शब्दस्तोममहानिधि

संस्कृताभिधानम्

कलिकाता-संस्कृतविद्यामन्दिराध्यापकेन

श्रीतारानाथ-तर्कवाचस्पति-भट्टाचार्येण

सङ्कलितम्

तेनैव परिशोधितञ्च

द्वितीय संस्करणम्

कलिकातानगरे

वीडनयन्त्रे

मुद्रितम्

इं १८७६

सांकेतिकशब्दसङ्केतज्ञापनम् ।



सङ्केत	सङ्केतबोध्य	२त०	द्वितीयातत्पुरुषः
पु०	पुंल्लिङ्गः	३त०	तृतीयातत्पुरुषः
स्त्री०	स्त्रीलिङ्गः	५त०	पञ्चमीतत्पुरुषः
न०	नपुंसकलिङ्गः	६त०	षष्ठीतत्पुरुषः
ए०स्त्री०	अनपुंसकलिङ्गः	७त०	सप्तमीतत्पुरुषः
पु०न०	उभयलिङ्गः	ब०	बहुव्रीहिसमासः
न०स्त्री०	अपुंल्लिङ्गः	द्वाक०	द्वाकपार्थिवादितत्पुरुषः
त्रि०	त्रिलिङ्गः	उप०	उपपदसमासः
अव्य०	अव्ययम्	मयू०	मयूरव्यंसकादि
स०	समासः	प्रा०	प्रादिसमासः
त०	तत्पुरुषः	उपमि०	उपमितसमासः

संकेत	संकेतबोध्य	संकेत	संकेतबोध्य
न०त०	नञ्तत्पुरुषः	स्वादि०	स्वादिगणीयः
कर्म्म०	कर्म्मधारयः	तुदा०	तुदादिगणीयः
द्वि०	द्विगुसमासः	रुधा०	रुधादिगणीयः
अव्ययी०	अव्ययीभावः	तना०	तनादिगणीयः
ब	बहुव्रीहिः	क्र्या०	क्र्यादिगणीयः
३ब०	तृतीयान्तान्यपदार्थबहुव्रीहिः	चुरा०	चुरादिगणीयः
५ब०	पञ्चम्यन्तान्यपदार्थबहुव्रीहिः	अद०	अदन्त
६ब०	षष्ठ्यन्तान्यपदार्थबहुव्रीहिः	पर०	परस्मैपदी
७ब०	सप्तम्यन्तान्यपदार्थबहुव्रीहिः	आत्म०	आत्मनेपदी
म०ब०	मध्यमबहुव्रीहिः	उभ०	उभयपदी
प्रा०ब०	प्रादयो धातुजबहुव्रीहिः	सक०	सकर्म्मकः
द्व०	द्वन्द्वसमासः	अक०	अकर्म्मकः
समा०	समासान्त	द्विक०	द्विकर्म्मकः
शाक०	शाकल्यादित्वात्परूपम्	द्विव०	द्विवचनान्तः
नि०	निपातनात्	ब०व०	बहुवचनान्तः
+	प्रातिपदिकम्	गौरा०	गौरादित्वात्
—	धातुः	ब्राह्म०	ब्राह्मणादित्वात्
भ्वा०	भ्वादिगणीयः	पृषो०	पृषोदरादित्वात्
अदा०	अदादिगणीयः	चतुर्व०	चतुर्वर्णादित्वात्
जुहो०	जुहोत्यादिगणीयः	व्री०	व्रीह्यादित्वात्
दिवा०	दिवादिगणीयः	सार्व०	सार्वविभक्तिकः

शब्दस्तोममहानिधिः ।



चिदात्मने नमः ।

अ

अ पु० अव्-ड । विष्णौ । अव्य० संबोधने, अधिक्षेपे, निषेधे च ।

अंश अदन्तचुरा० उभ० विभाजने । अंशय-ति ते आंशिश-त् त ।

अंश पु० अंश-भावेऽच् । विभागे, विभाज्ये, अवयवे, एकदेशे, विभाज्याङ्के, राशित्रिंशभागे च ।

अंशक पु० अंश-स्वुल् । ज्ञातौ, दायादे, राशित्रिंशभागे, दिने च । विभाजके त्रि० स्त्रियाम् अंशिका ।

अंशल त्रि० अंश+लच् बलवति । [स्त्रियाम् अंशिनी ।

अंशिन् त्रि० अंश-णिनि । भागकारके, अवयविनि, ज्ञातौ च ।

अंशु पु० अंश-कुगंकु । किरणे, प्रभायाम्, वेगे, स्वल्पादिस्वल्पांशे च ।

अंशुक क्ली० अंशु+क । वस्त्रे, सूक्ष्मवस्त्रे, गुह्यवस्त्रे, उत्तरीये च ।

अंशुधर पु० अंशुधारि-अच् ईत० । सूर्य्ये । वेगधरे त्रि० स्त्रियामंशुधरा ।

अंशुपति पु० अंशु-पति ईत० । सूर्य्ये । [स्त्रियामंशुमती ।

अंशुमत् पु० अंशु+मतुप्+ङीप् । सूर्य्ये । वेगवति अंशुमति च त्रि०

अंशुमत्फला स्त्री० अंशुमत् फलं यस्याः । कदलीवृक्षे ।

अंशुमती स्त्री० अंशु+मतुप् । [illegible] सालपर्णीवृक्षे सालपाण इति ख्याते । अंशुविशिष्टायां स्त्रियाम् ।

अंशुमाला स्त्री० अंशु-माला ६त० । किरणजाले ।
अंशुमालिन् पु० अंशु-माला+इनि । सूर्य्ये । किरणजालवति त्रि० [illegible]मालिनी ।
अंशुहस्त पु० अंशु[illegible]हस्त यस्य ब० । सूर्य्ये ।
अंस अदन्तचुरादि० उभ० विभाजने । अंसय-ति ते । [च पु० ।
अंस क्ली० पु० अंस् अच् । स्कन्धे । अंस-अच् । विभाज्ये, अवयवे
अंसकूट पु० अंस-कूट ६त० । ककुदे, राजन्योऽंसकूटकथन-मटुरिति प्रौढिवचनोदयः ।
अंसल त्रि० अंस+लच् । बलवति ।
अंह चुरा० उभय० भाषने । अंहय-ति ते आङ्+अंह-तृ-त ।
अंह भ्वादि० आत्म० गतौ । अंहते । आंहिष्ट ।
अंहति स्त्री० अंह-अति, न-हन् क्तिन् वर्णविपर्य्ययः इति वा । त्यागे, रोगे च । अंहतीच ।
अंहस् क्ली० अंह-असि । पापे ।
अंहि पु० अंह-क्रि । पदे, वृक्षमूले च ।
अंहिप पु० अंहिणा पिबति अंहि-पा-ड । वृक्षे ।
अंहिस्कन्ध पु० अंहि[illegible]स्कन्ध ६त० । गुल्फे ।
अक वक्रगतौ भ्वादि० घटादि पर० । अकति आकीत् । अकयति ।
अक दृदित् भ्वादि० चिक्कारणे आत्मने० । अङ्कते ।
अक क्ली० कं सुखं न० त० । पापे, दुःखे च ।
अकच पु० न-कच बहु० । केतुग्रहे । केशशून्ये त्रि० ।
अकरणि स्त्री० न-कृ-अनि । आक्रोशभेदे, पापे च । [त्रि०
अकरा स्त्री० न-कृ-अच् । आमलकीवृक्षे । कररहिते, कर्त्रभिन्ने च
अकर्कश त्रि० न-कर्कशः न०त० । कोमले, कार्कश्यरहिते च ।
अकर्ण त्रि० न कर्ण बहु० । बधिरे, कर्णरहिते च ।
अकर्त्तन पु० न-कर्त्तन बहु० । वामने खर्व्वे च ।
अकर्म्मण्य त्रि० कर्म्मन्+य-त्र न०त० । कर्म्मायोग्ये ।
अकर्म्मन् त्रि० न-कर्मन् बहु० । कार्य्यादिमे ।

अकल्कन (क) त्रि० न-कल्कन (क) बहु०। दम्भरहिते त्रि०।
अकल्का स्त्री० न-कल्क बहु०। ज्योत्स्नायाम्। दम्भरहिते
अकल्य त्रि० कलासु साधुः कला+यत् न० त०। रोगिणि।
अकस्मात् अव्यये न-कस्मात् न० त०। हठात्कारे, आयन्तुके च
अकाण्ड पु० न-काण्ड न० त०। असमये, अनवसरे च। न
काण्डः (स्तम्बः सायको वा यस्य) बहु०। तत्शून्ये त्रि०।
अकाण्डे अव्य० न-काण्डे न० त०। असमये, अनवसरे च। [त्रि०
अकाम पु० कम-घञ् न० त०। अनिच्छायाम्। ब० कामरहिते
अकामतः अव्य० अकाम-तसिल्। अनिच्छाहेतुतः।
अकाय पु० न-काय ब०। राहौ। देहशून्ये त्रि०।
अकार पु० अ+कार। अ-स्वरूपवर्णे। कारः क्रियान-कारो यस्य
ब०। कर्मशून्ये त्रि०।
अकारण न० न-कारण न० त०। कारणभिन्ने। न-कारण-
(उद्देश्य, हेतु) ब० निष्प्रयोजने, हेतुशून्ये च त्रि०।
अकार्य्य न० न-कृ-ण्यत् न० त०। द्यूतक्रियाचौर्य्यसाहसादौ दुष्ट-
कर्म्मणि। ब० कार्य्यशून्ये त्रि०।
अकाल पु० न-काल न० त०। असमये, शुक्लाद्यादिनिमित्तकव्रता-
द्यकरणायोग्ये काले। कृष्णवर्णभिन्ने त्रि०।
अकालजलदोदय पु० अकाले जलदानामुदयः तत्पु०। कुज्झ-
टिकाम्। असमये मेघानामुदये च। [च।
अकिञ्चन त्रि० न-किञ्चन मयूरव्यंसकादि त० दरिद्रे, निर्द्धने
अकिञ्चनता स्त्री० अकिञ्चन+ता। परिग्रहत्यागे, दारिद्र्ये च।
अकिञ्चिज्ञ त्रि० न-किञ्चित्-ज्ञा-क। अल्पज्ञाने, ज्ञानशून्ये च।
अकिञ्चित्कर त्रि० न-किञ्चित्कृ-अच्। अकर्मण्ये, क्रियाशून्ये,
निष्प्रयोजने च।
अकुण्ठ त्रि० न-कुण्ठा ब०। अकुण्ठिते, प्रतिभायुक्ते, कार्य्यदक्षे च।
अकुतोभय त्रि० न-कुतः-भय-मयूरव्यंसकादि त०। भयशून्ये।
अकुप्य न० गुप्-यत् कस्य गः न० त०। स्वर्णरूप्ययोः।

अकूपार पु० न-कूप-क-अण् कच्छपे। न-कुप्-अण् दीर्घः। महापारे,-समुद्रे,-दूरपारे-त्रयर्थे च।

अकूवार पु० न-कु-ह-अण् दीर्घः। समुद्रे त्रयर्थे च।

अकृत्य न० न-कृ-क्यप् न०त०। अकार्य्ये चौर्य्यादिदुष्कर्मणि च। कर्मशून्ये त्रि०। [स्वयं पक्के नीवारादौ।

अकृष्टपच्य त्रि० न कृष्टे कर्षणे पच्यते पच्-यत्। कृष्यादिकं विना

अकृष्णकर्मन् त्रि० न-कृष्ण-कर्मन् ब०। अदुष्टाचारे पुण्यशीले।

अकौशल न० कुशलस्य भावः कुशल+अण् न० त०। अपाटवे। बहु०। पाटवशून्ये त्रि०।

अक्का स्त्री० अक-कनृ। मातरि।

अक्त त्रि० अन्ज-क्त। कृताञ्जने, परिक्षिप्ते, व्याप्ते, संकुले च।

अक्रम त्रि० न-क्रम ब०। क्रमशून्ये, यौगपद्ये पादशून्ये च।

अक्रान्ता स्त्री० न क्रम-क्त। दुष्टस्त्याम्। क्रान्तभिन्ने त्रि०।

अक्रूर पु० न-क्रूर न० त०। यदुवंशीयनृपभेदे क्रूरभिन्ने त्रि०।

अक्रोध पु० क्रुध-घञ् न०त०। कोपनिवृत्तौ। ब०। कोपशून्ये त्रि०

अक्त व्याप्तौ संहतौ च स्वादिगणीयः स्वादिस्व पर०। अक्नोति अक्तति।

अक्त न० अक्त-अच्। इन्द्रिये; क्षाथोद्भवरसाञ्जने, (धुना) सर्ज्जर-सक्षारे। अक्त-घञ् पु०। द्यूतसाधने पाशकादौ, घोड़शमाधकमानरूपे कर्षे, रथावयवे चक्रे, क्रयविक्रयचिन्तायाम्, त्रिभीतकवृक्षे यण्ड्रा इति ख्याते, सर्पे, शकटे, विवादविज्ञाततत्त्वे, रुद्राक्षे, जपमालायाञ्च।

अक्तक त्रि० अक्त-खुल्। पाशकादिक्रियाकारिणि, व्यापके च।

अक्षत न० क्षण्-क्त-न त०। यवे, क्षतरहिते च लाजेषु पु० ब०व०।

अक्षदर्शक पु० अक्त-दृश्-ण्वुल्। द्यूतकारिणि। व्यवहारादिदर्शिनि त्रि०। स्त्रियाम् अक्षदर्शिका।

अक्षदृश् पु० अक्त-(व्यवहार) दृश-क्विप्। व्यवहारनिर्णेतरि। द्यूतदर्शके त्रि०।

अक्षदेविन् त्रि० अक्ष-दिव--णिनि । द्यूतकारिणि स्त्रियाम् अक्षदेविनी ।

अक्षद्यू त्रि० अक्ष-दिव-क्विप् । पाशकादिक्रियाकारिणि, स्त्रीत्वे अक्षद्यु ।

अक्षधुरा स्त्री० अक्ष-(चक्र) धुर्-(अग्र) ६त० । चक्राग्रे ।

अक्षधूर्त्त पु० धुर्व-क्त अक्ष-धूर्त्त ७त० । द्यूतकारिणि, शाखोट-इति प्रसिद्धे वृक्षे च ।

अक्षधूर्त्तिल पु० अक्ष-(शकट) धुर्व-तिल । वृक्षे ।

अक्षपटिक पु० अक्ष-(व्यवहार) पट-ठक् । व्यवहारनिर्णेतरि ।

अक्षपाद पु० अक्ष-(चक्षुः) पाद् ब० । गौतमे (न्यायदर्शनप्रवर्त्तक-मुनौ) । अक्ष-(चक्र) पाद् (अवयव) ६त० । चक्राङ्गे ।

अक्षम त्रि० क्षम-अच् न० त० । अशक्ते । ब० । क्षमारहिते ।

अक्षमा स्त्री० क्षम अङ् न० त० । ईर्ष्यायाम्, असहने च ।

अक्षमाला स्त्री० अक्ष-माला ६त० । जपमालायाम् । [त्रि० ।

अक्षय पु० न० क्षि-अच् । क्षयाभावे । ब० । नाशरहिते, क्षयशून्ये च

अक्षया स्त्री० सोमवारे अमावास्यातिथौ, रविवारे सप्तम्यां, कुजवारे चतुर्थ्यां च । वैशाखशुक्लतृतीयायामपि ।

अक्षय्य न० अक्षयाय हितम् अक्षय+यत् । श्राद्धीये देये घृतमधु-युक्ते जले, अक्षयधर्म्मे च । [ब्रह्मणि न० ।

अक्षर पु० क्षर-अच् न० त० । अकारादिवर्णे । नाशशून्ये त्रि० ।

अक्षरचण (न) त्रि० अक्षरेण वित्तः अक्षर+चण (न) । लेखके ।

अक्षरचुञ्चु त्रि० अक्षरेण वित्तः अक्षर+चुञ्चु । लेखके ।

अक्षरजीवक त्रि० अक्षर-जीव-ण्वुल् । वर्णलेखनोपजीविनि, स्त्रियाम् अक्षरजीविका ।

अक्षरजीविन् त्रि० अक्षर जीव-णिनि ३त० । वर्णलेखनोपजीविनि, स्त्रियाम् अक्षरजीविनी । [न्यादौ ।

अक्षरतूलिका स्त्री० अक्षर-तूलिका ६त० । वर्णलेखनद्रव्ये लेख-

अक्षरवाट पु० न क्षरतीति अक्षरः वट-वेष्टने घञ् । वाङ्मयुद्भभूमौ ।

अक्षरसंस्थान न० अक्षर-संस्थान ६त० । वर्णविन्यासे । बहु० ।

लिप्यादौ च । [स्त्रियामपि

अक्षवती स्त्री अक्ष+मतुप् वत्वम् । अक्षक्रीड़ायाम् । अक्षविशिष्ट-

अक्षवित् त्रि० अक्ष-विद-क्विप् । द्यूतज्ञे, व्यवहाराभिज्ञे च ।

अक्षशौण्ड पु० अक्ष-शौण्ड ७त० । द्यूतदक्षे ।

अक्षसूत्र न० अक्ष सूत्र ६त० । जपमालासूत्रे, यज्ञसूत्रे, उपवीते च ।

अक्षाग्रकीलक अस्त्री० अक्ष (चक्र) अग्र-कीलक ६त० । चक्राग्र-स्थापिते शङ्कौ ।

अक्षान्ति स्त्री क्षम-क्तिन् न०त० । ईर्ष्यायाम् । ब० । क्षमारहिते त्रि० ।

अक्षारलवण न० क्षारलवण न०त०, ब० वा । क्षारलवणभिन्ने सै-न्धवे, सामुद्रे च । गोक्षीरं गोघृतञ्चैव धान्यं सुद्गास्तिला यवाः । सामुद्रं सैन्धवञ्चैव अक्षारलवणं स्मृतमिति स्मृतिपरिभाषितेऽपि ।

अक्षि न० अक्ष-क्सि । चक्षुषि । [कोचित् ।

अक्षिकूटक न० अक्षि-कूटक, ६त० । चक्षुर्गोलके तत्तारकायामिति

अक्षिगत त्रि० अक्षिविषयं गतः प्राकृपार्थिवादि त० । द्वेष्ये, रिपौ च ।

अक्षिभेषज पु० अक्षि-भेष (रोग) जि-ड । लोध्रविशेषे ।

अक्षिव न० क्षिव-क न०त० । सामुद्रलवणे ।

अक्षिविकूणित न० अक्षि-वि-कूण-क्त । अपाङ्गदर्शने कटाक्षपाते च

अक्षीव पु० क्षीव-क, न० त० । सामुद्रलवणे । क्षीवो मत्तो न०त० । मत्तभिन्ने त्रि० ।

अक्षोट पु० अक्ष-ओट, अक्षस्येव विभीतकस्येव, उटानि पर्णान्यस्येति वा । पार्व्वतीयपीलुवृक्षे आखरोट इति प्रसिद्धे ।

अक्षोड पु० अक्ष-ओड । पार्व्वतीयपीलुवृक्षे । [रहिते त्रि० ।

अक्षोभ पु० क्षुभ-घञ् न०त० । हस्तिबन्धनस्तम्भे । बहु० । क्षोभ-

अक्षौहिणी स्त्री अक्ष (शकटादि) जहि-णिनि । संख्याविशेषयुक्तरथा-दिसेनायाम् । तत्संख्या च २१८७ हस्तिनः । २१८७ रथाः । ६५६१० अश्वाः । १०९३५० पदातयः ।

अखट्ट पु० खट्ट-अच् न०त० । पियालवृक्षे पियासाल ख्याते ।

अखट्टि स्त्री खट्ट-इ न०त० । अशिष्टव्यवहारे । अखट्टी च ।

अखण्ड त्रि० खड़ि-घञ् न० त०। संपूर्णे, सकले। खण्डभिन्ने पु० न०।
अखण्डन पु० खड़ि ल्युट् न० त०। काले। खण्डनशून्ये त्रि०।
अखण्डित त्रि० खड़ि क्त न० त०। सम्पूर्णे खण्डितभिन्ने च।
अखात न० खन-क्त न० त०। देवखाते, मनुष्यादिखाते च। खात-
भिन्ने त्रि०। [खादौ, भक्ष्यभिन्ने च।
अखाद्य त्रि० खाद-अर्हार्थे ण्यत् न० त०। भोजनानर्हे गोमां-
अखिल त्रि० न खिल्यते न क्षण्यते आदीयते इति खिल-क न० त०।
समग्रे। खिलाभिन्ने कृष्टभूम्यादौ स्त्री०।
अग इदित् गतौ भ्वादि० पर०। अङ्गति। आङ्गीत्।
अग वक्रगतौ भ्वादि० पर० घटादि। अगति आगीत्। अगयति।
अग पु० न गच्छतीति गम-ड न० त०। वृक्ष, पर्व्वते, सूर्य्ये च।
गमनाकर्त्तरि मूढादौ त्रि०।
अगच्छ पु० गम-श न० त०। वृक्षे।
अगति स्त्री गम-क्तिन् न० त०। उपायाभावे। बन्धु०। गतिशून्ये
उपायशून्ये च त्रि०। [अकथने च त्रि०।
अगद पु० नास्ति गदो रोगो यस्मात् ५ब०। औषधे। ६ब०। रोगशून्ये
अगदङ्कार पु० अगदं करोति अगद-कृ-अण् सुम् च। वैद्ये।
अगम पु० न गच्छतीति गम-अच् न० त०। वृक्षे। अगन्तरि त्रि०।
अगम्य त्रि० न-गन्तुमर्हति गम-यत् न० त०। गमनानर्हे, अन्त्य-
जातिस्त्रियाञ्च स्त्री०। [देवताड्वृक्षे। विषहारिणि द्रव्यमात्रे त्रि०
अगरी स्त्री० नास्ति गरो विषो यस्याः ५ब० ङीष्। मूषिकविषहारिणि
अगरु न० न गिरति गॄ-उ न० त०। अगुरुचन्दने खनामप्रसिद्धे।
अगस्ति पु० अगं विन्ध्याचलम् अस्यति अग-अस्-ति अकन्वादि०।
अगस्त्यनामके मुनौ।
अगस्तिद्रु पु० अगस्तिप्रियः द्रुर्वृक्षः शाक० त०। वकवृक्षे।
अगस्ती स्त्री अगस्तिनिवासत्वात् दक्षिणस्यां दिशि।
अगस्त्य पु० अगं विन्ध्याचलं स्त्यायति स्तम्भाति स्त्यै-क। अगस्त्य-
नामके मुनौ।

अगाध त्रि० गाध प्रतिष्ठायाम् गाध-घञ् न-त० । अतिगभीरे । छिद्रे न० ।

अगाधजल पु० अगाध-जल-७त० । अतिगभीरजले ह्रदे ।

अगार न० अगम् न गच्छन्त्यत्र छदि प्रापोति अग-ऋ-अण् । गृहे ।

अगु पु०न गौः किरणो यस्य । राहौ । किरणशून्ये, गोशून्ये च त्रि०

अगुरु न० न गुरुर्यस्मात् । अगुरुचन्दने खनामप्रसिद्धे, शिंशपा-(शिशु) वृक्षे च । गुरुभिन्ने, उपदेशकशून्ये च त्रि० ।

अगुरुशिंशपा स्त्री अगुरुःसारो यस्याः तादृशी शिंशपा मध्यपदलोपि त० । शिशु इति प्रसिद्धे शिंशपावृक्षे । [द्रव्यमात्रे त्रि० ।

अगूढ़गन्ध न० न-गूढो गन्धो यस्य ब० । छिङ्गुद्रव्ये । अगुप्तसौरभे

आनायी स्त्री अग्नि+ऐङ्-ङीप् । अग्नेर्योपिति स्वाहाख्यायाम् ।

अग्नि पु० अङ्गति ऊर्द्धं गच्छति अगि-नि नलोपः । अग्नौ खनामप्रसिद्धे तेजोभेदे ।

अग्निक पु० अग्निवत् कायति प्रकाशते कै-क । इन्द्रगोपकीटे ।

अग्निकण पु० अग्नि-कण इ त० । अग्निच्युतक्षुद्रांशे ।

अग्निकारिका स्त्री अग्नि-कारिका इत० । अग्निकृत्ये होमाधानादौ, अग्नुद्दीपकौषधिभेदे च ।

अग्निकार्य्य न० अग्नि-कार्य (कृ ण्यत्) इत० । अग्निकृत्ये होमाधानादौ

अग्निकाष्ठ न० अग्नेः (उद्दीपनाय) काष्ठम् तादर्थ्यषष्ठ्या त० । अगुरुकाष्ठे । [व्याघ्रनखपुङ्खे गुड़ा इति ख्याते ।

अग्निकुक्कुट पु० अग्नेः कुक्कुट इव रक्तवर्णस्फुलिङ्गत्वात् । ज्वलदग्नि-

अग्निकोण न० अग्नेः कोणः इत० । पूर्व्वदक्षिणयोर्मध्ये दिग्भागे तस्य वह्निदैवत्यप्रसिद्धेः । [प्रसिद्धे काचे च ।

अग्निगर्भ पु० अग्निर्गर्भे यस्य ब० । सूर्य्यकान्तमणौ आतसीति

अग्निचयन पु० अग्निश्चीयतेऽनेन चि-ल्युट् । मन्त्रभेदे, काष्ठे च ।

अग्निचित् पु० अग्निं चितवान् चि-भूतार्थे क्विप् । मन्त्रपूर्व्वकक्रतवह्निस्थापने अग्निहोत्रिणि । [जातद्रव्ये त्रि० ।

अग्निज पु०अग्नि-जन-ड । अग्निजारवृक्षे । स्वर्णे न० । अग्नि-

अग्निजात पु० अग्नेर्जातः जन-क्त । अग्निजारवृक्षे स्वर्णे न० । वह्निजातमात्रे त्रि० ।

अग्निजार पु० अग्निं जारयति जॄ-णिच्-अण् । अग्निजारनामकवृक्षे ।

अग्निजाल पु० अग्निं जारयति जॄ-णिच्-अण् लत्वम् । अग्निजारवृक्षे ।

अग्निजिह्वा स्त्री अग्नेर्जिह्वेव । जाङ्घीवृक्षे । हृत० । अग्निजिह्वायाम् । अग्निर्जिह्वा येषां ब० । देवे हृत० । अग्निशिखायाम् ।

अग्निज्वाला स्त्री अग्नेर्ज्वालेव । गजपिप्पलीवृक्षे । [कङ्कतभेदे ।

अग्निदमना स्त्री अग्निं दमयतीति दमि-ल्यु । गणिकारीनाम-

अग्निदेवता स्त्री अग्निर्देवो यस्याः । कृत्तिकाख्यतारायां तस्या अग्नि-दैवतत्वात् । अग्निदैवतमात्रे त्रि० ।

अग्निनिर्य्यास पु० अग्नेर्निर्यासः (चीरवत् निष्यन्दः) । उपचारात् तज्जाते अग्निजारवृक्षे । स्वर्णे न० ।

अग्निप्रस्तर पु० अग्निं प्रस्तृणाति स्तृ-अच् अग्नेर्वा प्रस्तरः । चक्-मकीति ख्यातेऽग्न्युत्पादके प्रस्तरखण्डे ।

अग्निबाहु पु० अग्नेर्बाहुरिव दीर्घशिखत्वात् । धूमे ।

अग्निभ न० अग्निरिव भाति भा-क । स्वर्णे । अग्निवत् प्रकाशवति त्रि०

अग्निभू पु० अग्नेर्भवति भू-क्विप् । कार्त्तिकेये । स्वर्ण न० । अग्नि-जातमात्रे त्रि० ।

अग्निमणि पु० अग्ने-र्मणिः । अग्निसाधने आतशीति प्रसिद्धे काचे । सूर्य्यकान्ते मणौ च ।

अग्निमथन पु० अग्नये मथ्यतेऽसौ मन्थ-ल्युट् नलोपः । गणियारीति ख्याते गणिकारीवृक्षे । तत्काष्ठयोर्घर्षणे हि झटिति वह्निरुद्दी-प्यते अग्निमन्थनमन्त्रे च ।

अग्निमन्थ पु० अग्नये मथ्यतेऽसौ मन्थ अच् । गणिकारीवृक्षे ।

अग्निमारुति पु० अग्निमारुत+इञ् । तुल्य कल्पभेदे अग्निवायुरूप-योर्देवयोः पुत्रे अगस्त्यमुनौ ।

अग्निमुख पु० अग्निर्मुखमिव यस्य । देवे, हुतद्रव्यं हि देवैरग्निद्वा-रेणैवाश्नते । अग्निर्मुखे यस्य तस्मिन् । विप्रे, यागरूपाग्नेरास्य

मुखे स्थितत्वात् । अग्निर्मुखः प्रधानमुपास्यो यस्य तस्मिन् वा । विप्रे । अग्नेर्मुखे तु न० ।

अग्निमुखी स्त्री० अग्निरिव मुखमस्यं यस्याः गौरादित्वात् ङीष् । (भेखा) भल्लातकवृक्षे, पाकशालायाम्, गायत्रीमन्त्रे च ।

अग्निरक्षण न० अग्निः रक्ष्यतेऽनेन रक्ष-ल्युट् । राक्षसादिभ्योऽग्नि-रक्षाकारके मन्त्रभेदे, अग्निहोत्रे च ।

अग्निरजस् पु० अग्निरिव रज्यते दीप्यते रञ्ज अस् नलोपः । रक्त-वर्णे इन्द्रगोपनामककीटे । अग्निवीर्य्ये, स्वर्णे च । [प्रिये त्रि० ।

अग्निवल्लभ पु० अग्नेर्वल्लभः सुखेन दाह्यत्वात् । सालवृक्षे । अग्नि-

अग्निवाह पु० अग्निं वाहयति गमयति बोधयति वा वाहेः अण् धूमे, छागे च । वह्निवाहकमात्रे त्रि० ।

अग्निवित् पु० अग्निं विन्दते विन्द-क्विप् । अग्निहोत्रिणि साग्निके ।

अग्निवीज न० अग्नेर्बीजम् तद्वीर्य्यजातत्वात् उपचारात् । स्वर्णे, वह्नि-रेतसि च ।

अग्निवीर्य्य न० अग्नेर्वीर्य्यं, तद्वीर्य्यजातत्वादुपचारात् स्वर्णे वह्निरेतसि, तत्पराक्रमे च । ब० । अग्नितुल्यपराक्रमवति त्रि० ।

अग्निशिख पु० अग्निरिव शिखा यस्य । कुङ्कुमवृक्षे, कुसुम्भवृक्षे, अग्नि-तुल्यशिखे जाङ्गलीवृक्षे च । अग्नितुल्यजटावति त्रि० ।

अग्निशेखर पु० अग्निरिव शेखरमस्यं यस्य । कुङ्कुमवृक्षे कुसुम्भवृक्षे जाङ्गलीवृक्षे च । अग्नितुल्याग्रवति त्रि० ।

अग्निष्टोम पु० अग्नेः स्तोमं स्तुतमन्त्वम् । यागविशेषे ।

अग्निष्ठ पु० अग्नौ स्थातुमर्हति स्था-क षत्वम् । वह्नौ स्थितियोग्ये लौहमये कटाहादिपात्रे । [सम्भूतमात्रे त्रि० ।

अग्निसम्भव पु० अग्निरिव सम्भवति भू-अच् । अरण्यकुसुम्भे । अग्नि-

अग्निसहाय पु० अग्निना सह अयते अय-अच् ३तः । वायौ, अग्निसहायधूमवद्वेगवत्त्वात् शीघ्रगतित्वाच्च तथात्वम् ।

अग्निसार न० अग्नौ सारो यस्य अत्यन्ताग्नावुत्तापनेऽपि सारांशा-दहनात् । रङ्गाङ्गने । अग्नेर्मध्ये तु अस्त्री० ।

अग्निवात्त (वात्त) पु० ब०ब० अग्नितः (आहीयविप्रकररूपाग्नेः) वात्तं आत्तं ग्रहणं येषां आ+दा-क्त पत्वनिति बहुव्रः। मरीचिपुत्रे पितृगणविशेषे।

अग्निहोत्र पु० अग्नये-हूयतेऽत्र हु-त्र ४त०। मन्त्रकरणकवह्निस्थापनपूर्वकहोमादौ। अग्निहोत्रसंबन्धित्वात् वह्नौ च।

अग्निहोत्रिन् त्रि० अग्निहोत्र+इनि। अग्निस्थापनपूर्वके सायंप्रातरादिकाले होमकर्त्तरि साग्निके। [नमन्त्रे।

अग्नीध् पु० अग्नरिध्यतेऽनेन अग्नि-इन्ध-क्विप्। अग्निप्रज्वालनकारके ब्रह्मापरपर्य्याये ऋत्विग्भेदे। अग्निं धारयत्यत्र अग्निधृत्यादि धृ-क। अग्निक्रत्ये, होमादौ च।

अग्नीन्धन त्रि० अग्निरिध्यतेऽनेन अग्नि-इन्ध-ल्युट्। मन्त्रभेदे। स्त्रियां टित्त्वात् ङीप्। भावे ल्युटि। अग्निक्रत्ये न०।

अग्न्याधान न० अग्नेराधानम् आ-धाञ्-ल्युट् ६त०। वेदमन्त्रद्वारा वह्निस्थापने। बहु०। अग्निहोत्रयागे।

अग्न्यागार पु० अग्नेरागारः अग्नि-आ-गृ-घञ् ६त०। वेदमन्त्रद्वारा वह्निस्थापनयोग्ये गृहे, तदाधारे-कुण्डे, स्थण्डिले च।

अग्न्याहित पु० अग्निराहितो येन अग्नि-आ-धाञ् कर्म्मणि क्त, वा परनिपातः अग्निहोत्रिणि साग्निके।

अग्न्युत्पात पु० अग्निना कृत उत्पातः (अग्निसूचकोपद्रवः) उत्-पत-घञ् ३त०। आकाशस्थाग्निकृतविकारसूचितोपद्रवे, उल्कापाताद्यशुभसूचके, धूमकेतुकृतविकारे च।

अग्न्युपस्थान त्रि० अग्निरुपस्थीयतेऽनेन अग्नि-उप-स्था-ल्युट् ३त०। वह्निरुपस्थानमन्त्रे। स्त्रियां ङीप्। ३त०। वह्निरुपस्थाने न०।

अग्र न० अञ्च-रक् नलोपः। उपरिभागे, शेषभागे, आलम्बने, पूर्वभागे, फलपरिमाणे, समूहे च। प्रधाने, अधिके, प्रथमे च त्रि०। [कर्म०। देहपूर्वभागे।

अग्रकाय पु० अग्रः कायः अवयवावयविनोरभेदात् कर्म्मधा० वत्

अग्रग त्रि० अग्रे गच्छतीति अग्र–गम–ड ७त० । प्रथमगामिनि ।
स्त्रियामग्रगा । [प्रधाने च ।
अग्रगण्य त्रि० अग्रे गण्यते अग्र–गण यत् ७त० । अग्रगणनीये,
अग्रगामिन् त्रि० अग्रे गच्छति अग्र–गम–णिनि ७त० । अग्र-
सरे । स्त्रियामग्रगामिनी ।
अग्रज पु० अग्रे जायते अग्र–जन–ड । ज्येष्ठभ्रातरि । अग्रजात-
मात्रे त्रि० । ज्येष्ठभगिन्यां स्त्री० । [जङ्घाग्रभागे ।
अग्रजङ्घा स्त्री० अग्रा जङ्घा अवयवावयविनोरभेदात् क० स० ।
अग्रजन्मन् पु० अग्रे जन्म यस्य अग्र जन् मनिन् व्यधि० वहु० ।
ज्येष्ठभ्रातरि, विप्रे च । अग्रजातमात्रे त्रि० ।
अग्रजात पु० अग्रे जातः अग्र–जन् क्त ७त० । ज्येष्ठभ्रातरि, विप्रे
च । ज्येष्ठभगिन्यां स्त्री० । पूर्वजातमात्रे त्रि० ।
अग्रजाति पु० अग्रा श्रेष्ठा जातिर्यस्य, अग्र-जन-क्तिन् । विप्रे ।
अग्रजिह्वा स्त्री० अग्रा जिह्वा अग्रहस्तवत् क० । जिह्वा-
ग्रभागे । [श्रेष्ठे च ।
अग्रणी त्रि० अग्रे नीयतेऽसौ अग्र नी क्विप् णत्वम् । प्रभौ
अग्रतस् अव्य० अग्रे अग्राद्वा अग्र-तसिल् । पूर्वभागे, पूर्वभागा-
वधिके च । [अग्रगामिनि । स्त्रियां ङीप् ।
अग्रतःसर त्रि० अग्रतः सरति गच्छति अग्रतस् सृ–ट ७त० ।
अग्रदानिन् पु० अग्रे दानं यस्य अग्र–दान+इनि । प्रेतोद्देशेन
यद्दानं दीयते तत्प्रतिग्राहिणि अग्रदानीति ख्याते विप्रे ।
अग्रनख अङ्गी० अग्रं नखं अग्रहस्तवत् क० । नखाग्रे ।
अग्रनासिका स्त्री० अग्रा नासिका अग्रहस्तवत् क० । नासिकाग्र-
भागे । [गीति ख्याते छन्दे ।
अग्रपर्णी स्त्री० अग्रे पर्णं यस्याः जातित्वात् ङीप् आलुक्-
अग्रभाग पु० भज्यते इति भागः एकदेशः अग्रः पूर्वः भागः
भज–घञ् क० । आद्यावौ पथमसमृद्ध्यर्थे द्रव्ये अवयवस्य
अग्रदेशे च । यथा शरस्य अल्पाग्रम् ।

अग्रभुक् त्रि० अग्रे देवपित्रादिभ्योऽदत्त्वा भुङ्क्ते अग्र-भुज क्विप् ७त०। औदरिके।

अग्रमांस न० अग्रं प्रधानं भक्ष्यत्वेन मन्यते मनु-क, दीर्घः कर्म०। हृदयस्थे पद्माकारे (फुल्का) इति नामके मांसे केचित् व्युत्क्राम्य-मांसमेकं नामेत्याहुः। अग्रमास इति प्रसिद्धे रोगभेदे च।

अग्रमुख न० अग्रं मुखं अग्रहस्तवत् कर्म०। मुखाग्रे।

अग्रयान न० अग्रे यानं यस्य या-ल्युट् संज्ञात्वेऽप्यणत्वम्। पुरो-गामिनि सैन्ये। अग्रगामिमात्रे त्रि०। [प्रसिद्धे शाकभेदे।

अग्रलोहिता स्त्री० अग्रमुपरिभागः लोहितं यस्याः ब०। चिल्लीति

अग्रवीज पु० अग्रं शाखाग्रं बीजमुत्पादकं यस्य क्षिप्तायतदण्डखण्ड-कूढे कलम इति प्रसिद्धे काण्डजाते कुरण्टकादिवृक्षे।

अग्रसन्धानी स्त्री० अग्रे फलोत्पत्तेः प्राक् सन्धानं कार्य्यस्य ज्ञानं यस्या ङीप्। यमपञ्जिकायाम्। यत्र हि प्राणिवर्गस्य प्राग्भ-वीयकर्म्मानुसारेण शुभाशुभसूचनं सर्वं लिख्यते सा यमपञ्जिका, केचित् यमपट्टिकेति सा कथ्यते। अग्रसन्धानकारिणि तु त्रि०।

अग्रसन्ध्या स्त्री० अग्रं सन्ध्यायाः सर्व्वोऽप्येकदेशः कालवाचिना समा-स्यते इत्युक्तेः एक०त०। सन्ध्या पूर्वसमये। अग्रा पूर्वा सन्ध्या इति क०। प्रातःसन्ध्यायाम्। [स्त्रियां ङीप्।

अग्रसर त्रि० अग्रे सरति गच्छति अग्र सृ-ट ७त०। अग्रगामिनि।

अग्रह पु० ग्रहः (परिग्रहः) न०त०। परिग्रहाभावे। बहु०। परिग्रहशून्ये संन्यासिप्रभृतौ त्रि०।

अग्रहर पु० अग्रे ह्रियते दीयतेऽसौ अग्र-हृ-अच्। अपदेये वस्तुनि, भागाग्रे च। अग्र-हृ-ट। अग्रहारिणि तु त्रि०।

अग्रहस्त पु० अग्रः हस्तः अवयवावयविनोरभेदात् क०। हस्ताग्रे।

अग्रहायणः अस्त्री० ह्रस्व ओहिकालयोरिति काले वा हृ-ल्युट् युक् च भावं स्वभावं जहाति हायनो वर्षः अग्रः पूर्वः हायनः क० णत्वम्। मार्गशीर्षे मासि तस्य च वर्षादित्वम्

अमरकोषादौ मार्गादिमारभ्य कार्त्तिकान्तमासकीर्त्तनात् खण्ड-मत्रगतम् ।

अग्रहायणी स्त्री० अग्रूनि जहातीति हायनी जीहिः अग्राः श्रेष्ठा हायनाः शालयो यस्यां संज्ञात्वात् णत्वं गौरादित्वात् ङीप् । मृगशीर्षनक्षत्रे । तस्य च नक्षत्रस्य रात्रौ प्रथमसुद-यकाले श्रेष्ठव्रीहीणां धान्यानामुत्पत्तिर्लोके दृश्यते । तच्च नक्षत्रं सौराग्रहायणे मासि रात्रौ प्रथमसुदेति ।

अग्रहार पु० अग्रे ह्रियतेऽसौ हृ-घञ् । अग्रहरे (पूर्वोक्तेऽर्थे) ब्रह्मचारिणे देये क्षेत्रादौ च । अग्र-हृ-अण् । अग्रहारिणि । त्रि० । स्त्रियां ङीप् ।

अग्राह्य त्रि० न-ग्रह ण्यत् न०त०। ग्रहणायोग्ये शिवनिर्माल्यादौ प्रतिग्रहायोग्ये तिलाक्षतवर्णादौ च । [च त्रि०।

अग्रिम पु० अग्रे भवः अग्र+डिमच् । ज्येष्ठभ्रातरि । श्रेष्ठे उत्तमे

अग्रिय पु० अग्रे भवः अग्र+घ । ज्येष्ठभ्रातरि श्रेष्ठे उत्तमे च त्रि० ।

अग्रीय पु० अग्रे भवः अग्र+ख । ज्येष्ठभ्रातरि । श्रेष्ठे उत्तमे च त्रि० । [गामिनि ।

अग्रेगा त्रि० अग्रे गच्छति अग्र-गम-क्विप् अलुक्स० । अग्र-

अग्रेगू त्रि० अग्रे गच्छति अग्रे-गम-डू+अलुक्स० । अग्रसरे सेवके ।

अग्रेदिधिषू पु० दिधिं धैर्यं स्यति निरस्यति दिधिषूः विरुढा पुनर्भूः योषित् दिधि-सो कू-घत्वम् अग्रे प्रधाना दिधिषूर्यस्य अलुक्स० कबभावाहस्वत्वे । पुनर्भूविवाहकारिणि । निपा-तनात् अस्य ह्रस्वान्तताप्यिष्यते । प्रागूढकनिष्ठभगिन्या अनूढ-ज्येष्ठभगिन्यां च । ज्येष्ठायां ऊढायां कन्यायामूढेऽ-नुजा । सा चाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूः स्मृतेति म-नूक्तेः । एतत्पक्षे च अग्रे स्वविवाहात् पूर्वं दिधिषूः ज्येष्ठा-विवाहकालावहनद्धैर्यलोपकारिणी अनुजा यस्या इति विग्रहः ।

अग्रेवण न० अग्रे वनस्य ७त० अलुक्स० णत्वम् । वनाग्रदेशे ।

अग्रेसर त्रि० अग्रे सरति गच्छति अग्रे सृ-ट अलुक्स० ७त० । अग्रगामिनि स्त्रियां ङीप् । [च त्रि० ।

अग्र्य पु० अग्रे भवः अग्र+यत् । ज्येष्ठभ्रातरि । प्रधाने त्रि०

अङ्ग दृदित् गतौ भ्वादि० आत्मने० सक० सेट् । अङ्गते । आङ्गिट ।

अङ्ग पापकरणे अदन्तचुरादि० उभय० । अघयति-ते ।

अङ्ग न० चुरा० अघ अच् । पापे, व्यसने, दुःखे च ।

अघमर्षण त्रि० अघं पापं मृष्यतेऽनेन अघ-मृष-ल्युट् दीर्घ० । सर्वपापनाशार्थं जप्ये मन्त्रादौ । स्त्रियां ङीप् ।

अघोर पु० घुर्ण-क्विप् । न घोरः (शान्तः) न०त० । महादेवे । घोरभिन्ने त्रि० । भाद्रकृष्णचतुर्दश्यान्तु स्त्री० ।

अघोष पु० घुष-घञ् न० त० । वर्णोच्चारणबाह्यप्रयत्नविशेषे । स च खयां यमः खयः+क+पौ विसर्गः शर एव च । एते श्वासानुप्रदानाः अघोषाश्च विदुश्चते इति शिक्षोक्तदिशा खयादिवर्णानामुच्चारणप्रयत्नः ।

अघ्न्या पु० न हन्ति सृष्टिकर्त्तृत्वात् न-हन-यक् निपातनात् साधु । प्रजापतौ । न हन्यते स्त्रीहत्यायां निषिद्धत्वात् । स्त्रियां गवि तु स्त्री० ।

अङ्क (नृक) संख्याकरणे चिह्नयुक्तकरणे अदन्तचुरादि० उभ० सक० सेट् । अङ्कय-ति-ते आङ्किक-तृ-त । अङ्कापयति ते इति केचित् ।

अङ्क पु० अङ्क-घञ् । दृश्यकाव्यविशेषे अङ्क इति प्रसिद्धे नाटकपरिच्छेदे, पर्वते, चिह्ने रेखायां, युद्धभूषणे, समीपे च । क्रोडे तु अङ्की०

अङ्कति पु० अत् च (गतौ) अति कुत्वम् । वाते । पूजनार्थत्वे कर्म्मणि अति । अङ्कणि अग्नौ च । अग्निहोत्रिणि त्रि० । स्त्रियामू अङ्कतीर च । [मङ्कनी । चिह्नकरणमात्रे न० ।

अङ्कन त्रि० अङ्क ल्युट् । अङ्कनसाधनद्रव्ये दागनीति प्रसिद्धे स्त्रियां

अङ्कपालि (ली) स्त्री पा-अलि अङ्क- पालि दीर्घ० वा ङीप् । क्रोडप्रान्ते । अङ्केन पालयतीति अङ्क-पालि इ । उपमातरि (धाइमा) इति प्रसिद्धायाम् । अङ्कस्य पालिरिव त० । आलिङ्गने च ।

अङ्कपालिका स्त्री अङ्कपालि+क । धात्र्याम्, वेदिकायां, क्रोड़प्रान्तभागे, आलिङ्गने च ।

अङ्कस् न० अनृज-असुन् कुत्वम् । चिह्ने, शरीरे च ।

अङ्कित त्रि० अङ्क-क्त । चिह्निते, चिह्निते, कृतसंख्यायाञ्च ।

अङ्किन् त्रि० अङ्कः (आलिङ्गनस्थानत्वेन) अस्त्यस्य अङ्क+इनि । अङ्केनालिङ्ग्ये-ह्रदक्षादिवाद्यभेदे, क्रोड़विशिष्टे च स्त्रियामङ्किनी ।

अङ्कुर स्त्री अङ्क-उरच् । बीजादभिनवोत्पन्ने, मृत्तिकादिभ्यो जाते च तृणवृक्षादौ, जले च । शीघ्रमुत्पद्यते इति साधर्म्यात् रुधिरे, लोम्नि च

अङ्कुरक पु० अङ्क्यते यत्नेन सञ्चीयतेऽसौ अनृच-घुरच् ततः क । पक्ष्यादीनां वासस्थाने वासा इति ख्याते । [भेदे डाङण् इति ख्याते ।

अङ्कुश स्त्री अङ्क-उशच् । हस्तिचालनोपयोगिनि वक्राग्रे लौहास्त्र-

अङ्कुशदुर्द्धर पु० दुःखेन धार्य्यते व्यवस्थाप्यते दुर्-धारि खल् हस्तः अङ्कुश-दुर्धर ३त० । दुर्दान्तहस्तिनि ।

अङ्कूर पु० अङ्क-खर्जूरादित्वात् जरच् । अभिनवोत्पन्ने तृणवृक्षादौ ।

अङ्कूष स्त्री अङ्क जरच् । हस्तिचालनोपयोगिनि वक्राग्रे लौहमयेऽस्त्रभेदे

अङ्कोट (ठ) (ल) पु० अङ्क्यते लक्ष्यते कालकैः । अङ्क+ओट (ओठ) (ओल) । पीतवर्णसारे गन्धयुक्तपुष्पे दीर्घकण्टकयुक्ते रक्तवर्णफले आकोड़ इति ख्याते वृक्षे ।

अङ्कोलक पु० अङ्कोल+क । आकोड़ इति ख्याते वृक्षे ।

अङ्कोलसार पु० अङ्कोलस्य सारः ६त० । अङ्कोटवृक्षजाते विषभेदे ।

अङ्कोलिका स्त्री अङ्क-वल् अच् संप्रसारणे अङ्कोला+क । आलिङ्गनक्रियायाम् ।

अङ्क्य पु० अङ्के क्रोड़े स्थापयित्वा वाद्यतेऽसौ अङ्के साधुः । अङ्क यत् । सार्द्धतालत्रयायामं चतुर्हस्ताङ्गुलाननः । हरीतक्याकृतिर्यः स्यादङ्कोऽङ्के च हि वाद्यते इत्युक्तेः क्रोड़े स्थापनपूर्व्वकं वादनीये ह्रदक्षादौ । अङ्कनीये त्रि० ।

अङ्क् चिह्नयुक्तकरणे अदन्तचुरादि उभय० सकर्म्मक० सेट् अङ्कयति ते आङ्किङ-त् त । मतान्तरे अङ्कयन्ति ते ।

अङ्ग न० अङ्ग-अच् । देहे, अवयवे, प्रधाने, उपाये, मनसि च ।

अङ्गग्रह पु० अङ्ग ग्रह ६त० । देहवेदनायाम् ।

अङ्गज न० अङ्गात् जायते अङ्ग-जन-ड । रुधिरे । पुत्रे, कामे च पु० । देहजातमात्रे त्रि० ।

अङ्गण(न) न०अगि—गतौ अङ्गति गच्छति स्वल्पं स्वल्पं गच्छति अत्र अङ्ग-ल्युट पृषोदरादित्वात् वा णत्वम् । (उठान) इति प्रसिद्धे प्राङ्गणे ।

अङ्गति पु०अनक्ति यात्यनेन करणेन । अनज-अति क्वुत्वम् । वाहने । अज्यते पूज्यते कर्म्मणि अति । ब्रह्मणि, अग्नौ च । अग्नि-होत्रिणि त्रि० । स्त्रियाम् अङ्गती च ।

अङ्गद न०अङ्गं दायति शोधयति दै-क । ताड्, वाजु, इति च प्रसिद्धे बाहुभूषणे । वालिपुत्रे-वानरे पु० । अङ्गदानकर्त्तरि त्रि० । दक्षिणदिग्गजकरिण्यां स्त्री०।

अङ्गना स्त्री प्रशस्तमङ्गमस्ति यस्याः अङ्ग+न । अङ्गशौष्ठवत्यां योषिति, योषिन्मात्रे, उत्तरदिग्गजकरिण्याञ्च ।

अङ्गनाप्रिय पु० प्रो-क अङ्गना-प्रिय ६त० । अशोकवृक्षे तत्पुष्पेण स्त्रियः स्वाङ्गं भूषयन्तीति । योषित्प्रियमात्रे तु त्रि० ।

अङ्गपालि स्त्री०अङ्गं पाल्यते संरक्ष्यतेऽत्र अङ्ग-पाल-इ । आलिङ्गने ।

अङ्गपालिका स्त्री०अङ्गं देहं पालयतीति अङ्गपालि-एवुल् । धात्रमा इति ख्यातायाम् उपमातरि । अङ्गपालनकारके त्रि० ।

अङ्गमर्द्द पु०अङ्गं मर्द्दयति अङ्ग-मर्द्द-णिच्-अच् ६त०। देहसंवाहके सेवके । अङ्गमर्दनकारके त्रि० ।

अङ्गमर्द्दक पु० अङ्गं मर्द्दयति अङ्ग-मर्द-णिच् ण्वुल् । देहसंवाहके-सेवके ।

अङ्गमर्द्दिन् पु० अङ्गं मर्द्दयति अङ्ग-मर्द णिच् णिनि ६त० । अङ्ग-मर्द्दके सेवके । अङ्गमर्दनकारके त्रि० । स्त्रियां ङीप् ।

अङ्गरक्ता पु० अङ्गे रक्ताः रनुज-क्त ७त० । कम्बिल्यदेशजाते-रक्तवर्ण-चूर्णवति-गुड़ारोचनीति वणिजेषु वैद्येषु च प्रसिद्धे द्रव्यभेदे । रक्ताङ्गमात्रे त्रि० ।

अङ्गरक्षणी स्त्री अङ्गं रक्ष्यतेऽनया अङ्ग-रक्ष-ल्युट् ङीप्। आङ्-राखा इति प्रसिद्धे वस्त्रे। अङ्गरक्षणकारके त्रि०।

अङ्गराग पु० अङ्गं रज्यतेऽनेन अङ्ग-रञ्ज-करणे घञ्। अङ्गलेपने कुङ्कुमादौ। भावे घञ्। अङ्गस्य विलेपने। [अङ्गदेशाधिपे कर्णे।

अङ्गराज् पु० अङ्गेषु तन्नामकदेशेषु राजते राज-क्विप् ७त०।

अङ्गव न० अङ्गे खावयवे वाति अन्तर्भवति अतिशोषणात् सङ्कुचिता-ङ्गमिव भवति अङ्ग-वा-ड ७०। शुष्कफले।

अङ्गविकृति पु० वि-कृ-क्तिन् अङ्गस्य विकृतिश्चालनादिर्यस्मात् ५त०। नगीनाड़ा इति ख्याते अपस्माररोगे। ६त०। अङ्गस्य विकारे स्त्री,

अङ्गविक्षेप पु० वि-क्षिप-घञ् अङ्गस्य विक्षेपः चालनं यत्र ब०। अङ्गुल्यादिविन्यासभेदेन त्रिंशद्विधे नृत्ये। ६त०। अङ्गस्य चालनमात्रे।

अङ्गवैकृत न० विकृतस्य भावः विकृत+अण् अङ्गेन अङ्गचेष्टया वैकृतं हृदयभावो ज्ञायते यत्र बहु०। आकार इति ख्यातायाम्-हृदयगतभावावेदकचेष्टायाम्। ६त०। अङ्गस्य विकारे न०।

अङ्गस् पु० अनृज-असुन् कुत्वञ्च। पक्षिणि इत्युज्ज्वलदत्तः।

अङ्गसंस्कार पु० अङ्गं संस्क्रियतेऽनेन अङ्ग-सम्-कृ करणे घञ्। देहसंशोधनादिसंस्कारकारके स्नाने गोधूमचूर्णादिनाङ्गमर्दने च। भावे घञ्। ६त०। अङ्गस्य संस्कारे विलेपनादौ। अङ्गं संस्करोति अङ्ग-सम्-कृ-कर्त्तरि अण् ६त०। कुङ्कुमादौ त्रि०।

अङ्गहार पु० अङ्गं ह्रियते चाल्यतेऽत्र अङ्ग-हृ आधारे घञ्। अङ्गुल्यादिविन्यासभेदेन त्रिंशद्विधे नृत्ये। भावे घञ्। ६त०। अङ्गस्य हरणमात्रे।

अङ्गाङ्गिभावः पु० अङ्गस्य अङ्गिनश्च भावः। गौणमुख्यभावे।

अङ्गाधिप पु० अधि पा-क अङ्ग-अधिप ६त०। अङ्गदेशपतौ कर्णे। अत्र अङ्गाधिपतिरित्यपि।

अङ्गार अस्त्री० अङ्ग-आरन्। अर्द्दग्धे-अग्निसंक्रान्ते अग्निशून्ये वा आङ्गार इति प्रसिद्धे-काष्ठखण्डे। मङ्गलग्रहे पु०। रक्तवर्णे त्रि०

अङ्गारक पु० अङ्गार+स्वार्थे क । रक्तवर्णत्वात् मङ्गलग्रहे, कुरण्टक-वृक्षे, भीमराज इति ख्याते-भङ्गराजवृक्षे च । अल्पार्थे क । स्फुलिङ्ग इति विख्याते-अङ्गारक्षुद्रांशे ।

अङ्गारक न० तैलमङ्गारकं नाम सर्वज्वरविनाशनमिति वैद्यकपरिभाषिते तैलविशेषे ।

अङ्गारकमणि अस्त्री अङ्गारकस्य मणिः ६त० । °प्रवाले तस्य मङ्गलग्रहस्वामिकत्वस्य ज्योतिषे प्रसिद्धिः ।

अङ्गारधानिका स्त्री० अङ्गाराणि धीयन्तेऽस्याम् अङ्गार-धा-आधारे ल्युट् टित्त्वात् ङीप् ततः स्वार्थे कप् टाप् । अङ्गाराधारे (आङ्टा) इति (धुनची) इति च प्रसिद्धे पात्रभेदे ।

अङ्गारपरिपाचित न० अङ्गारे (ज्वलदग्न्याप्रकाष्ठखण्डे) परिपाच्यते परि-पच स्वार्थे णिच् क्त । कावाय इति प्रसिद्धे-पक्वमांसादौ

अङ्गारपुष्प पु० अङ्गारमिव लोहितवर्णं पुष्पं यस्य ब० । जिँया-पुति, इति ख्याते क्षुद्रवृक्षे ।

अङ्गारमञ्जरी स्त्री अङ्गारमिव रक्तवर्णा मञ्जरी यस्याः ब०समासान्तकयभावान्नुखत्वे संज्ञात्वात् । रक्तवर्णे-(करमचा) इति ख्याते करञ्जवृक्षे ।

अङ्गारवल्ली स्त्री अङ्गारमिव रक्तफलत्वात् रक्ता वल्ली क० । रक्तवर्णफलवत्यां-कुँच इति प्रसिद्धायाम्,-गुञ्जालतायां करञ्जवृक्षे च ।

अङ्गारशकटी स्त्री शकोति वोढुं शकटम्, अल्पं शकटं, शकटी, शकादिवत् अल्पार्थे ङीप् अङ्गारस्य शकटी ६त० । (आङ्टा) धुनाचीति च प्रसिद्धे अङ्गाराधारे पात्रभेदे ।

अङ्गारि स्त्री अङ्गार+मत्वर्थे इनि पृषोदरादित्वात् कलोपः । अङ्गाराधारे आङ्टा इति प्रसिद्धे पात्रविशेषे ।

अङ्गारिका स्त्री अङ्गारं विद्यतेऽस्याः अङ्गार+मत्वर्थे ठन् टाप् । आङ्टा इति ख्याते अङ्गारपात्रे । [पात्रे । अङ्गारवति त्रि० ।

अङ्गारिणी स्त्री अङ्गार+इनि । अङ्गारधानिकायां(आङ्टा)इति ख्याते

अङ्गारित पु० अङ्गारमिवाचरतीति अङ्गार+क्विप् ततः कर्त्तरि क्त ।

पलाशकलिकोद्गमे । अङ्कारं करोतीत्यर्थे णिचि क्त । दग्धप्राये त्रि०

अङ्किका स्त्री०अङ्कम् आच्छादयति अङ्क+इनि-के स्त्रियां टाप् । आङ्राखा इति प्रसिद्धे कञ्चुकवस्त्रे ।

अङ्किन् त्रि० अङ्क+इनि । प्रधाने, अवयवविशिष्टे, देहवति च ।

अङ्गिरस् पु० अङ्क-असि डिरागमः । स्वनामख्याते ऋषिभेदे ब्रह्मणोमुखजाते पुत्रे । [स्वीकारे अभ्युपगमे ।

अङ्गीकार पु०अनङ्गम् अस्वकीयम् अङ्गं क्रियते अङ्ग च्वि-कृ-घञ् ।

अङ्गीकृत त्रि० अङ्ग-च्वि-कृ कर्म्मणि क्त । अभ्युपगते स्वीकृते ।

अङ्गुरि (री) स्त्री अङ्ग-उलि-रलयोरैकत्व स्मरणात् रत्वम् । आङ्गुल इति प्रसिद्धायाम् हस्तपादशाखायाम् वा ङीप् अङ्गुरीवोरगस्यतेति रघुः ।

अङ्गुरीय न०अङ्गुरौ भवम् अङ्गुरि-छ । वालमूलादित्वात् वा लत्वाभावः । अङ्गुलिभूषणे आङ्गटीति प्रसिद्धे ।

अङ्गुरीयक न० अङ्गुलौ भवम् अङ्गुलि-छ । वालमूलादित्वात् वा रत्वे स्वार्थे क । अङ्गुलिभूषणे आङ्गटीति ख्याते ।

अङ्गुल पु० अङ्ग-उल । हस्तपदशाखायां आंगुल इति ख्यातायाम् वात्स्यायनमुनौ अङ्गुले च । यवोदरैरङ्गुलमष्टसंख्यैरिति भास्कराचार्योक्तेः अष्टयवोदरपरिमाणे तु न० ।

अङ्गुलि (ली) स्त्री० अङ्ग-उलि । हस्तपदशाखायाम् आङ्गुल इति ख्यातायाम् । वा ङीपि अङ्गुली च । हातगुडा इति ख्याते गजकर्षिकारवृक्षे च । [ऋते ललाटस्थार्द्धचन्द्राकृतितिलके ।

अङ्गुलितोरण न० अङ्गुल्याः तोरणमिव कृतम् । चन्दनादिद्वारा

अङ्गुलित्र न० अङ्गुलिं त्रायते अङ्गुलि+त्रै-क । चामाटीति प्रसिद्धे ज्याकर्षणजतखेदवारणार्थम् अङ्गुलिवस्त्रे चर्म्मणि वङ्गगोधाङ्गुलित्र इति भट्टिः ।

अङ्गुलित्राण न० अथलिस्त्रायतेऽनेन त्रै-क ह्रस्व० । चामाटीति प्रसिद्धे ज्याकर्षणजतखेदनिवारणार्थम् अङ्गुलिवस्त्रे चर्म्मणि ।

अङ्गुलिमुद्रा स्त्री० अङ्गुल्या मुद्रं राति अङ्गुलि+मुद्र रा-क

ईत० । धारयितुर्नामाक्षरसङ्ख्यासहिते आङ्कुटीति प्रसिद्धे अङ्कुलीभूषणे ।

अङ्कुलिमोटन न० अङ्कुल्योर्मोटनं मर्दनं यत्र ब० । अङ्कुलिहृदयमर्दनजाते तुड़ि इति प्रसिद्धे शब्दे ।

अङ्कुलिषङ्गा स्त्री० अङ्कुलौ सङ्गो यस्याः षत्वम् ७त० । (याउ) इति प्रसिद्धे अङ्कुलिसंलेपकारके यवागूद्रव्ये ।

अङ्कुलिसन्देश पु० अङ्कुल्या अङ्कुलिध्वनिना सन्दिश्यते सं-दिश-घञ् । अङ्कुलिध्वनिद्वारासंज्ञादाने, अङ्कुलिस्फोटनमात्रेऽपि ।

अङ्कुलिस्फोटन न० अङ्कुल्योः स्फोटनं ताडनं यत्र ७त० । (तुड़ि) इति प्रसिद्धे अङ्कुलिहृदयमर्दनजाते शब्दे ।

अङ्कुलिपञ्चक न० अङ्कुलीनां पञ्चकम् पञ्चसंख्या । हस्तस्थानामङ्कुलीनां समुदाये तासु अङ्गुष्ठ तर्जनीमध्यमानामिकाकनिष्ठानामिकाः । [प्रसिद्धे अङ्कुलिभूषणे ।

अङ्कुलीयक न० अङ्गुरीयकवत् वा रत्वाभावः । आङ्कुटीति

अङ्कुलिसम्भूत पु० अङ्कुलौ सम्भवः सम्-भू-क्त ७त० । नखे अङ्कुलिसम्भूतमात्रे त्रि० ।

अङ्कुष्ठ पु० अङ्गौ पाणौ प्राधान्येन तिष्ठति अङ्ग-स्था-क अम्बाम्बेत्यादिना षत्वम् । हस्ताङ्गुलौ । अम्बाम्बेति स्थले अङ्गुशब्दप्रयोगात् अङ्गुशब्दोऽपि हस्तवाचीति ज्ञापितम् ।

अङ्कुष्ठमात्र त्रि० अङ्गुष्ठ+परिमाणार्थे मात्रच् । अङ्गुष्ठमध्यपर्वपरिमिते । अङ्गुष्ठमात्रोऽप्यवरोऽपि दृष्ट इति श्रुतौ ।

अङ्कूप पु० अङ्क-ऊपय । नकुले वाणे च ।

अङ्कूस् न० अङ्क-असि । पापे ।

अङ्क्ति पु० अञ्च गतौ क्तिच् । चरणे हस्तमूले च ।

अङ्क्ति पु० अञ्च गतौ किन् । चरणे हस्तमूले च । [हस्तमात्रे ।

अङ्क्तिप पु० अङ्क्त्या मूलेन पिबति सिक्तजलादिकम् पा-क ३त० ।

अङ्क्तिपर्णिका स्त्री अङ्क्तौ मूले अङ्क्तेरारभ्य वा पर्णमस्याः ब० जातित्वात् ङीष् ततः स्वार्थे के ह्रस्वे टाप् । सिंहपुच्छाकारपु-

अर्ति चाकुलिया, इति ख्याते वृक्षे । अङ्क्रिपर्णीत्यपि नाम ।

अङ्क्रिवल्लिका स्त्री अङ्क्रेरारभ्य वल्लीव पर्णवत्त्वेन ततः स्वार्थे के हस्वे टाप् । सिंहपुच्छाकारपुष्पवति चाकुलिया, इति प्रसिद्धे वृक्षे । अङ्क्रिवल्लीत्यपि नाम । [आचिष्ट ।

अच अविस्रष्टकथने उभय० भ्वादि० सक० सेट् । अचति ते । आचीत्

अच पूजने गतौ च इदित् पर०भ्वादि० सक० सेट् । अञ्चति आञ्चीत् आनञ्च । अञ्चात् गतौ तु अच्यात् ।

अच अव्यक्तकथने इदित् उभय० भ्वादि० सक० सेट् । अञ्च-ति ते । आञ्चीत् आञ्चिष्ट । [भिक्षे न० ।

अचक्षुस् त्रि० बहु-उसि ब० । मन्दनेत्रे नेत्रहीने च । न० त० । चक्षु-

अचण्डी स्त्री चडि कोपने अच् गौरादित्वात् ङीष् न० त० । शान्तस्वभावायां गवि । कोपनभिन्ने त्रि० ।

अचर न० न चरति चलति-चर-अच् न० त० । स्थावरे स्थितिशीले पृथिव्यादौ चराणामन्नमचरमिति मनुः । चलनशून्ये त्रि० ।

अचल पु० न चलति चल-अच् न० त० । पर्व्वते, गोंज इति ख्याते वृक्षे, गिरौ, ब्रह्मणि च । पृथिव्यां स्त्री । चलनशून्ये त्रि० ।

अचलत्विष् पु० अचला गतधा प्रक्षालनेनापि मालिन्यानपगमात् स्थिरा त्विट् कान्तिर्यस्य ब० । कोकिले । स्थिरकान्तिमति त्रि० । कर्म्म० । स्थिरायां कान्तौ स्त्री ।

अचिन्त्य न० चिति-कर्म्मणि यत् न० त० । चिन्तयितुमियत्तया परिच्छेत्तुमशक्ये परब्रह्मणि । चिन्तयितुमशक्ये वस्तुमात्रे त्रि० । अचिन्त्याः खलु ये भावा इति स्मृतौ । [मात्रे त्रि० ।

अचिर न० चिरम् न० त० । अल्पकाले । अल्पकालस्थायिनि द्रव्य-

अचिरद्युतिः स्त्री० अचिरा क्षुद्रकालस्थायिनी द्युतिर्यस्याः ब० । विद्युति । अल्पकालस्थविद्युतिमिति त्रि० । कर्म्म० । अल्पकालस्थायिन्यां कान्तौ स्त्री ।

अचिरप्रभा स्त्री० प्रभा अङ् अचिरा अचिरस्थायिनी प्रभा यस्याः ब० । विद्युति । च्युता दिवः स्यात्तुरिवाचिरप्रभेति

भट्टिः । अल्पकालस्थायिप्रभावति त्रि० । कर्म्म० अचिरायां दीप्तौ स्त्री ।

अचिररोचिस् स्त्री अचिरं रोचिर्यस्याः ब० । विद्युति । अचिरप्रभावति त्रि० । कर्म्म० । अचिरप्रभायाम् न० ।

अचिरांशु स्त्री अचिरा अंशवोऽस्याः ब० । विद्युति । अल्पकालस्थायिकिरणवति त्रि० । कर्म्म० । अचिरकिरणे पु० ।

अचिरात् अव्य० अचिरं अततीति क्विप् । शीघ्रे, अविलम्बे च ।

अचिराभा स्त्री अचिरप्रभावत् । आ-भा-अङ् । विद्युति ।

अचेतन त्रि० चित-णिच्-युच् चेतना ज्ञानम् ब० । चेतनाशून्ये । चित ल्यु न० त० । ज्ञानविशिष्टभिन्ने ।

अचेतस् त्रि०चित असुन् न०त० । विवेकशून्ये, दुष्टचित्ते, चित्तशून्ये च । चित्ताभावे अव्य० ।

अचैतन्य त्रि० चेतनस्य भावः चेतन+यक् ब० । चैतन्यरहिते, ज्ञानशून्ये च । न०त० । ज्ञानभिन्ने न० ।

अच्छ अव्य० छो-क न०त० । आभिमुख्ये । [श्लोके, स्फटिके च पु० ।

अच्छ त्रि० न छति दृष्टिम्, न+छो क० । स्वच्छे निर्म्मले च । म-

अच्छभल्ल पु० अच्छ-आभिमुख्येन भल्लते गच्छति अच्छ+भल्ल+अच् । भालूके अत्र भल्ल इत्यपि पृथक् नाम ।

अच्छम् अव्य० न-छो कसुन् । आभिमुख्ये । [वैदिककर्म्मणि च ।

अच्छिद्र त्रि० छिद्र+रक् ब० । छिद्रशून्ये, अङ्गहानिः छिद्रं नच्छून्ये

अच्छिद्रावधारण न० अच्छिद्रतया साङ्गतयावधारणम् अव धारे-ल्युट् । क्रतस्य वैदिककर्म्मणोऽच्छिद्रतया अवधारणे क्रतैतत्कर्म्माच्छिद्रमस्त्वित्यभिलापरूपे ।

अच्छोद त्रि० अच्छम् उदकं यस्य उदकस्योदभावः । निर्म्मलजलवति तडागादौ । तन्नामकप्रसिद्धे सरसि न० ।

अच्युत पु० च्योतते अच्यु-क न०त० । विष्णौ । च्युतिशून्ये त्रि०

अच्युतागज पु० अच्युतस्य जन्यस्य अर्थे जायते अर्थ+जन+ड ६त० । नलभद्रे । [कामदेवे । तद्वज्जातमात्रे त्रि० ।

अच्युताङ्गज पु० अच्युतस्याङ्गात् जायते अङ्ग+जन-ड । ईत०।
अच्युतात्मज पु० आत्मनोऽङ्गात् जायते जनड ईत०। कामदेवे।
अच्युतावास पु० आ-उप्यते सेव्यतेऽत्र आ-वस-घञ् ईत०। अश्वत्थवृक्षे। अश्वत्थः सर्ववृक्षाणामित्युक्तेस्तस्य तत्रोपास्यत्वात्तदावासत्वम्
अच्युति स्त्री च्यु-क्तिन् न० त०। च्यवनाभावे। बद्ध०। नाशशून्ये त्रि०।
अज गतौ क्षेपणे च भ्वादि० पर० सक० सेट्। अजति। अवैषीत् आजीत्। अजिता जेता।
अज दीप्तौ इदित्। चुरादि० उभय० सेट् अक०। अञ्जयति ते। आञ्जिजत् त।
अज पु० न जायते जन-ड न०त०। ब्रह्मणि, विष्णौ, हरे, जीवात्मनि ईश्वरे, छागे, मेषराशौ, सूर्यवंशीयराजभेदे दशरथपितरि, आत्मनि विष्णोर्जाते कामदेवे च। जन्मरहिते त्रि०। जगत्कारणे सत्त्वरजस्तमोगुणात्मके प्रधाने अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानामिति श्रुतेः। छाग्याञ्च स्त्री।
अजकर्ण पु० अजस्य कर्ण इव कर्णौ यस्य ब०। छागतुल्यकर्णवायमानपत्रयुक्ते पियासाले, इति ख्याते वृक्षे मरिचपत्रे च।
अजकर्णक पु० अजकर्णइव कायति पत्रद्वारा प्रकाशते कै क। पियासाल इति ख्याते वृक्षे।
अजकव अस्त्री०अजो विष्णुः को ब्रह्मा च वाति शरत्वेनात्र वा+अधिकरणे क ह्रस्व०। शिवधनुषि। वाबुई इति ख्याते वर्वरीवृक्षे पु०।
अजकाव अस्त्री स अजकौ विष्णुब्रह्माणौ अवतीति अण् उप० स०। शिवधनुषि।
अजक्षीर न० अजायाः क्षीरं पुंवद्भावः। छागदुग्धे।
अजग पु० अजं छागं यज्ञाङ्गत्वेन गच्छति गम-ड ईत०। विष्णौ। अजेन गन्तरि बद्धौ च। [वनयमान्यास्।
अजगन्धा स्त्री अजस्य गन्धइव गन्धोऽस्याः। जोयानीति ख्यातायां
अजगन्धिका स्त्री अजस्य गन्ध इव गन्धो यस्याः ब० ततः स्वार्थे के टाप्। वाबुई इति प्रसिद्धे वर्वरीशाके।

अजगन्धिनी स्त्री अजस्य मेषस्य गन्धो गेयः एकदेशः यस्यामिति यावत् तद्यस्याः फलाकारेत्वाजीति अजगन्ध+ङीष् । (गा-डरपिप्पल) इति प्रसिद्धे अजमूत्रीढये ।

अजगर पु० अजं छागं गिरति गिलति गृ अच् । डकुलवर्णे ।

अजगव पु० अजगो विष्णुः वरत्वेन त्रिपुरासुरवधकाले ऽस्यास्ति अज-ग+व । शिवधनुषि । [धनुषि ।

अजगात्र पु० अजगं विष्णुमवति अव-अच् उप०स० । शिवध-

अजघन्य त्रि० न जघन्य (अधम) न०त० । अधमभिन्ने श्रेष्ठे च ।

अजजीविक त्रि० जीवयति जीव-णिच् कर्त्तरि ण्वुल् जीविका अजएव क्रयविक्रयादिभ्यां पालनादिना वा जीविका जीवनो-पायोऽस्य ब० । छागक्रयविक्रयादिना जीविकावति ।

अजटा स्त्री० नास्ति जटा शिफा यस्याः ब०।(मुदकुआलता)इति प्रसिद्धे शिफारहिते वृक्षभेदे । [ततः अच् ।आबुकुमीति प्रसिद्धे वृक्षभेदे ।

अजड स्त्री० अजडयति सर्वमात्मादृक्मर्दनार्थं चालयति न+जड-णिच्

अजथ्या स्त्री० अजानां समूहः । अज+थ्यञ् स्त्रीत्वात् टाप् । अज-समूहे । तद्धितार्थोत्तरपदत्वात् स्त्रीत्वयूथिकावाच्च ।

अजदण्डी स्त्री० अजस्य ब्रह्मणोदण्डोऽस्याः ब०गौरा०ङीष् । ब्रह्म-दण्डीवृक्षे ब्रह्मणो यत्तार्थदण्डस्य तदीयकाष्ठेन करणात्तथात्वम् ।

अजनि स्त्री० न+जन-आक्रोशे अनि । आक्रुश्यमाने अन्यायादौ । अर्थाभावे अव्ययी० । अजन्या अभावे अव्य० ।

अजन्य स्त्री० लौकिकक्षेत्रभिन्ने जन्यते न+जन—णिच्-यत् । शुभाशुभ-सूचके दैवकृते भूकम्पादावुत्पाते । अन्यभिन्ने त्रि० ।

अजप पु० अजन्तं जपति निन्द्यं गजः, जप्-अच् । कुपाठके । अजं पाति रक्षति अज+पा-क । छागपालके त्रि० ।

अजपा स्त्री० प्रयत्नेन जपितुमशक्या अयत्नोच्चारिता जप-अच् । श्वा सप्रश्वासयोः बहिर्गमनागमनाभ्यां अक्षरनिष्पादनरूपे जपे, हंसः, सोऽहमिति वा मन्त्रभेदे च । जपशून्ये त्रि० ।

अजपात् (द) पु० अजस्य पाद इव पादोऽस्य वा अन्त्याकारलोपः । वटभेदे तद्वैलक्षण्यात् पूर्वभाद्रपदनक्षत्रे च ।

अजभक्ष पु० अजैर्भक्ष्यतेऽसौ भक्ष कर्म० ईत० । (वासुट) इति प्रसिद्धे वर्बरीवृक्षे तत्पत्रमजैरतिप्रीतितो हि भक्ष्यते ।

अजमीढ पु० अजो मीढः यस्मै सिक्तः यत्र ब० । (आजमीढ) इति प्रसिद्धे देशे । तद्देशाधिपे राजनि अपि । आजमीढ युधिष्ठिरे ।

अजमोदा स्त्री० अजस्य मोद इव मोदो गन्धो यस्याः अजं मोदयति वा । सुट-कर्म० ईत० मोदि-अण् वा । उग्रगन्धत्वात् यवमात्रायाम् यवानीभाते च । [दलशून्ये त्रि० ।

अजघ्न पु०नास्ति जन्मो दन्तोऽस्य ब० । मेढे तस्य दन्ताभावात् तथात्वम् ।

अजय पु० जि-अच् न०त० । वीरभूमिनगरसन्निधाने अजय इति नामके नदविशेषे च । अजेन छागेन याति·या-क ३त० । छाग-वाहने अग्नौ पु० । अजये जयशून्ये त्रि० । अव्ययी० । अजयाभावे अव्य० । नास्ति जयो यादृक्कृत्येनास्याम् (त्रिष्टि.) (भाङ्ग,) इति च प्रसिद्धनास्निकायाम् विजयायाम् स्त्री ।

अजय्य स्त्री० जि-यक्यार्थे यत् । जेतुमयक्ये दुर्जये यत्नौ ।

अजरा स्त्री० जॄ-अङ् न०त० । (हतकुमारी) इति प्रसिद्धे वृक्षे तस्य जराभावात् । जराशून्ये त्रि० । जराभावे अजरसम् अव्य० ।

अजर्य्य न० न जीर्य्यति जॄ-यत् न०त० । सौहार्दे ।

अजलोमन् पु० अजस्य लोमेव लोम (मञ्जरी) यस्य उपमान ब० । (शूकशिम्बी) इति ख्याते अजलोमवन्मञ्जरीविशिष्टे वृक्षभेदे ।

अजवीथी स्त्री० अजेन मङ्क्षणा निर्मिता वीथी पदं ३त० । गगन-क्षेत्रक्रमे (यमनाला) इतिख्याते, क्रान्तिपथे । यामारभ्य अगस्त्य-स्थानपर्य्यन्तं पितृयानपथः ।

अजशृङ्गी स्त्री० अजस्य मेषस्य शृङ्गमिव फलमस्याः ब० । (गाकुलशिङ्गा) इति प्रसिद्धे मेषशृङ्गतुल्यफलवति वृक्षे । [विनि वस्तुमात्रे त्रि० ।

अजस्र न० । न+जस-र । अलते विच्छेदरहिते । तथाभूतकालस्था-

अजस्रका स्त्री० न जरा यस्यां सा न+कन्+टाप् बहु० स्त्री-

घापरित्यागेन परार्थाभिधायिकायां लक्षणायाम् । यथा श्वेतो धावतीत्यादौ श्वेतगुणापरित्यागेन तद्वति लक्षणा ।

अजहल्लिङ् पु० न जहत् लिङ्गं यस्य बहु० । लिङ्गतल्लिङ्गके विशेष्यस्यान्यलिङ्गकत्वेऽपि स्वलिङ्गत्यागेन विशेषणे यत्वे । तथा चान्यत्र विशेषणस्य विशेष्यानुसारिलिङ्गत्वनियमेऽपि अत्र न तथा नियमः यथा वेदः स्मृतिर्वा प्रमाणम् । • [ख्याते दृष्टे ।

अजहा स्त्री० न जहाति मुखम् न+हा-ड । आङ्कथीति

अजागर पु० जाग्रट-णिच् अच् न जागरो यस्मात् ५ब० । शिवनेन निग्रहाभिधित्वकारके यदपेक्षयाऽन्यस्मिन् जागरणकर्त्तरि नास्ति तादृशे (भोगराज) इति ख्याते भृङ्गराजे । भृङ्गराजः सुजागर इति रभसवाक्यात् तस्यात्यन्तनिग्रहाभिधित्वकारित्वम् ।

अजाजी स्त्री० अजेन छागेन आजीविक्षोभो गन्धोत्कटत्वात् त्यागो यस्याः अज-घञ् वीभावाभावः ब० । सर्व्वभक्ष्येऽपि छागेन गन्धोत्कटतया त्यज्यमाने, (जीरा)इति प्रसिद्धे जीरके हर्षे ।

अजाजीव पु० अजैस्तद्दुग्धघृतक्षीरादिना तत्क्रयविक्रयादिना वा आजीवति आ+जीव-अच् ३त० । आगमालके तत्क्रयविक्रयाभ्यामाजीविनि च ।

अजातकक्कट् पु० न जातं कक्कदसंज्ञकूटं यस्य बहु० कक्कदशब्दस्यान्त्याकारलोपः । अपूर्व्वकक्कदवति अल्पवयस्के गवादिवत्से ।

अजातशत्रु पु० जातस्य जन्तुमात्रस्य न शत्रुः अभ्राड्भोजीत्यादिवत् नञोऽव्यवहितेन शत्रुशब्देनान्वयात् अप्रसिद्धशत्रुः । युधिष्ठिरे राजनि । एवमजातारिप्रभृतयोऽपि तत्रैव ।

अजाति स्त्री० जन-क्तिन् न०त० । अनुत्पत्तौ । ब० । जातिशून्ये जात्यादौ जन्मशून्ये च त्रि० । अव्य० । जातिभावे अव्य० ।

अजाद्दनी स्त्री० अजैर्हन्यतेऽसौ अजाश्च दुःखार्थत्वेनाजैर्हन्यन्ते इति वा अद-कर्म्मणि ल्युट् ह्नन० । दुरालभायाम् (विचटि) प्रसिद्धे स्वर्णेन दुःखदायके क्षुपभेदे ।

अजानि पु० नास्ति जाया यस्य ब जायाया निङादेशः । जायारहिते ।

अजानेय पु० अजेऽपि विज्ञेऽपि जानेयो यथाख्यानं प्रापणीयो आरोढ़ी येन अज-विज्ञे अण् वीभावाभावः आ+रो-कर्मणि यत् ततः ब० । बहुयत्नप्रहारेऽपि निर्भयेन यथाख्यानमारोढ़व्यः प्राप्ये अश्वे, उत्तमाश्वे, च ।

अजाप्रिया स्त्री० अजानां प्रिया । (कुश) इति ख्याते वदरीवृक्षे ।

अजि पु० अज-इन् । तेजसि । गतिमति त्रि० । तेन पदाजिः ।

अजिन न० अजति क्षिपति रज आदि अज-इनच् वीभावाभावः । चर्मणि ।

अजिनपत्रा (त्री) (त्रिका) स्त्री० अजिनं चर्मेव सृक्किवत् पत्रं पक्षो यस्याः ब० । (चालुणिका) इति प्रसिद्धे पक्षिभेदे (त्री) इत्यत्र गौरादित्वात् ङीष् । ततः स्वार्थे के सुखेऽत्र टापि-पत्रिका

अजिनफला स्त्री० अजिनं (चर्मविकारत्वात् मसृणं) इव फलं यस्याः । अजिनपूर्वपदत्वेन जातिलक्षणं ङीषं बाधित्वा टाप् । (टेपारी) इति प्रसिद्धे मसृणाकारफलके वृक्षभेदे ।

अजिनयोनि स्त्री० अजिनस्य चर्मणः योनिः कारणं इव ष० । हरिणमात्रे । [चत्वरे ।

अजिर न० अज-किरन् वीभावाभावः । (उठान) इति ख्याते

अजिह्म त्रि० हा-मन् हित्वालोपौ ततः न० त० । सरले

अजिह्मग पु० अजिह्मं सरलं गच्छति गम-ड । बाणे । सरलगामिनि त्रि० । [भेदे । जिह्मान्यूने त्रि० ।

अजिह्म पु० जि बहु० कन् च जिह्वा रसना वा नास्ति यस्य ब० ।

अजीर्ण न० जॄ-भावे क्त न० त० । जठरानलमान्द्येन भुक्ताजीर्णतायां, रोगभेदे च । कर्त्तरि क्तेः न० त० जीर्णतोभिन्ने त्रि० ।

अजीव त्रि० जीव-भावे घञ् ब० । जीवनरहिते मृते शवे च ।

अजीवनि स्त्री० न जीव्यात् न+जीव-आक्रोशे अनि । अनिष्टापविषये जीवनाभावे ।

अजेय त्रि० न+जि-कर्म्मणि यत् । जयायोग्ये ।

अजैकपाद्(द्) पु० अजस्य छागस्य एकः पादइव पादो यस्य उपमा०

व० वा पादस्यान्त्याकारलोपः । कदुविशेषे, तद्देवताके पूर्वभाद्रपदनक्षत्रे च । [नाञ्जएयास्य प्रयोगः । वेश्यायाम् ।

अञ्जूका स्त्री० अर्जयति या सा अर्ज्जि-ऊक रकारस्य जत्वम् ।

अञ्झटा स्त्री० अचति दोषं नाशयति अच-क्विप् झटति संछन्नते झट्-अच् ततः कर्म्म० । (भुंइ आमला) इति प्रसिद्धे वृक्षे ।

अज्ञ त्रि० न जानाति न+ज्ञा-क । ज्ञानशून्ये, मूर्खे, अल्पज्ञे च

अज्ञान न० ज्ञा-भावे ल्युट् न०त० । ज्ञानविरोधिनि ज्ञाननाशके (अविद्या)इति वेदान्तप्रसिद्धे जगत्कारणे ज्ञानविरोधिनि पदार्थे । व० । ज्ञानशून्ये त्रि० । अव्य० । अज्ञानाभावे अव्य० ।

अञ्चति पु० अनृच-अति । वायौ ।

अञ्चल पु०अञ्चति प्रान्तम् अनृच-अलच् । प्रान्तभागे वस्त्रप्रान्ते च ।

अञ्चित त्रि० अनृच-क्त । पूजिते, आकृञ्चिते च । "अञ्चितसव्यपाद"-मिति भट्टिः ।

अञ्चितभ्रु स्त्री०अञ्चिता पूजिता वक्रीकृता वा भ्रूर्यया । सुन्दरयोषिति वक्रीकृतभ्रुवि च स्त्रियाम् । कर्म०(भ्रू)तथाभूतभ्रूलतायाम् स्त्री० ।

अञ्ज (नृज) मिश्रणे गतौ व्यक्तीकरणे च रुधादि०पर० सक० वेट् । अनक्ति । आञ्जीत् । अञ्जिता अङ्क्ता । वि-व्यक्तीकरणे "अनक्ति कालत्रितयेऽपि योग्यतामिति" माघः ।

अञ्जन न० अज्यतेऽनेन करणे ल्युट् । कज्जले । भावे ल्युट् । मिश्रीकरणे, गमने, मालिन्ये, व्यक्तीकरणे च । कर्त्तरि ल्यु । उत्तरदिग्गोहस्तिन्यां कृतुमतो-मातरि च स्त्री० । णिचि युच् । अभिलक्षणाभिन्ने अभिलक्ष्यान्यार्थबोधके शब्दव्यापारे, स्त्री । "अन्यार्थधीजनव्यापृतिरञ्जनेति" काव्यप्रकाशः ।

अञ्जनकेशी स्त्री० अञ्जनमिव केशो यस्याः ङीप० । केशसंस्कारके कृष्ण-विलासिनीनामके गन्धद्रव्ये । यत्संयोगात् केशस्य कृष्णता स्यात् ।

अञ्जनाधिका स्त्री० अञ्जनादधिका कृष्णत्वात् ५ब० । (आजनाइ) इति ख्याते कीटभेदे ।

अञ्जनावती स्त्री० अञ्जनं विद्यतेऽस्याः अधिककृष्णवर्णत्वात् अञ्ज-

न+मतुप् यत्वं दीर्घत्वं । दैर्घ्यानकोणस्थ हस्तिन्याम् ।

अञ्जनिका स्त्री० अञ्जना स्वार्थे क टाप् कापि पूर्व्वाकारस्य इत्वम् । (आजनाइ) इति प्रसिद्धे अञ्जनाख्ये कीटभेदे ।

अञ्जनी स्त्री० अज्यते चन्दनकुङ्कुमादिभिरसौ अनृज-कर्म्मणि ल्युट् ङीप् । कुङ्कुमाद्यनुलिप्तायाम् स्त्रियाम् । करणे ल्युटि कटुका-वृक्षे, कालाञ्जनवृक्षे च ।

अञ्जलि पु० अनृज-अलि । संयुतकरपुटे, कुड़वपरिमाणे च ।

अञ्जलिका स्त्री० अञ्जलिरिव कायति प्रकाशते अञ्जलि+कै-टाप् । बालमूषिकायाम् ।

अञ्जलिकारिका स्त्री० अञ्जलेः कारिका करणं कृ-धात्वर्थनिर्देशे ण्वुल् । अञ्जलिकरणे अञ्जलेरिव कारिका स्वार्थमात्रेण पत्रपुटस्य संपुटीकरणात् कृ-ण्वुल् ह्रैत०।(लज्जालु) इति ख्यातायाम् ल-ज्जायोद्भवतायाम् सा हि स्वार्थमात्रात् सङ्कोचेन पत्रपुटं संपुटं कुर्वती अञ्जलिमिव करोति । अञ्जलेः कारः करणं नित्ययोगेऽस्त्यर्थाः । कृ-भावे घञ् ह्रैत०। ततः नित्ययोगे मत्वर्थीयः ठन् ठस्येकः टाप् । प्रतिमायां तस्या हि यत् निर्म्माणसमये अञ्ज-लिकरणं तत् नित्ययोगेन तिष्ठति । अञ्जलि+कृ-कर्त्तरि ण्वुल् । विमर्द्दनाञ्जलिकारके त्रि० ।

अञ्जस त्रि० अनृज असच् । सरले ।

अञ्जसा अव्य० अनृज-भावे अच् अञ्जं गतिं वितन्वं वा स्यति सो-किप् । विलम्बाभावे शैघ्र्ये याथार्थ्ये च ।

अट गतौ भ्वादि० सक०पर० सेट् । अटति अटीत् । [रोषणस्थाने ।

अटनि (नी) द्वि० अटति भ्रौर्वीम् अट-अनि वा ङीप् । धनुरग्रे गुणा-

अटरूष पु० अटति भ्रमति अट-अच् तं रोषति हिनस्ति रुष-क अट-द्भिर्वा रुष्यते न युज्यते न रुष-क । (वासक) इति ख्याते वृक्षे ।

अटवि(वी) स्त्री० अटन्ति चरमे वयसि यत्र अट-अवि वा ङीप्रि दीर्घता । वने । [गमने च ।

अटाट्या स्त्री० अट यङ्-भावे अ स्त्रीत्वात् टाप् । परिभ्रमणे इधा-

अट्ट अतिक्रमे बधे च भ्वादि० आत्म० सक० सेट् । अट्टते । आट्टिष्ट ।
अट्ट अनादरे चुरादि० उभय० सक० सेट् । अट्टयति ते । आट्टिटत् त ।
अट्ट पु० अट्टयति अनादृयतेऽन्यत्र चु० अट्ट- घञ् । प्रासादस्यो-परिगृहे, प्राचीरोपरिगृहंस्थसैन्यगृहे, तत्र स्थिता हि नरा अ-न्यान् हीनतया नादृयन्ते, अतिशये च । तच्छीलं यति च अ-न्योत्कर्षेऽनादरः । [वि० परोक्षम् । अयुक्तकारी हासे ।
अट्टं अव्य० अट्टप्रकारः अट्ट स्वार्थेवाचितया प्रकारे द्वित्वम् यकन्च्वा-
अट्टहास पु० अट्टेनातिशयेन हासः कर्म० घञ् रेतं० । उच्चहासे ।
अट्टहासक पु० अट्टहास इव कायते कै-क । अट्टहासेन म्लानौ षष्ठिनिगमादतिशुभत्वं तद्वत् शुभे कुन्दपुष्पे ।
अट्टालक पु० अट्ट इव प्रासादोपरिगृहमिव अलति पर्य्याप्नोति भवति अल-एवुल् । प्रासादोपरिस्थे इष्टकादिगृहे ।
अट्टालिका स्त्री० अट्टाल+स्वार्थे क । इष्टकादिनिर्म्मिते राजगृहे ।
अठ गतौ भ्वादि० पर० सक० सेट् । अठति । आठीत् ।
अठ गतौ इदित् आत्म० भ्वादि० सक० सेट् । अण्ठते ।
अड उद्यमे भ्वादि० पर० अक० सेट् । अडति । आडीत् ।
अड व्याप्तौ स्वादि० पर० सक० सेट् वेदएवास्य प्रयोगः । अड्नोति । आडीत् । [आड्डीत् ।
अड्ड अभियोगे समाधाने च भ्वादि० पर० सक० सेट् । अड्डति ।
अण शब्दे भ्वादि० पर० अक० सेट् । अणति । आणीत् ।
अण ज्ञीवने दिवा० आत्मने० अक० सेट् । अण्यते आणिष्ट ।
अण(न)क त्रि० अणति यथेच्छम् नदति अण-अच् ततः कुत्सायाम् क । अधमे, निन्दिते च । दन्त्यमध्यवायम् ।
अणव्य त्रि० अण-उनू अणुरस्य खञ्च्यणस्य भवनं क्षेत्रम् अणु+यत् । सर्षपादिकोत्पत्तियोग्ये (सुनाभूमि) ख्याते क्षेत्रे ।
अणि पुंस्त्री० अणति शब्दायते अण-इनू । (आरा)इति ख्याते रथच-क्रावस्थिते कीलके खञ्चाद्यवभागे च । स्त्रीत्वे वा ङीष् । अत्रा-देर्दीर्घतापीष्यते । तेन आणिः आणी ।

अणिमन् पु० अणोर्भावः अणु+इमनिच् । सूक्ष्मत्वे सूक्ष्मपरिमाणे, ऐश्वर्यभेदे च यद्बलात् सूक्ष्मीभूय सर्वत्र गन्तुं शक्नोति । ऐश्वर्याणि च "अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा । ईशित्वं च वशित्वञ्च तथा कामावसायिता" इत्युक्तानि । एतेषां स्वरूपाणि ऐश्वर्यपदार्थनिरूपणे वक्ष्यन्ते ।

अणीयस् त्रि० अणु+ईयसुन् । अतिसूक्ष्मे "अणोरणीयान् महतो महीयानिति" श्रुतिः । स्त्रियाम् ङीप् ।

अणु त्रि० अण-उन् । क्षुद्रे, सूक्ष्मपरिमाणवति, द्रव्ये, लेशे च । स्त्रियाम् अण्वी च । (चिना, काङ्नी, श्यामा) प्रभृति सूक्ष्मधान्ये पु०

अणुक त्रि० अणु+निपुणे । स्वार्थे क । सूक्ष्मे अल्पे क । क्षुद्रे ।

अणुभा स्त्री० अण्वी सूक्ष्मा भा दीप्तिर्यस्याः ब० । विद्युति ।

अण्ड न० अण्यन्ति संप्रयोगं यान्ति अनेन अम-ड टवर्गादित्वेऽपि डस्य नेत्वम् । पुंसोऽवयवभेदे शुक्रे, पक्षिडिम्बे, वीर्ये च ।

अण्डज पु० अण्डात् डिम्बात् जायते जन-ड । अण्डजाते पक्षिणि, सर्पे, मत्स्ये, (कांकलास) इति ख्याते क्रकलासे च । अण्डजातमात्रे त्रि० । स्त्रीगर्भाशयकन्दर्यान्तु स्त्री ।

अण्डालु पु० अण्ड+आलु । डिम्बविशिष्टे मत्स्ये । [मत्वर्थे च ।

अण्डीर पु० अण्डः पुंसवयवभेदः अस्यास्तीति अण्ड-ईरन् । पुरुषे,

अत बन्धने इदित् भ्वादि० पर० सक० सेट् । अन्तति । आन्तीत् ।

अत बन्धने भ्वादि० पर० सक० सेट् । अतति । आतीत् ।

अत प्रापणे, सातत्ये गतौ च भ्वादि० पर० सक० सेट् । अतति । आतीत् । क्ते अतितः ।

अतट पु० तट्यते आहन्यतेऽम्भसा इति तटं जलाघातस्थानं तन्नास्ति यस्य ब० । (आड़रीति) प्रसिद्धे आलम्बनस्थानशून्ये, पर्वताद्युच्चस्थाने, भूमेरधोभागे च ।

अतल न० अस्य भूखण्डस्य तलं पृषोदरा० इदमोऽत्वम् । सप्तपातालमध्ये प्रथमखण्डे, भूमेरधोभागे । तलशून्ये त्रि० ।

अतलस्पर्श त्रि० न तलस्याधोभागस्य स्पर्शो यत्र ब० । अतिगभीरे ।

अतस पु० अत गतौ असच् । वाते । सातत्यार्थात् अत-असच् । आत्मनि । गौरादित्वात् ङीषि । तिसि, मसिना इति ख्याते अतसीवृक्षे । तत्फलजाते द्वीमवस्त्रे न० ।

अति अव्य० अत-इ । पूजायाम्, उत्कर्षे, अतिक्रमणे, अतिशये च ।

अतिकथ त्रि० अतिक्रान्तः कथाम् । कथनायोग्ये, अश्रव्ये, नष्टे च ।

अतिकन्दक पु० अतिरिक्तः कन्दः यस्य ब० । हस्तिकन्दनामके वृक्षे ।

अतिकेशर पु० अतिरिक्तानि केशराण्यस्य ब० । वृक्षकट्वे ।

अतिक्रम पु० अति-क्रम-घञ् । लङ्घने । अतिक्रान्तः क्रममिति प्रादि स० । क्रमोल्लङ्घने त्रि० ।

अतिगण्ड पु० परिभाषया विष्कुम्भावधि षष्ठे योगे ।

अतिगन्ध पु० अतिशयितो गन्धो यस्य ब० । चम्पकवृक्षे । अतिशयितगन्धवति त्रि० ।

अतिचरा स्त्री० अतिक्रम्य चरति दुर्गभूमिजातत्वात् दुष्प्रापत्वाच्च अति+चर अच् । पद्मगरिणीवृक्षे उत्तरदेशभवे, तत्पर्यायो पद्माभेतिशब्ददर्शनात् स्वल्पपद्मिन्यामिति केचित् ।

अतिचार पु० अतिशयेन चारः अतिक्रम्य वा चारः अति+चर घञ् । अतिशयितगमने, ज्योतिःशास्त्रप्रसिद्धे मङ्गलादिपञ्चकस्य सूर्यसम्पर्कविशेषात्तत्तेजोऽसहिष्णुतया वक्रगत्यादिगत्या स्वस्वभोग्यकालमल्लङ्घ्य राश्यन्तरगमने, अस्य विवरणन्तु वाचस्पत्याभिधाने दर्शयिष्यते । [क्रम्य अतिशयेन वा गन्तृमात्रे त्रि० स्त्रियां ङीप् ।

अतिचारिन् पु० अति+चर-णिनि । पूर्वोक्तातिचारवति ग्रहे । अति-

अतिछत्र पु० अतिक्रान्तश्छत्रम् प्रादि० स० । (छातिया) इति प्रसिद्धे स्थलहस्तिविशेषे, (तालभाङ्गा) इति प्रसिद्धे जलहस्तिभेदे च । स्वार्थे क । अतिछत्रकोऽप्योति तत्रार्थे । छत्राकारपत्रपुष्पवति(छुल्फा) इति प्रसिद्धे शाकभेदे स्त्री । क्षीरस्वामिमते छत्रा इत्येव नाम ।

अतिजगती (ति) स्त्री० अतिक्रान्ता जगतीं द्वादशाक्षरपादां वृत्तिं प्रा० स० । त्रयोदशाक्षरपादके छन्दोभेदे । जगतीं भुवनमतिक्रान्त-

यति त्रि० । तत्र पुंसि क्लीवे च (अतिजगति) । [णिनि च ।

अतिजव त्रि० अतिशयितो जवो यस्य ब० । अतिवेगवति । द्रुतगा-

अतिजागर पु० अतिशयितो जागरो निद्राराहित्यं यस्य ब० । नील-वके पक्षिणि तस्य सर्वदा जागरूकत्वात् । निद्राराहित्यवति त्रि० ।

अतिडीन न० अतिक्रान्तं डीनं पक्षिगतिभेदं प्रा० स० । पक्षिणाम् अतिदीर्घगमने ।

अतितराम् अव्य० अति+तर-तसः आम् । अत्यन्तातिशये ।

अतितीक्ष्ण त्रि० अतिशयेन तीक्ष्णः कटुरसो यस्य ब० । मरीचादौ । (झजना) इति प्रसिद्धे शोभाञ्जने पु० ।

अतितीव्रा स्त्री० अतिशयेन तीव्रा पाकादौ दुर्ज्जरत्वात् प्रा० स० । वन्धि-मत्यां (गाँटदूर्वा) इति ख्यातायां दूर्व्वायाम् । अतितीव्रगुणके त्रि०

अतिथि पु० अतति गच्छति न तिष्ठति अत इथिन् । अध्वयोगेन आगन्तुके गृहागते, विशेषे च तस्य इन्द्रियेषु संसर्गमात्रकाले एव चेतसि स्थितिर्नोत्तरकालमिति गतिरनुमीयते ।

अतिथिसपर्य्या स्त्री० अतिथीनां सपर्य्या पूजनम् सपरश्चासौ कण्ड्वादिः यक् ततो ञ्यङ् । प्रत्यहं गृहस्थस्य कर्त्तव्यपञ्चयज्ञमध्ये मनुष्ययज्ञे अतिथिपूजनादौ । अतिथिपूजादयोऽप्यत्र स्त्री ।

अतिदिष्ट त्रि० अति-दिश-क्त । अतिदेशस्य कर्म्मणि । यथा प्रकृतिवत् विकृतिः कर्त्तव्येति वाक्येन प्रकृतिभूतदर्शयागादेरङ्गकार्य्याणि प्रयाजादीनि विकृतौ पश्वादियागेऽतिदिश्यन्ते । अतिदेशो नाम इतरधर्म्मस्य इतरत्रेत्थं प्रयोगाय प्राप्तिः इति मीमांसायां स्थितम् । करणव्युत्पत्त्या तदुपदेशवाक्यमपि तथा ।

अतिदोष्य पु० अतिशयेन दोष्णे अति-दोष-कर्त्तरि यत् । रक्तचित्रके लालचिता इति ख्याते वृक्षे ।

अतिदेश पु० अति-दिश-घञ् । अतिदिश्यशब्दार्थे—आख्यातरूपे-ऽपि । अतिदिश्यतेऽनेनेति करणे घञि तत्प्रतिपादकवाक्येऽपि ।

अतिधनुष् पु० अतिरिक्तं धनुर्यस्य ब० धनुषोऽनङ् । उत्कृष्टधनुर्युक्ते योधे । मनुष्यजातिनामकारिणि त्रि० ।

अतिधृति स्त्री० अतिक्रान्ता धृतिम् अष्टाद्यक्षरपादिकां वृत्तिं। प्रा०ब० । जनविंशत्यक्षरपादके छन्दोभेदे । धृतिर्धैर्यं सन्तोषो वा । अतिक्रमकारिणि त्रि० ।

अतिनु (नी) त्रि० अतिक्रान्तोनायम् प्रा०ब० क्रीते क्षुद्रः । नौकातिक्रमकारिणि । पुंसि स्त्रियां च अतिनौः ।

अतिपतन न० अति-पत-ल्युट् । अतिक्रमे, अत्यये च । अत्या०स० पातातिक्रान्तरि त्रि० । [ष० । पक्षिसेनामतिक्रान्ते त्रि० ।

अतिपत्ति स्त्री०अति-पद क्तिन् । अनिष्पत्तौ, अतिक्रमे च । अत्या०

अतिपत्तृ त्रि०अति+पद तृच् वा अतिक्रान्ते । अत्या०स० । पत्त्वातिक्रान्ते त्रि०

अतिपथिन् पु० अतिशयितः सुन्दरः पन्थाः प्रा०स० अतेः पूजार्थत्वात् न समासान्तः । सत्पथे ।

अतिपातक न० अतिक्रान्तोऽत्यन्तदुष्टत्वेनान्यत् पातकं प्रा०स० । पुंसां मातृस्वसृदुहितृगमनजन्ये स्त्रीणाञ्च पुंसपितृस्वसुरगमनजन्ये पातकविशेषे । पातकमतिक्रान्तवति पुण्यशीले त्रि० । [काले ।

अतिप्रगे अव्य० अति प्रगीयतेऽस्मिन् काले गै के । अत्यन्तप्रातः

अतिप्रश्न पु० अति+प्रच्छ नङ् । निरुत्तरप्रश्ने ।

अतिप्रसक्ति स्त्री० अति-प्र-सृज-क्तिन् । अत्यन्तासक्तौ, प्रसङ्गमतिक्रम्यान्यत्र संबन्धे अतिप्रसङ्गे च । लक्ष्ये लक्षणसंबन्धः प्रसङ्गः अलक्ष्ये तत्संबन्धोऽतिप्रसङ्गः । अत्या०स० । प्रसङ्गमतिक्रान्तवति त्रि०

अतिप्रसङ्ग पु०अति-प्रसृज घञ् । अतिप्रसक्तिपदार्थे ।

अतिबल त्रि० अतिशयितं बलं यस्य ब० । अतिशयितबलवति । अतिशयितं बलं यस्याः ५ ब० । अत्यन्तबलाधात्रिकायां पीतवर्णायां (बेडियाला) इति ख्यातायां लतायां, विश्वामित्रेण ब्रह्मास्त्रमुनिक्तः शिक्षिते रामाय दत्ते अस्त्रे च स्त्री । अतिशयितं बलम् प्रा०स० । अत्यन्ते बले, सामर्थ्ये, सैन्ये च न० ।

अतिभूमि स्त्री० अतिशयिता भूमिर्मर्य्यादा प्रा०स० । अतिमर्य्यादायाम्, व्याप्तौ च । अतिक्रमेऽव्ययी० । मर्य्यादातिक्रमेऽव्ययी० । अत्या० स० । भूमिं भुवं मर्य्यादां वातिक्रान्तवति त्रि० ।

अतिमङ्गल्य पु० अतिमङ्गलाय हितम् अतिमङ्गल+यत् । विल्ववृक्षे ।
अतिमङ्गल्याच्चे अतिमङ्गलयुक्ते च त्रि० ।

अतिमर्य्याद अव्य० । अतिक्रमे अव्ययी० मर्य्यादातिक्रमे । प्रा०-
ब० । मर्य्यादामतिक्रान्तवति त्रि० । [तिक्रमकर्त्तरि च ।

अतिमात्र त्रि०अतिक्रान्तो मात्रामल्पं अत्या०स० । अतिशयिते, मात्रा-

अतिमुक्त त्रि० अतिशयेन मुक्तः विदेहकैवल्यं गतः अति मुच-कर्त्तरि
क्त । निर्व्वाणमुक्तिमति । अतिक्रान्ता मुक्तां शोभामात् अत्या०स० ।
माधवीलतायां पु० ।

अतिमुक्तक त्रि० अतिशयेन मुक्त-स्वार्थे क । निर्व्वाणमुक्तिमति ।
अतिशयितमुक्ते च । अतिशयेन मुक्तं विस्तारोऽस्य मुच-भावे क्त
वा कप् । अतिविस्तृते तिन्दुकवृक्षे पु० ।

अतिमोदा स्त्री० अतिशयितो मोदो यस्याः ब० । नवमल्लिकायाम् ।
अत्यन्तमोदवति त्रि० ।

अतिरथ पु० अतिक्रान्तो रथं रथिनम् अत्या०स० । योधविशेषे
"अमितान् योधयेद्यस्तु सशस्त्रोऽतिरथस्तु सः" इत्युक्तलक्षणे
रथातिक्रमकारके त्रि० ।

अतिरसा स्त्री० अतिशयितो रसो यस्याः ब० । (राखा) इति ख्या-
तायां मूर्वालतायाम् । अत्या० स० । रसातिक्रान्ते त्रि० ।

अतिराज पु० अतिक्रान्तोराजानं अत्या०स०अच्-समासान्तः । यज्ञवि-
शेषे । राजातिक्रान्ते त्रि० ।

अतिरिक्त त्रि० अति-रिच्-क्त । अतिशयिते, श्रेष्ठे, भिन्ने, शून्ये
च । भावे क्त । अतिशये आधिक्ये न० ।

अतिरूक्ष त्रि०अतिशयितः रूक्षः अत्या०स० । अत्यन्तरूक्षे स्नेहशून्ये ।
तथाभूते कङ्गुकोद्रवादिधान्ये पु० । अतिक्रान्तोरूक्षम् । अतिशय-
स्निग्धे त्रि० । [धिक्ये च ।

अतिरेक पु० अति-रिच्-घञ् । अतिशये, भेदे, प्राधान्ये, आ-

अतिरोग पु० अतिशयितो रोगः रुज-घञ् । क्षयरोगे । अत्या०
स० । रोगातिक्रान्ते त्रि० ।

अतिरोमश पु० अतिशयितं रोम अतिरोमन्+श। बनजाते छागे। अत्यन्तरोमाढ्ये त्रि०।

अतिवक्तृ त्रि० अति-वच तृच्। बाचालके, वाचोयुक्तिदक्षे च।

अतिवर्णाश्रमिन् पु० अतिक्रान्तोवर्णानाश्रमिणश्च अत्या०स०। ब्राह्मणादिवर्णभिन्ने ब्रह्मचर्य्याद्याश्रमिभिन्ने च "यो वेदान्तमहावाक्यश्रवणेनैव केशव!। आत्मानमीश्वरं वेद सोऽतिवर्णाश्रमी भवेत्" इत्युक्तलक्षणे ब्रह्मज्ञाश्रमिणि।

अतिवर्त्तिन् त्रि० अति-वृत-णिनि। अतिक्रमकारके।

अतिवर्त्तुल पु० अतिशयितः वर्त्तुलः प्रा० स०। (बाटुलाकलाइ) इति ख्याते वर्त्तुलाकारके कलाये। अत्यन्तवर्त्तुले त्रि०। [च।

अतिवाद पु० अति+वद-घञ्। अत्युक्तौ, कठोरवाक्ये, अप्रियवाक्ये

अतिवादिन् त्रि० सर्व्वानतीत्य वदतीति अति+वद-णिनि। सर्व्वानतिक्रम्य वदनशीले, सर्वमतखण्डनेन स्वमतव्यवस्थापके च।

अतिवाहित त्रि० अति+वह-णिच्-क्त। यापिते, अतिक्रान्ते च।

अतिविकट पु० अतिशयेन विकटः प्रा० स०। दुष्टहस्तिनि। अतिकराले त्रि०। [ख्यातायां लतायाम्। विघातिक्रमकारके त्रि०।

अतिविषा स्त्री० अतिक्रान्ता विषम् अत्या०स०। (आतश्च) इति

अतिवृत्ति स्त्री० अति+वृत-क्तिन्। अतिक्रमे। वृत्तिर्जीविका तामतिक्रान्ते त्रि०। [रतिभेदे।

अतिवृष्टि स्त्री० अति+वृष-क्तिन्। अत्यन्तवृष्टौ यस्योपघातकोपद्रवरूपे

अतिवेल त्रि० अतिक्रान्तो वेलां मर्य्यादाम् कूलं वा अत्या०स०। अतिशयिते, निर्मर्य्यादे, समुद्रकूलातिक्रमकारके च। अतिक्रमे अव्ययी०। वेलातिक्रमे अव्य०।

अतिव्याप्ति स्त्री० अतिशयेन लक्ष्यमलक्ष्यञ्चाविशिष्य व्याप्तिर्व्यापनम् अति+वि+आप्-क्तिन्। अतिशयव्यापने 'लक्ष्यस्यैवालक्ष्यस्यापि व्याप्ते'। तथा च यत्र यस्य स्थितिरुचिता ततोऽन्यत्रापि तस्य मन्यन्ते अतिव्याप्तिः। यथा दृष्टिव्याः गन्धो लक्षणं तत्रैव तस्य

स्थितिरुचिता तस्य वाय्वादौ सत्त्वप्रसङ्गे अतिव्याप्तिः । यथा वा धूमे वह्निव्यापकता न तु जले, तथा जले प्रसक्तौ अतिव्याप्तिः ।

अतिशक्ति स्त्री० अतिशयिता शक्तिः कर्मसाधनसामर्थ्यम् देहजं बलम् वा प्रा० स० । अतिशयिते सामर्थ्ये, अधिकवीर्ये च । अतिक्रान्तः शक्तिम् अत्या०स० । सामर्थ्यातिक्रमकारके त्रि० । अतिशयिता शक्तिर्यस्य प्रा० ब० । अतिशयबलवति त्रि० अतिक्रमेऽव्ययी० । शक्त्यतिक्रमे अव्य० ।

अतिशक्करी स्त्री० अतिक्रान्ता शक्करीम् चतुर्दशाक्षरपादिकां वृत्तिम् अत्या०स० । पञ्चदशाक्षरपादके छन्दोभेदे ।

अतिशय पु० अति–शीङ्-अच् । आधिक्ये, अतिरेके, च अतिक्रान्तः शयं हस्तं अत्या०स० । हस्तातिक्रमकारके त्रि० ।

अतिशयित पु० अति+शीङ्-क्त । अधिके, अतिक्रान्ते च ।

अतिशयोक्ति स्त्री० अतिशयेन उक्तिर्निर्देशः वच-क्तिन् । अलङ्कारशास्त्रप्रसिद्धे अर्थालङ्कारभेदे । सा०द०पर० ।

अतिशायन न० अति+शीङ्–ल्युट् । अतिशायने "इष्ठन्" पा० स्वत्वनिर्देशात् नि०दीर्घः । आधिक्ये, प्रकर्षे च । तद्विशिष्टे त्रि० ।

अतिशीत न० अतिशयितं शीतम् प्रा० स० । अत्यन्तशीतलस्पर्शे ।

अतिशोभन त्रि० अति+शुभ-ल्यु । अत्यन्तशोभान्विते, श्रेष्ठे च ।

अतिसन्ध्या स्त्री० अत्यासन्ना सन्ध्या प्रा०स० । पूर्वदिवसीय रात्रेर्घटिकादण्डादिसूर्योदयपर्यन्तः, सूर्यास्तात् पूर्वोत्तरदण्डात्मकश्च कालः सन्ध्या तस्याः अत्यासन्ने काले ।

अतिसर्ग पु० अति+सृज-घञ् । दाने, कामचारानुज्ञायां यथेच्छं क्रियतामित्याद्यभिलाषप्रकृपायाञ्च । सर्गं सृष्टिमतिक्रान्तरि त्रि० ।

अतिसर्जन न० अति+सृज-ल्युट् । दाने, बधे, विप्रलम्भे च ।

अतिसायम् अव्य० अत्यासन्नं सायम् प्रा०स० । सूर्यास्तकालः सायम् तस्यासन्ने काले ।

अतिसार पु० अतिशयेन सारयति रेचयति अति+सृ-णिच्-अच् । बद्धद्रवीभूतमलनिःसारके उदरामये रोगे । अतेर्दीर्घतापि वा ।

अति (ती) सारकिन् त्रि० अतिसारोरोगोऽस्यास्ति अतिसार+इनि कुक् च् । अतिसाररोगवति । अतेर्दीर्घतापि वा ।

अतिसृष्ट त्रि० अति+सृज-क्त । दत्ते, प्रेरिते ।

अतिसौरभ पु० सुरभेर्भावः अण् सौरभम्, अतिशयितं तदस्य ब० । अत्यन्तामोदवति आम्रे । सौरभान्विते वस्तुमात्रे त्रि० ।

अतीत त्रि० अति+इण्-क्त । अतिक्रम्य गते, नाशप्रतियोगिनि भूते काले तत्कालवृत्तिपदार्थमात्रे च ।

अतीन्द्रिय त्रि० अतिक्रान्तमिन्द्रियं तद्विषयत्वात् अत्या० स० । इन्द्रियायोग्ये अप्रत्यक्षे, नेत्रश्रोत्रनासिकारसनात्वक्चेतांस्येतानीन्द्रियाणि तैर्ज्ञातुमशक्ये विषये । [न्यातिशये च ।

अतीव अव्य० अत्येव-इवः अवधारणे प्रा० स० । अवधृतातिशयेऽत्यन्ते

अतुल त्रि० तुल-णिच्—अ तुला सा नास्ति यस्य ब० । उपमाशून्ये, अत्यन्तशोभाढ्ये च । तिलवृक्षे पु० ।

अतुल्य त्रि० तुलां वाऽर्हमर्हति तुला+यत् न० त० । अनुपमे, सौन्दर्य्यातिशयशालिनि च ।

अतृप्ति स्त्री० तृप-क्तिन् अत्यन्ताभावार्थे-न० त० । तृप्तिराहित्ये । ब० । तृप्तिरहिते, अत्यन्तोर्षिणि, लोलुपे, च त्रि० ।

अतृट् वधे भ्वा० आत्म० सक० सेट् । अतृते आतृष्ट । णिचि अतृटयति ते आतितृट् त ।

अत्ता स्त्री० अतति संबध्नाति अत-तक् दृडभावः । मातरि, श्वश्वाञ्च । नाऽयेऽस्य व्यवहारः स्वार्थे के कापि अत इच्चे । अत्तिकायत्त ।

अत्यन्त न० अतिक्रान्तोऽन्तं सीमाम् अत्या० स० । अतिशये । तद्युक्ते सर्वपरिच्छेदातिक्रान्ते त्रि० । अतिक्रमेऽव्ययी० । परिच्छेदातिक्रमे नाशातिक्रमे च अव्य० । [अत्यन्तकोपशालिनि ।

अत्यन्तकोपन त्रि० अत्यन्तं कुप्यति अत्यन्त+कुप-ल्यु, ऋत० स० ।

अत्यन्तगामिन् त्रि० अत्यन्तम् अत्यन्तायं गच्छति अति+अन्त अत्यये अव्ययीभावः ततः-गम-णिनि । आत्यन्तिके, अतिशयगमनशीले च स्त्रियां ङीप् अत्यन्तगामिनी ।

अत्यन्तसंयोग पु० अत्यन्तेन साकल्येन संयोगः संबन्धः व्याप्तिरिति यावत् । अन्तमवसानमतिक्रान्तः संयोगो वा अत्यन्त+अम्+युज-घञ् सन्ततसंबन्धे व्याप्तादौ ।

अत्यन्ताभाव पु० अत्यन्तः नित्यः अभावः कर्म्म० । नास्तीति वाक्याभिलप्यमाने नाशप्रागभावभिन्ने संसर्गाभावे । यथा भूतले घटो नास्ति इति वाक्येन न्यायमते भूतले घटाभावः प्रतीयते स च न नाशः नापि प्रागभावः । नाशप्रागभावयोस्तु न अत्यन्तता प्रतियोगिकाले तयोरसत्त्वात् । [कारिणि ।

अत्यन्तिक त्रि० अत्यन्तं गच्छति अत्यन्त+ठन ठस्येक । अतिशयितगति-

अत्यन्तीन त्रि० अन्तस्यात्ययः अत्यन्तम् अत्यये व्ययी० अत्यन्तं गामी अत्यन्त+ख । अतिशयितगतिशीले ।

अत्यम्ल पु० अतिशयितोऽम्लोरसः फलपत्रादौ यस्य ब० । (तेतुल) इति प्रसिद्धे तिन्तिड़ीवृक्षे । अत्यन्ताम्लरसवति वस्तुमात्रे त्रि० । वनबीजपुरे (टाबालेबु) इति प्रसिद्धे वृक्षे स्त्री० ।

अत्यम्लपर्णी स्त्री अत्यम्लं पर्णं यस्याः जातित्वात् ङीष् । अत्यम्लपत्रयुक्ते वनबीजपुरे (टाबालेबु) इतिख्याते वृक्ष ।

अत्यय पु० अति+इण-अच् । अतिक्रमे, अभावे, विनाशे, दोषे, कृच्छ्रे, अतिक्रम्य गमने, कार्य्यस्यावश्यम्भावाभावे च ।

अत्यर्थ न० अतिक्रान्तमर्थमनुरूपस्वरूपं अत्या० स० । अतिशये । तद्विशिष्टे त्रि० अत्यये अव्य० । अर्थाभावे अव्य० ।

अत्यल्प त्रि० अतिशयितोऽल्पः प्रा० स० । अत्यन्ताल्पे अणुतरे ।

अत्यष्टि स्त्री अतिक्रान्ता अष्टिं षोड़शाक्षरपादिकां वृत्तिं अत्या० स० । सप्तदशाक्षरपादके छन्दोभेदे ।

अत्याकार पु० अतिशयेन आकारः तिरस्कारः प्रा० स० अति+आ+कृ-घञ् । तिरस्कारे । अतिशयित आकारो मूर्त्तिः प्रा० स० । महादेहे । अतिशयित आकारो यस्य ब० । तद्विशिष्टे त्रि० ।

अत्यागिन् त्रि० त्यज-घिणुन् मन्दाग्र नञ् त० । कर्म्मफलानुसन्धानेन कर्म्मानुष्ठायिनि, त्यागिभिन्ने च ।

अत्याचार पु॰अत्युत्कट आचारः आ+चर–घञ् प्रा॰स॰। अनुचिताचरणे। अतिक्रमे अव्ययी॰। आचारातिक्रमे अव्य॰।

अत्याधान न॰ अति-आ-धा ल्युट्। अतिक्रमणे, सम्बन्धमात्रे, उपरिस्थापने च। अव्ययी॰। अग्न्याधानातिक्रमे अव्य॰।

अत्याल पु॰ अतिशयेन समन्तात् अलति पर्याप्नोति अति+आ+अल–अच्। (लालचिता) इति ख्याते रक्तचित्रकवृक्षे, तस्य अत्यल्पकालेन समन्तात् व्यापनात् तथात्वम्।

अत्याश्रम त्रि॰अतिक्रान्त आश्रमान् तद्विहितधर्मान् अत्या॰स॰। सर्वाश्रमत्यागिनि पञ्चमाश्रमिणि संन्यासिनि अत्र्याश्रमिन् इत्यपि। अतिशयित आश्रमः प्रा॰स॰। उत्तमाश्रमे संन्यासे पु॰।

अत्याहित न॰ अत्यन्तमाधीयते तन्निवारणार्थं मनोदीयतेऽस्मिन् आ+धा–क्त। अत्यन्तभीतौ, प्राणहानिशङ्काकरे अनर्थे च।

अत्युक्ति स्त्री॰ अतिशयेन अनौचित्येन वा उक्तिः अति+वच–क्तिन्। अतिशयोक्तौ, अन्याय्योक्तौ, निर्गुणजनस्य आरोपितगुणेन स्तवने।

अत्युक्था स्त्री॰ उक्थ्या एकाक्षरपादिका इति; अतिक्रान्ता ताम् अत्या॰स॰। ह्यक्षरपादके छन्दोभेदे। उक्थनामकसामभेदाति क्रान्तरि त्रि॰।

अत्यूह पु॰ अतिशयेन ऊह्यते यद्वायते अति+ऊह–अच्। कालकण्ठे (डेओ)इति प्रसिद्धे दात्यूहे पक्षिणि। अतिशयेन ऊहस्तर्कः प्रा॰स॰। अतिशयवितर्के। (नील) इति ख्यातौषधौ नीलिकायां स्त्री॰। अतिक्रमेऽव्ययी॰। वितर्कातिक्रमे अव्य॰।

अत्र अव्य॰ वा इदम्+एतद्+वा सप्तम्यास्त्रल् प्रकृतेरत्–भावश्च। अस्मिन् एतस्मिन् वेत्यर्थे। [च। स्त्रियां ङीप् अत्रभवती।

अत्रभवत् त्रि॰ इदम्+एतद्+वा प्रथमायास्त्रल्। पूज्यार्थे, श्राद्धे

अत्रि (त्रि) पु॰ अद+त्रिन्। सप्तर्षिमध्ये मुनिविशेषे। अत्र पक्षे वा तलोपे त्रिरित्यपि। त्रिमिश्रे त्रि॰ बहुवचनान्तः।

अत्रिजात पु॰ अत्रेर्नेत्रात् जातः जन–क्त ५त॰। चन्द्रे, अपत्यार्थं तपस्यां कुर्वतोऽत्रेर्नेत्रात् जातो हि चन्द्रः।

अत्रि (त्रि)न् पु० अद्–त्रिणि । सप्तर्षिमध्ये मुनिभेदे । पक्षे तलोपः ।

अथ अव्य० चु०अर्थ–ड पृषो० रलोपः । संशये, आरम्भे, आनन्तर्ये, प्रश्ने, विकल्पे, प्रकरणे समुच्चये, पक्षान्तरे च । मङ्गलं तु नास्यार्थः किन्तु अर्थान्तरप्रयुक्तोऽप्ययं श्रुत्या मङ्गलसाधनं भवति ।

अथकिम् अव्य० अथ+कायते कवते वा डिसु । स्वीकारे ।

अथर्व्वन् पु० अथ+ कृ–वनिप् । अथर्व्वनामकमुनिविशेषे, तन्मुनिदृष्टतया तुरीये वेदे च ।

अथर्व्वविद् पु० अथर्व्ववेदं तदुक्तं कर्म वा वेत्ति विद्– क्विप् । अथर्व्ववेदस्य मन्त्रोदेवीरमीष्टयइत्यादिकस्य, तद्विहितानिचारादिकर्मणश्च वेत्तरि वशिष्ठादौ ।

अथवा अव्य० अथ+वा–क्विप् । पक्षान्तरे ।

अथो अव्य० अर्थ–डो पृषो० रलोपः । अथशब्दार्थे आरम्भादौ ।

अद् बन्धने भ्वा० पर० इदित् सक० सेट् । अन्दति । आन्दीत् ।

अद् भक्षणे अवने च अदा० पर० सक० अनिट् अत्ति अघसत् जघास अत्ता अत्स्यति सनि जिघत्सति ।

अद् अव्य० अद्–क्विप् । आश्चर्य्ये ।

अदत्ता स्त्री० न० दा–क्त । अपरिणीतायाम् स्त्रियाम् । अदत्तमात्रे त्रि० । अप्राशस्त्ये न०त० । अदत्तन्तु 'भयक्रोधशोकावेगरुजान्वितै'रित्याद्यभिहितलक्षणे, दानाभासेनार्पिते दत्त्वापि गृह्यादर्त्तुं योग्ये त्रि० ।

अदत्तादायिन् त्रि० अदत्तमादत्ते आ+दा–णिनि इ त० । चौरे ।

अदभ्र त्रि० दम्भ रक् दम्भलं न०त० । अनल्पे 'अदभ्रदर्भामधिशय्य स स्थली'मिति भारविः ।

अदर्शन त्रि० दृश–भावे ल्युट् न०ब० । दर्शनायोग्ये, अतीन्द्रिये, नाशे; व्याकरणशास्त्रपरिभाषिते लोपे च । अव्ययी० दर्शनाभावे अव्य० ।

अदल पु० दल्यते भिद्यते इति दलं पत्रं दल–कर्मणि घञ् न०ब० । दलशून्ये (हिजल) इति ख्याते वृक्षे । पत्रशून्ये वृक्षमात्रे त्रि० । वृक्षमाख्यां स्त्री० ।

अदस् त्रि० न दृश्यते उत्क्षिप्यतेऽङ्गुलिर्यत्र इदन्तया निर्द्धारणाय पुरो-

वर्त्तिन्येवाङ्गुलिमिद्द यः सम्भवति नापुरोवर्त्तिनि । न+दृश् क्विप् । अपुरोवर्त्तिनि परोक्षे ज्ञाते वस्तुनि ।

अदाह्य त्रि० दग्धुमशक्ये दह्-ण्यत् न०त० । निराकारतया दाहायोग्ये परमात्मनि । दाहानर्हे महारोगिप्रभृतौ त्रि० ।

अदिति (ती) स्त्री० न+दा-डिति वा ङीप् । दातुं च्छेत्तुमयोग्यायाम् श्रुतौ, दितिरसुरमाता विरोधे न०त०तद्विरोधिन्यामदितौ सुरमातरि दक्षप्रजापतेः कन्यायाम् कश्यपपत्न्याम्,अदितिदेवताके पुनर्वसुनक्षत्रे च दो-क्तिन् दितिः खण्डस्तद्रहिते त्रि० ।

अदितिज पु० अदितेर्जायते जन-ड ५त० । देवे ।

अदीन त्रि० दी-क्त न०त० । कातर्य्यरहिते उदारे ।

अदृष्ट न०दृश-क्त न०त० । पुण्यापुण्यरूपे भाग्ये, इन्द्रियायोग्यत्वात् तस्यादृष्टत्वम् । अदृष्टहेतुके भयादौ च । दृष्टभिन्ने त्रि० ।

अदृष्टपूर्व्व त्रि० न पूर्वं दृष्टः सह सुपेति स० परनि० । पूर्वमदृष्टे ।

अदृष्टि स्त्री० विरुद्धा दृष्टिः विरोधार्थे न०त० । क्रूरदृष्टौ, सरोषवक्रदृष्टौ, दर्शनाभावे च ब० । दृष्टिशून्ये त्रि० ।

अद्धा अव्य० अञ्चते अत् तां सन्तं गमनं ज्ञानं वा दधाति क्विप् । याथार्थ्ये,साक्षात्कारे,स्फुटे, अवधारणे, अतिशये आकाङ्क्षिते च ।

अद्भुत न० अततीत्यत् अव्ययमाकाङ्क्षितार्थे तथा भाति भा-डुतच् । आकाङ्क्षिते उल्कापातादौ, आलङ्कारिकप्रसिद्धे नवरसान्तर्गतविस्मयस्थायिभावके रसे च । तद्वति त्रि० ।

अद्भुतखन पु० अद्भुतः खनोयस्य खन-अच् ब० । महादेवे । कर्म० । आश्चर्य्यशब्दे । ब० तथाशब्दवति त्रि० ।

अद्य अव्य० अस्मिन्नहनि इदम्शब्दस्य निपातः सप्तम्यर्थे । अस्मिन् दिवसे । आधारार्थत्वेऽपि अस्य समासान्तरघटकता तेनाद्यदिवसादारभ्य इति, "अद्यप्रभृत्यवनताङ्गीति" कुमारः ।

अद्यतन त्रि० अद्य भवः अद्य+ट्यु, तुडागमश्च । अद्यभवे वस्तुमात्रे । स्त्रियां ङीप् अद्यतनी ।

अद्यत्वे अव्य० इदम्शब्दस्यदानीमित्यर्थे निपा० । अधुनार्थे ।

अद्यश्वीना स्त्री० अद्य श्वः परदिने वा प्रसोष्यते । अद्य+श्वस्+ख टिलोपः। आसन्नप्रसवायां गर्भिण्याम् ।

अद्रि पु० अद्-क्रिन् । पर्वते, दृषदि स्त्रियाँ, परिमाणभेदे च ।

अद्रिकर्णी स्त्री० अद्रिः अद्रिनामिका गिरिवल्लिभूमिका तस्याः कर्णः कर्णतुल्यं पत्रं यस्याः गौरादित्वात् ङीष् । बालभूमिकाल्पपत्रायाम् अपराजितालतायाम् । [भूमौ ।

अद्रिकीला स्त्री० अद्रयः कुलाचलाः कीलाः शङ्कव इव यस्याः. ब० ।

अद्रिज न० अद्रौ जायते जन-ड ७त० । (शिलाजतु) इति स्वनामप्रसिद्धे गन्धद्रव्ये । (गेरि) इति प्रसिद्धे द्रव्ये इति केचित् । पार्वत्यां स्त्री० । पर्वतभवमात्रे त्रि० ।

अद्रितनया स्त्री० अद्रेर्हिमाचलस्य तनया । पार्वत्याम् ।

अद्रिभिद् पु० अद्रिं विनक्ति भिद्-क्विप् ६त० । इन्द्रे ।

अद्रिभू स्त्री० अद्रावपि भवति भू- क्विप् ७त० । अपराजितालतायाम् तस्याः पर्वतेऽप्यतिकठोरभूमिके जायमानत्वात्तथात्वम् ।

अद्रिराज पु० अद्रीणां राजा टच् समा० । हिमाचले ।

अद्रिसार पु० अद्रेः सार इव । लौहे ।

अद्रीश पु० अद्रीणां अद्रेर्वा ईशः ६त० । हिमाचले, शिवे च ।

अद्वय न० द्वयं द्वयं नञ्ना ब० । सजातीयविजातीयस्वगतभेदशून्ये परब्रह्मणि । सजातीयद्वितीयरहिते, द्वयशून्ये च वस्तुमात्रे त्रि० । नास्ति द्वयं यस्य मते ब० । बुद्धभेदे पु० ।

अद्वयवादिन् पु० अद्वयं वदति सर्वमेव वस्तु चिन्मात्ररूपं नान्यदतो द्वितीयमस्तीति वदति वद-णिनि । अद्वैतवादिनि वैदान्तिके बाह्यार्थाभावेन ज्ञानात्मकं सर्वं वस्तु स्वीकर्त्तरि बौद्धे च । स्त्रियां ङीप् यादिनी । [हिते । केवले एकस्मिन् परमात्मनि न० ।

अद्वितीय त्रि० न द्वितीयः सदृशो यस्य न० ब० । सजातीयद्वितीयर-

अद्वैत त्रि० द्विधा कृतं भेदं गतम् द्वीतम् तस्य भावः द्वैतं तन्नास्ति यस्य ब० । सजातीयादिभेदशून्ये केवले परमात्मनि ।

अद्वैतवादिन् त्रि० अद्वैतं सर्वमेव चिदात्मकं वदतीति वद णिनि ।

सर्वमेव चिदात्मनि रज्जौ इव रजतादिवत् आरोपितं सत् प्रतिभाति तत्याधिष्ठाने च यथा रजतबुद्धिर्निवर्त्तते एवं चिदात्मनि याथार्थ्येनावगते सर्वं बाह्यं वस्तु निवर्त्तते इति वादिनि वैदान्तिके ब्रह्मविशेषे च ।

अधःक्षिप्त त्रि० अधो मुखेन क्षिप्तम् क्षिप्-क्त शाक०त०। अधोमुखेन स्थापिते न्यञ्चिते न्युञ्चीकृतेऽधस्ताच्चिक्षिप्ते च ।

अधःपुष्पी स्त्री० अधोमुखानि पुष्पाण्यस्याः जातित्वात् ङीष् । (सुनफा) इति ख्याते अवाक्पुष्पीवृक्षे ।

अधन त्रि० नास्ति धनं स्वाधीनतया यथेष्टमुपयोक्तुं यस्य ब० । भार्य्यापुत्रदासादिषु तेषां धनस्वामित्वेऽपि कार्य्ये यथेष्टविनियोगस्य पत्यादिसापेक्षत्वात् अधनत्वम् "भार्य्यापुत्रश्च दासश्च त्रयएवाधनाः स्मृताः । यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनमिति" स्मृत्युक्तत्वात् । निर्धने अल्पधने च । [कुत्सिते, हीने च ।

अधम त्रि० अव-अम धादेशः अधोभवः अधस्+मः अन्यलोपो वा ।

अधमर्ण त्रि० अवश्यदेयम् ऋणं तत् अधमं शोध्यं यस्य ब० । अवश्यदेयर्णशोधके (खातक) इति प्रसिद्धे ऋणग्रहीतरि ।

अधमाङ्ग न० अधमम् अङ्गम् कर्म्म० । चरणे ।

अधर पु० न म्रियते मृङ्-अच् न० त० । (ठोट) इति ख्याते ऊर्द्धे, नीचे वा ओष्ठे । धरणं धरा तत्संबन्धरहिते हीने, तले, नीचे च त्रि० ।

अधरात् अव्य० अधस्+प्रथमायाः पञ्चम्याः सप्तम्या वा आति अन्यलोपः अधोभागे । विवक्षावशात् अधरात्-रमणीयम् आगतो वसति वेत्यर्थानुसन्धानेन प्रथमान्ताद्यर्थो बोध्याः ।

अधरेण अव्य० अधरस्मिन् देशे, काले दिशि वा अधर+ एनप् । आसन्ने नीच देशादौ अवरस्यां दिशि च ।

अधरेद्युस अव्य० अवरस्मिन्नह्नि अधर+एद्युस् । अधरदिवसे ।

अधर्म्म पु० धियतेऽनेन धृ-मनिन् विरोधे न० त० । धर्मविरोधिनि वेदनिषिद्धकर्म्मजन्ये पापे, तद्धेतुभूतप्राणिहिंसादौ च । पुण्यरूप-

धर्म्मशून्ये त्रि०। गुणाद्यपरपर्य्यायः धर्म्मस्तद्रहिते ब्रह्मणि न०।

अधश्चरः पु० अधःकर्म्मणि स्तेयादौ चरतीति चर-ट। चौरे।

अधःस्थानगामिनि त्रि०। स्त्रियाम् ङीप्।

अधःशय्या स्त्री० शीङ्-क्यप् शय्या ७त०। भूमिशयने।

अधस् अव्य०अधर+असि अधरशब्दस्थाने अधादेशश्च। पाताले, अधः-स्थानमात्रे च। तत्रापि अर्थवशात् प्रथमापञ्चमीसप्तम्यर्था उन्नेयाः

अधस्तात् अव्य० अधर+अस्तात्। अधःशब्दवत् नीचार्थे।

अधि अव्य० न+धा-कि। अधिकारे, ऐश्वर्य्ये, स्वत्वे, अधिक्षेत्यर्थे, उपरि, आधिक्ये, अतिशये च। आधीयते दुःखमनेनेति धा+धा-कि वा ह्रस्वः। मनःपीड़ायाम् पु०। [१०परि० द्रष्टव्यम्]।

अधिक त्रि०अधि+क। अतिरिक्ते, अनेकक्षिन्, अर्थालङ्कारभेदेसा०

अधिकरण न० अधि+कृ-ल्युट्। आधारे, व्याकरणशास्त्रे परिभाषिते अधिकरणसंज्ञके कर्तृकर्मद्वारा क्रियाश्रये कारके, यथा गेहे स्थाल्यामन्नं पचतीत्यादौ गेहस्य कर्तृद्वारा, स्थाल्याश्च कर्म्मद्वारा, परम्परया पाककियाश्रयत्वम्, पूर्वोत्तरमीमांसाशास्त्रप्रसिद्धे एकार्थप्रतिपादके न्यायसमुदाये अधिक्रियते निर्णयार्थं विचारोऽस्मिन् विषयसंशयपूर्वपक्षसिद्धान्तनिर्णयात्मकपञ्चाङ्गबोधकवाक्यसमुदाये च। तत्र विचारार्हं वाक्यं विषयः तस्यार्थविषये सन्देहः इदमित्थं न वेति विकल्पः। तत्र सन्दिह्यमानयोः पक्षयोः असत्पक्षे युक्तिप्रदर्शनवाक्यं पूर्वपक्षवाक्यं सिद्धान्तः पूर्वपक्षोक्तां युक्तिं खण्डयित्वा सत्पक्षे युक्तिप्रदर्शनवाक्यम्। ततश्चेत्याद्यभिलापेन सिद्धान्तसिद्धार्थोपसंहारकं वाक्यं निर्णायकवाक्यमिति विस्तरस्तु वाचस्पत्यादिधाने।

अधिकरणविचाल पु०अधिकरणस्य विचालः अन्यथाकरणं वि-चल घञ् ६त०। द्रव्यस्य अवस्थान्तरकरणेन संख्यान्तरकरणे, विचालो नाम यदेकमनेकं क्रियते अनेकं वैकं क्रियते इति भाष्यम्। एकस्य राशेः पञ्चधाविभागे, पञ्चात्मकस्य वा एकधा करणेऽधिकरणस्य संख्याया विचालः।

अधिकर्म्मिक पु०(न०)अधिकमत्र दृष्टं कर्म्मणेऽलम् अधि–कर्म्मन्+ठ। दृष्टाध्यक्षे, दृष्टस्यवणिग्भ्यः शुल्कादानकर्म्मणि नियुक्ते च।

अधिकाङ्ग पु० अधिकोऽङ्गात्। वर्म्मधरैर्योधैर्हृदयमध्ये वर्म्मदार्ढ्यार्थं बद्धपट्टिकादौ। ब०। अधिकाङ्गवति त्रि०।

अधिकार पु० अधि+कृ–घञ्। आरम्भे, यथेष्टं क्रयविक्रयादिकर्त्तृत्वसम्बादके स्वामित्वे, विनियोज्यपुरुषेण संबन्धे, यथा विहितकर्म्मणि ब्राह्मणादेरधिकारः। राज्ञां च्छत्रचिह्नादिधारणादौ, यथाऽयं च्छत्रधारणेऽधिकारी, प्रकरणे, व्याकरणशास्त्रे पूर्वसूत्रोपात्तपदादेरुत्तरत्र सूत्रेषु अनुवृत्तौ च।

अधिकारविधि पु० अधिकारे फलस्वाम्ये विधिर्विधानम् वि+धा–कि ७त०। कर्म्मजन्यफलभोक्तृत्वापके विधौ यथा यजेत इत्यनेन यागजन्यफलभोक्ता स्वर्गकामीति ज्ञाप्यते।

अधिकार्थवचन न०अधिकार्थस्य स्तुतिनिन्दाभ्यामारोपितस्य वस्तुधर्म्मादतिरिक्तस्य वचनम् वच–ल्युट् ६त०। स्तुत्यर्थवादे,निन्दार्थवादे च।

अधिकृत पु० अधि+कृ–क्त। आयव्ययाद्यवेक्षके, अध्यक्षे कर्म्मजन्यफलसंबन्धिनि च। स्वामित्ववति त्रि०।

अधिक्षिप्त त्रि०अधि+क्षिप्–क्त। स्थापिते, निन्दिते, कृताधिक्षेपे च

अधिक्षेप पु० अधि+क्षिप–घञ्। तिरस्कारे।

अधिगत पु० अधि+गम–क्त। ज्ञाते प्राप्ते, स्वीकृते च।

अधिगम पु० अधि–गम–घञ्। ज्ञाने, प्राप्तौ, स्वीकारे च।

अधिचक्रा स्त्री० अधि+चक्रन्। पर्वतस्योपरिभूमौ।

अधिदेवता स्त्री०देवएव देवता अधिका देवता देवतायां वा अधीश्वरत्वात्। देवानामपि सूर्य्यादिग्रहादीनामीश्वरे रुद्रादौ। ते च सूत्युक्ता बोध्या यदधिष्ठानाद्धि सूर्य्यादयः स्वस्वकार्य्यं कुर्व्वन्ति।

अधिदैवत न० देवतैव स्वार्थे अण्। अधिदेवतावत् समानार्थे। हिरण्यगर्भे, अन्तर्यामिनि पुरुषे च पु०। स च दैवतानि चक्षुरधिष्ठातॄणि सूर्य्यादीनि तत्तत्कर्म्मणि नियुज्य चक्षुरादीनीन्द्रियाण्यनुगृह्णातीति तस्य सर्वदेवतेश्वरत्वम्।

अधिनाथ पु० अधिनीयते वायुना गन्धाधारत्वेनाश्रीयतेऽनयनद्वारा तत्तत्-स्थानं ह्रियतेऽसौ अधि+नी-घञ् । गन्धे ।

अधिप त्रि० अधि+पा-क । राजनि, प्रभौ च ।

अधिपति पु० अधि+पा-डति । प्रभौ ।

अधिभू पु० अधिभवति स्वामीभवति स्वाम्यर्थेऽत्राधिः भू-क्विप् । प्रभौ ।

अधिमांसक पु० अधिको मांसो यत्र ब० कप् । दन्तरोगविशेषे "हनूस्थे पश्चिमे दन्ते महाशोथो महारुजः । कालान्नायी कफक्लेदो विज्ञेयः सोऽधिमांसक" इति वैद्यकम् ।

अधिमास पु० अधिको रविमासादतिरिक्तः शुक्लप्रतिपदादिदर्शान्तश्चान्द्रोमासः प्रा० स० । मलमासे असंक्रान्तमासोऽधिमासो निरुक्त इतिस्मृतेः रविसंक्रान्तिवर्जितो मासोऽधिमासः । तथाहि "मीनादिस्थो रविर्यैर्मासारम्भः प्रथमे क्षणे । ते चैत्राद्या" इत्युक्तदिशा मीनस्थे रवौ यस्य चान्द्रमासस्यारम्भः स चैत्र इत्येवं चैत्रादिलक्षणे स्थिते यस्मिन् चान्द्रमासे रवेः राश्यन्तरसंक्रमो न, तस्य तदुत्तरस्य च चान्द्रमासस्य उभयोर्मीनस्थे रवौ आरम्भात् उभयोरपि चैत्रता, तत्राद्योऽधिमासः संक्रान्तिहीनत्वात् द्वितीयः शुद्धः इति स्मृतौ प्रसिद्धम् ।

अधिराज पु० अधिको राजा प्रा० स० टच् । सार्व्वभौमे ।

अधिरोहिणी स्त्री० अधिरुह्यतेऽनया अधि+रुह-करणे ल्युट् । (मइ) इति (सिड़ि) इति च प्रसिद्धे काष्ठवंशादिनिर्मिते उच्चस्थानारोहणसाधने सोपानवृन्दे ।

अधियज्ञ पु० अधिगतः स्वामितया यज्ञो यस्य ब० । विष्णौ ।

अधियोगः युज-घञ् योगः अधिको योगः प्रा० स० । ज्योतिषप्रसिद्धे यात्रिकशुभयोगे । स च गमनसमयलग्ने, तस्माद्वा चतुर्थे, पञ्चमे, सप्तमे, नवमे, दशमे वा स्थाने बुधजीवभार्गवाणां मध्ये द्वयोरेकत्र, उक्तस्थानमध्ये अन्यतमस्थाने वा स्थितौ सत्यां योगः तत्र यात्रुः क्षेमं धनुहानिश्च फलम् । मुहूर्त्त० या० प्र० ।

अधिवास पु० अधि+वस-घञ् । निवासे । वासेर्घञि । गन्धमाल्याद्यैः

संस्कारे । अधिवासयति देवता अनेन अधि+वस–णिच् करणे घञ् । यज्ञारम्भात्पूर्वदिवसे देवतास्थापनादिकर्मणि ।

अधिवासन न० अधि+वस-णिच् अधिकरणे ल्युट् । यज्ञारम्भात् पूर्वदिवसे देवतास्थापनादौ । भावे ल्युट् । गन्धमाल्याद्यैः पूज्यादेः संस्कारकरणे । [स्कारे, कृतप्रागुक्ताधिवासे देवादौ च ।

अधिवासित त्रि० अधि-वस–णिच्–क्त । गन्धमाल्यादिभिः कृतसं-

अधिविन्न स्त्री० विद्–भावे क्त । अधि उपरि विन्नं विवाहोऽस्याः । कृतसपत्निकायाम् अध्यूढायाम् स्त्रियाम् । कृतपूर्वविवाहायाः उपरि पत्या पुनर्विवाहकरणे प्रागूढाया भार्य्यायां अधिविन्नत्वम् । "अधिविन्नस्त्रियै देयम्" इति स्मृतिः ।

अधिश्रयण न० अधि उपरि श्रयणं पक्वकार्य्यं स्थापनं श्रीञ्–भावे ल्युट् । चूल्ल्या उपरि स्थापने, तत्पूर्वकपाके च । अधिश्रीयते पच्यतेऽत्र, करणे ल्युट् टित्त्वात् ङीप् । चूल्ल्याम् (आका) इति, (चूला,) इति च ख्यातायाम् स्त्री० ।

अधिष्ठातृ त्रि० अधि+स्था–तृच् पत्वम् । अध्यक्षे, नियमितकार्य्य-विशेषाकरणेन कृताकृतावेक्षके च ।

अधिष्ठान न० अधि-स्था ल्युट् । नियमितकार्य्यविशेषाकरणेन साक्षित्वमात्रेण, स्थितौ, वेदान्तशास्त्रप्रसिद्धे आरोपाधिकरणे च । अधिकरणे ल्युटि । पुरे । करणे ल्युटि । चक्रे, प्रभावे च चक्रेण प्रभावेण च प्रवृत्तत्वात्तादिसम्भवात् ।

अधीत त्रि० अधि+इङ्–क्त । पठिते । भावे क्त । अध्ययने न० ।

अधीतिन् त्रि० अधीतमनेन अधीत+इनि । कृताध्ययने ।

अधीन त्रि० अधिगतमिनं प्रभुं गतिस० । आयत्ते धनाधीनइत्यादौ तु धने अधि–इतिवाक्ये समासे अध्युत्तरपदात् ख ।

अधीर त्रि० धीरः धैर्य्यान्वितः न०त० । चञ्चले ।

अधीश त्रि० अधिक ईशः प्रा०स० । अधिकप्रभौ सार्व्वभौमे ।

अधीश्वर त्रि० अधिक ईश्वरः प्रा०स० । सार्व्वभौमे स्त्रियां ङीप् ।

अधीष्ट न० अधि+इषा०क्त–भावे क्त । सत्कारपूर्व्वकनियोगे । कर्म्मणि क्त । सत्कारपूर्व्वकं नियोजिते त्रि० ।

अधुना अव्य० अस्मिन् काले इदमशब्दस्य नि० । संप्रतीत्यर्थे ।

अधुनातन त्रि० भवार्थे अधुना+ट्युल् । इदानीम्भवे स्त्रियां ङीप् ।

अधृष्ट त्रि० धृष–निर्लज्जत्वे क्त न०त० । लज्जाशीले ।

अधृष्य त्रि० धृष–अर्हार्थे यत् न०त० । धर्षणायोग्ये अनभिभवनीये ।

अधोंऽशुक न० अधर+प्रथमार्थे असि अधरस्य अधादेशश्च । परिधानवस्त्रे ।

अधोऽक्षज पु० अक्षात् इन्द्रियात् जायते अक्षजं प्रत्यक्षज्ञानम् जन–ड ५त० अधरमप्राह्यकत्वाद्दीनं तद्वस्य ब० । अधर–प्रथमार्थे असि अधादेशश्च । इन्द्रियायोग्ये, "अधो न क्षीयते जातु यस्मात्तस्मादधोऽक्षज इत्युक्त" लक्षणे, वा विष्णौ ।

अधोजिह्विका स्त्री० अल्पा जिह्वा जिह्विका अल्पार्थे क अधोऽधरा जिह्विका कर्म० । (आलजिभ) इति ख्यातायाम् तालुस्थजिह्विकायाम् । [ललोके ।

अधोभुवन न० अधोऽधरं भुवनं लोकः कर्म० । भूमेरधरे भागे पाता-

अधोमुख त्रि० अधो मुखं यस्य ब० । अवाङ्मुखे, ज्योतिषशास्त्रे प्रसिद्धेषु नक्षत्रभेदेषु च । यथा "मूलाश्लेषा कृत्तिका च विशाखा भरणी तथा । मघा पूर्व्वात्रयं चैव अधोमुखगणः स्मृत" इति । गोजिह्वाख्यवृक्षे स्त्री० टाप् ।

अधोलोक पु० अधोऽधरो लोकः कर्म० । भूमेरधस्थपाताले ।

अध्यक्ष त्रि० अधिगतोऽक्षं व्यवहारं अक्षा०स०। नृपस्य कृतधारणादिव्यवहारेऽधिकृते । अध्यक्ष्णोति व्याप्नोति अधि+अक्ष–अच् । व्यापके अधिगतं मूलतया अक्षमिन्द्रियम् गति स० । प्रत्यक्षज्ञाने । अर्शआदित्वात् अच्, तद्विषये त्रि० ।

अध्यग्नि अव्य० अग्नौ अग्निसमीपे वा विभक्त्यर्थे सामीप्येऽर्थे वा अव्ययी० । अग्नौ अग्निसमीपे वा । तत्र स्थाने विवाहादौ स्त्रीभ्यो दत्ते धनादौ न० । स्मृतिशास्त्रे चास्मिन्नर्थे परिभाषाख्य

क्षेता यथा "विवाहकाले तत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ । तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्त्तित" मिति ।

अध्यण्डा स्त्री० अधिकमण्डं बीजं यस्याः ईच० । अधिकबीजवत्यां (भुंइ आमला) इति ख्यातायाम् भूम्यामलक्याम् ।

अध्यधीन त्रि० अधिकोऽधीनः प्रा०स० । अत्यधीने गर्भदासे च ।

अध्ययन न० अधि+इङ्-ल्युट् । पठने, गुरुमुखोच्चारणानुसारिणि उच्चारणे च । अध्ययनञ्चाक्षरमात्रपाठ इति वैदिकाः सार्थाक्षरग्रहणमिति मीमांसकाः ।

अध्यर्द्ध त्रि० अधिकमर्द्धं यस्य ब० । खार्द्धेन सहिते वस्तुमाने ।

अध्यवसाय पु० अधि+अव+सो घञ् । इदमेवमेवेति विषयपरिच्छेदे निश्चये । स चात्मधर्म्म इति नैयायिकाः । बुद्धिधर्म्म इति सांख्याः । उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धेः रजस्तमोऽभिभवे सति यः सत्त्वसमुद्रेकः सोऽयमध्यवसाय इतिवृत्तिरिति चाख्यायते इति सांख्यतत्त्वकौमुदीपरिभाषितलक्षणः, कर्त्तव्यमिति योऽयं निश्चयः चित्सान्निध्यात् प्राप्तचैतन्याया बुद्धेः परिणामः सोऽयमध्यवसाय इत्युक्तलक्षणो वा निश्चयः । उत्साहे च ।

अध्यात्म अव्य० आत्मनि देहे मनसि वा विभक्त्यर्थे अव्ययी० । आत्माधिकरणे देहाधिकरणे चित्ताधिकरणे च । तदधिकृत्य विद्यादिविषये आत्मतत्त्वे, स्वभावोऽध्यात्मसुच्यते इति गीतावचनात् स्वभावे, भावस्य स्वरूपं प्रत्यक्चैतन्यमिति तस्मिन्, परब्रह्मणि च । अतएव अध्यात्मविद्याधिकादीनामेतद्विषयकविद्यार्थत्वं वेदान्तादौ प्रसिद्धम् ।

अध्यापक त्रि० अधि+इङ्-णिच्-ण्वुल् । प्रागुक्ताध्ययनकारयितरि, उपाध्याये च । स्त्रीत्वात् टापि, अध्यापना तस्मिन्नेवार्थे ।

अध्यापन न० अधि+इङ्-णिच्-भावे ल्युट् । पाठनायाम् । गुचि

अध्याय पु० अधि+इङ्-घञ् । अध्ययने वेदादिशास्त्रस्य एकार्थकविषयसमाप्तिद्योतके अंशविशेषे, "सर्गोवर्गः परिच्छेदोद्वाताध्यायाङ्कसंग्रहाः। उच्छ्वासः परिवर्त्तश्च पटलः काण्डमेव च । स्थानं प्रकरणञ्चैव पर्व्वोल्लासाङ्किकानि च । पुराणादौ परिच्छेदा अनेके

परिकीर्त्तिता" इत्युक्तान्यतमप्रकारे च । [अधिके च ।

अध्यारूढ़ त्रि० अधि+आ-रुह-कर्त्तरि क्त । आरोहणकर्त्तरि

अध्यारोप पु० अधि+आ-रुह-णिच्-घञ् च षञ् । अतस्मिन् तद्बुद्धिरारोपोमिथ्याज्ञानम् किञ्चिदधिष्ठानमधिकृत्य तादृशारोपः अध्यारोपः यथा असर्पभूतां रज्जुमधिकृत्य सर्पारोपः तथैव अजगद्रूपे ब्रह्मणि जगद्रूपारोपः । तादृशे मिथ्याज्ञाने ।

अध्यावाहनिक न० अध्यावाहनं पितृगृहात् भर्त्तुर्गृहागमनात्काले लब्धं अधि+आ+वह-ल्युट् ततः लब्धार्थे ठन् ठस्येक ।"यत् पुनर्लभते नारी नीयमाना हि पैतृकात् । अध्यावाहनिकं नाम स्त्रीधनं परिकीर्त्तितमिति स्मृत्युक्तलक्षणे पितृकुलात् भर्तृकुलगमनकाले तेभ्यः प्राप्ते स्त्रीधने ।

अध्याशन न० अधि+आ-अश-ल्युट् । भोजनोपरिभोजने ।

अध्यास पु० अधि+अस-घञ् । अतस्मिन् तद्बुद्धौ अध्यारोपे । अधि-आस घञ् । आसने । [च ।

अध्यासित त्रि० अधि+आस-क्त । अधिष्ठिते । णिचि । निवेशिते

अध्याहार पु० अधि+आ+हृ-घञ् । आकाङ्क्षाविषयपदानुसन्धाने, जल्पे, तर्के, अपूर्व्वोत्प्रेक्षणे च ।

अध्यूढ़ पु० अधि+वह-क्त । प्रभौ सहृद्वे च । आरोहणकर्त्तरि त्रि० । "ऋच्यध्यूढ़ंसाम गीयते इति" श्रुतिः । अधिउपरि ऊढ़-सुद्वाहो यस्याः ब० । कृतसपत्निकायां स्त्रियां कृतद्वितीयविवाहस्य प्रागूढ़यीपिति स्त्री० ।

अध्येषण न० अधि-इष-प्रेरणे ल्युट् । सत्कारपूर्वकमाचार्य्यादेः प्रेरणे, प्रवर्त्तनमात्रे च । युचि टाप् तच्छब्देवार्थे स्त्री० ।

अध्रुव त्रि० ध्रु-क न०त० । चले, विकारवति, अनित्ये, अस्थिरे च ।

अध्वग पु० अध्वन्+गम-ड । पथिके, सूर्य्ये, उष्ट्रे च । पथिगामुकमात्रे त्रि० । गङ्गायां स्त्री० ।

अध्वगभोग्य पु० अध्वगेन अतिसौलभ्यात् अयत्नलभ्यफलत्वाच्च भोग्यं ६त० । (आमड़ा) इति प्रसिद्धे आम्रातरुवृक्षे ।

अध्वजा स्त्री० अध्वनि जायते जन–ड ७त० । (सोना) इति ख्याते स्वर्णपुष्पीवृक्षे ।

अध्वन् पु० अधि वनम् अद्–क्वनिप् वादेशः । पथि, अधिकढुरारोहणेच । (सर्वभक्षकत्वात्) काले, क्षिप्रेच । अद्यते खण्ड्यो भक्ष्यतेऽनेनेति करणे घञि । अवयवे ।

अध्वनीन त्रि० अध्वानमलं गच्छति अध्वन्+ख । पथिके ।

अध्वन्य त्रि० अध्वानमलं गच्छति अध्वन्+यत् । पथिके ।

अध्वर पु० अध्वानं सत्पथं राति रा+क । यज्ञे । न ध्वरति कुटिला न भवति ध्वृ-अच् न०त० । सावधाने, अहिंसनमधेऽपि द्वितीयवर्णौ च ।

अध्वरथ पु० अध्वैव रथो यस्य ब० । पथिप्रक्षे दूते । अध्वने हितो पथ्यादिर्वा रथो यस्य ब० । पथिगमनोपयुक्ते रथे ।

अध्वर्यु पु० अध्वरमिच्छति अध्वर+क्यच्–युच् ततोऽन्त्याकारलोपः । यजुर्वेदज्ञे होमकारिणि ऋत्विजि ।

अध्वशल्य पु० अध्वनि शल्यमिवाचरतीति क्विप्+अच् । पथिकानां पादशल्यादौ शल्यवद्बाधकारके (आपाङ्) इति ख्याते अपामार्गवृक्षे ।

अन जीवने अदादि० पर० अक० सेट् । अनिति अनीत् ।

अन जीवने दिवा० आत्म० अक० सेट् । अन्यते आनिट ।

अनक्ष त्रि० नास्ति अक्षं चक्षुर्नेत्रादिकमिन्द्रियं वा यस्य ब० । चक्षुःशून्ये चक्षुरादीन्द्रियशून्ये च ।

अनक्षर न० अप्रशस्तान्यक्षराणि यत्र ब० । सङ्गणस्याक्षेपके दोषोद्घोषकवाक्ये, अवाच्ये, निन्द्यवचने, (गालि) इतिप्रसिद्धे दुष्टवचने च ।

अनड्वाह पु० अप्रशस्तं मन्दमुहि न०त० । मन्दनेवे । ब० । तद्वति तत्र अनड्वाह्यौ टच् समासान्तः ।

अनग्नि पु० नास्ति अग्निः श्रौतः स्मार्त्तो वा यस्य । श्रौतेन स्मार्त्तेन अग्निविधिना अनाहिताग्नौ स्मार्त्तस्यादौ, सर्वथा अग्निशून्ये प्रयुज्यते च ।

अनङ्ग त्रि० नास्ति अङ्गं पापं दुःखं व्यसनं कार्पण्यं वा यस्य । पापशून्ये, दुःखहीने, व्यसनशून्ये स्वच्छे च । [अङ्गशून्यमात्रे वि० ।

अनङ्ग न० नास्ति अङ्गमाकारो यस्य । अकाये चित्ते । कन्दर्पे पु० ।

अनङ्गशेखर पु० क्रमेण लघुगुरुनिवेशवति दण्डकभेदे छन्दोविशेषे ।

अनच्छ त्रि० न अच्छः निर्मलः न०त० । कलुषे, अप्रसन्ने च ।

अनञ्जन न० न अज्यते लिप्यते अनेन अञ्ज-कर्मणि ल्युट् न०त० । निःसम्बन्धे आकाशे, परब्रह्मणि च । अञ्जनं दोषस्तद्रहिते नारायणे पु० । तथाभूतवस्तुमात्रे त्रि० ।

अनड्वह् पु० अनः शकटं वहतीति नि० (एड़ा) इति प्रसिद्धे गवि । स्त्रियां गर्वङीपि अनड्वही अनड्वाहीति च ।

अनध्याय पु० अध्यायोऽध्ययनमभावार्थे न०त० । अध्ययनाभावे । न अधीयतेऽस्मिन् काले इति अधिकरणे घञ्, अध्ययनाय निषिद्धे "चातुर्मास्यद्वितीयायाम् । मन्वादिषु युगादिषु । अष्टकासु च संक्रान्तौ शयने बोधने हरेः । अनध्यायं प्रकुर्वीत" त्याद्युक्ते काले, निर्घाते भूमिचलने इत्याद्याकालिकानध्यायकाले च ।

अनन्त पु० नास्ति अन्तः गुणानां यस्य ब० । "गन्धर्व्वाप्सरसः सिद्धाः किन्नरोरगचारणाः । नान्तं गुणानां जानन्ति तेनानन्तोऽयमुच्यते" इत्युक्तलक्षणे विष्णौ, मेघे च । बहुशीर्षकत्वादपरिच्छिन्ने शेषनागे, तदवतारे बलभद्रे च । अन्तः परिच्छेदः देशतः कालतः वस्तुतश्च यस्य नास्ति तस्मिन् परब्रह्मणि आकाशे च न० । बहुविस्तारवति सिन्दुवारवृक्षे पु० । अवधिशून्ये, दृश्यत्वशून्ये, च वस्तुमात्रे त्रि० । [कर्त्तव्ये स्वनाम्ना ख्याते व्रते ।

अनन्तव्रत न० अनन्तस्य व्रतमुपासनार्थत्वात् ६त० । भाद्रशुक्लचतुर्दश्यां

अनन्ता स्त्री० नास्ति अन्तोऽस्या ब० । विशल्यायामोषधौ (अनन्तमूल) इति ख्याते मूलभेदे, पार्वत्याम्, पृथिव्याम्, दुःस्पर्शायां दुरालभायां, दूर्वायां, हरितक्यां, आमलक्यां, गुडूच्याम्, अग्निमन्थवृक्षे, अग्निशिखावृक्षे, श्यामलतायाम्, पिप्पल्यां च ।

अनन्यज पु० नास्ति अन्यद्यस्मात् सर्ब्बवस्तुभेदानां तदात्मकत्वात्, विष्णुः तस्मात् जायते जन-ड ५त० । कामदेवे ।

अनन्यवृत्ति त्रि० न अन्यस्मिन् ध्येयभिन्ने वृत्तिर्यस्य ब० । एकान्तचित्ते ।

अनन्वय त्रि० नास्ति अन्वयो यत्र ब० । अन्वयशून्ये । अर्थालङ्कारभेदे पु० ।

अनय पु० अयः शुभावहो विधिस्तद्भ्यः न० त० । अशुभदैवे द्यूतकारिणामपसव्यगमने च । नयो नीतिः नी-अच् न०त० । नयाभावे अनीतौ । ब० । तच्छून्ये त्रि० । [प्रतिबन्धवशून्ये च ।

अनर्गल त्रि० अर्गलं द्वाररोधकस्तम्भः ब० । द्वाररोधकस्तम्भशून्ये,

अनर्घ त्रि० अर्घो मूल्यं न० ब० । अमूल्ये ।

अनर्थ पु० अर्थः प्रयोजनं विरोधे न० त० । अनिष्टे । ब० । अभीष्टरहिते विष्णौ पु० आप्तकामत्वात् । अर्थोऽभिधेयः प्रयोजनं वा नास्ति यस्य ब० । अर्थरहितमात्रे त्रि० ।

अनर्थक न० अर्थोऽभिधेयोऽप्राप्तस्थे नञा ब० । उरःप्रभृति० कप्-समासान्तः । समुदायार्थशून्ये प्रलापे, असम्बन्धे वाक्ये च । व्यर्थे त्रि० । [अभेदे, एकार्थे ।

अनर्थान्तरम् न० अन्योऽर्थः अर्थान्तरं मयूर० त० ततः न० त० ।

अनल पु० नास्ति अलः पर्याप्तिर्यस्य बहुदाह्यदहनेऽपि तृप्तेरभावात् ब० । वह्नौ, अष्टवसुमध्ये पञ्चमे वसौ, अनलर्दवतत्वात् कृत्तिकानक्षत्रे च । (चिता) इति ख्याते चित्रके वृक्षे, पु० तस्य सर्वतः पर्याप्तत्वेऽपि पर्याप्तेः सीमाभावात्, (भेला) इति ख्याते भल्लातके वृक्षे पित्तनामके देहस्थे आयुर्द्वारके धातौ च । अव्ययी० । नलाभावे अव्य० । न० त० । नलभिन्ने । अन-कलच् । षष्टिवर्षमध्ये पञ्चाशत्संख्याते वर्षे । [लतायाम् ।

अनलप्रभा स्त्री० अनलस्य प्रभेव प्रभा यस्य ब० । ज्योतिष्मतीनामिकायां

अनलि पु० अनितीत्यत् अन+किप् अन् अलिर्यत्र ब० । वकवृक्षे तस्य मधुभिर्भ्रमराणां जीवनधारणात् ।

अनवधानता स्त्री० अवधीयते मनः संयुज्यते कर्त्तव्यकर्मणि यथास्थितं प्रवर्त्यतेऽनेन अव+धा-करणे ल्युट् अवधानं चित्तवृत्तिभेदः तन्नास्ति यस्य तस्य भावः । प्रमादे । कर्त्तव्येऽकर्त्तव्यताबोधेन ततो निवृत्तिः, अकर्त्तव्ये कर्त्तव्यताबोधेन तत्र प्रवृत्तिः प्रमादः ।

अनवरत त्रि० अव+रम्-भावे क्त अवरतम् तद्वास्ति यस्य व० । निरन्तरे उत्कृष्टे च । [संस्कारविशेषे स्वनाम्ना प्रसिद्धे ।

अनवलोभन न० सीमन्तोन्नयनानन्तरं चतुर्थे मासि कर्त्तव्ये गर्भस्य

अनवसर त्रि० अवसरत्वात् अव+सृ-अच् अवसरः उचितः कालः स नास्ति यस्य व० । उचितकालविहीने । न०त०। अवसराभावे ।

अनवस्कर त्रि० अवस्क्रियते धोध्यते अव+कृ-अच् सुडागमः अवस्करो मलः स नास्ति यस्य व० । विमले ।

अनवस्था स्त्री० अव+स्था-अङ् अवस्थितिः न०त०। अवस्थाभावे, तर्कदोषविशेषे, उपपाद्यस्य समर्थनाय उपपादकस्यानुसरणं तर्कः यत्र तर्के उपपाद्योपपादकयोर्विश्रान्तिर्नास्ति तादृशतर्कस्यानवस्थादोषः तेन स तर्को न ग्राह्यः ।

अनवस्थान न० अव+स्था-ल्युट् न० त० । अवस्थानाभावे । ब० । वायौ पु० । चञ्चलमात्र त्रि० । [जनशून्ये त्रि० ।

अनशन अश+ल्युट् न०त० । भक्षणाभावे, उपवासे च । ब० । भो-

अनस् न० अनिति शब्दायते अन-असुन् । शकटे । करणे ल्युट् । ओदने । मातरि । स्त्री० ।

अनसूया स्त्री० असू-कण्ड्वादित्वात् यक्-अङ् न०त०। असूया गुणेषु दोषारोपस्तदभावे, अतिसुनिपत्याच्च । [क्लेशवाक्ये च ।

अनाकुल त्रि० न आकुलः न० त० । अव्यग्रे, एकाग्रे, स्थिरे, अम-

अनाक्रान्ता स्त्री० आक्रमितुमयोग्या सर्वतः कण्टकाद्यावृतत्वात् आ+क्रम-क्त न०त० । कण्टकावृतक्षेत्रे । आक्रान्तभिन्ने त्रि० ।

अनागत त्रि० आ+गम-क्त आगतः न०त० । भाविनि, अज्ञाते, अनुपस्थिते, आगमनकर्तृभिन्ने च ।

अनागतार्त्तवा स्त्री० ऋतोः स्त्रीपुष्पस्येदं विकारावयवम् आर्त्तवस्+ऋतु+अण् न आगतमार्त्तवं यस्याः ब० । स्त्रीधर्म्मशून्यायां लग्निकायां कन्यायाम् ।

अनाचार पु० आ+चर-घञ् अप्राशस्त्येऽभावे वा नञ्त० । कदाचारे, आचाराभावे च । ब० । आचारहीने त्रि० ।

अनातप पु० आ+तप-अच् न०त०। आतपस्य रौद्रस्याभावे छायायां च। ब०। आतपशून्ये त्रि०।

अनात्मन् पु० अतति सातत्येन तिष्ठति अत-मनिन् अप्राणत्वे भेदार्थे च न०त०। आत्मभिन्ने, अपकृष्टात्मनि देहादौ "अप्राणः प्राप्यते योऽयमत्यन्तं व्यक्यतेऽथ वा। जानीयात्तमनात्मानं बुद्ध्यन्तं वपुरादिकम्" इति प्रतिपादिते च।

अनादर पु० आ+दृ-अच् आदरः गौरवहेतुका सम्मानना विरोधे नञ् त०। परिभवे, तिरस्कारे च तस्य आदरविरोधित्वात्। ब०। आदरशून्ये त्रि०।

अनादि पु० आदिः कारणम् पूर्वकालो वा स नास्ति यस्य परमेश्वरे। नास्ति आदिः प्राथमिको यस्मात् ५ब०। हिरण्यगर्भे पु० तस्यैव सृष्टेः प्रथमोत्पत्तेः। आदिशून्ये त्रि०।

अनान् न० अननमनः अन-अच् अनं जीवनम् अमयति कुजति अम-ऊनि। अर्शोरोगे। नासशून्ये मनुष्ये पु० तस्य वैदिककर्म्मानर्हतयाऽनासत्वात्। नासशून्ये त्रि०।

अनामय पु० अम-घञ् आमं तापं याति नयेन या-क आमयो रोगः न० त०। रोगाभावे आरोग्ये। न० ब०। रोगशून्ये त्रि०।

अनामा स्त्री० ब्रह्मणः शिरश्छेदनसाधनतया ग्रहणायोग्यत्वात् नास्ति नाम ग्रहणयोग्यं यस्याः ब० मनन्तत्वात् डाप्। स्वनामप्रसिद्धायां मध्यमकनिष्ठयोः मध्यगायामङ्गुल्याम्। स्वार्थे क अनामिकाऽप्यत्र। तया हि शिवेन ब्रह्मशिरश्छित्तमिति पुराणे प्रसिद्धम् अतएव तस्या पवित्रीकरणार्थं पवित्रनामकृकृशधारणं क्रियते।

अनायास पु० आ+अस-घञ् अल्पार्थे न०त०। प्रयत्नाभावे, अल्पप्रयासे, अक्लेशे च। ब०। प्रयत्नशून्ये त्रि०।

अनायासकृत न० अनायासेन अल्पप्रयत्नेन कृतं न० त०। अल्पायासेन साध्ये कार्य्यादौ।

अनारत न० आ+रम-क्त आरतं विरतिः अत्यन्ताभावे न० त०। सन्ततौ, अविरते अविच्छेदे च। ब०। तद्वति त्रि०।

अनार्जव पु० ऋजोर्भाव आर्ज्जवं ऋजुता स्वाच्छन्द्यं नञ्ञा ७त० । रोगे । अव्ययी० । ऋजुत्वाभावे अव्य० । ६त० । कुटिले त्रि० ।

अनार्य्यक(ज) न० । अनार्य्यदेशे आर्य्यावर्त्तादिभिन्ने द्वीपान्तरादौ भव अनार्य्य+क । अगुरुकाष्ठे । जङ्गति पक्षे तस्मिन् जायते जन-ड । अनार्य्यदेशजाते त्रि० । [ख्याते मुनिभेदे ऋक्षे ।

अनार्य्यतिक्त. पु० अनार्य्यं प्रियस्तिक्तः शाक० त० । (चिरायता) इति

अनाकृत्ति स्त्री० आ+कृत–क्तिन् अभ्यासः आगतिश्च न०त० । अभ्यासाभावे, आगमनाभावे च । ब० । तद्वति त्रि० ।

अनाकृष्टि स्त्री० आ+कृष–क्तिन् न० त० । ईषद्दृष्टेरभावे भस्योपघातकोपद्रवे ईतिभेदे ।

अनाघ्रक पु० । आ समन्तात् घ्रियते अघ्रः आघ्रः अघनम् आ+अघ–घञ् न०त० । यथेच्छभोगाभावे, "तमेतं ब्राह्मणा विविदिषन्ति वेदानुवचनेन तपसाऽनाशकेनेति" श्रुतेः ।

अनाघ्रिन् पु० न नश्यति नश–घ्रिनि न०त०, न अश्नाति कर्म्मफलं अश–घ्रिनि न०त० वा । नाशशून्ये, कर्म्मफलाभोक्तरि च परमेश्वरे

अनाघ्रिन् त्रि० न+अघ–क्रुस् नि० । अघनमश्नुतमिति ।

अनाघ्या स्त्री० आ+स्था–अङ् आस्था आदरः न०त० । अनादरे । ब० । आदररहिते त्रि० ।

अनाचरण न० आ+चर–ल्युट् क आचरणं छेदो भोगो वा न०ब० । छेदभोगादिरहिते नवीने वस्त्रे । तन्त्रशास्त्रे प्रसिद्धे हृदयस्थिते द्वादशदलपद्मे "शब्दो ब्रह्ममयः शब्दोऽनाहतो यत्र दृश्यते । अनाहताख्यं तत् पद्मं मुनिभिः परिकीर्त्तितं" मित्युक्तलक्षणे च अक्षिणि पद्मे च आहतमाघातः करतालाद्याघातः तन्नास्ति यस्य तादृशः शब्दे अस्यास्ति अर्श आदित्वात् अच् । अनाहतशब्देन च परापश्यन्ती मध्यमावैखरीति प्रसिद्धानां वागवृत्तीनां मध्ये मध्यमा वाक् कथ्यते तस्याः हृदयपद्मे उत्पन्नत्वात् । ब० । आघातरहिते वस्तुमात्रे त्रि० । [उत्पन्ने । परिव्राजके ।

अनिकेत त्रि० नास्ति निकेतः नियमेन वासो यस्य ब० । नियतनिवा-

अनिमिमेष पु० नास्ति निमिषः चक्षुःस्पन्दनं यस्य निषः-घञ् कुटादि० न गुणः निष भ्वादि० घञ्-वा ईत्व० । चक्षुःस्पन्दन-शून्ये देवे मत्स्ये च । निमेषो दृष्टिप्रतिबन्धकस्तच्छून्ये विष्णौ च । न निमिषति चलतीति नि+मिष-क न० त० । काले । क्रियाशून्ये वस्तुमात्रे त्रि० ।

अनियन्त्रित त्रि०नि+यन्त्र चु०क्त न०त०। अनियमिते,उच्छृङ्खले च ।

अनिरुद्ध पु० न केनापि युद्धेन निरुद्धः नि+रुध-क्त न० त० । कामदेवपुत्रे, उषापतौ, वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाख्यचतुर्व्यूहस्य परमेश्वरस्य अनिषेध्यस्य अत्यन्तचलस्य चेतसोऽधिष्ठातरि अनिरुद्धाख्ये अंशे च अप्रतिरुद्धे त्रि० ।

अनिरुद्धपथ न० निरुद्धः पन्था यत्र ब० । आकाशे तत्र कस्यापि गतिरोधनाभावात् । रुद्धवर्त्मभिन्ने त्रि० ।

अनिर्देश्य त्रि० निर्देश्यं जातिगुणक्रियासंज्ञाभिर्निर्देष्टुमशक्यम् निर्+दिश्-ण्यत्-अशक्यार्थे ण्यत् न० त० । निर्विशेषे निर्धर्मके परमात्मनि तस्य जातिगुणाद्यभावेन इदं इदिति निर्देशायोग्यत्वात् ।

अनिर्व्वचनीय पु० निर्वचनं निरुक्तिः लक्षणादिना ज्ञापनं तद्गोचरतया निर्वक्तुमशक्ये वियदादौ, परात्मनि च ।

अनिल पु० अनित्यनेन अन+इलच् । वायौ, तेनैव सर्व्वेषां प्राणधारणात् तद्देवतायां स्वातिनक्षत्रे, "वातः पञ्चाशदूनका" इत्युक्तागणदेवताभेदे, अष्टवसुमध्ये पञ्चमे वसौ च ।

अनिलघ्नक पु० अनिलं वातरोगं हन्ति हन्-क ततः प्राशस्त्ये क । (चयड़ा) इतिख्याते वृक्षे तत्फलस्य वातनाशकत्वात् ।

अनिलसख पु० अनिलस्य वायोः सखा टच् । वह्नौ ।

अनिलान्तक पु० अनिलो वातरोगस्तस्यान्तकः अन्तं करोतीति अन्त+ण्वुच् ण्वुल् । (जीयापुति) इतिख्याते वृक्षे ।

अनिलामय पु० अनिलकृत आमयः शाक० त० । वातरोगे ।

अनिवार त्रि० नास्ति निवारो निवारणं यस्य अविच्छेदे, सतते, अनिवार्य्ये च ।

अनिश त्रि० निशा चेष्टाव्याघातः सा नास्ति यस्य ब० । अविरते, निरन्तरे, सदाभवे वस्तुनि, रात्रिवर्জ्जिते च ।

अनिष्ट त्रि० इष्ट+क्त विरोधे नञ् त० इष्टस्य सुखादेर्विरोधिनि प्रतिकूलवेदनीये दुःखे, तत्साधने, पापे, विषादौ, अपकारे च । नागबलायां स्त्री० ।

अनीक न० अनित्यनेन अन–ईकन् । सैन्ये, तस्य हि जीवनरक्षकत्वात् । न नीयते अपसार्य्यतेऽस्मात् । नी–क्विप् ब० कप् ह्रस्वाभावः । युद्धे, ततोहि प्रायोमरणान्नापसारणम् ।

अनीकस्थ पु० अनीके युद्धे तिष्ठति स्था–क । युद्धगते सैन्ये ।

अनीकिनी स्त्री० अनीकं युद्धं प्रयोजनतया अस्त्यस्याः अनीक+इनि । सेनायाम्, हस्त्यादिसंख्याविशेषवत्यां सेनायाञ्च तत्संख्या च हस्तिनः २१८७ । रथा २१८७ । अश्वाः ६५६१ । पदातयः १०९३५ समुदिताः २१८७० ।

अनीश पु० नास्ति ईशो नियन्ता यस्य ब० । सर्वनियन्तरि विष्णौ । न०त० । ईश्वरभिन्ने स्वामिभिन्ने च त्रि० ।

अनीह त्रि० ईह–अङ् न०ब० । स्पृहाशून्ये निश्चेष्टे च ।

अनु अव्य० अन–उ । सहार्थे, पश्चादर्थे, सादृश्ये, लक्षणे, हीने, व्याप्तौ, कस्मिंश्चित्प्रकारप्राप्तज्ञापने, भागे, अनुक्रमे, आयामे, समीपे च ।

अनुक त्रि० अनुकामयते अनु+कम–ड । कामनावति ।

अनुकम् अव्य० अनुकामयते अनु–कम् क्विप् । वितर्के ।

अनुकम्पा स्त्री० अनु+कम्प–अ । दयायाम्, किञ्चिच्चलने च ।

अनुकरण न० सादृश्ये–अनु+कृ–ल्युट् । अनुकरणे । तच्च देशभाषावयवादिभिः सदृशीकरणम् । अनुक्रियतेऽनेनेति करणे ल्युट् । सदृशीकरणसाधने । यथा पटत्वांप्रभृति शब्दाः अव्यक्तशब्दस्यानुकरणानि ।

अनुकर्ष (र्षण) पु० अनुकृष्यते सम्बद्धेन चक्रेण अनु+कृष–घञ् । रथाधःस्थिते चक्रोपरिबद्धे काष्ठे, पूर्वस्कन्धोपात्तपदादेरुत्तरत्रान्वयार्थमाकर्षणे च । कर्त्तरि ल्युट् नान्तोऽप्यत्रार्थे ।

अनुकल्प पु० कल्प्यते विधीयते इति कल्प–णिच्–अच् कल्पौविहितः अनु हीनः कल्पो सुख्यकल्पादधमः प्रा०स०। गौणकल्पे, प्रतिनिधौ च। यथा सख्यभावे गुडः।

अनुकामीन त्रि० कामस्य अभिलाषस्य सदृशमनुकामं सादृश्येऽव्ययी० ततः•गच्छतीत्यर्थे ख। यथेष्टगमनशीले।

अनुकार पु० अनु+कृ–घञ्। देशभाषादिभिः सदृशीकरणे।

अनुकूल त्रि० कूलमावरणं स्नेहेनानुबन्धमिति यावत् अनुगतस्त्वं अत्या०स०। सहचरे, सहाये, स्वपक्षपातिनि, अलङ्कारशास्त्रप्रसिद्धे नायकभेदे च। सा० दर्पण।

अनुक्रम पु० अनु+क्रम–घञ् न वृद्धिः। परिपाट्याम्। आनुपूर्व्ये अव्ययी०। यथाक्रमे अव्य०।

अनुक्रमणिका स्त्री० अनुक्रम्यते यथोत्तरं परिपाट्या आरभ्यतेऽनया अनु+क्रम–करणे ल्युट् स्त्रीत्वात् ङीप् स्वार्थे के ह्रस्वः। अनुक्रमज्ञापके, ग्रन्थाद्यंशे वक्तव्यस्य, ग्रन्थशेषे च उक्तार्थसङ्ग्रहाय संख्याकृते पुराणादेरंशविशेषे। स्वार्थे काभावेऽनुक्रमण्यपि, तत्रैव।

अनुक्रोश पु० अनुक्रोशत्यनेन क्रुश आह्वाने रोदने च घञ्। दयायाम्। अनुगतः क्रोशं गतिस०। प्राप्तक्रोशके त्रि०। [च।

अनुग त्रि० अनु+गम–ड। पश्चाद्गामिनि, सहचरे, आनुलोम्यं गते

अनुगत त्रि० अनु+गम–क्त। पश्चाद्गते, सहगते, आनुलोम्यं, गते, सामान्यधर्मयुक्तेन संगृहीतेऽखिले विशेषे च।

अनुगम पु० अनु+गम–घञ् वृद्ध्यभावः। पश्चाद्गमने, सहायीभवने, आनुलोम्यकरणे, सामान्यधर्मेण सर्वेषां विशेषयुक्तानां संग्रहे च।

अनुगुण त्रि० अनुकूलो गुणो यस्य। अनुकूले अनुगते च।

अनुग्रह पु० अनु+ग्रह–अप्। अभीष्टसम्पादनेच्छारूपे प्रसादे, आनुकूल्ये, अनिष्टनिवारणपूर्वकेष्टसाधनेच्छारूपायामभ्युपत्तौ, "विरूपोन्मत्तनिःस्वानामनुग्रहपूर्वकं हि यत्। पूरणं दानमानाभ्यामनुग्रह उदाहृत" इत्युक्तलक्षणे दरिद्रादिपोषणे च। अनो ग्रहणं

सूर्यादिग्रहो वा अनुगतस्तम् गतिस० । ग्रहानुगते सूर्यादिग्रहानुगते च त्रि० ।

अनुचर त्रि० अनु+चर–ट । सहचरे, पश्चाद्गामिनि, दासादौ, स्त्रियां ङीप् । अनुगतश्चरं दूतं गतिस० । दूतानुगे त्रि० ।

अनुज त्रि० अनु पश्चात् जायते जन–ड । पश्चाज्जाते सहोदरे भ्रातरि । तादृश्यां भगिन्यां स्त्री० ।

अनुजीविन् पु० अनुजीवितुमाश्रयितुं शीलमस्य अनु+जीव–णिनि । सेवके, आश्रिते च ।

अनुज्ञा स्त्री० अनु+ज्ञा–अङ् । स्वयं प्रवृत्तस्यान्यस्य प्रवृत्तिविघातकरणेन प्रवर्त्तनारूपायामनुमतौ ।

अनुतर्ष न० अनुतृष्यतेऽनेन करणे घञ् । सुरापानपात्रे, मद्ये, मद्यपाने च । भावे घञ् । अभिलाषे पानेच्छायाम् ।

अनुताप पु० अनु+तप–घञ् । दृष्टमनुचितं कृतमिति स्वकृतवस्तुनो दुःखजनकतया ज्ञानेन पश्चात्तापे ।

अनुत्तर त्रि० उत्तर उत्तमः नञ्रा ५ब० । अत्यन्तश्रेष्ठे । ६ब० । उत्तरवाक्यरहिते । न०त० । उत्तरदिग्भिन्ने स्त्री० ।

अनुदात्त पु० उच्चैराजः उच्चारित उदात्तः न०त० । वर्णोच्चारणस्थानेषु कण्ठादिषु नीचोच्चारणप्रयत्नविशेषे स्वरभेदे ।

अनुदित पु० उत्+इण्–क्त ईषदर्थे न०त० । किरणमालेषु ईषदुदितसूर्ये प्रविरलतारके काले । उदितेऽनुदिते चैवेति मनुः ।

अनुद्रुत त्रि० अनु+द्रु–क्त । पश्चाद्गते, "अर्द्धमात्रं द्रुतं ज्ञेयं द्रुताद्धैर्ज्ञाप्यनुद्रुतमित्युक्तलक्षणे वादनविषये कालविशेषे च ।

अनुधावन न० अनु+धाव–ल्युट् । पश्चाद्गमने, तत्त्वनिश्चयायानुसरणे, अनुसन्धाने च ।

अनुध्या स्त्री० अनु+ध्यै–अङ् । अनुचिन्तने, अनुग्रहे, आसक्तौ च ।

अनुनय पु० अनु+नी–अच् । विनये, प्रणिपाते, प्रार्थने, सान्त्वने च ।

अनुनासिक पु० अनुगता नासां अत्या०स० तत्रोच्चार्य्यमाणार्थे ठ । नासानुगतेन सुखेनोच्चार्य्यमाणेषु वर्ण्यान्त्येषु ङञादिषु ।

अनुपद अव्य० पदस्य पश्चात् अव्ययी०। पश्चाद्गमने, अव्यवधाने च। अनुगतं पदम् अव्यास०। पश्चाद्गामिनि त्रि०।

अनुपदिन् त्रि०अनुपदम् अन्वेष्टा अनुपद+अन्वेष्टरीत्यर्थे इनि। अन्वेषकर्त्तरि। गवामेवान्वेष्टरीत्यन्ये। स्त्रियां ङीप्।

अनुपदीना स्त्री० अनु पदस्य आयामतुल्यायामः आयामेऽव्ययी० अनुपदं वर्त्तेत्यर्थे ख। पादतुल्यायामयुक्तायां पादत्राणायां पादुकायाम् (मोजा) इत्यादि-ख्यातायाम्। [भावे, असङ्गतौ च।

अनुपपत्तिः स्त्री० उप+पद-क्तिन्। उपपत्तिर्युक्तिः न०त०। युक्त्यभावे,

अनुपम त्रि० उप+मा-अञ् न०त०। उपमाशून्ये, सादृश्यरहिते उत्तमे च। कृसृटाख्यस्य दिग्गजस्य योषिति स्त्री०।

अनुपरत त्रि० उप+रम-क्त न० त०। अविरते अनिवृत्तेच्छे च।

अनुपलब्धि स्त्री० उप+लभ-क्तिन् न०त०। लाभाभावे, प्रत्यक्षाभावे च। तत्र च कारणानि "अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्। सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहारादिति सांख्यकारिकोक्तानि।

अनुपसंहारिन् पु० न्यायमते परिभाषिते दुष्टहेतुविशेषे। स च दृष्टान्तरहितोऽन्वयी व्यतिरेकी वा दुष्टहेतुः। यथासर्वमनित्यं प्रमेयत्वादित्यनुमाने सर्वस्यापि पक्षत्वेन अन्वये दृष्टान्तो नास्ति नापि व्यतिरेके दृष्टान्तः सर्व्वस्यापि प्रमेयतया तदभावस्य कुत्राप्यसिद्धेः।

अनुपाकृत त्रि० उप+आ+कृ-क्त न०त०। मन्त्रैर्यज्ञे पशोरर्चनादिसंस्कार उपाकरणं तद्रहिते।

अनुपात पु०अनु+पत-करणे घञ्। अङ्कभाग्ये प्रसिद्धे त्रैराशिके, पूर्वाङ्कपातानुसारेणापराङ्कपातने च। भावे घञि, पश्चात्पतने।

अनुपातक न०अनुपातयति स्वानुरूपं नरकं गमयति अनु+पत-णिच्-ण्वुल्। ब्रह्महत्यादिमहापातकसदृशे वेदनिन्दादिजन्ये पापविशेषे। तानि च पञ्चत्रिंशत्प्रकारहेतुत्वत्वेन तावत्संख्यातानि प्राय० वि० अनुपा० प्र०।

अनुपान न०अन्नु भेषजेन सह पश्चाद्वा पीयते कर्मणि ल्युट्। औष-

धाङ्गे तेन सह, तत्सहाद्या येये मधुगुड़ादौ पानस्य जलस्य समीपे अव्ययी० । जलसामीप्ये अव्य० ।

अनुपूर्व्व पु० अनुगतं पूर्वं परिपाटीं गतिस० । यथाक्रमे ।

अनुप्रासः पु० अनुगतः रसाद्यनुगुणं प्रकृष्टः सासं वर्णन्यासं समवर्णैरचनां समवर्णैरुच्चारणं वा अनु+प्र-अस् घञ् । अलङ्कारे प्रसिद्धे स्वरवैषम्येऽपि समवर्णानां रचनायाम् ।

अनुप्लव पु० अनु+प्लु-अच् सहाये, अनुचरे, दासे च ।

अनुबन्ध पु० अनु+बन्ध-यथायथं भावादौ घञ् । बन्धने, इच्छापूर्वकदोषकरणे, वातपित्तादिदोषाणामप्राधान्ये, प्रकृतिप्रत्ययागमादेशानां गुणवृद्ध्यादिकार्य्यविशेषार्थमनुबन्धनीये परिनिष्पन्नपदकालेषु अश्रूयमाणतया नश्वरे इत्संज्ञया कृतलोपे वर्णादौ, मुख्यानुयायिनि अप्रधाने, प्रकृतस्यानुवर्त्तने, संबन्धे, पाश्चात्यशुभपरिणामे, शास्त्रस्यादौ वक्तव्येषु, अधिकारिविषयप्रयोजनसम्बन्धेषु ज्ञेये, फलसाधने च

अनुबन्धिन् त्रि० अनुबध्नाति अनु+बन्ध-णिनि । सहचरे, अनुचरे-अनुरोधिनि, व्यापके च । स्त्रियां ङीप् ।

अनुबन्धी स्त्री० अनुबध्यतेऽतिस्नेहेन व्याप्रियतेऽनया अनु+बन्ध-घञ् गौरा० ङीष् । स्त्रिक्कारोगे, तृष्णायाञ्च ।

अनुबन्ध्य त्रि० बधार्थं बन्धोऽनुबन्धः यत् । बधार्थं बद्धे गवादौ ।

अनुबोध पु० अनु+बुध-णिच् घञ् । पूर्वलिप्तचन्दनादेर्गन्धोद्दीपनार्थं पुनर्मर्दनादौ पश्चाद्बोधे च ।

अनुभव पु० अनु+भू-अप् । स्मृतिभिन्ने ज्ञाने ।

अनुभाव पु० अनुभावयति उद्बोधयत्यनेन अनु+भू-णिच्-करणे-घञ् । कोपदण्डादिजाते राज्ञां तेजोविशेषे । सामर्थ्ये च । कर्त्तरि अचि । अलङ्कारशास्त्रप्रसिद्धे रसव्यञ्जके । "भावं मनोगतं साक्षात् सूचयत् व्यङ्ग्यन्ति ये । तेऽनुभावा इति ख्याताः" इत्युक्तलक्षणे भूभङ्गादौ । [इत्यर्थमनुभाते ।

अनुमत त्रि० अनु+मन-क्त । स्वयंप्रवृत्ते इदं क्रियतामिति प्रोत्सा-

अनुमति स्त्री० अनु+मन-क्तिन् । अनुमतौ अनुज्ञायाम् । अनुमन्यते

कलाहीनत्वेऽपि पूर्णिमाविहितयागादिकरणायानुज्ञायतेऽस्याम् अधिकरणे क्तिन् । कलाहीनचन्द्रयुक्तां शुक्लचतुर्दशीयुतपूर्णिमातिथौ ।

अनुमन्तृ त्रि० अनु+मन–तृच् । स्वयमुदासीने कार्य्यादौ प्रवृत्तस्यान्यस्योत्साहवर्द्धनमनुज्ञाकर्त्तरि ।

अनुमरण न० अनु+मृङ–ल्युट् । भर्त्तरि मृते तद्देहाप्राप्तौ तत्पादुकादिग्रहणेन पृथक्चितारोहणेन स्त्रीणां देहत्यागे ।

अनुमान न०अनु+मि–मा–वा भावादौ ल्युट् । व्याप्यस्य दर्शनेन व्यापकस्य निश्चये, यथा वह्निर्धूमस्य व्यापक इति धूमस्तस्य व्याप्य इत्येवं तयोः भूयः सहचारं पाकस्थानादौ दृष्ट्वा पश्चात् पर्वतादौ उद्दृश्यमानाग्निसख्य धूमस्य दर्शने तत्र वह्निरस्तीति निश्चीयते । करणे ल्युटि । तद्धेतुभूते धूमादौ । श्रुतेरेव स्वतः प्रामाण्यं, यत्र श्रुतिः साक्षात् न श्रूयते तत्र श्रुतिवाक्यात् श्रुतिवाक्यानुमीयते इति श्रुत्यनुमापकं श्रुतिवाक्यमप्यनुमानपदेनाभिधीयते इति मीमांसकाः ।

अनुमिति स्त्री०अनु+मि–मा–वा क्तिन् । प्रागुदर्शिते भावसाधनानुमानशब्दस्यार्थे ।

अनुमोद पु० अनु+मुद–घञ् । प्रस्तुतकर्म्मणि प्रवृत्तिविघातकरणेनान्यप्रोत्साहानुकूलव्यापारे, त्वया यत् कृतं तन्मेऽनुमतमित्याद्यभिलाषसाधने । [जादिषु पञ्चसु यागेषु ।

अनुयाज पु० अनु+यज–घञ् कुत्वाभावः । दर्शपौर्णमासाङ्गे प्रया-

अनुयायिन् त्रि० अनु+या–णिनि । सदृशे, अनुचरे, दासादौ, पश्चाद्गामिनि च । स्त्रियां ङीप् ।

अनुयोग पु०अनुयुज्यते कथनाय नियुज्यते अनु+युज–घञ् । प्रश्ने । सति हि प्रश्ने, पृष्टः कथनाय प्रवर्त्तते ।

अनुराग पु० अनु+रञ्ज+घञ् । अत्यन्तप्रीतौ, स्नेहे च । अनुरूपो रागः प्रा० स० । अतिरागानुगे त्रि० । [दशनक्षते ।

अनुराधा पु० अनुगता राधां विशाखां अत्या०स० । स्वनामप्रसिद्धे सप्त-

अनुरूप अव्य० रूपस्य सादृश्ये योग्यत्वे वा अव्ययी० । सादृश्ये योग्यतायाञ्च । अर्मश्राद्यच् । सदृशे, योग्ये च त्रि० ।

अनुरोध पु० अनु+रुध–घञ् । अनुसरणे, आराध्यादेरिष्टसम्पादने-आयाञ्च ।

अनुलाप पु० अनु वारंवारं लप्यते लप–घञ् । सुरुभाषणे ।

अनुलेप पु० अनु+लिप–भावे घञ् । चन्दनादिमर्दने कर्मणि घञि । अनुलिप्यमाने चन्दनादौ ।

अनुलोम पु० अनु+लोमन्+यथाक्रमे अव्ययी० अच् । यथाक्रमे ।

अनुलोमज पु० अनुलोमेन यथाक्रमेण जातः जन–ड । परिणीतासवर्णादिस्त्रीषु विप्रादिभ्य उत्कृष्टेभ्यो वर्णेभ्यो जाते मूर्द्धाभिषिक्तादौ संकीर्णवर्णे ।

अनुवर्त्तन न०अनुगतो वर्त्तनमाराध्यादेरिष्टसम्पादनं अत्या०स० अनु+वृत–ल्युट् । अनुरोधे, आराध्यादेरिष्टसम्पादने च ।

अनुवाक पु० अनु+उच्यते–वच–घञ् कुत्वम् । गानशून्ये ऋग्भागे, ऋग्यजुःसमूहे, वेदांशे शस्त्रनाम्नि ख्याते च ।

अनुवाक्या स्त्री०अनु+वच–ण्यत् कुत्वम् । ऋत्विग्भेदः प्रशास्ता तत्प्रयोज्यायां देवताज्ञानसाधने ऋचि ।

अनुवाद पु० अनु+वद–घञ् । ज्ञातार्थस्य प्रतिपादने, सिद्धस्योपन्यासे, प्रमाणान्तरावगतार्थस्य शब्देनोक्तौ, कथितस्य भाषान्तरेण कथने च ।

अनुवासन न० अनु+वस–ल्युट् । धूपादिना सौरभान्वितकरणे, स्नेहयुतकरणे च ।

अनुवृत्त त्रि० अनु+वृत-क्त । व्याप्ते, पालिते, अनुगते, प्रीतिविशिष्टे, अनुवृत्तिमति च ।

अनुवृत्ति स्त्री० अनु+वृत– क्तिन् । प्रवाहरूपेणानुगतौ, अनुरोधे, सेवायाम्, आनुकूल्ये, व्याकरणशास्त्रे प्रसिद्धे पूर्वसूत्रलोपात्तपदादीनामुत्तरत्र सूत्रेष्वनुवर्त्तनरूपेऽध्याहारे च ।

अनुव्रज्या स्त्री० अनु+व्रज-क्यप् । अनुसरणादिरूपे सेवने ।

अनुशय पु० अनु+शीङ्–अच् । अत्यन्तद्वेषे, पश्चात्तापे, पूर्ववैरे च । अनुगतः शयं सूत्रं गतिस० । सूत्रानुगते त्रि० ।

अनुशयिन् पु० अनु+शीङ्–इनि । यावत्कर्म्मक्षयं चन्द्रलोके स्थित्वा

सावशेषे एव कर्म्मणि पश्चात्तापान्विते मूर्च्छितेऽपि जन्मग्रहायागन्तु' प्रवृत्ते जीवे । पश्चात्तापयुते त्रि० ।

अनुशासन न० अनु+शास–ल्युट् । शासने, आज्ञायाम्, उपदेशे, नियोगकरणे च । शिष्यते आख्यायते लक्षणादिनेति करणे ल्युटि । व्युत्पादनञ्च अतथाभूतेभ्यो विशेष्य अनुशिष्याणां बोधनम् यथा व्याकरणे साधुशब्दानामसाधुभ्यो विविच्य प्रबोधनम् ।

अनुशीलन न० अनु+शु०–शील–ल्युट् । मुहुरालोचने, पुनःपुनरभ्यासे च । [शोचना तत्रैवार्थे स्त्री ।

अनुशोचन न० अनु+शुच–ल्युट् । शोके । स्वार्थे णिचि युचि । अनुशोचना तत्रैवार्थे स्त्री ।

अनुश्रव पु०अनुश्रूयते गुरुपरम्परयोच्चारणादनु क्रमश्रवणे, श्रूयते एव न तु केनापि क्रियते वा अनु+श्रु–अप् । वेदे, तस्य श्रूयमाणतायाः एव सर्वसम्मतत्वात् ।

अनुषङ्ग पु० अनु+सञ्ज–घञ् । दृढत्वम् । दयायाम्, आसक्तौ, एकस्य सूत्रपदस्य अन्यत्रान्वयार्थमनुवृत्तौ, अन्योन्येन प्रवृत्तौ तत्क्रियानान्तरीयकतयान्यस्य सिद्धिरूपे अतिशयप्रसिद्धे प्रसङ्गे च ।

अनुष्टुभ् स्त्री० अनु+स्तुभ–क्विप् षत्वम् । वरवृत्त्याम्, अक्षराष्टकके छन्दोभेदे च ।

अनुष्ठान न० अनु+स्था–भावे ल्युट् षत्वम् । विहितकर्म्मादिकरणे ।

अनुष्ण त्रि० उष्णः दग्धः न० त० । अलसे, उष्णभिन्ने शीते च । उत्पले न० । अलसोहि शीतबाधाभावेऽपि शीतबाधामभिनयन् कर्त्तव्यकर्म्मणि जड़ इव भवति दग्धस्तु शीतेऽपि तदगणयित्वा कर्त्तव्यकरणाय अजड़ इव सन् व्याप्रियते इति तयोरुष्णाऽनुष्णता । अत्र कारिण्यर्थे कनि अनुष्णकोऽपि । [दृश्यम् । नीलदूर्वायाम् ।

अनुष्णवल्लिका स्त्री० अनुष्णा शीतला वल्लीव स्वार्थे क । टापि अत

अनुसन्धान न० अनु+सम्–धाञ्–ल्युट् । अन्वेषणे, चिन्तने च ।

अनुसरण न०अनु+सृ–ल्युट् । अनुगमने, सदृशीकरणे । भावे घञि अनुसारोऽप्यत्र ।

अनुसूत त्रि० अनु+सिव–क्त जट् । अविते, सततसंबन्धे च ।

अनुस्वार पु०अनु+सृ-घञ् उदात्तादिस्वरवत्त्वात् स्वरवर्णाएव स्वाराः अनुगतः स्वारान् अत्या०स०। स्वरान्तरेण उच्चार्य्यमाणे विन्दुरेखया व्यज्यमानेऽनुनासिके वर्णभेदे अनुस्वारो विसर्गश्चेत्युपक्रम्य आश्रयस्थानभागिन इत्युक्तेः तस्य तथात्वम्।

अनुहर पु० अनु+हृ-ल्युट्। देशभाषाचेष्टादिना सदृशीकरणे, सादृश्यधर्म्मादिष्करणे च। [च न०।

अनूक पु० अनु+उच- समवाये क कुत्वं नि०। गतजन्मनि कुले शीले

अनूचान पु० अनु+वच-कान नि०। शिक्षादिषड्ङ्गसहितवेदाध्ययनकारिणि, वेदार्थानुवचनसमर्थे च।

अनून त्रि० जन-क न० त०। परिपूर्णे, समग्रे, अक्षीणे च। ननं निश्चितं न० त०। अनिश्चिते।

अनूप त्रि० अनुगता आपो यत्र ७ब० अच् स० आत उत्वम्। जलप्राये देशे, तत्स्थले सर्वदाभाजिनि महिषे, "बह्वम्बुबद्धदत्वञ्च वातश्लेष्मामयान्वितः। देशोऽनूप इति ख्यात" इत्युक्ते देशविशेषे च पु०। अनूपसर इति प्रसिद्धे देशे वा।

अनूपज न० अनूपे जलप्राये देशे जायते जन-ड ७त०। (आदा) इति ख्याते आर्द्रके तस्य जलप्रायोद्भवत्वात्। तत्स्थानजातमात्रे त्रि०।

अनूरु पु०न स्त ऊरू यस्य ब०। सूर्य्यसारथौ अरुणे विनताज्येष्ठपुत्रे। तस्य अपूर्णे एव गर्भे माता अण्डस्य स्फोटनादूरुप्रभृत्यङ्गविकलत्वं पुराणे प्रसिद्धम्।

अनूरुसारथि पु० अनूरुः सारथिः रथनियन्ता यस्य। सूर्य्ये।

अनृच पु० नास्ति अभ्यस्ततया ऋक् यस्य अच् समासान्तः। ऋक्शून्ये अनुपनीते बालके।

अनृत न० ऋतं सत्यं न० त०। सत्यभिन्ने अयथार्थे। अन्यतत्त्वव्यवहारस्तु प्रायेण कथने एव लोके दृश्यते क्वचित् वस्तुन्यपि यथा रङ्गे रजतादिकं, तत्र रजतमिदमिति ज्ञानञ्च। तद्वति त्रि०। ७ब०। वाणिज्ये न० तत्रान्यतवाहुल्यात्।

अनेक त्रि० एक+न०त०। एकभिन्नेषु बहुषु। नञ्तत्पुरुषे उत्त-रपदानुसारेणैव लिङ्गवचनतानियमेऽपि अत्र बहुवचनान्तत्वं तेन "पतन्त्यनेके जलधेरिवोर्मयः" इति माघः। [हलन्ति।

अनेकप पु० अनेकाभ्यां सुखशुखाभ्यां द्वाभ्यां पिबति पा-क। द्विपे

अनेकरूप त्रि० अनेकानि बहूनि रूपाण्यस्य ब०। चित्ररूपे।

अनेकान्त त्रि० न एकएकान्तः परिच्छेदो यस्य ब०। अनियतरूपे, अनतिशये च।। [२त०। बौद्धभेदे।

अनेकान्तवादिन् पु० अस्ति नास्ति नित्यमेकान्तं न वदति वद-णिनि

अनेडमूक त्रि० एडो बधिरो मूको वाक्शक्तिरहितश्च नास्ति यस्मात् ५ब०।(काला, बोबा)इति ख्याते श्रवणवचनशक्तिरहिते, षण्ढे च।

अनेहस् पु० न हन्यते हन-असि प्रकृतेरेहादेशः। काले।

अनैकान्तिक पु० एकान्तं नियतं व्याप्नोति एकान्त+ठक् न० त०। व्यभिचारिणि दुष्टे हेतौ। यथा धूमसाधने वह्निहेतुः न एकान्तो नियमो व्याप्तिर्यत्र ७ब०। अनेकान्तोऽत्यर्थे।

अनोऽक हु पु० अनसः शकटस्याक्षं गतिं हन्ति हन-ड। दृचे।

अन्त न० अम-तन्। स्वरूपे, स्वभावे च। शेषे पु०न०। नाशे, प्रान्ते, सीमायां, निश्चये, अवयवे च पु०। निकटे, मनोहरे च त्रि०।

अन्तःकरण न० क-करणे ल्युट् अन्तरभ्यन्तरं तद्वृत्तिपदार्थानां ज्ञानादीनां वा करणं कर्म० ईत० वा ज्ञानसुखादिसाधने आभ्य-न्तरे इन्द्रिये मनोबुद्धिचित्तादिपदाभिलप्यमाने। अवान्तरभेदस्तु वाचस्पत्ये। [बक्रान्तःकरणे त्रि०।

अन्तःकुटिल पु० अन्तर्मध्ये कुटिलः। वक्राकारमध्यावयवयुक्ते शङ्खे।

अन्तःपुर न० अन्तराभ्यन्तरं पुरं गृहं कर्म०। (अन्दर) इति प्रसिद्धे राज्ञां स्त्रीणां स्थानयोग्ये गृहे। तत्र स्थितत्वात् राजमहिलायामपि। पुरशब्दसमासे अचि स्त्रीत्वात् ङीप् अन्तःपुरीत्यपि।

अन्तःसत्वा स्त्री०अन्तरभ्यन्तरे गर्भे सत्त्वं प्राणी यस्या ब०। गर्भिण्यां स्त्रियाम्। [हलन्ति।

अन्तःस्वेद पु० अन्तः स्वेदो मदस्यन्दनं घर्मजलं यस्य ब०। मदस्राविणि

अन्तक पु० अन्तं करोति अन्त+तत्करोतीत्यर्थे णि—ण्वुल्। यमे। नाशकारके त्रि०।

अन्तकर त्रि० अन्तं नाशं करोति क्त—ट उप०स०। नाशकारके।

अन्तग त्रि० अन्तमवसानं गच्छति गम—ड। पारगामिनि अवसानं गते च। क्त अन्तगत इत्यपि तत्रार्थे।

अन्तर् अव्य० अन्—तुडागमश्च। मध्ये, प्राप्ते, स्वीकारे चित्ते च।

अन्तर न० अन्तं राति ददाति रा—क। अवकाशे, अवधौ, परिधानांशुके अन्तर्ज्ञाने, भेदे, परस्परवैलक्षण्ये विशेषे, तदर्थे, छिद्रे, आत्मीये, विनार्थे, बहिरर्थे व्यवधाने, मध्ये षडङ्गे च। उदाहरणानि तु वाचस्पत्ये।

अन्तरङ्ग त्रि० अन्तर्मध्येऽङ्गानि यस्य। आत्मीये, व्याकरणशास्त्रे प्रकृति-प्रत्ययकार्य्यमध्ये प्रकृत्याश्रिते कार्य्ये च।

अन्तरा अव्य० अन्तरेति दृश्—डा। निकटे, मध्ये, विनार्थे च।

अन्तरात्मा पु० अन्तर्वर्त्ती आत्मा अन्तः करणे, सर्व्वान्तर्यामिनि परमेश्वरे, अन्तःकरणाभिमानिनि जीवे च। [धानकारके त्रि०।

अन्तराय पु० अन्तरं व्यवधानमयते क्षय—अच्। विघ्ने। बाध-

अन्तराल न० अन्तरं मध्यसीमामारातिं गच्छति आ+रा—क रस्य लत्वम्। मध्ये, अभ्यन्तरे च। स्वार्थे अण् आन्तरालञ्च।

अन्तरिक्ष न० अन्तः स्वर्गपृथिव्योर्मध्ये ईक्ष्यते ईक्ष—कर्मणि घञ्, अन्तः कक्षाणि यस्य वा पृषो० पक्षे ह्रस्वः षकारस्य रित्वं वा। पञ्चिमे-षसञ्चारयोग्ये भूलोकसूर्य्यमध्यवर्त्तिनि आकाशप्रदेशे। अत्र अन्तरीक्षमपि।

अन्तरित त्रि० अन्तर्+इण—कर्त्तरि क्त २त०। अन्तरं व्यवधानं करोतीति णिचि कर्मणि क्त वा। व्यवधानं गते, तिरस्कृते च।

अन्तरीप पु० अन्तर्मध्ये गता आपोऽस्य ब० अच्स०आतर्ह्वत्तम्। द्वीपे।

अन्तरीय न० अन्तरे भवं गहादित्वात् छ। परिधाने वस्त्रे "नाभौ धृतञ्च यद्वस्त्रमाच्छादयति जानुनी। अन्तरीयं प्रशस्तं तद्विच्छन्नमुभयान्तयो"रित्येवंलक्षणे।

अन्तरे अव्य० अन्तरेति इण् विच् । मध्ये । [विनार्थे, मध्यार्थे च ।

अन्तरेण अव्य० अन्तरेति इण्—ण टवर्गादित्वेऽपि णत्वं नेत्वम् ।

अन्तर्गडु त्रि० अन्तर्मध्ये गडुरिव निरर्थकः । ग्रीवाप्रदेशे जातस्य गलमांसपिण्डस्य गडोर्यथा निरर्थकत्वम् तद्वन्निरर्थके । "काव्यान्तर्गडुभूता या नालङ्कारः प्रहेलिकेति" साहि० १० परि० ।

अन्तर्गृह न० अन्तर्गतं गृहम् । गृहमध्ये, वाराणसीस्थे सप्तावरणवति स्थानविशेषे च ।

अन्तर्जठर न० अन्तर्जठरस्य । जठरमध्ये, कुक्षिमध्यस्थकोष्ठे च ।

अन्तर्जल न० अन्तर्जलस्य अव्ययी० । जलमध्ये, जलमध्येकर्त्तव्ये अघमर्षणमन्त्रजपे च । "होममन्तर्जलादिनीति" स्मृतिः ।

अन्तर्ज्योतिः न० अन्तः ज्योतिरिव प्रकाशकम् । अन्तरात्मनि ।

अन्तर्दधन न० अन्तर्दध्यते मादकता आधीयतेऽनेन । दध—करणे ल्युट् । किण्वप्रभृतौ मद्यबीजे । [कोष्ठसन्नामे च ।

अन्तर्दाह पु० अन्तर्मध्ये दाहः दह—घञ् । देहाभ्यन्तरसन्तापे,

अन्तर्द्वार पु० अन्तर्मध्ये द्वारम् । गृहमध्यस्थे गुप्तद्वारे ।

अन्तर्धान न० अन्तर्+धा—ल्युट् । तिरोधाने दृश्यपदार्थस्य दर्शनायोग्यस्थाने स्थितौ, मुन्यादीनां शरीरत्यागे च । अङ्कि । अन्तर्धीयतेऽनेनार्थे स्त्री० ।

अन्तर्धि पु० अन्तर्+धा—कि । आच्छादने, व्यवधाने, अन्तर्धाने च ।

अन्तर्भूत त्रि० अन्तर्मध्ये भूतः भू+क्त । मध्यस्थिते अन्तर्गते च ।

अन्तर्मनस् त्रि० अन्तर्गतं बाह्यव्यापाराज्ञमतया अन्तरेव स्थितं मनो यस्य । व्याकुलचित्ते, समाहितमनस्के च ।

अन्तर्यामिन् पु० अन्तर्मध्येऽनुप्रविश्य यमयति स्वस्वकर्मणि इन्द्रियादीनि जीवं वा व्यापारयति यम+णिच्—णिनि । वायौ, "अन्तराविश्य भूतानि यो बिभर्त्त्यात्मकेतुभिः । अन्तर्यामीश्वरः साक्षात् भवे" दित्युक्तैः आत्मकेतुभिः निजव्यापारैः प्राणादिवृत्तिभिरित्यर्थः । ईश्वरे, अन्तरेव यमयतीत्यादिबृहदारण्यकान्तर्यामिब्राह्मणोक्तेः । अन्तर्गतवस्तुज्ञातरि त्रि० ।

अन्तर्वंशिक त्रि० अन्तर्वंशे राज्ञामाभ्यन्तरदृष्टे नियुक्तः नियुक्तार्थे ठ । अन्तःपुरे रक्षणार्थं नियुक्ते कुब्जवामनादौ ।

अन्तर्वत्नी स्त्री० अन्तरस्ति अस्ति गर्भः । अन्तर+मतुप् नि० । गर्भवत्यां स्त्रियाम् ।

अन्तर्वमि पु० अन्तः स्थित एव वाणयति उद्गारशब्दं कारयति वण शब्दे इन् णस्य मत्वम् । (ढेकुर) इत्यादि ख्यातस्योद्गारशब्दस्य कारके अजीर्णनामके रोगभेदे ।

अन्तर्वाणि त्रि०अन्तर्गता अन्तः करणे स्थिता शास्त्रवाक्यालिका वाणी यस्य ब० न कप् हुस्वश्च वङ्गशास्त्रवाक्याभिज्ञे पण्डिते ।

अन्तर्वेदी स्त्री० पृथिव्या मध्यस्थितत्वादन्तर्वेदीव । हरिद्वारावधिप्रयागपर्य्यन्ते यज्ञस्थलीति ब्रह्मावर्त्तवृत्ति च ख्याते देशे ।

अन्तर्हित त्रि० अन्तर्+धा—क्त । गुप्ते, तिरोभूते च ।

अन्त (न्ति) वासिन् पु० अन्ते समीपे वस्तुं शीलमस्य वस—णिनि सप्तम्या वा लुक् । शिष्ये । स्त्रियां ङीप् । समीपवर्त्तिनि त्रि० ।

अन्तशय्या स्त्री० शयनं शय्या शीङ्—क्यप् अन्तस्य नाशार्थं शय्या चतुर्थ्यर्थे ई त० । मरणार्थं भूमिशय्यायाम्, तद्धेतुत्वात् श्मशाने च । अन्तएव शय्यानिर्व्यापारार्थकत्वात् कर्म्म० । मरणे ।

अन्तःस्था त्रि० अन्तःस्थौष्ठयोर्मध्ये तिष्ठतीति स्था—क्विप् । यरलवाख्येषु वर्णेषु । वा विसर्गजिह्वामूलीयोऽन्तस्था अपि ।

अन्तावसायिन् पु०नखकेशानामन्तमवसातुं छेत्तुं शीलमस्य अव+सो—णिनि युक् च । नापिते । अन्ते हृद्ये वयसि अवस्यति निश्चिनोति तत्त्वम् । क्षुनिभेदे । अन्ताय स्वतोपक्रमते जन्तुनाशाय अवस्यति । प्राणिहिंसके चाण्डालादौ ।

अन्ति (का) स्त्री० अन्त्यते संबध्यते अन्त—इ । नटाभिनयनकाले तद्ज्ञौ जे ष्ठभगिन्याम् । स्वार्थे के टापि अन्तिकेत्यपि ।

अन्तिक त्रि० अन्त्यते संबध्यते सामीप्येन, अन्त—घञ् सोऽस्यास्तीति मत्वर्थीयः ठन् । सामीप्यवति । स्वार्थे ठनि । सामीप्ये पु० । नृक्षत्राम् न० । ओषधिभेदे स्त्री० ।

अन्तिकाश्रय पु० अन्तिके समीपे आश्रीयते आ+श्री–अच्। निकटस्थे, अवलम्बनस्थाने च।

अन्तिम त्रि० अन्ते भवः अन्त+डिमच्। अन्तभवे, चरमे च।

अन्त्य पु० अन्ते पर्य्यन्ते वसतीति अन्त+यत्। चाण्डाले। तुल्यायाम् स्त्री०। अन्तिमे वस्तुनि त्रि०। यथा नक्षत्राणां मध्ये रेवती, राशीनां मध्ये मीनः वर्णानां मध्ये हकार इत्यादि। संख्याभेदे न०"जलधिश्चान्त्यं परार्द्धमिति दशगुणोत्तरा संख्या" इति भास्कराचार्योक्तेः परार्द्धदशभागे।

अन्त्यज पु०अन्तोऽधमः सन् जायते जन–ड। शूद्रे, स हि वर्णानां विप्रादीनां चतुर्णां मध्ये अधमो जातः। "रजकश्चर्मकारश्च नटोवरुड एव च। कैवर्त्तमेदभिल्लाश्च सप्तैते ह्यन्त्यजाः स्मृताः" इति स्मृत्युक्तेषु रजकादिषु च। अधमजातमात्रे त्रि०।

अन्त्यजन्मन् पु० अन्त्यं जन्म यस्य। शूद्रे। स हि विप्रक्षत्रियवैश्यजन्मानन्तरं ब्रह्मणः पादात् शेषे जातः।

अन्त्यावसायिन् पु० "निषादस्त्री तु चण्डालात् पुल्कस्यामन्त्यावसायिनम्। श्मशानगोचरं स्मृते"इति मनूक्तेः निषादस्त्रियां चण्डालजाते (सरदाफरास) इति ख्याते सङ्कीर्णवर्णे "चण्डालः श्वपचः क्षत्ता स्मृतो वैदेहकस्तथा। मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः" इत्यङ्गिरसोक्तचाण्डालादिषु च।

अन्त्येष्टि स्त्री०इष्टियागः यज+क्तिन् अन्त्या इष्टिः। मृतस्य दाहादिरूपे चरमसंस्कारे "नान्त्येष्टिर्नास्थिसञ्चयः" इतिस्मृतिः।

अन्त्र न० अन्त्यते देहो बध्यतेऽनेन अति–बन्धने ष्ट्रन्। देहबन्धने "उक्ताः सार्द्धत्रयो व्यामाः पुंसामन्त्राणि सूरिभिः। अर्द्धव्यामेन हीनानि स्त्रीणामन्त्राणि निर्द्दिशेत्" इति वैद्यकोक्तपरिमाणवति नाड़ीभेदे।

अन्त्रक पु० अन्त्यते बध्यतेऽनेन अदि+बन्धने–क्रू स्वार्थे क ह्रस्वः अभिधानात् पुंस्त्वम्। हस्तिपादबन्धने निगड़े, पादकीले च।

अन्दू स्त्री० अन्द्यते बध्यतेऽनेन अदि+कू । निगड़े स्त्रीपादभूषणे च ।
अन्ध दृष्टिनाशे अद० चु० उभ० अक०सेट् । अन्धयति ते आन्दिधत् त ।
अन्ध त्रि० अन्धयति चक्षुषा न पश्यति अच् चक्षुर्हीनत्वे । अन्ध्र-तेऽनेनेति करणे घञि । अन्धकारे जले च न० ।
अन्धक पु० अन्धयति अन्ध–एवुल् । देशभेदे, मुनिभेदे, यदुवंश्यनृप-भेदे, हिरण्याक्षसुते दैत्यभेदे च । तमसि न० ।
अन्धकरिपु पु० अन्धकासुरस्य रिपुः । शिवे, अन्धकस्य तमसो रिपौ सूर्ये, चन्द्रे, वह्नौ च ।
अन्धकार पु०न० अन्धं करोति कृ–अण् उप०स० । तेजोऽभावे तमसि ।
अन्धकूप पु० अन्धयतीत्यन्धः स चासौ कूपः । सान्धकारे कूपे । अन्धः कूपो यत्र ७त० । नरकभेदे । अन्धस्य दृष्ट्यभावस्य कूपरूपत्वं । मोहे । स हि सर्व्वदृष्ट्यभावस्याकरः ।
अन्धतमस न० अन्धयति अन्ध+अच् तायति अनेनेति तम्–करणे असि कर्म० अच् समासान्तः । निविड़ान्धकारे ।
अन्धतामिस्र न०तमिस्रा तमस्तातिः तमिस्रैव तामिस्रं अन्धयतीत्यन्धम् कर्म० । निविड़ान्धकारे । अन्धमु अन्धकारकं तामिस्रं यत्र ७त० । नरकविशेषे । सांख्यशास्त्रे प्रसिद्धे भयविशेषविषयकोऽभिनिवेशे पु० ।
अन्धमूषिका स्त्री० अन्धं दृष्ट्यभावं सुष्णाति सुष+एवुल् दीर्घः । देव-ताऽदृश्ये तत्सेवने हि चक्षुष्मत्ता भवतीति वैद्यकप्रसिद्धम् ।
अन्धस् न० अद्यते अद–असुन् नुम् धश्च । ओदने ।
अन्धिका स्त्री० अन्धयति अन्ध–ण्वुल् । रात्रौ, द्यूतभेदे सर्याम्, सिद्धाख्यौषधौ (आन्धुलीति) ख्याते नेत्ररोगभेदे च ।
अन्धु पु० अन्ध–कु । कूपे ।
अन्धुल पु० अन्ध–उलच् । शिरीषवृक्षे ।
अन्ध्र पु० अन्ध–र । देशभेदे, तत्स्थलोके, ब०व० जातिभेदे च ।
अन्न न० अनित्यत्वेन अन–नन् अद्यते इति वा अद–क्त अन्नार्थतया न जग्धिः । ओदने, खिद्यान्ने, "यस्य चोत्तरतं प्रोक्तं सतुषं धान्यमुच्यते । आमं तु वितुषं ज्ञेयं खिन्नमन्नमुदाहृतम्" इति

स्मृतेः व्रीहियवादावामाग्ने, पृथिव्याम्, अन्नहेतुत्वात् तस्या अन्न-त्वम् अतएव वेदान्ते तेजोऽबन्नात्मिका प्रकृतिरित्युक्तम् । उपचारात् उपकरणे च । [दूति ख्याते धान्यादेः स्थापनस्थाने ।

अन्नकोष्ठक पु० अन्नस्य व्रीह्यादेः खलं कोष्ठमिव अल्पार्थे कन् ।(कुटी)

अन्नगन्धि पु० अन्नस्य गन्धइव गन्धो यस्य ब० इत्समासान्तः । अति-सारे, उदरामये च रोगे । अन्नस्य गन्धो लेशो यत्र ब० इत्समा-सान्तः । अल्पान्ने भोजनादौ त्रि० ।

अन्नप्राशन न० प्रकृष्टं विधानेन प्रथममाशनं प्राशनं ६त० । षष्ठाष्ट-मासादौ बालकादेर्विधानेन प्रथमान्नभोजने ।

अन्नमय पु० अन्नस्य विकारः अन्न+विकारार्थे मयट् । स्थूलशरीरे । अन्नविकृतिमात्रे त्रि० । "अन्नमयं हि सौम्य मन" इति श्रुतिः ।

अन्नविकार पु० वि+कृ–घञ् ६त० । अन्नस्य विकारे शोणितमां-सादिपरिणामजे चरमधातौ शुक्रे ।

अन्नाशन न० अन्नस्य विधानेन आशनम् । अन्नप्राशनार्थे ।

अन्य त्रि० अन -अन्यो० यः । भिन्ने, सदृशे च । सर्वनामता चास्य ।

अन्यतम त्रि०अव्यु० प्रा० । बहूनां मध्ये निर्द्धारिते एकस्मिन् ।

अन्यतर त्रि०अव्यु०प्रा० । द्वयोर्मध्ये निर्द्धारिते एकस्मिन् सर्व्वनामता ।

अन्यत्र अव्य० अन्य+त्रल् । व्यतिरेके, विनार्थे च "अन्यत्र धर्म्मादि-त्यत्राधर्मादिति" स्मृतौ प्रथमार्थे एव त्रल् । [वितर्के, दुष्टे च ।

अन्यथा अव्य० अन्य+प्रकारार्थे थाच् । विनार्थे, इतरप्रकाराय,

अन्यथासिद्धि स्त्री०अन्यथा सिद्धिः यस्य कारणतां विनापि सिद्धिः । कार्यजन्म तस्य अन्यथासिद्धिरिति न्याये परिभाषितरूपे वस्तुनि यथा घटजन्मकाले तत्र गर्दभस्य स्थितावपि तस्य कारणतां विनापि घटा-दिसिद्धिरिति घटादौ गर्दभादेरन्यथासिद्धिः ।

अन्यदा अव्य० अन्यस्मिन् काले दा । अन्यस्मिन् काले इत्यर्थ ।

अन्यपूर्व्वा स्त्री० अन्यः पूर्व्वो यस्याः । पूर्वपतिमरणादौ पश्चात् कृत-तद्भिन्नपतिकायां पुनर्भुवि । अर्शआदित्वादच अन्या पूर्वा यस्य सा । तत्परित्यक्तरि पुनर्भूपतौ पु० ।

अन्यभृत् पु० अन्येन भ्रियते भृ-कर्मणि क्विप्। कोकिले। कर्मणि क्के अन्यभृतोऽप्यत्र। कर्त्तरि क्विपि परपोषके त्रि०।

अन्यादृश् त्रि०अन्यस्येव दर्शनमस्य अन्य+दृश-क्विन् आत्वम्। अन्यसदृशे, अन्यप्रकारे च। कडि-अन्यादृशः क्से अन्यादृक्षोऽप्यत्रैवार्थे

अन्याय पु० न्यायोविचारः, सङ्गतिः, औचित्यं, प्रतिज्ञादिपञ्चकप्रतिपादकवाक्यञ्च अभावार्थे न०त०। विचाराभावे, सङ्गत्यभावे, अनौचित्ये, भेदार्थे न०त० पञ्चावयवन्यायभिन्ने च न्यायशब्दार्थेत्वधिकं वक्ष्यते। ब०। विचारशून्ये, औचित्यशून्ये, असङ्गते, प्रतिज्ञादिपञ्चकवाक्यशून्ये च त्रि०।

अन्योदर्य्य पु० अन्यस्मिन् स्वमातृभिन्ने उदरे गर्भे भवः उदर+यत्। एकपितृके भिन्नमातृके वैमात्रेये भ्रातरि। "अन्योदर्य्यस्तु संसृष्टीति" स्मृतेः। तथाभगिन्यां स्त्री०। अन्योदरजातमात्रे त्रि० अतएव दायभागटीकायां तद्वचनव्याख्याने भ्रातृपुत्रादीनामपि अन्योदर्य्यपदार्थतया ग्रहणमित्युक्तम्।

अन्योन्य त्रि० अन्य+कर्मव्यतिहारे (एकजातीयक्रियाकरणे) द्वित्वम् पूर्वपदे सुश्च। परस्परार्थे। कृतद्वित्वस्यापि सर्वनामता तेनान्योऽन्यस्मै इत्यादि। अलङ्कारशास्त्रप्रसिद्धे अलङ्कारभेदे न० तच्च साहि० द०१० परि० द्रष्टव्यम्।

अन्योऽन्याभाव पु० अन्योऽन्यस्मिन् अन्योऽन्यस्य अभावः। भेदे भेदो हि यथा घटे पटस्य तथा पटे घटस्य सदाऽस्ति संसर्गाभावस्तु-नैवं घटे भूतलस्याभावेऽपि भूतले घटस्य कदाचित् सत्त्वसंभवेन सदा भावाभावात्।

अन्योन्याश्रयः त्रि० अन्योन्यमाश्रयतीति आ+श्रि-अच्। परस्परसापेक्षे। न्यायमते तर्कविशेषे पु०। स च एकस्य ज्ञानादिजननाय यथाऽन्यज्ञानाद्यपेक्षा तथा अन्यस्य ज्ञानादिजननायेतरस्य ज्ञानाद्यपेक्षेति स्वापेक्षापेक्षित्वनिमित्तकोऽनिष्टः प्रसङ्गः विस्तरस्तु वाचस्पत्ये।

अन्वक्ष त्रि० अनुगतमक्षमिन्द्रियं यस्या० ब०। प्रत्यक्षे, अनुपदे अनुगे च। अक्ष्णः समीपेऽव्ययी० टच्। चक्षुर्निकटे अव्य०।

अन्वच् त्रि० अनु+अञ्च-क्विन्। अनुगामिनि अनुपदे च।

अन्वय पु० अनु+इण्-अच्। सन्ततौ, अनुगतौ, अनुवृत्तौ, आनुकूल्ये, कार्य्ये-कारणस्यानुसरणे, कार्य्यसत्ताप्रादकस्वसत्ताकस्य कारणस्य कार्य्योपस्थितौ, स्वसत्तानियतसत्तावति, कार्य्ये संबन्धे च पदानां, पदोपस्थाप्यपदार्थानाञ्च परस्परेण सम्बन्धे च।

अन्वयबोध पु० अन्वयस्य पदोपस्थाप्यपदार्थानां संबन्धस्य बोधः ६त०। न्यायमते शब्दजन्ये शाब्दइति नामके प्रत्यक्षानुमानादिभिन्ने बोधे। वैशेषिकमते शब्दजन्ये अनुमित्यात्मके एव बोधे।

अन्वयव्यतिरेकिन् त्रि० अन्वयव्यतिरेकौ स्तोऽस्य। साध्यसाधके हेतुविशेषे, यथा वह्निसाधने धूमः। स हि वह्निमति महानसादौ वह्न्यभाववति जलादौ च भावाभाभ्यां वह्नेरन्वयव्याप्तः व्यतिरेकव्याप्तश्चेति न्यायमते प्रसिद्धम्।

अन्वयव्याप्ति स्त्री० अन्वयेन व्याप्तिर्व्यापनं नियततया स्थितिः ३त०। यत्र धूमस्तत्र वह्निरित्येवं रूपायां व्याप्तौ।

अन्ववसर्ग पु० अनु+अव+सृज-घञ्। यथेष्टं क्रियतामित्येवं रूपायामनुज्ञायाम्।[इण्-कर्त्तरि अच् वा। वंशे, सन्ताने च।

अन्ववाय पु० अन्ववायते उत्पत्त्यानुसंबध्यते अनु+अव+अय-घञ्.

अन्वष्टका स्त्री० अनुगतामष्टकाम् अत्या०स०। अष्टकानन्तरतिथिषु गौणचान्द्रपौषमाघफाल्गुनमासानां कृष्णनवमीषु। तत्र साग्निकस्य माहश्राद्धमष्टकाश्राद्धवत् कर्त्तव्यम्।

अन्वह अव्य० अह्नि अह्नि वीप्सार्थेऽव्ययी० अच्। प्रतिदिने।

अन्वाचय पु० एकस्य प्राधान्यादन्यं अचीयते बोध्यते यत्र अनु+आ+चि-आधारे अच्। उद्देश्यसिद्ध्यानुद्देश्यसिद्धौ। यथा भिक्षां गच्छ यदि गां पश्यस्तामानय, अत्र भिक्षायामेव उद्देशः न गमने, तत्सिद्ध्युत्तरं गवानयनमनुद्दिष्टमपि साध्यतया निर्दिष्टम्।

अन्वाजि अव्य० अन्वाजयत्यनेन अनु+आ+जि-डे। दुर्बलस्य बलाधाने। सप्तम्यन्तप्रतिरूपकोऽयम्।

अन्वादेश पु० अनु+आ+दिश घञ्। पूर्वोपात्तस्य किञ्चित्कार्य्यां-

न्तरं विधातुं पुनरुपदेशे । यथा अनेन व्याकरणमधीतं न्यायमेनं प्रपाठयेति न्यायपाठार्थं पुनरुपदेशः । कथितकथने, अनुवादार्थे च ।

अन्वाधेय न० अनु+आ+धाञ् यत् । "विवाहात् परतो यत्तु लब्धं भर्तृकुलात् स्त्रिया । अन्वाधेयं तु तत्प्रोक्तं लब्धं बन्धुकुलात्तथा" इत्युक्तलक्षणे स्त्रीधने । पश्चादाधेये वस्तुनि त्रि० ।

अन्वासन न० अनु+आस—ल्युट् । पश्चादुपवेशनरूपे सेवने, अनुशोचने च । आधारे ल्युटि । शिल्पिगृहे ।

अन्वाहार्य न० अनु व्याप्तौ, मासि मासि आहियते अनु+आ+हृ—कर्मणि ण्यत् । प्रतिमासकर्त्तव्येऽमावास्याविहिते श्राद्धे "पितृणां मासिकं श्राद्धमन्वाहार्यं विदुर्बुधाः" इति स्मृतिः, यागदक्षिणायाञ्च ।

अन्वाहार्यपचन पु० अन्वाहार्यं श्राद्धं पच्यतेऽनेन पच+करणे ल्युट् । दक्षिणाग्नौ ऋग्वेदविधिना स्थापितेऽग्नौ ।

अन्विच्छा स्त्री० अन+इष—अ नि० । अन्वेषणे ।

अन्विष्ट त्रि० अनु+इष्—क्त । अन्वेषिते ।

अन्वीक्षा स्त्री० अनु श्रवणादनु ईक्षा श्रुतार्थस्य युक्तायुक्तत्वपर्य्यालोचना अनु+ईक्ष—भावे अ । वेदार्थश्रवणानन्तरं तदर्थपर्य्यालोचनायाम् । अतएवैतदुपयोगिनी विद्या आन्वीक्षिकीत्युच्यते ।

अन्वेषण न० अनु+इष—भावे ल्युट् । अनुसन्धाने । व्यवधानादिना अदर्शनं गतस्य ज्ञानार्थं प्रयत्नोऽनुसन्धानम् । वाञ्छायाञ्च । युचि । अन्वेषणा । तत्रेच्छेवार्थे स्त्री० ।

अप् स्त्री० बहु०आप—क्विप् हस्वः । जले ।

अप अव्य० न पाति पा—ड । वियोगे, विकृतौ, विपरीते, निदर्शने, आनन्दे, वर्জ্জने, चौर्य्य च । [रणवति त्रि० ।

अपकर्मन् न० अपकृष्टं कर्म प्रा० । दुष्टाचरणे । ब० । दुष्टाच-

अपकर्ष पु० अप+कृष—भावे घञ् । उचितधर्मापेक्षया हीनतायां, स्वकर्त्तव्यकालात् पूर्वकालकरणे च ।

अपकार पु० अप+कृ—घञ् । अनिष्टोत्पादने, तद्धेतौ हेत्वे च ।

अपकारगिर् स्त्री० अपकारेण हेतुना गीर्यते गृ-क्विप्। भर्त्सनवाक्ये।
अपकृष्ट त्रि०अप+कृष-क्त। अधमे,हीने,स्वकालात् पूर्वकाले कृते च।
अपक्रम पु० अपहृत्य क्रमो गतिः क्रम-घञ् अदृष्टिः। पलायने।
अपक्रिया स्त्री० अप+कृ-भावे श। द्वेषे, अपकारे च।
अपक्रोश पु० अप+क्रुश-घञ्। निन्दने। उपक्रोशोऽप्यत्र।
अपक्षेपण न० अप+क्षिप-ल्युट्। अधःस्थानसंयोगहेतौ क्रिया-विशेषे, अधःपातने च। अवक्षेपणमप्यत्रार्थे।
अपगत त्रि० अप+गम-क्त। नष्टे, पलायिते, गते, द्रवीभूते च।
अपघन पु० अप+हन अप् घनादेशः। देहे, घनो निबिडस्तद्-भिन्ने त्रि०।
अपघात पु०अप+हन-घञ्। अपकृष्टहनने दुष्टहेतुकमरणे च।
अपचय पु० अप+चि अच्। हानौ, अपहरणे, व्यये च।
अपचायित त्रि० अप+चाय-चि-स्वार्थे णिच्-वा क्त। पूजिते।
अपचार पु० अप+चर-घञ्। अहिताचरणे। प्रा०ब० अपग-ताचारे, दूरहीने च त्रि०। [हीने।
अपचित त्रि० अप+चाय-क्त चायः चिभावः। पूजिते। चि-क्त।
अपचिति स्त्री० अप+चाय-क्तिन् प्रकृतेश्चिभावः। पूजायां चि+क्तिन्। हानौ अपचये च।
अपटान्तर त्रि० पटेन तिरस्करिण्या अन्तरमत्र। अव्यवहिते, आसक्ते, संसक्ते च। अपदान्तरमित्यत्रैवार्थे।
अपटी स्त्री० अल्पः पटः पटी न०त०। (कानात्) इति ख्याते वस्त्र-प्रावरणे। [च।
अपटु त्रि० पटुर्नेच्छः न०त०। रोगिणि, दक्षतारहिते कार्यादिक्षमे
अपतर्पण न० अप+तृप-ल्युट्। रोगादौ उपवासे, तृप्त्यभावे च।
अपत्य न० न पतन्ति पितरोऽनेन पत-करणे यत् न०त०। पुत्रदु-हितृरूपे सन्ताने। [विशिष्टे गर्भदायिविद्यादौ च।
अपत्यदा स्त्री० अपत्यं तद्धेतुं गर्भं ददाति। सेवनेन गर्भमाहके ओष-
अपत्यप्रद पु० अपत्यस्य प्रत्युः हेतु०। कर्कटे।

अपत्र पु०न विद्यते पत्रमस्य । अङ्कुरे तस्य पत्राभावात् तथात्वम् ।
अपत्रप त्रि० अपगता त्रपा लज्जा यस्मात् पृ.ब० । लज्जाहीने ।
अपत्रपा स्त्री०अप+त्रप–भावे अ । अन्यहेतुकैलज्जायाम् ।
अपत्रपिष्णु त्रि० अप+त्रप–इष्णुच् । स्वभावतो लज्जाशीले ।
अपथ्य न० न पन्थाः न०त० वा अच् । कुपथे, । अत्र वा अचोऽभावे अपथिन् इत्यपि । ब० । पथिशून्ये त्रि० । पथोऽभावः मार्गाभावे अव्य० ।
अपथ्य त्रि० पथि (रोगिभोजने) हितं पथिन्+यत् न०त० । रोगिभोजनायोग्ये । [अवदानमप्यत्राह ।
अपदान न० अप+दैप–ल्युट् । शोधने, करणे ल्युट् । प्रशस्ते कर्मणि
अपदिश न० दिशयोर्मध्ये अप+दिश–अव्ययी० । दिशोर्मध्ये विदिशि (कोणे) इति ख्याते । [निमित्ते, स्थाने च ।
अपदेश पु० अप+दिश–घञ् । लक्ष्ये, स्वरूपाच्छादनरूपे, च्छले,
अपध्वंसज पु० अपध्वस्यतेऽनेन अपध्वंसः वर्णानां भिन्नरूपतासंपादकः सङ्करस्तस्माज्जायते जन–ड मु.त० । भिन्नवर्णसङ्गमजाते करणादौ संकीर्णवर्णे ।
अपध्वस्त त्रि० अप+ध्वंस–क्त । निन्दिते, परित्यक्ते, अवचूर्णिते च ।
अपनयन न० अप+नी–भावे ल्युट् । दूरीकरणे, खण्डने च ।
अपनोदन न० अप+नुद–भावे ल्युट् । दूरीकरणे, खण्डने च ।
अपभ्रंश न०अप+भ्रंश–पतने घञ् । पतने । अपभ्रश्यते अधर्महेतुतया पत्यतेऽनेन करणे घञ् । साधुशब्दभिन्ने अपशब्दे यज्ञादौ तत्कथनस्य पापहेतुत्वात् ।
अपमान न० अप+मि–मा–वा भावे ल्युट् । अवज्ञायाम् ।
अपमित्यक न०अपमितिरपमानः तेनाकं दुःखं यत्र । अपमानहेतुकदुःखदायके करणे, तद्ग्रहणे हि उत्तमर्णसमीपेऽनादरात् दुःखं भवति । [शस्त्रादिना स्वयमन्यतो वा मरणे ।
अपमृत्यु पु० अपकृष्टो मृत्युः प्रा० स० । मरणहेतुरोगादिकं विना
अपयान न० अप+या–भावे ल्युट् । अपसरणे, पलायने च ।
अपर न०न पूर्यते यत; पृ–अपादाने, अप् न०त० । गजस्य पश्चाद्भागे ।

न पृणाति सन्तोषयति पृ-अच् न०त० । शत्रौ । अर्वाचीने, भिन्ने च त्रि० । पश्चिमायां दिशि, कन्यकादार्दिद्यायां च स्त्री० ।

अपरक्त त्रि० अप+रञ्ज-क्तर्त्तरि क्तं । विरक्ते, अननुकूले ।

अपरति स्त्री० अप+रम-भावे क्तिन् । विरागे, निवृत्तौ च ।

अपरत्र अव्य० अपर+त्रल् । पश्चादर्थे, परकाले च ।

अपरत्व न० अपरस्य भावः त्व । (अपर)इति व्यवहारके न्यायमते गुणभेदे, तच्च द्विविधं कालिकं दैशिकञ्च तत्र माघादपरः फाल्गुन इति कालिकं, पाटलिपुत्रादपरा काशीति दैशिकम् ।

अपरपक्ष पु० अपरः शेषः पक्षः कर्म० । कृष्णपक्षे ।

अपररात्र पु० अपरं रात्रेः एक० त० टच् । रात्रिशेषे ।

अपरस्पर न० अपरञ्च परञ्च द्व० पूर्वपदे सुश् । क्रियासातत्ये सन्ततैकरूपक्रियाकरणे ।

अपराजित पु० परा+जि-क्त न०त० । शिवे, विष्णौ, ऋषिभेदे च । पराजितभिन्ने त्रि० । दूर्व्वायां, स्वनामख्यातायां लतायां, दुर्गायां, शेफालिकायां, जयन्तीवृक्षे, असनवृक्षे, भृङ्गिणीवृक्षे च स्त्री० ।

अपराद्धपृषत्क पु० अपराद्धो लक्ष्यात् च्युतः पृषत्को बाणो यस्य अप+राध-क्त ब० । लक्ष्याद्याहिसायके धानुष्के ।

अपराध पु० अप+राध-भावे घञ् । अकार्य्यादिकरणरूपे दोषे ।

अपरान्त पु० अपरस्या अन्तः । पाश्चात्यदेशभेदे । तद्देशवासिनि त्रि० ।

अपराह्ण पु० अपरमह्नः एक० त० टच् अह्नादेशो णत्वञ्च । त्रिधा विभक्तदिनस्य तृतीये भागे ।

अपरिग्रह पु० परि+ग्रह-अप् अभावार्थे न०त० । असंग्रहे, स्त्रीकाराभावे च । नास्ति कन्याकौपीनाद्यतिरिक्तः परिग्रहो यस्य ब० । परिव्राजके । परिग्रहमात्रशून्ये त्रि० ।

अपरिच्छिन्न त्रि० परि+च्छिद्-क्त न०त० । इयत्तारहिते ।

अपरिहार्य्य त्रि० परि+हृ-ण्यत् न०त० । परिहर्त्तुमयोग्ये ।

अपरेद्युस् अव्य० अपरस्मिन्नहनि अपर+एद्युस् । अपरदिने इत्यर्थे ।

अपरोक्ष न० परतोऽतीतः अक्ष्णामिन्द्रियाणां न भवति पर+अक्षि-अ-

समर्टस० टच् नि० घुट्। विषयेन्द्रियसन्निकर्षजन्ये प्रत्यक्षरूपे ज्ञाने। अर्थ आद्यचि तद्विषये त्रि०।

अपर्णा स्त्री० न पर्णान्यपि भोजनं यस्याः। हिमाद्रिजायाम् तपसि स्थितया तया पर्णास्याप्यभोजनात्तथात्वम्। पर्णशून्ये त्रि०।

अपर्य्याप्त त्रि०परि+आप्—क्त न०त०। असमर्थे, असम्पूर्णे च। [च।

अपलाप पु०अप+लप-घञ्। सतोऽप्यसत्त्वेन कथनरूपे अपह्नवे, ये मृषि

अपवरक न० अप+ वृ—ञ्वुल्० संज्ञायां ण्वुल्। वासगृहे।

अपवर्ग पु०अप+वृज—भावे घञ्। दाने, निर्याणमोक्षे, फलसाधने, प्रसादौ च

अपवर्जन न० अप+वृज—भावे ल्युट्। दानादावपवर्गार्थे।

अपवर्त्तन न०अप+वृत—णिच्—भावे ल्युट्। परिवर्त्तने, वक्रीकरणे, अङ्कशास्त्रे प्रसिद्धे भाज्यभाजकयोरुभयोरपि तुल्यरूपेण केनचिद्भेन विभाजने च।

अपवाद पु०अप+वद—भावे, घञ्। निन्दायाम्, आज्ञायाम्, प्रणये, विश्वासे, विधेयविधिरूपे बाधके, वेदान्तप्रतिषिद्धे रज्जौ प्रतिभासस्य रजतस्य रज्जुमात्ररूपतालाभे च।

अपवारण न० अप+वृ—णिच्—ल्युट्। अन्तर्धाने।

अपविद्ध त्रि०अप+व्यध—क्त। त्यक्ते, प्रत्याख्याते, प्रतिक्षिप्ते, "मातापित्रभ्यामुत्सृष्टं तयोरन्यतरेण वा। यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते" इत्युक्तरूपे पुत्रभेदे च।

अपविद्धा स्त्री०अपगतं विघ्नं यस्याः ब०। विघ्नहारिण्याम्।

अपवृत्त पु०अप+वृत—क्त। पराङ्मुखीभूते।

अपशब्द पु० अपकृष्टः शब्दः प्रा०स०। संस्कृतभिन्ने शब्दे "तएव शक्तिवैकल्यप्रमादालस्यतादिभिः। अन्यथोच्चारिताः शब्दा अपशब्दा इतीरिताः" इतिहार्युक्तदिशा संस्कृतशब्दे एव अन्यथोच्चारणादसाधुत्वं गते भाषाशब्दे। [त्रि०।

अपशोक पु० अपगतः शोको यस्मात् ब०। अशोकवृक्षे। शोकरहिते

अपसु अव्य० अप+सा—कु पत्वम्। निर्दोषे, शोभने, विपरीते च। प्रतिकूले, विरुद्धार्थे च त्रि०। काले पु०।

अपष्ठुल त्रि० अप+स्था+उरच् रस्य लः षत्वम् । निमित्ते, विपरीते च ।
अपसद त्रि० अपकृष्टएव सीदति सद–अच् । अधमे, नीचे च ।
अपसर्जन न० अप+सृज–भावे ल्युट् । दाने, परित्यजने ।
अपसर्प पु० अप+सृप–अच् । गुप्तचरे । भावे घञि अपसरणे ।
अपसव्य पु० अपगतं सव्यं यत्र । दक्षिणभागे । पितृतीर्थे न० ।
अपस्कर पु० अपकीर्य्यते स्वस्वस्थाने क्षिप्यते अप+कृ–अप् सुडागमः । चक्रभिन्ने रथाङ्गे रथारम्भके काष्ठे ।
अपस्नात त्रि० अपकृष्टं स्नातः । कृतसुद्दिश्य स्नाते ।
अपस्मार पु० अपगतः स्मारः स्मरणं यस्मात् ५ ब० । (मिरगी) इति ख्याते रोगभेदे । तस्मिन् सति तद्रोगिणस्तदानीं सर्वविषय-स्मृतिर्नश्यति ।
अपहस्त त्रि० अपसारणार्थो हस्तो यस्मिन् । गलहस्तादिना अप-सारिते ।
अपहार पु० अप+हृ–घञ् । अपचये चौर्य्ये, सङ्गोपने, धनस्वा-म्यनुपयोगिव्यये च । [ऽपलापे, प्रेमृणि च ।
अपह्नव पु०अप+ह्नु–भावे अप् । सतोऽपि वस्तुनोऽसत्त्वेन कथनरूपे-
अपह्नुति स्त्री० अप+ह्नु–भावे क्तिन् । अपलापे, अलङ्कारशास्त्रे प्रसिद्धे अर्थालङ्कारभेदे च सा च सा० द० परि० दृश्या ।
अपांनाथ पु० ६त० अलुक् स० । समुद्रे ।
अपांनिधि पु०नि+धा–कि ६त० अलुक् स० । समुद्रे ।
अपांपति पु० पा+डति ६त०अलुक् स० । समुद्रे, वरुणे च ।
अपांपित्त न० । ६त०अलुक् स०वा । अग्नौ, तस्य जलहेतुत्वात् तत्-पित्तत्वम् "आकाशाद्वायुर्वायोरग्निरग्नेरापः" इति श्रुतिः अत्र वा लुकि अप्पित्तमित्यपत्यर्थे ।
अपाक पु०पच–घञ् अभावार्थे न०त० । पाकाभावे, भुक्ताद्यादेरग्निमा-न्द्यादिना पाकाभावे च । ७ब० । तन्नाधने अजीर्णकारोगे । ३ब० । पाकरहिते आमे त्रि० । अव्ययी० । पाकाभावे अव्य० ।
अपाकरण न० अप+आ+कृ–ल्युट् । निराकरणे ।

अपाकशाक पु० न पच्यते शाको यस्य । अर्द्धके तस्य मूलमेव भोजनार्थं पच्यते न शाकः ।

अपाङ्क्तेय त्रि०सङ्घैः सह भोजने पङ्क्तिमर्हति अर्हार्थे ढक् न०त० । सङ्घैः सह एकपङ्क्तौ भोजनानर्हे क्लीनपतितादौ । अत्र व्यञ्जि अपाङ्क्त्य इत्यपि ।

अपाङ्ग पु० अपाङ्गति तिर्यक् चलति नेत्रं यत्र अप+अङ्ग-अधारे घञ् । नेत्रप्रान्ते, तिलके च । अपगतोऽङ्गात् निरा० स० । अङ्गहीने त्रि० ।

अपाङ्गक पु० अपकृष्टमङ्गं यस्य ब० कप् । (आपाङ्) इति ख्याते अपामार्गे । स्वार्थे क । नेत्रान्ते पु० । अपगताङ्गे त्रि० ।

अपाङ्गदर्शन न० अपाङ्गेन नेत्रान्तेन दर्शनं ३त० । कटाक्षे ।

अपाटव न० नास्ति पाटवं पटुता यत्र पटु+भावेऽण् ७ब० । रोगे । न०त० । पटुताभिन्ने । ६ब० । पटुताशून्ये त्रि० ।

अपात्र न० पातं श्राद्धभोजनदानादियोग्यं न०त० । विद्यादिहीने-ऽनाचारे, दानादियोग्यताहीने कुपात्रे, नटादौ च ।

अपात्रीकरण न० अपात्रं श्राद्धभोजनाद्ययोग्यं क्रियतेऽनेन कृ—करणे ल्युट् । निन्दितप्रतिग्रहादिजनिते पापभेदे "निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम् । अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम्" इति मनूक्ते तद्धेतुभूते निन्दितधनादानादौ च ।

अपादान न० व्याकरणप्रसिद्धे वियोगक्रियावधिभूते विभागजनकतत्-क्रियानाधारे तत्क्रियाजन्यविभागाश्रये ।

अपान पु० अपानयति अधोनयति मूत्रादि अप+आ+नी—बा० ड अपा-निति छधोगच्छति अप+अन—गतौ अच् वा । सततमधोगमन-शीले, गुह्यदेशस्थे, "अधोनयत्यपानस्तु आहारञ्च मलं पुनः" इत्युक्तलक्षणे "मूत्रशुक्रमलो वायुरपान इति कीर्त्यते" इत्युक्तलक्षणे च वायौ । गुह्ये न० ।

अपामार्ग पु० अपमृज्यते व्याधिरनेन मृज—करणे घञ् कुत्वदीर्घौ । (आपाङ्) इति ख्याते वृक्षे ।

अपाय पु० अप-इण्—भावे अच् । वियोगे, नाशे, अपसरणे च ।

अपार त्रि० उत्तरोऽवधिः पारः न०ब०। उत्तरावधिशून्ये। नद्यादे-रर्वाचीने अवारे तीरे न०।

अपार्थ त्रि०अपगतोऽर्थोऽभिधेयः प्रयोजनं वा यस्मात् ५ब०। अर्थ-शून्ये, प्रयोजनशून्ये च। ब० वा कपि। अपार्थकमप्यतार्थे, निष्-प्रयोजने, असंबद्धार्थके वाक्ये च। [उद्घाटिते च।

अपाटत त्रि०अप+आ+टट—क्त। अनाच्छादिते, अप्रतिबद्धे स्वतन्त्रे,

अपाटत्त त्रि० अप+आ+टंत—क्त। लुण्ठिते, पराहृत्ते च।

अपाश्रय पु० अप+आ+श्री—अच्। आश्रयशून्ये। अपाश्रयतीति कर्त्तरि अचि। अधीने। करणेऽचि। चन्द्रातपे।

अपासन न० अप+अस—णिच्—लुट्। मारणे।

अपास्त त्रि० अप+अस—क्तेपे क्त। निरस्ते, अवधीरिते च।

अपि अव्य० न पिबति गच्छति पि—गतौ क्विप् न लुक्। अशक्यकर-णायोद्यमरूपायां, शक्नुवत्कर्त्तृकमाविष्कर्त्तुमशक्तिरूपायां, वा स-म्भावनायां, सन्देहे, निन्दायां, प्रश्ने, समुच्चये, अल्पपदार्थे, काम-चारानुज्ञायाम्, अवधारणे, पुनरर्थे च।

अपिगीर्ण त्रि० अपि+गॄ—क्त। स्तुतौ, वर्णिते, उद्घान्ते च।

अपितु अव्य०अपि+तन्—डु। किन्त्वर्थे, यद्यर्थे, यद्यपीत्यर्थे च।

अपिधान न० अपि+धाञ्—ल्युट्। आच्छादने, अत्र अपेरलोपे। पिधानमप्यत्र। [मप्यत्र।

अपिनद्ध त्रि०अपि+नह—क्त। परिच्छिते वसनादौ। अपेरलोपे पिनद्ध-

अपोच्य त्रि० अपि—च्यवते सौन्दर्य्यादीयते च्यु—ड अलोपः उपसर्गदीर्घः न०त०। अतिसुन्दरे। [पुच्छहीने त्रि०।

अपुच्छा स्त्री० नास्ति पुच्छमस्याः यस्याः। शिखरहीने शिंशपावृक्षे।

अपुनरावृत्ति स्त्री० न पुनरावृत्तिरागमनं यत्र ७ब०। निर्वाणमुक्तौ। ईत्र०। पुनर्गमनशून्ये त्रि०। न०त०। पुनरागमनाभावे स्त्री०।

अपुनर्भव पु० न पुनर्भवो जन्म यत्र ७ब०। निर्वाणमोक्षे। ईब०। अत्यन्तमुक्तौ न०त०। पुनर्जन्माभावे।

अपुष्पफलद पु० पुष्पं विनापि फलं ददाति दा–क उप० स०। पुष्प-शून्ये फलवति पनसोदुम्बरादिवृक्षे।

अपूप पु० न पूयते विशीर्य्यति पू–य–प। गोधूमादिचूर्णपिष्टके।

अपूरणी स्त्री०न पूर्य्यते सर्वतः कण्टकाष्टततया दुरारोहत्वात् कर्मणि ल्युट् ङीप्। गालगलिहत्वे। संख्यापूरणसाधनभिन्ने च।

अपूर्व्व त्रि० न पूर्वं दृष्टम्। अविदिते आश्चर्य्ये। ईद०। कारणशून्ये परमात्मनि पु०। वैधनिषेधक्रियाजन्ये कालान्तरभाविनोः सुख-दुःखयोर्हेतुभूतयोः पुण्यपापयोः न०। पूर्वकालादिभिन्ने त्रि०।

अपूर्व्वविधि पु०अपूर्वं प्रमाणान्तरेणाप्राप्ते विधिर्विधानम् वि+धा–कि। अप्राप्तप्रापके लिङादिपदवेदनीये शब्दविशेषे। यथा स्वर्गकामो यजेतेति लिङ्युक्तं वाक्यं प्रमाणान्तरेणाप्राप्तस्य स्वर्गसाधनत्वस्य यागे बोधयत् अपूर्वविधिः।

अपेक्षा स्त्री० अप+ईक्ष–भावे अ। आकाङ्क्षायां कार्य्यकारणयोरवश्य-सम्बन्धे च। "अपेक्षते प्रत्ययसुत्तमं त्वाम्" इति कुमारः।

अपेक्षाबुद्धि स्त्री०अयमेकः अयमेकस्मात्कारिकायां अनेकत्वादिविष-यिण्यां बुद्धौ।

अपेक्षाबुद्धिज त्रि० न्यायमतप्रसिद्धे द्वित्वाद्यारभ्य परार्द्धसंख्याभेदे, द्वित्वादिकं हि प्रागुक्तापेक्षाबुद्धितो जायते।

अपोगण्ड त्रि० पुनाति पवते वा पू–क्विप् न पोगण्ड एकदेशोऽस्य। शिशौ, बलिभे, विकलाङ्गे, अतिभीरौ च।

अपोह त्रि० अप–वह–क्त। निरस्ते, बाधिते च।

अपोहिका स्त्री०अपगतमुदकं यस्याः ५ब०। (पूतिका)इति ख्याते शाके

अपोह पु०अपगत ऊहो वादिप्रसङ्गावितस्तर्को यस्मात् ५ब०। वादि-प्रसङ्गावितर्कनिरासार्थके प्रतिवादिप्रसङ्गावितदूषिते तर्कभेदे। अप+ऊह–घञि गुरौ परुषम्। त्यागे, अतद्व्यावृत्तौ च।

अप्पति पु० अपां पतिः ई०त०। वरुणे समुद्रे च।

अप्रकाण्ड पु० न प्रकाण्डः स्कन्धो यस्य। स्कन्धशून्ये भिण्टिकादौ।

अप्रकाश त्रि० प्र+काश–घञ् न०त०। लोके रङ्गभूमिस्थसामाजिक-

सन्निधाने एव प्रकाश्ये जनान्तिकपदबोधनीये रङ्गस्थपात्रादिबोधायोग्ये । परब्रह्मणि न० । न०त० । प्रकाशाभावे, गोपने च पु० ।

अप्रकृष्टगुण त्रि० न० न प्रकृष्टः गुणो यस्य न० ब० । व्याकुले ।

अप्रतिकर त्रि० न प्रति वैपरीत्ये कृ–अच् न०त० । अप्रतिकूलकरे । प्रति+कृ–भावे अप् न०त० । निक्षेपाभावे पु० ।

अप्रतिरथ न० न प्रतिकूलो रथो यत्र । युद्धार्थयाने, युद्धसमये यात्राकृतमङ्गले, सामावयवभेदे च । न प्रतिपक्षो रथो रथान्तरमस्य ईव० । अतुल्ये योधे, विष्णौ च पु० ।

अप्रतिरूपकथा स्त्री० नास्ति प्रतिरूपा प्रत्युत्तरीभूता कथा यस्याः । उत्तरवाक्यरहितायां वाचि ।

अप्रत्यक्ष त्रि० ज्ञानभेदः प्रत्यक्षं न०ब० । प्रत्यक्षागोचरे अतीन्द्रिये न० त० । प्रत्यक्षाभावे । न०ई० । प्रत्यक्षज्ञानशून्ये त्रि० ।

अप्रधान न० । न०त० । प्रधानभिन्ने गौणे ।

अप्रस्तुतप्रशंसा अप्रस्तुतस्याप्राकरणिकार्थस्याक्षेपादिना प्रशंसा स्तुतिः । अलङ्कारप्रसिद्धे अर्थालङ्कारविशेषे । सा च सा० १०परि०दृश्या ।

अप्रहत त्रि० न प्रहन्यते स्म प्र+हन–क्त न०त० । अनाहते अक्षतभूम्यादौ (खिल) इति ख्याते ।

अप्राग्र्य त्रि० प्राग्र्यं प्रधानं न०त० । अप्रधाने ।

अप्सरस् स्त्री० बहु० । अद्भ्यः सरन्ति सृ–असुन् सुडागमश्चान्तत्वात् । उर्वश्यादिस्वर्गवेश्यायाम् । पचाद्यच् । अप्सराप्यत्र स्त्री ।

अफल पु० नास्ति फलं यस्य । फलशून्ये (रांड़ा) इति ख्याते वृक्षे । निष्फले वृक्षमात्रे, निष्प्रयोजने वस्तुमात्रे च त्रि० । फलशून्यायां वृक्षमार्य्यां, भूम्यामलक्यां च स्त्री० । [ख्याते अहिफेने ।

अफेन न० अप्रशस्तं फेनं यस्य । वृक्षविशेषनिर्य्यासे (आफिङ्) इति अब गतौ इदित् भ्वादि० आत्म० सक० सेट् । अब्यते आब्विट ।

अबद्ध न० न संबध्यते स्म बन्ध–क्त । वस्तुदायार्थशून्ये निरर्थके वाक्ये । स्वार्थे के । अबद्धकमप्यत्र । संबन्धहीने त्रि० ।

अबद्धमुख त्रि० न बद्धं नियन्त्रितं मुखमस्य । दुष्टवाक्यादिनि दुर्मुखे ।

अवध्य त्रि० बध–अर्हार्थे यत् न०त०। बधार्हे। वन्द् क्यप्। अनर्थकवाक्ये न०।

अवन्ध्य त्रि० बन्धे फलप्रतिबन्धे साधु बन्ध–यत् न०त०। सफले।

अबल पु०नास्ति बलं यस्मात्। ५ब०। परमात्मनि तत्सेवने हि बलक्षयः। ईब०। बलरहिते दुर्बले च त्रि०। योषिति स्त्री०।

अबाध त्रि०, नास्ति बाधा यस्य। अप्रतिबद्धे, पीड़ाशून्ये च।

अबिन्धन पु० आप इन्धनं दाह्या अस्य। वाड़वाग्नौ वज्राग्नौ च।

अब्ज न० अङ्गाद् जायते जन–ड ५त०। पद्मे "अर्बुदमब्जं खर्वनिखर्वे" त्यादिभास्कराचार्योक्तेः शतकोटिसंख्यायाञ्च। शङ्खे पु०न०। चन्द्रे धन्वन्तरौ च पु०।

अब्जज पु० अब्जात् विष्णुनाभिपद्मात् जायते जन–ड। वेधसि। "खराशौ, खांशगे, सौम्ये लग्नस्थे वा भृगोः सुते। जीवे वाब्जजयोगोऽयं यातः शत्रुविनाशकृदि" त्युक्तलक्षणे ज्योतिषप्रसिद्धे त्रिकयोगभेदे च।

अब्जभोग पु०अब्जस्य शङ्खस्य भोग आकार इवाकारो यस्य। वराटके। अब्जस्य पद्मस्य भोगः देहाकारः। पद्मकन्दे।

अब्जयोनि पु० अब्जं योनिरुत्पत्तिस्थानं यस्य। विधातरि।

अब्जवाहन पु०अब्जमिव शुभ्रत्वात् वृषभो वाहनमस्य। वृषवाहने शिवे।

अब्जहस्त पु० अब्जचन्द्रो हस्तात् किरणात् यस्य। सूर्य्ये, सूर्य्यकिरणसम्पर्कादेव चन्द्रपादवृद्धिरिति ज्योतिषसिद्धान्तः।

अब्जिनी स्त्री० अब्जानि सन्त्यस्मिन् देशे, अब्जानां समूह इति वा इनि ङीत्वम्। पद्मयुक्तलतायां पद्मसमूहे च। [स्त्र्यं।

अब्जिनीपति पु०अब्जिन्याः पद्मसमूहस्य पतिः। प्रकाशकतयाऽनुकूलः।

अब्द पु० अपो ददाति दा–क। मेघे जलदे, (सुथा) इति ख्याते सुस्तके, शैलभेदे च। अब्दा०नि०। अन्त्यस्थमध्यः। वत्सरे।

अब्दसार पु० अब्दस्य सुस्तस्य सारो रसपरिपाकः। कर्पूरभेदे।

अब्धि पु० आपो धीयन्तेऽत्र धा–आधारे कि। जलधौ।

अब्धिकफ पु० अब्धेः समुद्रस्य कफ इव। समुद्रफेने।

अब्धिद्वीपा स्त्री०अब्धिभिर्वेष्टिताः लवणोदकादिभिः सप्तभिर्वेष्टिता सप्त-द्वीपा अस्याम् । क्षाराब्ध्यादिवेष्टितजम्बुप्रभृतिसप्तद्वीपवत्यां पृथिव्याम्

अब्धिनवनीतक पु० अब्धेः समुद्रस्य नवनीतमिव स्वार्थे क । चन्द्रे ।

अब्धिमण्डूका स्त्री० अब्धिं मण्डयति मण्ड–ऊक गौरा० ङीष् । मुक्तासाधनशुक्तौ ।

अब्धिशयन पु० अब्धौ शयनमस्य । विष्णौ, स हि प्रलये अब्धौ शेते ।

अब्भक्ष पु० अपोभक्षयति । सर्पभेदे । नित्यं जलपायिनि त्रि० ।

अब्भ्र न०अपो बिभर्त्ति भृ–क । मेघे । न बिभर्त्ति किञ्चित् भृ–क द्वित्वम् । अद्वित्वे बकारहीनो वा । गगने ।

अब्भ्रंलिह पु० अभ्रं मेघं लेढि अत्युन्नतया स्पृशति । लिह–खश् हुम् च । वायौ । मेघस्पर्शिनि उच्चतमे त्रि० ।

अब्भ्रक न० अभ्रमिव कायति राजते कै–क । (आव्) धातुभेदे ।

अब्भ्रकक्ष न०अभ्रं कक्षति व्याप्नोति शोषयति वा कक्ष–खच् मुम् च । वायौ । अत्युच्चे त्रि० ।

अब्भ्रपुष्प न० अभ्रस्य पुष्पमिव शुभ्रत्वात् कार्य्यत्वाच्च । जले । अ-भ्रमिव पुष्पमस्य ब० । वेतसवृक्षे पु० ।

अब्भ्रमातङ्ग पु० अभ्रात्मको मातङ्गः शा०त० । ऐरावते गजे ।

अब्भ्रमु स्त्री० अभ्रे अभ्रात्मके ऐरावते माति मा–डु । ऐरावतस्य योषिति ।

अब्भ्रमुवल्लभ पु० अभ्रमोर्वल्लभः ई०त० । ऐरावते गजे ।

अब्भ्ररोहस् पु०अभ्रात् तत्सम्बन्धात् रोहति रुह–असुन् । वैदूर्य्यमणौ तस्य हि मेघगर्जाद्भेदः इति प्रसिद्धम् ।

अब्भ्रोत्थ न० अभ्रात् तन्निघर्षणादुत्तिष्ठति स्था–क । वज्रे ।

अब्रह्मण्य न० ब्रह्म (ब्र) क्षणि वेदे साधु ब्रह्मन्+यत् । न०ब० । हिंसाया वेदनिन्दितत्वात् । नास्योक्तौ अयं न वध्य इत्याकारके वाक्ये ब्रह्मण्याभावे च । ब० । ब्रह्मण्यशून्ये त्रि० ।

अब्राह्मण पु० ब्राह्मण्ये नञ्सा त० । अपकृष्टविप्रे ।

अभ्र भ्रनौ भ्वा०आत्म० इदित् अक० सेट् । अभ्रते अभ्रिष्ट ।

अभय न० भी–अच् न०त०। भयाभावे। ह्रस्व०। भयशून्ये त्रि०न भयमस्मात् ५ब०। परमात्मनि, तज्ज्ञाने च। "अभयं वै जनक! प्राप्तोऽसि" इति श्रुतिः। हरितक्यां स्त्री०।

अभयडिण्डिम पु० अभयार्थं डिण्डिमः। जयढक्कायाम्।

अभाव पु० भू–घञ् न०त०। सत्तायां अविद्यमानतायाम्। न्यायमते द्रव्यादिषट्कं भावः पदार्थस्तद्भिन्ने।

अभाषण न०भाष–भावे ल्युट् न०त०। मौने। न०त०। कथनाभावे च।

अभि अव्य० न भाति भा–कि। कञ्चित् प्रकारं प्राप्तस्य द्योतने, आभिमुख्ये, अभिलाषे, वीप्सायां, लक्षणे, समन्तार्थे च।

अभिक त्रि० अभिकामयते अभि+कन्–नि०। कामुके।

अभिक्रम पु० अभि+क्रम–भावे घञ् अदृद्धिः। आरम्भे, आरोहणे, युद्धे, शत्रुसम्मुखयाने। कर्मणि घञि। आरब्धे।

अभिख्या स्त्री० अभि+ख्या–अङ्। अभिधाने, शोभायां, कीर्त्तौ च।

अभिग्रस्त त्रि० अभि+ग्रस–क्त। शत्रुभिराक्रान्ते।

अभिग्रह पु० अभि+ग्रह–अप्। (लुट) इतिख्याते, प्रकाशहरणे, अभियोगे, आभिमुख्येनोद्यमे, गौरवे च। ल्युटि अभिग्रहणमप्यत्र न०।

अभिघात पु० अभि+हन–घञ्। प्रहारे, क्रियाभेदेन द्रव्यस्य द्रव्यान्तरेण संयोगविशेषे, यथावर्णोच्चरणकाले कण्ठतालुप्रभृतिषु स्थानेषु वायोः संयोगः। संबन्धमात्रे च।

अभिघातिन् पु०अभि+हन–णिनि। शत्रौ। प्रागुक्ताभिघातवति त्रि०।

अभिघार पु० अभि+घृ–चरणे णिच्–भावे अच्। होमे आभिमुख्येन घृतादेः सेचने। कर्म्मणि घञ्। सिच्यमाने घृते।

अभिचार पु० अभि+चर–घञ्। हिंसाफलकेषु मारणोच्चाटनस्तम्भनप्रभृतिषु अथर्ववेदतन्त्रादिप्रसिद्धेषु कर्म्मसु।

अभिजन पु० अभिजन्यतेऽस्मिन्जन–घञ् अदृद्धिः। कुले, ख्यातौ, जन्मभूमौ, कुलश्रेष्ठे च। [श्रेष्ठे च। अभि जन्मन्यत्र।

अभिजात त्रि०अभि+प्रशस्तं–जातं जन्म यस्य सः। कुलीने, पण्डिते

अभिजित् न० ज्योतिषप्रसिद्धे उत्तराषाढानक्षत्रस्य शेषचतुर्थांशसहितश्रवणानक्षत्राद्यकलाचतुष्करूपे राशिचक्रस्थे विंशात्मककलांशे । अभिभूय जयति शत्रूननेन अभि+जि–करणे क्विप् । शत्रुजयिनि, यात्रानुकूललग्नभेदे, पञ्चदशधाविभक्तदिनस्याष्टमे भागे स्मृतिप्रसिद्धे कुतपकाले च ।

अभिज्ञ त्रि० अभिजानाति अभि+ज्ञा-क । निपुणे, पण्डिते च ।

अभिज्ञा स्त्री० अभि+ज्ञा–अङ् । प्रथमसमुत्पन्ने ज्ञाने ।

अभिज्ञान न० अभिज्ञायतेऽनेन अभि+ज्ञा–करणे ल्युट् । सोऽयमितिज्ञानसाधने चिह्ने । [धीप्रतायाञ्च ।

अभितस् अव्य० अभि+तसिल् । सामीप्ये, आभिमुख्ये, उभयतोऽर्थे,

अभिद्रवण न० अभि+द्रु–ल्युट् । वेगेन गमने । [कारे च ।

अभिद्रोह पु० अभि+द्रुह–घञ् । आक्रोशे, अनिष्टचिन्तने, अप-

अभिधा स्त्री० अभि+धा–भावे अङ् । अभिधाने, शब्दनिष्ठे अर्थबोधजनकतारूपशक्तिभेदे च । अभिधीयतेऽनेनेति करणे अङि । वाचकशब्दे । भट्टमते फलजनकव्यापाररूपायां शब्दार्थनिष्ठायां भावनायाञ्च ।

अभिधान स्त्री० अभि+धा-भावे ल्युट् । कथने । करणे ल्युट् । संज्ञायां, शब्दार्थप्रतिपादके निघण्टुकोषादिनामके ग्रन्थे च ।

अभिधेय त्रि० अभि+धा–कर्मणि यत् । वाक्यार्थे, संज्ञिनि च ।

अभिध्या स्त्री० अभि+ध्यै–अङ् । परधनस्वाजिह्मीर्षायां, जिघृक्षायां चिन्तने, विषयप्रार्थनायां च ।

अभिनन्द पु० अभि+नन्द–घञ् । सन्तोषे, प्रतिपाद्यगुणकथनादि प्रवर्त्तके ज्ञाने, प्रशंसायाञ्च । ल्युटि । अभिनन्दनमप्यत्र न० ।

अभिनय पु० अभि+नी–करणे अच् । कृतभावव्यञ्जके शरीरचेष्टादौ । भावे अचि । अभिनेयपदार्थस्य शरीरचेष्टाभाषणादिभिरनुकरणे । अभिनयति बोधयत्यर्थमत्र आधारे अच् । शरीरचेष्टादिभिर्दृश्यपदार्थज्ञापके रूपकादौ दृश्यकाव्ये ।

अभिनव पु० अभि+नु–अप् । ज्ञाने । प्रा० स० । नूतने त्रि० ।

अभिनवोद्भिद् (द्) पु० अभिनवमुद्भिद्य जायते उद्+भिद्-क्विप् क वा। अङ्कुरे।

अभिनन्दन न० अभि+नन्द्-ल्युट्। अभितोबन्धने, दृढबन्धने च।

अभिनिर्मुक्त पु० अभितः+सर्व्वतः सायन्तनकर्म्मणा निर्मुक्तः। सूर्य्यास्तकाले निद्रावशात् त्यक्ततत्कालकर्त्तव्यकर्म्मणि।

अभिनिर्याण न० अभि+निर्+या-ल्युट्। जिगीषया गमने।

अभिनिवेश पु० अभितोनिवेशः घञ्। अवश्यमिदं कर्त्तव्यमित्याग्रहसमन्विते मनःसंयोगभेदे, योगशास्त्रप्रसिद्धे मरणभीतिजनके अज्ञानविशेषे, अनित्यैरपि देहादिभिर्वियोगो मा भूदिति मरणनिवारणार्थमायासे च।

अभिनीत त्रि० अभि+नी-क्त। युक्ते, विनीते, अक्रोधने, क्षमावति, भूषिते च। [भिक्षुरूपेण गते च।

अभिपन्न त्रि० अभि+पद्-क्त। अपराधयति, आपद्यते, स्वीकृते, आ-

अभिप्राय पु० अभि+प्र-इण-अच्। आशये, सम्मतौ च।

अभिभव पु० अभि+भू-अप्। पराजये, तिरस्कारे, अनादरे, च।

अभिभूत त्रि० अभि+भू-क्त। किं कर्त्तव्यमिति ज्ञानशून्ये पराभूते, व्याकुले च।

अभिमत त्रि० अभि+मन-क्त। सम्मते, आदृते, अभीष्टे च।

अभिमन्त्रण न० अभि+मन्त्रि-ल्युट्। मन्त्रपाठेन संस्कारकरणे, निमन्त्रणे, आह्वाने च। [चक्षूरोगभेदे।

अभिमन्थ (न्य) पु० अभि+मन्थ-अच् मन्थ इति पक्षे मन-श।

अभिमर पु० अभिम्रियतेऽत्र मृ-आधारे अप् बा०। युद्धे, मरणनिरपेक्षतया कृते युद्धोत्साहे च। [पीडने च।

अभिमर्द पु० अभि+मृद-आधारे घञ्। युद्धे, मर्द्दे, भावे घञ्।

अभिमान पु०अभि+मन-भावे घञ्। आत्मन्युत्कर्षारोपे, मिथ्यागर्व्वे, अर्थादिदर्शे, ज्ञाने, प्रलये, हिंसायाञ्च।

अभिमुख त्रि० अभिगतो मुखं अत्या० स०। सम्मुखे। स्त्रियां ङीष्।

अभिमृष्ट त्रि० अभि+मृष-क्त। संस्पृष्टे, मिलिते, सम्बद्धे च।

अभियुक्त त्रि० अभि+युज–क्त । परैः रुद्धे, आशङ्के व्यवहारविषये, प्रतिवादिनि च । आप्ते दृढतमे पराक्रान्ते च ।

अभियोक्तृ त्रि० अभि+युज–तृच् । व्यवहारे अपराधयोजनकर्त्तरि वादिनि, अभियोगकर्त्तरि च ।

अभियोग पु०अभि+युज-भावे घञ् । अन्यकृतस्य निजधर्षणस्य नृपाय विज्ञापने, युद्धार्थमाह्वाने, अपचिकीर्षयाक्रमणे, आग्रहे, शपथे, उद्योगे च । [प्रिये, मनोहरे च ।

अभिराम त्रि० अभिरम्यतेऽस्मिन् रम–आधारे घञ् । सुन्दरे,

अभिरूप पु० अभिरूपयति सर्व्वं स्वात्मकं करोति चु० रूप–अच् । शिवे विष्णौ च । अभिरूपयति निरूपयति । प्रख्याते । उत्कृष्टं रूपं यस्य । कन्दर्पे, चन्द्रे च । मनोहरे त्रि० ।

अभिलाप पु० अभिलप्यते संकल्प्यतेऽनेन लप–करणे घञ् । देशकालादिकीर्त्तनपूर्व्वकं विहितकर्म्मैतदहं करिष्ये इत्येवं रूपे वाक्ये । कर्मणि घञ् । शब्दे ।

अभिलाव पु० अभि+लू–घञ् । छेदने ।

अभिलाष (स) पु० अभि+लष(स)–घञ् । इच्छायां, लोभे च । अभिलाषोऽप्यत्रार्थे । [अच् । प्रणामे ।

अभिवाद् पु० अभि+वद–घञ् । अप्रियवाक्ये । अभि+चु० वद–

अभिवादन न० अभि+चु०वद० ल्युट् । अभिसुखीकरणार्थं वाचिके प्रणामे । आभिसुख्याय आनुकूलाय वाद्यते आशीः कार्य्यतेऽनेन वद–णिच्–ल्युट् । स्वनामोच्चारणपूर्व्वकं नमने । तत्प्रकारस्तु वाचस्पत्ये ।

अभिविधिः पु० अभि+वि+धा–कि । व्याप्तौ, मर्य्यादायाञ्च ।

अभिव्यक्त पु०अभि+वि+अञ्ज–क्त । उत्पत्त्यादिना प्रत्यक्षयोग्यतामापन्ने

अभिव्यक्ति स्त्री० अभि+वि+अञ्ज–क्तिन् । प्रत्यक्षयोग्यतायाम् ।

अभिव्याप्ति स्त्री० अभितो–व्याप्तिः वि+आप–क्तिन् । साकल्येन योगे, सर्व्वावयवसम्बन्धे, सर्व्वतोवृत्तौ च ।

अभिशप्त त्रि० अभि+शप–क्त । इदं तेऽनिष्टं भूयादित्येवं रूपस्य

गुरुविप्राद्यभिधापक्ष उद्देश्ये ।

अभिशस्त त्रि० अभि+शंस्–क्त । अयं परस्त्रियं गच्छतीत्यादिना मिथ्यावाक्येन मैथुनविषयको दोषारोपो यस्मिन् जने क्रियते तस्मिन् ।

अभिशस्ति स्त्री० अभि+शंस्–क्तिन् । स्वर्णस्तेयादिकमनेन कृतमिति मिथ्यापवादे ।

अभिशाप पु० अभि+शप–घञ् । स्वर्णमनेन हृतमित्यादि मिथ्यापवादवाक्यकथने । द्विजगुरुप्रभृतिकर्त्तृके अनिष्टं ते भूयादित्येवमनिष्टाशंसने च । [‘अभिषङ्गजडं विजज्ञिवान्” इति रघुः ।

अभिषङ्ग पु० अभिष+ञ्ज–घञ् । पराभवे, आक्रोशे, शपथे, व्यसने च

अभिषव पु० अभि+षु–अप् । यज्ञान्तस्नाने, यज्ञे, स्नाने, पीड़ने, सुरोत्पादनादिव्यापारे, सोमलतापाने, तत्कण्डने च ।

अभिषवण न० अभि+षु–ल्युट् । स्नाने, यज्ञान्ते स्नाने, सोमादिकण्डने च ।

अभिषेक पु० अभि+सिच्–घञ् । विधिना शान्त्यर्थं, सेचने, अधिकारप्राप्त्यर्थं स्नाने, यथा राज्याधिकारार्थं, राज्येऽभिषेकः वाममार्गे शक्तिदीक्षायामधिकारार्थं शाक्ताभिषेकश्च । मन्त्रादिना शिरसि जलप्रक्षेपमात्रेण मार्जने च ।

अभिषेणन न० सेनया शत्रोरभिमुखं यानम् अभि+सेना+णि–ल्युट्, णत्वणत्वे । सेनया शत्रुं योधयितुं तदभिमुखगमने ।

अभिष्टुत त्रि० अभि+स्तु–क्त । वर्णिते, स्तुते च ।

अभिष्यन्द पु० अभि+स्यन्द्–भावे घञ् । अतिदृष्टौ स्रवणे, जलादिक्षरणे च । कर्मणि घञि । अधिके । “खगाभिष्यन्दनमनमिति” कुमारः । करणे घञि । नेत्ररोगभेदे ।

अभिष्यन्दनगर पु० अभिष्यन्देन प्रधाननगरातिदृष्ट्या तदतिशयेन हृतं नगरम् । शाखानगरे । [घञि । अभिशापे, सन्तापे च ।

अभिसन्ताप पु० अभि+सम्+तप–आधारे घञ् । युद्धे । भावे

अभिसन्धान न० अभि+सम्+धा–ल्युट् । वञ्चने, प्रतारणे च ।

अभिसन्धि पु० अभि+सम्–धा–कि । अभिसन्धाने, उद्देश्ये च ।

अभिसम्पात पु० अभि+सम्+पत–आधारे घञ्। युद्धे। भावे घञि। पतने।

अभिसर त्रि० अभितः सरति सृ+ट। सहाये, अनुचरे स्त्रियां ङीप्।

अभिसर्ज्जन न० अभि+सृज–भावे ल्युट्। दाने, बधे च।

अभिसार पु० अभि+सृ–घञ्। बले, युद्धे, साहाय्ये, साधने, स्त्रियाः पुंसो वा संभोगार्थं निर्ज्जनसङ्केतस्थानगमने च।

अभिसारिका स्त्री० अभि+सृ–सारेर्वा ण्वुल्। कान्ताप्रार्थनया स्वयं सङ्केतस्थानं गामिन्याम्, स्त्रियाम्।

अभिसारिणी स्त्री० अभि+सृ–णिनि। अभिसारिकायाम्।

अभिसृष्ट पु० अभि+सृज–क्त। दत्ते, उत्सृष्टे, त्यक्ते च।

अभिहार पु० अभि+हृ–घञ्। अपचिकीर्षया अभिगम्याक्रमणे, साक्षात्चौर्य्ये, अभियोगे, कवचादिधारणे च।

अभीक त्रि० अभिकामयते अभि+कन्–नि० दीर्घः। कान्तुके, स्वामिनि, क्रूरे, निर्भये च। कवौ पु०।

अभीक्ष्णम् अव्य० अभिक्ष्णौति अभि+क्षणु–अङ्ग दीर्घः। नित्ये, भृशार्थे, भये च। अग० अच् टिलोपः। तद्धिते द्रव्ये प्रकृष्टे भये सतते च त्रि०।

अभीरु स्त्री० भी–रुक् न० त०। शतमूल्याम् असङ्कुचितपत्रत्वादभीरुत्वमस्याः। भयशून्ये त्रि०। [शतमूल्याम्।

अभीरुपत्री स्त्री० न भीरुणि असंकुचितत्वात् पत्राण्यस्याः।

अभीषङ्ग पु० अभि+सनज–घञ् वा दीर्घः। आक्रोशे, शापे च।

अभीषु पु० अभि+सूष–कु। किरणे, (लागाम) इति ख्याते प्रग्रहे, कामे, अनुरागे च।

अभीष्ट त्रि० अभि+इष–क्त। वाञ्छिते, दयिते, पूजे च।

अभेद पु० भिद+घञ् न०त०। भेदाभावे, तादात्म्ये, अविशेषे च। न०। विशेषशून्ये, भेदशून्ये च त्रि०।

अभेद्य न० भिद–कर्म्मणि यत् न०त०। हीरके। भेदनानर्हे त्रि०

अभ्यग्र त्रि० अभिक्रमणमग्रं यस्य। निकटे, आसन्ने च।

अभ्यङ्ग पु० अभि+अञ्ज–भावे घञ् कुत्वम् । तैलादिमर्द्दने ।

अभ्यञ्जन न० अभ्यज्यतेऽनेन अञ्ज–करणे ल्युट् । तैलादौ । भावे ल्युटि । अभ्यङ्गे ।

अभ्यधिक त्रि० अभितोऽधिकः । सर्वथोत्तमे ।

अभ्यन्तर न० अभिगतमन्तरम् अत्या० स० । अन्तराले, मध्यस्थाने ।

अभ्यमित त्रि० अभि+अम–रोगे क्त । रोगयुक्ते ।

अभ्यमित्रीण त्रि० अभ्यमित्रमलं गामी ख । शत्रुमभि, सामर्थ्येन गन्तरि ।

अभ्यमित्रीय त्रि० अभ्यमित्रमलं गामी छ । शत्रुमभि, सामर्थ्येन गामिनि ।

अभ्यमित्र्य त्रि० अभ्यमित्रमलं गामी यत् । शत्रुमभि, सामर्थ्येन गन्तरि । [दस्य नत्वम् । समीपे ।

अभ्यर्ण त्रि० अभि+अर्द्द–कर्म्मणि क्त अविदूर्थे इडभावः

अभ्यर्हित त्रि० अभि+अर्ह–क्त । उचिते, श्रेष्ठे, पूजिते च ।

अभ्यवकर्षण न० अभि+अव+कृष–ल्युट् । शल्यादेरुद्धारणे ।

अभ्यवस्कन्द पु० अभि+अव+स्कन्द्–घञ् । शत्रोराक्रमे, शत्रुभिः क्रियमाणे प्रहारे, आसादने, प्रपाते च । ल्युटि । अभ्यवस्कन्दा नमप्यत्रार्थे न० ।

अभ्यवहार पु० अभि+अव+हृ–भावे घञ् । भोजने ।

अभ्यसन पु० अभि+अस–ल्युट् । अभ्यासे पौनःपुन्येनैकक्रियाकरणे ।

अभ्यसूया स्त्री० अभि+असू–उपतापे कण्ड्वादि० यक् प्रत्ययान्तत्वात् अ, स्त्रीत्वात् टाप् । गुणेषु दोषारोपणे ।

अभ्याकाङ्क्षित न० अभि+आ+काङ्क्ष–क्त । मिथ्याभियोगे ।

अभ्याख्यान न० अभि+आ+ख्या–भावे ल्युट् । मिथ्याभियोगे, मिथ्योद्भावने च । [थौ । सम्मुखागतमात्रे त्रि० ।

अभ्यागत पु० अभि+आ+गम–क्त । अदृष्टपूर्व्वे गृहं गतेऽति-

अभ्यागम पु० अभि+आ+गम–भावे घञ् अपवृद्धिः । विरोधे, अन्तिके गमने, भोगे, स्वीकारे, फलसम्बन्धे च । आधारे घञ् । समरे ।

अभ्यागारिक पु० अभ्यगारे तद्गतकर्मणि तद्गते व्याप्तः ठन् । गृहवृत्तिपुत्रादिपोषणेषु व्याकुले । [आरम्भे च ।

अभ्यादान न० अभि + आ + दा–भावे ल्युट् । आभिमुख्येनादाने, [निष्पीडने ।

अभ्यक्त त्रि० अभि + अक्त–क्त नि० । रोगयुक्ते ।

अभ्यामर्द पु० अभि+आ+मृद–आधारे घञ् । रणे । भावे घञ् ।

अभ्याय पु० अभि+अय्–आप्तौ करणे घञ् । अवश्यमेकेष्वर्थेष्वन्तिके च

अभ्यास पु० अभि+अस–क्षेपे कर्मणि घञ् । आवृत्तौ । गुरोराकर्णनं, तदर्थं युक्तायुक्तत्वविचारः, पौनःपुन्येन तदावृत्तिः, शिष्येभ्योदानमित्येवंरूपविद्याभ्यासे, पौनःपुन्येन कीर्त्तने, अन्तिके, विजातीयज्ञानानन्तरिते सजातीयैकरूपज्ञानप्रवाहरूपे ध्यानादेरभ्यासे च ।

अभ्यासादन न० अभि+आ+सद–णिच्–ल्युट् । शस्त्राद्यैः शत्रोर्निर्वीर्यताकरणे, शत्रोः सम्मुखगमने च ।

अभ्याहार पु० अभि+आ+हृ–घञ् । अभिहारार्थे । समन्तहरणे ।

अभ्युच्चय पु० अभि+उद+चि–अच् । वृद्धौ, लक्षग्राम् । सन्तुष्टये च ।

अभ्युत्थान न० अभि+उद्+स्था–ल्युट् । आदरेणासनादित उत्थाने गौरवेणोत्थानादिना प्रत्युद्गमने, उत्क्रान्तिमात्रे, उद्यमे उद्भवे च ।

अभ्युदय पु० अभि+उद्–इण्–अच् । अभीष्टकार्य्याणां प्रादुर्भावे, वृद्धौ, आघासमानचूडादिसंस्कारे च । अतएव तदर्थकश्राद्धम् आभ्युदयिकमित्युच्यते । अभ्युदयसाधने इष्टलाभे, वृद्धिनिमित्तके श्राद्धे च ।

अभ्युदित पु० अभितः सर्वतः उदितं उत्क्रान्तं प्रातर्विहितं कर्म यस्मात् । सूर्य्योदयकाले निद्रयाऽक्रततत्कालकर्त्तव्ये ब्रह्मचारिणि । अभित उदिते, प्रकाशिते च त्रि० । [उद्युक्ते ।

अभ्युद्यत त्रि० अभि+उद्+यम–क्त । अयाचितोपस्थिते फलादौ

अभ्युपगम पु० अभि+उप+गम–घञ् अदृष्टिः । स्वीकारे सम्मतौ च । [भीष्टसम्पादनरूपे अनुग्रहे, सान्त्वने च ।

अभ्युपपत्ति स्त्री० अभि+उप+पद–क्तिन् । अनिष्टनिवारणपूर्वका-

अभ्युपाय पु० अभि+उप+इण्–अच् । स्वीकारे अधिकोपाये

अभ्र गतौ भ्वादि०पर०सक०सेट् । अभ्रति । आभ्रीत् । आनभ्र ।

अभ्रि स्त्री०अभ्रति मलं यस्मात् । अभ्र—गतौ अपादाने इन् । नौकाम-लघर्षणार्थं काष्ठरचिते कुद्दाले । वा ङीप् अभ्रीत्यप्यत्र । [त्रि०।

अभ्रेष पु०भ्रेष—चलने घञ् न०त०। न्याय्ये,उचिते च । चलनशून्ये

अम रोगे चुरा०उभय०अक०सेट् पीड़ने सक०। आमयति ते आमिमत् त ।

अम गतौ,भोजने,अक०सक०शब्दे च भ्वादि०प०सेट् । अमति आमीत्

अम पु०अम—घञ् अष्टद्विः । रोगे । अपक्वफलादौ त्रि० ।

अमङ्गल पु० नास्ति मङ्गलं प्रयोजनं यतः । एरण्डवृक्षे । ६ब० । कुशलशून्ये त्रि० । न०त० । मङ्गलभिन्ने ।

अमत्र न०अमत्यत्रमत्र अम—भोजने आधारे अत्रन् । भोजनपात्रे ।

अमर पु० मृ—पचाद्यच् न०त० । देवे, अष्टाविंशकमध्ये अमरसिं-हनामके शास्त्रिके, कुशद्वीपवर्षे, स हि छिन्नोऽपि पुनःपुनः प्ररो-हति, सहसा न म्रियते । पारदे, तस्यापि वह्न्यादौ बहुतापनेऽपि न ध्वंसः । अस्थिसमुच्चये च स हि बहुकालं भूमौ स्थितोऽपि न जीर्यति । ६ब० मरणशून्ये त्रि० ।

अमरद्विज पु० अमरपूजकः द्विजः शाक० त० । देवले (पूजारीति) ख्याते विप्रे । [द्रुगन्धायां स्त्री० कायस्थवर्णे पु० ।

अमरपुष्पक पु० अमरमविशीर्णं पुष्पं यस्य कप् । कल्पवृक्षे,

अमरा स्त्री० मृ—पचाद्यच् न०त० । दूर्व्वायां, गुडूच्यां, स्थूणायां, जरायौ, वटवृक्षे, घृतकुमार्य्यां च । अर्श आदित्वादच् । देवन-गर्य्यामरावत्याम् स्त्री० ।

अमराद्रि पु० अमराणामद्रिः ६त० । सुमेरुपर्व्वते ।

अमरालय पु० ६त० । अमराणामालयः । स्वर्गे । [नगर्य्याम् ।

अमरावती स्त्री० अमरा विद्यन्तेऽस्यां मतुप् म वः दीर्घः । इन्द्र-

अमर्त्य पु० न मर्तिमर्हति यत् मर्त्यः न०त० । मरणशून्ये देवे ।

अमर्त्यभुवन न० अमर्त्यानां देवानां भुवनम् । स्वर्गे ।

अमर्ष पु० मृष—क्षान्तौ घञ् विरोधे न०त० । क्षमाविरुद्धे कोपे ।

अमर्षण त्रि० मृष—ल्यु न०त० । क्रोधने, असहने च ।

अमल न०अम+कलच् । अभ्रके । निर्मले, दोषरहिते च त्रि० लक्ष्म्यां, भूम्यालक्ष्यां, नाभिनालायां च स्त्री० ।

अमा अव्य० न मा–वा० का । सहार्थे, निकटे च । अमावास्यायां तिथौ, चन्द्रस्य सर्वकलाव्यापकतया स्थितायां सूर्य्यकिरणासंपर्कादृदीप्तायां कलायाञ्च स्त्री० ।

अमांस त्रि० नास्ति मांसं यस्य । दुर्बले । मांसहीनो हि दुर्बलः ।

अमात्य पु० अमा सह वसति यत् । मन्त्रिणि । तस्य सहचरत्वात् । [मनःकष्टदायके दुःखे ।

अमानस्य न० मानसे साधु न भवति मानस्+यत् न०त० ।

अमाव(वा)स्या स्त्री० अमा सह वसतश्चन्द्रार्कौ यत्र वस–यत् यद्वा कृष्णपक्षस्येतिथौ तद्दिने चन्द्रार्कावेकराशिस्थौ हि भवतः ।

अमित्र पु० अम–रोगे इत्र । रिपौ ।

अमुक्त न० मुच–क्त न०त० । सदा धार्य्ये छुरिकाभेदे । मुक्तभिन्ने त्रि० ।

अमुच अव्य० अदस्+त्रल् । परलोके, जन्मान्तरे च ।

अमूर्त्त त्रि० मूर्त्ति+अर्श आदित्वादच् न०त० । मूर्त्तिशून्ये वाय्वादौ ।

अमूला स्त्री० नास्ति मूलं यस्याः टाप् । अग्निशिखावृक्षे । मूलशून्ये त्रि० ।

अमृत न० मृ–क्त न०त० । मोक्षे, होमावशिष्टद्रव्ये, सुधायां, जले, घृते, "अयाचितं स्यादयाचितमिति" मनूक्ते अयाचितलब्धे च । परब्रह्मणि न० । मरणशून्ये त्रि० । विभीतके स्त्री० ।

अमृतजटा पु० अमृता जटा यस्याः । जटामांसीवृक्षे ।

अमृतदीधिति पु० अमृतमिवाप्यायनकरी दीधितिः किरणो यस्य । चन्द्रे । [घटोले पु० ।

अमृतफला स्त्री० अमृतमिव स्वादु फलं यस्याः । द्राक्षायाम्

अमृतयोग पु० ज्योतिषप्रसिद्धायां नक्षत्रविशेषयुक्तायां वारविशेषयुक्तायाञ्च तिथौ । वाचस्पत्ये अमृतशब्दे विवृतिः ।

अमृतवल्ली स्त्री० अमृताय जीवनसाधनाय वल्ली । गुडूच्याम् ।

अमृतसू पु० अमृतं दीधितिरूपमाप्यायनं सूते सू+क्विप् । चन्द्रे । अमृतान् देवान् सूते । देवमातरि स्त्री० ।

अमृतसोदर पु० अमृतस्य सोदर एकत उत्पन्नत्वात् । उच्चैःश्रवसि, ।
उच्चैःश्रवसो हि समुद्रादुत्पत्तिः। तज्जातीयत्वात् घोटकमात्रे च ।
अमृतस्रव स्त्री० अमृतमिव स्रवति स्रु–पचाद्यच् । रुदन्तीलतायाम् ।
अमृतान्धस् पु० अमृतमन्धो भक्ष्यं यस्य । देवमात्रे ।
अमृताशन पु० अमृतमश्नाति अश–ल्यु । देवमात्रे ।
अमृताहरण पु० अमृतमाहरति मातृदास्यनिवारणार्थं स्वर्गात् भूलोकं नयति आ+हृ–ल्यु । गरुडे तस्यामृताहरणवृत्तान्तो महाभारते आदिप० ३२अ० । वाचस्पत्ये विवृतिः ।
अमेधस् त्रि० नास्ति मेधा यस्य ब० असिच् । मूर्खे, अल्पबुद्धौ च
अमेध्य न० मेध्यं पवित्रं न०त० । पुरीषे । पवित्रभिन्ने त्रि० ।
अमोघ त्रि० मोघो निष्फलः न०त० । सफले, अव्यर्थे च । नदभेदे पु० । पटोललतायां, हरितक्यां विड्भङ्गे च स्त्री० ।
अम्ब गतौ भ्वादि० पर०सक० सेट् । अम्बति आम्बीत् आनम्ब ।
अम्बक न० अम्बति शीघ्रं नक्षत्रस्थानपर्य्यन्तं गच्छति अम्ब–ण्वुल् । नेत्रे । अम्ब्यते स्नेहेनोपगम्यते घञ् स्वार्थे क । पितरि ।
अम्बर न०अबि–शब्दे घञ् अम्बः शब्दस्तं राति धत्ते अम्ब+रा-क । शब्दाश्रये आकाशे, मर्म्मरशब्दयुक्ते वस्त्रे, स्वनामख्याते गन्धद्रव्ये, आकाशनामके अभ्रकधातौ च ।
अम्बरि(री)ष न०अम्ब्यते पच्यतेऽत्र अम्ब–ऋरिष । नि० वा दीर्घः । (भाजनाखोला)इति ख्याते भर्জ্জনपात्रे । अम्बरीषमपि । दीर्घयुक्तस्तु विष्णौ, शिवे, भास्करे, बालके, आख्यातकवृक्षे, नरकभेदे, अनुतापे, सूर्य्यवंश्यनृपभेदे च पु० । वाचस्पत्ये विवृतिः ।
अम्बष्ठ पु० अम्बाय चिकित्सकशब्दाय तत्ख्यापनार्थं तिष्ठतेऽभिप्रैति स्था+क–षत्वम् । चिकित्सके, विप्रात् वैश्यकन्यायां जाते सङ्कीर्णवर्णे, देशभेदे, क्षत्रियके च । यूथिकायां स्त्री० स्वार्थे क ह्रस्वे अत इत्त्वे । अम्बष्ठिकायामेव सा च (वामनहाटीति) प्रसिद्धायां वाह्लीलतायाञ्च ।
अम्बष्ठकी स्त्री० अम्बष्ठं कायति आदानार्थमाकृयति कै–क गौरा०

ङीष् । (पलाण्डु) इति ख्यातायां लतायां पाठायाञ्च ।

अम्बा स्त्री० अम्ब्यते स्नेहेनोपगम्यते अम्ब-कर्म्मणि घञ् । मातरि, नाम्नोक्तावपि तत्रैव, अम्बष्ठालतायां, काशीराजकन्यायाञ्च ।

अम्बाला स्त्री० अम्बेति शब्दं लाति धत्ते ला-क । मातरि ।

अम्बालिका स्त्री० अम्बालेव स्वार्थे के ह्रस्वे अत इत्त्वम् । मातरि, काशीराजकन्यायां विचित्रवीर्य्यपत्न्यां पाण्डुराजमातरि च ।

अम्बिका स्त्री० अम्बैव स्वार्थे के ह्रस्वे अत इत्त्वम् । मातरि, काशीराजसुतायां विचित्रवीर्यपत्न्यां धृतराष्ट्रराजमातरि, जगदुत्पादकत्वात् दुर्गायाम्, अम्बष्ठालतायाम् (कट्कीति) ख्यातायाम् लतायाञ्च ।

अम्बु न० अबि शब्दे-उण् । जले । (रास्ना) इति ख्यातायां लतायां स्त्री० ।

अम्बुकण्टक पु० अम्बुनः कण्टकमिव । कुम्भीरे, शृङ्गाटके च ।

अम्बुकिरात पु० अम्बुनि किरात इव हिंसः । कुम्भीरे ।

अम्बुकीश पु० अम्बुनि कीशः वानर इव । (शुशक) इति ख्याते शिशुमारे जलजन्तुभेदे ।

अम्बुचामर न० अम्बुनि चामरमिव ७त० । शैवले ।

अम्बुज न० अम्बुनि जायते जन-ड । पद्मे, चन्द्रे (हिजल्) इति ख्याते वृक्षे च पु० । शङ्खे पु०न० ।

अम्बुद पु० अम्बु ददाति दा-क । मेघे, मुस्तके च ।

अम्बुधि पु० अम्बूनि धीयन्तेऽत्र धा+आधारे कि ई त० । समुद्रे ।

अम्बुवाची स्त्री० "यस्मिन् वारे सहस्रांशुर्यत्कालं मिथुनं व्रजेत् । अम्बुवाची भवेत्तिथं पुनस्तत्कालवारयोरिति" ज्योतिषोक्तेः "रजोयुक् च्छाम्बुवाची स्यात्" इति स्मृतेश्च सूर्य्याक्रान्तार्द्रानक्षत्र-प्रथमचरणे जातरजस्कायां भूमौ । [कायां पतिव्रतायाम् ।

अम्बुशिखा स्त्री० अम्बुशिरिव शिखति शि-अच् । पत्रालर्बुदे ।

अम्बुपर्णी स्त्री० अम्बूनि पर्णे यस्याः । उदकपर्णे । वा ङीष् । तत्रैव ।

अम्बुप्रसाद पु० अम्बूनि प्रसादयति प्र+सद्-णिच् ण्य् उप० स० । (निर्म्मली) प्रसिद्धे कतकवृक्षे ।

अम्बुभृत् पु० अम्बूनि बिभर्त्ति भृञ्-क्विप् । समुद्रे, मेघे, मुस्तके च ।

अम्बुमात्रज पु० अम्बुमात्रे जलमात्रे जायते जन–ड । (शालुक)
इति ख्याते शब्दे ।
अम्बुरुह न० अम्बुनि रोहति जायते रुह–क । पद्मे । स्थलप-
अम्बुवासिनी स्त्री० अम्बुनि जलप्रधाने वसति वस–णिनि ।
पाटलावृक्षे । [मुस्तके च ।
अम्बुवाह पुं०अम्बूनि वहति वह–अण् उप०स०। मेघे, तन्नामनामके
अम्बुवाहिनी स्त्री० अम्बूनि वाहयति नौकातः बहिरपसारयति
वह+णिच्–णिनि । काष्ठादिरचिते नौकाजलसेचनीपात्रे ।
अम्बुवेतस पु० अम्बुजातोवेतसः शाक०त० । जलवेतसे ।
अम्बुशिरीषिका स्त्री० अल्पः शिरीषः अल्पार्थे के स्त्रीत्वम् ।
७त० । जलशिरीषे । [ख्यातायां जलौकायाम् ।
अम्बुसर्पिणी स्त्री०अम्बुनि सर्पति सृप–णिनि ७त० । (जोंक)इति
अम्बूक्त त्रि० अनम्बु अम्बु क्तं अम्बु श्लेष्मात्मकाम्बु उपचारात्त-
द्युक्तं ततः चि–क्त–क्त । निष्ठीवनयुक्ते वचसि ।
अम्भस् न० अभि–यद्दे असुन् । जले, बालानामौषधौ च ।
अम्भःसार न० अम्भसः सारः वा शरीरं वा विसर्गः । शुक्रायाम् ।
सत्वे अम्भस्सारमपि तत्रैव ।
अम्भोज न० अम्भसि जायते जन–ड ७त० । पद्मे सारसविहगे ।
चन्द्रे पु० । शङ्खे पु० न०। जलजातमात्रे त्रि०। [पद्मसमूहे ।
अम्भोजख(ष)ण्ड न० अम्भोजानां समूहः अम्भोज+ख(ष)ण्डच् ।
अम्भोजयोनि पु० अम्भोजः हरिनाभिपद्मं योनिः उत्पत्तिस्थानं
यस्य । विधातरि ।
अम्भोजिनी स्त्री० अम्भोज+समूहार्थे, तद्वति देशे वा इनि । पद्मस-
मूहे, पद्मयुक्तदेशे लताहृमे च । [कर्त्तरि त्रि० ।
अम्भोद पु० अम्भो ददाति दा–क । मेघे मुस्तके च । जलदान-
अम्भोधर पु० अम्भोधरति धृञ–धारणे अच् । मेघे । समुद्रे,
मुस्तके च ।
अम्भोधि पु० अम्भांसि धीयन्ते यत्र धा–आधारे कि । समुद्रे ।

अम्भोनिधिः पु० अम्भांसि निधीयन्तेऽत्र नि+धा—कि । समुद्रे ।
अम्भोराशि पु० अम्भसां राशिरिव एकत्वोपचितत्वात् । समुद्रे ।
अम्भोरुह न० अम्भसि रोहति रुह—क । पद्मे । सारसखगे च ।
अम्मय त्रि० अपां विकारः अप्+मयट् । जलविकारे फेनादौ ।
अम्र पु० अमति सौरभेण दूरं गच्छति अम—रन् । आम्रवृक्षे । फलपत्रादौ न० । एवं प्रायः सर्वत्र वृक्षवाचकेषु ।
अम्रात पु० अम्रं रसं सर्व्वत्र पत्रपुष्पादौ अतति व्याप्नोति अत—अण् रस्य वा लत्वम् । (आमड़ा) अम्रातकवृक्षे स्वार्थे क अम्रातकोऽपि तत्रार्थे । वा रलाभावे अम्राभः अम्लातकश्च तत्रार्थे ।
अम्ल न० अम—क्त । (घोल) तक्रे । (टक) रसे पु० । तद्वति त्रि० ।
अम्लक पु० अल्पोऽम्लः अल्पार्थे कन् । (मान्दार) लकुचवृक्षे ।
अम्लकेशर पु० अम्लः केशरोऽस्य । बीजपूरे (गोँड़ानेबु) ।
अम्लचूड़ पु० अम्ला चूड़ा शिखाऽस्य । अम्लशाके ।
अम्लजम्बीर पु० अम्लो जम्बीरः । (गोँड़ानेबु) जम्बीरवृक्षे ।
अम्लनायक पु० अम्लं रसं नयति नी—ण्वुल् । अम्लवेतसे ।
अम्लनिशा स्त्री० अम्लरसे निःशेषेण शेते शीङ्—ड । गठीवृक्षे ।
अम्लपत्र पु० अम्लं पत्रं यस्य । अम्लवेतसवृक्षे ।
अम्लपत्री स्त्री० अम्लं पत्रं यस्याः । पलाशीलतायाम् ।
अम्लपनस पु० अम्लः पनसः कर्म० । (मान्दार) लकुचवृक्षे ।
अम्लफल पु० अम्लं फलं यस्य । (तेँतुल) इतिख्याते वृक्षाम्ले ।
अम्लबन्धा स्त्री० बन्ध—कर्मणि घञ् ७त० । अम्लासंबन्धे, कन्दभेदे ।
अम्लभेदन पु० अम्लार्थं भिद्यतेऽसौ कर्मणि ल्युट् । अम्लवेतसे ।
अम्लरुहा स्त्री० अम्लाय रोहति रुह—क । मालवजनागवल्लाम् ।
अम्लवीनि(णि)का स्त्री० अम्लं रसं लाति गृह्णाति अम्लवः तमूनयति अल्पमम्लत्वात् क्षीनयति जन—एवुल् वा पु० णत्वम् । (आमरुल) इति ख्याते लताभेदे ।
अम्लवती स्त्री० अम्लो रसो विद्यतेऽस्याः अम्ल+मस्य वः (आमरुल) इति ख्याते लताभेदे ।

अम्लशाटिका स्त्री० अम्लस्य रसस्य शाटिका स्थानमिव । नागवल्लीभेदे ।

अम्लवास्तूक पु० अम्लरसान्वितोवास्तूकः शाकभेदः । (चुकपालङ्ग) इति ख्याते चुक्रे ।

अम्लबीज न० अम्लस्य बीजं कारणम् । (तेँतुल) इत्याख्ये ।

अम्लवृक्ष न० अम्लो रसो वृक्षेऽपि यस्य । (तेँतुल) इत्याख्ये ।

अम्लवेतस पुं० अम्लोवेतसइव नाम्नः । (चुका) इति ख्याते चुक्रे ।

अम्लशाक पु० अम्लः शाको यस्य । चुका इतिख्याते चुक्रे ।

अम्लसार पु० अम्लो रसएव सारः प्रधानं यस्य । चुक्रे निम्बुके, हिन्ताले च । काञ्जिके न० । [वृक्षे ।

अम्लहरिद्रा स्त्री० अम्लरसान्विता हरिद्रा । (आमहरिद्रा)इति ख्याते

अम्ला स्त्री०अम्लो रसो भूम्ना विद्यतेऽस्या अर्शआद्यच् । तिन्तिड्याम् ।

अम्लाङ्कुश पु० अम्लम् अङ्कुशाकारमग्रं यस्य । चुक्रे ।

अम्लाटन पु० अश्यते अट्–कर्मणि ल्युट् कर्म० । कुरण्टकवृक्षे ।

अम्लान पु० म्लै+क–न०त० । (आमला) इति ख्याते महाफलवृक्षे । म्लानभिन्ने त्रि० ।

अम्लिका स्त्री०अम्लैव स्वार्थे क । तिन्तिड्याम् । अत्राम्लीकोत्यपि पृषो० ।

अय गतौ भ्वा० आत्म० सक० सेट् । अयते आयिष्ट । अयाञ्चक्रे ।

अय पु० एति सुखमनेन इण्–करणे अच् । प्राक्तने शुभकर्मणि, शुभदायके–दैवे विधाने च । [भेदे । अयःस्थानमध्यत्र ।

अयःपान न० अयः, द्रवीभूतं तप्तलौहं पीयतेऽत्र ल्युट् । नरक ।

अयःशूल न० अय इव शूलम् उपतापकम् । तीव्रे उपतापे, लौहक्षतास्त्रभेदे च, अयश्शूलमध्यत्र । [माघे पु० ।

अयज्ञिय त्रि० यज्ञाय साधुर्न भवति यज्ञ+यत् न०त० । यज्ञानर्हे ।

अयन न० अय–भावे ल्युट् । गतौ, दक्षिणत उत्तरस्याम्, उत्तरतश्च दक्षिणस्यां सूर्य्यस्य गतौ, तथाहि द्वादशराश्यात्मकस्य राशिचक्रस्यार्द्धं मकरादिमिथुनपर्य्यन्तं राशिषट्कं क्रमेण उत्तरावनतं तत्र स्थितोऽर्कः स्वगत्या प्राचीं गच्छन्नपि किञ्चित् किञ्चित्तिर्य्यग्गत्या उत्तरामभिक्रामति ततः कर्कादिमिथुनःपर्य्यन्तं राशिषट्कं

क्रमेण दक्षिणायनं तत्र स्थितोऽर्कः प्राग्वत् दक्षिणामेवाभिक्रामति मेषं गतिरयनशब्देन ज्योतिषे व्यवह्रियते एवञ्च सौरैः षड्भिर्मासैरेकमयनमित्यपि तत्र प्रसिद्धम्। "अयनविष्णुपदीषड्शीतय" इत्युक्तेरयनासवसंक्रान्तौ, सा हि पारिभाषिकायनशब्दवाच्या। नभोमण्डले प्रवहानिलेन पश्चाद्गत्या बंभ्रम्यमाणस्य राशिचक्रस्य निराधारतया दोलायमानत्वेन सप्तविंशांशपर्य्यन्तं प्राक्, पश्चाच्च या गतिर्भवति तत्रापि तच्चि अष्टमांशाधिक ६६, ८। षट्षष्टिवर्षैरेकैकमंशमतीत्य प्राक्, पश्चाद्वा चलतीति १८०० अष्टादशशतवर्षैः सप्तविंशांशपर्य्यन्तं प्राक् गत्वा पुनः पश्चात्, पश्चाद्गत्वा च प्रागवलम्बते। यदाचैवं राशिचक्रं प्राक् गच्छति तदा राशिचक्रनिर्दिष्टमेषादिस्थानात् उक्तकालभेदेनैकांशातिक्रमेण क्रमशः प्राचि, प्राक्तरे, प्राक्तमे, वा स्थाने ग्रहाणां प्रभापुञ्जसञ्चारः यदा तु पश्चादवलम्बते तदा निर्दिष्टमेषादिस्थानात् तत्रैव परे, परतरे, परतमे, च स्थाने ग्रहाणां प्रभासञ्चार इति भेदः। इदानीञ्च पश्चिमायनं ततः पश्चादेव ग्रहप्रभासञ्चारः। तथाच ज्योतिषोक्तगणितरीत्या मेषादितः पश्चादेकविंशांशे मीनादिनवमांशे एवेदानीं विषुवादिसंक्रान्तिर्भवति एवं विष्णुपद्यादीनामपि तत्तदंश एव ग्रहप्रभासञ्चारः। अयञ्चायनानुसारेण ग्रहप्रभासञ्चारस्वीकारः दिनमानविशेषस्य लग्नपरिमाणस्य, छायापदविशेषस्य, च बोधार्थमिति सिद्धान्ते प्रसिद्धम्। करणे ल्युटि। उक्तायनज्ञानसाधने शास्त्रे, "ज्योतिषामयनञ्चैवेति" सैन्यनिवेशविशेषेऽपथ्यूहप्रवेशमार्गे च "अयनेषु च सर्वेषु यथाभागमवस्थिताः" इति गीता। आधारे ल्युट। पथि, गृहे, आश्रये, स्थाने, "तौ यदस्यायनं पूर्वमिति" मनुः। प्रागुक्तराशिचक्रस्य अंशरूपे गतिस्थानविशेषे च "तत्काले सायनार्कस्थेति" नीलकण्ठः।

अयनसंक्रान्ति स्त्री० अयनेन राशिचक्रस्य पश्चात्, प्राग्वा गत्वा कृता संक्रान्तिर्ग्रहाणां प्रभापुञ्जस्य सञ्चारः सम्+क्रम—क्तिन् इत०। चल-संक्रान्तौ, मेषादिभिर्द्वादशस्थानेषु विभक्तस्य राशिचक्रस्य प्राक्-

पश्चाद्वा दोलायमानतया निर्दिष्टमेषादिस्थानात् पश्चात् पूर्वं वा अहःप्रभापुरुषसञ्चारः आक्रान्तराशिं विहाय राश्यन्तरे गमनं चल-संक्रान्तिः अनियतस्थानतया चलत्वात्। निर्दिष्टराशिस्थानेषु पञ्चानां मण्डलसञ्चारः अचलसंक्रान्तिः राशिसंक्रान्तिरिति चोच्यते नियतमेकस्थाने एव जायमानत्वादचलत्वम्। अनयैव संक्रान्त्या यथा मासादिव्यवहारे न दोषः चलसंक्रान्त्या तु बहवो दोषास्तथा वाचस्पत्ये वक्ष्यते। [चलति।

अयस् न० इण-असुन्। लौहे, तच्च स्थावरमप्ययस्कान्तसान्निध्यात्

अयस्कान्तः पु० अयसां मध्ये कान्तः रमणीयः कस्कादित्वात् सत्वम् (कान्तिलौह) इति ख्याते लौहभेदे। ६ त०। सन्निधिमात्रेण लौहाकर्षके (चुम्बक) इतिख्याते प्रस्तरभेदे च अयसांप्रियत्वात्तथात्वम्।

अयस्कार पु० अयस्+कृ-अण् उप०स०। लौहकारे।

अयाचित न० याच-क्त न०त०। अमृताख्यवृक्षौ "अमृतं स्यादया-चितम्" इति मेदिनिः। अप्रार्थिते त्रि०।

अयि अव्य० इण्-इन्। प्रश्ने, अनुनये, संबोधने, अनुरागे च।

अयुक्छद पु०अयुजः सप्त सप्त छदा अस्य वृक्षौ संख्यायाः वीप्सार्थत्वम्। (छातिम) इतिख्याते सप्तपर्णवृक्षे। [क्षिप्ते, आपन्नते च।

अयुक्त त्रि० न+युज-क्त। विषयासक्ततया कर्त्तव्येऽनवहिते, अनु-

अयुग्म न० न युग्मात्कन्। (विजोड़) इति ख्याते विषमे।

अयुग्मच्छद पु०अयुग्माः सप्त सप्त छदा अस्य। सप्तपर्णवृक्षे तस्य हि प्रत्येकपल्लवे सप्त सप्त पर्णानि विद्यन्ते। [दशसहस्रसंख्यायां न०।

अयुत त्रि०यु-मिश्रणे अमिश्रणे वा क्त न०त०। असंयुक्ते। संयुक्ते च

अये अव्य० इण्-एच्। कोपे, विषादे, संभ्रमे स्मृतौ, संबुद्धौ च।

अयोग पु० युज-घञ् न० त०। योगाभावे, कुयोगे वियोगे च। न० ब०। विधुरे, कूटे, कठिनोदये च।

अयोगवः पु० अय इव कठिना गौर्वाणी यस्य नि० अच्। शूद्रात् वैश्यायां जाते प्रतिलोमजे सङ्कीर्णवर्णे।

अयोगवाह पु०अदभ्रादि इत्यादिषु चतुर्दशसु अक्षरसमाम्नायसूत्रेषु

नास्ति योगः पाठादिरूपःसंबन्धो येषां ते तथापि वाहयन्ति पत्वण-त्वादिकार्य्यादिकं निष्पादयन्ति वाहेः अच् कर्म०। "अनुस्वारो विसर्गश्च+क+पौ चैव पराश्रितौ। अयोगवाहाविज्ञेया आश्रय-स्थानभागिनः" इति शिक्षाप्रदर्शितेषु अनुस्वारविसर्गादिषु।

अयोगुल पु० गुलः गोलाकारः अयसा निर्मितोगुलः। (गोलीति) ख्याते लौहगुटिकायाम्।

अयोऽग्र न० अयोऽग्रे मुखे यस्य। मुखले तस्य मुखे लौहबद्धत्वात्।

अयोघन पु० अयांसि हन्यन्तेऽनेन हन-अप् घनादेशश्च नि०। (हा-तुड़ीति) ख्याते लौहमुद्गरे। [र्य्याम्। योधनानर्हे त्रि०।

अयोध्या स्त्री० युध यत् न०त०। सरयूतीरे खनामख्यातायां नग-

अयोनिज पु० योनौ उपचारात् मातरि न जायते। परमेश्वरे। रामपत्न्यां सीतायां स्त्री०। योनितोऽनुत्पन्ने त्रि०।

अयोमल न० अयसो मलइव। (लौहगूथ) इति ख्याते लौहमले।

अर न० ऋ-अच्। चक्रस्य नाभिनेम्योर्मध्यस्थे काष्ठे, शीघ्रे च शीघ्र-तादिगुणवति त्रि०। स्वार्थे क। शैवाले। पर्पटे (पापडीति) ख्याते पु०।

अरघट्ट(क) पु०अरं शीघ्रं घट्टाते चाल्यतेऽसौ घट्ट-कर्मणि अच्। महाकूपे, तदुपरि निबद्धजलोत्तोलनकाष्ठे च। स्वार्थे क। तत्रैव।

अरजस् त्रि० रजुंज असुन् नलोपः न०त०। रजोगुणकार्य्यकामक्रो-धादिशून्ये। अनार्त्तवायां नग्निकायां स्त्री० धूलिशून्ये त्रि०।

अरणि पु० ऋ-अनि। स्वार्थे, (गणियारीति) ख्याते वृक्षे। ऋच्छति प्रापयत्यग्निम्। अग्निमन्थनकाष्ठे द्वि०। स्त्रियां ङीप्।

अरणिक पु० अरण्ये अग्निमन्थनकाष्ठाय साधु ठन्। अग्निमन्थनका-ष्ठसाधने अग्निमन्थवृक्षे। [पु०।

अरण्य पु० अर्य्यते गम्ये वयसात्र ऋ-आधारे अन्य। वने, कट्फलवृक्षे

अरण्यकदली स्त्री० अरण्ये कदली। गिरिकदल्यां तस्याः पा-मादावनुत्पत्तेः। [ख्यातायां वनकार्पास्याम्।

अरण्यकार्पासी स्त्री० अरण्ये कार्पासी। (वनकापास) इति

अरण्यकुलत्थिका स्त्री० अरण्यस्य कुलत्थिका स्वल्पकुलत्था। (वनकुल्-थीति) ख्यातायां कुलत्थिकायाम्।

अरण्यकुसुम्भ पु० ६त०। वनकुसुम्भे।

अरण्यचटक पु० ६त०। वनचटके। [इति ख्याते वनार्द्रके।

अरण्यजार्द्रक न० अरण्ये जायते जन+ड कर्म्म०। (वनआदा)

अरण्यजीर पु० ६त०। वनजीरके।

अरण्यधान्य न० ६त०। नीवारादौ वनधान्ये।

अरण्यमक्षिका स्त्री० ६त०। (डाँश)इति ख्याते दंशे।

अरण्यमुद्ग पु० ६त०। वनमुद्गे।

अरण्यवायस पु०६त०। (दांड़काक) इति ख्याते द्रोणकाके।

अरण्यवास्तूक पु० ६त०। (वनबेतो) इति ख्याते वनशास्तूकशाके।

अरण्यशूरण पु० शा०त०। वनभवे (ओल) इति ख्याते वनशूरणे।

अरण्यसखा पु० अरण्ये सख इव हिंस्रः। वृके।

अरण्यषष्ठी पु० अरण्याय गन्तुं षष्ठी। ज्यैष्ठशुक्लषष्ठ्याम्। "ज्यैष्ठे मासि सिते पक्षे षष्ठी यारण्यसंज्ञिता। व्यजनैककरास्तस्यामटन्ति विपिने स्त्रिय." इति स्मृतिः।

अरण्यानी स्त्री० महदरण्यं निं०ङीष् आनुक् च। महारण्ये।

अरति पु० ऋ–अति। क्रोधे रम–क्तिन् न०त०। अनवस्थितचित्ततायाम्, रागाभावे, रतिविरहे, उद्वेगे, "स्त्रीभोज्यवस्त्रलाभेन चेतसो यानवस्थितिः अरतिः स"इत्येवं रूपे इष्टवियोगान्मनसोव्याकुलीभावे च स्त्री०। न०ब०। रागहीने त्रि०

अरत्नि पु० ऋ–क्तनि रत्निः बहुव्रीहिकरः स नास्ति यत्र। विस्तृतकनिष्ठे बहुव्रीहिहस्ते, तत्परिमाणे, कफोणौ च।

अरम् अव्य० अल–अम् वा लस्य रत्वम्। वक्ष्यमाणेऽलमर्थे शीघ्रतायाञ्च।

अरर त्रि० ऋ–अरन्। कवाटे अपिधाने च।

अरे अव्य० अरं शीघ्रं राति रा–डे। शीघ्रं प्रत्युत्तरलाभेच्छया कृते क्षतिव्यग्रतया संबोधने।

अरण (नु) पु० ऋ–अनु वा अत्वम्। (ओना) श्योनाकवृक्षे।

अरविन्द न० अरान् चक्राङ्गानीव पत्राण्यपि विन्दते विद+घ । पद्मे, सारसपक्षिणि, नीलोत्पले, रक्तकमले, ताम्रे च ।

अराति पु० न राति ददाति सुखं रा+क्तिच् न०त० । शत्रौ ।

अराल पु० ऋ-विच् अर् अरमालाति आ+ला—क । सर्ज्जरसे मत्त-हस्तिनि । कुटिले त्रि० । वेश्यायां स्त्री० ।

अरि पु० ऋ—इन् । शत्रौ रथाङ्गे, चक्रे, विट्खदिरे, षट्सु, कामक्रोधादिषु तत्संख्यासाम्यात् षट्संख्यायां, ज्योतिषप्रसिद्धे लग्नावधिके षष्ठस्थाने ग्रहेश्वरे, तन्त्रोक्तमन्त्रभेदे, राज्ञो विषयान्तरस्थे नृपतौ । प्रेरके त्रि० ।

अरित्र न० ऋच्छत्यनेन ऋ—इत्र । (हालि) इति ख्याते नौकाचालनकाष्ठे ।

अरिमर्द पु० अरिं रोगरूपं शत्रुं मर्दयति मर्द—अण् उ०स० । कामर्दवृक्षे । शत्रुतापके त्रि० ।

अरिमेद पु० अरेर्विट्खदिरस्येव मेदः सारः स्नेहोऽस्य । (गुरुदारा-वला) वृक्षभेदे । अरिरिव मेदयति क्षतत्वात् अलं स्निह्यति मिद—अच् । विट्खदिरे । क्षमिभेदे ।

अरिषड्वर्ग पु० षण्णां वर्गः समुदायः षड्वर्गः अरीणां कामक्रोध-लोभमोहमदमात्सर्य्यरूपाणामन्तःशत्रूणां षड्वर्गः देवीभागवतवत् विष्णुभागवतवच्च समासतया समाधः । कामादिषु षट्स्वान्तरेषु शत्रुषु ।

अरिष्ट पु० [illegible] हिंसायां कर्त्तरि—क्त न०त० । लशुने, निम्बे, क्षुप-भाङ्गे, [illegible]भेदे, काके, कङ्कपक्षिणि, (रीठा) इति ख्याते फेनिलवृक्षे च । अशुभे, मरणचिह्ने तक्रे, चतुर्जाते, सूतिकागारे,

मद्ये च न०। ५ब०। शुभे। स्वार्थे क। निम्बे, फेनिले वृक्षे च पु०।

अरिष्टनाति पु० अरिष्ट+नातिल्। शुभार्थसने। शुभङ्करे त्रि०

अरिष्टसूदन पु० अरिष्टमसुरं सूदयति सूद+ल्यु। विष्णौ। अशुभनाशके त्रि०।

अरुचि पुं० न रुचिर्यत्र। सत्यप्यभिलाषे भोजनायोग्यतासम्पादके रोगभेदे। न रुचिः सन्तोषः न०त०। सन्तोषाभावे।

अरुज पु० न रुजति रुज—क। (सोँदाल) इति ख्याते वृक्षे। रोगशून्ये नीरोगे च त्रि०।

अरुण पु० ऋ—उनन्। सूर्य्ये, सूर्य्यसारथौ, गुड़े, सन्ध्यारागे, निःशब्दे, दानवभेदे, कुष्ठभेदे, पुन्नागवृक्षे अव्यक्तरागे च। क्षयाभिश्रितरक्ते वर्णे पु० तद्वति त्रि०। कुङ्कुमे, सिन्दूरे च न०। महिष्यायां श्यामाकायाम्, अतिविषायां नदीभेदे कदम्बपुष्पायाञ्च स्त्री०।

अरुणलोचन पु० अरुणे रक्ते लोचने यस्य। पारावतपक्षिणि

अरुणसारथि पु० अरुणः सारथिर्यस्य। सूर्य्ये,।

अरुणानुज पु० ईत०। गरुड़े। अरुणाग्रजादयोऽप्यत्र।

अरुणोदक न० अरुणमुदकं यस्य। सरोवरभेदे, नदीभेदे स्त्री०।

अरुणोदय पु० अरुणस्यार्कस्य तत्किरणस्योदयो यत्र। "चतस्रो घटिकाः प्रातररुणोदय उच्यते" इत्युक्ते सूर्य्योदयात् प्राक्चतुर्घटिकाले। [रात् भूमौ पतन्त्यां नद्याम्।

अरुणोदा स्त्री० अरुणमुदकं यस्या उदकस्योदः। मन्दराद्रिशिखर-

अरुणोपल पु० अरुण उपलः। (चुनीति) ख्याते पद्मरागे।

अरुन्तुद त्रि० अरूंषि मर्म्माणि तुदति तुद—खश् मुम् च। मर्म्मपीडके, हृदयग्रन्थिरूपमर्म्मस्थानस्थार्शकारके च।

अरुन्धती स्त्री० अव्युत्पन्नः। वशिष्ठपत्न्याम्।

अरुष्क पु० अरुर्म्मर्म्मस्थानं कायति पीडयति कै—क। सूर्य्यमात्रेण व्रणकारके भल्लातकवृक्षे।

अरुष्कर पु० अरुर्व्रणं करोति अरुस्+क+अच्। भल्लातकवृक्षे। व्रणकारिणि त्रि०। [घते च पु० न०।

अरुस् पु० ऋ–उसि। अर्के, रक्तखदिरे च। मर्म्मणि न०। व्रणे,

अरुहा स्त्री० न किञ्चिन्मूलमाश्रित्य रोहति आकाशे एव रोहति रुह+क। भूम्यामलक्याम्।

अरे अव्य० ऋ–ए। रोषाह्वाने, नीचसम्बोधने, अपकृतौ, असूयायाञ्च

अरेरे अव्य० अरे+शेषितायां द्विरुक्तिः। नीचसम्बोधनादौ।

अरोक त्रि० रुच–दीप्तौ घञ् रोकश्छिद्रं दीप्तिश्च न० ब०। छिद्रशून्ये, दीप्तिशून्ये च॥ [कृत त।

अर्क तापे, स्तुतौ च चुरा०उभ०सक०सेट्। अर्कयति ते आर्चि-

अर्क पु० अर्च्–कर्म्मणि घञ् कुत्वम्। सूर्य्ये, इन्द्रे, ताम्रे, स्फटिके, विष्णौ, पण्डिते, (आकन्द)इति ख्याते वृक्षे, (आरक)इति ख्याते क्षुपविशेषे च।

अर्ककान्ता पु० अर्कोऽर्ककिरणैः कान्तोऽनुकूलो यस्याः कम–क (ऊडुडिया) इति ख्याते वृक्षे। ई ट०। सूर्य्यप्रियायाम्

अर्कचन्दन न० अर्कस्य प्रियश्चन्दनः शाक०त०। रक्तचन्दने।

अर्कतनय पु० ई त०। सुग्रीवे, कर्णे, यमे, शनौ, वैवस्वतमनौ च। यमुनायां स्त्री०। द्विवचनान्तः। अश्विनीकुमारयोः पु०।

अर्कपत्र पु० अर्कः सूर्य्यइव तीक्ष्णं पत्रं यस्य। अर्कवृक्षे। अर्कपर्णोऽप्यत्र। ई त०। अर्कवृक्षस्य पत्रे न०।

अर्कपादप पु०अर्कः अर्कवृक्षइव तीक्ष्णः पादपः। निम्बे। [नीवृक्षे।

अर्कपुष्पी स्त्री० अर्कस्यार्कवृक्षस्य पुष्पमिव पुष्पमस्याः। कटुरो-

अर्कप्रिया स्त्री० अर्कं प्रीणाति प्री–क०। जवायाम्। ई त०। सूर्य्यप्रियायां, छायायाञ्च।

अर्कबन्धु पु० अर्कस्य बन्धुरिव। गौतमे सूर्य्यवंश्ये बौद्धे।

अर्कभक्ता स्त्री० अर्कस्य भक्ता। (ऊडुडुडिया) इति ख्यातायां लतायाम्। तत्किरणसम्पर्के एव तस्या हि सौन्दर्य्यम्।

अर्कमूला पु० अर्कइव सर्पाणां दुष्प्रसहं मूलं यस्याः। (इश्वरमूल)

इति ख्यातायां लतायाम् । [प्रियपुष्पे बन्धूकवृक्षे ।

अर्कवल्लभ पु० अर्कस्य वल्लभः समानवर्णपुष्पत्वात् । रक्तपुष्पत्वेन अर्क-

अर्कव्रत पु० अर्कस्याराधनार्थं व्रतम् । माघशुक्लसप्तम्यादौ कर्त्तव्ये अर्काराधनार्थे व्रते । अर्कस्येव व्रतं नियमः "तद्वत्प्रगुणसूत्रत्वादुभादत्ते हि रसान् रविः" इत्युक्ते यथा रविणा लोकहितार्थं रसस्य ग्रहणमेकं प्रजापालनार्थमेव राज्ञा प्रजाभ्यो यत् करस्य ग्रहणं तादृशे "अष्टौ मासान् यथादित्यस्तोयं गृह्णाति रश्मिभिः । तथा हरेत् करं राष्ट्रान् नित्यमर्कव्रतं हि तदिति" मनूक्ते व्रते च ।

अर्काश्मन् पु० अर्कस्य अनुगतः, अश्मा । सूर्यकान्तमणौ, स हि सूर्यरश्मिसम्पर्कादुज्ज्वलति ततस्तस्यार्कसम्बन्धित्वम् ।

अर्कोपल पु० अर्कस्यानुगत उपलः । सूर्यकान्तमणौ ।

अर्गल स्त्री० न० अर्ज्—कलच् न्यङ्क्वा० कुत्वम् । कपाटमध्यस्थे० रोधके काष्ठादिदण्डे, सप्तशतीस्तोत्रादौ पाठ्ये स्तोत्रविशेषे च "अर्गलं कीलकं चादौ पठित्वा कवचं पठेत् । जपेत् सप्तशतीं पश्चादित्युक्तेः" । कल्लोले, कपाटे च न० । क्षुद्रार्गले स्त्री० गौरा० ङीष् अर्गली, स्वार्थे क, अर्गलिकाप्यत्रार्थे ।

अर्घ मूल्ये भ्वादि० पर० सक० सेट् । अर्घति आर्घीत् । घानर्घ ।

अर्घ पु० अर्घ-घञ् । क्रेयवस्तुनो ग्रहणार्थं तुल्यरूपे देये रजतादिद्रव्यरूपे मूल्ये । अर्ह—करणे घञ् न्यङ्क्वादित्वात् कुत्वम् । पूजोपचारे दूर्वाक्षतादौ सामगैरयं मयकारः क्लीबलिङ्गश्च प्रयोक्तव्यः ।

अर्घ्य अर्घ+देयार्थे यत् । अर्घार्थं दीयमाने जलादौ । अर्घदानयोग्ये पूज्ये त्रि० । [आर्च्छिष्ट आनर्च्छि ।

अर्च पूजायाम् उभ० भ्वादि० सक० सेट् । अर्चति ते आर्चीत्

अर्च पूजायां चुरा० उभ० सक० सेट् । अर्चयति ते आर्चिचत् त

अर्चा स्त्री० अर्च—आधारे अ । प्रतिमायाम् । भावे अ । पूजायाम् ।

अर्चि स्त्री० अर्च-इन् । वह्न्यादिशिखायाम् ।

अर्चित त्रि० अर्चि—क्त । पूजिते, विष्णौ पु० ।

अर्चिष्मत् पु० अर्चिर्विद्यतेऽस्य मतुप् । सूर्ये, वह्नौ च । दीप्ते त्रि० ।

अर्चिस् न० पु० अर्च्च–इसि । वह्न्यादेः शिखायां, मयूखे च ।
अर्ज अर्जने भ्वा०पर०सक०सेट् । अर्जति, आर्जीत् । आनर्ज्ज ।
अर्ज्ज संस्कारे चुरा०उभ०सक०सेट् । अर्ज्जयति ते आर्ज्जिजत् त ।
अर्ज्जक पु० अर्ज्जयति रज्जुम् अर्ज्ज–ण्वुल् । (वाबुई) इति ख्याते
तृणे, तत्कृतरज्जुना हि रज्जुर्निर्म्मीयते । अर्ज्जनकर्त्तरि त्रि०
अर्ज्जन न० अर्ज्ज–ल्युट् । स्वामित्वसम्पादके व्यापारभेदे सम्पादने च ।
अर्ज्जुन पु० अर्ज्ज–उनन् । स्वनामख्याते वृक्षे, मध्यमपाण्डवे,
हैहयाधिपे कार्त्तवीर्य्ये, करवीरे, मयूरे, धवले च । शुभ्रतागुण-
वति त्रि० (आजन) इति ख्याते नेत्ररोगे न० । [गवि, कृष्टिन्यान्च ।
अर्ज्जुनी स्त्री० गौरा० ङीष् । जघायां, वाकुद्दायां नद्यां, स्त्रियां
अर्ज्जुनोपम पु० अर्ज्जुनः स्वनामख्यातः वृक्ष उपमा यस्य । (सेगुन)
इति ख्याते शाकद्रुमे, महापत्राख्यवृक्षे च ।
अर्ण पु० ऋ–न । अकारादौ वर्णे ।
अर्णव पु० अर्णांसि सन्त्यस्मिन् अर्णस्+व सलोपः । समुद्रे ।
अर्णवोद्भव पु० उद्भवत्यस्मात् उद्+भू–अपादाने अप् ६त० । अग्नि-
जारवृक्षे चन्द्रे च । अमृते न० । स्त्रियां स्त्री ।
अर्णस् न० ऋच्छति ऋ–असुन् "उदके नुट् चेति" उणा० नुट् । जले ।
अर्त्तगल पु० आर्त्तवत् गलति गल–अच् पृषो० वा ह्रस्वः ।
नीलझिण्टिकायाम् । ह्रस्वाभावे आर्त्तगलश्चात्र ।
अर्त्तन न० ऋत–ल्युट् पक्षे दृयङभावः । निन्दायाम् ।
अर्त्ति स्त्री० अर्द–क्तिन् । पीड़ायाम् । करणे क्तिन् । धनुष्कोट्याम्
अर्थ याचने अदं० चु० आत्म० द्विक० सेट् । अर्थयते आर्त्तिधत
मतान्तरे अर्थापयते आर्त्तयापत ।
अर्थ पु० अर्थ–भावकर्म्मादौ यथायथम् अच् । विषये, अभिधेये, धने,
वस्तुनि, प्रयोजने, निवृत्तौ, हेतौ, प्रकारे, अभिलाषे, उद्देश्ये च ।
अर्थदूषण न० अर्थस्य अपहरणादिना दूषणम् ६त० । धनापहरणे,
व्यसनस्थाने क्रीड़ादौ धनव्यये च ।
अर्थना स्त्री० अर्थ–युच् । भिक्षायाम् ।

अर्थपति पु० अर्थानां पतिः ६त० । नृपे, कुबेरे च ।

अर्थप्रयोग पु० अर्थानां प्रयोगः ६त० । दृष्ट्याद्यर्थमधमर्णायार्थदानादौ, दृष्टिलाभार्थं धनप्रयोगे ।

अर्थवत् त्रि० अर्थः सन्निहितोऽस्य मतुप् वत्वम् । सन्निहितधने धनिनि । असन्निहितधने तु न मतुप् किन्तु इनिस्तेन तत्र अर्थीत्येव । प्रयोजनवति, अभिधेयवति च ।

अर्थवाद पु० अर्थस्य लक्षणया स्तुत्यर्थस्य, निन्द्यार्थस्य वा वादः वद्–करणे घञ् । प्रशंसनीयगुणवाचके, निन्दनीयदोषवाचके च शब्दविशेषे । भावे घञ् । तत्कथने ।

अर्थव्ययज्ञ त्रि० अर्थस्य धनस्य व्ययं तत्प्रकारं जानाति ज्ञा–क । किं धनं, कथं, कुत्र, कियत्, कस्मै, वा व्ययितव्यमिति विशेषाभिज्ञे ।

अर्थशास्त्र न० अर्थस्य भूमिधनादेः प्रापकं शास्त्रं शाक० त० । नीतिशास्त्रे, अभिचारादिकर्मप्रतिपादके शास्त्रे च ।

अर्थागम पु० अर्थस्य आगमः आ+गम–घञ् अदृद्धिः । आये ।

अर्थान्तर न० अन्योऽर्थः अर्थान्तरं मयूर० त० । अन्यार्थे, न्यायमते उद्देश्यसिद्ध्यर्थं प्रयुक्ते शब्दसामर्थ्यादनुद्दिश्यसिद्ध्यनुकूले वाक्ये । तस्य प्रतिवादिनोद्भावने वादिनिग्रहः ।

अर्थान्तरन्यास पु० प्रकृतार्थसिद्धये अन्यार्थस्य न्यासः । अलङ्कारप्रसिद्धे अर्थालङ्कारभेदे सा० १० प० ।

अर्थापत्ति स्त्री० अर्थस्य अनुक्तार्थस्य आपत्तिः सिद्धिः आ+पद–क्तिन् । जीवतश्चैत्रस्य गृहासत्त्वज्ञानेन बहिःसत्त्वकल्पनादौ, मीमांसकादिमते अनुमानातिरिक्तायां आपादकस्यानुपपत्तिज्ञानेनापाद्यस्य कल्पनायाम्, न्यायमते व्यतिरेकव्याप्तिज्ञानजन्यायामनुमितौ, अर्थालङ्कारभेदे च सा० १० प० ।

अर्थिक पु० अर्थिने इत्यर्थी याचकः कुत्सितार्थे कन् । निद्रागतस्पर्शादेर्जागरणार्थं नियुक्ते स्तुतिपाठकादौ ।

अर्थिन् त्रि० अर्थ+अस्त्यर्थे इनि । याचके, सेवके, व्यवहारे–वादिनि, अर्थात्प्रार्थनीये धनस्वामिनि च ।

अर्थ्य त्रि० अर्थात् प्रयोजनादनपेतः अर्थ+यत्। न्याय्ये। अर्थ-कर्म्मणि यत्। प्रार्थनीये। शिलाजतुनि न०। [आनर्ह।

अर्ह वधे भ्वादि० उभ० सक० सेट्। अर्हति ते आर्हीत् आर्हिष्ट

अर्ह याचने, गतौ, सक० पीड़ायां अक० च, भ्वादि० पर० सेट्। अर्हति आर्हीत्। तत्र याचने "अरट्धनं नार्हति चातकोऽपीति" रघुः।

अर्ह वधे चुरा० उभय० सक० सेट्। अर्हयति ते आर्हिहत्।

अर्हन न० अर्ह-ल्युट्। गतौ, पीड़ायां वधे याचने च।

अर्हना स्त्री० अर्ह-भावे युच्। भिक्षायां गतौ पीड़ायाञ्च।

अर्हित त्रि० अर्ह-क्त। पीड़िते, गते, याचिते च। वातरोगे न०

अर्ह पु० ऋध-इञ्नौ भावादौ घञ्। खण्डे। तल्यांगे न०। खण्डिते दग्धे च त्रि०। [रङ्गफलदायिन्यां कावेरीनद्याम्।

अर्हगङ्गा स्त्री० अर्हं गङ्गायाः एकदे० त०। स्नानादौ गङ्गास्नानादे-

अर्हचन्द्र पु० अर्हं चन्द्रस्य एक० त०। चन्द्रस्यार्द्धे, तदाकारे नख-क्षते, गलहस्ते, वाणभेदे, स्त्रीणां तिलकभेदे च। (तेओड़ीति) ख्यातायां लिङ्गति स्त्री०। स्वार्थे क प्रत्यये अनयोरर्थे। अर्हचन्द्रिका कर्णस्फोटलतायां चित्रपर्ण्याञ्च। [ख्याते कुर्पासकवस्त्रे।

अर्हचोलक न० अर्हं चोलस्य न०त० संज्ञायां कन्। (काञ्चुलीति)

अर्हतिक्त पु० असम्भूर्णस्तिक्तः। नेपालनिम्बे।

अर्हनारीश्वर पु० अर्द्धांङ्गे या नारी तया ईश्वरः। हरगौरीरूपे शिवे।

अर्द्धपारावत पु० अर्द्धेन अङ्गेन पारावत इव। चित्रकण्ठकपोते तित्तिरौ न ख्याते पक्षिणि।

अर्द्धपुलायित न० "यताऽर्द्धक्रमादूनै र्मण्डलायितवल्गितैः। उन्मु-खस्याश्वस्य गतिरर्द्धपुलायितमिति" परिभाषिते अश्वगति-भेदे। [यत्न। काव्यबन्धभेदे शब्दालङ्कारे

अर्द्धभ्रमक पु० स्वर्द्धे श्लोकार्द्धे गतागताभ्यामेकरूपतया भ्रमो

अर्द्धमात्रा स्त्री० अर्द्धं मात्रायाः एक० त०। विन्दुरर्द्धचन्द्राकारव्यञ्जायां ब्रह्मरूपायाम् ऊर्द्धे। अर्द्धा मात्रा उच्चारणकालो येषाम्। हल्-वर्णेषु अर्द्धं मात्रकमित्युक्तेस्तेषां तथात्वम्।

अर्द्धयाम पु० अर्द्धं यामस्य एक० त०। अष्टधा विभक्तस्य दिनस्य रात्रेर्वा अष्टमे भागे यत्र वारवेलाकालेवेलाव्यवहारः।

अर्द्धरथ पु० रथोऽस्यास्य अच् रथः, रथी अर्द्धः असम्पूर्णो रथः। असम्पूर्णे रथिनि। निकृष्टयोधे। [निर्गीथे।

अर्द्धरात्र पु० अर्द्धं रात्रेः एक० त० अच्। द्वितीयप्रहरयोपरूपे

अर्द्धवीक्षण न० अर्द्धमसपूर्णं वीक्षणम् वि+ईक्ष–ल्युट्। कटाक्षेदर्शने।

अर्द्धशफर पु० अर्द्धः प्रकृतशफरादीनः शफरः। (दाड़का) इति ख्याते मत्स्यभेदे।

अर्द्धासन न० अर्द्धमासनस्य एक० त०। आसनस्यार्द्धभागे अर्द्धमसनं त्यागः विच्छेदश्च। स्नेहव्यङ्गके सम्मानभेदे। अनिन्द्यायाञ्च।

अर्द्धोदय पु० अर्द्धस्य समृद्धस्य पुण्यस्य उदयो यत्र। माघमासीयामावास्यातिथिनक्षत्रवारविशेषयुक्ते "माघे मासि सिते पक्षे अमा स्याद्-र्कसंयुता। नक्षत्रे श्रवणे देवि! व्यतीपातो यदा भवेत्। अर्द्धोदयः स विज्ञेय" इत्युक्ते योगे।

अर्द्धोरुक न० अर्द्धमूरोः अर्द्धोरु तत्र काशते काश–ड। ऊर्व्योरधरपर्य्यन्ताङ्गाच्छादने वस्त्रे, उत्तमस्त्रीणामर्द्धोरुपर्य्यन्ते चोलकाकारे परिधेयवस्त्रे च।

अर्पण न० ऋ+णिच्–युक्–ल्युट्। निक्षेपे, स्वत्वत्यागे च। करणे ल्युटि। मन्त्रादौ। जुहूप्रभृतौ स्त्री०। संप्रदाने ल्युटि। देवादिषु। अधिकरणे ल्युटि। त्यागाधिकरणे वस्त्रादौ। कर्मणि ल्युटि। हविरादौ त्याज्यद्रव्ये।

अर्पित त्रि० ऋ–णिच् युक् च क्त। दत्ते निक्षिप्ते निवेशिते च।

अर्पिस पु० ऋ–णिच् युक् च इसन्। हृदये, अग्रमांसे च।

अर्ब(र्बि) हिंसने, भ्वादि० पर० सक० सेट्। अर्बति अर्बीत् आनर्ब।

अर्बु (र्बु) द् न० अर्व् (र्ब) बिच् तस्मै उदेति अर्ब् (र्ब्)+उद्+इण्–ड। (आम्) इति ख्याते मांसपिण्डाकारे रोगभेदे, दशकोटिसंख्यायां तत्संख्यातेषु च। पर्वतभेदे पु०।

अर्भ पु० ऋ–भ। बालके।

अर्भक पु० अर्भएव स्वार्थे क । बालके, मूर्खे, क्षुद्रे, अल्पे, सदृशे च ।

अर्य्य त्रि० ऋ-यत् । स्वामिनि । वैश्ये पु० । स्त्रियां टाप् । अर्य्या वैश्यजातिस्त्रियां स्वामिन्याञ्च । वैश्यपत्न्यान्तु ङीष् । अर्य्यी । वैश्यजातीयायां स्त्रियाम् आनुक् ङीष् च । अर्य्याणीत्यपि ।

अर्य्यमन् पु० अर्य्यं श्रेष्ठं मिमीते मा-कनिन् । सूर्य्ये, तद्देवताके उत्तरफल्गुनीनक्षत्रे, अर्कवृक्षे, पितृणां राजनि च ।

अर्व्वन् पु० ऋ-वनिप् । घोटके, इन्द्रे, गोकर्णपरिमाणे च । स्त्रियामर्व्वती सा च बडवायां वृष्टिन्यामपि ।

अर्व्वाच् अव्य० अवरे काले देशे वा अञ्चति अनुच-क्विन् पृषो० अर्वादेशः । पश्चात्काले समागते तत्रस्थेविपर्य्यस्ते च त्रि० । अर्व्वाच्+असि तस्य लुक् । अवरकालादौ मध्ये च अव्य० ततो भवार्थे युञ् तुट्च् । अर्व्वाकन तद्भवे त्रि० स्त्रियां ङीष् ।

अर्व्वाचीन त्रि० अर्व्वाक्काले पश्चात् काले भवः ख । पश्चाद्भवे ।

अर्श्स् न० ऋ-असुन् शुक् च । वलिकाकारे गुह्यस्थरोगभेदे । वा पृषो० सलोपे । अ मध्यते ।

अर्शस त्रि० अर्शस्+अस्त्यर्थे अच् । वलिकाकारकगुह्यव्याधियुक्ते ।

अर्शोघ्न पु० अर्शोहन्ति हन-टक् । (ओल)वृक्षे, रक्तातके च ।

अर्शोघ्नी स्त्री० अर्शस् हन टक् टित्त्वात् ङीप् उप० स० । तालमूल्याम् भल्लातक्याञ्च । [भल्लातके ।

अर्शोच्छिद् पु० अर्शसोऽहितः छेदनेन तद्राशकत्वात् । ईद० ।

अर्ह पूजने, सक० योग्यत्वे अक० चुरादि० उ० सेट् । अर्हति, आर्हीत् आनर्ह । प्राप्तियोग्यतार्थे गतौ च सक० ।

अर्ह्य पूजने चु० उ० सक० सेट् । अर्हयति ते आर्जिहत् त ।

अर्ह पु० अर्च्यते चु० अर्ह कर्मणि अच् । पूजाप्रशंसादिभिराराध्ये ईश्वरे, पक्षी च० योग्ये त्रि० ।

अर्हण पु० अर्ह-कर्त्तरि ल्यु । बुद्धभेदे । भावे ल्युट् पूजने न० करणे ल्युटि । पूजोपकरणे पुष्पादौ, उपायने च न० ।

अर्हणा स्त्री० अर्ह-युच् । पूजायाम् चु० ।

अर्हत् पु० अर्ह–प्रशंसायां कर्मणि शतृ । बुद्धभेदे । पूज्ये त्रि० ।

अर्हन्त पु० अर्ह वा०झच् । बुद्धभेदे ।

अर्हा स्त्री० अर्ह–भावे अ । पूजायाम् ।

अल भूषणे, वारणे, च सक० भ्वा० उभ० पर्य्याप्तौ अक० सेट् । अलति ते आलीत् आलिष्ट । [हरितालेच ।

अल न० अल–अच् । वृश्चिकपुच्छस्थे कण्टकाकारे पदार्थे (हुल)

अलक पु० अलति भूषयति मुखम् अल–कन् । ललाटस्थे किञ्चाग्रे वृत्तिलकेशे, अङ्गुलिप्रवृद्धभेदे च । कुबेरपुर्याम् । अष्टमवर्षावधि-दशमवर्षपर्य्यन्तवयस्कायां कन्यायाञ्च स्त्री० । शिखकादित्वात् कापि नेत्त्वम् ।

अलकनन्दा स्त्री० अलति पर्य्याप्नोति कुन् अलका । नन्दयतीति अच् नन्दा कर्म० । गङ्गाभेदे । अलकै र्नन्दति अच् । कन्या-यास् । सा हि अलकैरलङ्कुर्व्वति । [पीतसालवृक्षे ।

अलकप्रिय पु० अलकान् प्रीणाति विकर्णीकरोति प्री–क । (पियासाल)

अलकाधिप पु० अलकाया अधिपः ६त० । कुबेरे ।

अलक्त पु० न रक्तो यस्मात् नञ् त० । रस्य लत्वम् । लाक्षारसे, स्वार्थे के । अलक्तकोऽप्यत्र तद्वृक्षौ लाक्षायाञ्च ।

अलक्षण त्रि० नास्ति लक्षणं अनुमापकं यस्य ब० । अननुमेये, सुचिह्नशून्ये च । न० त० दुर्लक्षणे न० ।

अलक्षित त्रि० लक्ष–क्त न० त० । अज्ञाते, लक्षणेनानुमिते च ।

अलक्ष्मी स्त्री० विरोधार्थे नञ् त० । लक्ष्मीविरुद्धायां निर्ऋतौ (आलक्ष्मीति) ख्यातायाम् ।

अलगर्द पु० लगति स्तृणाति किप् लग् अर्द्यति अर्द्–अच् अल् स्तृणन् सन् अर्दा न भवति । विषवृक्षे जलव्याले । पृषो० रत्वम् । रन्ध्रोति रन्ध्र–अच् वा । अलगर्दोऽत्र ।

अलङ्करण न० अलम्+कृ–भावे ल्युट् । भूषायाम् । करणे ल्युट् । वलयादौ भूषणे ।

अलङ्करिष्णु त्रि० अलम् कृ–इष्णुच् । भूषके रक्षणकरणशीले ।

अलङ्कर्म्मीण त्रि० अलं समर्थः कर्म्मणे ख । कर्म्मक्षमे ।

अलङ्कार पु० अलम्+कृ+घञ् । भूषायाम् । करणे घञि । हारादौ भूषणे, साहित्यविषयदोषगुणप्रतिपादके ग्रन्थे, शब्दभूषणे—अनुप्रासादौ, शब्दार्थभूषणे—उपमादौ च । वाक्यस्त्ये विस्तृतिः ।

अलङ्क्रिया स्त्री अलम्+कृ—भावे श । भूषायाम् ।

अलम् अव्य० अल+असु । भूषणे, सामर्थ्ये, पर्य्याप्तौ, निवारणे, निषेधे, निरर्थकत्वे, अस्त्यर्थे, अत्यर्थे अवधारणे च ।

अलम्पुरुषीण त्रि० अलं समर्थः प्रतिपुरुषाय । प्रतिमल्लादियोधनसमर्थे

अलम्बुष पु० अलं पुष्णाति पुष—क पृषो० पस्य बत्वम् । प्रहस्ते, वमने, राक्षसभेदे च । लज्जालुवृक्षे स्वर्णवेश्यायाञ्च स्त्री० ।

अलवाल न० लवमालाति ला—क न० त० । वृक्षसेकार्थं वृक्षमूले मृदादिकृते जलाधारे वेदने स्वार्थेऽण् । आलवालमप्यत्र ।

अलस त्रि० न लसति व्याप्रियते लस—अच् । अवश्यकर्त्तव्येषु शरीरापाटवमभिनीय कृतप्रयासे, क्रियामन्दे च । पादरोगभेदे, वृक्षभेदे च पु० । हंसपदीलतायां स्त्री० ।

अलसक पु० न लस्यति अनेन लस करणे घञ् वा युन् । उदरामयरोगभेदे । स्वार्थे क । तत्रार्थे ।

अलात पु० न० । ला—क्त न० त० । (कयाला) इति ख्याते (आङ्गार) इति ख्याते च अर्द्धदग्धकाष्ठे ।

अलाबु स्त्री० न लम्बते न+लबि—उ णित् नलोपश्च वृद्धिः । (लाउ), तुम्बीफले । वा ङीप् । अलाबूशब्दात् ।

अलि पु० अलति दंशे, कूजिते, गच्छिते, वा समर्थो भवति अल—इन् । भ्रमरे, वृश्चिके, काके, कोकिले, हस्तिकराग्रे सुरायाञ्च ।

अलिक न० अल्यते भूष्यते अल—कर्म्मणि इकन् । ललाटे ।

अलिङ्ग त्रि० नास्ति लिङ्गमनुमापकचिह्नादि यस्य । कार्य्यादिरूपलिङ्गरहिते अननुमेये ।

अलिञ्जर पु० अलनमलिः अल—इन् तं जरयति जॄ—अच् पृषो० मुम् । (जाला) इति ख्याते मृण्मये जलाधारे पात्रभेदे मणिके ।

अलिन् पु० अलं दृश्चिकपुच्छस्यकण्टकं विद्यतेऽस्य वा अल+इनि। दृश्चिके, भ्रमरे च।

अलिन्द पु० अल्यते भूष्यते अल–कर्मणि किन्दच्। द्वारप्रकोष्ठा-द्बहिर्द्वारवर्त्ति चत्वरे, द्वारबहिर्भागे च।

अलिपत्रिका स्त्री० अलिर्वृश्चिक इव पत्रमस्याः वा कपि अतइत्वम्। वृश्चिकपुच्छाख्यलतायाम्(बिछाति)। अलिपर्ण्यपि अत्र।

अलिप्रिय न० अलीनां प्रियमधिकमादकत्वात्। रक्तोत्पले पाट-लावृक्षे स्त्री०। अलिवल्लभाप्यत्र। [गणिकारीवृक्षे।

अलिमोदा स्त्री० अलीन् मोदयति मुद+णिच्–अच्। (गणिआरी),

अलीक न० अल–ईकन्। अप्रिये, ललाटे, स्वर्गे च। अलति गच्छ-त्यधोऽनेन। असत्ये। मिथ्याकथने हि नरकपातः।

अलौकिक त्रि० लोके विदितः ठक् न० त०। लौकिकप्रत्यक्षागम्ये, लोकातीते, चमत्कारिणि च।

अल्प त्रि०अल–प। क्षुद्रे ईषदर्थे, क्षुद्रे, मरणार्हे च। स्वार्थे के। अल्पकमप्यत्र। यवासे पु०।

अल्पगन्ध न० अल्पो गन्धोऽस्य। रक्तकैरवे। स्वल्पगन्धयुक्ते त्रि०।

अल्पतनु त्रि० अल्पा क्षुद्रपरिमाणा तनुः शरीरं यस्य। खर्वे, दुर्बले, स्वल्पास्थियुक्ते च।

अल्पप्रमाणक पु० अल्पं प्रमाणमस्य वा कप्। (तरमुज) (खरमुज) वा इति ख्याते वृक्षे। अल्पप्रमाणयुक्ते त्रि०।

अल्पमारिष पु० अल्पः मारिषः शाकः कर्म०। (मटिया) इति ख्याते शाके। [प्रमाणे मरिषे।

अल्पसरस् पु० अल्पं सरः कर्म०। (डोवा) इति ख्याते अल्प-

अल्पायुस् पु० अल्पमायुः जीवनकालो यस्य। क्षुद्रे पशुषु तस्यैवा-ल्पायुष्कत्वात्तथात्वम्। अल्पायुष्कमात्रे त्रि०।

अल्पिका स्त्री० अल्पैव स्वार्थे के अत इत्वम्। क्षुद्रपर्ण्याम्।

अल्पिष्ठ त्रि० अतिशयेनाल्पः अल्प+इष्ठ। क्षुद्रतरे।

अल्पीयस् त्रि० अल्प+ईयसुन्। अत्यल्पे। स्त्रियां ङीप्।

अवा स्त्री० अव्यते इत्यच् किप् अवे भूधात्वे वाति गच्छति वा क ४त०। मातरि। अवतीति अव् पचाद्यच् सन् वाति सर्वानत्ति गच्छति जानाति वा वा—क। सर्वज्ञायां सर्वभक्षिकायां परमात्मदेवतायाम् सा च अथर्ववेदे अवाक्षेत्यादिसूक्ते प्रसिद्धा।

अव रक्षणे, गतौ, स्यूतायां, दीप्तौ, शोभायां, अवणे, व्याप्तौ, आलिङ्गने, प्रार्थने, प्रवेशे, इच्छायां वृद्धौ, भक्षणे, बधे, सामर्थ्ये, अवगमे, करणे, इच्छोत्पादने च यथायथं सक० अक० च भ्वादि० सेट् पर०। अवति अवीत्। आव।

अव अव्य० अव—अच्। निश्चये, व्याप्तौ अनादरे, असाकल्ये, आलम्बने, शुद्धौ, परिभवे, नियोगे, निम्नतायां च।

अवकर पु० अवकीर्यते संमार्ज्जन्यादिभिः अव—कृ—कर्म्मणि अप्। सम्मार्ज्जन्यादिभिः क्षिप्ते धूलयादौ।

अवकाश पु० अव+काश—घञ्। अवस्थितियोग्यतासम्पादके काले, देशे च। तत्र कालिकोऽवकाशः क्रियान्तरस्थितियोग्यतासम्पादकः स चावसर इत्यप्युच्यते, "क्षत्रावकाश रुचि संप्रकृष्टम्" इति भट्टिः। द्रव्यान्तरस्थितियोग्यतासम्पादको दैशिकः स चावकाश इत्येव "अवकाशं किलोदन्वानिति" रघुः।

अवकीर्ण त्रि० अव—कृ कर्मणि क्त। चूर्णिते, ध्वस्ते च।

अवकीर्णिन् त्रि० अवकीर्णं ध्वस्तं व्रतमस्यास्य इनि। क्षतव्रते।

अवकृष्ट त्रि० अव+कृष—क्त। दूरीकृते, अपसारिते, बहिष्कारिते च

अवक्रेशिन् त्रि० अवच्युतं क्रं सुखं यस्मात् ५ब० अवक्रं शून्यतां फलशून्यतामीशितुं शीलमस्य अवक्र+ईश—णिनि। अफले वृथे। अवसन्नाः केचा विद्यन्ते अस्य इनि। अल्पकेशयुक्ते त्रि०।

अवक्रय पु० अवक्रीयते प्रतिरूपदानेन स्वाधीनं क्रियतेऽनेन अव+क्री—अच्। याज्ञस्य प्रतिरूपत्वेन देये मूल्ये, भाटके च

अवक्षुत त्रि० अव—क्षु—क्त। उपरि क्षतक्षुते। [भर्त्सने च न०।

अवक्षेप पु० अव+क्षिप—घञ्। निन्दायाम्। ल्युटि अवक्षेपणमप्यत्र

अवगणित त्रि० अव+गण—कर्मणि क्त । तिरस्कृते, अवज्ञाते च ।
अवगण्ड पु० अव+गम—ड डकारस्य नेच्चम् । गण्डस्थस्थले ।
अवगत त्रि० अव+गम—क्त । निम्नगते, ज्ञाते च ।
अवगाढ त्रि० अव+गाह—क्त । निविष्टे, अन्तःप्रविष्टे, निमग्ने च
अवगाह पु० अव+गाह—घञ् । स्नाने, अन्तःप्रवेशे च । आधारे घञ् । स्नानस्थाने । वा अङ्गोपे वगाहोऽप्यत्र । ल्युटि अव-गाहनमप्यत्र । [भावे क्त । जनापवादे निन्दायाञ्च न० ।
अवगीत त्रि० अव+गै—क्त । निर्वादयुक्ते जनापवादयुक्ते, दुष्टे, गर्हिते च ।
अवगुण पु० अव+गुण—क । दोषे ।
अवगुण्ठन न० अव+गुण्ठ—ल्युट् । योषितां शिरःप्रावरणक्रिया-याम् । करणे ल्युटि । मुखाच्छादने वस्त्रे ।
अवगुण्ठिका स्त्री० अव+गुण्ठ—एवुल् स्त्रीत्वाट्टापि अतइत्त्वम् । स्त्रीणां मुखावरणवस्त्राम्, उवनिकायाञ्च ।
अवगुण्ठित त्रि० अव+गुण्ठ—क्त । कृतावगुण्ठने, चूर्णिते च ।
अवगृह्य न० अव+ग्रह—क्यप् । व्याकरणप्रसिद्धे प्रग्रह्यसंज्ञके पदे ।
अवगोरण न० अव+गुर—ल्युट् । वधायाख्याद्युद्यमे ।
अवग्र(ग्रा)ह पु० अव+ग्रह—घ, घञ् वा । दृष्टिजलप्रतिबन्धे ।
अवग्रहण न० अव+ग्रह—ल्युट् । प्रतिरोधे ।
अवघट्ट पु० अव+घट्ट—अच् । बन्धे, घरट्टे (जाँता) च ।
अवघात पु० अव+हन—घञ् । अवहनने, तण्डुलादेर्विशुद्धीकरणे ।
अवचय पु० अव+चि—अच् । पुष्पफलाद्यादाने । [वस्त्रे ।
अवचूड(ल) पु० अवनता चूडा यस्य वा डो लः । ध्वजाधोबद्धे
अवचूर्णित त्रि० अव+चूर्ण—कर्मणि क्त । पिष्टे, क्षिप्ते, चूर्णीकृते च
अवचूलक न० अवनता चूडा यस्य ङस्य लत्वम् संज्ञायां कन् । चामरे
अवच्छिन्न त्रि० अव+छिद—क्त । रुद्धे, विशिष्टे, व्याप्यमाने अव च्छेदकतानिरूपके च । [त्रि०
अवच्छुरित न० अव+छुर—भावे क्त । अवच्छासे । कर्मणि क्त । मिश्रि
अवच्छेद पु० अव+छिद—भावे घञ् । विरामे, परिच्छेदे एकदेशे च

अवच्छेदक त्रि० अव+छिद्–ण्वुल् । एकदेशे, व्यावर्त्तकविशेषणे च
अवज्ञा स्त्री० अव+ज्ञा–अङ् । अनादरे ।
अवट पु० अव–अटन् । गर्त्ते, कूपे, ऐन्द्रजालिकजीविकावति च ।
अवटि स्त्री० अव–अटि । गर्त्ते, कूपे च । वा ङीष् अवटीत्यपि ।
अवटीट त्रि० अवनता नासिका प्रा०स० नतार्थे नासायाः टीटादेशः अर्शआदित्वादच् । (खांदा) नतनासिके जने ।
अवटु पु० अव+टीक–डु । गर्त्ते, दृक्षभेदे, कूपे च । ग्रीवापश्चाद्भागे, ग्रीवाया उन्नतभागे च स्त्री० ।
अवडीन न० अव+डी–भावे क्त । अवरोहणरूपे पक्षिणां गतिभेदे ।
अवतंस पु० न० अव+तनुस–घञ् । कर्णपूरे, शिरोभूषाभेदे च ।
अवततमस न०अवततं व्याप्तं तमः प्रा०स०अच् समा० । व्याप्तान्धकारे ।
अवतार पु० अव+तॄ–करणे घञ् । तीर्थे, (पुष्करिण्यादेः सोपानपद्धतौ) । भावे घञ् । अवरोहणे, देवानामंशावेशवशेन प्रादुर्भावे च ।
अवतारणा न० अव+तॄ–णिच्–ल्युट् । भूतादीनामावेशनेन प्रादुर्भावने, अवरोपणे, ग्रन्थप्रस्तावने च । अवतारस्यायत्र स्त्री० ङीप् ।
अवतोका स्त्री०अवपतितं तोकमस्याः प्रा०ब० । स्वदुर्गभायां स्त्रियाम्
अवदंश पु० अव+दन्स–घञ् । भर्ज्जिते चर्वणद्रव्ये, मद्यपानोल्लासकादिकारके चर्वणद्रव्ये । [मनोज्ञे च त्रि० ।
अवदात पु० अव+दै–क्त । शुभ्रे, प्रीते च वर्णे । तद्वति, विशुद्धे
अवदान न० अव+दो–ल्युट् । खण्डने, पराक्रमे, अतिक्रमे, शुद्धिकरणे, वीरणमूले च । [ल्युल् । भेदनकर्त्तरि त्रि० ।
अवदारक पु० अवदारयति द–णिच्–ण्वुल् । (खोनता) खनित्रे
अवदारण न० अव+द–णिच्–करणे ल्युट् । खनित्रे ।
अवदाह न० अवसादितो दाहो येन प्रा०ब० । वीरणमूले ।
अवद्य त्रि० वद–यत् न०त० । अधमे, पापिनि, निन्द्ये, कथनायोग्ये च । [मनोनिवर्त्तते ।
अवधान न० अव+धा–ल्युट् । मनोयोगविशेषे, यद्यस्मात् विषयान्तरतो

अवधारण न० अव+धृ—णिच्—ल्युट्। दृढत्वापरिच्छेदे, अयमेवेति विषयपरिच्छेदके निश्चये च।

अवधि पु० अव+धा—कि। सीमायां, काले च। आधारे कि। बिले।

अवधीर अवज्ञायाम् अद० चुरा० उभय० सक० सेट्। अवधीरयति ते आवधीरत् त। मतान्तरे अवादिधीरत् त।

अवधूत त्रि० अव+धू—क्त। अभिभूते निवर्त्तिते, चालिते, अनादृते च। "यो विलङ्घ्याश्रमान् वर्णान् आत्मन्येव स्थितः पुमान्। अतिवर्णाश्रमी योगी अवधूतः स उच्यते" इत्युक्तलक्षणे वर्णाश्रमधर्मत्यागिनि सन्न्यासिनि पु०। [याज्ञ।

अवध्वंस पु० अव+ध्वंस—भावे घञ्। परित्यागे, चूर्णिते, निन्द्-

अवन न० अव—ल्युट्। प्रीणने, रक्षणे, प्रीतौ च।

अवनत त्रि० अव+नम—क्त। अधोभूते, आनते च।

अवनति स्त्री० अव+नम—क्तिन्। औद्धत्याभावे, विनये, अधोनमने च।

अवनद्ध त्रि० अव+नह-कर्मणि क्त। खचिते, रोपिते च। ऋदवादित्वाद्धे न०

अवनय पु० अव+नी—अच्। अधोनयने।

अवनाट त्रि० अवनता नासिका प्रा० स० नतार्थे नासिकाया नाटादेशः अर्श आद्यच् (खाँदा) अवनतनासिके जने।

अवनि (नी) स्त्री० अव—अनि। भूमौ। वा ङीष् अवनीत्यपि च।

अवनेजन न० अव+निज—भावे—ल्युट्। प्रक्षालने, श्राद्धे—पिण्डप्रदानार्थमाहृतकुशस्थानसेचने च।

अवन्ति (न्ती) पु० स्त्री० अव—अन्ति। मालवदेशे। [न्यासव्याख्यायाम्।

अवन्तिका स्त्री० अवन्तिषु कायति प्रकाशते। मालवदेशीयराजधा-

अवन्तिसोम न० अवन्तिषु अभिषुतं सोममिव शाक०त०। आङ्किके।

अवपात पु० अव+पत—आधारे घञ्। बिले, भावे घञ्। अधःपतने, निपाते च।

अवप्लुत त्रि० अव+प्लु—क्त। स्नानात् सिक्ते अवतीर्णे। आर्द्रभूते च।

अवभास पु० अव+भास—भावे घञ्। साक्षात्कारे, ब्रह्मधर्मस्वरूपसमारोपेण भाने च।

अवभृथ पु० अव+भृ-क्थन्। सुख्ययज्ञसमाप्तौ क्रियमाणे यज्ञाङ्गे कर्मणि, यज्ञाङ्गभूते यज्ञान्ते स्नाने च।

अवभ्रट त्रि० अवनता नासिका प्रा०स० नतार्थे नासिकाया भ्रटादेशः अर्शआद्यच्। अवनतनासिके (खाँदा) जने।

अवम त्रि० अवत्यस्मादात्मानम् अव-मप्। कदाचारादौ, कुत्सिते, नीचे च। ज्योतिषप्रसिद्धे एकतिथिद्वयान्तवति एकस्मिन् दिनवारे न०। अवमदिनमप्यत्र।

अवमत त्रि० अव+मन-क्त। अनादृते।

अवमर्द पु० अव+मृद-घञ्। पीड़ने। [शभेदे च।

अवमर्श पु० अव+मृश-घञ्। आलोचनायाम्, नाटकस्य सन्ध्यङ्ग-

अवमानना त्रि० अव+चुरा०-मन-भावे युच्। अपमानकरणे।

अवमानित त्रि० अव+चुरा० मन-कर्मणि क्त। कृतापमाने।

अवमोटन न० अव+मुट्-णिच्-ल्युट्। (मोचड़ान) परिवर्त्तनेना-न्यथापादनरूपे परिमोटने।

अवयव पु० अव+यु-अच्। देहादावङ्गे, उपकरणे, न्यायमते प्रति-ज्ञाहेत्वादाहरणादिषु पञ्चसु वाक्येषु च।

अवर त्रि० अव+रा-क। चरमे, अधमे, कार्य्ये च। पश्चाद्वर्त्तिनि देये काले पु० तद्वर्त्तिनि त्रि०। हस्तिजङ्घायाः पश्चाद्देशे न०।

अवरज पु० अवरस्मिन् काले जातः। कनिष्ठसोदरे भ्रातरि, शूद्रे च। कनिष्ठसोदरभगिन्यां, शूद्रायाञ्च स्त्री० टाप्।

अवरति स्त्री० अव+रम-भावे क्तिन्। विरामे, निवृत्तौ च।

अवरवर्ण पु० कर्म०। शूद्रे,

अवरीण त्रि० अव+रीङ-कर्मणि क्त। तिरस्कृते।

अवरुद्ध त्रि०अव+रुध-कर्मणि क्त। आच्छादिते,बन्धादिना प्रतिरुद्धे च अन्तःपुरवासिन्यां भोग्यायां दास्यां, राजयोषिति च स्त्री०।

अवरूढ त्रि० अव+रुह-कर्त्तरि क्त। अवतीर्णे, स्वस्थानादुत्थिते।

अवरोध पु० अव+रुध-भावे घञ्। निरोधे। कर्मणि घञ्। राजान्तःपुरस्थायां योषिति, राजदारेषु च। आधारे घञ्।

राजान्तःपुरे। ल्युट्। अवरोधनमप्यत्र न०।

अवरोधिक पु०अवरोधे तद्रक्षणादौ नियुक्तः ठन्। राजान्तःपुररक्षणार्थं नियुक्ते धामनादौ।

अवरोपित त्रि० अव+रुह-णिच्-पुक् च कर्मणि क्त। उत्पाटिते।

अवरोह पु०अव+रुह-भावे घञ्। अवतरणे, ऊर्द्ध्वदेशादनिम्नदेशगमने, आरोहे च। पचाद्यच्। तरोर्मूलादग्रपर्य्यन्तमारूढायां गुडूच्यादिलतायाम्। अपादाने घञि। स्वर्गे, ततो हि भोगावसाने सर्वेऽवतरन्ति।

अवरोहशाखिन् पु० अवरोहति च्छिन्नोऽपि पुनः प्ररोहति अव+रुह-अच् कर्म०, अवरोहति अधोगच्छति मूलमस्याः तादृशी शाखा कर्म० ततः बाहुल्ये मत्वर्थीय इनिः। वटवृक्षे, तस्य च्छेदनेऽपि पुनः प्ररोहः शाखातोऽपि बहूनि मूलान्यवतरन्ति च।

अवरोहिका स्त्री० अवरोहति अत्यन्तमधोगच्छति अव+रुह-ण्वुल् टाप् कापि अतएत्त्वम्। अश्वगन्धालतायाम्।

अवरोहिन् पु० अव+रुह-णिनि (वटवृक्षे)। अवरोहिशाखोऽप्यत्र।

अवर्ण पु० वर्ण-घञ् विरोधे नञ्तत्०। प्रशंसाविरोधिनि अपवादे।

अवलक्ष अव+लक्ष घञ् + श्वेतवर्णे। तद्वति, मूर्खे च त्रि०। अवादेरतो लोपे, बलक्षोऽप्यत्रैवार्थे। [संबद्धमात्रे त्रि०।

अवलग्न पु० अव+लग-क्त नि० दुःखभावः। (भाजा) देहमध्यभागे।

अवलम्ब पु० अव+लबि-आधारे घञ्। आश्रये। करणे घञि। अवलम्बसाधने दण्डादौ। ल्युट् अवलम्बनमप्यत्र न०।

अवलम्बित त्रि०अव+लबि-कर्त्तरि क्त। आश्रिते, रक्षादिना बद्धे च।

अवलिप्त त्रि०अव+लिप-कर्त्तरि कर्मणि वा क्त। गर्विते, कृतलेपने च।

अवलीढ त्रि० अव+लिह-कर्मणि क्त। भक्षिते, कृतावलेहे च।

अवलीला स्त्री० अवरा लीला। अनायासे, अनादरे च।

अवलेप पु०अव+लिप-भावे घञ्। गर्वे, लेपने, दूषणे, सम्बन्धे च।

अवलेपन न० अव+लिप-भावे ल्युट्। विलेपे, अञ्जने, सङ्कल्पे च। करणे ल्युटि। चन्दनादौ।

अवलेह पु० अव+लिह्–भावे घञ् । जिह्वाग्रेण स्वादने । कर्मणि घञि । तत्स्वाद्ये औषधादौ च ।

अवलोकन न० अव+लुक–भावे ल्युट् । दर्शने, अनुसन्धाने च । करणे ल्युट् । आलोके, नेत्रे च । [लतायाम् ।

अवल्गुज पु० अवल्गोरशोनत्वाज्जायते जन–ड । सोमराजी-

अववाद पु० अव+वद–भावे घञ् । निन्दायाम्, विश्वासे आज्ञायाम्, अपालम्भने च । [पराधीने च ।

अवश त्रि० नास्ति वशमायत्तत्वं यस्य । अस्वाधीने, कामादिपरवशे,

अवशिष्ट त्रि० अव+शिष–क्त । अतिरिक्ते, परिशिष्टे, अधिके च

अवश्यम् अव्य० अव+श्यै–ड० डसु । निश्चये, अप्रत्यनिवारणे च ।

अवश्याय पु० अव+श्यै–ण । कुज्झटिकायाम्, अभिमाने च ।

अवश्राण न० अव+श्रो–अच् । चूर्णीतोऽवतार्य्य स्थापने ।

अवष्टब्ध त्रि० अव+स्तभ–कर्म्मणि क्त षत्वम् । आसक्ते, आक्रान्ते, अवलम्बिते, प्रतिरुद्धे च ।

अवष्टम्भ पु० अव+स्तभ–भावादौ घञ् षत्वम् । स्वर्से, स्तम्भ प्रारम्भे, रोधने, गर्वे च "रक्षोरवष्टम्भमयेन पत्रिणा" इति रघुः ।

अवस् अव्य० अव+प्रथमायाः पञ्चम्याः सप्तम्या वार्थे असि आदेशः । बाह्ये पश्चादर्थे च ।

अवसथ पु० वस–अथन् न० ब० । निलये, ग्रामे च ।

अवसथ्य पु० अवसथ+स्वार्थे यत् । आवासे, ग्रामे च ।

अवसर पु० अव+सृ–अच् । प्रस्तावे, जिज्ञासाविशेषस्येऽवश्यवक्तव्ये, वत्सरे, मन्वन्तरभेदे वर्षणे, क्रियास्थितियोग्यतासम्पादकरूपे कालिकेऽवकाशे च । [कामचारानुज्ञायां च ।

अवसर्ग पु० अव+सृज–भावे घञ् । अप्रतिबन्धे, यथेष्टं क्रियतामिति

अवसर्प पु० अव+सृप–अच् । चरे । [रूपावस्थानतायाञ्च ।

अवसाद पु० अव+सद–भावे घञ् । नाशे, विषादे, स्वकार्य्याक्षमत्व–

अवसादन न० अव+सद णिच् भावे ल्युट् । कार्य्याक्षमतापादने, नाशने च

अवसान न० अव+सो–भावे ल्युट् । विरामे, समाप्तौ, सीमायां मृत्यौ च ।

अवसाय पु० अव+सो–भावे घञ् । समाप्तौ, शेषे, निश्चये च ।

अवसित त्रि० अव+सो–कर्त्तरि कर्मणि वा क्त । समाप्ते, कृते ज्ञाते, परिपक्के, निश्चिते, सर्हितधान्ये च । अव+सि–क्त । संबद्धे च ।

अवस्कन्द पु० अव+स्कन्द्–आधारे घञ् । जिगीषूणां सैन्यनिवेशस्थाने शिविरे, भावे घञ् । आक्रमणे च । [तरणे, आक्रमणे च ।

अवस्कन्दन न० अव+स्कन्द्–भावे ल्युट् । सर्व्वाङ्गेऽवगाहने, अव-

अवस्कर पु० अव+कॄ–कर्मणि अप् सुट् । विष्ठादिमले । अपादने अपि । गुह्यदेशे उपस्थादौ । [अवादेशः । अवरकालादावित्यर्थे ।

अवस्तात् अव्य० अवरस्मिन् अवरस्मात् अवरमित्यर्थे अस्तादेशः

अवस्तार पु० अव+स्तॄ–करणे घञ् (परदा) इति ख्यातायां जवनिकायाम्, भावे घञ् । आस्तरणे । [अवस्थाने च ।

अवस्था स्त्री० अव+स्था–अङ् । कालकृतायां देहादेर्दशायाम्,

अवस्थान न० अव+स्था–भावे ल्युट् । स्थितौ । आधारे घञि । आवासे, प्रतिष्ठायाञ्च ।

अवस्यन्दन न० अव+स्यन्द्–भावे ल्युट् । क्षिंसने ।

अवस्रंसन न० अव–स्रंसु–भावे ल्युट् । अधःपतने, च्युतौ च ।

अवहार पु० अव+हृ–कर्त्तरि घञ् । चौरे, आहरणमात्रे, जलजन्तुभेदे च । भावे घञि । युद्धादिविश्रामे । कर्मणि घञि । निमन्त्रितविप्रादिभ्यो देये द्रव्ये ।

अव(ब)हित्था स्त्री०न० न वहित्थमिति स्था-क पृषो० । हृदयभावे ।

अवहेल न० स्त्री० । अव+हेल–अ घञर्थे क वा । अनादरे ।

अवाक्पुष्पी स्त्री० अवाक् अधोमुखं पुष्पमस्याः । (शुलफा) इति ख्यातायाम् शतपुष्पिकायाम् ।

अवाक्शिरस् त्रि० अवाक् शिरोऽस्य ब० । अधोमुखे ।

अवाग्र त्रि० अवनतमग्रमस्य प्रा० ब० । नम्रमुखे ।

अवाङ्मुख त्रि० अवाक् मुखमस्य । अधोमुखे ।

अवाच् त्रि० अवाञ्चति अव+अनच्–क्विन् । अधोमुखगते, अवरे–देशे, काले च । दक्षिणस्यां दिशि स्त्री० ङीप् । नास्ति वाक् यस्य

ईश्व० । वाक्यरहिते त्रि० । पूर्वार्धे औ अवाञ्चौ, अत्र अवाचौ इत्यादिभेदः । अवाच्+कालाद्यर्थे प्रथमादीनां स्थानेऽस्ताति तस्य लुक् । अवरकालादावित्यर्थे अव्य० ।

अवाच्य न० वच–ण्यत् न कुत्वम् न०त० । दुष्टवचने, वचनानर्हे, निन्द्यनीये च अवाचिभवः अवाच्+यत् । अवरकालादौ भवे त्रि० ।

अवान्तर त्रि० अवगतमन्तरं मध्यम् अव्या०स० प्रधानान्तःपातिनि अङ्गादौ, सामान्यस्य विशेषे च ।

अवार न० न वारयति । नद्यादेर्जलानतिक्रमेण प्राप्ये तीरे ।

अवारपार पु० अवारं पारञ्च स्त्री यस्य अर्शआद्यच् । उभयकूलवति वस्तुनि ।

अवारपारीण त्रि० अवारपारे गच्छति खञ् । परपारगामिनि ।

अवारिका स्त्री० नास्ति वारि यत्र । धन्याके, तस्य अतिशुष्कफलत्वेन जलशून्यत्वात्तथात्वम् ।

अवासस् त्रि० न वासोऽस्य । वस्त्ररहिते नग्ने ।

अवि पु० अव–इन् । सूर्य्ये, मेषे, रागे, पर्वते, मूषिककम्बले, प्रभौ च । ऋतमत्यां स्त्रियां लक्षायाञ्च स्त्री० वा ङीप् ।

अविकट पु० अवि+समूहे कटच् । मेषसंघाते । विकट उग्रः न०त० । उग्रभिन्ने सौम्ये त्रि० । [अजगन्धाहृत्ते ।

अविगन्धा स्त्री० अवेरजागस्य गन्ध इव गन्धः पुष्पादावस्याः ।

अविघ्न पु० विज–क्त न०त० । (करमचा) करमर्दकवृक्षे ।

अवितथ न० न वितथं मिथ्या न०त० । सत्ये ।

अविद्या स्त्री० विद–क्यप् न०त० । विद्याभावे, अहङ्कारहेतौ अज्ञाने, विद्याविरोधिन्याम् अयथार्थबुद्धौ च । वेदान्तमते भावाभावाभ्यामनिर्वाच्यायामचेतनायां मायायाम् ।

अविद्धकर्णी स्त्री० न विद्धः अच्छिद्रः प्रशस्तः कर्णोऽस्याः । पाठालतायाम् ।

अविनाभाव पु० विना व्यापकत्वेन न भावः स्थितिः । व्यापकस्वस्वतुरोधिसत्ताकृपायां व्याप्तौ ।

अविनीत त्रि० अ+नी–क्त। उद्धते। कुलटायां स्त्री०।

अविप्रिय क० अवीनु मेषान् प्रीणाति प्री-क। श्यामाङ्गे। विप्रियमपकारः न० त०। प्रतिकूलभिन्ने। न० ब०। अपकारशून्ये त्रि०। श्वेतालतायां स्त्री।

अविभक्त पु०वि+भज–क्त न०त०। संसृष्टे, विभागरहिते द्रव्ये–स्वामिनि च। "अविभक्ता विभक्ता वा सपिण्डाः स्थावरे समाः कृति" "अविभक्तं स्थावरं यत्सर्व्वेषामेव तद्भवेदिति" च स्मृतिः।

अविमुक्त न० "न विमुक्तं शिवाभ्यां यदविमुक्तं ततो विदुः" इत्युक्तलक्षणे काशीक्षेत्रे। वि+मुच–क्त न० त०। मुक्तभिन्ने त्रि०।

अविरत त्रि० वि+रम भावे–क्त न०ब०। विरामशून्ये, अनवरते द्रव्यादौ च क्रियाविशेषणत्वे न०।

अविरति स्त्री० विरामो विरतिः भावे क्तिन् न० त०। विषयादौ स्थिरचित्ततायाम्, विरामाभावे च।

अविरल त्रि० न विरलः न० त०। घने निबिड़े।

अविलम्बित त्रि० वि+लबि–क्त न० त०। विलम्बशून्ये, त्वरायुक्ते द्रव्यादौ। क्रियाविशेषणत्वे न०।

अविवेक पु० वि+विच–घञ् न० त०। सदसद्विवेकाभावे, सम्भूयैक-कार्य्यकरणे, भ्रमे च। न० ब०। विवेकशून्ये त्रि०।

अविविक्तृ त्रि० वि+विच–क्विप् तुण् न० त०। विवेचकभिन्ने, मूर्खे, शास्त्राद्युपदेशशून्ये। विवेकोभेदस्तद्भिन्ने च। साङ्ख्यमते प्रधाने, महदादौ च। प्रधानं महदादिभ्यः, महदादयश्च प्रधानात् न विविच्यन्ते (भिद्यन्ते) इत्युक्तम् तत्रैव।

अविशेष पु० वि+शिष–घञ् न० त०। विशेषाभावे, अभेदे च। न० ब०। विशेषशून्ये तुल्ये त्रि०। साङ्ख्यादिमतसिद्धेषु तन्मात्रा-ख्येषु सूक्ष्मभूतेषु, तानि च इदमेतदेवंगुणकमिति व्यावृत्ततया नानुभूयन्ते इत्यविशेषाः।

अविश्रान्त त्रि० वि+श्रम–क्त न० त०। विरामरहिते द्रव्ये।

अविष पु० अ+इषच्। सर्षपे, क्षमे च। ङीप् नद्यां स्त्री०।

न०ब० विश्वशून्ये त्रि०। (आतश्च्) विश्वायां स्त्री० टाप्।
अविसोढ़ न० अवेर्ढ्यम् अवि+सोढ न षत्वम्। मेषा दुग्धे।
अविस्पष्ट न० विस्पष्टं स्तनमात्रेणार्थावबोधकं हुरेण अवणायोग्यञ्च वि+स्पष-क्त न० त०। अस्पष्टवाक्ये।
अवीचि पु० नास्ति वीचिः सुखमत्र। नरकभेदे अवीचिमयोऽयत्र।
अविजा स्त्री० ईषदर्थे नञ्ा ब०। अल्पबीजवत्यां द्राक्षायाम्। बीजशून्ये त्रि०। [प्रवर्त्तमाने निषेधको अनुमाने
अवीत न० वि+इण्-क्त न० त०। न्यायप्रसिद्धे व्यतिरेकसुखेन
अवीर त्रि०वीरः पुत्रादि र्नास्ति यस्य। पुत्रादिशून्ये। न०त०। वीर्य्यवर्जिते। पतिपुत्ररहितायां स्त्री०। "अजातपुत्रा विधवा साऽवीरा परिकीर्त्तितेति" स्मृतेः। [धाने च युच्। अवेक्षायाञ्च स्त्री।
अवेक्षण न० अव+ईक्ष-भावे ल्युट्। दर्शने, प्रतिजागरणे, अव-
अव्यक्त पु० वि+अन्ज-क्त न०त०। विष्णौ, कामे शिवे, सांख्यमते सर्वकारणे, प्रधाने, रूपाद्यहीनतया चक्षुराद्यगोचरत्वात्तस्य, तच्छास्त्रम् वेदान्तमते सूक्ष्मशरीरे रूपरहितायां, शब्दप्रवृत्तिनिमित्तैर्जातिगुणादिभिर्वर्জ্জिते निराकारे ब्रह्मणि च न०। असदे-वस्तुमात्रे त्रि०। [अरुणवर्णे।
अव्यक्तराग पु० न व्यक्तोऽल्पव्यक्तोरागोऽरुणिमा यस्य। ईषद्रक्ते
अव्यङ्गा स्त्री०अवेरङ्गं यस्याङ्गमस्याः। शूकशिम्बाम्। न विकलमङ्गमस्य ब०। विकलाङ्गभिन्ने पूर्णाङ्गे त्रि०।
अव्यञ्जन पु० नास्ति व्यञ्जनं शुभलक्षणं मूकं यस्य। मूकहीनमशौ सुलक्षणशून्ये, चिह्नशून्ये च त्रि०।
अव्यण्डा स्त्री०न विगतमण्डं बीजमस्याः। शूकशिम्बाम्।
अव्यथ पु० न व्यथते पङ्गां न स्खलति व्यथभयचलनयोः अच्। सर्पे। व्यथाशून्ये त्रि०। नास्ति व्यथा यस्याम् ७त०। हरितक्यां गुडूच्याञ्च स्त्री०। [व्यथाशून्ये त्रि०।
अव्यथिन् पु० बहुचलनेऽपि न व्यथते व्यथ-इनि। अश्वे।
अव्यभिचारिन् त्रि० वि-अभि+चर-णिनि न० त०। कोनापि

प्रतिकूलहेतुना निश्चयितसाध्ये । व्याहन्यते व्यभिचारो व्याप्ते-रभावस्तच्छून्ये हेतौ पु० ।

अव्यय पु० न० वि+इण्—अच् न०त० । सर्व्वासु विभक्तिषु सर्व्ववचनेषु च एकरूपे शब्दवृत्तिधर्म्मविशेषे यथा स्वरादयोऽव्ययाः सर्व्वत्रैक-रूपाः । शिवे, विष्णौ च पु० । आद्यन्तरहिते विकारशून्ये त्रि० । परब्रह्मणि पु० । "सदृशं त्रिषु लिङ्गेषु सर्व्वासु च विभक्तिषु । वचनेषु च सर्व्वेषु यन्न व्येति तदव्ययमिति" उभयमरा श्रुतिः ।

अव्ययीभावः पु० अनव्ययमव्ययं भवत्यनेन अव्यय+च्वि—भू-करणे घञ् । व्याकरणसिद्धे समासविशेषे । तत्र हि उपकुम्भमित्यादौ अनव्ययस्यापि कुम्भादिपदस्याव्ययत्वम् ।

अव्यवस्था स्त्री० वि+अव—स्था—अङ् न० त० । इदं कर्त्तव्यमिदं नेति नियमाभावे, शास्त्रादिविरुद्धायां व्यवस्थायाम्, अविधौ च ।

अव्यवहार्य्य त्रि० वि+अव+हृ+ण्यत् न०त० । भयनाशनभोजनादौ एकत्रावस्थानायोग्ये पतितादौ । [चात्संबन्धे ।

अव्यवहित त्रि० वि+अव+धा—कर्म्मणि क्त न०त० । व्यवधानरहिते सा-

अव्याकृत त्रि० वि+आ+कृ—कर्म्मणि क्त न०त० । वेदान्तमते अप्रकटी-कृते बीजरूपे जगत्कारणोत्पन्ने । सांख्यादिमते तथाभूते प्रधाने च ।

अव्याप्यवृत्ति त्रि० व्याप्य स्वाधिकरणं देशादिकं साकल्येन संबध्य न वृत्तिः स्थितिर्यस्य । स्वाधिकरणे देशादौ प्रदेशविशेषस्थिते वस्तुनि । यथा घटोभूतलादौ एकदेशे एव तिष्ठति इत्यतोऽव्याप्य-वृत्तिः । व्याप्यवृत्तिस्तु जातयादिः घटादौ साकल्येन सम्बध्य स्थित इति न्यायमते प्रसिद्धम् ।

अव्युत्पन्न त्रि० वि+उत्+पद—क्त न०त० । समुदायशब्दस्यावयवशोऽर्थ-बोधकतायाञ्चः व्युत्पत्तिस्तच्छून्ये अवयवार्थशून्ये शब्दे, शब्दार्थान-भिज्ञे मूर्खादौ च । [आङ् आनये ।

अश व्याप्तौ—व्याप्तौ च स्वादि० आत्म० सक० वेट् । अशते आशिष्ट

अश भोजने क्रयादि० पर० सक० सेट् । अश्नाति आशीत् । आश ।

अशकुनी स्त्री० अश्नुते व्याप्नोति अश—अच् अशा खुभ्नाति जलमा-

दयोति क्षुभ्न-ड । क्षुभो० वनीय० किच्चात् कीप् वर्ण० । अङ्गने कायेन अवव्याप्ते अङ्गोपरिजाते (माला) इति ख्याते रत्नभेदे ।

अग्रन पु० अश्नुते व्याप्नोति अश-क्नु । पीतवाससि ह्रस्वस्याभावः-व्यञ्जनमात्रे । भावे ल्युट् । आप्तौ, भोजने च न० । कर्मणि ल्युट् । अन्ने न० ।

अग्रनपर्णी स्त्री० अग्रनस्य पीतवाससः पर्णमिव पर्णमस्याः । (आराटी) इति ख्याते रत्नभेदे तस्य पीतवाससस्तत्पर्णीत्वात् ।

अग्रनाया स्त्री० अग्रिलोभेनाग्रणिष्यति अग्रन+क्यच् क्विप् आप् । बुभुक्षायाम् । [बुभुक्षायाम् न० ।

अग्रनायित त्रि० अग्रन+क्यच्-कर्त्तरि-क्त । बुभुक्षिते । भावे क्त ।

अग्रनि पु० स्त्री० अश्नुते संहनि अश-अनि । मेघोत्पन्ने ज्योतिषि वज्रे, प्रस्तरवर्षिणि उपलाविशेषे, विद्युति च ।

अग्रब्द त्रि० नास्ति ग्रब्दो, वेदादौ वाचकग्रब्दो वा यस्य । ग्रब्दहीने, वेदे वाचकग्रब्दवर्जिते च "प्रधाने अग्रब्दमस्पर्शरूपरसगन्धवयमिति"-स्मृतिः "दूरमेतेनाग्रब्दमिति" शारीरकसूत्रञ्च ।

अग्रशरीर त्रि० नास्ति ग्रशरीरं तदभिमानो वा यस्य । "प्रत्यक्षागमविरुद्धस्य मिथ्याज्ञानस्य बलेतरत्वे । नेतिनेतिस्वरूपत्वादग्रशरीरो भवत्ययम्" इत्यग्रब्दग्रस्पर्शे रूपरसगन्धवर्जिते ह्यैकभूते परमात्मनि, ग्रशरीराभिमानशून्ये जीवन्मुक्ते च "अग्रशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतरति"श्रुतिः । [वेदादिविरुद्धे नास्तिकागमादौ ।

अग्रास्त्र न० ग्रास-करणे ष्ट्रन् ग्रास्त्रं वेदादिविरोधे न० त० ।

अग्रित त्रि० अग्र-कर्मणि क्त । भक्षिते । कर्त्तरि क्त । तृप्ते ।

अग्रितक्षत्रोज त्रि० अग्रितात्क्षत्राणोज । पूर्वगोत्ररणशूले ।

अग्रितग्रव त्रि० अग्रितक्षत्रो ग्रवत्यनेन ग्र सुप् च । हस्तिसाधने अङ्कादौ । [चरौ ।

अग्रिच पु० अग्र-संज्ञतौ क्त । चौरे । भोजनार्थात् कर्मणि क्त ।

अग्रिर पु० अग्र-भोजनेऽरच् । बके, राक्षसे, सर्पे, वायौ च । यज्ञे न० ।

अग्निशर्मा स्त्री० नास्ति निर्मलं शर्म यस्याः ङीप्। निर्मलशर्मायां स्त्रियाम्। आर्यायै मुखे अग्निशर्माख्यम्।

अग्नीति स्त्री० दक्षाध्वरध्वंसं हवतिः हवयवहनुधिया हवतिः क्तिन् अग्नीतन्त्रदेवः। अग्नुधिते हवये ६तत्पु०। तत्पुरुषे च।

अग्नुभ न० नास्ति शुभं यस्मात् ५त० । यागे "अग्नुभस्यानुपपत्तिरशुभं नाशयेति" इति स्मृतिः न०त०। अशुभे। स्मृतिः स्त्री०।

अग्नेय त्रि० नास्ति मेघो यस्य। मेघरहिते वस्तुनि। स्त्रियां-मेघमाले न०। नञ् त०। मेघनाशे।

अग्नोज पु० नास्ति ओजो यस्मात् ५त०। बलमत्स्याते अग्नोजस्के, बलहीने च। मादके न०। कटुजातके स्त्री०। ईत०। ओजशून्ये त्रि०।

अग्नोकरोहिणी स्त्री० अग्नोक इव रोहति रुह-णिनि। (कट्कीति) ख्यातायां कटुजायाम्।

अग्नोच्य त्रि० शुच-ण्यत् नि यस्मात् न० त०। ओचिद्रव्यभिन्ने।

अग्नीध्र न० शुचेर्भावः शौचं न० त०। स्मृतिप्रसिद्धे, विहितकर्मानधिकारित्वसम्पादके अधर्मे, शुचित्वाभावे च। स्वार्थे अण्। आग्नीध्रमस्यास्ति "आग्नीध्राद्विप्रसुच्येत" इति स्मृतिः।

अग्नुजन्मा स्त्री० अग्नुते अग्न-मनु जन्म०। जातवेदसाम्।

अग्नुष्टुभ् पु० अग्नुभानि प्रकार एव भाव्यादिकं कुटुम्बति कुटु अच् उप० स०। यागप्रकरणे, तत्रोटुजवादिमन्त्रत्वेन तत्तु जातैर्निर्मुलीकरणे प्रकारे एव विहितम्।

अग्नुशर्भ पु० अग्नुभ इतो गर्भोऽस्य। पद्मा इति ख्याते मरकतभेदे। [ओषिरत्नम्।

अग्नुशासन न० अग्नुशास्यतेऽनेन-ल्युट ५त०। मरकतभेदे अग्नुशास्त्र न० अग्नुशासनं कृत्वि निर्वर्त्तते कृत्र-ड। यागाङ्गभेदे दर्शे।

अग्नुज पु० अग्नुभो जायते जन-ड ५त०। प्रकरजाते शिखाजातुनि, लौहे च। अग्नुजन्मरत्नम्।

अग्नुशास्त्र न० अग्नुशासनं शास्त्रमिति ६-विग्र-ष्ट्रन्। यागाङ्गभेदे दर्शनाख्ये।

अञ्जनम् पु० अञ्जयते व्याप्नोति, अञ्ज्+ल्युट् वा अञ्जति व्यक्तं करोति अञ्ज्+ल्युट् वा अ० नि० । घृतादौ ।

अञ्जनत्व न० अञ्जनौषधीनां भावः अञ्ज०+त्व । अञ्जने औषधे, गुणत्वात् । अञ्जनानामः । अञ्जनौषधभावे ।

अञ्जनाक्ष पु० ब० अञ्जनमञ्जयति । शुक्लभागे दीर्घाकारचक्षुषि, तद्विशिष्टे च । (आउडेलि) ख्याते अल्पोटवृक्षे अञ्जनसदृशे कोविदारवृक्षे च पु० ।

अञ्जनपुष्प न० अञ्जनः पुष्पमिव । शिरीषवृक्षे, भेदेन अञ्जनपुष्पी ।

अञ्जनभाव न० अञ्जनेव आचरति चूर्णितं करोति । अञ्ज—णिच्—अच् ल्युटो० अञ्ज भावम् । द्रव्यचूर्णकारके (कामानदिस्) इति ख्याते सौवर्चलभेदे । [अञ्जनौषधभावे ।

अञ्जनभिद् पु० अञ्जानसन्निभं आचष्टे । नामख्यभेदके वृक्षे । क ।

अञ्जरी स्त्री० अञ्जानं दाति दा—क नीरा० ङीष् । मूलकशाकभेदे वल्लि मूलकारे प्रसरणशिव कठिनवर्णं दृश्यते ५ ।

अञ्जरीपत्र पु० अञ्जरी मूलकस्य पत्रमिव पत्रं—ट । वर्णवृक्षे ।

अञ्जरीपर पु० अञ्जरीं फलति फल्—ड । (देवदाल) देवताडे ।

अञ्जसार पु० ब० अञ्जनः सार इव । लौहे । त्रि० । अञ्जनसारवर्णविशिष्टे त्रि० । [अञ्जसे अञ्ज—असुन् । अञ्जसमञ्जस ।

अञ्जस(से) अ० अञ्जसे भावे अञ्जस् वा अञ्ज—असुन् । यथार्थे, रहसे च

अञ्जस्क पु० अञ्जं (सं) पिबति पा—क । राक्षसे ।

अञ्जस्त त्रि० अञ्ज—अञ्जे—क्त न०त० । सम्यक् सिद्धसिद्धपरिपूर्णे च । न० त० । अनञ्जिते त्रि० । [ङीष् ।

अञ्जि(ञ्जी) स्त्री० अञ्ज—अञ्जु वा०क्तिन् । अञ्जनादेरन्यत्राने अञ्जादिभेदे च वा

अञ्जु(ञ्जू) पु० अञ्जते व्याप्नोति गत्यर्थत्वात् । अञ्ज् (अच) कुन् । अञ्जुर्जने ।

अञ्जोल न० त्रियं आति अञ्जाति वा—क रस्य लत्वम् गौरादित्वात् ङीष् । अञ्जादिवत्वादिजातत्वात् प्राग्जातीयत्वात् ।

अञ्जोषा स्त्री० न त्रिमृति यज्ञोत्सवेन त्रिगुणा त्रि—क्त्वु पृ० ह०

शुक्लतारात्मकत्वेऽप्यस्याः योगशास्त्रकृतारान्तरालाभात् न परस्परभेदः अश्विन्यादिनक्षत्रतारावत्। क्षेत्रः अश्वकारविशेषः सम्बन्धो वा ष०त०। तद्वृद्धिते त्रि०।

अश्व पु० अश्नुते-क्वन्। घोटके। [खरादौ।

अश्वकर्णिका स्त्री० अश्वस्य मेढ्रमिव कन्दोमूलमस्याः। अश्वगन्धा-

अश्वकर्ण पु० अश्वस्य कर्णाकार पत्रमस्य। खनामख्याते शालवृक्षे। स्वार्थे क अश्वकर्णकोऽप्यत्र। [खचरे घोटकभेदे। खराश्वजोऽप्यत्र।

अश्वखरज पु० अश्वश्च करी च, अश्वी च खरश्च वा ताभ्यां जायते पुंवद्भावः।

अश्वखुर पु० अश्वस्य खुरमिव खुरं मूलमस्य। (ल्लीति) ख्याते गन्धद्रव्ये। अमरालिताबाम् स्त्री०।

अश्वगन्धा स्त्री० अश्वस्य गन्ध एकदेशोमेढ्रमिव मूलमस्याः। वराहकर्णसदृशपत्रे खनामख्याते क्षुद्रक्षुपभेदे। [नाशकत्वात्।

अश्वघ्न पु० अश्वं हन्ति हन-टक् उप०स०। करवीरवृक्षे तस्यास्य-

अश्वतर पु० तनुरत्नः अश्व+तनुत्वे टरच् अश्वावामन्नेगोत्पन्नत्वेऽश्वत्वं तस्य तनुत्वाच्चास्यविद्वत्वात्। गर्दभेनाश्वायास्तत्पन्ने, खचरेऽपि-भेदे, वर्णभेदे च। जातित्वेन स्त्रियां ङीप्।

अश्वत्थ पु० न श्वः स्थिरं स्थास्यतिष्ठतीति वा क पु०नि०। खनामख्याते वृक्षे, गर्हायाञ्च वृक्षे, चिरमस्थास्नित्वात् संसारूपे वृक्षे च "ऊर्द्धमूलमधःशाखमश्वत्थं प्राहुरव्ययम्" इति गीता।

अश्वपाल पु० अश्वान् पालयति पा+णिच्-अण् अश्व्। घोटकरक्षके। ष्वुन्। अश्वपालकोऽप्यत्र अश्वे न०।

अश्वपुच्छी स्त्री० अश्वस्य पुच्छमिव केशरोऽस्य। लाङ्गलपर्णीवृक्षे।

अश्वबाल पु० अश्वस्य बालः केशरइव तदाकारपुष्पत्वात्। (घोड़ा) इति ख्याते काशे। ह्रस्व०। अश्वस्य केशे।

अश्वमार पु० अश्वं मारयति मृ-णिच् अण्। करवीरे। ष्वुन्। अश्वमारकोऽप्यत्र। [मारकाश्वाङ्के किन्नरे। स्त्रियां ङीप्।

अश्वमुख पु० अश्वस्य मुखमिव मुखमस्य। अश्वाकारमुखे पुरु-

अश्वमेध पु० अश्वो मेध्यतेऽस्मिन्निति मेध-घञ्। यज्ञभेदे।

अश्वमेधीय पु० अश्वमेधाय हितः अश्वमेधाय वा यागाय । अश्वमेधार्हत्वे
अश्वयुज् स्त्री० अश्वेन इवसदृशाकारेण युज्यते । अश्विनीनक्षत्रे
तस्या अश्वसदृशरूपत्वात् । युज—क्विप् अश्वयुजपि अश्वेन अश्वा-
कारेण युज्यते यत्र चान्द्राश्विनमासि पौर्णमास्याम् । तस्मिन्
चान्द्रमासे च "अश्वयुज् अश्वयुजे तु आदिं कुर्यात्" इति स्मृतिः ।
मत्वर्थीयेऽपि । अश्वयुजोऽस्मिन् ।
अश्वरोधक पु० अश्वं रुणद्धि रुध—ण्वुल् । करवीरे वृक्षे ।
अश्ववल्गा पु० अश्वस्य वल्गनमिव वल्गनमस्य । अश्वसदृशाकारमुखवति पुरु-
षाकाराख्यजन्तुके किन्नरे ।
अश्ववार(ह) पु० अश्वं वारयति चुरा० इ—अच् उप०स० । अश्वा-
रोहिणि । वह—घञ्—अण् । अश्ववाहोऽस्यास्ति ।
अश्वस्तन त्रि० न श्वोभवः श्वस्+ट्यु तुट् च । परदिनस्थायिनि
एकाहनिर्वर्त्तोपचितेऽन्नादौ "अश्वस्तनविधानेन कर्त्तव्यम्" इति मनुः ।
अश्वात्थ पु० अश्वस्थानीव अच् समा० । देवसद्मवृक्षे ।
अश्वाभिधानी स्त्री० अश्वोऽभिधीयतेऽभिधास्यतेऽनया अभिधा—ल्युट् ।
अश्वबन्धनरज्ज्वामभिधानीवाच्यवाचकं "इक्षामश्वाभिधानीं सुतस्येत्यश्वा-
भिधानीमादत्ते" इति श्रुतिः ।
अश्वारि पु० अश्वस्यारिः ६त० । महिषे ।
अश्वारोह पु० अश्वमारोहति रुह—अण् । अश्वयाहके, अश्वारोह-
क्षेत्र युद्धकर्त्तरि च । अश्वगन्धायां स्त्री० ।
अश्वावरोहक पु० अश्वस्याऽवरोहमिवावरोहति स्वुल् । अश्वगन्धावृक्षे ।
अश्विन् पु० द्वि० अश्वाः सन्ति अश्वोऽस्ति वा इनि । सूर्यवैद्ययोः ।
अश्विनी स्त्री० अश्वसदृशमाकारोऽस्यस्य ङीप् । सप्तविंशति-
नक्षत्रमध्ये प्रथमे नक्षत्रे ।
अश्विनीकुमार पु० द्वि० अश्वीभूता संज्ञायाञ्च सूर्यपत्नी तस्या-
मश्वरूपेण सूर्येण जातौ कुमारौ । सूर्यवैद्ययोः । [ङिप्] त्रि० ।
अश्वीय न० अश्वानां समूहोऽश्वेभ्योहितं वा छ । अश्वसमूहे अश्व-
अश्वीरस न० अश्वानामुदर इव सुखमस्य अच्समा० । घृतेऽश्वे ।

अष दीप्तौ अक० गतौ, भक्षणे च सक० भ्वादि० उभ० सेट्। अषति ते आषीत् आषिष्ट।

अषडक्षीण त्रि० न षडक्षीणि षडक्षीव्यि नेत्रेन्द्रियाणि यत्र स। हतो-जनकर्णास्रुते द्वाभ्यामेव क्षते मन्वादौ।

अषाढ़(ड़) पु० अषाद(शाड़) या युक्ता पौर्णमासी आषाढ़ी (शाढी) सा यत्र मासे अण् वा लुक्। वैशाखादितस्तृतीये चान्द्राषाढ़-मासे। आषाढी पूर्णिमा प्रयोजनमस्य प्रयोजनार्थं अण्। अक्ष-चारिधाय्य दण्डे, तस्य हि आषाढ़पौर्णमास्यां विहितकर्मोपयो-गित्वात् आषाढः आषा(ढी)ढोऽभयत्र।

अषाढ़ा(ड़ा) स्त्री० षाढिः साहनं सह-णिच्+क्तिन् टत्वम् अर्श आद्यच् न० त० पृषो० वा डत्वम्। अस्मिन्नक्षधिके पूर्वादिके त्रिंशे, उत्तरादिके एकत्रिंशे च नक्षत्रे। आषाढाभत्र।

अष्टक न० अष्टौ अध्यायाः परिमाणमस्य अष्टन्+कन्। पाणिनेरष्टा-ध्यायीग्रन्थे, प्रतेश्चतुर्थाध्यायात्मके ऋग्वेदांशे च।

अष्टका स्त्री० अश्नन्ति पितरोऽस्यां तिथौ अश-तकन्। "अष्टका तु सपाख्याता सप्तम्यादिदिनत्रयम्" इत्युक्तलक्षणे सप्तम्यादिदिनत्रये, पौषमाघफाल्गुनानां कृष्णाष्टम्यां, "अष्टका पितृदैवत्ये" इत्यजा-दिपाठात् न ङीत्वम्। तद्विहितश्राद्धे च।

अष्टन् त्रि० बहु० अश-व्याप्तौ कनिन् तुट् च। संख्याभेदे।

अष्टपदिका स्त्री० अष्टौ दिक्षु पादा अस्याः अन्त्यलोपः ङीपि षट्पदे संज्ञायां कन् ह्रस्वः। (छापरमाति) लतायाम्।

अष्टपाद् पु० अष्टौ पादा अस्य ब०व्री अन्त्यलोपः। मृगविशेषे, शरभे, लूतायाञ्च। अष्टपादोऽत्यत्र।

अष्टमङ्गल पु० अष्टसु स्थानेषु उरःखुरचतुष्टयपुच्छसृक्पृष्ठस्थकेशेषु श्वेतकृष्णाङ्गं मङ्गलमस्य। तादृशलक्षणयुक्ते अश्वे। अष्टानां मङ्गलद्रव्याणां समाहारः। "लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्म-णोगौर्हुताशनः। हिरण्यं सर्पिरादित्य आपो राजा तथाष्टम" इत्युक्तेषु अष्टसु द्रव्येषु।

अष्टमान न० अष्टौ सुवर्णः मानं परिमाणमस्य । कुडवरूपे अष्टसंख्यिते परिमाणभेदे ।

अष्टमी स्त्री० अष्टानां पूरणी । पक्षदशकलात्मकचन्द्रस्य अष्टमकलाक्रियारूपायां स्वनामख्यातायां तिथौ अष्टसंख्या पूरणार्थे । अष्ट+क्त अष्टं संघातं व्याप्तिं वा माति मा—अच् क गौरा० ङीष् । कोटालतायाम् ।

अष्टमूर्त्ति पु० अष्टौ भूम्यादयो मूर्त्तयोऽस्य । "क्षितिर्जलं तथा तेजो वायुराकाशमेव च । यष्टार्कश्च तथा चन्द्रः मूर्त्तयोऽष्टौ पिनाकिनः" इत्युक्ताष्टमूर्त्तिधारिणि शिवे ।

अष्टलौहक न० अष्टानां लौहानां धातूनां समाहारः । "सुवर्णं रजतं ताम्रं सीसकं कान्तिकं तथा । यङ्गं लौहं तीक्ष्णलौहमित्यष्टौ धातवः स्मृता" इत्युक्तेषु अष्टसु धातुषु ।

अष्टाकपाल पु० अष्टसु कपालेषु स्कन्दाय संस्कृतः पुरोडाशः । संस्कारार्थकस्य तद्धितस्य लुक् आत्वम् । अष्टसु कपालेषु संस्कार्य पुरोडाशे, तद्वाच्ये यज्ञे च ।

अष्टाङ्ग पु० अष्टावङ्गानि यस्य । योगविशेषे, यमनियमासन प्राणायामप्रत्याहारध्यानधारणासमाधिरूपे योगशास्त्रोक्ते यतेर्यं स्वरूपादि तत्तच्छब्दार्थे वक्ष्यते । "जानुभ्यान्तु तथा पद्भ्यां पाणिभ्यान्तुरसा धिया । शिरसा वचसा दृष्ट्या प्रणामोऽष्टाङ्गकेरितः" इत्युक्तलक्षणे प्रणामे "आपः क्षीरं कुशाग्रं च दधि सर्पिः स्वयम्भुवम् । यवः सिद्धार्थकश्चैव अष्टाङ्गोऽर्घः प्रकीर्त्तितः" इत्युक्तद्रव्यघटिते पूजोपकरणार्घे, शारीफलके च तस्य प्रत्येकमङ्गत्वे अष्टपदरूपाङ्गकत्वात् ।

अष्टादशन् त्रि० बहु० । अष्टाधिका दश, अष्टौ च दश चेति वा । संख्याविशेषयुक्ते । पूरणे डटि । तत्पूरणे त्रि० ।

अष्टादशाङ्ग पु० न० अष्टादश अङ्गानि यस्य । वैद्यकप्रसिद्धे आयुर्वेदे ।

अष्टापद पु० न० अष्टौ अष्टौ पदानि पद्भावोऽस्य इत्वे संख्या बहुत्वस्य वीप्सार्थत्वाङ्गीकारः आत्वम् अङ्गार्थादि । शारीफलके ।

अस्य धातुस्य पदं प्रतिज्ञा यस्य । सर्वे । शरभे, लूतायाञ्च पु०, तयोरष्टपदत्वात् । अष्टाभिः सिद्धिभिरप्यते आ+अद-अच् । अणिमाद्यष्टसिद्धियुक्ते कैवाशे । अष्टसंख्यातेन आपद्यते अप् आशे ।

अष्टि स्त्री० अश्नते भूनौ क्षिप्यते अश-क्तिन् पृषो० अत्वम् । (आटि) इति ख्याते बीजे, षोड़शाक्षरपादके छन्दोभेदे च ।

अष्ठीला स्त्री० अष्ठिवत्तुल्यकठिनाङ्गमं रा-क रस्य लः दीर्घः । "आत्मापत्यं वस्तिमुखं कृत्वा वातसमोक्षताम् । कुर्य्यात्तीव्रा-र्त्तिमष्ठीलां मूत्रविण्मार्गरोधिनीमिति" वैद्यकोक्तलक्षणयुक्ते वात-जन्ये व्याधिभेदे ।

अष्ठीवत् पु० नास्ति अतिशयितमस्थि यस्मिन् अस्थन् पृषो० निः । (आंटु) इति ख्याते जानूर्ध्वोः सन्धिस्थाने ।

अस दीप्तौ अक० भक्षणे गतौ च सक० भ्वादि० उभ० सेट् । असते ते आसीत् आसिष्ट । "नावस्य उत्पाद्य दुद्राव" इति कुमारः ।

अस विद्यमानतायाम् अदा० अक० पर० सेट् । अस्ति अभूत् ।

अस क्षेपे दिवा० पर० सक० सेट् । अस्यति आस्यत् ।

असंस्कृत त्रि० असम्+कृ-क्त सुट् न० त० । गर्भाधानादिसंस्कार-रहिते, व्याकरणसंस्कारशून्ये अपशब्दे च ।

असकृत् अव्य० न सकृत् न० त० । पौनःपुन्ये ।

असक्त त्रि० सस्ज-क्त न० त० । आसक्तिशून्ये फलाभिलाषशून्ये च "असक्तः सुखमन्वभूत्" इति रघुः । "कुर्य्यात् विद्वांस्तथाऽसक्तः" इति गीता ।

असङ्कुच त्रि० न सङ्कुचः । परस्परावियुक्ते । यामादिपथे विस्तीर्णे पथि च पु० ।

असङ्क्रान्तमास पु० न सङ्क्रान्तः राश्यन्तरं प्राप्तोरवि र्यत्र चान्द्रमासे । शुक्लप्रतिपदादिदर्शान्ते संक्रमणशून्ये मासभेदे ।

असङ्ख्य त्रि० नास्ति संख्या इयत्ता यस्य । परार्द्धातीते, बहुसंख्यके च ।

असङ्ग पु० सस्ज-घञ् न० त० । सङ्गरहिते परमात्मनि, कृष्णे च ।

न० त०। सङ्गविरोधिनि, पुत्रवित्तस्त्रीभोज्यवस्त्वागन्तुके वैराग्ये। न० ब०। विषयरागाभाववति त्रि०।

असङ्गत त्रि० सम्+गम—क्त न० त०। सङ्गतिरौचित्यं तच्छून्ये, अनन्तराभिधानोत्थापकाकाङ्क्षाविषयभिन्ने च। "नासङ्गतं प्रयुञ्जीत" इत्यभियुक्तोक्तिः।

असङ्गति स्त्री० सम्+गम—क्तिन् न०त०। सङ्गतिविरहे। "अर्थालङ्कारभेदे सा० द० परि०।

असत् त्रि० अस+शतृ न० त०। सद्भिन्ने, निरुपाख्ये निःस्वरूपे निषेधरूपेण प्रतीयमाने, अभावत्वाद्यये, "अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्। असदित्युच्यते पार्थ" इति गीतोक्ते अश्रद्धया कृते होमादौ च। इन्द्रे पु०। दुष्टाचारिणि असाधौ त्रि०। स्त्रियां ङीप्। कुलटायाम्।

असद्ग्रह पु० असति अविद्यमाने वस्तुनि ग्रहः आग्रहः। बालादीनाम् (आवदार) इति ख्याते आग्रहभेदे।

असनपर्णी स्त्री० असनस्य पर्णमिव पर्णमस्याः गौ०ङीष्। शातकट्यां

असभ्य त्रि० सभायामर्हति यत् न० त०। सभायामनुपयुक्ते। स्त्रीवर्णनादौ, खले च। [ज्येष्ठपुत्रे पु०।

असमञ्जस न० समञ्जसं युक्तियुतं न० त०। असङ्गते। सगरराजस्य

असमय पु० अपशब्दार्थे न० त०। दुष्टकाले अयोग्यकाले च।

असमर्थ त्रि० समर्थः शक्तः न० त०। अशक्ते, दुर्बले च। समर्थः सङ्गतार्थः न०त०। असङ्गतार्थे, व्याकरणशास्त्रे प्रसिद्धायां यत्र यस्यान्वययोग्यता तत्सहचराभावेनापेक्षायाम् अतएव आद्यभोजनादौ असमर्थसमासः नञ्पदस्य आद्येन सहान्वययोग्यत्वात् भोजनेन च सहचाराभावेन अपेक्षणीयत्वात्।

असमवायिकारणम् न० समवैति सम+अव+इण—घिनि न० त० कर्म०। न्यायमते समवायिकारणं द्रव्यं तद्भिन्नं द्रव्यमिति यत् गुणादिकं कारणं तन्निरूपणं। यथा कपालद्वयसंयोगरूपो गुणो घटस्य, द्रव्याश्रिता क्रिया संयोगविभागादेः।

असमीक्ष्यकारिन् त्रि० समीक्ष्य विविच्य न करोतीति क+णिनि। विवेचनाभावकर्त्रि कर्मकारके, मूर्खे च।

असम्बद्ध न० सम्बद्धं परस्परमन्वितं न भवति सम्+बन्ध—क्त न०त०। अर्थानन्वयबोधके ऽन्वितार्थके वाक्ये।

असम्बद्धप्रलाप पु० कर्म्म०। असम्बद्धस्य असङ्गतस्य कथने, असङ्गतस्य अप्रस्तुतस्य निष्प्रयोजने कथने च।

असम्बाध त्रि० नास्ति सम्बाधा अन्योन्यं पीड़ा यत्र। परस्परसंघर्षरूपपीड़ारहिते विरले, बाधारहिते च। "असंबाधा देवनदी" इति भारतम्।

असम्मत त्रि० सम्+मन—क्त नास्ति सम्मतो यस्मात् पू ब०। प्रणयिजने। न० त०। अनभिमते "असम्मतः कस्य सुक्तिमार्गम्" इति कुमारः। [मानरहिते च।

असम्मुग्ध त्रि० सम्+मुह—क्त न० त०। अक्षतसन्देहे परिछतामि-

असक् पु० सरति सृ—उन् न० त०। (कुकुरसोङ्गा) वृक्षे।

असहन पु० न सहति सह—ल्यु न० त०। शत्रौ। क्षमाशून्ये त्रि०।

असाधारण त्रि० न० त०। साधारणं सामान्यधर्मयुक्तं तद्भिन्ने, तन्मात्रवृत्तिधर्मयुक्ते, विशेषे, अधिके च। न्यायमते "अस्तूभयाद्यावृत्तः स असाधारणो मत" इत्युक्ते सपक्षविपक्षाद्यावृत्तौ दुष्टे हेतौ पु०। यथा वह्निसाधने गगनादिर्हेतुः स च पक्षे पर्वतादौ, पक्षभिन्ने जलादौ च न विद्यते गगनादेः कुत्रापि विद्यमानत्वाभावात्। [अपभ्रंशादौ च।

असाधु त्रि० न० त०। साधुभिन्ने, असङ्गतिते, संस्कृतशब्दभिन्न,

असाध्य त्रि० विध—यिच्—साधादेशः यत् न० त०। "अर्द्धं साध्यमधोयाध्यमसाध्यं युगपद्धतम्" इत्युक्ते प्रतिकारानर्हे रोगभेदे, असाधनीये, दुर्ज्ञेये, शत्रौ च।

असाम्प्रतम् अव्य० न साम्प्रतम् युक्तं न० त०। अयुक्ते।

असार पु० नास्ति सारो यस्य। सारहीने एरण्डवृक्षे। न०त०। सारभिन्ने। न०ब०। निःसारे त्रि०। "असारः खलु संसार"

कृतान्नटः। [प्रतिरूपकम् अव्य०।

असि पु० अस–दीप्तौ क्षेपणे वा इन्। खड्गे। तन्निमित्तं विभक्ति-

असिक्नी स्त्री० क्नो–क्त सिता क्नीयादौ शुभ्रा असती तद्विज्ञा अदृढा क्नादेशः ङीप् च। अन्तःपुरचारिरक्षामहत्तायां प्रेष्यायाम्, नदी-भेदे च। [यत्र। गण्डोपधाने।

असिगण्ड पु० अस्यते क्षिप्यते अस–इन् असिः क्षिप्तो गण्डो

असित पु० सितः शुभ्रः विरोधे न० त०। शुभ्रवर्णभिन्ने तद्विशिष्टे कृष्णवर्णे। तद्वति त्रि०। कृष्णपक्षे पु०। नीलोपधौ, अन्तः-पुरचारिरक्षायामदृढायां प्रेष्यायाञ्च स्त्री० टाप्।

असितकार्ष्णिस् पु० असितयति क्षिप्–ण्वुल् वा अर्चिः शिखा यस्य। वह्नौ तच्छिखासम्बन्धेन हि सर्वेषामसितत्वम्।

असितफल पु० असितं कृष्णं फलं यस्य। मधुनारिकेले। [कन्

असिदंष्ट्र पु० असिरिव तीक्ष्णा दंष्ट्रा यस्य। मकरास्ये यादसि। [राज

असिद्ध त्रि० सिद्धोनिष्पन्नः प्रकृत्य न० त०। अपक्के, अनिष्पन्ने च न्यायमते आश्रयासिद्धत्वादिभिस्त्रिभिर्दोषैर्दुष्टे हेतौ पु०।

असिद्धि स्त्री० सिध–क्तिन् न०त०। अनिष्पत्तौ, अपाके, न्यायमते आश्रयासिद्धिप्रभृतित्रिविधहेत्वदोषे च।

असिधाव पु० असिं खड्गं धावयति मार्ज्जयति धाव–अण्। ग्र-स्त्राणां मार्ज्जनकरे। ण्वुल्। असिधावकोऽप्यत्र।

असिधेनुका स्त्री० असिर्धेनुरिव यस्याः वा कप्। असेर्धेनुतुल्य-त्वेन तद्वत्सुखतुल्यायाम् छुरिकायाम्।

असिपत्र (क) पु० असिरिव तीक्ष्णं पत्रमस्य वा कप्। द्रुद्रुमे, शुण्डनामकतृणे च। असिरिव पत्राकारो यस्य। नरकभेदे। असेः पत्रमिवाच्छादकम्। खड्गकोषे न०।

असिपत्रवन न० असिरिव पत्रमस्य तादृशं वनम्। नरकभेदे "अ-स्मिन्हि वै निजवेदपथादनापदि अपगतः पाखण्डशीपगतसम-सिपत्रवनं प्रवेक्ष्यतीति" भागवतम्। [अन्तुभेदे।

असिपुच्छ पु० असिरिव धारायुक्तः पुच्छोऽस्य। शिशुमारे जल-

असिपुत्रिका स्त्री० असेः पुत्रीव स्वार्थे कन् ह्रस्वे अत इत्वम्। क्षुरिकायाम्। कनभावे। असिपुत्रीत्यपि।

असिमेट पु० असिरिव तीक्ष्णः मेदो निर्यासो यस्य। विट्खदिरे।

असिहेति पु० असिर्हेतिः साधनमस्य। खड्गेन युद्धकर्त्तरि।

असु पु० अस्यते क्षिप्यते अस–उन्। चित्ते। कर्त्तरि उन्। तापे। करणे उन्। पञ्चवृत्तिषु वायुभेदेषु पु० बहु०। [त्रि०।

असुख न० विरोधे न० त०। सुखविरोधिनि दुःखे। न०व०। तद्वति

असुधारण न० असूनां प्राणादिपञ्चवायुवृत्तीनां धारणम्। जीवने।

असुर पु० अस–ईप्रौ उर। सूर्य्ये। अस्यति क्षिपति देवान् उर। सुरविरोधिनि दैत्ये। रात्रौ स्त्री०।

असुररिपु पु० असुराणां रिपुः। दानवशत्रौ विष्णौ।

असुरसा स्त्री० न सुष्ठु रसो यस्याः ५ब०। (वायुवृत्तुलसी) वर्बरी-वृक्षे तस्या अतिसुरसत्वात्।

असूयक त्रि०(असू)असूज् कण्ड्वादि० यकि-ण्वुल्। गुणेषु दोषा-रोपणशीले। [रोपणे।

असूया स्त्री०(असू)असूर्ज्–कण्ड्वादि० यकि ण्वुल्। गुणेषु दोषा–

असूर्य्य (च)ण न० सूर्य–ण्यट् रे परे दीर्घः नास्ति सूर्य्यगमनादरो यस्मात् न० ५ब०। पाठान्तरे असूनासुरणं तापोयस्मात् अना-दरे। [अत्यन्तगुप्ते सूर्य्यादर्शिनि राजदारादौ।

असूर्य्यम्पश्य त्रि०सूर्य्यमपि न पश्यति दृश–खश् मुम् च। अस०समा०।

असृक्कर पु० असृजं शोणितं करोति कृ–ट। शरीरस्थे रसधातौ, अन्नादेरयितस्य प्रथमं रसरूपता, रसस्य रक्तरूपतेति वैद्यके प्रसिद्धम्।

असृग्धरा स्त्री० असृजं धरति धृ–अच्। शोणितधारिण्यां त्वचि।

असृज् न० न सृज्यते इतररागवत् संसृज्यते सहजत्वात् न+सृज् क्विन्, अस्यते क्षिप्यते इतस्ततो नाड़ीभिः अस् सृजि वा। रक्ते, कुङ्कुमे, विष्णुग्रावधिके शोड़षे योगे।

असेचनक त्रि० न सिच्यते तृप्यते मनोऽत्र सिच–ल्युट् संज्ञायां कन्। अत्यन्तप्रियदर्शने [illegible] न तृप्यति।

अस्त पु० अस्यन्ते क्षिप्यन्ते किरणा यत्र आधारे क्त । पश्चिमाचले, कर्मणि क्त । क्षिप्ते अदर्शिते च त्रि० । मृत्यौ ज्योतिषोक्ते लग्नात् सप्तमे स्थाने च न० । भावे क्त । अदर्शने क्षेपे च न० ।

अस्तक पु० अस्तं अपुनरावृत्तिम् अदर्शनं वा करोति अस्त+णिच् ण्वुल् । निर्व्वाणमोक्षे ।

अस्तम् अव्य० अस-तमि । नाशे, अदर्शने च ।

अस्तमन न० अस-वा-भावेल्युट् अस्तस्य अस्तस्य अनः गतिः । सूर्य्यादेरदर्शनसाधने भूगोलकलया तिरोधाने, "तिरोधानञ्च यत्रैति तद्देवास्तमनं रवेः । नैवास्तमनमर्कस्य नोदयः सर्व्वदासतः इति ज्योतिषोक्तेः तत्काले च ।

अस्तमय पु० अस्तोभीयते प्राप्यते यत्र मिन्-अच् वा न आत् । प्रलयादौ, सूर्य्यस्यातिप्रत्यासत्त्या प्रकाशाभावेनान्धकाराधानसत्यं वियोगे चोदयः "रविणास्तमयोयोगो वियोगस्तूदयो भवेदिति ज्योतिषोक्तेः अन्धकाराणां रवियोगे च । [चले अस्तगिरौ ।

अस्ताचल पु० अस्यन्ते किरणा यत्र आधारे क्त कर्म० । पश्चिमा-

अस्ति अव्य० अस्-शतिप् । स्थितौ, विद्यमानतायाञ्च "अस्ति नास्ति जानातीत्या"दि ।

अस्तु अव्य० अस् तुन् । अनुज्ञायां, पीड़ायाम् प्रतिक्षेपे अस्वीकारे, प्रार्थनायाम्, प्रशंसायाम्, लक्षणे, अस्वीकारपूर्व्वकास्वीकारे च । [संस्कृतसद्भिक्षे त्रि० ।

अस्थान न० स्थे क न० त० । निन्दायाम्, भर्त्सने च । स्थानः

अस्त्र न० अस्यते क्षिप्यते अस-ष्ट्रन् । क्षेप्यास्त्रे शरादौ । करणे ष्ट्रन् । वाणे, रिपुक्षेपणसाधने प्रहरणमात्रे खड्गादावपि ।

अस्त्रकण्टक पु० अस्त्रं कण्टकइव । बाणे तस्याग्रस्थ कण्टकाकारत्वात् । [कित्-ण्वुल् ह्रस्व० । अस्त्रव्रणरोगचिकित्सके ।

अस्त्रचिकित्सक पु० अस्त्रस्य अस्त्रजन्यव्रणस्य चिकित्सकः

अस्त्रिन् त्रि० अस्त्रं धनुरस्यास्ति इनि । धनुर्द्धरे, अस्त्रधारिमात्रे च ।

अस्थान न० अप्राशस्त्ये न० त० अप्रशस्तस्थाने अयोग्यस्थाने ।

अस्थि न० अस्यते अस+क्थिन् । मांसाभ्यन्तरस्थे (हाड़) इति ख्याते धातुभेदे ।

अस्थिकृत् पु० अस्थि—कृ—क्विप् त० । अस्थिकारके मेदसि धातौ ।

अस्थिज पु० अस्थ्नो जायते जन—ड । अस्थिपरिपाकाज्जाते तदन्तःस्थे मज्जधातौ । [शिवे ।

अस्थिधन्वन् पु० अस्थि अस्थिमयं धनुरस्य व० अनङ् समा० ।

अस्थिपञ्जर पु० अस्थि पञ्जर इव । शरीरस्थास्थिसङ्घये पिञ्जराकारे कङ्काले । [ककुरे च ।

अस्थिभक्ष पु० अस्थि भक्षयति भक्ष—अण् । (हाड़गिला) पक्षिणि,

अस्थिमालिन् पु० अस्थिमयी मालाऽस्यास्ति इनि । शिवे ।

अस्थिर त्रि० न० त० । स्थिरभिन्ने चञ्चले ।

अस्थिविग्रह पु० अत्यन्तकृशत्वात् अस्थिसारो विग्रहो देहोऽस्य । शिवानुचरे भृङ्गरीटे । [ग्रन्थिमति वृक्षे ।

अस्थिशृङ्खला स्त्री० अस्थ्नां शृङ्खलेव योजनहेतुः । (हाड़जोड़ा)

अस्थिसंहार पु० अस्थीनि संहरति योजयति सम्+हृ—अण् । (हाड़जोड़ा) ग्रन्थिमति वृक्षे ।

अस्थिसार पु० अस्थ्नः सारः रसपरिणामः । अस्थिजाते मज्जधातौ । अस्थेरिव सारो यस्य । रक्तमांसशून्ये त्रि० ।

अस्नाविर त्रि० नास्ति स्नावा शिरा यस्य इरच् । शिरारहिते, स्थूलशरीरशून्ये च ।

अस्निग्धदारु न० अस्निग्धं रूक्षं दारु कर्म्म० । देवदारुवृक्षे ।

अस्मद् त्रि० अस—अदिक् । अहंप्रत्ययावलम्बनत्वेन वेद्ये प्रत्यगात्मनि, देहाभिमानिनि जीवे च ।

अस्मि अव्य० अस्—मिन् । अहमर्थे, "त्वमस्मि वच्मि विदुषां" इति साहित्यदर्पणे । [पुरुषयोरभेदाभिमाने मोहे ।

अस्मिता स्त्री० अस्मि इत्यस्य भावः तल् । सांख्यसिद्धे प्रधान-

अस्रखदिर पु० अस्रवर्णः रक्तवर्णः खदिरः । विट्खदिरे ।

असृज न० असात् रुधिरात् रसपाकेन जायते । मांसे ।

असृपचक पु० असृमिव रक्तं पचनमस्य संज्ञायाम् कन् । रक्तपाके पिण्डालुवृक्षे । [पा—क । राक्षसे पु० ।

असृपा पु० असृं पिबति पा—क्विप् क या । (जोंक) जलौकसि ।

असृफला(ली) स्त्री० असृमिव लोहितं फलमस्याः । सप्तकीवृक्षे ।

असृविन्दुच्छदा स्त्री० असृविन्दुः रुधिरविन्दुरिव छदो दलं यस्याः । लवणानामके वृक्षे ।

असृमातृका स्त्री० असृस्य रुधिरस्य मातेव पोषिका संज्ञायां कन् । अग्नितापादेः रसरूपे देहस्थे प्रथमे धातौ ।

असृरोधिनी स्त्री० असृं क्षतजमागु रुणद्धि रुध—णिनि । लज्जालुलतायाम् । [तुलसीवृक्षे ।

असृार्जक पु० असृं रुधिरं सेवनेनार्जयति अर्ज—एवुल् । श्वेत-

असृच्छन्द त्रि० नास्ति असृस्य छन्द आयत्तता यस्य । पराधीने ।

असृतन्त्र त्रि० न असृस्य तन्त्रः अधीनः । पराधीने ।

असृन्त न० असृनाम् अन्तो यस्मात् ५ब० । क्षुद्रां तदन्तिनापाद्धि प्राणक्षयः । अशुभे च । हैत० । भैरवे पु० ।

असृप्र पु० नास्ति असृग्निद्रा यस्य । देवे । निद्ररहिते त्रि० ।

असृर्ग्य त्रि० स्वर्गाय हितं स्वर्ग+यत् न०त० । स्वर्गहेतुधर्मविरोधिनि निषिद्धाचरणादौ । [दुष्टे अतिकषाये ।

असृादुकण्टक पु० असृाद्वः मधुरः कण्टको यस्य । (गोखुरो) गोक्षुर-

असृाध्याय त्रि० न स्वाध्यायो वेदाध्ययनमस्य । वेदाध्ययनहीने "असृाध्यायं वषट्कारं" इति स्मृतिः । न स्वाध्यायो यस्मिन् । अध्ययननिषिद्धकाले अष्टम्यादौ । अधीयते अधि+इङ्—घञ् अध्यायः स्वस्य स्वस्मिन्नुद्धारेण अध्यायः स्वाध्यायः "स्वाध्यायोऽध्येतव्य" इति स्मृतिः न० त० । स्वाध्यायभिन्ने ।

असृामिक त्रि० न स्वामी यस्य । स्वामिरहिते "अटव्यः पर्वताः पुण्या नद्यस्तीर्थानि यानि च । सर्व्वाण्यस्वामिकान्याहुर्न हि तेषु परिग्रहः" इति स्मृतिः ।

अस्वैरिन् पु० स्वैरी स्वाधीनः न० त० । परतन्त्रे ।
अह गतौ आत्म० स्वा० सक० इदित् सेट् । अंहते आंहिष्ट । [त ।
अह दीप्तौ चुरा० इदित् उभ० अक० सेट् । अंहयति ते आंहिहत्
अह अव्य० अहि—क्त् । प्रशंसायां, क्षेपे, क्रियोगे, नियहे, आचारातिशये, अवज्ञाने च ।
अहंयु त्रि०* अहमहङ्कारोऽस्यास्य अहम्+यु अनादेशः । गर्वयुक्ते ।
अहङ्कार पु० अहमिति क्रियते अनेन क—अपादाने घञ् । गर्वे "अहङ्कारस्य सर्वेषां पापबीजमनङ्गलम् ब्रह्महत्यादिषु च सर्वेषां गर्वः पर्य्यन्तमुच्यते" इति पुराणात् गर्वशब्दोऽत्यन्तम् ।
अहङ्कृत त्रि० अहमिति कृतं येन । सगर्वे ।
अहत न० हन—क्त न० त० । दिव्यौतं नवं श्वेतं सदृशं वस्त्र धारितम् । अहतं तद्विजानीयात् पावनं सर्वकर्मसु" इत्युक्तलक्षणे वस्त्रे । हतभिन्ने त्रि० । [व+हा क्विप् । दिवसे ।
अहन् न०न जहाति न त्यजति सर्वथा परिवर्त्तमानत्वात् न त्यजति ।
अहम् अव्य०अह—असु । अहङ्कारार्थे, स्वात्मसम्बन्धितयाऽभिधाने च ।
अहमहमिका स्त्री० अहमहमित्यहङ्कारोऽस्यत्र वीप्सायां द्विरुक्तम् ठन् न टिलोपः । परस्पराहङ्कारे अहमेवाग्रगण्य इत्येवं रूपायामन्योन्योक्तौ च ।
अहंपूर्विका स्त्री० अहं पूर्व्वोऽहं पूर्व्वं इत्यभिधानं यत्र । ओद्धानां युयुत्साधिक्येन अहमेव पूर्वं यास्यामीत्यध्यवसाये ।
अहम्मति स्त्री० अहमित्याकारा मतिः ज्ञानं मन+क्तिन् । अविद्यायाम् अन्यस्मिन्नन्यधर्म्मारोपरूपे अज्ञाने ।
अहर्गण पु० अह्नां गणः समूहः । त्रिंशदहोरात्रके मासे । ज्योतिषप्रसिद्धे अहानां स्वल्पतासाधनार्थमाकृष्टे: वर्त्तमानदिनपर्य्यन्ते दिनसमूहे च । [प्रतिदिने ।
अहर्दिव न० अहश्च दिवा च समा० द्व०तुल्यार्थकतया वीप्सा गम्यते ।
अहर्पति पु० अह्नां पतिः । सूर्य्ये, अहर्नाथादयोऽप्यत्र ।
अहर्मुख पु० अह्नोमुखमादिभागः । प्रत्यूषे ।

अहल्य त्रि० नञ्तत्पु० न हलेन कृष्यम् । कृषाकृष्टे क्षेत्रे । गौतमर्षिपत्न्यां स्त्री० ।

अहस्कर पु० अहः करोति कृ–ट कस्कादित्वात् सत्वम् । दिवाकरे सूर्ये, अर्कवृक्षे च । [अर्कवृक्षे च ।

अहस्पति पु० अह्नः पतिः ६त० कस्कादित्वात् सत्वम् । सूर्ये,

अहह अव्य० अहं जहाति अहन्+हा–क पृषो० । सम्बोधने आश्चर्ये, खेदे, क्लेशे, प्रकर्षे च । [च त्रि० ।

अहार्य्य पु० हृ–ण्यत् न० त० । पर्वते । हर्त्तुमशक्ये, अभेद्ये

अहि पु० आहन्ति आ+हन+डिन् टिलोपः आङो ह्रस्वश्च । सर्पे, दैत्यासुरे, सूर्ये, धातुभेदे सीसके, राहौ, पथिके, खले, वप्रे, सर्पस्वामिके अस्त्रेयानतले च ।

अहिंसा त्रि० न हिनस्ति हिंस् शीलार्थे ञ्वानश् न० त० । वाङ्मनः-कायैः परपीड़ाभावे, प्राणिपीड़ानिवृत्तौ, अशास्त्रीयप्राणिपीड़नाभावे च "अहिंसा परमो धर्म" इति स्मृतिः ।

अहिका स्त्री० अहिरिव कायति प्रकाशते दुराक्रमत्वात् । शालमलिवृक्षे । [भेदे स्त्री० ।

अहिच्छत्र पु० अहेः फणाकारः छत्रमस्यादृक्षः । मेघपुष्पीवृक्षे, नगरी-

अहिजित् पु० अहिं सर्पं दैत्यासुरं वा जितवान् जि–क्विप् तुक् च । विष्णौ, इन्द्रे च । [लतायाम् ।

अहिजिह्वा स्त्री० अहेर्जिह्वेव तदाकारशिखत्वात् । नागजिह्वाख्य-

अहित पु० । न० त० । शत्रौ । पथ्यभिन्ने त्रि० ।

अ(आ)हितुण्डिक पु० अहेस्तुण्डं मुखं तेन दीव्यति ठक् । व्याध्यपाहिणि, सर्पखेलके च ।

अहिविद्विष् पु० अहिं सर्पं दैत्यासुरं वा द्विष्टवान् द्विष–भूते क्विप् । गरुड़े, इन्द्रे, मयूरे, नकुले, विष्णौ च ।

अहिनिर्लयणी स्त्री० अहिर्निर्लीयतेऽस्याम् निर्+ली–ल्युट् । (खोलस)इति ख्याते सर्पनिर्मोके ।

अहिपुत्रक पु० अहेः पुत्रः क्षुद्रसर्प इव कायति प्रकाशते कै–क । क्षुद्रसर्पाकारे नौकाविशेषे (क्षिप्) ।

अहिफेन पु० अहेः फेनः गरलमिव तीक्ष्णगुणत्वात् । (आफिङ्) इति ख्याते दुग्धभेदे ।

अहिबुध्न्य पु० अहेरिव बुध्नो मौला यस्य । रुद्रभेदे, तद्देवताके उत्तरभाद्रपदनक्षत्रे च ।

अहिभय न० अहेः, सर्पस्यत्वात् आदृताकारत्वाच्च अहितत्त्वात् स्वगतत्वाच्च भयं भी—कर्त्तरि अच् । सर्पभये राज्ञां स्वगतजनिते भये च ।

अहिभयदा स्त्री० अहिभयं दाति खण्डयति दो—क । सर्पभयनाशिकायाम् भूम्यामलक्याम् ।

अहिभुज् पु० अहिं भुङ्क्ते क्विप् । गरुडे, मयूरे, नकुले च ।

अहिमर्हनी स्त्री० अहिर्मर्हयतेऽनया मर्द—ल्युट् । गन्धनाकुलीनामलतायाम् ।

अहिमार पु० अहिं मारयति मृ—णिच्—अण् । अरिमेदवृक्षे ।

अहिमेदक पु० अहिराकृत्याऽरिरिव मेदोऽस्य वा कप् । अरिमेदवृक्षे ।

अहिलता स्त्री० अहिलोकस्य पातालस्य लता षाक० त० । ताम्बूल्याम् ।

अहीरणि पु० अहीन् ईरयति दूरीकरोति ईर—अनि । हिंसुकसर्पे तद्दर्शनाद्धीतरे सर्पाः पलायन्ते ।

अकुत पु० नास्ति कुतं कपटं यत्र । धर्मसाधनत्वेऽपि अकृते वेदपाठे ।

अहे अव्य—अह—ए । खेदे, नियोगे च ।

अहेतु पु० न हिनोति हि—कु न० त० । मतमूल्याम् ।

अहैतुक त्रि० हेतु त आगतम् ठक् न० त० । फलाभिसन्धानरहिते, कारणरहिते च ।

अहो अव्य० न+हा—डो । शोके, धिगर्थे, विषादे, दयायां, सम्बोधने, विस्मये, प्रशंसायाम्, वितर्के, असूयायाञ्च ।

अहोरात्र पु० अहश्च रात्रिश्च टच् समा० । सूर्योदयद्वयमध्यवर्त्तिकाले षष्टिदण्डात्मके मानुषे दिने पैत्रादिमानन्तु वाचस्पत्ये ।

अहोवत अव्य० अहो च वत च द्व० । खेदे, सम्बोधने, अनुकम्पायाञ्च ।

अह्राय अव्य० ह्रु—घञ् दृद्धिः पृषो० वस्य यत्वं न० त० । शीघ्रे ।

आ

आ अव्य० आङ् क्विप् पृषो० पलोपः। वाक्ये (वाक्यालङ्कारद्योतने) पूर्वं मैवं संस्था इदानीमेवमिति प्रतिषादनपरे स्मृतौ (आ एवं मन्यसे इति स्मृतस्यान्यथापादने) अनुकम्पायाम्। बहुत्वे, अङ्गीकारे, ईषदर्थे क्रियायोगे, सीमायां व्याप्तौ च। •वाक्यस्मृतिभिन्नेऽस्य ङित्त्वमिष्यते। [स्मिते च।

आकम्पित त्रि० आ+कपि—चलने कर्त्तरि क्त। कम्पयुक्ते, ईषत्क-

आकर पु०आकुर्वन्ति संघीभूय कुर्वन्ति व्यवहारमत्र आ क-घः। समूहे, श्रेष्ठे च। आकीर्य्यन्ते धातवोऽत्र कृ—अप्। रत्नादुत्पत्तिस्थाने।

आकरिक त्रि० आकरे रत्नादुत्पत्तिस्थाने नियुक्तः ठक्। आकरे करग्रहणार्थं नियुक्ते।

आकर्ष पु० आकृष्यते विषयान्तरतोऽनेन आ+कृष—घञ्। पाशके, शारिफलके, द्यूते, इन्द्रिये धन्विनो धनुरवयवे च। भावे घञि। आकर्षणे। आधारे घञि। निकषे उपले। अलादिगतं धान्यमाकृष्यतेऽनेन करणे घञि। अङ्कुशाकारे (आकुड़ा) इति ख्याते काष्ठभेदे।

आकर्षिक पु० आकर्षति सन्निकृष्टस्थं लोहं आ+कृष—ण्वुल्। (चुम्बक) इति ख्याते अयस्कान्ते। आकर्षणकर्त्तरि त्रि०।

आकर्षणी स्त्री० आकृष्यतेऽनया आ+कृष—ल्युट् ङीप्। छिन्नस्यपुष्पाद्याहरणार्थे (आङ्गी) यष्टिकाभेदे।

आकलन न० आ—कल—ल्युट्। आकाङ्क्षायाम् गणनेऽनुसन्धाने च।

आकल्प पु० आ+कृप णिच्—घञ्। वेषरचनायाम्, भूषणे च कल्पपर्य्यन्ते अव्य०। आकल्पं नरकं भुङ्क्ते इति स्मृतिः।

आकल्पक पु० आकल्पयति अन्यस्यान्यथात्वं कल्पयति आ+कृप-णिच्—ण्वुल्। वञ्चने औत्सुक्ये, दर्पे च।

आकष पु० आकृष्यते यत्र कष—अच्।* सवर्णादिकषणसाधने (कोष्टि) प्रस्तरभेदे।

आकस्मिक त्रि० अकस्मात् इति अव्ययं कारणाभावे कारणं विना भवः विनया० ठक् टिलोपः । अकस्माद्भवे ।

आकाङ्क्षा स्त्री० आ+काङ्क्ष–अङ् । अभिलाषे, न्यायमते वाक्यार्थज्ञानहेतौ यत्पदं विना यत्पदस्यानन्वयत्वात्पदे तत्पदत्वस्वरूपे, सम्बन्धे च । [निवासे ।

आकाय पु० आचीयते यस्मिन् आ+चि कर्मणि घञ् चितौ कुत्वम् ।

आकार पु० आ+कृ–घञ् । मूर्त्तौ, अवयवसंस्थानविशेषे च । आक्रियते आविष्क्रियते कृतोभावोऽनेन आ–कृ–णिच् करणे घञ् । कृतभावावेदके सुखप्रसादवैवर्णरूपे प्रीत्यप्रीतिसूचके देहचेष्टने । भावे घञ् । कृतौ भावे, कृतौ च ।

आकारगुप्ति स्त्री० गुप–क्तिन् आकारस्य कृतभावस्य गुप्तिर्गोपनम् । रत्नादिजनितसुखप्रसादस्य भयजनितविषादादेश्च गोपने ।

आकारण न० स्त्री० आ+कृ–णिच् ल्युट्, युच् वा । आह्वाने । यूचि स्त्रीत्वात् टाप् ।

आकालिक त्रि० अकाले भवं ठञ् । अतमये तत्त्वे वस्तुनि । स्त्रियां ङीप् "आकालिकीं वीक्ष्य मधुप्रवृत्तिम्" इति कुमारः । समानकालौ आद्यन्तौ यस्य समानकालस्य आकालादेशः इकञ्च् नि० । आशुविनाशिनि, आद्यन्तयोरभावात्, पूर्वदिवसे यत्समये उत्पत्तिः परेद्युस्तत्समये एव नश्वरे, "आकालिकमनध्यायमेतेष्विति" मनुः आशुविनाशित्वात् विद्युति स्त्री० ।

आकाश पु० न० आकाशन्ते सूर्य्यादयोऽत्र । गगने ।

आकाशदीप पु० आकाशे दीयमानो दीपः या० क० । "तुलायां तिलतैलेन सायं सन्ध्यासमागमे । आकाशदीपं यो दद्यादिह्यक्तलक्षये दीपभेदे ।

आकाशमूली स्त्री० आकाशे भूमिमूलदेशे मूलमस्याः ङीप् । (गाना) कुम्भिकायाम् ।

आकाशरश्विन् पु० आकाशे अत्युच्चप्राचीरोपरिस्थितः वनु रश्वति रच–णिनि । दुर्गवहिःप्राचीरोपरिस्थिते रक्षके ।

आकाशवल्ली स्त्री० आकाशस्य वल्ली शाखेव अत्युच्चियत्वात् । अम-रवेल इति ख्यातायां लतायाम् ।

आकाशवाणी स्त्री० आकाशे भवा वाणी । अदृश्योत्थादकपुरुष-स्थेनाकाशादिशोत्पन्नायां देवादि वाचि ।

आकीर्ण त्रि० आ+कृ–क्त । व्याप्ते, विक्षिप्ते च [सम्पादने च ।

आकुञ्चन न० आ+कुचि–ल्युट् । सङ्कोचे, प्रसारितस्य संक्षिप्तत्व

आकुञ्चित त्रि० आ+कुचि–क्त । आभुग्ने सङ्कोचिते च ।

आकुल त्रि० आ+कुल–क । व्याकुले । [नाकुले च (

आकुलाकुल त्रि० आकुल+प्रकारे द्वित्वम् । आकुलप्रकारे, अत्य-

आकूत न० आ+कू भावे क्त । आशये अभिप्राये ।

आकृति स्त्री० आक्रियते व्यज्यते जातिरनया करणे क्तिन् । आकारे, अवयवसंस्था, जातौ रूपे च ।

आकृतिच्छला स्त्री० आदयति छद्–णिच् कर्त्तरि ट्रन् छस्य शत्व० । (घोषा) घोषातकीलतायाम् ।

आकेकरा स्त्री० आके अन्तिके कीर्य्यते क कर्म्मणि अप् "दृष्टि-राकेकरा किञ्चित्स्फुटाग्रे प्रसारिता । नीलिताङ्गी पुराकोके ताराख्यावर्त्तनोत्तरे" इत्युक्तलक्षणे दृष्टिभेदे । [पारिभाषिकम् ।

आक्रन्द पु० आ+क्रन्द–घञ् । सारावे रोदने, आह्वाने, शब्दे च । कर्मणि घञ् । मित्रे, भ्रातरि च । आधारे घञ् । दाक्ष्ये युद्धे, दुःखिनां रोदनस्थाने च । आक्रन्दयति अच् । खदेया-क्रमणमाचरतः पार्ष्णिग्राहस्य प्रयोज्यके तत्प्रवर्त्तिनि रूपे ।

आक्रम पु० आ+क्रम–घञ् अदृद्धिः । बलेनातिक्रमणे । ल्युट् । आक्रमणमप्यत्र न० ।

आक्रान्त त्रि० आ–क्रम–क्त । कृताक्रमणे अभिभूते व्याप्ते च ।

आक्रीड पु० आक्रीड्यत आ+क्रीड–घञ् । क्रीड़ास्थाने उद्यानादौ ।

आक्रोश पु० आ+क्रुश–घञ् । विरुद्धचिन्तने, शापे, निन्दायाञ्च ल्युट् आक्रोशनमप्यत्र न० । [क्रीड़या जाते वैरे ।

आक्षदूतिक न० अक्षदूतेन पाशक्रीड़या निर्वृत्तम् ठक् । पाश-

आक्षपाटिक पु० अक्षपटे क्रीड़ास्थाने व्यवहारस्थाने वा नियुक्तः ठक् । अक्षदर्शके, व्यवहाराध्यक्षे प्राङ्विवेके च ।

आक्षार पु० आ+क्षर–णिच्–घञ् । अगम्यागमनं कृतं त्वयेति पुरुषं प्रति, अगम्यगमनं त्वया कृतमिति स्त्रियं च प्रतिदूषणे । ल्युट् आक्षारणमप्यत्र न० । ऋच् टाप् । अत्रार्थे ।

आक्षारित त्रि० आ+क्षर–णिच्–क्त । आक्षारोमैथुनविषयापवादस्तेन दूषिते ।

आक्षिक पु० अक्षमिन्द्रियं व्याप्नोति तत्प्रकृत्वात् । रङ्गकर्तृके ।

आक्षीव पु० आ+क्षीव–णिच्–अच् । शोभाञ्जनवृक्षे । आ+क्षीवे–क्त नि० । मत्ते ।

आक्षेप पु० आ+क्षिप–घञ् । भर्त्सने, अपवादे, आकर्षणे, धनादिव्यासङ्गरूपे निश्चये" अर्थालङ्कारभेदे च मा०१०द्द० ।

आक्षेपक त्रि० आ+क्षिप–ण्वुल् । निन्दाकारके । "यदा तु धमनीः सर्व्वाः कुपितोऽभ्येति मारुतः । तदा क्षिपत्यायु सुरुर्मुरुर्दैहं नभस्वरः । सुरुर्मुरुस्तदाक्षेपादाक्षेपक इति स्मृत, इत्याक्षेपलक्षणे वातरोगभेदे च । [ख्याते । ओट । आक्षोटोऽप्यत्र ।

आक्षोड पु० आ+अक्ष–ओड् स्वार्थे अण् । शैलपीलुवृक्षे आखरोट इति

आख पु० आखनत्यनेन आ+खन–ड । खनित्रे । ष । आखनोऽप्यत्र ।

आखण्डल पु० आखण्डयति भेदयति पर्व्वतान् आ+खडि डलच् ह्रस्व नेत्वम् । इन्द्रे । [खननकर्त्तरि त्रि० ।

आखनिक पु० आ+खन–कर्त्तरि ण्वुल् । चौरे, शूकरे, मूषिके च ।

आखनिवक पु० आ+खन–करणे ण्वुल वक । खनित्रे । ङर । आखरोऽप्यत्र ।

आखु पु० आ+खन–डु । मूषिके, चौरे, शूकरे च । कर्म्मणि डु । देवताडवृक्षे । "विभवे सति नैवात्ति न ददाति जुहोति न । तमाखुराखुम्" इत्युक्तलक्षणे कृपणे च ।

आखुकर्णी स्त्री० आखोः मूषिकस्य कर्ण इव पर्णमस्याः । (उन्दुरकाणी) मूषिककर्णतुल्यपर्णवल्लीं लतायाम् ।

आखुग पु० आखुना मूषिकेण गच्छति । गम—ड । मूषिकवाहने गणेशे ।

आखुपर्णिका स्त्री० आखोः कर्ण इव पर्णमस्याः वा कप् स्वार्थे कन् अत इत्त्वम् । (उन्दुरकाणी) इति ख्यातायां लतायाम् ।

आखुभुज् पु० आखुं भुङ्क्ते भुज—क्विन् । मूषिकभक्षके विड़ाले ।

आखुविषहा स्त्री० आखुविषं मूषिकविषं हन्ति हन—ड । मूषिकविषहरे देवताडङ्कते, देवतालीलतायाञ्च ।

आखेट पु० आखिद्यन्ते त्रास्यन्ते प्राणिनोऽत्र आ+खिट—घञ् । प्राणित्रासदायां मृगयायाम् । स्वार्थे कन् आखेटकोऽप्यत्र ।

आखेटिक पु० आखेटे कुशलः ठक् । मृगयाकुशले ककुरे ।

आखोट पु० आखः खनित्रमिव उटानि पर्णान्यस्य । (आखरोट) इति ख्याते शैलपीलौ । [भावे अङ् । कथने ।

आख्या स्त्री० आख्यायतेऽनया आ+ख्या—अङ् । संज्ञायां, नाम्नि च ।

आख्यात त्रि० आ+ख्या—कर्मणि क्त । कथिते, व्याख्याते, व्याकरणप्रसिद्धे तिङन्ते पदे च "क्रियाप्रधानमाख्यात" इति यास्कः ।

आख्यातृ त्रि० आ+ख्या—तृच् । कथनकर्त्तरि । पाठयितरि "आख्यातोपयोगे" इति पाणिनिः । [मन्यनादुग्रपाख्यानम् ।

आख्यान न० आ+ख्या—भावे ल्युट् । प्रसिद्धेतिवृत्तकथने यथा अमृत-

आख्यायिका स्त्री० आ+ख्या—ण्वुल् कापि अतइत्त्वम् । विदितवृत्तान्तार्थायां कथायाम्, गद्यपद्यप्रबन्धे च । कथके त्रि० ।

आगत त्रि० आ+गम—क्त । आयाते, उपस्थिते, प्राप्ते च । भावे क्त । आगमने न० ।

आगन्तु त्रि० आ+गम—तुन् । अनियतस्थायिनि अतिथौ, आगमनशीले च । स्वार्थे कन् । आगन्तुकोऽप्यत्र ।

आगम न० पु० आ+गमो—घञ् । "आगतं शिववक्त्रेभ्यो गतञ्च गिरिजाश्रुतौ । मतञ्च वासुदेवस्य तस्मादागमसुच्यते" इत्युक्तलक्षणे सृष्टिश्च प्रलयश्चैव देवानां च तथार्च्चनम् । साधनञ्चैव सर्वेषां पुरश्चरणमेवच । षट्कर्मसाधनञ्चैव ध्यानयोगश्चतुर्विधः सम्भिर्लक्षणैर्युक्तं त्वागमं तद्विदोविदुरिति तल्लक्षणे च तन्त्रशास्त्रे । "शिवं शिवैः

प्रमाणेषु हितं वाच्यं वरत्वं च । आगमं शास्त्रमाप्तोक्तमित्युक्तलक्षणे शास्त्रमात्रे च । भावे घञ् अदृष्टे: उपदेशे आगतौ च पु० । आगम्यते ज्ञायतेऽनेन करणे घञ् । व्यवहारे सन्दिग्धार्थसाधके पत्रलेख्यादौ । आगच्छति प्रकृतिप्रत्ययानुपघातेन प्राप्नोति अच् । व्याकरणप्रसिद्धे प्रकृतिप्रत्ययानुपघातेन तत्प्राप्ते आगन्तरि इत्वादौ । [अपराधे, पापे च ।

आगस् न० इण आग अपराधे उणा० इण् असुन् आगादेशः ।

आगामिन् त्रि० आ+गम–णिनि । आगन्तुके, प्रगामिनि । भविष्यति काले, तद्वृत्तौ च । [ष० । ग्रहे ।

आगार न० अग–कुटिलायां गतौ घञ् आगच्छन्ति अत्र–अण् उप०

आगू स्त्री० आ+गम–क्विप् मलोपे ऊकारादेशः । इदं कर्त्तव्य मेवेत्यङ्गीकारे प्रतिज्ञायाम् च ।

आग्नीध्र न० अग्निधिन्वे अग्नीत् तस्य शरणं "अग्नीधः शरणे रक् भञ्" वार्त्ति०रक् भत्वात् जश् । होतुर्गृहे मनुवंश्ये नृपभेदे च ।

आग्नेय न० अग्निर्देवतास्यस्य अण् । स्वर्णे, घृते च । वृत्तमर्धेऽपि । रक्तवर्णे । "अग्निनोक्तं पुराणं यदाग्नेयं वेदसंज्ञितं" इत्युक्तलक्षणे महापुराणभेदे वह्निपुराणे च । अग्निदेवतावति द्रव्यमात्रे त्रि० । दक्षिणपूर्वदिग्भि, अग्नियोषिति स्वाङ्गायाम् अग्निदेवताकायाम्रुचि च स्त्री० ङीप् ।

आग्रयण न० अग्रे अयनं भोजनं यस्यादेर्येन कर्मणा पृ० ह्रस्वदीर्घः व्यत्ययः । नवशस्यनिमित्ते के दृष्टिरूपे यज्ञे ।

आग्रहायणिक पु० आग्रहायणी पौर्णमासी यस्मिन् मासे ठक् । चान्द्रे मार्गशीर्षमासि । अण् । आग्रहायणोऽत्र ।

आग्रहायणी स्त्री० अग्रहायणया मृगशिरसा नक्षत्रेण युक्ता पौर्णमासी अण् ङीप् । चान्द्रमार्गशीर्षमासपूर्णिमायां तस्या एव पूर्णिमाया मृगशिरसा योगसम्भवात् । [अग्रहायणीये विप्रे ।

आग्रहारिक पु० अग्रहारोऽग्रभागो नियतं दीयतेऽस्मै ठक् ।

आघट्ट पु० आघट्टयति रोगान् ण्वुल् । रक्तवर्णेऽपामार्गे ।

आघाट पु० आहटयति रोगान् वियोजयति आ+घट–णिच् । घञ् दृद्धिः नि० । रक्षापमार्गे, सीमाबाञ्च ।

आघात पु० आ+हन–घञ् । आहनने । आधारे घञ् । वधस्थाने ।

आघार पु० आ+घृ–कर्म्मणि घञ् । घृते । भावे घञ् होमादौ, मन्त्रविशेषेण देवताविशेषाय घृतदाने ।

आघूर्णित त्रि० आ+घूर्ण–क्त । चालिते, भ्रामिते च ।

आघ्राण न० आ+घ्रा–क्त । गन्धग्रहणे, तद्गौ च । [आक्रान्ते च ।

आघ्रात(ण) त्रि० आ+घ्रा–क्त वा तस्य नत्वम् । गृहीतगन्धे,

आङ्किक त्रि० अङ्केन अङ्कचालनेन निर्वृत्तं ठक् । भावव्यञ्जकेऽङ्क-निष्पन्ने भ्रूक्षेपादौ, अङ्कजातमात्रे च । वृदङ्के वाद्ये न० ।

आङ्गिरस पु० अङ्गिरसो मुनेरपत्यम् अण् । बृहस्पतौ ।

आचमन न० आ+चम–भावे ल्युट् । विधिना जलप्राशने, मुखादिप्रक्षालने, वैधकर्म्मादौ जलप्राशनपूर्वकमदाङ्गस्पर्शरूपक्रियाबाञ्च, विस्तरो वाचस्पत्ये । [निष्ठीवनपात्रे ।

आचमनक न० आचमनस्य मुखप्रक्षालनस्य कं जलं यत्र । यतहुण्टे

आचमनीय न० आचमनाय मुखप्रक्षालनाय दीयते दृद्वात् क, आ+चम–करणे अनीयर् वा । मुखप्रक्षालनार्थे जले । [घञ् । भक्ष्यमात्रे ।

आचाम पु० आ+चम–भावे घञ् वा दृद्धिः । आचमने । कर्म्मणि

आचार पु० आ+चर–भावे घञ् । चरित्रे, मन्वादयुक्ते स्नानाचमनादिव्यवहारे च । [शिलमोचिकालतायाम् ।

आचारी स्त्री० सम्यक् चारः प्रसरणं यस्याः गौ० ङीष् । (शेलञ्चा)

आचार्य्य पु० "उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते" इति मनूक्तलक्षणे वेदाध्यापयितरि, "आचिनोति यस्त्वर्थानाचारे स्थापयत्यपि । स्वयमाचरते यस्मादाचार्य इति कथ्यते" इत्युक्तलक्षणे मन्त्रप्रस्थापके शङ्कराचार्य्यादौ च । स्त्रियां टाप् आचार्य्या । आचार्यपत्न्यान्तु आचार्यानी । ङीप् न भवति ।

आचार्यक पु०आचार्यस्य कर्म भावो वा ण्वुल्तृचौ ततः स्वार्थे कन्। आचार्यकर्त्तव्यकर्मणि। [मितपरिमाणे, शकटपरिमाणे च पु०।

आचित त्रि० आ+चि–क्त। संगृहीते, वाक्ये, व्याप्ते च। दृश्यार-

आच्छन्न त्रि०आ+छद–क्त। आवृते। छद–णिच्–क्त नि०। आच्छादिते।

आच्छाद् पु० आच्छाद्यतेऽनेन छद–णिच्–करणे घञ्। वस्त्रे।

आच्छादन न० आ+छद–णिच्–ल्युट्। पिधानवस्त्रे।

आच्छिन्न त्रि० आ+छिद–बलाद्ग्रहणे क्त। बलाद्गृहीते।

आच्छुरित न० आ+क्षुर क्त। नखाघातेन दशब्दहासे, नखाघातेन दार्ढ्ये च। स्वार्थे क। आच्छुरितकमप्यत्र। [कृतयायाम्।

आच्छेदन न० आच्छिद्यन्तेऽत्र छिद–ल्युट् पृषो० दस्यौत्। आछ आवासे (दीर्घविस्तारे)। इदित् भ्वादि० पर० सक० सेट्। आच्छति आच्छीत्। [अण्। छागमांसादौ त्रि०।

आज न० आज्यतेऽनेन आ+अन्ज–घञर्थे क। घृते। आजखेदम्

आजक न० अजानां समूहः वुञ्। छागसमूहे।

आजन्मसुरभिपत्र पु० आ जन्मनः सुरभि पत्रमस्य। मरुवकवृक्षे।

आजानेय पु० "शक्तिभिर्भिन्नहृदयाः स्खलन्तश्च पदेपदे। आजानन्ति यतः संग्रामाजानेयास्ततः स्मृता" इत्युक्तलक्षणे उत्तमाश्वे। अव-यवार्थस्तु आजानेयशब्दे द्रष्टव्यः।

आजि स्त्री० अज्यन्तेऽस्याम् अज–इञ् न वीभावः। समरभूमौ, संग्रामे, आक्षेपे, क्षणे, मर्य्यादायाम् च।

आजीव पु०आजीव्यतेऽनेन आ+जीव–करणे घञ्। आजीविकायाम् कर्त्तरि एवुल्। आजीविकायत्र स्त्री०।

आजू स्त्री०आजवति आ+जु–क्विप् दीर्घः। भृतिं विना कर्मकारके।

आज्ञा स्त्री० आ+ज्ञा–अङ्। निदेशे इदं क्रियतामिति शासने, ज्योतिषप्रसिद्धे लग्नात् दशमे स्थाने च।

आज्य न० आ अज्यते अन्ज–क्यप् नलोपः। घृते।

आज्यभाग पु० आज्यस्य भागः। होमे आकृतिविशेषे, घृते च।

आञ्जनेय पु० अञ्जनाया अपत्यं ढक्। हनुमति।

आङ्गिनेय पु० अङ्गिरसां अपत्यं ढक् । (आजनाद) कीटभेदे ।
आटविक न० अटव्यां चरति भवो वा ठक् । आरण्यके जैन्ये ।
आटि(डि) पु० आ+अट्-इण् । मरारिपक्षिणि । आ+अड-इण् ।
आडिरप्यत्र, मत्स्यभेदे च । जातित्वेन स्त्रियां वा ङीप् ।
आटोप पु० आ+टुप घञ् पृषो० टत्वम् । दर्पे, संरम्भे, वातजन्ये
उदरव्याधिभेदे च ।
आडम्बर पु० आ+डबि-अरच् । हर्षे, दर्पे, तूर्यस्वने, आ-
रम्भे, संरम्भे, अभिलोम्नि, धनगर्व्विते, आयोजने च ।
आढक पु० न० आढौकते आ+ढौक-घञ् पृषो० । सप्ततोदशाङ्कुलमाने,
प्रस्थचतुष्टयमिते, पुष्कलचतुष्टयमिते च धान्यमानपात्रे, षट् पञ्च-
दशाधिकद्विशतसुष्टिपरिमाणे, द्रोणस्य चतुर्थभागे च ।
आढकिक त्रि० आढक+प्रमाणार्थे ठञ् । आढकमितस्य धान्यस्य व-
पनयोग्ये क्षेत्रे, तत्प्रापके तत्खादके च । स्त्री । आढकीनोऽप्यत्र ।
आढकी स्त्री० आढौकते अच् पृषो० । (अरहर) ख्याते शमी-
धान्यभेदे ।
आढ्य त्रि० आ+ऋध्-क पृषो० । युक्ते, विशिष्टे, सम्पन्ने, धनिनि च ।
आणवीन त्रि० अणुधान्यानां शर्षपादीनां भवनं क्षेत्रम् वा खञ् ।
(सुनाडाऊ) शर्षपादिभवनयोग्ये क्षेत्रे । अञ् आणवमप्यत्र ।
आणि पु० अण-इन् स्त्रियां वा ङीप् । रथचक्रापस्थे कीलके,
कोटौ, सीम्नि च । [भवे च ।
आतङ्क पु० आ+तकि-घञ् । रोगे, सन्तापे, सन्देहे, सुरजशब्दे,
आतञ्चन न० आ+तनच-ल्युट् । वेगे, प्रापञ्चे, आघायने, दुग्धादौ
दध्यादिभावापादनाय अम्लद्रव्यप्रक्षेपे, निक्षेपे उपदंशे, द्रवद्रव्ये प्र-
क्षेपयोचिते कठिनद्रव्यस्य चूर्णने, गलितक्षयादेर्द्रव्यान्तरयोगेन
जारणे च ।
आततायिन् त्रि० आततेन विस्तीर्णेन शस्त्रादिना अयितुं शीलमस्य
अय-णिनि । वधोद्यते "अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः ।
क्षेत्रदारापहारी च षडेते आततायिनः" इत्युक्तप्रकारे ।

आतप पु० आ+तप-घ । प्रकाशे, उद्द्योते, सूर्य्यादालोके च ।

आतपत्र न० आतपात् त्रायते । त्रै-क । छत्रे । स्वार्थे कन् । आतपत्रकमप्यत्र ।

आतपाभाव पु० ई त० आतपस्याभावरूपायां छायायाम् ।

आतर पु० आतरत्वनेन तृ-अप् । नद्यादेः तरणार्थं देये भाटकादौ ।

आतर्पण न० आ-तृप-ल्युट् । प्रीतौ । णिचः प्रीणने मङ्गलालेपने

आतायिन् पु० आ+तै-णिनि । (चिल्) इति ख्याते पक्षिभेदे ।

आतिथेय न० अतिथये इदं ढक् । अतिथिनिमित्तके भोजनादौ । तत्र साधुः ढक् । अतिथिसपर्य्यायां कुशले त्रि० ।

आतिथ्य न० अतिथेरिदं अण् । अतिथौ, अतिथिसेवादौ ।

आतिवाहिक त्रि० अतिवाहे इहलोकात् परलोकप्रापणे नियुक्तः ठक् । मृतस्य सूक्ष्मदेहादेर्लोकान्तरप्रापणार्थमीश्वरनियुक्ते अर्चिरादिस्थानस्थिते देवभेदे । "आतिवाहिकास्तल्लिङ्गात्" इति वेदान्तसूत्रम् ।

आतुर त्रि० ईषदर्थे आ+अत-उरच् । रोगयुक्ते ।

आतृप्य पु० आतृप्यतेऽनेन आ+तृप-करणे क्यप् । (आता) वृक्षविशेषे ।

आतोद्य न० आसमन्तात् तुद्यते आ+तुद-ण्यत् । वीणादौ चतुर्विधे वाद्ये ।

आत्तगन्ध त्रि० आत्तोऽङ्गीकृतोऽरिणा गन्धो गर्व्वो यस्य । शत्रुभिभूते, कार्य्ये च । आत्तगर्व्वोऽप्यत्र ।

आत्मगुप्ता त्रि० आत्मना गुप्तः स्वशक्त्यैव रक्षिते । (आत्मकृषी) लतायां भेदे ।

आत्मघातिन् त्रि० आत्मानं देहं हन्ति हन्-णिनि ई त० । "व्यापदयेत् दृषात्मानं स्वयं योऽग्न्युदकादिभिः अदैवेनैव मार्गेण आत्मघाती स उच्यते" इत्युक्तलक्षणे आत्मनः स्वशरीरस्य प्राणेन सह वियोजयितरि जने ।

आत्मघोष पु० आत्मानं घोषयति स्वशब्दैः । काके, वृक्षटे च, तस्यां (का का) (वृ वृ) ध्वनिनैवात्मनामैकदेशस्य घोषणात् ।

आत्मज पु० आत्मनो जायते, आत्मा वा जायते अत्र-ड । पुत्रे,

"आत्मा वै जायते पुत्र इति" श्रुतिः आत्मजन्माप्यत्र । कन्यायां, मनोजन्यायां बुद्धौ च स्त्री० ।

आत्मदर्शे पु० आत्मा देहः दृश्यतेऽस्मिन् दृश—आधारे घञ् । दर्पणे ।

आत्मन् पु० अत—मनिच् । स्वरूपे, यत्ने, देहे, मनसि, दक्षौ, बुद्धौ, अर्के, यज्ञे, वायौ, जीवे, ब्रह्मणि च ।

आत्मबान्धव पु० "आत्ममातुः स्वसुःपुत्रा आत्मपितुः, स्वसुःसुताः । आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवा" इत्युक्तेषु ।

आत्मभू पु० आत्मनो मनसो देहात् वा भवति भू—क्विप् । चतुर्मुखे विधातरि, कामे च ।

आत्ममूली स्त्री० आत्मैव रक्षणे मूलमस्याः दुष्प्रयत्नवेतरमर्हनतः स्वस्य स्वयं रक्षणात् गौरा० ङीष् । द्राक्षालतायाम् ।

आत्मम्भरि त्रि० आत्मानं बिभर्त्ति स्व सुन् च । स्वोदरमात्रपूरके ।

आत्मयोनि पु० आत्मा योनिरस्य । हरौ, हरे, विधातरि मनसिजे मदने च । [रक्षके ।

आत्मरक्षा स्त्री० आत्मन एव रक्षा यस्याः । दृढभेदे । ईत० । आत्मनो

आत्महन् पु० आत्मानं हतवान् हन—क्विप् । "योऽन्यथासन्तमात्मानमकर्त्तारं स्वयं प्रभुम् । कर्त्तारं भोक्तेति मन्यन्ते तएवात्महनो जनाः, इत्युक्तलक्षणे आत्मनो याथार्थ्यज्ञानरहिते, अज्ञे, आत्मघातिनि च जने ।

आत्माधीन पु० आत्मनोऽधीनः । पुत्रे, स्वाजके । प्राणाधारे च ।

आत्माश्रय पु० आत्मानमाश्रयति आ+श्रि—अच् ईत० । स्वस्य स्वापेक्षयारूप तर्कदोषभेदे ।

आत्मीय त्रि० आत्मनोऽयं छ । आत्मसम्बन्धिनि ।

आत्मोद्भवा स्त्री० आत्मनैवोद्भवति भू—अच् । मायपत्नीदक्षे आत्मा उद्भवो यस्याः । कन्यायाम् । पुत्रे पु० ।

आत्यन्तिक त्रि० अत्यन्त+भवार्थे ठक् । अतिशयेन जाते ।

आत्ययिक त्रि० अत्ययः नाशः प्रयोजनमस्य ठक् । नाशिनि ।

आत्रेय पु० अत्रेरपत्यं ढक् । अत्रिसुनिपुत्रे, देवर्षौ रक्षधातौ च ।

आत्रेयी स्त्री० न सन्ति कर्म्मयोग्यानि त्रीणि दिनानि यस्याः ङीप् समा० सा अत्रा स्वार्थे ठञ्। ऋतुमत्यास्, नदीभेदे च। पुनः स्वार्थे कनि ह्रस्वे आत्रेयिकाप्यत्र।

आथर्व्वण न० अथर्वणा मुनिना दृष्टो वेदः अण् तमधीते वेत्ति वा पुनः अण्। तमधीते तत्र विहितं वा पुनरण्। अथर्ववेदस्थे ब्राह्मणे, तद्वेदविहिते ऽभिचारादिकर्म्मणि च।

आथर्व्वणिक त्रि० अथर्वाणं वेदमधीते ठक्। अथर्ववेदपाठके विप्रे।

आदर पु० आ+दृ-क्प्। समादरे, सम्माने, आरम्भे च।

आदर्श पु० आदृश्यतेऽत्र दृश-आधारे घञ्। दर्पणे, टीकायां प्रतिरूपपुस्तके च। [ल्युट्। इन्दिरोगदृष्टे स्त्री०।

आदान न० आ+दा-भावे ल्युट्। ग्रहणे, अङ्गाभरणे च। कर्म्मणि

आदि पु० आ प्रथमं दीयते गृह्यते आ+दा-कि। प्रथमे, प्राक् सत्तायाम्, कारणे, सामीप्ये, प्रकारे, अन्तये च।

आदिकारण न० आद्यं कारणं निमित्तम्। पूर्व्वनिमित्ते।

आदितेय पु० अदित्या अपत्यं ढक्। देवे।

आदित्य पु० अदितेरपत्यं यत्। सूर्य्ये, देवे च। आदित्यमण्डलस्थे हिरण्मये विष्णौ, अर्कवृक्षे अदितिदेवताके पुनर्व्वसुनक्षत्रे च।

आदित्यपत्र पु० आदित्यस्य अर्कवृक्षस्य पत्रमिव पत्रमस्य। क्षुपभेदे। ङीप्० अर्कवृक्षपत्रे न०। [वृक्षे।

आदित्यपुष्पिका स्त्री० आदित्यवर्ण्णं पुष्पमस्याः। रक्तपुष्पे अर्क-

आदिदेव पु० आदौ दीव्यति स्वयं राजते दिव-अच् ७त०। नारायणे, शिवे, आदिकारणे वेधसि च।

आदिपु(पू)रुष पु० आदौ पुरि० देहे वसति वस-उषन् स्त्रीत्वेनात्मना पूरयति जगत् पूर-उषन् वा पृ० वा कुसः। प्रथमजीवे हिरण्यगर्भे नारायणे च।

आदिम त्रि० आदौ भवः आदि+डिमच्। आद्ये।

आदिमत् त्रि० आदिः कारणं विद्यतेऽस्य मतुप्। सकारणे कार्य्ये।

आदिवराह पु० आद्यो वराहः। विष्णौ तस्यादिवराहरूपत्वात्।

आदिष्ट न० आ+दिश–भावे क्त। आज्ञायाम्, उपदेशे च। कर्म्मणि क्त। उपदिष्टे, व्याकरणप्रसिद्धे स्थानिजाते, यथा इकः स्थाने यण् आदिश्यते इति यणादिष्ट–इत्युच्यते। [क्लेशे, दुर्दशे च]

आदीनव पु०आ+दी–भावे क्त आदीनस्य वानम् प्राप्तिः वा०क। दोषे,

आदृत त्रि०आ+दृ–कर्त्तरि क्त। पूजिते,सादरे, कृतादरे च।

आदेश पु० आ+दिश–भावे घञ्। आज्ञायाम्, शासने, उपदेशे च। च। कर्म्मणि घञ्। ज्योतिषशास्त्रोक्ते, फले, व्याकरणप्रसिद्धे प्रकृतिप्रत्ययोपघातके कार्य्यभेदे (वर्ण्यस्थाने वर्णान्तरोत्पत्तौ) च।

आदेष्टृ त्रि० पु० आ+दिश–तृच्। ऋत्विजं प्रति मनेष्टसम्पादनार्थं कर्म्म क्रियतामित्यादेशकर्त्तरि यजमाने, आदेशकर्त्तमात्रे त्रि०।

आद्य त्रि०आदौ भवः दिगा०यत्। प्रथमे। अद–यत्। अदनीयद्रव्यमात्रे धान्ये न०।

आद्यमाषक पु० आदौ भवः आद्यं मुख्यं मष्यतेऽनेन करणे घञ् कर्म्म०। पञ्चगुञ्जापरिमाणे, (माषा) इति ख्याते षष्टिकृष्णला इत्युक्तेराद्यत्वविशेषणम् तस्य कार्षिकविशेषोपयोगितया गौणत्वान्न मुख्यत्वम् अतएव "दशार्द्धगुञ्जं प्रवदन्ति माषमिति भास्कराचार्येण माषस्य पञ्चगुञ्जत्वमेवोक्तम्।

आद्यून त्रि० आदिना ऊनः। आदिशून्ये। आ+दिव–क्त। अलिगोपायां स्त्रियां तस्य नत्वम् ऊठ् च। (पेटुके) कर्म्मान्तरकाङ्क्षाविरहेण केवलसुदरपूरके।

आधमन न० आधीयते आ+धा–कर्मणि ल्युट्। (बन्धकदाने) आधौ, योगाधमनविक्रीतम्" इति स्मृतिः।

आधर्षित त्रि० आ+धृष–क्त। अन्यायेनाक्रान्ते, "मार्गेष्वाधर्षितः परैरिति स्मृतिः।

आधान न० आ+धा–ल्युट्। आधौ, मन्त्रादिना वह्निस्थापने, "आधाने सोमपाने" चेति स्मृतिः। गर्भाधाने च।

आधार पु० आ+धृ–घञ्। अधिकरणे, आश्रये, व्याकरणप्रसिद्धे औपश्लेषिकवैषयिकाभिव्यापकाख्येऽधिकरणकारके, अक्षसम्पादनार्थं

अवरोधनार्थे बन्धने दृढीकरणे अवधारणार्थे आलवाले च। आधारबन्धप्रभृतयोऽत्रेति रघुः।

आधि पु० आधीयते अभिनिवेश्यते प्रतीकाराय धनोऽनेन। आ+धा—कि। मानसदुःखे अत्याधावाम्, अधिष्ठाने, बन्धके, "आधौ प्रतिग्रहे क्षीते" इति स्मृतिः। अवने च। [ग्रथिततायाम्।

आधिक्य न० अधिकस्य भावः ष्यञ्। अधिकतायाम् अति—

आधिदैविक त्रि० देवान् अग्निवाय्वादीन् अधिकृत्य निर्वृत्तम् अधि+देव—ठञ् द्विपदवृद्धिः। अतिवातादिदैवजाते दुःखे।

आधिपत्य न० अधिपतेर्भावः ष्यञ्। प्रभुत्वे।

आधिभौतिक त्रि० भूतानि व्याघ्रसर्पादीन्यधिकृत्य जातम्। अधिभूत+ठञ् द्विपदवृद्धिः। व्याघ्रसर्पादिजनिते दुःखे।

आधिवेदनिक न० अधिवेदनाय विवाहोपरिविवाहाय हितं ठक् तत्र काले दत्तं ठञ् वा। अधिकं वेदनमधिवेदनं तत्र प्रथमविवाहात्परं द्वितीयविवाहकाले स्त्रियै देये धने। "अधिविन्नस्त्रियै देयमाधिवेदनिकं धनम्" इति स्मृतिः।

आधुनिक त्रि० अधुना भवः ठञ्। इदानीन्तने, नव्ये च।

आधेय त्रि० आ+धा—यत्। आश्रिते च तत्पदे "आधेयश्चाक्रियः सेति" भाष्यकारिका। [हस्तिपके।

आधोरण पु० आ+धोर—गतिचातुर्य्ये ल्युः। हस्तिगतिचातुर्य्यज्ञे

आध्मात त्रि० आ+ध्मा—क्त। शब्दिते, दग्धे, वातरोगजातायाम् उदरस्फीततायाम्।

आध्मान पु० "आध्मानमिति ज्ञानीयाद्रोगं वातनिरोधजम्" इत्युक्ते वातव्याधौ। आ+ध्मा—आधारे ल्युट्। स्फीततायाम्। नलिकानामकगन्धद्रव्ये स्त्री० ङीप्। [शोकमोहज्वरादिरूपे दुःखे।

आध्यात्मिक त्रि० आत्मानं मनःशरीरादिकमधिकृत्य भवः। ठञ्।

आध्यान न० आ+ध्यै—ल्युट्। चिन्तायाम्, उत्कण्ठापूर्वकस्मरणे च।

आध्वर्यव न० अध्वर्योः यजुर्वेदविद इदं अञ्। यजुर्वेदविहिते अध्वर्युसम्बन्धिनि कर्मणि, तद्वाने च।

आन पु० आनित्यनेन आ+अन–करणे क्विप् । अनःस्थितस्य प्राणवायोर्नासिकयोत्क्षेपे ।

आनक पु० आनयति सोत्साहान् करोति अन–णिच् ण्वुल् । पटहे, महढक्के, सशब्दमेघे च । उत्साहके त्रि० ।

आनकदुन्दुभि पु० आनकः प्रोत्साहकः दुन्दुभिर्देववाद्यविशेषो यस्य कृष्णजन्मोत्सवे तथा वाद्यं महदृष्टे जातम् । कृष्णपितरि वसुदेवे । बहुलदृढकायां स्त्री० ङीप् ।

आनत त्रि आ+नम–क्त । ईषत्प्रणामे, अधोमुखे, विनयानते च ।

आनति स्त्री० आनमति प्रणीभवत्यनया आ+नम–करणे क्तिन् । सन्नतौ । भावे क्तिन् । नम्रीभावे, अधोभवने, नम्रतायाञ्च ।

आनद्ध न० आ+नह–क्त । चर्मणा बद्धमुखे पटहमुरजादौ वाद्ये, केशभूषादिके च । व्याप्ते, व्याप्ते, बद्धे च त्रि० ।

आनन न० आ अनित्यनेन आ+अन–करणे ल्युट् । मुखे ।

आनन्तर्य्य न० अनन्तरमेव भवर्षभादित्वात् स्वार्थे ष्यञ् । अनन्तरे अव्यवहिते । अनन्तरस्य भावः ष्यञ् । अव्यवधाने ।

आनन्त्य न० अनन्त+भावे स्वार्थे वा अण् । बाहुल्ये "आनन्त्यात् कुलधर्म्माणाम्" इति स्मृतिः देशकालाद्यपरिच्छिन्ने "तदानन्त्यं समश्नुते इति श्रुतिः । अनन्तं सुखमित्यर्थः ।

आनन्द पु० आ+नन्द–घञ् । हर्षे, सुखे, दुःखाभावे, ब्रह्मणि च । आनन्दवति त्रि० "सत्यं ज्ञानमानन्दं ब्रह्म" इति श्रुतिः ।

आनन्दथु पु० आ+नदि–भावे–अथुच् । आनन्दे ।

आनन्दन न० आनन्दयत्यनेन आ+नदि–णिच्–करणे ल्युट् । गमनागमनसमये सुखलाभेनानन्दोत्पादने ।

आनन्दमय पु० आनन्दः प्रचुरोऽस्य प्राचुर्य्ये मयट् । जीवे, वेदान्तोक्ते सुषुप्तिसाक्षिणि प्राज्ञे च ।

आनन्दार्ण पु० आनन्दः अर्ण इव अवीमत्वात् । परमेश्वरे "स्वेच्छामूर्त्तिकृतस्यास्य सौख्यस्य परिवृंहिताः । आनन्दाख्यो रसोऽयम्" मित्युक्ते यावत्तावन्मेदे च । हृत० । अत्यन्तानन्दे ।

आनन्दि पु० आ+नदि–इन् । हर्षे, कौतुके च । कौशल्यानन्दि-वर्द्धनो राम इति रामायणम् ।

आनद्ध पु० आ+नह्यत्यत्र आ+नह–आधारे घञ् । नह्यशालावाम् रज्जौ, जले, द्वारकाष्ठस्थिरदेशे, तद्देशवासिनि च । [स्त्रियाँ ।

आनाम्य त्रि० आ+नम–कर्म्मणि यत्वृअनिट्कत्वात् न धुक्षः । नम्य

आनाय पु० आनीयते मत्स्योऽनेन आ+नी–करणे घञ् । जाले । भावे अच् आनयः । आनयने ।

आनाय्य पु० आनाय्यते गार्हपत्यादानीय संस्क्रियतेऽसौ नी–यत् आयादेशः । वैदिकप्रसिद्धे दक्षिणाग्नौ ।

आनाह पु० आ+नह–घञ् । दैर्घ्ये विण्मूत्ररोधके वैद्यकोक्ते रोगभेदे च ।

आनुपूर्व्वी स्त्री० पूर्वमनुक्रम्य अनुपूर्वं तस्य भावः ष्यञ् ततो वा ङीषि यलोपः । परिपाट्याम् मूलावधिके क्रमे ङीषभावपक्षे । आनुपूर्वमप्यत्र न० ।

आनुमानिक त्रि० अनुमानादागतः ठक् स्त्रियां ङीप् । अनुमानप्रमाणसिद्धे सांख्योक्ते प्रधाने "आनुमानिक इति वेदान्तलक्षणम् ।

आनुश्रविक त्रि० गुरुपादादनुश्रूयते अनुस्रवोवेदस्तत्र विहितः ठक् । स्वर्गादिसाधनतया वेदविहिते कर्म्मसमूहे "दृष्टवदानुश्रविक" इति सांख्यकारिका ।

आनृत त्रि० अनृतं मोहनमस्य अण् । असत्यस्वभावे । [अकौर्य्ये च ।

आनृशंस्य न० नृशंसो घातुकः न० त० भावे ष्यञ् । दयायां,

आन्तर त्रि० अन्तर्मध्ये भवः अण् । आभ्यन्तरे । [सौसादृश्ये ।

आन्तरतम्य न० अन्तरतमस्य अयनसदृशस्य भावः ष्यञ् ।

आन्ध्र न० अमत्यनेन अम–गतौ क्त्र उपधादीर्घः । नाडीभेदे । अन्ध्रस्येदम् अण् । अन्ध्रसम्बन्धिनि त्रि० । स्त्रियां ङीप् ।

आन्दोल दोलने अद० चुरा० उभय० सक० सेट् । आन्दोलयति ते आन्दुदोलत् त ।

आन्दोलन न० आन्दोल–भावे ल्युट् । पुनः पुनर्दोलने, सञ्चलने, अनुसन्धाने च ।

आम्बसिक्त त्रि० अम्बो भक्तं सिक्तमस्य ठक्। पाचके।

आम्बयिक त्रि० अम्बये प्रयत्नकुले भवः ठञ्। प्रयत्नकुलजाते।

आम्बाह्निक त्रि० अह्नि अह्नि अम्बहम् तत्र भवः ठञ्। प्रतिदिनसाध्ये पाकादौ।

आम्बीक्षिकी स्त्री० अनु वेदश्रवणानन्तरमीक्षा परीक्षणमन्वीक्षा सा प्रयोजनमस्याः तत्र साधु वा ठञि ङीप्। तर्कविद्यायाम् अध्यात्मविद्यायाञ्च। [मेदे पु०।

आप पु० आप्यते आप-कर्मणि। अपां समूहे। आप अच् वसु०

आपगा स्त्री० आपेन जलसमूहेन गच्छति वहति ड। नद्याम्।

आपण पु० न० आपणायन्ते विक्रीयन्तत्र आ+पण-नि० आधारे घ। हट्टे, क्रयविक्रेयद्रव्यशालायाञ्च। भावे च। क्रयविक्रयव्यवहारे पु०।

आपणिक त्रि० आपणा दायस्थानादागतः ठक्। क्रयादिकर्त्तरि वाणिजे। [प्रत्यक्षरूपे तर्कदोषे च।

आपत्ति स्त्री० आपतति आ+पत-क्तिन्। आपदि, प्रापणे, अनिष्ट०

आपद् स्त्री० आ+पद-क्विप्। विपत्तौ।

आपन न० आप-भावे ल्युट्। प्राप्तौ, मरीचे च। कर्मणि ल्युट्। क्रेये।

आपन्न त्रि० आ+पद-क्त। विपद्ग्रस्ते, प्राप्ते च।

आपन्नसत्त्वा स्त्री० आपन्नं सत्त्वं यया। गर्भवत्याम्।

आपमित्यक न० अपमित्य परीक्ष्यार्थं निर्दिष्टम् अप+मे-क्त ल्यप् ततोनिर्दिष्टेऽर्थे कक् किच्चात् वृद्धिः। तुल्यरूपद्रव्यविनिमयेन ग्रहणे।

आपराह्णिक त्रि० अपराह्णे भवः ठञ्। त्रिधा विभक्तस्य दिनस्य तृतीयभागभवे पितृश्राद्धादौ।

आपस् न० आप-असुन्। जले, "आपोभिर्मार्ज्जनम्" इति स्मृतिः। "सर्वमापोमयं जगत्" इति देवीभागवतम्।

आपस्तम्बिनी स्त्री० आपः स्तम्भति स्तम्भ-णिनि। विद्युन्मायां लतायाम्।

आपाक पु० समन्तात् परिवेष्ट्य पच्यतेऽत्र आ+पच—आधारे घञ्। (पोवान्) कुम्भकारस्य मृत्पात्रपाकस्थाने। [तत्काले, मार्गे च।

आपात पु० आ+पत—भावे घञ्। सहसा पतने, । आधारे घञ्

आपाततस् अव्य० आपात+तसिल्। अनिश्चये विनेत्यर्थे "आपाततो-यदर्थस्य" इति साहित्यदर्पणे।

आपान न० आपीयते सम्भूय सुरा पीयतेऽत्र आधारे ल्युट्। सुरापा-नार्थं सम्भूयोपवेशने, (चक्रे) मद्यपानसभायाञ्च।

आपानभूमि स्त्री० आपानस्य भूमिः। सुरापानस्थाने।

आपिङ्गर न० ईषत् पिङ्गरवर्णम्। स्वर्णे।

आपीड़ पु० आ+पीड़—अच्। शिखामालेऽ, शिरोभूषणे, स्तबक-स्थिर्निःसृतकाण्डे च।

आपीत न० ईषत् पीतम् प्रा०त०। माक्षिकधातौ। ईषत्पीते त्रि०।

आपीन न० आ+प्याय—क्त पीनभावः तस्य नत्वम्। (सेड़) ऊधसि। कूपे पु०। ईषत्स्फीते त्रि०।

आपूपिक न० अपूपः शिल्पमस्य ठक्। पिष्टकसमूहे पिष्टकसम्पादनेन जीव्यतीत्यादार्थं ठक्। पिष्टकाजीवे, तद्भक्षणकारके, तद्रच-यितरि, तद्भक्षणशीले च त्रि०।

आपूप्य पु० अपूपाय साधुः वा अत्र। सक्तुषु, गोधूमचूर्णादौ च।

आपृच्छा स्त्री० आ+प्रच्छ—अङ्। आलापे जिज्ञासायामाभाषणे च।

आप्त त्रि० आप—क्त। विश्वस्ते, प्राप्ते, लब्धे, सत्ये, रागद्वेषादिव-र्जिते, यथार्थोपदेष्टरि भ्रमादिशून्ये यथार्थज्ञातरि च।

आप्तकाम त्रि० आप्तः प्राप्तः कामः कामनाविषयो येन। सम्पूर्ण-काम नित्यतृप्ते। परमेश्वरे पु०।

आप्ति स्त्री० आप—क्तिन्। सम्बन्धे, योगे, लाभे प्राप्तौ च।

आप्तोक्ति स्त्री० आप्तस्य उक्तिः वच—क्तिन्। सन्दिग्धे विषयनिर्णयार्थं सिद्धान्तिवाक्ये, यथार्थज्ञवाक्ये च।

आप्य त्रि० अपामिदं अण् चातु० स्वार्थे ष्यञ्। जलसम्बन्धिनि। अपां विकारे तु अण्यञौ वक्तव्यौ वि० को० आप—यत्। प्राप्ये,

चाक्षुषमन्यत्तरोक्ते देवभेदे, (कङ्क) दक्षे । अलविशरे फेनादौ ।

आप्यायन न० आ+प्याय–ल्युट् । वृद्धौ, प्रीतौ च । स्विद्–ल्युट् । तर्पणे प्रीणने च । ल्यु । तत्कर्त्तरि त्रि० ।

आप्रच्छन न० आ+प्रच्छ–ल्युट् । आमन्त्रणे, गमनाज्ञामनसमये बन्धुनामन्योन्यकुशलजिज्ञासयानन्दसम्पादने ।

आप्रपद अव्य०प्रपदं पादाग्रं तत्पर्य्यन्तम् अव्ययी० । पादाग्रपर्य्यन्ते ।

आप्रपदीन त्रि० आप्रपदं पादाग्रान्तं प्राप्नोति ख । पादाग्रान्तं लम्बमाने वस्त्रादौ । [सर्वतः वस्त्रकृत्तने च ।

आप्लु(प्लो)व पु० आ+प्लु–घञ्–अप् वा । स्नाने । (जयन्ताप) । अजानां

आप्लुत त्रि० आ+प्लु–क्त । स्नाते । भावे क्त । स्नाने न० ।

आप्लुतव्रत पु० आप्लुतं वेदाध्ययनानन्तरं स्नानं व्रतमस्य । अधीतवेदे, अक्षतस्नातस्नात्रमे ब्रह्मचारिभेदे स्नातके ।

आबद्ध न० आ समन्तात् बद्धम् बन्ध–भावे क्त । दृढबन्धने । आधारे क्त । प्रेम्णि । कर्म्मणि क्त । भूषणे । करणे क्त । योक्त्रे पु० । बद्धे आप्ते प्रतिरुद्धे च त्रि० ।

आबन्ध पु० आ+बन्ध–घञ् । दृढबन्धे, योक्त्रे च ।

आबाधा स्त्री० आ+बाध–अ । पीड़ायां क्लेशे च । लीलावत्यादौ प्रसिद्धे त्रिकोणक्षेत्रे लम्बोभवपार्श्वस्थे क्षेत्रमध्ये रज्जुनिक्षेपाज्जायमाने भूखण्डे ।

आबिल त्रि० आ+बिल भेदने, क । कलुषे, अस्वच्छे च ।

आबुक पु० आमनन्ति आप् क्विप् आपमुक्तनोति उद्+तन–ड । नाखोक्तौ भगिनीपतौ ।

आभरण न० आ+भृ–कर्मणि ल्युट् । भूषणे ।

आभा स्त्री० आ+भा–अङ् । दीप्तौ, शोभायाम्, कान्तौ, उपमाने, वातरोगभेदे च ।

आभाषण न० आ+भाष–ल्युट् । आलापे, परस्परकथने च ।

आभाषित त्रि० आ+भाष क्त । अभिमुखीकृत्य कथिते ।

आभास पु० आ+भास–घञ्। प्रतिबिम्बे, दीप्तौ, मन्वादेरादौ सङ्क्रान्तिदर्शनोत्थापने अवतारणे च।

आभास्वर पु० आ+भास-वरच्। चतुःषष्टिमिते, द्वादशमिते वा गण-देवताभेदे। दीप्ते त्रि०।

आभिजात्य न० अभिजातस्य भावः ष्यञ्। कौलीन्ये, पाण्डित्ये च।

आभीक्ष्ण्य न०स्वार्थेष्ण्। अत्यर्थे। तद्वति त्रि०। क्रियाविशेषणत्वे न०।

आभीक्ष्ण्य न० अभीक्ष्णस्य भावः ष्यञ्। पौनःपुन्ये।

आभीर पु० आ समन्तात् भियं राति रा–क। आकिर इति ख्याते ब्राह्मणादम्बष्ठायामुत्पन्ने वर्णसङ्करभेदे गोपे देशभेदे च।

आभीरपल्लि(ल्ली) स्त्री० आभीराणां पल्लिः। गोपग्रामे, पक्षे ङीप्।

आभील न० आ समन्तात् भयं लाति आभी+ला–क। कष्टे तद्वति, भयानके च त्रि०।

आभोग पु० आ+भुज–भावे आधारे वा घञ्। वस्त्रस्य अन्ते परिपूर्णतायां, यत्ने, गानसमाप्तौ (भणिता) कविनामख्यापने च।

आभ्युदयिक त्रि० अभ्युदयः प्रयोजनमस्य ठक्। चूड़ादि कर्मणि तदृद्ध्यर्थं कर्त्तव्ये श्राद्धे।

आम त्रि० आ ईषत् अश्यते पच्यते आ+अम–कर्मणि घञ्। अपक्वे वैद्यकोक्ते अजीर्णताख्ये रोगभेदे पु०। [ऋसांसादितत्त्वगन्धाद्ये।

आमगन्धि न० आमस्यामस्य गन्धइव गन्धो यत्र इत् समा०। अप-

आमनस्य न० अप्रशस्तं मनो यस्य तस्य भावः ष्यञ्। दुःखे।

आमन्त्रण न० आ+मन्त्र–ल्युट्। अभिनन्दने, सम्बोधने, कामचारानुज्ञारूपे स्वनामख्याते च। अवश्यकर्त्तव्ये नियोगो निमन्त्रणं यथा श्राद्धादौ भोजने, अकरणे प्रत्यवायासाधने नियोग आमन्त्रणं यथा स्वस्त्रियेऽयने। [संबोधने या प्रथमा तस्यां न०।

आमन्त्रित त्रि० आ+मन्त्र–क्त। आमन्त्रिते, संबोधिते च। व्याकरणे

आमय पु० आमं रोगं यात्यनेन वा–करणे घञर्थे क आ+यीञ् हिंसायां करणे अच् वा। रोगे।

आमयाविन् त्रि० आमयोऽस्यास्ति विनि दीर्घश्च। रोगयुक्ते।

आमर्शन न० आ+मृश-ल्युट्। स्पर्शे। [मित्सुट्टः]
आमर्ष पु०न+मृष-घञ् दीर्घः। क्रोधे, "निष्प्रयोगं निरामर्षं निर्वीर्य्य-
आमलक पु० आ+मल-युन्। वासकवृक्षे। ङीष्। धात्र्याम् ति-
व्यफलायां च स्त्री०। तस्याः फलं फले लुगिति तद्धितस्य लुक्।
धात्रीफले न०। [ख्याते वातरोगभेदे।
आमवात पु० आमयति पीडयति आम-णिच्-अच् कर्म०। स्वनाम-
आमातीसार पु० कर्म०। स्वनामख्याते रोगभेदे।
आमाशय पु० आमस्याशयः। नाभिस्तनयोर्मध्यभागे अपाकस्थाने।
आमिक्षा स्त्री० आमिष्यते सिच्यते मिष-सक्। तप्ते पक्के दुग्धे
दधियोगजायां (छाना) विकृतौ। [आमिक्षीयमधुत्व।
आमिक्षीय न० आमिक्षायै हितं छ। आमिक्षोपकरणे दधि च
आमिष न० पु०आ+मिष-सेचने क। मांसे, भोज्यवस्तुनि, उत्कोचे,
रुचिरूपादौ, लोभसञ्ज्ञये, जामे, कामगुणे, भोजने, विषये च।
आमिषप्रिय पु० ईत०। कङ्कपक्षिणि। मांसाभिलाषिणि त्रि०।
आमिषाशिन् त्रि० आमिषमश्नाति। अश-णिनि। मांसभक्षके।
आमिषी स्त्री० आमिषनामैकदेशनामिकायां जटामांस्याम्।
आमुक्त त्रि० आ+मुच परिधाने क्त। परिहिते। कर्त्तरि क्त। परि-
हितकवचे जने।
आमुख न० आ+मुच् करणे अच् "आमुखं तद्विजानीयात् बुधैः प्र-
स्तावना मता" इत्युक्तायां नाटकाङ्गे प्रस्तावनायाम्।
आमुष्मिक त्रि० अमुष्मिन् परलोके भवः ठक् सप्तम्या अलुक् टिलो-
पश्च। परलोके जन्मान्तरे भवे वस्तुनि। स्त्रियां ङीष्।
आमुष्यायण त्रि० अमुष्यापत्यस्यौत्तरापि सङ्घत्वेन सञ्चरितत्वेन
च प्रख्यातस्यापत्यं फक् षष्ठ्या अलुक्। सङ्घभोक्तरि।
आमोद पु० आ समन्तात् मोदयति आ+मुद+णिच्-अच्। अतिदूर-
व्यापके गन्धे, गन्धमात्रे च। आ+मुद भावे घञ् हर्षे।
आमोदिन् त्रि०आमोदयति सुरभी करोति आमोद+अस्त्यर्थे णिच्-
णिनि। सुखसुगन्धितापादके कर्पूरादौ, हृष्यति च।

आम्नाय पु० आम्नायते अभ्यस्यते आ+म्ना–घञ्। वेदे, आगमे निगमे, गुरुपरम्परागते, सदुपदेशे, मंत्रे, कुलक्रमेण कथने च। भावे घञ्। अभ्यासे। [तत्फलादौ न०।

आम्र पु० अम–गत्यादिषु रक्। दीर्घश्च। खनामख्याते वृक्षे।

आम्रातक पु० आम्रं तद्वत् आ ईषत् अतति याति आ+अत–ख्वुल्। (आमड़ा) इति ख्याते वृक्षे।

आम्रावर्त्त पु० आम्रइव आ ईषत् तुल्यरूपतया वर्त्तते आ+वृत–अच्। आम्रातकवृक्षे।

आम्रेडित न० आ+म्रेड–उन्मादे अच् आम्रेड्येन उन्मत्तेनेवाचर्य्यते। आम्रेड+आचारे क्विप् ततः क्त। उन्मत्तेन यथा कथितस्य पुनःपुनः कथनं क्रियते एवं कथितस्य द्विरुक्तिकथने।

आम्ला स्त्री० आ समन्तात् अम्लो रसो यस्याः। तिन्तिड्याम् स्वार्थे कनि आम्लिकाऽप्यत्र।

आय पु० आ+इण्–अच् अय घञ्। लाभे। प्राप्तौ, धनागमे, ज्योतिषोक्ते एकादशस्थाने यामादौ स्वामिपाद्यभागे, वनितागारप्रान्तरे च।

आयःशूलिक त्रि० अयःशूलेनार्थानन्विच्छति। तीक्ष्णोपायेनाभीष्टसाधके जने। [अतियत्नशालिनि।

आयत त्रि० आ+यम–क्त। दीर्घे, आकृष्टे च। आ+यत–अच्।

आयतच्छदा स्त्री० आयतः दीर्घः छदोऽस्याः। कदल्याम्।

आयतन न० आयतन्तेऽत्र यत–आधारे ल्युट्। देवादिवन्दनस्थाने, आश्रये, विश्रामस्थाने, यज्ञस्थाने च।

आयति(ती) स्त्री० आ+या–क्तिन् वा ङीप्। उत्तरकाले, प्रभावे, फलदानकाले च। आ+यम–क्तिन्। सङ्गमे, दैर्घ्ये, प्रापणे च।

आयत्त त्रि० आ+यत–कर्त्तरि क्त। अधीने, वशीभूते।

आयत्ति स्त्री० आ+यत–क्तिन्। क्लेशे, वशित्वे, सामर्थ्ये, दीप्तौ, गमने, प्रभावे च। [लौहकवचे स्त्री० ङीप्।

आयस न० अयसा निर्म्मितं तद्विकारो वा अण् लौहधात्वादौ

आयस्त त्रि० आ+यस–क्त । खिन्ने, क्लेशिते, हते तीक्ष्णीकृते ।
आयाम पु० आ+यम–घञ् । दैर्घ्ये ।
आयास पु० आ+यस–घञ् । परिश्रमे, अतियत्ने च ।
आयु पु० इण–उण । जीवनकाले, "मा वधिष्टा जटायुं मामू" इति भट्टिः । [कर्म्माध्यक्षे, कुशले च ।
आयुक्त त्रि० आ+युज–क्त । व्यापारिते, प्रेषयुक्ते, नियुक्ते,
आयुध न० आ+युध–करणे घञर्थे क । प्रहरणमात्रे ।
आयुधिक पु० आयुधं शिल्पमस्य ठक् । शस्त्राजीवे । तदर्थं क आयुधीयश्च ।
आयुर्वेद पु० आयुर्विद्यते लभ्यतेऽनेन विद लाभे करणे घञ् आयुर्वेत्यनेन चिकित्सापनेन विद–ज्ञाने करणे घञ् वा । चिकित्साशास्त्रे वेदस्योपाङ्गे ।
आयुर्वेदिन् त्रि० आयुर्वेदोवेद्यतया विद्यतेऽस्य इनि । आयुर्वेदज्ञे चिकित्सके । [वधिके तृतीये योगे पु० ।
आयुष्मत् त्रि० आयुर्विद्यतेऽस्य मतुप् । चिरजीविनि । विष्णुस्मा-
आयुष्य त्रि० आयुःप्रयोजनमस्य स्वर्गादिभ्यो यत् । आयुषोहितकारके पथ्ये । स्वार्थे यत् आयुषि न० ।
आयुस् न० इण–असि–णिच् । जीवनकाले "आयुषः शमे" इति रघुः ।
आयोग पु० आ+युज–घञ् । गन्धमाल्योपहारे, व्यापारे, रोधे च ।
आयोगव पु० अयोगव एव स्वार्थे अण् मूढादैच्यायासुत्वम् । प्रतिलोमवर्णसङ्करजे जातिभेदे ।
आयोजन न० आ+युज–ल्युट् । उद्योगे, आहरणे च ।
आयोधन न० आ+युध–आधारे ल्युट् । युद्धस्थाने । भावे ल्युट् । योधने, तत्फले वधे च ।
आर पु० ऋ–कर्त्तरि घञ् । मङ्गलग्रहे, शनिग्रहे, मधुराम्लफले वृक्षभेदे च । पित्तले, कोणे, प्रान्तभागे, क्षुरप्रलोहे च न० ।
आरकूट पु० न० । आरं पित्तलं कूटयति रूपीकरोति अच् । पित्तलाभरणे । "किमारकूटाभरणेन न श्रिय" इति नैषधम् ।

आरक्त पु० आ+रञ्ज–क्त । हस्तिकुम्भाधःस्थले, हस्तिमस्तकचर्मणि, सैन्धे च । रक्ते त्रि० । भावे घञ् । रक्तायाम् ।

आरग्वध पु०आ+रगे–गङ्कायां क्विप् आरक् रोगगङ्कामपि हन्ति अच् वधादेशश्च । (सोंदाल) इति ख्याते वृक्षे ।

आरट्ट पु० आरभ्यते विख्याप्यते आ+रट टच् टस्य नेत्वम् । अश्वोत्पत्तिस्थाने (आरब) देशभेदे ।

आरट्टज पु० आरट्टे देशे जायते जन–ड । (आरब) स्थानजाते घोटके ।

आरणि पु० आ+कृ–अनि । आवर्त्ते यमसां स्वतोभ्रमे ।

आरण्य त्रि० अरण्ये भवः यञ् । वनजाते मृगसिंहादौ ।

आरण्यक पु०अरण्ये भवः मनुष्यादिः वुञ् । पथि,अध्वनि, न्याये, विहारस्थाने मनुष्ये, हस्तिनि च । वेदस्यांशविशेषे न० । "आरण्यकमधीत्य चेति" मनुः ।

आरति स्त्री० आ–रम क्तिन् । उपरमे, निवृत्तौ च ।

आरनाल न० आर्च्छति आ+कृ–अच् आर नल-गन्धे घञ् । आरो नालोगन्धो यस्य । काञ्जिके । वा कप् । आरनालकमप्यत्र ।

आरभटी आरभ्यतेऽनया आ+रभ–अटि ङीप् नाट्ये रचनाभेदे ।

आरम्भ पु० आ+रभ–घञ् मुम् च । त्वरायाम् वेगे–उद्यमे, दर्पे, उपक्रमे, प्रस्तावनायाञ्च । कर्मणि–घञ् । आरभ्यमाणे ।

आरम्भवाद पु०आरम्भस्य वादः परीक्षापूर्वकः कथाभेदः । न्यायमते वैशेषिकमते च "पृथिव्यब्वह्निवायूनां क्रियासंयोजिताश्रयः द्व्यणुकादिक्रमेणैवमारभन्ते कृदं महदिति" तयोः स्वीकारात् ।

आर(रा)व पु० आ+रु–घञ् अप् वा । शब्दमात्रे ।

आरा स्त्री० आ+कृ–अच् । चर्मभेदकास्त्रभेदे । (टेको) इति ख्याते लौहास्त्रे च । "आराग्रमात्रो ह्यवरोऽपीति" श्रुतिः ।

आरात् अव्य० आ+रा–आति । दूरे, समीपे च ।

आरात्रिक न० अरात्रावपि निवृत्तं ठञ् दीपो हि रात्रावेव प्रदर्श्यते कृदं दिनेऽपि दर्श्यते । (आरति) नीराजनकर्मणि ।

आराधन न० आ+राध–ल्युट्। पाके, साधने, पूजने, तोषणे, प्राप्तौ च।

आराधना स्त्री०आ+राध–णिच् युच् स्त्रीत्वात् टाप्। सेवायाम्।

आराम पु० आ+रम–आधारे घञ्। उपवने, क्रीडास्थिते च। [गामिणि त्रि०।

आरालिक पु० आरालं कुटिलं चरति ठक्। पाचके। वक्र-

आरु पु० रु–उण्। वृक्षभेदे, कर्कटे, शूकरे च।

आरेवत पु० आरेवयति रेचयति मलं आ+रेव–णिच्–अतच्। अत्म-मसारके (सोँन्दाल) आरग्वधवृक्षे।

आरोग्य न० अरोगस्य भावः ष्यञ्। रोगराहित्ये अनामये।

आरोग्यशाला स्त्री० आरोग्यार्था शाला। चिकित्सास्थले।

आरोप पु० आ+रुह–णिच्–करणे ल्युट्। आरक्षिन् अन्यधर्मा-वभासे यथा रज्ज्वां सर्पज्ञानम्। रूपकालङ्कारादौ तु सत्यपि बाधज्ञानेऽभेदावबोधः शाब्दः न प्रतिरुध्यते।

आरोह पु० आ+रुह–घञ्। दैर्घ्ये। उत्तमस्त्रीणां नितम्बे, आ-रोहणे, उच्छ्राये, परिणाहभेदे च।

आरोहण न०आ+रुह–करणे ल्युट् पाषाणादिरचिते उच्चप्रासाद-रोहणसाधने (सिडि) सोपाने। भावे घञ्। निम्नस्थानादूर्द्ध–गमने।

आर्चिक पु०ऋचि भवः ऋचो व्याख्यानो ग्रन्थो वा ठञ्। ऋचां व्याख्याने। ऋचि भवः ठक्। ऋग्वेदभवे त्रि०। ऐकर्चि आर्चीकदृश्यत्वत्र त्रि०।

आर्जव पु०ऋजोर्भावः अण्। सरलतायां परप्रवारणाराहित्ये।

आर्त्त त्रि० आ+ऋ–क्त। पीडिते, दुःखिते, अस्वस्थे च।

आर्त्तव न० ऋतुरस्य प्राप्नः अण्। स्त्रीपुष्पे, पुष्पे च। ऋतुरस्य प्राप्नः अण्। ऋतुजे फलपुष्पादौ त्रि०। बोधक्याम् स्त्री०ङीप्।

आर्त्ति स्त्री० आ+ऋ–क्तिन् ऋति धातौ दृष्टिः। पीडायाम् धनुष्कोट्याञ्च।

आर्त्विज्य न०ऋत्विजो भावः कर्म वा ष्यञ्। ऋत्विग्भोग्ये कर्मणि।

आर्थिक त्रि० अर्थं गच्छति अर्थात् आगच्छति वा ठक् । अर्थयाचके अर्थागते च । [ष्ठे नवमे च स्त्री० ङ्यां० ।

आर्द्र न० अर्द्द–रक् दीर्घश्च । क्लिन्ने, सजलवस्तुनि । अस्त्रिनीत आरभ्य

आर्द्रक न० आर्द्रायां भूमौ जातं वुन् । (आदा) स्वनामख्याते मूलभेदे ।

आर्य्य पु० ऋ–ण्यत् । स्वामिनि, गुरौ, सद्बुद्धि च । श्रेष्ठकुलोत्पन्ने पूज्ये, श्रेष्ठे, सज्जने, साधौ साध्वी, उदारचरिते, शान्तचित्ते, "कर्त्तव्यमाचरन् काममकर्त्तव्यमनाचरन् । तिष्ठति प्रकृताचारे स वा आर्य्य इति स्मृतः" इत्युक्तलक्षणे जने च त्रि० ।

आर्य्यक पु० अतिशयेनार्य्यः पितोरपि पूज्यत्वात् प्राशस्त्ये कन् । पितामहे, मातामहे च । स्वार्थे कन् । श्रेष्ठे त्रि० ।

आर्य्यपुत्र पु० आर्य्यस्य श्वशुरस्य पुत्रः । पत्यौ, गुरुपुत्रे च ।

आर्य्यावर्त्त पु० आर्य्या आवर्त्तन्ते अत्र आ+वृत–आधारे घञ् । "आ समुद्रात्तु वै पूर्व्वादा समुद्रात्तु पश्चिमात् । तयोरेवान्तरं गिर्य्योर्मध्यमार्य्यावर्त्तं प्रचक्षते" इति मनूक्ते देशभेदे ।

आर्ष त्रि० ऋषेरिदम् अण् । ऋषिप्रणीते धर्म्मशास्त्रे, तत्सृष्टे वेदे च । "आर्षं धर्म्मोपदेशञ्चेति" मनुः । आर्षं आदाय गोयुगमित्युक्ते विवाहभेदे पु० ।

आर्हत पु० अर्हत इदम् अण् । बुद्धविशेषे । तत्सम्बन्धिनि त्रि० ।

आर्हन्ती स्त्री० न० अर्हतोभावः, अञ् तुम् च पित्त्वात् ङीष् यलोपः । योग्यतायाम् । [अनर्घे, बहुमूल्ये च त्रि० ।

आल न० आलयन्ति भूषयन्ति आ+अल–भूषादौ अच् । हरितालें ।

आलभन न० आ+लभ–ल्युट् । स्पर्शे ।

आलम्ब पु० आ+लबि–कर्म्मणि घञ् । अवलम्बे, आश्रये च ।

आलम्बन न० आ+लबि–ल्युट् । आश्रये, अलङ्कारभेदे रसाश्रये विभावे च । [भूतिः" स्पर्शे च ।

आलभ्य पु० आ+लभ घञ् तुम् च । वधे, "अश्वालभ्यं गवालभ्यमिति

आलय पु० आलीयतेऽस्मिन् आ+ली–आधारे अच् । गृहे । अव्ययी०

लयपर्य्यन्ते । अव्य० "पिबत भागवतं रसमालयमिति" भागव० ।

आलयविज्ञान न० आलयं लयपर्य्यन्तं स्थायि विज्ञानम् । बौद्धमते लयपर्य्यन्तं स्थायिनि अहङ्काराख्ये विज्ञाने तन्मते हि सर्व्वज्ञानानां वासिकतयाऽनुभवजन्यसंस्कारस्य तस्मिन् ज्ञाने एव प्रकल्पनात् पूर्वानुभूतस्य स्मृतिसम्भवः ।

आलवाल न० आ समन्तात् जलमवलाति आ+ला–क । वृक्षमूले सेकार्थं मृदादिघटिते जलाधारे सेतौ ।

आलस्य न० अलसस्य भावः ष्यञ् । सत्यपि सामर्थ्येऽकर्त्तव्येऽनुत्साहरूपेऽलसत्वे । अलसएव प्राज्ञादित्वात् स्वार्थे ष्यञ् । अलसत्वयुक्ते । [मन्थरमात्रे च ।

आलान न० आलीयतेऽत्र आ+ली–ल्युट् । गजबन्धनस्तम्भे रज्ज्वां,

आलाप पु० आ+लप–करणे घञ् । कथोपकथने, सम्भाषणे च ।

आलाबू स्त्री० आ+लबि– ऊङ् नलोपश्च । तुम्बाम् ।

आलावर्त्त न० आ समन्तात् जलमत्यर्थं वर्त्तयते वाल्यते आ+अल–इत–णिच् घञ् । वस्त्रनिर्म्मिते व्यजने ।

आलि(ली) स्त्री० आ+अल इन् । आगन्तुकजलावारणार्थं ग्रसेकजलधारणार्थं च वृतिरूपे सेतौ, सख्यां समवयस्कायां, षड्भौ आरामादिवृत्तभेदेषु, सन्ततौ च । वा ङीप् आलीत्यपि । शुद्धान्तःकरणे अत्यर्थे च त्रि० । भ्रमरे, वृश्चिके च पु० ।

आलिङ्गन न० आ+लिगि–ल्युट् । प्रीतिपूर्व्वकसमन्योन्यदेहसंश्लेषणे, परिरम्भे च ।

आलिङ्गय त्रि० आ+लिगि–ण्यत् । आलिङ्गनीये, यथाश्रुतिवदङ्के च ।

आलिञ्जर पु० अलिञ्जर एव स्वार्थे अण् । (जाला) इति ख्याते वृत्तभेदे जलपात्रे मणिबन्धे ।

आलिम्पन न० आ+लिप–ल्युट् सुम् च । मङ्गलार्थं लेपने ।

आलीढ न० "नमिता पूर्व्वजङ्घा तु पश्चिमा प्रसृता भवेत् । असंयोमप्रकायः स्यादालीढस्य च लक्षणम्" इत्युक्तलक्षणे "आलीढं दक्षिणं पादम्" इत्युक्तलक्षणे च धनिनां पादविन्यासविशेषेण नृ-

स्थाने । आ+लिह्–क्त । भुक्ते, खादे च त्रि० । "सेनान्यमात्यो-ऽलिवाल्लुराक्षैः" इति रघुः । भावे क्त लेहने न० ।

आलीनक न०आ ईषत् प्रवासेन अग्निसंबन्धमात्रेण लीयते द्रवीभवति आ+ली–क्त संज्ञायां कन् । (रां) इति ख्याते रङ्गे ।

आलु पु०आ+लु–डु । खनामख्याते कन्दभेदे, भेलके, पेचके पक्षिणि च । (आरी) इति ख्यातायां क्षुद्रघटिकायां स्त्री० ।

आलुक न० आलुरेव स्वार्थे कन् । मूलभेदे, काष्ठालुशङ्खालुप्रभृतिवन्मूलभेदे क । शेषे नागे पु० । आ+लू–क्विप् संज्ञायां कन् ङीप् । आलूकी रक्तालुप्रभेदे स्त्री ।

आलेख्य न० आ+लिख–आधारे ण्यत् । चित्रपटादौ ।

आलेख्यशेष त्रि० आलेख्यं चित्रमेव शेषो यस्य ब० । मृते, तस्य चित्रे एव प्रतिकृतिरूपेण अवस्थानात् ।

आलोक पु० आ+लुक–घञ् । दर्शने, उद्द्योते, वह्निनामालोकये-त्यादि स्तुतिवाक्ये । "आलोकशब्दं वयसां विरावैः" इति रघुः ।

आलोचन न०आ+लुच णिच् भावे ल्युट् । कर्त्तव्यतायाऽवधारणे, विवेचने च । "अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम् । बालमूकादिविज्ञानसदृशं मुग्धवस्तुजम् । ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्यया । बुद्ध्याऽवसीयते सापि प्रत्यक्षत्वेन सम्मता" इति सांख्योक्ते निर्व्वाक्यके मुग्धवस्तुविषयके प्राथमिके ज्ञाने च ।

आवपन न० आ उप्यते स्माप्यतेऽत्र ल्युट् । धान्यस्थापनपात्रे (धल्ला) इति ख्याते । आ+वप–णिच्–आधारे ल्युट् । सर्व्वसस्यक्षेत्रे ।

आवरक न० आ+वृ–करणे अप् संज्ञायां वुन् । अपवारके, आच्छादके वस्त्रादौ ।

आवरण न० आ+वृ–करणे ल्युट् । (ढाल) चर्म्ममयफलके । भावे ल्युट् । आच्छादने, वेदान्तमते अविद्यादिना ज्ञानप्रकाशाच्छादने च ।

आवर्जित त्रि०आ+वृज–णिच् क्त । आकृष्टे, क्षिप्ते, दत्ते, आनमिते च ।

आवर्त्त पु०आ+वृत–भावादौ घञ् । चक्राकारेण जलस्य स्वयं भ्रमणे,

भ्रुवोर्मध्ये रोमसंस्थानभेदे घोटकचिह्ने वामावर्त्तनामके भव्ये। आवर्त्तने, चिन्तने च। अव्य। मेघाधिपभेदे आधिक्यधातौ च न०।

आवर्त्तन न० आ+वृत–णिच् ल्युट्। (आवाटान) दुग्धादेरालोड़ने। आवर्त्तते परिवर्त्तते यस्मिन् काले। मध्याह्नोत्तरं यदा पश्चिमतः पूर्व्वस्यां दिशि सूर्य्यच्छाया प्रथमं भवति, तस्मिन् काले "आवर्त्तनसमीपे वा" इति स्मृतिः धातुद्रव्यस्य द्रवीकरणे च।

आवर्त्तनी स्त्री० आवर्त्तते द्रवीक्रियते आलोड्यतेऽत्र आ+वृत–णिच्–आधारे ल्युट्। ताम्रादिधातुद्रव्यस्य द्रवीकरणाधारे लक्षाये (कुची) पात्रभेदे, मूषायाम्।

आवर्त्तित त्रि० आ+वृत–णिच् क्त। अभ्यस्ते, घुर्णिते च।

आवर्ह पु० आ+वृह–घञ्। उत्पाटने। [ङीप्।

आवश्यक त्रि० अवश्यं भव्यः मनोज्ञा० वुञ्। नियतकर्त्तव्ये स्त्रियां

आवसथ पु० आवसत्यत्र वस–अथच्। वसतिस्थाने, विश्रामस्थाने, व्रतभेदे च। [गोतल्ये राशीकृते धान्ये च।

आवसित त्रि० आ+अव+सो–क्त। धृतधान्ये, गर्हणानन्तरकर्म–

आवहमान त्रि० आ+वह–शानच्। क्रमागते।

आवाप पु० आ+वप–आधारे वा घञ्। आलवाले, (थला) पात्रभेदे, प्रक्षेपे, भाण्डे, वलये, यत्नचिन्तने परराष्ट्रचिन्तने, निम्नोन्नत भूमौ, प्रधानहोमे च। [वलयादौ।

आवापक पु० आ+वप–कर्म्मणि घञ् संज्ञायां कन्। प्रक्षेपाधारे

आवापन न० आ+वप–णिच्–करणे ल्युट्। (तात) क्षतबन्धे।

आवास पु० आ+वस–आधारे घञ्। वासस्थाने गृहादौ।

आवाहन न० आ+वह–णिच् ल्युट्। सान्निध्याय देवानामाकर्षणे।

आविक न० अविना तन्नोच्या निर्म्मितं ठक्। कम्बले। अवेर्मक्ष संम्बन्धिनि त्रि०। [स्थाते करमर्हत्वे च।

आविग्न पु० आ+विज–कर्त्तरि क्त। उद्विग्ने (पाखिआमला) इति

आविद्ध त्रि० आ+व्यध–क्त। विद्धे, वक्रे, पराकृते, क्षिप्ते, अभिभूते, मूर्खे च।

आविध पु० आविध्यतेऽनेन व्यध-करणे क। कालादिवेधनसाधने (अमर) (तरपिन) सूच्याकारायुधे अस्त्रे। [आग्नेये च।

आविष्ट त्रि० आ+विश-क्त। भूतादिग्रस्ते, आवेशयुक्ते, निविष्टे

आविस् अव्य०आ+अव-इसुन्। प्रकाशे। एतच्छब्देन सह भूधातुः-प्रकाशार्थे यथा आविर्भावः। कृञ्धातुः प्रकाशकरणेऽर्थे यथा आविष्कारः।

आवीरचूर्ण पु० आ समन्तात् विशेषेण ईर्यते क्षिप्यते आ+वि+ईर-क्त कर्म०। आवीर इति ख्याते फलगुनि "आवीरचूर्णं रविरं सुरुतां परमेश्वर" इति पुराणम्।

आवुक पु० आवति पालयति उण् संज्ञायां कन्। नाप्योक्तौ जनके।

आवृत् स्त्री० आ+वृत-सम्पदादित्वात् क्विप्। परिपाट्यामनुक्रमे।

आवृत त्रि० आ+वृ-क्त। वेष्टिते ज्ञताच्छादने।

आवृत्त त्रि० आ+वृत-क्त। निवृत्ते, "आवृत्तानां गुरुकुलादिति" स्मृतिः अभ्यस्ते, गुणिते च।

आवृत्ति स्त्री० आ+वृत-क्तिन्। अभ्यासे, पुनःपुनर्गुणने "चक्रुश्चा-यतावृत्तिपाठाद्" इति पुराणम्। [वृद्धदारकवृत्ते।

आवेगी स्त्री० आवेगोऽस्त्यस्याः अर्श आद्यच् गौरा० ङीष्।

आवेश पु० आ+विश-घञ्। अहङ्कारभेदे, संरम्भे, अभिनिवेशे, आसङ्गे, अनुप्रवेशे, यथा भूतावेशः। यक्षभये, भूतादिना रोगे च।

आवेशन न० आ+विश-आधारे ल्युट्। शिल्पशालायाम् भूतावेशे रोगे, सूर्येन्दुपरिधौ च।

आवेशिक त्रि० आवेशे भवः आगतो वा ठञ्। अतिथौ असाधारणे स्त्रीबे बान्धवादौ च। [(वेड़ा)।

आवेष्टक पु० आवेष्टयति ण्वुल्। आवरणकारके प्राचीरादौ

आशंसा स्त्री० आ+शंस+अ। अप्राप्तस्य प्राप्तीच्छायाम्, कृतार्था-भंसने च।

आशंसित त्रि० आ-शंस-क्त। वाञ्छिते, कथिते च। भावे क्त। कथने न०।

आशंसु त्रि० आ+शनृच्—उ। इच्छावति, इष्टार्थलाभेच्छौ, कथञ्चि-तरि च।

आशङ्का स्त्री० आ+शङ्कि—अ। त्रासे, सङ्कोचे, ईषद्वितर्के च।

आशय पु० आ+शी—अच्। अभिप्राये, आधारे, विभवे, मनसष्टचे वैद्यकोक्ते अजीर्णे स्थाने च। आ फलविपाकात् चित्तभूमौ शेते इति कर्त्तरि अच् कर्मजन्ये वासनारूपे संस्कारे, धर्माधर्मरूपे अदृष्टे च। आधारे अच्। आशयवति चित्ते। भावे अच्। शयने स्थाने च।

आशर पु० आशृणाति आ+शृ—अच्। अग्नौ, राक्षसे च।

आशा स्त्री० आ समन्तात् अश्नुते अश—अच्। दिशि, अशक्योपा-यार्थविषयायाम्, दीर्घाकाङ्क्षायाम् अनधिगतविषयायां तृष्णायां च। [ईत० तृष्णासम्बन्धे दिशां बन्धे च।

आशाबन्ध पु० आशां दिशं बध्नाति अच्। मर्कटजाले, बन्ध-घञ्

आशास्य त्रि० आ+शास—यत्। आशीःसाध्ये, आशंसनीये च "आशास्यमन्यत् पुनरुक्तम्" इति रघुः।

आशित त्रि० आ+क्र्यादि० अश—क्त। भुक्ते अशनेन तृप्ते च।

आशितङ्वीन अशितङ्वीनवत् सर्वम्। दीर्घादिरिति बहुवः।

आशितम्भव पु० अशितम्भवत् सर्वम्। दीर्घादिरिति बहुवः।

आशिस् स्त्री० आ+शास—क्विप् दीर्घत्वम्। हितप्रार्थने अभीष्टवृद्धि-प्रार्थने, सर्पतालुस्थदन्ते, सर्पदंष्ट्रायामाशीत्यपि पुंसो०।

आशीर्वाद पु० आशिषोवादः वचनम् वद—घञ्। मङ्गलप्रार्थने आशीर्वचने च।

आशीर्विष पु० आशिषि आख्यां वा विषोऽस्य पुंसो०। सर्पे।

आशु अव्य० अश—उण्। क्षिप्रत्वे। वर्षाभवे यष्टिकादौ धान्ये, माटरे ओषधौ च पु०न०। क्षिप्रे त्रि०। क्रियाविशेषणत्वे न०।

आशुग पु० आशु+गम—ड। वायौ, बाणे, सूर्ये च। शीघ्रगामिनि त्रि०।

आशुपत्री स्त्री० आशु पत्रं यस्याः । शङ्खपुष्पीलतायाम् ।

आशुशुक्षणि पु० आ+शुष–सन्+अनि । अग्नौ, वायौ च ।

आशौच न० अशौचमेव स्वार्थेऽण् । अशौचसमानार्थे वैदिककर्म्मानर्हावस्थायाम् ।

आश्चर्य्य न० आ इति चर्य्यतेऽभिनीयते आ+चर यत् सुट् च । अपूर्वेऽद्भुते चित्ते, विस्मये च । अद्भुतवति त्रि० ।

आश्वन पु० आ+अश–ल्युट् । सूर्य्यसारथौ अरुणे । [रघुः ।

आश्यान त्रि० आ+श्यै–क्त । ईषद्घनीभूते "पक्वश्चाश्यानकर्दमान्" इति

आश्रम पु० न० आ+श्रम आधारे घञ् अथवा । ब्रह्मचर्य्यादिके शास्त्रोक्ते धर्म्मभेदे, मुनीनां वासस्थाने, मठे, वने च कलौ तु ब्रह्मचर्य्यवानप्रस्थौ न स्तः गृहस्थभिक्षुकाश्रमावेव "गृहस्थो भिक्षुकश्चैव आश्रमौ द्वौ कलौ युगे" इति स्मरणात् सर्व्वक्लेशहानेन विश्रामस्थाने परमेश्वरे च ।

आश्रमधर्म्म पु० आश्रमेषु विहितो धर्मः । ब्रह्मचार्य्यादीनां शास्त्रविहिते धर्मे ।

आश्रय पु० आश्रीयतेऽसौ आ+श्रि–कर्म्मणि अच् । स्वामीप्ये, आधारे, गृहे, राज्ञां सन्धिप्रभृतिषु षट्सु गुणेषु मध्ये प्रबलशत्रोराश्रयणरूपे गुणे च ।

आश्रयाश पु० आश्रयमाधारं काष्ठमश्नाति अश–अण् । वल्मीके ।

आश्रव पु० आशृणोति वाक्यं आ+श्रु–अच् । अङ्गीकारे, लेशे च । आशृणोति वाक्यम् पचाद्यच् । प्रवर्त्तयितुं निवर्त्तयितुं वा वाक्ये वचनस्थिते ।

आश्रित त्रि० आ+श्रि–क्त । आश्रयप्राप्ते, शरणागते, आधेये च ।

आश्रुत त्रि० आ+श्रु–क्त । अङ्गीकृते, आकर्णिते च ।

आश्लेष पु० आ ईषदेकदेशेन श्लेषः सम्बन्धः आ+श्लिष–घञ् । एकदेशसम्बन्धे । [रथादौ त्रि० ।

आश्व न० अश्वानां समूहः अण् । अश्वसमूहे । अश्वैरुह्यतेऽण् ।

आश्वत्थ न० अश्वत्थस्य फलमित्यण् तस्य न लुक् । अश्वत्थफले ।

आश्वयुज पु० आश्वयुजी अश्विनीनक्षत्रयुक्ता पौर्णमासी यस्मिन् मासे-ऽण्। शुक्लप्रतिपदादिके दर्शान्ते चान्द्रे आश्विने मासे।

आश्वयुजी स्त्री० अश्वयुजा अश्विनीनक्षत्रेण युक्ता पौर्णमासी "नक्षत्रेण युक्तः काल" इत्यण्। आश्विनमासीयपौर्णमास्याम्।

आश्वास पु० आ+श्वस्-घञ्। निर्हेतौ आश्वासदाने भीतस्य भयनिवारणार्थे सान्त्वने च। [चैन्द्रे मासि।

आश्विन पु० आश्विनी पूर्णिमा यस्मिन् मासे अण्। स्वनामख्याते

आश्विनी स्त्री० अश्विना अश्वाकारवता नक्षत्रेण युक्ता पूर्णिमा नक्षत्राण्। आश्विनमासिकपौर्णमास्याम्।

आश्विनेय पु० द्वि० अश्विन्याः अश्वाकारवत्याः सूर्य्यपत्न्याः संज्ञाया अपत्ये ढक्। स्वैवैद्ययोः। [गम्ये स्थाने।

आश्वीन त्रि० अश्वेनैकाहेनातिक्रम्यते खञ्। अश्वस्य एकाह

आषाढ़ पु० आषाढ़ी पूर्णिमाऽस्मिन् मासेऽण्। स्वनामख्याते मासे।

आषाढ़ी स्त्री० आषाढ़या नक्षत्रेण युक्ता पूर्णिमा "नक्षत्रेण युक्तः काल" इत्यण्। आषाढ़मासीयपौर्णमास्याम्।

आस उपवेशने अदादि० आत्म० अक० सेट्। आस्ते आसिष्ट।

आस अव्य० आस्-किप्। क्षेपणे, अपाकरणे, कोपे, सन्तापे, पीड़ायां, सगर्वतर्जने च।

आसक्त त्रि० आ+सञ्ज-क्त। आसङ्गे युक्ते विषयान्तरनिष्टत्त्या तत्परे च। नित्ये सतते च न०। तद्वति त्रि०।

आसङ्ग न० आ+सञ्ज-घञ्। अभिनिवेशे, प्राप्तस्योपस्थितस्यापि नाशतो रक्षणाभिलाषे, भोगाभिलाषे, कर्त्तृत्वाभिमाने च। तद्युक्ते त्रि०। सौराष्ट्रवृद्धि स्त्री०।

आसक्ति स्त्री० आ+सञ्ज-क्तिन्। संसर्गे, लाभे, सन्निधौ। न्यायादिमते यत्पदार्थेन यत्पदार्थस्यान्वयापेक्षा तयोरव्यवधानेन पदेनोपस्थापने च।

आसन न० आस-ल्युट्। उपवेशने। आधारे ल्युट् पीठादौ, हस्तिस्कन्धदेशे, सन्ध्यादिषु षट्सु न्यग्भूतेषु शत्रुदुर्गादीन्यवरुध्य

स्थितौ, यातायातिवृत्तौ, अष्टाङ्गयोगमध्ये तृतीयेऽङ्गे पद्मासनादौ। आस्यति क्षु, स्वार्थेऽण्। जीरकवृक्षे पु०। युच् टाप्। स्थितौ।

आसन्न त्रि० आ+सद्–क्त। निकटस्थे, उपस्थिते च।

आसव पु०आस्रूयते आ+सु–कर्मणि अण्। मद्यमात्रे "गौडपैष्टिकमाधवी रसैः पक्वैरपक्वैरासवो भवेद्" इत्युक्तप्रकारे मद्ये च।

आसवद्रु पु० आसवस्य (ताड़ी) मद्यस्य कारणं द्रुः शाक० त०। तालवृक्षे।

आसादन न० आ+सद्–णिच्–ल्युट्। सन्निधापने, स्थापने च।

आसादित त्रि० आ+सद्-णिच्–क्त। लब्धे, सन्निधापिते, आयोजिते च।

आसार पु० आ+सृ–घञ्। धारासम्पाते वेगवृष्टौ, प्रसरणे, सैन्यानां सर्वतो व्याप्तौ च। करणे घञ्। सुवृष्टुवले।

आसीनप्रचलायित न० आसीनेन उपविष्टेनैव प्रचलयत् आचरितम् प्रचल–क्यच् भावे क्त। उपविश्य निद्रावशेन प्रचलनरूपे(ढोला)दोलने

आसुति स्त्री० आ+सु–क्तिन्। सोमादिनिष्पीड़ने अभिषवे, मद्यादिनिष्पादने (चोयाना) इति ख्याते पाके।

आसुतीवत्स पु० आसुतिरस्त्यस्मिन् वत्सच् दीर्घः। शौण्डिके। सोमाभिषवव्यवहारिणि याज्ञिके त्रि०।

आसुर न० "आसुरो द्रविणादानात्" इत्युक्तलक्षणे धनदानेन कन्याविवाहे। असुरस्येदम् अण्। असुरसम्बन्धिनि त्रि०। स्त्रियां ङीप् "आसुरी रात्रिरन्यत्र" इति स्मृतिः।

आसुरस्व न० ह्रैत०। "अयज्वनान्तु यद्द्रव्यमासुरस्वं तदुच्यते" इति मनूक्ते अयाज्ञिकधने।

आसेचन त्रि०न सिच्यते क्त्यते मनोऽत्र आधारे ल्युट् आसेचन+स्वार्थेऽण्। आसेचनार्थे अतृप्तिकारके यस्य दर्शनं तत्र। स्वार्थे कन् आसेचनकमप्यत्र। [पेऽवरोधे।

आसेध पु० आ+सिध–घञ्। राजाज्ञयाऽन्यत्र गमनादेः प्रतिषेधरू-

आसेवा स्त्री० आ+सेव–अ। अभिलाषपूर्वकं पौनःपुन्येन प्रवृत्तौ।

आस्कन्दन न० आस्कद्यतेऽत्र आ+स्कन्द्–आधारे ल्युट्। शोषणे, आक्रमणे च। आधारे षष्ठ्। रथे।

आस्कन्दित न० आ+स्कन्द्–भावे णिच् क्त। अश्वगतिभेदे त्वरित-गमने च। स्वार्थे कन्। आस्कन्दितकमप्यत्र।

आस्तर पु० आ+स्तृ–करणे अप्। कुशिपुष्टस्यकम्बले झुल इति ख्याते। ल्युट्। आस्तरणमप्यत्र न०।

आस्तिक त्रि० अस्ति परलोक इति मतिर्यस्य ठक्। परलोकास्ति-त्ववादिनि "अस्तीत्युक्ता मतो यस्मादास्तिकस्तेन कथ्यते" इति निरुक्तसंज्ञाके जरत्कारुमुनिसुते। आस्तीकोऽप्यत्र।

आस्तिक्य न० आस्तिकस्य भावः कर्म वा। वैदिकधर्मे श्रद्धायाम्।

आस्तीकजननी स्त्री० ईत०। जरत्कारुमुनिपत्न्यां जरत्कारुनाम्न्यां वासुकिभगिन्यां मनसादेव्याम्।

आस्था स्त्री० आ+स्था–अङ्। आलम्बने, अपेक्षायां, श्रद्धायां, स्थितौ, यत्ने च। आधारे अङ्। प्रतिष्ठायां, स्थाने च।

आस्थान न० आस्थीयतेऽत्र आ+स्था–आधारे ल्युट्। सभायां वि-श्रामस्थाने च। स्त्रीत्वमपि तत्र ङीप्। आस्थानीत्यप्यत्रैवार्थे।

आस्थित त्रि० आ+स्था–क्त। आरूढे प्राप्ते, अङ्गीकृतवति च।

आस्पद न० आ+पद–घञ् ह्रस्व च। प्रतिष्ठायाम्, पदे, स्थाने, क्षेत्रे, प्रभुत्वे च। [स्खालनकर्कश्येनेति कुमारः।

आस्फालन न० आ+स्फल चाले–णिच् ल्युट्। चालने "ऐरावता-

आस्फोट पु० आ+स्फुट–अच्। स्वयं फलस्य स्फोटनात् अर्कवृक्षे (तालठोका) मल्लादेर्बाह्वादेर्हस्ततालेन शब्दकरणे च। (हापर-मालो) नवमल्लिकायां स्त्री०। ल्युट् आस्फोटनमप्यत्र न०।

आस्फोटक पु० आस्फोटोऽर्कवृक्ष इव। (आखरोट) शैवपीलौ।

आस्फोटनी स्त्री० आस्फोट्यते विदार्य्यतेऽनया आस्फुट–णिच्-करणे ल्युट् स्त्रीत्वात् ङीप्। (तुरमन) वेधनास्त्रे।

आस्फोत पु० आ+स्फुट–अच् पृषो० टस्य तत्वम्। अर्कवृक्षे कोविदारवृक्षे, भूपलाशवृक्षे च। स्वार्थे कन्। आस्फोत-

कोऽर्कवृक्षे । [अक्षाम् (छापरबाली) लताभेदे च ।
आस्फोता स्त्री० आ+स्फुट–अच् पृषो० । अपराजितायां, वन०
आस्य न० अश्नते पाशोऽत्र+अस–आधारे ण्यत् । मुखे । तन्मध्ये
च । आस्ये भवः यति यलोपः । मुखभवे त्रि० ।
आस्यपत्र न० आस्यमेव पत्रमस्य । पद्मे ।
आस्यलाङ्गल पु० आस्ये लाङ्गलमिव भूविदारकं यस्य । शूकरे ।
आस्यलोमन् न० ६त० । पुरुषमुखजाते लोम्नि (दाढ़ि) ।
आस्या स्त्री० आस–भावे क्यप् । स्थितौ, आसने च ।
आस्यास्रव पु० आस्यस्यास्रवः प्रस्रवः ६त० । लालायाम् (थुथु) (लार)
इति ख्यातायाम् । [निरन्तरास्रवणे ।
आस्रव पु० आस्रवति मनोऽनेन करणे अप् । क्लेदे । भावे अप् ।
आस्वाद पु० आ+स्वद–कर्मणि घञ् । रसे । भावे घञ् । रसानुभवे ।
आह अव्य० आ+हन–ड । आक्षेपे, नियोगे, दृढ़सम्भावने, उवाचेत्यर्थे
"अथाह वर्णी विदितो महेश्वर" इति कुमारः ।
आहत त्रि० आ+हन–क्त । गुणिते, ताड़िते, बन्धप्राप्ततोऽसीत्यादौ
रूपार्थके वाक्ये च । ढक्कायाम् पु० । पुरातने नूतने च वस्त्रे न० ।
आहतलक्षण पु० आहतमभ्यक्तं लक्षणं यस्य । गुणैः प्रसिद्धे ।
आहर पु० आ+हृ–अच् । उच्छ्वासे, अन्तःस्थितस्य वायोर्मुखेन
बहिर्गतौ ।
आहव न० आह्वयन्तेऽत्रयोऽत्र आ+हृ–अप् सम्प्रसारणे गुणः ।
युद्धे । आह्वयतेऽत्र आ+हु अप् । यज्ञे ।
आहवनीय पु० आहवनमर्हति छ । गार्हपत्याग्नेरुद्धृत्य होमार्थं
कृतसंस्कारे वह्नौ । आ+हु–अनीयर् । हवनीये ।
आहार पु० आ+हृ–घञ् । आहरणे, द्रव्यमात्रस्य ग्रहणः करणरूपे भोजने च । "निराहाराश्च ये जीवा" इति स्मृतौ जलपानेऽप्याहारशब्दः । कर्मणि घञ् । अन्नादौ भक्ष्ये ।
आहार्य त्रि० आ+हृ–ण्यत् । आहरणीये, आगन्तुके, कृत्रिमे, आरामे भाव्ये रचिते रसादिव्यञ्जकभूपादौ च ।

आहाव पु० आ+ह्वे—घञ् संप्रसारणे ह्वाव्रः । कूपसमीपे गवादीनां जलपानाय प्रस्तरादिना रचिते (खाल) जलाशये, युद्धे, आह्वाने च । [लताधानसंस्कारे च ।

आहित त्रि० आ—धा—क्त । न्यस्ते, स्थापिते, अर्पिते, क्षते,

आहितुण्डिक त्रि० अहितुण्डेन दीव्यति ठक् । व्यालग्राहिणि ।

आहुत त्रि० उद्देश्यस्य आभिमुख्येन साक्षादेव हुतं हु—क्त । यज्ञस्य-कर्त्तव्येषु पञ्चसु यज्ञेषु । मनुष्ययज्ञे भूतयज्ञे चेत्यर्थे ।

आहुति स्त्री० आ+हु—क्तिन् । देवोद्देशेन मन्त्रेणाग्नौ हविःक्षेपे ।

आहेय न० अहेरिदम् ढक् । सर्पसम्बन्धिनि चर्म्मविषादौ ।

आहो अव्य० आ+हन—डो । प्रश्ने, विकल्पे, विचारे च ।

आहोपुरुषिका स्त्री० अहमेव पुरुषः शूरः मयू० अहो पुरुषः तस्य भावः वुञ् स्त्रीत्वात् टाप् । दर्पजन्ये आत्मनि उत्कर्षसम्भावने ।

आहोस्वित् अव्य० आहो च स्विच्च द्व० । विकल्पे, प्रश्ने च ।

आह्निक त्रि० अह्ना साध्यं ठञ् । दिनसाध्ये, स्नानसन्ध्यातर्पणादौ च । दृष्टमर्थं ठञ् । दिनसम्बन्धिनि । अध्यायान्तर्गते ग्रन्थस्य प्रकरणसमूहे न० ।

आह्लाद पु० आ+ह्लद—घञ् । आनन्दे ।

आह्वय पु० आ+ह्वे अ । नामनि संज्ञायाम् प्राणिसाधने द्यूते च ।

आह्वान आ+ह्वे ल्युट् । आकारणे आहूतौ च ।

इ

इ पु० अस्य विष्णोरयनम् अ+इञ् । कामे । अस्येदम् अ+इञ् । भेदे, रोषोक्तौ, निराकरणे, अनुकम्पायाम्, खेदे, विस्मये, निन्दा-यामू, सम्बोधने च । [भञ्जन इत्युञ्जटः ।

इ गतौ भ्वादि० पर० सक० अनिट् । अयति ऐषीत् । अयसुदयति सुद्रा-

इक् अरणेऽधिपूर्व्वक एव किन् अदादि० पर० सम० अनिट् । अ-ध्येति अध्यैषीत् इण इक इति ङित्त्वे न क्ङिति । अधीयन् ।

इक्षु पु० इष–क्सु । मधुररसयुते ऋषिपत्रे खनामख्याते दृक्षे ।

इक्षुकाण्ड पु० इक्षोः काण्ड इव काण्डोऽस्य । काशदृक्षे ।

इक्षुकुट्टक पु० इक्षुं कुट्टयति कुट्ट–ण्वुल् । गुड़कारके क्षुद्रोवल्लाटौ

इक्षुगन्ध पु० इक्षोरिव गन्ध एकदेशावयवो यस्य । काशदृक्षे, चुक्रशो-ऋरे च ।

इक्षुगन्धा स्त्री० इक्षोर्गन्ध इव गन्धोऽस्याः । शुक्लविदार्य्याम्, क्षुद्रभू-मिकुष्माण्डे, काशे, गोक्षुरे च । स्वार्थे के अत इत्त्वम् । इक्षु-गन्धिका भूमिकुष्माण्डे ।

इक्षुतुल्या स्त्री० इक्षुणा तुल्या पत्रादिना । (जनार) । धान्यविशेषे ।

इक्षुनेत्र न० इक्षुर्नीयते पुनरुत्पादनायारोप्यतेऽनेन नी–ष्ट्रन् । इक्षोर्नेत्र-मिव वा इक्षुत्पादको इक्षुनेत्राकारे तदृक्षन्यौ ।

इक्षुपत्र पु० इक्षोः पत्रमिव पत्रमस्य । (जनार) धान्यभेदे ।

इक्षुप्र पु० इक्षुरिव पूर्य्यते पृ–कर्म्मणि घञर्थे क शरदृक्षे ।

इक्षुमती स्त्री० इक्षुरुदृशोऽस्त्यर्थां मतुप् । नदीभेदे ।

इक्षुमूल पु० इक्षोर्मूलं ग्रन्थिरिव मूलं ग्रन्थिर्यस्य । वंशदृक्षे । ङीप० । इक्षुमूले तदृक्षन्यौ न० ।

इक्षुयन्त्र न० इक्षोस्तद्विपीड़नस्य यन्त्रम् । (महाशाल) इक्षुनि-पीड़ने यन्त्रे ।

इक्षुर पु० इक्षुमिक्षुगन्धं राति–क । (तालमाखना) कोकिलाख्ये दृक्षे, काशे च । ततः स्वार्थे क । तत्रार्थे, स्थूलशरीरे च ।

इक्षुरस पु० इक्षो रस इव रसो यस्य । (नड़ा) इति ख्याते तृणभेदे । ङीप० । इक्षोः रसे ।

इक्षुरसक्काथ पु० इक्षुरसस्य काथः पाकभेदः । गुड़े ।

इक्षुवल्ली(ल्लरी) स्त्री० इक्षुरिव सुखादा वल्ली वल्लरी वा लता । क्षीर-विदार्य्याम् । [खेले ।

इक्षुवाटि(टी)का स्त्री० इक्षोर्वाटीव इवार्थे के वा ह्रस्वः । इक्षु-

इक्षुवालिका स्त्री० इक्षुरिव वलति एवुल् । तालमाखना इति ख्याते दृक्षे, काशे च ।

इक्षुगर पु० इक्षुरिव गृणाति गॄ—अच् । काशभेदे तद्वने गन्धर्वगीत-ख्यातेर्दृष्टत्वात् तस्मिन्नुषत् हिंसकत्वम् ।

इक्षुशाकट पु० इक्षूणां भवनं क्षेत्रम् इक्षु+शाकटच् (दो) (कल्ल) इति ख्याते इक्षुभवनक्षेत्रे । तदर्थे शाकिन् । इक्षुशा-किनृशब्दोऽप्यत्रार्थे ।

इक्षुसार पु० ६त० । गुड़े । [सूर्यशतके आदिराजे च ।

इक्ष्वाकु पु० इक्षुमिक्षामाकरोति इक्षु+आ+कृ—डु । कटुतुम्बाम्

इक्ष्वारि पु० इक्षुरिवासमन्ताद्दक्षति आ+दक्ष—इन् । काशदृणे ।

इक्ष्वालिका पु० इक्षुरिव अलति व्याप्नोति एवुल् । काशे ।

इख गतौ भ्वादि० परo सकo सेट् । एखति ऐखीत् ।

इख गतौ इदित् भ्वादि० परo सकo सेट् । इङ्खति ऐङ्खीत् ।

इग गतौ इदित् भ्वादि० परo सकo सेट् । इङ्गति ऐङ्गीत् ।

इङ् अध्ययने अधिपूर्व्व एव ङित् अदा० आत्म० सक० अनिट् । अ-धीते अध्यैष्ट अध्यगीष्ट । अधिजगे, अध्यैष्यत अध्यगीष्यत ।

इङ्गित न० इगि—क्त । अनिप्रायव्यञ्जकदैहिकचेष्टायाम् ।

इङ्गुद पु० इगिः उ इङ्गुः रोगस्तम् यति दो—क । तापसतरौ गौरा० ङीष् इङ्गुदीत्यप्यत्रैव ।

इच्छक पु० इष—ण्वुल । (टावाले) इति ख्याते इक्षे । इच्छायुक्ते त्रि० ।

इच्छा स्त्री० इष—अ । इदं मे भूयादिति मनोधर्म्मभेदे सुखे तत्सा-धने च चित्तवृत्तौ न्यायमते, "निर्दुःखत्वे सुखे चेच्छा तज्ज्ञाना-देव जायते । इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि" इत्युक्त-रीत्या सुखादिज्ञानेन तत्साधनत्वज्ञानेन च जायमाने इदं मे भूयादित्येवं रूपे आत्मधर्म्मे अभिलाषे च ।

इच्छावती स्त्री० इच्छाऽस्यस्याः मतुप् मस्य वत्वम् । मैथुनेच्छावत्यां कामुकायाम् इच्छामात्रयुक्तावाच्यौ ।

इच्छु त्रि० इष—उ नि० । इच्छायुक्ते, इच्छाशीले च ।

इज्जल पु० इण्—किप् तुक् इत् जलं यस्य । (हिजल) निम्बतरौ ।

इज्य पु० इज्यतेऽसौ यज—क्यप् । सुरगुरौ, नारायणे च पूज्ये त्रि० ।

दुग्धा स्त्री० यज–भावे–क्यप् स्त्रीत्वात् टाप्। यज्ञे, यजेर्दानार्थत्वात् दाने, सङ्गमे च। कर्मणि क्यप्। प्रतिमायां, गवि, कुट्टिन्यां च।

दुग्धाशील पु० दुग्धाशीलमस्य। पुनःपुनर्यज्ञकारके।

दुट गतौ भ्वादि० पर० सक० सेट्। एटति ऐटीत्।

दुड़ा स्त्री० दुल–अच् वा लस्य डत्वम्। गवि, वाचि, भूम्नि, स्वर्गे, वामपार्श्वस्थायाम् वक्रायां नाड्यां च।

दुण् गतौ णित् अदादि० पर० सक० अनिट्। एति ऐणीत्।

दुतर त्रि० दुना कामेन तरः तृ–अ। नीचे भिन्ने पामरे च।

दुतरेतर त्रि० दुतर+द्वित्वम्। अन्योन्यार्थे परस्पराद्य।

दुतरेतरयोग पु० दुतरेतरस्य परस्परस्य योगः एकपदार्थान्वयित्वेन सम्बन्धः। चार्थविशेषे, व्याकरणे यत्र द्वन्द्वसमासे समस्यमानानां पदानां प्राधान्यं तदर्थे।

दुतरेद्युस् अव्य० दुतर–एद्युस्। अन्यस्मिन्नह्नीत्यर्थे।

दुतम् अव्य० दृदम्+तसिल्। अस्मिन्नित्यर्थे।

दुतस्ततः अव्य० दुतश्च ततश्च। अस्मिन् तस्मिन्नित्यर्थे।

दुति अव्य० दृण–क्तिच्। हेतौ, प्रकाशने, निदर्शने, प्रकारे, अनुकर्षे, समाप्तौ, प्रकरणे, स्वरूपे, सान्निध्ये विवक्षानियमे, मते, प्रत्यक्षे, अवधारणे, व्यवस्थायाम्, परामर्षे, माने, दृत्यर्थे, प्रकर्षे, उपक्रमे च। [दृदं कृत्यादित्येवं परिपाटीरूपे कर्मानुष्ठानक्रमे।

दुतिकर्त्तव्यता स्त्री० दुति दृदं कर्त्तव्यं तस्य भावः। दृदं कृत्वा

दुतिह अव्य० दुत एवं ह किल ह०। उपदेशपरम्परायाम् यथाऽत्र वटे यक्ष दृत्युपदेशपरम्परैव न तु केनापि दृष्टा तथा कथितम्।

दुतिहास पु० दुतिह पारम्पार्य्योपदेश आस्तेऽस्मिन् दुतिह+आस घञ्। "धर्म्मार्थकाममोक्षाणामुपदेशसमन्वितम्। पूर्ब्बवृत्तकथायुक्तमितिहासं प्रचक्षते" दृत्युक्तलक्षणे पुराणप्रकाशके भारतादिग्रन्थे।

दुत्थम् अव्य० दृदम्+थम्। दृदंप्रकारे अनेन प्रकारेणेत्यर्थे।

दुत्थम्भूत त्रि० दृदंप्रकारं भूतः प्राप्तः भू–क्त। एवं प्रकारप्राप्ते।

दुत्वर त्रि० दुष् करप्। पश्चिमे, नीचे, क्रूरकर्म्मणि च। पण्डे पु०। अभिसारिकायां स्त्री०।

दुद ऐश्वर्य्ये दुदित् आदि० पर० अक० सेट्। दुन्दति ऐन्दीत्।

दुदम् त्रि० दुति कमि नलोपश्च। पुरोवर्त्तिनि दृश्ये चराचरे।

दुदानीम् अव्य० दुदम्+दानीम् दृष् च सम्प्रत्यर्थे।

दुद्ध न० दुध–भावे क्त। आतपे, दीप्तौ, आश्चर्य्ये च। कर्त्तरि–क्त। दग्धे, निर्म्मले च त्रि०।

दुध न० दुध–कर्त्तरि क्त। सन्धि, अग्निसन्दीपने काष्ठे च।

दुन पु० दुण–नक्। सूर्य्ये, प्रभौ, स्तुतिविशेषे च।

दुन्दिरा स्त्री० दुदि–दुर। लक्ष्म्याम्।

दुन्दि(न्दी)वर न० दुन्दिरिन्दी वा लक्ष्मीस्तस्यावरमभीष्टम्। नीलोत्पले।

दुन्दीवरिणी स्त्री० दुन्दीवर+अमूर्द्धे देये वार्थे इनि। उत्पलसमुदाये, तद्युक्तलतायाञ्च। [मूल्याम्।

दुन्दीवरी स्त्री० दुन्दीं लक्ष्मीं दृणाति दृ–अच् गौरा० ङीष् यत्न-

दुन्दु पु० उनत्ति चन्द्रिकया भुवं क्लिन्नां करोति उन्द् उ आदेरिच्च। चन्द्रे, तद्देवताके मृगशिरोनक्षत्रे तत्पञ्चसंख्ये एकसंख्यायुक्ते, कर्पूरे च।

दुन्दुकलिका स्त्री० दुन्दुरिव शुभ्रा कलिका यस्याः। श्वेतक्याम्।

दुन्दुकान्तः पु० दुन्दुः कान्तोऽभीष्टोऽस्य। चन्द्रकान्ते मणौ।

दुन्दुजनक पु० ईत०। समुद्रे।

दुन्दुजा स्त्री० दुन्दोर्जायते जन–ड। सोमोद्भवायां नर्म्मदायां नद्याम्।

दुन्दुपुत्र पु० ईत०। बुधग्रहे।

दुन्दुपुष्पिका स्त्री० दुन्दुरिव शुभ्रं पुष्पमस्याः। (विलसाङ्गला) जाङ्गलीशाके।

दुन्दुभृत् पु० दुन्दुं बिभर्त्ति भृ–क्विप्। शिवे। [पत्न्याम्।

दुन्दुमती स्त्री० दुन्दु+प्राशस्त्ये मतुप्। पूर्णिमायाम्, अजराज-

दुन्दुरत्न न० ईत०। शुक्लायां तस्यास्चन्द्रदेवताकत्वात्।

दुन्दुलेखा स्त्री० दुन्दोर्लेखेव। चन्द्रकलायाम्। तदंशनाम्न्यां षोड-

स्तायाम्, तद्वत्आधायतकारित्वात्तामरूपतायां, तद्वदुपच्छलयुक्तत्वात् यमानिकायाञ्च ।

इन्दुलोहक न० ईत० । इन्दुदेवताके, लौहके, रौप्ये धातौ ।

इन्दुवल्ली स्त्री० ईत० । चन्द्रनामिकायां सोमलतायाम् ।

इन्द्र पु० इदि+र । देवाधिपे, परमेश्वरे, इन्द्रदैवते ज्येष्ठानक्षत्रे, द्वादशार्कमध्ये अर्कभेदे, इन्द्रतुल्यसंख्याके चतुर्दशसंख्यान्विते, विष्कुम्भादितः षड्विंशे योगे, कुटजवृक्षे च ।

इन्द्रक न० इन्द्रस्य कं सुखमिव कं यत्र । सभामण्डपे ।

इन्द्रकील पु० इन्द्रस्य कीलइव अत्युच्चत्वात् । मन्दरपर्वते ।

इन्द्रकोष पु० इन्द्रस्य कोषइव सुखदायकत्वात् । मञ्चे, खड्गायाञ्च ।

इन्द्रगोप पु० इन्द्रो गोपो रक्षकोऽस्य वर्षाभवत्वात् । इन्द्ररक्षिते रक्तवर्णे कीटभेदे ।

इन्द्रजाल न० इन्द्रेण कौशलाद्यैश्वर्य्य ण जालं दृष्टेर्नेत्रावरणम् यथास्थितवस्तुदर्शनाप्रामाण्यसाधनात् । मन्त्रौषधादिना अन्यथास्थितस्य वस्तुनोऽन्यथात्वेन दर्शनसाधने कुहके (बाजी) ।

इन्द्रजालिक त्रि० इन्द्रजालं शिल्पमस्य ठन् । कुहककारिणि ।

इन्द्रजित् पु० इन्द्रं जितवान् जि—भूते क्विप् । रावणसुते मेघनादे ।

इन्द्रतूल न० इन्द्रस्येव तूलमाकाशे उड्डीयमानत्वादिन्द्रस्वामिकत्वम् । आकाशे मरुता चाल्यमाने कार्पासे वृक्षे ।

इन्द्रदारु पु० इन्द्रस्य तद्भुवनस्य दारु अत्युच्चाप्यतयाकाशगामित्वादिन्द्रभुवनदारुत्वम् । देवदारुवृक्षे ।

इन्द्रद्रु पु० इन्द्रस्य द्रुर्वृक्षः । अर्जुनवृक्षे, कुटजवृक्षे च ।

इन्द्रधनुस् न० इन्द्रस्य धनुरिव । "रविकिरणा वरुणवर्णा वातेन विलोड़िता नभसि । शक्रायुधसंस्थाना दृश्यन्ते तत्तु इन्द्रधनुः" इत्युक्ते नभसि वायुचालिते शक्रधनुराकारेण परिणते रविकिरणे ।

इन्द्रध्वज पु० न० इन्द्रस्य ध्वजः । भाद्रशुक्लद्वादश्यां नृपेण प्रजाहितार्थं पूज्यमाने उच्छ्रिते शक्रदेवताके ध्वजे ।

इन्द्रनील पु० इन्द्र इव नीलः । "चीरमध्ये क्षिपेन्नीलं चीरं चेत्

नीलता नवेत् । इन्द्रनीलम्" इति ख्यातमिन्द्रनीलवर्णे (वाङ्क) मरकतमणौ ।

इन्द्रपुष्पा स्त्री० इन्द्र इव नील" पुष्पमस्याः (विषलाङ्गला) जाङ्गली-वृक्षे । ब० वा कपि । इन्द्रपुष्पिकाप्यत्र ।

इन्द्रप्रस्थ न० इन्द्रस्य तत्स्थानमेरोः प्रस्थइव (दिल्लीति) ख्याते पुरे ।

इन्द्रभेषज न० इन्द्र इव भेषजं श्रेष्ठत्वात् । (शुंठ) शुण्ठ्याम्० ।

इन्द्रमहकामुक पु० इन्द्रमहं कामयते कम–उक । कुक्कुरे ।

इन्द्रयव न० पु० इन्द्रस्य कुटजवृक्षस्य यवाकृतिबीजत्वात् यवो बीजम् । कुटजवृक्षस्य यवाकारे तिक्तरसे बीजे स्वनामख्याते ।

इन्द्रलुप्त न० ३त० । (टाक) इति ख्याते मस्तकोपरि केशनाशके रोगे । इन्द्रेण लुप्ते । त्रि० । [(टेको) इति ख्याते जने ।

इन्द्रलुप्तिक त्रि० इन्द्रलुप्तमस्यास्ति ठन् । (टाक) रोगयुक्तशीर्षके

इन्द्रवंशा स्त्री० वर्णवृत्तेषु द्वादशाक्षरपादके छन्दोभेदे ।

इन्द्रवज्रा स्त्री० वर्णवृत्तेषु एकादशाक्षरपादके छन्दोभेदे ।

इन्द्रवारुणी स्त्री० इन्द्रं वारयति चु० ट–ल्युट् । (राखालशसा) तिक्तरसायां श्वेतमूलायां पीतपुष्पायां लतायाम् ।

इन्द्रवृक्ष पु० ६त० । देवदारुवृक्षे ।

इन्द्रवृद्धा स्त्री० ३त० । व्रणरोगभेदे ।

इन्द्रव्रत न० इन्द्रस्येव वर्षणे व्रतम् । वार्षिकांश्चतुरो मासान् यथेन्द्रोऽभिवर्षति । तथाभिवर्षेत् स्वं राष्ट्रं कामैरिन्द्रव्रतं चरन्" इति स्मृत्युक्ते प्रजापालने राज्ञोव्रतभेदे ।

इन्द्रशत्रु पु० इन्द्रः शत्रुः शातयिता यस्य । वृत्रासुरे ।

इन्द्रसावर्णि पु० चतुर्दशे मनौ । [नामके वानरे च ।

इन्द्रसुत पु० ६त० । जयन्ते, मध्यमपाण्डवे पार्थे, अर्जुनवृक्षे, वालि-

इन्द्रसुरस पु० इन्द्रः कुटजवृक्ष इव सुरसः मध्यरसः । (निर्गुन्दी) सिन्धुवारे ।

इन्द्राणिका स्त्री० इन्द्रः कुटजवृक्ष आनयति शैवनेन जीवयति

अन–णिच्–एषुल् संज्ञातेन घत्वम् । निर्गुण्डप्राम् (सिसिन्दा) ।

इन्द्राणी स्त्री० इन्द्रस्य पत्नी ङीष् आनुक् च । शचीनाम्न्यामिन्द्र-पत्न्याम् । इन्द्रः कुटजं वृक्षं आनयति अन–णिच्–अण् (सि-सिन्दा) सिन्धुवारे वृक्षे स्थूलैलायां, क्षुद्रैलायां, गौर्य्यादिषु षोडशमातृकासु मध्ये आद्यायां मातृकायाञ्च ।

इन्द्रानुज पु० ईत० । विष्णौ, स हि कश्यपाददितौ वामनरूपेण इन्द्रस्य पश्चात् जातः । इन्द्रावरजोऽप्यत्र ।

इन्द्रायुध न० इन्द्रस्यायुधं धनुरिव । इन्द्रधनुः शब्दार्थे ।

इन्द्रायन पु० इन्द्रेण अश्यते भुज्यते कर्मणि ल्युट् । (सिद्धि) मज्जायाम् ।

इन्द्रिय न० इन्द्रस्य प्रत्यगात्मनः लिङ्गमनुमापकम्, तेन दृष्टं मम चक्षुः मम श्रोत्रमित्येवमभिमतम्, इन्द्रेण ईश्वरेण सृष्टं, प्रोक्षितं वेत्या-द्यर्थे इन्द्र+घ । आत्मनो विषयोपलब्धिकरणतयेश्वरसृष्टे, ज्ञान-कर्म्मसाधनेषु चक्षुरादिषु [प्रतिबन्धे ।

इन्द्रियनिग्रह पु० ईत० । स्वस्वविषयेभ्यश्चक्षुरादीनां प्रवृत्ति

इन्द्रियबध पु० ईत० । इन्द्रियाणां स्वस्वकार्य्याक्षमत्वरूपे "वाधिर्य्यं कुष्ठताम्यत्वं जडताऽजिह्मता तथा । मूकता कौण्ठ्यपङ्गुत्वक्लैव्यो-दावर्त्तमत्तता" इत्युक्तप्रकारे एकादशेन्द्रियाणां क्रमेणैकाद-शविधे घाते ।

इन्द्रियवृत्ति स्त्री० ईत० । "शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः । वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्" इति सां-ख्योक्ते श्रोत्रादीनां शब्दादिषु प्रकाशनार्थे व्यापारे ।

इन्द्रियसंप्रयोग पु० इन्द्रियाणां संप्रयोगः स्वस्वविषयेषु प्रयोगः व्यापारणम् । इन्द्रियसम्बन्धे । इन्द्रियसन्निकर्षोऽत्र ।

इन्द्रियार्थ पु० इन्द्रियाणामर्थो विषयः । शब्दस्पर्शरूपरसगन्धात्मके इन्द्रियवेद्ये विषये ।

इन्द्रियायतन न० ईत० । शरीरे ।

इन्द्रियार्थसन्निकर्ष पु० इन्द्रियाणामर्थैः स्वस्वविषयैः सह सन्निकर्षः

सम्बन्धः । प्रत्यक्षज्ञानहेतौ इन्द्रियविषयसंयोगे ।

इन्ध दीप्तौ भ्वादि० आत्म० अकः सेट् । इन्धते, ऐन्धिष्ट ।

इन्धन न० इध्यतेऽग्निरनेन इन्ध-करणे ल्युट् । काष्ठे ।

इभ पु० इण्-भ किच्च । हस्तिनि, तत्तुल्यसंख्यके अष्टसंख्यान्विते च ।

इभकर्णा स्त्री० इभोपपदा कर्णा यस्याः क० त० । गजपिप्पल्याम् ।

इभदन्ता स्त्री० इभस्य दन्तइव शुभ्रं पुष्पमस्याः । शुभ्रपुष्पवल्यां नागदन्त्याम्, विषोषधौ च । [निद्रापयति । भङ्गायाम् ।

इभनिमीलिका स्त्री० इभं हस्तिनमपि निमीलयति सेवनात्

इभपालक पु० इभं पालयति । (माहुत) हस्तिपके ।

इभया स्त्रीन इभैर्याचते भक्ष्यतया प्राप्यते या कर्मणि क । सर्षपीराष्ट्रे ।

इभ्य त्रि० इभं हस्तिनमर्हति यत् । प्रचुरधनवति आढ्ये, क्रमे च ।

इभ्या स्त्री० इभावच्छिन्ना इभ+यत् । यष्टीमधुवृक्षे ।

इयत् त्रि० इदं परिमाणमस्य इदम्-वतुप् । एतावदर्थे स्त्रियां ङीप् ।

इयत्ता स्त्री० इयतो भावः तल् । सीमायां, परिमाणे, संख्यायाञ्च ।

इरम्मद पु० इरया जलेन माद्यति वर्द्धते इरा+मद-खश् मुम् च । वड्वाग्नौ वाड़वानले च ।

इरा स्त्री० इण् रक् इ कार्मं राति रा-क वा । भूमौ, वाचि, सुरायाम्, जले, अन्ने च । [जलचरे, भूचरे च त्रि० ।

इराचर न० इराया चरति चर-ट । (गिल) करकायाम् ।

इराज पु० इरया सुरया वीयतेऽसौ अज-घञ् । कन्दर्पे ।

इरावती स्त्री० इरां भूमिम् अवति अव-अच् ङीप् । वटपत्रशय्यायां, सा हि पाषाणभेदनेनापि भूमिमागच्छति ।

इरिण न० ऋ-इन किच्च । ऊषरभूमौ, निराकृष्टे, शून्ये च ।

इरेश पु० ईत० । वरुणे, वागीशे, भूमिपतौ, विष्णौ च ।

इर्वारु स्त्री० उर्व-आरु पृषो० । (काकुड़) कर्कट्याम् । आरु ।

इर्व्वारुरत्न । [(फूटी) (स्वयं भिन्नपक्वकर्कट्याम् ।

इर्व्वारु(लु)शुक्तिका स्त्री० इर्व्वारुः शुक्तिकेव स्वयं स्फोटनात्

दूल शयने अक० भतौ क्षेपे च सक० तुदा० पर० सेट्। दूलति।

दूल क्षेपणे चुरा० उभ० सक० सेट्। दूलयति ते ऐदिदूलत् त।

दूलविला स्त्री० पुलस्त्यपत्निपत्याम् कुबेरजनन्याम्। एतन्नामत्वेनैव कुबेरस्य ऐलविल इति नाम।

दूला स्त्री० दूल—क। भूमौ, गवि, वाचि, जम्बुद्वीपस्य नवमवर्षमध्ये वर्षभेदे तत्सीमा चेलाष्टतशब्दार्थे वक्ष्यते। वैवस्वतमनुकन्यायां बुधपत्न्याम्। सा हि विष्णुवरात् पुंस्त्वमासाद्य पुनः शङ्करशापात् स्त्रीत्वं गता बुधस्तु तामुपयम्य पुरूरवसमुत्पादयामासेति पुराणे प्रसिद्धम्।

दूलाहृत न० दूला पृथिवी हृता येन। नवमवर्षात्मकजम्बुद्वीपस्य वर्षभेदे तच्च वर्षम् "पश्चान्माल्यवतः प्राच्यां गन्धमादनशैलतः। दूलाहृतं नीलगिरेर्याम्यतोनिलधाटदक्" दूलु क्त चतुःसीमावच्छिन्ने देशेऽस्ति।

दूली स्त्री० दूल—ङीष्। (छातकुरी) करवालिकायाम्।

दूलीय पु० दूलीव करवालिकेव शोभते शुभ—ड। करवालिका सदृशावयवे खनामख्याते मत्स्यभेदे।

दूष्यल पु० दूल—वलच् नि० गुणाभावः अत्यन्तचञ्चले मत्स्यभेदे, वशिष्ठनाम्नि दैत्यभेदे च मृगशिरोदेशस्थपञ्चतारात्मिकरस्थासु तारासु स्त्री० ब० व०।

दूव व्याप्तौ दूदित् भ्वा० पर० सेट् सक०। दून्वति ऐन्वीत्।

दूव अव्य० दूवि—क। साहस्रे, उत्प्रेक्षायाम्, ईषदर्थे, वाक्यालङ्कारे च।

दूष गतौ सर्पणे च दिवा० पर० सक० सेट्। दूष्यति, ऐषीत्।

दूष्य वाञ्छायाम् तुदा० पर० सक० सेट्। दूष्यति, ऐषीत् एषिता एष्टा एषित्वा दूष्य। दूष्टः। [एषितः एषित्वा।

दूष पौषः पुन्ये क्रयादि० पर० अक० सेट्। दूष्णाति ऐषीत्।

दूष पु० दूष—गतौ किप् यातो त्रिगीर्णां साध्यत्विन् अर्थ आद्यच्। आश्विने मासि।

दूषि(षी)का स्त्री० दूष गत्यादिषु (दू) ईकन् कित् ह्रस्वश्च। गजनेत्रगोलके। दीर्घमध्यस्तु काये, सुङ्गामध्यवर्त्तितृणे च।

इषु पु० स्त्री० इष्यते क्षिप्यतेऽनेन इष– उ कित् ह्रस्वश्च । बाणे तत्तुल्यसंख्ये पञ्चसंख्यान्विते च ।

इषुधि पु० स्त्री० इषवो धीयन्तेऽत्र धा–कि । बाणाधारे तूणे ।

इषुपुङ्खा स्त्री० इषोः पुङ्खमिव पुच्छमस्याः । शरपुङ्खाख्ये ।

इष्ट त्रि० इष–क्त । पूजिते, अभिलषिते, प्रिये च । यज–क्त । यज्ञादौ कर्मणि, शरपुङ्खाख्ये च पु० । संस्कारे न० । "इष्टाग्निकर्म हवनं त्रेतायां यच्च हूयते । अन्तर्वेद्याञ्च यद्दानमिष्टं तदभिधीयते । अग्निहोत्रं तपः सत्यं वेदानाञ्चार्थपालनम् । आतिथ्यं वैश्वदेवञ्च प्राहुरिष्टं मनीषिणः" इत्युक्तलक्षणे धर्म्मकार्य्ये च ।

इष्टका स्त्री० इष–तकन् । (इट्) मृदादिनिर्म्मिते मृत्खण्डभेदे ।

इष्टकापथ न० इष्टकाभिर्निर्म्मितः पन्थाः । इष्टकानिर्म्मिते पथि । इष्टं कापथमपानं यस्य । अधोवायुरोगौ उशीरे ।

इष्टगन्ध त्रि० इष्टो गन्धो यस्य । सुगन्धिद्रव्ये । वालुकायां न० ।

इष्टा स्त्री० इज्यतेऽनया यज–करणे क्त । शमीवृक्षे ।

इष्टापूर्त्त न० इष्टं च पूर्त्तञ्च द्वयोः समाहारः पूर्वपददीर्घः । प्रागुक्ते अग्निहोत्रादौ इष्टे, "वापीकूपतडागादि देवतायतनानि च । अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते" इति मन्वुक्ते पूर्त्ते च ।

इष्टि स्त्री० यज–क्तिन् । यागे, दर्शपौर्णमासाकृत्यागभेदे च । इष–क्तिन् । अभिलाषे ।

इष्वसन पु० अस्यते क्षिप्यतेऽनेन अस–ल्युट् इत्व० । धनुषि ।

इष्वास पु० इषवः अस्यन्तेऽनेन अस–घञ् इत्व० । बाणे । इषून् अस्यति अण् । बाणक्षेपके धन्विनि त्रि० ।

इह अव्य० इदम्+ह इशादेशः । अस्मिन् काले देशे दिशिवा ।

इहत्य त्रि० इह भवः इह+त्यप् । इहकालादिजाते ।

ईं

ईं स्त्री० अस्य विष्णोः पत्नी ङीष् । लक्ष्म्याम् ।

ईं कान्तौ अक०, गतौ व्याप्तौ च सक०अदा० पर०अनिट् । एति ऐषीत् ।

ईं गतौ दिवा० आत्म० सक० अनिट् । ईयते ऐष्ट ।

ईक्ष दर्शने भ्वादि० आत्म० सक० सेट् । ईक्षते । ऐक्षिष्ट ।

ईक्षण न० ईक्ष–भावे ल्युट् । दर्शने । करणे ल्युट् । नेत्रे ।

ईक्षणिक त्रि० ईक्षणं हस्तरेखादीक्षणे शुभाशुभदर्शनं शिल्पमस्य ठन् । शुभाशुभफलकथनेनोपजीविनि दैवज्ञे । स्त्रियां टाप् ।

ईक्षा स्त्री० ईक्ष–अ । दर्शने ।

ईख गतौ इदित् भ्वादि० पर०सक० सेट् । ईखति ऐखीत् ।

ईज गतौ निन्दायाञ्च भ्वा० आत्म० सक० सेट् । ईजते ऐजिष्ट ।

ईज गतौ निन्दने च इदित् भ्वा० आत्म०सक०सेट् । ईञ्जते ऐञ्जिष्ट ।

ईड स्तुतौ चुरा० उभ० सक० सेट् । ईडयति ते ऐडिडत् त ।

ईड स्तुतौ अदा० आत्म० सक० सेट् । ईट्टे ईडिषे ईडिध्वे ऐडिष्ट ।

ईडा स्त्री० ईड–अ । स्तुतौ ।

ईडित त्रि० ईड+क्त । स्तुते कृतस्तवे ।

ईति स्त्री० ईयतेऽनया ई–क्तिन् । डिम्बे, उत्पातिते, प्रवादे, अतिवृष्टिरनावृष्टिः शलभाः मूषिकाः खगाः । अत्यासन्नाश्च राजानः षडेता ईतयः स्मृता” इत्युक्ते क्लेशरूपदुःखे च । [ईदृक्षे ।

ईदृक्ष त्रि० अस्येव दर्शनमस्य । इदम्+दृश्–क्विप् इदादेशे दीर्घः ।

ईदृश(ग्) त्रि० अस्येव दर्शनमस्य । इदम्+दृश क्विन्–इदादेशः दीर्घः । एतादृशे । ट–ईदृशोऽत्यत्व । स्त्रियां ङीप् ।

ईप्सा स्त्री० आप्तुमिच्छा आप्–सन्–अ । प्राप्तुमिच्छायामिच्छायाञ्च ।

ईप्सित त्रि० आप–सन्–क्त । आप्तुमिष्टे, इष्टे, अभेप्सिते च ।

ईर गतौ वा चुरा० उभ० पक्षे भ्वादि० पर० सक० सेट् । ईरयति ते ऐरित ऐरिरत् त ऐरीत् ।

ईर कम्पे अक०, गतौ सक० अदा० आत्म० सेट् । ईर्ते ऐरिष्ट ।

ईर्ष्य ईर्ष्यायां भ्वादि० पर० अक० सेट्। ईर्ष्यति ऐर्ष्यीत्।
ईर्म्म न० ईर–मक्। व्रणे। ऋवर्णादिरयमिति मकरः पुंसो० ईर्मः।
ईर्ष्य ईर्ष्यायां भ्वादि० पर० अक० सेट्। ईर्ष्यति ऐर्ष्यीत्।
ईर्ष्या स्त्री० ईर्ष्य–अ। परोत्कर्षासहिष्णुतायामसूयायाम्।
ईर्ष्यालु त्रि० ईर्ष्या लाति ला–डु। ईर्ष्यायुक्ते।
ईला स्त्री० ईड–क इस्य लत्वम्। पृथिव्यां, वाचि, गवि च।
ईलित त्रि० ईड–क्त इस्य लत्वम्। स्तुते।
ईश ऐश्वर्ये अदा० आत्म० सक० सेट्। ईष्टे ईशिषे ईशिध्वे ऐशिष्ट
ईश पु० ईश–क्विप्। परमेश्वरे। स्वामिमात्रे त्रि०।
ईश पु० ईश–क। महादेवे, परमेश्वरे, हिरण्यगर्भे च। स्वामिनि त्रि०
ईशान पु० ईश–शानच्। महादेवे, परमेश्वरे, शिवस्य अष्टमूर्त्तिमध्ये सूर्य्यमूर्त्तौ च। ग्रामीट्यां स्त्री० ङीष्। स्वामिनि त्रि० "ईशानो भूतभव्यस्य" इति श्रुतिः। शिवपत्न्याम् स्त्री० ङीष्।
ईशिता स्त्री० ईशिनो भावः तल्। अणिमाद्यैश्वर्यमध्ये सर्व्वेषां स्वामित्वरूपे ऐश्वर्ये ईशित्वमप्यत्र न०।
ईश्वर पु० ईश–वरच्। महादेवे, कन्दर्पे, पातञ्जलोक्ते क्लेशकर्म्मविपाकाशयैरपरामृष्टे पुरुषविशेषे चैतन्यात्मनि, "ईश एवाहमन्यो न च मानीशते परे। ददामि च सदैश्वर्यमीश्वरस्तेन कीर्त्यते" इत्युक्तलक्षणे परमेश्वरे, प्रभवादिमध्ये वत्सरभेदे च। आर्षे, स्वामिनि च त्रि० स्त्रीत्वे गौरा० ङीष्। "ईश्वरीं सर्व्वभूतानाम्" इति श्रुतिः।
ईश्वरी स्त्री० ईश्वरस्य शिवस्य स्त्री ङीष्। दुर्गायाम्। ईश–वनिप् ङीष् रान्तादेशश्च। लिङ्गिनीलतायां वन्ध्याकर्कटक्याम्, क्षुद्रजटालतायाम्, नाकुलीवृक्षे च।
ईष उञ्छे (उञ्छनं तत्संग्रहात् कणस्य आदाने) तुदा० पर० सक० सेट्। ईषति ऐषीत्। [ऐषिष्ट।
ईष दाने ईषणे, गतौ हिंसने च भ्वादि० आत्म० सक० सेट्। ईषते
ईषत् अव्य० ईष–अति। अल्पे, किञ्चिदर्थे च।

ईषत्कार पु० ईषत्+कृ-घञ्। खेदे, अल्पे च। अल्पप्रयासेसाध्ये त्रि०
ईषत्पाण्डु, पु० ईषदञ्चतीति त०। श्वेतरक्तधूसरे। तद्वति त्रि०।
ईषदुष्ण पु० ईषदञ्चतीति त०। अल्पतप्ते मन्दोष्णे। तद्वति त्रि०।
ईषद्रक्त पु० ईषदञ्चतीति त०। अव्यक्तरागेऽरुणवर्णे। तद्वति त्रि०।
ईषा स्त्री० ईष-क। हलयुगयोर्मध्यस्थिते काष्ठे।
ईषादन्त पु० ईषेव दन्तौ यस्य। ईषादीर्घदन्ते हस्तिनि।
ईषिका स्त्री० ईषेव इवे प्रतिकृतावितिकन्। गजास्थिगोलके, तूलिकाभासे, अस्त्रविशेषे च। "सोऽभिमन्त्र्य शरेषीकामीषिकास्त्रम्" इति रामा०। पर्णरीकादि० नि० ईषीकाभावः।
ईह चेष्टने भ्वादि० आत्म० अक० सेट्। ईहते ऐहिष्ट।
ईहा स्त्री० ईह-अ। चेष्टायाम्, उद्यमे, वाञ्छायाञ्च।
ईहामृग पु० ईहां मृगयते घञ्। वृके (नेकड़े बाघ) अलङ्कारशास्त्रकथिते नाटकभेदे च साहि० ६ परि०।

उ

उ गत्यै भ्वा० आत्म० अक० अनिट्। ओवते औष्ट।
उ अव्य० उ-किप् न तुक्। सम्बोधने कोपवचने, अनुकम्पायां, नियोगे, विस्मये च। अत-डु। शिवे पु०। [क्त। कथने न०।
उक्त त्रि० वच-क्त। कथिते। एकाक्षरपादके छन्दोभेदे स्त्री०। भावे
उक्ति स्त्री० वच-क्तिन्। कथने।
उक्थ न० वच-थक्। नवविधात्मकसाम्नोऽवयवभेदे, महाव्रताख्ये यज्ञे प्रधानभूते यज्ञकर्मे सामवेदस्थांशे, प्राणे च। यज्ञभेदे पु० एकाक्षरपादे छन्दोभेदे स्त्री०। उक्तोऽन्यत्।
उक्थशास् पु० उक्थानि सामावयवशस्त्राणि शंसति-शंस् क्विप् नि०। यजमाने। [भू आस चकार।
उच समवाये भ्वादि० पर० सक० सेट्। उचति औचीत्। उच्चाम्ब-
उच्चतर पु० तनुरुचा उच्चन्+तनुत्वे-धे टरच्। तनीयस्त्वप्राप्ते वृक्षे। जातौ स्त्रीत्वे ङीष्।

उक्षन् पु० उक्ष–कनिन् । इन्द्रे, अग्नौ, औषधौ च । सेचनकर्त्तरि त्रि० ।
उक्ष गतौ भ्वादि० पर० सक० सेट् । ओक्षति औक्षीत् उवोक्ष ।
उक्ष गतौ इदित् भ्वादि० पर० सक० सेट् उक्षति औक्षीत् ।
उक्षा स्त्री० उक्ष–क । पाकपात्रे पिठराद्यौ (हांड़ि) ।
उक्ष्य त्रि० उक्षायां स्थाल्यां संस्कृतं वत् । स्थालीपक्वे मांसादौ ।
उग्र पु० उच–रक् गमालादेशः । महादेवे, वायुमूर्त्तिधारिणि शिवे क्षत्रियात् जातायां शूद्रायासुत्पन्ने सङ्कीर्णवर्णे, (आधुनि) उग्रगुणत्वात् शोभाञ्जनवृक्षे, केरलदेशे क्रूरसंज्ञके "उग्राः पूर्व्वमघान्तका" इति ज्योतिषोक्ते नक्षत्रसमुदाये च वत्सनाभाख्ये विषे न० । उत्कटे त्रि० । वचायां, यवान्यां, धन्याके, उग्रजातेः स्त्रियां क स्त्री० टाप् ।
उग्रकाण्ड पु० उग्रः काण्डोऽस्य । (करेला) कारविल्ले वृक्षभेदे ।
उग्रगन्ध पु० उग्रः गन्धः पुष्पेऽस्य । चम्पके, कट्फले, अर्ज्जकवृक्षे लशुने च । हिङ्गुनि न० । उत्कटगन्धाढ्ये त्रि० । यवान्याम् यवानीयाम्, अजमोदायाञ्च स्त्री० टाप् ।
उग्रचण्डा स्त्री० उग्रा चण्डा कोपना कर्म्म० । देवीभेदे ।
उग्रतारा स्त्री० उग्रादपि भयात् तारयति भक्तान् । तारारूपायां देव्याम् । [रसज्ञधनुष्के त्रि० ।
उग्रधन्वन् पु० उग्रं धनुर्यस्य व० अनङ् समा० । शिवे शक्रे च । बहुव्रि-
उग्रनासिक त्रि० उग्रा दीर्घा नासिका यस्य । दीर्घनासिके ।
उग्रश्रवस् पु० उग्रम् उत्कटं श्रुतिधरं अयः कर्म्म यस्य । रोमहर्षणसुते पौराणिके सूते । [ख्याते नृपे ।
उग्रसेन पु० उग्रा सेनाऽस्य । यदुवंश्ये आहुकनामके कंसस्य जनकत्वेन
उच समवाये ट्वि० पर० सक० सेट् । उच्यति औचत्–औचीत् ।
उचित त्रि० उच–क्त वच–कितच् वा । ज्ञाते, परिचिते युक्ते ।
उच्च त्रि० उत्क्षिप्य बाहू चीयते उद्+चि–ड । उन्नते ।
उच्चटा स्त्री० उद्+चट–अच् । लशुनभेदे, गुञ्जायां, चूडालायाम्, भूम्यामलक्यां, नागरमुस्तायां, दम्भे (देखुआ) चञ्चायाञ्च ।

उच्चण्ड त्रि० उद्+चडि-अच्। अत्यन्तोग्रे त्वरायुक्ते अविलम्बिते।

उच्चतरु पु० कर्म्म०। नारिकेले। [उच्चै र्हस्ततालदानात्।

उच्चताल न० उच्चः तालः हस्ततालः यत्र। गानगोष्ठ्यां मत्ततया तत्र

उच्चन्द्र पु० उक्तिष्टः खल्वाऽवशिष्टचन्द्रो यत्र प्रादि० धातु० व० क्षिप्त-शब्दलोपः। रात्रिशेषे। [वचिते नीवारे।

उच्चय पु०उत्साद्य चयः चि-अच्। पुष्पादेरुत्तोलने। हस्ताभ्यामुद्धृत्या-

उच्चाटन न० उद्+चट्-णिच्-ल्युट्। उत्पाटने स्वस्थानात् विश्लेषणे "उच्चाटनं स्वदेशादेर्भ्रंशनं परिकीर्त्तितम्" इति तन्त्रोक्ते षट्कर्म्मान्तर्गतेऽभिचारभेदे च।

उच्चार पु०उद्+चर-णिच् घञ्। उच्चारणे। कर्म्मणि घञ्। विष्ठायाम्

उच्चावच त्रि०उदक् उत्कृष्टश्च अवाक् अपकृष्टश्च मयू०नि०। उत्कृष्टा-पकृष्टात्मके नानाभेदे।

उच्चूल पु०उच्चता चूडा यस्य उस्य लत्वम्। ध्वजोर्द्ध्वस्थिते यष्टिखण्डे।

उच्चैःश्रवस् पु० उच्चैरुच्चतं श्रवोऽस्य। उच्चतकर्णे समुद्रजाते श्वेतवर्णे इन्द्रस्य वाहनभूते अश्वभेदे। उच्चैरुच्चशब्दं शृणोति श्रु-असुन्। बधिरे।

उच्चैर्घुष्ट न० उच्चैस्+घुष क्त। (टेंडरा) उच्चघोषणायाम्।

उच्चैस् अव्य० उद्+चि डैसि। अत्यर्थे, महति, उच्चते च। अकचि उच्चकैरपत्र। [अधर्मजन्ये च।

उच्छास्त्र त्रि० उक्तं शास्त्रात् ग०स०। अतिक्रान्तशास्त्रे शास्त्रविरुद्धे-

उच्छिख त्रि० उक्ता शिखा यस्य प्रा०ब०। उच्चताग्रे।

उच्छित्ति स्त्री० उद्+छिद-क्तिन्। उच्छेदे, नाशने च।

उच्छिलीन्ध्र उच्छिन्नं शिलीन्ध्रम्। छत्राके। विकसितशिलीन्ध्रयुक्ते त्रि०। "उच्छिलीन्ध्रवनवाटिभिति" मेघदूतम्।

उच्छिष्ट त्रि० उद्+शिष-क्त। भुक्तावशिष्टे, त्यक्ते च।

उच्छिष्टभोजन पु० पञ्चयज्ञावशिष्टं देवनैवेद्यं वा भोजनमस्य। पञ्चयज्ञावशिष्टस्य देवनैवेद्यस्य च भोक्तरि।

उच्छिष्टमोदन न० उच्छिष्टं अमरोच्छिष्टं मधु तेन मोदते वर्द्धते

शुद्-ल्यु । (मोम) शिक्थके ।

उच्छीर्षक न० उत्थापितं शय्यात उच्चोच्च स्थापितं शीर्षं यस्मिन् ब० कप् । शीर्षोपधाने (बालिश) । उद्गतशीर्षके धान्यादौ त्रि० ।

उच्छून त्रि० उद्-श्वि-क्त । स्फीते "इथाच्छूनैः किमेभि" रिति नाट- कम् उद्गते च । [नियन्त्रारहिते, अप्रतिबन्धे च ।

उच्छृङ्खल त्रि० उद्गतं शृङ्खलात: गति स० । • बन्धनरहिते,

उच्छेद पु० उद् छिद्-घञ् । छेदने, विनाशने च ।

उच्छोषण त्रि० उद्+शुष-णिच्-ल्यु । सम्यक्, ऊर्द्ध शोषके च ।

उच्छ्रा(च्छ्रा)य पु० उद्-श्रि-अच् घञ् वा । उच्चतायाम् उन्नतौ ।

उच्छ्रित त्रि० उद्+श्रि-क्त । उच्चे, प्रवृद्धे, सञ्जाते, समुच्चये च ।

उच्छ्वसित त्रि० उद्+श्वस-क्त । विकाशिते, जीविते, स्मुरिते च ।

उच्छ्वास पु० उद्+श्वस-घञ् । अन्तर्मुखश्वासे, आख्यायिकायाः परिच्छेदे, प्राणे, आश्वासे च । [औच्छीत् ।

उछ उञ्छे (कणशआदाने) तुदा० इदित् पर० सक० सेट् । उञ्छति उछ बन्धे समापने च तुदा० पर० सक० सेट् । उछति औच्छीत् ।

उज्जय(यि)नी स्त्री० विक्रमादित्यराजधान्याम् अवन्त्यां पुर्याम् ।

उज्जासन न० उद्+जस-हिंसायां स्वार्थे णिच्-लुट् । मारणे ।

उज्जृम्भ पु० उद्+जृभि-घञ् । विकाशे, स्फुटने च ।

उज्जृम्भित त्रि०उद्+जृभि-क्त । विकाशिते । भावे क्त । चेष्टायाम् न० ।

उज्ज्वल त्रि० उद्+ज्वल-अच् । दीप्ते, विशदे, विकाशिनि च । स्वर्णे न० । शृङ्गाररसे पु० । [शुज्ज्वलाङ्कार" इति रघुः ।

उज्झ त्यागे तुदा० पर० सक० सेट् । उज्झति, "औज्झीत तल्प-

उञ्छ पु० उछि-घञ् । "अबाधितस्थानेषु पथि, क्षेत्रेषु च अप्रतिहतावकाशेषु यत्र यत्रौषधयो विद्यन्ते तत्र तत्राङ्गुलीभ्यामेकैकं कणं सङ्गृह्णिनोतीति" स्मृत्युक्ते कणश आदाने ।

उञ्छन पु० न० उछि-ल्युट् । आपणादिपतितस्य विक्रीतावशिष्टस्य धान्यादेः कणश आदाने ।

उञ्छशिल न०उञ्छ+शिल-अपहारे क । क्षेत्रस्वामिना परित्यक्तशस्यात्

चेलाक्कगयः समुच्चयरूपे उच्चारे ।

उट नं० उ०—ट नेच्चम् । हर्षे पर्णे च । [शुष्कादिष्टे ।

उटज पु० न० उटेभ्यो जायते जन—ड । पत्रनिर्म्मितगवलायां

उठ उपघाते भ्वा० पर० सक० सेट् । ओठति औठीत् ।

उड संहतौ (सौत्रः) पर० अक० सेट् । ओडति औडीत् ।

उडु क्लीं० न० उड—उ । नक्षत्रे, जले च । स्त्रीत्वे वा ऊङ् ।

उडु(डू)प पु० उडुनि जले पाति पा—क । प्लवे भेलायाम् । उडूनि नक्षत्राणि पाति । चन्द्रे स हि ताराणां पतिरतोरक्षकः ।

उडु(डू)पति पु० उडूनां पतिः । चन्द्रे, जलेशे वरुणे च ।

उडुपथ पु० उडूनां पन्थाः । आकाशे ।

उडुम्बर पु० उं जन्तुं वृणोति खश् उम्बरः उत्कृष्टः उम्बरः पृषो० दस्य वा डत्वम् । (यज्ञडुम्बुर) यज्ञाङ्गे वृक्षे, ताम्रे च, अकारान्तस्त्रियाम् देहल्याम्, कुष्ठभेदे च न० ।

उड्डामर त्रि० उत्कटं डामरम् । अत्यन्तप्रचण्डे ।

उड्डीन न० उद्+डी—क्त । पक्षिणामूर्द्ध्वगमने ।

उत अव्य० उ—क्त । विकल्पे, समुच्चये, वितर्के, प्रश्ने, अत्यर्थे च ।

उत त्रि० वेञ् क्त संप्रसारणम् (वुना) स्यूते ।

उतथ्य पु० अङ्गिरसः अङ्गायां पत्न्यामुत्पन्ने गुरोर्ज्येष्ठभ्रातरि ।

उतथ्यतनय पु० ६त० । गौतमे मुनौ ।

उतथ्यानुज पु० ६त० । बृहस्पतौ "उतथ्यवरजो"ऽमरः ।

उताहो अव्य० उत च आहो च द्व० । विकल्पे, प्रश्ने, विचारे च ।

उत्क त्रि० उद्गतं मनोऽस्य उद्+क त्रि० । उन्मनस्के अन्यमनस्के ।

उत्कट पु० अतीव उद्+कटच् । रक्तेक्षौ, शरे च । स्वक्पत्रे । गुडत्वचि (दारचिनि) च न० । उद्गतः कटः आवरणं यस्य प्रादि० ब० । सत्ये विभवे, तीव्रे च त्रि० । भिन्नकटे गजे पु० ।

उत्कण्ठा स्त्री० उद्+कण्ठि—अ । इष्टलाभे कालासहनरूपे औत्सुक्ये ।

उत्कण्ठित त्रि० उत्कण्ठा जाताऽस्य तारकादि० इतच् । उत्कण्ठायुक्ते । नायिकाभेदे स्त्री० । साहि० २परि० ।

उत्कर पु० उद्+कृ–अप् । धान्यादीनां राशीकरणे, प्रसारणे, हे-यापसारणे च कृत्यपदादिविशेषे च ।

उत्कर्ष पु० उद्+कृष–घञ् । अतिशये ।

उत्कल पु० "जगन्नाथप्रान्तदेश उत्कलः परिकीर्त्तित" इत्युक्ते ओड्र-देशे । उत्कः वनं लाति आ+क । व्याधे, भारवाहके च ।

उत्कलिका स्त्री० उद्–कल–वुन् । उत्कण्ठायाम्, कामादिजातायां ऋतौ च ।

उत्कलित त्रि० उद्+कल–क्त । उन्मनस्के दृष्टिमति च ।

उत्कार पु० उद्+कृ–घञ् । धान्यानां, राशीकरणे, अर्द्धक्षेपणे च ।

उत्कास पु० उच्चैः कः कासः । कासभेदे, वमनव्याधौ च ।

उत्कीर्ण त्रि० उद्+कृ–क्त । उल्लिखिते, क्षतवेधे च "मणौ वज्रस-मुत्कीर्णे" इति रघुः ।

उत्कुण पु० उद्+कुष–क । कोषकीटे (उकुण) इति ख्याते ।

उत्कृति स्त्री० षड्विंशत्यक्षरपादके छन्दोभेदे ।

उत्कोच पु० उद्+कुच–घञ् । अभ्याप्यकर्मकरणार्थं वादिप्रतिवादि-भ्योऽर्थग्रहणे (घुस) इति ख्याते ।

उत्क्रम पु० उद्+क्रम–घञ् अवधिः । व्युत्क्रमे, विपरीतक्रमे ।

उत्क्रोश पु० उद्+क्रुश–अच् । कुररीपक्षिणि ।

उत्क्षेपण न० उद्+क्षिप–ल्युट् । अर्द्धक्षेपणे । कर्मणि ल्युट् । व्यजने । करणे ल्युट् धान्यमर्दने काष्ठभेदे । [इति रघुः ।

उत्खात त्रि० उद्+खन–क्त । उत्पाटिते "उत्खातप्रतिरोपिता"

उत्खातकेलि पु० "उत्खातकेलिः मृत्काद्यैर्वप्रक्रीड़ा निगद्यते" इत्युक्तलक्षणे दृषदादेः मृत्कादिना वप्तिकाखनने ।

उत्त त्रि० उन्द्–क्त । क्लिन्ने आर्द्रवस्तुनि ।

उत्तंस पु० उद्+तंसि–अच् । कर्णाभरणे, शिरोभूषणे च ।

उत्तप्त त्रि० उद्+तप्–क्त । सन्तप्ते, क्षाते च । शुष्कमांसे न० ।

उत्तम त्रि० उद्+तमप् । उत्कृष्टे । प्रियव्रतस्यपुत्रे पु० ।

उत्तमर्ण पु० उत्तमस्य ऋणस्य । ऋणप्रयोजके (महाजने) ।

उत्तमसाहस न० "दामोत्तियसाहसोदण्डे उत्तमसाहसम्" इत्युक्ते दण्डभेदे ।

उत्तमाङ्ग न० कर्म० । मस्तके । [शिरसि ।

उत्तम्भ पु० उद्+स्तम्भ–घञ् । प्रवृत्तिबाधिकायामनिष्टसाधनतो

उत्तर कं० उत्तीर्यते प्रकृताभियोगोऽनेन उद्+तॄ–अप् । राजसभीये वादिप्रतिवादिनोरभियोगशोधने उत्तरार्थे व्यवहाराङ्गे "प्रश्नोद्धारिधारा पृच्छा तस्य भङ्गनमुत्तरम्" इत्युक्ते दोषभङ्गनवाक्ये च । विराटराजपुत्रे पु० । उदीच्यां दिशि विराटराजसुतायाञ्च स्त्री० । अनन्तरे देशे, काले च पु० । अनन्तरदिग्देशकालवृत्तौ त्रि० ।

उत्तरकाल पु० कर्म० । अविष्यत्काले आयतौ ।

उत्तरकुरु पु० नववर्षात्मकस्य जम्बुद्वीपस्य वर्षभेदे ।

उत्तरकोशला स्त्री० अयोध्यानाम्न्यां नगर्याम् । [प्रतितरङ्गे त्रि० ।

उत्तरङ्ग न० उत्तरमङ्गम् कर्म० अकस्मा० । द्वारोर्ध्वस्थदारुणि । उ-

उत्तरच्छद पु० कर्म० । शय्याया उपर्यास्तरणवस्त्रे ।

उत्तरपक्ष पु० वादे पूर्वपक्षस्य सदूनत्वे विद्वत्पक्षे ।

उत्तरफाल्गुनी स्त्री० फल्गु मनोहरं नयति । नी–डो कर्म० । अश्विन्यादिनक्षत्रेषु द्वादशे नक्षत्रे दक्षिणोत्तरस्थितताराद्वयात्मके ।

उत्तरभाद्रपद् स्त्री० भद्राय हितः भाद्रः भद्र प्राटस्तुर्थ्यां यस्याः ब० तद्वः कर्म० । अश्विन्यादिनक्षत्रेषु षड्विंशे नक्षत्रे पदशब्देन समासः टाप् । उत्तरभाद्रपदाख्ये ।

उत्तरमीमांसा स्त्री० कर्म० । ब्रह्ममीमांसायाम् वेदान्तदर्शने ।

उत्तरा अव्य० उत्तर+आच् । उत्तरस्यां दिशि काले देशे वेत्यर्थे ।

उत्तरा "प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु क्रियन्ते याः क्रियाः पितृयाः प्रोच्यन्ते उत्तराहि ता इत्युक्ताः सपिण्डीकरणोत्तराः आद्धक्रियाः । [आद्धोत्तरक्रियास्वित्यर्थे ।

उत्तरात् अव्य० उत्तर+आति । दिग्देशकालविषये उत्तरस्योत्तर-

उत्तराधिकारिन् त्रि० उत्तरमधिकरोति अधि+कृ–णिनि । पूर्व-

स्वामिस्वत्वोपरमे तत्स्वत्वाधीनस्वत्ववति लाताधिकारे धनमौतादौ दायादे। (अंशी) इति ख्याते।

उत्तराभास पु० उत्तरमिवाभासते आ+भास–अच्। दुष्टोत्तरे।

उत्तरायण न० "माघादि मासयुग्मेषु क्रमतः षट् क्रमादितः। उत्तरायणमादौत्तरित्युक्तलक्षणे ऋतुत्रयात्मके माघादिके मासषट्के काले। उत्तरा दिशि ह्यर्कस्य अयनं यस्मिन् वा" इति व्युत्पत्तेः। तदारम्भकाले मकरसंक्रमणदिनेऽपि।

उत्तराषाढ़ा स्त्री० अश्विन्यादिनक्षत्रेषु एकविंशतितमे नक्षत्रे।

उत्तरासङ्ग पु० उत्तरे ऊर्द्धभागे आसज्यते आ+सञ्ज–घञ्। उत्तरीयवस्त्रे। [उत्तरस्मात् उत्तरस्मिन्नर्थे।

उत्तरात्हि अव्य० उत्तर+आहि। दिग्देशकालविषये उत्तरस्मिन्

उत्तरीय न० उत्तरस्मिन् देहभागे भवः छ। ऊर्द्धदेहभागे वस्त्रे।

उत्तरेण अव्य० आसन्नदिग्देशकालानां प्रथमान्तसप्तम्यन्तानामर्थेषु "तत्रागारं धनपतिगृहानुत्तरेणास्मदीयम्" इति मेघदूतम्।

उत्तरेद्युस् अव्य० उत्तरस्मिन् दिने उत्तर+एद्युस्। आगामिदिवसे इत्यर्थे। [भूमिलग्नपृष्ठतया ऊर्द्धभावेन स्थिते, ऊर्द्धमुखे च।

उत्तान त्रि० उद्गतस्तानो विस्तारो यस्मात्। विस्तारमुखे, (चित)

उत्तानक पु० उद्–तन–एवुल्। उच्चटार्थे।

उत्तानपत्रक पु० उत्तानमूर्द्धमुखं पत्रमस्य। रक्ते एरण्डवृक्षे।

उत्तानपाद पु० स्वयम्भुवो मनोः पुत्रे ध्रुवपितरि नृपभेदे।

उत्तानशय त्रि० उत्तानः ऊर्द्धमुखः सन्नेव शेते शी–अच्। अनिग्निशौ तस्य च तदानीमव्रताने सामर्थ्याभावात्।

उत्ताप पु० उद्+तप–घञ्। उष्णतायाम्, सन्तापे च।

उत्तार त्रि० उद्गता तारा तस्य। उद्गततारकनेत्रयुक्ते। उत्कृष्टसारः। अत्यन्तोच्चे। [रथे, त्वरिते, उद्गते, च। मूषकभेदे पु०।

उत्ताल त्रि० तुरा०तल–प्रतिष्ठायाम् अच्। प्रतिष्ठिते नर्त्तति। विक–

उत्तीर्ण त्रि० उद्+तॄ–क्त। मुक्ते, पारङ्गते च।

उत्तुङ्ग त्रि० उत्कटं तुङ्गम्। अत्युच्चे।

उत्तुष पु० उद्गतः अस्तुनाभावेऽपि लघोऽत्वात् । आजाख्ये (खट्) भाटधान्ये । [रणे, उद्दीपने, तीक्ष्णीकरणे च ।

उत्तेजना स्त्री० उत्+तिज-णिच्-युच् । प्रेरणायाम्, अपतीक्ष-

उत्तेजित त्रि० उद्+तिज-णिच्-क्त । प्रेरिते, उद्दीपिते, च । भावे क्त । उत्तेजनायाम् "उत्तेजितं मध्यवेगं भोजनं श्रमव-मनमेतत्त्रयं" अश्वगतिभेदे न० ।

उत्तेरित न० उद्-तॄ भावे क्तच् गुणे एत्वम् नि० । अश्वगतिभेदे । अर्थ आद्यवि । "उत्तेरितोऽतिवेगाढ्यो न मृषोति न पश्यति" इत्युक्तगतियुक्तोऽश्वे पु० ।

उत्तोलन न० उद्+तुल-उन्नाने लुट् ऊर्द्धं नीत्वा तोलने ।

उत्तोलित त्रि० उद्+तुल-क्त । उत्क्षिप्ते, ऊर्द्धतोलने च ।

उत्त्यक्त त्रि० उद्+त्यज-क्त । ऊर्द्धक्षिप्ते, परित्यक्ते च ।

उत्थान न० उद्+स्था-ल्युट् । ऊर्द्धगतने, उद्यमे, ऊर्द्धभवनचेष्टायाम्, उद्भवे च । करणे ल्युट् । उत्साहे, पौरुषे, हर्षे च । अधिकरणे ल्युट् । रणे, राज्ञश्चिन्तनरूपे तन्त्रे, प्राङ्गणे, चैत्ये च ।

उत्थानैकादशी स्त्री० उत्थानस्य हरेः निद्रातः प्रबोधनस्य काल इ-कादशी । कार्त्तिकशुक्लैकादश्याम् ।

उत्थित त्रि० उद्+स्था-क्त । दृद्धियुक्ते, उद्यते, उत्पन्ने च ।

उत्थिताङ्गुलि पु० उत्थिता उद्गता अङ्गुलयो यत्र । (चापड़) वि-स्तृताङ्गुलिके करतले चपेटे ।

उत्पत पु० उत्पतति ऊर्द्धं गच्छति उद्+पत-अच् । पक्षिणि ।

उत्पतन न० उद्+पत-ल्युट् । ऊर्द्धगमने, उत्पत्तौ च ।

उत्पत्ति स्त्री० उद्+पद-क्तिन् । जन्मनि, जीवस्य देहसम्बन्धे, सां-ख्यादिमते आविर्भावे च । उद्+पत-क्तिन् । ऊर्द्धगमने ।

उत्पत्तिविधि पु० मीमांसकमते कर्म्मस्वरूपावेदके विधौ यथा अग्नि-होत्रं जुहोतीत्यादि ।

उत्पल न० उद्+पल-अच् । नीलपद्मे, कुसुदादौ, कुष्ठौषधौ च ।

उत्पलगन्धिक न० उत्पलस्य गन्धइव गन्धोऽस्य इति समा० संज्ञायां

कन् । गोशीर्षाख्ये चन्दने । [जातौ च । ङीप् । इन्दीवरस्य दले ।

उत्पलपत्र न० उत्पलस्य पत्रमिव । तिलकभेदे, स्त्रीणां ललाटादौ तस्य-

उत्पलिनी स्त्री० उत्पलानि सन्त्यस्मिन् देशे तेषां समूहो वा इनि । उत्पलयुक्तजलायां, कुवलयसमुदाये च । [देशतृणेषणे ।

उत्पवन न० उद्+पू-करणे ल्युट् । कुशकाशिकुशायां पवित्रे च जला-

उत्पाद्य त्रि० उद्+हृद्य-यत् । अर्द्धदृष्टिकारके, उन्मुखे च ।

उत्पाटन न० उद्+पट-णिच्+ल्युट् । उन्मूलने ।

उत्पात पु० उद्+पत-घञ् । उपद्रवे । उद्+पत-अ । अकस्मादा-

गते प्राणिनां शुभाशुभसूचके दैवनिमित्ते भूकम्पादौ ।

उत्पादक पु० ऊर्द्धस्थिताः पादा अस्य कप् । अष्टपदे शरभाख्ये म-

जारातौ पशुभेदे तस्य पृष्ठस्थचतुःशरत्वादूर्द्धपादत्वम् । उत्-पद्-णिच्-ण्वुल् । पितरि पु० । उत्पादनकर्त्तरि त्रि० ।

उत्पादशय पु० उत्पाद ऊर्द्धक्षिप्तपादः शेते शी-अच् । (टिटिर) टिट्टिभपक्षिणि ।

उत्पिञ्जल त्रि० उद्+पिञ्ज-कलच् । अत्यर्थाकुले ।

उत्प्रास पु० उद्+प्र+अस-दीर्घादिषु घञ् । उपहासे ।

उत्प्रेक्षा स्त्री० उद्+प्र+ईक्ष-अ । उद्भावने अर्थालङ्कारभेदे च सा० द० परि० । [ज्ञाने (भाषा) ।

उत्प्लवन न० उद्+प्लु-ल्युट् । उत्प्लवने, जलादेरुपरिस्थितिरूपे उत्प्-

उत्प्लवा स्त्री० उत् जलादेरुपरि प्लवते प्लु-अच् । नौकायाम् ।

उत्फुल्ल त्रि० उत्+फुल्ल-क्त । दलानामन्योन्यविश्लेषेण विकाशिते कुसु-मादौ ।

उत्स पु० उन्द्-स । पर्वतादितः स्रवज्जलस्य पातस्थाने, स्रवज्जले च ।

उत्सङ्ग पु० उद्+सञ्ज-घञ् । क्रोडे । सङ्गादुत्क्रान्ते त्रि० ।

उत्सर्ग पु० उद्+सृज-घञ् । व्याकरणोक्ते सामान्यविधाने, न्याये, त्यागे, दाने, यागभेदे, अपानवायोर्व्यापारे च ।

उत्सर्जन न० उद्+सृज-ल्युट् । दाने त्यागे च ।

उत्सर्पण न० उद्+सृप-ल्युट् । उत्+य पुरतोगतौ, उद्भवे च ।

उत्सव पु० उद्+सू–अप् । आनन्दजनकव्यापारे विवाहादौ ।

उत्सवसङ्केत पु० उत्सव आनन्दजनकः सङ्केतः स्त्रीपुंसयोः रत्यर्थमनुरागादागमनम् यस्य । अस्येयं स्त्रीत्वेन दाम्पत्यनिबन्धने स्त्रीपुंसयोरनुरागमात्रहेतुकस्य रविहारस्यातिनि पार्वतीये जातिभेदे । "यदैकत्सवसङ्केतानिति" रघुः ।

उत्सादन न० उद्+सद–णिच्–ल्युट् । उत्सारणे, उद्वर्त्तने च ।

उत्सारक पु० उद्+सृ–णिच्–ण्वुल् । द्वारपाले तेन हि प्रभुद्वारतो जना दूरीक्रियन्ते । [नरकरणे च ।

उत्सारण न० उद्+सृ–णिच्–ल्युट् । दूरीकरणे, चालने, स्थाना-

उत्साह पु० उद्+सह–घञ् । उद्यमे, अध्यवसाये, कर्त्तव्यकर्त्तव्येषु स्थिरतरे प्रयत्ने "उत्साहो बलमूलं स्या" दिति नीतिविदां मतम् । "प्रभुशक्तिर्मन्त्रमूला तस्मादुत्साहवान् भवेत्" इत्युक्ते राज्ञां गुणविशेषे, कल्याणे, सत्त्वे, वीररसस्य भावादे च साहि० ३ परि० ।

उत्साहवर्द्धन पु० उत्साहं वर्द्धयति वृध–णिच्–ल्यु । वीररसे । वृध–ल्युट् ई त० । उत्साहस्य वृद्धौ न० ।

उत्साहशक्ति स्त्री० उत्साहएव शक्तिर्बलम् । राज्ञां विक्रमहेतौ बले ।

उत्सिक्त त्रि० उद्+सिच–क्त । गर्विते उद्धते, वर्द्धिते, उपरिसेकयुक्ते, उपस्कृते, त्यक्तमर्य्यादे च ।

उत्सुक त्रि० उद्+सु–क्विप् कनि हस्वः । दृष्टार्थसम्पादनाय उत्क्रान्ते, अभीष्टोगमिष्यतीत्युत्कण्ठान्विते च ।

उत्सृष्ट त्रि० उद्+सृज–क्त । त्यक्ते, ऊर्द्धोत्क्षिप्ते, दत्ते च ।

उत्सेक पु० उद्+सिच्–घञ् । गर्व्वे, उद्रेके उद्धृत्यवहिःसेचने च ।

उत्सेध पु० उद्+सिध–घञ् । हेहे, उन्नतौ "पयोधरोत्सेधनिपातेति" कुमारः ।

उद् अव्य० उ–क्विप् तुक् वृषो० दत्वम् । प्रकाशे, विभागे, प्राकट्ये, ऊर्द्धे उत्कर्षे, प्राबल्ये, अत्यन्ये, शक्तौ, प्राधान्ये, बन्धने, भावे, मोक्षे, "तस्य उदिति नाम" इति श्रुतेर्ब्रह्मणि च ।

उदक न० उन्द्–ण्वुल् नलोपश्च णि० । जले वृषो० कत्वोभे उदमप्यत्र ।

उदकीर्य्य पु० उदेन जलेन कीर्य्यते कृ–क्यप् । (छड़कनेका)
करङ्भेदे ।

उदकुम्भ पु० उदकेन पूर्णः कुम्भः मध्य० त० । जलपूर्णकुम्भे
मान्युदकुम्भकन्या इति भट्टिः ।

उदक्या स्त्री० उदकं शुद्ध्यर्थं स्नानजलं अत्यर्थमिते अर्हति यत् ।
ऋतुमत्स्त्रीम् ।

उदगद्रि उदगुत्तरस्यामद्रिः । हिमाचले ।

उदगयन न० उदक् उदीच्यामयनम् । उत्तरायणे माघादिके मास-
षट्के "उदगयने आपूर्य्यमाणे" पक्षे इति स्मृतिः ।

उदग्र त्रि० ऊर्द्धतमं यस्य । ऊर्द्धे । [पात्रे (कुपो) ।

उदङ्क पु० उदच्यते उद्दि यतेऽत्र उद्+अच्–घञ् । घर्मजले इतादि-

उदच् अव्य० उदच् दिग्देशकाले वाच्ये प्रथमापञ्चमीसप्तम्यर्थे अस्तादि
तस्य लुक् । प्रथमान्ताद्यर्थस्तौ उदरादिगादौ । उद्+अनच–
किन् । उत्तरे देशे काले च पु० । स्वार्थे उदङ्उदञ्चौ ।
*दिशि स्त्री० ङीप् उदीची ।

उदज पु० उद्+अज–अच् । पशुप्रेरणे ।

उदञ्चन न० उद्+अनच्–करणे ल्युट् । पिधानार्थे भाजे (ढाकना) ।
भावे ल्युट् । ऊर्द्ध क्षेपणे ।

उदञ्चित त्रि० उद्+अनच्–क्त । ऊर्द्धक्षिप्ते, पूजिते च ।

उदधि पु० उदकानि धीयन्तेऽस्मिन् धा–आधारे कि उदादेशः ।
समुद्रे, घटे च ।

उदधिमल पु० उदधेर्मल इव । समुद्रफेने ।

उदन्त पु० उद्गतोऽन्तोनिर्णयो यस्मात् । वार्त्तायाम् इत्यन्ते कथ-
यादिकथने, साधौ च ।

उदन्या स्त्री० अतिगात्रेण उदकमिच्छति क्यच् उदन्भावः अ ।
पिपासायाम् ।

उदन्वत् पु० उदकानि सन्त्यस्य मतुप् उदन् भावः मस्य वः । समुद्रे ।

उदप् आप्नाते (सौत्रः) पर० सक० सेट् । उदपति । औदापीत् ।

उदपान पु० न० उदकं पीयतेऽस्मिन् पा—ल्युट् उदादेशः । कूपसमीपस्थे स्नाते क्षुद्रजलाधारे ।

उदमान पु० "कुल्या स्यादष्टभिर्द्रोणैर्द्रोणपादेन चाढकः । अस्यार्द्धमर्द्धभाग उदमान उदाहृत इत्युक्ते मानभेदे ।

उदय पु० उद्+इ—अच् । ज्योतिषोक्ते राशेरुदयरूपे लग्ने । आधारे अच् । उदयाचले पूर्वपर्वते "यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृत" इत्युक्तलक्षणे दृष्टियोग्यस्थाने च भावे अच् । प्रथमदर्शनयोग्यभवने, वृद्धौ, समुन्नतौ उत्पत्तौ च ।

उदयन पु० उद्+इ—ल्युट् । वत्सराजे, अगस्त्ये मुनौ, कुसुमाञ्जलिप्रभृतिग्रन्थकारके उदयनाचार्य्ये च । भावे ल्युट् । उदये ।

उदर न० उद्+दृ—अप् । जठरे नाभिस्तनयो र्मध्यभागे । आधारे अप् । युद्धे । उद्+इ—अप् उदो दलोपश्च । उदररोगे ।

उदरग्रन्थि पु० उदरे ग्रन्थिरिव । गुल्मनामकरोगे ।

उदरत्राण न० उदरं त्रायतेऽनेन ल्युट् । (ऋमरबन्ध) उदरबन्धवस्त्रे ।

उदरपिशाच त्रि० उदरे तत्पूर्त्तौ पिशाच इव । सर्व्वान्नभक्षके ।

उदरभरि त्रि० उदरं बिभर्त्ति भृ—खि मुम् च । पञ्चयज्ञादिकरणेनाऽनोदरमात्रपोषके ।

उदररोग पु० ६त० । उदरी इति ख्याते रोगे । [ख्याते रोगे ।

उदरामाय पु० उदरस्थं रोगं याति नयति या—क । स्वनाम

उदरावर्त्त पु० उदरे आवर्त्त इव गभीरत्वात् । नाभौ ।

उदरिणी स्त्री० उदरे गर्भोऽस्त्यस्याः इनि । गर्भवत्याम् ।

उदरिन् त्रि० उदरं वृहत् अस्त्यस्मिन्नर्थे मत्वर्थीय इनि । तुन्दिले (भुडियुक्ते) । ङीप् । उदरिलोऽप्यत्र ।

उदर्क पु० उद्+अर्क—अर्च+घा घञ् । उत्तरकाले भाविफलके शुभाशुभकर्म्मणि च ।

उदर्चिस् पु० उद् ऊर्द्धमर्चिः रश्मिरस्य । उच्चिखे वह्नौ । उत्कटकान्तित्वात् कन्दर्पे ऊर्द्धरेतस्त्वात् शिवे च । प्रा० स० । उन्नतायां शिखायां न० ।

उद्वसित न० उद्+वस+क्त—क्त । नष्टे । [नष्टिते नक्षे ।
उद्क्षित् न० उदेन जलेन युयति वर्जते युि—क्विप् । अर्घजलेन
उदात्त पु० उद्+आ+दा—क्त । वर्णोच्चारणस्थानेषु ऊर्द्ध:स्वरेण उच्चा-
रिते । हृद्ये, महति, दातरि च त्रि० । अलङ्कारभेदे न० ।
उदान पु० उद्+अन—घञ् । ऊर्द्धगमनोत्क्रमणहेतुवायुके कण्ठस्थे
वायौ, उदरावर्त्ते रोगौ, सर्पभेदे च ।
उदार त्रि० उद्+आ+रा—क । दातरि, महति, सरले, दक्षिणे,
गम्भीरे, असाधारणे च ।
उदावर्त्त पु० उद्+आ+वृत—घञ् । "यत्नोद्यं जायते वायोरावेगः
स चिकित्सकैः । उदावर्त्त इति प्रोक्तो व्याधि" इत्युक्तलक्षणे
वातव्याधौ ।
उदासीन त्रि० उद्+आस—शानच् । मध्यस्थे, विवदमानयोरेकतरप-
क्षानवलम्बके, निर्गतोर्द्धगतैः अत्युन्नतभूमितो व्यवहिते परतरे,
उपेक्षके च ।
उदास्थित त्रि० उद्+आ+स्था—क्त । चरे, द्वारपाले, मध्यस्थे,
प्रव्रज्यारूपस्थानच्युते नष्टाश्रमे परिव्राजके च ।
उदाहरण न० उद्+आ+हृ—भावे ल्युट् । एकदेशप्रसिद्धा सकलसि-
द्ध्यर्थं कथने । कर्मणि ल्युट् । दृष्टसिद्ध्यर्थसूच्यमाने दृष्टान्ते,
प्रकृतसिद्ध्यर्थं निदर्शनरूपे उपोद्घाते च ।
उदाहृत त्रि० उद्+आ+हृ—क्त । दृष्टान्ततयोपन्यस्ते, कथिते च ।
उदित त्रि० वद—क्त । कथिते । उद्+इण्—क्त । उत्थिते, उद्गते, दृष्टे च
उदीच्य त्रि० उदीचि उत्तरकालादौ भवः यत् । उत्तरकालादिभवे
वस्तुनि, पराक्रान्ता नद्याः दक्षिणोत्तरदेशे, (बाङ्गा) मध्यदेशे च ।
उदीरण न० उद्+ईर—ल्युट् । कथने, उच्चारणे च ।
उदीर्ण त्रि० उद्+ऋ—क्त । उद्गते, महति, उद्रिक्ते च उदीर्णराग-
प्रतिरोधकमिति" माधवः ।
उदुम्बर पु० उदुम्बरवत् वर्त्मयत् । ह्रस्वाभावः ।
उदुम्बरपर्णी स्त्री० उदुम्बरपर्णीवत् वर्त्मयत् । न ह्रस्वम् ।

उदुम्बरफला स्त्री० उदुम्बरफलावत् सर्व्वम् । न० तत्वम् ।

उदूखल न० ऊर्द्धं खं लाति ला–क पृषो० णि० । तण्डुलादिकरण-मार्थं काष्ठादिरचिते द्रव्ये, गुम्फलौ च । [नेति" भाषः ।

उदूढ त्रि० उद्+वह–क्त । ऊढे, स्थूले, धृते च । उदूढलोकवित्तये-

उद्गत त्रि० उद्+गम–क्त । उदिते, उत्पन्ने, ऊर्द्धं गते, उद्गामे च ।

उद्गमनीय न० उद्+गम–अनीयर् । धौतवस्त्रद्वये "गृहीतपल्लद्गम-नीयवस्त्रेति" कुमारः ।

उद्गाढ न० उद्+गाह–क्त । अतिशये । अत्यन्ते । अतिशययुक्ते त्रि० ।

उद्गाता पु० उद्+गै–तृच् । सामवेदगायके ।

उद्गार पु० उद्+गृ–घञ् । उद्वमने ।

उद्गीति स्त्री० उद्+गै–क्तिन् । उच्चैर्गाने, मात्राष्टत्तौ आर्य्याभेदे च ।

उद्गीथ पु० उद्+गै–थक् । सामवेदावयवभेदे ।

उद्गूर्ण त्रि० उद्+गुरी–उद्यमे क्त । उद्यते ।

उद्ग्राहित त्रि० उद्+ग्रह–णिच्–क्त । उपन्यस्ते, बद्धे, उदीर्णे, प्रत्यायिते, प्राप्तिते, च । [प्रग्रस्ते त्रि० ।

उद्घ पु० उद्+हन–अप् नि० । हस्तपुटे, बद्धौ, वायौ, प्रशंसायां च ।

उद्घन पु० उद्+हन–अप् नि० । काष्ठतक्षणसाधनेऽधःस्थकाष्ठे यदुपरि निधाय काष्ठं तक्ष्यते ।

उद्घर्षण न० उद्+हृष–ल्युट् । हृष्टकरण (झामा) गात्रादिघर्षणे ।

उद्घाट पु० उद्+घट–णिच्–घञ् । राजसम्पत्करणस्थाने घट्टे ।

उद्घाटक पु०न० उद्+घट–णिच्–ण्वुल् । कूपात् जलोद्धारणार्थे यन्त्र-भेदे (अरघट्ट) (धुरना) इतिख्याते । करणे ल्युट् उद्घाटनमप्यत्र न० । भावे ल्युट् उद्घाटनम् । प्रतिबन्धनिरासे, कृतबन्धस्य बन्धा-पकरणे च न० ।

उद्घात पु० उद्+हन–घञ् । आरम्भे, पादस्खलने "प्रायेण प्रेर्य्य-माणेन अपानः पीड्यते यदि । गत्वा चेर्द्धं निवर्त्तेत एतदुद्घातल-क्षणम्" इत्युक्तलक्षणे प्राणायामाङ्गकुम्भकभेदे, उत्सृष्टे, सृष्टे, यत्नपरिच्छेदे च ।

उद्दंश पु० उद्दशति । प्रसह्यदंशके (उड़ाण) कीटभेदे ।
उद्दान न०उद् दो-ल्युट् । बन्धे, चुल्लग्राम्, वाङ्मात्रके, मध्यबन्धे च
उद्दामन् त्रि० उद्दतं दाम्नः । बन्धरहिते, अप्रतिबन्धे, स्वतन्त्रे, अ-
त्युग्रे च । उत्कृष्टं श्रेष्ठं दाम पाशाख्यमस्त्रं यस्य । वरुणे पु० ।
उद्दाल पु० उद्+दल-णिच्-अच् । वत्सरकवृक्षे, वनकोद्रवे च ।
संज्ञायां कन् । वेदप्रसिद्धे ऋषिभेदे ।
उद्दिष्ट त्रि० उद्+दिश-क्त । उपदिष्टे, अभिहिते च कन्दः शाके
प्रस्तारविशेषस्तानसाधने न० ।
उद्दीपन न० उद् दीप-णिच्-ल्युट् । प्रकाशने, उत्तेजने च । ल्यु ।
अलङ्कारोक्ते रसाद्युद्दीपके चन्द्रादौ विभावे सा०३प० ।
उद्देश पु० उद् दिश-घञ् । अनुसन्धाने, अन्वेषणे, अभिलाषे च ।
उद्देशतस् अव्य० उद्देश+तसिल् एकदेशेनेत्यर्थे संक्षेपार्थे च ।
उद्द्राव पु० उद्+द्रु-घञ् । पलायने ।
उद्द्योत पु० उद्+द्युत-घञ् । प्रकाशे । [प्रगल्भे, आढ्ते च त्रि० ।
उद्धत पु० उद्+हन-क्त । राजभल्ले । वाक्यादिचञ्चले, अविनीते ।
उद्धरण न० उद्+हृ-भावे ल्युट् । शुद्धौ, धनने, ऋणशुद्धौ, उन्मू-
लने च । कर्म्मणि ल्युट् । वास्तेऽङ्गादौ ।
उद्धर्ष न०पु० उद्+हृष-णिच् घञ् । उल्लासे ।
उद्धर्षण न० उद्+हृष-णिच्-ल्युट् । रोमाञ्चे ।
उद्धव पु० उद्+हु-अप् । यज्ञाग्नौ, कृष्णदयिते यादवविशेषे च ।
उद्धान न०उद्धीयतेऽस्मिन् धाञ्-ल्युट् । चुल्लग्राम्, वमिते, उद्धते च ।
उद्धार पु० उद्धियते उद्+हृ-कर्म्मणि घञ् । ऋणे । भावे घञ् ।
शुद्धौ, उद्धारे च । [भारसूच्ये च ।
उद्धर त्रि० उद्धता धूरस्मात् प्रा० ब० अच् समा० । निर्भरे, दृढे
उद्धृत त्रि० उद् धृ-क्त । उत्क्षिप्ते, उत्कम्पिते च ।
उद्धूनन न० उद् धू-णिच्-ल्युट् । उत्क्षेपणे ।
उद्धूलन न० उद्धूलिं धूलिं करोति उद्धूलि+णिच्-भावे ल्युट् । धू-
लिमर्द्दने । "एलालवङ्गकर्पूरकस्तूरीमरिचत्वचाम् । चूर्णोद्धूल-

अन्नं देयं भोज्ये, क्षीरेऽनुसन्धने। नांसमत्स्यप्रभेदेषु" इत्युक्तरूपे व्यञ्जनोपकरणे मूर्खभेदे च।

उद्धृत त्रि० उद्-हृ-भृ-वा क्त। उत्क्षिप्ते, भुक्तोज्झिते, क्षयोद्धारे, दृष्टकल्पने, उच्छेदिते च। [रीयवह्निष्कृतरुक्षे।

उद्धृतपाणि त्रि० उत्तरीयात् उद्धृतः बहिष्कृतः पाणिर्येन। उच्च-

उद्धान न० उद्धन्यति वह्निरत्र उद्-धा-ल्युट्। चुल्लाम्।

उद्धार पु० उज्झत्युदकम् उज्झ-यत् नि०। नदभेदे।

उद्धन्धन न० उद्+बन्ध-ल्युट्। गलरज्ज्वादिनात्मबन्धने "उद्धन्धनकृता मे च इति" स्मृतिः।

उद्बुद्ध त्रि० उद्+बुध-क्त। विकसिते न्यायादिमते ज्ञानवस्तुनः संबन्धिज्ञानादिना कृतोद्दीपने संस्कारे च। यथा रुक्मिदर्शनात् अनुभूतरुक्मिपकसंस्कारस्य उद्बोधरूपे उद्दीपने कृते रुक्मिपकः स्मर्यते इति प्रबुद्धे जागरिते, उद्बुद्धां च जगद्धात्रीमिति स्मृतेः।

उद्बोध पु० उद्+बुध-घञ्। किञ्चिद्बोधे न्यायादिमते स्मृतिजननाय संस्कारोद्दीपने च।

उद्भट पु० उद्+भट-अच्। कच्छपे, तरङ्गादौ प्रस्फोटनहेतौ भूमौ, श्रेष्ठार्थवे महार्थवे, प्रवरे, मन्यादृष्टिर्भूते लोकादौ च।

उद्भव पु० उद्+भू-अप्। जन्मनि उत्पत्तौ। अपादाने अप्। परमेश्वरे। [लुट्। खिन्ने।

उद्भावन न०उद्+भू-णिच्-ल्युट्। कल्पने, उत्पादने च। उद्+चु०भू०

उद्भिज्ज त्रि० उद्+भिनत्ति क्विप् उद्भित् तथा सन् जायते जन-ड। भूमिमुद्भिद्य जाते तरुगुल्मादौ "उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिणः" इति मनुः।

उद्भिद् त्रि० भूमिमुद्भिनत्ति उद्+भिद्-क्विप्। वृक्षलतागुल्मवल्लीवनरूपे पञ्चविधे स्थावरभेदे। यागविशेषे पु०।

उद्भिद त्रि० उद्+भिद-क। वृक्षादौ पञ्चविधे स्थावरे।

उद्भूत त्रि० उद्+भू-क्त। उत्पन्ने। न्यायमते प्रत्यक्षयोग्ये च।

उद्भेद पु० उद्भिद्यतेऽनेन घञ्। रोगास्रे। भावे घञ्। स्फुरणे।

उद्गम पु० उद्भावयत्यनेन उद्+भम-घञ् च वृद्धिः । उद्वेगे ।
उद्यत त्रि० उद्+यम-क्त । उद्युक्ते, अङ्गीकृते, प्रवृत्ते, यत्नाधाये च ।
उद्यम पु० उद्+यम-घञ् अवृद्धिः । उद्योगे ।
उद्यान न० उद्+या-आधारे ल्युट् । आक्रीडे वने । भावे ल्युट् । निःसारणे । कर्मणि ल्युट् । प्रयोजने ।
उद्योग पु० उद्+युज-घञ् । यत्ने, चेष्टायाम्, उद्यमे च ।
उद्र पु० उनत्ति क्लिद्यति उन्द्-रक् । जलविड़ाले । (उद्विराल) ।
उद्रथ पु० उद्गतो रथो यस्मात् । रथकीले । उद्गतरथवत्त्वात्पक्षो यस्य (ताम्रचूड़विहगे) ।
उद्रिक्त त्रि० उद्+रिच क्त । अतिशयिते, अधिके, स्फुटे च ।
उद्रेक पु० उद्+रिच-घञ् । वृद्धौ, अतिशये, उपक्रमे च ।
उद्वर्त्त पु० उद्+वृत-घञ् । अतिशयिते, अधिके च ।
उद्वर्त्तन न० उद्वर्त्त्यतेऽनेन उद्+वृत्-णिच् ल्युट् । शरीरनिर्मलीकरणद्रव्यादौ । भावे ल्युट् । विलेपने, घर्षणे च । उद्+वृत-ल्युट् । उत्पने ।
उद्वह पु० उद्वहति ऊर्द्धं नयति पितॄन् वह अर्च् । पुत्रे "प्रणमामि रघूद्वहम्" इति तन्त्रम् । ऊर्द्धेन वहति अच् । प्रवहवायोरूर्द्धस्थिते वायुभेदे ।
उद्वान्त पु० उद्गतं वान्तमन्नजलमस्मात् प्रा० ब० । निर्मदे गजे । उद्+वम-क्त । ऊर्द्धीर्णे उद्गते च त्रि० ।
उद्वासन न० उद्+वस-णिच्-ल्युट् । मारणे उद्+वस+णिच्-ल्युट् । विसर्जने । [परिक्षये ।
उद्वाह पु० उद्+वह-घञ् । विवाहे भार्य्यात्वसंपादकव्यापारूपे
उद्वाहु त्रि० उद्गतोबाहुर्यस्य । ऊर्द्धस्तोलितबाहौ "उद्बाहुरिव वामन" इति रघुः ।
उद्विग्न त्रि० उद्+विज-क्त । उद्वेगयुक्ते, दुःखमपरिहार्यमेव तत्र व्याकुलचित्ते, क्षुभिते च ।

उद्वृत्त त्रि० उद्गतो वृत्तात् गति० । दुर्वृत्ते । उद्+वृत–क्त । उत्पिण्डे, शुक्लोज्झिते च ।

उद्वेग पु० उद्+विज–घञ् । व्याकुलचित्ततायाम् विरहजन्ये दुःखोद्भवे, भये च । शुक्राकफले न० । उद्गतोवेगोऽस्मात् निष्फले, क्लिन्ने । शीघ्रगामिनि च ।

उद्वेल त्रि० उद्गतो वेलाम् । अतिक्रान्तमर्य्यादे ।

उद्वेष्टन न० उद्+वेष्ट–ल्युट् । हस्तपादयोर्बन्धने, उपश्लेषे च उद्गतं वेष्टनात् त्रि० । उन्मुक्तबन्धने त्रि० ।

उध्रस उञ्छे क्रया० पर० अक० सेट् । उध्रस्नाति औध्रासीत् ।

उध्रस उत्क्षेपे उञ्छे च(कणश आदाने) चु०सक०सेट् । उध्रासयति ते।

उन्द क्लेदे रुधा० पर० अक० सेट् । उनत्ति । औन्दीत् ।

उन्दुर पु० उन्द–अरु । मूषिके उर–उरु । उन्दुरः उन्दुरुस्वार्थे ।

उन्दुरकर्णी स्त्री० उन्दुरस्य कर्णइव पर्णमस्याः । आखुकर्ण्याम् ।

उन्दूर पु० उन्द–ऊरु । मूषिके ।

उन्न त्रि० उन्द–क्त क्लिन्ने आर्द्रे (भिजे) दयापरे च ।

उन्नत त्रि० उद्+नम–क्त । उच्चे, महति च ।

उन्नतानत त्रि० उन्नतं च तदानतञ्च । उच्चनीचे स्थानादौ ।

उन्नति स्त्री० उद् नम–क्तिन् । वृद्धौ, उदये, गरुडभार्य्यायाञ्च ।

उन्नद्ध त्रि० उद्+नह–क्त । उद्गते, उत्कटे च ।

उन्नमित त्रि० उद्+नम–णिच्–क्त । उत्तोलिते, ऊर्द्धीकृते च ।

उन्न(न्ना)य पु० उद्+नी–अच् घञ् वा । कूपादितो जलादेरुत्तोलने ।

उन्नयन न० उद्+नी–ल्युट् । वितर्के, ऊर्द्धप्रापणे च ।

उन्नस त्रि० उन्नता नासा यस्य नसादेशः । उन्ननासिके ।

उन्निद्र त्रि० उद्गता निद्रा यस्य । विकसिते ।

उन्मज्जक पु० उद्+मज्ज ण्वुल् । "कण्ठदघ्ने जले स्थित्वा तपः कुर्वन् प्रवर्त्तते । उन्मज्जकः स विज्ञेयस्तापसोलोकपूजितः" इत्युक्तलक्षणे तापसे । जलादेरुपरि उत्प्लावके त्रि० ।

उन्मत्त पु० उद्+मद–क्त करणे क्त । धूस्तूरे सुचकुन्दवृक्षे च । कर्त्तरि

क्त । उन्मादयति, महावेशयति च त्रि० । [दके द्रव्ये ।
उन्माद त्रि० उद्गतो मदोहर्षोऽस्य । उन्मादयुक्ते । करणे अच् मा-
उन्मनस् त्रि० उद्भ्रान्तं मनोऽस्य ।-उत्कण्ठायुक्ते, अन्यमनस्के च ।
उन्मथ पु० उद्+मन्थ-घञ् । वधे ।
उन्माथ पु० उन्माथ्यतेऽनेन उद्+मथ-करणे घञ् । आमिषदानेन मृगादिबन्धनार्थं निवेशिते कूटयन्त्रे (फांद) इति ख्याते । भावे घञ् । विलोडनोत्थापने, हिंसने च ।
उन्माद पु० उद्+मद-घञ् । चित्तविभ्रमे, भूताद्यावेशात् चित्तस्यानवस्थितौ, पित्तकफयोः रक्ततावस्थाभेदे, कायिकरोगकृते मतिभ्रंशे च । [बाणभेदे ।
उन्मादन पु० उद्+मद-णिच्-ल्यु । उन्मत्तकारके कामदेवस्य
उन्मान न० उद्+मा-करणे ल्युट् । उर्द्धमाने स्वर्णादेरुन्मानसाधने, तोलकादौ, परिमाणमात्रे च । [च ।
उन्मिषित त्रि० उद्+मिष-क्त । प्रफुल्ले, विकसिते, किञ्चित् प्रकाशिते
उन्मीलन न० उद्+मील-ल्युट् । उन्मेषे, विकाशने च ।
उन्मुख त्रि० उद्+ऊर्द्धं मुखमस्य । ऊर्द्धास्ये, उद्युक्ते च ।
उन्मुद्र त्रि० उद्गता मुद्रा यस्मात् । त्यक्तमुद्रे, विकसितेच ।
उन्मूलन न० उन्मूल+णिच्-ल्युट् । उत्पाटने उद्धृतमूलकरणे ।
उन्मेष पु० उद्+मिष-घञ् । चक्षुरादेरुन्मीलने, किञ्चिद्विकाशे च ।
उप अव्य० पच-क । अधिकार्थे, हीने, आसन्ने, सामीप्ये, सादृश्ये, प्रतियत्ने-गुणाधाने, व्याप्तौ, प्रजायाम् शक्तौ, आरम्भे, दाने, दोषाख्याने, आश्चर्य्यकरणे अत्यये, निदर्शने च ।
उपकण्ठ त्रि० उपगतः कण्ठं अत्या०स० । निकटे, कण्ठासन्ने च । ग्रामान्ते, अन्यानामाक्रान्तिगतौ च न० ।
उपकरण न० उपक्रियतेऽनेन उप+कृ-ल्युट् । प्रधानसाधकगुणेऽङ्गे यथान्नभोजनादौ व्यञ्जनादि, शयने खट्वादि, स्नानेऽनुलेपनादि, प्रजायां पुत्रादि । भूपादीनां छत्रचामरादिपरिच्छदे च ।
उपकार पु० उप+कृ-घञ् । प्राधानस्यानुगुणसम्पादने, उपक्रतौ ।

उपकारक त्रि० उप+कृ—ण्वुल् । उपकारकर्त्तरि । स्त्रीत्वे टापि अतइत्त्वे उपकारिका । रूपाख्ये, पटनिर्म्मितराजसदने च ।

उपकार्य्य त्रि० उप+कृ—ण्यत् । उपकारयोग्ये । राजाख्ये, पटनिर्म्मितराजसदने च स्त्री० टाप् ।

उपकुक्षि स्त्री० उप+कुन्+ड । क्षणजीरके । ण्वुलि टापि अतइत्त्वे । उपकुक्षिकाप्यत्र तत्पर्य्यायां स्वल्पलायाञ्च ।

उपकुर्व्वाण पु० उप+कृ—शानच् । सावधिकब्रह्मचर्य्यकारिणि वेदाध्ययनार्थं कञ्चित्कालं ब्रह्मचर्य्यव्रतधारिणि ।

उपकुल्या स्त्री० उप+कुल—क्यप् । निम्नस्थाम् उपगतः कुल्यां क्लृप्तिमं वरः । कुल्याशब्दे त्रि० ।

उपकूप पु० उपगतः कूपं अव्या० स० । कूपसमीपस्थे खातरूपे जलाशये ।

उपक्रम पु० उप+क्रम—घञ् । उपायज्ञानपूर्वकारम्भे, प्रथमारम्भे चिकित्सायाञ्च ।

उपक्रोश पु० उप+क्रुश—आक्षाने घञ् । निन्दायाम् । आसन्नक्रोशे त्रि० । अव्ययी० । क्रोशसमीपे अव्य० ।

उपक्रोष्टृ पु० उप+क्रुश—ष्टृच् । गर्दभे । निन्दके त्रि० ।

उपक्लृप्त त्रि० उप+क्लृप—क्त । विन्यस्ते, उपभोगार्थं प्रस्तुते च ।

उपगत त्रि० उप+गम—क्त । स्वीकृते, उपस्थिते, ज्ञाते च ।

उपगम पु० उप+गम—घञ् अदन्ङ्गि । समीपगमने, अङ्गीकारे, ज्ञाने च

उपगीति स्त्री० उप+गै—क्तिन् । आर्य्याविशेषे छन्दोभेदे ।

उपगूह्य त्रि० उप+गुह—ण्यत् । आलिङ्गे, प्राह्ये च । भावे ण्यत् । आलिङ्गने ।

उपगूहन न० उप+गुह—ल्युट् । आलिङ्गने, पिधाने च ।

उपग्रह पु० उप+ग्रह—अप् । कारावस्थने, वन्दीकरणे, उपयोगे, अनुकूलने च । कर्म्मणि घञ् । कारारुद्धे बन्द्याम् । ज्योतिषोक्ते ग्रहलक्षे गगनस्थे ज्योतिःपदार्थ धूमकेत्वादौ च ।

उपग्राह्य न० उप+ग्रह—ण्यत् । उपढौकने (भेट) ।

उपघात पु० उप+हन—घञ् । अपकारे, नाशने, रोगे च

उपघ्न पु० उप+हन—क वि० । आशये आश्रये ।

उपचक्र पु० उपगतं चक्रेण तुल्यनामत्वात् । चक्रवाकपक्षिणि ।

उपचय पु० उप+चि—अच् । वृद्धौ, उन्नतौ, ज्योतिषोक्तेषु लग्नतः तृतीयषष्टदशमैकादशस्थानेषु च ।

उपचरित त्रि० उप+चर—क्त । उपासिते लक्षणया बोधिते च ।

उपचर्या स्त्री० उप+चर—क्यप् । चिकित्सायां, सेवायाञ्च ।

उपचार्य पु० उपचीयते संस्क्रियतेऽसौ वि० । वह्नौ संस्कृताग्नौ ।

उपचार पु० उप+चर—घञ् । चिकित्सायां, सेवायां, व्यवहारे, उत्कोचे, लक्षणया मुख्यार्थत्यागेनान्यार्थपरत्वकल्पने, अयथार्थवाक्येन मनोरञ्जकरणे च उपचारपदं न चेदिदमिति कुमारः ।

उपचित त्रि० उप+चि—क्त । दृब्धे, वर्द्धिते, सञ्चिते, समाहिते, अवयवद्वारा बद्धजीभूते च । [स्त्रीपक्षायां स्त्रीत्वौ च ।

उपचित्रा स्त्री० उपगता चित्रं वर्णम् । उन्दुरपर्य्यायाम् चित्रातारा-

उपच्छन्द् पु० उप+छन्द्—घञ् । सहायार्थं प्रार्थनेऽनुरोधे च । "तत्सिद्ध्युपच्छन्दयति प्रयोज्य" मिति रघुः ।

उपजाति स्त्री० वर्णवृत्ते छन्दोभेदे ।

उपजाप पु० उप+जप—घञ् । भेदे, विच्छेदे, "उपजापः कृतस्तेन" इति माघः । उपांशुजपे च ।

उपजिह्वा स्त्री० उपगता अर्द्धसुखी जिह्वा यस्याः । काकीभेदे । प्रा० स० । उपरिस्थायां जिह्वायाञ्च (आलजिभ्) ।

उपजीविका स्त्री० उपजीव्यति उप+जीव—कर्त्तरि कर्त्तृत्वोपचारात् ण्वुल् अत इत्त्वम् । जीवनोपायभूतायां वृत्तौ ।

उपजीविन् त्रि० उप+जीव—णिनि । आश्रिते ।

उपजीव्य त्रि० उप+जीव—ण्यत् । आश्रये ।

उपज्ञा स्त्री० उप+ज्ञा+कर्म्मणि अङ् । विनोपदेशेन स्वयमुद्भाव्ये प्रथमं ज्ञायमाने । भावे अङ् । आद्ये ज्ञाने ।

उपढौकन न० उप+ढौक—कर्म्मणि ल्युट् । (भेट) उपहारे उपायने ।

उपत्यका स्त्री० उप+यकञ् । पर्वतसमासन्नायां भूमौ ।

उपदंश पु० उप+दंश–घञ् । मद्यपानरोचके (चाटनी) भक्ष्यद्रव्ये, भक्ष्यद्रव्योपकरणमात्रे, उपस्थरोगभेदे च ।

उपदर्शक पु० उप+दृश–णिच्–एवुल् । द्वारपाले । दर्शयितरि त्रि०

उपदा स्त्री० उप+दा–अङ् । उत्कोचे, उपढौकने च ।

उपदेश पु० उप+दिश–घञ् । मन्त्रादिकथने, अनुशासने, हितकथने, प्रवर्त्तकवाक्ये च ।

उपद्रव पु० उप+द्रु–अप् । उत्पाते शुभाशुभसूचके भूकम्पादौ, रोगजन्ये ज्वरादौ पिपासाहादौ विकारे च ।

उपद्रुत त्रि० उप+द्रु–क्त । व्याकुले, प्राप्तोपद्रवे च ।

उपधा स्त्री० उप–धा–अङ् । धर्म्मार्थकाममोक्षेषु प्रत्येकं परियोधने । उपेत्य धीयते यस्मादुपधा तेन कीर्त्तिता" इत्युक्ते धर्म्मार्थाद्युपन्यासेन मन्त्रिणां परीक्षणे व्याकरणोक्ते, अन्यवर्णात् पूर्ब्ववर्णे च ।

उपधातु पु० उपमितः धातुभिः । स्वर्णादिप्रधानधातुसदृशेषु "सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षिकम् । तुत्थं कांस्यञ्च रीतिश्च सिन्दूरञ्च शिलाजतु" इत्युक्तेषु सप्तसु द्रव्येषु, शरीरस्थेषु रसादिजन्येषु स्तनदुग्धादिषु च ।

उपधान न० उपधीयते शिरोऽत्र । (बालिश) शिरोधाने, प्रणये, द्रव्यभेदे, विधे च । [कपटे, रथचक्रे च ।

उपधि पु० उप+धा–कि । अन्यथास्थितस्य वस्तुनोऽन्यथा प्रकाशनरूपे

उपधूपित त्रि० उप+धूप–क्त । व्याप्तधूमरसे, धूमापघृते च ।

उपधृति स्त्री० उप+धृ–क्तिन् । क्रिया ।

उप(पा)ध्मानीय पु० उप ध्मा+शानच्–छ । पक्षयोः परयोः उच्चार्य्यमाणे विसर्गसदृशे वर्णभेदे तस्य व्यञ्जिका अर्द्धविसर्गाकारा रेखा । उपाध्मानीयस्य ।

उपनत त्रि० उप+नम–क्त । उपस्थिते, प्राप्ते च ।

उपनय पु० उप+नी–अच् । उपनयने "अष्टमोक्तकर्म्मणा येन समीपं नीयते गुरोः । बालो वेदाय तद्योगाद् बालस्योपनयं विदुः" इति स्मृत्युक्ते संस्कारविशेषे । न्यायमते यो यो मयान् स स्व-

क्षिकान् अयमपि तथेत्यादिवाक्यरूपे न्यायावयवभेदे, ज्ञानलक्षणप्रत्यासत्तिजन्ये ज्ञानभेदे च ।

उपनयन न० उप+नी–ल्युट् । क्षुद्रसंस्कारभेदे उपनयार्थे ।

उपनाह पु० उप+नह–घञ् । वीणायां तन्त्रीबन्धनस्थाने, वृक्षादिपशुबन्धनार्थं लेपनद्रव्ये च ।

उपनिधि पु० उप+नि+धा–कि । न्यासे विश्वासेन स्थापितं द्रव्ये ।

उपनिषद् स्त्री० उपनिषीदति प्राप्नोति ब्रह्मात्मभावोऽनया । उप+नि+सद–क्विप् । ब्रह्मविद्यायां, तत्प्रतिपादके वेदशिरोभागे वेदान्ते च । [राजमार्गे ।

उपनिष्कर न० उपनिष्किरन्ति सैन्यान्यत्र (उप–निस्कृ+अप् । वीथौ

उपनिष्क्रमण न० उप+निस्–क्रम–ल्युट् । राजपथे ।

उपनेत्र न० उपगतं नेत्रम् । नेत्रसमीपे धृते काचादिनिर्म्मिते नेत्रोपकारके द्रव्ये (चसमा) ।

उपन्यास पु० उप+नि+अस–घञ् । वाक्योपक्रमे ।

उपपति पु० उपगतः पत्या । जारे ।

उपपत्ति स्त्री० उप+पद–क्तिन् । युक्तौ, सङ्गतौ च ।

उपपद न० उपोच्चारितं पदम् प्रा० स० । समीपोच्चारिते नामोत्तरं उच्चारिते अर्थबोधकशब्दे, व्याकरणे प्रत्ययादिविधायकसूत्रे सप्तम्यन्तपदेन निर्दिश्यमाने पदे च । यथा कर्म्मण्यण् इत्यादौ कर्म्मणीति सप्तम्यन्तं पदम् अण्प्रत्ययविधाने उपपदम् ।

उपपन्न त्रि० उप+पद–क्त । युक्तियुक्ते, "उपपन्नं ननु शिवम्" इति रघुः

उपपातक न० उपगतं पातकेन । गोवधादिरूपे पापे ।

उपपादन न० उप+पद–णिच्–ल्युट् । युक्त्या समर्थने सम्यक्प्रतिपादने च । [पादिते च ।

उपपादित त्रि० उप+पद–णिच्–क्त । युक्त्या समर्थिते, सम्यक् प्रति-

उपपुर न० उप समीपे पुरम् । पुरसमीपे शाखानगरे ।

उपपुराण न० उपगतं पुराणेन । सर्गप्रतिसर्गादिलक्षणपुराणलक्षणयुक्तेषु सनत्कुमारादिशुक्तेषु अष्टादशसु ग्रन्थेषु ।

उपप्लव पु० उप+प्लु—अप् । गगनाद्गुल्कापातादिरूपे उपद्रवे, चन्द्रार्कोपरागे च ।

उपप्लुत त्रि० उप+प्लु—क्त । पीड़िते, ग्रस्ते-चन्द्रार्के च उपप्लुते च । "उपप्लुतं यातुमद" इति माघः । [कारके ।

उपभूषण न० उपभूष्यतेऽनेन ल्युट् । घण्टाचामरादौ भूषणोप-

उपभोग पु० उप+भुज—घञ् । भोजनादिजन्ये सुखानुभवे भोगे ।

उपमर्द पु० उप+मृद—घञ् । आलोड़ने, क्षिपने, पूर्वधर्मविनाशनेन धर्मान्तरोत्पादने च ।

उपमा स्त्री० उप+मा—अङ् । सादृश्ये, अर्थालङ्कारभेदे च । सा० १०८०

उपमान न० उपमीयतेऽनेन उप+मा—ल्युट् । सादृश्यज्ञानसाधने सादृश्यप्रतियोगिनि च येन सादृश्यं भवति तच्चित्, यथा चन्द्र इव सुखमित्यादौ चन्द्र उपमानम् । भावे ल्युट् । सादृश्यज्ञाने ।

उपमिति स्त्री० उप+मि—क्तिन् । सादृश्यज्ञाने उपमायाम् ।

उपमेय त्रि० उपमीयतेऽसौ उप+मि—यत् । सादृश्याश्रये यथा चन्द्र इव सुखमित्यादौ सुखम् ।

उपमेयोपमा स्त्री० अर्थालङ्कारभेदे साहि० १० प० ।

उपयन्तृ पु० उप+यम—तृच् । स्त्रियो विवाहकर्त्तरि पत्यौ ।

उपयम पु० उप+यम्—घञ् अट्टहिः । विवाहे । वा ट्टहिः । उपयामश्चात्र । [मन्त्रे ।

उपयमन न० उप+यम—ल्युट् । विवाहे । करणे लुट् । वैवाहिके

उपयाचक त्रि० उपगत्य याचकः याच—ण्वुल् । समीपे आगत्य याच्ञाकर्त्तरि । [देवाय देये मन्त्रादौ च ।

उपयाचितक न० उप+याच—क्त स्वार्थे कन् । प्रार्थिते, स्वेष्टसिद्धये ।

उपयुक्त त्रि० उप+युज—क्त । न्याय्ये, रचिते, भुक्ते च ।

उपयोग पु० उप+युज—घञ् । आवश्यके भोजने, इष्टसिद्धिसाधने व्यापारे च । [साधनतायाम्, प्रयोजने च ।

उपयोगिता स्त्री० उपयोगिनो भावः तल् । आनुकूल्ये, इष्ट-

उपयोगिन् त्रि० उप+युज—घिणुन् । इष्टसाधने अनुकूले उपयुक्ते च ।

उपरक्त पु० उप+रञ्ज-क्त । रागयुक्ते चन्द्रे सूर्ये च । व्यसनेष्वा-सक्ते, रञ्जनद्रव्येण रक्ते च ।

उपरक्षण न० उप+रक्ष-ल्युट् । रक्षार्थं सैन्यादिस्थापने ।

उपरत त्रि० उप+रम-क्त । विरते, निवृत्ते, क्षते, सर्वकामनाशून्ये च ।

उपरतस्पृह त्रि० उपरता निवृत्ता स्पृहा यस्य । सत्यपि जीवने स्वा-मित्वे विषयभोगादौ च अत्यन्तनिवृत्तामिलाषे । "धितर्थ्युपरत-स्पृहे" इति स्मृतिः ।

उपरति स्त्री० उप+रम-क्तिन् । विरतौ, लभ्यप्राप्तावौदासीन्ये, विषयेभ्य इन्द्रियाणां निवारणे, विहितकर्मणाम् विधानतस्त्यागरूपे संन्यासे "पुमर्थः कर्मणा नेति धीर्या सोपरतिर्मवेदित्युक्तरूपायां बुद्धौ च ।

उपरत्न न० उपसितं रत्नेन गतिः । मणिसदृशेषु "उपरत्नानि काचश्च कर्पूरोऽश्मा तथैव च । सत्तामुक्तितथा शङ्ख इत्युक्तकाचादिषु ।

उपरम पु० उप+रम-घञ् अवृद्धिः विषयवैराग्ये, निवृत्तौ । "फेनो-परमे दद्यात्" इति वैद्यकम् ।

उपराग पु० उप+रञ्ज-घञ् । रविचन्द्रयोर्ग्रहणे । यत्तूक्तञ्च राहुधिष्ठितभूमिच्छायया चन्द्रस्य, चन्द्रमण्डलेन च रवेर्मण्डलाच्छा-दनमिति सिद्धान्ते स्थितम् । [ऊर्द्ध शब्दस्यार्थे ।

उपरि अव्य० ऊर्द्ध+रिल् उपादेशश्च । प्रथमापञ्चमीसप्तम्यन्तार्थवृत्तेः

उपरिष्टात् अव्य० ऊर्द्ध-रिष्टाति उपादेशश्च । उपरिशब्दस्यार्थे ।

उपरोध पु० उप+रुध-घञ् । आनुकूल्याय कथनरूपेऽनुरोधे, स-मीपे रोधने च ।

उपरोधक न० उप+रुध-ण्वुल् । वासगृहे । अनुरोधकर्त्तरि त्रि० ।

उपल पु० उपलीयते उपलीर्य्यते गिरिरनेन वा-ड नस्य लत्वम् । प्रस्तरे । अर्श आदित्वादच् । प्राणाचितायां स्त्री० ।

उपलक्षण समीपस्थस्य स्वसम्बन्धिनश्च लक्षणं ज्ञानं यस्मात् । स्वस्य स्वान्यस्य च अजहत्स्वार्थया लक्षणया बोधके शब्दे यथा काकेभ्यो दधि रक्ष्यतामित्यत्र काकपदं स्वस्य स्वान्यादेः स्वादेश्च बोधकम् ।

उपलब्धि स्त्री० उप+लभ–क्तिन्। ज्ञाने, प्राप्तौ च। "नाभाव उप-लब्धेः" इति वेदान्तसूत्रम्।

उपलम्भ पु० उप+लभ–घञ् सुम् च। लाभे, ज्ञाने च।

उपलिङ्ग न० उपमितं लिङ्गेन। लोकसिद्धसाधनभावेन लिङ्गेनानुमा-पकेन सदृशे अलौकिकसाधनभावके अरिष्टसूचके भूकम्पादौ उपचारे।

उपवट पु० उपमितो वटेन। वटवृक्षसदृशे प्रियालवृक्षे।

उपवन न० उपमितं वनेन। वनतुल्ये कृतिमे आरोपितवृक्षसमूहे उद्याने। [मध्यम् न०।

उपवर्ह पु० उप+वृह–घञ्। शिरोधाने (बालिश) लुगट्। उपवर्हण-

उपवसथ पु० उप+वस–अथ। याने।

उपवास पु० उप+वस–घञ्। "तपनोदयमारभ्य यामाष्टकमभोजनम्। उपवास इति ख्यात" इति स्मृत्युक्ते अनाहारे।

उपवाह्य पु० उप+वह–ण्यत्। राजवाहके।

उपविष पु० उपमितं विषेण। "अर्कक्षीरं स्नुहीक्षीरं तथैव कलि-हारिका। धत्तूरः करवीरश्च पञ्च चोपविषाः स्मृता इत्युक्तेष्व-र्कक्षीरादिषु। [स्थापिते कार्पासे यत्नसूत्रे।

उपवीत न० उप+अज–क्त वीभावः। बहिर्भूतदक्षिणहस्ततया वामांस-

उपवीतिन् त्रि० उपवीतं विद्यतेऽस्य। यज्ञोपवीतवति।

उपवृंहित त्रि० उप+वृंह–क्त। वर्द्धिते।

उपवेद पु० उपमितः वेदेन। वेदसदृशे आयुर्वेदादौ।

उपव्याघ्र पु० उपमितो व्याघ्रेण। व्याघ्रतुल्ये नृगान्तके (चितावाघ) चितकाख्ये पशुभेदे। [नाशे, रोगप्रतीकारे, शान्तौ च।

उपशम पु० उप–शम–घञ् वृद्धिः। इन्द्रियाणां निग्रहे, तृष्णा-

उपश्रय पु० उप+श्री–अच्। समीपशयने, "औषधान्नविहाराणामु-पयोगं सुखावहम्। विद्याद्युपश्रयं व्याधेरिति वैद्यकोक्ते उपयोगभेदे च।

उपश्रुत्य न० उपगतं श्रवणम् अस्मिन्स्थाने (भागाड़) यानान्ते।

उपशाय पु० उप+शी–घञ्। वासिकभटानां पर्य्यायेण शयने।
उपश्रुति स्त्री० उप+श्रु–क्तिन्। अङ्गीकारे दैवशुभाशुभप्रश्ने च।
उपश्लेष पु० उप ईषत् एकदेशेन श्लेषः सम्बन्धः। आधाराधेययोरेकदेशसम्बन्धे। यथा वृक्षघटयोः।
उपष्टम्भक न० उप+स्तभ–ण्वुल्। स्थूणायाम्। स्तम्भकारिणि त्रि०।
उपसंग्रह पु० उप+सम्+ग्रह–अप्। पादसंवर्धपूर्वकनमस्कारे।
उपसंयम पु० उप+सम्+यम–घञ्। अदृष्टिः। उपसंहारे।
उपसंव्यान न० उपसंवीयतेऽनेन व्ये–ल्युट्। परिधानवस्त्रे।
उपसंहार पु० उप+सम्+हृ–घञ्। समाप्तौ, संक्षेपे च।
उपसत्ति स्त्री० उप+सद–क्तिन्। सेवायां, सङ्गमाने, प्रतिपादने च।
उपसन्न त्रि० उप+सद–क्त। उपस्थिते, निकटागते च।
उपसम्पन्न त्रि० उप+सम्+पद–क्त। यज्ञार्थहते प्रोक्षिते पशौ, पाकेन संस्कृते मांसादौ, पर्य्याप्ते, हृते च।
उपसर पु० उप+सृ–अप्। स्त्रीगव्यादिषु पुंगवादीनां गर्भाधानायोपगमे।
उपसर्ग पु० उप+सृज–घञ्। रोगविकारे उपद्रवे, शुभाशुभसूचके महाभूतविकाररूपे उत्पाते, व्याकरणोक्तेषु "निपातास्वादयोऽव्ययाः प्रादयस्तूपसर्गकाः। द्योतकत्वात् क्रियायोगे लोकादवगताङ्गे" इत्युक्तलक्षणेषु क्रियायोगे प्रादिषु च।
उपसर्जन न० उप+सृज–ल्युट्। असुख्ये, गौणे, विशेषणे व्याकरणोक्ते समासशास्त्रे प्रथमान्तनिर्दिष्टे च।
उपसर्या स्त्री० उपसियतेऽसौ सृ–यत्। गर्भग्रहणयोग्यायाम् ऋतुमत्यां गवि। [चन्द्रार्कसमीपे मण्डलाकारे परिधौ।
उपसूर्य्यक न० उपगतं सूर्य्यं सूर्य्यमिव चन्द्रं वा संज्ञायां कन्।
उपसूर्य्यकमण्डल न० उपसूर्य्यकं मण्डलं वेष्टनम् कर्म०। चन्द्रार्कवेष्टने परिधौ। [युक्ते, विसृष्टे च त्रि०।
उपसृष्ट न० उप+सृज–क्त। मैथुने। व्याकरणोक्ते प्राद्युपसर्ग-
उपसेक पु० उप+सिच घञ्। सेचनेन मृदूकरणे।
उपस्कर पु० उप+कृ–अप् सुट् च। व्यञ्जनादिसंस्कारके पिष्टधन्या-

कहरिद्रादौ (घटना) गृहोपकरणे हस्तदूखलादौ च ।

उपस्थाता त्रि० उप+स्था—तृच् । सेवके, उपगते, ऋत्विग्भेदे च ।

उपस्थान न० उप+स्था+ल्युट् । उपेत्य स्थितौ, नमस्कारे च ।

उपस्थित त्रि० उप+स्था—क्त । समीपस्थिते, प्राप्ते, आगते च ।

उपस्पर्श पु० उप+स्पृश—घञ् । स्पर्शे, स्नाने च । उपस्पृश्यन्ते इन्द्रियाणि यत्र । विधिना जलपानपूर्वके सुखादिस्पर्शरूपे वैधाचमने । तथेत्युपस्पृश्येति रघुः ।

उपस्पृष्ट त्रि० उप+स्पृश—क्त । आचान्ते कृताचमने, समीपे आरूनादौ स्पृष्टे च । [समीपे अव्य० ।

उपहार पु० उप+हृ—घञ् । (भेट) उपढौकने । अव्ययी० । हारः

उपहर पु० उप+हृ—अप् । युद्धे । निर्जने निकटे च न० ।

उपांशु अव्य० उप+अन्शु-उ । निर्जने अप्रकाशे च । "जिह्वो चालयेत् किञ्चित् देवतागतमानसः । निजश्रवणयोग्यः स्यादुपांशुः स जपः स्मृत इत्युक्तलक्षणे मन्त्रादेर्जपे पु० । उपांशुः स्याच्छतगुण इति मनुः ।

उपाकरण न० उप+आ+कृ—ल्युट् । उपनयनपूर्वकं वेदस्य ग्रहणे, श्रावण्यां पूर्णिमायां कर्त्तव्ये वैधकर्मविशेषे, संस्कारपूर्वकं यज्ञे पशूनां हनने, आरम्भे च ।

उपाकर्म्म न० उप+कृ—मनिन् । उपाकरणशब्दार्थे । [आरम्भे च ।

उपाकृत त्रि० उप+आ+कृ—क्त । यज्ञे हननार्थं कृतसंस्कारे पशौ,

उपाख्यान न० उप+आ+ख्या—ल्युट् । पूर्ववृत्तकथने, "रामोपाख्यानमत्रैव" इति महाभारतम् । कथनमात्रे च ।

उपागम पु० उप+आ+गम—घञ् अदुपधेः । स्वीकारे, समीपागमने च ।

उपाङ्ग न० उपमितमङ्गेन गतिः । अङ्गसदृशे प्रधानोपयोगिनि "अङ्गोपाङ्गैरिहोदिता" इत्यमरः ।

उपाजि अव्य० उप+अज—के वीभावाभावः । दुर्बलस्य बलाधाने ।

उपात्त त्रि० उप+आ+दा—क्त । गृहीते, प्राप्ते च "स्वयं केचिदुपात्तस्य" इति स्मृतिः । अन्तर्गतभेदे गजे पु० ।

उपात्यय पु० उप+अति+इण्—अच्। लोकयात्राचारातिक्रमे, व्यतिक्रमे, क्रमोल्लङ्घने, नाशे च।

उपादान न० उप+आ+दा—ल्युट्। ग्रहणे, स्वस्वविषयेभ्य इन्द्रियाणां निवारणरूपे प्रत्याहारे, कार्य्यजननार्थमुपादीयमाने कार्य्यान्विते कारणे, यथा मृदादि घटादेः, स्वर्णादि अलङ्कारादेः, जननार्थं ग्रहणे। तच्च सर्वदा कार्य्येऽनुगतम्।

उपादेय त्रि० उप+आ+दा—यत्। उत्तमे, ग्राह्ये, प्रधाने, विधेये च उपादेये गुणो भवेदिति भट्टकारिका।

उपाधि पु० उप+आ+धा—कि। धर्मचिन्तायाम्, विशेषणे। उपाधिर्भिद्यते न तु तद्वानिति सांख्यसूत्रम्। स्वधर्मस्यान्यगततयावभासके, यथा दर्पणादि स्वगतं नीलिमादिकं स्वप्रतिबिम्बितमुखगततया, जवापुष्पं च स्वगतं रक्तत्वं स्फटिकगतयाऽवभासयति अतोऽत्र दर्पणादि नीलिमाद्यवभासने उपाधिः। न्यायमते हेतुरभिचारोद्भावके साध्यव्यापके साधनाव्यापके पदार्थे च।

उपाध्याय पु० उपेत्याधीयतेऽस्मात् उप+अधि+इङ्—घञ्। "एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः। योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते" इति मनूक्तलक्षणे वेदैकदेशतदङ्गाध्यापके। स्त्रियां ङीपि उपाध्यायीतिरूपद्वयम्। उपाध्यायस्य पत्नीत्यर्थे ङीष् आनुक् वा उपाध्यायानी उपाध्यायी च।

उपानह् स्त्री० उप+अन—नह्—क्विप्। उपसर्गदीर्घः। चर्म्मपादुकायाम्।

उपान्त पु० उपनितमन्तेन प्रा० स०। निकटे, प्रान्ते च।

उपान्त्य त्रि० उपान्ते भवः यत्। अन्त्यसमीपभवे।

उपाय पु० उप+अय—घञ्। साधने, उपगमे, राज्ञां रिपुनिराकरणहेतुषु सामादिषु च।

उपायन न० उप+अय—ल्युट्। तोषकारके उपहारे, समीपगमने च।

उपारत त्रि० उप+आ+रम—क्त। निवृत्ते "उपारताः यश्चिपरातरोचरात्" इति भारविः।

उपालम्भ पु० उप+आ+लभ–घञ् मुम् च। निन्दापूर्वकदुष्टवचने, परस्परदूषणे च। [तिरस्कारे, प्रतिबिम्बे च।

उपालब्ध त्रि० उप+आ+लभ–क्त। अलाभनयनाय पुनःपुनर्भूमिकुठि-

उपासक त्रि० उप+आस्–ण्वुल्। उपासनाकर्त्तरि, सेवके च त्रि०।

उपासङ्ग पु० उपासज्यते शरो अत्र। उप+आ–सञ्ज–घञ्। तूणे। [सेवने। युच्। देवताद्याराधने स्त्री०।

उपासन न० उप+आस–ल्युट्। शरीराभ्यासे। आस–ल्युट्

उपासित त्रि० उप+आस–क्त। सेविते, कृतोपासने देशादौ च।

उपासि स्त्री० उप+आस–क्तिन्। उपासनायाम् "यदुपासिमवाव-न्योः" भट्टिमाङ्कलिः।

उपाहित पु० उप आसन्नमहितं यतः। उल्कापातादौ अन्तरिक्षपात-रूपे उपद्रवे। उप+आ+धा–क्त। आरोपिते, योजिते च त्रि०।

उपेक्षक त्रि० उप+ईक्ष–ण्वुल्। विषादिनोर्जयपराजयासंलक्षे, तत्कृतहर्षविषादशून्ये, उदासीने, प्रतीकारानुद्यते च।

उपेक्षा स्त्री० उप+ईक्ष–अ। त्यागे "इदं न मम स्यात्" इति इच्छा-भेदे, औदासीन्ये, अनपेक्षणे च।

उपेन्द्र पु० उपगत इन्द्रम् अनुजत्वात्। विष्णौ। स हि कश्यपात् अदितौ इन्द्रादपरं वामनरूपतया संजातः।

उपेन्द्रवज्रा स्त्री० एकादशाक्षरपादके छन्दोभेदे।

उपेय त्रि० उप+इण्–यत्। उपायसाध्ये, प्राप्तव्ये च।

उपोढ त्रि० उप+वह–क्त। सन्निवेशविशेषयुक्ते व्यूढे सैन्ये निकटे, ऊढे कृतविवाहे च।

उपोत्तम त्रि० उपगतमुत्तममन्त्यम्। अन्त्यसमीपे उपान्त्ये।

उपोदकी स्त्री० उपगतमुदकमत्र। पूतिकायाम् (पुइशाक)।

उपोद्घात पु० उप+उद्+हन–घञ्। प्रकृतोपयोगादौ उदाहरण्ये प्रकृतार्थं वर्णयितुमर्थान्तरवर्णने, "चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः" इत्युक्तलक्षणायां चिन्तायाञ्च।

उपोषण न० उप+उष–ल्युट्। उपवासे अहोरात्राभोजने।

उपोषित न० उप वस+भावे—क्त । उपवासे । कर्त्तरि क्त । उप-वासकर्त्तरि त्रि० । [चेले ।

उप्त त्रि० वप—क्त क्तवार्थे धात्वादौ । अधिकरणे क्त । उप्तधान्यादौ

उप्तशिष्ट त्रि० पूर्वमुप्तं पश्चात् शिष्टं पूर्वकालेत्यादि स० । बीजवप-नानन्तरं शिष्टे क्षेत्रे (बीजावशिष्टे क्षेत्रे) । (काड़ान) ।

उब्ज आर्জवे रुदा० पर० अक० सेट् । उब्जति औब्जीत् ।

उभ त्रि० द्वित्व० । उ—भक् । द्वित्वविशिष्टार्थे । अस्य वचनादिवृत्तौ प्रयोगो नास्ति ।

उभय त्रि० उभौ अवयवौ यस्य उभ+अयट् । द्वित्वविशिष्टेऽर्थे ।

उभयतस् अव्य० उभ—तसिल् वृत्तौ अयः । उभयपार्श्वे ।

उभयथा अव्य० उभ+थाच् । वृत्तौ अयः । उभयप्रकारेष्वर्थे ।

उभयद्युस् अव्य० उभ—द्युस् वृत्तौ अयः । उभयस्मिन्योः । एद्युस् । उभयेद्युरन्यत् ।

उभ् अव्य० उ—डुभ् । रोषे, स्वीकारे, प्रश्ने च ।

उमा स्त्री० ऊः शिवस्य मा लक्ष्मीः । दुर्गायाम् "उमेति मात्रा तपसे निषिद्धा पश्चादुमाख्यां सुमुखी जगाम" इति शिवकान्तायां पार्वत्याम् । तं शिवं माति पतित्वेन मन्यते मा+क । शिवप-त्न्याम् । वे—मक् संप्रसारणम् । हरिद्रायाम् अतसीदृश्यै (म-सिना) कीर्त्तौ, कान्तौ, भान्तौ च ।

उमाकट पु० उमाया अतस्या हरिद्रायाः वा रजः कटच् । अतस्या हरिद्रायाश्च रजसि ।

उमाधव पु० उमाया धवः पतिः ६त० । महादेवे । उमाकान्तोमेशा-दयोऽप्यत्र ।

उमासुत पु० ६त० । कार्त्तिकेये । उमापुत्रादयोऽप्यत्र ।

उम्भ पूर्त्तौ रुदा० पर० सक० सेट् । उम्भति औम्भीत् ।

उर् गतौ (सौत्रः) पर० सक० सेट् । ओरति औरीत् ।

उरग पु० उरसा गच्छति उरस्+गम—ड सलोपश्च । सर्पे, तद्देवतायां अश्लेषानक्षत्रे च ।

उरगाशन पु० उरगानश्नाति उरग+अश्-ल्यु उप० स०। गरुडे। ल्युट्। उरगाशनम् क्लीबे न०।

उरण पु० ऋ० क्यु, धातोरच्च। मेषे। [(दादमर्दन) इत्ये।

उरणाक्ष पु० उरणस्य मेषस्य अक्षीव अक्षि पुष्पं यस्य। दद्रुघ्ने

उरभ्र पु० उरु उत्कटं भ्रमति भ्रम-ड पृषो० उलोपः। मेषे।

उररी अव्य० वे-ररीक्। अङ्गीकारे, विस्तारे च।

उररीकृत त्रि० उररी+कृ-क्त। अङ्गीकृते, विस्तृते च।

उरस्कृद् पु० उरस्कादयतेऽनेन कृद्-णिच्-घ हुस्वः। कवचे।

उरस् न० ऋ-असुन् धातोरुच्च। वक्षःस्थले।

उरसिज पु० उरसि जायते जन-ड त० सप्तम्या अलुक्। स्तनोद्भवो-जाते स्तने। [पद्मोद्भवे।

उरसिल त्रि० प्रशस्तमुरोऽस्यस्य प्राशस्त्येमत्वर्थीय इलच्। प्रशस्त-

उरस्कट पु० उरः कवचते आव्रियतेऽनेन कट-घञर्थे क। बाहाना-सुत्तरीयभेदे तदीये यज्ञोपवीताकारे वस्त्रभेदे च। (चुकशाकाड़)।

उरस्य न० उरस्यायते त्रै-क। वक्षोरत्नके कवचे। ल्युट्। उर-स्त्राणमप्यत्र न०।

उरस्य त्रि० उरसा निर्म्मितः उरस्+यत्। स्वजाते औरसे पुत्रे।

उरस्वत् त्रि०प्रशस्तमुरोऽस्यस्य प्राशस्त्ये मतुप् मस्य वः। प्रशस्तवक्षोयुते।

उरी अव्य० वेञ् रीक्। अङ्गीकारे, विस्तारे च।

उरीकार पु० उरी+कृ-घञ्। स्वीकारे, विस्तारे च।

उरीकृत त्रि० उरी+कृ-क्त। अङ्गीकृते, विस्तृते च। [ङीप्।

उरु त्रि० ऋर्यु-कु हुलोपो हुस्वश्च। विशाले, महति च स्त्रियां वा

उरुक्रम पु० उरुर्महान् क्रमः यादोविक्रमो वा यस्य। विष्णौ।

उरुवूक पु० उरु-वै-अक आलोपश्च। एरण्डवृक्षे रक्तैरण्डे च।

उरोज पु० उरस् जन-ड त०। स्तीजने। [(मातृजरा) मर्कटके।

उर्णनाभ पु० उर्णेव सूत्रं नाभौ गर्भेऽस्य अच् समा० हुस्वः।

ऊर्णा स्त्री० ऊर्णवते आच्छादयते ऊर्णु-ड हुस्वश्च। मेषादिलोम्नि।

उर्द् माने खादे च धक० क्रीड़ायाम् अक०भ्वा०आत्म० सेट् उर्दते।

उद्र पु० उर्द्–रक् । जलविड़ाले (उद्विराव) ।
उर्द् हिंसायां भ्वा० पर०सक० सेट् । उर्दति और्दीत् ।
उर्वरा स्त्री० उर्व–क–अच् । सर्वशस्यगुणायां भूमौ ।
उर्व्वशी स्त्री० उरून् अश्नुते वशीकरोति उरु+अश–क गौरा०ङीष् । स्वर्गवेश्यायाम् ।
उर्व्वशीरमण पु० ६त० । चन्द्रवंश्ये बुधपुत्रे पुरूरवोनामके राजनि ।
उर्व्वारु पु० उर्व–रु–उण् । कर्कट्याम् । स्वार्थे कन् अत्रैव ।
उर्व्वी स्त्री० उर्व+स्त्रियां गुणवचनत्वात् ङीष् । भूमौ ।
उल दाने (सौत्रः) पर० सक० सेट् । ओलति औलीत् ।
उलप पु० न० वल–कपच् सम्प्रसारणम् । शाखापत्रप्रचयबुतायां लतायाम् । कोमले तृणभेदे न० (उलुखड़) ।
उलूक पु० वल–समवाये ऊक सम्प्रसारणम् । पेचके, इन्द्रे, दुर्योधनमातुलशकुनिपुत्रे च तृणभेदे न० । (उलुखड़) ।
उलूखल न० ऊर्द्धं खम् उलूखं पृषो० तत् लाति श्लाघति ला–क । धान्यादिकण्डनसाधने काष्ठमये पात्रे (उखरी) गुल्मरोगे च ।
उलूपिन् पु० ओः शत्रोरिव रूपमस्यास्ति इनि रस्य लत्वम् । शिशुके, (शोशक) मत्स्यभेदे च ।
उलुलु पु० उद् उद् इति रस्य लत्वम् । दृष्टिस्रुचके माङ्गल्यादौ स्त्रीध्वनिभेदे "उलूरुलुध्वनिरुच्चार" इति नैषधम् ।
उल्का स्त्री० उप–दाहे क नि०पस्य लः । रेखाकारे गमनात् पतत्तेजःपुञ्जे । [भेदे (ल्याकसेयाली) ।
उल्कामुखी स्त्री० उल्केव रात्रौ ज्वलत् मुखं यस्याः । शृगाली
उल्मुक न० उप–दाहे मुक, पस्य लः । अङ्गारे ।
उल्लल त्रि० उद् लल–अच् । बद्धरोमयुक्ते ।
उल्लसित त्रि० उद् लस–क्त । तरलिते, आन्दोलिते च । [पु० ।
उल्लाघ त्रि० उद्+लाघ–क्त नि० व रोगनिर्मुक्ते, दक्षे शुचौ च । मरिचे ।
उल्लाप पु०+लप–घञ् । काकुवाक्ये, शोकरोगादिना अनेर्विकारे च ।
उल्लास पु० उद्+लस–घञ् । प्रकाशे, आह्लादे, अलङ्काराध्यायस्या-

नीचे परिच्छेदे च । [चिह्निते च ।

उल्लिखित त्रि० उद्+लिख–क्त । उत्कीर्णे तनूजते उपरि लिखिते,

उल्लेख पु० उद्+लिख–घञ् । उद्धारणे, अलङ्कारभेदे साहि०।०प ।

उल्लेखन न० उद्+लिख–ल्युट् । वमने, खनने, उद्धारणे च ।

उल्लोच पु० उद्+लोच–घञ् । चन्द्रातपे विताने ।

उल्लोल पु० उद्+लोड़–घञ् उस्य लत्वम् । महातरङ्गे ।

उल्व न० वल–वक् सम्प्रसारणञ्च । गर्भवेष्टनचर्मणि जरायौ ।

उल्वण त्रि० उद्+वण–अच् पृषो० दस्य लः । व्यक्ते, स्पष्टे ।

उ(ष)ग्रती स्त्री० उष–ग्रह, वष–ग्रह सम्प्रसारणम् वा । स्त्रियां ङीष् । अकलव्याणायां वाचि । [उशन, उशनः ।

उशनस् पु० वश–कनसि । भार्गवे शुक्रे । यौ उशना सम्बुधौ उशनन्

उशीर पु० न० वश–ईरन् किच्च । (खस खस्) वीरणमूले ।

उष वधे, दाहे च भ्वादि० पर० सक० सेट् । ओषति औषीत् ।

उष वधे दाहे च भ्वादि०पर०सक०सेट् । ओषति औषीत्, औषत् ।

उष पु० उष–क दिने युग्मुखौ, रात्रिशेषे, चारखस्तिकायां च कामनायुक्ते त्रि० ।

उषण न०उष–कृग्रन् । मरिचे । पिप्पल्यां, शुण्ठ्यां चव्यिके च(चट) ।

उषर्बुध पु० उषसि सम्बुध्यते बुध्यते होमार्थं प्रबोधने प्रकाशते उषस्+बुध–क अहरादित्वात् रः । अग्नौ, रक्तचित्रके च ।

उषस् न० उष–असि किच्च । प्रत्यूषे, पञ्चयज्ञाधङ्कटिकोत्तरकाले ।

उषसी स्त्री० उषं तापकत्वात् दिवसं स्यति उष+सो–क गौरा० ङीष् । सायं सन्ध्यायाम् ।

उषा स्त्री० उष–क टाप् । "तेजःपरिक्षानिदधा मानोरुदीच्यं यावत्" इति वराहोक्ते काले बाणराजसुतायाञ्च ।

उषाकाल पु० उषायां कालः शब्दोऽस्य । कुक्कुटे ।

उषापति पु० उषाया बाणराजसुतायाः पतिः । अनिरुद्धे कन्दर्पाख्ये कृष्णपौत्रे । उषाकान्तादयोऽप्यत्र ।

उषित त्रि० उष–क्त । पर्युषिते दग्धे च । वस–क्त । स्थिते ।

उष्ट्र पु० उष—ट्रन् किच्च । खनामख्याते पशुभेदे, वाहरथे च ।

उष्ण पु० उष—नक् । ग्रीष्मे ऋतौ, आतपे, पलाण्डौ गरकभेदे, शीतभिन्ने स्पर्शे च । तद्वति, आक्षरहिते दर्शे च त्रि० ।

उष्णक त्रि० उष्णमिव करोति कन् । अनलसे, क्षिप्रकारिणि च उष्णं करोति उष्ण+णिच् । ण्वुल् ञ्वरे पु० ।

उष्णगु पु० उष्णा गावः किरणा अस्य । सूर्य्ये । उष्णरश्मिरत्यत्र ।

उष्णनदी स्त्री० कर्म० "यत्रहारे बहावीरे तप्ता वैतरणी नदी" इत्युक्तायाम् उष्णनद्यां वैतरण्याम् ।

उष्णवारण न० उष्णं वारयति वृ—णिच्—ल्युट् । आतपत्रे, छत्रे ।

उष्णवीर्य्य पु० उष्णरूपं वीर्य्यमस्य । शिग्रुवाराख्ये अलजन्तौ । उष्णवीर्य्यवति त्रि० ।

उष्णांशु पु० उष्णा अंशवो यस्य । सूर्य्ये ।

उष्णागम पु० उष्णस्यागमोऽत्र । निदाघकाले ।

उष्णासह पु० उष्णं आसहतेऽत्र आ+सह—अच् । हेमन्ते ऋतौ । उष्णं न सहते अच् । असहमोष्णे त्रि० ।

उष्णिका स्त्री० अल्पमल्पमस्याम् अल्पार्थे कन् ङीप् अत इत्वञ्च उष्णादेशः । यवागवाम् (याउ)। उष्णकशब्दात् टाप् । दधायाम् ।

उष्णिह् स्त्री० उत्क्लिद्यति क्विन् ङीप् धातुम् । एकाक्षरपादके छन्दोभेदे । खादौ उष्णिक् उष्णिग्भ्याम् ।

उष्णीष पु० न० उष्णमीषते क्षिणोति रोग—अच् कर्म० परस्मै० । शिरोवेष्टनवस्त्रे, (पागड़ी) किरीटे च ।

उष्णोपगम पु० उष्णस्य उपगमोऽत्र । निदाघकाले ।

उष्म पु० उष—मक् । निदाघे, आतपे, ग्रीष्मे ऋतौ च ।

उष्मपा पु० उष्मं पिबन्ति पा—क्विप् अमोः पुत्रे पितृगणभेदे ।

उष्र पु० वसन्ति रश्मा अत्र वस—रक् । किरणे, सूर्य्यकिरणानां अन्धकारहेतुत्वात् रश्मवत्त्वम् । दग्धे च । सुरभ्यां उषचित्रायतायां च स्त्री० । [जहतः ।

उह वधे भ्वादि० पर०सक० सेट् । ओहति औहत्, औहीत्, उवोह

उह अव्य० उ च ह च ह० । सम्बोधने, एवार्थे च ।
उहह अव्य० उह च ह च । सम्बोधने । [कर्मणि च ।
उह्यमान त्रि० वह--कर्मणि यानच् । आकृष्यमाणे, वहन-

ऊ

ऊ अव्य० वेञ् क्विप् । सम्बोधने, वाक्यारम्भे, दयायां, रक्षायाञ्च ।
ऊ पु० अवतीति अव--क्विप् ऊठ् । महादेवे चन्द्रे च । पालके त्रि० ।
ऊत त्रि० ऊय-- तन्तुसन्ताने क्त । सूते, सूत्रेण ग्रथिते च ।
ऊति स्त्री० ऊय--क्तिन् । सूतौ । अव--क्तिन् नि० । रक्षणे,
स्त्रीयायां, अरणे च । [क्षीराधारे आपीने (सिड़) ।
ऊधस् न० उन्द--असुन् निपा० उतो दीर्घः । स्त्रीगव्यादेः
ऊधस्य न० ऊधसि भवम् ऊधस्+यत् । दुग्धे ।
ऊन परिहाणे अदन्तचुरा० उभ० अक० सेट् । ऊनयति ते औ-
निनत् त औनयीत् औनयिष्ट ।
ऊन त्रि० ऊन-हानौ क्त । हीने, असंपूर्णे च ।
ऊम् अव्य० ऊय-मुक् । रोषोक्तौ, प्रश्ने, निन्दायां, सहायाञ्च ।
ऊय तन्तुसन्ताने भ्वा० आत्म० सक० सेट् । ऊयते औयिष्ट ।
ऊररी अव्य० ऊय-ररीक् । अङ्गीकारे, विस्तारे च ।
ऊरव्य पु० ऊरु+भवार्थे यत् । वैश्ये । तस्य ब्राह्मण ऊरुतो जन्म
"ऊरू वैश्य" इति श्रुतेः प्रसिद्धम् । ऊरुसम्भवे त्रि० ।
ऊरी अव्य० ऊय-रीक् । अङ्गीकारे, विस्तारे च ।
ऊरु पु० ऊर्णुयते आच्छाद्यते ऊर्णु-कर्मणि कु नुलोपश्च । जानुपरिभागे ।
ऊरुज पु० ऊरोर्ब्रह्मण ऊरोर्जायते जन-ड । वैश्ये ।
ऊरुपर्व्वन् पु० ऊरोः पर्वेव । जानुनि (हाँटु) ।
ऊरुस्तम्भ पु० ऊरू स्तम्भाति अच् । स्तम्भाख्याते रोगे ।
ऊरुस्तम्भा स्त्री० ऊरोरुपमानभूतः स्तम्भो यस्याः । कदलीवृक्षे ।
ऊर्ज्ज बलप्राणने चुरा० उभ० अक० सेट् । ऊर्ज्जयति, ते औ-
र्ज्जिजत् त ।

अर्ज्ज पु० अर्ज्ज—आधारे घञ्। वार्त्तिके भावे घञ्। भावे घञ्। बले, उत्साहे च। अस्मिन् शान्तोऽवबलार्थे। [शौल्वयन।

अर्ज्जस्वल त्रि० अर्ज्जस्+अस्त्यर्थे वलच्। बलवति। रिणि। अर्ज्जस्-

अर्ज्जित त्रि० अर्ज्ज—क्त। बलातिशययुक्ते, दृढियुक्ते च।

अर्ज्जनाम पु० अर्ज्जेव तन्तुर्नाभावस्य अच् समा० ह्रस्वः। मर्कटे (माकड़सा) ऊर्णनाभे अर्णनाभिरप्यत्र भ्रुवोर्मध्यस्थे महापुरुषचिह्ने आवर्त्ताकारे लोमसङ्घे च।

अर्ज्जी स्त्री० अर्ज्ज-करणे ङ। मेषलोमनि। [मङ्गुरे च।

अर्ज्जीयु पु० अर्ज्जाः सन्त्यस्य युच्। मेषे, कम्बले, अर्ज्जनाम्नि, चप-

अर्ण्ण आच्छादने अदा० उभ० सक० सेट्। अर्णोति, अर्णुते, औ-र्णावीत् और्ण्णुवीत् और्ण्णवीत् और्ण्णविष्ट और्ण्णविष्ट।

अर्द्ध त्रि० ऋद्ध हाल्—ड पृषो० उरादेशः। उच्चे उपरि च।

अर्द्धक पु० अर्द्धः सन् कायति प्रकाशते। खदङ्गभेदे च च पोपुच्छ-वदाकारक्षितालपरिमितः सुखेऽधोमुखः अर्द्धं कृत्वा अद्यते।

अर्द्ध त्रि० ऋत् उपरि ध्वन्यते ध्वन—ड आदेरुरादेशः। उच्चे तट्टे उपरि च। [मङ्गलतावरीलतायाम्।

अर्द्धकण्ठी स्त्री० अर्द्धः कण्ठः सुखमस्याः ब० गौरा० ङीष्।

अर्द्धजानु त्रि० अर्द्धे जानुनी यस्य। उपरिभागे स्थूलजानुयुक्ते।

अर्द्धजङ्घ त्रि० अर्द्धे जानुनी यस्य जानुनो वा जङ्घे। उपरिभागे स्थूलजानुयुक्ते। गजारातौ पशुभेदे।

अर्द्धपाद पु० अर्द्धाः पृष्ठस्थाः चत्वारः पादा यस्य। अरमाख्ये

अर्द्धपुण्ड्र पु० अर्द्धे अर्द्धसुखः पुण्ड्रः इक्षुयष्टिरिव। ललाटस्थे अर्द्धसुखे पुण्ड्रेऽनुवत् रेखात्रयात्मके तिलकभेदे। तद्धारणे वि-धिनिषेधादिकं वाचस्पत्ये दृष्टव्यम्।

अर्द्धम् अव्य० ऋद्—क्मन् डस्य आदेरुरादेशश्च। अर्द्धशब्दार्थे।

अर्द्धमान न० अर्द्धमारोप्य मीयते येन मा—ल्युट्। पलकर्षादिमिते पाषाणादौ (वाटखारा)। तेन हि तुलादावारोपितेन खर्व्वा-देर्गुरुत्वमनुमीयते। उन्मानपरिच्छेदकपरिमाणे च।

ऊर्द्धरेतस् पु० ऊर्द्धं न पतत् रेतो यस्य । महादेवे, सनकादौ सन्न्यासिनि, भीष्मे च ।

ऊर्द्धलिङ्ग पु० ऊर्द्धमुत्कटं लिङ्गं चिह्नमस्य । महादेवे ऊर्द्धलिङ्गं चिह्नमाद्यमिति सहस्रनामस्तः ।

ऊर्द्धलोक पु० कर्म० । स्वर्गे ।

ऊर्द्धसित पु० ऊर्द्धमुपरिभागे असितः कृष्णः आसितो वा । कारवेल्ले (करला) ऊर्द्धपिप्पिटे लि० ।

ऊर्म्मि पु० स्त्री० ऋ-मि-ऊर्त्तं वस्तु । तरङ्गे, प्रकाशे, वेगे, वस्त्रग्रहोत्तरेखायाम्, पीड़ायाम्, उत्कण्ठायाम्, बुभुक्षादिषु, षट्सु च "क्षुधा बुभुक्षा च पिपासा च प्राणस्य, मनसः सप्तमी । शोकमोहौ, शरीरस्य जरामृत्यू षडूर्म्मय" इति । "षड्भिरूर्म्मिभिरुद्दामं समस्तमनसां मनः । अतिवेग समायुक्तं गतिरूर्म्मिसदाकृता" इत्यलङ्कारचूडामण्यामस्यगतौ स्त्री० ।

ऊर्म्मिका स्त्री० ऊर्म्मिरिव कायति कै-क । तरङ्गवस्त्रकाशभाने अङ्गुरीयके । स्वार्थे कन् । तरङ्गादौ च ।

ऊर्म्मिमत् त्रि० ऊर्म्मिरिव वक्रताऽस्यास्य मतुप् यस्य० मस्य नः । वक्रे तरङ्गवति च ।

ऊर्म्मिमालिन् पु० ऊर्म्मिमालाऽस्यास्य इनि । वसुदेवे ।

ऊष पु० ऊष-रुजायां क । क्षारमृदि, प्रभाते, रत्नभेदे चन्द्रमादौ च ।

ऊषण न० ऊष-ल्यु । मरिचे, पिप्पलीमूले, शुण्ठ्याम् । (चिता) चित्रके पु० । पिप्पल्यां चव्ये च (चइ) स्त्री० ।

ऊषर त्रि० ऊष+मत्वर्थीयो रः । ऊषवति क्षारमृत्तिकायुक्ते देशे वपितमपि बीजं न प्ररोहति ।

ऊषरज न० ऊषरात्जायते जन-ड । (पाङ्गा) लवणभेदे ।

ऊषरवत् त्रि० ऊष-मतुप् मस्य वः । ऊषरभूमौ ।

ऊष्मन् पु० ऊष-मनिन् । पीष्मे व्याकरणोक्तेषु शोष्मवायुशोष्मार्थमाणेषु ग्रसनकण्ठ्येषु वर्णेषु ।

ऊह वितर्के भ्वादि० आत्म० सक० सेट् ऊहते ऊहित ।

ऋह पु० ऋह-घञ् यितर्के आगमाविरोधिना तर्केण आगमार्थस्य संशयपूर्वमवधारणेन, उत्तरपक्षव्यवस्थापनेन निर्णयकरणे परीक्षायां, अनन्वितार्थकविभक्तिविशिष्टपदपूर्वके अन्वयबोधकिमित्यादिकल्पने, यथा पार्थस्य सौख्यास्तु इति वस्तुवचनसन्वितमपि एकोद्दिष्टे अन्वितत्वात् सौख्य इत्येकवचनान्ततया कल्पनम् पदान्तरेणाकाङ्क्षापूरणे च ।

ऋहा स्त्री० ऋह अ स्त्रीत्वात् टाप् । अध्याहारे ऋहशब्दार्थे च ।

ऋट

ऋट गतौ भ्वा०पर०सक०अनिट् । ऋट्टति । आरत् आर्टीत् ।

ऋट गतौ जुहोत्यादि० पर०सक०अनिट् । ऋटर्त्ति आरत् ।

ऋट हिंसायां भ्वा०पर०सक०अनिट् । ऋट्टयति । आर्टीत् ।

ऋटक्थ न० ऋट्-थक् । धने स्वर्णे, स्मृतिप्रसिद्धे दायद्रव्ये धने च ।

ऋट्ट पु० ऋध-स किच्च । भल्लूके । नखरे मेघादौ च पु०न० ।

ऋट्टगन्धा स्त्री० ऋट्टान् गन्धयति क्विप्तस्य गन्ध-अच् । ऋषिजाङ्गलीवृक्षे महाश्वेतायां, क्षीरविदार्य्यां च ।

ऋट्टगिरि पु० कर्म्म० । कुलाचलभेदे ऋट्टनामके पर्व्वते ।

ऋट्टराज पु० ऋट्टानां राजा त० टच् । जाम्बवति, चन्द्रे च ।

ऋट्टवत् पु० ऋट्टाः सन्त्यस्मिन् मतुप् मस्य वः । नर्म्मदातीरस्थे पर्व्वतभेदे ।

ऋट्टवेद पु० ऋट्टप्रधानो वेदः । देवदैवत्ये ऋग्नामख्याते वेदभेदे ।

ऋट्ट स्तुतौ तुदा०पर०सक०सेट् । ऋट्टति आर्टीत् ।

ऋट्ट् स्त्री० ऋट्ट क्विप् । अर्थवशेन क्रियताचरघादनुते वेदांशे ।

ऋट्ठ मोहे मूर्च्छा गमने च तुदा०पर०सक० अक० च । सेट् । ऋट्ठति आर्ट्ठीत् । आनर्ट्ठ ।

ऋड गतौ अर्जने च भ्वा०आत्म०सक० सेट् । अर्जते आर्ड्डिष्ट आन्ड्ज ।

ऋडक न० ऋड-कन् । नरकभेदे च ।

ऋडोष न० ऋड-ईषन् किच्च । अर्ज्जनपात्रे कटाहादौ । धने,

ऋजु त्रि० ऋज–कु । सरले । स्त्रियां वा ङीष् ऋज्वी ऋजुः ।

ऋष् गतौ तना० उभ० सक० सेट् । अर्णोति ऋर्णोति, ऋणुते आर्णीत् आर्णिष्ट ।

ऋण न० ऋ–क्त नि० नत्वम् । अधमर्णेन उत्तमर्णात् दुर्गदैयत्वेनाऽपगच्छ ग्रहीते धने, (धार) ऋते, दुर्गे, दुर्गभूमौ च । देवर्षिपितृणामहं येन यथाक्रमं यज्ञवेदाध्ययनपुत्रोत्पादनरूपेऽवश्यकार्य्ये ऋत्वे ऋणमन्यमवेहीति रघुः ।

ऋणमत्कुण पु० इदम् ऋणं मम देयमिति कुर्वति अभ्युपगच्छ यन्दायते ऋण+अच् कृण–क । मन्मके प्रतिभुवि (जामिन) ।

ऋणमार्गण ऋणं परकीयत्वमात्मीयत्वेन मार्गयति चुरा० ऋग–ल्युट् । प्रतिभुवि । (जामिन) ।

ऋणमुक्ति स्त्री० मुच–क्तिन् ह्रस्व० । ऋणशोधने ।

ऋणादान न० ऋणस्यादानम् । उत्तमर्णेनाधमर्णात् दत्तधनस्य धनस्य सद्विक्रयरूपे अष्टादशव्यवहारमध्ये व्यवहारभेदे । "तेषामाद्यमृणादान" मित्यादि स्मृतिः ।

ऋणिन् पु० ऋण+मत्वर्थीय इनि । ऋणयति अधमर्णं ऋणग्रस्ते 'ऋणी न स्याद् यथापिता" इति स्मृतिः ।

ऋत गतौ (सौत्रः) पर० सक० सेट् । ऋतीयते आर्त्तीयिट आर्त्तिष्ट ।

ऋत न० ऋ–क्त । 'ऋतमुञ्छशिलं शेय" मित्युक्तेः ब्राह्मणस्य उपजीव्यवृत्तौ मोक्षे, जले, कर्म्मफले "ऋतं पिबन्ता" विति श्रुतिः सत्प्रिये वाक्ये मानसादिसत्ये च । दीप्ते, सत्ये, पूजिते च त्रि० ।

ऋतधामन् पु० ऋतं सत्यं धाम यस्य । परमेश्वरे, विष्णौ च ।

ऋतम् अव्य० ऋत–कमि । सत्यमित्यर्थे ।

ऋतम्भरा स्त्री० ऋतम् बिभर्त्ति ऋतम्+भृ–अच् । योगशास्त्रप्रसिद्धे विपर्य्यासशून्ये यथार्थज्ञानरूपे चित्तवृत्तिभेदे ।

ऋति स्त्री० ऋ–क्तिन् । गतौ याच्ञायाम् निन्दायाञ्च । कर्म्मणि क्तिन् । वर्त्मनि मङ्गले च ।

ऋतु पु० ऋ–तु किच्च । शिशिर; वसन्तसमयो ग्रीष्मो वर्षा शरद्धिमः ।

माघादिमासद्वयेषु ऋतवः शैटजमादिके द्वयमृतौ कालभेदे। शोणितदर्शनयुक्ते गर्भधारणयोग्ये स्त्रीणामवस्थाभेदे "ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः" इति मनुः। दीप्तौ भावे च। [अमरव्याख्ये।

ऋतुप्राप्त त्रि० ऋतुस्नानयोग्यः युवादिः प्राप्तोऽनेन, कर्त्तरि क्तौ

ऋतुमती स्त्री० ऋतु+मतुप्। रजस्वलायां स्त्रीभेदे। [याम्।

ऋतुराज पु० ऋतूनां राजा ईत० टच् समा०। वसन्ते ऋतौ।

ऋतुवृत्ति पु० ऋतूनां वृत्तिः पर्य्यायेणावर्त्तना यत्र। वत्सरे।

ऋते अव्य० ऋत (सौत्रः) के। वर्জ্জने विनार्थे च।

ऋत्विज् ऋतु-यज्-क्विन्। याजके, 'अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् क्रतून्। यः करोति ऋतौ यस्य स तस्यर्त्विगिहोच्यते" इति मनूक्ते स्वानुष्ठेयवैदिकादिकर्म्मकरे। [च त्रि०।

ऋद्ध न० ऋध-क्त। पक्वमर्द्धितधान्ये सिद्धान्ने च। समृद्धे सम्पन्ने

ऋद्धि स्त्री० ऋध-क्तिन्। वृद्धौ, देवभेदे, ओषधिभेदे च।

ऋध वृद्धौ दिवा० स्वा० च पर० अक० सेट्। ऋध्यति ऋध्नोति आर्द्धीत् आर्द्धीत्। [तुदा० पर० सेट्। ऋधति आर्धीत्।

ऋफ दाने हिंसायां निन्दायां युद्धे च सक० श्लाघायां अक०

ऋभु पु० अरि स्वर्गे अदितौ वा भवति ऋ+भू-डु। देवे।

ऋभुक्ष पु० ऋभवो देवाः नियन्ति वसन्त्यत्र नि+ड। स्वर्गे वज्रे इन्द्रे च। [ऋभुक्षाः ऋभुक्षावौ।

ऋभुक्षिन् पु० ऋभुक्षः वज्रं स्वर्गोवाऽस्त्यस्मिन् इनि। इन्द्रे स्वादौ

ऋष गतौ तुदा० पर० सक० सेट्। ऋषति आर्षीत्।

ऋषभ पु० ऋष-अभक्। वृषभे, ओषधिभेदे, मुनिभेदे च।

ऋषभतर पु० तनुः ऋषभः तनुत्वे टरच्। भारवहने मन्दयत्नौ वृषभे। जातित्वेन स्त्रियां ङीष् ऋषभतरी।

ऋषभध्वज पु० ऋषभो ध्वजो यस्य। शिवे। ऋषभध्वजोऽस्यास्ति।

ऋष्यमा स्त्री० ऋष्यस्य मृगस्येव मा प्रभा यस्याः । मृगाकारायां स्त्रियां, स्त्रीकिम्प्रामे, शिवालक्षायाम् ।

ऋषि पु० ऋष—इन् किच्च । वेदे, मन्त्रद्रष्टरि मुनौ, सप्तर्षिषु कर्म० आपस्तम्बसूत्रकाराचार्ये, गोत्रप्रवरप्रवर्त्तके मुनौ च ।

ऋषियज्ञ पु० ऋष्युद्देश्यको यज्ञः । ब्रह्मयज्ञे वेदाध्ययने ।

ऋष्टि स्त्री० ऋष—क्तिच् किन् । उभयतो धारायुक्ते अस्त्रे ।

ऋष्य पु० ऋष, कर्म० । मृगभेदे ।

ऋष्यगन्धा स्त्री० ऋष्यस्य गन्ध इव गन्धो यस्याः । हट्टविलासिन्यां वृक्षे ।

ऋष्यप्रोक्ता स्त्री० ऋषिभिरप्रोक्ता । शतावर्य्याम्, अतिबलायाम्, मूर्वायां शिग्रौ वृक्षे च ।

ऋष्यमूक पु० ऋष्यो मृगो मूको यत्र । "ऋष्यमूकस्तु पम्पायाः पुरतः पुष्पितद्रुमः" इति रामायणोक्ते पर्व्वतभेदे ।

ऋष्यशृङ्ग पु० ऋष्यस्य मृगभेदस्य शृङ्गमिव शृङ्गमस्य । विभाण्डकपुत्रे लोमपादराजकन्यायाः शान्तायाः पत्यौ ।

ऋ

ऋ गतौ अक्रो० पर०सक० सेट् । आर्त्ति आरीत् । आर आरतुः ।

ए

ए अव्य० इण्—विच् । दयायां, स्तुतौ आमन्त्रणे, असूयायां, आह्वाने च । विष्णौ पु० ।

एक त्रि० इण्—कन् । एकत्वरूपप्रथमसंख्यान्विते, केवले, शुद्धे, अन्यार्थे, सत्ये, अद्वितीये, समाने, अल्पे च ।

एकक त्रि० एक+कन् । असहाये । [आरके आत्मे च ।

एककार्य्य त्रि० एकं कार्य्यं प्रयोजनमस्य । एकरूपकार्य्यकरे, परस्परएकगुरु पु० एकोऽभिन्नो गुरुर्यस्य । समानमन्त्रोपदेष्टरि ।

एकचक्र न० एकं चक्रं यत्र । हरिक्षेत्रे । सूर्य्यरथे पु० । शरीरभेदे स्त्री० । बल वधार्थं पाण्डवाः स्थिताः ।

एकाचर त्रि० एकः सन् चरति चर-अच् । एकाकिचारिणि यतौ ।

एकचर्य्या स्त्री० एकस्य चर्य्या चर, ण्यप् । असहायगमने ।

एकजाति पु० एका जातिर्जननं यस्य । शूद्रे । एकजन्मात्रे त्रि० ।

एकजातीय त्रि० एकः प्रकारो विधा यस्य प्रकारार्थे जातीयर् । तुल्यप्रकारे । [खिन् । यथा भवतामेकतमः साधुः ।

एकतम त्रि० एक+डतमच् । बहूनां मध्ये जात्यादिभिर्निर्द्धार्य्ये एक-

एकतर त्रि० एक+डतरच् । द्वयोर्मध्ये जात्यादिभिर्निर्द्धार्य्ये एकखिन् । यथा, भवतोरेकतरः साधुः ।

एकतान त्रि० एकं तानयति पु० तन-श्रद्धायाम् घञ् । अनन्य चित्तवृत्तौ एकविषयाधिकरणचित्ते तद्वृत्तचित्ते च ।

एकताल पु० एकः समस्तालोमान यत्र । समन्वितलये, निष्टङ्क-रहिते च नृत्यगीतादौ ।

एकत्र अ० एक+त्रल् । एकस्मिन्नित्यर्थे । [व्याप्तौ च ।

एकत्व न० एक-त्व । ऐक्ये, अभेदे, साम्ये, सायुज्यमुक्तौ, भेद-

एकदण्डिन् पु० एकः केवलः शिखायज्ञोपवीतादिशून्यो दण्डोऽस्यास्ति । "यदा सर्वाध्यवसितं परं ब्रह्म सनातनम् । तदैक-दण्डं संन्यस्य सोपवीतां शिखां त्यजेदित्युक्तलक्षणे परिव्राजके ।

एकदन्त पु० एको दन्तोऽस्य । गणेशे । एकदंष्ट्रोऽप्यत्र ।

एकदा अव्य० एक+काले दाच् । एकस्मिन् काले इत्यर्थे ।

एकदृक् त्रि० एका दृक् यस्य । एकनेत्रे काणे । काणे पु० । एकं सर्वमभिपश्यति दृश-क्विप् । शिवे ।

एकदेश पु० कर्म० । अवयवे, प्रतीके ।

एकधा अव्य० एक+प्रकारे धाच् । एकप्रकारे "एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" इति स्मृतिः ।

एकधुरा स्त्री० एका धूः कर्म० अच् । एकभारे । बहुहतीत्यर्थेऽप्य

तस्य लुक् । एकभारवाहके गवादौ । [गवादौ ।

एकधुरावह त्रि० एकधुरां वहतीति वह–अच् । एकभारवाहके

एकधुरीण त्रि० एकधुरां वहतीति ख । एकभारवाहके गवादौ ।

एकपद त्रि० एकः पदो यस्य । सहाये ।

एकपत्नी स्त्री० एकः समानः अनन्यो वा पतिर्यस्याः ङीप् नुक् च । सपत्न्यां पतिव्रतायाञ्च । यो धर्मएकपत्नीनामिति मनुः ।

एकपद न० एकं पदं पदगतियोग्यकालो यत्र । एकपदगतियोग्यकाले तत्काले । कर्म० । एकस्मिन् पदे । निष्पन्नि स एकपदे इति माघः । [वर्त्मनि पथि ।

एकपदी स्त्री० एकः पादोऽस्याम् । स्वाङ्गत्वात् ङीष् पङ्गावः ।

एकपदे अव्य० एक+पद–के । अकस्मादित्यर्थे कथमेकपदे निरागसम्" इति कुमारः ।

एकपिङ्ग पु० एकं नेत्रं पिङ्गमस्य । कुबेरे स हि सास्रुवं गौरीं निरीक्ष्य तच्छापात् नष्टनेत्रो जातः पुनः शिवप्रसादात् तच्चक्षुषः पिङ्गलत्वं जातमिति पुराणकथा । एकपिङ्गलोऽत्र ।

एकभक्तव्रत पु० न० "दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत् । एकभक्तमिति प्रोक्तं रात्रौ तत्र कदाचन" इत्युक्ते व्रतभेदे ।

एकयष्टिका स्त्री० एका यष्टिरिवावली यस्याः ब० कप् । (एकनर) एकावलीहारभेदे ।

एकराज् पु० एको राजते क्विप् । सार्वभौमे ।

एकवचन न० वच–ल्युट् ६त० । व्याकरणोक्ते एकसंख्याबोधके स्यादौ तिङादौ च ।

एकवर्षिका स्त्री० एको वर्षो वयःकालो यस्याः । एकहायन्यां गवि ।

एकविंशति स्त्री० एकाधिका विंशतिः । एकाधिकविंशतिसंख्यायां तद्वति च । एकत्रिंशदादयश्चैवम् ।

एकवीर पु० एको वीरः कर्म० । महावीरे अतिवीरे वृक्षभेदे च ।

एकशफ पु० एकः शफोऽस्य । एकशफयुक्तेषु खरादिषु "खरोऽश्वोऽ-

स्तरो गौरः वरभक्षकरी तथा । एते अकथकाः इत्युक्तेषु पशुषु । [यथा घटः घटौ घटाः घटौ ।

एकशेष पु० एकः शेषो यत्र । व्याकरणप्रसिद्धे इकस्थानीये हरिभेदे ।

एकश्रुति स्त्री० एका अभिन्ना उदात्तादिशून्या श्रुतिर्यत्र । प्रातिशाख्ये प्रसिद्धे उदात्तानुदात्तस्वरितानामविभागेनोच्चारणे ।

एकसर्ग त्रि० एकस्मिन् सर्गे निश्चयो यस्य । अनन्यमनसि एकाग्रचित्ते ।

एकहायनी स्त्री० एकोहायनो वयोमानं यस्या ङीप् । एकवर्षवयस्कायां गवि ।

एकाकिन् त्रि० एक+आकिन् । असहाये ।

एकाक्ष पु० एकमक्षि यस्य षच् समा० । काके । काणे त्रि० ।

एकाग्र त्रि० एकमग्रं विषयो यस्य । विषयान्तरव्यावृत्त्या एकमात्रमनस्के चित्तेपरक्षितज्ञाने च । स्वार्थे ष्यञ् ऐकाग्र्यमप्यत्र ।

एकादश त्रि० एकादशन्+पूरणे डट् । एकादशानां पूरणीभूते ।

एकादशन् त्रि० एकश्च दश च आत्मन् । एकाधिकदशसंख्यायुक्ते ।

एकादशद्वार न० एकादश द्वाराणि यत्र । शरीराख्ये पुरे तत्र हि नासिकाश्रोत्रनेत्राणां द्वयं द्वयमिति षट् शुक्ष्यादीनि, मुखमेकम्, नाभ्या सह अधःस्थानि त्रीणि, ब्रह्मरन्ध्रञ्चैकमित्येकादश द्वाराणि सन्ति ।

एकादशी स्त्री० एकादशानां पूरणी । उभयपक्षीयप्रतिपदादितः एकादशपूरणयां तिथौ । यत्र हि हरिवासरव्रतम् ।

एकाङ्गविंशति स्त्री० एकेन न विंशति एक+नञ् आदुक् । एकोनविंशतिसंख्यायां तद्युक्ते च । एवमेकाङ्गत्रिंशदादयः ।

एकान्त त्रि० एकः अन्तो निश्चयो यत्र । अवश्ये ।

एकान्ततस् अव्य० एकान्त+तसिल् । अव्यभिचारिणि ।

एकान्न त्रि० एककालमेवान्नं भक्ष्यं यस्य । एकभक्तभोजिनि ।

एकान्नविंशति स्त्री० एकेन न विंशतिः । एक+न—आदुक् दस्य या न । एकोनविंशतिसंख्यायां, तद्युक्ते च । एवमेकान्नत्रिंशदादयः ।

एकाब्दा स्त्री० एकः अब्दो वयोमानं यस्याः । एकहायन्यां गवि ।

एकायन त्रि० एकमयनं विषयो यस्य। विषयान्तरव्याक्षिप्तचित्ते एकाग्रमनस्के। कर्म्म० एकस्थाने।

एकायनगत त्रि० एकायनमेकद्विषयं मनोद्वारा गतः। एकाग्रचित्ते।

एकावली स्त्री० एकाऽद्वितीया आवली माला यस्यित्येषी। (एकनर) हारभेदे, अर्थालङ्कारभेदे च।

एकाश्रय त्रि० एक आश्रयो यस्य। अनन्यगतिके।

एकाष्टीला पु० एकमस्मिं काष्ठं तत्तुल्यं खाति खा-क यत्वं दीर्घश्च। वकट्टके पाठायां स्त्री०। [एकदिने।

एकाह पु० एकमहः द्विगु० अच्। अक्षाहान्नाः पुंसीति पुंस्त्वम्।

एकाहगम्य त्रि० एकाहेन गम्यते गम-घञ्। एकाहगम्ये देये।

एकाहार पु० एकस्मिन् दिवसे एक आहारो भोजनम्। एकदिनेत्येकवारभोजने। ब० सहति त्रि०।

एकीभाव पु० अनेकस्य एकस्य भावः एक+च्वि-भू-उप० घञ्। एकत्वे।

एकीय त्रि० एक-छ। एकपक्षभवे, एकसम्बन्धिनि च।

एकोद्दिष्ट न० एक उद्दिष्टो यत्र। एकोद्देशेन विहिते श्राद्धे "एकमुद्दिश्य ब्राह्मणमेकोद्दिष्टं तदुच्यते" इति स्मृतिः। तच्च प्रेतत्वाद्यं तत्तुल्यविधिकं सांवत्सरिकं श्राद्धमिति।

एज कम्पने भ्वादि० आत्म० अक० सेट्। एजते ऐजिष्ट।

एज दीप्तौ भ्वादि० पर० सक० सेट्। एजति ऐजीत्।

एठ वाधने भ्वादि० आत्म० सक० सेट्। एठते ऐठिष्ट।

एड पु० इल-खञ्जे अच् डस्य लः मेषे। वधिरे त्रि०।

एडक पु० इल-एकुल् डस्य लः वनच्छागले, पृथुपुच्छके मेषे मेषमात्रे च जातित्वात् स्त्रीत्वे अजादित्वात् टाप् एडका।

एडगज पु० एडो मेषो गजो भक्षयत्यादस्य। दद्रुघ्ने (दादमर्द्दन)

एडमूक त्रि० स्मृतिरहित एडोबधिरश्चासौ मूकः। वाक्स्मृतिबुद्धिरहिते।

एड(डू)क न० इड-(ऊ) उक नि० गुणः। हिंसायाम्। अन्तर्व्यस्ताक्षियुक्ते कक्षे, भित्तौ च।

एण पु० इ-ण तस्य नेत्वम्। कृष्णवर्णे मृगे। स्त्रियाम् ङीषी।

एणतिलक पु० एणस्तिलकवत् चिह्नं यस्य । मृगाङ्के चन्द्रे ।
एत त्रि० पु० दृश् तनू । कर्बूरवर्णे । तद्वति त्रि० । शिवाभेदे च ।
एतद् त्रि० दृश्—अदि तुक् च । इदोपवर्त्तिनि वस्तुनि ।
एध वृद्धौ भ्वा० आत्म० अक० सेट् । एधते ऐधिष्ट ।
एध पु० इध्यतेऽग्निरनेन इध-करणे घञ् वि० नलोप सुधौ । काष्ठे ।
एधस् न० इध्यतेऽग्निरनेन इध असि वि० नलोप सुधौ । काष्ठे ।
एधित त्रि० एध—क्त । इन्धियुक्ते "मधुसर्पिरसमेधित" इति भाग० ।
एनस् न० इण—असुन् तुट् च । पापे, अपराधे च ।
एरका स्त्री० इण—रक । निर्गन्धिवृणभेदे ।
एरण्ड पु० ईरयति वायुम् भक्षं वा ईर—अण्डच् वि० सुडच । इक्षु-भेदे (एरंडी) । (भेरण्डा) ।
एरण्डपचिका स्त्री० एरण्डस्य पत्रमिव पत्रमस्याः ब० संज्ञायां कन् अत इत्वम् । दन्तीवृक्षे ।
एला स्त्री० इल-अच् । एलालतायाम् (एलाची) ।
एलापर्णी स्त्री० एलायाः पर्णमिव पर्णमस्याः । राजावाम् । (काटा आमरुल) । [यज्ञद्रव्यभेदे ।
ए(ल)लावालुक न० एलेव वलते वल—ऊण् संज्ञायां कन् । वा ह्रस्वः ।
एव अव्य० इण्—वन् । सादृश्ये अनियोगे, अवधारणे, चारनियोगे, विनिमये, परिभवे ईषदर्थे च । विशेषसङ्गतः अन्ययोगव्यवच्छेदे । यथा पार्थ एव धनुर्द्धरः इत्यादौ पार्थान्यपदार्थे प्रयुक्तधनुर्द्धरत्वम् व्यवच्छिद्यते । विशेषणसङ्गतः अयोगव्यवच्छेदे, यथा शङ्खः पाण्डर एवेत्यादौ शङ्खे पाण्डरत्वायोगो व्यवच्छिद्यते । क्रियासङ्गतः अत्यन्तायोगव्यवच्छेदे यथा नीलं सरोज भवत्येवेत्यादौ सरोजे नीलत्वात्यन्तायोगो व्यवच्छिद्यते । गन्तरि त्रि० ।
एवम् अव्य० इण्—वम । सादृश्ये, इत्थंप्रकारे, "एवंवादिनि देवर्षा-वित्ति" कुमारः अवधारणे, स्वीकारे, प्रश्ने च ।
एष गतौ भ्वा० आत्म० सक० सेट् । एषते ऐषिष्ट ।
एषण पु० एष—ल्यु । लौहभेदे बाणे । युच् । इच्छायां कुललोक-

धनकाशनानां स्त्री० । क्षुद् । सर्षपादीनां सुखादाघने न० ।
विस्फोटभेदे अल्पभेदे स्त्री० ङीप् । स्वार्थे कन् । एषणिकायाम् ।

ऐ

ऐकागारिक त्रि० एकमसहायमगारं प्रयोजनमस्य ठक् । चौरे ।
ऐकाग्र्य त्रि० एकाग्र+स्वार्थे ष्यञ् । एकाग्रचित्ते अनन्यासक्तचित्ते ।
ऐकात्म्य न० एक आत्मा स्वरूपं यस्य तस्य भावः ष्यञ् । ऐक्ये एकस्वरूपत्वे ।
ऐकान्तिक त्रि० एकान्तं व्याप्नोति ठञ् । अव्यभिचारिणि, अवश्यं भाविनि । स्त्रियां ङीप् । ऐकान्तिकी हरेर्भक्तिरुत्पातायैव कल्पते इति पुराणम् ।
ऐकाहिक त्रि० एकाहे भवः कालात् ठञ् । एकदिननिष्पन्ने । एकाहमतीत्य भवः । एकाहानन्तरं जायमाने ज्वरे दिने दिने एकसमये जायमाने ज्वरे च पु० । ऐकाहिकं ज्वरं हन्ति तस्य नामानुकीर्त्तनमिति ज्वरनाशकमन्त्रः ।
ऐक्य न० एकस्य भावः एक+ष्यञ् । अभेदे एकरूपतायाम् ।
ऐक्षव त्रि० इक्षोर्विकारः इक्षु-अण् । इक्षुविकारे गुडादौ । "ऐक्षवं गुडवर्जितम्" इति स्मृतिः ।
ऐक्ष्वाक पु० इक्ष्वाकोर्गोत्रापत्यम् अण् त्रि० सूर्यवंश्ये नृपे ।
ऐङ्गुद न० इङ्गुदाः फलम् फले अण् तस्य न लुक् इङ्गुदी इत्यत्र फले ।
ऐण त्रि० एणस्य कृष्णसृगस्येदम् अण् । कृष्णसृगचर्मादौ ।
ऐणेय त्रि० एणस्येदम् ढक् । कृष्णसृगीचर्मादौ ।
ऐतिह्य न० इतिह पारम्पर्योपदेशः अनिर्दिष्टप्रवक्तृकोपदेश इति यावत् स्वार्थे ष्यञ् । पारम्पर्योपदेशे । यथात्र वटे यक्षः प्रतिवसतीत्यादि परम्परोपदेशमात्रम् । न तु केनाप्येतदुपलभ्य कथितम् । [सोमराज्याम् स्त्री० ङीप् ।
ऐन्द्रव न० इन्द्रदैवताऽस्य । मृगशिरोनक्षत्रे चन्द्रसम्बन्धिनि त्रि० ।
ऐन्द्र त्रि० इन्द्रस्येदम् इन्द्र+अण् । इन्द्रसम्बन्धिनि । ज्येष्ठा नक्षत्रे

न० । स्त्रियां ङीप् । "ऐन्द्री तण्डुलरेणुरम्" इति इन्द्रदेवताके वैद्यक् । इन्द्रदेवताके त्रि० । प्राच्यां दिशि स्त्री० ।

ऐन्द्रजालिक त्रि० इन्द्रजालेन चरति । मायाकारके । (बाजिकर) ।

ऐन्द्रि पु० इन्द्रस्यापत्यम् इञ् । इन्द्रपुत्रे, जयन्ते, अर्जुने, सुधीवनामरे, काके च ।

ऐन्द्रियक त्रि० इन्द्रियेण प्रकाश्यः वुञ् । इन्द्रियजन्यप्रत्यक्षेण प्रकाश्ये ।

ऐर न० इरा अन्नं तद्विकारः । अन्नमये ब्रह्मलोकस्थे वरुणे च ।

ऐरावण पु० इरा सुरा वनमुदकं यत्र पूर्वपदादिति णत्वम् तत्र भवः अण् । इन्द्रगजे ऐरावते ।

ऐरावत पु० इरा जलानि सन्त्यस्य इरा+मतुप् मस्य वः इरावान् समुद्रस्तत्र भवः अण् । समुद्रजाते इन्द्रगजे ।

ऐरावती स्त्री० इराः सन्त्यस्य मतुप् मस्य वः इरावान् तत्र समुद्रः भवा रण् । विद्युति ।

ऐरिण न० इरिणे जघरे भवः । लवणभेदे । (पाङ्गा) ।

ऐरेय न० इरा अन्नम् तत् भवः ढक् । अन्नभवे मद्ये ।

ऐल पु० इलायाः अपत्यम् । बुधपुत्रे पुरूरवोनामके नृपतौ ।

ऐलविल पु० इलविलाया अपत्यम् अण् । कुबेरे ।

ऐशानी स्त्री० ईशानो देवताऽस्याः । उत्तरपूर्वदिशि ।

ऐश्वर्य्य न० ईश्वरस्य भावः । अणिमाद्यष्टविधविभूतिभेदे ।

ऐषमस् अव्य० अस्मिन् वत्सरे त्रि० । वर्त्तमानवत्सरे ।

ऐहलौकिक त्रि० इह लोके भवः ठञ् द्विपदवृद्धिः । इहलोकजाते ।

ऐहिक त्रि० इह भवः कालाट्ठञ् । इहलोकभवे गृहीतशरीरस्याधिनि कल्पचन्दनादिसुखानुभवादौ च ।

ओ

ओक पु० उच-कन् त्रि० चस्य कः पलिघि इषले च ।

ओकस् न० उच-असुन् व्यङ्गादित्वात् कुत्वम् । गृहे आश्रयस्थाने च

ओकोदनी स्त्री० ओक आत्मवः मूर्द्धरूपम् अदनं भक्षं यस्याः । (उकुण) जेयकीटे ।

ओख गोमये, भूमये, शिवारणे चुरा०-सानसें अक०-आ०-पर० सेट् । ओखति औखीत् । [दुनन्तश्चे च ।

ओघ पु० उच-घञ् पृषो० घ । समूहे, जलवेगे, परम्परायां

ओङ्कार पु० अव-मन् तस्याकारलोपः, ङट् गुणः; ओम् ततः स्वरूपे कार । प्रणवे ।

ओज वधे अद० चुरा० उभ०-अक० सेट् । ओजयति-ते औजिजत्-त ।

ओजस् न० उज-असुन् बलोपे गुणः । दीप्तौ अवष्टम्भे, प्राणबले, प्रकाशे, सामर्थ्ये, ज्योतिषोक्ते प्रथमद्रेक्काणादौ विषकरायौ, यक्षादिकौशले, धातुतेजसि, ज्ञानेन्द्रियाणां पाटवे, काव्यगुणभेदे, गौडरीत्याम्, वैद्यकोक्ते "भ्रमरैः फलपुष्पेभ्यो यथा सम्भ्रियते मधु । तद्वदोजः शरीरेभ्यो धातुः सम्भ्रियते नृणाम्" इति लक्षणे धातुरूपोपलक्षे वस्तुभेदे च । अच् । ओजशब्दोऽत्र ।

ओजिष्ठ त्रि० अतिशयेनोजस्वी ओजस्विन् इष्ठन् मतोर्लुक् । अतितेजस्विनि शारतमे च ।

ओडिका स्त्री० उ-ड तस्य नेत्त्वम् गौरा० ङीष् स्वार्थे क हुस्वः । (उड़िधान) नीवारे ।

ओडी स्त्री० उ-ड तस्य नेत्त्वम् गौरा० ङीष् । (उड़ीधान) नीवारे ।

ओड्र पु० न० आ+ईषत् उनत्ति उन्द्-रक् दस्य डः । जवापुष्पे ।

ओड्रपुष्प पु० ओड्रं पुष्पमस्य । जवाद्रुमे ।

ओण अपसारणे भ्वा० पर० सक० सेट् । ओणति औणीत् ।

ओत त्रि० आ+वेञ्-क्त । अनल्पांशौ "ओतश्च प्रोतश्चेति" श्रुतिः । पटे दीर्घतन्तौ च ।

ओतु त्रि० अव-तुन् ङट् गुणः । बिड़ाले ।

ओदन पु० उन्द्-युच् नलोपो गुणश्च । भक्ते क्लिन्नान्ने ।

ओदनपाकी स्त्री० ओदनस्य पाक इव पाको यस्याः ङीष् । नीलझिण्टिकायाम् ओषधिभेदे च ।

ओदनी स्त्री० ओदन इवाचरति ओदन+क्विप्–ततः अच् गौरा० ङीष्। (वेतसा) मलायाम्।

ओम् अव्य० अव–मनु तस्यामोऽवः गुणः। प्रणवे, आरम्भे, स्वीकारे, ओमित्यात्मानमवतोऽर्थेति भावः। अनुमतौ, अर्थाङ्गीकारे, मङ्गले, शुभे, शैवे, ब्रह्मणि च।

ओल पु० आ–उनत्ति आ+उन्द्–क लस्योपे पृषो० इस्य लत्वम्। मूरणे (ओल) इति ख्याते कन्दे। आर्द्रे त्रि०।

ओलज क्षेपे इदित् भ्वा० पर० सक० सेट्। ओलञ्जति औलञ्जीत्।

ओलड क्षेपे वा चुरा० उभ० पक्षे भ्वादि० पर० सक० सेट्। ओलडयति ते औलडति औलिलडत् त औलडीत्।

ओष पु० उष–घञ्। दाहे।

ओषण पु० उष–ल्यु। कटुरसे (झाल) इति ख्याते रसभेदे।

ओषधि स्त्री० ओषो दाहो धीयतेऽत्र। ओष+धा–कि जातिविषयत्वात् स्त्रीत्वे वा ङीप् ओषधी च। फलपाकान्ते व्रीह्यादौ।

ओषधिप्रस्थ पु० न०। ओषधिप्रधानः प्रस्थः शाक०। हिमालयपुरे।

ओषधिपति पु० ६त०। चन्द्रे। ओषधीनामोऽयम्।

ओष्ठ पु० उष्यते उष्णवायुरेण उष–कर्मणि ठन्। (ठोंठ) दन्तच्छदे।

ओष्ठपुष्प पु० ओष्ठोपमानं पुष्पं यस्य। बन्धूकवृक्षे।

ओष्ठी स्त्री० ओष्ठ इवाचरति ओष्ठ+क्विप् ततः अच् गौरा० ङीष्। विम्बफलनामके (तेलाकुचा) वृक्षे। [विम्बिकाशब्दतावान्।

ओष्ठोपमफला स्त्री० ओष्ठ उपमीयतेऽनेन ओष्ठोपमं फलं यस्याः।

औ

औत्त न० उत्तानां दृषदां समूहः अण् ठिलोपः दृषत्समूहे। तुल्। औत्तकमप्यत्र।

औत्स्य त्रि० उत्सानां पक्वम् यञ्। स्वादीपक्वे मांसादौ।

औचिती स्त्री० उचितस्य भावः अञ्। स्त्रीत्वमत्र भिन्नत्वात् ङीष् यलोपः न्याय्यत्वे सत्यत्वे च।

औचित्य न० उचितस्य भावः ष्यञ्। उचितस्य भावे व्याख्याते।

औडुम्बर पु० चतुर्हस्तेषु वर्षेषु मध्ये वर्षभेदे, कुष्ठरोगभेदे च।

औत्कण्ठ्य पु० उत्कण्ठाया भावः ब्राह्म० ष्यञ्। उत्कण्ठायाम्।

औत्तानपादि पु० उत्तानपादस्य गोत्रापत्यम् इञ् ऐहिकभोग-साधनकर्म्मान्ते ज्योतिर्मण्डले निश्चलतया तारकारूपेण स्थिते ध्रुवनामके गोत्रे।

औत्सर्गिक त्रि० उत्सर्गं सामान्यविधिमर्हति ठञ्। सामान्यविधियोग्ये।

औत्सुक्य न० उत्सुकस्य भावः ष्यञ्। उत्कण्ठायाम् "औत्सुक्येन ब्रतत्वरेति रत्नावली"।

औदनिक त्रि० ओदनः शिल्पमस्य ठञ्। सूपकारे।

औदरिक त्रि० उदरे प्रभितः ठक्। आध्माने, (पेटुक) उदरमात्र-पूरणापेक्षके।

औदश्वित न० उदश्वितिं अर्द्धजलमथिते तक्रे संस्कृतम् अण्। उदश्वित्संस्कृते द्रव्ये। तत्रार्थे ठकि औदश्वित्कमप्यत्र।

औदार्य्य न० उदारस्य भावः गुणवचनत्वात् ष्यञ्। उदारतायाम्।

औदासीन्य न० उदासीनस्य भावः ष्यञ्। शुभाशुभयोरुपेक्षायाम् तटस्थ्ये।

औदास्य न० उदास्ते उद्+आस—अच् भावार्थे ष्यञ्। वैराग्ये। अनुरागशून्यतायाम् मनोयोगविरहे।

औद्दालक न० "प्रायो वल्मीकमध्यस्थाः कपिलाः क्षुद्रकीटकाः। कुर्वन्ति कपिलं क्षुद्रं तत् स्यादौद्दालकं मधु इत्युक्ते मधुनि।

औद्भिद न० "उद्भिदं पांशुलवणं यज्जातं भूमितः स्वयम्" इत्युक्ते पांशुलवणे, "विदार्य्य भूमिं निष्पन्नं यत् सङ्कल्प्य धारया क्षरेत्। तत्तोयमौद्भिदं नाम" इत्युक्तलक्षणे जले च। उद्भिद्य जायते जन—ड उद्भिज्जं ततः स्वार्थेऽण् औद्भिज्जमप्यत्र।

औद्वाहिक न० उद्वाहकाले हितं ठञ्। विवाहकाले हितधनादौ। "सैतमौद्वाहिकञ्चैव" इति स्मृतिः।

औपचारिक पु० उपचार एव विनयादित्वात् स्वार्थे ठक्। उपचारार्थे।

औपनिषद पु० उपनिषत्सु वेद्यः अण्। वेदान्तवाक्यवेद्ये परमात्मनि "तं त्वौपनिषदं पुरुषम्" इति स्मृतिः।

औपनौविक त्रि० नौविशेषे व्याप्तं ठक्। नौविशेषे व्याप्ते। "औपनौविकमस्य किञ्च स्त्री" इति भाषः।

औपम्य न० उपमैव स्वार्थे ष्यञ्। सादृश्ये।

औपयिक त्रि० उप+अय-घञ्, उपायेन लब्धः ठक् हुस्वश्च। उपायलब्धे, युक्ते न्यायागतवस्तुनि च। [रोगभेदे।

औपसर्गिक पु० उपसर्गेण निष्पादितः ठञ्। वातादिसन्निपातजाते

औरभ्र न० उरभ्रस्य मेषस्येदम् अण्। मेषादिलोमजाते कम्बले।

औरभ्रक न० उरभ्राणां समूहः वुञ्। मेषसमूहे।

औरस पु० उरसा निर्मितः अण्। "सवर्णायां संस्कृतायां स्वयमुत्पादयेत्तु यम्। औरसं तं विजानीयादादित्यु क्तलक्षणं सुतं।

और्द्धदैहिक त्रि० ऊर्द्धो देहः प्रेतदेहः तत्र भवं तस्मै देयं वा श्राद्धादि ठक्। मृतदिनमारभ्य सपिण्डीकरणान्तं क्रियमाणे जलदानश्राद्धादिलक्षणे कर्म्मकलापे। अलुगतादित्वात् द्विपदवृद्धौ और्द्धदैहिकमप्यत्र।

और्व पु० उर्व्यापत्यम् अण्। वाडवानले तस्योर्व्यामुत्पत्तिजातत्वात् तत्स्थानस्य भृगोरस्य दक्षिणशीर्षाद्याम्। उर्व्या भवः। मांसुलवणे।

और्लूक न० उलूकानां समूहः अण्। घेचकसमूहे।

औलूक्य पु० वैशेषिकदर्शनकारकोलूकादृषौ तच्छास्त्रवेत्तरि च।

औशनस न० उशनसा शुक्रेण प्रोक्तम् अण्। शुक्रप्रोक्ते उपपुराणादौ दण्डप्रणयनरूपे शास्त्रे च।

औशीर न० वश-ईरन् किच्च ततः प्रज्ञाद्यण्। वसुदितयोः मध्यापीठयोः।

औषध न० ओषधौ भवः अण्। रोगनाशके ओषधिभवे द्रव्ये, रोगहारके द्रव्यमात्रे।

औष्ट्र न० उष्ट्रस्येदम् अण् । उष्ट्रदुग्धादौ ।
औष्ट्रक न० उष्ट्राणां समूहः वुञ् । उष्ट्रसमूहे ।
औष्ठ्य त्रि० ओष्ठे भवः यत् । ओष्ठस्थानोच्चार्य्यमाणे उवर्णपवर्गादौ ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यविरचिते
शब्दस्तोममहानिधौ स्वरवर्णादिकाः
शब्दाः समाप्ताः ।

ओंतत्सत् ।

कं

कं पु० कं शब्दं कच दीप्तौ, वा ड । ब्रह्मणि, वायौ, आत्मनि, यमे दक्षप्रजापतौ सूर्य्ये, अग्नौ, विष्णौ, काले, कामदेवे, राजनि, मयूरे, देहे, मनसि, धने, प्रकाशे, शब्दे च । सुखे शिरसि, जले, रोगे च न० ।

कंस पु० कम–स । उपसेनसुते रूपे श्रीकृष्णमातुले । तैजसद्रव्ये, कांस्ये, (ताम्ररङ्गमिश्रणजनितधातुद्रव्ये । (काँसा) स्वर्णरजतादि-निर्म्मितपानपात्रे । आढक इति प्रसिद्धे परिमाणे च अमरः । पृषो० तालव्यान्त इति केचित् ।

कंसक न० कंसादिव कं जलं यत्नात् युक्त० । (क्षीराकस) इति प्रसिद्धे नेत्रौषधौ तत्संयोगाद्धि अग्निसंयोगेन कंसादिव चक्षुरा-दितो जलं स्रवति ।

कंसकार पु० कंस+कृ–अण् उप० । (काँसारी) इति प्रसिद्धे जातिभेदे ।

कंसजित् पु० कंस+जि-क्विप् तुक० । कंसस्वपजयकारिणि, श्रीकृष्णे ।

कंसहन् पु० कंस+हन्–क्विप् तुक० । कंसवैरिघातके श्रीकृष्णे ।

कंसारति पु० कंस+अरति तुक० । कंसस्वपशत्रौ श्रीकृष्णे ।

कंसास्थि न० कंसः अस्थीव उपमितसमासः । गुरुतयाऽस्थिसदृशे (काँसा) इति प्रसिद्धे धातुभेदे ।

कक दीप्तायाम् भ्वादि० आत्म० सक० सेट् । ककते । अककिष्ट ।

कक्क गतौ भ्वादि० इदित् आत्म० सक० सेट् । कक्कते । अकक्किष्ट ।

काकुत्स्थ पु० ककुदि अस्तरवधार्थमिन्द्रेण प्रार्थितः सन् दृषद्रूपधरस्य इन्द्रस्य ककुदि पृष्ठभागे तिष्ठतीति ककुत्+स्था–क । सूर्य्यवंशीय-रूपभेदे यत्पत्यतया काकुत्स्थेति संज्ञाभाजः सूर्य्यवंशीया अभवन् ।

काकुद अमरः० कं सुखं कौति कुशब्दे क्विप् तुक् च तस्य दः । दृष-खण्डपृष्ठस्थसंधिगड्डाकारे, (झुंड) इति ख्याते दृषाङ्गे, श्वेतच्छ-त्रादौ रूपचिह्ने, प्रधाने, पर्वताग्रभागे च ।

ककुद् अस्त्री० कस्य देहस्य सुखस्य वा कुं भूमिं ददाति दा-क। (झुंड) इति ख्याते वृक्षे, प्रधाने, व्यपदिष्टे, कलादौ, पर्व्वताग्रभागे च।

ककुद्मत् पु० ककुदमस्त्यस्येति मतुप् भस्यान्तत्वेऽपि यवादित्वात् न मस्य वः। वृक्षे, वृक्षोषधिविशेषे च। ककुदिव मांसपिण्डमस्त्यस्येति मतुप् ङीप्। कन्यायाम् स्त्री०।

ककुन्दर न० कस्य शरीरस्य (पृष्ठदेशस्य) कुं भूमिं दारयतीति कक्-इ-णिच्-अच् पृषो०। पृष्ठवंशाधःस्थ गर्त्ताकारे कूपके।

ककुभ् स्त्री० कं वातं स्तुभ्नाति स्तुनुभ क्विप् पृषो०। दिशि, शोभायाम्, चम्पकमालायाम्, वाद्ये, रागिणीभेदे च।

ककुभ पु० कं वातं स्तुभ्नातीति क पृषो०। वीणाद्ये, स्तम्भीर्य्यसम्पादनार्थमधोबद्धावनूमयभाण्डे। कस्य वातस्य कुः भूमिः भास्यऽस्मात् कक्+भा-क। विस्तीर्णशाखत्वात् वातभूमिप्रकाशके-ऽर्জुनवृक्षे, रागभेदे च। दिशि, रागिणीभेदे च स्त्री०।

कक्ष हासे भ्वादि० पर० अक० सेट्। कक्षति अकक्षीत्।

कक्कोल पु० कक्षते गच्छतीति क्विप् कक्, कोलति संख्यायति अच् कोलः कक् चासौ कोलश्चेति कर्म०। गन्धद्रव्यभेदे (कांकोल) इति वङ्गभाषाख्याते वनकपूर इति पाश्चात्येख्याते।

कक्कोलक न० कक्कोलस्येदमर्थे कन्। कक्कोलवृक्षजाते गन्धद्रव्ये वनकपूर इति ख्याते। तस्य कोषे फलवत्त्वात् कोषफल इति प्रसिद्धिः।

कक्ष पु० कक्ष-हिंसायां क। स्त्रीणाम् उत्तरीयवस्त्रस्य पश्चाद्भागस्थे अञ्चले (आँचल) लतायाम्, शुष्कवृक्षे, शुष्कवने च। पार्श्वभागे, राजान्तःपुरे, वाह्वोर्मूले पृष्ठप्रदेशनिहितोऽधोऽङ्गस्थैकदेशे (काखा) वस्त्राञ्चले, हस्तिबन्धनरज्ज्वाम्, काञ्च्याम्, प्रकोष्ठके, वृक्षभित्तौ, साम्ये, खड्गांशदे कचरोगभेदे च (कांकविराली) स्त्री०।

कक्षावेष्टक पु० कक्षं वनमुपवनं साम्यं स्त्रीबाहुमूलं वा कक्षां राजगृहान्तं वावेष्टते अव-इष्ट ण्वुल्। गृहान्तपालके, उद्यानपाले, रक्षाजीवे, कवौ, चारे च।

कच्चोत्या स्त्री० कक्षात् शुष्कतृणात् उत्तिष्ठति उद्+स्था—क+टाप् अदृश्यस्थायाम् ।

कच्या स्त्री० कच्चे भवा यत् । इष्टकिकायाम् इर्म्यादिप्रकोष्ठे, साटम्बे, वस्त्ररज्जौ, मेखलायाम् गजबन्धनरज्जौ उद्योगे, परार्थबद्धकक्षाणां तादृशबन्धवः कुत इति, उत्तरीयवस्त्रे च । [अकार्षीत् ।

कच क्रियायामिते भ्वादि० पर० सक० अक० च सेट् । कचति अकचीत्

कच्छ पु० कक्षि गतौ अच् । (कांक) पक्षिभेदे यस्य पक्षेण शरपुङ्खः क्रियते । युधिष्ठिरे च सहि विराटनगरे तां संज्ञां लेभे ।

कच्छट पु० कं देहं कटति क+कट—सुम् च, ककि लौल्ये अटन् वा । कक्षे । स्वार्थे कन् । कच्छटकोऽप्यत्र । [माले च ।

कच्छण न० कं सुखं कणति कण्—क्वण- अच् । करभूषणे, भूषण-

कच्छत न० ककि—कतच् । केशप्रसाधन्याम् (काकुइ) ।

कच्छतिका स्त्री० कक्षि—अतच् गौरा० ङीष् स्वार्थे कनि ह्रस्वे टाप् । प्रसाधन्याम् (कांकुइ) नागबलायाञ्च ।

कच्छती स्त्री० कक्षि—अतच् गौरा० ङीष् । प्रसाधन्याम् ।

कच्छलोटि पु० कच्छस्य लोटिरिव चञ्चुरस्य । मत्स्यभेदे (काकिला) अच् समा० । कच्छलोटोऽप्यत्र ।

कच्छपत्र पु० कच्छस्य पत्रेण पत्रं पक्षोऽस्य । पुङ्खे तत्प्रयुक्ते शरे ।

कच्छमुख पु० कच्छस्य मुखमिव मुखमस्य । (सांड़ाशि) यन्त्रभेदे ।

कच्छाल पु० कं सुखं शिरो वा कालयति क्षिपति कल—अच् । त्वङ्मांसरहितशरीरारम्भकेऽस्थिसञ्चये ।

कच्छालमालिन् पु० कच्छालानां मालाऽस्यास्ति इनि । रुद्रे ।

कच्छु(क्षु) पु० ककि—उ । (काछनी) धान्यभेदे । पृषो० कस्य गः कच्छुरप्यत्र । [हित्वे । कच्छिरप्यत्र ।

कच्छुल्ल पु० कच्छुरत्व रलति कच्छु+रल—ड । अशोकवृक्षे । पृषो० लस्य

कच रवे भ्वा० पर० अक० सेट् । कचति अकचीत् अकाचीत् ।

कच बन्धे, हिंसे च भ्वा० पर० इदित् सक० सेट् । कञ्चति अकञ्चीत् ।

कच बन्धे, सक० दीप्तौ अक० चादि० आत्म० सेट् । कचते अकचिष्ट ।

कच पु० कच–अच्। केशे, हरितालद्रव्ये, शुष्कव्रणे, सेघे च। हस्तिन्यां स्त्री०। भावे घ। बन्धे शोभायाञ्च।

कचाचित त्रि० कच आचितो विकीर्णो यस्य। विकीर्णकेशे। "कचाचितो विष्वग्" इति भारविः।

कचाम्बोद न० कचमामोदयति आ+मुद–णिच् अच्। (बाला) इति ख्याते गन्धद्रव्ये। [पत्तिकाङ्के हस्ते।

कचु स्त्री० कच–उ। स्वनामख्याते (हरिद्रा मानके कचुरिति) मव-

कचुर त्रि० कुत्सितं चरति कु–चर–अच् कदादेशः। मलिने। तक्रे न०।

कच्चित् अव्य० काम्यते इति कम् चीयते निश्चीयते अर्थो यस्मात् कम्+चि–क्विप् पृषो० मस्य दः। स्वाभिलषितज्ञापनाय लते प्रश्ने, हर्षे, मङ्गले च।

कच्छ त्रि० कच–बन्धे–क, केन जलेन कृणाति दीव्यते कु–ड वा। जलप्राये देशे। तटे, पुच्छागद्रुमे, नौकाङ्के च पु०। परिधानाञ्चले, (काछा) वाराहग्राम्, चीरिकायाञ्च (झिल्ली) स्त्री०।

कच्छप पु० कच्छे पिबति पा–क। कूर्म्मे। स्त्रियां जातित्वात् ङीप्। मङ्गलयुग्मबन्धभेदे च।

कच्छरुहा स्त्री० कच्छे जलप्रायदेशे रोहति रुह–क। दूर्व्वायाम्।

कच्छूर त्रि० कच्छूरस्यास्तिर इतच्। कच्छूरोगवति। कुत्सितं कुरति कु+कुर–क कदादेश। परस्त्रीगामिनि। पुंस्त्वे स्त्री०।

कच्छू स्त्री० कचं दीप्तिं छ्यति छो–कू। कण्डूकारके रोगभेदे।

कच्छूघ्नी स्त्री० कच्छूं हन्ति हन–टक् टित्त्वात् ङीप्। पटोलतायाम्।

कच्छूरा स्त्री० कच्छूं राति ददाति रा–क। मूकशिम्बाम् (आलकुशी) शब्दाम्, गन्धशब्दाञ्च।

कच्छोटिका स्त्री० कक्ष्यया उटिका वेष्टनं वट धात्वर्थनिर्देशे ण्वुल् समासारणञ्च। कक्षावेष्टने। अर्थ आदाधि स्त्रीत्वात् टाप् कक्षवेष्टनयुक्तायां शाखाम्।

कज रोहे (सौत्रः) इदित् पर० अक० सेट्। कञ्जति अकञ्जीत्।

कज्जल न० कुत्सितमोषद्वा जलं नेत्रस्य यस्मात् कोः कदादेशः। अञ्जने।

तद्वर्णत्वात् मेघे पु० । मद्यभेदे स्त्री० टाप् ।

कज्जलरोचक पु० न० कज्जलं रोचयति रुच–णिच्–अच् । दीपाधारे (पिलसुज) इति वङ्गभाषायां प्रसिद्धे ।

कञ्चिका स्त्री० कच्चि एव कुन् । वंशशाखायाम् (कञ्ची) ।

कञ्चुक पु० कच्चि–उकन् । योधादेः चोलाङ्गतौ सन्नाहे लौहवर्म्मणि, निर्म्मोके (खोलस) स्त्रीणां चूचिकायां वस्त्रे च ।

कञ्चुकिन् पु० कञ्चुक+इनि । राज्ञामन्तःपुराधिकारिणि द्वारपाले, सर्पे जारे, यवे, चणके च । आवृतकवचे त्रि० ।

कञ्चुलिका स्त्री० कच्चि–उल गौरा० ङीष् स्वार्थे कन् ह्रस्वे टाप् । स्त्रीणां कूर्पासवस्त्रे (कांचली) कनभाषे । कञ्चुलीत्यपि ।

कञ्ज पु० कनित्यव्ययं जलादिवाचि तस्मिन् जले मूर्द्धनि वा जायते जन–ड । पद्मे, केशे, कारणजले स्निग्धबीजजातित्वात् चतुराननेच ।

कञ्जक पु० कञ्जः केशइव कायति कै–क । (मयना) पक्षिभेदे तस्य कृष्णवर्णत्वेन केशतुल्यत्वात् ।

कञ्जार पु० कं जलं जारयति जृ–अण् । सूर्य्ये, अङ्गुलौ च । उदरे न० । कच्चि । कञ्जरोऽप्यत्र ।

कट गतौ भ्वादि० पर० सक० सेट् । कटति अकटीत् अकाटीत् ।

कट गतौ भ्वा० इदित् पर० सक० सेट् । कण्टति अकण्टीत् ।

कट गतौ भ्वा० पर० सक० सेट् । कटति अकटीत् अकाटीत् कट्टः ।

कट इतौ वर्षणे च भ्वादि० पर० सक० सेट् । कटति अकटीत् ।

कट पु० कट–अच् कर्म्मणि घ वा । हस्तिगण्डस्थले, कटिपार्श्वे, नदादिरचिते आसने (मादुर) (दड़मा) । अतिशये, काशे, तृणे, शवे, शवरघे, ओषधौ, शुभ्रधाने च । क्रियाकारके त्रि० ।

कटम्बरा स्त्री० कटं वृणोति कट+इ–खच् मुम् च् । (कटकी) कटुरोहिण्याम् । कटुंबराप्यत्र ।

कटक अस्त्री० कट–बुन् । मेखलाख्ये पर्वतमध्यभागे, बाहुभूषणे वलये, हस्तिदन्तमण्डले, चक्रे, सामुद्रलवणे, राजधान्याम्,

सेनायाञ्च । [कामरूपिणि राक्षसे च ।

कटपू पु० कटं प्रयते प्रु–क्विप् दीर्घश्च । मल्लादेशे, विद्याधरे,

कट(टि)प्रोथ प्रोथ–अच् कटस्य (कक्षा वा) प्रोथोमांसपिण्डः । स्त्रियां कटिदेशस्थमांसपिण्डे, कक्षायाञ्च ।

कटभङ्ग पु० भनज–घञ् ईत० । सैन्यभङ्गद्वारा राजविनाशे, धान्यानां दन्तच्छेदने च । [अपराजितायाञ्च ।

कटभी स्त्री० कटं दृढं भाति ड गौरा० ङीष् । ज्योतिष्मतीलतायाम् ।

कटभरा स्त्री० कटं बिभर्त्ति भृ, खच् मुम् च् । (गन्धभादाल) राजबलायाम् । ग्रहोनावृक्षे पु० ।

कटशर्करा स्त्री० कक्षते व्याप्नियते कटं फलं तत् शर्करा खर्परेव यस्याः (लाटा) गाङ्गेयीलतायाम् ।

कटाच्च पु० कटं गण्डं अञ्चति व्याप्नोति अच् । व्यपाङ्गदृष्टौ ।

कटायन न० कटस्य तृणासनस्यायनमुत्पत्तिस्थानम् । वीरणमूले ।

कटाह पु० कटमाहन्ति आ–हन–ड । मद्दिष्यामिशौ, तैलादेः पाकसाधनपात्रे, खर्परे, नरके च ।

कटि(टी) स्त्री० कट–इन् । श्रोणिदेशे (कांकाल) । ऋदिकारान्तत्वात् वा ङीप् । [वर्म्मणि च ।

कटिच न० कटिं लायते ले–क । काञ्चने, कटिवस्त्रे, कटि–

कटिल्ल पु० कट–इल्ल । कारवेल्ले (करेला) ।

कटिसूत्र न० कटौ धार्य्यं सूत्रं मध्य० । कटिधार्य्ये कार्पासरचिते धातुमये वा सूत्रे (घुनसी गोट) । [वद्धो धार्य्यते ।

कटीतल पु० कट्यां तलमास्पदमस्य । वक्रखड्गे यतोऽसौ कटिदेशे

कटोर पु० कट–ईरन् । जघने, कन्दरे, च । कट्यां न० । संज्ञायां कन् नितम्बे । तद्वति, तीक्ष्णे, मत्सरिणि च त्रि० ।

कटु न० कट–उ । दूषणे, दुष्टकार्य्ये, रसभेदे (झाल) तद्वति त्रि० । चम्पके, चीनकर्पूरे, पटोले, कटुकीलतायाञ्च स्त्री० वा ङीप् ।

कटुक पु० कटु स्वार्थे संज्ञायां वा कन् । पटोले, सुगन्धिवृक्षे, अर्कवृक्षे, (आकन्द) कुटजवृक्षे, (कुरची) राजसर्षपे, (राइसरषा)

शुण्ठीपिप्पलीमरिचरूपे त्रिकटुनि न० । [त्रयुने च ।
कटुकन्द पु० कटुः कन्दो मूलं यस्य । शिग्रुवृक्षे (सजना) आर्द्रके,
कटुकफल पु० कटुकं फलमस्य । कङ्कोले ।
कटुका स्त्री० कटु+संज्ञायां कन् । (कटकी) कटुरोहिण्याम्, ना—
म्बूल्यां राजिकायां, (राइसरसा) तिक्तालाबुके च (तितलौंकी) ।
कटुकी स्त्री० कटु+स्वार्थे कन् गौरा०ङीष् । (कटकी) कटुरोहिण्याम् ।
कटुकीटक पु० कटुः कीटः स्वार्थे कन् । मशके ।
कटुकाण पु० कटुस्तीक्ष्णः काणो यस्य । (तित्तिर) टिट्टिभपक्षिणि ।
कटुग्रन्थि पु० न० । कटुर्ग्रन्थिरस्य । पिप्पलीमूले, शुण्ठीमूले च ।
कटुच्छद पु० कटुः च्छदः पत्रं यस्य । तगरवृक्षे (टगर) ।
कटुतिक्तक पु० कटुश्चासौ तिक्तश्चेति अल्पार्थे कन् । भूनिम्बे, शुण्ठ-
वृक्षे च कटुतुम्ब्याम् स्त्री० । टाप् अत इत्त्वम् ।
कटुतुम्बी स्त्री० कर्म० । (तितलाउ) लताभेदे । कटु तुण्डं मुख-
मस्याः ङीष् कटुतुण्डीत्यपि च । [त्रिकमप्यत्र ।
कटुत्रय न० कटूनां त्रयम् । शुण्ठीपिप्पलीमरिचानां त्रये । कटु—
कटुदला स्त्री० कटु दलं यस्याः । (काँवड़) कर्कश्याम् ।
कटुफल पु० कटु फलं यस्य । पटोले । श्रीवल्लीवृक्षे स्त्री० ।
कटुभङ्ग पु० कटुः भङ्ग एकदेशो यस्य । शुण्ठ्याम् । कटुरपि भङ्गः ।
क्षितकारी कर्म० कटुभङ्गोऽप्यत्र ।
कटुमञ्जरिका स्त्री० कटुर्मञ्जरी यस्याः । अपामार्गे ।
कटुर न० कटुं विपाके कटुरसं राति रा—क । तक्रे ।
कटुरस पु० कटुस्तीक्ष्णो रसो ध्यनिर्यस्य । भेके ।
कटुरोहिणी स्त्री० कटुः सती रोहति रुह—णिनि । कटुकायाम् ।
कटुवार्त्ताकी स्त्री० कर्म० । श्वेतकण्टकारिकायाम् ।
कटुबीजा स्त्री० कटुबीजं यस्याः । पिप्पल्याम् ।
कटुस्नेह पु० कटुः स्नेहः तैलादिरूपो निर्यासो यस्य । सर्षपे ।
कटार पु० कटी—क कटनावरणम् कृच्छति कट—अण् । (कटार)
वस्त्रोदे । कट—ण्वुल् कटारकोऽप्यत्र ।

कट्फल पु० कट–क्विप् कट् फलं यस्य । (कायफल) गीपर्णीवृक्षे गन्धाढ्यायाम्, (नागर) दन्तत्वाम्, काकमाच्याम्, वार्त्ताक्याञ्च ।

कटुर न० कट–उरन् । तक्रे, दधिसरे, व्यञ्जने च ।

कटुवी स्त्री० कटु+गुणवचनत्वात् ङीष् । (कटकी) कटुकायाम् ।

कठ (कठाघाते (उत्कण्ठापूर्वकशब्दने) वा चुरा० उभ० पक्षे भ्वा० परo सकo सेटo इदित् । कण्ठयति ते कण्ठति । अचकण्ठत् त अकण्ठीत् । [अकाठीत् ।

कठ लक्ष्यजीवने भ्वादि० परo अकo सेटo । कठति अकठीत्

कठ आध्याने (उत्कण्ठापूर्वकशब्दने) इदित् भ्वा० आत्म० सकo सेटo । प्रावेशोत्पूर्वः । उत्कण्ठते उदकाठिष्ट । [तरि च ।

कठ पु० कठ–अच् । मुनिभेदे ऋग्वेदीयशाखायाम् तच्छाखाध्ये-

कठाकु पु० कठ काकु । मुनिभेदे ।

कठिञ्जर पु० कठ–इनच् कठिं कठिनं जरयति जृ+णिच्–अच् । पृषो० मुम् च् । तुलस्याम् पलाशवृक्षे पर्वतरायाञ्च । [स्त्री० ।

कठिन त्रि०कठ–इनच् । क्रूरे, निष्ठुरे, कठोरे, सान्द्रे च स्त्रियाम्

कठिनपृष्ठ पु० कठिनं पृष्ठमस्य । कच्छपे ।

कठिनी स्त्री० कठिन+गौरा० ङीष् । वर्णलेखनसाधने द्रव्ये । खडिकायाम् । "कठिनीः लिखोति" इति नैघण्टम् स्वार्थे कन् अत्रैवार्थे । [खाञ्छनच्छिरिति साधः ।

कठोर त्रि० कठ–ओरन् । कठिने, पूर्णे च । कठोरनारायणाधिप-

कड भेदने रचने च चुरा० इदित् उभ० सकo सेटo । कण्डयति ते अचकण्डत् । [अकण्डिष्ट ।

कड मदे भ्वा० इदित् उभ० सकo सेटo । कण्डति ते अकण्डीत् अकण्डीत् ।

कड मदने तुदा० परo सकo सेटo । कडति अकाडीत् अकडीत् ।

कडक न० कड–अच् संज्ञायाम् कन् । (करकच) लवणभेदे ।

कडङ्कर न० कडं गिरति गृणाति वा अच् नि० मुम् । आमगुडादिकाष्ठे (आगड़ा) भुवि ।

कडङ्करीय त्रि० कडङ्करमर्हति । घृतभक्षणयोग्ये गवादौ ।

कडम्ब पु० कड–अम्बच् । शाकनाड़िकायाम्, (डाँट) कोर्चे, प्रान्तभागे च ।

कडम्बी स्त्री० कडम्बो भूयसा विद्यतेऽस्याः अर्श आद्यच् गौरा० ङीष् । (कलमी) शाकभेदे तस्याः कडम्बभूयस्त्वात् ।

कडार पु० गड–सेचने आरच् गडपकाडेशः । पिङ्गलवर्णे । तद्वति त्रि० । करभकण्टकडारभाषा इति भाषः ।

कण्ड कार्कश्ये भ्वा० पर० अक० सेट् । कण्डति अकण्डीत् ।

कण आर्त्तस्वरे भ्वा० पर० अक० सेट् । कणति अकाणीत् अकणीत् । णिचि अचीकणत् त अचकाणत् त । [यति ते ।

कण गतौ भ्वा०पर० सक० सेट् । कणति अका(क)णीत् । णिचि कण-

कण पु० कण–निमीलने अच् । धान्यादेरतिसूक्ष्मांशे, लेशे च गौरा० ङीष् वनजीरके स्त्री० । अल्पार्थे टाप् । क्षुद्रांशे, जीरके पिप्पल्याम्, श्वेतजीरके च । कणत् अचकाणत् त ।

कण निमीलने चुरा० उभ० अक० सेट् । काणयति ते । अक्षी-

कणजीरक न० कर्म० । क्षुद्रजीरके ।

कणभक्ष पु० भक्ष–अण् उप० । श्यामचटके कणादे मुनौ "कण-भक्षपक्षानुसारिणामिति प्रकाशिका । एवम् कणभक्षकोऽप्यत्र ।

कणिक पु० कणो विद्यतेऽस्य अस्त्यर्थे ठन् । गोधूमचूर्णे, (मयदा) अतिसूक्ष्मांशे, अग्निमन्थवृक्षे च स्त्री० ।

कणित न० कण आर्त्तस्वरे क्त । पीड़ितानां शब्दे ।

कणिश न० कणो विद्यतेऽस्य इनि कणी तं श्यति शो–क । शस्य-शूर्षा धान्यादिशीर्षे च ।

कणीयस् त्रि० कण–ईयसु । अत्यन्ताल्पे ।

कणे अव्य० कण–के । अभिलाषातिशये ।

कणेर पु० कण–एर । कर्णिकारवृक्षे । वेल्लायां, हस्तिन्याञ्च स्त्री० ।

कण्टक पु० न० कटि एवुल् । सूच्यग्रे, क्षुद्रशत्रौ, रोमाञ्चे, मत्स्या-द्यस्थि द्रुमाङ्गे (कांटा) "लग्नाम्बुद्यूनकर्माणि केन्द्रसंज्ञञ्च कण्ट-कम् इति ज्योतिषोक्ते लग्ने, ततः चतुर्थसप्तमदशमस्थानेषु च ।

कण्टकद्रुम पु० कण्टकाचितो द्रुमः शाक० । शाल्मलीवृक्षे (शिमुल) ।
कण्टकप्रावृता स्त्री० ३त० । धृतकुमार्याम् ।
कण्टकफल पु० कण्टकाचितं फलं यस्य । धनवृक्षे (काटाल)
कण्टकिफलोऽप्यत्र । [(वेगुण) तस्याद्यत्वे कण्टकाचितत्वात् ।
कण्टकबृन्ताकी स्त्री० कण्टकाचिता बृन्ताकी । वार्त्ताक्याम्
कण्टकश्रेणी स्त्री० कण्टकानां श्रेणी यत्र । कण्टकार्य्याम् ।
कण्टकारिका स्त्री० कण्टकान् दृयर्त्ति कण्टक+ऋ—ण्वुल् स्वनाम-
ख्याते वृक्षे । फलेऽपि लुक् हरितक्यादित्वात् स्त्री० ।
कण्टकारी स्त्री० कण्टक+ऋ—अण् वृक्षत्वात् । फलेऽपि तस्य लुक्
हरितक्यादित्वात् स्त्री० ।
कण्टकाशन पु० कण्टकमश्नाति अश—ल्यु । उष्ट्रे ।
कण्टकित त्रि० कण्टको रोमाञ्चो जातोऽस्य इतच् । जातपुलके
"प्रीतिकण्टकितत्वच" इति कुमारः ।
कण्टकिन् पु० कण्टक+इनि । मत्स्यभेदे, खर्ज्जूरवृक्षे त्रिकण्टवृक्षे
(वइची) गोक्षुरे, खदिरवृक्षे, वदरवृक्षे, वंशभेदे, (वेड़ बाँश) ।
वार्त्ताक्यां, श्रोणश्लिष्टयाञ्च स्त्री० ।
कण्टकिल पु० कण्टक+इलच् । (वेड़वाँश) । वंशभेदे ।
कण्टकिलता स्त्री० कण्टकिनी लता कर्म्म० । (घसा) त्रपुषीलतायाम् ।
कण्टकी स्त्री० कण्टक+अर्शआदित्वादच् गौरा० ङीष् । वार्त्ताकीभेदे ।
कण्टतनु स्त्री० कटि—अच् कण्टः कण्टकान्विता तनुर्यस्याः । वृक्षत्वात् ।
कण्टदला स्त्री० कटि—अच् कण्टं दलं यस्याः । केतक्याम् ।
कण्टपत्र पु० कण्टं कण्टकान्वितं पत्रं यस्य । विकङ्कतवृक्षे ।
कण्टपत्रफला स्त्री० कण्टं कण्टकान्वितं पत्रं फलञ्च यस्याः । मत्स्य-
दण्डायाम् । [(वइची) ।
कण्टपाद् पु० कण्टः कण्टकान्वितः पादो मूलं यस्य । विकङ्कतवृक्षे ।
कण्टफल पु० कण्टं कण्टकान्वितं फलं यस्याः । गोक्षुरे, धनवृक्षे,
धूस्तूरे, लताकरञ्जे, एरण्डभेदे च ।
कण्टल पु० कण्ट+मत्वर्थीयो लच् । बावुले (बाबला) ।

कण्ठवल्ली स्त्री० कण्ठा कण्ठकान्विता वल्ली कर्म०। ग्रीवाभरणे।
कण्ठाक्तगला स्त्री० कण्ठ। अक्तंगला कर्म०। नीलझिण्टयाम्।
कण्ठालु पु० कंट+आलु। टङ्कयां, वंशभेदे, वार्त्ताक्याञ्च।
कण्ठ पु० कण्ठ—ठ तस्य नेत्वम् कठि—अच् वा। ग्रीवापुरोभागे, मद-नवृक्षे, समीपे, होमकुण्डाद्याहेयाङ्कुलिखितस्थाने च।
कण्ठतलासिका स्त्री० कण्ठतले अश्वकण्ठस्वरूपस्थाने आसे आध-एवुल्। अश्वग्रीवावेष्टकचर्म्मादौ।
कण्ठाग्नि पु० कण्ठे अग्निः पाकाग्निर्यस्य। पक्षिणि, तस्य कण्ठा-धःकरणमात्रेणैवान्नादेः पाकाद्दोष्माग्नित्वात् कण्ठाग्नित्वम्।
कण्ठाल पु० कठि—आलच्। शूरणे (ओल) युद्धे, उष्ट्रे, नौकाङ्गे, अरित्रे च। जले, गोणीभेदे च स्त्री०।
कण्ठिका स्त्री० कठि—एवुल्। (एकनरा) कण्ठाभरणभेदे।
कण्ठी स्त्री० क्षुद्रः कण्ठः अल्पार्थे ङीप्। अश्वकण्ठवेष्टनरज्ज्वाम्।
कण्ठीरव पु० कण्ठ्यां रवो यस्य। सिंहे, मत्तगजे, कपोते च।।
कण्ठेकाल पु० कण्ठे कालः सप्तम्याः अलुक्। महादेवे।
कण्डन न० कडि—ल्युट्। मुषलादिना तण्डुलादेर्निस्तुषता सम्पादने (कांडान)। [कण्डनो चोदकुम्भ्येति मनुः।
कण्डनी स्त्री० कण्ड्यतेऽनेन कडि—ल्युट्। मूषले उदूखले च।
कण्डिका स्त्री० कडि एवुल्। वेदैकदेशे।
कण्डु स्त्री० कडि—उ। गात्रघर्षणे, तत्कारके रोगे च (चुलकान)
कण्डु(ण्डू)र पु० कण्डु कण्डू वा राति रा क। कारवेल्लतायाम् (करेला) शूकशिम्ब्याम् (आलकुशी) स्त्री०।
कण्डूय स्त्री० कण्डू अ गात्रविघर्षणे संपदादित्वात् क्विप्। कण्डूयने गात्रघर्षणे। "कपोलकण्डूय" मिति कुमारः।
कण्डूयकरी स्त्री० अ—टक् उप०। शूकशिम्ब्याम् (आलकुशी)।
कण्डूघ्न पु० कण्डू—हन—टक्। आरग्वधे, गौरसर्षपे च।
कण्डूति स्त्री० कण्डूय—क्तिन्। कण्डूयने गात्रघर्षणे।

कण्डूयन क्ली० कण्डू-यक् ल्युट्। कण्डूयाम् गात्रघर्षणे।
कण्डूया स्त्री० कण्डू यक् कण्डूय-अ-स्त्रीत्वात् टाप्। कण्डूयाम्।
कण्डूल पु० कण्डू+लच्। कण्डूकारके मूरणे। कण्डूयुक्ते त्रि०।
कण्डोल पु० कडि-ओल। बंशादिरचिते धान्यस्थापनपात्रे।
(डोल) उड्रे च।
कण्डोष पु० कण्डूनामोषो यस्मात् ५ ब०। शूककीटे (शूयापोका)।
कण्व पु० कण्-वन्। मुनिभेदे। पापे न०।
कतक पु० तक-क्वामे कस्य जलस्य तको ह्रासः प्रकाशो यस्मात्। ५ ब०
(निर्म्मली) वृक्षभेदे। यस्य फलसम्पर्कात् जलप्रसादः।
कतम त्रि० किम्+डतमच्। बहूनां मध्ये एकस्य जातिप्रश्नेऽर्थे डतमच्। बहूनां मध्ये एकस्मिन् जातिविशिष्टे विशेषधर्म्मज्ञानाय पृष्टे। द्वयोर्मध्ये तथार्थे डतरच्। कतरः।
कति त्रि० किम्+डति। संख्याभेदपरिज्ञानाय पृष्टे।
कतिपय त्रि० कति+अयच् पुक् च। कतिशब्दार्थे।
कत्तृण क्लीबलिङ्गे तृणं कोः कदादेशः। भूम्नौ (चाकुलिया) कुल्फिकायां (पाना) सुगन्धितृणे च।
कत्तोयं न० कुत्सितमौषद्वा तोयं यत्र। मद्ये।
कत्थ श्लाघायां भ्वा०आत्म०अक०सेट्। कत्थते अकत्थिष्ट।
कत्थ वैचित्ये अद०चुरा०उभ०अक०सेट्। कत्थयति ते अचकत्थत् त।
कत्थ वाक्यरचनायां अद०चुरा०उभ०सक० सेट्। कत्थयति ते अचीकत्थत् त अचकत्थत् त।
कत्थक त्रि० कत्थ-एवुल्। तत्त्वनिर्णयार्थं वादरूपकथाकर्त्तरि, कथोपजीविनि नाटकवर्णनकर्त्तरि च। [मनालम्बेऽति माघः।
कत्थङ्कारम् अव्य० कत्थम्+कृ-णमुल्। कत्थं कृत्वेत्यर्थे। 'कत्थङ्कार-
कत्थञ्चन अव्य० कत्थम्+चन। केनांशेनेत्यर्थे।
कत्थञ्चित् अव्य० कत्थम्+चित्। कत्थञ्चनार्थे अतियत्नेनेत्यर्थे च प्राणान् कत्थञ्चिदमि धारयितुमिति रसमञ्जरी।
कत्थम् अव्य० किम्+प्रकारार्थे थम् कादेशः। केन प्रकारेणेत्यर्थे।

कथमपि अव्य० कथम् च अपि च द्व० । अतियत्नेनेत्यर्थे अतिगौरवेणेत्यर्थे च । [२न० । किंप्रकारप्राप्ते ।

कथम्भूत त्रि० किं प्रकारं भूतः प्राप्तः *किम्+द्वितीयान्तादपि यत्त ।

कथा स्त्री० कथ–अ । कथने, "प्रबन्धकल्पनां लोकसत्यां प्राहुः कथां बुधाः । परम्पराश्रया या स्यात् सा मताख्यायिका बुधैः" रित्युक्तलक्षणे वाक्ये प्रबन्धरचनायां कादम्बर्यादिग्रन्थे, पञ्चप्रतिपक्षोपन्यासेन विचारणायां, वादरूपे वाक्ये च ।

कथाप्रसङ्ग पु० कथायां प्रसङ्गो यस्य । वावदूके । गोष्ठीवचने वातुले, त्रिषु वाच्ये "कथाप्रसङ्गेन जनैरुदीरितादि" ति भारविः ।

कद रोदने, वैक्लवे अक० आह्वाने सक० भ्वा० दृदित् पर० सेट् । कन्दति अकन्दीत् । [अकादिट् । णिच्–कदयति ते ।

कद विक्लवीभावे दिवा० आत्म० अक० सेट् घटादि । कद्यते

कद्धन् पु० कुत्सितोऽध्वा कदादेशः गतिः कुपथे । [ल्युट् । युट् ।

कदन न० कद–णिच्–ल्युट् । पापे, मर्दने, मारणे च आधारे

कदम्ब पु० कद–अम्बच् । स्वनामख्याते वृक्षे । हर्षने देवताड़ वृक्षे । समूहे च न० । स्वार्थे कन् । संघे न० ।

कदम्बगोलकन्याय पु० कदम्बपुष्पस्य गोलके यथा सर्वावयवेषु युगपत्पुष्पाणामुत्पत्तिस्तादृशे एकदोत्पत्तौ दृष्टान्तभेदे ।

कदर पु० कं जलं दृणाति पचाद्यच् । श्वेतखदिरे (काटावाबला) वृक्षभेदे च । [विडम्बिते, दूषिते च ।

कदर्थित त्रि० कुत्सितोऽर्थः कदर्थस्तं करोतीति णिच्–कर्म्मणि क्त ।

कदर्य त्रि० कुत्सितोऽर्थः स्वामी कुगतिः । सति विभवे अदातरि, लुब्धे । "आत्मानं धर्मकृत्यञ्च पुत्रदारांश्च पीडयन् । यो लोभात् सञ्चिनोत्यर्थान् स कदर्य्य इति स्मृत" रित्युक्तलक्षणेऽर्थसञ्चयकारके च ।

कदल पु० कद–कलच् । रम्भावृक्षे च । अजादित्वात् टाप् पृथ्वीजतायां (चाकुलिया) शाकभेदवृक्षे च । [कायां, वृक्षभेदे च ।

कदली स्त्री० काय दल्यते त्वगादौ जलवाहुल्यात् । रम्भावृक्षे, पताका-

कदलीकुसुम न० ६त० । (मोचा) कदलीपुष्पे ।
कदलीदण्ड पु० ६त० । कदलीमध्यस्थे दण्डाकारे पदार्थे (थोड़) ।
कदा अव्य० कस्मिन् काले किमु+दा कादेशः । कस्मिन्काले प्रश्नार्थे ।
कदाख्य पु० कुत्सिता आख्या यस्य कदादेशः । (कुड़) वृक्षे ।
कदाचन अव्य० कदा+चन । अनिर्द्धारिते कस्मिंचित् कालेऽर्थे चित् । कदाचित् अव्य० कदा+चित् कदाचनार्थे कदापीत्यर्थे च ।
कदुष्ण न० कुत्सितम् ईषदुष्णं कोः कदादेशः । ईषदुष्णे स्पर्शे । तद्वति त्रि० ।
कद्रु पु० कद्—रु । पिङ्गलवर्णे । तद्वति त्रि० नागमातरि स्त्री० ।
कद्रू स्त्री० कद्रु+संज्ञायामूङ् । नागमातरि कश्यपपत्न्याम् ।
कद्रू (द्रु) पुत्र पु० ६त० । सर्पे । कद्रू (द्रू) सुतादयोऽप्यत्रार्थे ।
कद्वद त्रि० कुत्सितं वदति कु+वद्-अच् कदादेशः गर्हितवाक्यवादिनि ।
कन प्रीतौ अक० सतौ सक० भ्वा० पर० सेट् । कनति अकनीत् अकानीत् ।
कनक न०कन्—वुन् । स्वर्णे, किंशुकवृक्षे कृष्णकुसुमे—धुस्तूरे धुस्तूरे च ।
कनकक्षार पु० कनकस्य तद्भस्मवत् क्षारः । (सोहागा) टङ्के तत्स्वर्णात् हि झटिति कनकं द्रवति ।
कनककदल न० कनकदण्डं छत्रं यस्य शाक० । राजच्छत्रे
कनकप्रसवा स्त्री० कनकमिव प्रसवः पुष्पं यस्याः । स्वर्णकेतक्याम् ।
कनकरस पु० कनकमिव रसो यस्य । हरितालके ।
कनकलोहव पु० कनतीति कना दीप्ता कला अवयवः तया उद्भवति उद्+भू—अच् । (धूना) सालनिर्य्यासे ।
कनकाचल पु० कर्म० । सुमेरुपर्वते, धान्याचलादिषु दशसु दानीयपर्वतेषु मध्ये दानीते स्वर्णपर्वते च ।
कनकाध्यक्ष पु० ७त० । सुवर्णरक्षणादावधिकृते ।
कनकारक पु० कनकं दीप्तं यथा तथा करोति सर्वतो व्याप्नोति कृ—ण्वुल् । कोविदारवृक्षे ।

कनकालुका स्त्री० कनकनिर्मिता आलुः संज्ञायां कन्। अङ्गारे (भारी) सौवर्णकलसे च।

कनखल पु० तीर्थभेदे।

कनिष्ठ त्रि० अयमेषामतिशयेन अल्पो युवा वा इष्टन् कनादेशः। अतियूनि अत्यल्पे अनुजे च। अनुजायां सर्वाभ्यः क्षुद्राङ्गुलौ च स्त्री० टाप्। कनिष्ठभ्रातुः पत्न्यामपि अजादित्वात् टाबेव।

कनी स्त्री० कम-अच् गौरा० ङीष्। दुहितरि।

कनीनिका स्त्री० कन-ईन संज्ञायां कन् टाप् अत इत्त्वम् अल्पितारायां, कनिष्ठाङ्गुलौ च।

कनीयस् त्रि० अयमनयोरतिशयेन यवा अल्पो वा ईयसु कनादेशः। कनादेशः। द्वयोर्मध्ये अल्पतरे, अनुजेच। स्त्रियां ङीप्।

कनीयस न० कनी दीप्तिः तत्कै यस्यति यस-अच्। ताम्रे।

कन्तु पु० कम-तु। कामदेवे। हृदये न०। कं सुखमश्नोति कम्+अस्त्यर्थे तु। सुखवति त्रि०। [वस्त्रखण्डे। (कांथा)

कन्था स्त्री० कम-थन्। मृण्मयभित्तौ (कांथ) स्त्रस्यधितजीर्ण-

कन्थारी स्त्री० अतिकण्टका इतत्वात् कन्थामपि कल्कति वेधनेन प्रविशति कृ-अण्। दुष्प्रवेशाख्ये वृक्षे।

कन्द पु० न० कन्दति कन्द्यति कन्द्यते वा कदि-अच् णिच् अच्, घञ् वा। मूरणे (ओल) मूलमात्रमूले, वृक्षमूले च (गाजर) मेघे पु०।

कन्दगुडूची स्त्री० कन्दोद्भवा गुडूची डाक०। गुडूचीभेदे, (गुळ्वी) इति ख्याते कन्दे च।

कन्दट न० कदि+अटन्। श्वेतोत्पले।

कन्दफला स्त्री० कन्दात् फलं यस्याः ङ्यु टकारवेल्लायाम्। (उक्का)

कन्दर पु० स्त्री० कम् जलेन दीर्यते कम्+दृ-अच् वृक्षाकारे गिरिनितम्बदेशे गुहायाम्, स्त्रीत्वे टाप् ङीम् च। अर्जुने पु०। आर्द्रके न०।

कन्दराकर पु० ईत०। पर्वते। [(पाकुड़) आखोटवृक्षे च।

कन्दराल पु० कन्दरा+अस्त्यर्थे लच्। गईभाण्डवृक्षे मूलकवृक्षे च

कन्दरोद्भवा स्त्री० कन्दरे उद्भवति उद्+भू—अच्। शुण्ठ्यामलकभेदौषधे।
कन्दर्प पु० कम् सुखं तेन तत्र वा दृप्यति कम्+दृप+अच्, कम् कन्दर्पितो दर्पोऽस्मात् वा। कामदेवे।
कन्दर्पकूप पु० कन्दर्पस्य कूप इव। स्त्रीचिह्नभेदे।
कन्दर्पजीव पु० कन्दर्पं जीवयति उद्दीपयति जीव णिच् अण्। कामवर्द्धननामकवृक्षे।
कन्दर्पमूषल पु० कन्दर्पस्य मूषल इव। पुरुषचिह्नभेदे।
कन्दल न० कदि—कलच्। कपाले नवाङ्कुरे, करञ्जनौ अपवादे, कन्दखोलतापुष्पे च। कनके, युद्धे कलापे च पु०।
कन्दली स्त्री० कन्दे लीयते ली—ड, कदि—कलच् वा गौरा० ङीष्। खगभेदे शुक्लभेदे, पताकायाम्, पद्मबीजे, भूमिकदल्याञ्च।
कन्दलीकुसुम न० ६त०। भूमिकदलीपुष्पे, कलापे च।
कन्दवर्द्धन पु० कन्देन वर्द्धते वृध—ल्यु। सूरणे (ओल)।
कन्दवल्ली स्त्री० कन्दादारभ्य वल्ली। वन्याकर्कोट्याम्।
कन्दशूरण पु० कन्दप्रधानः शूरणः शाक० (ओल) सूरणे।
कन्दु पु० स्त्री० स्कन्दं उ इलोपः। (ताम्रोया) स्वेदनीपात्रे कन्दु पक्वं तैलपक्वमिति स्मृतिः तण्डुलादेः भर्ज्जनपात्रमात्रे च गोकुले कन्दुधारणाधामिति स्मृतिः। [कुमारः।
कन्दुक पु० कदि—उक। गेन्दुके; "सा कन्दुकैः कविभपुत्रकैश्चेति
कन्दुपक्व त्रि० इलोपसेकं विना कन्दुपात्रे पक्वं तण्डुलादि। शुष्कतया भ्रष्टतण्डुलादौ। कन्दुपक्वानि तैलेनेत्यादिस्मृतिः।
कन्दोट पु० कदि—ओटन्। श्वेतोत्पले। नीलोत्पले न०।
कन्दोल पु० कन्दे मूले उतः वेञ्—क्त। कुसुदे।
कन्धर पु० कम् जलम् धारयति धरः। मेघे। शिरसश्च धरा। ग्रीवायाम् स्त्री०।
कन्धि पु० कम् शिरो धीयतेऽस्मिन् कम्+धा—कि। ग्रीवायाम्।
कन्थ न० कद—क्थन्। प्रावरे, मूर्च्छायाञ्च।
कन्थका स्त्री० अज्ञाता कन्था कन्था+अज्ञातार्थे कन् स्त्रियां टाप्

मेयम् । "कन्यका दशमे प्रोक्तेति कन्यकायां दशवर्षायां कुमार्याम् ।

कन्या स्त्री० कन–यत् कन्यायाः कनीनू चेति निपातात् वयसि प्रथम इति न ङीप् । अनूढायां कुमार्याम्, मेषादितः षष्ठे राशौ च ।

कन्याकुब्ज पु० कन्याः कुब्जा यत्र । काम्यकुब्जदेशे तत्र हि वायुना कन्याश्रमस्य कुब्जत्वं कृतमि' ति रामायणकथा ।

कन्याट पु० कन्या अटत्यत्र घञ् । वासभवने ।

कप चलने (सौत्रः) भ्वर० अक० सेट् कपति अकपीत् अकपीत् ।

कप चलने भ्वादि० दृदित् आत्म० अक०सेट् । कम्पते अकम्पिष्ट ।

कपट पु० न० के मूर्द्धनि अयं पट इवाच्छादकः । अन्यथास्थितस्य वस्तुनोऽन्यथात्वेनाच्छादने ।

कपटिन् त्रि० कपट+इनि । छलयुक्ते । चीनानामगम्यद्रव्ये पु० ।

कपर्द पु० पर्व पूरणे क्विप् रात् वलोपे पर् धर्त्तिः कस्य गङ्गाजलस्य परा पूर्त्त्या दायति शुध्यति क+पर्+दैप्–क । हरजटायाम् । केन सुखेन पूर्त्तिं ददाति दा–क । वराटके अल्पार्थे कन् स्त्रीत्वे टाप् अतइत्त्वम् । कपर्दिकाऽप्यत्र ।

कपर्दिन् पु० कपर्द+अस्त्यर्थे इनि । महादेवे ।

कपाट स्त्री० न० कं वातं पाटयति वहिर्गमयति पट–णिच् अण् । द्वारावरणेन वातरोधके खनामख्याते काष्ठादौ । बहुत्वात् स्त्रियां ङीप् । कपाटीत्यत्र ।

कपाल पु० न० कं जलं पालयति कण् । घटादेरवयवे, शिरोऽस्थ्नि, यतीनां भिक्षापात्रे, कर्परे च । सौत्रकप–कालन् । समूहे, कुष्ठरोगभेदे च ।

कपालभृत् पु० कपालं ब्रह्मणः शिरोऽस्थिमयं पात्रं बिभर्त्ति भृ–क्विप् । शिवे । [दुर्गायां स्त्री० ङीप् ।

कपालमालिन् पु० कपालानां माला विद्यतेऽस्य इनि शिवे ।

कपालिका स्त्री० चुद्रं कपालमल्पार्थे कन् अत इत्त्वम् । मानस्थ-ण्डयवखण्डे (खापरा) ।

कपि पु० कौ० कप—इ । वानरे, रक्तचन्दने, वराहे, कपिवृक्षे च । तद्वति त्रि० ।

कपिकच्छू स्त्री० कपीनामपि कच्छूः यस्याः पृ० ब० । (आलकुशी) कपिकच्छूहेतौ स्फुटशिम्बाम् ।

कपिका स्त्री० कप—कुन् । नीलसिन्धुवारवृक्षे । [ध्वजोऽस्य ।

कपिकेतन पु० कपिः केतनं ध्वजरूपं चिह्नं यस्य । अर्जुने कपि-

कपिचूड़ा स्त्री० कपीनां चूड़ेव । आम्रातकवृक्षे तस्य सुकुलेन तथात्वात् ।

कपिचूत पु० कपीनां चूत इव प्रियः । आम्रातकवृक्षे ।

कपिञ्ज पु० कं जलमिव पिञ्जयते वर्ण्यते पिञ्ज—क नलोपः । (शिका-रस) सिन्धुके ।

कपिञ्जल पु० कपिव पिञ्जयति पिञ्ज—कलच् । गौरतित्तिरौ, पातके च "कपिञ्जलानालभेते"ति श्रुतिः ।

कपित्थ पु० कपिस्थिष्ठत्वात् तत्फलप्रियत्वात् स्था—क पृषो० । (कएत-बेल) वृक्षभेदे कपित्थमदराग्रम्' इति भागवतम् ।

कपित्थत्वक् पु० कपित्थस्य त्वगिव त्वक् वल्कलमस्य । एलवालुकवृक्षे ।

कपित्थाख्य पु० कपित्थमिवाख्या यस्य । गोलाङ्गूलाख्ये वानरभेदे ।

कपिप्रभा स्त्री० कपावपि प्रभा स्वगुणप्रसारोऽस्याः । (आलकुशी) कपिकच्छ्वाम् ।

कपिप्रिय पु० ६त० । आम्रातकवृक्षे कपित्थे च ।

कपिरथ पु० कपिः हनुमान् रथइव वाहनम् यस्य । रामचन्द्रे कपीरथे यस्य । अर्जुने ।

कपिल पु० कप—इलच् पृषोदरः । अग्नौ, वासुदेवे, सांख्यशास्त्रकारके मुनिभेदे, स च कर्दमप्रजापतितो देवहूत्यां भगवदंशेन जातः । कङ्कुरे, दानवभेदे, पिङ्गलवर्णे च तद्वति त्रि० । स्वर्णवर्णायां नद्यां, नदीभेदे, रक्तपुष्पयोगात् शिंशपायां पुण्डरीकनागदिग्गज-करिण्यां च स्त्री० ।

कपिलधारा स्त्री० कपिलेव शुभ्रा धारा यस्याः । गङ्गायां स्वर्गनद्याम् । कपिलानां धारा दुग्धधारा यत्र । काश्यां प्रसिद्धे तन्नामकतीर्थे ।

कपिलशिंशपा स्त्री० कर्म० । पीतपुष्पयुक्तायां शिंशपायाम् ।
कपिलाह्वो स्त्री०कपिलमल्लिवत् पुष्पमस्याः। पीतपुष्पायां शिंशपायाम् ।
कपिलाश्व पु० कपिलरूपेणाश्वहरणात् कपिलवर्णाश्वयोगाद्वा इन्द्रे ॥
कपिलोमफला स्त्री० कपिलोमवत्यपि फलं कण्टकवन्मस्याः । (आल-कुशी दुरालभायाम् ।
कपिलीह न० कपितुल्यं पिङ्गलं लोहंधातुः । पित्तले ।
कपिवक्त्र पु० कपेर्वक्त्रमिव वक्त्रमस्य । नारदे तस्य शापवशात्कपितुल्यास्यत्वं पुराणे प्रसिद्धम् । [आख्यातकदृश्ये ।
कपिवदान्य पु० कपिषु वदान्यो बहुफलत्वत्वेन तत्प्रदानात् ।
कपिवल्ली स्त्री कपिरिव तल्लोमतुल्या वल्ली । गजपिप्पल्याम् ।
कपिश पु० कपिः कपिलवर्णोऽस्यास्ति अस्त्यर्थे अ । (झिलारस) सिल्हके । कृष्णापीतमिश्रे वर्णे च । तद्युक्ते त्रि० । बहौभेदे, कपिशं तीक्ष्णमिति रभसः । माधव्यां लतायाञ्च स्त्री० ।
कपिशी स्त्री० कपिश+गौरा० ङीष् । माधव्याम् मदिरायाञ्च ।
कपिशीर्ष न० कपीनां प्रियं शीर्षमस्य शाक० । प्राकाराग्रे ।
कपिशीर्षक न०कपेः शीर्षमिव कायति कै+क । सिङ्घाडके ।
कपीन्द्र पु० कपिरिन्द्र इव । हनुमति । कपीनामिन्द्रः । सुग्रीवे ।
कपीष्ट पु० कपीनामिष्टः । राजादने कपित्थे च ।
कपूय त्रि० कुत्सितं पूयते पूयी–विसरणे अच् पृषो० उलोपः । कुत्सिते । कपूयचरणाः कपूययोनिमापद्यन्ते इति स्मृतिः ।
कपोत पु० कोवातः पोतइव यस्य । पारावते पक्षिमात्रे च ।
कपोतक न० कपोत इव कायति प्रकाशते कै–क । सौवीराञ्जने ।
कपोतपालिका स्त्री० पालयति पाल+ण्वुल्–उप० । सम्भाव्य प्रसारितदारुभेदे सौधादिप्रान्ते काष्ठादिरचिते पक्षिपालस्थाने सिङ्घे (फाखराघोप) ।

कपोतपाली स्त्री० कपोतान् पालयति कर्म्मण्यण् ङीष्० । प्रासाद-प्रान्ते दारुनिर्म्मिते पक्षिस्थाने खिटके (पायराखोप) ।

कपोतवर्णी स्त्री० कपोतस्य वर्ण्ण इव वर्णो यस्याः गौरा० ङीष् । लक्ष्मौलतायाम् ।

कपोताङ्घ्रि पु० कपोतस्याङ्घ्रिरिव रक्तवर्णत्वात् । नलीनामद्रव्ये ।

कपोतारि पु० कपोतस्यारिः ई०त० । श्येनपक्षिणि ।

कपोल पु० कौ लक्ष्यं-ओलच् । गण्डे । गल्ले (गाल) ।

कफ पु० केन जलेन फलति फल-ड । शरीरस्थे धातुभेदे । श्लेष्मणि ।

कफकूर्चिका स्त्री० कफं कूर्चयति विकरोति कूर्च-विकारे एवुल् । लालायाम् आस्यास्रवे (थुथु) ।

कफणि पु० स्त्री० केन जलेन फणति स्फुरति कनि । भुजगभेदभण्डौ । कूर्परे (कनुइ) स्त्रीत्वे वा ङीष् ।

कफवर्द्धन पु०कफं वर्द्धयति वृध-णिच्-ल्यु । पिण्डातकवृक्षे । कफ-वृद्धिकारके त्रि० ।

कफविरोधिन् पु० न० कफं विरुणद्धि वि+रुध-णिनि । मरिचे, कफविरोधकारके त्रि० । [वञ्जुरवृक्षे, कफनाशके त्रि०

कफान्तक पु० कफमन्तयति तत्करोतीति अन्त+णिच्-एवुल् ।

कफारि पु० ई०त० । शुण्ठ्याम् ।

कफिन् त्रि० कफोऽस्यास्त कफ+इनि । श्लेष्मप्रधाने जने ।

कफोणि पु० स्त्री० केन जलेन फणति कनि पृषो० ओत्वम् । भुजभेद-भण्डौ कूर्परे (कनुइ) स्त्री० वा ङीष् ।

कबन्ध पु० कं सुखं बध्नाति बन्ध-अण्, कं बध्यते ऽत्रेति वा बन्ध-घञ्, केन वायुना बध्यते, कोवायुर्बन्धो वा यस्य यथायथं वाक्यम् । उदरे, धूमकेतौ, राहौ, राक्षसभेदे च । जले न० । 'मनुष्याणां यदस्ते तु छेदनेषु छलमूर्द्धसु । तदाधेयात् कबन्धः स्यादेकोऽमूर्त्ता क्रियान्वित' इत्युक्तलक्षणे शिरःशून्यक्रियायुक्तदेहे पुंस्त्री० । [कपित्थवृक्षे ।

कबिल्थ पु० कपयस्तिष्ठन्त्यत्र तल्लिप्सयत्वात् स्था-क पृषो० पस्य बः ।

कम् अव्य० कम—क्विप्-भावपक्षे विच् । पादपूरणे, जले, मस्तके, सुखे, मङ्गले, निन्द्यायाञ्च ।

कम वाञ्छायां भ्वादि० आत्म० सक० सेट् । कामयते अचीकमत अचकमत । [अचकमत ।

कम कामनायाम् चुरा० आत्म० सक० सेट् । कामयते अचीकमत

कमठ पु० कम—अठन् । कच्छपे यतीनां जलपात्रे न० ।

कमण्डलु पु० न० मण्डन मण्डः कस्य जलस्य मण्डं लाति ला कु । करके, संन्यासिनां जलपात्रभेदे, भृङ्गवृक्षे, चतुरश्रादजातौ च ।

कमन त्रि० कामयते कम—ल्यु । कामुके, अभिरूपे, सुन्दरे च । अशोकवृक्षे पु० ।

कमनच्छद पु० कमनः सुन्दरः छदोऽस्य । कदम्बवृक्षे ।

कमनीय त्रि० कम—अनीयर् । मनोहरे, कामनायोग्ये च ।

कमल न० कं जलमलति भूषयति कम्+अल—अच् । पद्मे । कम—कलच् । ताम्रे, लोमनि, औषधे, जले च न० । भृगभेदे, सारसविहगे च पु० । [पद्मसमूहे ।

कमलख(ण्ड)ण्ड न० कमलानां समूहः कमल+(ण्ड)खण्डच् ।

कमला स्त्री० कमलं विद्यतेऽस्या अर्शआदित्वात् अच् । लक्ष्म्याम् । कम—कलच् वरस्त्रियाम् ।

कमलालया स्त्री० कमलमालयो यस्याः । लक्ष्म्याम् ।

कमलासन पु० कमलमासनं यस्य । चतुरानने ब्रह्मणि ।

कमलिनी स्त्री० कमलानां समूहः देशो वा कमल+इनि । पद्मसमूहे पद्मयुक्तलतायाञ्च ।

कमलोत्तर न० कमलमिवोत्तरमुत्कृष्टम् । कुसुमपुष्पे ।

कमित त्रि० कम—क्विप्भावपक्षे क्त । कामुके स्त्रियाम् । कमितौ ।

कम्प पु० कपि—चलने घञ् । गात्रादिकम्पे वेपथौ । [चलने ।

कम्पन त्रि० कपि युच् । कम्पयुक्ते । शिशिरे ऋतौ पु० । भावे ल्युट् ।

कम्पिल(ल्ल) पु० कपि—इलच् । कमलागुंडा रोचन्याम् । कपि—इल्लच्, करञ्जे, "देवीं कपिल्लवासिनीम्" इति स्मृतिः ।

कम्पिल्लक पु० कम्पिल्ल एव स्वार्थे कन् । (कमला) करञ्जभेदे ।

कम्म त्रि० कपि–र । कम्पान्विते ।

कम्ब गतौ भ्वा० पर० सक० सेट् । कम्बति अकम्बीत् ।

कम्बल पु० कम्ब कलच् । नागभेदे साखायां, प्रावारे, जलौ च । स्व-नामख्याते मेषलोमनिर्म्मिते वस्त्रासनादौ, जले च न० ।

कम्बलिन् पु० कम्बलः गलरोमरूपसास्नाऽस्त्यस्य इनि । वृषभे कम्बल-वति त्रि० । [शकटे गन्धीरथे च ।

कम्बलिवाह्य न० कम्बलिना वृषेण वाह्यम् वह–ण्यत् । वृषभवाह्ये

कम्बि स्त्री० कम्ब–इन् बुक् च । दर्व्याम् (हाता) वा ङीष् । कम्बी ।

कम्बु पु० न० कम्ब–उ बुक् । शङ्खे गले च । शम्बूके, वलये, नलके च न० । ग्रीवायां स्त्री० । [कन् कम्बुकण्ठिकाख्यत्व ।

कम्बुकण्ठी स्त्री० कम्बुरिव कण्ठोऽस्याः कम्बुग्रीवायाम् । स्वार्थे

कम्बुपुष्पी स्त्री० कम्बुः शङ्ख इव पुष्पमस्याः । शङ्खपुष्प्याम् ।

कम्बुमालिनी स्त्री० कम्बूनां तत्सदृशपुष्पाणां मालाऽस्त्यस्याः इनि । शङ्खपुष्प्याम् ।

कम्बोज पु० कम्ब–ओज । हस्तिभेदे, शङ्खभेदे "प्रसूनटं समारभ्य यावेलाहृत्तिणपूर्वतः कम्बोजदेश" इत्युक्तदेशे च ।

कम्बोतायिन पु० कम्बुरिवातायी । शङ्खतुल्यशब्दोत्पादकाये शङ्खचिल्ले

कम्भारी स्त्री० कं जलं बिभर्त्ति कन्+भृ–अण् उप० । गाम्भार्य्याम् (गांभार) ।

कम्र त्रि० कम–णिङ्भावपक्षे र । मैथुनेच्छावति कामुके मनोहरे च

कर पु० कृ–अप्, कृ–अच् वा । हस्ते, किरणे, राजग्राहे राजस्वे, वर्षोपले, प्रत्यये, हस्तिहस्ते, हस्तनक्षत्रे च । किञ्चित्कर्म्मोप-पदे तत्कर्मकारके । यथा कर्मकरः यशस्करः ।

करक पु० कृ–वुन् । करञ्जवृक्षे, पक्षिभेदे, दाड़िमवृक्षे, कोविदार वृक्षे, वल्कलवृक्षे, करीरे नारिकेलास्थ्नि च (नारिकेलेरखोल) । कमण्डलौ पु०न० । कर–स्वार्थे कन्, वर्षोपले (शिल) पु०स्त्री० । स्त्रियां गौरा० ङीष करकी ।

करकङ्कणन्याय पु० कङ्कणशब्दस्य करभूषणार्थकत्वेऽपि यथा करङ्क-शब्दप्रयोगस्तत्सम्बन्धद्योतनार्थः तद्वत् दृष्टान्ते ।

करकण्टक पु० करस्य कण्टक इव । नखे ।

करकाजल न० करकाया जलम् ६ त० (बरफ) करकाशब्दे ।

करकाम्भस् पु० करकाया अम्भ इवाम्भो यस्य । नारिकेले ।

करग्रह पु० करस्य बधूकरस्य वरेण ग्रहो ग्रहणं यत्र । विवाहे ।

करग्रहारम्भ पु० करस्य राजग्राह्यस्य ग्रहणं प्रजाभ्य आदानं तस्य आरम्भः । वार्षिककरस्य प्रथमादानारम्भे (पुण्याह) ।

करङ्क पु० कीर्य्यते क्षिप्यतेऽत्र कॄ—अप् करोऽङ्को गर्भोऽस्य शक० । नारिकेलास्थि (खोल), भक्तकपर्परे (माधारखुली), कमण्डलौ पात्रभेदे च "ताम्बूलकरङ्कवाहिनी" इति कादम्बरी ।

करच्छद पु० कर इवावयवकल्पदोऽस्य । घाण्टोटवृक्षे (सिहोड़ा) ।

करज पु० करे जायते जन-ड । नखे व्याघ्रनखाख्यगन्धद्रव्ये (नखी) च । कं शिरः जलं वा रुजयति रुज—णिच्—अच् नि० । (करमचा) करञ्जवृक्षे । [वृक्षे ।

करञ्ज पु० कं शिरः जलं वा रञ्जयति अच् । (करमचा) इति ख्याते

करञ्जफल पु० करञ्जस्य फलमिवाम्लं फलं यस्य । कपित्थे (कएत-बेल) । [दीप्तायां गवि स्त्री० टाप् ।

करट पु० कॄ—अटन् । गजगण्डे, काके, कुत्सिताङ्गे च । दुःखेन

करटिन् पु० करटः गजगण्डः तत इनि । हस्तिनि ।

करटु पु० कॄ—अटु । (करकटिया) इति नामके विहगे ।

करण न० कॄ—ल्युट् । क्रियानिष्पत्तौ साधात्यव्यवधानेन साधने व्याकरणोक्ते कारकभेदे, वर्णे, हेतौ, क्षेत्रे, इन्द्रिये, गात्रे च, करणं यत्तव कान्तिमत्तवेति—कुमारः । भावे ल्युट् । क्रियायाम् न० ज्योतिषोक्तेषु ववबालवादिष्वेकादशसु तिथ्यर्द्धेषु वैद्येन शूद्रायामुत्पादिते जातिभेदे च (करणकायस्थ) पु० ।

करणाधिप पु० करणानामिन्द्रियाणामधिपः । जीवे आत्मनि ।

करण्ड पु० क—अच्छन्। मधुपक्षे (मौचाक), खड्गे, कारण्डवे विहगे, वंशादिरचिते पुष्पपात्रे (डाली), वस्त्रे च (कौटा), यक्ष्मति रोगे स्त्री० टाप्।

करतल पु० ईत०। हस्तस्य तले, हस्ते च।

करताल न० तल—प्रतिशायां घञ् करे तालो यस्य। वाद्यभेदे (करताल), तद्धि करे स्थापयित्वैव वाद्यते।

करतालो स्त्री० करौ तालौ ते यत्र ताड—घञ् ईत० गौरा० ङीष् ङस्य ङः। करतलध्वनौ।

करतोया स्त्री० करस्य गौरीविवाहकाले शिवकरस्य तोयात् स्वयङ्गमशक्तिः सञ्जातं तोयं यस्याः। कामरूपदेशे स्वनामख्याताबाम् नद्याम्

करपत्र न० कराय् पतति—पत्र डुन्। (करात) क्रकचे दारुभेदके। अस्त्रभेदे। करावेव पत्रं वाहनं यत्र। जलक्रीडायाम्। तत्र हि हस्ताभ्यां परस्परसुत्तोल्य क्रीड्यते।

करपत्रवत् पु० करपत्रमिव पत्रमस्त्यस्य मतुप् तालवृक्षे।

करपर्ण पु० करः हस्त इव पर्णं यस्य। (भ्येट) भिण्डातकवृक्षे रक्तैरण्डे च।

करपल्लव पु० करस्य हस्तस्य पल्लव इव। अङ्गुलौ।

करपात्र न० कर एव पात्रं जलनिक्षेपपात्रं यत्र। हस्ताभ्यामुत्क्षिप्य परस्परजलदानक्रीड़ने। कर्म०। हस्तरूपे पात्रे।

करपाल पु० करं पालयति पाल—अण्। खड्गे। संज्ञायां कन् टाप् अत इत्त्वम्। हस्तयष्टौ। (सौंटा) स्त्री० ङीष्।

करपीड़न न० करस्य वधूकरस्य वरेण पीड़नं यत्र हस्तेन मर्द्दनं यत्र। विवाहे। (खड्गे।

करबाल पु० करस्य बालः शिशुरिव। नखे। करे बालो गतिर्यस्य।

करभ पुंस्त्व—अभच्, करे भाति भा—क वा। मणिबन्धात् कनिष्ठापर्य्यन्ते करस्य बाह्यदेशे, करिशावके, उष्ट्रशिशौ (नखी) मानगजहस्ते, उष्ट्रे च। "करभकरुकटार" मिति माघः।

करभप्रिया स्त्री० करभस्य उष्ट्रस्य प्रिया। द्राक्षाभायाम्। (आङ्गुरी)।

करभवल्लभ पु० ईत० । उष्ट्रप्रिये शोलुण्डवृक्षे, कपित्थवृक्षे च ।
करभादनी स्त्री० करभैः उष्ट्रैरद्यते अद्-कर्मणि ल्युट् टित्त्वात् ङियां ङीम् । दुरालभायाम् । (जवासपुष्पी)
करमर्द पु० करं मर्दयति मृद्-अण् । (करमचा) करञ्जवृक्षे । स्वार्थे कन् करमर्दकोऽप्यत्र । तत्फलं यैर्हि करकरुरिति तस्य तथात्वम् ।
करमर्दन पु० करं मर्दयति मृद्-ल्यु । (करमचावृक्षे) ।
करमाला स्त्री० करः करास्थुलिपर्व मालेव जपसंख्याहेतुत्वात् । "आरभ्यानामिकामध्यं दक्षिणावर्त्तयोजनः । तर्जनीमूलपर्य्यन्तं करमाला प्रकीर्त्तितेत्युक्तलक्षणायां जपसंख्यार्थं कराङ्गुलिपर्व्वरूपायां मालायाम् । [अक्षमालाभेदे ।
करमुक्त न० करेण मुच्यते मुच्-क्त । (नखरो)
करम्ब त्रि० कृ-अम्बच् । मिश्रिते । विश्रुते पु० ।
करम्बित त्रि० करम्बो मिश्रणं जातोऽस्य इतच् मिश्रिते "मधुकरनिकरकरम्बिते"ति जयदेवः । [मिश्रितमात्रे पु ।
करल पु० केन जलेन रल्यते विच्यते रल-अच् डस् च । दधि-
करवृक्ष पु० करे रोहति रुह-क । नखे । [(तरवार)
करवाल पु० करं वालयति रक्षति चु० वल-पालने अण् । खड्गे
करवीर पु० करं वीरयति चु० वीर-विक्रान्तौ अच् । रक्तपुष्पे वृक्षे, खनामख्याते वृक्षे, पुष्पधानुके, देशभेदे च ।
करवीरक पु० करवीर इव कायति-कै-क । अर्जुनवृक्षे । स्वार्थे कन् । करवीरार्थे । [(अरहर)
करवीरभूषा स्त्री० करवीरस्येव भूषा यस्याः । आढक्याम् ।
करशाखा स्त्री० करस्य शाखेव । अङ्गुलौ । [अलक्तके ।
करशीकर पु० करस्य कृत्रिमस्य शीकरः । कृत्रिमात् निर्गते ।
करशूक पु० करस्य शूकः शूकीव । नखे ।
करसूत्र न० ई त० विवाहादौ हस्ते मङ्गलार्थं बध्यमाने सूत्रे ।
करहाट पु० करं हाटयति दीपयति हट-दीप्तौ घिच्-अच् ।
पद्मादिमूले, नदनद्यादिमिश्रतीरे, देशभेदे च ।

करहाटक पु० करं हाटयति हट-दीप्तौ णिच्-ण्वुल्। मदन वृक्षे। हृत०। हस्ताभरणे सुवर्णे। [(करमूचा)।

करामर्द पु० करमाक्रन्दति आ+क्रन्द-अण् उप०। करमर्द

कराल त्रि० कृ-अप् करोत्यिनेपः तस्मै अलति पर्य्याप्नोति अल-प्रभृ-प्नो-अच्। विकटे भयानके तैलभेदे (गर्ज्जनतैल)। सर्जरस-युक्ततैले, (तैलधुना) च न०। दन्तुरे, उग्रे च त्रि०। (अनन्त-मूल) वृक्षभेदे पु०।

करास्फोट तु० करेण आस्फोटः शब्दो यत्र। वक्षस्थले सङ्कुचितकूर्पेण स्थापिते एकवाहौ इतरकरस्याघातेन शब्दकरणे (ताल्ठोका)। ३त०। वाक्यास्फोटे।

कारिक पु० क-इक। विट्खदिरे।

कारिणी स्त्री० करिन्-ङीप्। कपिलायां धेनुकायाम् देवताभेदे च।

कारिशारक पु० करिषं दृणाति छिनत्ति ड-ण्वुल्। सिंहे।

करिन् पु० करः शुण्डादण्डः अस्त्यर्थे इनि:। हस्तिनि।

करीर पु० कृ-ईरन्। घटे। वंशाङ्कुरे, छिन्नांशुवंशस्य करीरमेवेति नैषधम्। भिक्षायाम्, हस्तिदन्तमूले च स्त्री०।

करीष पु० न०। कृ-ईषन्। शुष्कगोमये। [वात्यायाम्।

करीषङ्गवा स्त्री० करीषं कषति कष-हिंसायाम् खच् मुम् च।

करुण पु० क-उन। करुणाख्ये रसभेदे करुणाख्ये वृक्षे च। "दयाशुद्धवृकरुण" इति नैषधम्। दीने, अनाथे दुःखिते, करुणावति च त्रि०। दयायां स्त्री० टाप्।

करुणविप्रलम्भ पु० करुणरसान्वितो विप्रलम्भः। अलङ्कार प्रसिद्धे शृङ्गाररसमध्ये विप्रलम्भभेदे साहि० ३ परि०।

करुणापर त्रि० करुणायां परः आसक्तः करुणा परा वा यस्य। अत्यन्तकरुणायुक्ते। [करुणामयी।

करुणामय त्रि० करुणा+प्राचुर्य्ये मयट्। प्रचुरकरुणावति स्त्रियां

करूष पु० कृ+ऊषन्। देशभेदे।

करेट पु० के जले रेटति रेट-क। (करकटिया) इति ख्याते खगे।

करेणु पु० क्र-एनु । गजे । हस्तिन्यां स्त्री० ।

करोट पु० न० के शिरसि रोटते रुट्-घञ् वा अच् । शिरोऽस्थि । इन् । करोटिरस्यस्त स्त्री० वा ङीप् ।

कर्क हासे सौत्रः भ्वा० अक० सेट् । कर्कति अकर्कीत् ।

कर्क पु० करोति क्षणोति क्षिणते वा यथावद्यं वाक्यम् क्र-क तस्य नेत्वम् । वङ्गौ, श्वेताश्वे, दर्पणे, दुग्धीरे, कर्कटवृक्षे, कर्कटके, मेषादितप्तुर्थे राशौ च । घटे पु० स्त्री० वा ङीप् ।

कर्कट पु० सौत्र-कर्क-अटन् । क्षुद्रफलके, कटफले, कर्करेटौ पक्षिणि, अजजन्तुभेदे कुक्षीरे, (काँकड़ा) मेषादितप्तुर्थे राशौ, शाल्मलीवृक्षे च । स्वार्थे कन् कर्कटकोऽप्यर्थेषु, द्रव्यभेदे च ।

कर्कटशृङ्गी स्त्री० कर्कट इव शृङ्गं यस्याः । (काँकड़ासिङ्गी) द्रव्यभेदे । स्वार्थे कन् कर्कटशृङ्गिकाप्यत्र ।

कर्कटि स्त्री० कर्कं कण्टकमटति इन् गक० । (कांकुड) प्रसारी शाल्मलीवृक्षे च । वा ङीप् अत्वार्थे, कर्कटशृङ्गाच्च ।

कर्कटु पु० सौत्र-कर्क-अटु । करेटुपक्षिणि (करकटिया) ।

कर्कन्धू स्त्री० कर्कं कण्टकं दधाति धा-कू नि० सुम् । बदर्याम् (कुल)

कर्कर पु० कर्क-हासे-अरन् । दर्पणे, चूर्णपाषाणखण्डे कङ्करे काँकर क्षुद्रे च । घञ् । कर्कं हासं राति रा-क । दृढे कठिने त्रि० ।

कर्कराङ्ग पु० कर्करं कठिनमङ्गं यस्य । खञ्जने पक्षिणि ।

कर्कराम्बुक पु० कर्करः कठोरः अतिशयितान्धकारत्वात् अम्बुः कूपः संज्ञायां कन् । अत्यन्तान्धकारवति कूपे ।

कर्करी स्त्री० कर्कं हासं राति रा-क गौरा० ङीष् । (झारी) घनाजलपात्रे, कन्दोर्धतादिपक्वनिष्काथनसाधने (झाजरा) । पात्रे च । कर्क+रा-ईक् । कर्करीकोऽप्यत्र ।

कर्करेट पु० कर्कति शब्दं रेटते भाषते रेट-भाषणे क । (कर्कटिया) द्रुते ख्याते खगे ।

कर्कश पु० करे कथति कथ-शब्दे अच् पृषो०, कर्कः काठिन्यम् अस्त्यर्थे अ कृ० चेपे विच् कर, कश-हिंसायाम् अच् कर्म० वा ।

करञ्जे (करमचा) कांसमर्द, दद्रौ, खड्गे, खरमर्दे च। कार्कशिके, क्रूरे, निर्दये, खरमर्दवति च त्रि०।

कर्कशच्छद पु० कर्कशः छदः पत्रमस्य। (सिहोडा) शाकोटवृक्षे पटोले च। कर्कशदलोऽप्यत्र। कोषातक्यां स्त्री० टाप्।

कर्कसार न० कर्कं क्षारं श्वेततां सरति गच्छति सृ-अच्। करमे (हरिमिश्रितक्षारे)। [कुष्माण्डयां स्त्री० वा ङीष्।

कर्कारु पु० कर्कं क्षारं श्वेतताम्बच्छति कृ-उण्। कुष्माण्डे।

कर्कोट पु० कर्क-ओट"। सर्पभेदे, स्वार्थे कन्। "कर्कोटको नाम सर्पो यो दष्टविष उच्यते" इत्युक्तलक्षणे सर्पे, विल्ववृक्षे, दद्रौ, (कांकरोल) ख्याते वृक्षे च। [तच्यां।

कर्कोटकी स्त्री० कर्क-ओट-संज्ञायां कन् गौरा० ङीष्। पीतघोषा-

कर्कोटी स्त्री० कर्क-ओट गौरा० ङीष्। (काकुड़) कर्कशाम् कुष्माण्डयाञ्च। स्वार्थे कन्। कर्कोटिकापत्र।

कर्चर पु० कर्च्-अर पृषो०। (कचूर) गन्धद्रव्ये, शब्दे च।

कर्ज पीड़ायाम् भ्वा० पर० सक० सेट्। कर्जति अकर्जीत्।

कर्ण भेदने अदन्त चुरादि० उभ० सक० सेट्। कर्णयति ते अच कर्णस् त। आ-अवणे आकर्णयति ते।

कर्ण पु० कृ-नन्, कर्ण-भेदने, अच्, कीर्य्यते शब्दग्रहणाय कृ-नन् वा। श्रोत्रेन्द्रिये, वरिष्ठे कविपातके, अङ्गदेशाधिपे पृथासुते सूर्य्यात्मजे, त्रिधनुषे भुजकोटिभिन्नायां तिर्य्यग्रेखायाञ्च।

कर्णकीटी स्त्री० कर्णयति भिनत्ति अच् कर्णः अल्पः कीटः अल्पार्थे ङीष् कीटी कर्म० (काणखाद) यतपद्यां।

कर्णगूथ न० ६त०। कर्णमले।

कर्णजलूका स्त्री० कर्णे जलूकेव। यतपद्यां (काणखाद) कर्णजलौकस् ह्रस्वपत्र। [लोचनेति भट्टिः।

कर्णजाह न० कर्णस्य मूलम्। कर्ण-जाह। कर्णमूले "कर्णजाहविः

कर्णधार पु० कर्णं नौकागतिनिरूपणदण्डं (हाल) धारयति धृ-णिच्-

अण् वाविके (वाद्यकारी) । [कर्णभूषणभेदे ।

कर्णपाली स्त्री० कर्णं पालयति पाल–अण् । (कानवाला) ।

कर्णपुष्प पु० कर्णे इव पुष्पं यस्य । मोरटालतायाम् ।

कर्णपूर पु० कर्णं पूरयति पूर–अण् । कर्णाभरणे, कोशीलते, शिरीषवृक्षे अशोकवृक्षे च एतेषां पुष्पैः स्त्रीकर्णस्य पूरणात् ।

कर्णपूरक पु० कर्णं पूरयति ण्वुल् । कर्णपूरार्थे ।

कर्णमल न० ६त० । कर्णस्थे मलाकारे पदार्थे (कानेर मयला) ।

कर्णवर्जित त्रि० ३त० । बधिरे (काला) श्रोत्रशून्ये । सर्पे पु० ।

कर्णवेध पु० विध–घञ् ६त० । कर्णवेधनकर्मणि संस्कारभेदे ।

कर्णवेष्ट पु० कर्णौ वेष्टयते अनेन । कुण्डले । ण्वुल्, कर्णवेष्टकोऽत्रैव । भावे ल्युट् । कर्णावरणे न० ।

कर्णशष्कुली स्त्री० कर्णस्य शष्कुलीव । कर्णगोलके, तच्छाकाकारे च "अवलम्बितकर्णशष्कुली"ति नैषधम् ।

कर्णशूल न० ६त० । कर्णरोगभेदे ।

कर्णस्फोटा स्त्री० कर्णे स्फोटो विदारणं यस्याः । (कानफाटा) लताभेदे ।

कर्णाट पु० "रामनाथं समारभ्य श्रीरङ्गान्तं किलेश्वरि ! कर्णाटदेश इत्युक्तो देशे" काव्यरीतिभेदे, स्त्री० ङीप् ।

कर्णाभरणक पु० कर्णाभरणमिव कायति पुष्पद्वारा । आरग्वधे वृक्षे । (सोन्दाल) । [कर्णचालने ।

कर्णास्फाल पु० आ+स्फुर–णिच्–स्फाजादेशः ६त० । करिणां

कर्णि पु० कर्ण–इन् । शरभेदे, कर्णकारिकायां स्त्री० वा ङीप् ।

कर्णिका स्त्री० कर्ण–ण्वुल् । करिकुम्भाग्रे, करभस्याङ्गुलौ, पीलकोशे पद्मवराटे, लेखन्याम्, कुट्टिन्याम्, अग्निमन्थवृक्षे, अजगृङ्गीवृक्षे च । कर्ण+भूषणे कन् । कर्णभूषणभेदे ।

कर्णिकार पु० कर्णिकामर्हति वह–अण् उपo । (गछियारी) वृक्षभेदे, आरग्वधवृक्षभेदे च (छोट सोन्दाल) ।

कर्णीरथ पु० कर्णः सारथ्येनास्यास्ति कर्णी स्वनः; तत्र रथे शोभा यस्य

न समासान्तः कप् च चासौ रथो रथतुल्यं वाहनं कर्म०। (ऊन्यवाहे) याने (पालकी) इत्यादौ।

कर्णीसुत पु० कर्ण्याः कंसमातुः सुतः। कंसभागिनेये।

कर्णेजप पु० कर्णे जपति जप-अच् सप्तम्या अलुक्। सूचके पिशुने, खले च। [अचकर्त्तृ त।

कर्त्त शैथिल्ये अदं० चुरा० उभ० अक० सेट्। कर्त्तयति ते

कर्त्तन न० कृतौ छेदने ल्युट्। छेदने। तृलभिन्नात् स्तूलनिष्काशनव्यापारे (काट्नाकाटा)।

कर्त्तरी स्त्री० कृत-घञ् कर्त्तं राति रा-क गौरा० ङीष्। लघास्त्रभेदे, पत्रीकृतहिरण्यादेः छेदनसाधने (कातारी), केशादिकर्त्तनसाधने (काँचि) अस्त्रे, "क्रूरमध्यगतचन्द्रो लग्नं वा क्रूरमध्यगम्। कर्त्तरी नाम योगोयम्" इति ज्योतिषोक्ते योगभेदे च।

कर्त्तृ त्रि० कृ-तृच्। कारके, व्याकरणोक्ते कारकान्तरप्रयोक्तरि क्रियाश्रये स्वतन्त्रे, तत्प्रयोजके च। चतुरानने पु०।

कर्त्तृका स्त्री० कृत-तृच् स्वार्थे संज्ञायां कन्। अस्त्रभेदे।

कर्त्त्र शैथिल्यकरणे अदं० चुरा० उभय०सक० शैथिल्ये अक० सेट्। कर्त्त्रयति ते अचकर्त्तृ त। क्त कर्त्त्रितः।

कर्त्री स्त्री० कर्त्त-अच् गौरा० ङीष्। (काटार) इति ख्याते अस्त्रभेदे। कृ-तृच् कारिकायां स्त्रियां स्त्री० ङीष्। [अकर्हीत्।

कर्द्द कुत्सितरवे उदरशब्दे च भ्वा० पर० अक० सेट्। कर्द्दति

कर्द्द पु० कर्द्द-अच्। कर्द्दमे।

कर्द्दट पु० कर्द्द-अटन्। पद्मकेशरे, पङ्के च।

कर्द्दम पु० कर्द्द-अम्। पङ्के, पापे, ब्रह्मणश्छायायामुत्पन्ने प्रजापतिभेदे। मांसे न०, पङ्कवति त्रि०। [पङ्के एव हि प्ररोहः।

कर्द्दमक पु० कर्द्दमे कायति प्रकाशते कै-क। शालिभेदे, तस्य

कर्पट पु० न० कृ-कर्म्मणि विच्-कर्-पटः कर्मः। वस्त्रके जीर्णवस्त्रे (ताताकानि), मलिनवस्त्रे च। करस्थः पटः शक०।

वर्म्मादिकार्य्यार्थं कृत्तत्वचो वल्कलखण्डे कषायरङ्गे वस्त्रे च ।

कर्पटधारिन् त्रि० कर्पटं मलिनं जीर्णं रङ्गं वा वस्त्रं धारयति णिनि । मलिनादिवस्त्रधारके भिक्षुकादौ । [कर्पटीलक्षणम् ।

कर्पटिक त्रि० कर्पट-ठन् । कर्पटवस्त्रयुक्ते भिक्षुकादौ । इनि

कर्पर पु० कृप्-अरन् लत्वाभावः । कपाले खर्परेऽग्न्यग्नि, (खापरा) यन्त्रभेदे (कात), कटाहे च ।

कर्परांग पु० कर्परस्यांगः । (खापरा) शर्करायाम् ।

कर्पराल पु० कर्परमलति अल-अण् । कन्दराले, अक्षोटवृक्षे च ।

कर्परी स्त्री० कृप-अरन् लत्वाभावः गौ० ङीष् । दारुहरिद्राकार-भेदे तुत्थे (तुंते) । [ङीप् । कर्पासीत्यपि ।

कर्पास पु० न० कृ-पास । वस्त्रयोनौ (कापास) वृक्षभेदे । जातित्वे

कर्पासफल न० ६त० । (आकाटी) कर्पासीबीजे ।

कर्पूर पु० न० कृप-ऊर लत्वाभावः । स्वनामख्याते गन्धद्रव्ये ।

कर्पूरमणि पु० कर्पूरवर्णो मणिः रत्नभेदे, कर्पूराख्यमणौ च ।

कर्पूररस पु० कर्पूर एव रसः । रसकर्पूरे ।

कर्ब्ब गतौ भ्वा० पर० सक० सेट् । कर्बति अकर्बीत् ।

कर्बूर पु० कर्ब-ऊर । राजसे, शबले च । स्वर्णे, हरितालेच न० ।

कर्मंकर पु० कर्म्म करोति कृ-ट यमे । भृत्ये त्रि० । स्त्रियां ङीष् ।

कर्मंकाण्ड पु० कर्म्मणां समूहः दृक्थादित्वात् काण्डच् । कर्मसमूहे, तत्प्रतिपादके वेदभागे च ।

कर्मंकार पु० कर्म्म+कृ-अण् । लौहकारके जातिभेदे, (कामार) वेतनं विना (वेगार) कर्म्मकारके, बाढ़के च ।

कर्मंक्षेत्र न० कर्म्मणां तद्विधानायोचितं क्षेत्रम् । भारतवर्षे ।

कर्मंठ त्रि० कर्म्मणि कुशलः कर्म्मन्+ठ । क्रियाकुशले ।

कर्मंण्य त्रि० कर्म्मणि साधुः कर्म्मन्+यत् । कर्म्मणि योग्ये, तत्र प्रवीणे च । वेतने अस्त्री० ।

कर्मंदेवता स्त्री० कर्म्मणा यागादिना देवता । यज्ञेन देवत्वं प्राप्ते

"अग्निमुखे ऽग्नमेधादि कर्म कृत्वा यद्दत्तमम् । यथाव्य देवैर्व्याः पृज्ञाद्यास्तथाः कर्मदेवता इत्युत्तरपदे देवे ।

कर्मधारय पु० व्याकरणोक्ते अभेदान्वयिना समानविभक्तिकेन पदेन घटिते समासभेदे । [कारके च ।

कर्मन् न० क—मनिन् । क्रियायाम्, व्याकरणोक्ते कर्त्तुरिप्सितरूपे

कर्मफल न० कर्मणः फलम् । कर्मविपाकजनिते सुखदुःखादौ, कामरूपफले च (कामराङ्गानेषु) ।

कर्मभू स्त्री० कर्म कर्मणादि परिकर्म, पुरुषादिकर्म वा तत्र भूः । अन्यभूमौ, आर्य्यावर्त्ते, भारतवर्षे च विहितकर्म्माण्यस्यतैव वर्षे क्रियन्ते नान्यत्र । [प्रयोते अन्ये ।

कर्ममीमांसा स्त्री०ईत० । कर्मकाण्डप्रधानवेदभागविचारस्पे जैमिनि-

कर्ममूल न० कर्मणां मूलम् । कुशलपे । तेन हि वैदिकादि सर्वं कर्म निष्पाद्यते ।

कर्मरङ्ग पु० न० कर्मणि भोजनादौ रङ्गो रतिर्यस्मात् रञ्ज—घञ् (कामराङ्गा) जम्बीरभेदे, तद्भोजने हि भोजनादौ रुचिर्भवति ।

कर्मविपाक पु० विपच्यते वि—पच—कर्मणि घञ् कर्मणो विपाकः । शुभाशुभकर्मजन्ये तत्फलभूते सुखदुःखादौ ।

कर्मव्यतिहार पु० वि—अति—हृ—घञ् । कर्मणा व्यतिहारः ईत० । परस्परैकजातीयक्रियाकरणे, क्रियाविनिमये च यथा यः कश्चित् येन कर्मणा इतरं सम्बध्नाति, इतरोऽपि तज्जातीयेनैव कर्मणा तं सम्बध्नाति, तयोः कर्मविनिमयो भवति । यथा अन्योन्यं ताडयत इत्यादौ । [दयं कर्म्मकारिणि च ।

कर्मशूर पु० कर्मणि शूरः । प्रयत्नेन प्रारब्धकर्मसमापके, आफलो-

कर्मसङ्ग पु० कर्मणि सङ्ग आसक्तिः तनुज—घञ् । इदमहं करोमि अनेनैतत् फलं भोक्ष्ये इत्याकारकेऽभिनिवेशे ।

कर्मसंन्यासिन् पु० विहितकर्म्माणि विधानेन संन्यस्यति सं+नि+अस्-णिनि । सर्वकर्मत्यागिनि यतौ ।

कर्मसाक्षिन् पु० साक्षात् पश्यति नि० साक्षी ईत० । "सूर्य्यः सोमो

अयः कालो सङ्कामतीति यङ् च । एते शुभाशुभहेतवः कर्मणो नयं कालिक्यं दत्त्वा शुभेषु सुखादिषु नयन्ति ।

कर्मसिद्धि स्त्री० ६त० । दृष्टाभिष्टफलप्राप्तौ "सकर्मसिद्धिं सुनरा-यंते" इति कुमारः ।

कर्माध्यक्ष पु० ७त० । क्रियासाक्षिणि कृताकृतावेक्षके ।

कर्मार पु० कर्म करोति कृ-अण् । कर्मकारे (कामार) जातिभेदे, वंशभेदे (वेड़वांश), कर्मरङ्गे इत्ये च ।

कर्मिष्ठ त्रि० अतिशयेन कर्मी इष्टन् इनेर्लुक् । क्रियादक्षे जने ।

कर्मेन्द्रिय न० कर्मणां क्रियाणां साधनभूतमिन्द्रियम् । हस्तपादादौ, ततो हि चलनादानादिक्रिया निष्पद्यते ।

कर्व दर्पे भ्वा० पर० अक० सेट् । कर्वति अचकर्वीत् ।

कर्वट पु० कर्व-अट । द्विशतग्रामसंमध्ये सुन्दरस्थाने, यत्र गत्वा क्रय-विक्रयादिना सन्निहितजनपदवासिनो जना जीवन्ति तादृशे ग्रामे पुरे वा नगरभाते च ।

कर्वर पु० कृणाति हिनस्ति कृ-बधे वरच् । व्याघ्रे, राक्षसे च । शृगाले स्त्री० ङीप् । [कनृ ग्वुल् । क्रौञ्चादित्वे ।

कर्वुदार पु० कर्व दर्पे उच् । तं दारयति दृ-णिच् अण् । कोविदारवृक्षे स्वार्थे

कर्वुर पु० कर्व-उर । राक्षसे, ग्रामे, नानावर्णे च तद्वति त्रि० ।

कर्ष पु० न० कृष-घञ् कर्मणि षञ् वा । षोड़शमाषके माने, तन्मिते सुवर्णे च ।

कर्षक पु० कृष-ण्वुल् । कृषीवले ।

कर्षफल पु० कर्षं तन्मानं फलमस्य । विभीतकवृक्षे, आमलक्याम् स्त्री० टाप् । [गाभेर खोड़) ।

कर्षिणी स्त्री० कृष-णिनि । क्षीरिण्यीवृक्षे, खलीवे च (अजवा-

कर्षू पु० कृष-ऊ । करीषाग्नौ (घुटियार आगुन) क्षयौ च । कुल्यायां, नदीभाते च स्त्री० । [काले इत्यर्थे ।

कर्हि अव्य० किम् काले किम्+र्हिल् आदेशः । अनद्यतने अस्मिन्

कर्हिचित् अव्य० कर्हि+चित् । कस्मिंश्चित्काले इत्यर्थे ।

कल संख्यायां सक० शब्दे अक० भ्वा० आत्म० सेट् । कलते अकलिष्ट

कल गतौ संख्यायाञ्च अद० चुरा० उभय० सक० सेट् कलयति ते अचकलत् त

कल नोदने (प्रेरणे) चुरा० उभय० सक० सेट् । कालयति ते अचीकलत् त ।

कल पु० कल-शब्दे घञ् अवृद्धिः मधुराव्यक्तशब्दे, धान्यवृक्षे च । कड मदे घञर्थे क डस्य लः । रेतसि । अजीर्णे त्रि० ।

कलकण्ठ पु० कलः कलान्वितः कण्ठोऽस्य । कोकिले हंसे, पारावते च । जातित्वे स्त्रियां ङीष् कलकण्ठी ।

कलकल पु० कलप्रकारः गुणवचनत्वात् प्रकारे द्वित्वम् । कोलाहले ।

कलघोष पु० कलो घोषो यस्य । कोकिले ।

कलङ्क पु० कलयति क्विप् कल् चासौ अङ्कश्चेति चिह्ने, अपयशसि, ताच्छील्यादिधातूनां मलभेदे (कल्काल), ताच्छील्ययोगात् अन्यादेर्विकारे च ।

कलञ्ज पु० कलेति शब्दं जञ्जति भाषते क इत्यव्यक्तानुकरणम् । जञ्ज-अच् । विषाक्ताखेटे कृते मृगे, पक्षिणि च 'न कलञ्जं भक्षयेदिति स्मृतिः । ताच्छील्ये 'कलञ्जसंवेष्टनधूमपानात् स्याद्दन्तगुद्विर्मुखरोगकृमिरिति' वैद्यके तत्सेवनात् मुखगुह्यादि वक्त्रा । 'रूपकैर्दशभिः प्रोक्तः कलञ्जो नाम तण्डुलपरिमाणे च ।

कलत्र न० गद-ष्ट्रन् गस्य कः डस्य लः । नितम्बे, भार्य्यायाञ्च ।

कलधौत न० कलः शब्दः धौतोऽस्य । स्वर्णे, रजते च । कलधुत-मध्यम ।

कलध्वनि पु० ई० । कोकिले, पारावते, मयूरे च । कर्म० । मधुराव्यक्ते शब्दे ।

कलन पु० कल-ल्युट् । वेतसवृक्षे । भावे ल्युट् । चिह्ने, दीप्ते, जल्पने एकमाधिक्यगर्भे, पक्षिणि, संख्याने, गणने वसने च, न० । "कलनात् सर्वभूतानामि"ति स्मृतिः ।

कलभ पु० कल-अभच् । मत्तवर्षीये हस्तिशावके, धुस्तूरवृक्षे च ।

कलभवल्लभ पु० ६त० गौलुट्ये । [ते रघुजि' तिरघुः]
कलम पु० कल-अम । लेखन्याम्, चौरे, धान्यभेदे च । 'कलमा इव
कलम्ब पु० कड-अम्बच् डस्य लः नालिकाशाके (कलमी), धान्ये,
कदम्बवृक्षे, शाकनाद्याञ्च । स्वार्थे कन् । कलम्बकोऽप्यत्रार्थे ।
कलम्बिका स्त्री० कलम्बो भूम्नाऽस्यस्य ठन् । कलम्बीशाके, गोवा-
स्थिनाड्यां मन्थायाञ्च ।
कलम्बी स्त्री० कड-अम्बच् डस्य लः के जले लम्बते अच् वा गौरा०
ङीष् (कलमी) जललताकभेदे । कलम्बी गोवधालिकेति स्मृतिः ।
कलरव पु० क-अप् रवः कलोरवोऽस्य । कोकिले पारावते च
कर्म० । मधुराव्यक्ते शब्दे ।
कलल पु० न० कल-कलच् । गर्भवेष्टनचर्मणि जरायौ शुक्रशोणितयोः
संसर्गे च । [श्यामे (धुना) ।
कललज पु० कललं शुक्रशोणितसंघात इव जायते जन-ड । शालनि-
कलविङ्क(ङ्क) पु० कलं वङ्क (ङ्क)ते वगि(वकि)-गतौ अच् पृषो० अत
इत्वम् । चटके खगे, इन्द्रियवे च ।
कलश पु० न० कलं शब्दं शवति शु-गतौ ड । घटे ।
कलशि स्त्री० कलं श्यति शो-डन् आलोपः । घटे । 'कलशिमुद-
धिगुर्व्वी' मिति माघः । वा ङीष् । अवलम्बितकर्त्तृभक्कुलीक-
लशीकमिति नैषधम् पृच्छिपण्यर्थाम् (चाकुलिया) ।
कलस पु० कल जलेन सहति अच् । घटे "कलसं जलसंभृतमिति
नैषधम् । आतित्वात् स्त्रियां ङीष् । द्रोणभाखे त्रि० ।
कलह पु० न० कलं हन्ति हन-ड । विवादे, युद्धे, अप्रियोक्तौ च ।
कलहंस पु० कलप्रधानो हंसः । राजहंसे, 'कलहंसः कलयांबभूव स
इति नैषधम् । कादम्बहंसे (बालहाँस), रूपोत्तमे, परमात्मनि,
वर्षाऋतौ, लघोदशाक्षरपादके छन्दोभेदे च ।
कलहान्तरिता स्त्री० "कोपात् कान्तं पराभूय पश्चात् तापान्विता
यदि । कलहान्तरिता प्रोक्ते" त्युक्तलक्षणे नायिकाभेदे ।

कला स्त्री० कल–अच् । चन्द्रमण्डलस्य षोड़शे भागे, दत्तधनस्याधिकलभ्यांशे (सुद) अवयवे, कालपरिमाणे, ज्योतिषोक्ते राशेस्त्रिंशद्भागस्य षष्टिभागे, नौकायाम्, कपटे, विभूतौ, सामर्थ्ये, संख्यायां, मरीचिपत्न्याम्, चतुःषष्टिप्रकारेषु गीतवाद्यादिषु च ।

कलाद पु० कलामंशमादत्ते आ–दा–क । स्वर्णकारे तेन हि अलङ्कारगठनार्थं दत्तधनस्यांशोऽपचीयते ।

कलादक पु० कलामत्ति कला+अद–ण्वुल् । स्वर्णकारे गठनार्थं दत्तद्रव्यांशस्य भोजनं तेन हि क्रियते ।

कलानिधि पु० कला निधीयन्तेऽत्र । कला+नि+धा–कि । चन्द्रे ।

कलानुनादिन् पु० कलमनुनदति णिनि । भ्रमरे, चटके च ।

कलान्तरं पु० अन्या कला अंशः मयू० । दृङ्निर्णये 'मासे शतस्य यदि पञ्च कलान्तरं स्यादिति लीलावती, अन्यस्यां चन्द्र कलायाञ्च, "ज्योत्स्नान्तरणीव कलान्तराणी"ति कुमारः ।

कलाप पु० कलामाप्नोति कला–व्याप–अण् । समूहे, मयूरपिच्छे, भूषणे, काञ्च्याम्, ढगे, चन्द्रे, व्याकरणभेदे यामभेदे च ।

कलापक पु० कलाप+क स्वार्थे कन् । कलापार्थे, "कस्तिक्कभवन्ते, एकवाक्यतापन्ने श्लोकचतुष्के न० कलापकं चतुर्भिः" स्यादित्यु क्तेः

कलापिन् पु० कलापोवर्होऽस्यास्ति इनि । मयूरे तद्वर्हतुल्यपक्षवति वटे च । कल+आप–णिनि । कोकिले ।

कलाभृत् पु० कलां बिभर्त्ति कला+भृ–क्विप् चन्द्रे । [स्त्री० ।

कलाय पु० कलमयते अय–अण् । (मटर) धान्यभेदे । गण्डदूर्व्यायां

कलालाप पु० कलमालपति आ+लप–अण् । भ्रमरे ।

कलावत् पु० कला+अस्त्यर्थे मतुप् मस्य वः । चन्द्रे । कलावति त्रि० ।

कलि पु० कल–इन् । विभीतकवृक्षे, विवादे, युद्धे, क्रूरे, अन्त्ययुगे च । कोरके स्त्री० वा ङीष् कली च ।

कलिक पु० कल+मत्वर्थे ठन् । वकभेदे (कोंचवक)

कलिका स्त्री० कल–इन् स्वार्थे कन् । (कलि) कोरके, वीरणमूले च ।

कलिकापूर्व न० कलिकेव अपूर्वमदृष्टं पुण्यापुण्यम् । प्रधानकर्मजन्य-

प्रधानापूर्वस्य हेतुभूतेऽवान्तरकर्म अङ्गे पुरुषादौ ।

कलिकार पु० कलिं करोति क—अण् । भूम्याटपक्षिणि, प्रतिकरङ्गे च ।

कलिकारक पु० कलिं करोति क—एवुल् । नारदे । कलहकारके त्रि० । कलिकार+स्वार्थे क । भूम्याटपक्षिणि पु० । [स्त्रियाम् ।

कलिकारी स्त्री० कलिकामिच्छति क—अण् । (विधलाङ्गलिया) लाङ्ग-

कलिङ्ग पु० कलिं गच्छति गम—खच् मुम् डित्व । प्रतिकरङ्गे धूम्याटे, कुटजवृक्षे, गिरीषवृक्षे, प्लक्षवृक्षे, "जगन्नाथात् पूर्वभागे कृष्णा-नीरान्तरं शिवे ! कलिङ्गदेशः संप्रोक्त" इत्युक्तदेशे, "उत्कलाद-र्धितपथः कलिङ्गाभिमुखो ययौ" इति रघुः इन्द्रयवे च । योषिति त्रिष्टतायाञ्च (तेउड़ि) स्त्री० ।

कलित त्रि० कल—क्त । विदिते, प्राप्ते, भेदिते, गृहीते, उक्ते । संख्याते, विचारिते, बद्धे च ।

कलिद्रुम पु० कलेराश्रयः द्रुमः । विभीतकवृक्षे तत्र हि नलस्य रा-ज्ञाश्रित्यावासप्राप्ये कलिना सुचिरं स्थितमिति भारतकथा ।

कलिन्द पु० कलिं ददाति दा ति वा खच् मुम् च । अद्रिविशेषे, यतो यमुनानदी निःसृता, विभीतकवृक्षे, सूर्य्ये च ।

कलिन्दकन्या स्त्री० ई त० । यमुनायां, कलिन्दशब्दादप्यत्व ।

कलिप्रिय पु० कलिः कलहः प्रियो यस्य । नारदे, वानरे च । ई त० विभीतके । ई ब० प्रियविवादे जने त्रि० ।

कलिल त्रि० कल—इलच् । गहने, मिश्रे च । [लाङ्गल्याम् ।

कलिहारी स्त्री० कलिं हरति हृ—अण् । (विधलाङ्गलीया)

कलुष पु० स्त्री० कल—उषच्, लप हिंसायां कस्य लश्च लुप्तो घातकः दुःखं वा । मलिने । पापे न० । तद्वति त्रि० ।

कलेवर न० कले शुक्ले वरं श्रेष्ठम् तदुत्पन्नत्वेऽपि शुचि । सप्तम्या अलुक् । देहे । [वाङ्गुलिके ।

कलोपजीविन् त्रि० कलां वृद्धिमुपजीवति उप+जीव—णिनि ।

कल्क पु० न० कल—क तस्य नेत्वम् । घृततैलादिशोधे, दम्भे, विभीतक-वृक्षे, पिष्टायाम्, तुरुष्कनामकगन्धद्रव्ये, घृततैलादिपाके देहे

ओषधिद्रव्ये च द्रव्यमात्रं शिलापिष्टं शुष्कं वा जलसिक्तम् । तदेव सूरिभिः पूर्वैः कल्क इत्यभिधीयते' इत्युक्तलक्षणे द्रव्यभेदे, श्राद्धे, पापे च । [कार्यने कलहे च ।

कल्कन न० कल्कं करोति णिच् भावे ल्युट् । दम्भे, श्राद्धे,

कल्कि पु० कलक+तत् करोतीति णिच्-इन् । "सम्बलग्राममुख्यस्य ब्राह्मणस्य महात्मनः । भवने विष्णुयशसः कल्किः प्रादुर्भविष्यती-त्युक्तलक्षणे हरेरवतारे ।

कल्किन् पु० कल्क-इनि । मत्स्यः कूर्मोवराहश्च नरसिंहश्च वामनः । रामो रामश्च रामश्च बुद्धः कल्कीच ते दशेति विष्णोरवतारभेदे ।

कल्प पु० क्लप-अच् घञ् वा । यज्ञक्रियाणामुपदेशके, शिक्षाकल्पव्या-करणादीनामन्यतमे वेदाङ्गभेदे, बौधायनादिकृते अनुष्ठेयकर्मवि-धाने, स्मृत्यात्मके कर्मपद्धतिग्रन्थे, ब्रह्मादिने, प्रलये, विकल्पे, कल्प-वृक्षे, न्याये च । उत्तरपदस्थः सादृश्ये कल्पप् । यथा पित्त-कल्पः गुरुकल्पः ।

कल्पक पु० क्लप-णिच् ण्वुल् । नापिते । छेदके, कल्पनाकारके त्रि० ।

कल्पतरु पु० कल्पते फलदानाय अच् कर्म० । कल्पवृक्षे । [च ।

कल्पन न० क्लृ-भावे ल्युट् । क्लृप्तौ, छेदने, न्यायोक्ते अनुमिति भेदे

कल्पना स्त्री० क्लप-णिच्-युच् । पल्ययनादिना करिणां सज्जीकरणे, न्यायोक्ते अनुमितिभेदे, रचनायाञ्च ।

कल्पान्त पु० ७त० । प्रलये ।

कल्मष पु० कर्म शुभकर्म स्यति सो-क-पृषो०षत्वं रस्य लत्वञ्च । नरकभेदे । पापे न० । तद्वति, मलिने च त्रि० ।

कल्माष पु० कलयति कल-क्विप् तं माषयति अभिभवति अण् । माषः उप० । राक्षसे चित्रवर्णे, कृष्णवर्णे, कृष्णपाण्डुरवर्णे च । तद्वति त्रि० स्त्रियां ङीप् ।

कल्माषकण्ठ पु० कल्माषः कण्ठो यस्य । शिवे तस्य स्वयं श्वेतत्वात् विषयोगेन कृष्णत्वात् कृष्णपाण्डुरता ।

कल्य न० कल-यत्, कलाय साधु कला+यत् वा । प्रभाते, मद्यनि

ज्योतिषोक्ते लग्ने च। प्राक्स्फुतिवर्त्तिते सञ्जीभूते, वीतरोगे, दक्षे कल्याणे च जने त्रि०।

कल्यजग्धि स्त्री० अद्–क्तिन् कल्ये प्रातर्जग्धिः। प्रातर्भोजने उप-चारात् तत्कालभक्ष्ये।

कल्याण न०। कल्ये प्रातः अयते शब्द्यते अण् घञ्। हेम्नि, मङ्गले च। शुभयुक्ते त्रि०। स्त्रियां गौरा० ङीष्।

कल्यानकृत् त्रि० कल्याणं शुभं शास्त्रविहितं करोति कृ–क्विप्। शास्त्रविहितकर्मकारके "न हि कल्याणकृत् कश्चि"दिति गीता।

कल्याणिका स्त्री० कल्याण+अस्त्यर्थे ठन्। मनःशिलायाम्।

कल्ल कूजने अशब्दे च भ्वा०आ०अक० सेट्। कल्लते अकल्लिष्ट।

कल्ल त्रि० कल्ल–अच्। बधिरे श्रवणेन्द्रियशून्ये।

कल्लोल पु० कल्ल–ओलच्, कमु जलं लोलं चपलं यस्मादत्र पृषो० अनुस्वारस्य लत्वम्। महातरङ्गे, हर्षे च। वैरिणि त्रि०।

कव स्तुतौ वर्णने च भ्वा०आत्म०सक०सेट्। कवते अकविष्ट।

कवक पु० कु–अप् संज्ञायां कन्। व्याघ्रे, भूच्छत्राके, पलाण्डु, कवकानिचेति स्मृतिः।

कवच पु० कं वातं वञ्चयति वन्च–क। गर्हाभाण्डे हृदे, षट्छदवृक्षे च। वर्म्मणि, तन्त्रोक्ते पूजादौ प्राये भूर्जपत्रे लिखित्वा धार्य्ये च देवतामन्त्रन्यासयुक्ते वाक्यस्तोमे पु०न०।

कवर पु०न० कु–अरन्। अश्वे, लवणे, केशपाशे च। खचिते, संवृते, शबले च त्रि०। वर्वरायां स्त्री० टाप्। कं शिरो वृणोति आच्छादयति क+वृ–अच् गौरा०ङीष्। केशविन्यासे केशवेषे, काकोल्यां क्षिङ्गुधाके वर्वरायाञ्च स्त्री०।

कवर्ग पु० कथटितो वर्गः सजातिसंघः। कादिषु पञ्चसु वर्णेषु। एवं चवर्गादयः। [एवं चवर्ग्य चवर्गीयादयः।

कवर्गीय पु० कवर्गे भवः छ। कवर्गसध्यभवे वर्णे। यत्। कवर्ग्यः

कवल पु० कं वलते वल–अच्। व्याघ्रे, (ग्रेलमाछ) महत्यग्रे च।

कवलित त्रि० कवलं ग्रासं करोति णिच्–क्त। भुक्ते, व्याप्ते च।

कवाट न० कं वातं वटति वट–णेऽने अण् । द्वाररोधके काष्ठखण्डे जुड़ेऽर्थे ङीप् । कपाटी ।

कवि पु० कु–इ । शुक्रे, वाल्मीकिमुनौ, भास्करे काव्यकर्त्तरि, ब्रह्मणि च । अतीतानागतसर्वज्ञे सङ्ख्यार्थदर्शिनि पण्डिते च त्रि० । स्त्रीत्वे स्त्री० वा ङीष् कवी ।

कविक न० कु–इ संज्ञायां कन् । खलीने यत्र लौहमयं घोटकमुखाभ्यन्तरे प्रग्रहयोजनार्थं दीयते तस्मिन् ।

कविका स्त्री० कु–इ संज्ञायां कन् । खलीने, मत्स्याभेदे च (कई) ।

कविज्येष्ठ पु० कविषु ज्येष्ठः । वाल्मीकिमुनौ ।

कविता स्त्री० कवेः कर्म्म भावो वा तल् । कविकृते काव्ये "भवति कविता कामिनीम्" इति प्रसङ्गराघवम् । [त्रि० ।

कवीर्ण न० ईषदुष्णम् कोः कवादेशः । ईषदुष्णे स्वर्णे ।

कव्य न० कु–यत् । पितृदेहेन दत्ते ऽन्नादौ । [पितृगणभेदे ।

कव्यवाल पु० कव्यं पितृदेहकं द्रव्यं वालयति चु० वल–ण्वुल् ।

कष गत्यर्थे भ्वा० अक० पर० सेट् । कषति अकषीत् अकाषीत् ।

कषा स्त्री० कष–अच् । अश्वादेस्ताडनार्थे ताड़नसाधने पदार्थे, (कोड़ा, चाबुक) ।

कषार्ह त्रि० कषामर्हति अर्ह–अच् । कषया ताड्ये अदान्ते ऽश्वादौ ।

कषिपु पु० कष–कु नि० । भक्षे, वस्त्रे च । सम्पदितयोर्भोज्यवस्त्रयोः, यथायाञ्च "सत्यां क्षितौ किं कषिपोः प्रयासैः" इति प्रयोगात् ।

कषेरु पु० न० कं शृणाति शृ–हिंसायां उ एरङादेशः । पृष्ठास्थनि, जलजे मूलभेदे च (केशुर) । स्वार्थे कन् । अल्पार्थे ।

कषेरुक स्त्री० कषेरु+अप्राणिजातिवाचकत्वात् ङीष् । जलकन्दे (केशुर) ।

कष्मल न० कष–कलच् षुट् च । मूर्च्छायां, मोहे, पापे च । मलिनेत्रि० ।

कष्मीर पु० कष–ईरन् षुटच् च । काश्मीराख्ये देशे ।

कष्मीरज पु० कष्मीरे जायते जन–ड । कुङ्कुमे कश्मीरजन्माद्यत्व ।

कष्य न० कष–यत् । अक्षमध्यभागे, मद्यभेदे च । कषामर्हति कषा+यत् । कषार्हे अदान्ते ऽश्वादौ ।

कश्यप पु० कश्यं मद्यं पिबति पा–क ब्रह्मवचनयो योऽभूत् मरीचिरिति विश्रुतः । कश्यपस्य सुतोऽभूत् कश्यपात्तु स कश्यप इति निरुक्ते मुनिभेदे, नृगभेदे, मत्स्यभेदे च ।

कष बधे भ्वा० पर० सक० सेट् । कषति । अकर्षीत् अकाषीत् ।

कष न० कष–अच् । (कटी) पाषाणभेदे, "कषपाषाणनिभे नभस्तले" इति नैषधम् । [कष्ड्यूने च न० ।

कषण पु० कष–ल्यु । अपक्के (काँचा) । भावे ल्युट् । घर्षणे,

कषाय पु० कषति कण्ठम् कष–आय । श्लेष्मातकवृक्षे, रागे, अलंकरणदोषे, "कषाये कर्मभिः पक्के ततो ज्ञानं प्रजायते" इति वेदान्तपरिभाषायाम् । धववृक्षे (धगाछ), रसभेदे (कषा), रक्तपीतमिश्रितवर्णे च । तद्वति त्रि० । का० ङीप् । क्षुद्रदुरालभायां स्त्री० ।

कषायित त्रि० कषायो रक्तपीतवर्णोजातोऽस्य इतच् । जातकषाये "अम्बुनैव कषायितस्तनी"ति कुमारः ।

कषायिन् पु० कषाय+इनि । सालवृक्षे, लकुचवृक्षे, खर्जूरीवृक्षे च । विषयरागवति त्रि० ।

कष्ट न० कष–क्त कष्छ्रगहनयोः कषतीति नेट् । पीड़ायाम् व्यथायाम्, पीड़ायुक्ते । गहने च त्रि० ।

कस गतौ भ्वा० पर० सक० सेट् । कसति अकसीत् अकासीत् ।

कस्ग शातने गतौ च अदा० इदित् आत्म० सक० सेट् । कंस्ते अकंसिष्ट ।

सक शातने गतौ च सक० अदा० आत्म० सेट् । कस्ते अकसिष्ट ।

कासनोत्पाटन पु० कासनं कासरोगम् उत्पाटयति ल्यु । वासकवृक्षे, "वासकः कासनाशक" इति वैद्यकोक्तेः ।

कसेरु पु० कस-उ एकस्यागमः । कशेरौ, शूकरस्य प्रिये जलकन्दभेदे च ।

कस्तीर पु० न० कं जलं तीरयति अच् नि० हुट् । रङ्गे (राङ्)धातौ ।

कस्तूरिका स्त्री० कस–करन् हुट् च गौरा० ङीष् कस्तूरी स्वार्थे क हस्वे अत इत्वम् । मृगभेदे । पृषो० जतः हस्वे कस्तुरिकाप्यत्र ।

काकस्तूरी स्त्री० कसति गन्धोऽस्याः कस–ऊरच् तुट् च गौरा० ङीष् । कृष्णागरुजाते गन्धद्रव्ये ।

काङ्गार न० कं जले ङादते ङाद–घञ् पृषो० दस्य रः । श्वेतोत्पले ।

कांस्य न० कंसेन निष्पादितम् कंस–ञ्य । वाद्यभेदे, पानपात्रे च । स्वार्थे ष्यञ् । ताम्ररङ्गमिश्रिते उपधातौ, "उपधातुर्भवेत्कांस्यं द्वयोस्तारारिरङ्गयोरित्युक्तेः । स्वार्थे कन् । उक्तार्थे ।

कांस्यकार पु० कांस्य+ऊ–घञ् उप० । (काँसारि) जातिभेदे ।

काक पु० कै–शब्दे कन् तस्य नेच्चम् । स्वनामख्याते पक्षिणि । खञ्जे, अक्षे तिलके च ।

काककला स्त्री० काकस्य कला अवयवो जङ्घेवावयवो यस्याः काकज–ङ्गावृत्ते ।

काकघ्नी स्त्री० काकं हन्ति ट । महाकरञ्जे, तत्फलसेवने हि काकस्य नाशः ।

काकचिञ्चा स्त्री० काकवर्णा चिञ्चा मध्यभागः अर्शे यस्याः । गुञ्जायाम् । पृषो० । काकचिञ्चि, काकचिञ्ची, काकचिञ्चाप्यत्र ।

काकच्छद पु० काकस्य छदः पक्ष इव छदो यस्य । खड्गनखगे ।

काकजङ्घा स्त्री० काकस्य जङ्घेवावयवो यस्याः । स्वनामख्याते वृक्षभेदे (केओयाठेङ्गा) ।

काकजम्बु स्त्री० काकवर्णा जम्बुः । भूमिजम्ब्वाम् ।

काकतालीय स्त्री० काकगमनसमये तालपतनमतर्कितहेतुकं तदिव छ । अतितर्कितसम्बन्धे यादृच्छिकागतौ ।

काकतिक्ता स्त्री० काकस्यापि तिक्ता । गुञ्जायाम् ।

काकतिन्दुक पु० काकवर्णः तिन्दुकः । काकमोलुके (कुचला) ।

काकनासा स्त्री० काकस्य नासेव फलमस्याः । काकजङ्घायाम् (केओठेङ्गा) काकनासाप्यत्र ।

काकपक्ष पु० काकस्य पक्ष इव । मस्तकपार्श्वद्वयस्थे "बालानां तु शिखा ज्ञेया काकपक्ष" इत्युक्ते केशरचनाभेदे (काणपाटा) ।

काकपद न० काकस्य पदमिव । लिपौ पतितवर्णस्य उपरिलेखने

तत्स्थानसूचनार्थं व्यङ्गे काकपदाकारे चिह्ने । शीर्षस्थे काकपदाकारे केशगुच्छे च (शिखा) ।

काकपर्णी पु० काकवर्णं पर्णमस्याः । क्षुद्रपर्ण्याम् ।

काकपीलु पु० काकप्रियः पीलुः शाक० । (कुचला) काकतिन्दुके ।

काकपीलुक पु० काकानां पीलुरिव । (कुचला) काकतिन्दुके ।

काकपुष्ट पु० काकेन पुष्टः । कोकिले, कोकिलया हि काकनीडात् पायसडिम्बमपनीय तत्स्थाने स्वडिम्बं स्थाप्यते काक्या च स्वडिम्बबुद्ध्या तत् परिपाल्यते इति प्रसिद्धम् ।

काकपुष्प पु० काकवर्णं पुष्पमस्य । मध्यिपर्णे वृक्षे ।

काकभीरु पु० काकात् भीरुः । पेचके ।

काकमाची पु० काकान् मञ्चते मचि–अण् मलोपः । कट्फलतायाम् । (गुड़काकाड़) । [क्षुद्रपर्ण्याम् । (सुगामी) ।

काकमुद्गा स्त्री० मुदं गच्छति मुद्–गम्–ड काका मुद्गा यस्याः ५ब० ।

काकरुहा स्त्री० काकवत् रोहति अन्तरीक्षे मूलमूर्ध्वमया जायते । (परगाछा) वन्दावृक्षे ।

काकलक पु० कुत्सितं कलं कायति कै–क । ग्रीवायामुन्नतदेशे ।

काकली स्त्री० कल–इ ईषत् कलिः कादेशः वा ङीप् । वृक्षे मधुरशब्दे ।

काकलीरव पु० काकली मधुराव्यक्तो रवो यस्य । कोकिले ।

काका स्त्री० काकः काकवर्णो विद्यतेऽस्याः अर्श आद्यच् । काकोल्यां, काकनासायाम् काकमाच्याञ्च ।

काकाक्षिगोलकन्याय पु० काकस्य एकं चक्षुर्यथा उभयगोलके पर्य्यायेण चक्षुःकार्य्यकारकमेवमेकस्योभयसंबन्धे दृष्टान्ते ।

काकाङ्घ्री स्त्री० काकस्याङ्घ्रिरिव फलमस्याः । काकनासायाम् ।

काकाण्ड पु० काकस्याण्डमिव फलं यस्याः । महानिम्बे । कोलश्रियाम् स्त्री० टाप् । महाज्योतिष्मत्यां च ङीप् ।

काकादनी स्त्री० काकैरद्यतेऽसौ काक+अद–ल्युट् । गुञ्जायाम् ।

काकाल पु० काकं काकेतिरवं लाति ला–क । द्रोणकाके ।

काकिणी स्त्री० कक–लौल्ये घञ् तस्य अणति अण् पृषो० । (बुड़ि) मध्यचतुर्थांशे "वाराटकानां दशकद्वयं तत् सा काकिणी" लीलावती । काकिनीत्यप्यत्र ।

काकी स्त्री० काकस्य जातित्वात् स्त्रियां ङीप् । काकयोषिति काकवर्णत्वात् वायतीलतायाम् ।

काकु स्त्री० कक–उण् । शोकभीत्यादिभिर्ध्वनेर्विकारे, व्यङ्ग्यार्थप्रतिपादे विरुद्धार्थकल्पके नञादौ शब्दे च । [सूर्यवंश्ये नृपे ।

काकुत्स्थ पु० काकुत्स्थः सूर्यवंश्यीयः नृपभेदस्तस्यापत्यम् अण् ।

काकुद न० काकुं ध्वनिभेदं ददाति धत्ते दा–क, काकस्योदनेऽस्मिन् घञर्थे क वा शक० । तालुनि जिह्वेन्द्रियाधिष्ठानस्थाने (तालुया) ।

काकेन्द्र पु० काकवर्षस्येन्द्रः पृषो० । (कुचला) वृक्षभेदे ।

काकेष्ट पु० काकानामिष्टः । निम्बे तस्य हि फलं काकानामिष्टम् ।

काकोदर पु० कुत्सितमकति अक–अच् कोः कादेशः काकमीषदुदरं यस्य । सर्पे । [कन् । (यज्ञडुमर) वृक्षभेदे ।

काकोड़ु, (दु) म्बरिका स्त्री० काकप्रिया उडु (कु) म्बरी संज्ञायाम्

काकोल पु० कक–लौल्ये स्वार्थे णिच्–अच् । द्रोणकाके, सर्पे, शूकरभेदे च । नरकभेदे, विषभेदेच पु० न० । वायसाम्, अश्वगन्धायाञ्च स्त्री० । [ङीप् अकाङ्क्षिद्वेषे ।

काङ्क्ष वाञ्छायाम् भ्वा० उभ० कुटित् सक० सेट् । काङ्क्षति अकाङ्क्षीत् ।

काच त्रि० ईषत् कुत्सितमञ्चि यस्य कोः कादेशः । कुत्सिताङ्गे जने, ईषद्दर्शने कटाक्षे न० ।

काची स्त्री० कञ्चे भवा अण् ङीप् । तुवरिकायाम् (अरहर) ।

काचीव पु० ईषत् चीयत्यस्मात् चीव–घञ् कादेशः शोभाकुनद्यके (सज्जना)

काञ्चा स्त्री० काञ्चि–अ । दृक्छायाम् ।

काञ्चा स्त्री० कुत्सितमञ्चमस्याः कादेशः टाप् । वचायाम् ।

काच पु० कच्यतेऽनेन कच–बन्धने दीप्तौ च घञ् । शिक्ये, (सिका)

मणिभेदे, कस्तिकाभेदे क्षारे, (काच्) शिक्यके च (भोज) ।

काचन न० काचयति बध्नाति अनेन काच—स्वार्थे णिच्—ल्युट् । पत्र-बन्धनद्रव्ये लाक्षादौ । काचिदित्यर्थे अव्य० ।

काचलवण न० काचस्य लवणम् । काचोत्पादनसाधने लवणे, (सोरा) क्षारलवणे (कालालोण) ।

काचसीवर्चल न० ६त० । काचकस्तिकासम्भवे लवणे ।

काचस्थाली स्त्री० काचस्य स्थालीव (मारुलगाछ) । वृक्षभेदे, काचमयपात्रे च ।

काचाक्ष पु० काच इवाक्षि यस्य । कपर्दके काचे वृक्षफले ।

काचित त्रि० काचे शिक्ये चितं धृतं पृषो० । शिक्यधृते पदार्थे ।

काञ्चन पु० काचि—टीप्नौ ल्यु । स्वनामख्याते वृक्षे, चम्पके, नागके-शरे, उदुम्बरे, धुस्तूरे च । स्वर्णे, पद्मकेशरे, काञ्चनादिपुष्पे टीप्नौ च न० ।

काञ्चनक पु० काञ्चनमिव कायति प्रकाशते कै—क । पक्षिभेदे, कोवि-दारवृक्षे च । हरितालेन० । [(चापाकला) ।

काञ्चनदली स्त्री० काञ्चनमिव दलं यस्याः । स्वर्णकदल्याम् ।

काञ्चनक्षीरी स्त्री० काञ्चनमिव क्षीरं यस्याः गौरा० ङीष् । स्वर्णि-क्षीरतायाम् । [(गर्जियारी) ।

काञ्चनपुष्पी स्त्री० काञ्चनमिव पुष्पमस्याः । गर्जिकारीवृक्षे,

काञ्चनार पु० काञ्चनं दीप्तिमत्त्वमस्ति—अर्श० । काञ्चनवृक्षे ।

काञ्चनाल पु० काञ्चनाय दीप्तये अलति पर्य्याप्नोति अल—अच् कोविदारवृक्षे । [हरिद्रायां, गोरचनायाम्, स्वर्णक्षीरीवृक्षे च ॥

काञ्चनी स्त्री० काञ्चनेऽनया काचि—टीप्नौ करणे ल्युट् ङीप् ।

काञ्चि(ञ्ची) स्त्री० काचि—इन् वा ङीप् । स्त्रीकटिभूषणभेदे, (चन्द्र-हार गोट) "एकयष्टिर्भवेत् काञ्ची मेखला सप्तयष्टिका । नवयः षोड़श त्रेय" इत्युक्तलक्षणे यष्टौ, शुक्लायाम् "अयोध्या मथुरा माया काशी काञ्ची अवन्तिके" ति पुरीभेदे च ।

काञ्ची(ञ्चि)पद न० ६त० । जघने ।

काञ्जिक न० अम्लरस-भावर्थणिदेये युन् कुत्सितो अञ्जिको यस्मिंस्तत् । आरनाले (कांजी) ।

काण पु० कण-निमीलने घञ् । काके । एकचक्षुर्युक्ते त्रि० ।

काण्ड पु० न० कण-भावे ड तस्य नेत्वम् दीर्घः । जन्मनि, दलादि-गुच्छे, वृक्षस्कन्धे, (गुड़ी) बाणे, अवसरे, प्रस्तरे, नाडीवृन्दे, नाले, वस्तुपरिच्छेदांशके ग्रन्थप्रकरणे निर्ज्जनस्थाने च । अम्लोट-वृक्षे पु० । [(करेला) ।

काण्डकटुक पु० काण्डे स्तम्बेऽपि कटुकश्चिह्नः । कारवेल्ले,

काण्डकीलक पु० काण्डे कीलमिव यस्य कप् समा० । लोध्रे, तस्मिन् कीटसंबन्धात् हि कीलमिव सर्वत्र जायते ।

काण्डतिक्त पु० काण्डे तिक्तः भू निम्बे (चिरायता) ।

काण्डपट पु० काण्ड इव पटः । (कानात) पटभेदे, यस्य संकोचे काण्डरूपता भवति ।

काण्डपृष्ठ त्रि० काण्डानि पृष्ठे यस्य । यस्त्राजीवे । "स्वकुलं पृष्ठतः कृत्वा यो वै परकुलं व्रजेत् । तेन दुश्चरितेनासौ काण्डपृष्ठ इति स्मृत" इत्युक्तलक्षणे जने पु० ।

काण्डरुहा स्त्रि० काण्डात् प्ररोहति । कटुक्याम् (कटकी) ।

काण्डीर त्रि० काण्डो बाणोऽस्यास्ति ईर । (तीरन्दाज) बाणधरे । अपामार्गे न० । मञ्जिष्ठायां कारवेल्लप्रायाञ्च स्त्री० ङीष् वा ।

काण्डेक्षु पु० काण्डेन स्तम्बेन इक्षुरिव । (तालमाखना) तृणभेदे ।

काण्व पु० कण्वेनाधीतः अण् । यजुर्वेदीयशाखाभेदे । अपत्यार्थेऽण् । कण्वपुत्रादौ त्रि० ।

कातर त्रि० ऐपत्तरति स्वकार्यं कर्त्तुं शक्नोति कु+तृ अच् को: का-देशः । अधीरे, व्यसनाकुले, भीते, विषण्णे, चञ्चले च । तदध्या-सितकातराक्षीतौ रघुः के जले आतरति श्रूयते न तु विशेषतो मज्जति उड्डुपे ।

कातरण न० कुत्सितं तरणं कादेशः । कुत्सिततरणे ।

कात्यायन पु० कत्यस्यापत्यं फक् मुनिभेदे । स च धर्मशास्त्र कर्त्ता ।

वररुचि नाम्ना व्याकरणवार्त्तिककर्त्रा च ।

कात्यायनी स्त्री० कत्यस्यापत्यं स्त्री०फञ् । दुर्गायां सांख्यि कल्पान्तरे कत्यस्यापत्यमासीत् । अर्द्धवयस्कायां कामावस्थायां विधवायाञ्च ।

कादम्ब पु० कद–णिच्–अम्बच् । (बालहँस) कलहंसे, काणे, द्रुमे च । कदम्बे भवः अण् । कादम्बमत्र त्रि० ।

कादम्बर न० कादम्बं राति लाति प्रकृतित्वेन रा–क । ऐक्षवे गुडादौ, तस्य विकारे मद्ये च । कादम्बं कदम्बोद्भवं रसं राति रा–क । तत्तुल्यरसत्वात् दधिसरे पु० ।

कादम्बरी स्त्री०कृत्सितं मलिनमम्बरं यस्या: को: कादेशः कदम्बरो बलभद्रस्तस्य प्रिया अण् । हलिप्रियायाम् मदिरायाम् । कादम्बं रसं राति रा–क गौरा० ङीष् कोकिलायाम्, सरस्वत्याम्, शारिकायाञ्च ।

कादम्बिनी स्त्री० कादम्बाः कलहंसा वलाका वा अनुधावकत्वेन सन्त्यस्याः इनि । मेघमालायाम् । [कालभवे ।

कादाचित्क त्रि० कदाचिद् भवः कालार्थत्वात् ठञ् । कदाचित्-

कादृवेय पु० कद्रूः अपत्यम् ढक् । नराकारे फणालाङ्गूलवति देवयोनिभेदे नागे, सर्पे च । [सुखे च ।

कानन न० चु० कन–दीप्तौ ल्युट् युच् वा । वने, गृहे, ब्रह्मणो

काननाग्नि पु० ६त० । श्रमीद्रुमे, तज्जातवह्निना हि वनदाहः ।

कानीन पु० कन्याया अनूढाया अपत्यम् अण् कनीनादेशश्च । "कानीनः कन्यकाजातो माताभ्रहसुतो मत" इति स्मृत्युक्ते पुत्रभेदे । यथा व्यासः कर्णश्च ।

कान्त पु० कम–क्त, कम–क्त वा । पत्यौ, लौहे, सूर्य्यपूर्वकः सूर्य्यकान्तशिलायाम्, चन्द्रपूर्वकः चन्द्रकान्तमणौ, वसन्ते, हिज्जलद्रुमे च । कस्य ब्रह्मणोऽन्तो यस्मात् । वासुदेवे । कुङ्कुमे लौहभेदे न० । मनोरमे, शोभने, अभीष्टे च त्रि० । नार्य्यां, प्रियङ्गुवृक्षे च स्त्री० ।

कान्तपुष्प पु० कान्तं पुष्पमस्य । कोविदारवृक्षे ।

कान्तलक पु० कान्तं लकति लक—आस्वादने अच् । (तुंद) वृक्षे वृक्षे ।

कान्तलौह पु० कान्तो लौहो यस्य । अयस्कान्ते । कर्म० । (कान्तिलौह) लौहसारे । [पुष्पोद्गमौषधं यस्य । अशोकवृक्षे ।

कान्ताङ्घ्रिदोहद पु० कान्ताङ्घ्रेः नारीपादस्पर्शः दोहदं

कान्तायसम् न० कान्तमयः अच् समा० । (कान्तिलौह) लौहसारे । ङीप् । अयस्कान्ते मणौ ।

कान्तार पु० कस्य जलस्य सुखस्य अन्तस्तं कान्तं मनोहरं वा कृच्छति कृ—अण् । कोविदारवृक्षे, इक्षुभेदे उपद्रवे, कानने, पद्मभेदे, महारण्ये, दुर्गमवर्त्मनि, गर्त्ते च ।

कान्तारक पु० कान्तं वनकृच्छति कृ—ण्वुल् (काजला) इक्षुभेदे ।

कान्ति स्त्री० कम—क्तिन् । शोभायां, दीप्तौ, अभिलाषे च ।

कान्तिदा स्त्री० कान्ति+दा—क । सोमराजीलतायाम् कान्तिप्रदे त्रि० ।

कान्तिदायक न० कान्ति-दा-ण्वुल् । कालीयकवृक्षे । कान्तिप्रदे त्रि० ।

कान्दव न० कन्दौ भर्ज्जनपात्रे संस्कृतम् अण् । (मिठाइ) पक्वान्ने भक्ष्यभेदे ।

कान्दविक त्रि० कान्दवं पण्यमस्य ठक् । अपूपकारिणि तदुपजीविनि (मेठाइकर) । [पलायिते ।

कान्दिशभूत त्रि० कां दिशं यामीत्युक्तिं भूतः प्राप्तः षष्ठी० । भीत्या

कान्दिशीक त्रि० कां दिशं यामीत्याह ठक् षष्ठी० । भीत्या पलायिते ।

कान्यकुब्ज न० कन्याः कुब्जा यत्र कन्याकुब्ज+स्वार्थेऽण् षष्ठी० । देशभेदे, विप्रभेदे च (कनौज) । [च । क्षत्रभेदे पु० ।

कापटिक त्रि० कपटेन चरति ठक् । कपटव्यवहारिणि धूर्त्ते, परसमक्षे

कापथ पु० कुत्सितः पन्थाः अच् समा० कादेशः । निन्द्ये वर्त्मनि ।

कापालिक पु० कपालेन मस्तककर्परेण व्यवहरति भोजनपानादिकं करोति ठक् । खनामख्याते वर्णे, कुलाचारिभेदे च ।

कापिल पु० कपिलेन प्रोक्तमधीतेऽण् । सांख्यशास्त्रज्ञे, मिश्रलवणे च । तद्वति त्रि० ।

कापिश्य न० कपिशवर्णोऽस्यस्य प्रज्ञाद्यण्। मद्यभेदे।

कापिशायनी स्त्री० कापिशस्य मद्यभेदस्यायनम् स्थानं अण्-ङीप्। द्राक्षालतायाम्।

कापुरुष पु० कुत्सितः पुरुषः कोः कादेशः। निन्दितपुरुषे।

कापोत न० कपोतानां समूहः अण्। पारावतसमूहे। कपोतवर्णत्वात् कपोतस्येदम् अण्। सौवीराञ्जने, सर्जिकाक्षारे च।

कापोताञ्जन न० कापोतं च तदञ्जनं चेति कर्म०। सौवीराञ्जने।

काफल पु० कुत्सितं फलमस्य। (कट्फल) वृक्षभेदे।

काम न० कम-घञ्। शुक्रे, दृष्टानतिक्रमे, निष्कामे च। कम-घञ्। काम्ये, अनुमतौ, इच्छायामभीष्टविषयाभिलाषे, "पुंसो या विषयापेक्षा स काम इति भण्यते" त्युक्तलक्षणे विषयापेक्षणे कन्दर्पे च पु०।

कामकला स्त्री० कामस्य कला प्रिया। कलाहेतुत्वात् कामपत्न्याम् रतौ।

कामकार त्रि० कामं काम्यं करोति अण्। कामतः प्रवृत्तौ।

कामकेलि पु० कामे रतौ केलिर्यस्य। जारे। कर्म०। सुरते।

कामगामिन् त्रि० कामं गच्छति गम-णिनि। यथेष्टाचरणशीले। वृद्धौ० सुम्। कामं गामीत्यपत्र।

कामचार पु० कामेन स्वेच्छया चर+घञ् चारः।

कामद त्रि० कामान् ददाति दा-क। अभीष्टदायके, वनभेदे च।

कामदुघा स्त्री० कामं दोग्धि दुह-क घादेशः। अभीष्टसम्पादयित्र्याम् सुरभौ गवि।

कामदुह् स्त्री० कामं दोग्धि दुह-क्विप्। सुरभौ गवि।

कामधेनु स्त्री० कामस्य अभीष्टस्य दोहनस्य हेतुर्धेनुः। सुरभौ गवि।

कामध्वंसिन् पु० कामं ध्वंसयति ध्वंस-णिच्-णिनि। शिवे।

कामपाल पु० कामान् पालयति पाल-रक्षणे-अण्। बलभद्रे।

कामम् अव्य० कम-णिङ्-अम्। अनुमतौ, प्रकामे, पर्याप्ते, असूयायाम्, अनुमतौ, अकामानुमतौ, स्वच्छन्दार्थे, अनिष्टागत्वा-

स्वीकारे च । [रूपे, सुन्दररूपे च त्रि० ।

कामरूप पु० खनामख्याते देशभेदे । कामोरूपं यस्य । स्वेच्छा-

कामरूपिन् पु० कामतो रूपं यस्य इनि । विद्याधरे । मनोज्ञरूपवति, स्वेच्छारूपधारिणि च त्रि० ।

कामल पु० कामेन लक्षति लक्ष—ड । वसन्तकाले । मत्वर्थे लच् । कामयुक्ते त्रि० । कामं कान्तिं लुनाति लू—ड । रोगभेदे (कांग्रोल) पु० स्त्री० स्त्रियां टाप् ।

कामवल्लभ पु० ६त० । आम्रवृक्षे तन्मुकुलं हि कन्दर्पप्रियम् ।

कामवृन्ता स्त्री० कामतो वृन्तं यस्याः । पाटलायाम् । [(परगाछा) ।

कामवृक्ष पु० कामेन बीजाङ्कुरनिरपेक्षतया यथेच्छं वृक्षः । पन्द्राके

कामशर पु० कामस्य शर इव सुकुलवत्त्वेन । आम्रवृक्षे ।

कामसख पु० ६त० । कामस्य सखा+टच् समा० । वसन्तकाले, तद्दीपके चन्द्रे च । [यनप्रणीते ग्रन्थे ।

कामसूत्र न० कामस्य तत्तन्त्रस्य सूत्रम् । कामतन्त्रप्रतिपादके वात्स्या-

कामाङ्कुश न० कामस्याङ्कुश इव । नखे ।

कामात्मता स्त्री० कामात्मनो भावः तल् । कर्मफलाभिलाषशीलत्वे । कामात्मता न प्रशस्तेति मनुः ।

कामात्मन् त्रि० कामे फलतृष्णायामात्माऽन्तःकरणं यस्य । फलकामनावति, कामाकुलचित्ते च । काम आत्मा स्वरूपं यस्य । काम्यमानविषयगताकुलचित्तत्वेन तद्रूपतापन्नस्वभावे ।

कामान्ध पु० कामं यथेष्टमन्धयति स्वरेण विरहिणम् चुरा० अन्ध—अच् । कोकिले । कामेनान्धः ३त० । विवेकहीने त्रि० ।

कामालु पु० कामतोऽलति अल—पर्याप्तौ उण् । रक्तकाञ्चनवृक्षे ।

कामावशा(सा)यिता स्त्री० कामान् अवशेते अव+शीङ्—णिनि तस्य भावः तल् । अणिमाद्यष्टविधैश्वर्यमध्ये सत्यसङ्कल्पतारूपे ऐश्वर्ये । कामान् अवसातुं निश्चेतुं शीलमस्य स्तेः णिनि ततस्तल् । कामावसायितायत्वे वार्थे ।

कामिन् पु० काम—णिनि । चक्रवाके, पारावते, चटके, सारसखगे च

एतेषां कामाधिक्यात् कामित्वम् । कामयति त्रि० स्त्रियां ङीप् कामिनी । भीरुस्त्रियाम्, दारुहरिद्रायाम्, मदिरायाञ्च स्त्री० ।

कामीन पु० कामयतुगच्छति ख । रामपूगे । कामानुगते त्रि० ।

कामुक पु० कम—णिङ्—उक । अशोकवृक्षे, अतिसुक्तके, माधवीलतायाम्, चटके च । मैथुनकामनातिशयवति त्रि० । स्त्रियां ङीप् कामुकी । इच्छामात्रवत्यान्तु टाप् कामुका ।

कामुककान्ता स्त्री० कामुकानां कान्ता प्रिया । अतिमुक्तकलतायाम् ।

काम्पिल्य पु० कम्पिलाया नद्या अदूरभवो देशः यत् । उत्तरदेशभेदे, तत्र जातायां गुग्गुलरोचनाख्यायां लतायाञ्च ।

काम्बल पु० कम्बलेन परिष्कृतो रथः । कम्बलेन समन्ताद्वेष्टिते रथे ।

काम्बविक पु० कम्बुः शङ्खः शिल्पमस्य । शङ्खकारे (शांखारि) ।

काम्बोज पु० कम्बोजो देशोऽभिजनो निवासो वा यस्य अण् कम्बोजदेशोद्भवेऽश्वे, पुन्नागवृक्षे, म्लेच्छभेदे च । धवखदिरे, मांसपिण्डे, कृतपुष्पाद्यै, स्त्री० ङीप् ।

काम्य न० कम—णिङ् यत् । यत् किञ्चित् फलमुद्दिश्य, यज्ञदानतपःक्रिया । क्रियते बहुलायास तत्काम्यं परिकीर्त्तितमित्युक्ते कर्मणि । कमनीये, सुन्दरे च त्रि० ।

काय पु० चीयतेऽन्नादिभिः चिञ् घञ् नि० । देहे । कः प्रजापतिर्ब्रह्मा वा देवताऽस्य अण् वृत् अन्तादेशः वृद्धिरयादेशश्च । प्रजापतिदेवताके चरौ, प्राजापत्यविवाहे कनिष्ठानामिकामूलोर्ध्वभागे, स्वल्पाङ्गुलिमूलरूपे, ब्राह्मतीर्थे, लक्ष्ये, स्वभावे, मूलधने च ।

कायस्थ पु० काये तिष्ठति काय+स्था—क । परमात्मनि, लिपिकरवृत्तौ (काएत) जातिभेदे च । कायस्थितत्वनया स्था—क टाप् । हरीतक्याम् आमलक्याञ्च स्त्री० ।

कायिका स्त्री० कायेन निर्वृत्ता ठक् । गवादिकर्मकरणरूपायां "दोहावाहप्रकर्मयुक्ता कायिका सम्प्रदाकृता" इति स्मृत्युक्तायां वृत्तौ प्रत्यक्षं पणतदर्द्धादिदेयवृत्तौ च "कायाधिरोधिनी यच्च यच्चार्द्धाद्या तु कायिकेति नारदवचनात् ।

कार पु० कृ हिंसायां, क्त करणे वा भावे घञ्। बन्धे, निश्चये, यत्ने क्रियायाञ्च। कृ विक्षेपे आधारे घञ्। छिमाट्टौ, यतौ च। कर्म्मोपपदे कर्त्तरि अण्। तत्कर्म्म कर्त्तरि यथा कर्मकारः स्वर्ण-कार इत्यादि। कृ—कर्मणि घञ् विक्षिप्ते धान्यादिराशौ।

कारक त्रि० कृ—ण्वुल्। क्रियाजनके। क्रियोपाधिके साक्षात् क्रि-यान्वयिनि व्याकरणोक्ते कर्त्तृकर्म्मादिषु षट्सु न०।

कारकदीपक न० अलङ्कारशास्त्रे अर्थालङ्कारभेदे सा० १०प०।

कारण न० कृ—णिच् करणे ल्युट्। हेतौ, यद्व्यतिरेकेण कार्य्यानुत्प-त्तिलक्षिनि, यथा दण्डं विना घटस्यानुत्पत्तिरतो दण्डो घटस्य कारणम्। साधने, इन्द्रिये, देहे च। कृञ् हिंसायां स्वार्थे णिच् भावे ल्युट्। बधे। क्रियते इति कर्मणि, वाद्यभेदे च। कृञ् हिंसायां णिच्—युच् टाप् कारणा। यातनायां स्त्री०।

कारणमाला स्त्री० अर्थालङ्कारभेदे साहि० १० परि०।

कारणोत्तर न० कारणेन उत्तरम्। व्यवहारेषु वाद्युपन्यस्तं वस्तु सत्यत्वेनाङ्गीकृत्य तत्प्रतिकूलतासाधनकारणकथने यथा अयं मतं धारयतीत्यभियोगे सत्यं गृहीतं किन्तु शोधितम् इयं भूमिर्मदीया-नेन भुज्यते इत्यभियोगे सत्यमेतस्य भूमिः किन्तु दानेन क्रयादिना वा इदानीं ममेत्युत्तरकथनम्। कारणमप्येतदर्थे "मिथ्योत्तरे पूर्व-वादे कारणे प्रतिवादिनीति" कारणोत्तरेऽपि कारणशब्द-प्रयोगात्।

कारण्डव पु० रम—ड तस्य नेत्त्वम् रण्डः ईषत् रण्डः कारण्डः तं वाति वा—कः हंसभेदे।

कारम्भा स्त्री० ईषत् रम्भा कोः कादेशः। प्रियङ्गुवृक्षे।

कारव पु० केति रवोऽस्य। काके।

कारवी स्त्री० कारं वाति वा क, ङीष्, कृ+अच् करणे मयूरस्तस्येदम् अण्+कृ-हिंसायां णिच् क्विप् कार् तमवति अण् वा। धातपुष्पायाम्, रुद्रजटायाम्, मयूरशि-खायाम्। कारवेल्लौ, त्वक्पत्त्रयाम् (तेजपात) क्षुद्रजीरके च।

कारवेल्ल पु० कारं वेल्लते वेल्ल–अण् । (करेल) लतामेदे । स्वल्पार्थे ङीप् । क्षुद्रकारवेल्लायाम् (छोटा) ।

कारस्कर पु० कारं करोति क–अण् नि० सुट् । किसानकहत्ते ।

कारा स्त्री० कृ–भिदादित्वात् अङ् नि० दीर्घः । बन्धनागारे, दूत्याम्, घोषाधःस्थकाष्ठमयभाण्डे, सुवर्णकारिकायाञ्च ।

कारागार न० कारैवागारम् । बन्धनालये ।

कारापथ पु० लक्ष्मणात्मजयोरङ्गदचन्द्रकेतोराज्यविषये देशभेदे ।

कारि स्त्री० कृ–इञ् । क्रियायाम् । शिल्पिनि त्रि० ।

कारिका स्त्री० कृ–धात्वर्थनिर्देशे ण्वुल् । क्रियायाम् । कर्त्तरि ण्वुल् । नटयोषिति । स्वल्पाक्षरग्रन्था बहुलार्थबोधके श्लोके, शिल्पे च कृ–भावे ण्वुल् । यातनायाम् । कृ–वुण् मापितादिलक्ष्ये, वृद्धिभेदे च (सुद) । [स्वयं कृतेति" स्वल्पे कृ वृद्धिभेदे(सुद)।

कारिता स्त्री० कृ–णिच्–क्त । "कारिता नाम सा वृद्धिर्यस्मिंकेन

कारीरी स्त्री० कं जलमृच्छति क+ऋ–विच् कार् मेघः तमीरयतीति ईर–अण् । वृष्टिसम्पादिकायां यज्ञक्रियायाम् । कारीरीमनु वृष्टिरिति स्मृतिः ।

कारु त्रि० कृ–उण् । शिल्पिनि, कारके च । विश्वकर्म्मणि पु० ।

कारुज पु० कं जलमारुजति, कुत्सितं रुजति वा रुज–क । करभे, वल्मीके, नागकेशरे, गैरिके, स्वयंजाते देहस्थे तिलादिचिह्ने च ।

कारुणिक त्रि० करुणा शीलमस्य ठक् । दयालौ दयाशीले ।

कारुण्य न० करुणस्य भावः करुणैव वा ष्यञ् । दयायाम् ।

कार्त्तस्वर न० कृतस्वरे आकरभेदे भवं, कृताः पठिताः स्वरा येन तस्मै वैदिकाय ब्राह्मणाय वा इदम् वा अण् । स्वर्णे, धुस्तूरे, काञ्चनवृक्षे च ।

कार्त्तिक पु० कृत्तिकायां जातः अण् । स्कन्दे, कृत्तिकानक्षत्रेण युक्ता पौर्णमासी कार्त्तिकी सास्मिन् मासे अण् । स्वनामख्याते धरदतोर्द्वितीये मासे

कार्त्तिकिक पु० कृत्तिकानक्षत्रेण युक्ता पौर्णमासी कार्त्तिकी

सा यत्र मासे ठक् । कार्त्तिके धरद्वतोर्हितीये मासे ।

कार्त्तिकी स्त्री० कृत्तिकानक्षत्रेण युक्ता पौर्णमासी अण् । चान्द्र-कार्त्तिकमासस्य पौर्णमास्याम् ।

कार्त्तिकेय पु० कृत्तिकानामपत्यं तत्पालितत्वात् ढक् । स्कन्दे शिवपुत्रे ।

कार्त्तिकोत्सव पु० ७त० कार्त्तिकशुक्लप्रतिपदि कर्त्तव्ये दीपोत्सवे ।

कार्त्स्न्य न० कृत्स्नस्य भावः ष्यञ् । साकल्ये, सामस्त्ये ।

कार्पट पु० कीर्य्यते कृ-पिच् कर्-पटः कर्म० सदृश भवति अण् । खाट्टायाम् (चापडागाला) स्वार्थेऽण् । चुद्रवस्त्रखण्डे, कर्पटेन जीर्णवस्त्रेण चरति अण् । कार्य्यार्हिनि (उमेदार) ।

कार्पटिक पु० कर्पटेन काषायवस्त्रेण चरति ठक् । तीर्थयात्रोद्यते ।

कार्पण्य न० कृपणस्य भावः ष्यञ् । उचितव्ययविमुखतया धनसञ्चये-च्छायां, "दैन्ये च" कार्पण्यदोषोपहतस्वभाव इति गीता ।

कार्पास पु० कार्पासाः फलम् अण् तस्य लुक् तस्य विकारे वा अण् । (तुला) कार्पासीफले । तज्जातवस्त्रादौ त्रि० ।

कार्पासनासिका स्त्री० कार्पासस्य नासिकेव सूत्राकर्षणे स्थानम् । यथा नासिकासूत्रदानेन पश्वादिराकृष्यते एवं सूत्राकर्षके तकौ, बल्ले (टेको) ।

कार्पासी स्त्री० कृ-पास स्वार्थेऽण् । वृक्षभेदे (कापास) ।

कार्म्मण त्रि० कर्मणि कुशलः अण् । क्रियासु दक्षे, योगविद्यायाम् ।

कार्म्मिक त्रि० कर्मणा निर्वृत्तं ठक् । विचित्रवस्त्रादौ ।

कार्मुक पु० कर्मणे प्रभवति उकञ् । वंशे, श्वेतखदिरे, महानिम्बे हिज्जले च । धनुषि न० । क्रियादक्षे, कर्मठमे च त्रि० ।

कार्य्य न० कृ-ण्यत् । प्रयोजने, हेतौ, व्याकरणोक्तेषु आ-देशप्रत्ययागमेषु, न्यायमते प्रागभावप्रतियोगिनि घटपटादि विकार-रूपे कार्य्ये, विनश्वरे, अवयववति, देहादौ, विवादे, पुण्यापुण्यरूपे अपूर्वे च । कर्त्तव्ये त्रि० ।

कार्श्य न० कृशस्य भावः ष्यञ् । कृशत्वे । स्वार्थे ष्यञ् । कृशे सा-रहृचे, रुक्षचे (डेको) वृचे च पु० ।

कार्षापण पु० न० कर्षस्यायम् अण् आ+पण–घञ् कार्षस्य आ-पणः । (काहन) षोडशसु पणेषु, पणे च । [(तोला)

कार्षिक पु० कर्षस्यायम् ठञ् । पणचतुर्थभागे, क्रय्यमाणे च ।

कार्ष्य पु० क्रय क स्वार्थे ष्यञ् । सालवृक्षे ।

काल पु० कलयतिगणयति अल–अच् कोः कादेशः । कृष्णवर्णे । त-द्वति त्रि० । लौहे, कज्जलके, न० । कालयति सर्वं चुरा० क-ल०–अच् । यमे, महाकाले शिवे, शनैश्चरे, कोकिले रक्तचित्रके, कासमर्दे, क्षणदण्डादिसमये च पु० । अयं च सर्वकार्येषु निमित्त कारणम् । स च आदित्यादिक्रियाप्रचयरूपस्तदुपाधिको घटा-दिरूपो वा ।

कालक पु० चु० कल–एवुल् । जतौ, (देहस्थचिह्नभेदे) कलङ्काले च । कालयावके, यकृति, बीजगणितोक्ते अव्यक्तराशिसंज्ञाभेदे च न० ।

कालकण्ठ पु० कालः कण्ठो यस्य । नीलकण्ठे शिवे, मयूरे, । खञ्जने, कलविङ्के, दात्यूहे च ।

कालकूट न० कालमपि कूटयति, दहति, कूट–अण् । विषे, कालस्य मृत्योः कूटो राशिरिव । देवासुरयुद्धे देवैर्हतस्य पृथुमालिनः । दैत्यस्य रुधिराज्जातस्तरुरत्यन्तभिभः । निर्यासः कालकूटोऽस्य मुनिभिः परिकीर्त्तितः । सोऽहिफेनत्वे, पृष्टङ्गेरे कोङ्कणमलये ऽभ-वदित्युक्ते वृक्षनिर्य्यासरूपे विषभेदे पु० न० ।

कालकृत् पु० कालं समयं स्वगत्या करोति कृ–क्विप् तुक् च । सूर्य्ये ।

कालकेशी स्त्री० कालः केशएव पत्रादिर्यस्याः । नील्यामोषधौ ।

कालखण्ड न० कर्म० । दक्षिणकुक्षिस्थे मांसखण्डे यकृति ।

कालचक्र न० कालस्यचक्रमिव प्रवृत्तिरूपारयत्वात् सदा परिवर्त्तमान-त्वाच्च । कालस्वरूपे द्वादशमासात्मके संवत्सरस्वरूपे चक्रे ।

कालचिन्तक पु० कालं चिन्तयति विचारयति चिन्ति-एवुल् । ज्योति-र्विदि देवज्ञे ।

कालधर्म्म पु० ईत० मृत्यौ, समयस्वभावे च ।

कालनियोग पु० कालेन कृतो नियोगः कालस्य वा नियोगः आज्ञा नि+युज–घञ्। दैवाज्ञायां, कालकृतनियमे च।

कालनिर्य्यास पु० कर्म०। गुग्गुलौ।

कालनेमि पु० राक्षसभेदे, हिरण्यकशिपुपुत्रे दैत्ये च "कालनेमिवधे युद्धे" इति पुराणम्।

कालपर्ण पु० कालं कृष्णं पर्णमस्य। तगरवृक्षे।

कालपुच्छ पु० कालः पुच्छोऽस्य। "गुणैरेतसमः कालपुच्छो मुनिभिरीरित" इत्युक्ते मृगभेदे।

कालपृष्ठ पु० कालं पृष्ठमस्य। मृगभेदे, कङ्कपक्षिणि, चापे च। कालोयम इव पृष्ठमस्य। कर्णस्य चापे।

कालमान पु० कालं मानमस्य। कृष्णजीरके, कृष्णतुलस्यां च।

कालमूल पु० कालं मूलमस्य। रक्तचित्रकवृक्षे।

कालमेषी स्त्री० कालं वर्णं मिषति स्पर्द्धते मिष–अण्। मङ्गिष्ठायाम्, सोमराज्याम्, त्रिवृति च।

कालरात्रि स्त्री० कालस्य रात्रिर्नाशिका। सर्वभूतापहारिण्याम् मृत्युदेव्याम् यमभगिन्याम् कल्पान्तरात्रौ, "दीपावली तु या प्रोक्ता कालरात्रिश्च सा मते" त्युक्ते कार्त्तिकामावास्यारात्रिसमये च।

काललवण न० कर्म०। विड्लवणे।

काललौह न० कर्म०। कृष्णायसे लौहभेदे।

कालवृन्त पु० कालं कृष्णं वृन्तमस्य। कलत्यवृक्षे।

कालशाक न० कर्म०। श्राद्धीये शाकभेदे।

कालसर्प पु० नित्यकर्म०। कृष्णसर्पे महाविषे (कोउटासाप)।

कालसार त० कालेन सारः प्रबलः। कृष्णसाराभिधे मृगे,।

कालसूत्र न० कालस्य यमस्य सूत्रमिव। कुठालवक्रसूत्रच्छेदनरूपे नरकभेदे।

कालसेय न० कालस्यां दधिकुल्यां भवं ढक्। तक्रे।

कालस्कन्ध पु० कालः स्कन्धो यस्य। तमालवृक्षे, तिन्दुकवृक्षे, जीरकवृक्षे, दुग्धदिरे, उदुम्बरे च।

काला स्त्री० काल+अर्शाद्यच् । कृष्णत्रिवृति कालयति अच् । मञ्जिष्ठायाम् । कल-क्षेपे कर्मणि घञ् अस्वगन्धायाम् पाटलावृक्षे, कृष्णजीरके, नीलिकायाञ्च ।

कालागुरु न० कर्म० । प्राग्ज्योतिषदेशोत्पत्तिके कृष्णागुरुचन्दने ।

कालाग्नि पु० कालकारः स्मृत्युकारी अग्निः प्रलयाग्नौ कालानलः-दयोऽप्यत्र । [कलविङ्के, कपिञ्जले पक्षिणि च ।

कालानुनादिन् पु० अनुनदति अनु नद-णिनि कर्म० अमरे ।

कालानुसारक न० कालः स्मृगमद इवानुसरति दूरतो गच्छति सृ-ण्वुल् । कृष्णागुरुणि पीताख्यचन्दने ।

कालानुसारिन् न० कालः स्मृगमद इवानुसरति गन्धेन दूरतो ग-च्छति णिनि । धेलेये गन्धद्रव्ये ।

कालानुसार्य्य पु० न० । कालेन स्मृगमदेनानुसार्य्यते अनुसृ-ण्यत् । शैलजे गन्धद्रव्ये, शिंशपावृक्षे, (शिशु) तगरे च ।

कालान्तरविष पु० कालान्तरे दंशनकालात् बहुकालानन्तरं विषं यस्य । मूषिकादौ । तस्य हि विषं कालान्तरे कष्टदम् ।

कालायस न० कर्म० । लौहभेदे ।

कालाशुद्धि स्त्री० कालस्य शुभकर्म योग्यसमयस्य अशुद्धिः । शुभक-र्माकरणप्रयोजके स्मृत्याद्युक्ते कालदोषे ।

कालिक पु० काले वर्षाकाले चरति ठक् । वकपक्षिणि, कालं कृष्णवर्ण-मनुसरति ठक् । कृष्णचन्दने कालागुरुणि । प्रकृष्टः दीर्घः कालो-ऽस्य प्रकृष्टे ठञ् । वैरे । कालेन निर्वृत्ते कालस्येदं वा ठक् । कालभवे कालसम्बन्धिनि च त्रि० । कालो वर्णो ऽस्यस्याः ठन् । देवीभेदे दृष्टिकपत्रवृक्षे, (पिचाति) क्रमेण [देयवस्तुमूल्ये, नवमेघे, पटोलशाखायां रोमाल्याम् मांस्यां, काक्यां, शिवायां, मेघावल्यौ, स्वर्णादिदोषे सुरायां, काकोल्यां, श्यामाख्यविहगे प्रतिमासदे-यवृद्धौ कुज्झटिकायां, तिमिरायां हरीतक्यां च स्त्री० ।

कालिङ्ग पु० कुत्सितं लिङ्गमस्य । मूलिकभेदौ, कृष्णाहि, सर्षे, लौहभेदे च । कालिङ्गानां राजा अण् । कलिङ्गदेशपतौ स्त्र-

यतौ बहुषु तस्य लुक् कलिङ्गाः । "कलिङ्गदेशमारभ्य मङ्गाख्यो-
जनं शिवे ! । दक्षिणस्यां महेशानि ! कालिङ्गाः परिकी-
र्त्तिता इत्युक्तादेशभेदे ब० व० गौरा० ङीष् । राजकर्कश्याम् ।

कालिन्दी स्त्री० कलिन्दाद्रौ भवा अण् । यमुनायाम् ।

कालिन्दीभेदन पु० भिनत्ति हलेनाकर्षणेन गतिरोधनादिना अन्य-
था करोति भिद्–ल्यु ६त० । बलभद्रे तत्कथा च हरिवंशे ।

कालिमन् पु० कालस्य भावः इमनिच् । कृष्णतायाम् ।

काली स्त्री० कालो वर्णोऽस्त्यस्याः अच् ङीष् । देवीभेदे, मत्स्य-
गन्धायां व्यासमातरि सत्यवत्याम्, नवमेघालौ, परीषादे कालाङ्ग्यां
लिङ्गति, रात्रौ, दक्षिणकाल्याम्, । (विचाति) वह्नेर्जिह्वाभेदे च ।

कालीयक पु० कालस्य वर्णस्येयं दृङ्गाच्छः संज्ञायां कन् । दारुह-
रिद्रायाम् । कृष्णचन्दने न० ।

कालेय पु० कलेरपत्यम् ढक् । दैत्यभेदे, (कालायकृष्णवर्णा तायै प्रभ-
वति ढक् । यकृति । कालचन्दने न० । स्वार्थे कन् । कुङ्कुमे ।
कालीयके चन्दने न० । हरिद्रायाम् ए० ।

कालोनिक त्रि० कल्पनायाः आगतः ठक् । कल्पिते, आरोपिते,
कल्पनाभवे च । [गर्भधारणयोग्यकालप्राप्तायां गवि ।

काल्या स्त्री० कालः गर्भधारणयोग्य समयः प्राप्तोऽस्य यत् ।

कावेरी स्त्री० कस्य जलस्य वेरं शरीरं तस्येदमित्यण् । सरिद्भेदे । कु-
त्सितमपवित्रं वेरं यस्याः स्वाङ्गात् ङीष् । वेश्यायां धूम० ।
हरिद्रायाम् । [कवित्वे च ।

काव्य पु० कविरेव स्वार्थे ष्यञ् । शुक्रे । कवेः कर्म । ग्रन्थभेदे

काव्यलिङ्ग न० अर्थालङ्कारभेदे । सा० १० परि० ।

काव्यार्थापत्ति स्त्री० अर्थालङ्कारभेदे । सा० १० परि० ।

काश दीप्तौ भ्वा० आत्म० अक० सेट् । काशते अकाशिष्ट, काशाञ्चक्रे
चकाशे णिच् अचकाशत् त ।

काश दीप्तौ दिवा आत्म० अक० सेट् । काश्यते । अकाशिष्ट णिच्
अचकाशत् त ।

काश्य पु० काश—ष्यञ् । रोगभेदे, क्षुपे, अयभेदे च, तत्पुष्पे न० । ण्वुञ् । काशकः । काशथे दे ।

काश्यिराज पु० ६त० टच् समा० ङ्याप्पोरिति ह्रस्वः । अयभेदे, दिवोदासे धन्वन्तरौ अये च ।

काशी स्त्री० काश—अच् गौरा० ङीष् । सप्तमोक्षपुरीणां मध्यगायां "काशीतलवाहिनी गङ्गे"ति मन्त्रोत्तरपदमात्रम् ।

काशीय न० कं जलमश्नुते व्याप्नोति क+अश—घिनि तेषु अध्ये देशे च । (क्षीरकाकोली) उपधातुभेदे तत्संयोगात् दलादितो अजस्रस्रवात् तस्य जलव्यापनप्रधानत्वम् ।

काश्मीर न० काश्मीरदेशेषु भवः अण् । कुङ्कुमे, पुष्करमूले, टङ्के (सोहागा) 'हारदापीठमारभ्य कुङ्कुमाद्रितटान्तकम् । तावत् काश्मीरदेशः स्यात् पञ्चाशद्योजनात्मक' इत्युक्ते देशे ब० ब० च । तेषां राजा अण् । काश्मीरदेशे तस्य बहुषु लुक् । काश्मीराः ।

काश्मीरज पु० काश्मीरदेशे जायते जन—ड । कुङ्कुमे, कुष्ठे, (कूड़) पुष्करमूले च । गौरा० ङीष् गाव्यार्याम् अतिविषायाम् स्त्री० । ब० । काश्मीरजन्मामात्र ।

काश्यप पु० कश्यपस्य गोत्रापत्यम् विदादिञ् मुनिभेदे, ऋगभेदे, मीनभेदे, गोत्रभेदे, तत् प्रवरान्तर्गतमुनिभेदे च कश्यपगोत्रजमात्रे त्रि० ।

काश्यपि पु० कश्यपस्यापत्यम् इञ् । गरुड़ापत्ये अश्वे ।

काश्यपी स्त्री० कश्यपस्येयम् अण् ङीप् । पृथिव्याम् ।

काश्यपेय पु० कश्यपस्यापत्यम् ढक् । सूर्ये । गरुड़े च ।

काष्ठ न० काश—क्थन् । इन्धने दारुणि ।

काष्ठकदली स्त्री० काष्ठमिव कठिना कदली साक० । वनकदल्याम् ।

काष्ठकीट पु० ६त० । घुणाख्ये कीटे ।

काष्ठकुट्ट पु० काष्ठं कुट्टयति छिनत्ति अण् । (काट्ठोकरा) पक्षिभेदे ।

काष्ठकुद्दाल पु० कुद्दालयति दल विदारणे अण् ण्वुक० कुद्दालः । ६त० । नौकादेर्मज्जापनयनार्थं काष्ठघटिते कुद्दाले ।

काष्ठतक्ष् पु० काष्ठं तक्षति क्विप् । रथकारे वर्द्धकौ (सुतर) ख्याते वर्णभेदे ।

काष्ठतक्षक पु० काष्ठं तक्षति ण्वुल् । रथकारे वर्द्धकौ (सुतर) ।

काष्ठलेखक पु० काष्ठं लिखति ण्वुल् । घुणाख्ये कीटे ।

काष्ठा स्त्री० काश-क्थन् । दिशि, दारुहरिद्रायाम् स्थितौ, पर्य्यवसानभूमौ, अष्टादशनिमेषात्मके काले, उत्कर्षे, काष्ठाशब्दे हरसानुस्निग्धमिति कुमारः सीमायाञ्च परा हि काष्ठा तपसस्तया पुनरिति कुमारः ।

काष्ठाम्बुवाहिनी स्त्री० पुनःपुनरम्बु वहति णिनि, काष्ठस्याम्बुवाहिनी । काष्ठरचितनौकाकृतिजलसेचन्याम् द्रोण्याम् । (सेउनी) ।

कास कुत्सितशब्दे भ्वादि० आत्म० अक० सेट् । कासते अकासिष्ट कासाञ्चक्रे क्विप् अचकासत् त ।

कास पु० कास-घञ् । रोगभेदे ।

कासघ्नी स्त्री० कासं रोगं हन्ति टक् । कण्टकार्य्याम् ।

कासमर्द पु० कासं मर्दयति मृद-अण् । (कालकासुन्दे) वृक्षभेदे ।

कासमर्दन पु० मृद-ल्यु ईत० । पटोले ।

कासर पु० के जले आसरति आ+सृ-अच्, ईषत् सरति स्थूलकायत्वात् कोः कादेशः वा । महिषे ।

कासार पु० कोन जलेनासम्यक् सारोऽस्य, ईषत् सारोऽस्य वा । सरोवरे, सपद्मे निष्पद्मे वा महाजलाशये ।

कासारि पु० इत० । कासमर्दे, आलुके च ।

कासीस न० क्षुद्रः कासः कासी तां स्यति शो-क । (हीराकस) । उपधातुभेदे ।

कासू स्त्री० कस-ऊ णिच्च । विकलयाचि, दीप्तौ, वृद्धौ, रोगे च ।

काहल पु० कुत्सितं हलति लिखति अच् कोः कादेशः । कुक्कुटे, विड़ाले च । शब्दमात्रे, महाढक्कायाम्, वाद्यभेदे, महाध्वनौ, अव्यक्तशब्दे न० । शुष्के, भग्ने, खले च त्रि० ।

काहलापुष्प पु० काहलेव पुष्पमस्य । धुस्तूरे ।

किं ज्ञाने जुहो० पर० सक० अनिट्। चिकेति अकैषीत्।

किंवदन्ति(न्ती) स्त्री० किम्+वद्–झिच् या ङीष्। जनश्रुतौ सत्ये अपत्ये वा लोकापवादे।

किंवा अव्य० किञ्च वा च ह्रस्व०। विकल्पे, अथवेत्यर्थे।

किंशारु पु० कुत्सितं शृणाति किम्+शॄ–आरु। धान्याद्यधःभागे, वाशे, अङ्कपक्षिणि च।

किकीदिवि पु० किकीति दीव्यति शब्दायते किकि+दिव–इन् नि० दीर्घः। चाषविहगे। [स्त्रियां ङीष्।

किङ्कर त्रि० किञ्चित् कुत्सितं वा करोति–ट। भृत्ये, सेवके।

किङ्किणी स्त्री० किञ्चित् किणं करोतीति णिच्–अच्–गौरा० ङीष्। कटिभूषणे क्षुद्रघण्टिकायाम्, विकङ्कतवृक्षे च।

किङ्किर पु० किम्+कॄ+क। कोकिले, भ्रमरे, हये, कन्दर्पे च। रक्तवर्णे स्त्री०।

किङ्किरात पु० किङ्किरां रक्तवर्णं मतिं गच्छति पुष्पद्वारा अण्। अशोकवृक्षे, एकपक्षिणि रक्ताम्बष्ठवृक्षे (रक्तभाटी) अत–अच् कर्म०। कन्दर्पे, कोकिले च। [बलाश्वे।

किञ्च अव्य० किञ्च च ह्रस्व०। आरम्भे, समुच्चये, साकल्ये, समा–

किञ्चन अव्य० किम्+चन। असाकल्ये, अल्पे च। तृणिकर्षणपलाशे पु०।

किञ्चित् अव्य० किम्+चित्। असाकल्ये, अल्पे च।

किञ्चुक पु० किञ्चित् चुलुम्पति सौत्र चुलुम्प–डु संज्ञायां कन्। (केंचो) मञ्जीलताख्ये कीटभेदे।

किञ्जल्क पु० किञ्चित् जलति अल–अपचारणे क तस्य नेत्वम्। केसरे, पुष्परेणौ, नागकेशरे च पद्ममध्यस्थे केशाकारे। करहाटवेष्टने न०।

किट गतौ सक० भये अक० भ्वा० पर० सेट्। केटति अकैटीत्।

किटि पु० किट–गतौ इन् किच्च। शूकरे। [मले च (खाट)।

किट्ट न० किट–क्त दृढ़भावः। धातूनां मले, तैलाद्यधोभागस्थे

किण्व पु० कण गतौ अच् पृषो० अत इत्वम् । (बेटा) । शुष्कव्रणे, कार्षापणे, वर्णजे त्रिषु च । [ङीष् । अणार्जे ।

किणिही स्त्री० किण—अस्त्यर्थे इनि किणिनो ब्रणात् ङीषि ङ गौ०

किण्व पु० न० कण—व नि० । सुरावीजे द्रव्ये "किण्वादिभ्यो मदअक्षिवत्" इति सांख्यसूत्रम् । पापे न० ।

कित संशये रोगापनयने च भ्वा० पर० सक० सेट् । चिकित्सति अचिकित्सीत् । वासे अक० दुच्छायां सक० । केतति अकेतीत् ।

कित ज्ञाने जुहो० पर० सक० सेट् । चिकेत्ति अकेतीत् ।

कितव पु० कि—भावे—क्त कितेन वाति वा—क । द्यूतकारके, वञ्चके, खले, चोरनामकगन्धद्रव्ये, धुस्तूरवृक्षे च ।

किन्नङ्ग पु० किञ्चिन्मात्रा तनुर्यस्य । अष्टपादे (माकड़सा) कीटभेदे ।

किन्तु अव्य० किम् त च ह० । पूर्ववाक्यसङ्कोचप्रापने, प्रागुक्तविरुद्धार्थे, किं पुनरित्यर्थे, च ।

किन्नर पु० कुत्सितो नरः कुत्वा च अश्वमुखत्वे नरदेहत्वात् नरमुखत्वे चाश्वदेहत्वात् । देवयोनिभेदे देवानां गायके ।

किन्नरेश पु० ६त० । कुबेरे धनदे ।

किन्नु अव्य० किम् नु च ह० । प्रश्ने, वितर्के, सादृश्ये, स्थाने च ।

किम् अव्य० कै किन्नु । प्रश्ने, निषेधे, वितर्के, निन्दायाञ्च ।

किमु अव्य० किम् उ च ह० । विमर्षे सम्भावनायाञ्च ।

किमुत अव्य० किम् उत च ह० । प्रश्ने, वितर्के, विकल्पे, अतिशये च ।

किम्पच त्रि० किं पचति अच् । क्षपणे सति आत्मोदरपूर्त्तिमात्रं पचति नागन्तुकातिथिभ्यो दानार्थम् ।

किम्पचान त्रि० किम्+पच—आनच् । आत्मोदरपूर्त्तिमात्रं पाककर्त्तरि क्षपणे । [क्षपणे त्रि० ।

किम्पाक पु० निन्दितः पाकोऽस्य (माकाल) इतिख्याते वृक्षे ।

किंपु(पू)रुष पु० कुत्सितः पु(पू)रुषः । देवयोनिभेदे देवगायके । हिमाचलहेमकूटयोर्मध्यस्थे नववर्षात्मकजम्बुद्वीपस्थैकतमे वर्षे ।

कियत् त्रि० किम्+परिमाणे, वतुप्किमः क्यादेशः वस्य यः । किंप-

रिमाणे इत्यर्थे । [डिच्चे टिलोपे ख्युन् । उद्योगे इत्याहे ।

कियदेतिका स्त्री० कियत् एतत् आरभ्यमाणं करोति णिचि ।

किर पु० कॄ—क । शूकरे ।

किरण पु० कॄ—क्यु । सूर्य्ये, रश्मौ च ।

किरणमालिन् पु० किरणानां मालाऽस्त्यस्य इनि । सूर्य्ये ।

किरात पु० कीर्य्यन्तेऽक्षरा अत्र कॄ—क पर्य्यन्तदेशस्थमर्तति अण् । म्लेच्छजातिभेदे पर्य्यन्तदेशाभ्यर्थिनि, अल्पतनौ, "तप्तकुण्डं समारभ्य रामक्षेत्रान्तकं शिवे ! किरातदेशो देवेशि ! विन्ध्यशैलेऽवतिष्ठति इत्युक्तदेशे च

किरातिक त्रि० किरातदेश उत्पत्तिस्थानत्वेनास्त्यस्य ठच् । कर्म० (चिरता) ख्याते द्रव्ये, अश्वगन्धाद्रव्ये, भूनिम्बे च ।

किरि पु० कॄ—इक् । शूकरे ।

किरीट पु० न० कॄ—कीटन् । मुकुटे, शिरोवेष्टने च ।

किरीटिन् पु० किरीट+इनि । अर्জ্জुने । मुकुटवति त्रि० ।

किर्म्मी स्त्री० किरति किम् किरं माति मा—क गौरा० ङीष् । मलाशङ्कके, गण्डे, स्वर्णपुत्तलिकायाम्, लौहपुत्तलिकायाञ्च ।

किर्म्मीर न० कॄ—ईरन् कित् गुडागमश्च । नारङ्गद्रव्ये, राक्षसभेदे, चित्रवर्णे च । तद्वति त्रि० ।

किल अव्य० किल—क । वार्त्तायाम्, अनुनयार्थे, निश्चये, संभावे प्रसिद्धप्रमाणद्योतके, सत्ये, क्षेपे, असूये, अलीके, तिरस्कारे च ।

किलकिञ्चित "हर्षाभिलाषविरोधाद्भयसङ्करजातिभिर्य्यात्" इत्युक्ते स्त्रीणां विलासभेदे "रमयन्तीकिलकिञ्चितं किले"त नैषधम् ।

किलकिला स्त्री० किलकिलेति बोद्धायां किल्+ततः अच् ततः किम् । हर्षशब्दे, सिंहनादे, वानराणां शब्दानुकरणे च ।

किलाटक पु० "नवदुग्धस्य पक्वस्य पिण्डः प्रोक्तः किलाटक" इत्युक्ते क्षीरविकारे ।

किलाटिन् पु० किलाति क, अट—णिनि कर्म्म । वंशे द्रव्ये ।

किलास न० किल—क+तमस्यति अस+अण् । श्वित्ररोगे (कुष्ठे) ।

किञ्चिल्क पु० किञ्च-कन् ततो जातः जन-ड पृ०। कटे, कुड्माकारे च।

किञ्चिह्न न० किञ्च-टिषच् नुक्। अपराधे, पापे, दोषे, अधर्मा-धर्म्मफलभूते अनिष्टे संसारे च।

किञ्जल्क पु० ब० किं ईषत् जल्कति शल-अच् पृ० पल्लवे।

किञ्जल्लय पु० न०। किञ्चित् जल्लति चलति कयन् पृ०। पल्लवे।

किटोर पु० कथ-ओरन् नि०। दृढशिखिनौ, क्रूरे, तरुणावस्थे "किञ्चिच्छूरः किशोरः स्यात् यतो हि दशमात् परम्। शूरत्वं दृश्यते किञ्चि" दित्युक्ते दशवर्षोत्तरपञ्चदशवर्षवयस्के त्रि०। स्त्रियां ङीप्।

किण्क वधे चुरा० आत्म० सक० सेट्। किण्कयते अचिकिण्कत।

किष्किन्ध(न्धा) पु० ओड्रदेशस्थे पर्वतभेदे। तत्रत्यगुहायां स्त्री०।

किष्कु पु० स्त्री० किण्क-उ। द्वादशाङ्गुलिपरिमाणे, प्रकोष्ठदेशे, हस्तपरिमाणे च।

किष्कुपर्व्वन् पु० किष्कुमितं पर्व यस्य। वृक्षे, वंशदण्डे, माट नले च (नाड़ा)।

किसलय पु० न० किञ्चित् सलति सल-गतौ कयन् पृ०। पल्लवे।

कीकट पु० किञ्चित् कुत्सितं कटति पृ०। अन्ये। मगधदेशे ब० व० च "कीकटेषु गया पुण्येति पुराणम्। कृपणे, निर्द्धनेच त्रि०।

कीकस पु० कीति कथति कथ-शब्दे अच्। चण्डाले।

कीकस पु० कीति कसति कस-गतौ अच्। अस्थिभेदे अस्थि न० कठिने त्रि०।

कीकि पु० पु० कीति शब्दं कायति कै। चाषपक्षिणि।

कीचक पु० कीत्यव्यक्तं चकति चक-क्याद्यौ अच्। दैत्यभेदे, "की-चका नाम ते वंशा ये स्वनन्त्यनिलाहताः" इत्युक्ते वेणुभेदे (तल-ताँश) विराटराजश्याले, केकयाधिपे नृपभेदे च।

कीचकजित् पु० कीचकं जितवान् जि-भूते क्विप्। भीमसेने एवं कीचकभिदादयोऽप्यत्र। [अचीकिटत्-त।

कीट वर्णे च चुरा० उभ० सक० सेट्। कीटयति ते

कीट पु० कीट–अच् । क्रमिभ्यः स्वार्थे सुडनुनासौ । स्वार्थे कन् । तत्रार्थे मागधजातौ च । कठिने त्रि० ।

कीटघ्न पु० कीटं हन्ति हन–टक् । गन्धके ।

कीटजा स्त्री० कीटेभ्यो जायते जन–ड । लाक्षायाम् ।

कीटमणि पु० कीटेषु मणिरिव । खद्योते ।

कीदृश् पु० किम्+दृश–क्विप् किमः की० । किंप्रकारे । ट । कीदृशः । क्स । कीदृक्षोऽप्यत्र ।

कीनाश पु० कुत्सितं नाशयति किन्नाति नि० । यमे, "कीनाशनिर्ऋ-तनासत्यमिति माधः वानरभेदे, कर्षके पशुघ्ने, क्षुद्रे च ।

कीर पु० कीर्यति हिंस्यते कॄ–अच् । शुकपक्षिणि, देशभेदे ब० व० । मांसे न० ।

कीर्ण त्रि० कॄ–क्त । व्याप्ते, निक्षिप्ते, विक्षिप्ते च ।

कीर्त्तना स्त्री० चुरा० उभ० युच् टाप् । यशसि ।

कीर्त्ति स्त्री० पु० कृत–क्तिन् । यशसि ।

कीर्त्तित त्रि० पु० कृत–क्त । कथिते–ख्याते च ।

कीर्त्तिशेष पु० कीर्त्तिरेव शेषः । मरणे । ब० । मृते त्रि० ।

कील बन्धे भ्वादि० पर० सक० सेट् । कीलति अकीलीत् ।

कील पु०स्त्री० कील–क । अग्निशिखायाम् । वारणे घञ् । यज्ञे, बन्धे, कफोणौ स्तम्भे, लेखे च ।

कीलक पु० कील+स्वार्थे संज्ञायां वा कन् । कीलार्थे, गवां दोहनार्थं बन्धनस्तम्भे, गवां कण्डूयनार्थे स्तम्भे च ।

कीलाल न० कीलां वह्निशिखामलति वारयति अल् । जले, रुधिरे च । कीलामौर्वाग्नेः शिखां लाति ला–क । अन्नाते । कीलेन प्रतिबन्धेन अल्यते वार्य्यते अल–घञ् । मद्यौ पु० ।

कीलित त्रि० कील–क्त । बद्धे । भावे–क्त । बन्धे न० ।

कीश पु० कस्य वायोरपत्यम् अत इञ् किः हनुमान् ईशो यस्य । वानरे । [ङीप् । कीशपर्णीत्यप्यत्र ।

कीशपर्ण पु० कीशः तल्लोमेव पर्णमस्य । अपामार्गे । जातित्वे

कु शब्दे भ्वा० आत्म० सक० अनिट् । कवते अकोष्ट ।

कु आर्त्तस्वरे तुदा० आत्म० सक० अनिट् । कुटादि । कुवते अकुत ।

कु शब्दे अदा० पर० अक० अनिट् । कौति अकौषीत् ।

कु अव्य० कु+डु । पापे, निन्दायाम्, ईषदर्थे, निवारणे च । भूमौ, धरावाच्च स्त्री० ।

कुक आदाने भ्वा० आत्म० सक० सेट् । कोकते । अकोकिष्ट ।

कुकील पु० कौः पृथिव्याः कील इव स्तम्भहेतुत्वात् । पर्वते ।

कुकुट पु० कौ कुटति कुट-क । (मुर्गा) इति ख्याते पक्षिभेदे ।

कुकुद पु० सत्कारपूर्वकमलङ्कृतकन्याप्रातरि ।

कुकुन्दर पु० कुं भूमिं दारयति अन्तर्भूतण्यर्थे द-अण् नि० । वृक्षित कुन्दरमल, स्कुद्यते कामिनाऽत्र स्कुद् नि० वा । स्त्रीणां नितम्बस्थे आवर्त्तकारे पृष्ठवंशादधोगर्त्तद्वये ।

कुकुर पु० कुं पृथिवीं कुरति कुर-क । यदुवंशीयनृपभेदे तेषां यथातिशापात् राज्यं नास्तीति पुराणकथा । कुत्सितः कुरः इति माधवः । दशार्हे देशभेदे ब० व० ।

कुकूल न० कौः भूमेः कूलं कुत्सितं वा कूलम् क-ऊलच् धातोः कुत्वागमश्च । तुषानले, शङ्कुनिः नद्यादीर्णे गर्त्ते, वर्त्मनि च ।

कुकोल न० कुत्सितं कोलति कुल-अच् । कोलिदृक्षे ।

कुक्कुट पु० कु-किप् युक् तेन कुटति कुट-क । (कुकड़ा) ख्याते खगे, तृणोल्कायां, वनकुक्कुटे, वल्लिस्फुलिङ्गे च स्वार्थे कन् । तत्रैव "शूद्राज्जातो निषादायां स वै कुक्कुटकः स्मृत" इति मनूक्ते सङ्कीर्णवर्णे । स्त्रियां ङीष् ।

कुक्कुटमस्तक पु० कुक्कुटस्येव मस्तकं यस्य । चञ्चे (चट) ।

कुक्कुटव्रत न० ज्येष्ठ भाद्रशुक्लसप्तम्यां सन्तानार्थं स्त्रीभिः कर्त्तव्ये व्रतभेदे ।

कुक्कुटशिख पु० कुक्कुटस्य शिखेव शिखा यस्य । कुसुमवृक्षे तस्य हि पुष्पाणि कुक्कुटशिखातुल्यानि ।

कुक्कुभ पु० कुक् इत्यव्यक्तं शब्दं कौति कु-भक् । वनकुक्कुटे ।

कुक्कुर पु० कोचते क्विप् कुरति शब्दायते कुर-शब्दे क कर्म० । कुक्कुरनामख्याते । पशौ । पर्य्यायपर्व्वते पु० ।

कुक्कुरदु पु० कुक्कुरस्याधे यो दुर्दुचः शाक० । (कुकुरसोंघा) वृक्षभेदे ।

कुक्कुवाच् पु० कुक्कु इत्यव्यक्तं वाक् यस्य । वारकुक्कुटे ।

कुक्षि पु० कुक्ष-क्सि । उदरे, उदरस्य वामदक्षिणपार्श्वयोश्च (कोंख) ।

कुक्षिम्भरि त्रि० कुक्षिं बिभर्त्ति भृ-डु-मुम् च । देवातिथिषु यज्ञे-नात्मोदरमात्रपूरके ।

कुक्षिरन्ध्र न० कुक्षेरिव रन्ध्रं छिद्रं यत्र । नले ।

कुङ्कुम न० कुक्यते आटीयते कुक-उमक् नि० मुम् । काश्मीरदेशजे खनामख्याते गन्धद्रव्ये । [क्षिख्याते पर्व्वतभेदे ।

कुङ्कुमाद्रि पु० कुङ्कुमख्याकरः अद्रिः । काश्मीरदेशस्थे कुङ्कुमोत्प-

कुच रोषे, सम्पर्के, लेखने च सक० कौटिल्ये अक० तु० पर० सेट् कुटादि । कुचति अकुचीत् चुकोच ।

कुच उच्चे भस्मे भ्वा० पर० अक० सेट् । कोचति अकोचीत् ।

कुच पु० कुच-सम्पर्के-अच् । स्तने ।

कुचन्दन न० कुत्सितं गन्धहीनत्वात् चन्दनम् । रक्तचन्दने, (वकम्) वृक्षभेदे च ।

कुचफल पु० कुचाविव फलमस्य । दाड़िम्बवृक्षे ।

कुचर त्रि० कुत्सितं चरति चर-अच् । परदोषकथनशीले ।

कुचेला स्त्री० कुत्सितं चेलमिव पत्रमस्याः शिल्पकर्णवृक्षे गौरा० ङीष् । अम्बष्ठायां (आकनादि) । कोजिया, कुक्षा ।

कुज क्षेपे, भ्वा० पर० सक० सेट् उदित् । कोजति अकोजीत्

कुज पु० कौ पृथिव्यां जायते जन-ड । मङ्गलवृक्षे, नरकासुरे, वृक्षमात्रे च । सीतायां कात्यायन्याञ्च स्त्री० ।

कुज्झटि(टी) स्त्री० कु-क्विप् कुत् झट-संहतौ इन्, वा ङीष् । (कुवासा) नीहारे ।

कुञ्चन न० कुन्च-ल्युट् । कौटिल्ये अनादरे च "बालाद्यावर्द्धस-ङ्कोचं जनयन्ति यदा मलाः । तदा द्रष्टुं न शक्नोति कुञ्चनं नाम

शब्दे हरिद्रायुक्ते नेत्ररोगभेदे च । स्वार्थे कन् । कुरेरकौ ।

कुक्षि पु० कुत्सितं क्षियति निवसति अत्र कुत्सितं क्षियति हिनस्ति वा कुक्षि । अष्टसुदिर्भवेत् कुक्षिः कुक्षयोऽष्टौ च पुष्कलम्" इत्युक्ते मानभेदे ।

कुक्षिका स्त्री० कुक्षि—स्वार्थे कन् टाप् । लघुजीरके, (कुचें) इति ख्याते गन्धद्रव्यभेदे (कनची) वंशशाखायां, तालकोद्घाटने वस्त्रभेदे (काढी) उद्घाटिनी कुक्षिकेति प्रसन्नराघवम् ।

कुक्षित न० कुक्षि—क्त । तगरपुष्पे । वक्रे, सङ्कुचिते च त्रि० ।

कुक्ष्य पु० कौ पृथिव्यां जायते जन—ड पृ० । हस्तिहनौ, समन्तान्नता-दिभिराच्छादिते मध्यशून्ये पर्वतादेः स्थानभेदे पु० न० ।

कुञ्जर पु० कुङ्क+अस्त्यर्थे र । हस्तिनि ।

कुञ्जरच्छाय पु० "योगोमघात्रयोदश्यां कुञ्जरच्छायसंज्ञकः । भवे-न्मघायां संस्थे च शशिन्यर्के इत्युक्ते योगभेदे ।

कुञ्जरपिप्पली पु० कुञ्जर इव स्थूला पिप्पली । गजपिप्पल्याम् ।

कुञ्जराशन पु० कुञ्जरैरश्यते अश—भक्षे ल्युट् । अश्वत्थवृक्षे ।

कुञ्जल न० कुत्सितं जलं यत्र पृ० । काञ्जिके । (आमानि) ।

कुट कौटिल्ये तुदा० पर० सक० सेट् कुटादि । कुटति अकुटीत् चुकोट ।

कुट प्रतापने चुरा० आत्म० सक० सेट् । कोटयते अचूकुटत ।

कुट वैकल्ये भ्वा० इदित् पर० अक० सेट् । कुण्टति अकुण्टीत् ।

कुट पु० कुट—अच् दुर्गे (गड़) पर्वते, वृक्षे च । घटे पु० न० । टहे स्त्री० ङीप् । शिलाकुट्टे अस्त्रे पु० । अत्र कुट्ट इत्ये-वेत्यन्ये ।

कुटङ्ग पु० कुटं टङ्कं करोति ड पृ० । टङ्काच्छादने, (चाल) गिरि-सन्निकटे च ।

कुटज पु० कुटे पर्वते जायते जन—ड । (कुड़ची) वृक्षभेदे यस्य फलम् इन्द्रयवः । कुटे घटे जायते । अगस्त्यमुनौ द्रोणाचार्ये च ।

कुटजबीज न० क्लीं० । इन्द्रयवे ।

कुटन्नट पु० कुटन् वक्रोभवन् नटति । श्योनाकवृक्षे । सुश्लके न० ।

कुटप पु० कुट–कपन् । मुनौ । अकृतमौषधस्योपयोगे, कुड़वरूपमाने-
भेदे च । मद्ये न० ।

कुटि पु०कुट–इन् । वृक्षे, देहे, जले च । अ ह्रस्वे स्त्री० वा ङीप् ।

कुटिचर कुटौ जले चरति चर–अच् । वारिचरे शूकरे ।

कुटी(टि)र पु० अल्पा कुटी ईरन् । पर्णशालादौ (कुँड़े) ।

कुटिल त्रि० कुट–इलच् । वक्रे, भङ्गुरे च । तगरपुष्पे न० ।

कुटिलग पु० कुटिलं गच्छति गम–ड । सर्पे । नद्यां स्त्री० टाप् ।
वक्रगामिनि त्रि० । [अच् । यतिभेदे ।

कुटि(टी)च(र)क पु० कुट्यां कुटौ वा चरति, चकति तिष्ठति । वा क

कुटुम्ब पु० न० कुटुम्ब–अच् । पोष्यवर्गे बान्धवे, सन्ततौ, द्वितीय-
गृहे च ।

कुटुम्ब एतौ चुरा० आत्म० अक० सेट् । कुटम्बयते अचुकुटुम्बत ।

कुटुम्बिनी स्त्री० कुटुम्ब+इनि । पतिपुत्रादियुतायां प्रशंसितायां
स्त्रियाम् । [अचुकुटत् त ।

कुट्ट छेदने, निस्ने च अट० चुरा० उभ० सक० सेट् । कुट्टयति–ते

कुट्ट प्रतापने अट० चुरा० आत्म०सक० सेट् । कुट्टयते । अचुकुट्टत ।

कुट्टक पु० कुट्ट–ण्वुल् । लीलावत्यादौ प्रसिद्धे गणिते अङ्कभेदे ।
छेदके त्रि० ।

कुट्टनी स्त्री० कुट्ट–ल्युट् ङीप् । (कुटनी) परपुरुषेण सह परस्त्रियाः
सनामसंकारयितर्याम् ।

कुट्टमित न० "कोशस्तनाधरादीनां यत्रे कूर्मेऽपि सम्भ्रमात् । प्राज्ञैः
कुट्टमितं नाम शिरःकरविधूननमित्युक्तं स्त्रीणां विलासभेदे ।

कुट्मल पु० न० कुट–कमलच् । मुकुले विकासोन्मुखकलिकायाम् ।
नरकभेदे न० यत्र रज्जुभिर्यन्त्रणा नारकिभ्यो दीयते ।

कुठ छेदने सौत्रः पर० सक० सेट् । कोठति अकोठीत् ।

कुठ वैकल्ये आलस्ये अक० मोचने सक० च रुदित् भ्वा० पर० सेट् ।
कुण्ठति अकुण्ठीत् ।

कुठ पु० कुठ–अच् । वृक्षे ।

कुठर पु० कुठ–अरच् । अन्नवदनुवन्नवर्णवस्त्रे । [वृक्षे पु०।
कुठार पु० स्त्री० कुठ–आरन् । अस्त्रभेदे (कुड़ाल) स्त्रियां ङीप् ।
कुठाह पु० कुठ–काहन् । वानरे, वृक्षे, अस्त्रकारे च ।
कुठेर पु० कुठ–एरक् । श्वेतसुरसायाम्, वन्नौ, (गाबुर) इतिख्याते वृक्षे च । स्वार्थे कन् । (गावुरतुलसी) इति वृक्षे ।
कुड वैकल्ये भ्वा० इदित् पर० अक० सेट् । कुण्डति अकुण्डीत् ।
कुड दाहे भ्वा० इदित् आत्म० सक० सेट् । कुण्डते अकुण्डिष्ट ।
कुड रचणे चुरा० इतित् उभ० सक० सेट् । कुण्डयति ते अचुकुण्डत् त ।
कुड अदने सक० बाल्ये अक० तुदा० पर० सेट् । कुटादि । कुडति अकुडीत् चुकोड़ । [भाषभेदे ।
कुडप(व) पु० कुड–कपन् (कवन्) वा । प्रस्थचतुर्थांशरूपे परि–
कुड्मल पु० न० कुड–कमलच् । विकाशोन्मुखकलिकायां, वरकभेदे न० ।
कुड्य न० कुड–यत् । भित्तौ, विलेपने च । [दार्ढ्यं चौर्य्यं क्रियते ।
कुड्यच्छेदिन् पु० छिद्–णिनि ह्रस्व० । चौरे येन कुड्यभित्तिं वि–
कुड्यच्छेद्र न० कुड्यं छेद्यं यस्य । खनके ।
कुण आभाषणे, शब्दणे च अदा० चु० उभ० सक० सेट् कुणयति ते अचुकुणत् त । [अकोषीत्
कुण उपकरणे शब्दे च तुदा० पर० सक० सेट् । कुणति
कुणप पु० कण–कपन् संप्रसारणञ्च । त्यक्तप्राणे मृतदेहे शवे, पूति-च वहति त्रि० । गौरा० ङीष् । विट्सारिकायाम् (शुआसालिक)।
कुणि पु० कुण–इन् । मुखरन्ध्रे (तुंड) कुत्सितकरे त्रि० ।
कुण्ठ त्रि० कुठि–अच् । क्रियासु मन्दे, अकर्म्मण्ये, मूर्खे च । एषु । कुण्ठकः । मूर्खे ।
कुण्ड पु० कुण्डयते कुडि भदे, कुडि–दाहे वा घञ् । जीवति भर्त्तरि जारजे पुत्रे मानभेदे पात्रे, जलाशये च । होमीयाग्निस्थाप-नस्थानभेदे पु०न० । ङीप् । स्वार्थे स्त्री० ।

कुण्डपाय्य पु० कुण्डेन पीयते सोमोऽस्मिन् यज्ञभेदे ।

कुण्डल न० कुडि दाहे रक्षणे वा कलच् कर्णभूषणे, वेष्टने, धात्रीफले, वलये च ।

कुण्डलना स्त्री० कुण्डलं वेष्टनं करोति णिच् ततो युच् । वेष्टने "विधमां कुण्डलनावशायिते" ति नैषधम् तन्नामप्रसिद्धे मल्लाधारस्थिते यन्त्रिभेदे (जिलिपी) इति ख्याते पक्वान्नभेदे गुडचोलतायां सर्प-जातिस्त्रियाञ्च ।

कुण्डलिन् पु० कुण्डल+अस्त्यर्थे इनि । सर्पे ।

कुण्डलिनी स्त्री० कुण्डलं वलयाकारवेष्टनमस्त्य इनि । सर्पाकारेण लिवेष्टनयुते तन्नामप्रसिद्धे यन्त्रिभेदे, सर्प्यां च ।

कुण्डिका स्त्री० कुण्ड+संज्ञायां कन् । कमण्डलौ, स्थाल्याञ्च (कुड़ि) ।

कुण्डिन पु० कुडि-इनच् । मुनिभेदे विदर्भनगरे, देशभेदे च ।

कुतप पु० कुत्सितं तपति तप-अच् । सूर्ये, वह्नौ, ब्राह्मणे, अतिथौ, गवि, भागिनेये, दौहित्रे च । वाद्ये, नेपालकम्बले, कुशतृणे, पञ्चदशधाविभक्तदिनस्याष्टमांशे काले च अस्त्री० । स च मध्याह्नात् पूर्वोत्तरदक्षण्डद्वयात्मकः मुहूर्त्तरूपः कालः ।

कुतस् अव्य० किम्+तसिल् कादेशश्च । कस्मादित्यर्थे, प्रश्ने, निश्चये च ।

कुतुक न० कुत्सं चर्मनिर्म्मितत्वेन हेयपात्रमिव कायति कै-क पृषो० ह्रस्वः । फलनिरपेक्षतया चिकीर्षिते कौतुके ।

कुतुप पु० ह्रस्वाः कुत्सः डुपच् । अल्पे चर्ममये घृतादिक्षेपपात्रे (कुपो) ।

कुतुम्बुरु न० कुत्सितं तुम्बुरु कुगतिः । कुत्सिततिन्दुकफले ।

कुतू स्त्री० कुत्सितं तन्यते तन-कू । चर्मनिर्म्मिते घृतादिक्षेपपात्रे (कुपा)।

कुतूहल न० कुत्सं चर्ममयं क्षेपपात्रं हलति लिखति हल-अच् । अपूर्ववस्तुदिदृक्षातिशये चेष्टाभेदे, फलनिरपेक्षतया चिकीर्षिते कौतुके च । प्रश्ने, आश्चर्य्ये च त्रि० ।

कूतृण न० कुत्सितं तृणं कुगतिः । (घासा) कुत्सायाम् ।

कुत्र अव्य० किम्+त्रल् आदेशः। कस्मिन्नित्यर्थे। ततश्चित्। कुत्रचि-
चिदित्यप्यत्रार्थे।

कुत्स निन्दने चुरा० आत्म०सक० सेट्। कुत्सयते अचुकुत्सत।

कुत्सा स्त्री० कुत्स-अ टाप्। निन्दायाम्, परिवादे च।

कुत्सित न० कुत्स-क्त। कुष्ठनामौषधे (कुड)। निन्दिते त्रि०।

कुथ क्लेषे (कोथ) दृदिस् आदि० अक० सेट्। कुथ्नति अकुथ्नीत्।

कुथ पूतिगन्धे दिवा० पर० अक० सेट्। कुथ्यति अकोथीत्।

कुथ पु० स्त्री० कुथ-अच्। हस्तिपृष्ठस्थे चित्रकम्बले "कुथेन गात्रे-
भूमिवेष्टवाइनमिति" आधः स्त्रियां टाप्। कुथास्थे पु०।

कुदाल पु० कुं भूमिं दलयति विदारयति दल-अण्। (कोदाल)
भूमिखननसाधने अस्त्रभेदे।

कुदृष्टि स्त्री० कुत्सिता वेदबाह्या दृष्टिस्तर्कादिरूपा कुमतिः। वेदबा-
ह्यतार्किककल्पनायाम्। "यास्य सा कुदृष्टय" इति मनुः।

कुद्दाल पु० न० कुं भूमिमुद्दलयति उद्+दल-अण् सक०। कोवि-
दारवृक्षे, काकनासायाञ्च, भूमिखननसाधनेऽस्त्रे (कोदाल) न०।

कुनख पु० कुत्सितनखकारके रोगभेदे। तथा नखयुक्ते जने त्रि०।

कुनखिन् त्रि० कुनख+अस्त्यर्थे इनि। कुनखरोगयुक्ते कुत्सितनख-
युक्ते जने च। [कारके त्रि०।

कुनट पु० कुत्सितं नटति नट-अच्। म्लेच्छजातौ। कुत्सितनाट्य-

कुनटी स्त्री० कौ नटति अच् गौरा० ङीष्। मनःशिलायाम्।

कुनली स्त्री० कोः पृथिव्या नलइव गौरा० ङीष्। वल्मीके।

कुनाशक स्त्री० कुं नाशयति नश-णिच्-ण्वुल्। दुरालभायाम्।

कुनृत्त अनादरे च भ्वा० पर० सक० सेट्। कुनृत्यति अकुनृत्सीत्।

कुन्त पु० कुं भूमिं सुनत्ति उन्द्-त्र सक०। गवेधुकायां (गड़गडे)
धान्ये, प्रासाख्यायुधे, भल्ले च।

कुन्तल पु० कुत्सं कुत्सा आकारं लाति ला-क। केशे, मानभेदे,
जवे, कुशे च जनपदभेदे ब० व०। [सस्नेहनेन हि केशवृद्धिः।

कुन्तलवर्द्धन पु० कुन्तलान् वर्द्धयति वृध-णिच् ल्यु। भृङ्गराजे तद्-

कुन्ति पु० कम–क्तिच् ङ्ङ०। देशभेदे। युधिष्ठिरादिमातरि स्त्री० वा ङीष्। वा च शूरसेनराजस्यौरसी पृथानाम्नी कन्या अनपत्यतया कुन्तिभोजाय पित्रा अपत्यकल्पाय दत्ता।

कुन्द लोचे स्तवे च भ्वादि० पर० अक० सेट्। कुन्दति अकुन्दीत्।

कुन्द पु० कुं भूमिं दायति खण्डति या दै–दो–वा क वि० कुम्। (कुंद) पुष्पवृक्षे कन्दुकलागवस्त्रभेदे च मेदिनी, (कुंद) कुबेरस्य निधिभेदे, करवीरवृक्षे च।

कुन्दुरु पु० कुं भूमिं दुनक्ति अल्पादित्वात् नि०। सुगन्धिद्रव्यभेदे।

कुन्दुरुकी स्त्री० कुन्दुरुरिव प्रतिकृतिः कन् गौरा०। यक्षकीटके।

कुप आच्छादने क्रुदित् वा चुरा० उभ० पक्षे भ्वादि० पर० सक० सेट्। कुप्यति ते कुप्पति अचुकुप्पत् त अकुप्पीत्।

कुप इत्येके चुरा० उभ० सक० सेट्। कोपयति ते अचूकुपत् त।

कुप कोपे दिवा० पर० अक० सेट्। कुप्यति अकुपत्–अकोपीत्।

कुपाणि त्रि० कुत्सितः पाणिरस्य ब०। वक्रहस्ते।

कुपिन्द पु० कुप–किन्दच्। तन्तुवाये।

कुपीलु पु० कुत्सितः पीलुः। कासेन्दौ (कुचला)।

कुपूय त्रि० कुत्सितं पूयते पूय-विसरणे अच्। लालाचारादिनिन्दिते।

कुप्य न० कुप–क्यप् नि०। स्वर्णरूपाभ्यामन्यस्मिन् तैजसादौ उपधातौ, (दस्ता) इति ख्याते धातौ च।

कुब्ज क्रुदित् स्तुतौ वा० चुरा० उभ० पक्षे भ्वा० पर० सक० सेट्। कुब्जयति ते कुब्जति अचुकुब्जत् त अकुब्जीत्।

कुबेर वेरर पु० कुब्जति धनं एरक् नलोपश्च। यक्षराजे नन्दीश्वरे च। कुत्सितं वेरं देहोऽस्य। "कुब्जायां क्षितिमन्दोऽयं शरीरं वेर-मुच्यते। कुवेरः कुशरीरत्वादित्यवर्ण्यसमध्योऽयम्। कुत्सितशरीरे न०। मन्दे त्रि०। [प्राटसाटके, लताकरञ्जे च।

कुबेराक्षी स्त्री० कुबे(ब)रस्याक्षीवाक्षि पुष्पमस्याः अच् ङीष्।

कुब्ज पु० ईषत् उन्नमार्जवमस्य अक०। खड्गे, अपामार्गे च। "कुब्जं हृदयं यदि वा पृष्ठमुन्नतं क्रमशः सक्थ्। कुब्जो वायुछेदा. कुष्ठी-

त्तदा तं कुजमादिशेत्" इत्यद्भुतसागरोक्तवति जने (कुजो) त्रि० ।

कुञ्जक पु० कुञ्ज+कन् । कुञ्जे । मञ्चाशके पुष्पप्रधाने वृक्षे च तत्पुष्पे न० । "अधोकात् पुष्पमाहस्तात् सेवतीपुष्पमुत्तमम् । सेवतीपुष्पमाहस्तात् कुञ्जकं पुष्पमुत्तममिति नारसिंहम् । [कुमारत् त ।

कुमार क्रीडौ अद० चुरा० उभ० अक० सेट् । कुमारयति ते अचु-

कुमार पु० कुमारयति क्रीडति, कुत्सितो मारो यस्मात्, कौमारयति दुष्टान् वा । शुके पक्षिणि, कार्त्तिकेये, नाट्योक्तौ युवराजे, अश्व-वारके, सिन्धुनदे, वरुणवृक्षे, पञ्चवर्षीये, बालके च । स्त्रियां ङीप् ।

कुमारभृत्या स्त्री० भृ—क्यप् ह्रस्व० । प्रसवकाले गर्भिण्याः परिच-र्य्यायाम् । "कुमारभृत्याकुशलै"रिति रघुः ।

कुमारिका स्त्री० कुमार+वयसि प्रथम इति ङीप् ततः स्वार्थे कन् । पञ्चवर्षीयायां अविवाहितायां कन्यायाम्, नवमल्लिकावृक्षे, भारत-वर्षस्य खण्डभेदे च "वर्षं व्यवस्थितिरिहैव कुमारिकाख्ये इति सिद्धान्तशिरोमणिः ।

कुमारी स्त्री० कुमार+ङीप् । नवमल्लिकायाम्, हतकुमार्य्यां नदी-भेदे, अपराजितायां वन्ध्याकर्कोट्यां स्थूलैलायां वरुणवृक्षे "संप्राप्ते द्वादशे वर्षे कुमारीत्यभिधीयते" इति स्मृत्युक्तायां द्वादशवर्षीया-यां अनूढायां कन्यायाम्, श्यामापिप्पलिषु च ।

कुमाल क्रीडौ अद० चुरा० उभ० अक० सेट् । कुमालयति ते अचुकुमालत् त ।

कुमालक पु० कुमाल—एवुल् । सौवीरदेशे । [अप्रीते च त्रि० ।

कुमुद् न० कौ भूमौ मोदते हृद—किप् । कैरवे, रक्तोत्पले च । हरिणे,

कुमुद न० कौ भूमौ मोदते हृद—क । कैरवे, कह्लारे, (कोइ) श्वेतो-त्पले च । वानरभेदे, दैत्यभेदे, कर्पूरे च पु० ।

कुमुदबान्धव पु० हृत० । चन्द्रे तस्य कुमुदप्रकाशकत्वेन तद्बान्धव-त्वम् एवं तन्नाथादयोऽप्यत्र कर्पूरे च ।

कुमुदा स्त्री० कौ भूमौ मोदते हृद—क टाप् । (पाना) वारिपर्ण्याम्, गाम्भारीवृक्षे, शालपर्णीवृक्षे, धातकीवृक्षे कट्फले च ।

कुमुदाभिख्य न० कुमुदस्येवाभिख्या शोभा यस्य । रजते ।

कुमुदिनी स्त्री० कुमुदानां समूहः इनि । कुमुदसमूहे । अस्यर्थे इनि । कुमुदयुक्तपुष्करिण्यादौ कुमुदवतायाञ्च ।

कुमुद्वत् त्रि० कुमुदानि प्रायाण्यस्मिन् इमतुप् मस्य वः । कुमुदयुक्तदेशे । स्त्री० ङीप् । कुमुदिन्याम् ।

कुम्भ पु० कुं भूमिं मुत्तमं वा उम्भति उनुभ पूरणे अच् शक० । घटे द्रोणभेदे, हस्तिशिरःस्थमांसपिण्डद्वये, "तैः किं मत्तकरीन्द्रकुम्भकुहरे" इति प्रसन्नराघवम् । कुम्भकर्णस्य पुत्रे, वेश्यापतौ, प्राणायामाङ्गे श्वासरोधके चेष्टाभेदे, "दश द्रोणा भवेत् खारी कुम्भस्तु द्रोणविंशतिरित्युक्ते परिमाणभेदे" धान्यं दशभ्यः कुम्भेभ्योऽरतोऽभ्यधिकमिति स्मृतिः । ज्योतिषप्रसिद्धे मेषावधिके एकादशराशौ च । गुग्गुलौ, त्रिवृति च न० ।

कुम्भक पु० कुम्भ इव कायति निश्चलतया प्रकाशते कै—क । "त्यागसंरोधने हित्वा निरोधः कुम्भकः स्मृत" इत्युक्ते श्वासप्रश्वासत्यागेन प्राणवायोर्निरोधरूपे प्राणायामाङ्गे योगशास्त्रादौ प्रसिद्धे व्यापारे ।

कुम्भकर्ण पु० कुम्भ इव कर्णावस्य । रावणानुजे राक्षसभेदे ।

कुम्भकार पु० कुम्भं करोति कृ, अण् उप० । जातिभेदे ककुभपत्तिषि च ।

कुम्भकारिका स्त्री० कुम्भ-कृ-ण्वुल् । कुलत्थायाम् (कुलथकलाई) ।

कुम्भकारी स्त्री० कुम्भ+कृ—अण् ङीप् मनःशिलायां, कुलत्थाक्षुपे, कुम्भकारपत्न्याञ्च ।

कुम्भतुम्बी स्त्री० कुम्भाकारा तुम्बी । (गोलालाउ) अलाबुभेदे ।

कुम्भयोनि पु० कुम्भो योनिरुत्पत्तिस्थानं यस्य । अगस्त्यमुनौ कुम्भयोनेर्महौजस इति रघुः । द्रोणाचार्य्ये, द्रोणपुष्पाञ्च । कुम्भसम्भवादयोऽप्यत्र ।

कुम्भशाला स्त्री० कुम्भस्य पाकशाला ६त० । कुम्भादिपाकस्थाने [(कुमारशाला) ।

कुम्भाण्ड पु० कुम्भाकारः अण्डः । कुष्माण्डे, बाणासुरमन्त्रिणि च गौरा० ङीष् कुम्भाण्डी स्त्री० कुम्भाण्डे ।

कुम्भिका स्त्री० कुम्भ+अस्त्यर्थे ठन् । (थाना) वारिपात्रास्थाम्, पाटला-वृक्षे, द्रोणपुष्पे च ।

कुम्भिन् पु० कुम्भ+अस्त्यर्थे इनि । हस्तिनि, कुम्भीरे शुग्रुवौ च ।

कुम्भिल पु० कुम्भ+अस्त्यर्थे इलच् । चौरे शालमत्स्ये, श्लोकार्थचौरे, व्याले च ।

कुम्भी स्त्री० कुम्भ—अच् गौरा० ङीष् । उखायां, पाटलावृक्षे, वारिपात्रास्थाम्, पुन्नागे, गणिकारिकायां, कटफले च ।

कुम्भीपाक पु० कुम्भ्यां तैलघटे पाको यस्मिन् । 'परत्र यमानुचरास्तप्ततैले यत्रोपरन्धयति स कुम्भीपाक" इत्युक्तलक्षणे नरकभेदे

कुम्भीर पु० कुम्भिनं हस्तिनमीरयति ईर—अण् । जलजन्तुभेदे नक्रे

कुम्भीरमक्षिका स्त्री० कुम्भीरोपपदा मक्षिका शाक०त० । (कुमीरे पोका) कीटभेदे ।

कुर शब्दे तुदा०पर०अक०सेट् । कुरति अकोरीत् ।

कुरङ्कर पु० कुरं शब्दं करोति क—अच् पृ० सुम् । सारसपक्षिणि ।

कुरङ्ग पु० कौ रङ्गति रङ्ग—अच् । "कुरङ्ग ईषत्ताम्रः स्या द्धरिणाकृतिको महान् इत्युक्तविशेषे मृगभेदे मृगमात्रे च ।

कुरङ्गम पु० कौ रङ्गं मिमीते मा—ड । हरिणभेदे ।

कुरण्ट पु० कुर्य्यते शब्द्यते कुर—अण्टक् । पीतझिण्टयाम् स्वार्थे कन् । अत्रैवार्थे ।

कुरर पु० कवते कुङः—शब्दे क्रन् । उत्क्रोशपक्षिणि ।

कुररी स्त्री० कुरर—ङीष् । कुररपक्षिस्त्रियां, मेघाख्ये ।

कुरल पु० कुर—कलच् । कुररपक्षिणि अलकरूपकेशेषु च ।

कुरव पु० अल्पमकरन्दयत्त्वात्क्लीनार्भीषद् रवो यत्र । रक्तझिण्टयाम्, कुरवके, सितमन्दारे च । कुत्सितशब्दे, बहु० । तथाशब्दयुक्ते त्रि० । ततः स्वार्थे कन् तेष्वर्थेषु (कुडचि) इति ख्याते पुष्पवृक्षे । "कुरवकस्तवक व्यतिषङ्गिणी" ति माघः ।

कुरस पु० कुत्सितोरसोऽत्र । कदम्बे । कुत्सितरसयुक्ते त्रि० । गोजिह्वालतायां स्त्री० टाप् । कुग० । कुत्सितरसे पु० ।

कुरु पु० ब—कु । चन्द्रवंशीयराजभेदे, "हस्तिनापुरमारभ्य कुरुक्षेत्राच्च दक्षिणे । पञ्चालपूर्वभागे तु कुरुदेशः प्रकीर्त्तितः" इत्युक्ते देशभेदे ब० व० । ओदने, कण्टकारिकायाम् । नवखण्डात्मकस्य जम्बुद्वीपस्य वर्षभेदे च पु० ।

कुरुक्षेत्र न० कुत्सितं रौति कुरु पापं कर्म्म तस्य क्षेपणात् अपाकरणात् क्षेत्रम् "तरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानाञ्च सचक्रुकस्य । एतत् कुरुक्षेत्रसमन्तपञ्चकं प्रजापतेरुत्तरवेदिरुच्यते इत्युक्ते देशे तद्धि कुरुपाण्डवानां युद्धभूमिः । [अत्रैवार्थे ।

कुरुण्ट पु० कं कण्टति कुटि—स्तोके अण् । पीतझिण्टायाम् । एवुल् ।

कुरुवक पु० ईषत् रौति रवशब्दे संज्ञायां कन् उवङ् । रक्तझिण्टायाम्, पीतझिण्टायाञ्च ।

कुरुविन्द पु० कुरून् विन्दति विद—अ सुचादित्वात् सुम् । सुक्तायां, कर्णभूषे, दर्पणे, झिङ्गुलेच । पद्मरागमणौ न० ।

कुरुविल्व पु० कुरुषु विल्वद्रुः । पद्मरागमणौ (माणिक)

कुरुविन्द पु० कुरुषु विन्दः । चतुस्तोलकमिते स्वर्णे ।

कुरुवृद्ध पु० कुरूणां जनपदानां राजानः तद्राजस्य तद्धितस्य बहुषु लुक् तेषु कुरुषु वृद्धः । भीष्मे ।

कुरूप्य न० ईषत् रूप्यं शुभ्रत्वेन सादृश्यात् । रङ्गनामके धातौ ।

कु(कू)ई क्रीड़ायां भ्वा०आत्म० अक० सेट् । कु(कू)ईते अकु(कू)ईष्ट ।

कु(कू)ईन न० कु(कू)ई—ल्युट् । क्रीड़ायाम् । [कफोदौ च ।

कुर्पर पु० कुर—किच् कुर् प्रिपर्त्ति व्यच् परः कर्म्म० । जानुनि, ।

कुर्पास पु० न० कुर्परे अस्यते आस्ते वा घञ् पृ० । स्त्रीणां कञ्चुलिकायां (कांचुली) स्वार्थे कन् । अत्रैवार्थे ।

कुर्व्वत् त्रि० कृ—शतृ । कर्म्मकरे भृत्ये, कारके च ।

कुर्व्वद्रूप पु० कुर्वत् फलोत्पत्तिं रूपं यस्य । बौद्धमतसिद्धे फलजननाय योग्ये धान्यादौ बीजे ।

कुल बन्धे संहतौ च भ्वा०पर० अक० सेट् । कोलति अकोलीत् ।

कुल न० कुल—क । वंशे, सजातीयगणे, देशे, गृहे, देहे, तन्त्रोक्ते

जीवादौ, मध्यमकुलद्वयेन क्रध्यमाणायां भ्रूभौ च "दधौ कुकन्तु भ्रुङ्कीतं"ति मनुः। कुले भवे त्रि०। शिल्पिकुलप्रधाने पु०।

कुलक न० कुल—अच् संज्ञायां कन्। घटके, एकवाक्यतापन्ने पद्यादिकश्लोकसमुदाये च। वल्मीके, काकतिन्दुके, कुरुकाण्डे च पु०।

कुलकुण्डलिनी स्त्री० कुलैः कुलाचारैरुपास्या कुण्डलिनी सार्द्धत्रितयवेष्टनाकारवती शक्तिः। तन्द्रशास्त्रप्रसिद्धे मूलाधारस्थिते सर्पीतुल्ये शक्तिभेदे। [पालिकायां स्त्री० टाप्।

कुलज त्रि० कुले सत्कुले जायते जन—ड। सत्कुलोद्भवे। कुल-

कुलटा स्त्री० व्यभिचारार्थं भिक्षार्थं वा कुलानि अटति अट्—अच् शक०। असत्यां पुंश्चल्याम्, भिक्षुक्यां सत्याञ्च।

कुलत्थ पु० कुले—तिष्ठति स्था—क पृ०। कलायभेदे (कुलत्थकलाइ) वनकुलत्थे स्त्री० टाप्।

कुलत्थिका न० कुलत्थ इव कुत्सार्थे कन्। कुलत्थाकृतिनाकारे प्रस्तरभेदे। कन् वनकुलत्थे।

कुलधारक पु० कुलस्य वंशस्य धारकः धृ—णिच् एवुल् वौरसे पुत्रे।

कुलपति ह्व०। "मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात्। अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः" इतिपुराणोक्तलक्षणयुक्तिनि मुनिविशेषे, सैन्यागाध्यक्षे च।

कुलपर्व्वत पु० कौ पृथिव्यां लीयते ली—ड कर्म०। "महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः। विन्ध्यश्च पारिपात्रश्च सप्तैते कुलपर्वताः" इत्युक्तेषु महेन्द्रादिषु पर्वतेषु। कुलाचलादयोऽप्यत्र।

कुलपालक न० कुलं पालयति पाल—ण्वुल्। (कमलालेबु) नारङ्गभेदे। वंशपालके त्रि०। [स्त्रियाम्।

कुलपालिका स्त्री० कुलस्यैव स्त्री नान्यगामिनी। कुलरक्षिकायां सत्यां

कुलाचार ह्व०। कुलोचिते धर्म्मे "जीवः प्रकृतितत्त्वञ्च दिक्कालाकाशमेव च। चित्यप्तेजोवायवश्च कुलमित्यभिधीयते। ब्रह्मचर्य्या निर्विकल्पमेतेष्वाचरणञ्च यत्। कुलाचारः स एवोक्त इत्युक्तरूपे ज्ञाने च।

कुलाय पु० कुलं पक्षिसङ्घातोऽयतेऽत्र अय-घञ्। पक्षिनिलये-नीडे, स्थानमात्रे च। कौ लायोगतिरस्मात्। देहे न०।

कुलायिका स्त्री० कुलाय: पक्षिवासस्थानं विद्यतेऽस्यां ठन्। पक्षि-शालायां (चिड़ियाखाना)।

कुलाल पु० कुल-कालन्, कुलमलति अल-अण् कुलमालाति आ+ला-क वा कुत्वम्। कुम्भकारे, (कुमार) कङ्कुमपक्षिणि च।

कुलाली स्त्री० कुलमलति अल-अण्। नीलोत्पलभेदे, अङ्कुशभेदे, अरण्यकुलत्थिकायाम्, कुम्भकारभार्यायाञ्च।

कुलाह पु० कुलमाहन्ति आ+हन-ड। ईषत् पीतवर्णे कृष्णजातौ अश्वे। ततः संज्ञायां कन् लुकलासे, (राङ्गाकुले (खाड़ा) इति ख्याते शाकभेदे च।

कुलाहल पु० कुलमाहलति अर्हते अच्। (कुरसोड़ा) वृक्षभेदे।

कुलि ल० कुल-इन्। हस्ते। कण्टकार्य्यां स्त्री० वा ङीप्।

कुलिक पु० कुल+अस्त्यर्थे ठन्। अष्टनागान्तर्गतनागभेदे, (कुलो-खाड़ा) इति ख्याते शाके, ज्योतिषोक्ते रव्यादिवारे देवभेदे च। कुलश्रेष्ठे त्रि०।

कुलिङ्ग पु० कौ पृथिव्यां लिङ्गति चरणार्थं गच्छति अच्। चटके, धूम्राटे, (फिङ्गा) भूम्निप्रत्यासत्तया धान्यादिचारिणि खगे च। कुत्सितलिङ्गे न०। ब०। तद्वति त्रि०। स्वार्थे कन् चटके। ङीप् कर्कटशृङ्ग्याम्। [पेटिकायाञ्च।

कुलिङ्गाक्षी स्त्री० कुलिङ्गमिव फलमस्याः षच् समा०। (पेटारी)।

कुलिन् पु० कुल+अस्त्यर्थे इनि। पर्वते। सत्कुलवति त्रि०।

कुलिर(ली)र पु० कुल-इरक् ईरक् वा कर्कटे (कांकड़ा) मेषादि-धिके चतुर्थे राशौ च।

कुलिश पु० न० कुलौ हस्ते शेते शी-ड, कुलिनं पर्वतं श्यति शो-ड वा। वज्रे। कौ लिशति श्लिष्यति लिश-क। अस्थि-संहारवृक्षे, मत्स्यभेदे च। [न्याङ्गु।

कुली स्त्री० कौ लीयते-ड ङीप्। कण्टकार्य्यां, पत्न्यां ज्येष्ठ भगि-

कुलीन पु० कुले आकरे भवः ख। श्रेष्ठकुले। तन्नोत्पन्ने कुलाचारे वर्त्तति, सत्कुलीये च त्रि०।

कुलीनक पु० को भूमौ लीनः लो+क संज्ञायां कन्। वनस्थले।

कुलुत्थ पु० कोलति कुल–क्विप् कुल् उत्थोऽस्मिन् उ०। "अर्द्धखित्थ गोधूमा अर्द्धे च चणवादयः। कुलुत्थ इति कथ्यन्ते इत्युक्तेषु अर्द्धखित्थगोधूमादिषु "स हि कुलुत्थान् खादन् विभित्ते इति स्मृतिः सूर्य्यस्य पारिभाषिकभेदे, मुक्तधान्ये वनादौ च। काष्ठिके मसीपरिणामे च न०।

कुल्य न० कुल–संख्याने क्यप् अस्थि, अष्टद्रोणीरूपपरिमाणे, मृगे, व्याधिभे च। कुले भवः, कुलाय हितो वा यत्। सत्कुलोद्भवे कुलहिते च त्रि० कुल–क्यप् टाप्। क्षत्रियायामल्पनद्याम्, जीवन्त्यामोषधौ, कुलस्त्रियां, स्थूलवार्त्ताकौ च स्त्री०। [च।

कुव न० कुं भूमिं वाति गच्छति वा क। जलजे, पुष्पमात्रे, उत्पले

कुवङ्ग न० कुत्सितं वङ्गम्। सीसके (सीसा) धातुभेदे।

कुवल न० कौ वसते वल संचलने अच्। उत्पले, बुन्नाफले च कोलिवृक्षे स्त्री० ङीप्। बदरीफले न०।

कुवलय न० कोर्वलयमिव शोभाहेतुत्वात्। उत्पले, श्वेतोत्पले नीलोत्पले च, "कुवलयदलश्यामविस्तीर्णदृष्टे" इत्युक्तेः।

कुवलयापीठ त्रि० कुवलयमापीडा भूषणं यस्य। नीलोत्पलभूषणवति जने। कंसासुरस्य कृष्णरूपधारिणि दैत्यभेदे पु०।

कुवाद् त्रि० कुत्सितं वदति अण्। अपरदोषकथनशीले। आवे यङ् कुग०। कुत्सितवाक्ये।

कुविन्द पु० कुं भूमिं विन्दति विद–ग। तन्तुवाये सूचीगर्भे विश्वकर्म्मणो जाते वर्णभेदे च (ताँति)।

कुवृत्तिकृत् पु० कोः पृथ्व्याः वृत्तिं वेष्टनं करोति कृ–क्विप्। (कांटाकरञ्जा) वृक्षे हे०। कुत्सितवृत्तिकर्त्तरि त्रि०।

कुवेणि(णी) स्त्री० कुत्सितं वेणन्ते मत्स्या अस्याम् वेण–इन्, या ङीप्। मत्स्यधान्याम् (खाजुरी)।

कुश पु० न० कौ शेते शी–कुं भावं शेति शी–वा क कुशेति कुश–क वा । खनामख्याते तृणे । कुशोनूत्पन्नगर्भो दर्भवति रामन्तते च "त्रिपुषागशकुनंकुश" मिति रभसः वोक्ते, इतस्ततश्चेषाहते क्षीपभेदे च पु० । जले न० ।

कुश क्षुतौ क्षुदिर् आदि० पर० सक० सेट् । कुंशति अकुंशीत् ।

कुश क्लेशे दि० पर० सक० सेट् । कुश्यति । अकुशत्–अकोशीत् ।

कुशध्वज पु० जनकस्य भ्रातुरुपस्यानुजे भ्रातरि ।

कुशपुष्प न० कुशाकारं पुष्पमस्य अन्विपर्त्ते वृक्षे ।

कुशल न० कुश–कलन् । कल्याणे । तनुति त्रि० । कुशान् लाति ला क । दक्षे त्रि० । कौ पृथिव्यां शलति चलयति कार्य्याणि शल–अच् । कार्य्यचतुरे त्रि० ।

कुशलिन् त्रि० कुशल+अस्त्यर्थे इनि । कल्याणवति । "कुशलिनो वत्सस्य वार्त्ता" इति साहि० ।

कुशस्थल न० ६त० । काम्यकजनेशे । द्वारकायां स्त्री० ङीप् । क

कुशा स्त्री० कुश–क । वल्गायां, रज्ज्वां, मधुकर्कोट्यां, सामगानां स्तोत्रगानार्थे प्रोद्गातृभेदे च ।

कुशाकर पु० कुशैराकीर्य्यते समन्तादत्रेण मूलाच्छादनेन वेष्ट्यते आ–कृ अप् । यज्ञाग्नौ । स हि कुशकण्डिकायां कुशैराव्रियते

कुशाग्रीय त्रि० कुशाग्रमिव कृ । अतिसूक्ष्मे ।

कुशालमलि पु० कुत्सितः शालमलिः रोहितकवृक्षे ।

कुशावती स्त्री० कुश–अस्त्यर्थे मतुप् मस्य वः दीर्घः । राजालजकुशस्य राजधान्यां पुर्य्याम् ।

कुशिक पु० कुश+अस्त्यर्थे ठन् । जमदग्निपितरि, विश्वामित्रस्य पितरि च मुनिभेदे । कुश+स्वार्थे कन् । काशे, यज्ञतृणे, विभीतकवृक्षे, अश्वकर्णवृक्षे, तैलपेचे च । कोकरे (ठेरा) त्रि० ।

कुशी स्त्री० कुश–अस्योविकारेऽर्थे ङीप् नि० । लौहविकारे फाले ।

कुशीलव पु० कुत्सितं शीलं कुगति० अस्त्यर्थे व, कुशीलं वाति वा–क–वा । कीर्त्तिघोषणारके नटे, चारणे, याचके च । कुशी-

सम्बन्धिनाद्यप्रचारकत्वात् तथात्वम् । तयोः सुतौ ।

कुशीलव पु० कुं पृथिव्यां शेते शी–क्वन् लवं द्यति दो–क । नटे, रामपुत्रयोः ।

कुशूल पु० कुष–कूलच् । तुषाग्नौ, अन्नकोष्ठे, इष्टकादिनिर्म्मिते धान्यादिस्थापनार्हे स्थाने च ।

कुशूलधान्यक पु० कुशूलपरिमितं धान्यं यस्य । यावता धान्येन वर्षत्रयं यस्य स्वकुटुम्बस्य सङ्कुलस्य निर्व्वाहो भवति तावन्मात्रसञ्चितधान्ये विप्रे । [कर्णिकारवृक्षे च ।

कुशेशय न० कुशे जले शेते शी–अच् अलुक् । पद्मे, सारसपक्षिणि,

कुष निष्कर्षे क्र्यादि० पर० सक० सेट् । कुष्णाति अकोषीत् । निरस्तु वेट् निरकोषीत् निरकुक्षत् ।

कुषाकु पु० कुष्णाति कुष–काकु । वानरे, सूर्य्ये, वह्नौ च । परोक्षापिनि त्रि० । [(कुठ) रोगभेदे च ।

कुष्ठ न० कुष्णाति रोगम् देहं वा कुष–कथन् । (कुड) विषभेदे

कुष्ठगन्धि न० कुष्ठस्येव (कुड़) गन्धोऽस्य इत् समा० । एलवालुके ।

कुष्ठगन्धिनी स्त्री० कुष्ठस्य गन्धोऽस्त्यस्याः इनि । अश्वगन्धायाम् ।

कुष्ठघ्नी स्त्री० कुष्ठं हन्ति हन–क ङीप् । काकोडुम्बरिकायाम् ।

कुष्ठनाशन पु० कुष्ठं नाशयति नश–णिच्–ल्यु । वाराहीकन्दे, गौरसर्षपे, गिरीषवृक्षे च । [सोमराज्याम् ।

कुष्ठनाशिनी स्त्री० कुष्ठं नाशयति नश–णिच् णिनि ङीप् ।

कुष्ठल न० कुत्सितं स्थलम् अस्वङ्गादित्वात् थत्वम् । कुत्सितस्थले ।

कुष्ठसूदन पु० कुष्ठं सूदयति सूद–ल्यु । आरग्वधे (सोन्दाल) ।

कुष्ठहन्तृ पु० कुष्ठं हन्ति हन–तृच् । हस्तिकन्दे (हातिकान्दा) ।

कुष्ठक्षत् पु० कुष्ठं क्षरति क्षृ–क्विप् तुक् च । (विट्खदिरे) ।

कुष्ठारि पु० ६त० । विट्खदिरे, पटोले, गन्धके च ।

कुष्ठिन् त्रि० कुष्ठ+अस्त्यर्थे इनि । कुष्ठरोगयुक्ते ।

कुष्माण्ड पु० ईषत् उष्मा पित्तहेतुत्वात् यस्मिन् फलेषु बीजेषु यस्य शक० । (कुमड़ा) ख्याते वृक्षे, शिवस्य गणदेवताभेदे च । जातित्वात् स्त्रियां ङीप् कुष्माण्डीत्यपि तत्रैव दृश्यते ।

कल्पितेषेषु कुशाग्रेषु पावमानीभ्येति ऋतिः स्वाहे कनू कुशाग्रः
कोऽपि (कुलङ्गा) वृक्षे ओषधौ, छत्रायां, कर्कटौ च ।

कुस श्लेषे दिवा० परः सकः सेट् । कुस्यति अकुसत्—अकोसीत् ।

कुसित पु० कुस—क्त । जनपदभेदे । दैत्यभेदे पु० । गर्हिते त्रि० ।

कुसीद न० कुसितात् क्षीदतीव निर्विशङ्केन गृह्यते । चतुर्गुणं वाद्गुणं कुसीदाख्यं ततः स्मृतम्" इत्युक्ते वृद्धिभेदे (सूद) अर्थप्रयोगे, वृद्धि (सूद) जीविकायाम् "स्थानलाभनिमित्तं यत् दानमङ्गीक्रियते । तत् कुसीदमिति ज्ञेयम्" इत्युक्ते स्थानस्य मूलधनस्य यथावस्थित्यै, ततोलाभाय चोत्तमर्णाधमर्णाभ्यां दत्ते, गृहीते च धने । अर्थग्रादित्वादच् । तत् प्रयोगकर्त्तरि त्रि० ।

कुसीदिक त्रि० कुसीदाय वृद्ध्यै प्रयच्छति कुसीद+ठन् । वृद्ध्या जीविनि वार्द्धुषिके । स्त्रियां स्वित्वात् ङीष् ।

कुसुम न० कुस—उमक् पुष्पे, फले, स्त्रीरजसि, नेत्ररोगभेदे च ।

कुसुमपुर न० (पाटना) इति ख्याते पाटलिपुत्रे नगरे, पृषो० अन्तलोपे कुसुममप्यत्र ।

कुसुममध्य पु० कुसुमं मध्ये फलमध्ये यस्य । (चालता) वृक्षभेदे ।

कुसुमाकर पु० ईत० । वसन्ते ऋतौ "विद्धि मां कुसुमाकर", इति गीता ।

कुसुमागम पु० कुसुमानामागमो यत्रकाले । वसन्ते ऋतौ ।

कुसुमाञ्जन न० कुसुमाकारमञ्जनं माक० । पैत्तलमलजाते पुष्पाकारे अञ्जनभेदे । [नैव पुष्पाकारत्वम् ।

कुसुमात्मक न० कुसुममेवात्मा स्वरूपं यस्य । कुसुमे तस्य सर्वात्म-

कुसुमाधिप पु० कुसुमेषु कुसुमप्रधानेषु वृक्षेषु अधिपः श्रेष्ठः सुग-न्धित्वात् । चम्पकवृक्षे ।

कुसुमायुध पु० कुसुममायुधमस्य । कामदेवे । [च ।

कुसुमासव न० कुसुमस्य तद्रसस्यासवम् । पौष्पे मद्यभि, तज्जाते मद्ये

कुसुमेषु पु० कुसुमानीषवो यस्य । कामदेवे । [समूहे ।
कुसुमोच्चय पु० कुसुमानामुच्चयः समूहो यत्र । उद्याने । ईत० पुम०
कुसुम्भ न० कुस—उम्भ । पुष्पप्रधानद्रव्ये (कुसुम) "कुसुम्भं नालिकाशाकं वार्त्ताकुमिति स्मृतिः । स्वार्थे क कसुम्भकौ ।
कुस्मृति स्त्री० कुत्सिता स्मृतिः स्मृ—क्तिन् । याज्ञे ।
कुस्रुभ पु० कुं भूमिम् स्रुभाति स्रुनृभ—अच् नलोप नि० । विष्णौ, वसुदे च ।
कुस्वप्न न० कुत्सितं स्वप्नति स्वप—भर्त्सने उक् नि०—सुट् । धन्यादौ
कुस्म(ष्म) वृद्धौदर्शनेच चुरा० आत्म० सक० सेट् । कुस्म(ष्म)यति अचुकुस्म(ष्म)त । [अचुकुस्मत ।
कुह विस्मापने अद० चुरा० आत्म० सक० सेट् । कुहयते
कुह अव्य० किम्+ह—कु तिहोरिति कादेशः । कुत्सितविस्मये ।
कुहक न० कुह—एवुल् । इन्द्रजालमायया अन्यथास्थितस्य वस्तुनोऽन्यथादर्शनेन । तद्युक्ते त्रि० ।
कुहन न० ईषत् यत्नेन हन्यते हन—कर्मणि अच् । मद्यादौ ईषद् यत्नेन हन्ति कर्त्तरि अच् । सर्पे, चौरे च कुं भूमिं हन्तीति अच् । भूमिके । कुह—युच् टाप् । दम्भचर्यायां स्त्री० । ईर्ष्यालौ त्रि० ।
कुहर पु० कुं हरति हृ—अच् । नागभेदे । कुहं विस्मापनं राति रा—क । छिद्रे । सर्पे, कण्ठे, कण्ठ्यवर्णे वर्णभेदे च न० ।
कुहलि पु० कुत्सितं हलति हल—इन् । ताम्बूल्याम् (पान)
कुहा स्त्री० कुह—अच् । कुज्झटिकायां, कटुक्यां च ।
कुहू स्त्री० कुह—कु—वा ऊङ् । नष्टेन्दुकलायां चतुर्दशीयुतायाममावास्यायां, कोकिलालापे च "त्वमपि चन्द्रविरोधिकुहूरव" इति "उच्चैरिति कुहूरवध्वनिभिर्ये" ति चोद्भटः ।
कुहूकण्ठ पु० कुहूरितिशब्दः कण्ठे यस्य । कोकिले ।
कुहूरव पु० कुहूरिति रवो यस्य । कोकिले । कुहूशब्दादयोऽप्यत्र ।
कुहेलिका स्त्री० कुत्सितं हेलयति एवुल् । कुज्झटिकायाम् ।

कूं आर्त्तस्वरे तुदा० परस्म० अक० सेट् कुटादि० । कुटते अकुटिष्ट ।

कूं शब्दे क्रयादि० उभ० अक० सेट् भ्वादि० । कुनाति कुनीते । अकवीत् अकविष्ट ।

कूकुंद पु० सत्कल्पाख्यकृतकन्याद्वातरि ।

कूचिका स्त्री० कू-चिक् संज्ञायां कन् । तूलिकायाम् । अल्पार्थे वा ङीप् । कूचीत्यपि ।

कूज शब्दे भ्वा० पर० सक० सेट् । कूजति अकूजीत् ।

कूजित न० कूज-क्त । पक्षिशब्दे अव्यक्तशब्दे च "मधुकरनिकरकरम्बितकूजित कुञ्जकुटीरे" इति जयदेवः ।

कूट पु० कूट-अच् कर्मणि घञ् वा । अगस्त्यमुनौ । शठे पु० स्त्री० । निशले, धान्यादिराशौ, अयोघने (नेहार) लौहमुद्गरे, दम्भे, मायायां, यथार्थवस्त्वाच्छादने, अद्रिशृङ्गे, तुङ्गे, फालाधारे-लाङ्गलाङ्गे, मर्म्मणि हरणबन्धनहेतौ-यन्त्रे, भग्नहृदयख्याते, पुरद्वारि च पु० । स्वार्थे कन् फाले । संज्ञायां कन् । कवर्च्यामु, सुरानामगन्धद्रव्ये च पु० ।

कूट अपवारे दानाभावे च चुरा० आत्म० सक० सेट् । कूटयते अचुकूटत्-त । [कूटयति ते अचुकूटत्-त ।

कूट दाहे मन्त्रणे प्रच्छादने च अद० चुरा० उभय० सक० सेट् ।

कूटकार्षापण पु० कर्म० । मिथ्याभूतरौप्यादि सुद्रायाम् ।

कूटकृत् पु० कूटं मिथ्याभूतं करोति कृ-क्विप् तुक् च । कितवे त्रि० । कलसादिपाकस्थाने (पोवान) ।

कूटपालक पु० कूटं मृत्तिकास्तूपं पालयति पाल-ण्वुल् । कुम्भाले ।

कूटयन्त्र न० कूटेन कृतं यन्त्रम् । व्याधिमादिदानेन मृगपक्षिधारणार्थं पातिते यन्त्रे ।

कूटशाल्मलि पु० कूटः मिथ्याभूतः शाल्मलिः । क्षुद्रशाल्मलौ ।

कूटसंक्रान्ति स्त्री० "अर्द्धरात्रे व्यतीते तु यदा संक्रमते रविः । सा ज्ञेया कूटसंक्रान्तिरिति कृत्युक्तौ रवेरर्द्धरात्रात्परं राश्यन्तरसञ्चारे ।

कूटसाक्षिन् त्रि० कर्म० । साक्ष्ये मिथ्याभिधायिनि ।

कूटस्थ त्रि० कूटोऽयोघनवत् निश्चलं यथा तथा तिष्ठति स्था–क । एवरूपतया सर्वकालस्थायिनि परिणामादिकार्य्यान्तरशून्ये आकाशादौ, ब्रह्मणि च । व्याघ्रनखाख्यसद्रव्ये पु० ।

कूटागार न० कर्म्म० । मृषागारे, चन्द्रशालिकायाम्, (चिलाघर) क्रीड़ागृहे च ।

कूटायुध न० कर्म० । अन्तर्गुप्तनिशितशस्त्रे बहिः काष्ठादिमये अस्त्रभेदे ।

कूटार्थभाषा स्त्री० कूटार्थस्य कल्पितार्थस्य भाषा कथा । प्रबन्धकल्पनारूपायां कथायाम् ।

कूड धनीभावे तुदादि० पर० अक० सेट् । कूडति अकूडीत् ।

कूण सङ्कोचे अद०चुरा०उभ०अक० सेट् । कूणयति–ते अचुकूणत् त ।

कूण सङ्कोचे चुरा० आत्म० अक० सेट् । कूणयते अचूकूणत ।

कूणि त्रि० कूण–इनि । रोगादिना सङ्कुचितनखकरादौ जने ।

कू(कु)प दैर्घ्ये भ्वा० चुरा० उभ० अक० सेट् । कू(कु)पयति–ते । अचुकू(कु)पत्–त ।

कूप पु० कुत्सिताः रेफवत् वा आपो यत्र अच् समा० कुवन्ति मण्डूकाः अस्मिन् कू–पक् दीर्घश्च वा । स्वनामख्याते जलाधारे, गर्त्ते च । ततः संज्ञायां कन् । नौकादौ गुणाधारे (मास्तुल) काष्ठमये दण्डे ।

कूपाङ्क(ङ्क) पु० कूपाकारोऽङ्कश्चिह्नं कूपाकारमङ्कं वास्मिन् । रोगाङ्के ।

कूपार पु० कुं पृथिवीं पिपर्त्ति पूरयति अण् पूर्वदीर्घः । समुद्रे ।

कूपी स्त्री०कूप–अच् गौ० ङीष् । खेटादिधारणार्थं चर्ममये पात्रभेदे ।

कूर्च पु० न० कुर्य्यते कुर–चट् नि० दीर्घः । भ्रुवोर्मध्ये, स्थिते लोमोद्गमे, ब्रह्मसूत्रे, कैतवे, दम्भे, मयूरपुच्छे, कुशमुष्टौ, अङ्गुष्ठाङ्गुलिमध्यस्थोपरिभागे, अङ्घ्रौ, शीर्षे, आसनभेदे, तन्त्रोक्ते बीजभेदे च (क्लीम्) ।

कूर्चशिरस् न० ६त० अङ्गुल्यग्रे (गुडगुडा) । [शेखरादयोऽप्यत्र ।

कूर्चशीर्ष पु० कूर्चं शिरस्तु तद्वत् शीर्षमस्य । नारिकेले । कूर्च–

कूर्चिका स्त्री० कूर्च+अस्त्यर्थे ठन् । (छीरसा) दुग्धविकारे,

सूचिकायां, तन्त्रिकायाम्, कुट्टन्यां, कुक्षिकायाञ्च द्रव्यमार्ज्जनसाधने द्रव्ये,—(कुंचि) ह्रस्वयुक्ते च ।

कूर्पास पु० कुर्पासवत् सर्वम् ।

कूर्म्म पु० कुत्सितः कौ वा अर्म्मिर्गो यस्य पृ० । वक्षसि, "उन्मीलने ऋतः कूर्म" इत्युक्ते देहस्थे वायुभेदे च ।

कूर्म्मचक्र न० कूर्म्माकारं चक्रम् । ज्योतिषोक्ते क्षणिकर्म्मोपयोगिनि, तन्त्रोक्ते जपादिकर्म्मोपयोगिनि च कूर्म्माकारे चक्रभेदे ।

कूर्म्मपुराण न० कूर्मेण कूर्मावतारेण भगवता उक्तम् पुराणम् । अष्टादशसु पुराणेषु मध्ये पुराणभेदे ।

कूर्म्मपृष्ठक न० कूर्मस्य पृष्ठमिव इवार्थे कन् । खरारे (खरा) ।

कूल आदृतौ भ्वा० पर० सक० सेट् । कूलति अकूलीत् ।

कूल न० कूल—अच् । नद्यादेर्जलसमीपस्थाने तीरे, कूपे, शैलपृष्ठे च ।

कूलक पु० कूल—स्वुल् । क्षितिपर्वते, वल्मीके स्थाने.(उयरढीपि) ।

कूलङ्कष पु० कूलं कषति कष—खच् मुम् च । समुद्रे । नद्यां स्त्री० ।

कूवर पु० न० कूड् शब्दे कुटादि वरच् । रथस्य चक्रकाष्ठासङ्गके काष्ठे युगन्धरे, कवचे च । रथे त्रि० ।

कूष्माण्ड पु० कुत्सित उष्मा अण्डेषु बीजेषु यस्य । (कुमड़ा) ह्रस्वभेदे गणदेवताभेदे च । जातित्वात् ङीष् कुष्माण्डीत्यपि तत्र ।

कृ क्रतौ भ्वा० उभ० सक० अनिट् । करति ते चकार्षीत् अक्रत ।

कृ क्रञौ तना० उभ० सक० अनिट् । करोति कुरुते चकार्षीत् अक्रत । क्रत्रिमः ।

कृ वधे स्वादि० उभ० सक० अनिट् । क्रणोति क्रणुते चकार्षीत् अक्रात ।

कृक पु० कृ—कक् । गले । [क्षुधाकारके देहस्थे वायुभेदे च ।

कृकण पु० कृ इति कण इति कण—शब्दे अच् । (कवार) कृकरपक्षिणि,

कृकर पु० कृ इति शब्दं करोति । क्षुधाकारे देहस्थे वायौ ।

कृकलास पु० कृकं कण्ठं लासयति लस् । सरटे (कांकलास) गिरगिटे । [मयूरे, सरटे च ।

कृकवाकु पु० कृकेण वक्त्रेण वच—परिभाषणे उण् कच् । कुक्कुटे,

कृकाटिका स्त्री० कृकं कण्ठमटति अट–ण्वुल् टाप् कापि अत इत्वम् । ग्रीवायामुन्नतदेशे ।

कृच्छ्र न० कृत–रक् ऋोऽन्तादेशः । कष्टे, दुःखे तत्कारणे–पापे, कष्टदायके–प्राजापत्यादिव्रते, मूत्रकृच्छ्ररोगे च । तद्वति त्रि० ।

कृत छेदे तुदा० पर० सक० सेट् । तुदादि । कृन्तति अकर्त्तीत् कर्त्तिष्यति–कर्त्तयति कृत्तः ।

कृत वेष्टे रुधा० पर० सक० सेट् । कृणत्ति कृन्तः अकर्त्तीत् ।

कृत न० कृ–क्त । "चत्वार्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्" इति मनूक्ते दिव्यमानेन चतुःसाहस्रमितवर्षे, मानुषमानेन १७२८००० मितवर्षे, सत्ययुगे, पर्य्याप्ते, अलमर्थे, फले च । रचिते त्रि० ।

कृतक न० कृत० कन् । विडलवणे । कृत्रिमे, मिथ्याकल्पिते च त्रि० ।

कृतकृत्य त्रि० कृतं कृत्यं कर्त्तव्यं येन । कृतार्थे समाप्तकार्य्ये, धन्ये, विदुषि च ।

कृतक्षण त्रि० कृतः क्षणः समयो येन । लब्धावकाशे ।

कृतघ्न त्रि० कृतं हन्ति हन–क । कृतापकारस्य जनस्य अपकारे प्रवर्त्तमाने "कृतघ्ने नास्ति निष्कृति"रिति पुराणम् ।

कृतच्छिद्रा स्त्री० कृतं छिद्रं यस्याम् कोषातकीलतायाम् ।

कृतज्ञ त्रि० कृतं कृतोपकारं जानाति ज्ञा–क । कृतोपकारज्ञातरि–प्रत्युपकारके । कुक्कुरे पु० ।

कृतधी त्रि० कृता सम्पादिता धीर्येन । शास्त्राभ्यासंस्कृतान्तःकरणे, स्थिरचित्ते, "कृतधीः किं प्रभाषेत" इति गीता ।

कृतप्रणाश पु० कृतयोः पुण्यापुण्ययोर्भोगमन्तरेण प्रणाशो नाशः । कृतहानौ ।

कृतम् अव्य० कृत–कमु । अलमर्थे, निषेधे च ।

कृतमाल पु० कृता मालास्य । आरग्वधे, (सोन्दाल) वर्णिकारे च ।

कृतलक्षण त्रि० कृतानि लक्षणान्यस्य । गुणैर्विख्याते ।

कृतवर्म्मन् पु० हृदिकासुते यादवे क्षत्रियभेदे ।

कृतश्रम त्रि० कृतः श्रमो येन महोत्साहान्विते ।

कृतवीर्य्य पु० कृतं वीर्य्यमनेन । एकवीरस्यपाख्ये कार्त्तवीर्य्यार्জ্জुन-जनके नृपभेदे । वीर्य्यान्विते त्रि० ।

कृतविद्य त्रि० कृता अभ्यस्ता विद्या येन । अभ्यस्तविद्ये ।

कृतसापत्निका स्त्री० कृतं सापत्न्यं यस्याः कप् यलोपः टापि अत इत्वम् । अध्यूढायां स्त्रियां यस्या विवाहात् पश्चात् तत्पतिना विवाहान्तरं कृतं तस्याम् ।

कृतस्वर पु० कृतः स्वरो यत्र । स्वर्णोत्पत्तिस्थाने स्वर्णाकरे ।

कृतहस्त त्रि० कृतः अभ्यस्तः हस्तो वाणादित्यागमोक्षणलाघवरूपा हस्तशिक्षा येन । सुशिक्षितशरमोक्षणविद्ये जने ।

कृताकृत न० कृतं कार्य्यमकृतं कारणं च समा० द्व० । कार्य्यकारणयोः । कर्म० । कृते अकृते च होमादौ । अतएव ऋत्विग्वि-शेषस्य ब्रह्मणः कृताकृतावेक्षणाय होमादौ वरणम् ।

कृताञ्जलि पु० कृतोऽञ्जलिरिव पत्रसङ्कोचो येन । लज्जालुवृक्षे । संपुटीकृतहस्ते त्रि० ।

कृतात्मन् ०० कृतः शिक्षितः संस्कृतो वा आत्माऽन्तःकरणं यस्य । शिक्षितचित्ते, शुद्धान्तःकरणे च ।

कृतान्त पु० कृतस्य कर्मजन्यभोगस्यान्तोऽवसानम् । भोगं विना कृतकर्मनाशे "कृतान्तेऽनुशयवान्" इति शारीरकसूत्रम् ।

कृतान्त पु० कृतः अन्तो विपर्य्ययनाशो निश्चयो विषयपरिच्छेदो वा येन । ज्ञातसिद्धान्ते । कृतो नाशो येन । दैवे, यमे च ।

कृतान्न न० कृतं पक्वञ्च तदन्नञ्च खड्गकादौ पक्वान्ने, "कृतान्नसदृक् स्त्रिय" इति स्मृतिः ।

कृतार्थ त्रि० कृतः अर्थः प्रयोजनं येन । कृतकार्य्ये ।

कृतास्त्र त्रि० कृतं शिक्षितमस्त्रं येन । शिक्षितास्त्रे ।

कृति स्त्री० कृ-क्तिन् । पुरुषप्रयत्ने, कर्त्तृव्यापारे, विंशत्यक्षरपादके छन्दोभेदे च । [निपुणे, साधौ, कृतार्थे च ।

कृतिन् स्त्री० कृतमनेन इष्टादित्वादिनि । मण्डिते, योग्ये, पुण्यवति,

कृत्त त्रि० कृत-क्त । छिन्ने, वेष्टिते च ।

कृत्ति स्त्री० कृत–क्तिन्। चर्म्मणि, भूर्ज्जपत्रे च।

कृत्तिका स्त्री० कृत–क्तिन् संज्ञायां कन्। अश्विन्यवधिके तृतीये नक्षत्रे। [सुतो जातः। चन्द्रे।

कृत्तिकासुत पु० कृत्तिकायाः सुतः स्कन्दे, कृत्तिकानक्षत्रयुक्तकाले

कृत्तिवासस् पु० कृत्तिश्चर्म वासो यस्य, कृत्तिं वस्ते वस–असुन् वा। शिवे। [कैतिमाख्येषु प्रत्ययेषु पु०। कर्त्तव्ये त्रि०।

कृत्य न० कृत–क्यप्। कार्य्ये, व्याकरणोक्तेषु यत्क्यप्तव्यानीयर्यत्-

कृत्यविद् त्रि० कृत्यं कर्त्तव्यं वेत्ति विद्-क्विप्। कार्य्यज्ञे शिक्षिते, कृत्यविदित्युपादेति रघुः। [देवभेदे च।

कृत्या स्त्री० कृ–क्यप् टाप्। क्रियायाम्–अभिचारक्रियाजन्ये,

कृत्रिम न० कृ–क्त्रि लेर्मप् च। विड्लवणे, काचलवणे, तुरक्कनाम-गन्धद्रव्ये, रसाञ्जने च। सिन्धुके द्वादशविधपुत्रान्तर्गते पुत्रभेदे च पु०। क्रियया निष्पन्नमात्रे त्रि०।

कृत्स्न न० कृत–कृत्स्न। सकले, जले, कुशौ च। अशेषे त्रि०।

कृन्तन न० कृत–ल्युट्। त्रि० सुश्रु च। छेदने, कृन्तनं नखकेशानां छेदनञ्च वनस्पतेः" इति स्मृतिः।

कृप कल्पने भ्वा० आत्म० लुङि लुटि लृटि लृङि च उभ० इतादि अक० वेट्। कल्पते। अकल्पत् अकल्पिष्ट अकृप्त। कल्प्तासि कल्पितासे कल्पतासे कल्प्स्यति कल्पिष्यते।

कृप दौर्ब्बल्ये चट० चुरा० उभ० अक० सेट्। कृपयति ते अचिकृपत्-त।

कृप वृतौ चित्रीकरणे वा चुरा० पक्षे भ्वादि० पर०। कल्पयति ते कल्पति अचीकल्पत्–त अकल्पीत्,

कृप पु० कृप–क। शरद्वतः पुत्रे द्रोणश्यालके कृपाचार्य्ये।

कृपण पु० कृप–क्युन्। कृपौ। भन्दे, क्षुद्रे च "कृपणाः फलहेतवः" इति गीता। दीने, "कार्पण्यदोषोपहतस्वभावः" इति गीता अदातरि च त्रि०। [च्छायाम्।

कृपा स्त्री० कृप–अङ्। दयायां फलनिरपेक्षतया दीनजनानुपक्षे-

कृपाण पु० कृपां लुदति लुद्–ड। खड्गे। ङीप्। कृपाणोलक्षणम्।
छुरिकायाम्, कर्त्र्यांच।

कृपालु त्रि० कृपां लाति ला–डु। कृपायुक्ते।

कृपी स्त्री० द्रोणाचार्य्यस्य पत्न्याम् शरद्वतो दुहितरि।

कृपीट न० कृप–कीटन्। उदके, तोये च।

कृपीटजोनि पु० कृपीटस्य जलस्य योनिः। वह्नौ "वाडोरग्निर-
ग्नेराप इति श्रुतेरस्य जलयोनित्वम्।

कृमि पु० क्रम–इन् सम्प्रसारणञ्च। कीटात् क्षुद्रे–जन्तौ तच्छा-
तम्यां–लाक्षायां, उदरजातकीटयुक्तरोगे च।

कृमिकण्टक पु० कृमिरिव कण्टकोऽस्य। विडङ्गे उडुम्बरे चिलायाञ्च।

कृमिकोषोत्थ न० कृमेः कोषात् उत्तिष्ठते उत्पद्यते उद्–स्थाक।
कौषेये (रेशमिवस्त्रे)।

कृमिघ्न पु० कृमिं हन्ति हन–क। विडङ्गे, पलाण्डौ, कोलकन्दे,
भल्लातके च हरिद्रायाम् स्त्री० टाप्। धूपपत्रायां स्त्री० ङीप्।

कृमिज न० कृमिभिर्जन्यते जन–कर्म्मणि ड। अगुरुणि चन्दने।
कृमिनोजाते त्रि०। लाक्षायां स्त्री० टाप्।

कृमिफल पु० कृमयः फलेऽस्य। उदुम्बरे।

कृमिशैल पु० कृमीणां शैल इव। वल्मीके।

कृमीलक पु० कृमीन् ईरयति जनयति ईर–ण्वुल् रस्य ल।
वनशुद्धे। [अकर्मीत्।

कृश तनूकरणे दिवा० पर० सक० सेट्। कृश्यति अकृशत्–
कृश त्रि० कृश–क्त नि०। अल्पे, क्षुद्रे च।

कृशाङ्गी स्त्री० कृशमङ्गमस्याः। प्रियङ्गुवृक्षे। कृशदेहे त्रि०।

कृशानु पु० कृश–आनुक्। वह्नौ चित्रकवृक्षे च।

कृशानुरेतस् पु० कृशानौ वह्नौ रेतोयस्य। शिवे। देव्या षोढ्य-
र्थकस्य शिववीर्य्यस्याग्नौ प्रक्षेपः अतोऽग्निमः कार्त्तिकेयो जातः
इति पुराणकथा अनुसन्धातव्या। [अकृशत–अकृष्ट।

कृष आकर्षणे विलेखने च तुदा० आत्म० सक० अनिट्। कर्षते।

कृष आकर्षणे विलेखने च भ्वा०पर० सक० अनिट्। कर्षति अकार्षीत्-अकार्क्षीत्-अकृक्षत्।

कृष्णक पु० कृष-कनु। काके, कृष्णे। कर्षके त्रि०।

कृष्ण(ग)(स)र पु० तिलतण्डुलसम्भाकः कृ(ग)(ष)र, परिकीर्त्तित दुग्धुक्ते तिलमिश्रिते पक्वे तण्डुलाद्यन्ने।

कृषि स्त्री० कृष-क्तिच्। वैद्यवृत्तिभेदे भूमिकर्षणरूपे यत्नोत्पादनव्यापारे। कर्मणि क्तिच्। भूमौ। [कृषिवृत्त्या जीविनि।

कृषिजीविन् त्रि० कृष्या जीवति जीव-णिनि। स्वयमस्वं वा कृतया

कृषोबल त्रि० कृषिरस्यास्ति बलच् दीर्घश्च। कर्षके।

कृष्टपच्य त्रि० कृष्टे क्षेत्रे स्वयमेव पच्यते पच-क्यप्। धान्यादौ।

कृष्ण पु० कृष-नक्। भगवतोऽवतारभेदे वासुदेवे देवकीनन्दने।

"कृषिर्भूवाचकः शब्दः णश्च निर्वृतिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" इत्युक्ते परब्रह्मणि, वेदव्यासे, अर्জ্জुने मध्यमपाण्डवे च। कृष्णवर्णत्वात् काके, कोकिले, करमर्द्दके (करमचा) वृक्षे, नीले, वर्णे च तद्वति त्रि०। कालागुरुणि क्लीअशुभकर्मणि च न०। द्रौपद्यां, नीलीवृक्षे, कणायां, द्राक्षायां, नीलपुनर्नवायाम्, कृष्णजीरके, गाम्भार्य्यां कटुकायाम्, राजमर्षे, मर्षपयां, काकोल्यां, सोमराज्यां च कृष्णवर्णत्वात् स्त्री० टाप्। नीलाञ्जने, लौहे, मरिचे च पु०।

पुष्पप्रधाने वृक्षे।

कृष्णकलि पु० कृष्ण इव चूड़ालः कलिः कलिकाऽस्य। स्वनामख्याते

कृष्णकाय पु० कृष्णः कायो यस्य। महिषे। कृष्णवर्णतनुयुक्ते त्रि०

कृष्णगन्ध पु० कृष्णश्चासौ गन्धोऽस्य। शोभाञ्जनवृक्षे।

कृष्णगर्भ पु० कृष्णवर्णो गर्भोऽस्य। कट्फले।

कृष्णचूड़ा स्त्री० कृष्णश्चासौ चूड़ा इव चूड़ाऽस्य। स्वनामख्याते पुष्पवृक्षे।

कृष्णचूर्ण न० कृष्णश्चासौ चूर्णम्। लौहमले (लोहार गु)।

कृष्णजटा स्त्री० कृष्णा जटा यस्याः। जटामांस्याम्।

कृष्णजीरक पु० कर्म०। कृष्णवर्णजीरके (कालजीरे)।

कृष्णद्वैपायन पु० द्वीपे भवः फञ् कर्म्म० । वेदव्यासे तस्य पराशरात् वसुनाद्वीपे एव जन्मेति पुराणम् ।

कृष्णधुस्तू(धत्तू)र पु० कर्म्म० (कनकधुतरा) वृक्षभेदे ।

कृष्णपर्णी स्त्री० कृष्णं पर्णमस्याः । (कालसुलसी) कृष्णतुलस्याम् ।

कृष्णपक्ष पु० कर्म्म० । प्रतिपदाद्यमावस्यान्ताः पञ्चदशतिथिषु "चन्द्रवृद्धिकरः शुक्लः कृष्णचन्द्रक्षयात्मक" इत्युक्ते मासार्द्धकाले ।

कृष्णपाक पु० पच्यते इति पाकः; फलं कृष्णः कृष्णवर्णः पाकोऽस्य । करमर्दे ।

कृष्णपाकफल पु० कृष्णपाकं फलमस्य । करमर्दे ।

कृष्णफल पु० कृष्णं पाकावस्थायां फलमस्य । करमर्दे, सोमराज्यां स्त्री० टाप् । [कटुकायाम् ।

कृष्णभेद पु० कृष्णोवर्णेन भेदश्छेदः षष्ठ्यलुक् । वा ङीप् ।

कृष्णमुद्ग पु० कर्म्म० । (कालसुग) क्षुद्रभेदे ।

कृष्णरुह स्त्री० कृष्णः वनं रोहति रुह–क । लतुकालतायाम् ।

कृष्णलवण न० कर्म्म० । सौवर्च्चलवणे । (काचालोण) ।

कृष्णलक पु० कृष्णं वर्णं लाति श्लाति वा-क संज्ञायां वनु । गुञ्जाफले तस्यार्द्धकृष्णत्वात्तथात्वम् 'पञ्चकृष्णलको माष" इति मनुः

कृष्णला स्त्री० कृष्णं वर्णमस्य फले लाति वा–क टाप् । गुञ्जायाम् ।

कृष्णलौह न० कर्म्म० । मण्डूरे ।

कृष्णलोहित पु० कृष्णः वनु लोहितः वर्णो यस्य वर्णेनेति समा० । रक्तकृष्णमिश्रितवर्णे । तद्वति त्रि० ।

कृष्णवल्क पु० कृष्णं वल्कमस्य । वानरे ।

कृष्णवर्ण पु० कृष्णो वर्णोऽस्य । राहौ पक्षे । कृष्णः अशुभो वर्णः मुखे । ब० । कृष्णवर्णवति त्रि० ।

कृष्णवर्त्मन् पु० कृष्णं वर्त्म धूमप्रसारकृपगतिस्थानमस्य । वह्नौ, राहौ पक्षे, चित्रकवृक्षे च । कृष्णमपवित्रं वर्त्माचरणं यस्य । दुष्कर्मकारके त्रि० ।

कृष्णवल्लिका स्त्री० कर्म्म० । लतुकालतायाम् ।

कृष्णवल्ली स्त्री० कर्म०। कृष्णतुलस्याम् कर्कट्याम्।
कृष्णवीज पु० कृष्णं वीजमस्य। रक्तविषौ। कालिङ्गे न०।
कृष्णवृन्त स्त्री० कृष्णं वृन्तमस्याः। पाटलावृक्षे माषपर्णाञ्च। संज्ञायां कन् कापि अत इत्वम्। गाम्भार्याम्।
कृष्णशर(सार) पु० कृष्णसारो शारः (सारः) मयूरश्च वर्णो वर्णनेति ष०। कालसारहरिणे।
कृष्णशालि पु० कर्म० (कालधान) धान्यभेदे।
कृष्णशिम्बिका स्त्री० कर्म०। काकाण्डायाम्।
कृष्णशिशु पु० कर्म०। कृष्णशोभाञ्जने (कालसजना)।
कृष्णशृङ्ग पु० कृष्णं शृङ्गमस्य। महिषे।
कृष्णसर्षप पु० कर्म०। (राइ सर्षा) राजसर्षपे।
कृष्णसार पु० कृष्णः सारोऽस्य। शिंशपावृक्षे (शिशु)
कृष्णस्कन्ध पु० कृष्णः स्कन्धोऽस्य। तमालवृक्षे।
कृष्णागुरु न० कर्म०। कालागुरुणि, "कृष्णं गुणाधिकं तच्च लोहवत् वारि मज्जति" त्यु क्तलक्षणे धूपकाष्ठे।
कृष्णाजिन न० कर्म०। कृष्णसारमृगचर्मणि।
कृष्णायस न० कर्म० टच् समा०। कृष्णलोहे अयस्कान्ते।
कृष्णार्चिस् पु० कृष्णः कृष्णता अर्चिर्भ्यो यस्य। कृष्णता कारकशिखे वह्नौ।
कृष्णार्जक पु० कर्म०। विषघ्ने (कालतुलसी) वनबर्बरे।
कृष्णावास पु० कृष्णसावासोऽजिनं। अश्वत्थवृक्षे।
कृष्णिका स्त्री० कृष्णैव संज्ञायां कन्। (राइ) राजसर्षपे।
कृष्णेक्षु पु० कर्म०। (काजला) इक्षुभेदे।
कृष्य स्त्री० कृष-अर्हार्थे क्यप्। कर्षणार्हायाम् भूमौ।
कॄ विक्षेपे तुदा० पर० सक० सेट्। किरति अकारीत्। कीर्णः।
कॄ हिंसने क्र्यादि० उभ० सक० सेट्। कृणाति अकारीत्।
कॄ विज्ञाने चुरा० आत्म० सक० सेट्। कारयते अचीकरत।
कॄत संशब्दे चु० उभ० सक० सेट्। कीर्त्तयति-ते अचकीर्त्तत्-त।

कृत्त त्रि० कृत्-क्त । रचिते, निर्मिते, "कृत्तेन सोपानमचेतेति स्मृतिः ।

केकय पु० देशभेदे, तद्राजस्तु अश्वो वक्तृषु लुक् । तद्देशराजभेदे च ब० व० । तद्योगात् अन्यजनकभावोपचारात् केकयी स्त्री० भरतमातरि । [तात्त्रिवृक्षे पुरुषे (टेरा) ।

केकर पु० के मूर्द्धनि कर्त्तुं गोलमस्य क-अच् अलुक् स० । निम्नोन्नतकेका स्त्री० के मूर्द्धनि कायते कर्मणि ड अलुक् स० । मयूरवाक्यायाम् ।

केकावत पु० केका+अस्त्यर्थे वतच् । मयूरे ।

केकिन् पु० केका+अस्त्यर्थे इनि । मयूरे ।

केचन अव्य० किम:+पुंसि जसिरूपं ततश्च । केचिदित्यर्थे एवं केचिदित्यधत्र । [केतन्-त ।

केत सत्तायां अद० चुरा० उभ० सक० सेट् । केतयति-ते अचि

केतक पु० कित-निवासे खुल् । "केतकः स्वधिकापुष्पोजम्बुकः क्रकचच्छदः" इत्युक्तलक्षणे वृक्षे । तत्पुष्पे न० । गौरादि० ङीष् । केतकीत्यधत्र ।

केतन न० कित-भावाधिकरणकर्मकरणेषु यथायथं ल्युट् । गृहे, निवासस्थे, केतौ, ध्वजे, चिह्ने, ज्ञाने च ।

केतु पु० चाय-तुक्यादेशः । रोगे, द्युतौ, पताकायाम्, चिह्ने, रिपौ च । राहोः शरीरावयवे उपग्रहे । तेषामुत्पातरूपता ज्योतिषे विद्वा ब० । व० ।

केतुमाल न० "सुकेतनं केतुमालं प्रतीच्यां गन्धमादनः" इत्युक्ते जम्बुद्वीपस्य नवखण्डान्तर्गते खण्डभेदे ।

केदार पु० के शिरसि दारोऽस्य । पर्वतभेदे, तत्स्थे शिवविष्णुभेदे, भूमिप्रभेदे, आलवाले, क्षेत्रे च ।

केनिपातित पु० के जले निपातोऽस्य अलुक् स० । अरित्रे नौकादेर्गतिनिर्णायके (हाल) इति प्रसिद्धे काष्ठे । या कापि तत्सदृशे

केन्दु पु० कुत्सित इन्दुः को: कादेशः । तिन्दुकवृक्षे । संज्ञायां कन् (गाव) गालकवृक्षे ।

केसुक पु० के शिरसि असयति दहति असु उक् अलुक् स०। (केन्दु) इतिख्याते केन्दुवृक्षे। फलं केसुकयर्जितमिति स्मृतिः।

केयूर पु० के बाहुशिरसि यौति या—ऊरच् अलुक् स०। (बाजु) (ताड़) बाहुभूषणे।

केरल पु० ब० व०। "सुब्रह्मण्यं समारभ्य यावद्देशो जनार्दन! तावत् केरलदेशः स्या"दित्युक्ते देशे। वैदिकयागानधिकारित्वि—ब्रह्मबन्धुत्वे" कोक्तिसर्पा आक्षिपका दक्षिणोत्थाः सकेरलाः। सर्वे ते क्षत्रियास्तात। धर्मलोपां निराकृत इति हरिवंशोक्ते क्षत्रियभेदे च।

केल चालने भ्वा० पर० सक० सेट्। केलति अकेलीत्। णिचि अचि-केलत् त। [स्त्री० वा ङीष्।

केलि पु० स्त्री० केल—इन्। परीहासे, क्रीड़ायाञ्च। पृथिव्यां

केलिवृक्ष पु० केलेः क्रीडार्थं वृक्षः। केलिकटम्बवृक्षे।

केलिसचिव पु० केलौ सचिवः सहायः नर्मसचिवे क्रीडाविषये मन्त्रिणि।

केव सेवने भ्वा० आत्म० सक० सेट्। केवते अकेविष्ट, णिचि अचिकेवत् त।

केवल त्रि० केव—कलच् वा सरसि वलयति वल—अच् अलुक् स०। एके, कृत्स्ने च। निश्चिते, ज्ञानभेदे, शुद्धे च ज०।

केविका स्त्री० केव—ण्वुल् टाप् कङ्कणदेशप्रसिद्धे केवेर इति ख्याते पुष्पप्रधाने वृक्षे, भृङ्गारी च।

केश पु० क्लिश्यते क्लिशाति वा क्लिश—अच् लत्वोपश्च कश वैशोवा। वरुणे, हीवेरे, दैत्यभेदे, विष्णौ, चिकुरे च मज्जधातुजातोपधातु-विशेषोऽयं केशः। अश्व परवर्त्तिनः पाशादिशब्दाःकेशभूयस्त्व-वाचिनः। बालास्तु तत्पराः पाशो रचना भार उच्चयः। हस्तः पक्षः कलापश्च केशभूयस्त्ववाचकाश्चत्युक्तेः।

केशकीट पु० ६त०। यूकाख्ये केशकीटे। (उकुण)

केशपर्णी स्त्री० केशइवपर्णमस्याः जातित्वात् ङीष्। अपामार्गे।

केशपाशी स्त्री० केश+पाश—गौरा० ङीष्, विस्तारात्, केशसमूहे चूड़ायाम् ।

केशमथनी स्त्री० केशै र्बद्धा मथ्यतेऽसौ मथ ल्युट् ङीप् । ग्रन्थिदृष्टे ।

केशमार्जक न० केशान् मार्ष्टि मृज—ण्वुल् । (काँकुर चिरणि) ख्याते केशप्रसाधिकायां कङ्कतिकायाम् ।

केशर पु० के जले शीर्य्यते शॄ—अप् । सिंहस्कन्धस्थायां जटायाम् अश्वस्कन्धस्थकेशेषु, पुन्नागवृक्षे, वकुलवृक्षे, 'नीलकेशर-वृक्षे सुरानामसमवृक्षे च । छिक्कुले न० किञ्जल्के पु० न० ।

केशरञ्जन पु० केशान् रञ्जयति रञ्ज—णिच्—ल्यु । भृङ्गराजवृक्षे (भीमराज) ।

केशराज पु० केशा राजन्तेऽनेन घञ् भृङ्गराजे (भीमराज) ।

केश(स)रिन् पु० केश(स)राः सन्त्यस्य इनि । सिंहे, अश्वे, पुन्नागवृक्षे नागकेसरवृक्षे, बीजपूरकवृक्षे हनुमत्पितरि वानरभेदे च ।

केशरूपा स्त्री० केशस्येव रूपमस्याः । वन्दावृक्षे (परगाछा) ।

केशव पु० केशौ ब्रह्मरुद्रौ सर्वेश्वरोऽपि अनुकम्पयतया वाति या—ड, केशं केशिनं अर्दयति वा हिनस्ति वा—क वा । विष्णौ । "यस्मात् त्वयैष दुष्टात्मा हतः केशी जनार्द्दन ! तस्मात् केशव-नाम्ना त्वं लोके ख्यातो भविष्यसी"ति ल्युक्तेः । "अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः सर्व्वाः केशवं तस्मात् मां प्राहुर्द्विजसत्तमा" इत्युक्तौ सूर्य्यांशुभवति परेश्वरे च । केश+प्राशस्त्ये व । प्रशस्त-केशयति त्रि० ।

केशवर्द्धिनी स्त्री० केशान् वर्द्धयति वृध—णिच्—णिनि । वृहदेवीलतायाम् ।

केशवेश पु० केशस्य वेशः । कबरीबन्धने । [लतायाम् ।

केशारुहा स्त्री० केशा आरोहन्त्यनया रुह—घञर्थे क । वृहदेवी-

केशिक त्रि० प्रशस्ताः केशोऽस्यास्ति ठन् । प्रशस्तकेशयुक्ते जने ।

केशिका स्त्री० केशिन इव कायति प्रकाशते कै—क । शतावरीवृक्षे ।

केशिन् त्रि० प्रशस्ताः केशाः सन्त्यस्य केश+इनि प्रशस्तकेशयति । विष्णौ, दैत्यभेदे, सिंहे च पु० ।

केशिनिसूदन पु० केशिनं निसूदयति हिनस्ति नि+सूद-णिच्-ल्युट्। कृष्णे केशिहादयोऽप्यत्र।

केश्य न० केशाय हितं केश+यत्। कृष्णशुरणि। भृङ्गराजे पु०।

केसर न० के जले सरति सृ-अच्। किञ्जल्के, नागकेशरपुष्पे कासीसे, स्वर्णे च। नागकेशरवृक्षे, तरङ्गस्कन्धस्थे केशे, सिंहस्कन्धस्थजटायां पुन्नागवृक्षे, वकुलवृक्षे च पु०। किञ्जल्के पु० न०।

कै शब्दे भ्वा० परः अक० अनिट्। कायति अकाषीत्।

कैकयी स्त्री० केकयानां देशानां राजा तस्यापत्यम् अण् ङीप्। दशरथपत्न्यां भरतमातरि। [देशभेदे।

कैकेय पु० केकय+राजनि+अञ् नि० अत एत्वं वृद्धिः। केकय-

कैकेयी स्त्री० कैकेयस्यापत्यं स्त्री अण्। भरतमातरि दशरथपत्न्याम्।

कैटभ पु० कीटवत् भाति भा-क स्वार्थे अण्। दैत्यभेदे।

कैटभजित् पु० कैटभं जितवान् जि-भूते क्विप् तुक् च। विष्णौ। कैटभार्य्यादयोऽप्यत्र।

कैटर्य्य पु० किट त्रासे घञ् कैटं राति रा-अतिलिक्षत्वात् क स्वार्थे ष्यञ्। निम्बे, भूनिम्बे, कटफले, पूतिकरञ्जे मदनवृक्षे च।

कैतव न० कितवस्य कर्म्म अण्। कपटतायाम् स्वार्थे अण्। द्यूते, वैदूर्य्यमण्यौ, धुस्तूरपुष्पादौ च। [क्षेत्रसमूहे न०।

कैदार पु० केदारस्य क्षेत्रस्यायम् अण्। केदारजन्ये शालिधान्ये।

कैदार(रि)क न० केदार+समूहार्थे वुञ् ठञ् वा। क्षेत्रसमूहे।

कैरव न० के जले रौति रु-अच् अलुक् स० कैरवो हंसस्तस्य प्रियम् अण्। कुमुदे, शुक्लोत्पले, शङ्खे च।

कैरविणी स्त्री० कैरव+इनि। कुमुदसमुदाये तद्युक्तजलाशये च।

कैरवी स्त्री० कैरवाय हिता अण्। चन्द्रिकायाम्।

कैरात पु० किरात इव शूरः इवार्थे अण्। बलवत्पुरुषे, किरातदेशे (पर्व्वतदेशे) भवः अण्। भूनिम्बे गन्धरचन्दने च न०।

कैराल न० केरलदेशे भवम् अण्। विडङ्गे।

कैलास पु० के जले लासो लसनं दीप्तिरस्य अलुक् स०, केलसः

स्फटिकसङ्घेव शुभ्रः अण्, केशीनां समूहः अण्—कैशं तेनाख्यते-ऽत्र आह वञ् वा । शिवकुबेरयोः स्थाने ।

कैलासपति पु० ६त० । शिवे । [(जेले) धीवरजातौ ।

कैवर्त्त पु० के जले वर्त्तते वृत-अच् अलुक् स० ततः स्वार्थे अण् ।

कैवर्त्तमुस्तक पु० कर्म० । जलस्थितमुस्तके (केशुर) ।

कैवल्य न० केवलस्य शुद्धस्य उपाधिरहितस्य भावः । मोक्षे ।

कैशिक न० केशानां समूहः ठक् । केशसमूहे । नाटकप्रसिद्धे वृत्ति-भेदे स्त्री० ङीप् स० ६ प० ।

कैशोर न० किशोरस्य भावः अञ् । "प्रागण्डं दशमावधि, कैशोर-मापञ्चदशात्" इत्युक्तायां किशोरावस्थायाम् ।

कैश्य न० केशानां समूहः ष्यञ् । केशसमूहे ।

कोक पु० कोकते कुक—आदाने अच् । चक्रवाके, वृके, ज्येष्ठाम् खर्ज्जुरीवृक्षे, दर्दुरे, विष्णौ च ।

कोकनद पु० कोकान् चक्रवाकान् नदति नादयति अन्तर्भूतण्यर्थे नद्—अच् । रक्तकुमुदे, रक्तपद्मे च [क्ली० ।

कोकनदच्छवि पु० कोकनदस्येव च्छविर्दीप्तिरस्य । रक्तवर्णे तद्वति

कोकबन्धु पु० कोकयोश्चक्रवाकयोर्मीलनकारित्वात् बन्धुरिव । सूर्य्ये ।

कोकिल पु० कुक आदाने इलच् । स्वनामख्याते विहगभेदे जातौ स्त्रियां टाप् । [वृक्षभेदे, करवीरभेदे, इक्षुगन्धायाञ्च ।

कोकिलाक्ष पु० कोकिलस्याक्षीव रक्तमक्षि पुष्पं यस्य । (तालमाखना)

कोकिलावास पु० ६त० । आम्रवृक्षे ।

कोकिलेक्षु पु० कोकिल इव कृष्ण इक्षुः । (काजला) इक्षुभेदे ।

कोङ्कण पु० कोमिति कणन्त्यत्र । "अथाभ्यङ्ग स्थारभ्य कोटिदेशस्य मध्यगे समुद्रप्रान्तदेशो हि कोङ्कणः परिकीर्त्तितः" इत्युक्ते देशभेदे ।

कोच पु० कुच—अच् । देशभेदे, तद्देशस्थे "तीवरस्त्रीषु स पुत्रः मांस-च्छेदसमुद्भवः । कोचजातिरिति ख्यातः" इत्युक्ते जातिभेदे च ।

कोजागर पु० कोजागर्त्तीति वदत्यस्मिन् पृ० । आश्विनपौर्णमास्याम् । निशीथे वरदा लक्ष्मीः कोजागर्त्तीतिवादिनी" इति ।

कोट पु० कुट–घञ् । कौटिल्ये, दुर्गे च (गड़) ।

कोटर पु० न० कोटं कौटिल्यं राति रा–क । वृक्षस्यगह्वरे ।

कोटवी स्त्री० कोटं वाति वा–क गौरा० ङीष् । नग्निकायां स्त्रियां दुर्गायाञ्च ।

कोटि स्त्री० कुट–इञ् । धनुषोऽग्यभागे वस्तुमात्रस्याग्यभागे, शृङ्गायाम् (पिड़िङ्गशाक) संशयस्यालम्बने, वादे निर्णयार्थं कृते पूर्वपक्षे, शतलक्षमितसंख्यायां, तत्संख्येये च । वा ङीष् कोटीत्यप्यत्र ।

कोटिक पु० कोट्या बहुधा कायति प्रकाशते कै–क । इन्द्रगोपकीटे ।

कोटिर पु० कोटिं राति रा–क । इन्द्रे, नकुले, इन्द्रगोपकीटे च ।

कोटिवर्षा स्त्री० कोटिभिरग्यैर्वर्षति मधु वृष–अण् । (पिड़िङ्ग) शाकभेदे ।

कोटि(टी)ग पु० कोट्या अग्रेण ग्यति गो–क । लोष्टभेदनेऽस्त्रे ।

कोटीर पु० कोटिमीरयति ईर–अण् । किरीटे, जटायाञ्च ।

कोट्ट पु० कुट्ट–घञ् नि० गुणः । दुर्गे (गड़) राजधानीभेदे च ।

कोट्टवी स्त्री० कोट्टं वाति वा–क गौरा० ङीष् । लग्नायां स्त्रियाम् शुक्लकेश्याञ्च ।

कोट्टार पु० कुट्ट–आरक् पृ० । कूपे पुष्करिण्याः घाटके च ।

कोठ पु० कुठि–अच् नि० नलोपः । मण्डलाकारे कुष्ठरोगे ।

कोण पु० कुण–करणे घञ् कर्त्तरि अच् वा । येन धनुराकृतिना काष्ठेन वीणादयो वाद्यन्ते तस्मिन् वादनसाधने काष्ठे, गृहादीनामेकदेशे, अश्रौ, अस्त्राणामग्यभागे, खगुड़े, मङ्गलग्रहे च ।

कोणकुण पु० कोणे मस्तकैकदेशे कुणति चलति कुण–क । मत्कुणे (उकुण) । [देशभेदे च ।

कोदण्ड न० कु–शब्दे विच् कोर्दण्डोऽस्य । धनुषि, भ्रूलतायां,

कोद्रव पु० कु–विच् कोः द्रवति द्रु–अच् कर्म० (कोदो)धान्यभेदे ।

कोप पु० कुप–भावे घञ् । क्रोधे कामाप्राप्तिजे चित्तवृत्तिभेदे ।

कोपनक पु० कुप–युच् कोपनः स इव कायति कै–क । चोरनाम-कर्मग्रन्थे ।

कोपना स्त्री० कुप–युच् टाप्। प्रज्ञत्या कोपवत्यां स्त्रियाम्। कोप-शीले त्रि०। [कोपशालिनि त्रि०।

कोपिन् पु० अवश्यं कुप्यति णिनि। अजपारावते। अवश्य

कोमल न० कु–कलच् सुट् त्रि० गुणः। जले। मृदौ, अकठिने, मनोहरे च त्रि०। क्षीरिकायां स्त्री०। टार्पे।

कोमलपल्लवी स्त्री० कोमलं पल्लवं यस्याः। लतायाम्।

कोयष्टि पु० कं जलं यष्टिरिवास्य पृ० अत इत्वम्। जलकुक्कुभे पक्षिणि। संज्ञायां कन्। (टिटिर) टिट्टिभपक्षिणि।

कोरक पु० न०। कुर्य्यते कुर–घञ्। कलिकायाम्, कृष्णाले कक्कोले च "विकारकोरकाणीति" माघः। अमरे पुंस्त्वोक्तिः प्रायिकाभिप्रायेण।

कोरङ्गी स्त्री० कुर–अङ्गच् ङीष्। क्षुद्रलतायाम्। पिप्पल्यां च।

कोरदूष पु० कोरं दूषयति दुष–णिच् अण् (कोदो) धान्यभेदे।

कोल पु० कुल–संख्याने अच्। क्रोडे–गणियन्हे, शूकरे, उडुपे (डोङ्गा), भुजान्तरे, भल्लके, चित्रायाम् (चिता), अस्त्रभेदे, टङ्कदृश्यमाने, जातिभेदे च। चव्ये, मरिचे, तोलकमाने, बदरफले च न०।

कोलक पु० कुल–ण्वुल्। अङ्कोठवृक्षे (कांकला) च। गन्धद्रव्यभेदे, मरिचे, कक्कोले च न०।

कोलकन्द पु० कोलमिव कन्दोऽस्य। महाकन्दभेदे।

कोलदल न० कोलं बदरीफलमिव दलमस्य। नखीनामगन्धद्रव्ये।

कोलपुच्छ पु० कोलस्य शूकरस्येव पुच्छोऽस्य। कङ्कपक्षिणि।

कोलमूल न० कोलस्य बदर्य्याइव मूलम्। पिप्पलीमूले।

कोलम्बक पु० कुल–अम्बच् संज्ञायां कन्। तन्त्रीभिन्ने अलाबू प्रभृतिसमुदाये वीणायाः काये।

कोलवल्ली स्त्री० कोलइव वल्ली तत्तुल्यरोमवत्त्वात्। गजपिप्पल्याम्।

कोलशिम्बि स्त्री० कोलपादाकारा शिम्बिरस्याः। "आखुकर्णी" ति ख्यातायां शूकरपादिकायां लतायाम्।

कोला स्त्री० कुल–अच् टाप् । पिप्पल्याम्, चव्यभेषजे, कोलिवृक्षे, देशभेदे च ।

कोलाविध्वंसिन् त्रि० कोलां विध्वंसितुं वस्तुं शीलमस्य विधिन्नेन धातोरन्यार्थपरत्वम् । पर्वतवासिनि म्लेच्छभेदे, "एवं पालयतस्तस्य म्लेच्छाः पर्वतवासिनः । कोलाविध्वंसिनः प्राप्ता इति देवीभागवतम् । कोलाविध्वंसिनस्तथेति देवीमाहात्म्यम् । कोलाशब्दः कोलाफलवाचकस्तथा च कोलाफलेनैव राज्यविध्वंसं कुर्व्वन्ति ये । तेषु । [व्यक्ते शब्दे ।

कोलाहल पु० कुल–घञ् तमाकुलति अच् । बहुविधे दूरगामिन्य-

कोलि पु० स्त्री० कुल–इन् । वदर्य्याम् स्त्रीत्वपक्षे वा ङीष् ।

कोविद पु० कुङ् शब्दे–विच् कोवैदस्त वेत्ति विद क । पण्डिते विदुषि ।

कोविदार पु० कुं भूमिं विदारयति–वि+दृ–अण् । रक्तकाञ्चनारे (रक्तकाञ्चन) ।

कोश(ष) पु० कुश(ष) घञ् । पानपात्रे, कड्गले, खड्गपिधाने, (खाप) कृताकृतयोः खर्ण्णरूप्ययोः, अर्थसञ्चये, मेघ्रायाम् अण्डकोषे, शब्दादिसंग्रहे, योनौ, शिम्बायाम्, गुप्तगेहे, हिरण्यादिस्थापनगृहे मञ्जूषायाम् आच्छादके, मनसादि फलस्थान्तः स्थावयवभेदे च (कोया) ।

कोशफल न० कोशेफलमस्य । कक्कोले, त्वपुष्याम् (यशा) स्त्री०टाप् ।

कोशल पु० स्त्री० कुश–कलच् नि० गुणः । अयोध्यापुरे या टाप् ।

कोशलात्मजा स्त्री० कोशलानां राजा तद्राजस्य लुक् (६त० । रामचन्द्रस्य मातरि ।

कोश(ष)लिक न० कोशं (षं) धनसञ्चयं लाति ला–क ततःभावे ठन् । उत्कोचे (घुस) ।

कोशाङ्ग पु० न० कोशाकारमङ्गमस्य । बड्गमूले वृक्षभेदे ।

कोशा(ष)तकी स्त्री० कोश (ष) मतति एवुल् गौरा० ङीष् । (झिङ्गा) पटोल्यां तत्फलेऽपि हरीतक्यादित्वात् स्त्रीत्वम् ।

कोशिला स्त्री० कोश+अस्त्यर्थे पिच्छादित्वाद् इलच् । सुवर्णयूथिकायाम् ।

कोयी(षी) स्त्री० कुष (कुष) अच् गौरा० । चर्मपादुकायाम् धान्या-
द्याधारभाजने च (गुजरा) ।
कोष पु० कोषयत् ।
कोषचक्षु पु० कोषाकारा चक्षुर्यस्य । चारपक्षिणि ।
कोषवृद्धि स्त्री० कोषस्य धनसञ्चयस्य वृद्धिः । धनवृद्धौ कोषस्थाधनस्य
वृद्धिर्यस्मिन् । रोगभेदे पु० ।
कोषशायिका स्त्री० कोषे शेते शी-एवुल् । छुरिकायाम् ।
कोषिन् पु० कोष+इनि । आम्रवृक्षे ।
कोष्ठ पु० कुष-घञ् । गृहमध्ये, उदरमध्ये, धान्यादिस्थापने कुम्भले
च (कुठी) आत्मीये त्रि० ।
कोष्ण न० ईषदुष्णम् कोः कादेशः । ईषदुष्णसर्षे । तद्वति त्रि० ।
कोसल पु० कौ पृथिव्यां सलति उत्कर्षं गच्छति अच् पृ० गुणः ।
सरयूतीरनिविष्टे देशे । अयोध्यायां स्त्री० । [च ।
कोहल पु० कौ हलति खण्डयति अच् पृ० गुणः । वाद्यभेदे मद्यभेदे
कौक्कुटिक पु० कुक्कुटौ मायां, पादपतनदेशञ्च पश्यति ठक । द्यूतिके,
कीटादिवधभीत्या पार्श्वे पश्यन्नदृष्टरि संन्यासिनि च ।
कौक्षेयक कुक्षौ सतं वद्धः ठक्ञ् । सतकुक्षिबद्धे खड्गे ।
कौट पु० कूटे अदिशुद्धं भवः अञ् । कूटजे (कुरची) कुक्षां प्राय-
भवः । खतन्त्रे त्रि० ।
कौटज पु० कूटमेव कौटं तत्र जातः । कुटजे वृक्षे
कौटतच्च पु० कर्म० । स्वाधीनकर्मोपजीविनि । [जीविनिव्याधे ।
कौटिक त्रि० कूटेन खगबन्धनयन्त्रेण चरति ठक् । मांसविक्रय
कौडविक त्रि० कुडवः सम्भवति (खल्लिन् समानेशयति) तद्वापः
वपनयोग्यं क्षेत्रम् वा ठक् । कुडवधान्यस्थापनयोग्ये पात्रे,
तद्वपनयोग्ये क्षेत्रे च ।
कौण्प पु० कुणपः शव भक्ष्यत्वेन विद्यतेऽस्य अण् । राक्षसे ।
कौतुक न० कुतुक+प्रज्ञादित्वात् स्वार्थे अण् । अपूर्वदर्शनौत्सुक्ये ।
कौतूहल न० कुतूहल+प्रज्ञादित्वात् स्वार्थे अण् । कौतुके ।

कौद्रवीय त्रि० कोद्रवाणां भक्षणं शीलम् छ। (कोदो) धान्यभेद-भक्षणयोग्ये चेले।

कौन्ती स्त्री० कुन्तिषु देशेषु भवा अण् ङीप्। भल्लगल्लिकोषधौ।

कौप त्रि० कूपे भवः अण्। "भूमौ खातोऽल्पविस्तारो गम्भीरो गण्डलाकृतिः। वज्रोऽक्षुः सकूपः स्यात्तदम्भः कौपमुच्यते' इत्युक्ते कूपोदके, स्त्रियां ङीप् "न विरसाः कौपीरपः पाखतीति वाहि० २म०।

कौपीन न० कूपे पतनमर्हति अकार्य्यार्थे नि० पापे, तद्वति त्रि०। गोप्यत्वात् पुरुषलिङ्गमपि कौपीनम् तदाच्छादकत्वात्। मेखलानिबद्धे वस्त्रखण्डे च "कौपीनवन्तः खलु भाग्यवन्त" इति पुराणम्

कौमार न० कुमारस्य भावः अञ्। "जातः कुं पृथिवीं प्रदृभ्यां मारयेत् स कुमारक" इत्युक्तलक्षणायां "कौमारं पञ्चमाब्दान्त" मित्युक्तावस्थायां "कौमारं यौवनं जरे"ति गीता।

कौमारी स्त्री० कुमारस्य कार्त्तिकेयस्येयम् अण्। कार्त्तिकेयशक्तौ, धृतकुमारीव्रतिकायाञ्च। अपूर्वपतिः कुमारी" सुपपत्नेति कौमारपूर्वपदे इत्यण्। भार्य्यायाम्।

कौमुद पु० "कौ मोदन्ते जना यस्मिन् कौमुदस्तेन कीर्त्तित इत्युक्तचिह्ने कार्त्तिकमासे

कौमुदी स्त्री० कुमुदानां हर्षहेतुरियम् अण्। ज्योत्स्नायां तत्सम्पर्के हि कुमुदप्रकाशः कविकल्पितः "कौ मोदन्ते जना यस्मान्नानाभावैः परस्परम्। हृष्टास्तुष्टाः सुखापन्नास्तेन सा कौमुदी मता" इत्युक्तलक्षणायां कार्त्तिकपौर्णमास्याम्। आश्विनपौर्णमास्यामपि।

कौमोदकी स्त्री० कोः पृथिव्याः पालकत्वात् मोदकः कुमोदकी विष्णुः तस्येवम् अण्। विष्णुगदायाम्।

कौरव पु० कुरोरयम् कच्छादित्वादण्। कुरुदेशसम्बन्धौ देशराष्ट्रादिषु पाण्डवेषु च उभयोरपि कुरुवंशजातत्वात्।

कौरव्य पु० कुरु-ष्यञ्। कुरुवंशजे क्षत्रिये। बहुषु लुक्। कुरवः।

कौल त्रि० कुले सत्कुले भवः अण्। सत्कुलीने। तन्त्रोक्ते कुलाचाररते च।

कौलटिनेय पु० स्त्री० भिक्षुक्या: कुलटाया अपत्यम् ढक् टिलोपश्च । कुलटा भिक्षुक्याः पुत्रे । स्त्रियां ङीप् ।

कौलटेय पु०स्त्री० कुलटाया: सत्या: असत्या वा अपत्यम् । ढक् । सत्या: असत्याश्च कुलटाया: पुत्रे । स्त्रियां ङीप् ।

कौलटेर पु०स्त्री० कुलटाया: असत्या अपत्यम् ढक् । वन्ध्यकाया: पुत्रे ।

कौलिक त्रि० कुलादागतः ठक् । कुलपरम्परागते । कुलेनाचरितः ठक् । कुलाचारे । कौलं कुलधर्मं प्रवर्त्तयति ठक् । कुलधर्म-प्रवर्त्तके तन्त्रोक्ते शिवे, मन्त्रादौ च ।

कौलीन न० कौ पृथिव्यां लीनं यस्मात् अलुक् स० । गुप्ते, परीवादे, दुष्कार्य्ये च । कुलीनस्य भावः कर्म वा । कुलीन कर्मणि प्राणिभिर्द्यूते च ।

कौलेय त्रि० कुले+भवः ढक् । सत्कुलोत्पन्ने ।

कौलेयक पु० कुले भवः स्वा ढकञ् । कुलागते कुक्कुरे ।

कौवेरी स्त्री० कुवेरस्येयम् अण् मातृमेदे, उत्तरदिशि च ।

कौशल न० कुशलस्य भावः अण् । क्रियायां नैपुण्ये ।

कौशलिका स्त्री० कुशलस्य पृच्छा ठक् । कुशलप्रश्ने । कुशलाय स्वमङ्गलाय नीयते ठञ् । उपायने उपढौकने ।

कौशलेय पु० कौशल्यायाः अपत्यम् ढक् यलोपः । रामचन्द्रे ।

कौशल्या स्त्री० कुशलैव चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् । रामजातरि ।

कौशाम्बी स्त्री० कुशाम्बेन निर्वृत्ता नगरी अण् । वत्सराजधान्याम् ।

कौशिक पु० कुशिकस्य गोत्रापत्यम् अञ्अण् । विश्वामित्रे मुनौ । कोशे भवः ठक् । नकुले, व्यालग्राहे, धूर्त्ते, दुष्टे गुग्गुलौ च । कोशेऽधिकृतः ठक् । कोशाध्यक्षे ।

कौशिकफल पु० कौशिकेन विश्वामित्रेण सृष्टं फलं यस्य । नारिकेले ।

कौशिकारति पु० ईत० । मेचकद्युतौ काके तस्य मेचकद्युतित्वं लोकप्रसिद्धम् ।

कौशिकी स्त्री० शरीरकोशादुत्पन्ना; पार्वत्याः निःसृताम्बिका । कौशि-

कौशि सभाख्यातेऽस्त्रशस्त्रधारी दूर्वायाम् नदीभेदे कौशिकी चन्द्रभागा चेति स्मृतिः गन्धे वृक्षभेदे च ।

कौशेय त्रि० कोशाडुत्पितम् ढक् । कृमिकोशादिजाते वस्त्रे ।

कौसल्या स्त्री० कोसलस्य राज्ञोऽपत्यं अञ् । राजमात्रि पाणिनिसूत्रे दृश्यसकारनिर्देशात् दन्त्यसकारवान्पठ्यम् ।

कौसल्यायनि पु० कौसल्याया अपत्यं फिञ् । श्रीरामे ।

कौसुम्भ पु० कुसुम्भ+स्वार्थे अण् । अरण्यकुसुम्भे शाकभेदे च कुसुम्भेन रक्तम् अण् । कुसुम्भरागरञ्जिते वस्त्रादौ त्रि० ।

कौसृतिक त्रि० कौसृत्या चरति ठक् मायाकारके शास्त्रयुक्ते ।

कौसुभ पु० कुं भूमिं सुनाति कुसुभो जलधिः तत्र भवः अण् । विष्णोर्वक्षस्थे कौसुभस्तु महातेजाः कोटिसूर्यसमप्रभः इत्युक्तलक्षणे मणिभेदे ।

कौसुभवक्षस् ईव० कौसुभो वक्षसि यस्य । विष्णौ ।

क्रथ बधे वा० चु० उभ० सचे भ्वा० पर० सक० सेट् घटादि । क्रथयति—ते क्रथति अचिक्रथत्—त अक्राथीत् ।

क्रस दीप्तौ कौटिल्ये च दिवा० पर० अक० सेट् घ० । क्रस्यति अक्रसीत्—अक्राक्षीत् क्रसयति-ते क्रसित्वा—क्रस्वा ।

क्रस दीप्तौ वा० चुः उभ० पक्षे भ्वा० क्रसयति-ते । क्रसति अचिक्रसत्—त अक्रसीत्—अक्राक्षीत् । क्रसित्वा—क्रस्वा ।

क्रू शब्दकरणे क्र्यादि० उभ० सक० सेट् घ्वादि० । क्रुणाति क्रुणीते अक्रावीत् अक्रविष्ट ।

क्रूय हुर्गन्धे आर्द्रीभावे शब्दे च भ्वा० आत्म० अक० सेट् । क्रूयते अक्रूयिष्ट । क्रोपयति ते । क्रूतः ।

क्रार कौटिल्ये भ्वा० पर० अक० सेट् क्रारति अक्रारीत् ।

क्रकच पु० क्रकृति कचति शब्दायते कच-शब्दे अच् । पक्षिलाक्षे वृक्षे । करपत्रे (करात) पु० न० । ज्योतिषोक्ते योगभेदे च ।

क्रकचच्छद् पु० क्रकच इव छदो यस्य । केतकीवृक्षे ।

क्रकचपाद्(द) क्रकचमिव पादो यस्य वा न्यक्षोपः । क्रकचासे ।

क्रकचपृष्ठी स्त्री० क्रकच इव पृष्ठं यस्याः । (करत) वस्त्रभेदे ।
क्रकण पु० क्र इति कणति शब्दायते कण–अच् । (कसार) पक्षिणि ।
क्रकर पु० क्र इति शब्दं कर्त्तुं शीलमस्य ताच्छील्येऽच् । (कवार)
अश्वे पक्षिणि ।
क्रतु पु० क्र–कतु । यूपसहिते, तद्रहिते, वा यज्ञे, संकल्पे, "यथाक-
तुरस्मिन् लोके पुरुषो भवती"ति श्रुतिः । ब्रह्मणः वराज्ञाते
मरीच्याद्यन्तर्गते मुनिभेदे, वैश्वदेवभेदे, इन्द्रियेषु च ।
क्रतुदोषमुट् पु० क्रतुनामिन्द्रियाणां दोषं मुदति क्विप् । प्राणायामे
"दह्यन्ते ध्मायमानानां धातूनाञ्च यथा मलाः । प्राणायामैस्तथा
दोषाः धार्य्यन्तीन्द्रियगोचरा" इत्युक्तेस्तस्येन्द्रियदोषनाशकत्वम् ।
क्रतुद्विष् पु० क्रतुं द्वेष्टि द्विष–क्विप् । असुरे, नास्तिके च ।
क्रतुध्वंसिन् पु०क्रतुं दक्षयज्ञं ध्वंसयति ध्वंस–णिच्–णिनि । शिवे ।
क्रतुभुज् पु० क्रतुं यज्ञे हुतहविरादिकं भुङ्क्ते भुज–क्विप् । देवे ।
क्रतुराज पु० क्रतूनां राजा टच्समा० । राजसूययज्ञे ।
क्रथ वधे भ्वा० पर० सक० सेट् घटा० । क्रथति अक्रथीत्–अक्राथीत् ।
क्रथयति–ते ।
क्रथ प्रतिहर्षे पु० उभय० सक० सेट् क्राथयति–ते अचिक्रथत्–त ।
कथन न० क्रथ वधे ल्युट् । मारणे क्लेशने च राजन्योर्व्वांसक्रूटक्रथन-
पट्टरिति प्रबोधचन्द्रोदयः । संज्ञायां कनू उड्डे ।
क्रद रोदने वैकल्ये अक० आह्वाने सक० भ्वा० पर० सेट् ।
क्रन्दति अक्रन्दीत् । [क्रदयति ।
क्रद वैकल्ये भ्वा० आत्म० अक० सेट् घट दि० । क्रदते अक्रदिष्ट
क्रन्द निरन्तरशब्दकरणे चुरा० अक० उभ० सेट् । प्रारेभ्याङ्पूर्वः
आक्रन्दयति ते आक्रन्दत् त ।
क्रन्दन न० क्रदि–भावे ल्युट् । शोकादिनाश्रुपातने । [क्रपयति ।
क्रप कृपायाम् भ्वा० अक० आत्म० सेट् घटादि । क्रपते अक्रपिष्ट

क्रम गतौ पा भ्वा० अक० सेट् दिवा० पर० अक० सेट्। आक्रामति आक्रमति अक्रमीत् आक्रमिषा आक्रान्त। [आक्रमणे, आदे च।

क्रम पु० क्रम—घञ्। निक्षेपपूर्वोपरभावरूपे विज्ञाने, अनुक्रमे, मार्गे,

क्रमि पु० क्रम—इनि। क्रमिपदार्थे।

क्रमि(मी)मिश्र पु० क्रमिं कृमिं क्रम—क। विष्णुके।

क्रमिज क्रमेर्जायते जन—ड। अगुरुचन्दने। टाबाद्यां ङीष्। ।

क्रमु पु० क्रम—उ। सुपारीके (सुपारी)।

क्रमुक पु० क्रम—उकञ् ततः संज्ञायां कन्। महद्गुणके महदादरणि, सुपारीके, षट्तिक्तःलोध्रे च। [सम्बन्धे।

क्रमेलक पु० आक्रमति क्रम—विच् एलति चल् कर्म०। उष्ट्रे स्वार्थे कन्।

क्रय पु० क्री—भावे अच्। मूल्यदानेन द्रव्यग्रहणे।

क्रयलेख्य न० ईत० "यत्किं चिल्लादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम्। पत्रं कारयते यस्तु क्रयलेख्यं तदुच्यते" इत्युक्तलक्षणे क्रयलक्षकपत्रे (क्वाला)।

क्रयविक्रयिक पु० क्रयविक्रयाभ्यां जीवति ठन्। वणिग्जने।

क्रयिक पु० क्रयेण जीवति ठन्। वणिग्जने।

क्रव्य त्रि० क्रवाय क्रेतारः क्रौर्योर्युरितिचुद्या प्रसारितम् क्री-वद् कर्म० कार्थे यत्। क्रव्यनिमित्तं कृष्टे प्रसारिते द्रव्ये।

क्रव्य न० क्रव—एयत् एलयोरेकत्वात्। आममांसे।

क्रव्याद् पु० क्रव्यमत्ति अद—क्विप्। राक्षसे, सर्पादौ च।

क्रव्यात् पु० क्रव्यमत्ति अद—अण्। राक्षसे, सिंहे, श्वेने, अग्नौ मांसभक्षके च "क्रव्यादोऽनलभक्षणे" इत्यभिधानभेदे दृश्यम्।

क्रशिमन् पु० कृशस्य भावः इमनिच्। कृशत्वे।

क्रान्त पु० क्रम—क्त। अस्ते। आक्रान्ते अतिक्रान्ते व्याप्ते संक्रान्ते च त्रि०। [अतीतदृष्टरि।

क्रान्तदर्शिन् त्रि० क्रान्तमतीतं पश्यति दृशि। पण्डिते

क्रान्ति स्त्री० क्रम—क्तिन्। आक्रमणे, गतौ, खगोलमध्यस्थस्वर्ध्वगत्यर्थं तिर्य्यग्गोलरेखायाञ्च "अयनादयनं यावत् कक्षा तिर्य्यक् तथ

धेरा । अग्निर्वसुः तथा सूर्यः सदा पर्येति भारतम्" इत्युक्तः भावार्थे ।

क्रिमि पु० क्रम-इचि इट्चाहेः । क्षुद्रजन्तौ ।

क्रिमिघ्न पु० क्रिमिं हन्ति हन-क । विड्गे । वीरतरायां स्त्री० ङीष् ।

क्रिया स्त्री० क्र-भावे य टाप् । वारणे, चेष्टायाम्, इन्द्रियव्यापारे, पाकादिशब्दप्रवृत्तिनिमित्ते फलव्यापाररूपे धर्मभेदे, विकृतौ, पूजायाम्, विद्यायां, चिकित्सायां, करणे, गर्भाधानादिसंस्कारे, व्यवहारपादविशेषे च । "सर्वेष्वर्थविवादेषु बलवत्क्रिया क्रिये"ति स्मृतिः ।

क्रियापाद् पु० कर्म० । व्यवहारे साक्षिलेख्यादिभिः प्रतिज्ञातार्थसाधनरूपे तृतीये पादे "पूर्वपक्षः स्मृतः पूर्वोद्दितोत्तरोत्तरः स्मृतः । क्रियापादस्तृतीयः स्यादिति स्मृतिः ।

क्रियाफल न० ६त० । "उत्पत्तिराप्तिर्विकृतिः संस्कृतिश्च चतुर्विधम् । क्रियाफलं प्राहुरार्याः" इत्युक्ते कर्मफले उत्पत्त्यादौ, धात्वादिजन्ये पुत्रौदनत्वादौ च ।

क्रियायोग पु० योगार्थं क्रियमाणे देवाराधनादौ । "वस्तु वाक्यार्थसंयोगः क्रियायोगः स उच्यते । प्रधानं कारणं योगो मुक्तेर्मुनिवरोत्तम ! । क्रियायोगस्तु योगस्य कारणं परमं मतम्" इति पुराणम् ।

क्रियासमभिहार पु० सम्+अभि+हृ-घञ् । ६त० । क्रियायाः पौनःपुन्ये । क्रियासमभिहारेण विराध्यन्तं क्षमेत च इति स्मृतेः ।

क्री क्रये (मूल्यदानेन द्रव्यग्रहणे) क्र्यादि० उभ० सक० अनिट् । क्रीणाति क्रीणीते अक्रैषीत् अक्रेष्ट ।

क्रीड खेलने भ्वा० पर० अक० सेट् । क्रीडति अक्रीडीत् ।

क्रीड़न न० क्रीड-ल्युट् । परीहासे, क्रीड़ावाद्ये ।

क्रीड़ा स्त्री० क्रीड़-अ । परीहासे खेलने च ।

क्रोल पु० क्री-क । हृदयपुण्डरीकान्तर्गते "क्रीणीयात् यस्यमत्यार्थं मातृ-

विक्रीयमानिकात् । स क्रीतकः कृतकाद्यै इत्युक्ते पुत्रभेदे । क्रीतकृते वस्तुमात्रे त्रि० ।

क्रीतानुशय पु० क्रीते अनुशयः इष्टत्वादिना पश्चात्तापो यत्र । अदातृविवादेषु "क्रीत्वा मूल्येन यः पण्यं क्रेता न हर्तुमर्हति । क्रीतानुशय इत्येतद्विवादपदमुच्यते" इत्युक्ते विवादभेदे ।

क्रुड भाषे दिवा० आ० अक० सेट् । क्रुड्यते । अक्रोडिष्ट ।

क्रुञ्च् पु० क्रुनृच–क्विप् । (क्रौंच) वकभेदे । जातित्वे टाप् क्रुञ्चा ।

क्रुञ्च पु० क्रुनृच कर्मणि घञ् । क्रौञ्चपर्वते । अच् टाप् । वीणाभेदे ।

क्रुध्(धा) स्त्री० क्रुध–सम्पदादित्वात् क्विप् वा टाप् । कामाग्निहेतुके चित्तवृत्तिभेदे कोपे । [अत्यभिक्रुध्यति अक्रुधत् ।

क्रुध कोपे दिवा० पर० अक० सोपसर्गः सक० अनिट् । क्रुध्यति

क्रुन्च गतौ, वक्रीभावेऽनादरे च सक० पर० सेट् । क्रुञ्चति अक्रुञ्चीत् ।

क्रुन्थ क्रोधे क्लेशे च क्रया० पर० अक० सेट् । क्रुन्थति अक्रुन्थीत् ।

क्रुश रोदने आक्रोशे च सक० भ्वा० पर० अनिट् । क्रोशति अक्रुशत् ।

क्रुष्ट क्रुश-भावे क्त । रोदने, रवे च । आङ्+कर्मणि क्त आक्रुष्टे त्रि० ।

क्रूर त्रि० क्रन–रक् धातोः कू । कठिने, निर्दये, परद्रोहकारिणि, नृशंसे, उग्रे च । रक्तकरवीरे पुंस्त्वे नखरे, कङ्कपक्षिणि ज्योतिषोक्ते रविभङ्गलमन्दराहुकेतुरूपे ग्रहे, पूर्वाफल्गुनीभरणीमघारूपे नक्षत्रे च पु० ।

क्रूरराविन् पु० क्रूरस्वरं रौति रु–णिनि । द्रोणकाके ।

क्रेय त्रि० क्री–यत् । क्रेतव्ये वस्तुमात्रे ।

क्रोड़ पु० न० क्रुड–घञ् । अङ्के (कोल) । राजसे शूकरे च पु० । अन्यानासुरभि भुजान्तरे च स्त्री० टाप् । वाराहीकन्दे पु० स्त्री० ।

क्रोड़ाङ्घ्रि पु० क्रोड़े अङ्घ्रिर्यस्य । कच्छपे ।

क्रोध पु० क्रुध–घञ् । परापकाराय चित्तवृत्तिभेदे, परानिष्टाभिलाषे, अनिष्टविषयद्वेषहेतुके चित्तवृत्तिभेदे च ।

क्रोधज पु० क्रोधात् जायते जन–ड । मोहे "क्रोधात् भवति संमोहः" इति गीता । पैशुन्यं साहसं द्रोहः ईर्ष्यासूयार्थदूषणम् ।

वाग्दण्डजन्य पापम् क्रोधजोऽपि मनोऽष्टकदलजो व्यसनभेदे च।

क्रोधन पु० क्रुध–ल्यु। कोपयुक्ते, कोपशीले, तन्त्रोक्तेषु अष्टसु भैरवेषु भैरवभेदे, अष्टिसम्बत्सरमध्ये ज्योतिषोक्ते "रोगोमरण्यदुर्भिक्षं विरोधोवह्निसङ्कुलः। क्रोधने विषमं सर्वमिति" फलके, बलरामभेदे च।

क्रोश पु० क्रुश–घञ्। रोदने आह्वाने च। अष्टसहस्रकुलमाने (क्रोश) "क्रोशः सहस्रद्वितयेन तेषां" इति लीलावती। मतान्तरे सहस्रकुलमाने। [क्रोष्टृ।

क्रोष्टु पु० क्रोशति क्रुश–तुन्। शृगाले। स्वार्थे कन् अत्रैवार्थे। स्त्रियां क्रोष्टुकपुच्छिका स्त्री० क्रोष्टुकस्य पुच्छमिव पर्णान्यस्याः। (चाकुलिया) वृश्चिपर्ण्याम्। [शृगाख्यां, चाकुल्याञ्च।

क्रोष्ट्री स्त्री० क्रुश–तुन् ह्रस्वत् ङीप्। भूमिकुष्माण्डे, विदार्य्यां,

क्रौञ्च पु० क्रुञ्च+स्वार्थे अण्। (क्रोंचक) वकभेदे कुररपक्षिणि, दैत्यभेदे, दधिसमुद्रेणावृते द्वीपभेदे पर्वतभेदे च।

क्रौञ्चदारुक(ण) पु० क्रौञ्चं दैत्यं पर्वतं वा दारयति ड–णिच् ण्वुल् युच् वा। कार्त्तिकेये स हि "क्रौञ्चे क्रौञ्चो हतो दैत्यः क्रौञ्चाद्रौ क्षेमकन्दरे। स्कन्देन युद्धा सुचिरं चिलमायो सुमायिना। स शैलजस्य दैत्यस्य ख्यातश्चिलेण कर्मणा। कैलासागमनस्य नाम्ना क्रौञ्चः स उच्यते इति पुराणम्।

क्रौञ्चादन न० क्रौञ्चानां वकभेदानामदनं भक्षम्। व्याधे, (पेंचु) चिञ्चोटके, पिप्पल्याञ्च। पद्मबीजे स्त्री०।

क्लथ वधे वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् चटादि०। क्लथयति ते क्लथति अचिक्लथत् अक्लाथीत् अक्लथीत्।

क्लद रोदने अक० आह्वाने सक० इदित् पर० भ्वा० सेट्। क्लन्दति अक्लन्दीत्। [क्लदयति ते।

क्लद वैकल्ये दि० आत्म० अक० सेट् चटादि०। क्लद्यते अक्लदिष्ट

क्लद रोदने भ्वा० उभ० इदित् अक० सेट्। क्लन्दति ते अक्लन्दीत् अक्लन्दिष्ट।

क्षप अव्यक्तवाक्ये चुरा० उभ० अक० सेट् घटा० । क्षपयति-ते अचि-क्षिपत् त ।

क्षम ग्लानौ दिवा० पर० अक० सेट् । क्षाम्यति अक्षमीत् । क्षमित्वा-क्षान्त्वा । क्षान्तः । [क्षमित्वा क्षमितः ।

क्षम ग्लानौ भ्वा० पर० अक० सेट् । क्षामति अक्षमत् अक्षमीत् ।

क्षम पु० क्षम-घञ् अदृष्टिः । आयासे, श्रमे च ।

क्षमय पु० क्षम-अथच् । आयासे । [विष्ट-क्षपयति क्षपित्वा । क्षपा ।

क्षय भये दिवा० आत्म० अक० सेट् घटादि० । क्षय्यते अक्षक्षान्त त्रि० क्षम-क्त । श्रमार्त्ते । [अक्षेदीत्-अक्षैत्सीत् ।

क्षिद् आदीभावे दिवा० पर० अक० सेट् । क्षिद्यति । अक्षिदत्-

क्षिद् रोदने क्षदित् भ्वा० उभ० अक० सेट् । क्षिन्दति अक्षिन्दीत् ।

क्षिन्न त्रि० क्षिद-क्त । आर्द्रे ।

क्षिश उपतापे दि० आत्म० अक० सेट् । क्षिश्यते । अक्षेशिष्ट क्षिशित्वा । क्षिशितः-क्षिष्टः ।

क्षिश विघाते क्र्या० पर-सक० वेट् । क्षिश्नाति अक्षेशीत्-अक्षिक्षत् ।

क्षिशित त्रि० क्षिश-उपतापे क्त । क्लेशयुक्ते वा । ह्रस्वभावे क्षिष्टोऽप्यत्र ।

क्षीतक न० क्षीव-क्षिप् नि० वलोपः क्षीं तकति हसते अच् मधुके (यष्टिमधु) ।

क्षीतकिका स्त्री० क्षीतक क्रयोऽस्यस्याः ठन् इत्वम् । नीव्यामोषधौ ।

क्षीव(व) मदे अप्रागल्भ्ये च भ्वा० आत्म० अक० सेट् । क्षीव(व)ते अक्षीबि(वि)ष्ट । [निरुत्साहे च ।

क्षीव(व) पु० क्षीव(व)-अच् । नपुंसके, विक्रमहीने, धर्म्मलत्यादौ,

क्षु गतौ भ्वा० आत्म० सक० सेट् । क्षवते अक्षविष्ट ।

क्षेद पु० क्षिद-घञ् । प्रतीभावे, चन्द्रे च ।

क्षेश बधे उपतापे भ्वा० आत्म० सक० सेट् । क्षेशते अक्षेशिष्ट ।

क्षेश पु० क्षिश-घञ् । दुःखे, रोगादौ, योगशास्त्रोक्तेषु अविद्या-स्मितादिषु पञ्चसु । [कौन्तेय" इति गीता ।

क्लैब्य(ब्य) न० क्लीव(व) भावे-घञ् । निष्पौरुषत्वे "क्लैब्यं मास्म गमः

क्लोमन् न० क्लुङ् गतौ मनिन्। "अभ्यन्तरं हृदयात् क्लोम तिष्ठति। अमरवृत्तिः विरामूकं क्लोम्यानं मतं वृधैः" इत्यमरः। वाङ्मीमध्ये स्थानभेदे। [नेति चाक्लोम्य।

क्व अव्य० किमु+अ कादेशः। कुत्सेऽर्थे चिरुग्वोः कचित् क्वच-

क्वण शब्दे भ्वा० पर० अक० सेट्। क्वणति अक्वाणीत्। अक्वणीत्

क्वण पु० क्वण-अप्। वीणायाः शब्दे, अनिघाते च।

क्वथ निष्पचने भ्वा० पर० सक० सेट्। क्वथति अक्वथीत्। [च।

क्वाथित त्रि० क्वथ-क्त। अतिशयपक्वे व्यञ्जनादौ, दशमूलयावनादौ।

क्वाथ पु० क्वथ-घञ्। दुःखे, द्रव्यमात्रस्यातिशये पाके।

क्वाथोद्भव न० क्वाथादुद्भवति अच्। लत्याङ्गने।

क्वेल चालने गतौ च भ्वा० पर० सक० सेट्। क्वेलति अक्वेलीत्। क्वेल-यति अचिक्वेलत्। [चञ्चत् त।

क्वञ्च क्वच्चजीवने इदित् चुरा० उभ० अक० सेट्। क्वञ्चयति ते अच-

क्वज वधे भ्वा० आ० सक० सेट् घटा०। क्वजते अक्वजिष्ट। क्वजयति

क्वज गतौ दाने च भ्वा० आत्म० इदित् सक० सेट्। क्वञ्जते अक्वञ्जिष्ट

क्वण वधे तना० उभ० सक० सेट्। क्वणोति क्वणुते। अक्वणीत् अक्वणिष्ट।

क्षण पु० क्षणोति दुःखम् क्षण-अच् उत्सवे, अवसरे, मध्ये, दण्डप्रम-परिमिते काले, निमेषक्रियाचतुर्थभागे च।

क्षणद पु० क्षणं यामिकादिसङ्कल्पं सत्त्वं वा ददाति दा-क। मद्यके। जले न०। रात्रौ स्त्री०।

क्षणप्रभा स्त्री० क्षणं व्याप्य प्रभा यस्याः। विद्युति।

क्षणभङ्ग पु० क्षणात् भङ्गो यस्य उर्णनाभे, सर्वेषां भावपदार्थानां प्रति-क्षणमवयवैक्षण्यापादकक्षणावयवभङ्गस्य स्वीकारो यस्मिन् मते तादृशे बौद्धादीनां मते। [कालस्य वस्तुमात्रे।

क्षणभङ्गुर त्रि० क्षणात् भज्यते भनज-कर्मकर्त्तरि घु-क्षणै-

क्षणिक त्रि० क्षणं व्याप्नोति ठन्। एकक्षणमात्रस्थायिनि पदार्थे। येषां प्रथमक्षणे उत्पत्तिः द्वितीयक्षणे स्थितिस्तृतीयक्षणे नाश इति

ते चन्द्रिका अंधा वृद्धाश्चक्षुरहिताः तार्किकाः । कार्यान्तरयत्नवर्तिनां सत्पदार्थानामादानाय उत्पत्तिर्द्वितीयक्षणे वाधते इति बौद्धाः "यत् तत्तृतीयक्षणिकं" मित्युक्ते ।

[अन्धयुक्ते त्रि० ।

अत न० अच्–आचे क्ते । अवरुद्धपूर्वादौ अर्थे । कर्मणि क्त ।

अतन्त्र पु० अतं कुत्सितं तन्त्रं–न । (छुछुन्दरीरोधा) जुपभेदे । काशावासु ।

अतल न० अतात् आयते अय–ड । बिले ।

अति स्त्री० अच्–क्तिन् । हानौ, अपचये अये च ।

अत्क पु० अट–अच् । मूलात् अतिशयायासुत्पन्ने सङ्कीर्णवर्णे, प्रतीहारे, चारचौ, भृत्यिष्यामुत्ते, नियुक्ते, वेधसि च ।

अत्त पु० अद्य–क्विप् अद् ततस्त्रायते त्रै–क । अतिथे "अतात् क्विप आयत इत्यु दयः अतस्य यद्द इति रघुः ।

अत्रबन्धु पु० अतस्य बन्धुरेव तत्कर्मकर्त्तृत्वाभावात् न तत्कर्त्ता । अतकार्य्यान्तरे निन्द्ये अतिथे ।

अत्रिय पुं० अतस्यापत्यं घ । अत्रजाते राजन्ये "अतत्रं त्रायते अर्थे वेदाध्ययनसंयुतम् । दानादानबहिर्भूतः स वै अत्रिय उच्यते इत्युक्ते वर्णभेदे ।

अद् संघेषणे सौत्र० आत्म० सक० अनिट् । अदते अदत्त ।

अप व्याप्तौ अद० चुरा० उभ० सक० सेट् । अपयति ते अचअपत् त ।

अप वधने चुरा० कुटिल् उभ० सक०सेट् । अम्पयति ते अचअम्पयत् त ।

अप प्रेरणे चुरा०उभ०सक०सेट् । अपयति ते अचिचपत् त ।

अपयक्क पु० अपयति विषयरागं अप–युच् संज्ञायां कन् । बौद्धसंन्यासिनि । एकःअपयक्क ! आकाङ्क्षत्तेत्युद्भटः ।

अपा स्त्री० अपयति वेदान् पै–णिच् पुक् च अच् । रात्रौ ।

अपाकर पु० अपायां रात्रौ करोदीधिति र्यस्य । चन्द्रे स हि रात्रौ अर्थं जसा दीप्यते ।

अपाट पु० अपायामटति अट–अच् । राक्षसे "ततः अपाटैः पृथुपिङ्गलाक्षैरिति भट्टिः ।

[आन्तः ।

अम सङ्गमे भ्वादि० आत्म० सक० सेट् अमते अमिष्ट अमंस्त

शम शब्दने दिवा० पर० सक० सेट् श्यनादि० । शाम्यति "शार्दं वा-शब्दं यः शमीति शाबः । अशमीत् ।

शम न० शम–अच् । युद्धे । शमे, शिवे, शमावति च त्रि० ।

शमता स्त्री० शम+तल् । योग्यतायां, शब्दनिष्ठे अर्थप्रकाशन शक्तौ च "शमता च लिङ्गमि"ति मीमांसा ।

शमा स्त्री० शम–अङ् । तितिक्षायाम्, "वाक्ये बाध्यालिके चैव दुःखे चौत्पातिके क्वचित् । न कुप्यति न वा कुप्ति शक्तया परिशो-भिता," "आक्रुष्टोऽभिहतो यापि नाक्रोशेच्च न कुप्ति वा । अदुष्टे वाङ्मनः कायैस्तितिक्षोः सा क्षमाभते"ति शोक्त क्षमया-याम् चित्तवृत्तौ, भ्रूवौ च ।

शमिन् त्रि० शम–विनुण् इदुद्भावः । शमावति । कार्यं शाम्यत्य-शमीति शाबः ।

शय पु० शि–अच् । शाके, ह्रासे, अपचये, कासरोगभेदे मृत्यौ, विरामे, हिंसायाम् ६० वर्षमध्ये "देशभङ्गश्च दुर्भिक्षं भये संजीयते प्रजा" इत्युक्तफलके वत्सरभेदे, रविसंक्रान्तिदशयुतशुक्लप्रतिपदा-दिके अमावास्यान्ते मासे "हिसंक्रान्तमासः शयः कार्त्तिकादौ" । "सौराद्यदा चन्द्रमसो गरीयान् मासो हिसंक्रान्तिरसौ शयाख्य इत्युक्ते मासे च ।

शयथु पु० शि–अथु (कासरोगे) ।

शयनाग्निनी स्त्री० शयं कासं नाशयति नश–णिच–णिनि । जीम-नीवृक्षे । [शम्यपचे ।

शयपच्च पु० शयस्य (चन्द्रस्य शयार्धः) पक्षः अवयवादित्वात् समा० ।

शर संचलने भ्वा० पर० अक०सेट् । शरति अशारीत् ।

शर पु० शर–अच् । मेघे । "कार्य्यं कारणरूपस्तु नश्वरं शरसुच्यते" इत्युक्तेनश्वरे त्रि० । "शरः सर्वोपि भूतानी"तिमेदिनी । जले न० । [ते शलति अचिशलत् त अशालीत् ।

शल शोधने का पु० उभ० पक्षे भ्वा० पर० सक० सेट् । शालयति

शव पु० शु–अप् । शुने, (कुँचि) राजिकाभेदे च ।

क्षवक पुं० क्षण-ण्वुल् वा कप् । दन्तिकाभेदे, अपामार्गे च ।
क्षवथु पुं० क्षु-अथच् । क्षुते (हाँचि) [क्षुतं आयते ।
क्षवथुका स्त्री० क्षवः मलेषु यस्याः । द्रोणपुष्प्याम् तत्पलाशाग्रे हि
क्षात्र न० क्षत्रस्य कर्म भावो वा-अण् । "शौर्यं तेजो धृतिर्दाक्ष्यं
युद्धे चाप्यपलायनम् । दानमीश्वरभावश्च क्षात्रकर्म स्वभावज"
मिति स्मृते क्षत्रियकर्मणि क्षात्रं द्विजत्वञ्च परम्परार्थमिति भट्टिः ।
क्षान्त वि० क्षम-क्त । सहिष्णौ केनचित् पीड़नेऽपि सति सामर्थ्ये
तत्प्रतीकारपराङ्मुखे ।
क्षान्ति स्त्री० क्षम-क्तिन् । क्षमायाम् सामर्थ्ये सत्यप्यपकारिण्यपकाराचिकीर्षायाम् ।
क्षाम वि० क्षै-क तस्य म । क्षीणे, दुर्बले च ।
क्षार पुं० क्षर-ण । (खार) इति ख्याते रसे, लवणे, क्षारजाते काचे,
भस्मनि, गुड़े, धूर्ते च । टङ्कणे (सोहागा) यवक्षारे, विड्-
लवणे, सर्जिकाक्षारे च न० । [पिटके च ।
क्षारक पुं० क्षार-स्वार्थे क । (जालि) । नवकलिकाहस्ते पक्षिमत्स्यादि
क्षारद्रवा स्त्री० क्षारो द्रवोऽस्याः । द्रुवाक्षारकयवागूं ।
क्षारभूमि स्त्री० क्षारयुक्ता भूमिः । अश्वधिसमीपस्थभूमौ किमार्थ्यं
क्षारभूमौ प्राणदा यमदूतिजेत्यु क्तेः ।
क्षारमृत्तिका स्त्री० क्षारसंयुक्ता मृत्तिका । उषरस्थाने ।
क्षारित वि० क्षार-णिच्-क्त अपवादपक्षे, आप्लुतोषे, क्षालिते च ।
क्षालित वि० पुं० क्षल-क्त । निर्णिक्ते कृतप्रक्षालने च ।
क्षि क्षये भ्वा० पर० अक० अनिट् क्षयति अक्षैषीत् ।
क्षि क्षिंसायां स्वा० पर० सक० अनिट् क्षिणोति क्षिण्वन्ति क्षिण्वः
क्षिण्वन्ति । अक्षैषीत् ।
क्षि गतौ सक० निवासे अक० तुदा० पर० अनिट् क्षियति अक्षैषीत् ।
क्षि क्षिंसायां क्र्या० पर० सक० अनिट् क्षिणाति अक्षैषीत् ।
क्षिण क्षिंसायां तना० उभ० सक० सेट् क्षिणोति क्षिणुते अक्षैषीत्
अक्षेक्षिष्ट ।

क्षितिः स्त्री० क्षि–निवासे आधारे क्तिन्। भूमौ, आधारे क्तिन् नि० वाचे। क्षि–क्षये भावे–क्तिन्। क्षये, रोचनाख्यगन्धद्रव्ये च।

क्षितिधर पु० क्षितिं धारयति ध–खिच् अच् तुक्। पर्वते भूमिधारणकर्त्रादिलक्षणेषु च।

क्षितिपति पु० ईत०। राजनि नृपतौ एवं क्षितीशादयोऽप्यत्र।

क्षितिरुह पु० रोहति रुह–क ७त०। वृक्षे।

क्षितिवर्द्धन पु० क्षितिं वर्द्धयति वध–णिच् ल्यु। मन्त्रे "आरोग्यं क्षितिवर्द्धनं" इति भट्टिः। [अक्षिप्र।

क्षिप प्रेरणे तुदा० उभ० सक० अनिट्। क्षिपति–ते अक्षैप्सीत्।

क्षिप नोदने दिवा० पर०सक० अनिट्। क्षिप्यति अक्षैप्सीत्।

क्षिपणि(णी) स्त्री० क्षिप–अनि वा ङीष्। नौकादण्डे (दाड़) यन्त्रे बड़िशे च।

क्षिप्त त्रि० क्षिप+क्त। प्रेरिते, त्यक्ते, विकीर्णे अवज्ञाते, रागद्वेषादिवशादहिष्कृतयन्त्रे चित्ते, वायुरोगभेदे च।

क्षिप्र न० क्षिप–रक्। ज्योतिषोक्ते नक्षत्रभेदे शीघ्रे च वर्त्तति त्रि०।

क्षिप्रकारिन् त्रि० क्षिप्रं करोति कृ–णिनि। (चालाक) शीघ्रक्रियाकारके।

क्षिप्रपाकिन् पु० क्षिप्रं शीघ्रं पच्यते विष्णु। (अनाजादिविशा) दूषभेदे शीघ्रपाकवति त्रि०।

क्षिव निरसने भ्वा० पर० अक० सेट् क्षेवति अक्षेवीत्।

क्षिश्र निरसने दिवा० पर० सक० सेट्। क्षेश्यति अक्षेशीत्। क्षेत्वा श्रुत्वा। [अक्षेट।

क्षी क्षिं क्षायां भ्वा० उभ० सक० अनिट्। क्षयति–ते अक्षैषीत्

क्षीज अव्यक्तशब्दे भ्वा० पर० अक० सेट्। क्षीजति अक्षीजीत्।

क्षीण त्रि० क्षि–क्त। दुर्बले, ह्रासे च "अक्षुद्रव्यसनि यावे क्षीणो भवति चक्षुषा स्मृतिः।

क्षीव(व) मदे भ्वा० आत्म० अक० सेट् क्षीव(व)ति अक्षीवी(वी)त्।

क्षीव(व) त्रि० क्षीव(व)–क्त नि०। मत्ते।

क्षीर वल्ली-सप्तमीतत्पु० क्षिप् ङीष् । क्षीरयति क्षर-अच् । दुग्धे, जले च

क्षीरकण्ठ पु० क्षीरं कण्ठे यस्य । खगभेदे बालके ।

क्षीरकन्द पु० क्षीरमिव कन्दोयस्य । क्षीरविदार्याम्, क्षीरशुक्लायाम् ।

क्षीरकाण्डक पु० क्षीरान्वितं काण्डं यस्य कप् । इक्षौ दर्भे, अर्कवृक्षे च ।

क्षीरदल पु० क्षीरं दले यस्य । अर्कवृक्षे ।

क्षीरनाश पु० क्षीरं नाशयति नश-णिच्-अण् । खाण्डोटवृक्षे (खेजोड़ा) तत्पत्रादिनिर्यासयोगेन क्षीरमेव दुग्धं दधिवत् घनीभवतीति तस्य दुग्धनाशकता ।

क्षीरपर्णी क्षीरं पर्णे यस्याः ङीष् अर्कवृक्षे ।

क्षीरवल्ली स्त्री० क्षीरा क्षीरवती वल्ली । क्षीरविदार्याम् ।
स्वार्थे कन् अणोहस्वः क्षीरवल्लिका अत्रैवार्थे ।

क्षीरविज्ञाति स्त्री० ईत० "दध्नश्च पयः पक्वं यत् स्यात् सा दधिकूर्चिकेत्युक्तायाम् । (क्षीरसा) दधिकूर्चिकायाम् ।

क्षीरवृक्ष पु० क्षीरप्रधानो वृक्षः । उदुम्बरे राजादन्याम् ।

क्षीरशर पु० क्षीरं क्षरति शृ-अच् । (छाना) आमिक्षायाम् ।

क्षीरशाक न० "अपक्वमेव यत्पत्रं क्षीरशाकं हि तत् पयः" इत्युक्ते नष्टे दुग्धे राजादने च । भृङ्गराजवृक्षे स्त्री० ।

क्षीरशुक्ल पु० क्षीरमिव शुक्लः । भृङ्गराजे (पानिफल) ।

क्षीरसार पु० क्षीरस्य सारः । नवनीते "क्षीरसारमपनीय" इत्युक्तेः (छाना) आमिक्षायाञ्च । [अर्कवृक्षे ।

क्षीरहिण्डीर पु० ईत० । दुग्धफेने । क्षीरमिव हिण्डीरः (फेंची)

क्षीराब्धि पु० क्षीरस्य दुग्धरसस्याब्धिः । क्षीरसमुद्रे एवं क्षीरसागरादयोऽप्यत्र ।

क्षीराब्धिज पु० क्षीराब्धौ जायते जन-ड । चन्द्रे । लक्ष्म्यां स्त्री० ।

क्षीरावी स्त्री० क्षीरमस्यति अव-अच् ङीष् । दुग्धिकायाम् (दुधी) ।

क्षीरिका स्त्री० क्षीर+अल्पार्थे कन् (क्षीरा) राजादन्याम् ।

क्षीरिणी स्त्री० क्षीर+अस्त्यर्थे इनि । तिक्तदुग्धायां पीतदुग्धायां च

क्षीरखतायाम् । [राजादने, क्षीरखतायाम्, स्याक्षीरद्रुमे च ।
क्षीरिन् पु० क्षीर+इनि । न्यग्रोधाम्रोदुम्बरप्लक्षशाखासु
क्षीरिवृक्ष पु० कर्म० । क्षीरयुक्तेषु न्यग्रोधाश्वत्थोदुम्बरप्लक्षशा-
खासु पञ्चसु वृक्षेषु ।
क्षीरोद पु० क्षीरसदृशमुदकमस्य उदकस्योदादेशः । क्षीरसमुद्रे ।
क्षु क्षुतौ अदा० पर० अक० सेट् । क्षौति अक्षावीत् क्षुशाव । क्षुतः ।
क्षुत्वा । क्षवथुः । [दुर्गमे" इति माधः ।
क्षुण्ण त्रि० क्षुद-क्त । अभ्यस्ते, विक्षते च "अभीक्ष्णमक्षुण्णवाति-
क्षुत् स्त्री० क्षु-सम्पदा० क्विप् तुक् च । (छांचि) क्षुते ।
क्षुत न० क्षु-क्त । नासातः वायुनिःसरणजे शब्दे । (छांचि) ।
क्षुद् प्रेषणे क्रधा० उभ० सक० सेट् । क्षुणत्ति क्षुन्ते । अक्षुदत् अ-
क्षोदीत् अक्षोदिष्ट ।
क्षुद्र त्रि०क्षुद-रक् । नीचे, क्षपणे, क्रूरे, दरिद्रे, अल्पे, मूलभाक्षिणिच
क्षुद्रकण्टकी स्त्री० क्षुद्रं कण्टकं यस्याः ङीष् । दन्त्याम् ।
क्षुद्रकण्टिका क्षुद्रं कण्टकं यस्याः टाप् अत इत्वम् । कण्टका-
रिकालतायाम् ।
क्षुद्रकन्दु पु० कर्म० । शब्दके ।
क्षुद्रघण्टिका स्त्री०घण्टेव कन् घण्टिका कर्म० । किङ्किण्याम् (घुङ्गुर)
क्षुद्रजन्तु पु० कर्म० । "क्षुद्रजन्तुरनस्थिः स्यादथवा क्षुद्रएव वा । अल्पं
वा प्रकृतौ येषां केचिदानकुलादपि" इत्युक्ते खले सत्त्वे ।
क्षुद्रजम्बू(म्बु) स्त्री० कर्म० । भूमिजम्ब्वाम् ।
क्षुद्रजीरक न० कर्म० । कणजीरके, सुगन्धे च ।
क्षुद्रधात्री स्त्री० कर्म० । कर्कटशृङ्ग्याम् ।
क्षुद्रधान्य न० कर्म० । कङ्गुप्रभृतौ तृणधान्ये ।
क्षुद्रपत्रा स्त्री०क्षुद्रं पत्रं यस्याः टाप् । चाङ्गेर्याम् (चुकोपालङ्क) ।
ङीप् । वचायाम् ।
क्षुद्रपनस पु० कर्म० । लकुचे (मांदार) ।

क्षुद्रफल्ल पु० क्षुद्रं फल्लफल्ल । जीवन्तवृक्षे । कण्टकार्य्यां च अग्नि-
दमन्यां, भूमिजम्बूवृक्षे स्त्री० टाप् ।
क्षुद्रभण्टाकी स्त्री० कर्म० । वृहत्यां ।
क्षुद्रमुस्ता स्त्री० कर्म० वशिरकन्दे ।
क्षुद्रवार्त्ताकिनी स्त्री० कर्म० । कण्टकार्य्यां ।
क्षुद्रवार्त्ताकी स्त्री० कर्म० । वृहत्यां ।
क्षुद्रशङ्ख पु० कर्म० । शम्बूके ।
क्षुद्रशोर्म पु० क्षुद्रं शीर्षमस्य । मयूरशिखावृक्षे, अल्पशीर्षवति त्रि० ।
क्षुद्रशुक्ति स्त्री० कर्म० । अल्पशुक्तिकायां । स्वार्थे कन् तत्रैवार्थे ।
क्षुद्रश्वास पु० कर्म० । अल्पकासरोगे । [मार्जारगन्धायाञ्च ।
क्षुद्रसहा स्त्री० वह—अच् क्षुद्रस्य सहा इव० । क्षुद्रपत्र्यां
क्षुद्रसुवर्ण न० कर्म० । पित्तले । [क्षुद्रे टाप् । अत्रैवार्थे ।
क्षुद्रहिङ्गुली स्त्री० कर्म० । कण्टकार्य्यां । स्वार्थे कन् अथो
क्षुद्रा स्त्री० क्षुद्—रक् । वेश्यायां, कण्टकार्य्यां, सरघायां, मक्षिका-
भार्य्यां, चाङ्गेर्य्यां, हिंसायां, गवेधुकायाञ्च (गङ्गरेधान) ।
क्षुद्राग्निमन्थ पु० कर्म० (छोटगणिकारी) अल्पगणिकारिकायाम् ।
क्षुद्राङ्गपनस पु० अल्पः अङ्गरसः पनसः कर्म० । क्षुद्रके (छेओ)
(मान्दार) । [स्वार्थे कन् तत्रैवार्थे ।
क्षुद्राङ्गा स्त्री० अल्पा अङ्गरसा कर्म० । चाङ्गेर्य्यां (क्षुद्रोपालङ्क)
क्षुद्रेवाक् पु० कर्म० । गोपालकर्कट्यां ।
क्षुद्रोडुम्बरिका स्त्री० कर्म० । काकोडुम्बरिकायाम् ।
क्षुध बुभुक्षायां दिवा० पर० सक० अनिट् । क्षुध्यति अक्षुधत् ।
क्षुध्(धा) स्त्री० क्षुध—क्यादित्वात् क्विप् वा टाप् । भोजनेच्छायाम् ।
क्षुप पु० क्षु—पक् । क्षुद्रशाखाविशिष्टयुक्ते शाखोटादिवृक्षे, द्वारकाम-
विशदिवृक्षे पर्वतभेदे, राजन्यभेदे च ।
क्षुभ्र पु० क्षुभ—क्त्र नि० । सन्धानदण्डे । क्षुभिते त्रि० ।
क्षुभ सञ्चोभने भ्वा० आत्म० सक० सेट् । क्षोभते अक्षुभत् अक्षोभिष्ट-
क्षुब्धः । क्षुभितः ।

क्षुभ सञ्चलने वा दिवा० आत्म० अक० सेट्। क्षुभ्यति क्षुभ्यते अक्षोभीत्। क्षुभित:।

क्षुभित त्रि० क्षुभ-क्त। आलोडिते, व्याकुले, भीते च।

क्षुमा स्त्री० क्षु-मक्। (सिसी) (तिसी) अतसयाम्।

क्षुर विलेखने तुदा० पर० सक० सेट्। क्षुरति अक्षोरीत्।

क्षुर पु० क्षुर-क क्षु-रक् वा। नापितास्त्रे पक्षादीनां शफे, (खुर) कोकिलास्ये, गोक्षुरे, महापिण्डखर्जूरे, वाद्ये च।

क्षुरक पु०क्षुर-कुन्। गोक्षुरे, (गोखुरी) कोकिलाक्षे, तिलकवृक्षे च।

क्षुर(रि)कर्मन् न० क्षुरस्य क्षुरिणो वा नापितस्य कर्म०। क्षौरे नख-केशादिकर्त्तने "क्षुर(रि)कर्म न कुर्वीत जन्ममासे च जन्मभे" इति स्मृतिः। [दर्शोऽप्यत्र।

क्षुरधान न० क्षुरोधीयतेऽस्मिन् नापितास्त्राधारे (भांड़) क्षुरभाण्डा-

क्षुरधार पु० क्षुराणां धारेव धरपत्रधारा यत्र। नरकभेदे।

क्षुरपत्र पु०क्षुर इव पत्रमस्य। बाणे, क्षुरतुल्यपर्णयुक्ते शरवणादौ त्रि०

क्षुरपत्रिका पु० क्षुर इव पत्रं यस्याः। पाकड़शाके।

क्षु(खु)रप्र पु० क्षुरः (खुरः) इव पृणाति छिनत्ति पृ-क (खुरपी) इति ख्याते घासच्छेदनास्त्रे, तत्तुल्याग्रफलकेशरे च।

क्षुरमर्दिन् पु० क्षुरं मर्द्नाति मर्दयति मृद्-णिनि नापिते।

क्षुरमुण्डिन् पु० क्षुरेण मुण्डयति मुण्ड-णिनि इत०। नापिते।

क्षुराङ्ग पु० क्षुर इवाङ्गमस्य। गोक्षुरे (गोखुरी)।

क्षुरिणी स्त्री० क्षुर+अस्त्यर्थे इनि ङीप्। वराहक्रान्तायाम् नापितभार्य्यायाञ्च।

क्षुरिन् पु० क्षुर+इनि। नापिते, पक्षौ च।

क्षु(खु)ल्ल त्रि० क्षुद(खु) क्विप् क्षुद्(खुद्) तां लाति ला-क। अल्पे, लघौ, कनिष्ठे च। [अल्पे च।

क्षुल्लक त्रि० क्षुधा लक्ष्यते लक्ष-आस्वादने घञर्थे क। नीचे, पामरे,

क्षेत्र न० क्षि-ष्ट्रन्। देहे, अन्तःकरणे, इन्द्रिये, "इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः। इच्छा द्वेषः सुखं दुःखं संघातश्चेतना

" धृतिः । एतत् क्षेत्र"मिति गीतोक्ते इन्द्रियादिसंघाते, शस्याद्युत्पत्तिस्थाने केदारे, विल्वस्थाने, कलत्रे मेषादिराशिषु च ।

क्षेत्रज पु० क्षेत्रे जायते जन–ड । "यस्तल्पजः प्रमीतस्य क्लीवस्य व्याधितस्य वा । स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृत" इत्युक्ते द्वादशविध पुत्रमध्ये पुत्रभेदे । क्षेत्रजातमात्रे त्रि० । गोलिकायाम् श्वेतकण्टकार्य्यां च स्त्री० ।

क्षेत्रज्ञ पु० क्षेत्रं देहमात्मत्वेन जानाति ज्ञा–क । "क्षेत्राख्यानि शरीराणि तेषाञ्चैव यथासुखम् । आत्मानं वेत्ति संयोगादतः क्षेत्रज्ञ उच्यते" इत्युक्ते जीवात्मनि ।

क्षेत्रपति पु० ६त० । रुद्रं क्षेत्रपतिं प्राहुः केचिदग्निमथापरे । स्वतन्त्र एव वा कश्चित् क्षेत्रस्य पतिरुच्यते" इत्युक्ते रुद्रादिषु, क्षेत्रस्वामिमात्रे च क्षेत्रपालादयोऽप्यत्र ।

क्षेत्ररुहा स्त्री० क्षेत्रे रोहति रुह–अच् । वालुकर्कायाम् ।

क्षेत्राजीव पु० क्षेत्रं शस्योत्पादनभूमिराजीवो यस्य । कृषके ।

क्षेत्रिक त्रि० क्षेत्र+अस्त्यर्थे ठन् । क्षेत्रस्वामिनि ।

क्षेत्रिन् त्रि० क्षेत्र+अस्त्यर्थे इनि । क्षेत्रस्वामिनि ।

क्षेत्रिय पु० परक्षेत्रे देहान्तरे चिकित्स्याः परक्षेत्रः+घ नि० । देहान्तरचिकित्सनीये असाध्ये रोगे, "दृष्टोऽयं क्षेत्रियो येन मय्यपाती"ति भट्टिः परक्षेत्रोत्पन्ने क्षेत्रजपुत्रादौ च क्षेत्रजातमात्रे

क्षेप पु० क्षिप–घञ् । विक्षेपे, निन्दायाम्, गर्वे प्रेरणे, लङ्घने, विलम्बे, हेलायाञ्च ।

क्षेपक त्रि० क्षिप–ण्वुल् । क्षेपकर्त्तरि । धञ् स्वार्थे कन् । अन्यादौ क्रन्यकर्त्तुरन्येन क्षिप्तपाठे, गुच्छे च । लीलावती प्रसिद्धे कुट्टके संयोजनीये अङ्कविशेषे च ।

क्षेपण न० क्षिप–ल्युट् । प्रेरणे, च आयुधः क्षेपणार्थञ्च दातव्यं स्त्रीधनं सदे"ति स्मृतिः ।

क्षेपणिका स्त्री० क्षिप्यते चाल्यतेऽनया क्षिप–अनि । नौका चालनदण्डे, (डाड़) जालभेदे च (क्षेपला) ।

क्षेपणीय त्रि० क्षिप–अनीयर्। निक्षिपार्हेऽस्त्रे, पाषाणादिके वा क्षेप्या-स्त्रेच। क्षेपमात्रे त्रि०।

क्षेपिष्ठ त्रि० अयमेषामतिशयेन क्षिप्रः इष्ठन्। अतिशीघ्र गामिनि, "वायुर्वै क्षेपिष्ठा देवते" इति श्रुतिः।

क्षेम न० क्षि–मन्। क्षोरमागमञ्चद्रव्ये। लब्धवस्तुनो रक्षणे पु०न०। कुशले न०। तद्वति त्रि०। मुक्तौ न०।

क्षेमफला स्त्री० क्षेमाय फलान्यस्याः। उदुम्बरवृक्षे।

क्षेव सेवने भ्वा० पर० सक० सेट्। क्षेवति अक्षेवीत्।

क्षै क्षये भ्वा० पर० अक० अनिट्, क्षायति अक्षासीत्।

क्षैत्र न० क्षेत्राणां समूहः भिक्षादित्वात् अ। क्षेत्रसमुदाये।

क्षैरेय त्रि० क्षीरे संस्कृतं दध्न्। क्षीरसंस्कृते अन्नादौ। यवागूवाम् स्त्री० ङीप्। [क्षौरिरथत्र।

क्षोणि(णी) स्त्री० क्षु–नि वा ङीप्। धरायाम्। पृ० नि०

क्षोद पु० क्षुद–घञ्। रजसि, चूर्णे, मेघगे च।

क्षोदक्षम त्रि० क्षोदं क्षमते अच्। विचारसहे तत्त्वनिर्णयार्थं विचा-रणीये अप्रसक्तदूषणे वाक्ये।

क्षोदिष्ठ त्रि० अयमेषामतिशयेन क्षुद्रः इष्ठन् क्षोदादेशः। क्षुद्रतरे।

क्षोभ पु० क्षुभ–घञ्। व्यथमितत्वतः सञ्चलने, चित्तस्य भयादि-हेतुके स्वकार्य्यासामर्थ्ये च।

क्षोभण पु० क्षोभयति क्षुभ–णिच्–ल्यु। कामबाणभेदे। सांख्याद्युक्ते प्रकृतिप्रेरके पुरुषे, ईश्वरे च।

क्षौद्र न० क्षुद्राभिः सरघाभिर्निर्वृत्तम्। अण्। 'मक्षिका कपिलाः क्षुद्राः क्षुद्राख्यास्तत्कृतं मधु। मुनिभिः क्षौद्रमित्युक्तमित्युक्ते मधुनि।

क्षौद्रज न० क्षौद्राज्जायते जन–ड। मधुजाते (मोम) सिक्थके

क्षौद्रवातु पु० कर्म०। माक्षिके मधुनि।

क्षौद्रप्रिय पु० क्षौद्रमिव प्रियः सादृश्यात्। जलमधुकवृक्षे हैम०। मधुप्रिये त्रि०।

क्षौद्र्य न० क्षुद्राभिः कृतम् ढक् । क्षिक् घके । (क्षौम) ।

क्षौम पु०न० क्षुमाया अतस्यादिकारः अण् । अतसीवल्कलजाते वस्त्रे, दुकूले, शणजे वस्त्रे च । क्षु-मन् प्रज्ञादित्वादण् अट्टालिकायाम् ।

क्षौमी स्त्री० क्षुमैव प्रज्ञाद्यण् । अतस्याम् क्षुमानिर्मितकन्थायाञ्च ।

क्षौर न० क्षुरेण निर्वृत्तम् अण् । क्षुरनिष्पाद्ये वपनादौ ।

क्ष्णु तेजने अदा०पर०सक०सेट् । क्ष्णौति अक्ष्णावीत् ।

क्ष्मा स्त्री० क्षमते भारं क्षम-अच् उपधालोपश्च । धरायाम् ।

क्ष्माभृत् पु० क्ष्मां पृथिवीं बिभर्त्ति पालयति वा भृ-क्विप् तुक् च । नृपे, पर्व्वते च । भूभृदादयोऽप्यत्र ।

क्ष्माय विधूनने भ्वा० आत्म० सक० सेट् । क्ष्मायते अक्ष्मायिष्ट ।

क्ष्मील निमेषे भ्वा० पर० अक० सेट् । क्ष्मीलति अक्ष्मीलीत् ।

क्ष्विड स्नेहे भ्वा० आत्म० अक० सेट् । क्ष्वेडते अक्ष्विडत् अक्ष्वेडिष्ट

क्ष्विद् मोहने स्नेहे अक० भ्वा० आत्म० सक० सेट् । क्ष्वेदते अक्ष्विदत् अक्ष्वेदिष्ट ।

क्ष्विद् कूजने दिवा०पर०अक०सेट् । क्ष्विद्यति अक्ष्वेदीत्-अक्ष्विदत् ।

क्ष्विद् कूजने भ्वा० पर० अक० सेट् । क्ष्वेदति अक्ष्वेदीत् ।

क्ष्वेड पु० क्ष्विड-अच् । पीतघोषाद्भुमे, विषे, वर्णीतके ध्वनौ च घोषातकीवृक्षे न० । दुरासदे, कुटिले च त्रि० । [श्लाकायाञ्च ।

क्ष्वेडा स्त्री० क्ष्विड-अच् टाप् । घोषातक्याम्, सिंहनादे वंश-

क्ष्वेडित न० क्ष्वेड-क्त । सिंहनादे ।

क्ष्वेल संचालने, गतौ सक० क्रीड़ायाम् अक० भ्वा० पर० सेट् । क्ष्वेलति अक्ष्वेलीत् णिचि लुङि अचक्ष्वेलत् ।

क्ष्वेला स्त्री० क्ष्वेल-अ । क्रीड़ायाम् ।

ख

ख पु० खर्व्व-ड । सूर्य्ये । इन्द्रिये, देहे, पुरे, शून्ये, अभ्रे, बिन्दौ, आकाशे, स्वर्गे, सुखे च न० ।

खक्ख हासे भ्वा० पर० अक० सेट्। खक्खति अखक्खीत्।

खग पु० खे आकाशे गच्छतीति गम-ड। सूर्य्ये, देवे, शरे, विहगे, वायौ, सूर्य्यचन्द्रादिषु ग्रहेषु च।

खगगति स्त्री० ई तत्०। "डीनं प्रडीनमुड्डीनं खंडीनं परिडीनकम्। विडीनमवडीनञ्चातिडीनं डीनडीनकम्। गतामतं प्रपतितं सम्पातः पक्षिणां गति"रित्युक्ते विहगगमने।

खगप पु० खगान् पाति पा-क। गरुडे खगपत्न्यादयोऽत्र।

खगस्थान न० ६ तत्०। द्रुमस्थे कोटरे।

खगालक न० अलयति अलं करोति णिच्-ण्वुल् ई तत्० श्येनविहगे।

खगोल पु० खं गोल इव। भूगोलोपरिस्थिते मण्डलाकारे आकाशे तस्य संस्थितमानविशेषो वाचस्पत्ये द्रष्टव्यः।

खच भूतौ उपसर्गे च क्या० पर० सक० सेट्। खच्नाति अखचीत् अखाचीत्।

खच बन्धने अदं० चुरा० उभ० सक० सेट्। खचयति-ते अचखचत् त

खचर पु० खे आकाशे चरति चर-ट। राक्षसे स्त्रियां ङीप्। सूर्य्ये वायौ, पक्षे अश्वतरे च। आकाशगामिनि त्रि०।

खचित त्रि० खच-क्त। बद्धे, संयुक्ते च।

खज मन्थे भ्वा० पर० सक० सेट्। खजति अखाजीत् -अखजीत्।

खज पङ्क्तायां भ्वा० इदित् पर० अक० सेट्। खञ्जति-अखञ्जीत्।

खज पु० स्त्री० खज-अच्। दर्व्याम् (हाता) मन्थदण्डे च।

खजाका स्त्री० खज-आक। दर्व्याम्। (हाता)

खज्योतिस् पु० खे आकाशे ज्योतिरस्य। खद्योते कीटे।

खञ्ज(क) पु० खजि गतिवैकल्ये अच् एवुल्। (खांड़ा) पादविकले।

खञ्जखेट पु० खञ्ज इव खेटति अच्। खञ्जनविहगे।

खञ्जखेल पु० खञ्ज इव खेलति अच्। खञ्जनखगे।

खञ्जन पु० खञ्ज ल्यु। खनामख्याते विहगे। स्वार्थे कन् तत्रैवार्थे।

खञ्जरीट पु० खञ्ज इव अञ्चति अञ्च-गतौ कीटन्। खञ्जनविहगे।

खट काङ्क्षे भ्वा० पर० सक० सेट्। खटति अखाटीत-अखटीत्।

खट पु० खट—अच् । अन्धकूपे, कफे, टङ्के, तृणे खाङ्गले च ।

खटिक पु० खट+उन् । कुञ्जपाखौ । (खडि) लेखनद्रव्ये स्त्री० । खटिकाच्चिणोतीति नैघण्टम् । [सप्तम्यां यस्येत्युट: ।

खटिनी स्त्री० खट+इनि लेखनद्रव्ये (खड़ी) । न पतति खटिनी

खटी स्त्री० खट—अच् गौरा० ङीष् । (खड़ी) लेखनसाधनद्रव्ये ।

खट्ट हतौ चुरा० उभ० सक० सेट् । खट्टयति ते अचखट्टत् त ।

खट्वा स्त्री० खट—क्वन् । "अष्टाभि: काष्ठखण्डैश्च हता खट्वेति" कथ्यते इत्युक्तायां शय्यायाम् ।

खट्वका स्त्री० खट्वा—खट्वा अल्पार्थे कन् अभाषितपुंस्कत्वात् वा अत इत्त्वम् । खल्पखट्वायाम् ।

खट्वाङ्ग पु० राजभेदे । खट्वाया अङ्गमिव । नरपञ्जरे, दैशायुध-विशेषे, भूतबन्धे च । ६त० खट्वाया अङ्गे न० खट्वाङ्गवरधारक इति वटुकस्तोत्रम् । [वटुकभैरवे च ।

खट्वाङ्गभृत् पु० खट्वाङ्गं बिभर्त्ति भृ—क्विप् तुक् च । शिवे,

खट्वारूढ़ पु० खट्वा अम् आरूढ—क्त नित्यस० । प्रमादवति । खट्वा-श्रिते । त्रि० । [अखण्डिते ।

खड मन्थने भञ्जने च भ्वा० आत्म० इदित् सक० सेट् । खण्डते ।

खड भेदे चुरा० उभ० सक० सेट् । खडयति ते अचीखडत् त ।

खड न० खड—अच् । तृणभेदे (खड) पानान्तरे, भेदे च पु० ।

खडकी स्त्री० खडक् इत्यव्यक्तशब्दं करोति क—ड गौ० ङीष् । पत्रद्वारे (खिड्कि) । [लेखनद्रव्ये ।

खडी स्त्री० खडि अच् नि० नलोप: गौरा० ङीष् । खबाम ख्याते

खड्ग पु० खडि—ग नि० नलोप: । गण्डकमृगे तद्वति गण्डकपशौ च । (गण्डार) चोरनामगन्धद्रव्ये, असौ च । लौहे न० ।

खड्गकोष पु० ६त० । चर्म्मादिमये असिपिधाने (खाप) वस्तुनि (ढाल) खड्गावरके च । खड्गकोषे (खाप) च ।

खड्गपत्र पु० खड्गस्य -पत्रमिवाच्छादकम् । (ढाल) खड्गावरके

खड्गपिधान न० खड्ग: पिधीयतेऽनेन । (खाप्) खड्गकोषे ।

खड्गिन् पु० खड्ग+अस्त्यर्थे इनि । गण्डारे । खड्गधारिजने त्रि०
खण्ड पु० खडि–घञ् भेदे "खण्डं खण्डं ययुर्यत्र" इति देवीमाहात्म्यम् । विडलवणे, इक्षुविकारे (खांड) च न० । कर्म्मणि घञ् । एकदेशे पु० न० ।
खण्डकर्ण पु० खण्डश्च कर्णः कन्दोयस्य । (शकरकंद) आलुभेदे ।
खण्डकालु पु० खण्डश्च कायति के–क कर्म० । (शकरकन्द) आलुभेदे ।
खण्डधारा स्त्री० खण्डे एकदेशे धारा यस्याः । कर्त्तर्याम् (कांदची)
खण्डन न० खण्ड्–ल्युट् । भञ्जने, भेदने, निराकरणे च ।
खण्डपरशु पु० खण्डयति खण्डः परशुरस्य । शिवे, तत्क्षिप्ते जामदग्न्ये च । खण्डपर्शुरप्यत्र ।
खण्डिक पु० खण्ड+अस्त्यर्थे ठन् । कलाये, ऋषिभेदे कले च कुत्सि० । खण्डिकोपाध्यायः शिष्याय: चपेटं ददातीति भाष्यम् ।
खण्डित त्रि० खडि–क्त । भेदिते छिन्ने, द्विधाकृते च "खातान्यखण्डयत्" खण्डितेर्णाकपायितेत्युक्तेश्छायां स्त्रियां स्त्री० ।
खण्डी स्त्री० खण्ड्यते गौरा० । वनमुद्गे ।
खण्डीर पु० अपकृष्टा खण्डी गुणादित्वात् र । पीतमुद्गे ।
खतमाल पु० खे तमाल इव । धूमे, मेघे च । [अखादीत् ।
खद् स्थैर्य्ये अक० वधे सक० भ्वा० पर० सेट् । खदति अखादीत्–
खदिर पु० खद–किरच् । (खएर) द्रुमभेदे इन्द्रे, चन्द्रे च ।
खदिरपचिका स्त्री० खदिरस्येव पत्रमस्याः ङीप् ततः संज्ञायां कन् कपि ह्रस्वः । अरिखदिरे लज्जालुलतायाञ्च । कनभावे खदिरपत्रीत्यप्यत्रैव । [विना खदिरसारेणेत्याकटः ।
खदिरसार पु० ६त० । खदिरद्रुमस्य निर्य्यासजे सारे (खएर)
खदिरिका स्त्री० खदिरः खदिररसोऽस्त्यस्याः ठन् । लाक्षायां तस्या हि खदिरतुल्यनिर्य्यासः । [(छातजोड़ा) लतायाञ्च ।
खदिरी स्त्री० खद–किरच् गौरा० ङीष् । लज्जालुलतायाम्, शाकभेदे,
खदिरोपम न० खदिर उपमा यस्य । (कांटाबबला) द्रुमभेदे ।
खद्योत पु० खे द्योतते द्युत–अच् । सूर्य्ये, कीटभेदे च (जोनाकीपोका)

खधूप पु० खमाकाशं धूपयति धूप–अण् । (झाउ) प्रभातौ अग्नि-क्रीडने "खद्योतः खधूपात्" इति भट्टिः ।

खन विदारे भ्वा० उभ० सक० सेट् । खनति अखानीत्–अखनीत् अखनिष्ट खायात्–खन्यात् । [त्रि० ।

खनक पु० खन–वुन् । मूषिके, सन्धिचौरे च । भूमिदारके (खोड़ा)

खनि(नी) स्त्री० खन–इ वा ङीप् । धातुरत्नादेरुत्पत्तिस्थाने । आकरे भूविदारणे च ।

खनित्र न० खन–इत्र । (खोन्ता) अस्त्रभेदे ।

खपुर पु० खमिन्द्रियमाकाशं वा पिपर्त्ति पृ–क । गुवाकवृक्षे, (सुपारी) अक्षवृक्षके, व्याघ्रनखे च । जर्जुगते पुरे, घटे च न० । अलसे त्रि० । [परस्याम् (पाना) ।

खमूली स्त्री० खे आकाशे भूमिमन्तरेणापि मूलमस्याः । वारि-

खम्ब गतौ भ्वा० पर० सक० सेट् । खम्बति अखम्बीत् ।

खर पु० खं सुखविलसतिगयेनास्यास्य र खमिन्द्रियं राति-रा–क वा रलयोरैक्यम् । गर्दभे, अश्वतरे राक्षसभेदे च "खेरतुः खरदूषणौ" इति भट्टिः । कण्टकिवृक्षभेदे, कामे, कङ्कविहगे, क्षारपक्षिणि, ६० सम्वत्सरमध्ये षष्टितमसंवत्सरभेदे रवेः पार्श्वचरे, तिग्मरश्मौ च । तद्वति, कठिने च त्रि० "खरविशदमभ्यवहार्य्यं" इति भाष्यम् । देवताड्डटक्ते स्त्री० टाप् ।

खरकाष्ठिका स्त्री० खरस्य काष्ठं यस्याः । वलायामौषधौ ।

खरगन्धा स्त्री० खरोगन्धो यस्याः । नागबलायाम् । [रासे च ।

खरघातन पु० खरस्यरोगं घातयति हन–णिच्–ल्यु । नागकेशरे,

खरच्छद पु० खरः छदः पत्रमस्य । (उलुखड़) तृणभेदे ।

खरणस(स) त्रि० खरा कठिना नासिकास्य नासिकाया नस वान्त्य-लोपः । अत्यच्च । कठिननासिके ।

खरत्वच् पु० खरा कठिना त्वक् यस्य । लज्जालुभेदे ।

खरदण्ड न० खरः पुष्पादाधेतया कठिनोदण्डोनालो यस्य । पद्मे ।

खरदला स्त्री० खरं दलं यस्याः । काशेक्षुखरे ।

खरदूषण पु० खरश्चासौ दूषणश्चेति कर्म० । भ्रातृभेदे (भुतरा) रक्षोदोषे त्रि० । [णिनि । राक्षे ।
खरध्वंसिन् पु० खरं खरनामानं राक्षसं ध्वंसयति ध्वंस–णिच्
खरनादिनी स्त्री० खरं नदति नद–णिनि । रेणुकानामगन्धद्रव्ये ।
खरपत्र पु० खराणि पत्राण्यस्य । धातकवृक्षे, भल्लातके, अल्पपत्रतुल्यत्वात् । गोजिह्वायां स्त्री० टाप् ।
खरपत्रक पु० खरपत्र+संज्ञायां कन् । तिलकवृक्षे ।
खरपादाख्य न० खरैः पादैर्मूलैराख्यः । कपित्थवृक्षे ।
खरपुष्पा(ष्पी) स्त्री० खराणि पुष्पाण्यस्याः वा ङीप् । वर्बराख्यायां (वावुइ तुलसी) ।
खरमञ्जरी स्त्री० खरा मञ्जरी यस्या गौरा० ङीष् । अपामार्गे ।
खरवल्लिका स्त्री० खरा वल्ली सैव स्वार्थे कन् । नागदन्त्याम् (मान) ।
खरशब्द पु० खर उच्चः शब्दोऽस्य । कुररपक्षिणि । हत० मर्म० उच्चशब्दे ।
खरस्कन्ध पु० खरः स्कन्धोऽस्य । प्रियालवृक्षे । खर्जूर्यां स्त्री० ।
खराशा स्त्री० खरैरश्यते भुज्यते अश–व । मयूरशिखायाम् (वृद्ध-जटाबता) ।
खर्क पु० खन–कु रस्यानादेशः । दर्पे, अश्वे, दन्ते, कामदेवे श्वेतवर्षे च । श्वेतवर्षवति, निर्विवृक्षौ, निर्बीजे, क्रूरे च त्रि० प्रतिपन्नरायां कन्यायां स्त्री० ।
खर्ज् अर्जायां अक० भ्वा० पर० सेट् । खर्जति अखर्जीत् ।
खर्जन न० खर्ज–ल्युट् । कण्डूयने । [वृक्षे च ।
खर्जु(र्जू) स्त्री० खर्ज–उ वा ऊङ् । कण्डूयने, कीटभेदे, खर्जूरी-
खर्जु(र्जू)ल पु० खर्जुं(र्जूं) कण्डूयनं लाति ला–क । चक्रमर्दे, (दादमर्दन) अर्कवृक्षे च ।
खर्जूर पु० खर्जूं राति खर्जने कण्डूं ददाति । कीटभेदे (खजा-गोजा) (खेजूर) वृक्षभेदे पु० स्त्री० । स्त्रीत्वे ङीप् । तत्फले, क्लीवे च न० ।

खर्ड् दंशने भ्वा० पर० सक० सेट्। खर्डति अखर्डीत्।

खर्पर पु० कर्परशब्दवत् पृ० खत्वम्। तस्करे, धूर्त्ते, भिक्षापात्रे कपाले भिक्षमत्स्यवञ्चके च। धातुभेदे, तत्पाङ्गभेदे च न०।

खर्ब(र्व) गतौ भ्वा० पर० सक० सेट्। खर्ब(र्व)ति अखर्बीत्(र्वीत्)।

खर्ब(र्व) पु० खर्ब(र्व)-अच्। कुजे, निधिभेदे, संख्याभेदे (सहस्रकोटौ) "अर्बुदमजं खर्बनिखर्वं" इति लीलावतो तत्संख्याते च। नीचे, वामने च त्रि०।

खर्ब(र्व)ट पु० खर्ब(र्व) अटन्। "एकतो यत्र तु ग्रामो नगरं चैकतः स्थितम्। मिश्रं तु खर्ब(र्व)टोनाम नदीगिरिसमाकुल" इत्युक्तविशिष्टे ग्रामे।

खर्वशाख त्रि० खर्व्वा शाखाः हस्तपादादयोऽस्य। वामने, क्षुद्रशाखावति द्रुमे पु०। [लताफलभेदे।

खर्बू(र्वू)ज न० खर्ब(र्व) ज तस्याः जायते जन-ड। (खरमुज)

खर्व गर्वे भ्वा पर० अक० सेट् खर्वति अखर्वीत्।

खल चलने खलने च भ्वा० पर० अक० सेट्। खलति अखालीत्।

खल न० खल-अच्। धान्यमर्दनस्थाने, (खामार) भुवि, तिलकरके च (खरल्)। नीचे, अधमे, क्रूरे च त्रि०। खे लीयते ली-ड। खस्थे। खं वर्त्मतः लाति ला-क। तमालद्रुमे।

खलति पु० खल सञ्चलने अति पृ०। इन्द्रकुप्ररोगे (माथारटाक) तद्वति त्रि०। [(फरास)।

खलपू त्रि० खलं भूमिं पुनाति पू-क्विप्। स्थानशोधनकारिणि

खलाधारा स्त्री० खल आधारो यस्याः। (तेलायोका) तैलपायिकाम्।

खलि पु० खल-इ। तैलकीट्टे (खरल)।

खलि(ली)न पु० न० खे सुखच्छिद्रे लीनं पृ० वा क्षुद्रः। अत्र सुखस्थायां कविकायां (कड़िचाल)।

खलिनी स्त्री० खलानां धान्यमर्दनस्थानानां समूहः इनि। धान्यमर्दनस्थानसंघे। [मत्स्यभेदे।

खलिश पु० खे आकाशे लाभादूर्द्ध्वभागे लिशति क। (खल्सा)

खलीकार पु० अखलं खलं करोति कृ—अ—घञ्। अपकारे तत्कर-णे हि अखलोऽपि खलो भवति।

खलु अव्य० खल—उ। प्रश्ने, वाक्यालङ्कारे, वीप्सायां, वाक्ये, निश्चये, अनु-नये, वाक्यस्य भूषणपूरणयोः, निश्चये, क्षेपे च।

खलेकपोत पु० खले धान्यमर्दनस्थाने यथा कपोता युगपत् पतन्ति एवं विशेषणानामेकत्र युगपदन्वयरूपे न्यायभेदे।

खलेवाली स्त्री० खले धान्यमर्दने वाल्यन्ते वाल्यन्ते इत्यर्था वल्लाः। धान्यमर्द-नभूमिमध्यस्थे काष्ठे (मेढिकाठ)।

खल्या स्त्री० खलानां समूहः यत्। धान्यमर्दनस्थानसमूहे।

खल्ल पु० खलतीति क्विप् खल् तं लाति ला—क। वस्त्रभेदे, कर्म्मणि, गर्त्ते, घातके, हन्तरि (मद्यक) औषधमर्दनपात्रे च (खल)।

खव सम्पत्तिपवित्रतयोः—प्रादुर्भावे, क्रया० पर० अक० सेट्। खवते अखावीत्—अखवीत्।

खवाक्य न० ईत०। रजन्यां आकाशात् निष्पन्दिनि जले स्थिते (ओस)।

खश पु० देशभेदे, हिमालयप्रान्तैकदेशे, तद्देशस्थे "शनकैस्तु क्रियालो-पादिमाः क्षत्रियजातयः। वृषलत्वं गता लोके ब्राह्मणादर्शनेन च। पतिते क्षत्रियभेदे च।

खष मधे भ्वा० पर० सक० सेट्। खषति। अखाषीत् अखषीत्।

खस पु० खानि इन्द्रियाणि खति निश्चलीकरोति खो—क। (खोस) (पाचड़ा) रोगभेदे। [(आफिङ्)।

खस्खस पु० (पोस्ता) नामकफले द्रुमभेदे यस्य निर्यासः अहिफेन:

खाञ्जिक पु० के आकाशे वीयते अज—घञ् आजीगतिः सोऽस्यास्ति ठन्। लाजेषु (खइ) देवह्यायुयोगे हि तेषामाकाशगतिः।

खट्टि पु० स्त्री० खट—इन्। मञ्चके। स्त्री० वा ङीष्। अल्पमञ्चे।

खाण्डव पु० इन्द्रप्रस्थनगरसन्निकृष्टस्थे वने। [इति खतिः।

खात न० खन—क्त। गर्त्ते, पुष्करिण्यादौ च "गर्त्ते खातादिकर्म च"

खातक पु० खन—घञ् स्वार्थे कन् (खाइ) परिखायाम्। खात इव

खातति खै–क । अवभर्त्सने (अवज्ञा) खात(द)कोविसङ्गीनः खा-खञ्जको विसवान् यदा" इति खातिः ।

खातभू स्त्री० खातस्य भूः स्थानम् । परिखायाम्, अवटभूमौ च ।

खाद् भक्षणे भ्वा० परः सक० सेट् । खादति अखादीत् ।

खादक पु० खादति खाद–ण्वुल् । कृत्याकृत्ये अधमार्थे "खादको-विसङ्गीनः खाद्" इति खातिः । भक्षके त्रि० ।

खादिर त्रि० खदिरस्य विकारः अण् । खदिरकाष्ठनिर्म्मिते यूपादौ "खादिरे पशुं बध्नाति खादिरं वीर्य्यकामस्येति श्रुतिः । खदि-रनिर्य्यासे (खएर) पु० । [यज्ञरूपे धान्यादिमानभेदे ।

खारि(री) स्त्री०खमारोति रा-क गौरा०ङीष् वा ह्रस्वः । द्रोणचतुष्-

खारीक त्रि० खार्य्याम् वापः, खारीपरिमाणमस्य वा ठेकञ् । खारी-मितधान्यवपनयोग्ये क्षेत्रे, खारीमिते धान्यादौ च ।

खिट भेदे भ्वा० परः अक० सेट् । खेटति अखेटीत् ।

खिद दैन्ये दिवा० कथा० च आत्म० अक० अनिट् । खिद्यते खिन्ने अखिन्न । खिन्नः । [अखैत्सीत् खिन्नः ।

खिद परिघाते तुदा०परः०अक०अनिट् सुचादि । खिन्दति खिन्दतः ।

खिन्न त्रि० खिद–क्त । दैन्ययुक्ते, अलसे, खेदयुक्ते च ।

खिल कृषौ आदाने तुदा० परः सक० सेट् । खिलति अखेलीत् ।

खिल त्रि० खिल–क । फलादिना अकृष्टे क्षेत्रादौ सारतः संक्षिप्ते पूर्वतन्त्रानुक्तपरिशिष्टे, यथा ऋग्वेदादौ श्रीसूक्तम्, यजुर्वेदे शिव-संकल्पादि, महाभारते हरिवंशः । खिलेषु हरिवंश इति पुञ्जि-काव्याख्याने "खिलो नारायणः प्रोक्तस्तद्गुणा ऋषयः स्मृता इति नीलकण्ठेनोक्तेः नारायणे च ।

खु ध्वनौ भ्वा० आत्म० अक० अनिट् । खवते अखोष्ट ।

खुज स्तेये भ्वा० परः सक० सेट् । खोजति अखोजीत् ।

खुञ्जाक पु० खुज–आक पृ० । देवताड़ृक्षे ।

खुड खण्डे रुदित् भ्वादि० आत्म० अक० सेट् । खुण्डते अखुण्डिष्ट ।

खुड भेदने चुरा० उभ० सक० सेट् । खोडयति–ते अखुखोडत्–त ।

खुड भेदने चुरा०उभ० इदित् सक०सेट्। खुण्डयति-ते अचुखुण्डत्-त।
खुर विलेखने तुदा० परं० सक० सेट्। खुरति अखोरीत्।
खुर पु० खुर-क। खगमख्याते प्रभूनां शफे कोलदण्डे, नखीनाम-
ग्रन्थभेदे, नापितास्त्रे, खट्वादीनां पादे च (खुरा)।
खुरक पु० खुर इव कायति कै-क। तिलवृक्षे।
खुरणस्(स) त्रि० खुर इव नासिकाऽस्य नसादेशः वा अन्यलोपः
णत्वञ्च। चिपिटनासिके।
खुरली स्त्री० खुर इव लाति ला-क गौरा० ङीष्। शराभ्यासे
खुरालिक पु० खुराख्यामायुधिः कायति प्रकाशते कै-क। (भांड)
नापितास्त्रभाण्डे, नाराचास्त्रे, उपधाने च।
खु(खू)ई क्रीड़ायां भ्वा० आ०अक० सेट्। खु(खू)ई ते अखु(खू)ईष्ट।
खेचर पु० खे चरति चर-ट अलुक्स०। शिवे, सूर्यादिग्रहे, विद्या-
धरे च स्त्रियां ङीष्। "चित्तं हरति खे यस्मात् जिह्वा हरति
खे गता। भ्रुवोरन्तर्गता जिह्वा खेचरी नाम मुद्रिका" इति
तन्त्रोक्ते मुद्राभेदे स्त्री०।
खेट भोजने अद० चु०उभ० सक० सेट्। खेटयति ते अचिखेटत्-त।
खेऽट पु० खेऽटति। सूर्यादिग्रहे, "यस्मिन् भे स्थिताः खेऽटा" इति
ज्योतिषम्। कपौ, ग्रामभेदे च। मृगयायां पु० न०। अधमे
त्रि०। कर्मणि क्लीबे च न०।
खेटक पु० खेट-ण्वुल्। फलके (ढाल) खेटकं पूर्णचापस्येति दुर्गाध्यानम्।
खेड भोजने अद० चु० उभ०सक० सेट्। खेडयति ते अचखेडत्-त।
खेद पु० खिद-घञ्। श्रमे, अवसन्नतायाञ्च।
खेदिनी स्त्री० खेदयति खिद णिच्-खिनि। अशनपूर्वीक्षुभेदे।
खेय न० खन-अत्। परिखायाम् (गड्ढा) खननीये त्रि०।
खेल चालने गत्याञ्च भ्वा० परं० सक० सेट्। खेलति अखेलीत्। अ-
चिखेलत् त। [शारिफलके स्त्री०।
खेलन न० खेल-ल्युट्। क्रीड़ायाम्। आधारे ल्युट् ङीष्।
खेला स्त्री० खेल-अ। क्रीड़ायाम्।

खेव खेवने भ्वा० आ० सक० सेट्। खेवते अखेविष्ट अचिखेवत।
खेसर पु० खे आकाशदव शीघ्रगामित्वात् सरति सृ-ट अलुक् स०।
गर्दभादश्वीजाते अश्वाद्गर्दभीजाते वा अन्तरे प्रभुभेदे।
खै खैर्ये अक० खलने हिंसायाञ्च सक०भ्वा० पर० अनिट्। खायति
अखासीत्।
खोट गतिप्रतिघाते भ्वा० पर० सक० सेट्। खोटति अखोटीत्।
खोट क्षेपे अद० चु० उभ०सक० सेट्। खोटयति ते अचुखोटत् त।
खोटि(टी) स्त्री० खोट-इच वा ङीष्। चतुरायां स्त्रियां, पाखण्डीदत्ते च।
खोड गतिप्रतिघाते भ्वा० पर० सक० सेट्। खोडति अखोडीत्।
अचुखोडत् त।
खोड क्षेपे अद० चु० उभ०सक० सेट्। खोडयति ते अचुखोडत् त।
खोड त्रि० खोड गतिप्रतिघाते अच्। खञ्जे (खोंडा)।
खोर गतिवैकल्ये भ्वा० पर० सक० सेट्। खोरति अखोरीत् अचु-
खोरत् त। [अचुखोलत् त।
खोल गतिवैकल्ये भ्वा० पर० सक० सेट्। खोलति अखोलीत्
खोर(ल) त्रि० खोर(ल) अच्। खञ्जे।
ख्यात त्रि० ख्या-क्त। ख्यातियुक्ते, कथिते च। [अख्यत्।
ख्या कथने अदा० पर० सक० सेट्। आर्द्धधातुकमात्रविषयोऽयम्।
ख्याति स्त्री० ख्या+क्तिन्। प्रथंसायाम्, प्रसिद्धौ, कथने च।

ग

ग पु० गै-क। गन्धर्वे, गवेधे, कन्दोपन्यासे एकगुरुवर्णे च।
गगन न० गम-युच् गोऽन्तादेशः। गात्रं प्रामादिकम्। आकाशे।
गगनध्वज पु० गगनस्य ध्वजइव। मेघे, सूर्ये च।
गगनेचर पु० गगने चरति चर-ट। सूर्यादिग्रहे, नक्षत्रे च।
गग्ध हसने भ्वा० पर० सक० सेट्। गग्धति अगग्धीत्।
गङ्गा स्त्री० गम-गन्। खवामख्याते नदीभेदे।
गङ्गाज पु० गङ्गायां जायते जन-ड। भीष्मे, कार्त्तिकेये च स हि

अग्नौ निपिक्षाय शिवबीर्य्यं षोढुमशक्नुवता अग्निना गङ्गायां संक्रमणे तस्माज्जात इति पुराणकथा ।

गङ्गाधर पु० गङ्गा धरति धृञ्—अच् ६त० । शिवे, यद्धि जटायां तामधारयदिति पुराणम् । सप्तद्वे च ।

गच्छ पु० गम—श । वृक्षे, खीलावतीप्रसिद्धे अङ्कभेदे च ।

गज मदेक्षने च भ्वा०पर०अक० सेट् । गजति अगाजीत्—अगजीत् ।

गज क्षने भ्वा० इदित् पर० अक० सेट् । गञ्जति अगञ्जीत् ।

गज पु० गज—अच् । हस्तिनि, अष्टसंख्यायां दिग्गजानामष्टत्वात् तथात्वम् । "अरत्नीनां शतान्यष्टावेक षष्ट्यधिकानि च । गजप्रमाणमाख्यात" मित्यु० "साधारणनखाङ्गुल्या त्रिंशदङ्गुलिको गज" इत्युक्ते च परिमाणभेदे, ज्योतिषोक्ते वास्तुभेदे, वैद्यकोक्ते गजपुटाख्ये गर्त्तभेदे च ।

गजच्छाया स्त्री० "यदेन्दुः पितृदैवत्ये स्वर्य्यश्चैव करेस्थितः । यास्या तिथिर्भवेत् सा हि गजच्छायेति कीर्त्तितेत्युक्ते, "कृष्णपक्षे त्रयोदश्यां मघास्थेन्दुकरे रविः । यदा तदा गजच्छाये"त्युक्ते च योगभेदे "द्विगुणा स्वात्मनश्छाया दर्शे स्यादपराह्णिकी गजच्छायेति सा प्रोक्तेत्युक्ते दर्शापराह्णे च ।

गजता स्त्री० गजानां समूहः तल् । हस्तिसमूहे ।

गजदन्त पु० गजस्य दन्तावित्र दन्तावस्य । मयूरे । हस्तिदन्ततुल्यदन्तवति त्रि० । ६त० करिदन्ते पु०

गजपिप्पली स्त्री० गजोपपदा पिप्पली शाक० । स्वनामख्यातायां पिप्पल्याम् । [इत्युक्ते औषधपाकार्थे गर्त्तभेदे ।

गजपुट पु० "हस्तप्रमाणो गर्त्तो यः पुटः स तु गजाह्वय" ।

गजप्रिया स्त्री० ६त० । शल्लकीवृक्षे ।

गजबन्धनी स्त्री० गजा बध्यन्तेऽत्र ल्युट् ङीप् । हस्तिबन्धनशालाम् (हातिशाला) ।

गजभक्ष्या स्त्री० गजैर्भक्ष्या । शल्लकीवृक्षे ।

गजवल्लभा स्त्री० ६त० । वल्लीजायां गिरिकदल्यां, शल्लक्याञ्च ।

गजसाह्वय न० गजेन हस्तिनामकनरेण सहितं आह्वयो यस्य। हस्तिनापुरे (दिल्ली)। [हस्तिपालके।

गजाजीव पु० गजैस्तत्पालनादिभिराजीव्यते जीव–अच्।

गजानन पु० गजस्येवाननं यस्य। गणेशे स हि शनिदृष्ट्या छिन्नमस्तकः पश्चात् गजमस्तकेन तन्मुखमिति पुराणम्।

गजारोह पु० गजमारोहति रुह–अण् हस्तिपाले (भारत)।

गजा(द्)यन पु० गजैरय(य)ते कर्म्मणि ल्युट्। अश्वत्थ वृक्षे। यज्ञकर्य्या स्त्री० ङीप्। [गजाह्वयसमयत्व।

गजाह्व न० गजसहिता आह्वा यस्य शाक०। हस्तिनापुरे।

गजेष्टा स्त्री० गजानामिष्टा। विदार्य्याम् (भूमिकुष्माण्डे)।

गञ्ज पु० गंजि–घञ्। अवज्ञायाम्। आधारे घञ्। भाण्डागारे खनौ, कोष्ठागारे च। धामरगट्टे, हट्टस्थाने, मद्यभाण्डे, मदिराभट्टे च स्त्री० टाप्।

गड सेके भ्वा० पर० सक० सेट् घटा०। गडति अगाडीत् अगडीत्। गडयति–ते।

गड वदनैकदेशे (गण्डनव्यापारे) इदित् भ्वा० पर० अक० सेट्। गण्डति अगण्डीत्।

गड पु० गड–अच्। मत्स्यभेदे (गडुइ) विघ्ने, परिखायां, व्यवधाने, देशभेदे च। स्वार्थे कन् गडुइ (मत्स्ये)।

गडदेशज न० गडदेशे शाम्बरदेशे जायते जन–ड। शाम्बर लवणे।

गडि(लि) पु० गड(ल)–इन्। गति सामर्थ्ये दुष्टतया भारवहन भीत्या-शयाने (गड्डे) गवादौ "सुखं स्वपिति गोगडि(लि)" रिति।

गडु पु० गड–उ। गौरे घाटामस्तकयोर्मध्ये मांसवर्द्धके रोगे, गलगण्डे, कूजे, शल्यास्त्रे विषमग्रन्थौ च काव्यान्तर्गडुभूतत्वा-न्नालङ्कारः प्रहेलिकेति साहि १०प०।

गडुर(ल) पु० गडुः कुजरोगोऽस्यास्य र ल वा। कुजे।

गडेर पु० गड–एरक्। मेघे (गाड़ोल)।

गड्डर(ल) पु० गड–डर (डल) वा डस्य नेत्त्वम्। मेघे।

गड्डरि(लि)का स्त्री० गड्डर(ल) मेषमनुधावति ठन्। मेषानुगन्त्यां मेषपङ्क्तौ। तत्सादृश्यादविच्छिन्नगतौ।

गण संख्याने अद० पु० उभ० सक० सेट्। गणयति ते अजीगणत् त अजगणत् त।

गण पु० गण-घञ् अच् वा। शिवानुचरे भूते, समूहे, संख्यायां, (गजसंख्या २७ रथसंख्या २७ अश्वसंख्या ८१ पदातिसंख्या १३५) एवं संख्यान्वितायां सेनायाम्, एकैक विकरणभेदमाश्रित्य भ्वादयादिधातूनां समूहे, ज्योतिषोक्ते देवादिसंज्ञकनक्षत्राणां समूहे छन्दोग्यन्योक्तेषु वर्णत्रयात्मकेषु मयरादिषु अष्टसु च।

गणक पु० गणयति-ण्वुल्। दैवज्ञे।

गणदेवता स्त्री० गणः सन् गणीभूय वा देवता। संहत्य देवत्वं प्राप्तेषु "आदित्या द्वादश प्रोक्ता विश्वे देवा दश स्मृताः। वसवश्चाष्टसंख्याताः षट् त्रिंशत् तुषिता मताः। आभास्वराश्चतुःषष्टिर्वातास्तु पञ्चाशदूनकाः। महाराजिकनामानो द्वे शते विंशतिस्तथा। साध्या द्वादशविख्याता रुद्राश्चैकादश स्मृता इत्युक्त तत्तत्संख्याभेदान्वितेषु आदित्यादिषु। [कादयोऽप्यत्र।

गणनाथ पु० गणानां प्रमथादीनां नाथः। गणेशे शिवे च गणनाय-
गणराज न० गणानां राशीनां समाहारः। गणशब्दस्य संख्यावत्त्वात् द्विगुस० षच्समा०। राशिवृन्दे।

गणरूप पु० गणो बहुनि रूपाण्यस्य। अर्कवृक्षे।

गणशस् अव्य० गणान्-गणान् प्रति गण+शस्। बहुश इत्यर्थे।

गणहासक पु० गणान् हासयति हस-णिच्-ण्वुल्। चोरनामगन्धे।

गणान्न न० गणायोत्सृष्टं, गणानां वान्नम्। मठादौ बहुजनाहार्ये नोत्सृष्टान्ने, बहुस्वामिकेऽन्ने च "गणान्नं गणिकान्नञ्चेति मनुना निषिद्धान्नमध्ये गणितम्।

गणिका स्त्री० गणः समूहोऽस्त्यस्याः भर्त्तृत्वेन ठन्। वेश्यायाम्, चित्ताकर्षकत्वात् यूथिकायाम् (जुही) कृष्णिन्यान्च।

गणिकारिका स्त्री० गणनं गणिः गच्छ-इतं करोति अण् ङीप्,

गणिकारो स्वार्थे क। तस्यः। (गणियारी)। वृक्षे। कनभावे गणिकारीत्यपि।

गणित न० गण–भावे क्त। गणने। करणे क्त। व्यक्ताव्यक्तरूपे अङ्कशास्त्रे। कर्म्मणि क्त। लब्धगणने संख्याते त्रि०।

गणेय त्रि० गण–एय। गणनीये।

गणेरु त्रि० गण–एरु। कर्षिकारवत्ते, हस्तिन्यां, वेश्यायाञ्च।

गणेश पु० गणानामीशः। स्वनामख्याते देवे, शिवे, च।

गण्ड पु० गडि–अच्। हस्तिकपोले, कपोलमात्रे, गण्डके, (गाण्डार) चिह्ने, वीथ्यङ्गे, पिठके, वीरे, हयभूषणे, बुद्बुदे, स्फोटके, ग्रन्थौ ज्योतिषोक्ते विष्कुम्भादिमध्ये योगभेदे, त्याज्ये वैवाहिकजन्मलग्नस्थे अश्विन्यादितारादण्डभेदे च।

गण्डक पु० गण्ड+स्वार्थे कन्। स्वनामख्याते पक्षौ (गण्डार) संख्याभेदे, अन्तराये, अवच्छेदे च।

गण्डकारी स्त्री० गण्डं ग्रन्थिं भग्नसंयोजनरूपं सन्धिं करोति कृ–अण ङीप् (हातजोड़ा) वराहक्रान्तायामोषधौ।

गण्डकी स्त्री० "गण्डक्याश्चैकदेशे च शालग्रामशिलास्थले" नित्युक्ते नदीभेदे। [याम्।

गण्डकीशिला स्त्री० गण्डक्यामुत्पन्ना शिला। शालग्राम शिला-

गण्डगात्र न० गण्डाः स्फोटका गात्रे ऽवयवे यस्य (आता) सीताफले।

गण्डदूर्वा स्त्री० गण्डयुक्ता ग्रन्थिमती दूर्वा (गाटदूर्वा)। दुर्वाभेदे।

गण्डमाला स्त्री० गण्डानां स्फोटकानां माला। "स्याद्गण्डमाला बहुभिश्च गण्डैरित्युक्तलक्षणे रोगभेदे।

गण्डमालिका स्त्री० गण्डानां ग्रन्थीनां माला यस्यां वा कप् अत इत्वम्। लज्जालुवृक्षे।

गण्डलेखा स्त्री० लिख्यते ऽत्र लेखा स्थली गण्डः स्थलीव। प्रशस्तः गण्डस्थल्याम्। गण्डभित्त्यादयोऽप्यत्र। [ललाटे च।

गण्डशैल पु० शैलस्य गण्ड इव, राज०स०। पर्वतात्मतिषु स्थूलोपलेषु

गण्डु पु० स्त्री० गडि–उ। ग्रन्थौ, उपधाने च। स्त्रीत्वे वा ऊङ्

गण्डूपद पु० गण्डूपुञ्जानि पदानि अस्य । (केँचो) किञ्चिलुके जातौ ङीप् ।

गण्डूष पु० गडि अषन् । मुखपूरणयोग्ये तोये "गण्डाच गण्डूषजलग्रहणे कुमारः । करिहस्ताग्रे, प्रहस्ता प्रमिते जले, कराञ्जलौ च ।

गण्य त्रि० गणं लब्धा गण+यत्, गण—अत् वा । गणं संख्यानं लब्धरि, गणनीये च । [भावे क्त । गमने ।

गत त्रि० गम—क्त । ज्ञाते, प्राप्ते, याते, लब्धे, मृते, समाप्ते च ।

गतागत न० गतं चागतञ्च द्व० । यातायाते "गतागतं कालकारा जनन्ते" इति गीता । गतञ्चागतञ्च यत्र । पक्षिगतिभेदे ।

गतार्त्तवा स्त्री० ऋतोरयमार्त्तवः तत्फलं गर्भादि च गत आर्त्तवो यस्याः । वन्ध्यायाम् दुष्टायाञ्च ।

गति स्त्री० गम—भावादौ क्तिन् । गमने, पथि, ज्ञाने, दृष्टायां, याचायाम्, उपाये, नाडीव्रणपथे, कर्म्मफले, प्राप्तौ च ।

गद पु० गद-अच् । श्रीकृष्णानुजे, रोगे च । भावे क । कथने, विषे च ।

गदा स्त्री० गद—अच् टाप् । स्वनामख्याते लौहादिकोषिते, लौहमये वाऽस्त्रभेदे पाटलाद्वृक्षे च ।

गदाग्रज पु० ६त० श्रीकृष्णे ।

गदाधर पु० गदां धरतीति ष्ट-अच् ६त० । श्रीकृष्णे ।

गदारोति पु० ७त० औषधे । [गद्गदति त्रि० ।

गद्गद पु० गदित्यव्यक्तं गदति क, अच् वा अव्यक्ताक्षुटशब्दे ।

गद्गदध्वनि पु० गद्गदः कफादिनाऽव्यक्तः ध्वनिः । कफौदकादिना सकफेन वायुना यथा स्यात्तथोच्चारणात् संजाते अव्यक्तध्वनौ । गद्गदति त्रि० ।

गद्य त्रि० गद-यत् । कथनीये । पद्याभिन्ने कविकृते अपादे पदसमूहे न० ।

गन्त्री स्त्री० गम्यतेऽनया ष्ट्रन् ङीप् । दृषवहनीये शकटे ।

गन्त्रीरथ पु० गन्त्री रथ इव अभीष्टस्थानप्रापकत्वात् । शकटे ।

गन्ध द्रोहे चुरा० आ० सक० सेट् । गन्धयते अजगन्धत ।

गन्ध पु० गन्ध—अच् । सम्बन्धे, लेशे, गन्धके, गर्व्वे, शोभाञ्जने, द्रव्यद्रव्यादीनां घ्राणग्राह्ये गुणभेदे स च गन्धः षड्विधः "सुरभीरतरो

वा दृष्टो वा दाहाकर्षित एव वा । रसः सप्तईजोवापि प्राक्षकृतो-द्भवएव येति" पञ्चविधकारणभेदात् दृष्टजन्मादौ च ।

गन्धकन्दक पु० गन्ध+अर्थे आद्यच् गन्धयुक्तः कन्दोऽस्य अच् । कमेरुवि ।

गन्धकचूर्ण पु० गन्धकप्रधानश्चूर्णः । (वारुद) इति ख्याते पदार्थे ।

गन्धकाष्ठ न० गन्धयुक्तं काष्ठम् कर्म० । अगुरुचन्दने ।

गन्धकुटी स्त्री० गन्धस्य कुटीवाधारः । सुरानामगन्धद्रव्ये ।

गन्धकुसुमा स्त्री० गन्धयुक्तं कुसुमं यस्याः । (गणियारी) गणि-कारीवृक्षे । [गन्धवति भूतृणे ।

गन्धखेडक न० गन्धस्य खेला यत्र कप् डलयोरैक्यात् । (वेणा)

गन्धजात न० गन्धो जातो यत्र । तेजपत्रे ।

गन्धघ्रा स्त्री० गन्धं जानात्यनया घञर्थे क । नासिकायाम् ।

गन्धतैल न० गन्धयुक्तस्य चन्दनस्याग्निसंयोगेन जनितं तैलम् । यन्त्र-पाकेन जनिते तैले । (आतर) प्रभृतौ ।

गन्धत्वच् स्त्री० गन्धान्विता त्वक् यस्याः । एलायाम् ।

गन्धदला स्त्री० गन्धयुक्तं दलं यस्याः । अजमोदायाम् ।

गन्धन न० गन्ध—भावादिषु ल्युट् । उत्साहे, प्रकाशने, सूचने, हिं-सायाञ्च ।

गन्धनाकुली स्त्री० गन्धान्विता नाकुली राज्ञा । राज्ञाभेदे ।

गन्धनिलया स्त्री० गन्धस्य निलयो यत्र । नवमल्लिकायाम् ।

गन्धपत्र पु० गन्धयुक्तं पत्रं यस्याः । तुलस्याम् । शठीभेदे स्त्री० ।

गन्धपत्रिका स्त्री० गन्धयुक्तं पत्रं यस्याः कप् कापि अत इत्त्वम् । अजमोदायाम् । [याम्, अम्बष्ठायाम्, अजमोदायाञ्च ।

गन्धपत्री स्त्री० गन्धयुक्तं पत्रं यस्याः; गौरा० ङीष् । अम्बष्ठा-

गन्धपलाशिका स्त्री० गन्धयुक्तं पलाशं यस्याः कप् । हरिद्रायाम् ।

गन्धपाषाण पु० गन्धयुक्तः पाषाणः । गन्धके ।

गन्धपुष्प पु० गन्धःपुष्पेषु यस्याः । वेतसे, अजमोदवृक्षे, बकुलवृक्षे अ-शोके च । कोरण्टां, गणिकारीवृक्षे च स्त्री० टाप् ।

गन्धफल पु० गन्धयुक्तं फलं यस्य । बिल्वे, कपित्थे च । विदार्याम्, गन्धकाय्यां स्त्री० टाप् । प्रियङ्गौ स्त्री० ङीष् ।

गन्धबन्धु पु० ६त० । आम्रवृक्षे ।

गन्धभद्रा स्त्री० गन्धेन गोशमांससेवनेन भद्रं यस्याः ब० व०। (गन्धमादन) लतायाम् ।

गन्धभाण्ड पु० गन्धस्य भाण्ड इव । (गन्धभादन) लतायाम् ।

गन्धमांसी स्त्री० गन्धयुता मांसी कर्म० । जटामांसीभेदे ।

गन्धमादन पु० न० गन्धेन मादयति मद्–णिच् ल्यु । पर्वतभेदे । अमरे, वानरे, गन्धके च पु० ।

गन्धमादिनी स्त्री० गन्धेन मादयति मद्–णिच्–णिनि । लाक्षायाम्, सुरानामगन्धद्रव्ये च । [द्रव्ये ।

गन्धमालिनी स्त्री० गन्धमालाऽस्त्यस्या इनि । सुरानामगन्ध-

गन्धमुखा स्त्री० गन्धो मुखेऽस्याः बहुव्रीहौ (टच्) ।

गन्धमुण्ड पु० गन्धं सुखयति सुख+तत्करोति णिच्–अच् । (गन्धभादन) लतायाम् ।

गन्धमूल पु० गन्धो मूले यस्य । गन्धकोशचे–गन्धाम् । पु० स्त्री० वा ङीष् । स्वार्थे कन् अत्रैवार्थे ।

गन्धमृग पु० गन्धप्रधानो मृगः । गन्धयोनौ कस्तूरीमृगे ।

गन्धराज न० गन्धेन राजते राज–अच् । चन्दने, कक्षगुग्गुलौ, स्वनामख्याते पुष्पवृक्षे च ।

गन्धराजी स्त्री० गन्धानां राज्ञी टच् ङीष् । नखीगन्धद्रव्ये ।

गन्धर्व पु० गन्धमर्वति अर्व–गतौ अच् बक० । देवभेदे, अश्वे, कोकिले, स्वर्गगायके देवयोनिभेदे, गायनमात्रे च ।

गन्धर्वनगर पु० न० गन्धर्वाणां नगरमिव । व्यन्त्राधिष्ठाने पुराकारे नीलपीतादिमेघरचनाभेदे, इन्द्रजाले च । गन्धर्वपुरमप्यत्र ।

गन्धर्वलोक पु० ६त० । गुह्यकलोकोपरि विद्याधरलोकस्याधो-निविष्टे स्थाने ।

गन्धर्ववेद पु० ६त० । सामवेदस्योपवेदे सङ्गीतविद्यायाम् ।

गन्धर्वहस्त पु० गन्धर्वस्य सूचनभेदस्य हस्तः पादः इव पत्रमस्य । एरण्डवृक्षे । स्वार्थे कन् तत्रैवार्थे ।

गन्धलता स्त्री० गन्धान्विता लता । प्रियङ्गौ । [जातिभेदे ।

गन्धवणिज् पु० गन्धोपजीवी वणिक् । (गन्धबेनिया) इति ख्याते

गन्धवती स्त्री० गन्ध+मतुप् मस्य व । व्यासमातरि, भूम्नि, वायुवह्नयोर्नगर्याम्, सुरायाञ्च ।

गन्धवल्कल न० गन्धो वल्कलेऽस्य । (दारचिनि) त्वचे ।

गन्धवल्लरी स्त्री०गन्धान्विता वल्लरी । सहदेवौषधतायाम् गन्धवल्लीत्यपि।

गन्धवह पु० गन्धं वहति वह–अच् ६त० । वायौ । गन्धयुक्ते गाधकादौ त्रि० ।

गन्धवारि न० गन्धवासितं वारि । गन्धद्रव्येण वासिते जले ।

गन्धवाह पु० गन्धं वहति वह–अण् उप० । वायौ । नासिकायां स्त्री०

गन्धविह्वल पु० गन्धेन विह्वलयति ह्वल–णिच्–अच् । गोधूमे ।

गन्धवीजा स्त्री० गन्धो बीजे यस्याः । मेथिकायाम् ।

गन्धव्याकुल पु० न० गन्धेन व्याकुलयति वि+आ+कुल–णिच्–अच् । कक्कोले । [प्रभेदौ ।

गन्धशालि पु० गन्ध प्रधानः शालिः । आमोदयति धान्यभेदे (वासमति)

गन्धसार पु० गन्धयुक्तः सारो यस्य । चन्दनवृक्षे ।

गन्धसारण पु० गन्धं सारयति सृ–णिच्–ल्यु । दृढवल्क्षाम् ।

गन्धसोम न०गन्धार्थं सोमोऽधिदुर्यस्य । कुसुदे चन्द्रोदये हि तस्य गन्धः ।

गन्धा स्त्री० गन्ध–णिच् अच् । गन्धहेतौ चम्पककल्लिकायाम् ।

गन्धाखु स्त्री० गन्धयुक्त आखुः । छुछुन्दर्याम् (छुंचा) ।

गन्धाजीव पु० गन्धेन गन्धद्रव्येणाजीवति आ+जीव–अच् । (गन्धबेने) गन्धवणिजि ।

गन्धाढ्य पु० गन्धेनाढ्यः । चन्दनवृक्षे, नागरङ्गवृक्षे च । गन्धयुक्ते त्रि० । "गन्धाढ्यः सुमनोहर" इति तन्नाम्न । स्वर्णयूथ्यां, गन्धपलाशायाञ्च स्त्री० । [अ–

गन्धाढ्या स्त्री० गन्धयुक्तः आढ्यो यस्याः । वनबीजपूरके ।

गन्धार पु० गन्धङ्कक्षति क्ष—अच् उप० । राजे, विन्ध्यरे, खरभेदे च । देशभेदे ब० व० । [ज्ञताभेदे ।

गन्धाली स्त्री० गन्धमक्षति पर्य्याप्नोति अल—अच् । (गन्धभादाल)

गन्धालीगर्भ स्त्री० गन्धाली गर्भे यस्याः । क्षुद्रपाठायाम् ।

गन्धाष्टक न० गन्धानां गन्धद्रव्याणामष्टकम् । चन्दनाद्यष्टसु गन्धद्रव्येषु प्रसङ्गेषु वाचस्पत्ये दृश्यः ।

गन्धिनी स्त्री० गन्धोविद्यतेऽस्याः इनि । सुरामांसगन्धद्रव्ये ।

गन्धिपर्णी पु० गन्धि गन्धयुक्तं पर्णं यस्य । सप्तच्छदवृक्षे (छातिम) ।

गन्धोत्कटा स्त्री० गन्धेन उत्कटा उग्रा । दमनकवृक्षे ।

गन्धोत्तमा स्त्री० गन्धेन उत्तमा उत्कृष्टा । मदिरायाम् ।

गन्धोली स्त्री० गन्धयति अर्द्दयति गन्ध—ओलच् गौरा० ङीष् । वरटायाम् (बोलता) ।

गभस्ति पु० गम्यते ज्ञायते गम—डः गः विघयस्तं बभस्ति भासयति भस—क्तिच् । किरणे, सूर्य्ये च । खाहाबां बह्निपत्न्यां स्त्री०वा ङीष् ।

गभस्तिमत् पु० गभस्ति+मतुप् । सूर्य्ये ।

गभस्तिहस्त पु० गभस्तयो हस्ता इव जलाकर्षकत्वात् यस्य । सूर्य्ये ।

गभीर त्रि० गच्छति जलमत्र गम—ईरन् भान्तादेशश्च । निम्नस्थाने, अतलस्पर्शे, गहने, दुष्प्रवेशे, दुर्वारे च ।

गम गतौ भ्वा० परर० सक० अनिट् । गच्छति अगमत् ।

गम पु० गम—अप् । दूतभेदे, जिगीषोर्यात्रायाम्, गमने, पथि, सदृशपाठे च । [स्यात् समास इति भाष्यम् । गमयितरि च ।

गमक त्रि० गमयति बोधयति गम—णिच्—ण्वुल् । बोधके, गमकगम्भारी स्त्री० कं जलं बिभर्त्ति भृ—अण् ङीप् पृ० कस्य गः । (गामारी) वृक्षभेदे ।

गम्भीर त्रि० गच्छति जलमत्र गम ईरन् भुगागमः नि० । निम्नस्थाने, मन्द्रे गभीरार्थे च । जम्भीरे, पद्मे, खगभन्नभेदे च पु० । स्वरे वक्त्रे च नाभौ च त्रिषु गम्भीरता शुभा ।

सन्धिभ

गम्भीरवेदिन् पु० गम्भीरं अन्तः वेत्ति विद्-णिनि । चिरकालेन यो वेत्ति शिक्षां परिचितामपि "गम्भीरवेदी विज्ञेयः स भजेत् कृत्युक्तचिह्ने" "त्वग्भेदात् शोणितस्रावात् मांसस्य क्षयवादपि । आत्मानं यो न जानाति स स्यात् गम्भीरवेदितेत्युक्तचिह्ने च भजेत् । तच्च गम्भीरवेदिताशब्दे ।

गय पु० असुरभेदे, वानरभेदे, नृपभेदे च । तीर्थभेदे स्त्री० टाप् ।

गर पु० गॄ-निगरणे अच् अप् वा । विषे, रोगे, रक्तवर्धिके पक्वमे करञ्जे च ।

गरघ्न पु० गरं विषं हन्ति । वर्बरे । मद्यभेदे (गडुच्) स्त्री० ङीष् ।

गरल न० गिरति जीवनं गॄ-अलच् । विषे, सर्पविषे, लवणमूले च ।

गरागरी स्त्री० गरं मूषिकविषमागिरति आ+गॄ-अच् गौ० ङीष् । देवताडीवृक्षे ।

गरिमन् पु० गुरोर्भावः इमनिच् गरादेशः । गौरवे ।

गरिष्ठ त्रि० अतिशयेन गुरुः इष्ठन् । गुरुतरे । ईयसुनि गरीयानप्यत्र ।

गरी स्त्री० गॄ शब्दे अच् गौरा० ङीष् । देवताडीवृक्षे ।

गरुड पु० गरुद्भ्यां डयते डी-ड पृ० तलोपः । कश्यपात्मजे विनतागर्भजाते पक्षिराजे ।

गरुडध्वज पु० गरुडो ध्वजः चिह्नमस्य । विष्णौ ।

गरुडपुराण न० गरुडेन प्रोक्तं पुराणम् । पुराणभेदे ।

गरुडाग्रज पु० ईत० विनतायाः ज्येष्ठपुत्रे सूर्यसारथौ अरुणे ।

गरुत् पु० गॄ-गॄ-वा उति । खगानां नभोगतिहेतौ पक्षे (पाखा) ।

गरुत्मत् पु० गरुत् अस्त्यस्य मतुप् यवादित्वात् न मस्य व । गरुडे, विहगमात्रे च ।

गर्ग पु० गॄ-ग । ब्रह्मण्यः पुत्रे मुनिभेदे ।

गर्गरी स्त्री० गर्गं कृतिं शब्दं राति रा-क गौ० ङीष् । दधिमन्थनपात्रे, कलसे च । मद्यभेदे, तरुणपशौ च पु० ।

गर्ज अव्यक्तेतुशब्दे भ्वा० पर० सक० सेट् । गर्जति । ब्र० "गर्ज्ज गर्ज्ज क्षणं मूढ" इति देवीमाहात्म्यम् ।

गर्ज् रवे चुरा० उभ० सक० सेट्। गर्ज्यति ते अजगर्ज्जत्—त।
गर्जर न० गृ—विच् गरं जरयति जॄ—विच् अच्। (गाजर) मूलभेदे।
गर्जित न० गर्ज्—क्त। मेघशब्दे। गर्ज्जि—क्त। मत्तकुञ्जिनि
गर्त्त पु० गृ—तन्। भूमिच्छिद्रे, क्षोणितस्थाने कूपाकारेऽङ्गे रोग भेदे च "धनुः सहस्राण्यष्टौ च गतिर्यासां न विद्यते। न ता नदीश्चरा गर्त्ताः" इत्युक्ते जाते स्त्री० टाप्।
गर्त्तिका स्त्री० गर्त्तोऽस्त्यस्याः ठन्। तन्तुवायनशाकायां (ताँतघर)।
गर्द् रवे वा चुरा० उभ० पक्षे भ्वा० परे० अक० सेट्। गर्द्यति ते गर्द्दति अजगर्द्दीत्—त अगर्द्दीत्। [विड्वरे च न०।
गर्द्दभ पु० गर्द् अभच् (गाधा) गर्द्दभे, गन्धखेदे च। श्वेतकुष्ठदे,
गर्द्दभाण्डक पु० स्त्री० गर्द्दभस्य भक्ष्यः पाकः। ब्रह्मयष्टिद्रुमे (वाम-नहाटी) भार्य्यायाम् स्त्री० ङीप्।
गर्द्दभाण्ड पु० गर्द्दभं गन्धविशेषमण्डति अम-ड डस्य नेत्वम् पक्वा-दिघ्वत्यसल्लाकारे द्रुमे (पाकुड़) वृक्षे।
गर्द्दभाह्वय पु० गर्द्दं गन्धविशेषमाह्वयति ह्वे—अ। गर्द्दभ इव आह्वयो यस्य वा। कुष्ठदे।
गर्द्दभी स्त्री० गर्द्द—अभच् गौ० ङीष्। गोमक्षीटे, श्वेतकण्टकार्य्यां, अपराजितायाञ्च। गर्द्दभ+पु० योगे ङीष्। रासभ्याम्
गर्द्ध लिप्सायां पु० उभ० सक० सेट्। गर्द्धयति ते अजगर्द्धत्—त।
गर्द्ध पु० गृध—घञ् अच् वा। अतिशयलुब्धायां, गर्द्धभाख्यद्रुमे च।
गर्द्धन त्रि० गृध—युच्। लुब्धे।
गर्ब गतौ भ्वा० परे० सक० सेट्। गर्बति अगर्बीत्।
गर्ब दर्पे अद० चुरा० आत्म० सेट्। गर्बयते अजगर्बत।
गर्व पु० गर्ब—दर्पे घञ्। अहङ्कारे।
गर्भ पु० गृ—भन्। भ्रूणे देहजन्मकारके शुक्रशोणितासुबन्धजन्ये "गर्भाशयगतं शुक्रमार्त्तवं जीवसंयुतम्। प्रकृतिः सविकारा च तत् सर्वं गर्भसंज्ञितं" त्रिलुक्ते सांसग्रिपिण्डे, शिशौ, कुक्षौ, नाटक-सन्धिभेदे, धनुष्कण्टके, अपवरके, "आद्यन्तयोर्द्वयोर्मासयोर्यावदा-

भवते लक्षम् । तावद् गर्भं विजानीयादित्यत्रे मासलक्षणचतुर्थ्यर्थे मक्षाजलाशयावनस्थाने, अत्रे अनौ, पुत्रे, च ।

गर्भक पु० गर्भे केशमध्ये कायति कै–क । केशमध्यस्थे वाल्ये ।

गर्भगृह न० गर्भ इव गृहम् । गृहमध्यभागे ।

गर्भघातिनी स्त्री० गर्भं हन्ति हन–णिनि ङीप् । शाकुनिकादयो ।

गर्भद पु० गर्भं ददाति दा–क । पुत्रजीववृक्षे । ङ्यां भेदे स्त्री० टच् ङीप् गर्भदात्रीत्यपि तत्रार्थे ।

गर्भपाकिन् पु० गर्भे पाकोऽस्त्यस्य इनि । षष्टिकधान्ये (साठीधान्) ।

गर्भपातक पु० गर्भं पातयति पत–णिच्–ण्वुल् । रक्तशोभाञ्जने (सहजना) । [गणिकारीवृक्षे ।

गर्भपातनी स्त्री० गर्भः पात्यतेऽनया पत–णिच् ल्युट् ङीप् ।

गर्भपातिनी स्त्री० गर्भं पातयति–पत–णिच्–णिनि ङीप् । विशल्यावृक्षे । [स्त्रियाम् ।

गर्भवती स्त्री० गर्भोऽस्त्यस्या मतुप् मस्य व । आपन्नगर्भायां

गर्भशय्या स्त्री० गर्भस्य शय्येव स्थानम् । "शङ्खनाभ्याकृतिर्योनि-स्त्यावर्त्ता सा च कीर्त्तिता । तस्यास्तृतीये त्यावर्त्ते गर्भशय्या-प्रकीर्त्तिते' ति वैद्यशब्दरत्नावलिः । [पतने

गर्भस्राव पु० स्रु–घञ् ह्रस्वः । प्रसूतिकालात् पूर्वं रोगादिना गर्भस्य

गर्भस्राविन् पु० गर्भं स्रावयति स्रु–णिच्–णिनि । हिन्तालवृक्षे ।

गर्भागार न० गर्भ इवागारम् । गृहमध्यभागे वासगृहे । गर्भएवागारम् । गर्भस्थाने ।

गर्भाधान न० गर्भः गृह्यतया आधीयतेऽनेन । दशविधसंस्कारान्तर्गते गर्भपात्रस्य संस्कारपूर्वकं गर्भनिधेके ।

गर्भाशय पु० गर्भ आश्रेतेऽत्र श्री–अच् । गर्भवेष्टनचर्म्मणि अरायौ ।

गर्भाष्टम पु० गर्भात् गर्भग्रहणसमयादष्टमः । गर्भग्रहणावधिकेऽष्टमे मासि वर्षे वा "गर्भाष्टमेऽब्दे कुर्वीतेति मनुः ।

गर्भिणी स्त्री० गर्भोऽस्त्यस्याः इनि । गर्भवत्यां सगर्भायां स्त्रियाम् ।

गर्भोपघातिनी स्त्री० गर्भस्य उपघ्नन्ति उप+हन्—णिनि । गर्भघातिन्यां गवि । [भेदे च ।

गर्मुत् स्त्री० गृ—उति सुट् च । स्वर्णे, लतायां, (नवना) दृश्य-

गर्व भदे भ्वा० पर० सक० सेट् । गर्वति अगर्वीत् ।

गर्व पु० गर्व—घञ् । अभिमाने, "ऐश्वर्यरूपतारुण्यकुलविद्याबलैरपि । दुष्प्राप्यादिनान्यो यामवज्ञा गर्वईरित" इत्युक्ते ऽवज्ञाभेदे च ।

गर्ह निन्दायां वा चुरा० पक्षे भ्वा० आत्म० सक० सेट् । गर्हयते अजगर्हत । पक्षे भ्वादिरूपम् ।

गर्ह कुत्सायां भ्वा० आत्म० सक० सेट् । गर्हते अगर्हिष्ट ।

गर्ह्य त्रि० गर्ह—यत् । निन्द्ये, अधमे च ।

गर्ह्यवादिन् त्रि० गर्ह्यं वदति वद—णिनि । कुत्सितवादिनि कहदे ।

गल भक्षणे स्रावे च भ्वा० पर० सक० सेट् गलति अगालीत् ।

गल क्षारणे चुरा० आत्म० सक० सेट् । गालयते अजीगलत ।

गल पु० गल—अच् कण्ठे (गला) सज्वरसे (धुना) वाद्यभेदे, गडकमत्स्ये च ।

गलक पु० गल—वुन् । क्षुद्रमत्स्ये । [पिण्डे ।

गलकम्बल पु० गले कम्बल इव । छागायां गलस्थिते मांस-

गलगण्ड पु० ७त० । (गरगण्ड) रोगभेदे ।

गलग्रह पु० "आरम्भानन्तरं यत्र प्रत्यारम्भो न दृश्यते । गर्भादिसुतयः सर्वे तमेवाहुर्गलग्रहं" इत्युक्ते प्रत्यारम्भाभावयति पदार्थे, "कृष्ण-पक्षे चतुर्थी च सप्तम्यादिदिनत्रयम् । "त्रयोदशीचतुष्कञ्च अष्टा-मेते गलग्रहा" इत्युक्ते तिथ्यष्टके च ।

गलन्तिका स्त्री० गल—अत इत्वम् अल्पार्थे कन् क्षुद्रधारिधारायु-तायां (झारा) कर्कर्यां "देवे देया गलन्तिकेति स्मृतिः ।

गल(ले)स्तनी स्त्री० गले स्तनो यस्याः वा बहुव्र० । छाग्याम् ।

गलहस्त पु० गलेहस्तः । अपसारणार्थंगलेऽर्पिते हस्ते (गलाटिपि) ।

गला स्त्री० गल—अच् । लज्जालुलतायां भेदे, अलम्बुषायाञ्च ।

गलित त्रि० गल—क्त । पतिते क्षरे, च्युते, हस्तादितो भ्रष्टे च ।

गलेगण्ड पु० गलेगण्ड इव यस्य । पक्षिभेदे (हाड़गिले) ।
गलोपान्त पु० गलस्य उपान्तः समीपम् । गलसमीपस्थेऽवयवे ।
गल्भ धार्ष्ट्ये, प्रागल्भ्ये, भ्वा० आ० सक० सेट् । गल्भते अगल्भिष्ट ।
गल्या स्त्री० गलानां कण्ठानां समूहः । कण्ठसमुदाये ।
गल्ल पु० गल–क तस्य नेत्त्वम् । (गाल) गण्डे ।
गल्लक पु० गलति क्विप् गल् तं लाति ग्लपाति ततः स्वार्थे कन् । चषके मद्यपानपात्रे ।
गवय पु० गु–अयच् । गोसदृशे गलकम्बलहीने पशुभेदे वानरभेदे च ।
गवल पु० गुङ् शब्दे अप् तं लाति ला–क वनमहिषे । तल्लम्बित्वात् तच्छृङ्गे न० । [दृष्टिस्थाने वातायने ।
गवाक्ष पु० गवां किरणानामक्षि रन्ध्रमिव । जालाकारे कुलवधू-
गवाक्षी स्त्री० गां भूमिमक्षीति अण् ङीप् । (गोक्षुर) लताभेदे, (गेंखोड़ा) शाखोटे, अपराजितायाञ्च ।
गवादन न० गोभिरद्यते अद–ल्युट् । घासे । इन्द्रवारुण्यां स्त्री० ।
गवेडु पु० गवे दीयते दीङ् क्षये कु पृ० दस्य ड अलुक् स० । (गड़गडे) धान्यभेदे । [कनि स्त्रीत्वे न टाप् अत्वे वार्थे ।
गवेधु पु० गवे धीयते धाञ्–धारणे कु । (गड़गडे) धान्यभेदे,
गवेधुको स्त्री० न० । गवामीषः गोरक्षः तथाभूतः इव कायति कै क गौरा० ङीष् । (गोरक्षचाकुलिया) लताभेदे ।
गवेष अन्वेषणे, अद० चुरा० आत्म० सेट् । गवेषयते अजगवेषत ।
गवेषणा स्त्री० गवेष–युच् टाप् । अन्वेषणे । ल्युट् अत्वे वार्थे न० ।
गव्य त्रि० गोर्विकारः गवि भवं, गोर्हितं, गोरिदं, वा सर्वत्र यत् गो-सम्बन्धिनि, गोर्हितादौ च । ज्यायां रागद्रव्ये च न० ।
गव्यूति स्त्री० गोर्यूतिः । क्रोशद्वये क्रोशे च ।
गह्व गर्हणे अद० चु० उभ० सक० सेट् । गर्हयति ते अजगर्हत् त ।
गह्वन न० गाह–युच् पृ० हुस्वः । कानने, गह्वरे, दुःखे च । दुर्गमे, दुष्प्रवेशे च त्रि० । "गहना कर्मणोगतिः" इति गीता ।
गह्वर पु० गाह–वरच् त्रि० । निकुञ्जे । दम्भे, वने, रोदने, विषम-

स्थाने, अनेकानर्थसङ्कटे च न०। गुहायां न०स्त्री० स्त्रीत्वपक्षे ङीष्

गा गतौ भ्वा० आत्म० सक० अनिट्। गाते अगात्त।

गा स्तुतौ सक० जन्यनि अक० जुहो०। जगाति अगासीत्।

गाङ्गेय पु० गङ्गा+ढक्। भीष्मे, कार्त्तिकेये च। "यं गर्भं सुषुवे गङ्गा पावकाद्दीप्ततेजसम्। तदुग्रं पर्वते न्यस्तं हिरण्यं समपद्यत" इत्युक्ते स्वर्णे, तन्नामनामके धुस्तूरे, सुवर्णके, कशेरुकेषु च।

गाङ्गेरुकी स्त्री० गाङ्गं जलमीरयति क्षिपति ईर–कु स्वार्थे कन् गौरा० ङीष्। नागबलायाम्।

गाजर न० गां जरयति जॄ–णिच्–अच्। गृञ्जने (गाजोर)।

गाढ न० गाह–क्त। अतिशये दृढे। तद्युते, अवगाढे, सेविते च त्रि० तपस्विगाढां तमसां प्रापेति रघुः।

गाणिक्य न० गणिकानां समूहः ष्यञ्। वेश्यासमूहे।

गाण्डिव पु० गण्ड–इन् पृ० दृद्धिः। धनौ।

गाण्डिव(ण्डी)व पु०न०। गाण्डिर्धन्विरस्यास्ति वा पूर्वपददीर्घः। अर्जुनचापे, चापमात्रे च। [अर्जुनदत्ते च।

गाण्डीव(ण्डि)विन् पु० गाण्डीव(ण्डि)व–इनि। अर्जुने, धानुष्कमात्रे,

गात्र शैथिल्ये अदा०चुरा०आत्म०अक० सेट्। गात्रयते अजगात्रत।

गात्र न० गा–ष्ट्रन्। देहे, गजाद्यजङ्गादौ च।

गात्रभङ्ग पु० भनज–घञ् गात्रस्य भङ्गोऽवसादो यस्याः। मूकश्विम्बाम्। ङीप्। अङ्गभङ्गे (गामोड़ा) स्त्री०।

गात्रानुलेपनी स्त्री० गात्रमनुलिप्यतेऽनया लिप–ल्युट्। अनुलेपनवर्त्तिकायाम्।

गाथक त्रि० गै–थकन्। गायके गानोपजीविनि।

गाथा स्त्री० गै–थन्। आर्य्यादिच्छन्दसि प्राकृतादिभाषारचिते पद्ये, श्लोके च। [अगाधिष्ट। अजगाधत्।

गाध प्रतिष्ठायां ग्रन्थे लिप्सायाञ्च भ्वा० आ० अक० सेट्। गाधते

गाध पु० गाध–घञ्। स्थाने, लिप्सायां, तलस्पर्शे च। [रूपभेदे।

गाधि पु० गाध इन्। चन्द्रवंशे कान्यकुब्जाधिपे, विश्वामित्रपितरि

गाधिज पु० गाधेर्जायते जन–ड । विश्वामित्रे ।

गाधेय पु० गाधि+अपत्ये ढक् । विश्वामित्रे मुनौ ।

गान न० गै–ल्युट् । गीतौ, ध्वनौ च ।

गान्दिनी स्त्री० गन्दायां, यादववंश्यस्य अक्रूरस्य मातरि च ।

गान्धर्व त्रि० गन्धर्वस्येदम् अण् । गन्धर्वसम्बन्धिनि । "इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च । गान्धर्वः स तु विज्ञेय" इत्युक्ते विवाहभेदे, भारतवर्षीयोपद्वीपभेदे च पु० । सामवेदस्योपवेदे सङ्गीतशास्त्रे, पदस्यस्वरसंघातस्तालेन सङ्गतस्तथा । प्रयुक्तश्चावधानेन गान्धर्वमभिधीयते" इत्युक्ते गाने च न० ।

गान्धार पु० गन्धं सौरभमृच्छति अण् प्रज्ञाद्यण् । सिन्दूरे गीतिविषये रागभेदे, स्वरभेदे च । कन्दार इति ख्याते देशोद्भवे त्रि० । गन्धके न० ।

गान्धारराज पु० गान्धाराणां जनपदानां राजा टच् । दुर्योधनमातामहे सुबले, तत्सुते शकुनौ च । [धृतराष्ट्रस्य पत्न्याम् ।

गान्धारी स्त्री० गान्धारस्य स्वापत्यम् अण् । दुर्योधनस्य मातरि

गान्धिक पु० गन्धेन जीवति ठक् । गन्धवणिजि ।

गायत्री स्त्री० गायन्तं त्रायते त्रै–क । वेदोक्ते, मन्त्रभेदे, षड्जस्वरपादके छन्दोभेदे च ।

गायन त्रि० गै–ल्युट् । गानोपजीविनि । स्त्रियां ङीप् ।

गारुड न० गरुडो देवताऽस्य । मरकतमणौ, विषमन्त्रे, स्वर्णे च । तेन प्रोक्तमित्यण् । गरुडेनोक्ते पुराणभेदे च ।

गारुडिक पु० गारुडेन विषमन्त्रेण जीवति ठक् । विषवैद्ये ।

गारुत्मत न० गरुत्मान् देवतास्य अण् मरकतमणौ ।

गार्द्धपक्ष पु० गृध्रस्यायं गार्द्धः अण् स पक्ष पत्रं यस्य । गृध्रपक्षरचितपत्रके बाणे । [गार्भिण्यसमूहे ।

गार्भिण न० गर्भिणीनां समूहः अञ् । गर्भिणीसमूहे । यञ् ।

गार्हपत्य पु० गृहपतेः नाम्ना युक्तः । यज्ञीयाग्निभेदे ।

गार्हस्थ्य न० गृहस्थस्य भावः कर्म० वा । गृहस्थाश्रमकर्त्तव्ये कर्मणि, तद्धर्मे च ।

गालव पु०चु०गल–घञ् तं वाति वा–क । मुनिभेदे, लोभदक्षे च ।

गालि पु० चु० गल–इन् । शापे, आक्रोशे च ।

गाह विलोडने भ्वा० आत्म० सक० वेट् । गाहते अगाहिष्ट आगाढ ।

गि(र्)रा स्त्री० गॄ क्विप् या टाप् । वाक्ये ।

गिरि पु० गॄ–कि । पर्वते । "सदोर्द्ध्वबाहुर्योगीशो सन्नकेशो दिगम्बरः । सर्वत्र समभावेन भावयेद्यो नरोत्तमः । दृष्ट देवीधिया नारीं स गिरिः परिकीर्त्तित" इत्युक्तलक्षणे संन्यासिनि, परिव्राजकोपाधिभेदे च । यथा आनन्दगिरिः । गिलति श्लोकम् गॄ–अच् । बालमूषिकायां स्त्री० वा ङीप् ।

गिरिकदली पु० ७त० । वन्यकदलीजातायाम् वनरम्भायाम् ।

गिरिकर्णी स्त्री० गिरिर्बालमूषिकेव कर्णः पत्रं यस्याः । अपराजितायाम् । स्वार्थे कन् गिरिकर्णिकाप्यत्र ।

गिरिका स्त्री० गिरि+संज्ञायां कन् । बालमूषिकायाम् ।

गिरिज न० गिरौ जायते जन–ड । अभ्रे, शिलाजतुनि, लौहे, गैरिके च । मधुकभेदे पु० । पार्वत्यां मातुलुङ्गवृक्षे स्त्री० ।

गिरिदुर्ग न० गिरिरेव दुर्गम् । राज्ञां शत्रुभ्यो निःशङ्कतया वासस्थानं दुर्गम् (गढ़) । पर्वतरूपे तादृशे स्थाने, "सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेदिति मनुः ।

गिरिनिम्ब पु० ७त० महानिम्बवृक्षे ।

गिरिपीलु पु० ६त० (फालसा) इति वृक्षभेदे ।

गिरिपुष्पक न० गिरेः पुष्पमिव इवार्थे कन् । शैलेये, शिलाजतुनि ।

गिरिभिद् पु० गिरिं भिनत्ति भिद–क । पाषाणभेदके वृक्षे, इन्द्रे च ।

गिरिमल्लिका स्त्री० गिरौ मल्लीव इवार्थे कन् । कुटजवृक्षे ।

गिरिश पु० गिरौ शेते शी–ड, गिरिरस्यास्ति लोमा० श वा । शिवे ।

गिरिशालिनी स्त्री०गिरिणा बालमूषिकाकर्णेनेव शलते शल–णिनि । अपराजितायाम् ।

गिरिसुत पु० ६त० । मैनाकपर्वते । पार्वत्याम् स्त्री० ।

गिरीश पु० गिरेः कैलासस्य ईशः । महादेवे ।

गिल पु० गिलति कृ—भूत० क लत्वम् । जम्बीरे ।

गिलित त्रि० गृ—क गिलो जातोऽस्य तारका० इतच् । भक्षिते ।

गीत न० गै—क्त । गाने तल्लक्षणादिकं वाचस्पत्ये ।

गीता स्त्री० गै—कर्म्मणि क्त । गुरुशिष्यकल्पनया उपदेशात्मके कथाविशेषे सा च भगवद्गीतारामगीतादिभेदात् बहुला किन्तु भगवद्गीतायामेव प्रसिद्धिः । गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः । 'या स्वयं पद्मनाभस्य मुखपद्मात् विनिःसृतेति श्रीधरस्वामिधृतवचनम् ।

गीति स्त्री० गै—क्तिन् । गाने, आर्य्याच्छन्दोभेदे च ।

गीर्ण स्त्री० गृ—क्तिन् । गिलने, स्तुतौ च ।

गीर्व्वाण पु० गीरेव वाणो यस्य । देवे ।

गीष्पति पु० गिरां पतिः इदुपधत्वात् षत्वम् । बृहस्पतौ । वा रत्वे विसर्गे च । गीष्पतिः गीःपतिरत्यत्र ।

गु ध्वनौ भ्वा० आत्म० अक० अनिट् । गवते अगोष्ट ।

गु पिठोत्सर्गे तुदा० कुटा० पर० अक० अनिट् । गुवति अगुत ।

गुग्गुल(लु) पु० गुज—किप् गुक् व्याधिः ततो गुडति रक्षति उ—गुड—क वा डलयोरैक्यत्वम् । स्वनामख्यातनिर्य्यासके वृक्षभेदे, रक्तगोभाञ्जने च ।

गुच्छ पु० गु—संप० किप् गुतं छाति छो—क । कलिकाकुसुमादि समूहवति स्तबके, आखुमूत्रे मूलत एव शाखाप्रधानसंघातात्मके धान्यमल्लिकादेः स्तम्बे, मुक्तादिग्रथिते हारभेदे, मयूरपुच्छे च । स्वार्थे कन् । उक्तेष्वर्थेषु । संज्ञायां कन् । रोठाकरञ्जे ग्रन्थिपर्णे न० ।

गुच्छकरञ्ज पु० गुच्छाकृतिः करञ्जः । करञ्जभेदे ।

गुच्छदन्तिका स्त्री० गुच्छीभूता दन्ताः पुष्पकृपाः सन्त्यस्याः ठन् । कदल्याम् तस्या हि मोचकरूपे पुष्पे गुच्छाकृतिदन्तरूपत्वम् ।

गु(त्स)च्छपत्र पु० गुच्छाकृतीनि पत्राण्यस्य । तालवृक्षे तस्यहि प्रत्ये-कपत्रस्य गुच्छात्मकत्वम् ।

गु(त्स)च्छपुष्प पु० गु(त्सा)च्छाकृतीनि पुष्पाण्यस्य । वृक्षविशेषे । स्वार्थायां कन् । रीठाकरञ्जे भावप्यां स्त्री० ङीष् ।

गु(त्स)च्छफल पु० गु(त्सा)च्छाकृतीनि फलान्यस्य । रीठाकरञ्जे, राजा-दन्यां, कतके च । अग्निदमन्यां, काकमाच्यां, द्राक्षायां कदल्यां च स्त्री० टाप् ।

गु(त्सा)च्छार्द्ध पु० गु(त्स)च्छस्य अर्द्धमिव अर्ध—अच् । चतुर्विंशति-यष्टिके हारभेदे । इत० गुच्छ(त्स)स्यार्द्धं पु० न० ।

गुज ध्वनौ तुदा० कुटा० पर०अक० सेट् । गुजति अगुजित् जुगोज ।

गुज कूजने भ्वा० पर० अक० सेट् । गोजति अगोजीत् ।

गुज कूजने भ्वा० पर०सक० सेट् इदित् । गुञ्जति अगुञ्जीत् "न जुगु-ञ्ज यः कल" मिति भट्टिः ।

गुञ्जा स्त्री० गुञ्ज—अच् लताभेदे (कुंच) तत्फलेऽपि हरितक्यादि-त्वादणो लुक् । "तुल्या यवाभ्यां कथिता तु गुञ्जेति लीलावती । गोधूमहयमाने, चतुर्थांश्यमाने, पटहे, मदिराघटे, मधुरध्वनौ, चर्म्मायाञ्च ।

गुटि(टी) स्त्री० गु—टिक् या ङीप् । गोलाकारायां वटिकायाम् । स्वार्थे कन् । तत्रैवार्थे गुटिकापातादिना व्यञ्जन" मितिदाद्यभागः ।

गुठ वेष्टने चुरा० उभ० इदित् सक० सेट् । गुण्ठयति—ते अजु-गुण्ठत्—त ।

गुड वेष्टने रक्षणे चूर्णने च चुरा० उभ० इदित् सक० सेट् । गुण्ड-यति—ते अजुगुण्डत्—त ।

गुड रक्षणे व्याघाते च तुदा० कुदा० पर० सक० सेट् । गुडति । अगुडीत् जुगोड ।

गुड पु० गुड—क । गोले, हस्तिगण्डे, "इक्षोरसो यः सम्यक्पाकजायते गोलवद् दृढः । सगुडः गौडदेशे तु मत्स्यण्डोऽत्र गुडो मत" इत्युक्तं

स्वनामख्याते इक्षोरसपाकजाते पदार्थे (फेणी) कृतिख्याते पदार्थे, पाके, कार्पासाच्च ।

गुडतृण न० गुडस्य गुड़ार्थं तृणम् । इक्षौ तत्र हि गुडोत्पत्तिः ।

गुडत्वक्(च्) पु० गुडइव मधुरा त्वक् (चा) यस्य । त्वचे (दारचिनि) ।

गुडदारु पु० गुडप्रधानो दारुः शाक० । इक्षौ ।

गुडधेनु स्त्री० गुड़निर्म्मिता धेनुः । दानार्थं धेनुत्वेन शास्त्रानुसारेण कल्पिते गुड़ादिपदार्थे ।

गुडपुष्प पु० गुड इव मधुरं पुष्पमस्य । मधुकवृक्षे (महुल) (महुआ) ।

गुडफल पु० गुड इव मधुरं फलमस्य मोलुवृक्षे ।

गुडबीज पु० गुड इव मधुरं बीजमस्य मखरे ।

गुडशिग्रु पु० गुड इव मधुरः शिग्रुः । रक्तशोभाञ्जने ।

गुडाका स्त्री० गुड—व्याघाते आक । निद्रायाम् । [अर्जुने च ।

गुडाकेश पु० गुडाकाया निद्रातुल्यालस्यस्य ईशः वशित्वात् । शिवे,

गुडाशय पु० गुडइव मधुरः आशयः फलमध्यं यस्य । आखोट वृक्षे (आखरोट) हैत० गुडाभिलाषे । [याम् ।

गुडु(डू)ची स्त्री० गुड—रक्षणे उ (ऊ) चट् । स्वनामख्यातायां लता-

गुण मन्त्रणे आम्रेडने इत्येके अदं० चु० उभ० सक० सेट् । गुणयति—ते अजुगुणत्—त ।

गुण पु० गुण—अच् घञ् वा । धनुषो मौर्व्याम् धनुराकर्षणदामनि, रज्जुमात्रे, सगुणोऽपि पूर्णकुम्भो यथा कूपे निमज्जतीत्युक्तेः । शौर्य्यादिधर्म्मे, राज्ञां सन्धिविग्रहादिषु षट्सु साधनेषु "षाड्गुण्यस्समयुञ्जते" इति भागः । ज्ञानविनयादिषु, गुणा गुणानुबन्धित्वादिति रघुः । सांख्यमते पुरुषोपभोगोपकरणभूतत्वात् तन्नद्धनोपयोगित्वाच्च सत्वरजस्तम आदिषु पदार्थेषु । "प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्म्मसि" ति गीता । अप्रधाने, न्यायमते रूपादिषु चतुर्विंशतिपदार्थेषु, व्याकरणोक्ते "सत्वे निविशते ऽपैति पृथग्जातिषु दृश्यते । आधेयशक्रियाजस्र योऽसत्वप्रकृतिर्गुणः" इत्युक्ते द्रव्यमात्राश्रिते द्रव्यभिन्ने उत्पाद्यानुत्पाद्यता समानाधिकरणे सिद्धरूपे

धस्तुधर्मे, व्याकरणे परिभाषिते अदेङ्गुण दृस्तुके अकारे, एकारे, ओकारे च अलङ्कारोक्तेषु माधुर्य्यादिषु, आदृत्तौ, तन्त्रौ, उत्कर्षे, दूर्वायाञ्च ।

गुणक पु० गुण–आचष्टेऽने ण्वुल् । आवर्त्तके यूरके "गुणस्यान्त्यमङ्गं गुणकेन हन्त्यादिति लीलावती ।। [तनि ।

गुणगुच्छ त्रि० षष्ठ-पञ्चार्थे कप् ईत० । गुणानां पञ्चे, पञ्चपा-

गुणनिका स्त्री० गुण–आचष्टेऽने युच् स्वार्थे कन् । अभ्यासे निश्चयार्थं पाठस्य ग्रन्थस्य पुनः पुनरनुशीलने, वक्तुर्गुणनिकैव सेति माघः । स्तूत्ये, स्तुत्यै, मालायाञ्च ।

गुणवृक्षक पु० वृक्ष इव कायति कै–क गुणानां नौकाकर्षणरज्जूनां बन्धनाधारः वृक्षः । नौकाकर्षकदामाद्याधारे काष्ठे । (भाषायां) ।

गुणित त्रि० गुण–आचष्टेऽने कर्म्मणि क्त । आहते ताडिते पूरिते ।

गुणिन् पु० गुणोऽस्यास्ति इनि । धनुषि । गुणविशिष्टे त्रि० "गुणी-गुणं वेत्ती"त्यधीते: ।

गुणीभूत त्रि० अगुणः गुणः भूतः च्वि भू–क्त । अप्रधानीभूते ।

गुणीभूतव्यङ्ग्य न० गुणीभूतं वाच्यार्थादपकृष्टं व्यङ्ग्यं यत्र । अलङ्कारोक्ते मध्यमे काव्ये ।

गुण्ड पु० गुडि–वेष्टने अच् । असिपत्रे वृक्षभेदे यस्य कन्दः कशेरु ।

गुण्डकन्द पु० ईत० । कशेरुणि (केशुर) ।

गुण्डारोचनिका स्त्री० गुण्डा सती रोचना इवार्थे कन् (कमलागुंडि) वृक्षभेदे ।

गुण्डिक पु० गुण्ड+अस्त्यर्थे ठन् । चूर्णीकृते तण्डुलादौ ।

गुण्डित त्रि० गुडि–वेष्टने क्त । रजसाकीर्णे, कृपिते ।

गुत्स पु० गुध–स किच्च । स्तबके, विकाशोन्मुखकलिकायाम्, गुच्छार्थे, वृक्षपरिच्छेदे च । गुत्सकादयः गुच्छकादिवत् ।

गुद क्रीडे भ्वा० आत्म० अक० सेट् गोदते अगोदिष्ट ।

गुद न० गुद–क । मलत्यागद्वारे अपानवायुनिःसारणद्वारे ।

गुदकील पु० गुदे कील इव । अर्शोरोगे । गुदाङ्कुरादयोऽप्यत्र ।
गुदग्रह पु० गुदं गृह्णाति ग्रह–अच् । उदावर्त्तनामके रोगे ।
गुद्र निष्पा कथने चुरा० उभ० सक० सेट् इदित् । गुन्द्रयति ते अजुगुन्द्रत्–त ।
गुध रोषे क्र्या० पर० अक० सेट् । गुध्नाति अगोधीत् ।
गुध क्रीडे भ्वा० आत्म० अक० सेट् । गोधते अगोधिष्ट ।
गुध वेष्टने दिवा० पर० सक० सेट् । गुध्यति अगोधीत् ।
गुन्द्र पु० गुन्द्र–अच् । शरटपक्षे (गोदपठेरा) ख्याते वृक्षे च ।
गुन्द्रमूला स्त्री० गुन्द्रस्येव मूलमस्याः एरकाख्ये तृणभेदे ।
गुन्द्रा स्त्री० गुद्रि पचाद्यच् । एरकायाम् । गां जलं द्रावयति द्रा–क पृ० । भद्रमुस्तके, प्रियङ्गौ, गवेधुकायाञ्च ।
गुप गोपने कत्थने च भ्वा० आत्म० सक० सेट् । निद्रायां जुगुप्सते अजुगुप्सिष्ट । गोपने गोपते अगोपिष्ट । [पीत्–अगौप्सीत् ।
गुप रक्षणे भ्वा० पर० सक० वेट् । गोपायति–अगोपायीत्–अगो–
गुप व्याकुलीभावे दिवा० पर० सक० सेट् । गुप्यति अगुपत्–अगोपीत् ।
गुप्त वि० गुप–रक्षणे गोपने वा क्त । रक्षिते, त्राते, गूढे, संवृते च । वैश्यसंज्ञायां पु० ।
गुप्तगति पु० गुप्ता गतिर्यस्य । अपसर्पे, गुप्तचरे ।
गुप्तस्नेह पु० गुप्तः स्नेहस्तैलादिर्यत्र । अङ्गोटवृक्षे ।
गुप्ति स्त्री० गुप–क्तिन् । रक्षणे, गोपने च राज्ञामात्मनगर्त्ता, परनगरस्याञ्च रक्षायां (पहारा) गुप्तावपि मनोहरमिति कुमारः । कारागारे, भूगर्त्ते, अक्षक्रीडास्थाने, नौकाच्छिद्रे, यमे, मर्त्ताधिष्ठितेः खनने च ।
गुम्फ ग्रन्थे तुदा०पर०सक०सेट् सुचा० । गुम्फति अगोम्फीत् । गुम्फितः ।
गुम्फ ग्रन्थे तु० पर० सक० सेट् । गुम्फति अगुम्फीत् । गुम्फितः ।
गुम्फ पु० गुम्फ–घञ् । ग्रन्थने, वाक्ये भूषणे, पुष्पमुखि च ।
गुम्फना स्त्री० गुम्फ–युच् । "वाक्ये शब्दार्थयोः सम्यग्रचना गुम्फना स्मृता" इत्युक्तायां रचनायाम् ।

गुम्फित त्रि० गुम्फ–क्त । ग्रथिते, प्रथिते च । [गोरक्षम् ।
गुर वधे गत्याञ्च दिवा० आत्म० सक० सेट् । गूर्य्यते अगोरिष्ट । गूर्णः
गु(गू)र उद्यमे तुदा० कुटा० आत्म० अक० सेट् । गुरते अगुरिष्ट ।
गुरणम् गूर्णः ।
गुरु पु० गिरत्यज्ञानं स्तणाति उपदिशति वा धर्म्मं गृ–कु उच्च । "नि-
षेकादीनि कर्म्माणि यः करोति यथाविधि । सम्भावयति चान्नेन
स विप्रो गुरुरुच्यते" इति मनूक्ते निषेकादिकर्त्तरि पित्रादौ,
"स गुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छतीत्युक्ते आचार्य्ये, मा-
त्रूपदेष्टरि, सम्प्रदायप्रवर्त्तके, उपाध्याये, तान्त्रिकमन्त्रोपदेष्टरि,
बृहस्पतौ, तदधिदेवे पुष्ये, द्विमात्रे दीर्घे स्वरवर्णे, विन्दुविसर्गयु-
क्ते–एकमात्रे, संयुक्तपरस्थात् पूर्वस्थिते एकमात्रेऽपि वर्णे, द्रोणा-
चार्य्ये, कपिकच्छ्वाञ्च । बलवति, महति, पूज्ये, "गुरुरग्निर्द्विजा-
तीनां वर्णानां ब्राह्मणो गुरुः । पतिरेको गुरुः स्त्रीणां सर्वत्रा-
भ्यागतो गुरु" इति पुराणम् । दुर्ज्जरे, गुरुत्ववति च त्रि०
स्त्रियां वा ङीप् ।
गुरुक्रम पु० ६त० गुरुपरम्परोपदेशे । [हरिवंशे ।
गुरुतल्पग पु० गुरोः पितुस्तल्पं दारान् गच्छति गम–ड । विमा-
गुरुपचा स्त्री० गुरु पाके दुर्ज्जरं पलमस्याः । तिन्तिड़ीवृक्षे ।
गुरुवर्त्तीघ्न पु० गुरुवर्त्तेः रोगभेदं हन्ति हन–क । निम्बवृक्षे (पातिलेबु) ।
गुरुसारा स्त्री० गुरुः गुरुत्ववान् सारो यस्याः । (शिंशु) शिंशपायाम् ।
गुरुस्कन्ध पु० गुरुः स्कन्धो यस्य । स्नुहीवृक्षे ।
गुर्ज्जर पु० देशभेदे (गुजराट) तद्देशवासिनि ब० व० ।
गु(गू)र्द कर्दने भ्वा० आत्म० अक० सेट् । गु(गू)र्दते अगु(गू)र्दिष्ट ।
गु(गू)र्द निवासे कर्दने च चुरा० उभ० अक० सेट् । गु(गू)र्दयति
ते अजुगु(गू)र्दत् त ।
गुर्व उद्यमे भ्वा० पर० अक० सेट् । गुर्वति अगुर्वीत् । गूर्णः ।
गुर्व्विणी स्त्री० गुरुर्गर्भोऽस्त्यस्याः व्रीह्यादित्वात् इनि नि० गुणा-
भावः । गर्भिण्याम् ।

गुर्व्वी स्त्री० गुरु—ङीष्। गर्भवत्यां "नहि वन्ध्या विजानाति गुर्व्वीं-प्रसववेदनां" इति। गौरवयुक्तायां स्त्रियां, गुरुस्त्रियाञ्च।

गुल्फ पु० गल—फक् नि० अस्योच्च। पादग्रन्थौ।

गुल्म पु० गुड़—रक्षणे वेष्टने वा मक्। हस्तयोरैक्यम्। प्रधानपुरुषाधिष्ठिते रक्षके पुरुषसंघे, (गजाः ६, रथाः ६, अश्वाः २७ पदातयः ४५) एतत्संख्यान्विते सैन्यसमुदाये, स्वनामख्याते रोगभेदे, पट्टदेशे रक्षणार्थं स्थापिते सैन्ये, अप्रकाण्डे लताप्रतानादौ वृक्षे, "एकमूलेषु सङ्घातजातेषु शरेषु प्रभृतिषु तृणभेदेषु, स्त्रीरोगे च।

गुल्ममूल न० गुल्ममिति मूलमस्य। आर्द्रके।

गुल्मवल्ली स्त्री० गुल्माकारा वल्ली। सोमलतायाम्।

गुल्मिनी स्त्री० गुल्म+इनि। द्राक्षाताम्बूलीप्रभृतौ लतायाम्।

गुल्मी स्त्री० गुल्माकारफलत्वात् गुल्मरोगहन्तृत्वाद्वा अच् गौ० ङीष्। आमलक्यां, लवल्याम्, एलायाम्, वल्लनिर्म्मितगृहे, वन्यायाम्, शुभ्रमस्तोटके, (गुड़काकोंली)।

गु(गू)वाक पु० गु—पिलाकादित्वात् आक नि० (सुपारी) क्रमुके।

गुह संवरणे भ्वा० उभ० सक० सेट्। गूहति ते अगूहीत् अघुक्षत् अगूहिष्ट अगूढ।

गुह पु० गुह—क। कार्त्तिकेये, अग्नौ, रामभित्रे शृङ्गवेराधिपे चण्डालनाथे, गर्त्ते, विष्णौ च सिंहपुच्छीलतायाम् अलक्षिते देवख्याते पर्वतगर्त्ते, हृदये च स्त्री०। गुहां प्रविष्टाविति श्रुतिः।

गुहाशय पु० गुहायां गर्त्ते आशेते शी—अच्। अज्ञाने। "सिंहव्याघ्रवृकाक्षतरक्षुद्वीपिनस्तथा। वभ्रुजम्बुकमार्জ্জারा इत्याद्याः स्युर्गुहाशयाः इत्युक्तेषु सिंहादिषु, हृदये, बुद्धौ च स्थिते जीवे, ईश्वरे च "गुहाशयं गह्वरेष्ठं" इति श्रुतिः।

गुहिल न० गुह—इलच् किच्च। धने, वने च।

गुह्य त्रि० गुह—क्यप्। कक्षये, दम्भे, परमात्मनि च। रहसि, अङ्गे, लिङ्गे च न०। रहस्ये, गुह्यमर्हति दण्डादित्वात् यति।

अप्रकाश्ये च त्रि० । [कुबेरधनरक्षके देवयोनिभेदे ।

गुह्यक पु० गुह्यं कं सुखं यस्य, गुह्यं कुत्सितं कायति कै—क वा ।

गुह्यकेश्वर पु० ६त० । कुबेरे ।

गुह्यपुष्प पु० गुह्यं पुष्पमस्य । अश्वत्थवृक्षे । [गूनः ।

गू विण्मार्गे तुदा० क्र्या० पर०अक० सेट् । गुवति अगुविष्ट जुगाव ।

गू स्त्री० गच्छत्यपानेन देहात् गम—क्विप् टिलोपश्च । विष्ठायां, मले च ।

गूधातु क्विप्प्रत्ययान्तताकथनं पुंलिङ्गताकथनञ्च प्रामादिकम् ।

गूढ त्रि० गुह—क्त । गुप्ते, संवृते, गहने च । रहसि न० ।

गूढज पु० गूढं गुप्तं यथा तथा जातः—गूढः सन् वा जातः जन ड ।

द्वादशपुत्रमध्ये पुत्रभेदे । [केनापि न दृष्टम् ।

गूढनीड पु० गूढं नीडं वासस्थानं यस्य । खञ्जनखगे तद्वासस्थानं हि

गूढपद पु० गूढं पदमस्य । अङ्कोटे, करीरे च ।

गूढपाद(ट) पु० गूढाः पादा अस्य वा पाड्वाद्यः । सर्पे ।

गूढपुरुष पु० कर्म० । गुप्तचरे, प्रणिधौ ।

गूढपुष्प पु० गूढानि संवृतानि पुष्पाण्यस्य । वकुलवृक्षे ।

गूढफल पु० गूढं यथा तथा फलति अच् । बदरे ।

गूढमैथुन पु० गूढं केनाप्यदृश्यं मैथुनं यस्य । काके ।

गूढवल्लिका स्त्री० कर्म० । अश्वोटवृक्षे ।

गूढसाक्षिन् पु० कर्म० । व्यर्थेना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम् ।

यः श्राव्यते तदा गूढो गूढसाक्षी स उच्यते" इत्युक्ते साक्षिभेदे ।

गूढाङ्ग पु० गूढान्यङ्गान्यस्य । कच्छपे ।

गूढोत्पन्न पु० "उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः । स गृहे

गूढ उत्पन्न स्तस्य स्यात् यस्य तल्पजः" इत्युक्ते पुत्रभेदे ।

गूथ पु० न० । गू—थक् । विष्ठायाम् ।

गूर उद्यमे चुरा० आ० अक० सेट् । गूरयते अजूगुरत ।

गूर वधे गतौ च दिवा० आत्म० सक० सेट् । गूर्यते अगूरिष्ट ।

गॄ सेके भ्वा० पर० सक० अनिट् । गरति अगार्षीत् ।

गॄज ध्वनौ भ्वा० पर० अक० सेट् । गर्जति अगर्जीत् ।

गृज ध्वनौ भ्वा० पर० अक० सेट् इदित्। गर्जति अगर्जीत्।

गृञ्जन पु० गृञ्जयते भक्ष्यत्वेन कथ्यते रोगेषु गृजि–ल्युट्। "गन्धाढ्-तिरसैस्तुल्यः स्वल्पनालः पलाण्डुने" त्युक्तलक्षणे मूलभेदे (रसुन) इति ख्याते मूलभेदे च। विषदग्धपशुमांसे न०।

गृध लिप्सायां दिवा० पर० सक० सेट्। गृध्यति अगृधत्–अगर्द्धीत्। गर्द्धित्वा–गृद्ध्वा।

गृध्नु त्रि० गृध–क्नु। लुब्धे।

गृध्र पु० गृध–क्रन्। (शकुनि) खगभेदे।

गृध्रनखी स्त्री० गृध्रस्य नखइव पत्त्रादि अस्याः ङीप्। वदर्याम् (कुलेखाडा) कुलिकवृक्षे च।

गृध्रराज पु० ष० त०। गरुडात्मजे जटायुखगे।

गृष्टि स्त्री० सकृत् गर्भं गृह्णाति यह–क्तिच्–पृ० नि०। सकृत्प्र-सूतायां गवि, वराहक्रान्तायां, वदरायामोषधौ, काश्मर्य्यांच।

गृह ग्रहणे चद० चु० आत्म० सक० सेट्। गृहयते अजगृहत।

गृह न० ग्रह० गेहार्थे क। इष्टकादारुत्तिकादिरचिते गेहे। गृह–ग्रहणे अच्। कलत्रे "न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते" इति स्मृतिः। नामनि, मेषादिभवने राशौ च। अर्च्चा-दित्वादयमुभयलिङ्गः तत्र एकगृहे न० पुंलिङ्गस्तु बहुवचनान्तएव "तत्रागारं धनपतिगृहा"नित्यत्र मेघदूतम्। कलत्रेऽपि दार-शब्दवत् ब० व०।

गृहकच्छप पु० गृहे कच्छप इव। गेधरणशिलायाम्।

गृहकन्या स्त्री० गृहे कन्येव। घृतकुमार्य्याम्।

गृहकारक पु० गृहं करोति कृ–ण्वुल्। (घरामि) गृहनिर्म्माणका-रके वर्णसङ्करभेदे। [चित्रकवृक्षे (घुघ्)।

गृहनाशन पु० गृहं नाशयति नश–णिच् ल्यु। वनकपोते

गृहगोधा स्त्री० गृहस्य गोधेव। (टिक्‌टिकी) ज्येष्ठायाम्। स्वार्थे कन् तत्रैवार्थे।

गृहपति पु० ष० त०। गृहस्वामिनि, गृहस्थे, मन्त्रिणि, धर्म्मे च।

गृहभूमि स्त्री० गृहयोग्या भूमिः । वास्तुभूमौ ।

गृहमणि पु० गृहे मणिरिव । प्रदीपे ।

गृहसृग पु० गृहस्थ मृगइव । कुक्कुरे ।

गृहमेधिन् पु० गृहैर्दारैर्मेधते संगच्छते मेध-सङ्गमे णिनि । गृहस्थे ।

गृहमेधीय पु० गृहमेधिनोऽयं छ । गृहस्थकर्त्तव्ये धर्मे ।

गृहयालु त्रि० गृह-आलु । ग्रहीतरि ।

गृहवाटिका स्त्री० गृहसमीपे वाटिका आरामः । गृहसमीप-स्थोपवने ।

गृहस्थ पु० गृहेषु दारेषु तिष्ठति अभिरमते स्था-क । गृहिणि ।

गृहागत पु० गृहमागतः आ+गम क्त । आगन्तुके, अतिथौ गृहा-गते त्रि० ।

गृहाराम —० गृहे गृहसमीपे आरामः । गृहसमीपस्थे उपवने ।

गृहावग्रहणी स्त्री० गृहमवगृह्यते अनेन अव+ग्रह-करणे ल्युट् ङीप् । देहल्याम् (देओयाल) ।

गृहिणी स्त्री० गृह-अस्त्यर्थे इनि । भार्य्यायाम् गेहकर्मकुशलायाम् । गृहिणी सचिवो मिथः सखी"ति रघुः ।

गृहिन् पु० गृहा दाराः सन्त्यस्य इनि गृहस्थे ।

गृहीत त्रि० ग्रह-क्त । स्वीकृते, ज्ञाते, प्राप्ते, धृते च ।

गृहेनर्द्दिन् पु० गृहे एव नर्द्दति न युद्धे, पात्रेसमितादि०स० । कापुरुषे रणभीरौ गृहे आस्फालयितरि ।

गृह्य पु० ग्रह-पदाखैरीत्यादिना क्यप् । गृहासक्ते खगे मृगे च मलहारे, वेटोदितकर्मप्रयोगज्ञापके गोभिलसूत्रादौ ग्रन्थभेदे च । अखैरिणि आयत्ते, स्वपत्नीये पत्ते च त्रि० । गृहे भवः यत् । गृहभवे, वस्तुनि त्रि० । स्वार्थे कन् तत्रैवार्थे । नगरबाह्यस्थे ग्रामे स्त्री० टाप् गृह्या ।

गृ विज्ञापने चुरा० आत्म० सक० सेट् । गारयते अजीगरत ।

गृ शब्दे क्रया० पर० प्रादि० सक० सेट् । गृणाति अगारीत् ।

गृ निगरणे तुदा० पर० सक० सेट् । गिरति-गिलति अगारीत् अगालीत्

गेद गतौ भ्वा० आत्म० सक० सेट्। गेदते अगेदिष्ट। अजिगेदत्
गेदित्वा गेत्त्वा।

गेन्दु(ण्डु)क पु० गच्छतीति ग गुन्दरिव कृत्वर्थे कन्। कन्दुके वस्त्र-
निर्म्मिते गोलाकारे क्रीड़नके। पृषो० वा ङत्वे गेण्डुकश्च।

गेय त्रि० गै—भव्यगेयेत्यादिना कर्त्तरि यत्। गायने। भावे यत्।
गीतौ "गेये केन विनीत वा"मिति रघुः। कर्म्मणि यत्। गातव्ये
त्रि० पूर्वार्द्धे गेयं सामेति भाष्यम्।

गेव सेवने भ्वा० आ० सक० सेट्। गेवते अगेविष्ट। अजिगेवत्।

गेष अन्वेषणे भ्वा० आत्म० सक० सेट्। गेषते अगेषिष्ट अजिगेषत्।

गेह न० गेा गणेशो गन्धर्वो वा ईहः ईप्सितो यत्र। गृहे।

गेहेनर्दिन् पु० गृहेनर्दिवत् सर्वम्।

गेहेशूर पु० गृहएव शूरः। पात्रे समितादि स०। कापुरुषे रणभीरौ।

गै गाने भ्वा० पर० सक० सेट्। गायति। अगासीत्।

गैरिक न० गिरौ भवः ठक्। (गिरि) इति ख्याते पर्वतजाते उप-
धातुभेदे, स्वर्णे च।

गैरिकाक्त पु० गैरिकमिवाक्ति पुष्पमस्य। जलमधूके वृक्षे।

गैरी स्त्री० गिरौ जाता अण्। (विषलाङ्गली) लाङ्गलीवृक्षे।

गैरेय न० गिरौ भवः ढक्। (शैलज) शिलाजतुनि।

गो पु० गम—डो। वृषभे, स्वर्गे किरणे, वज्रे जले, पशौ, चन्द्रे, वायौ,
सूर्य्ये, ऋषभनामौषधौ च,। सौरभेय्याम् इष्टौ, वाणे, दिशि,
मातरि, वाचि, भूमौ च स्त्री०। [विकल्पितवृक्षे च (वेदुचि)।

गोकण्टक पु० गोर्धनोः पृथिव्या वा कण्टकः। क्षुरे, विषमोक्षते स्थपुटे,

गोकर्ण पु० गौर्नतं कर्णौ यस्य। सर्पे, "नृत्यन्ति गोकर्णशरीरभक्षा"
इति चौरः। गोरिव कर्णौ यस्य। अश्वतरे, मृगभेदे, गणदेवता-
भेदे, अनाभिकायुतविस्तृताङ्गुष्ठमाने, शैवे तीर्थभेदे च।

गोकर्णी स्त्री० गौः कर्ण इव यस्याः। मूर्व्वालतायाम्।

गोकील पु० गोः पृथिव्याः कीलइव। लाङ्गले, मुसले च।

गोकुल न० गवां कुलं यत्र। गोस्थाने गोष्ठे, "गोकुले कन्दुशाला-

या"मिति स्मृतिः । व्रजनामके प्रसिद्धे स्थाने "गोकुले रामकेशवाविति पुराणम् । ईत० । गोसमूहे ।

गोखुर पु० गोः खुरइव । गोखुरवृक्षे ईत० । गवां खुरे ।

गोग्रन्थि पु० गोर्ग्रन्थिरिव । करीषे (घट्टा) गवां ग्रन्थिः षष्ठ्यलुक्तत्पु० गोष्ठे । गोर्ग्रन्थिरिव, गोलिङ्गिकोषधौ ।

गोघ्न पु० गौर्हन्यते यस्मै हन-सम्प्रदाने टक् । अतिथौ तदागमने हि मधुपर्कार्थं गोर्वधो विहितः । कर्त्तरि टक् । गोघातके त्रि० ।

गोचर पु० गावः इन्द्रियाणि चरन्त्यस्मिन् नि० क । इन्द्रियविषये रूपरसादौ । गावश्चरन्त्यस्मिन् । गवां प्रचारस्थाने, देशमात्रे, ज्योतिषोक्ते जन्मराश्यवधिके तत्तत् स्थाने सूर्य्यादिग्रहगमनेषु च । "गोचरे वा विलग्ने वा ये ग्रहारिष्टसूचकाः इति ज्योतिषम् ।

गोचर्म्मन् न० ईत० । गवां चर्मणि, "सप्तहस्तेन दण्डेन त्रिंशद्दण्डैर्निवर्त्तनम् । दश तान्येव गोचर्मे"त्युक्ते भूमिपरिमाणभेदे च ।

गोच्छाल पु० गां भूमिमाच्छादयति छद्-णिच् अण् पृ० । भूकदम्बे (चाकुलिया) ।

गोजा स्त्री० गवि पृथिव्यां व्रीह्यादिरूपेण जायते विट् आत्वम् । व्रीह्यादिषु ।

गोजिह्वा स्त्री० गोर्जिह्वेव । (गोजिवा) लताभेदे । स्वार्थे कन् अत्रैवार्थे । [अच् (तरसुज) शीर्षदन्ते पु० ।

गोडुम्बा स्त्री०गां भूमिं तुम्बति अर्दति तुबि-क पृ० । (गोसुक)गवादन्यां ।

गोणी स्त्री० गुण-घञ् नि० गुणः गोण+आवपनेऽर्थे ङीप् । धान्याधारे (गुण) ख्याते आवपनपात्रे छिद्रवस्त्रे, शाक्यां, "द्विभूर्णा गोणयुदाहृते"ति मानभेदे द्रोणपरिमाणे च ।

गोऽण्ड पु०गोरण्ड इव । नीचजातिभेदे (गोंड) वृद्धनाभौ च तद्वति ।

गोतम पु० ब्रह्मणः पुत्रे स्वनामख्याते मुनिभेदे ।

गोतीर्थ न० गोहेतुकं तत्स्थित्या तीर्थमिव । गोष्ठे ।

गोत्र पु० गां पृथिवीं त्रायते त्रै-क । पर्वते । नामनि, कानने, क्षेत्रे, पथि, क्षत्रे, सजातीयगणे, पौत्रादिवंशे, ऋषिशब्दवाच्ये च

आदिपुरुषेषु शाण्डिल्यादिषु चतुर्विंशतौ मनूक्तेषु च । विस्तरो वाचस्पत्ये ।

गोत्रज त्रि० गोत्रे समाने गोत्रे जायते जन–ड । एकगोत्रोत्पन्ने ।

गोत्रभिद् पु० गोत्रान् पर्वतान् भिनत्ति भिद–क्विप् । इन्द्रे ।

गोत्रा स्त्री० गोत्राः पर्वताः सन्त्यस्याः अर्श आदित्वादच् । धरायाम् । गो+समूहे त्रल् । गोसमूहे ।

गोदन्त न० गोर्दन्त इवावयवो यस्य । हरितालें । ह्रस्व० । गवां-दन्ते पु० ।

गोदान न० गावः कैशाटीयन्ते छिद्यन्तेऽत्र दो–ल्युट् । केशान्तरूप-संस्कारभेदे 'अथास्य गोदानविधेरनन्तर'मिति रघुः ।

गोदारण न० गां भूमिं दारयति द–णिच्–ल्यु । लाङ्गले, कुद्दाले च ।

गोदावरी स्त्री० नदीभेदे । गोदावरी । सरस्वति । इति जले तीर्थावाहनमन्त्रः ।

गोधन न० गवां धनं समूहः । गोसमूहे । गौरेव धनमस्य । गो-रूपधनवति त्रि० । गौरेव धनम् । गोरूपे धने न० ।

गोधा स्त्री० गुध्यते वेष्ट्यतेऽङ्गरनया करणे घञ् । धनुर्गुणाघातवा-रणाय प्रकोष्ठे बद्धे चर्मणि । कर्त्तरि अच् । (गोसाप) इति ख्याते सर्पभेदे 'गृधकः शल्लकी गोधेति" मनुः । स्वार्थे कन् अत्रैवार्थे ।

गोधापदी स्त्री० गोधेव पादौ मनसस्याः स्वाङ्गत्वात् जातित्वाच्च ङीपि पङ्गावः । (गोयानिया) लताभेदे । स्वार्थे कन् अत्रैवार्थे ।

गोधास्कन्ध पु० गोधेव स्कन्धोऽस्य । विट्खदिरे ।

गोधि पु० गुध–इन् । ललाटे, गोधायां च ।

गोधिनी स्त्री० गुध–णिनि । दृहतीभेदे ।

गोधूम पु० गुध–ऊम । ब्रीहिभेदे (गोहुम) नागरङ्गे च ।

गोधूलि पु० गोभ्य उत्थितोधूलिर्यत्र काले । (सन्ध्यातपारुणित पश्चि-मदिग्विभागे व्योम्नि स्फुरद्धिरलतारकमण्डिवेशे । रङ्गे गवां खुर-पुटोल्लसितैरजोभिर्गोधूलिरित्युक्ते काले ।

गोनर्द पु० गां जलं नर्दयति नर्द्—अण्। सारसपक्षिणि, पर्वतभेदे च। केवर्त्तीमूलके न०।

गोनर्दीय पु० गोनर्दे तत्समीपे देशे भवः। प्राणिनौ स्तनौ।

गोनस पु० गोरिव नासास्य नसादेशः। सर्पभेदे।

गोप पु० गां भूमिं वा पाति रक्षति पा—क। (गोयाला) जातिभेदे। यामाधिकृते भूरक्षके, उपकारके च त्रि०।

गोपघण्टा स्त्री० गोपप्रिया घोण्टा। कृष्णकोलौ 'वदरीसदृशाकारो वृक्षः क्षुद्रफलो भवेत्। अटव्यामेव सा घोण्टा गोपघण्टेति कीर्त्तितेत्युक्तवृक्षे च।

गोपति पु० ६त०। गवां पत्यौ वृषे, (सांड) वृषपतौ शिवे, भूमिपतौ नृपे श्रीकृष्णे, किरणपतौ सूर्य्ये स्वर्गपतौ शक्रे, कृष्णनामौषधौ च।

गोपदल पु० गोपदमात्रस्थानं लाति ला—क। शुद्धाके।

गोपभद्र पु० न० गोपेभ्यो भद्रमस्मात् ५ब०। शालुके।

गोपभद्रिका स्त्री० गोपेभ्यो भद्रं यस्मात् ५ब० कप् अतइत्त्वम्। गाम्भार्य्याम्।

गोपवल्ली स्त्री० गां पाति पा—क कर्म०। मूर्व्वालतायाम् श्यामालतायां (श्यामावास)।

गोपा स्त्री० गां पाति पा—क टाप्। श्यामालतायाम्।

गोपानसी स्त्री० गवां किरणानां पानं शोधनं गोपानं स्यति सो—क गौरा० ङीष्। कुब्जेषु काष्ठार्थं वङ्के वक्रकाष्ठे, (सुतनी) वक्रनाधारे पटलाधारे वंशपञ्जरे च। [क्ष्णो च।

गोपाल पु० गां सुरभीवृषभादिकं भूमिं वा पालयति। गोपार्थे,

गोपालकर्कटी स्त्री०। पाल—अण् गोपालस्य गोरक्षस्य प्रिया कर्कटी। क्षुद्रकर्कट्याम्।

गोपुच्छ पु० गोः पुच्छ इव पुच्छो यस्य। गोलाङ्गूलवानरे। गोपुच्छाकारत्वात् हारभेदे। ६त०। गोलाङ्गूले न०।

गोपुर न० गावः पूर्य्यन्ते यत्र पृषो० मूल०क। पुरद्वारे, केवर्त्तीमुस्तके च।

गोप्य पु० गुप—यत्। रक्षके दासीपुत्रे। रक्षणीयमात्रे, गुप्तेऽपि त्रि०।

गोमती स्त्री० नदीभेदे, वेदमन्त्रभेदे च ।

गोम लेपने अद० चुरा० उभ०सक० सेट् । गोमयति-ते अज्, गोमत्-त ।

गोमन्त पु० विन्ध्यपर्वतस्य प्रत्यन्तपर्वते ।

गोमय पु० न० गवां पुरीषम् गो+मयट् । गोपुरीषे (गोबर) ।

गोमयच्छत्र न० गोमये तदाधारस्थाने छत्रमिव । शिलीन्ध्रे (छातिया) ।

गोमयोत्था स्त्री० गोमयादुत्तिष्ठति उद्+स्था-क टाप् । (गुबरिया-पोका) कीटभेदे ।

गोमायु पु० गां विक्लवां वाचं मिनोति मा-उण् । शृगाले, गन्धर्वभेदे च ।

गोमिन् त्रि० गो+अस्त्यर्थे मिनि । गवां स्वामिनि । शृगाले पु० ।

गोमुख पु० गोरिव मुखमस्य । यन्त्रभेदे, नक्रे, कुटिलाकारे वाद्यभाण्डे चौरजातसञ्ज्ञिभेदे, लेपने, तन्त्रोक्ते जपमालास्थापनार्थं षट्कलादिनिर्म्मिते यन्त्रभेदे च । हिमालयैकदेशात् गङ्गापतनगुहायां स्त्री० ङीप् ।

गोमूत्रिका स्त्री० गोमूत्रं साधनत्वेनास्याः ठन् । गोमूत्रजातायां लतायां गोमूत्रतुल्यसन्निवेशविशेषवति काव्यबन्धे च ।

गोमेद पु० मणिभेदे, द्वीपभेदे च । "गोमेदे गोपतिर्मांस इत्युपक्रम्य यज्ञवाटे हतागावो दग्धाः कोपाग्निना तदा । तन्मेदसा मही लिप्ता गोमेदः स ततोऽभवदिति पुराणेऽस्य गोमेदता निरुक्ता ।

गोमेध पु० गावो मेध्यन्ते यत्र मेध-आधारे घञ् । यज्ञभेदे ।

गोरक्ष पु० रक्षतीति रक्ष-अच् । नारङ्गवृक्षे (गोरक्षचाकुलिया) । लताभेदे च । गोरक्षके त्रि० ।

गोरक्षकर्कटी स्त्री० कर्म्म० । क्षुद्रकर्कट्याम् (राखालकाँकुड़) ।

गोरक्षजम्बु स्त्री० गोरक्षे गोपे जम्बुरिव । धोएटाफले गोधूमे च ।

गोरक्षतण्डुली स्त्री० गोरक्षं तण्डुलं बीजं यस्याः । (गोरक्षचाकुलिया) क्षुपभेदे ।

गोरक्षतुम्बी स्त्री० गोरक्षी तुम्बी । कुष्माकारतुम्ब्याम् ।

गोरक्ष न० गौः किरण इव रोचते रुच-अच् । हरितालें ।

गोरोचना स्त्री० गोभ्योजाता रोचना हरिद्रा । स्वनामख्याते गन्ध-द्रव्ये "गोरोचनालक्तककुङ्कुमेनेति तन्त्रम् ।

गोर्द न० गुर अर्दादित्वात् नि० । मस्तिष्के मस्तकस्थे घृते ।

गोल पु० गुड–घञ् डलयोरैक्यम् । सर्वतोवर्त्तुले, मदनद्रुमे, भर्त्तरि मृते जारजे पुत्रे, ज्योतिषोक्ते भूगोले, खगोले, एकराश्यौ षड्ग्रहयोगे च । मण्डले न० । स्वार्थादौ कन् मृते भर्त्तरि जारजाते पुत्रे, मणिके, (जाला) गुडे, पिण्डे, गन्धरसे कलाये च ।

गोला स्त्री० गां दीप्तिं लाति ला–क । गोदावरीनद्याम् सख्यां, कुनद्यां, पत्राच्छने, मणिके, मण्डले, बालक्रीडनके च ।

गोलाङ्गूल पु० गोरिव कृष्णं लाङ्गूलमस्य । कृष्णमुखे वानरभेदे न्यायभे० च । [शिलीन्ध्रे च (छातिया) ।

गोलाश्म पु० गवि गोमये लाभो जन्म यस्य । गोमयकीटे, (

गोलिह पु० गोभिर्लिह्यते लिह घञर्थे क । घण्टापाटलौ (घण्टा-पारुलि) ।

गोलीढ पु० गोभिर्लिह्यते लिह–क्त । घण्टापाटलौ (घण्टापारुलि) ।

गोलोक पु०न० ईत० । वैकुण्ठस्य दक्षिणभागस्थे स्थानभे०, विष्णु-निवासस्थाने पु० ।

गोलोमिका स्त्री० गौः गोसदृशं लोमास्य ङीप् ततः स्वार्थे कनि अणो ह्रस्वः । (पाथुरी) (गोधुमा) इति च ख्यातायां तृणविशेषायाम् क्रोष्टुकपुच्छायाञ्च ।

गोलोमी स्त्री० गौरिव गोलोमसदृशंलोमास्य ङीप् । श्वेतदूर्वायाम् । गोलोमस्य जाता अण् । वचायाम् । गोलोम्नामियम् अण् । वेश्यायाम् ।

गोवन्दनी स्त्री०गवि भूमौ वन्द्यते ल्युट् । प्रियङ्गौ, पीतदण्डोत्पले च ।

गोवर्द्धन पु० गां वर्द्धयति वृध–णिच् ल्यु । वृन्दावनस्थे पर्वतभे० घासादिद्वारा तस्य हि गोवर्द्धकत्वम् ।

गोवर्द्धनधर पु०गोवर्द्धनं पर्वतं धारयति धृ–अच् । श्रीकृष्णे नन्दनन्दने ।

गोविन्द पु० गां विन्दति विद–श । श्रीकृष्णे, बृहस्पतौ च । गवाध्यक्षे त्रि० ।

गोविष् पु० न० इत० । गोमये ।

गोशीर्ष न० गोः शीर्षमिव "गोशीर्षः पर्वत स्तत्र जातत्वात् । मलयैक-देशे जाते चन्दने । ईत० गोमस्तके न० ।

गोशीर्षक पु० गोशीर्षमिव कायति कै–क । द्रोणपुष्पीवृक्षे क्षुपभा-द्विजाते गोरोचनातुल्ये चन्दनभेदे च । [गोः शृङ्गे ।

गोशृङ्ग पु० गोः शृङ्गमिव शृङ्गमस्य यस्य । बदरवृक्षे । इत० ।

गोष्ठ संघाते भ्वा० आत्म० अक० सेट् । गोषते अगोषिष्ट ।

गोष्ठ न० गावस्तिष्ठन्त्यत्र घञर्थे क पत्वम् । गवां स्थाने ।

गोष्ठी स्त्री० गावोऽनेका वाचस्तिष्ठन्त्यत्र घञर्थे कः पत्वं गौरा० ङीष् । सभायाम् ।

गोष्पद न० गोः पदम्, गावः पदयते यस्मिन् देशे वा पुट् । गोःपद-जाते गर्त्ते, गोपदप्रमाणे च । गोभिः सेवितो देशः । गो प्र-धाने देशे त्रि० ।

गोसंख्य पु० गावः संचष्टे संचक्ष–अच् । गोपे ।

गोसम्भवा स्त्री० गोरिव सम्भवो लोमादिरूपकारो यस्याः । श्वेत दूर्वायां । गोजाते त्रि० ।

गोसव पु० गावः स्रूयन्ते बध्यन्तेऽत्र सु–अप् । गोमेधयज्ञे ।

गोस्तन पु० गोः स्तना इव गुच्छो यस्य । चतुर्यष्टिकहारे ।

गोस्तनी स्त्री० गोरिव स्तनः फलमस्याः । द्राक्षाभेदे ।

गोस्थानक न० गवां स्थानं स्वार्थे कन् । गोष्ठे ।

गोहरितकी स्त्री० गोः हरितकीव हितकारित्वात् । बिल्ववृक्षे ।

गोहित पु० गवां हितं यस्मात् ५ब० । बिल्वे, घोषलतायाञ्च । गोहितकारके त्रि० ।

गौड पु० । "बङ्गदेशं समारभ्य भुवनेशान्तगं शिवे ! । गौडदेशः स्मा-ख्यात इत्युक्ते देशे । तद्देशस्थे जने ब० व० । "आरस्वताः कान्यकुब्जा गौडमैथिलकोत्कलाः पञ्च गौडा इति ख्यातास्विन्ध्य-

ख्योत्तरवासिन इत्युक्ते विन्ध्यपर्वतोत्तरभागवासिषु ब्राह्मणभेदेषु च ।

गौडवास्तु(स्तू)क पु० न० "तदेव चेत् वृहत्पत्रं रक्तं स्याद्गौडवास्तुकमित्युक्ते वास्तूकभेदे । [रीतिभेदे च ।

गौडी स्त्री० गुडस्य विकारः अण् । सुराभेदे अलङ्कारोक्ते काव्य-

गौण त्रि० गुणादागतः अण् । गुणयोगात् प्रवृत्ते शब्दे असुख्य वृत्त्योपपादितेऽर्थे च । शब्दनिष्ठे अर्थबोधकतायुक्तिरूपे वृत्ति-भेदे स्त्री० ङीप् ।

गौतम पु० गोतमस्यापत्यम् । शिष्यो वा अण् । शतानन्दे नायिके तत्तो जनके मुनिभेदे, शाक्यसिंहे च ।

गौतममम्भवा स्त्री० गौतमात् सम्भवतीति अच् गोदावरीनद्याम् ।

गौतमी स्त्री० गोतम+इदमर्थे अण् ततो ङीप् । गोतमप्रणीतायां षोड़शपदार्थीरूपायाम् शाक्यसिंहप्रणीतायाञ्च विद्यायां, गोदावरीनद्याम्, राज्ञीभेदे, कण्वभगिन्याञ्च ।

गौधार पु० गोधायाः अपत्यम् आरक् । गोधापुत्रे ।

गौधेय पु० गोधा+ढक् । गोधासुते ढक् गौधेरोऽप्यत्र ।

गौर पु० गुर-र नि० । श्वेतवर्णे, चन्द्रे, धवद्रुमे, अरुणवर्णे, श्वेतवर्णे च तत्तद्वर्णवति, विष्णौ च त्रि० । स्त्रियां गौरी । कोपरे, पङ्कजे, कुङ्कुमे, स्वर्णे च न० ।

गौरजीरक पु० कर्म० । श्वेतजीरके ।

गौरत्वच् पु० गौरी त्वक् यस्य । इङ्गुदीवृक्षे (जीवपुति) ।

गौरव न० गुरोर्भावः अण् । गुरुत्वे अभ्युत्थानादिसम्माने च ।

गौरवित त्रि० गौरवं जातमस्य तारं० इतच् । पूज्ये ।

गौरशाक पु० गौरः शाकोऽस्य । मधूकभेदे ।

गौरी स्त्री० गौर+ङीष् "शङ्खेन्दुकुन्दधवला ततो गौरी तु सा मते" त्युक्तायां पार्वत्याम् "अष्टवर्षा भवेद्गौरी" त्युक्तम् अष्टवर्षायाम् असञ्जातरजस्कायां कन्यायां, हरिद्रायाम् दारुहरिद्रायां, गोरोचनायाम्, प्रियङ्गौ, भूमौ, नदीभेदे, मल्लिकायां श्वेतदूर्वायां, मल्लिकायाम्, तुलस्याम्, सुवर्णकदल्याम् आकाशमांस्यां रागिणीभेदे च ।

गौरीपुष्प पु० गौरीव पीतं पुष्पमस्य । प्रियङ्गुवृक्षे ।

गौरीशिखर न० पार्वती तपस्यास्थाने 'जगाम गौरीशिखरमिति कुमारः ।

गौष्ठीन न० पूर्वं भूतं गोष्ठं खञ् । भूतपूर्वगोष्ठे ।

ग्रथ कुटिलीकरणे आत्म० इदित् सक० सेट् । ग्रन्थते अग्रन्थिष्ट ।

ग्रथित त्रि० ग्रन्थ संदर्भे–क्त । गुम्फिते, हिंसिते, आक्रान्ते च ।

ग्रन्थ संदर्भे वा चु० पक्षे क्र्या० उभ० सक० सेट् । ग्रन्थयति–ते-ग्रन्थाति ग्रन्थीते अजग्रन्थत्, अग्रन्थीत् अग्रन्थिष्ट ।

ग्रन्थ पु० ग्रन्थ–घञ् । गुम्फने, धने च । करणे घञ् । शास्त्रे । अनुष्टुप्छन्दस्के पद्ये च ।

ग्रन्थि पु० ग्रन्थ–इन् । वंशादिग्रन्थौ (गांठ) ख्याते कौटिल्ये, "ग्रन्थग्रन्थिरिह क्वचिदि" ति नैषधम् । ग्रन्थि पर्णवृक्षे, बन्धने, रोगभेदे च । [करीरे च । दैवज्ञे पु० ।

ग्रन्थिक न० ग्रन्थ–अस्त्यर्थे ठन् पिप्पलीमूले । ग्रन्थिपर्णे, गुग्गुलौ

ग्रन्थिदूर्वा स्त्री० ग्रन्थिमती दूर्वा (गांठदूर्वा) दूर्वाभेदे ।

ग्रन्थिपर्ण न० ग्रन्थिग्रन्थयुतं पर्णं यस्य । चोरनामगन्धद्रव्ये ।

ग्रन्थिफल पु० ग्रन्थि युक्तं फलमस्य । कपित्थवृक्षे, मदनवृक्षे, कु-क्कुरे (कुकुरसोङ्घा) ।

ग्रन्थिभेद पु० ग्रन्थिं भिनत्ति भिद–अण् (गांठकाटा) चौरभेदे) अङ्गुलिं ग्रन्थिभेदस्य छेदयेत् प्रथमे ग्रहे" इति स्मृतिः ।

ग्रन्थिमत् पु० ग्रन्थिः सन्धिरस्यास्ति मतुप् (हाड़जोड़ा) अस्थिसंहा-रकवृक्षे । ग्रन्थियुक्ते त्रि० ।

ग्रन्थिमत्फल पु० ग्रन्थिमत् फलं यस्य । (मान्दार) लकुचे ।

ग्रन्थिमूल न० ग्रन्थियुतं मूलमस्य । गृञ्जने (गाजर) ।

ग्रन्थिमूला स्त्री० ग्रन्थि ग्रन्थयुतं मूलमपि यस्याः । मालादूर्वायाम् ।

ग्रन्थिल न० ग्रन्थिं लाति ला–क । पिप्पलीमूले, आर्द्रके च । विक-ङ्कतवृक्षे, (वहचि) करीरे, तण्डुलीयशाके (पोदिना) भद्रदन्तायां मालादूर्वायाञ्च स्त्री० । हितावल्लाम् पिण्डालौ चोरनामगन्ध-द्रव्ये पु० । ग्रन्थिमति त्रि० ।

ग्रस भक्षणे भ्वा०आत्म०सक०सेट्। ग्रसते अग्रसिष्ट ग्रसित्वा ग्रस्त्वा।

ग्रस भक्षणे वा०चुरा० उभ० पक्षे भ्वा० सक० सेट्। ग्रासयति-ते ग्रसति अजिग्रसत्-त अग्रासीत् अग्रसीत्।

ग्रस्त न० ग्रस-क्त। लुप्तवर्णपदे वाक्यविशेषे, भक्षिते त्रि०।

ग्रह ग्रहणे क्रया० उभ० सक० सेट्। गृह्णाति गृह्णीते अग्राहीत् अग्रहीष्ट।

ग्रह आदाने वा चुरा०उभ०पक्षे भ्वा०पर० सक० सेट्। ग्राहयति ते ग्रहति। अजिग्रहत्-त अग्राहीत्-त अग्रहीत्।

ग्रह पु० ग्रह-अच् सूर्य्यादिषु नवसु। अनुग्रहे, निग्रहे ग्रहणे, रणोद्यमे, बालारिष्टकारकेषु, भूतनादिषु, चन्द्रसूर्य्ययोर्ग्रासे च "तदा सम्भाव्यते ग्रह" इति ज्योतिषम्।

ग्रहण न० ग्रह-भावादौ ल्युट्। स्वीकारे, आदाने, आदरे, करे ज्ञाने, बन्धने चन्द्रसूर्य्ययोर्ग्रासे, इन्द्रिये च।

ग्रहणि(णी) स्त्री० ग्रह-अनि वा ङीप्। स्वनामख्याते रोगभेदे।

ग्रहणीहर न० ग्रहणीं हरति हृ-अच्। लवङ्गे, ग्रहणीरोगहारिणि त्रि०। [ख्यातिमान् दुष्टभेदे।

ग्रहनाथ पु० ग्रहं ग्रहजन्यारिष्टं नाथयति नथ-णिच्-अण्।

ग्रहपति पु० ६त०। सूर्य्ये एवं ग्रहनाथकादयोऽप्यत्र।

ग्रहयाग पु० ग्रहेभ्यो यागः। अरिष्टनिवारणार्थं पुष्ट्यर्थं वा ग्रहोद्देशके यागभेदे।

ग्रहाधार पु० ६त०। ध्रुवनक्षत्रे।

ग्रहवह्नि पु० ग्रहाणां वह्निः। 'कपिलः पिङ्गलो धूमकेतुश्च जठराग्निकः। शिखीच टङ्कश्चैव सप्ततेजा हुताशनः। हुताशनश्च विप्रेयो नवैते ग्रहवह्नय इत्युक्तो सूर्य्यादिक्रमेण वह्निभेदे।

ग्राम पु० ग्रस-मन् आदेशः "विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति हि। स तु ग्राम इति प्रोक्तः शूद्राणां वास एव वा" "तथा शूद्रजनप्रायाः सुसम्पन्नजनपदाः क्षेत्रोपयोगभूमध्ये वसति ग्राम-

संज्ञिकोत्य क्षत्रत्वे विप्रादीनां वासस्थाने, यथा कुटुम्बिनः सर्वेऽप्येकीभूता भवन्ति हि । तथा खराणां सन्दोहो ग्राम इत्यभिधीयते" इत्युक्ते खरभेदे, किञ्चिच्छब्दोपपदे तदर्थसंघाते च यथा शब्द-ग्रामः अर्थग्राम इत्यादि ।

ग्रामगृह्या स्त्री० ग्रह-वाहुलकात् क्यप् । ग्रामवह्निभूतायां सेनायाम् ।

ग्रामणी पु० ग्रामं नयति नी-क्विप् । णत्वम् । नापिते । पत्यौ, प्रधाने च त्रि० । ग्रामगण्यायां वेश्यायां, नीलिकायाञ्च स्त्री० ।

ग्रामता स्त्री० ग्रामाणां समूहः तल् । ग्रामसमूहे ।

ग्रामधर्म्म पु० ग्रामे भवः श्रण् कर्म० । मैथुने व्यवाये ।

ग्रामसुख पु० ग्रामस्य सुखं यत्र । कट्टे ।

ग्रामसृग पु० ६त० । कुक्कुरे ।

ग्रामयाजक पु० ६त० । ग्रामस्य नानावर्णानां याजके अपकृष्ट विप्रे ।

ग्रामान्त न० ६त० । ग्रामस्य समीपस्थे ग्रामनिकटे ।

ग्रामीण पु० ग्रामे भवः खञ् । कुक्कुरे, काके, ग्राम्यशूकरे च ग्रामोद्भवे त्रि० । ग्रामीणस्य प्रथमत इति भाषापरि० नीलिकोपधौ पालङ्कशाके च स्त्री० ।

ग्राम्य त्रि० ग्रामे भवः य । प्राकृते, मूढे, ग्रामभवे, ज्योतिषोक्ते मिथुनादिराशिभेदे "छागमेषवृषाश्वाद्या ग्राम्याः प्रोक्ता इत्युक्तेषु, पशुभेदेषु, अश्लीलव्यञ्जके भण्डादिवाक्ये, च । लतायां नीलिकायाञ्च स्त्री० ।

ग्राम्यकन्द पु०—कर्म० । कन्दभेदे (ग्रामेर ओल) ।

ग्राम्यकर्कटी स्त्री० कर्म० । कृष्माण्डे ।

ग्राम्यकुङ्कुम न० कर्म० । कुसुम्भे । [इत्युक्तेषु सप्तसु पशुषु ।

ग्राम्यपशु पु० कर्म० । "गौर्मेषोऽजो महिषश्च अश्वाश्वतरगर्दभाः"

ग्राम्यवल्लभा स्त्री० ६त० । पालङ्कशाके (पालङ्ग) ।

ग्राम्याश्व पु० कर्म० । गर्दभे ।

ग्रावन् पु० गच्छति गम-ड यः ग्रावनति वन-संभक्तौ क्विप् कर्म० । प्रस्तरे, पर्वते, मेघे च । दृढे त्रि० ।

ग्रास पु० ग्रस–घञ्। पिण्डाकारे अन्नादेः कवले "कुक्कुटाण्डप्रमाणं वा यावद्वा प्रविशेन्मुखम्। एतं ग्रासं विजानीया"दित्युक्ते सुखपूरणयोग्यान्नादौ।

ग्राह पु० ग्रह–भावे घञ्। आदाने, ज्ञाने, ग्रहणे च। कर्त्तरि ण। जलजन्तुभेदे (हाङ्गर)। [त्रि०।

ग्राहक पु० ग्रह–ण्वुल्। श्येनपक्षिणि विपश्चिदि च। ग्रहीतरि

ग्राहिणी स्त्री० ग्रह–णिनि। क्षुद्रदुरालभायाम् (चिरुट) तान्त्रमूलाद्यर्थे, ग्रहीतरि त्रि०।

ग्राहिन् पु० ग्रह–णिनि। कपित्थे। ग्राहके, मलबन्धकारके च

ग्राहिफल पु० ग्राहि मलबन्धकं फलं यस्य। कपित्थवृक्षे।

ग्राह्य त्रि० ग्रह–ण्यत्। ग्रहीतुमुचिते, ग्रहणयोग्ये, उपादेये, स्वीकार्य्ये, ज्ञेये च।

ग्रीवा स्त्री० गृ–व निo। कन्धरायाम्।

ग्रीष्म पु० ग्रस–मन् निo। निदाघे, घर्मजनके आतपादौ तदाधारकाले ज्यैष्ठाषाढ़मासे, ऊष्मणि च तद्वति त्रि०।

ग्रीष्मजा स्त्री० ग्रीष्मे जायते जन–ड। (लोणा आता) लवल्यामु नवमल्लिकायाञ्च।

ग्रीष्मपुष्पो स्त्री० ग्रीष्मे पुष्पं यस्याः। करणपुष्पवृक्षे।

ग्रीष्मभवा स्त्री० ग्रीष्मे भवति भू–अच्। नवमल्लिकायाम्।

ग्रीष्मसुन्दर पु० ७त०। (गिमा) शाकभेदे।

ग्रुच चौर्य्ये गतौ च भ्वा० पर० सक० सेट्। ग्रोचति अग्रुचत्–अग्रोचीत्। ग्रुचित्वा ग्रुक्वा।

ग्रैव न० ग्रीवायां भवम् अण्। ग्रीवाभरणे।

ग्रैवेय न० ग्रीवायां भवं ढञ्। ग्रीवाभूषणे ढकञ् ग्रैवेयकमप्यत्र। "ग्रैवेयकं नोच्चल"मिति साहि०।

ग्लस भक्षणे भ्वा० आत्म० सक० सेट्। ग्लसते अग्लसिष्ट। ग्लसित्वा–ग्लस्वा।

ग्लह आदाने वा चुरा० उभ० पक्षे भ्वा० सक० वेट्। ग्लाहयति ते ग्लहति अजग्लहत् त अग्लहीत्।

ग्लह पु० ग्लह–घ। द्यूतादौ क्लृप्ते पणे, द्यूते च।

ग्लास्नु त्रि० ग्लै–स्नु। ग्लानियुक्ते।

ग्लुच चौर्य्ये गतौ च भ्वा० पर० सक० सेट्। ग्लोचति अग्लुचत्–अग्लोचीत्। क्ङा वेट्। [अग्लुचत्–अग्लुचीत्।

ग्लुञ्च चौर्य्ये गतौ च भ्वा० पर० सक० सेट् क्ङा वेट्। ग्लुञ्चति

ग्लेप दैन्ये गतौ चाले च भ्वा० आत्म० सक० सेट्। ग्लेपते अग्लेपिष्ट। अजिग्लेपत्।

ग्लेष सेवने भ्वा० आ० सक० सेट्। ग्लेषते अग्लेषिष्ट। अजिग्लेषत।

ग्लेष अन्वेषणे भ्वा० आ० सक० सेट्। ग्लेषते अग्लेषिष्ट अजग्लेषत्।

ग्लै क्लमे हर्षक्षये च भ्वा० पर० अक० अनिट्। ग्लायति अग्लासीत्।

ग्लौ पु० ग्लै–डौ। चन्द्रे, कर्पूरे च।

घ

घ पु० घट–ड घण्टायां, घर्घरशब्दे च।

घग्घ हसने भ्वा० पर० अक० सेट्। घग्घति अजघग्घीत्।

घट चेष्टायां भ्वा० आत्म० अक० सेट् घटादि। घटते अघटिष्ट घटयति। घटा।

घट हिंसे सक० सञ्ज्ञातौ अक० चु० उभ० सेट्। घाटयति-ते अजीघटत्-त।

घट द्यूतौ वा चु० उभ० पक्षे भ्वा० पर० अक० सेट्। घाटयति ते घटति। अजीघटत् त अघाटीत् अघटीत्।

घट शब्दकरणे चु रा० उभ० अक० सेट् इदित्। घण्टयति-ते अजघण्ट त्।

घट पु० घट–अच्। कलसे, कुम्भशब्दार्थे परिमाणभेदे च।

घटक त्रि० घटयति स्वविशिष्टतया निरूपयति घट णिच्–ण्वुल्। वाक्यलक्षणादिषु मध्यपातिनि पदार्थे, योजके च।

घटना स्त्री० घट–युच्। संहतकरणे, योजने, मेलने, करिणां समूहे च। [ईश्वरे च।

घटा स्त्री० घट–अ। घटने, सभायां, समूहे, गजसंहतौ, मेघा-

घटिका स्त्री० "गुर्वक्षराणामुदितं च षष्ट्या पत्रं प्रमाणं घटिका

किलके"ति ज्योतिर्विदाभरणोक्ते षष्टिपलात्मके दण्डरूपे काले। घटयति विहितकार्य्यकरणाय घट-णिच्-एवुल्। दण्डद्वयरूपे मुहूर्त्तात्मके काले। अल्पो घटः कन्। खल्पे घटे। स्वार्थे कन्। नितम्बे न०। [काले। अल्पार्थे-ङीप्। क्षुद्रे घटे।

घटी स्त्री०घटेन कालमानज्ञापकेन सच्छिद्रेण कुम्भेन ज्ञाया दण्डात्मके

घटीयन्त्र न० ६त०। कूपादितो जलोद्धारणयन्त्रे अरघट्टे, उद्घाटने; यक्ष्मणीरोगभेदे च।

घटोत्कच पु० हिडिम्बायां राक्षस्यां भीमसेनाज्जाते राक्षसभेदे।

घट्ट चालने भ्वा० आत्म० सक० सेट्। घट्टते अघट्टिष्ट।

घट्ट चालने चुरा० उभ० सक० सेट्। घट्टयति-ते अजघट्टत्-त।

घट्ट पु० घट्यतेऽत्र घञ्। स्नानार्थावतरणस्थाने (घाट) शुल्कग्रहण-स्थाने च। भावे घञ्। चालने।

घट्टजीविन् पु०घट्टं जीवति जीव-णिनि। (पाटुनि) प्रसिद्धे जातिभेदे।

घट्टित त्रि० घट्ट-क्त। निर्म्मिते, चालिते, चित्रपटादेरञ्जनार्थम् अम्ल-चूर्णमण्डेन लिप्ते वसनादौ (कलप दिए धोटा)।

घण दीप्तौ तना० उभ० अक० सेट्। घणोति घणुते। अघाणीत्-अघणीत् अघणिष्ट। घणित्वा—घणट्वा।

घण्टा स्त्री० हन-ट तस्य नेत्त्वम् नि० घः। कांस्यादिनिर्म्मिते वाद्य-भेदे। अतिबलायां, नागबलायां, घण्टापारुल्यौ च।

घण्टाकर्ण पु० घण्टेव कर्णोऽस्य। शिवानुचरभेदे (घेंटु)।

घण्टापथ घण्टोपलक्षितः. घण्टावतां हस्त्यादीनां गमनयोग्यो वा पन्थाः टच्। "दशधन्वन्तरो राजमार्गो घण्टापथः स्मृत" इत्युक्त-परिमाणे नगरप्रधानवर्त्मनि।

घण्टापाटलि पु० हन्यते स्म हन-कर्मणि ट तस्य नेत्त्वम् घत्वं नि०, पट गतौ घञ् पाटस्तं लाति ला-कि कर्म०। (घण्टा-पारुलि) वृक्षभेदे। [फलं पक्वं सत् भक्ष्यायते।

घण्टारवा स्त्री० घण्टेवारौति आ+रु-अच्। (वनयवानी) वृक्षभेदे यस्य

घण्टाली स्त्री० घण्टां तच्छब्दमलति अल-अण् ङीप् । कोषातक्याम् । ६त० । घण्टाश्रेणौ ।

घण्टावीज पु० घण्टेव बीजमस्य । जयपाले वृक्षे ।

घण्टिका स्त्री० क्षुद्रा घण्टा स्वल्पार्थे कन् । क्षुद्रघण्टायां तत्तुल्याकारत्वात् (आलजिव) तालुस्थजिह्वायाम् ।

घण्टेश्वर पु० ब्रह्मदायके मङ्गलस्य मेधानाम्न्यां पत्न्यां जाते पुत्रे ।

घन पु० हन्-अप् घनादेशः । मेघे, मुस्तायां, ओघे, दार्ढ्ये, काठिन्ये, विस्तारे, देहे, लौहमुद्गरे, कफे, अभ्रके, "समविघातश्च घनः प्रदिष्ट" इत्युक्ते सजातीयाङ्गत्रयव्याप्ते न्यूनगुणे च यथा त्रयाणां घनः २७ चतुर्णां ६४ । निविड़े, सान्द्रे, पूर्णे, दृढ़े च त्रि० । कांस्यतालादिवाद्ये, मध्यमन्द्रत्वे लौहे च न० ।

घनकफ पु० घनस्य मेघस्य कफ इव । मेघोपले करके ।

घनच्छद पु० घनो निविडश्छदो यस्य । शिग्रौ ।

घनत्वच् पु० घना निविडा त्वक् यस्य । लोध्रे ।

घनद्रुम पु० कर्म० । विकङ्कटकवृक्षे ।

घननाभि पु० ६त० । धूमे तस्य मेघयोनित्वात् तन्नाभित्वं 'धूमज्योतिः सलिलमरुतां"मिति मेघदूते तद्टीकायां मल्लिनाथोक्तेः ।

घनपत्र पु० घनानि पत्राण्यस्य । पुनर्नवायाम् ।

घनपदवी स्त्री० ६त० । आकाशे तस्य मेघाधारतया तत्सञ्चारस्थानतया च तथात्वम् ।

घनरस पु० घनस्य रसो निष्यन्दः । जले । कर्म० । सान्द्रनिर्यासादौ । कर्पूरे पीलुपर्ण्यां पु० । ब० निविड़रसे त्रि० ।

घनवल्लिका स्त्री० घना निविडा वल्ली । अमृतस्रवालतायाम् ।

घनवल्ली स्त्री० घनस्य मेघस्य वल्लीव । विद्युति । [जले च ।

घनसार पु० घनस्य सार इव शीतलत्वात् । कर्पूरे, दक्षिणावर्त्ते, पारदे,

घनस्कन्ध पु० घनः स्कन्धो यस्य । कोशाम्बवृक्षे ।

घना स्त्री० कटुजटायां मापपर्ण्याम् । [राजपथे हो"ति नैषधम् ।

घनागम पु० घनानां मेघानामागमो यत्र । वर्षाकाले "घनागमे

घनाघन पु० हन–अच् नि०। इन्द्रे वर्षुकमेघे मस्ते–धातुके–गजे, चक्रे, अन्योन्यघट्टने च। निरन्तरधातुके त्रि०।

घनान्तय पु० घनानामन्तयो यत्र काले। वरत्काले।

घनामय पु० घनो दृढ़ः आमयो यस्मात् ५ ब०। रज्जूरत्ने।

घनामल पु० घनोऽमलः विशेषणस०। वास्तुकशाके।

घनोपल पु० ईत०। घनस्य उपल इव संहत्य कठिनत्वात्। करके (शिल)।

घस्व गतौ भ्वा० पर० सक० सेट्। घस्वति अघस्वीत्।

घरट्ट पु० हृ–अच् घरोऽट्टः यस्मात् ५ ब० शक०। (जाँता) "प्रतिहृट्टपथे घरट्टजादि"ति नैषधम्।

घर्घर पु० पुनः पुनः घरति यङ्लुक् अच्। चलद्वारिध्वनौ नदभेदे, द्वारे, स्वरभेदे च। क्षुद्रघण्टिकायाम् स्त्री०।

घर्घरिका स्त्री० घर्घर+अस्त्यर्थे ठन्। क्षुद्रघण्टायाम् वाद्यभेदे। भटधान्ये, नदभेदे च पु०।

घर्ज गतौ भ्वा० पर० सक० सेट्। घर्जति अघर्जीत्।

घर्म्म पु० हृ–मेजे मक् नि० गुणः। श्रमार्त्तस्य गात्रात् निष्यन्दिनि–जले, आतपे, ग्रीष्मे च। [व्रणभेदे।

घर्म्मविचर्चिका पु० घर्मोत्था विचर्चिका। (घामाचि) राजिका क्षतौ

घर्षणाल पु० घर्षणाय अलति पर्य्याप्नोति अल–अच्। शिला-पुत्रके (लोढा)।

घर्षणी स्त्री० घृष–कर्म्मणि ल्युट् ङीप्। हरिद्रायाम्।

घस(स) अदने भ्वा० आत्म० सक० सेट् इदित् घंस(स)ते अघंसि(सि)ष्ट।

घस भक्षणे भ्वा० पर० सक० अनिट्। घसति। अघसत्। घस्ता घस्स्यति।

घस्मर त्रि० घस–क्मरच्। भक्षणशीले।

घस्र पु० घस–रक्। दिवसे। हिंस्रे त्रि०।

घाट पु० चु० घट–अच्। ग्रीवायाः पश्चाद्भागे। तत्रार्थे स्त्री० टाप्। स्वार्थे कन् अत्रैवार्थे।

घाण्टिक पु० घण्टया चरति ठक्। "राज्ञां प्रबोधसमये घण्टाभि-

ल्यास्तु घाण्टिका" इत्युक्तलक्षणेषु राज्ञां प्रबोधनाय घण्टां वादयित्वा स्तुतिपाठकेषु धुत्तूरे च । घण्टावादके त्रि० ।

घात पु० हन—घञ् । प्रहारे, मारणे, अङ्गस्य पूरणे, गुणने च । करणे घञ् । वाणे ।

घातिन् त्रि० हन—तच्छीलार्थे णिनि । हननकरणशीले ।

घातुक त्रि० हन—उकञ् । हिंस्रे, क्रूरेच ।

घार पु० घृ-सेके घञ् । सेचने । [भक्ष्यभेदे (घिओड़) ।

घार्त्तिक पु० घृतेन निर्मितः तस्य विकारो वा ठक् । घृतपूरे

घास पु० घस—कर्मणि घञ् । गवादीनां भक्ष्ये तृणभेदे ।

घिण गृहणे भ्वा० आ० सक० सेट् इदित् । घिण्वते अघिण्विष्ट ।

घु ध्वनौ भ्वा० आत्म० अक० अनिट् । घवते अघोष्ट ।

घुट आवर्त्तने भ्वा० आत्म० सक० सेट् । घोटते अघुटत् अघोटिष्ट ।

घुट प्रतिघाते तु० कुटा० पर०सक० सेट् । घुटति अघुटीत् जुघोट ।

घुट पु० तु० घुट—अच् । चरणग्रन्थौ गुल्फे । ङीन् । तत्रैवार्थे स्त्री० वा ङीप् । स्वार्थे कन् अत्रैवार्थे ।

घुड व्याघाते तु० कु० पर० सक० सेट् घुडति अघुडीत् जुघोड ।

घुण भ्रमणे तु० आत्म० सेट् घोणते अघोणिष्ट ।

घुण भ्रमणे तु० पर० सेट् । घुणति अघोणीत् ।

घुण गृहणे भ्वा० आत्म० सक० सेट् । घुण्वते अघोणिष्ट ।

घुण पु० घुण—क । स्वनामख्याते काष्ठभक्षककृमौ ।

घुण्ट पु० घुट—क नि० मुम् । गुल्फे । स्वार्थे कन् । तत्रैवार्थे ।

घुर ध्वनौ भीमभवने च तु० पर० अक०सेट् । घुरति अघोरीत् ।

घुर्घुर पु० घुरित्यव्यक्तं ध्वनिं घुरति घुर—क । (घुर्घुरिया) कीटभेदे शूकरशब्दे च "न घुर्घुरायित घुरीति मा० श्परि० ।

घुष कान्तौ क्षतौच भ्वा० आत्म० सक० सेट् इदित् । घुंषते अघुंषिष्ट ।

घुष बधे भ्वा० पर० सक० सेट् । घोषति अघुषत् ।

घुष स्तुतौ आविष्करणे च वा चु० उभ० भ्वा० पर० सक० सेट् । घोषयति ते घोषति अजूघुषत् त । अघुषत् ।

घुसृण न० घुस–क्यूच्। कुङ्कुमे "घुसृणैर्यंत जलाशयोदरे" इति नैषधम्।

घूक पु० घू इति कायति कै–क। उलूके पेचके।

घूकारि पु० ई त०। काके तस्य पेचकवैरित्वं लोकप्रसिद्धम्।

घूकावास पु० ई त०। शाखोटवृक्षे तस्य निबिडदृढशाखायुतत्वेन कोटरतुल्यत्वात् दिवाभीरोर्घूकस्यावासस्थानत्वम्।

घूर हिंसायां सक० जीर्णतायाम् अक० दि० आत्म० सेट्। घूर्य्यते अघूरिष्ट। घूर्णः। [घूर्णितः।

घूर्ण भ्रमणे तु० उभ० सक० सेट् घूर्णति ते अघूर्णीत् अघूर्णिष्ट

घृ सेके भ्वा० पर० सक० अनिट्। घरति अघार्षीत्। [घारितः।

घृ सेके चु० उभ० सक० सेट्। घारयति ते अजीघरत् त। घारयिता

घृ भासे अक० सेके सक० जु० पर० अनिट् जिघर्त्ति अघार्षीत्।

घृण दीप्तौ तना० उभ० अक० सेट्। घर्णोति घर्णुते अघर्णीत्।

घृण ग्रहणे भ्वा० आत्म० सक० सेट् इदित्। घृणते अघृणिष्ट।

घृणा स्त्री० घृ–सेके नक्। कारुण्ये, दयायां, जुगुप्सायाञ्च।

घृणि पु० घृ–निन्० गुणाभावः। किरणे, ज्वालायां, तरङ्गे, सूर्य्ये च।

घृत न० घृ–भासे भावे क्त। दीप्तौ। कर्त्तरि क्त। दीप्तेति०। सेकार्थस्य कर्त्तरि क्त। जले, पक्वनवनीते सर्पिषि च न०।

घृतकुमारी स्त्री० घृतप्रधाना कुमारी। स्वनामख्यातायामोषधौ तस्या हि दले दलिते घृतमिव स्रवति।

घृतपूर पु० घृतेन पूर्य्यते पूर–घञ्। पक्वान्नभेदे (घिवोड)।

घृताची स्त्री० अप्सरोभेदे।

घृष संघर्षे सक० हर्षे अक० भ्वा० आत्म० सेट् घर्षते अघर्षिष्ट।

घृष्टि पु० घृष–क्तिच्। वराहे। क्तिन्। घर्षणे, खड्गायां, विष्णुक्रान्तायां, वाराह्याञ्च स्त्री०।

घृष्टिला स्त्री० घृष्टिं लाति ला–क। घृष्टिपर्य्यायाम्। (चाकुलिया)।

घोट(क) पु० घुट–अच् एवुल् वा। अश्वे। [प्रसिद्धः।

घोटकारि पु० ६त०। महिषे, तस्य महिषेण सह वैरिभावश्च लोके

घोणा स्त्री० घुण–अच्। अश्वनासिकायां, नासामात्रे च।

घोणिन् पु० घोणा नासाऽस्त्यस्य ओरादित्वात् इनि। वराहे तस्य दीर्घनासत्वात् तथात्वम्।

घण्टा स्त्री० घुण्टा–ट तस्य नेत्वम्। (सेयाकुल) वदरीभेदे।

घोर पु० घुर–घञ्। शिवे, ऋषिभेदे, सांख्योक्तेषु रजः प्रधानेषु आकाशादिविशेषधर्मेषु। त्रिषे न०। दारुणे, भयानके, दुर्गमे च त्रि०।

घोरराजन पु० घोरं राजनं यद्योऽस्य। गृध्रराजे।

घोरा स्त्री० घुर–अच्। श्वेतदोलतायां, भयानकायां रात्रौ, सांख्योक्तायां राजस्यां मनोवृत्तौ, ज्योतिषोक्ते "रवावृजुगे सङ्क्रमे भास्करस्य भवेद्घोरं" नाम्नीत्युक्ते रविसंक्रान्तिभेदे च।

घोल पु० न० घुड–कर्मणि घञ् डस्य ल। तक्रे मथितदध्नि।

घोष पु० घोषन्ति गावोऽत्र घुष–आधारे घञ्। आभीरपल्ल्याम् भावे घञ्। ध्वनौ, अव्यक्तनादे च। कर्त्तरि अच्। अपामार्गे, व्याकरणोक्ते वर्णविशेषोत्पत्तौ वाह्यप्रयत्नभेदे च। कांस्ये न०।

घोषणा स्त्री० घुष–णिच्–युच्। लोकेख्यापनार्थं सङ्केतैः शब्दकरणे।

घोषा स्त्री० घुष्यते भ्रमरैरियं कर्मणि घञ्। शतपुष्पायां, मधुरिकायां, कर्कटशृङ्ग्यां, कोशातक्यां च।

घ्रा गन्धग्रहणे भ्वा० पर० अक० सेट् गन्धमात्रे सक० अनिट्। जिघ्रति अघ्रात्–अघ्रासीत्। घ्राणः–घ्रातः। [आघ्राते त्रि०।

घ्राण न० घ्रायतेऽनेन घ्रा–ल्युट्। नासिकायाम् घ्रा–क्त।

घ्राणतर्पण पु० घ्राणं नासिकां तर्पयति तृप्–णिच्–ल्यु। सुगन्धौ।

ङ

ङ पु० ङु–ड। विषये, विषयरक्षायाम्।

ङु ध्वनौ भ्वा० आत्म० अक० अनिट्। ङवते अङवीत्।

च

च अव्य० चि–ड। अन्वाचये (एकस्य प्राधान्येनेतरस्यानुषङ्गेणोक्तौ

यथा ग्रामं गच्छ अजाश्चानय अत्र ग्रामगमनमेव मुख्यमजानयनत्वानुषङ्गिकम् । समुच्चये (परस्परापेक्षारहितस्थानेकस्य एकस्मिन् कर्मादौ अन्वये) यथा पिता पुत्रश्च ग्रामं गच्छति । अत्रैकस्मिन् गमने कर्मणि पितुरिव पुत्रस्यापि अन्वयः । इतरेतरयोगे (परस्पर सापेक्षाणामेकस्मिन् कर्मादावन्वये) तत्र च द्वन्द्वसमासएव यथा पितापुत्रौ गच्छतः । अत्रोभयोरपि एकस्मिन् प्रत्येकरूपेण गमने परस्परसापेक्षतयैवान्वयः अन्वाचयादयमेवास्य विशेषः । सापेक्षता च स्वघटितनामोत्तरवर्त्तिविभक्त्यन्वयित्वेन । समाहारे (मिलितानामन्वये) यथा हस्तपादं बाधयति अत्र हस्तादीनां मिलितानामेवान्वयः इतरेतरयोगे तु प्रत्येकस्यान्वयः अथवा सङ्ख्यापदसमुदायोपस्थाप्यतत्तत् पदार्थसंहतिरेव तत्र प्रधानं संहतेरेकत्वात् तत्रैकवचनता । व्यासवाक्ये च चकारेणोभयत्र इतरेतरयोगस्य समाहाररूपसंहतेश्च प्राधान्यं द्योत्यते । पक्षान्तरे, अवधारणे, क्षेपे, तुल्यत्वे, विनियोगे, पादपूरणे च । चण्डेशे, चन्द्रे, कच्छपे, चौरे च पु० । दुर्जने निर्वीजे च त्रि० ।

चक भ्वान्तौ सौ० पर० अक० सेट् इदित् चङ्कति अचङ्कीत् ।

चक प्रतिघाते सक० तृप्तौ अक० भ्वा० उभ० सेट् घटा० । चकति—ते अचकीत्-अचाकीत् अचकिष्ट । चकयति ।

चकास दीप्तौ अदा० जुहो० पर० अक० सेट् । चकास्ति अचकासीत् । अचचकासत् ।

चकित न० चक-भावे क्त । भये, । कर्त्तरि क्त । भीते त्रि० । षोड़शाक्षरपादके छन्दोभेदे स्त्री० ।

चकोर पु० चक—तृप्तौ ओरन् । खनामख्याते—पक्षिभेदे चकोर पारणकरीति सुरारिः ।

चक्क अर्त्तौ चुरा० उभ० सक० सेट् । चक्कयति—ते अचचक्कत्—त ।

चक्र पु० क्रियतेऽनेन कृ—घञर्थे क वा० इत्वम् । चक्रवाके पक्षिणि, (चक्का) रथाङ्गे, (चाका) सैन्ये, समुदाये, राष्ट्रे दम्भ भेदे, कुम्भकारोपकरणे, "कलसे निजहेतुदण्डजः किमु चक्रभ्रमिकारितेति

नैषधम् चक्रभेदे, । पुटभेदे, जलावर्त्ते, यामजाले, तैगरपुष्पे, व्यूहभेदे, तन्त्रोक्तेषु मूलाधारादिषु स्थितेषु षट्सु पद्मेषु, देवार्च्चनयन्त्रेषु, "श्रीचक्रमेतदुदितमि"ति तन्त्रम् । मन्त्रदीक्षोपयोगिषु चक्रडमादिषु, वीरादिचक्रेषु, "प्रवृत्ते भैरवीचक्रे सर्व्वे वर्णा द्विजोत्तमा" इति तन्त्रम् अलङ्कारोक्ते काव्यबन्धविशेषे च न० । अर्च्चादित्वात् द्विलिङ्गत्वेऽपि लक्ष्मभेदेनैवास्य लिङ्गनियमः ।

चक्रक पु० चक्रमिव कायति कै–क । स्वापेक्षायामेक्ष्यपेक्षित्वनिबन्धनेऽनिष्टप्रसङ्गरूपे तर्कभेदे ।

चक्रकारक न० नखाक्षतित्वेन चक्रवत् वेष्टनं करोति कृ–ण्वुल् ६त० । व्याघ्रनखाख्ये गन्धद्रव्ये ।

चक्रकुल्या स्त्री० चक्रस्य तद्वद्वेष्टनाकारस्य कुल्येवाधारः । (चाकुलिया) पृश्निपर्ण्याम् । [(दादमर्दन)।

चक्रगज पु० चक्रे चक्राकारे दद्रुरोगे गजइव मर्द्दकत्वात् । चक्रमर्द्दे ।

चक्रगुच्छ पु० चक्रमिव वेष्टनाकारो गुच्छः स्तवको यस्य । अशोकवृक्षे ।

चक्रधर पु० चक्रमस्त्रभेदं फणामण्डलं वा धारयति धृ–अच् । विष्णौ, सर्पे च ।

चक्रधारा स्त्री० चक्रस्य धारामम् । चक्राग्रे यदंशेऽस्य तीक्ष्णता सा चाग्रे एवेत्यग्रमेव धारा । [गन्धद्रव्ये ।

चक्रनख पु० चक्राकारो नखइव क्षुभ्रादि० न णत्वम् । व्याघ्रनखाख्ये ।

चक्रपद्माट पु० पद्मं पद्मवनमटति अण् । पद्माटोगजवच्चक्रे चक्राकारे दद्रुरोगे पद्माटः गजइव मर्द्दकत्वात् । चक्रमर्दे वृक्षे (दादमर्दन)।

चक्रपर्णी स्त्री० चक्रमिव पर्णमस्याः ङीप् । (चाकुलिया) पृश्निपर्ण्याम् ।

चक्रपाणि पु० चक्रं प्रहरणं पाणौ यस्य । विष्णौ ।

चक्रपाद् पु० चक्रं पाद इव गतिसाधनत्वात् यस्य । रथे चक्रमिव पादोऽस्य । हस्तिनि ।

चक्रपुष्करिणी स्त्री० हरिचक्रेण निखाता पुष्करिणी । काशीनीथस्थे मणिकर्णिकाख्ये चक्रतीर्थे । [र्थोगः ।

चक्रबन्ध पु० चक्रयोः मेलकत्वात् बन्धुरिव । सूर्य्ये दिवाहि तयो

चक्रभेदिनी स्त्री० चक्रौ भिनत्ति परस्परं वियोजयति भिद्-णिनि। रात्रौ तत्र हि तयोर्वियोगः लोकप्रसिद्धः।

चक्रभ्रम पु० चक्रमिव भ्रमति अच्। कुन्दाख्ये शिल्पिनां यन्त्रभेदे।

चक्रमर्द पु० चक्रं चक्राकारं दद्रुरोगं मृद्नाति-मृद्-अण्। (दादमर्दन) नृपभेदे। ण्वुल्। चक्रमर्दकोऽप्यत्र।

चक्रला स्त्री० चक्रं रोगभेदं लाति ला-क। उच्चटायाम् सुस्तामेदे।

चक्रवर्त्तिन् पु० चक्रे भूमण्डले, वर्त्तितुं, चक्रं सैन्यचक्रं वा सर्वभूमौ वर्त्तयितुं शीलमस्य इत-णिच् वा णिनि। समुद्रपर्य्यन्तक्षितेरधीश्वरे, शास्त्रकथायाञ्च। चक्रवत् वर्त्तिनि त्रि०। जतुकायां जटामांस्यां अलक्तके च स्त्री० ङीप्।

चक्रवाक पु० चक्रशब्देन उच्यते वच-परिभाषणे कर्म्मणि घञ्। स्वनामख्याते खगे। [मण्डले न०।

चक्रवाडला पु० चक्रमिव वाड़ते वेष्टयति अच्। लोकालोकपर्वते।

चक्रवृद्धि स्त्री० "वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृते"ति स्मृत्युक्ते वृद्धिभेदे (सुदेर सुद)। [मण्डलाकारे सैन्यस्थापने।

चक्रव्यूह पु० चक्रमिव व्यूहः सैन्यस्थितिरचनाविशेषः। युद्धार्थे

चक्रा स्त्री० चक्र-टाप्। नागरमुस्तायां, कर्कटशृङ्ग्याञ्च।

चक्राङ्ग पु० चक्रस्याङ्गमङ्गं चक्रमिवाङ्गं यस्य। हंसे। चक्रमङ्गमस्य। रथे। [मञ्जिष्ठायाञ्च।

चक्राङ्गा स्त्री० चक्रं चक्राकारमङ्गमस्याः। कटुरोहिण्यां, क्षिलभोचिकायां,

चक्रिन् पु० चक्र+अस्त्यर्थे इनि। विष्णौ, सर्पे, चक्रवाके, कुम्भकारे, सूचके, तैलिकभेदे चक्रवर्त्तिनि, चक्रमर्दे व्यालनखे, खरे, श्यामजालिके च। चक्रवति त्रि०। [गर्दभे, नटभेदे च।

चक्रीवत् पु० चक्रवत् भ्रमणमस्यास्ति मतुप् मस्य वः नि० अत इत्त्वम्।

चक्ष कथने त्यागे च अदा० आत्म० सक० सेट्। चष्टे। अख्यत् अख्यत भाव्यते अकृशासीत् अक्ष्यास्त। त्यागे तु समचक्षिट।

चक्षण न० चक्ष-ल्यु, न ख्यादेशः। मद्यपानरोचके आदंशे (चाकन)

चक्षुःश्रवस् पु० चक्षुषा शृणोति श्रु—असुन् चक्षुरेव श्रवः कर्णो यस्य वा। सर्पे।

चक्षुष्य पु० चक्षुषे हितः यत्। कैतके, पुण्डरीकवृक्षे, शोभाञ्जने, रसाञ्जने च। सौवीराञ्जने, स्वलपद्मे, खर्परीतृणे च न०। प्रियदर्शने, चक्षुर्हिते च त्रि०। कुलत्थिकायां, सुभगायाम्, अजशृङ्ग्याम्, वनकुलत्थिकायाञ्च स्त्री०।

चक्षुस् न० चक्ष—उसि शिच्च तेन न ख्यादेशः। लोचने।

चक्ष घातने स्वादि० पर० सक० सेट्। चक्ष्णोति अचक्षीत् अचाक्षीत्।

चङ्क्रम पु० सौ० चकि उरच्। रथे, वृक्षे च। यानमात्रे न०।

चङ्क्रमण न० क्रम—यङ्—ल्युट्। पुनःपुनर्भ्रमणे, अतिशयभ्रमणे, इतस्ततो भ्रमणे, कुटिलभ्रमणे च।

चञ्चरी स्त्री० चन्च—गतौ यङ् तं लाति ला—क रस्य लः चञ्च+अस्त्यर्थे र वा गौरा० ङीष्। भ्रमर्य्यां, तिन्तिडीवृक्षे च।

चञ्चरीक पु० चर—ईकन् पर्षरीकादित्वात् नि०। भ्रमरे।

चञ्चल पु० चन्च—अलच् चञ्चं गतिं वा लाति ला—क वा। कामुके, वायौ च। चपले, अस्थिरे च त्रि०। विद्युति, लक्ष्म्याञ्च स्त्री०।

चञ्चा स्त्री० चन्च—अच्। नलनिर्म्मिते कटभेदे (चाँच) चञ्चेवेति स्वार्थे कन् "लुप् मनुष्ये" इति तस्य लुप्। तृणमयपुरुषे।

चञ्चु पु० चन्च—उ। एरण्डके, रक्तैरण्डे, नाड़ीचक्राके च। पक्षिणामोष्ठे (ठोट)। अत्र वा ऊङ् इत्येके। चञ्वूः।

चञ्चुसूचि पु० स्त्री० चञ्चुः सूचिरिव यस्य। कारण्डवपक्षिणि स्त्रीत्वपक्षे वा ङीप्। अत्रैव।

चट भेदे भ्वा० पर० सक० सेट्। चटति अचटीत्—अचाटीत्।

चट बधे भेदे च पु० उभ० सक० सेट्। चाटयति ते अचीचटत्—त।

चटक पु० चटति भिनत्ति धान्यादिकम् कुन्। कलविङ्के (चड़ुई) स्वार्थे कन् चटककोऽप्यत्र। जातौ स्त्रियामजादित्वात् टाप् न तु ङीप्। कन्पक्षे चटकिका।

चटकाशिरस् पु० चटकायाः शिर इव। पिप्पलीमूले।

चटु पु० चट–कु। प्रियवाक्ये, प्रतिनामासनभेदे, उदरे च। स्त्रीत्वमपीत्यन्ये।

चटुल त्रि० चट–उलच्। चञ्चले, चपले। विद्युति स्त्री०।

चड कोपे भ्वा० आत्म० अक० सेट् इदित्। चण्डते अचण्डिष्ट।

चड कोपे चुरा० उभ० अक० सेट् इदित्। चण्डययि ते अचण्डत् त। [चाण्डयति।

चण शब्दे भ्वा० पर० सक० सेट्। चणति अचाणीत्–अचणीत्।

चण गतौ हिंसे च भ्वा० पर० सक० सेट् वा घटा०। चणति अचाणीत् अचणीत्। चणयति–चाणयति।

चण दाने भ्वा० पर० अक० सेट् घटा०। चणति अचणीत्–अचाणीत्। चणयति। [गोत्रापत्यं चाणक्यः।

चणक पु० चण–दाने कन्। शस्यभेदे (बुट) (छोला) क्षुद्रभेदे च यस्य

चण्ड पु० चडि–कोपे–अण्। तिन्तिडीवृक्षे, यमदूते, दैत्यभेदे च। तीक्ष्णे न०। तीक्ष्णतावति कोपने च त्रि०। स्त्रियां ङीप्। चण्डी। "मल्लिकासुकुले चण्डी"त्युद्भटः।

चण्डा पु० चडि–अच् टाप्। चोरनामगन्धद्रव्ये, शङ्खपुष्प्याम् लिङ्गिनीलतायां, कपिकच्छ्वां, आखुपर्ण्यां, श्वेतदूर्वायां, पद्मावती नद्याञ्च।

चण्डांशु पु० चण्डा तीव्रा अंशवो यस्य। सूर्य्ये।

चण्डात पु० चण्डमतति अत–अच्। करवीरे।

चण्डातक पु०न० चण्डां कोपनामतति अत–ण्वुल्। वरस्त्रीणा मद्यैरुपर्यन्ते वस्त्रे। [ब्राह्मण्यामुत्पादिते सङ्कीर्णवर्णे

चण्डाल पु० चडि–आलच्। स्वनामख्याते जातिभेदे, शूद्रेण

चण्डिमन् पु० चण्डस्य भावः इमनिच्। उग्रत्वे।

चण्डी स्त्री० चडि–अच् वङ्कादित्वात् ङीप् कोपवत्यां, दुर्गायां तन्माहात्म्ययुक्तत्वात् सप्तशतीनामके ग्रन्थेच "चण्ड्राः गताड्डिति" पाठादिति ड्डतिः।

चण्डीकुसुम पु० चण्डीप्रियं कुसुमं यस्य। रक्तकरवीरवृक्षे।

चत याचने भ्वा० उ० द्विक० सेट् । चतति–ते अचतीत् अचतिष्ट ।

चतुःपत्री स्त्री० चत्वारि चत्वारि पत्राण्यस्याः । क्षुद्रपाषाणभेदे ।

चतुःपर्णी स्त्री० चत्वारि चत्वारि प्रतिपर्वं पर्णान्यस्याः । क्षुद्राल्लिकायाम् (आमरुल) ।

चतुःफला स्त्री० चतुर्धा विभक्तं फलमस्याः । नागबलायाम् ।

चतुःशाला न० चतस्रः अन्योन्याभिमुख्यः शाला यत्र । अन्योन्याभिमुखगृहचतुष्कयुतभवने, "एकशाले चतुःशाले, दुर्भिक्षे इति ज्योतिषम् ।

चतुःसम न० चत्वारि समानि यत्र । "लवङ्गं जीरकं पथ्या यमानी च चतुःसममित्युक्ते लवङ्गादितुल्यचतुर्द्रव्यात्मके औषधे, कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य तु । कुङ्कुमस्य त्रयश्चैव शशिनश्च चतुःसम मित्युक्तेषु मिलितेषु तत्तत्परिमाणान्वितकस्तूरीचन्दनकुङ्कुमकर्पूरेषु च । वा सत्वे चतुःसममप्युभयत्र ।

चतुर् त्रि० ब० व० चत–उरुन् । चतुःसंख्यायाम्, चतुःसंख्यान्विते च । स्त्रियां चतस्रः । [नेत्रगोचरे च त्रि० ।

चतुर पु० चत–उरच् । कस्तिशालायाम् । कार्य्यकुशले, दक्षे

चतुरङ्ग न० चत्वारि अङ्गानि यस्य । हस्त्यश्वरथपदातिरूपाङ्गचतुष्टययुते सैन्ये । रक्तहरितपीतश्यामलरूपाणि चत्वारि बलरूपाणि क्रीड़ासाधनान्यङ्गान्यस्य । (चतुराजी क्रीड़ाभेदे ।

चतुरङ्गुला स्त्री० चतस्रोऽङ्गुल्यः प्रमाणमस्य पर्वणः अच्समा० । आरग्वधे (सोन्दाल) ।

चतुरश्र त्रि० चतस्रः अश्रयः कोणाः यस्य सुतप्रातेत्यादि नि० । चतुष्कोणे, ज्योतिषोक्तयोः लग्नाच्चतुर्थाष्टमस्थानयोश्च । दन्त्यगर्भं चतुरस्रमित्यन्ये । [मुखादयोऽत्र ।

चतुरानन पु० चत्वारि आननानि यस्य । ब्रह्मणि एवं चतु

चतुर्थ त्रि० चतुर्णां पूरणः । येन चतुः संख्या पूर्य्यते तादृशे तुरीये ।

चतुर्थांश पु० चतुर्थोऽंशः । चतुर्भागैकभागे पादे, "चतुर्थांशहराः कला" इति स्मृतिः ।

चतुर्थी स्त्री० चन्द्रस्य चतुर्थकलायाः प्रवेशनिर्गमनरूपक्रियात्मकतिथौ । व्याकरणोक्तेषु ङे भ्याम् इति प्रत्ययेषु च ।

चतुर्दन्त पु० चत्वारो दन्ता अस्य । ऐरावते इन्द्रगजे ।

चतुर्दशन् त्रि० ब० व० । चतुरधिका दश । संख्याभेदे तत्संख्याते पदार्थे च । तत्संख्यापूरणे तु डट् । चतुर्दशः स्त्रियां चतुर्दशी । चन्द्रस्य चतुर्दशकलाक्रियायां चतुर्दशी ।

चतुर्दोल न० चतुर्भिर्वाह्यते यत्तु चतुर्दोलं तदुच्यते इत्युक्ते द्विपदैश्चतुर्भिर्वाह्ये यानभेदे (चौदोल) ।

चतुर्द्धा अव्य० चतुःप्रकारम् धाच् । चतुःप्रकारे ।

चतुर्भद्र न० चत्वारि भद्राणि धर्मार्थकाममोक्षरूपाणि कल्याणानि अन्यूनातिरेकेण समाहृतानि । मिलिते धर्मादिचतुष्टये ।

चतुर्भुज पु० चत्वारो भुजा हस्ता अस्य । नारायणे ।

चतुर्युग न० चतुर्णां युगानां समाहारः पात्रादित्वाच्च ङीप् । सत्रेतादापरकलिरूपयुगचतुष्टये "विज्ञेयं तच्चतुर्युगमिति मनुः ।

चतुर्वर्ग पु० चतुर्णां धर्मार्थकाममोक्षाणां वर्गः समुदायः । धर्मार्थकाममोक्षेषु चतुर्षु पुरुषार्थेषु ।

चतुर्विंशति स्त्री० चतुरधिका विंशतिः । (चब्विश) चतुर्युतविंशतिसंख्यायाम्, तत् संख्याते च ।

चतुर्विद्य पु० चतस्रो विद्या वेदज्ञानरूपा यस्य । चतुर्वेदवेत्तरि । प्रज्ञाद्यणि द्विपदवृद्धिः । चातुर्विद्योऽयत्र ।

चतुर्विधशरीर न० कर्म० । जरायुजाण्डजस्वेदजोद्भिज्जेषु शरीरेषु । चतुर्विधशरीराणि धृत्वा मुक्त्वा सहस्रश इति ।

चतुर्व्यूह पु० सृष्ट्यादिकार्यार्थं चत्वारो व्यूहा विभागा यस्य । वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धात्मके विष्णौ । [चतुष्टे ।

चतुष्क न० चतुर्भिः स्तम्भैः कायति कै-क । चतुःस्तम्भयुक्तमण्डपे । कन् चतुष्टय त्रि० चत्वारोऽवयवा विधा अस्य तयप् । चतुर्विभागवति चतुष्के च । स्त्रियां ङीप् "प्रवृत्तिरासीच्छन्दानां चरितार्थां चतुष्टयी"ति कुमारः । [(छतुनी) शाकभेदे ।

चतुष्पत्नी स्त्री० चत्वारि चत्वारि प्रत्येकपत्ने पत्न्यश्यस्याः ङीप् ।

चतुष्पथ पु० चत्वारः पन्थानः ब्रह्मचर्यादयः आश्रमा यस्य अच् समा० । ब्राह्मणे । चतुर्णां पथां समाहारः अच् । (चौमाथा) चतुर्मुखे पथि ।

चतुष्पद् पु० चत्वारि पदानि चरणा यस्य । गवादौ पशौ । ज्योतिषोक्ते करणभेदे, मेषवृषसिंहधनुरन्त्यार्द्धमकरपूर्व्वार्द्धरूपराशिभेदे च । पादशब्दस्य पाद्भावे चतुष्पादप्यत्र ।

चतुष्पदी स्त्री० चत्वारः पादा अस्याः पादस्य पाद्भावे ङीपि पद्भावः । चतुश्चरणात्मके पद्ये । चतुष्पाद्विकावाम् ।

चतुष्पर्णी स्त्री० चत्वारि चत्वारि प्रतिपर्ण पर्णान्यस्याः । (आमरुल)

चतुस्त्रिंशत् त्रि० चतुरधिका त्रिंशत् । चतुरधिकायां त्रिंशति (चौतिश) तत्संख्याते च चतुश्चत्वारिंशदादयोऽप्येवम् ।

चत्वर न० चत-क्वरच् । स्थण्डिले, यागार्थं संस्कृतभूमौ, अङ्गने च (उठान) । [(चल्लिश) संख्याभेदे तत्संख्याते च ।

चत्वारिंशत् स्त्री० चत्वारि दशतः परिमाणमस्य नि० ।

चत्वाल पु० चत-वालच् । होमकुण्डे, दर्भे च ।

चद् याचने भ्वा० उभ० सक० सेट् । चदति-ते अचदीत् ।

चद् आह्लादे दीप्तौ च भ्वा०पर०अक० सेट् इदित् चन्दति अचन्दीत् ।

चन हिंसायां अद्मार्तिघाते च भ्वा० पर०सक० सेट् घटा० चनति । अचानीत्-अचनीत् । चनयति । [चानयति ।

चन शब्दे तुदा० पर० अक० सेट् । चनति । अचानीत्-अचनीत् ।

चन अव्ययचन-शब्दे-अच् । असाकल्ये यथा किञ्चन । अप्यर्थे च ।

चन्च गतौ भ्वा० पर० सक० सेट् । चञ्चति अचञ्चीत् "चञ्चङ्गुजञ्जमिते"ति वेणी० । [ओषधिभेदे च ।

चन्दन चदि-णिच्-ल्यु । मलयजाते गन्धसारे, रक्तचन्दने, वानरभेदे,

चन्दनधेनु स्त्री० चन्दनेनाङ्किता धेनुः । "पतिपुत्रवती नारी म्रियते भर्त्तुरग्रतः । चन्दनेनाङ्किता धेनुस्तस्याः स्वर्गाय दीयते इति स्मृत्युक्तायां चन्दनाङ्कितायां देयधेन्वाम् ।

चन्दनपुष्प न० चन्दनस्येव पुष्पमस्य । लवङ्गे ।

चन्द्र पु० चदि-रक् । इन्दौ, मृगशिरानक्षत्रे, कर्पूरे, काम्पिल्ले, हीरके, जले, काम्ये, सुन्दरे, कृष्णवर्णे मयूरचन्द्रके, शोणसुक्षाफले च । आह्लादकद्रव्ये त्रि० स्वर्णे, शुक्ले च न० ।

चन्द्रक पु० चन्द्र इव कायति कै-क इवार्थे कन् वा । मयूरस्य पक्षस्थिते चन्द्राकृतौ पदार्थे, मत्स्यभेदे (चांदा) शिशुबीजे, शुभ्रमरिचे च ।

चन्द्रकला स्त्री० ६त० । चन्द्रस्य षोड़शे भागे, वृद्धिह्रासभेदे च ।

चन्द्रकान्त पु० चन्द्रः कान्तोऽभीष्टो यस्य । खनामख्याते मणिभेदे तद्दर्शने हि तस्य जलस्रावात् तत्कान्तत्वम् । कैरवे, श्वेतचन्दने च न० । रात्रौ, ज्योत्स्नायां, चन्द्रघोषायां, चन्द्रपत्न्याञ्च स्त्री० ।

चन्द्रकान्ति न० चन्द्रस्येव कान्तिरस्य शुभ्रत्वात् । रजते रूप्ये, ६त० चन्द्रस्य दीप्तौ । [मयूरे ।

चन्द्रकावत् पु० चन्द्रक+अस्त्यर्थे मतुप् मस्य वः संज्ञायां पूर्वपददीर्घः ।

चन्द्रकिन् पु० चन्द्रक+अस्त्यर्थे इनि । मयूरे ।

चन्द्रकूट पु० कामरूपस्थे पर्वतभेदे ।

चन्द्रगुप्त पु० प्रकृतनन्दस्य सुरानाम्न्यां दास्यां जाते चाणक्येन योगानन्दं सपुत्रं हत्वा कृतराज्याभिषेके राजभेदे ।

चन्द्रपुष्पी स्त्री० चन्द्र इव शुभ्रं पुष्पमस्या' । श्वेतकण्टकार्य्याम् ।

चन्द्रबाला स्त्री० चन्द्रस्य कर्पूरस्य बालेव तुल्यगन्धित्वात् । स्थूलैलायाम् । अत्यन्तयमध्य इत्यन्ये ।

चन्द्रभागा स्त्री० काश्मीरदेशस्थे नदीभेदे ।

चन्द्रमण्डल न० ६त० । चन्द्रस्य मण्डलाकारे बिम्बे ।

चन्द्रमस् पु० चन्द्रमाह्लादं निर्मीतेऽसि असिमादेशः चन्द्रं कर्पूरं माति तुलयति मा-असि वा । चन्द्रे ।

चन्द्रमौलि पु० चन्द्रो मौलौ यस्य । चन्द्रशेखरे शिवे ।

चन्द्रवल्लरी स्त्री० ६त० । सोमलतायाम् ।

चन्द्रवल्ली स्त्री० चन्द्र इव वल्ली सुधातुल्यमधुस्रावित्वात्। माधवीलतायाम्

चन्द्रव्रत न० चन्द्रस्य चन्द्रलोकप्राप्तये व्रतम् नियमः। चान्द्रायण-संज्ञके व्रते।

चन्द्रशाला स्त्री० चन्द्रः शालेवाधारो यस्याः। ज्योत्स्नायाम्। चन्द्र इवाह्लादिका शाला। प्रासादोपरिस्थे गृहे (चिलेघर)। स्वार्थे कन् तत्रैव। [पर्वतभेदे च।

चन्द्रशेखर पु० चन्द्रः शेखरं शिरोभूषणं यस्य। शिवे पूर्वदेशस्थे

चन्द्रसम्भव पु० सम्भवत्यस्मात् सम्भवः चन्द्रः सम्भवो यस्य। बुधे एवं सोमसुतादयोऽप्यत्र। नर्म्मदायां, स्थूलैलायाञ्च स्त्री०।

चन्द्रहास पु० चन्द्र इव हासः प्रभाऽस्य चन्द्रं हसति वा क्षिपत्वात् अण् वा। खड्गे। रौप्ये न० गुडूच्यां स्त्री०।

चन्द्रा स्त्री० चदि-रक्। एलायां, चन्द्रातपे च (चान्दोग्या)।

चन्द्रातप पु० चन्द्रस्य आतपो गमनं ततः पाति पा-क। (चान्दोग्या) विताने चन्द्रस्य आतप इव किरणः। ज्योत्स्नायाम्।

चन्द्रापीड पु० चन्द्र आपीड़ः शिरोभूषणं यस्य। शिवे, तारापीड़सुते नृपभेदे च।

चन्द्रिका स्त्री० चन्द्रः स्वाश्रयत्वेन अस्त्यस्याः ठन्। ज्योत्स्नायां, स्थूलैलायाम्, कर्णस्फोटायाम्, त्रयोदशाक्षरपादके छन्दोभेदे च।

चन्द्रिकाद्राव पु० चन्द्रिकया द्रावोनिष्पन्दो यस्य। चन्द्रकान्तमणौ।

चन्द्रिकापायिन् पु० चन्द्रिकां पिबति पा-णिनि। चकोरपक्षिणि।

चन्द्रेष्टा स्त्री० चन्द्र इष्टो यस्याः उत्पललतायाम् उत्पलिन्याम्।

चन्द्रोपल पु० चन्द्रप्रियः उपलः। चन्द्रकान्तमणौ।

चप चूर्णीकरणे चु० उभ० सक० सेट् घटा०। चपयति-ते अचीचपत्-त। चिधातोरेव स्वार्थे णिजित्यन्ये।

चप सान्त्वने भ्वा०पर०सक०सेट्। चपति अचापीत्-अचपीत्। चपयति

चप गतौ चु० उभ० सक० सेट् इदित्। चम्पयति ते अचचम्पत् त।

चपल पु० चप-णिच् घञ् चपं सान्त्वनं लाति ला-क। पारदे, सीसे, चोरनामगन्धद्रव्ये, प्रस्तरभेदे, राजमाषे च। तरले, चञ्चले, क्षणिके,

विकले, दुर्विनीते च त्रि० लक्ष्म्यां विद्युति, पुंस्त्व्याम्, पिप्पल्यां, विजयायां, मदिरायां, जिह्वायां, आर्य्याभेदे च स्त्री०।

चपेट पु० चप-घञर्थे क चपाय सान्त्वनाय इटति गच्छति इट-क। विस्तृताङ्गुलिके हस्ते प्रतले (चापड़) स्त्रीमपीष्यते। खण्डिकोपाध्यायः शिष्याय चपेटां ददातीति भाष्यप्रयोगात्। स्वार्थे कन् अत्रैवार्थे। [चम्नोति अचमीत्। चमित्वा-चान्त्वा।

चम भक्षणे भ्वा० स्वादि० च पर० सक० सेट्। चमति आचामति विचमति

चमत्कार पु० चमदित्यव्यक्तं क्रियते कृ-घञ्। लोकातीतवस्तु दृष्ट्वा चित्तस्य आनन्दहेतौ प्रकाशे विस्मये, अपामार्गवृक्षे च।

चमर पु० चम-अरच्। महिषाकृतौ मृगभेदे, यस्य पुच्छेन चामराख्यं व्यजनं भवति, दैत्यभेदे च। जातौ स्त्रियां ङीप् चमरी। चमरव्यजने चामरे न०। [काञ्चनारे च।

मरिक पु० चमरमिव पुष्पमस्त्यस्य ठन्। कोविदारवृक्षे रक्त-

चमस पु० न० चम-असच्। काष्ठजाते यज्ञिये पात्रभेदे, सोमरसपानपात्रे च। पिण्डकभेदे लड्डुके च पु०।

चमीकर पु० कृतस्वराभिधे स्वर्णस्योत्पत्तिस्थाने यद्योगात् स्वर्णं चामीकरमित्युच्यते।

चमू स्त्री० चम-ऊ। सेनामात्रे (गजाः ७२८, रथाः ७२८ अश्वाः २१८७, पदातयः ३६४५), एतत्संख्याभेदान्विते सैन्यभेदे च।

चमूरु पु० चम-ऊरच्। मृगभेदे, कोविदारवृक्षे च। चारु चमूरु चर्म्मणेति माघः। [फलभेदे न० (चाँपाकला)।

चम्पक पु० चपि-गतौ कुन्। (चाँपा) इति नामके वृक्षभेदे कदली-

चम्पकमाला स्त्री० ६त०। स्वर्णचम्पकैः निर्म्मितायां स्त्रीणां कण्ठाभरणे (चांपाकला) दशाक्षरपादके पङ्क्तिच्छन्दोभेदे च।

चम्पकरम्भा स्त्री० चम्पक इव रम्भा। स्वर्णकदल्याम्।

चम्पकोष पु० चपि [illegible] मनसे तस्य [illegible] कोषोभच्छते।

चम्पा स्त्री० चपि-अच् । नगरीभेदे नदीभेदे तीर्थभेदे कर्णस्य भार्य्यायाञ्च ।

चम्पाधिप पु० ६त० । कर्णे ।

चम्पावती स्त्री० चम्पा+मतुप् मस्य व । कर्णराजधान्यां नगर्य्याम् ।

चम्पू स्त्री० "गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते" इत्युक्ते काव्यभेदे ।

चम्ब गतौ भ्वा० पर० सक० सेट् चम्बति अचम्बीत् ।

चय गतौ भ्वा० आ० सक० सेट् । चयते अचयिष्ट ।

चय पु० चि-अच् । प्राकारमूले प्राकाराधारवेदिकायाम्, समूहे समाहृतौ । [पुष्पादेर्हृत्वादितो यत्वेण च ।

चयन न० चि-ल्युट् । इष्टकादीनामूर्द्धाधोनयनरूपे रचनाभेदे.

चर गतौ भ्वा० पर० सक० सेट् । चरति अचारीत् ।

चर संशये चुरा० उभ० सक० सेट् । चारयति-ते अचीचरत् त ।

चर पु० चर-अच् । स्वपरराष्ट्रवृत्तान्तज्ञानार्थं राजनियोगेन इतस्ततो भ्रमणकर्त्तरि चारे प्रणिधौ, कपर्दके, ज्योतिषोक्तेषु मेषकर्कटतुलामकरराशिषु च । स्वातिपुनर्वसुश्रवणादिनिकरूपे नक्षत्रभेदे सोमवारे च न० । चले जङ्गमे त्रि० ।

चरक पु० चर-कुन् स्वार्थे कन् वा । चारे राजदूते, पर्यटे भिक्षौ, वैद्यकशास्त्रकर्त्तरि मुनिभेदे तत् कृते तच्छास्त्रके ग्रन्थे च । देवाकर्ण्य सुश्रुतेन चरकस्योक्तेन जानेऽखिलमिति नैषधम् ।

चरण पु० न० । चर-करणे ल्युट् । पादे, वेदैकदेशे शाखारूपे ग्रन्थे, तदध्येतरि जने, गोत्रे च । भावे ल्युट् । गतौ, भक्षणे, आचारे, शीले च न० ।

चरणग्रन्थि पु० ६त० । गुल्फे ।

चरणायुध पु० चरणाभ्यामायुध्यति आ+युध-क । कुक्कुटे ।

चरणव्यूह पु० चरणानां वेदशाखानां व्यूहो विशेषेणोक्तिरूपणं यत्र । व्यासकृते ग्रन्थभेदे ।

चरम त्रि० चर-अमच् । अन्ते अवसाने, पश्चिमे च ।

चरमाचल पु० चरमः पश्चिमः अचलः कर्म० । अस्ताचले । चर-

चराचर न० चर—अच् नि० । जगति । समा० द्व० । जङ्गमेऽजङ्गमे एक

चरित(त्र) द० चर—क्त (इत्र वा) । अनुष्ठाने, सञ्चारे, व्रतकर्मादौ चेष्टिते, लीलादौ च ।

चरु पु० चर—उ । हव्यान्ने, होमार्थं पाच्यान्ने, "अनास्रावितानल-रूप्यपाकौदनश्चरुरिति याज्ञिकाः । चरुपाकपात्रेभाण्डे च ।

चर्च अध्ययने चुरा० उभ० सक० सेट् । चर्चयति-ते अचच—चर्च्—त । चर्चितः चर्चा ।

चर्च उक्तौ भक्षणे च तु० पर० सक० सेट् । चर्चति अचर्चीत् ।

चर्चरी स्त्री० चर्च—अरन् गौरा० ङीष् । गीतिभेदे, कुटिलकेशे, हर्षक्रीड़ायाम्, साटोपवाक्ये, छन्दोभेदे च ।

चर्चा स्त्री० अर्च—अ । विचारे, चिन्तायां, चन्दनादिना देहलेपने च ।

चर्चित त्रि० चर्चा जातास्य इतच् । चन्दनादिना कृतगात्रानुलेपने ।

चर्व गतौ भक्षणे च भ्वा० पर० सक० सेट् । चर्वति अचर्वीत् ।

चर्मकार पु० चर्म तन्मयं पादुकादिकं करोति कृ—अण् । चामार पादुकाकारे एवं चर्मकृदादयोऽप्यत्र ।

चर्मगवती स्त्री० चर्मास्त्यस्याम् मतुप् नि० । नदीभेदे ।

चर्मदण्ड पु० चर्मणा कृतोदण्डः । कशायाम् (कोड़ा) ।

चर्मन् न० चर-मनिन् । रक्तवरायां लतौ, इन्द्रियभेदे येन स्पर्श-उपलभ्यते तस्मिन् "शरीरावरकं शस्त्रं चर्म इत्यभिधीयते" इत्युक्ते (ढाल) फलके च ।

चर्मपादुका स्त्री० चर्मनिर्मिता पादुका । उपानद्दे (जुता) ।

चर्मप्रभेदिका स्त्री० प्रभिनत्ति प्र+भिद्-ण्वुल् इत० । चर्मरे-धनेऽस्त्रभेदे ।

चर्मप्रसेविका स्त्री० चर्मणा प्रसीव्यते सिव—ण्वुल् । अग्नि सन्दीप-नार्थं चर्मणा प्रसीव्यते भस्त्यानाग्नि यन्त्रे ।

चर्मिन् पु० चर्म—फलकमस्त्यस्य व्रीह्यादित्वादिनि । फलकारूढवति, लग्नुपचर्मणीति, भृर्ज्जदृचे, भङ्गुरीटे, कदल्याञ्च ।

चर्य्या स्त्री० चर–क्यप् । नियमापरित्यागे गुरूपदिष्ट व्रताद्यनुष्ठाने

चर्व भक्षे (दन्तैश्चूर्णने वा चुरा० उभ० पक्षे भ्वा० पर० । चर्वयति–ते चर्वति अचचर्वत्–त अचर्वीत् ।

चर्षणि पु० कृष–अनि पृ० आदेश्चत्वम् । जने "न चर्षणीनामुद्गादि"ति भागवतम् ।

चल गतौ भ्वा०पर०सक०सेट् ज्वलादि० । चलति अचालीत् । चलः चालः ।

चल विलासे तु०पर०अक०सेट् । चलति अचालीत् ।

चल प्रेषणे चुरा० उभ० सक० सेट् । चालयति अचीचलत्–त ।

चल त्रि० चल–ज्वलादित्वात् वा अच् । तरले, चञ्चले कम्पयुक्ते । भावे क । कम्पे । [पत्रादयोऽप्यत्र ।

चलदल पु० चलानि चञ्चलानि दलान्यस्य । अश्वत्थवृक्षे चल

चला स्त्री० चल–अच् । लक्ष्म्यां, सिन्धुके च ।

चलाचल त्रि० चल–अच् नि० । अत्यन्तचञ्चले । काके पु० ।

चवि स्त्री० चर्व–इण् पृ० । (चट्) चर्व्ये । [क्लार्थे ।

चविका स्त्री० चर्व कुन् पृ० । चर्व्ये (चट्) ड्कन् पृ० । चविकमप्य-

चव्य न० चव्यते चर्व–यत् पृ० । (चट्) दन्ते, वचायां, कार्पासास्थ्नि च

चव्यजा स्त्री० चव्यमिव जायते जन–ड । गजपिप्पल्याम् ।

चष भक्षे भ्वा० उभ० पर० सक० सेट् । चषति–ते अचाषीत् अचषीत् अचषिष्ट ।

चष बधे भ्वा० पर० सक० सेट् चषति अचाषीत्–अचषीत् ।

चषक पु० न० चष–करणे कुन् । मद्यपानपात्रे । कर्मणि कुन् । मधुनि, मद्यभेदे च न० ।

चषाल पु० चष–आलच् । यज्ञीयपशुबन्धनार्थे काष्ठे यूपमध्ये देये बलयाकारे काष्ठमये लौहमये वा पदार्थे ।

चह प्रतारणे भ्वा० पर० सक० सेट् चहति अचहीत् ।

चह प्रतारणे अद०चुरा०उभ०सक० सेट् चहयति–ते अचचहत् त ।

चह प्रतारणे चुरा० पर० सक० सेट् घटा० चहयति अचीचहत्–त ।

चाक्चक्य न० चक्क—अच् चक्कः प्रकारे ह्रित्वं चक्कचक्कस्य भावः । उज्ज्वलतायाम् । चाक्चक्यादिसाङ्ख्यसंदर्शनसमुद्भूतेति वेदान्तपरिभाषा ।

चाक्षुष न० चक्षुषा निर्वृत्तम् अण् । चक्षुर्जन्ये ज्ञाने, षष्ठे मनौ च ।

चाक्रिक पु० चक्रेण समूहेन चरति ठक् । संहत्य स्तुतिपाठके घाण्टिकार्थे ।

चाङ्गेरी स्त्री० "चङ्गुस्तुशोभने दन्ते" इतीकारे चाङ्गं—शोभनदन्तता मीरयति दूर—अण् गौरा० ङीष् । (आमरूल) तुपधेदे ।

चाट पु० चुट—भेदे अच् । आदौ विश्वासमुत्पाद्य पश्चात् धनापहर्त्तरि चौरे "चाटचारणदासेषु दत्तं भवति निष्फलमि"ति स्मृतिः ।

चाटकैर पु० चटकाया: चटकस्य वाऽपत्यम् एरक् । चटकापत्ये ।

चाटु पु० न० चट—ऊण् । प्रियवाक्ये मिथ्याप्रियवाक्ये च स्वार्थे कन् । अत्रैवार्थे "विश्रब्धचाटुकशतानी"ति साहि० ३परि० ।

चाटुपटु पु० चाटौ मिथ्यापरितोषणे वाक्ये पटुः । (भाण्ड) (खोसाहुदे) जने । ६त० पक्षे सः चाटुबटुरप्यत्र विदूषके च ।

चाणकीन त्रि० चणकस्य भवनं क्षेत्रम् खञ् । चणकभवनयोग्ये क्षेत्रादौ ।

चाणक्य पु० चणकस्य मुनेर्गोत्रापत्यम् यञ् । नवनन्दान् हत्वा चन्द्रगुप्ताय राज्यं दातरि विष्णुगुप्ते ।

चाणूर(र) पु० चण (न)—ऊरण् । कंसासुरस्य प्रधानमल्ले ।

चाणूरसूदन पु० चाणूर(नूरं सूदयति ल्युट् । श्रीकृष्णे ।

चाण्डाल पु० चण्डाल एव प्रज्ञाद्यण् । श्वपचे चण्डालार्थे ।

चातक पु० चतति याचते सततमम्भो मेघम् चत—ण्वुल् । खनामख्याते पक्षिभेदे । [चातुरी तुरी"ति नैषधम् ।

चातुरी स्त्री० चतुरस्य भावः तस्येदं वा अण् । "चातुर्य

चातुर्मास्य न० चतुर्षु मासेषु विहितम् यत् । चतुर्मासिसाध्ये यज्ञभेदे व्रतभेदे च "आषाढशुक्लद्वादश्यां पौर्णमास्यामथापि वा चातुर्मास्यव्रतारम्भ"मित्युपक्रम्य "कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तत्समापयेदि"त्युक्तं वाराहे ।

चातुर्वर्ण्य न० चत्वारो ब्राह्मणादयोवर्णा एव स्वार्थे ष्यञ्। ब्राह्मणादिषु चतुर्षु वर्णेषु "चातुर्वर्ण्यं मया सृष्ट"मिति गीता। भावे ष्यञ्। चतुर्वर्णधर्मे।

चान्द्र पु० चन्द्रोदेवताऽस्य, तस्येदमिति वा अण्। चन्द्रकान्तमणौ, त्रिंशत्तिथ्यात्मके पौर्णमास्यन्ते अमान्ते वा मासे च। चान्द्रायणव्रते न० चन्द्रलोके पु०। चन्द्रेण प्रोक्तमण्। व्याकरणभेदे। तदधीते। पुनरण्। चान्द्रव्याकरणाध्यायिनि त्रि०।

चान्द्रमास पु० कर्म०। "तत्त्रिंशता भवेन्मासश्चान्द्रस्तु तिथिभिस्मृते" ल्युक्षलक्षणे मासि।

चान्द्रायण चान्द्रश्चन्द्रलोकोऽयतेऽनेन अय—ल्युट् णत्वम्। व्रतभेदे।

चान्द्री स्त्री० चन्द्रस्येयम् अण्। चन्द्रपत्न्यां ज्योत्स्नायाञ्च। तच्छुभ्रत्वात् श्वेतकण्टकार्य्याम्। [रात्रौ च।

चाप पु० चपस्य वंशभेदस्य विकारः अण्। धनुषि, मेषावधिके नवमे

चापल न० चपलस्य भावः कर्म वा अण्। अविस्पष्टकारितारूपे, प्रयोजनं विनाऽपि पाण्यादेश्चालनरूपे वा चपलकर्मणि "मात्सर्य्यद्वेषरागादेश्चापलं त्वनवस्थिति" रित्युक्तलक्षणेऽनवस्थाने च। ष्यञ्। चापल्यमप्यत्र। [कृतव्यञ्जने।

चामर पु० न० चमरस्य विकारः तत्पुच्छनिर्मितत्वात्। चमरपुच्छ-

चामरपुष्प पु० चामरमिव पुष्पमस्य। क्रमुके, काशे, केतके, आम्रे च।

चामीकर न० चमीकरे आकरभेदे भवः अण्। स्वर्णे धुस्तूरे च।

चमुण्डा स्त्री० चमूं सेनां वियदादिसमूहरूपां लाति आदत्ते ला—क पृ०। दुर्गायाम् "यस्माच्चण्डञ्च मुण्डञ्च गृहीत्वा त्वमुपागता चामुण्डेति ततो लोके ख्याता देवी"त्युक्ते वा चण्डमुण्डानयित्र्यां दुर्गायाम्।

चाम्पेय न० चम्पायां भवः ढक्। चम्पके, नागकेशरे, स्वर्णे, किञ्जल्के च। स्वार्थे कन् किञ्जल्के।

चाय दर्शने भ्वा० उभ० सक० वेट्। चायति ते अचायीत् अचासीत् अचायिष्ट—आचास्त।

चार पु० चर एव स्वार्थे अण् । चरे "चारैः पश्यन्ति राजान" इति नीतिशास्त्रम् । चर–भावे घञ् । गमने बन्धे च । आधारे घञ् । कारागारे । कृत्रिमविषे न० ।

चारण पु० चारयति कीर्त्तिं चर–णिच् ल्यु । कीर्त्तिसञ्चारके नटे चाटचारणटासेष्वि"ति स्मृतिः ।

चारित्र न० चरित्रमेव स्वार्थेऽण् । चरित्रे ।

चारु पु० चर–उण् । दृढस्यतौ । मनोज्ञे मनोहरे त्रि० ।

चारुकेशरा स्त्री० चारूणि केशराण्यस्याः । नागरसल्लायाम् ।

चारुनालक न० चारु–नालं यस्य कप् नुभ्वा० । रक्तपद्मे ।

चारुपर्णी चारूणि पर्णान्यस्याः ङीप् । (गन्धभादाल) प्रसारिण्याम् ।

चारुफला स्त्री० चारूणि स्वादूनि फलान्यस्याः । द्राक्षायाम् ।

चार्चिक्य न० चर्च्च–धा[illegible]ण्यत् चर्चिकैव स्वार्थे ष्यञ् । चन्दनादिना गात्रलेपने । [रथे ।

चार्म्म पु० चर्मणा परिवृतो रथः अण् । चर्मणा सर्वतो वेष्टिते

चार्म्मण न० चर्मणां समूहः अण् । चर्मसमुदाये ।

चार्म्मिण चर्मणां समूहः अण् । चर्मिसमुदाये (छालि) समूहे ।

चार्व्वाक पु० चारुर्लोकसिद्धोवाको वचनं यस्य पृ० । प्रत्यक्षप्रमाणवादिनि लौकायतिके यस्य मतप्रस्थापकोबृहस्पतिः ।

चार्व्वी स्त्री० चारु–ङीप् । चारुत्वगुणवत्यां, स्त्रियां ज्योत्स्नायाम्, टीग्नौ, कुबेरपत्न्याञ्च ।

चाल पु० चल–ण । स्वनामख्याते गृहाच्छादने तृणादौ ।

चालनी स्त्री० चाल्यते शस्यादिरनया चल–णिच्–करणे ल्युट् । स्वनामख्याते बहुच्छिद्रे शस्यादिचालनसाधने पदार्थे ।

चाष पु० चष–भक्षणे णिच् अच् । खञ्जरीटे नीलाङ्गे खगे (नीलकण्ठ)।

चास पु० चस–णिच्–अच् । दृष्टौ चापे पक्षिणि च ।

चि चयने स्वादि० उभ० द्विक० अनिट् । चिनोति चिनुते । अचैषीत् अचेष्ट चिकाय–चिकाय–चिचाय । चाययति चपयतीत्येके ।

चि चयने वा चु० पक्षे भ्वा० उभ० द्वि० अनिट् घटादि । चप-

यति—ते चयति ते । अचीचपत् त अचैषीत् अचेट ।

चिकित्सक पु० कित—रोगापनयने स्वार्थे सन्—ण्वुल् । रोगापनयन कर्त्तरि वैद्ये ।

चिकित्सा स्त्री० कित—स्वार्थे सन्—अ । रोगप्रतीकारोपायकरणे ।

चिकित्स्य त्रि० चिकित्सयितुं योग्ये अर्हार्थे ण्यत् । साध्ये रोगे रोगात् मोचनयोग्ये जने च ।

चिकुर पु० चि इत्यव्यक्तं शब्दं कुरति कुर—क । केशे, वृक्षभेदे, पर्वते, सरीसृपे च । चपले, तरले, चञ्चले च त्रि० ।

चिक्क पीड़ने चुरा० उभ० सक० सेट् । चिक्कयति ते अचिचिक्कत् त ।

चिक्कण पु० चिक्क—क्विप् चिक् तं कणति कण शब्दे अच् । गुवाकवृक्षे । तत्फले न० । मसृणे स्निग्धे (चिकन) त्रि० । चिक्कणगुणवत्यां उत्तमायां गवि स्त्री० ।

चिच्छक्ति स्त्री० चिदेव शक्तिः । "चिच्छक्तिः परमेश्वरस्य विमला चैतन्यमेवोच्यते" इत्युक्ते चैतन्ये ।

चिञ्चा स्त्री० चिमित्यव्यक्तं शब्दं चिनोति चि—ड । तिन्तिड़ीवृक्षे । स्वार्थे कन् अत एव ।

चिञ्चाम्ल न० चिञ्चेवाम्लम् । अम्लशाके ।

चिट प्रेषणे भ्वा०पर० सक० सेट् । चेटति अचेटीत् ।

चिट प्रेषणे चुरा०उभ०सक०सेट् । चेटयति ते अचीचिटत् त ।

चित ज्ञाने भ्वा०पर०सक० सेट् । चेतयति ते अचेतीत् । चित्तम् ।

चित ज्ञाने चुरा० आत्म० सक० सेट् । चेतयति ते अचीचितत् त ।

चित स्मृतौ चु०उभ० सक० सेट् इदित् । चिन्तयति ते अचिचिन्तत् त

चित् स्त्री० चित—क्विप् । ज्ञाने चेतनायाम् चैतन्ये ।

चित् अव्य० चित—क्विप् । असाकल्ये यथा किञ्चित् जातुचित् ।

चित त्रि० चि—क्त । ज्ञातचयने पुष्पादौ ऋक्षे च । शवदाहार्थकाष्ठचुल्ल्यां स्त्री० ।

चिति स्त्री० चि—क्तिन् चितायां, समूहे, वेदान्तोक्ते निर्विषयसंवेदने, "निर्विशेषचितिरेव केवले"ति संक्षेपशारीरकम् । प्रासादादिषु

इष्टकादिसंख्याज्ञानार्थं अङ्कशास्त्रोक्ते (धर) इति ख्याते पदार्थे; अग्निस्थानभेदे च ।

चित्त न० चित्यते ज्ञायतेऽनेन चित—क्त । मनसि, वेदान्तोक्ते अनुसन्धानात्मकवृत्तिमति अन्तःकरणे, चिताकाष्ठे च ।

चित्तविक्षेप पु० चित्तं विक्षिपन्ति योगादपनयन्ति क्षिप—अण् । योगशास्त्रोक्तेषु योगप्रतिपक्षेषु व्याध्यादिषु नवसु ।

चित्तविप्लव पु० चित्तस्य विप्लवोऽवस्थानं यस्मात् ५ब० । उन्मादरोगे

चित्तविभ्रम पु० चित्तस्य विभ्रमो विशेषेण भ्रमणमनवस्थानं यस्मात् । ५ब० । उन्मादरोगे ।

चित्तसमुन्नति स्त्री० सम्+उद् नम—क्तिन् ६त० । चित्तस्य सम्यगुन्नमने तद्धेतौ गर्वे च चित्तोन्नतिरप्यत्र गर्वे च ।

चित्ताभोग पु० सम्यग् भोग आभोग एकविषयता ६त० । एकविषये स्थिरचित्ततायाम् ।

चित्य पु० चीयतेऽसौ चि—क्यप् । अग्नौ । चितायां स्त्री० ।

चित्र चर्णिके—लेख्ये अद्भुते च अद० चु० उभ० सक० सेट् । चित्रयति ते अचिचित्रत् त ।

चित्र पु० चित्र—क्विप् क्रायते त्रै—क वा तलोपः चित्र—अच् वा । यमभेदे "वृकोदराय चित्रायेति तर्पणमन्त्रः । अशोकवृक्षे, (चिता) चित्रकवृक्षे, एरण्डवृक्षे, आकाशे, कुष्ठभेदे, नानावर्णे च । तद्वति अद्भुते च त्रि० । लेख्ये तिलके शब्दालङ्कारभेदे च न० । स्वार्थे कन् उक्तार्थे (चिरायता) वृक्षभेदे । चित्रद्रुः कायति कै—क व्याघ्रभेदे । पु० ।

चित्रकण्ठ पु० चित्रः कण्ठोऽस्य । पारावते तद्भेदे वनकपोते च (घुघु) ।

चित्रकम्बल पु० कर्म० । कम्बलभेदे । [चित्रकारोऽत्र ।

चित्रकर पु० चित्रं करोति क—टच् । वर्णसङ्करभेदे । अण्

चित्रकाय पु० चित्रः कायो यस्य । (चितावाघ) व्याघ्रभेदे ।

चित्रकूट पु० चित्रं कूटमस्य । पर्वतभेदे ।

चित्रगुप्त पु० यमभेदे "चित्रगुप्ताय वै नमः" इति तर्पणमन्त्रः ।

चित्रतण्डुला स्त्री० न० चित्रस्तण्डुलोऽस्याः । विडङ्गे ।

चित्रत्वच् पु० चित्रा त्वक् यस्य । भूर्जत्वचे ।

चित्रदण्डक पु० चित्रोदण्डः काण्डो यस्य कप् । (ओल) सूरणे ।

चित्रपट पु० कर्म० । (छिट) प्रभृतौ वस्त्रे ।

चित्रपत्रिका स्त्री० चित्राणि पत्राण्यस्याः संज्ञायां कन् कापि अत इत्त्वम् । द्रोणपुष्प्यां, कपित्थपर्ण्यां च ।

चित्रपत्री स्त्री० चित्राणि पत्राण्यस्याः ङीप् । जलपिप्पल्याम् ।

चित्रपदा स्त्री० चित्रं पदं स्वाधिष्ठानस्थानं यस्याः । गोधालतायां, अष्टाक्षरपादके छन्दोभेदे च ।

चित्रपर्णी स्त्री० चित्राणि पर्णान्यस्याः (चाकुलिया) वृश्चिकपर्ण्याम् ।

चित्रपादा स्त्री० चित्रौ पादौ यस्याः । मारिकापक्षिणि ।

चित्रपुष्पी स्त्री० चित्राणि पुष्पाण्यस्याः ङीप् । आवष्टालतायाम् ।

चित्रपृष्ठ पु० चित्रं पृष्ठमस्य । कलविङ्कपक्षिणि ।

चित्रफला स्त्री० चित्रं फलं यस्याः । कण्टकार्य्यां वार्त्ताक्याम् ।

चित्रभानुः पु० चित्राभानवो यस्य । अग्नौ, सूर्य्ये, चित्रकवृक्षे, अर्कवृक्षे च । [डुम्बरिकायाम् ।

चित्रभेषजा स्त्री० चित्रमाश्चर्य्यं भेषजं यस्याः पृष० । काकोलीवृक्षे ।

चित्ररथ पु० चित्रोरथोऽस्य । सूर्य्ये, गन्धर्वभेदे च ।

चित्रलता स्त्री० कर्म० । मञ्जिष्ठायाम् ।

चित्रलेखा स्त्री० अप्सरो भेदे कुम्भाण्डसुतायाम् उषासख्यां, अष्टाक्षरपादके छन्दोभेदे च ।

चित्रवीर्य्य पु० चित्रमाश्चर्य्यं वीर्य्यमस्य । रक्तैरण्डे ।

चित्रशिखण्डिन् पु० चित्रशिखण्डिनोऽङ्गिरसो जायते जन–ड । वृहस्पतौ ।

चित्रशिखण्डिन् पु० चित्राः शिखण्डाः अस्त्यस्य इनि । "मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः । वसिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिन" इत्युक्तेषु सप्तसु मुनिषु ।

चित्राङ्ग पु० चित्रमङ्गमस्य । रक्तचित्रके, सर्पे च ।

चित्राङ्गद पु० शान्तनुराजसुते विचित्रवीर्य्यभ्रातरि, गन्धर्वभेदे च ।
चित्राङ्गी स्त्री० चित्रमङ्गमस्याः । मङ्गिष्ठायां कर्णजलौकसि च ।
चित्रायस न० कर्म० अच् समा० । तीक्ष्णलौहे (इस्पात) ।
चिद्रूप पु० चिदेव रूपमस्य । आत्मनि, स्फूर्त्तिमति च ।
चिदाकाश न० चिद् आकाशमिव निर्लेपत्वात् सर्वाधारत्वाच्च । शुद्धे ब्रह्मणि ।
चिदाभास पु० चित आभासः प्रतिबिम्बः । बुद्धावात्मप्रतिबिम्बे । जीवे बुद्धादृत्तिचिदाभासाविति वेदान्तः । [दृष्टपदार्थकारणे ।
चिन्ता स्त्री० चिति–अ । प्रागनुभूतत्तज्ज्ञानजन्ये संस्कारोद्बोधे पूर्ण-
चिन्तामणि पु० चिन्ताविषयस्य (तदुद्बवार्थे) मणिः । चिन्तामात्रेण चिन्तितास्तुदायके मणौ, स्पर्शमणौ च । "यथा चिन्तामणिं स्पृष्ट्वा लौहः काञ्चनतां व्रजे"दिति ।
चिन्न पु० चित–न पृ० तस्य नः । (चिना) शस्त्रभेदे ।
चिन्मय पु० चिदेव चित्+मयट् । चैतन्यरूपात्मके परमेश्वरे "चिन्मयस्याद्वितीयस्ये"त्यादि । [कन् । अल्पार्थे ।
चिपिट पु० चि–पिटच् किच्च । (चिड़ा) इति ख्याते पृथुके स्वार्थे
चिर न० चि–रक् । दीर्घकाले । तद्वर्त्तिनि पदार्थे त्रि० ।
चिरक्रिय त्रि० चिरकालेन क्रिया यस्य । दीर्घसूत्रे ।
चिरजीवक पु० चिरं जीवति जीव–एवुल् । जीवकवृक्षे ।
चिरजीविन् पु० चिरं जीवति णिनि । काके, जीवकवृक्षे, शास्त्रान्तिवृक्षे, मार्कण्डेये, "अश्वत्थामा बलिर्व्यासो हनुमांश्च विभीषणः कृपः परशुरामश्च सप्तैते चिरजीविन" इत्युक्तेषु सप्तसु च । चिरजीविनि त्रि० ।
चिरञ्जीविन् पु० चिरं जीवति जीव–णिनुं । चिरजीविपदार्थे ।
चिरटी स्त्री० चिरेण अटति पिलङ्गेहम् अट–अच् पृ० । यौवनवत्यां पिलङ्गेहस्थायां स्त्रियाम् ।
चिरतिक्त पु० चिरस्तिक्तो रसो यत्र । (चिरायता) भूनिम्बे ।
चिरन्न त्रि० चिरे भवः त्न । चिरन्तने पुरातने ।

चिरन्तन त्रि० चिरम्+ट्युल् तुट् च । पुरातने । स्त्रियां ङीप् ।
चिरपाकिन् पु० चिरेण पाकोऽस्यास्य दुर्ज्जरत्वात् । कपित्थे ।
चिरपुष्प पु० चिराणि पुष्पाण्यस्य । वकुलवृक्षे ।
चिरम् अव्य० चि-रसुक् बहुकालार्थे ।
चिरराच्र पु० चिरा रात्रिः अच् । बहुकाले ।
चिररात्राय अव्य० चिररात्रान् अयते अय-अण् । बहुकाले ।
चिरविल्व पु० चिरं विलति विल-भेदने व करञ्जवृक्षे ।
चिरसूता स्त्री० चिरं प्रसूता । बहुकालप्रसववत्यां गवादौ । स्वार्थे कन् अत्रार्थे ।
चिरस्य अव्य० चिरमस्यति अस-ण्यत् शक० । दीर्घकाले ।
चिरात् अव्य० चिरमतति अत-क्विप् । दीर्घकाले, गरुड़े पु० ।
चिराय अव्य० चिरमयते अण् । चिरकाले दीर्घकाले ।
चिरायुस् पु० चिरमायुर्यस्य । देवे । चिरजीविनि त्रि० ।
चिरि हिंसे स्वादि० पर० सक० सेट् । चिरिणोति अचिरायीत् ।
चिरेण अव्य० चि+एनप् । दीर्घकालार्थे । [चिर्भिटोपत्र ।
चिर्भटी स्त्री० चिरेण भटति अच् ङीप् पृ० । कर्कट्याम् ।
चिल वासे तु० पर० अक० सेट् । चिलति अचेलीत् ।
चिलिचिम पु० चिल इन् चिलं वासं चिनोति चि-मक् । (वेलेगुड़गुड़िया) मत्स्यभेदे ।
चिल्ल शैथिल्ये भावक्लमौ च स्वा० पर० अक० सेट् । चिल्लति अचिल्लीत् । [चिल् । क्लिन्ननेत्रे त्रि० ।
चिल्ल पु० चिल्ल-अच् । (चिल) पक्षिभेदे । क्लिन्न+ल क्लिन्नस्य
चिल्लक पु० चिल्ल-स्वुल् । लोध्रे । झिल्लिकायां स्त्री० ।
चिल्लाभ पु० चिल्ल इव प्रसह्यहारित्वादाभाति भा-क । ग्रन्थिभेदके चौरे । [कथाके च ।
चिल्ली स्त्री० चिल्ल-अच् गौरा० ङीप् । झिल्लीकीटे, लोध्रे, वाद्य-
चिवुक न० चीव-संवरणे उ पृ० ह्रस्वः । ओष्ठाधोभागे । स्वार्थे कन् तत्रैवार्थे । मुचकुन्दवृक्षे पु० ।

चिह्न लक्षणे अ०चु०उभ० सक० सेट् । चिह्नयति ते अचिचिह्नत् त ।

चिह्न न० चिह्न–अच् –चह्न–न उपधाया इत्त्वम् वा । लाञ्छने लक्षणे ।

चीक मर्षणे वा चु०उभ० मन्ये भ्वा० पर० सक० सेट् । चीकयति ते चीकति अचीचिकत् त अचीकीत् ।

चीन पु० चि–नक् पृ० दीर्घः । "मानसेशात् दक्षपूर्वे चीनदेशः प्रकीर्त्तितः" इत्युक्ते देशे, तद्देशस्थे जने व० व० । तन्त्रोक्ते तद्देशाचारभेदे च । तद्देशोद्भववस्त्रे न० "चीनपीनस्तनवसनदशान्नोलने" त्युट: । कङ्गुतुल्यव्रीहिभेदे स्तवे, मृगभेदे च पु० । पताकायां, सीसके च न० । स्वार्थे कन् । कङ्गुधान्यभेदे । [भेदे ।

चीत्कार पु० चीदित्यव्यक्तशब्दस्य कारः ष–घञ् । भयहेतुके ध्वनि-

चीनपिष्ट न० पिष–क्त पिष्टं चूर्णं ईत० । (चीनेर सिन्दूर) सिन्दूरभेदे । [अचिचीभत् त ।

चीभ प्रशंसायां भ्वा० आत्म० सक० सेट् । चीभते अचीभीत् ।

चीर न० चि–कन् दीर्घश्च । वस्त्रखण्डे "चीराणि किं पथि न सन्ती" ति भागवतम् । लेखनभेदे, चूड़ायां, सीसके इत्त्वत्वच: खण्डे, वस्त्रभेदे च । [चञ्चुशाके ।

चीरपत्रिका स्त्री० चीरमिव पत्रमस्याः स्वार्थे कन् अत इत्त्वम् ।

चीरपर्ण पु० चीरमिव पर्णमस्य । शालञ्चशाके ।

चीरितच्छद पु० चीरवदाचरितः छदो दलं यस्य । पाखञ्चशाके ।

चीर्ण त्रि० चर नक् पृ० अत ईत्त्वम् । क्षते, क्षीलिते, सञ्चिते च ।

चीव अदने संहतौ च भ्वा० उभ० सक० सेट् । चीवति ते अचीवीत् अचीविष्ट । अचिचीवत् त ।

चीव दीप्तौ चुरा० उभ० सक० सेट् । चीवयति ते अचीचिवत् त ।

चीवर न० चि–वरच् दीर्घश्च । भिक्षुवस्त्रे, कौपीनादौ ।

चुक्क पीडने चु० उभ० सक० सेट् । चुक्कयति ते अचुचुक्कत् त ।

चुक्र पु० चक–रक् अत उत्त्वञ्च । अम्लवेतसे (चुकोपालङ्क) शाकभेदे,

शुक्लभेदे च । स्वार्थे कन् (आमरुल) शाके, तिन्तिड्याञ्च स्त्री० ।

चुक्राम्ल पु० चुक्रमिवाम्लम् । इवाम्ले । अम्लवेतसायां, चिञ्चायां, काञ्जिकभेदे च स्त्री० ।

चुक्रिका स्त्री० चुक्रमेव स्वार्थे कन् । (चुकोमालङ्क) शाकभेदे ।

चु(चू)चुक न० चु(चू)चु इत्यव्यक्तं शब्दं कायति यत्र कै—क । कुचाग्रे स्तनवृन्ते । [चुच्यति अचुच्यीत् चुक्रः ।

चुच्य क्षाने मन्थने पीड़ने सुरादिसम्पादने च भ्वा० पर० सक० सेट् ।

चुट अल्पीभावे भ्वा० पर० अक० सेट् । चोटति अचोटीत् ।

चुट अल्पीभावे भ्वा० पर० अक० सेट् इदित् । चुण्टति अचुण्टीत् ।

चुट छेदने वा० चु० उभ० पक्षे तुदा० कुटा० पर० सक० सेट् । चोटयति-ते अचूचुटत्—त पक्षे चुटति अचुटीत् अचोट ।

चुट छेदने चुरा० उभ० सक० सेट् इदित् । चुण्टयति-ते अचुचुण्टत् त ।

चुट्ट अल्पीभावे चुरा० उभ० अक० सेट् । चुट्टयति-ते अचुचुट्टत्-त ।

चुड छेदने चुरा० उभ० सक० सेट् इदित् । चुण्डयति-ते अचुचुण्डत्-त ।

चुड अल्पीभावे भ्वा० पर० अक० सेट् इदित् । चुण्डति अचुण्डीत् ।

चुड्ड(ट्ड) क्रतौ छावे च भ्वा० पर० सक० सेट् । चुड्डति अचुड्डीत् ।

चुण छेदने तु० उ० पर० सक० सेट् । चुणति अचुणीत् चुचोण ।

चुत क्षरणे भ्वा० प० अक० सेट् । चोतति अचुतत्-अचोतीत् ।

चुद नोदने चु० उ० सक० सेट् चोदयति-ते अचूचुदत्-त चोदना चूड़ा ।

चुप मन्दगतौ भ्वा० पर० अक० सेट् । चोपति अचोपीत् ।

चुब चुम्बने वा० चु० उभ० भ्वा० पर० सक० सेट् इदित् । चुम्बयति-ते चुम्बति अचुचुम्बत्-त अचुम्बीत् ।

चुम्बक पु० चुबि-एवुल् । स्वसामख्याते अयस्कान्ते मणौ । धृत्तौ चुम्बनकर्त्तरि, अन्यैकदेशाभिज्ञे च त्रि० ।

चुर स्तेये (परद्रव्यापहरणे) वा० चु० उभ० पक्षे भ्वा० पर० सक० सेट् । चोरयति-ते चोरति तचूचुरत्—त अचोरीत् ।

चुरा स्त्री० चुर—क टाप् । चौर्य्ये ।

चुर्ण्ण वस्तुन्ये चुरा० उभ० सक० सेट्। चोलयति-ते अचूचुलत्-त।
चुलुक पु० चुल-उकक्। प्रसृतौ निविडपङ्के, भाण्डभेदे च। मापः मात्रमज्जनयोग्ये जले न०।
चुलुकिन् पु० चुलुक+अस्त्यर्थे इनि। शिशुमाराकारे मत्स्यभेदे।
चुलुम्प लौल्ये भ्वा० पर० अक० सेट्। चुलुम्पति अचुलुम्पीत्।
चुल्ल भावकरणे भ्वा० पर० अक० सेट् चुल्लति अचुल्लीत्।
चुल्ल पु० क्लिन्नस्य चुलादेशः चच्प्रत्ययः। क्लिन्ने नेत्रे तद्युक्ते जने। त्रि०
चुल्लि(ल्ली) स्त्री० चुल्ल-इन् वा ङीप् चुद्-क्लिक् वा। पाकार्थमग्निस्थापनस्थाने (चुला) चुल्लो चिरं रोदितीत्युद्भटः। अच्। चुल्लाधत्व।
चूड़ा स्त्री० चुद-अङ् नि०, चुल समुच्छ्राये दीर्घः अङ् डस्य लः वा। मयूरशिखायां मस्तकमध्यस्थशिखामात्रे, जटिकायां, वाङ्मयभूषणे, शिखायाम्, (अग्रे), भूषणमात्रे, कूपे, दशविधसंस्कारान्तर्गते संस्कारभेदे च। "प्रथमेऽब्दे व्रतादेर्वा चूड़ा कार्य्या"मिति स्मृतिः।
चूड़ामणि पु० ई० न०। शिरोरत्ने "चूडामणौ कृतविधु"रिति।
चूड़ाम्ल न० चूड़ायामग्रेऽम्लम्। इक्षाम्ले।
चूड़ाल न० चूड़ा शिखास्त्यस्य ल। मस्तके। शिखायुक्तजने त्रि०। श्वेतगुञ्जायां, नागरमुस्तायाम्, उच्चटाटरूपे च स्त्री० टाप्।
चूण सङ्कोचे चुरा० उभ० सक० सेट्। चूणयति अचूणीत्।
चूत पु० चुप-क्त पृ०। आम्रे, नवचूतप्रसवोमस्मिष्यतीति कुमारः च्यू-क्त पृ०। गृहद्वारे न०। स्वार्थे कन् आम्रे, कूपके च।
चूर दाहे दिवा० आत्म० सक० सेट्। चूर्य्यते अचूरिष्ट। चूर्णः।
चूर्ण प्रेषणे चु० उभ० सक० सेट्। चूर्णयति-ते अचुचूर्णत्-त।
चूर्ण पु० चूर्ण-घञ्। प्रेषणजाते रजसि धूलौ (आबीर) ख्याते द्रव्ये, ताम्बूलचर्वणोपयोगिद्रव्ये च चूर्णमानीयतां तूर्णमिति।
चूर्णक पु० चूर्ण-स्वुन्। मक्षुप। स्वार्थे कन् चूर्णार्थे च। "कटोराचरं स्वल्पसमं चूर्णकं विदु"रित्युक्ते गद्यभेदे न०।
चूर्णकार पु० चूर्णं करोति क-अण्। (चुनारी) जातिभेदे।
चूर्णकुन्तल द०चूर्ण्यते इति चूर्णः कर्म०। शिरःस्थे क्षुद्रकेशे (अलके)।

चूर्णि(र्णी) पु० चुर–चर–वा क्निच् । नि० । पतञ्जलिकृते महाभाष्ये, कपर्द्दके च ।

चूला स्त्री० चुल–अ दीर्घः । प्रासादोपरिस्थे गृहे (चिलाघर) चूडायाञ्च ।

चूलिका स्त्री० चुल–सञ्ज्ञायां ण्वुल् पृ० दीर्घः । हस्तिकर्णमूले, नाटकाङ्कभेदे च ।

चूष पाने भ्वा० पर० सक० सेट् । चूषति । अचूषीत् ।

चृत हिंसे ग्रन्थने च तुदा० सक० सेट् । चृतति अचर्तीत् ।

चृत(प) सन्दीपने वा चु० उभ० पक्षे भ्वा० पर० सक० सेट् । चर्त्त(र्प) यति–ते । अचीचृत(प)त् अचचर्त्त(र्प)त् त । पक्षे चर्त्त(र्प)ति अचर्त्तीत्(र्पीत्) ।

चेट(ड) पु० चिट–परप्रैष्ये अच् वा टस्य डः । दासे, उभयत्र ङीप् । दास्याम् । ण्वुल् । दासे, उपनायके च स्त्रियां चेटि (डि) का । [तया कथने च ।

चेत् अव्य० चित्–क्विप् यद्यर्थे पक्षान्तरे, असम्भवेऽपि सन्दिग्धे ।

चेतकी स्त्री० चित–ण्वुल् । हरितक्याम्, तत्फलेऽपि स्त्री० ।

चेतन पु० चित–ल्युट् आत्मनि, जीवे परमेश्वरे प्राणिनि च । चैतन्ययुक्ते त्रि० ।

चेतनकी पु० चेतनं करोति कृ–ड गौ० ङीप् । हरितक्याम् ।

चेतना स्त्री० चु० चित ल्युच् । बुद्धौ ज्ञाने ।

चेतनीया स्त्री० चेतनाय हिता छ । कट्फलनामौषधे ।

चेतस् न० चित–असुन् । चित्ते । आत्मनि पु० "साक्षीचेताः केवलो निर्गुणश्चे"ति श्रुतिः ।

चेतोमुख पु० चेतो मुखं द्वारमस्य । वेदान्तोक्ते सुषुप्त्यभिमानिनि जीवे ।

चेदि पु० देशभेदे । तद्देशस्थे जने ब० व० ।

चेदिपति पु० चेदीनां पतिः शिशुपाले उपरिचरवसुनामके नृपे च । चेदिराजादयोऽत्र । [चेलत् त ।

चेल क्षौल्ये गतौ च भ्वा० पर० सक० सेट् । चेलति अचेलीत् अचि-

चेल न० चिल-आच्छादने कर्मणि घञ्। वस्त्रे। चेल-लौल्ये अच्। अधमे त्रि०।

चेल्ल चालने गतौ च भ्वा० पर० सक० सेट्। चेल्लति अचेल्लीत्।

चेष्ट ईहायां भ्वा० आ० अक० सेट्। चेष्टते अचेष्टिष्ट। अचेष्टत्। अचिचेष्टत्।

चेष्टा स्त्री० चेष्ट+अङ्। "आत्मजन्या भवेदिच्छा इच्छाजन्या भवेत् कृतिः। कृतिजन्या भवेच्चेष्टे"त्युक्ते कायिके व्यापारे।

चैतन्य न० चेतन+भावे स्वार्थे वा ष्यञ्। चेतनायां, ब्रह्मणि प्रकृतौ च।

चैत्त न० चित्तस्येदम् अण्। बौद्धमते विज्ञानातिरिक्ते स्वल्पमात्रे।

चैत्य न० चित्यायां इदमर्थे ण्। श्मशादिप्रसिद्धे महावृक्षे, देवावासे वृक्षे, जनानां सभास्थतरौ, बुद्धभेदे, आयतने, चितासूचके, जनसभायां, यज्ञस्थाने, जनानां विश्रामस्थाने। देवस्थाने च।

चैत्यगृह न० चैत्यस्य समीपे गृहम्। चत्वरमध्यस्थे चैत्यसन्निहिते गृहे।

चैत्यवृक्ष पु० कर्म०। अश्वत्थादिप्रसिद्धे वृक्षे।

चैत्र पु० चित्रानक्षत्रेण युक्ता पौर्णमासी चैत्री सास्मिन् मासेऽण्। स्वनामख्याते शुक्लप्रतिपदादिदर्शान्तरूपे मासे। ठक्। चैत्रिकः। कन्। चैत्रकोऽप्यत्र पर्वतभेदे च

चैत्ररथ पु० चित्ररथेन गन्धर्वेण निर्वृत्तम् अण् कुबेरोद्याने।

चैत्रावली स्त्री० चैत्रे सम्यक् बलिरस्याम्। चैत्रपौर्णमास्याम्।

चैत्री स्त्री० चित्रानक्षत्रेण युक्ता पौर्णमासी अण् चैत्रमासपौर्णमास्याम् तत्रैव तद्योगसम्भवात्।

चैद्य पु० चेदीनां जनपदानामयम् ष्यञ्। शिशुपाले।

चोदना स्त्री० चुद्-युच्। "चोदना वोपदेशश्च विधिश्चैकार्थवाचिनः" इति भट्टोक्ते प्रवर्त्तनावाक्ये "चोदनालक्षणार्थो धर्म" इति मीमांसासूत्रम्। प्रेरणायां, तर्ज्जनादौ, प्रवर्त्तनायाञ्च।

चोद्य न० चुद्-ण्यत्। प्रश्ने, पूर्वपक्षे, अद्भुते च। प्रेरणार्हे त्रि०।

चोपन न० चुप-ल्युट्। मन्दगमने तृणोन्मूलने, सौने च।

चोर पु० चुर–अच्। स्तेयकर्त्तरि परद्रव्यापहारके गन्धद्रव्यभेदे, क्षणशब्दाच्च।

चोरक पु० चोरः स्वनामख्यातवृक्षइव कायति कै-क। अन्यिपर्णवृक्षे।

चोरपुष्पी स्त्री० चोर इव पुष्पमस्या रात्रिविकाशित्वात्। शङ्खिन्याम्। स्वार्थे कन् अत इत्त्वम्। चोरपुष्पिकाऽप्यत्र।

चोरा स्त्री० चोरतुल्यं रात्रिविकाशित्वेन पुष्पमस्त्यस्या अर्श आद्यच्। शङ्खपुष्पिकायाम्।

चो(चौ)रिका स्त्री० चोर+कर्मणि ठन् ठक् वा। चौर्ये।

चोल न० चुल–घञ्। स्त्रीणां कञ्चुकाख्ये आप्रपदीने वस्त्रे। (चोला) इति ख्याते पुंसां वस्त्रभेदे च द्राविड़कलिङ्गयोर्मध्ये, देशभेदे पु०।

चोलकी पु० चुल–ण्वुल् गौरा० ङीष्। करीरे, नागरङ्गे, किण्व्कुपर्णिनि च।

चोली स्त्री० अल्पश्चोलः ङीष्। कुर्पासके वस्त्रभेदे।

चोष्य त्रि० चूष–ण्यत् पृ०। इक्षुदण्डादौ भक्ष्यभेदे।

चौड(ल) न० चूडा प्रयोजनमस्य अण्। चूडाकर्मणि संस्कारभेदे। वा डस्य लः। [प्रहारके। चोरनामगन्धद्रव्ये पु०।

चौर त्रि० चुरा शीलमस्य चोरएव वा अण्। प्रच्छन्नपरद्रव्यापहारके।

चौर्य न० चोरस्य भावः कर्म वा ष्यञ्। परद्रव्यापहरणे।

च्यवन पु० च्यु–युच्। मुनिभेदे।

च्यु गतौ भ्वा० आत्म० सक० अनिट्। च्यते अच्योट।

च्यु हासे सहने च चुरा० उभ० सक० अनिट्। च्यावयति ते अचुच्यवत् त।

च्युत चरणे भ्वा० पर० अक० सेट्। च्योतति अच्युतत्-अच्योतीत्।

च्युति स्त्री० च्यु-क्तिन्। चरणे नाशे च अपादाने क्तिच्। भ्रंशे।

छ

छ त्रि० छो–क। छेदनकर्त्तरि, निर्म्मले, तरले च। गृहे न०।

छगल पु० छो–कलच् गुट् च। पशुभेदे अजे। जातौ ङीष्।

नीलवस्त्रे न० । इन्द्रदारकवृक्षे स्त्री० टाप् । स्वार्थे कन् । पशुभेदे छागे ।

छगलान्त्री(ङ्ग्री) स्त्री० छगलस्येवान्त्रम् अङ्गिर्यां अस्याः गौरा० ङीष् । इन्द्रदारकौषधे, वृक्षे च । स्वार्थे कन् । अत्रैवार्थे ।

छटा स्त्री० छो–अटन् दीप्तौ, परम्परायाञ्च ।

छटाफल पु० छटेव परस्परान्वितं फलं यस्य । गुवाके ।

छत्र पु० छद–णिच्–ष्ट्रन् ह्रस्वः । वचाकारमूलपत्रे (छातारिया) तृणभेदे । आतपत्रे न० । अतिछत्रायां (छत्ता) वृक्षे स्त्री० ।

छत्रक पु० छत्रमिव कायति कै–क । (राङ्गाकुलेखाड़ा) वृक्षे, भक्त-रङ्गे पक्षिणि च । स्वार्थे कन् छत्रे न० ।

छत्रपत्र न० छत्रमिव पत्रमस्य । स्थलपद्मे, भूर्जपत्रवृक्षे पु० ।

छत्रपुष्प पु० छत्रमिव पुष्पमस्य । तिलकवृक्षे ।

छत्रभङ्ग पु० छत्रस्य भङ्गो यत्र । नृपनाशे, वैधव्ये अस्वातन्त्र्ये च ।

छत्राक न० छत्रा अतिच्छत्रेव कायति कै–क । शिलीन्ध्रे "छत्राकं विड्वराहस्ये"ति मनुः ।

छत्राकी स्त्री० छत्रमकति अक–कुटिलगतौ अण् । राज्ञायाम् ।

छद संवृतौ अद० चु० उभ०सक० सेट् । छदयति ते अचिच्छदत् त ।

छद बलाधाने जीवने च भ्वा० पर० अक० सेट् । छदति–अच्छदत्-अच्छदीत्–अच्छादीत् ।

छद संवरणे वा० चुरा० पक्षे भ्वा० उभ०सकर्म्म० सेट् इदित् । छन्द्-यति-ते अचिच्छन्दत्–त । छन्दति–ते अच्छन्दीत् अच्छन्दिष्ट ।

छद अपवारणे भ्वा० उभ० सक० सेट् । छदति छदते । अच्छदीत्–अच्छादीत्–अच्छदिष्ट ।

छद पु० छद–क । पत्रे, पक्षिणां पक्षे, सन्धिपर्णवृक्षे, तमालवृक्षे च ।

छदन न० छद–ल्युट् । पत्रे, पक्षे, (तेजपात) त्वचे च । भावे ल्युट् । पिधाने ।

छदपत्र पु० छदार्थं पत्रमस्य । भूर्जपत्रे ।

छदि पु० छद–इन् । पटले (चाल) इति ख्याते गृहाच्छादके तृणपुञ्जे ।

छर्दिस् स्त्री० छद्–इसि । पटले (चाल) ।

छद्मतापस पु० छद्मना छलेन तापसः । लोकप्रतारणार्थं तापसता-ख्यापनाय तापसलिङ्गधारिणि तत्कर्म्माननुष्ठायिनि वैडालव्रतिके ।

छद्मन् न० छाद्यते स्वरूपमनेन छद–मनि । कपटे छले ।

छन्द पु० छदि संवरणे धातोरनेकार्थत्वात् इह इच्छायाम् घञ् अभि-लाषे, वशतायाम्, विषभेदे च ।

छन्दस् न० छदि–असि । वेदे, खैराचारे, अभिलाषे, नियताक्षर-वर्णमात्रादिसंनिवेशवशात् चतुश्चरणादौ उक्थ्यादिभेदे गायत्र्यादौ छन्दसि, पद्ये च ।

छन्दोग पु० छन्दः सामवेदं गायति गै–क । सामवेदगे विप्रादौ ।

छन्न त्रि० छद–णिच् क्त नि० । आच्छादिते । निर्ज्जने रहसि न० ।

छप गतौ वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् इदित् । छम्प-यति ते छम्पति अचच्छम्पत् त अच्छम्पीत् ।

छम भक्षणे भ्वा० पर० सक० सेट् । छमति अच्छमीत् । छमित्वा छान्त्वा ।

छर्द वमने चुरा० उभ० सक० सेट् । छर्दयति ते अचच्छर्दत् त ।

छर्दन पु० छर्द–णिच्–ल्यु निम्बवृक्षे मदनवृक्षे च । भावे ल्युट् । वमने न० ।

छर्दि (र्दी) स्त्री० छर्द–णिच्–इन् । वमनरोगे वा ङीप् । अत्रैवार्थे ।

छर्दिका स्त्री० छर्द–णिच्–ण्वुल् । उत्कासिकायां, विष्णुक्रान्ता-यान्च । धात्वर्थे ण्वुल् । वमने ।

छर्दिकारिपु पु० ६त० । क्षुद्रैलायाम् । छर्दिनाशके त्रि० ।

छर्दिघ्न पु० छर्दिं हन्ति–हन्–टक् । निम्बभेदे छर्दिनाशके त्रि० ।

छर्दिस् स्त्री० छर्द–इसि । वमने ।

छल न० छो कलच् । माये, स्वरूपाच्छादने छद्मनि, न्यायोक्तौ तात्पर्य्यान्तरेण प्रयुक्तस्य शब्दस्यार्थान्तरकल्पनेन वाग्दूषणे प्रतिवादिना दत्तदूषणे च । यथा नेपालादागतोऽयं नवकम्बलत्वादिति वादिन उक्तौ नवशब्दस्य नूतनत्वार्थपरत्वे स्थिते प्रतिवादिना तस्य

नवसंख्यायुक्तार्थत्वकल्पनेन नास्य नव संख्यकत्वमिति यद्दूषणं दीयते।

छलना स्त्री० छल+तत्करोति णिच्-भावे-युच्। परप्रतारणायाम्।

छल्ली स्त्री० छद-क्विप् तां लाति ला-क गौ० ङीष्। वल्कले (छाल) लतायाम्, सन्ततौ च।

छवि स्त्री० छ्यति असारं क्षिनोति तमो वा नि०। शोभायां कान्तौ च।

छष भ्वे० उभ० सक० सेट्। छषति ते अच्छार्षीत् अच्छर्षीत् अच्छर्षिष्ट।

छाग पु० छो गन्। छागले। जातौ स्त्रियां ङीष्। पुरोडाशे च। दृढमर्थं [अण्। छाग्यादुग्धे छागमांसे च न०।

छागल पु० छगलस्य प्रज्ञाद्यण्। खनामख्याते पशौ, छगलस्यापत्यम् अण्। ऋषिभेदे।

छागवाहन पु० छागो वाहनमस्य। अग्नौ।

छात त्रि० छो-कर्मणि कर्त्तरि वा क्त। क्षिप्ते, दुर्बले च। छातेतराम्बुच्छटेति काव्य० प्र० १उ०।

छात्र पु० गुरोर्हितावरणं छत्रं तच्छीलमस्य ण। शिष्ये, "वरटाः कपिलाः पीताः प्रायोक्षिमवतो वने। कुर्वन्ति छत्रकाकारं तज्जं छात्रं मधु स्मृत"मित्युक्ते मधुभेदे न०।

छादन पु० छद-णिच्-ल्यु। शीलाद्यर्थे भावे ल्युट्। छादने। करणे ल्युट्। पत्रे न०।

छान्दस पु० छन्दोवेदमधीतेऽण्। वेदाध्ययनकर्त्तरि।

छान्दोग्य न० छन्दोग+आम्नायार्थे ञ्य। सामगानां धर्मे आम्नाये, (मन्त्रब्राह्मणात्मके शास्त्रे) समूहे च।

छाया स्त्री० छो-ण। आतपाभावे, कान्तौ, प्रतिबिम्बे, पालने, उत्कोचे, षड्भौ, संज्ञाप्रतिरूपायां सूर्य्यभार्य्यायाम्, जनविंशाक्षरपादके छन्दोभेदे च।

छायातनय पु० ईत०। शनैश्चरे "छायासुतादयोऽप्यत्र।

छायापुरुष पु० छायया पुरुष इव। आकाशे दृश्ये निजच्छायानुरूपे छायात्मके पुरुषे।

छायाद्रुम पु० छायाप्रधानो द्रुमः शाक० । वटादौ वृक्षे ।
छिक्कनी स्त्री० छिक् इत्यव्यक्तं नासिकाशब्दं करोति शब्दायते अच् गौरा० ङीष् । (नाकछिक्नी) वृक्षभेदे ।
छिक्का स्त्री० छिक् इत्यव्यक्तं शब्दं करोति क ड । क्षुते ।
छित्वर त्रि० छिद्–क्वरप् । पु० तुक्च । वैरिणि, धूर्त्ते, छेदके च । स्त्रियां ङीष् । छेदने न० । [अच्छिदत् अच्छित्त, छिदा ।
छिद द्वैधीकरणे रुधा० उ० सक० अनिट् । छिनत्ति छिन्ते अच्छैत्सीत्-
छिद्दिर पु० छिद्–किरच् । कुठारे पावके, रज्जुभेदे, करपाले च ।
छिदुर त्रि० छिद्–कुरच् । वैरिणि, धूर्त्ते, छेदके, छेदनक्षमे च ।
छिद्र भेदने अद० चुरा० उभ० सक० सेट् । छिद्रयति ते अचिच्छिद्रत् त । [लग्नतोऽष्टमस्थाने च ।
छिद्र न० छिद्–रक् छिद्र–अच् वा । दूषणे, गर्त्ते, अश्वकाये ज्योतिषोक्ते
छिद्रान्तर् पु० छिद्रमन्तर्मध्यं यस्य । नले ।
छिद्रित त्रि० छिद्र क्त । विद्धे कृतच्छिद्रे ।
छिन्नपत्री स्त्री० छिन्नं पत्रं यस्याः । चम्पकायाम् । (आकनादी) ।
छिन्नमस्ता स्त्री० छिन्नं मस्तं यस्याः । महाविद्यायां विद्याभेदे ।
छिन्नरुह पु० छिन्नोऽपि रोहते रुह–क । तिलवृक्षे । गुडूच्यां, भल्लातक्यां, केतक्याञ्च स्त्री० ।
छिन्नोद्भवा स्त्री० छिन्नाप्युद्भवति उद्+भू–अच् । गुडूच्याम् ।
छुछुन्दरी स्त्री० छुछु इत्यव्यक्तं दृणाति अच् पृ० । (छुछु) जन्तुभेदे गटकमूषिकायाम् । [छुटति । अचुच्छुटत् त अच्छुटीत् ।
छुट छेदने वा चुरा० उभ० पक्षे तु० कुटा० पर० सक० सेट् । छोटयति ते
छुड छेदने तु० कु० पर० सक० सेट् । छुडति अच्छुडीत् चुच्छोड ।
छुप स्पर्शे तु० पर० सक० अनिट् । छुपति अच्छौप्सीत् ।
छुप पु० छुप–क । चुपे स्पर्शे, चपले, युद्धे च ।
छुर छेदे भ्वा० पर० सक० सेट् । छोरति अच्छोरीत् ।
छुर लेपने तु० कु० पर० सक० सेट् । छुरति अच्छुरीत् ।

कुरिका स्त्री० कुर-कुन् । अस्त्रभेदे (छुरि) । कुर-क गौ० ङीष् । कुरीत्यप्यत्र ।

कृद शब्दोपने वा चु० उ० पक्षे भ्वा० पर० सक० सेट् । कर्दयति ते कर्दति । अचिकर्दत्-अचिच्छृटत् त अच्छर्दीत् ।

कृद देवने दीप्तौ च अक० वमने सक० कर्धा० उभ० सेट् । कृणत्ति कृन्ते अच्छृटत् अच्छर्दीत् ।

कृप यातने हिक० शब्दे अक० वा चुरा० उभ० पक्षे भ्वा० पर० सेट् । कर्पयति ते कर्पति । अचिच्छृपेत् त-अचच्कर्पत् त । अच्छर्पीत् । [नागरे च त्रि० ।

केक पु० को-ईकन् । मत्तहासक्ते पक्षिणि, मृगे च । विदग्धे,

केकानुप्रास पु० केकस्य विदग्धस्य प्रियोऽनुप्रासः शाक० । अनुप्रासभेदे शब्दालङ्कारे । [भेदे ।

केकोक्ति स्त्री० केकायाः विदग्धायाः उक्तिः । वक्रोक्तिरूपेऽलङ्कार-

केद केदने अद० चु० उभ० सक० सेट् केदयति ते अचिकेदत् त ।

केद पु० किद-घञ् । केदने केदके भाजके च "केदं गुणं गुणं केदमिति लीलावती । कर्मणि घञ् । खण्डे, "वक्षाःकवाटकेद-विभङ्गराग" मिति कुमारः ।

कैदिक पु० केदं नित्यं सर्पति ठक् । वेतसे ।

कोऽ केदने दि० पर० सक० अनिट् । च्छ्यति अच्छात् अच्छासीत् ।

कोटिका स्त्री० चु० छुट-ण्वुल् । तर्जन्यङ्गुष्ठजनिते शब्दे ।

क्षु गतौ भ्वा० आत्म० सक० अनिट् क्षवते अच्क्षोष्ट ।

ज

ज पु० जि-जन-वा ड णिच्, विष्णौ, जनके, वेगे, शुक्रौ विषे, छन्दोग्रन्थोक्ते गुरुमध्यगे वर्णत्रये च ।

जक्ष भक्षणे सक० हासे अक० अदा० जक्षा० पर० सेट् । जक्षिति अजक्षीत् ।

जगच्चक्षुः पु० जगतां चक्षुरिव सर्वपदार्थदर्शकत्वात् । सूर्ये

जगत् पु० गम–क्विप् नि० । वायौ । जङ्गमे त्रि० विश्वे लोके न० ।

जगत्प्राण पु० जगतां प्राणो जीवनहेतुत्वात् । वायौ ।

जगत्साक्षिन् पु० जगतां साक्षीव सर्वस्य साक्षाद्दर्शनात् । सूर्य्ये ।

जगती स्त्री० गम–क्विप् नि० । पृथिव्यां, भुवने, जने, लक्ष्मीलतायां, वास्तुभेदे, द्वादशाक्षरपादके छन्दोभेदे च ।

जगदाधार पु० ६त० । वायौ, जगतामाश्रये च "कालो हि जगदाधार" इति स्मृतिः । [मिति स्मृतिः ।

जगद्धात्री स्त्री०धा–तृच् ६त० । दुर्गाभेदे । "उद्बुद्धाञ्च जगद्धात्री"

जगद्योनि पु० जगतां योनिरुत्पत्तिः यस्मात् । शिवे, विष्णौ, हिरण्यगर्भे, कुमारे च । ६त० पृथिव्याम् ।

जगन्नाथ पु० ६त० । विष्णौ, तदीयक्षेत्रभेदे, विमलापीठस्थे भैरवभेदे च ।

जगल पु० गल–अदने यङ् अच् नि० । मद्यकलके (मदेर गोडा) मदनवृक्षे, पिष्टमद्ये धूर्त्ते च ।

जग्ध त्रि० अद–क्त । भुक्ते ।

जग्धि स्त्री० अद–क्तिन् । भोजने, सक्थभोजने च ।

जघन न० वक्रं हन्ति हन–यङ् अच् पृ० । स्त्रीणां श्रोणिपुरोभागे, श्रोणौ च । "पीनस्तनजघनाया" इत्युद्भटः ।

जघनेफला स्त्री० जघने इव मध्यभागे फलमस्याः अलुक् स० । काकोडुम्बरिकायाम् ।

जघन्य त्रि० हन–यङ् अच् पृ०, जघनमिव इवार्थे यत् वा । अधमे, चरमे, गर्हिते च । शूद्रे पु० । जघनमनुशीलितं यस्य । पुंसां लिङ्गे ।

जघन्यज पु० जघन्ये चरमे जायते जन–ड । शूद्रे, कनिष्ठे त्रि० ।

जङ्गम त्रि० गम–यङ्–अच् । गतिशक्तियुते ।

जङ्गल न० गल–यङ्–अच् पृ० । वने, रहसि च । मांसे पु० ।

जङ्घा स्त्री० जङ्घन्यते कुटिलं गच्छति गत्यर्थकस्य हन्तेः कौटिल्ये यङ्–अ पृ० । गुल्फजानोरन्तराले अवयवे ।

जङ्घाकरिक त्रि० कृ—अप् करः त्रिलो० ईत० ततः अस्त्यर्थे ठन्। जङ्घाचलनेनाजीवति धावके (धावडे)।

जङ्घाल त्रि० जङ्घा वेगवती अस्त्यस्य लच्। धावके जङ्घाजीविनि। "हरिणैणकुरङ्गर्ष्यृष्यपतन्यङ्कुशम्बराः। राजीवश्च तथा शुण्डी जङ्घालाः परिकीर्त्तिता" इत्युक्तेषु मृगेषु पु०।

जङ्घिल त्रि० अतिशयवेगवती जङ्घास्त्यस्य इलच्। वेगवज्जङ्घाविशिष्टे धावके।

जज युद्धे भ्वा० पर० अक० सेट्। जजति अजाजीत्—अजजीत्।

जञ्ज योधने भ्वा० पर० सक० सेट् इदित्। जञ्जति अजञ्जीत्।

जट संहतौ भ्वा० पर० अक० सेट्। जटति अजाटीत् अजटीत्।

जटा स्त्री० जट—अच्। अन्योन्यसंलग्ने केशे, अतिनां शिखायाम्, सिंहादेः सटायाम्, वृक्षादेर्मूले, (जड़) जटामांस्यां, वेदस्य पाठभेदे, रुद्रजटायाम् लतायाम् शतावर्य्यां च।

जटाजूट पु० ईत०। जटानां जूटे (बन्धे) समूहे च "जटाजूटसमायुक्तामिति दुर्गाध्यानम्। [गन्धद्रव्यभेदे।

जटामांसी पु० जटां मन्यते मन—स दीर्घश्च। खनामख्याते

जटायु(स्) पु० जटां याति वा-क, जट—संहतौ अच् जटं संहतमायुरस्य वा। खनामख्याते खगभेदे, गुग्गुलौ च।

जटाल पु० जटास्त्यस्य लच्। गुग्गुलौ, वटे, कर्पूरे, सुष्कके च। जटायुक्ते त्रि०। जटामांस्यां स्त्री०।

जटावल्ली स्त्री० जटेव वल्ली। रुद्रजटायाम्।

जटि(टी) पु० जट-इन्। वटवृक्षे, समूहे च। जटामांस्यां स्त्री० वा ङीप्।

जटिन् पु० जटा अस्त्यस्य इनि। मुञ्जे (पाकुड़) अश्वत्थतुल्यपत्रयुक्ते वृक्षभेदे। जटावति त्रि०।

जटिल पु० जटा अस्त्यर्थे इलच्। सिंहे, ब्रह्मचारिभेदे च। जटायुक्ते त्रि०। जटामांस्यां, पिप्पल्यां, वचायां, दमनवृक्षे च स्त्री०।

जटु(डु)ल पु० जट–उलच् पृ० टस्य ड वा । देहस्थे कृष्णचिह्न भेदे पिल्ली (जडुल) । [वृद्धे, कठिने च त्रि० ।

जठर न० जायते जन्तुर्गर्भो वास्मिन् जन–अर–ठान्तादेशः । वृक्षौ ।

जड त्रि० जलति घनीभवति जल–अच् डस्य लः । दृष्टानिष्टानभिज्ञे, हिमार्त्ते, मूके, बुद्धिहीने, अप्रकाशे, वेदग्रहणासमर्थे मूर्खे च । जले, सीसके च न० । जडयति तत्करोति णिच्–अच् । सूकशिम्ब्यां भूम्यालक्ष्याञ्च स्त्री० टाप् ।

जतु न० जन–उ तोन्तादेशः । अलक्तके, लाक्षायाञ्च ।

जतुका स्त्री० जतु+स्वार्थे कन् । (चामचिका) पक्षिभेदे गन्धद्रव्यभेदे, जन्यां, पर्पट्यां, तिर्य्यक्फलायां, निशान्धायाञ्च ।

जतुकारी स्त्री० जतु करोति कृ–अण् ङीप् । जतुकालतायाम् ।

जतुरसः पु० ६त० । अलक्तके । [स्थितयोरस्थ्नोश्च ।

जत्रु न० जन–रु तान्तादेशः । स्कन्धकक्षयोः सन्धौ, कण्ठस्याधोभाग-

जन जनने जुहो० पर० अक० सेट् घटा० । जजन्ति । अजनत्–अजनीत् अजानीत् । जनयति जनितः । [र्यति जातः ।

जन जनने दि० आ० अक० सेट् घटा० । जायते अजनिष्ट । जन-

जन पु० जन–अच् । लोके, पामरलोके, मर्त्यलोकादूर्द्ध्वलोके च ।

जनक पु० जन–णिच्–ण्वुल् । पितरि, मिथिलाधिपे राजभेदे च । कारणे त्रि० ।

जनकसुता स्त्री० जनकस्य सुतया ख्याता । सीतादेव्यां रामपत्न्याम् ।

जनता स्त्री० जनानां समूहः तल् । जनसमूहे ।

जननि(नी) स्त्री० जन–अनि वा ङीप् । मातरि, जननामगम्यद्रव्ये, दयायां, कटुकायाम्, अलक्तके, जटामांस्याञ्च ।

जनपद पु० जनाः पद्यन्ते गच्छन्ति यत्र पद–घ । देशे ।

जनमेजय पु० जन+एज–णिच्–खश् मुम्च् । परीक्षिद्राजपुत्रे, नृपभेदे । पृ० जन्मेजयोऽप्यत्र ।

जनयित्र पु० जन–णिच्–त्रच् । पितरि । मातरि स्त्री० ङीप् ।

जनर्लोक पु० मर्त्यलोकोपरि भुवनभेदे ।

जनवल्लभ पु० ई॰त० । श्वेतरोहितवृक्षे । जनप्रिये त्रि० ।

जनश्रुति स्त्री० जनेषु श्रुतिरेव न दृष्टिर्यस्याः । सत्यमिथ्यासाधारण-लोकप्रसिद्धौ किम्वदन्त्याम् ।

जनस्थान न० दण्डकारण्यस्य समीपे स्थानभेदे, जनाधारस्थाने च । जनस्थाने श्रान्तमित्युद्भटः ।

जनान्तिक न० ई॰त० । जनानामीपे, अप्रकाशे; त्रिपताककरेणान्या-नपवार्यान्तिके जनान् । अन्योन्यामन्त्रणं यत् स्यात् जनानां तज्जनान्तिकमित्युक्तं नाटकेऽभिनयकर्त्तृभिरन्योन्यगुप्तभाषणे च ।

जनार्दन पु० जनैरर्द्यते याच्यते स्वाभीष्टमसौ अर्द्-याचने कर्म्मणि ल्युट्, जनं जननमर्दयति वा अर्द्-हिंसायां ल्यु वा । विष्णौ ।

जनाश्रय पु० जनानां लोकानामाश्रयः । मण्डूके ।

जनि(नी) स्त्री० जन-भावे क्विन् वा ङीप् । उत्पत्तौ अभूतप्रादुर्भावे, जायते गर्भोऽस्याम्, नार्य्याम् । मातरि, स्नुषायां, जायायाञ्च । जायते आरोग्यमनया । ओषधिभेदे जतुकायाञ्च ।

जनुस् न० जन-उसि । उत्पत्तौ ।

जनु(नू) स्त्री० जन-उ वा ऊङ् । उत्पत्तौ ।

जनेष्ट पु० जनानामिष्टः । सुन्दरवृक्षे । वृद्धिनामौषधौ, जातीपुष्पे, हरिद्रायां जतुकायाञ्च स्त्री० । [मानिनि जीवे ।

जन्तु पु० जन-तु । जननशीले प्राणिनि अविद्यादोषात् देहात्माभि-

जन्तुका स्त्री० जन्तुभिः कायति प्रकाशते कै-क । लाक्षायां, तस्याहि कीटैः प्रकाशः । छिङ्गुले च ।

जन्तुघ्न पु० जन्तून् क्रमीन् हन्ति टक् षीजपुरे । विड्ङ्गे, छिङ्गनि च न० । प्राणिघातके त्रि० ।

जन्तुफल पु० जन्तवः फलेऽस्य । उदुम्बरे ।

जन्तुमारी स्त्री० जन्तून् क्रमीन् मारयति मृ-णिच्-अण् उप० । निम्बूके (निमकी) । [वृश्चिकीटानां स्थितिः ।

जन्तुला स्त्री० जन्तून् कीटान् लाति ला-क । काशतृणे तत्र हि

जन्मन् न० जन-मनि । उत्पत्तौ, आद्यक्षणसम्बन्धे, गर्भवासयौ

निनिःसारणन देहस्य हृत्तो, न्यायादुक्ते अपूर्वदेहादिभिः सम्बन्धे, ज्योतिषोक्ते जन्मनक्षत्रे, स्वावधिके दशमे जनविंशे च नक्षत्रे, जन्मलग्ने च ।

जन्ममास पु० ईत० । "आरभ्य जन्मदिवसं यावत् त्रिंशद्दिनानि च । जन्ममासः स विज्ञेय वर्ज्जितः सर्वकर्मसु" त्युक्ते जन्मदिनावधिके त्रिंशद्दिनात्मके मासे ।

जन्मान्तर न० अन्यत् जन्म मयु० । भवान्तरे परलोके ।

जन्माष्टमी स्त्री० श्रीकृष्णस्य जन्मतिथौ सुख्यचान्द्रेण श्रावणस्य कृष्णाष्टम्याम् ।

जन्मिन् पु० जन्मास्त्यस्य व्रीह्यादि० इनि । प्राणिनि जीवे ।

जन्य त्रि० जन–कर्त्तरि यत् । जायमाने । जन–णिच्–यत् । उत्पाद्ये, जनके च । जनीं वधूं वहति नयति वा यत् । नवोढाज्ञातिमित्रभृत्यस्निग्धेषु त्रि० । अष्टे, परीवाहे, प्रीतौ, युद्धे, देवे च पु० । भावे यत् । जनने न० । मातृवयस्यायां स्त्री० ।

जप उच्चारणे वाचि च भ्वा०पर०सक०सेट् । जपति अजापीत्–अजपीत् ।

जप पु० जप–अच् । वेदमन्त्रादेरावृत्तौ यत्सङ्ख्यउच्चारणे "जपस्तङ्ख्यापणं ध्येयसम्मुखीकरणं मुने" इत्युक्ते मन्त्रादिभाषणे च ।

जपा(वा) स्त्री०जप–अच् वा पक्ष यः । स्वनामख्याते क्षुद्रे तत्पुष्पे च ।

जभ मैथुने भ्वा० पर० सक० सेट् । जभति अजम्भीत् ।

जभ मैथुने भ्वा० पर० सक० सेट् इदित् । जम्भति अजम्भीत् ।

जभ जृम्भणे भ्वा० आत्म० अक० सेट् इदित् । जम्भते अजम्भिष्ट ।

जभ नाशे चुरा० उभ० सक० इदित् । जम्भयति-ते अजजम्भत् त ।

जभ जृम्भणे भ्वा० आत्म० सेट् । जभते अजम्भिष्ट ।

जम भक्षे भ्वा०पर०अक०सेट् । जमति अजमीत् । जमित्वा-जान्त्वा ।

जमदग्नि पु० । परशुरामस्य पितरि मुनिभेदे ।

जम्पती पु०द्वि०व० । जाया च पतिश्च द्व० जायाया जम् । दम्पत्योः स्त्रीपुरुषयोः । [भैवाले, केतक्याञ्च ।

जम्बाल पु० जम्ब–घञ् जम्बमालाति आदत्ते आ+ला–क । पङ्के,

जम्बालिनी स्त्री० जम्बाल+अस्त्यर्थे इनि। नद्याम्।

जम्बीर पु० जम-बिच् वीर-विक्रान्तौ क कर्म० (गोड़ानेबु) वृक्ष-भेदे, मरुयके, सितार्जके च।

जम्बु(म्बू) स्त्री० जम-कू नि० वुक् पृष० वा ऊङ् (जाम)। इति ख्याते वृक्षे। तस्याः फले अण् तस्य वा लुप्। जाम्बवम्। वा ङीषि। जम्बु चाप्यत्र।

जम्बुक पु० जम्बुरिव कायति कै-क। (गोलापजाम) इति ख्याते वृक्षे, श्योनाकभेदे च। स्वार्थे कन् जम्बुशब्दार्थे।

जम्बुद्वीप पु० जम्बुवृक्षचिह्नितो द्वीपः शाक०। सप्तद्वीपमध्ये स्वनामख्याते द्वीपभेदे।

जम्बूक पु० जम० उलूकादि० नि०। शृगाले, नीचे, वकृणे. जम्बु-कार्थे च (गोलापजाम) द्राक्षाभेदे स्त्री०।

जृम्भ पु० जृभि-भज्। दैत्यभेदे, दन्ते, जम्भारे, अग्नौ, क्षनौ, तृणे च भावे घञ्। भक्षणे जृम्भणे च। अ। जृम्भायां स्त्री०।

जृम्भभेदिन् पु० जृम्भं दैत्यं भिनत्ति भिद्-णिनि। इन्द्रे जृम्भभेदना-दयोऽप्यत्र।

जृम्भला स्त्री० जृम्भं जृम्भां लाति ला-क। राक्षसीभेदे तस्याः स्मरणे ज्वरनाशात् ज्वरनाशे च तत्पूर्वाङ्गजृम्भाया अपि नाशः "वसुदेवोत्तरे तीरे जृम्भला नाम राक्षसी"ति।

जय पु० जि-भावे अच्। शत्रूणामभिभावने, नारायणपार्श्वचरे, "एतौ द्वौ पार्श्वगौ मह्यं जयो विजय एवचे"ति भागवतम् विराट-पुरस्थे गुप्तसंज्ञके युधिष्ठिरे च।

जयढक्का स्त्री० जयसूचिका ढक्का। वाद्यभेदे।

जयद्रथ पु० जयन् रथो यस्य। सिन्धुराजे दुर्योधनभगिनीपतौ स्व-नामख्याते नृपे, सूर्य्ये, भीमे च।

जयन्त पु० जि-झच्। इन्द्रस्य पुत्रे चन्द्रे, शिवे, विराटपुरस्थे गुप्त-संज्ञके भीमे च।

जयन्ती स्त्री० जयति रोगान् अन्यान्यौ धान्यि वा जि-झच् ङीप्।

जरायाम्, नादेय्याम् दुर्गाभेदे "जयन्ती मङ्गला काली"ति मन्त्रः। पताकायाम्, जयन्तीवृक्षे, "रोहिणीसहिता कृष्णा भाद्रे च श्रावणेऽष्टमी। अर्द्धरात्रादधश्चोर्द्धम् कलयापि यदा भवेत् जयन्ती नाम सा प्रोक्तेत्युक्तलक्षणे योगभेदे च।

जयपत्र न० जयसूचकं पत्रम्। "पूर्वोत्तरक्रियायुक्तं निर्णयान्तं यदा भवेत्। प्रदद्यात् जयिने लेख्यं जयपत्रं तदुच्यते"इत्युक्ते पत्रे

जयपाल पु० जयेन मलजयेन पालयति पाल–अण्। स्वनामख्याते शारकफलके वृक्षे। हैत०। विष्णौ, नृपे च।

जया स्त्री० जि अच्। हरितक्याम्, जयन्त्याम्, दुर्गायां तत्सहचर्य्यां गणिकारिकायां, विजयायां (भङ्गा) पताकाभेदे, नीलदूर्वायाम्, शान्तावृक्षे, ज्योतिषोक्ते "त्रयोदश्यष्टमी चैव तृतीया च जया-मते"त्युक्ते तिथिसमुदाये च।

जय्य त्रि० जेतुं शक्यः जि–यत् क्रियजय्यौ तदर्थे नि०। जेतुं शक्ये

जरठ त्रि० जॄ–अरठच्। कर्कशे, कठिने, पाण्डौ, जीर्णे च।

जरण पु०न०। जॄ णिच्–ल्यु। जीरके, हिङ्गुनि, सौवर्चले, कृष्णौ-षधौ च। कासमर्दे पु०। कृष्णजीरके स्त्री०।

जरत् त्रि० जॄ–अतृन्। वृद्धे, जीर्णे, जरायुक्ते, पुराणे च। स्त्रियां जरती।

जरत्कारु पु० मनसादेव्याः पत्यौ मुनिभेदे। मनसादेव्यां स्त्री०

जारुध पु० जरन् गौः अच् समा०। वृद्धोक्षे, ऋषभेदे च।

जरन्त पु० जॄ–झच्। मक्षिकायाम्। जीर्णे त्रि०।

जरा स्त्री० जॄ–अङ्। शैथिल्यापादकावस्थाभेदे।

जरायु न० जरामेति अण्। गर्भावरणचर्मणि गर्भगिल्ये, जटायौ पक्षिणि च।

जरायुज त्रि० जरायुतो जायते जन–ड। "एकशफेषु मृगादौ व्याला-मोमयलोहितः। रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजा"इत्युक्ते पश्वादिमनुष्यान्तेषु "आनुचर्यकृतिः सूक्ष्मा जरायुः सा निगद्यते शुक्रशोणितयोर्योनिसङ्क्षिप्तं पिण्डमावृतो यतः। तस्मात् गर्भो मनोद्यस्मात्

तेन प्रोक्तोजरायुज इत्युक्ते गर्भे च । [निरूक्तौ नटभेदे ।
जरासन्धः पु० "जरया सन्धितो यस्मात् जरासन्धस्ततोऽभवदित्युक्त-
जरुथ पु०न० जृ–अथन् । स्तोत्रमांसे । [अज(र्ची)(र्क्षी)(र्जी)त् ।
जर्ज (र्ज्ज)(र्जि) उक्तौ भर्त्सने च तु० पर० सक० सेट् । जर्च(र्ज्ज)(र्ज)ति
जर्जर पु०न० । जर्ज्ज–अरन् । शक्रध्वजे, शैलजे, गन्धद्रव्ये च ।
जीर्णे त्रि० । [जीर्णे त्रि० ।
जर्जरीक त्रि० जर्ज–ईकन् पर्फरीकादि० नि० । बहुछिद्रे द्रव्ये ।
जर्भ उक्तौ निन्दायाञ्च तु०पर०सक० सेट् । जर्भति अजर्भीत् ।
जर्भिल पु० जृ–बिच् कर्म० । व्यरण्यतिले ।
जर्म भर्त्सने उक्तौ रुजायां च भ्वा०पर०सक०सेट् । जर्मति अजर्मीत् ।
जल आच्छादने चुरा० उभ०सक० सेट् । जालयति ते अजीजलत् त ।
जल तीक्ष्णतादिशब्दे भ्वा०पर० सक० सेट् ज्वलादि । जलति अजा-
लीत् । जलः जालः ।
जल त्रि० जल–क्विप् । जडे । उद्दे, स्थावरे गन्धद्रव्ये ज्योतिषोक्ते
लग्नावधिके चतुर्थस्थाने, पूर्वाषाढानक्षत्रे च न० ।
जलकण्टक पु० जलस्य कण्टक इव । शृङ्गाटके । (पानफल) कुम्भीरे च
जलकपि पु० जले कपिरिव । शिशुमारे जलजन्तुभेदे (सोंसक) ।
जलकरङ्क पु० जलस्य करङ्क इवाधारः । नारिकेले, मेघे च । जले
करङ्क इव । शुष्के जललतायाञ्च ।
जलकाक पु० जले काक इव । (पानकौडी) पक्षिभेदे ।
जलकुन्तल पु० जलस्य कुन्तल: केश इव । शैवाले ।
जलचर पु० जलेचरति चर–टच् । आकाशादिषु जलजन्तुषु ।
जलज पु० जले जायते जन–ड । शैवाले, वानीरवृक्षे क्षिञ्जलवृक्षे,
मत्स्ये, ज्योतिषोक्तेषु कर्कटवृश्चिनमकरान्त्यराशिषु च । चारभेदे
पद्मे च न० । शङ्खे पु०न० । जलजातमात्रे त्रि० ।
जलजन्तु पु० ईत० जलस्थेषु आकाशादिषु प्राणिषु ।
जलजा स्त्री० जलजन्तुरत्यर्थं वलु । जलौकायाम् (जोंक) ।
जलद पु० जलं ददाति दा–क । मेघे, वर्षूरे च जलदातरि त्रि० ।

जलदागम पु० जलदानामागमो यस्मिन् काले। वर्षाकाले।

जलधर पु० जलानां धरः ष-अच्। मेघे-कर्पूरे, समुद्रे, तिलिश-वृक्षे च। जलधारिणि त्रि०। [भेदे च।

जलधरमाला स्त्री० ई त०। मेघपङ्क्तौ, द्वादशाक्षरपादके छन्दो-

जलधि पु० जलानि धीयन्तेऽत्र धा-कि। समुद्रे। तीर्यधिप्रभृतयो-ऽप्यत्र, चतुःसङ्ख्यायां संख्याभेदे, "जलधिश्चान्त्यं मध्यं परार्द्ध-मि"ति लीलावती।

जलधिजा स्त्री० जलधेर्जायते जन-ड। लक्ष्म्याम्।

जलनिधि पु० जलानि निधीयन्तेऽत्र नि-धा-कि। समुद्रे चतुः-संख्यायाञ्च।

जलनिर्गम पु० जलानां निर्गमः। नद्यादेर्जलभ्रमणे, अधःस्थितस्य जलस्योर्द्धगतौ, प्राकारादिषु जलनिस्सारणजालके च।

जलनीली स्त्री० जलं नीलयति नील+तत्करोति णिच् अण्। शैवाले। स्वार्थे क न् जलनीलिकाप्यत्र।

जलपृष्ठजा स्त्री० जलस्य पृष्ठे उपरि जायते जन-ड। शैवाले।

जलप्राय न० जलं प्रायं यत्र। जलबहुले देशे।

जलप्लव पु० जले प्लवते प्लु-अच्। (डहुविराल) जलजन्तुभेदे।

जलबुद्बुद न० ई त०। जलबिम्बे।

जलमनु पु० जले मनुरिव निरन्तरमज्जनोन्मज्जनत्वात् मनुस्मरङ्कविहगे

जलमार्ग पु० ई त०। प्रणाल्याम् (नाला) (नरदामा)।

जलमुच् पु० जलानि मुञ्चति मुच-क्विप्। मेघे।

जलमोद न० जलेन जलयोगेन मोदयति सेवितं मुद-णिच् अच्। उशीरे (बेणारमूल)। [धारायन्त्रे।

जलयन्त्र न० जलानामुत्क्षेपणार्थं यन्त्रम्। (फोहारा) ख्याते

जलवल्क पु० जलानां वल्कल इव। कुम्भिकायाम्।

जलविषुव न० रवेः तुलाराशिसंक्रान्तौ।

जलवेतस पु० जले जातो वेतसः शाक०। वेतसभेदे।

जलव्याल पु० जलस्थो व्यालो हिंस्रः। सर्पभेदे, क्रूरकर्मणि जन्तौ च।

जलशायिन् पु० जले समुद्रजले शेते शी–णिनि । नारायणे ।
जलशुक्ति स्त्री० जलस्य शुक्तिरिव । शम्बूके ।
जलशूक न० जलस्य शूकमग्रम् । शैवाले ।
जलशूकर पु० जलस्य शूकर इव । कुम्भीरे ।
जलसर्पिणी स्त्री० जले सर्पति सृप–णिनि । जलौकायाम् (जोंक) ।
जलहस्तिन् पु० जले हस्तीव । ग्राहाख्ये जलजन्तौ । ७त० । जलस्थे हस्तिरूपे जन्तुभेदे ।
जलहास पु० जलानां हास इव शुभ्रत्वात् । फेने, समुद्रफेने च ।
जलाधार पु० ६त० । तड़ागादौ जलाधारे समुद्रे च । जलमाधारो यस्य । गृञ्जाटके । उभौरे न० । जलस्थिते त्रि० एवं जलाश-यादयोऽपि शब्दा अत्रार्थे बोध्याः ।
जलार्द्रा स्त्री० जलेनार्द्रा । जलेनार्द्रीकृते व्यजने ।
जलालूक न० ६त० । शालूके, पद्मादिकन्दे मृणालमूले च ।
जलावर्त्त पु० आ+वृत–णिच्–अच् ६त० । स्वतो जलानां भ्रमणे ।
जलूका स्त्री० जलमोको यस्याः पृ० । जलौकायाम् ।
जलेचर पु० जले चरति चर–टक् अलुक् स० । हंसादौ ।
जलेन्धन पु० जलान्येवेन्धनानि यस्य । वाड़वानले ।
जलेरुहा स्त्री० जले रोहति–रुह–अच् अलुक् स० । कुटुम्बिनीवृक्षे ।
जलेशय पु० जले शेते शी–अच् अलुक् स० । मत्स्ये ।
जलेश्वर पु० ६त० । वरुणे, समुद्रे च ।
जलोच्छ्वास पु० जलान्युच्छ्वसन्त्यस्मिन्; उद्–श्वस–घञ् । प्रवहज्जलस्य निर्गममार्गे, अधिकजलस्य सर्वतोवहने च ।
जलोदर न० जलप्रधानमुदरं यस्मात् ५ब० । उदरामयरोगभे
जलोद्भवा स्त्री० जले उद्भवति उद्+भू–अच् । स्वल्पब्राह्मीशाके ।
जलौकस् स्त्री० जलमोको वसतिरस्याः । (जोंक) ख्यातायां रक्त-पायाम् । अमरमते ब० व० ।
जलौकस पु० जलमोको ऽस्यस्य अच् । (जोंक) रक्तपायां जलौकसे-नेव रक्ताकृटिनिपुणेन वेश्याजनेनेति वासवदत्ता ।

जलौका स्त्री० उच क नि० क जलमोकः स्थानं यस्याः। (जोंक) रक्तपायाम्। [कल्पनाधिनाथे" इति न्यायशिरोमणिः।

जल्प वाग्विशेषे भ्वा०पर०सक०सेट्। जल्पति अजल्पीत्। "मयि जल्पति

जल्प पु० जल्प-घञ्। परमतनिकारणपूर्वकं स्वमतस्थापनरूपे वाक्यभेदे, तत्त्वबुभुत्सोः कथारूपे वादे, कथने च।

जल्पाक त्रि० जल्प-पाकन्। बहुकुत्सितवाक्यवदनशीले (वाचाल)।

जव संघाते चुरा०उभ०अक०सेट् इदित्। जम्बयति-ते अजजम्बत् त।

जव पु० जु-अप्। वेगे।

जवन पु० जु-युच्। वेगवति शीघ्रके घोटके। देशभेदे, जातिभेदे च।

जवनिका स्त्री० जवन्यस्यां जू-ल्युट् स्वार्थे कन्। (कानात्) (परदा) ख्याते वस्त्रभेदे।

जवस न० जु-असच्। घासे।

जविन् पु० जवोऽस्त्यस्य इनि। घोटके, उष्ट्रे च। वेगवति त्रि०।

जष वधे भ्वा० उभ० सक० सेट्। जषति ते अजाषीत्-अजषीत्।

जस मोक्षणे दिवा० पर० सक० सेट्। जस्यति अजसत्-अजासीत् अजसीत्। [जसत् त।

जस वधे अनादरे च चुरा० उभ० सक० सेट्। जासयति ते अजी-

जस रक्षणे चु० उभ०सक० सेट् इदित्। जंसयति ते अजजंसत् त।

जहत्स्वार्था स्त्री० जहत् स्वार्थौयाम्। लक्षणाभेदे, यथा आयुर्घृतं

जहदजहल्लक्षणा स्त्री० जहच्च अजहच्च स्वार्थौयां तादृशी लक्षणा। वाच्यार्थैकदेशत्यागेनैकदेशग्रहणौ लक्षणायाम् यथा सोऽयं देवदत्त इत्यत्र तत्कालैतत्कालरूपार्थत्यागेन केवलदेवदत्तमात्रार्थबोधनात् वाच्यार्थैकदेशग्रहिता।

जहल्लक्षणा स्त्री० जहत् स्वार्थौयाम् उत्तरपदलोपः कर्म०। जहत् स्वार्थायां लक्षणायाम्। यथा आयुर्घृतम्।

जह्नु पु० चन्द्रवंशीये राजर्षिभेदे येन गङ्गावतरणकाले गङ्गा-पीतेति पुराणम्। [गङ्गायाम्।

जह्नुतनया स्त्री० जह्नोस्तनयेव तदुदरं गत्वा ततो निःसरणात्।

जङ्घसप्तमी स्त्री० वैशाखशुक्लसप्तम्याम् ।

जागर पु० जाग्—अप् । निद्राभावे जागरणे, कवचे च ।

जागरित न० जाग्—क्त । इन्द्रियैर्विषयोपलब्धियोग्यावस्थायाम् । जीवोहि स्वप्नादिहेतुकर्मनाशे इन्द्रियविषयान् अनुमेयांश्च स्थूलविषयान् व्यवहारिकांश्च पदार्थान् यस्यामवस्थायामनुभवति तज्जागरितम् । कर्त्तरि—क्त । जागरणयुक्ते त्रि० । [संज्ञे जीवे ।

जागरितस्थान पु० जागरितं स्थानमस्य । वेदान्तोक्ते विश्व-

जागरूक त्रि० जाग्+ऊक । जागरणशीले, अप्रमत्ते च ।

जागर्य्या स्त्री० जाग्—ण्य । जागरणे । ष्यञ् । जागराभवे ।

जाग्र निद्राभावे अदा०पर०अक०सेट् जक्षा० । जागर्त्ति अजागरीत् ।

जाग्रवि पु० जाग्र+क्विन् । अग्नौ, नृपे च ।

जाग्रत् न० जाग्र—शतृ । इन्द्रियादिभिः विषयज्ञानयोग्यावस्थायाम् । तद्वति त्रि० स्त्रियां ङीप् ।

जाङ्गल पु० जङ्गले भवः, तत् शीलितं यस्य वा अण् । कपिञ्जले खगे निर्जलदेशे हरिणादिषु पशुषु कुरुदेशसमीपस्थे देशे च तद्देशस्थे त्रि० ब०व० ।

जाङ्गलि पु० जङ्गलं परिशीलितमस्य जङ्गल—इञ् । विषवैद्ये ।

जाङ्गलिक पु० जाङ्गल्यां विषविद्यया चरति ठक् । विषवैद्ये ।

जाङ्गली स्त्री० जाङ्गलेरियम् अण् ङीप् । विषविद्यायाम्, शुक्लगिम्बशाके च ।

जाङ्गुली स्त्री० गम—यङ् उलच् नि० ङीप् । विषविद्यायाम् ।

जाङ्घिक त्रि० जङ्घाभ्यामाजीवति वेतनादि० ठक् । धावके, जङ्घाजीविनि । उष्ट्रे पु० । [च त्रि० ।

जात न० जन—क्त । समूहे, व्यक्ते, जन्मनि च । उत्पन्ने, प्रशस्ते

जातक न० जातस्य हितम् कन् । जातस्य शुभाशुभनिर्णायके बृहज्ज्ञातकादौ ग्रन्थे, जातकर्म्मरूपे संस्कारभेदे च ।

जातकर्म्मन् न० जातस्य कर्म मन्त्रवत् सर्पिःप्राशनादि । संस्कारभेदे ।

जातमात्र त्रि० जात एव मयूर० । सद्योजाते बालकादौ ।

जातरूप न० जातं रूपमस्य । प्रशस्तवर्णे, स्वर्णे ।

जातवेदस् पु० जातान् प्राणिनः विन्दते जठरानलत्वेन विदलाभे असुन् । वह्नौ, चित्रकवृक्षे च ।

जाति स्त्री० जन–क्तिन् । जन्मनि, अनुगतैकाकारबुद्धिजननसमर्थे, अवयवव्यङ्ग्ये सकृदुपदेशव्यङ्ग्ये च धर्मभेदे, यथा गोत्वमनुष्यत्वादि ब्राह्मणत्वशूद्रत्वादि च । व्याकरणोक्ते गौत्राद्यपत्यात्मके गोत्रे, वेदशाखाभेदे च । न्यायोक्ते साधर्म्यवैधर्म्याभ्यां व्याप्तिनिरूपेत्राभ्यां वादिवाक्येषु दूषणदानरूपे वाक्ये, षड्जादिषु सप्तसु स्वरेषु, अलङ्कारभेदे, चुक्राम्, आमलक्याम्, काम्पिल्ले, छन्दसि, जातिफले, मालत्यां, (चामेली) पुष्पप्रधानवृक्षे च । [स्त्री० ङीप् ।

जातिकोष न० जात्याः कोषमिव (जायफल) जात्याम् जयन्त्याम्

जातिब्राह्मण पु० जात्या ब्राह्मणः । "तपःश्रुत्याभ्यां यो हीनो जातिब्राह्मण एव सः" इत्युक्ते निन्द्ये विप्रे ।

जातिफल न० जात्याः फलम् (जायफल) जातिफले ।

जातिस्मर त्रि० जातिं पूर्वजन्म स्मरति स्मृ–अच् । अतीतजन्मवृत्तान्तस्मर्तृत्युक्ते जने । [भेदे च यस्याः फलं (जायफल) ।

जाती स्त्री०जन-क्विच् ङीप् । मालत्याम् (चामेली) तत्पुष्पेऽपि तथा-

जातीफल न० इतः (जायफल) इति ख्याते फले ।

जातीय त्रि० जातौ भवः छ । समानजातियुक्ते सजातीये किञ्चिच्छब्दात् जातीयप्रत्ययः । प्रकारार्थे । यथा तार्किकजातीयः तार्किकप्रकारः । [अविकल्पे, निषेधे च ।

जातु अव्य० जै–क्वये तुन् । कदाचिदित्यर्थे, शब्दे, निन्दायाम्

जातुधान पु० जातु कदाचिद्वस्तुं प्राप्य धनं सन्निधानमस्य । राक्षसे ।

जातुष त्रि० जतुनो विकारः अण् मुगागमः । जतुविकारनिर्म्मिते पदार्थे ।

जातूकर्ण पु० मुनिभेदे । [यागभेदः । जातकर्म्माख्ये संस्कारभेदे ।

जातेष्टि स्त्री० यज–क्तिन् इष्टिः जातस्य संस्कारार्थं कर्त्तव्या इष्टिः

जातोक्ष पु० जातः प्राप्तदम्यावस्थः उक्षा टच् समा० । युवबृषे ।

जात्य त्रि० जातौ भवः यत्। कुलीने, श्रेष्ठे, काले च।

जात्यन्ध त्रि० जातौ जन्मन्येवान्धः। जन्मान्धे "जात्यन्धोवधिरस्त-थे"ति मनुः। [न्यायोक्ते असदुत्तरे।

जात्युत्तर न० जात्या व्याप्तिविधुराभ्यां साधर्म्यवैधर्म्याभ्यामुत्तरम्।

जानकी स्त्री० जनकस्येयम् दुहितृत्वेन अण्। सीतायाम्।

जानपद त्रि० जनपदे भवः, तत आगतो वा अण्। देशस्थे देशादा-गते च। जनपदानां वृत्तौ स्त्री० ङीप्। [अर्थे।

जानु न० जन-उण्। जङ्घोरुमध्यभागे (हांटु) स्वार्थे कन्

जामदग्न्य पु० जमदग्नेरपत्यम् यञ्। जमदग्निपुत्रे परशुरामे।

जामातृ पु० जायां माति मिनोति मिमीते वा तृच्। दुहितृपतौ, बन्धुभेदे, स्वामिनि च।

जामि स्त्री० जन-मिण् नि० दृद्धिः। भगिन्यां दुहितरि, स्नुषायां, कुलस्त्रियां, सन्निहितस्त्रियाम्, "जामयो यानि गेहानी"ति मनुः

जाम्बवत् पु० रामायणप्रसिद्धे भल्लुकराजे।

जाम्बवती स्त्री० जाम्बवतोऽपत्यं स्त्री। कृष्णस्य भार्याभेदे जाम्बवत्-कन्यायाम् "शाम्ब! शाम्ब! महाबाहो! शृणु जाम्बवतीसुतेति" स्वर्यस्तवः। नागदन्त्याञ्च।

जाम्बूनद न० जम्बूनदे भवम् अण्। स्वर्णे "तीरस्थं तद्रसं प्राप्य सुखवायुविशोषिता। जाम्बुनदाख्यं भवति सुवर्णं सिद्धभूषणमि-त्युक्ते सुवर्णभेदे (तद्रसं जम्बूरसम्) धुस्तूरे च।

जायक न० जयति गन्धान्तरं जि-ण्वुल्। पीतवर्णे सुगन्धिकाष्ठे।

जाया स्त्री० जन-यक्। "पतिर्भार्यां संप्रविश्य गर्भोभूत्वेह जायते जायायास्त्वं जायात्वं यदस्यां जायते पुन"रित्युक्तायां स्त्रियाम्, ज्योतिषोक्ते लग्नतः सप्तमे स्थाने च।

जायाजीव पु० जायया जीवति जीव-क। नटे।

जायानुजीविन् पु० जायामनुजीवति अनु+जीव-णिनि। नटे, वेश्यापतौ, वके, दुःस्थे च।

जायु पु० जयति रोगान् जि–उण् । औषधे ।

जार पु० जीर्य्यतेऽनेन जॄ–करणे घञ् । उपपतौ ।

जारज त्रि० जारात् जायते जन–ड । अनियुक्तायामुपपतिजाते कुण्डे, गोलके च पुत्रे ।

जारणी स्त्री० जारयत्यनया चु०जॄ–करणे ल्युट् । स्थूलजीरके ।

जाल पु० चु० जल सम्बरणे घञ्, जल–घातने, णिच्–अच्, जले–क्षिप्यते इत्यण् वा । कदम्बवृक्षे गवाक्षच्छिद्रे "गवाक्षजालैरभि-निष्पतन्त्य" इति भट्टिः । मत्स्यधारणार्थे ग्रथनसूत्रनिर्म्मिते स्वनाम-ख्याते आनाये, अस्फुटकलिकायां, क्षुद्रफले, मृगपक्ष्यादिधारणार्थे पाशे च । घासे, दम्भे, समूहे, इन्द्रजाले च न० । स्वार्थे कन् । गवाक्षच्छिद्रे पु० । मोचकफले नवकलिकासमूहे, चारके च न० ।

जालकारक पु० क–ण्वुल् ह्रस्व० । जालस्य मक्षिकादिपातनाय पाशकारके-मर्कटे (माकड़सा) पाशस्य क्रियमस्य च कर्त्तरि त्रि० ।

जालन्धर पु० त्रिगर्त्ताख्ये देशे तद्देशस्थे जने ब० व० ।

जालपाद पु०जालमिव पादावस्य पाद्भावः । हंसे (चखारि)पक्षिभेदे च ।

जालवर्वुरक पु० जालाकारो वर्वुरकः । (काँटावाबला) वृक्षभेदे ।

जालिक पु० जालेन चरति जाल+ठक् । वागुरिके जालजीविनि, कैवर्त्ते, मर्कटके च । जालोपजीविनि त्रि० ।

जालिनी स्त्री० जाल+अस्त्यर्थे इनि । चित्रगालायां, कोपातक्याम्, (झिञ्जा) तस्याः पक्वफलकोषे हि जालवत्त्वम् ।

जाली स्त्री० जालं विद्यतेऽस्याः अच् गौरा० ङीष् (झिञ्जा) लतामेदे

जाल्म त्रि० जालयति अपचारयति म । पामरे, मूर्खे, क्रूरे, आमलक्यां च ।

जाबाल पु० जबालाया अपत्यम् अण् । मुनिभेदे ।

जाह्नवी स्त्री० "जानुद्वारा पुरादात्तां अह्नुःसंप्रीय कोपतः । तस्य कन्यास्वरूपा च जाह्नवी तेन कीर्त्तिते"त्युक्तनिर्वचनायां गङ्गायाम्।

जि जये भ्वा० पर० सक० अनिट् । जयति अजैषीत् ।

जिगीषा स्त्री० जि–सन् अ । जयेच्छायां, प्रकर्षे, उद्यमे च ।

जिघ्रासु त्रि० घ्रातुमिच्छुः घ्रा–सन् उ । घ्रातुमिच्छौ, सुश्चौ च ।

जित न० जि–भावे क्त । जये । कर्मणि क्त । अभिभूते पराजिते जयलब्धे, वशीकृते, आयत्तीकृते च ।

जितकाशिन् त्रि० जितेन जयेन काशते प्रकाशते णिनि । जिताहवे, जयिनि च ।

जितेन्द्रिय त्रि० जितानि वशीकृतानीन्द्रियाणि येन । "श्रुत्वा दृष्ट्वा तथा स्पृष्ट्वा भुक्त्वाघ्रात्वा च यो नरः । न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रिय" इत्युक्ते हर्षविषादशून्ये शान्ते जने । कामदृश्विवृक्षे पु० । [अस्य स्त्रीत्वोक्तिः प्रामादिकी ।

जित्य पु० जि–क्यप् । वृक्षभेदे क्षत्रभूमिसमीकरणार्थे स्थूलकाष्ठे (मइ) ।

जित्वर जि–क्वरप् । जयशीले । स्त्रियां ङीप् ।

जिन पु० जयति संसारं जि–नक् । बुद्धे, विष्णौ च । जित्वरे त्रि० ।

जिम भक्षे भ्वा० पर० सक० सेट् । जेमति अजेमीत् ।

जिरि हिंसायां क्षा० पर० सक० सेट् । जिरिणोति अजिरायीत् ।

जिव प्रीणने भ्वा० पर० सक० सेट् दित् । जिञ्वति अजिञ्वीत् ।

जिष सेके भ्वा० पर० सक० सेट् । जेषति अजेषीत् ।

जिष्णु पु० जिष–ग्लुञ् । अर्জ্জুने, इन्द्रे, विष्णौ, सूर्ये, वसुषु च । जित्वरे त्रि० ।

जिह्म त्रि० हा–मन् द्वित्वादि नि० । कुटिले, मन्दे, तगरवृक्षे च ।

जिह्मग पु० जिह्मं गच्छति गम–ड । सर्पे, मन्दवृक्षे च । मन्दगे, कुटिले च त्रि० ।

जिह्वा स्त्री० लेढि अनया लिह–व नि० । रसज्ञानेन्द्रिये रसनायाम्

जिह्वामूलीय पु० जिह्वामूले भवः छ । कखाभ्यां प्राक् अर्द्धविसर्गरेखालेखे विसर्गभेदे ।

जिह्वारद पु० जिह्वैव रदोदन्तस्यर्वणसाधनं यस्य । दन्तहीने जिह्वयैव चर्वणकरे खगे । [जरति, चर्मपुटे च ।

जीन त्रि० ज्या–क्तयोर्हानौ कर्त्तरि क्त संप्रसारणं दीर्घश्च । क्षीणे,

जीमूत पु० ज्या–क्विप् जीः तया जरया मूतो बद्धः मू–बन्धने क्त,

जयति नभः, जीयते वायुना वा जि–क्त भूट् दीर्घश्च वा । मेघे, सुस्तके, पर्व्वते, धृतिकरे, देवताडहृक्षे, इन्द्रे कोषातकीलतायाञ्च ।

जोर पु० ज्या–रक् । जीरके, खड्गे, अणौ च । संज्ञायां कन् । (जीरा) । ख्याते पदार्थे ।

जोर्ण पु० जॄ–क्त । जीरके । शैलजे न० । जरायुक्ते त्रि० । स्थूलजीरके स्त्री० । [कर्म० । पुरातनपत्रे न० ।

जोर्णपर्ण पु० जीर्णानि पर्णान्यस्य । कदम्बे । पुरातनपत्रयुक्ते त्रि० ।

जोर्णि स्त्री० जॄ–क्तिन् । जीर्णतायाम् ।

जोर्णोद्धार पु० जीर्णस्य भग्नमन्दिरादेरुद्धारो यत्र । संस्कारभेदे ।

जीव प्राणधारणे भ्वा० पर० अक० सेट् । जीवति अजीवीत् । णिच् अजिजीवत् त अजीजिवत् त ।

जीव पु० जीव–क । देहाभिमानिनि आत्मनि मनुष्यावधिकीटपर्य्यन्ते चेतने "प्राणान् चेतनरूपेण धारयन् जीव उच्यते" इत्युक्ते प्राणिनि । करणे घञ् । जीवनोपाये । जीव–णिच् अच् । वृक्षभेदे । भावे घञ् । प्राणधारणे ।

जीवक पु० जीवयति जीव–णिच् ण्वुल् । औषधभेदे । पीतशाले वृक्षे, क्षपणे च सेवके, वृद्धप्राजीविनि, जीव्यात् आशिषि वुनृ । आशास्यमानजीवने जने त्रि० ।

जीवघन पु० जीव एव घनोमूर्त्तिः सैन्धवशिलाशकलवत् यस्य । हिरण्यगर्भे । [चकोरपक्षिणि ।

जीवजीव पु० जीवान् जीवयति दर्शनेन तृप्तिकरत्वात् क ।

जीवञ्जीव पु० जीवान् जीवयति खच् । चकोरे, वृक्षभेदे च ।

जीवन न० जीव्यतेऽनेन जीव–ल्युट् । वृत्तौ, जले, मज्जनि, हैयङ्गवीने च भावे ल्युट् । प्राणधारणे । जीवयति णिच्–ल्यु । पुत्रे, जीवकौषधे, वायौ, क्षुद्रफलकवृक्षे च पु० ।

जीवनयोनि स्त्री० ६त० । न्यायोक्ते देहे प्राणसञ्चारकारणे अतीन्द्रिये यत्नभेदे ।

जीवनहेतु पु० ६त० ("विद्याशिल्पं भृतिः सेवा गोरक्षा विपणिः

ऋषिः । वृत्तिर्भैक्ष्यं कुशोदञ्च दश जीवनहेतवः इत्युक्तेषु विद्यादिषु जीवनोपायेषु दशसु ।

जीवनी स्त्री० जीव्यतेऽनया जीव–ल्युट् ङीप् । जीवन्त्याम्, काकोल्याम्, स्वर्णहरितकीभेदे, यष्ट्याम्, गुडूच्याम्, वन्दायाञ्च ।

जीवन्तिका स्त्री० जीव–झ ङीप् स्वार्थे कन् ह्रस्वे अत इत्वम् । गुडूच्याम्, जीवाख्यशाके, वन्दायां, हरितक्याञ्च ।

जीवन्ती स्त्री० जीव–झ ङीप् । जीवन्त्यां, मधुस्रवाख्यौषधौ, यष्ट्यां, गुडूच्यां, वन्दायां, हरितक्याञ्च ।

जीवन्मुक्त त्रि० जीवन्नेव मुक्तः त्यक्तसंसारः । कृतात्मसाक्षात्कारे प्रारब्धकर्मक्षयपर्य्यन्तं सुषुप्तिवत् व्यवहर्त्तरि आत्मज्ञे जीवे 'सुषुप्तिवद् आयति यो न पश्यति द्वयन्तु पश्यन्नपि चाद्वयत्वतः । तथा च कुत्रापि निष्क्रियश्च यः स आत्मविद्भान्यदृतोऽहं निश्चय इत्युक्ते ब्रह्मात्मज्ञानयुक्ते ।

जीवन्मुक्ति स्त्री० जीवत एव मुक्तिः कर्त्तृत्वभोक्तृत्वादिबन्धात् । जीवतो बन्धनिवृत्तौ ।

जीवपुत्रक पु० जीवयतीति क जीवः पुत्र इव हर्षहेतुत्वात् स्वार्थे कन् । (जीयापुता) वृक्षभेदे ।

जीवपुत्रा स्त्री० जीवः पुत्रं यस्याः । वृहज्जीवन्त्याम् ।

जीवप्रिया स्त्री० ईत० । हरितक्याम् । [नामौषधे च ।

जीवभद्र स्त्री० जीवानां भद्रं यस्याः ५ त० । जीवन्तीलतायां वृद्धि-

जीवयन्ती स्त्री० जीवयतीति जीव कर्म० ङीरकाकोल्याम् ।

जीवस्थान न० ईत० । मर्म्मणि ।

जीवा स्त्री० जीव–अच् जीवयतेरच् वा टाप् । धनुषो गुणे, जीवन्तिकायामौषधौ, यवायां, शिञ्जिते, भ्रूनौ, जीवनोपाये च ।

जीवातु पु०न० । जीव–आतु । अन्ने, जीविते, जीवनौषधे, वृहत्सञ्जीवनौषधे च ।

जीवात्मन् पु० कर्म० । देहाभिमानिनि जीवे ।

जीवाधार पु० ईत० । वृक्षे, देहे च ।

जीविका स्त्री० जीव–अ कन् अत इत्त्वम् । जीवनोपाये आजीवने ।
जीवितकाल पु०जीव–भावे क्त तस्य कालः । जीवनावधि काले आयुषि
जीवितेश पु० ६त० । यमे, प्राणस्वामिनि, "जीवितेशवशतिं जगाम से"ति रघुः । जीवातौ, चन्द्रे सूर्य्ये च । प्रियनाथे त्रि० ।
जीवोपाधि पु० ६त० । सप्तसुगुणिजात्यदयस्यासु ।
जीव्या स्त्री० जीवाय हिता यत् । हरितक्याम्, जीवन्त्यां, गोतुरदुग्धायाञ्च ।
जु रंहसि भ्वा०पर०अक० अनिट् । जवति । अजौषीत् । जवः ।
जु गतौ सौ आत्म० सक० अनिट् । जवते । अजोष्ट ।
जुग त्यागे भ्वा० पर० सक० सेट् इदित् । जुङ्गति । अजुङ्गीत् ।
जुगुप्सा स्त्री० गुप–निन्दायां स्वार्थे सन्–अ टाप् । निन्दायाम् ।
जुङ्ग पु० जुगि–अच् । छत्रदारकवृक्षे वा स्त्री० इति केचित् ।
जुटिका स्त्री० जट–संहतौ टाप् ह्रस्व० । शिखायां, संहतकेशे च ।
जुड प्रेरणे चु० उभ० सक० सेट् । जोडयति ते अजूजुड़त् ।
जुड बन्धे तुदा०कुटा०पर०सक० सेट् । जुडति अजुडीत् जुजोड ।
जुड गतौ तु० पर० सक० सेट् । जुडति अजोडीत् ।
जुत दीप्तौ भ्वा०आत्म०अक० सेट् । जोतते अजोतिष्ट । अजुजोतत् त
जुन गतौ तु० पर० सक० सेट् । जुनति अजोनीत् ।
जुर्व बधे भ्वा० पर०सक० सेट् । जूर्वति अजूर्वीत् । जूर्त्तः जूर्त्तिः
जुल प्रेरणे चु० उभ०सक० सेट् । जोलयति ते अजूजुलत् त ।
जुष प्रीतौ तर्के च वा चु० उभ० पक्षे भ्वा०पर०सक० सेट् । जोषयति ते जोषति अजूजुषत् त अजोषीत् ।
जुष वृं अक० सेवने सक० तुदा० आत्म० सेट् । जुषते अजोषिष्ट ।
जुष्ट न० जुष–क्त । उच्छिष्टे । सेविते त्रि० ।
जुहू स्त्री० जुहोत्यनया हु–क्विप् नि० । पलाशकाष्ठनिर्मिते अर्द्धचन्द्राकृतिरूपे यज्ञपात्रभेदे, पर्णमये यज्ञपात्रभेदे च "यस्य पर्णमयी जुहूर्भवती"ति श्रुतिः ।
जुट पु० जट बन्धे घ ह्रस्व० । बन्धे, समूहे, जटायाञ्च ।

जूति स्त्री० जु–क्तिन् नि० दीर्घः । वेगे ।

जूर वयोहानौ अक० बधे सक० दिवा० आत्म० सेट् । जूर्य्यते अजूरिष्ट । जूर्णः ।

जूर्ण पु० जूर–क्त (उलुखड़) तृणभेदे ।

जूर्त्ति स्त्री० ज्वर–क्तिन् संप्रसारणम् । ज्वरे ।

जूष बधे भ्वा० उभ० सक० सेट् । जूषति ते अजूषीत् अजूषिष्ट ।

जूष पु०न० जूष–घञ् अच् वा । सुहादीनां क्वाथे (यूष) ।

जूषण न० जूष–ल्यु । धातपुष्पाम् (धाइफूल) ।

जृ व्यक्तीकारे भ्वा० पर० सक० अनिट् । जरति अजारीत् ।

जृम्भ जृम्भणे (हाइयोला) भ्वादि० आत्म० सक० सेट् इदित् । जृम्भते अजृम्भिष्ट ।

जृम्भ जृम्भे भ्वा० आत्म० सक० सेट् । जर्भते अजर्भिष्ट ।

जृम्भ पु० जृम्भि–घञ् । सुखविकारे (हाइतोला) अटाप् । अत्रैव स्त्री० । ततः स्वार्थे कन् अत इत्वम् जृम्भिकाप्यत्रैव ।

जृम्भकास्त्र न० जृम्भि–णिच्–ण्वुल् कर्म० । विपक्षस्य जृम्भोपलक्षित-निद्राकारकेऽस्त्रे ।

जृम्भिणी स्त्री० जृम्भि–णिनि । एलापर्ण्याम् ।

जॄ जरायां दिवा० पर० अक० सेट् घटादि० । जीर्य्यति अजरत् अजारीत् । जीर्णः । जरा । जरयति ।

जॄ जरायां वा चुरा० उभ० पक्षे क्र्यादि० भ्वादि० अक० सेट् । जारयति ते जृणाति । अजीजरत् अजरत्–अजारीत् ।

जेमन न० जिम–ल्युट् । भक्षणे ।

जेय त्रि० जि–कर्मणि यत् । जेतव्यमात्रे ।

जेष गतौ भ्वा० आत्म० सक० सेट् । जेषते अजेषिष्ट । णिच् अजि-जेषत् त ।

जेह यत्ने भ्वा० आत्म० अक० सेट् । जेहते अजेहिष्ट । णिच् । अजिजेहत् त ।

जै क्षये भ्वा० पर० अक० अनिट् । जयति अजासीत् । जानः ।

जैत्र त्रि० जेतैव जेतृ प्रज्ञादि० अण्। जयशीले। पारदे पु०। औषधे न०।

जैत्री स्त्री० जेत्रैव जेतृ+स्वार्थे अण् ङीप्। जयन्तीवृक्षे।

जैन पु० जिनोदेवतास्य अण्। बौद्धधर्मावलम्बिनि अर्हदुपासके।

जैमिनि पु० वेदमीमांसासूत्रकर्त्तरि व्यासशिष्ये मुनिभेदे।

जैवातृक पु० जीव—आतृच् ततः—कण् वृद्धिश्च। चन्द्रे, औषधे, कर्पूरे च। दीर्घायुष्के त्रि०।

जोङ्गक पु०न०। जुगि—घञ्जने खुल् नि०। अगुरुचन्दने।

जोषम् अव्य० जुष—असु। सुखे, प्रशंसायां, तूष्णीभावे, लङ्घने च।

जोषा स्त्री० जुष्यते जुषते वा जुष—घञ्। नार्याम्।

जोषित् स्त्री० जुष—इति। नार्य्याम्।

ज्ञ पु० ज्ञा-क। ब्रह्मणि, पण्डिते, सोमपुत्रे, बुधे च।

ज्ञप मारणे, आलोके, निशाने, तोषणे, स्तुतौ च चुरा० उभ० सक० सेट् घटा०। ज्ञपयति—ते अजिज्ञपत्—त।

ज्ञपित त्रि० ज्ञप क। मारिते, ज्ञापिते च नि० ज्ञप्तोऽप्यत्र।

ज्ञप्ति स्त्री०—क्तिन्। बुद्धौ।

ज्ञा बोधे क्रया० पर० सक० अनिट्। जानाति अज्ञासीत्।

ज्ञ् ज्ञपधात्वर्थे चुरा० उभ० सक० सेट् घटा०। ज्ञपयति ते अजिज्ञपत् त।

ज्ञा प्रेरणे चुरा० उभ० सक० सेट्। ज्ञापयति ते अजिज्ञपत् त।

ज्ञातसिद्धान्त पु० ज्ञातः सिद्धान्तः तत्त्वार्थो येन। सिद्धान्तज्ञे।

ज्ञाति पु० ज्ञा—कर्त्तरि करणे वा क्तिच्। पितरि पितृबन्धौ सपिण्डसकुल्यसमानोदकसगोत्रजरूपे एकगोत्रोत्पन्ने पितृव्यादौ।

ज्ञातेय न० ज्ञातेर्भावः ढक्। ज्ञातित्वे।

ज्ञान न० ज्ञा—भावे ल्युट्। सामान्यविशेषरूपे बुद्धिभावे, "ज्ञानं द्विधा वस्तुमात्रद्योतकं निर्विकल्पकम्। सविकल्पन्तु संज्ञादिद्योतकत्वादनेकधा। संकल्पसंशयभ्रान्तिस्मृतिसादृश्यनिश्चयाः ऊहोऽभ्यवसायश्च तथान्येऽनुभवादयः" इत्युक्तेषु नानाविधेषु बुद्धिपरिणामेषु।

ज्ञानयोग पु० ज्ञानमेव योगः कौशलं ब्रह्मप्राप्त्युपायो वा । ब्रह्मज्ञानोपाये निष्ठाभेदे ।

ज्ञानलक्षणा स्त्री० ज्ञानमेव लक्षणं स्वरूपं यस्याः व्याप्तेः । न्याय-मते ज्ञानसाधनाय अलौकिके सन्निकर्षभेदे । यद्यति यद्विषयस्य ज्ञानं जननीयं पूर्वं तद्विषयज्ञानमेव तत्र पूर्वज्ञातवस्तुनः प्रत्यासत्तिः ।

ज्ञानवापी स्त्री० काश्यां स्थिते तीर्थभेदे ।

ज्ञानसाधन न० सिध–णिच्–करणे ल्युट् ६त० । इन्द्रिये ।

ज्ञानापोह पु० अप+उह–घञ् ६त० । विचारणे ।

ज्ञानाभ्यास पु० ६त० । "तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम् ।
एतदेकपरत्वञ्च ज्ञानाभ्यासं विदुर्बुधा" इत्युक्ते ध्येयविषयचिन्तादौ ।

ज्ञानिन् त्रि० ज्ञानमस्त्यस्ति इनि । ज्ञानसामान्यवति, तत्त्वज्ञानिनि च "तेषां ज्ञानी नित्ययुक्त" इति गीता । दैवज्ञे पु० ।

ज्ञानेन्द्रिय न० ६त० । श्रवणदर्शनादिज्ञानसाधने श्रोत्रनेत्रनासिका-जिह्वात्वग्रूपेन्द्रिये, अन्तःकरणे च ।

ज्या जरायां क्र्या० पु० पर० अक० अनिट् । जिनाति अज्यासीत् ।

ज्या स्त्री० ज्या–अङ् । धनुषो गुणे मौर्व्याम्, मातरि, भूमौ च ।

ज्यानि स्त्री० ज्या–क्तिन् । जीर्णतायां, हानौ, मद्यास्त्रे च ।

ज्यायस् त्रि० अतिशयेन वृद्धः ईयसु ज्यादेश इत आत्त्वञ्च । अति-शयवृद्धे । स्त्रियां ङीप् ।

ज्यु गतौ भ्वा० आत्म० सक० अनिट् । ज्यवते अज्योष्ट ।

ज्युत दीप्तौ भ्वा० पर० सक० सेट् । ज्योतति अज्युतत् अज्योतीत् ।

ज्युत दीप्तौ भ्वा० आत्म० अक० सेट् । ज्योतति अज्योतिष्ट । णिचः । अजुज्योतत् त ।

ज्येष्ठ त्रि० वृद्ध+इष्ठन् ज्यादेशः । अतिवृद्धे, श्रेष्ठे च । अयजे पु० । ज्येष्ठभगिन्याम्, वयोज्येष्ठायां, ज्येष्ठस्य पत्न्यामपि स्त्री० अजादित्वात् टाबेव । गङ्गायाम्, अलक्ष्म्राम्, अश्विन्यवधिके अष्टादशे नक्षत्रे च स्त्री० गृहगोधिकायां (टिकटिकी) स्त्री० ङीप् "ज्येष्ठीकृते श्रुतेष्वेव" मिति स्मृतिः ।

ज्येष्ठतात पु० तातस्य ज्येष्ठः राजदन्ता० । पितुरग्रजे (जेठा) ।

ज्येष्ठश्वश्रू स्त्री० ज्येष्ठत्वात् पत्न्याः अग्रजत्वेन अविवाह्यत्वात् पत्नी-मान्यतयैवात्मनो मान्यत्वाच्च श्वश्रूरिव । पत्न्याज्येष्ठभगिन्याम् ।

ज्येष्ठसामन् न० मूर्द्धानं दिवइत्यस्यामृचि गीते सामनि, तत्सामाङ्गे व्रते च ।

ज्यैष्ठाश्रम पु० ज्येष्ठ आश्रमो यस्य । "यस्मात् त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम् । गृहस्थेनैव धार्य्यन्ते तस्मात् ज्येष्ठाश्रमो गृही"त्युक्ते गृहस्थाश्रमे । इनि । गृहस्थाश्रमीत्यत्र ।

ज्यैष्ठ पु० ज्येष्ठानक्षत्रेण युक्ता पौर्णमासी ज्यैष्ठी साऽस्मिन् मासे अण् । स्वनामख्याते चान्द्रे मासे । [तत्रैव तन्मुखत्वात् ।

ज्यैष्ठी स्त्री० ज्येष्ठायुक्ता पौर्णमासी अण् । चान्द्रज्येष्ठमासपौर्णमास्याम्

ज्यैष्ठ्य न० ज्येष्ठस्य भावः ष्यञ् । ज्येष्ठत्वे "विप्राणां ज्ञानतो ज्यैष्ठ्य"-मिति मनुः । [ज्यवते अज्यास्त ।

ज्यो नियमे उपनये व्रतोपदेशे च भ्वा० आत्म० सक० अनिट् ।

ज्योक् अ० ज्यो—डोकि । सम्प्रत्यर्थे, कालभूयस्त्वे, क्षीघ्रतायां, प्रश्ने च ।

ज्योतिरिङ्ग पु० ज्योतिरिव इङ्गति इगि—गतौ अच् । खद्योते युच् । ज्योतिरिङ्गणोऽप्यत्र । [ज्योतिःशास्त्राभिज्ञे ।

ज्योतिर्विद् पु० ज्योतिषां सूर्य्यादीनां गत्यादिकं वेत्ति विद्-क्विप् ।

ज्योतिश्चक्र न० ६त० । सूर्य्यादीनां ज्योतिषां मण्डले, सप्तविंशतिभै-र्ज्योतिश्चक्रं क्षितेर्मेतत्त्रायुगमि"त्युक्ते सप्तविंशतिनक्षत्रात्मके राशिचक्रे च

ज्योतिश्शास्त्र न० ६त० । ग्रहनक्षत्रादीनां गतिस्वरूपादिनिर्णा-यके "पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिता: । केरलि: शकुनं चेति ज्योतिश्शास्त्रमुदीरितमित्युक्ते पञ्चाङ्गे शास्त्रे ।

ज्योतिष न० ज्योतिरधिकृत्य कृतोऽन्थः नि० न वृद्धिः । ज्योतिः—शास्त्रे । वृद्धौ । ज्यौतिषमप्यत्र ।

ज्योतिष्क पु० ज्योतिरिव इवार्थे कन् । चित्रकवृक्षे, मेषिकाबीजे, गणिकारीवृक्षे च । स्वार्थे कन् । ग्रहनक्षत्रादिषु ब० व० ।

ज्योतिष्मतीलतायाम् स्त्री० मेरोः शृङ्गान्तरे न० ।

ज्योतिष्टोम पु० ज्योतींषि स्तोमायस्य षत्वम् । षोड़शर्त्विक्साध्ये यज्ञभेदे ।

ज्योतिष्मत् पु० ज्योतिरस्त्यस्य मतुप् । सूर्य्ये प्लक्षद्वीपस्थे पर्वतभेदे च (मालकाङ्गनी) लताभेदे । रात्रौ, योगशास्त्रोक्ते चित्तवृत्तिभेदे च स्त्री० ङीप् । ज्योतिर्युक्ते त्रि० ।

ज्योतिस् पु० द्योतते द्युत्यतेऽनेन वा द्युत-इसुन् आदेर्दस्य जः । सूर्य्ये, अग्नौ, मेथिकाशाके च । नेत्रकनीनिकामध्यस्थे दर्शनसाधने, पदार्थे, नक्षत्रे, प्रकाशे, स्वयंप्रकाशे, सर्व्वावभासके चैतन्ये च न० ।

ज्योत्स्ना स्त्री० ज्योतिरस्त्यस्याम् न उपधालोपश्च । कौमुद्याम् चन्द्रकिरणे च । ङीप् । ज्योतिर्युक्तरात्रौ, (झिङ्गा) पटोलिकायां रेणुकानामगन्धद्रव्ये च स्त्री० ।

ज्यौतिषिक पु० ज्योतिषं शास्त्रं वेत्त्यधीते वा ठक् । दैवज्ञे ।

ज्रि अभिभवे भ्वा० पर० सक० अनिट् । ज्रयति अज्रैषीत् ।

ज्री वयोहानौ या० चुरा० उभ० पक्षे क्र्या० पु० प० अक० अनिट् ज्राययति ते ज्रिणाति अजिज्रयत् त अज्रैषीत् ।

ज्वर रोगे भ्वा०प०अ० सेट् घ० । ज्वरति अज्वारीत् । ज्वरयति ते ।

ज्वर पु० ज्वर-घ । स्वनामख्याते रोगभेदे ।

ज्वरघ्न पु० ज्वरं हन्ति हन-टक् । गुडूच्याम्, वास्तूके च । ज्वरनाशके त्रि० । मक्षिकायां स्त्री० ङीप् ।

ज्वरान्तक पु० अन्तयति अन्त+तत् करोति णिच् ण्वुल् ह्रस्व० । नेपालनिम्बे, आरग्वधे, लौहघटितौषधभेदे च । ज्वरनाशके त्रि० ।

ज्वरापहा स्त्री० ज्वरमपहन्ति अप+हन-ड । (वेलशुण्ठ) विल्वशुण्ठ्याम्, बिल्वपत्र्याञ्च । ज्वरनाशके त्रि० ।

ज्वरित त्रि० ज्वरः सञ्जातोऽस्य तारका० इतच् । ज्वरयुक्ते ।

ज्वल दीप्तौ चलने च भ्वा० पर०अक० सेट् घटा० ज्वला० । ज्वलति अज्वालीत् । ज्वलयति । ज्वलः ज्वालः ।

ज्वलन पु० ज्वलति ज्वल+युच् । वह्नौ, चित्रकवृक्षे च । भावे ल्युट् । दीप्तौ दाहे च ।

ज्वलनाश्मन् पु० ज्वलतीति ज्वलनो देदीप्यमानोऽर्कः किरणसम्पर्कात् अश्मा उपल: । सूर्य्यकान्तमणौ ।

ज्वलित त्रि० ज्वल–क्त । दग्धे, दीप्ते, उज्ज्वले, भास्वरे च ।

ज्वाल पु० ज्वल–ण । अग्निशिखायाम् । स्त्रीत्वमपि टाप् । दग्धाङ्गे दाहे च । दीप्ते त्रि० । [त्वात् । वह्नौ ।

ज्वालजिह्व पु० ज्वाल: शिखेव जिह्वा यस्य दाहकत्वसुलेहकत्वात् ।

ज्वालामुखी स्त्री० पीठस्थानभेदे । ज्वालासुख्यां महाजिह्वो देव उन्मत्तभैरवः । अम्बिका सिद्धिकामाख्यो यत्रो जालन्धरे मतेति तन्त्रम् ।

झ

झ पु० झग संहतौ यङे पिधाने वा ड । झञ्झावाते, सुरगुरौ, इन्द्रे, ध्वनौ च । नष्टद्रव्ये त्रि० ।

झङ्कार पु० झमित्यव्यक्तशब्दस्य कारः क–घञ् । भ्रमरादिशब्दे ।

झङ्कृति स्त्री० झन् इत्यव्यक्तशब्दस्य कृतिः क–क्तिन् । कांस्यादेर्ध्वनौ ।

झञ्झा स्त्री० झमितिकृत्वा झञ्झते यत्र ड ध्वनिभेदे, तथाध्वनियुक्ते प्रचण्डानिले च । [वातादयोऽप्यत्र ।

झञ्झानिल पु० झञ्झाप्रधानोऽनिलः शाक० । प्रचण्डानिले झञ्झा–

झट संहतौ भ्वा० पर० अक० सेट् । झटति अझाटीत् अझर्टीत् ।

झटा स्त्री० झट–अच् । शीघ्रे ।

झटिति अव्य० झट क्विप् झट् इत्य–क्तिन् ह्रस्व० । शीघ्रे ।

झन(ण)त्कार पु० झन(ण)दित्यव्यक्त शब्दस्य कारः क–घञ् । कङ्कणादिध्वनौ ।

झम भ्वा०पर०अक०सेट् । झमति अझमीत् । झमित्वा-झान्त्वा झान्तः ।

झम्प पु० झम–पन्, झमिति कृत्य पतति पत–ड वा । वेगेनोड्डीदि-देशादास्खालनपूर्वकपतने, लम्फे च । स्त्रीत्वमपीच्छति । पाताल-झम्पाश्च ताः इति वीरचरितम् । [तत्रैवार्थे ।

झर पु० झृ–अप् । निर्झरे उत्साद्गिर्गते जलप्रवाहे । अङ् टाप् ।

झर्च(र्क्)(र्झ्) उक्तौ भर्त्सने च तु० पर० सक० सेट्। झर्च(र्क्)(र्झ्)ति अझर्चीं(र्क्षीं)(र्झीं)त् ।

झर्झर पु० झर्झ-अरन्। (झांज) इति ख्याते वाद्यभेदे भटहे, कलियुगे, नदभेदे, च। वाद्यभेदे स्त्री० ङीप्।

झलज्झला स्त्री० जलन्तं जलति अच् पृ०। हस्तिकर्णास्फालने।

झल्ल पु० जातिभेदे।

झल्लक पु० न० झर्झ-एवुल् पृ०। कांस्यवाद्यभेदे "शिवागारे झल्लकश्चेति स्मृतिः। [स्त्री० टाप्।

झल्लरी स्त्री० झर्झति झर्झ-अरन् पृ०। वाद्यभेदे। शुण्ठ्यां, क्षुद्रे च

झष बधे भ्वा० पर० सक० सेट्। झषति अझाषीत् अझषीत्।

झष ग्रहणे विधाने च भ्वा० उभ० सक० सेट्। झषति-ते अझाषीत् अझषीत्।

झष पु० झष्यते कर्मणि घ। मत्स्ये, मीनराशौ च। भावे-घ। ताडे। अच्। खिले, वने च न०। नागबलायां स्त्री०।

झषकेतु पु० झषो मीनो मकरो वा केतुर्यस्य। मदने। झषकेतनादयोऽप्यत्र। [भूम्यामलक्यां यूथिकायाञ्च स्त्री० टाप्।

झाट पु० झट-णिच्-अच्। निकुञ्जे, कान्तारे, व्रणादीनां मार्ज्जने,

झाटल पु० झट-णिच् अलच्। शुण्ठीपारुल्यौ।

झामक न० झम-कर्मणि ण्वुल्। (झामा) अतिशयपक्वेष्टकायाम्।

झाबु पु० झा-इति वाति गच्छति वा-डु। (झाउ) वृक्षभेदे स्वार्थे कन्। तत्रैव।

झिङ्गाक न० लिंगि-आक पृ०। (झिङ्गा) फलभेदे।

झिङ्गिनी स्त्री० लिंगि-णिनि पृ०। झिङ्गिनीवृक्षे, शल्लकायाञ्च।

झिङ्गी स्त्री० लिंगि-अच् गौरा० ङीप्। झिङ्गिनीवृक्षे। (झिङ्गा)।

झिञ्झी स्त्री० झिञ्झा [illegible] गौरा० ङीप्। झिञ्झाराम् (झिंझिपोका)।

झिण्टी स्त्री० झिमिति रटति अच् पृ० गौ० ङीष्। (झाटि) वृक्षभेदे। स्वार्थे कन्। अत्रैवार्थे। [(झिंझिपोका)।

झिरिका स्त्री० झिरीति कायति शब्दायते कै–क। झिल्लयाम्।

झिल्ली स्त्री० चिल्लति चिल–अच् पृ० गौ० ङीष्। (झिंझिपोका) कीटभेदे। संज्ञायां कन्। आतपरूचौ वर्त्त्यांञ्च।

झुण्ट पु० लुण्ट–अच्–पृ०। अकाण्डे द्रुमे, स्तम्बे, गुल्मे च।

झृ वयोहानौ दिवा० पर० अक० सेट्। झीर्य्यति अझारीत् झरा

झ्रु गतौ भ्वा० आत्म० सक० अनिट्। झ्रुवते अझ्रोष्ट।

ञ

ञ पु० दृष्टे, शुक्ले कुटिलगतौ, गायने, घर्घरध्वनौ च।

ट

ट पु० टल–ड। वामने, पादे, निखने, च। करङ्के–टङ्कारे च न०

टक बन्धे चु० उभ० सक० सेट् इदित् टङ्कयति–ते अटटङ्कत्–त।

टङ्क पु० टकि घञ्–अच् वा। कोपे, कोपे, खड्गे पाषाणभेदनेऽस्त्रे च। चतुर्माषकरूपे परिमाणे जङ्घायां नीलकपित्थे, खनित्रे, दर्पे च पु०न०।

टङ्कक पु० टङ्कयते टङ्क् संज्ञायां कन्। (तङ्का) रजतमुद्रायाम्

टङ्कन पु० टकि–युच्। क्षारभेदे (सोहागा)।

टङ्कानक पु० टङ्कं कोपमानयति उद्दीपयति आन–णिच् ण्वुल्। ब्रह्मदारुवृक्षे (वामनगाछा)।

टङ्कार पु० टङ्कित्यव्यक्तशब्दस्य कारः ष–घञ्। ध्वनिभेदे धनुर्ज्या-कर्षणजे शब्दे, विस्मयहेतुके शब्दे च।

टङ्ग पु० टकि–अच् पृ०। (टाङ्गि) अस्त्रभेदे, जङ्घायाञ्च।

टङ्गन पु० टकि–युच् पृ०। (सोहागा) क्षारभेदे।

टङ्गिनी पु० टकि–णिनि पृ०। (आकनादी) पाठायाम्।

टल विलम्बे भ्वा० पर० अक० सेट् ज्वला०। टलति अटालीत्। टलः टालः।

टिटि(ट्टि)भ पु० टिटि(ट्टि) इत्यव्यक्तशब्दं भाषते भाष-ड । (टिटिर) पक्षिभेदे । स्वार्थे कन् अत्रैवार्थे ।

टिप क्षोदने चुरा० उभ०सक०सेट् । टेपयति–ते अटीटिपत्-त ।

टिप्पनी स्त्री० टिप्–क्विप् टिपा पन्यते क्रीयते अच् । टीकायाम् ।

टीक गतौ भ्वा० आत्म० सक० सेट् । टीकते अटीकिष्ट ।

टीका स्त्री० टीक–क । विषमपदव्याख्यानरूपायां वृत्तौ ।

टुल्ल विप्लवे भ्वा० पर०अक० सेट् । टुलति अटुल्लीत् ।

ठ

ठ पु० मण्डले चन्द्रबिम्बे शून्ये महेश्वरे वृहद्ध्वनौ च ।

ठक्कुर पु० देवप्रतिमायां, द्विजोपाधिभेदे च ।

ड

ड पु० डी-ड । वाद्यभाण्डौ, शब्दे, वासपक्षिणि, शिवे च ।

डङ्ग(ङ्गा)री स्त्री० कर्कटीभेदे ।

डप संक्षतौ वा चुरा० उभ०पक्षे भ्वा० आ० अक० सेट् । डपयति–ते डपते अडीडपत्-त । अडपिष्ट ।

डम्ब राशीकरणे वा चुरा उभ०पक्षे भ्वा० आत्म० सक० सेट् इदित् । डम्बयति–ते डम्बते अडडम्बत्–अडम्बिष्ट ।

डम्ब प्रेरणे वा० चुरा०उभ० पक्षे भ्वा०पर०सक० सेट् । इदित् । डम्बयति–ते डम्बति अडडम्बत् अडम्बीत् ।

डम्भ संक्षतौ वा चुरा० उभ० पक्षे भ्वा० आत्म० सक० सेट् । इदित् । डम्भयति–ते डम्भते अडडम्भत्–त अडम्भिष्ट ।

डमरु पु० डम् इति शब्दम् रयर्त्ति रु–उन् । वाद्यभेदे कापालिकयोगिवाद्ये, चमत्कारे च ।

डमरुक न० वंशादिरचिते पात्रभेदे (डाला) ।

डवित्थ पु० काष्ठमये मृगे ।

डहु(हू) पु० दह उ (ञ) मृगय्वादि० नि० । वृक्षे (भान्दार) ।

डाकिनी स्त्री० डाकानां समूहः इनि । काल्या गणभेदे ।
डामर पु० शिवोक्ते तन्त्रशास्त्रभेदे ।
डिण्डिम पु० डिण्डि इति शब्दं मिनोति प्रकाशयति मि–ड । वाद्य-
भेदे (पान आमाला) वृक्षभेदे च । [फेने ।
डिण्डि(ण्डी)र पु० डिण्डि इतिशब्दोऽस्यास्ति रः पूर्वपददीर्घः समुद्र-
डित्थ पु० काष्ठमये गजे "श्यामरूपो युवा विद्वान् सुन्दरः प्रियदर्शनः ।
सर्वशास्त्रार्थवेत्ता च डित्थइत्यभिधीयते" इत्युक्ते पुरुषभेदे च ।
डिप संहतौ वा चुरा० उभ० पक्षे भ्वा० आत्म० अक० सेट् । डेप-
यति–ते डेपते अडीडिपत् त ।
डिप प्रेरणे वा चु०उभ०पक्षे तुदा०कुटा० च पर०सक० सेट् । डेप-
यति–ते डिपति अडीडिपत्–त अडिपत् अडिपीत् ।
डिप संहतौ वा चुरा० उ०पक्षे भ्वा०आत्म०अक०सेट् इदित् । डिम्प-
यति–ते डिम्पते अडिडिम्पत्–त अडिम्पिष्ट ।
डिब प्रेरणे वा चु०उभ० पक्षे भ्वा०पर० सक० सेट् इदित् । डिम्ब-
यति–तेडिम्बति अडिडिम्बत्–त अडिम्बीत् ।
डिभ संहतौ वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् इदित् ।
डिम्भयति–ते डिम्भति । अडिडिम्भत् त अडिम्भीत् ।
डिम क्षिंसने सौ० पर० सक० सेट् । डेमति अडेमीत् ।
डिम पु० डिम–क । दृश्यकाव्यरूपनाटकभेदे ।
डिम्ब पु०डिबि–घञ् । शिशौ, अण्डे, स्निग्धानि, विप्लवे, अशस्ते कलहे,
एरण्डे, भयहेतुके–ध्वनौ, भये, भ्रमरे पुङ्खे च न० ।
डिम्बाहव पु० डिम्बतुल्य आहवः । नृपतिमृत्यौ युद्धे ।
डिम्भ पु० डिबि–अच् । मूर्खे, शिशौ च । स्वार्थे कन् अत्रैव
अतिशिशौ स्त्री० ।
डी नभोगतौ भ्वा० आ० अक० सेट् । डयते अडयिष्ट डीनः ।
डी नभोगतौ दि० आ० अक० सेट् । डीयते अडयिष्ट डीनः ।
डीन न० डी–भावे क्त । पक्षिणां गतौ तद्विशेषो वाचस्पत्ये ।

डुण्डुभ पु० डण्डु–इत्यव्यक्तशब्दं भवति तेन भाति वा भम्–भा–क डण्डु (ढोडा) इति ख्याते सर्पभेदे ।

डोर न०दोष्+रा+ड पृ०। कृत्यवाक्यादौ बन्धनसूत्रे स्वार्थे कन् अत्रैव ।

ढ

ढ पु० ढक्कायाम्, मुनि, तल्लाङ्गूले, निर्गुणे, ध्वनौ च । [भेदे ।

ढक्का स्त्री० ढक् इति कायति कै–क । यशःपटहे खनामख्याते वाद्य-

ढुण्ट अन्वे पणे भ्वा० पर० सक० सेट् ढुण्टति अढुण्टीत् ।

ढुण्टि पु० ढुण्ट–इन् । गणेशे काश्यां प्रसिद्धे ढुण्ढिराजि ।

ढोल पु० दोलायमानो वाद्यते पृ० । खनामख्याते वाद्यभेदे ।

ढौक प्रेरणे गत्याञ्च भ्वा० आत्म० सक० सेट् । ढौकते अढौकिष्ट । णिच् अढूढौकत्–त ।

ण

ण पु० णख गतौ ड पृषो० णत्वम् । बिन्दुदेवे, भूषणे, गुण वर्ज्जिते, जलस्थाने, निर्णये, ज्ञाने च ।

णक्ष गतौ भ्वा० पर० सक० सेट् । नक्षति प्रणक्षति अनक्षीत् णोप-देशत्वात् सति निमित्ते णत्वम् एवमन्येषामपि ।

णख गतौ भ्वा० पर० सक० सेट् । णोपदेशत्वात् णत्वम् । नखति प्रणखति । अनखीत् अनाखीत् ।

णट नृत्ये साभिनये नटकार्ये हिंसायामयं न णोपदेशी । भ्वा०पर० । अक० सेट् । नटति प्रणटति अनाटीत् अनटीत् । हिंसायाम् प्रनटति । [णिच् नटयति अनीनटत् ।

णट नटत्वे भ्वा० पर०घटा० । नटति प्रणटति अनाटीत् अनटीत् ।

णद अव्यक्तशब्दे भ्वा० पर० अक० सेट् । नदति प्रणदति अना-दीत्–अनदीत् ।

णद भाषे चु० उभ सक० सेट् । नादयति –ते प्रणादयति अनी-नदत्–त ।

णभ हिंसे भ्वा० आत्म० सक० सेट् । नभते प्रणभते अनभत् अनभिष्ट ।

णभ हिंसे दिवा० क्र्या० च पर० सक० सेट् । नभ्यति प्रणभ्यति नभ्नाति प्रणभ्नाति । अनाभीत् अनभीत् ।

णम शब्दे अक० नतौ सक० भ्वा० पर० अनिट् । नमति प्रणमति अनंसीत् नत्वा नतः । [अनयीत् ।

णय गतौ रचणे च भ्वा० पर० सक० सेट् । नयति प्रणयति

णर्ह शब्दे भ्वा० पर० अक० सेट् नर्हति प्रणर्हति अनर्हीत्,

णल गन्धे भ्वा० पर० सक० सेट् ज्वला० । नलति प्रणलति । अनालीत् । नलः नालः ।

णश अदर्शने नाशे च दिवा० पर० अक० सेट् । नश्यति प्रणश्यति अनेशत् अनशत् । अधान्तत्वे न णत्वम् प्रनष्टः ।

णस कौटिल्ये भ्वा० आत्म० अक० सेट् । नसते प्रणसते । अनसिष्ट ।

णह बन्धने दिवा० उभ० सक० अनिट् नह्यति—ते प्रणह्यति ते । अनात्सीत् अनद्ध ।

णास ध्वनौ भ्वा० आत्म० अक० सेट् । नासते प्रणासते अनासिष्ट । अननासत्—त ।

णिच्च चुम्बने भ्वा० पर० सक० सेट् । निञ्चति प्रणिञ्चति । क्ङिति ह्रस्वो वा णत्वमिति पाणिनिः । [ङिति ।

णिज शोधने अदा० आत्म० सक० सेट् इदित् । णिङ्क्ते प्रणिङ्क्ते अनिक्त

णिज शोधने जु० उभ० सक० अनिट् । नेनेक्ति प्रणेनेक्ति । नेनिक्ते अनिजत्—अनैक्षीत् अनिक्त ।

णिद सच्चिधाने अक० निन्दने सक० भ्वा० उभ० सेट् । नेदति—ते प्रणेदति—ते । अनेदीत् अनेदिष्ट ।

णिद कुत्सने भ्वा० पर० सक० सेट् इदित् । निन्दति प्रणिन्दति अनिन्दीत् क्ङिति ह्रस्वो वा णत्वमिति पाणिनिः ।

णिल दुर्गन्धे तुदा० पर० सक० सेट् । निलति प्रणिलति । अनेलीत् ।

णिव सेके भ्वा० पर० सक० सेट् इदित् । निम्वति प्रणिम्वति । अनिम्वीत् ।

णिश समाधौ भ्वा० पर०सक० सेट्। नेशति प्रणेशति अनेशीत्।
णिष सेके भ्वा० पर० सक० सेट्। नेषति प्रणेषति अनेषीत्।
णिस्त चुम्बने अदा०सक० सेट् इदित्। निंस्ते प्रणिंस्ते अनिंसीत्। क्वचित् वा णत्वमिति पाणिनिः। [षीत्।
णी प्रापणे भ्वा० उभ० द्विक० अनिट्। नयति प्रणयति अनैषीत्।
णील नीलताकरणे भ्वा० पर० सक० सेट्। नीलति प्रणीलति अनीलीत्।
णीव स्थौल्ये भ्वा० पर० सक० सेट्। नीवति। प्रणीवति। अनीवीत्।
णु स्तुतौ अदा०पर०सक०वेट्। नौति प्रणौति अनावीत् अनौषीत् नुनुविव।
णुद् प्रेरणे तुदा० उभ० सक० अनिट्। नुदति—ते प्रणुदति अनौत्सीत् अनुत्त।
णू स्तुतौ तु०कु०पर०सक० सेट्। नुवति प्रणुवति प्रणुवति अनुवीत्।
णेद् सचिधाने उभ० सक० सेट्। नेदति—ते प्रणेदति—ते।
णेष गतौ भ्वा० आ० अक० सेट्। नेषते प्रणेषते। अनेषिष्ट अनिनेषत् त। एते धातवः नादिका अपि सति हैतौ णत्व कार्य्यद्योतनार्थं गणे णोपदेशितया पठिताः प्रयोगे तु दन्त्यनादय एव पुनः प्रादियोगे णत्वमुपयान्ति।

त

त पु० तक—सहने हासे वा ड। चोरे, अन्तके, पुच्छे, क्रोड़े, म्लेच्छे, रक्ते शृगालपुच्छे च। तरके, पुंस्त्वे स्त्री० न०।
तक सहने हासे च भ्वा०पर०सक०सेट्। तकति अताकीत् अतकीत्।
तक दीप्त्यर्थे भ्वा० पर० अक० सेट् इदित्। तङ्कति अतङ्कीत्।
तक्र न० तक—रक्। चतुर्थांशजलयोगेन मथिते दधि।
तक्रकूर्चिका स्त्री० (छाना) पक्वे उष्णदुग्धे तक्रयोगेन जाताम् आमिक्षायाम्।
तक्ष काश्यें वा भ्वा० पक्षे स्वा० पर० सक० वेट्। तक्षति तक्ष्णोति अतक्षीत्—तक्षिता अताक्षीत् तष्टा। भर्त्सने तु संतक्षति।

तक्षक पु० तक्ष–ण्वुल् । विश्वकर्मणि, वर्द्धकौ, (छुतार) कश्यपस्य सुते नागभेदे च ।

तक्षणी स्त्री० तक्षतेऽनया ल्युट् । वास्याम्, (वाटण्) काष्ठतक्षण-साधने अस्त्रभेदे च । [नक्षत्रे च ।

तक्षन् पु० तक्ष–कनिन् । त्वष्टरि, वर्द्धकौ, विश्वकर्मणि, चित्रा-

तक्षशिला स्त्री० सिन्धुदेशे नगरीभेदे ।

तग गतौ भ्वा० पर० सक० सेट् इदित् । तङ्गति अतङ्गीत् ।

तगर पु० गृ–अच् तस्य क्रोडस्य गरः । (टगर) इति ख्याते ।

तङ्कन न० तकि–ल्युट् । दुःखेन जीवने । [तत्स्वभावे जन्तौ ।

तच्छील त्रि० तत् शीलं यस्य । स्वभावतः फलनिरपेक्षतया प्रवर्त्तमाने

तट उच्छ्राये भ्वा० पर० सक० सेट् । तटति अताटीत्–अतटीत् ।

तट त्रि० तट–अच् । कूले नद्यादेस्तीरे । अमरभते स्त्रियां ङीप् ।

तट आहतौ चु० उभ० सक० सेट् । ताटयति–ते अतीतटत् त ।

तटस्थ त्रि० तटे तिष्ठति स्था–क । तीरस्थे, समीपस्थे, मध्यमप्रविश्यै-वान्तिकस्थे, स्वरूपातिरिक्ते विशेषणे च ।

तटाक पु० तटमकति अक–अकगतौ अण् । तड़ागे ।

तटाग पु० तटमगति अग–अकगतौ अण् । जलाशयभेदे तड़ागे ।

तटिनी स्त्री० तट+अस्त्यर्थे इनि । नद्याम् ।

तड दीप्तौ आहतौ च चु०उभ०सक०सेट् । ताड़यति ते अतीतडत् त ।

तड आहतौ भ्वा० आत्म० सक० सेट् इदित् । तड्डते अतड्डिष्ट ।

तडाक पु० ताड्यते आहन्यते तटोऽनेन तड–आकन् नि० । जलाशयभेदे तड़ागे ।

तड़ाग पु० तड–नि० । "प्रशस्तभूमिभागस्थो बद्धसम्बत्सरोषितः । जलाशयस्तड़ागः स्या"दित्युक्ते "शतेन धनुर्भिः पुष्करिणी, त्रिभिर्दीर्घिका, चतुर्भिर्दीर्घः, पञ्चभिस्तड़ाग" इति वशिष्ठोक्ते पञ्चशतान्यूनधनुर्मिते द्विसहस्रान्यूनहस्तक्षेत्रफलके पञ्चचत्वारिंशद्धस्तान्यूनदीर्घविस्तारे जलाशये, कूटयन्त्रे च ।

तडा(टा)घात पु० "इन्द्रै; करिकराघातं तडा(टा)घातं विदुर्बुधा

इत्युक्तायां वयक्रीडायाम् अभ्यस्तानि "तडा(टा)घात" मिति कु० ।

तडित् स्त्री० ताड्यतेऽभ्रम् चुरा० तड्—इति निः ह्रस्वः । विद्युति ।

तडित्वत् पु० तडित् अस्त्यस्य मतुप् मस्य वः । मेघे, शक्रे च ।

तडुक पु० तडि—उकुल् । खड्गे, फेणे, समासप्रान्ते वाक्ये, गृह-दारुणि, तरुस्कन्धे च । मायावटुले, उपघातके च जने त्रि० ।

तडुलपरिष्कारे पु० न० । [शाके च । विडङ्गे पु० स्त्री० टाप् ।

तण्डुल पु०तडि-उलच् । धान्यादिसारे-निस्तुषे धान्यादौ, तण्डुलीय—

तण्डुलीय पु० तण्डुलाय हितं छ । (लुडनटे) (चाँपानटे) शाकभेदे, विडङ्गे च । स्वार्थे कन् उक्तशाके ।

तण्डुलीयिका स्त्री० तण्डुलाय हिता क संज्ञायाम् कन् । विडङ्गे ।

तण्डुलेय तण्डुलाय हिता ढ । तण्डुलीयशाके । यत् । तण्डुल्योऽप्यत्र ।

तत् अव्य० तन—किप् । क्षेतौ । [पृथौ च त्रि० ।

तत न० तन—क्त । वीणादिवाद्ये । वायौ पु० । व्याप्ते, विस्तृते,

ततपत्नी स्त्री० ततं पत्नं यस्याः । कदल्याम् ।

ततस्त्य त्रि० अव्ययात् त्यप् । तत्र भवे ।

तति स्त्री० तन—क्तिन् । श्रेण्यौ ।

तत्काल पु० सः कालः । वर्त्तमानकाले ।

तत्कालधी त्रि० तस्मिन् उचिते काले धीर्बुद्धिर्यस्य । अनिष्टादिनि-वारणाय झटिति प्रत्युत्पन्नबुद्धौ जने ।

तत्क्रियः त्रि० वेतनं विना स्वभावतः सा क्रिया कर्म यस्य । कर्म्मकरणशीले, वेतनं विना कर्म्मकारे ।

तत्क्षण पु० सचासौ क्षणः कालः । सद्योऽर्थे ।

तत्त्व(त्व) न० तन—क्विप् ततो भावः तस्य भावो वा त्व वा तलोपः । याथार्थ्ये, स्वरूपे, अनारोपितस्वरूपे, परमात्मनि, ब्रह्मणि तदिति सर्वनाम सर्वं च ब्रह्म तस्य नाम सर्वनाम तस्य भावः । ब्रह्मत्वे । विलम्बिते न्यायवाद्यादौ, चेतसि, वस्तुनि, सांख्योक्तेषु पञ्चविंशतौ पदार्थेषु ।

तत्त्वज्ञान न० ई त० । यथार्थज्ञाने, ब्रह्मज्ञाने च ।

तत्पर त्रि० तत्परस्तत्तमं यस्य । तन्नते, तदासक्ते च ।

तत्परायण त्रि० तदेव परमयनं यस्य णत्वम् । तदासक्ते ।

तत्पुरुष पु० व्याकरणोक्ते समासभेदे ।

तत्फल पु० तनोति क्विप् तत् विस्तीर्णं फलति विकाशते अच् । पुष्पमात्रविकाशिनि कुसुमे, क्षुद्रौषधौ चोरनामौषधौ च ।

तत्र अव्य० तस्मिन् कालादौ त्रल् । तस्मिन्नित्यर्थे ।

तत्रत्य त्रि० तत्र भवः अव्ययात् त्यप् । तत्र भवे वस्तुनि ।

तत्रभवत् त्रि० सः पूज्योभवान् प्रथमार्थे त्रल् ततः कर्म० । पूज्ये स्त्रियां ङीप् । तत्रभवती "तत्रापि तत्रभवती"ति नैषधम् ।

तथा अव्य० तेन प्रकारेण प्रकारे थाच् । सादृश्ये, अभ्युपगमे, पृष्टप्रतिवाक्ये, समुच्चये, निश्चये च ।

तथागत पु० यथा पुनरावृत्तिर्न भवति तथा गतो ज्ञातः । बुद्धमुनौ ।

तथाच अव्य० तथेति चिनोति चि—ड । पूर्व्वोक्तार्थदृढीकरणे ।

तथाहि अव्य० तथा च हि च इ० । निदर्शने प्रसिद्धमेवेत्यर्थे ।

तथ्य न० । तथा तत्र साधु यत् । सत्ये । तद्वति त्रि० ।

तद् त्रि० तन—अदि डिच्च । पूर्व्वोक्ते बुद्धिस्थे, परामर्शयोग्ये विप्रकृष्टविषये च । ब्रह्मणि न० । "ओं तत्सदिति निर्देशो ब्रह्मण" इति गीता ।

तदा अव्य० तस्मिन् काले दाच् । तस्मिन् काले इत्यर्थे ।

तदात्मन् त्रि० स आत्मा यस्य । तत्स्वरूपे ।

तदात्व न० तदेतस्य भावः तदा+त्व । तत्काले ।

तदानीम् अ० तस्मिन् काले—तद्+दानीम् । तदेत्यर्थे ।

तदासक्त त्रि० तस्मिन् गत आसक्तः । तत्परे एकान्तचित्ततया तत्रासक्ते ।

तद्गुण पु० अलङ्कारोक्ते अर्थालङ्कारभेदे ।

तद्गुणसंविज्ञान पु० तत्र बहुव्रीहौ गुणस्य गुणीभूतस्य (विशेषणस्य) संविज्ञानं विशेष्यपारतन्त्र्येण बोधनं यत्र । व्याकरणोक्ते बहुव्रीहिसमासभेदे भवति च लम्बकर्णमानयेत्यादौ गुणीभूतस्य कर्णस्याप्यानयनम् ।

तद्धन त्रि० तदेव धनं यस्य । कृपणे स हि सर्वमेव धनमपर्याप्तत्वावधार्य्य आत्मनि तद्धनत्वमेवाभिमन्यते ।

तद्धर्म्मन् त्रि० उद्देश्यान्तरं विनाऽपि स एव धर्म्मो यस्य अनिच् समा० । स्वधर्म्मोऽयमिति बुद्ध्या धर्म्माय प्रवर्त्तमाने जने ।

तद्धित पु० तेभ्यो विपरीतस्यापत्यप्रकृतीनां स्वविशिष्टतया प्रयोगेभ्यः हितः । व्याकरणोक्ते प्रत्ययभेदे ।

तन्द्रि अवसादे मोहे च० पर० अक० सेट् इदित् । तन्द्रति अतन्द्रीत् ।

तद्वत् अव्य० तेन तुल्यं या तुल्या सा चेत् क्रियेत्यर्थे वति । तद्वदयं क्रियावति । तस्य तत्र वा तुल्यमित्यर्थे वति । तत्तुल्येऽर्थे यथा तद्वत् शिवस्य विभूता, तद्वत् शिवे भक्तिरित्यादि । तद् अस्त्यर्थे मतुप् मस्य वः । तद्विशिष्टे त्रि० ।

तन विस्तृतौ तना० उभ० सक० सेट् । तनोति तनुते अतानीत्—अतनीत् अतत—अतनिष्ट ततान तेने । तनित्वा—तान्त्वा ।

तन उपकारे श्रद्धायां शब्दे आघाते च बा० चुरा० उभ० पक्षे भ्वा० सक० सेट् । तानयति ते तनति अतीतनत् त अतानीत्—अतनीत् । उपसर्गात् दैर्घ्यं । आतानयति दीर्घो भवति ।

तनय पु० तनोति कुलम् तन—कयन् । पुत्रे । दुहितरि, चक्रकुल्यायां, लतायां, घृतकुमार्यां च स्त्री० टाप् ।

तनिमन् पु० तनोर्भावः इमनिच् । तनुत्वे, कार्श्ये च ।

तनु स्त्री० तन—उ । देहे, मूर्त्तौ वा ऊङ् । तनुश्च अल्पे, विरले, कृशे च त्रि० । स्त्रियां वा ङीप् तन्वी तनुः ।

तनुच्छाय पु० तन्वी छाया यस्य । वर्बुरकवृक्षे । ह्रस्व० । देहच्छायायां स्त्री० न० । [स्त्री० देहजातमात्रे त्रि० ।

तनु(नू)ज पु० तनोः तन्वा वा जायते जन—ड । पुत्रे । दुहितरि

तनुत्र न० तनुं देहं त्रायते त्रै-क । कवचे । ल्युट् । तनुत्राणमस्यत्र ।

तनुत्वचा स्त्री० तन्वी त्वचा यत्कलं यस्याः । चुक्राम्लिकायां ।

तनुपत्र पु० तनूनि कृशानि पत्राणि यस्याः । इक्षुदीपवृक्षे ।

तनुभस्त्रा स्त्री० तनोर्दैहस्य भस्त्रेव । नासिकायाम् । कर्म० । क्षुद्रभस्त्रायाम् ।

तनुभृत् पु० तनुं देहं बिभर्त्ति आत्मत्वेनाभिमन्यते भृ–क्विप् । जीवे "या दुस्त्यजा तनुभृतामिति भागवतम् ।

तनुमध्या स्त्री० तनु क्षयं मध्यं यस्याः । क्षयमध्यायां स्त्रियां, षड्ऽक्षरपादके छन्दोभेदे च ।

तनुवार न० तनुं देहं वृणोति वृ–आण् उप० । कवचे, सन्नाहे च ।

तनुबीज पु० तनूनि क्षयीणि बीजानि यस्य । बीजवदरे ।

तनुस् न० तन–उसि । देहे ।

तनूनपात्(द्) पु० तनूं न पातयति पत–णिच्–क्विप् । अग्नौ, जठरस्थत्वेऽपि भुक्तान्नपाचनादस्य देहापातकत्वम् । तनूं न पाति रक्षति पा–क्त । यज्ञौ । अत्र पक्षे तनूनपान्नौ इत्यादिभेदः तन्वा ऊनं क्षयं पाति तनूनपं इत्यादि तदत्ति अद–क्विप् । यज्ञौ अस्मिन् पक्षे तनूनपादौ इत्यादिभेदः ।

तनूरुह न० तनौ रोहति रुह–क । लोमनि पक्षिणां पक्षे च तनुरुत्फुल्लतनूरुहोऽजनीति नैषधम् ।

तनृच गतौ भ्वा० परo सकo । तञ्चति अतञ्चीत् । तञ्चित्वा तञ्चा ।

तनृत्व सङ्कोचने क्रधा० परo सकo वेट् । पाणिनीयगणे अनृजू साहचर्य्यादयं वेडेव बोपदेवगणे उदित्करणं प्रामादिकम् । तनक्ति अतनृक्षीत् अतानृक्षीत् ।

तनृज सङ्कोचने क्रधा० परo सकo । पाणिनीयगणे (तनृचू) इत्यत्र तनृजू इति पाठान्तरम् अनृजुसाहचर्य्यात् अयमूदित्त्वात् वेडेव । तनक्ति अतनृक्षीत् अतानृक्षीत् ।

तन्तु पु० तन–तुन् । व्याधे, अपत्ये, सन्ततौ, सूत्रे च ।

तन्तुकीट पु० तन्तोः कीटः । (गुटिपोका) कीटभेदे ।

तन्तुनाभ पु० तन्तुनाभावस्य अच् समा० । (माकड़सा) लूतायाम् ।

तन्तुनिर्य्यास पु० तन्तुरिव निर्य्यासो यस्य । तालवृक्षे ।

तन्तुपर्वन् न० तन्तोः [illegible] रूपं पर्व । चान्द्रश्रावणपौ-

र्ष माख्याम् तद्दिने हि वामनाय यज्ञोपवीतदानोत्सव: कृतो विहितः ।

तन्तुभ पु० तन्तुना वस्त्रेण भाति भा–क । सर्पभेदे, वस्त्रे च ।

तन्तुर(ल) न० तन्तुर्विद्यतेऽस्य र–अच् वा । वस्त्रादौ ।

तन्तुवाप पु० तन्तून् वपति वप–अण् उप० । तन्तुवाये (ताँति) ।

तन्तुवाय पु० तन्तून् वयति वे–अण् । (ताँति) जातिभेदे ।

तन्तुविग्रहा स्त्री० तन्तवो विग्रहे यस्याः । कदल्याम् । तत्त्वचि हि बहुतन्तवो प्रादुर्भवन्ति ।

तन्तुशाला स्त्री० तन्तूनां वपनाय शाला । (ताँतघर) तन्तुवपनगृहे ।

तन्तुसन्तत त्रि० तन्तुभिः सन्ततं व्याप्तम् । सूत्रवस्त्रे ।

तन्तुसार तन्तवद्रव सारो मध्यास्य । गुवाकवृक्षे ।

तन्त्र न० तन–ष्ट्रन् । सिद्धान्ते, ओषधौ, कुटुम्बकार्य्ये, प्रधाने, तन्तुवाये, परिच्छदे, हेतौ, उभयार्थं सङ्कल्पप्रवृत्तौ, इति कर्त्तव्यतायाम् राष्ट्रे, परच्छन्दे कारणे, अर्थसाधके, तन्त्रौ, स्वराष्ट्रचिन्तायाम् परिजने, तन्तुवायशलाकायाम् प्रबन्धे, शपथे, धने, गृहे, वपनसाधने, कुले, वेदशाखाभेदे, वेदादिशास्त्रे, स्वनामख्याते शिवोक्ते शास्त्रे च ।

तन्त्रक न० तन्त्रादचिरादपहृतम् कन् । नवीने वस्त्रे ।

तन्त्रता स्त्री० तन्त्रस्य भावः तल् । अनेकोद्देशेन सङ्कल्पप्रवृत्तौ यथा तर्पणपूजनाद्यनेककर्म्मोद्देशेन सङ्कल्पज्ञाने कृते सर्व कर्माङ्गज्ञानसिद्धिः ।

तन्त्रवाप(य) पु० तन्त्राणि तन्त्रून् वप(य)ति वप–वे–वा अण् उप० । तन्तुवाये (ताँति) । [गुडूच्याम् ।

तन्त्रिका स्त्री० तन्त्रयते तन्त्र–इ ततः स्वार्थे कन् अणोह्रस्वः ।

तन्त्री स्त्री० तन्त्रि–ङी । गुडूच्याम्, वीणाभेदे, देहशिरायाम् रज्ज्वाम्, नदीभेदे, युवतीभेदे च ।

तन्द्रा स्त्री० सौ० तन्द्रि–अ । आलस्ये, निद्रायाम्, प्रमीलायाम् ।

तन्द्रालु त्रि० सौ० तन्द्रि–आलुच् । निद्राशीले ।

तन्द्रि(न्द्री) स्त्री० सौ० तन्द्रि–इन् वा ङीप् । आलस्ये निद्रायाम् ।

तन्मय त्रि० तदेव मयट्। तद्भावापन्ने अभेदे।

तन्मात्र त्रि० तदेव मयूर०। तदात्मके। सा मात्रा यस्मिन्। सांख्योक्तेषु "तस्मात्तस्मात्र तन्मात्रा तेन तन्मात्रता स्मृता। तन्मात्राण्यविशेषाणि अविशेषात्ततोहि ते। न शान्ता नापि घोरास्ते न मूढास्त्वविशेषिणः, श्रुत्युक्तेषु पञ्चसु शब्दादिकारणीभूतेषु भूतेषु।

तन्वी स्त्री० तनु+ङीप् पृषिरण्यर्षाम्। तनुत्वगुणयुक्तायाम् क्षयाक्लिष्टायाञ्च। [अतिपिष्ट।

तप दाहे भ्वा० उभ० सक० सेट्। तपति—ते अतापीत्—अतपीत्

तप उपतापे सक० ऐश्वर्ये अ० दि० आ० अनिट्। तप्यते अतप्त।

तप दाहे चु० उ० सक० सेट्। तापयति—ते अतीतपत्—त।

तप उपतापे सक०ऐश्वर्ये अक०भ्वा०पर० अनिट् तपति ततापीत्।

तप पु० तप—अच्। ग्रीष्मे ज्यैष्ठाषाढात्मके ऋतौ।

तपती स्त्री० तप—शतृ ङीप्। छायानाम्न्याम् सूर्य्यपत्न्यां, नदीभेदे, सूर्य्यप्रसूतायाञ्च यदोगात् कुरुवस्तापत्या उच्यन्ते।

तपन पु० तप-ल्यु। सूर्य्ये, तापे, मज्जातरुवृक्षे, नरकभेदे ग्रीष्मे ऋतौ, अर्कवृक्षे, रुद्राग्निभेदवृक्षे, सूर्य्यकान्तमणौ च।

तपनतनय पु० ६त०। यमे। यमुनायां, शनौवृक्षे च स्त्री०।

तपनी स्त्री० तप—ल्यु गौरा० ङीष्। गोदावरीनद्याम्।

तपनीय न० तप—अनीयर्। स्वर्णे। स्वर्णे कर्त्। अलंकारे।

तपस् पु० तप—असुन्। चान्द्रे माघे मासि, शिशिरे ऋतौ, जनलोकोपरिस्थे लोकभेदे च। आलोचने, 'स तपोऽकुरुतेति श्रुतेः स्वाश्रमविहितधर्म्मे, वैधे लोकजनके चान्द्रायणादौ कर्म्मणि, ज्योतिषोक्ते लग्नतो नवमस्थाने च न०।

तपस्य पु० तपसि तपश्चरणाय साधुः अनतिशीतोष्णत्वात् यत्। फाल्गुने मासि। तपसि साधे भवः यत्। कुन्दपुष्पवृक्षे तपश्चरणे साधुर्यत्। तपस्यभिरते त्रि०।

तपस्या स्त्री० तपश्चरति तपस्+क्यच्—अ। तपश्चरणे, व्रतचर्य्यायाञ्च

तपस्विन् त्रि० तपस्+अस्त्यर्थे विनि। तापसे, चान्द्रायणादिव्रतधा-

रिणि, अनुकम्पो, दीने प्रशस्ततपोवति च । घृतकरञ्जे वनस्थभेदे, वटके च पु० ।

तपस्विनी स्त्री० तपस्+विनि ङीप् । तपोयुक्तायां स्त्रियां, जटामांस्यां, कटुरोहिण्याम्, दीनायाम्, अनुकम्पायां, स्त्रियाञ्च ।

तपात्यय पु० तपस्य ग्रीष्मस्यात्ययोऽवसानं यत्र काले । वर्षाकाले "तपात्यये वारिभिरुक्षिते"ति कुमारः ।

तपोधन पु० तपोधनमतीवेष्टत्वात् यस्य । तापसे, तपनटङ्के च ।

तपोवन न० ईत० । तापससेव्ये वनभेदे, तन्नामके तीर्थभेदे च ।

तप्तकुम्भ पु० तप्तःकुम्भो यत्र । नरकभेदे ।

तप्तकृच्छ्र न० "षट्पलन्तु पिबेद्भक्ष्यं पलन्तु पयः पिबेत् । पलमेकं पिबेत् सर्पिस्तप्तकृच्छ्रं विधीयते इत्युक्ते व्रतभेदे, "पयो घृतसुरं वायुं तप्तं प्रतिदिनं पिबेत् स तप्तकृच्छ्र इति गौतमोक्तेः पुंस्त्वमपि ।

तप्तपाषाणकुण्ड न० तप्ताःपाषाणा यत्र तादृशं कुण्डं यत्र । नरकभेदे ।

तप्तबालुक न० तप्ता बालुका यत्र । नरकभेदे ।

तप्तमुद्रा स्त्री० तप्ता मुद्रा चिह्नम् । वैष्णवोचितधर्मरूपेऽग्नि तापितलौहशलाकादिना कृते भगवदायुधाकारे "कृत्वा धातुमयीं मुद्रां तापयित्वा स्वकां तनुम् । चक्रादिचिह्नितं भूप ! धारयेत् वैष्णवो नर इति ब्रह्माण्डोक्ते चिह्नभेदे ।

तप्तसुराकुण्ड न० तप्तायाः सुरायाः कुण्डं यत्र । नरकभेदे ।

तप्तसूर्म्मिकुण्ड न० तप्तसूर्म्मेः कुण्डं यत्र । नरकभेदे ।

तम खेदे अक० दैन्यायां सक० दिवा० परस्मै० सेट् । ताम्यति । अतमत्—अतमीत् । तमित्वा तान्त्वा ।

तम पु० ताम्यति तम—अच् । तमोगुणे, मतान्तरे राहौ च । तमोलङ्के च रात्रौ स्त्री० । अन्धकारे पादार्थे च न० ।

तमःप्रभ पु० तमस इव प्रभायस्य । नरकभेदे । नरकभूमौ स्त्री० ।

तमस् न० तम—असुन् । नेत्रवृत्तिरोधके नैशादिध्वान्ते, शोके, पापे, कार्य्याकार्य्यविवेके, विशेषदर्शनविरोधिदोषे सांख्योक्ते गुरुवरणकमेऽ तम इत्युक्ते गुणभेदे राहौ च ।

तमस न० तम–असच् । अन्धकारे । नदीभेदे स्त्री० तमसापगाया इति रघुः ।

तमस्विनी स्त्री० तमस् अस्त्यर्थे विनि । रात्रौ ।

तमाल पु० तम–कालनृ । स्वनामख्याते वृक्षे, तिलके, वरुणवृक्षे, खड्गे, कृष्णखदिरे च । वंशत्वचि पु० न० । ताम्बूलवल्लीभाम्, वरुणवृक्षे च स्त्री० ङीप् ।

तमालक पु० तमाल+स्वार्थे कन् । तमालवृक्षे, सुनिषण्णशाके न० । पत्रके (तेजपात) पु० न० । [तमालवृक्षे पु० ।

तमालपत्र न० तमालस्य पत्रमिव । तिलके, (तेजपात) पत्रके च ।

तमि(मी) स्त्री० तम–इन् वा ङीप् । रात्रौ ।

तमिस्र न० तमोऽस्त्यत्र र नि० । अन्धकारे, कोपे, सर्वाहङ्कार मूले अज्ञाने च । तामिस्रकारात्रौ स्त्री० ।

तमिस्रपक्ष पु० तमिस्रप्रधानः पक्ष शाक० । कृष्णपक्षे । प्रथमतोऽन्धकारस्याधिक्यात् तस्य तत्प्रधानत्वम् ।

तमोघ्न पु० तमोऽन्धकारं मोहमज्ञानं वा हन्ति हन–टक् । सूर्य्ये, वह्नौ, चन्द्रे, बुद्धे, विष्णौ, शिवे च ।

तमोज्योतिस् पु० तमसि अन्धकारे ज्योतिरस्य । खद्योते कीटे ।

तमोऽपह पु० तमोऽन्धकारमज्ञानं वापहन्ति अप+हन–ड । सूर्य्ये, चन्द्रे, वह्नौ, ज्ञाने च तमोनुदादयोऽप्यत्र ।

तम्ब गतौ भ्वा० पर० सक० सेट् । तम्बति अतम्बीत् ।

तय गतौ रक्षणे च भ्वा० आ० सक० सेट् । तयते अतयिष्ट ।

तरक्षु पु० तरं गतिं मार्गं वा क्षिणोति क्षितदु०डु । मृगादने क्षुद्रव्याघ्रे ।

तरङ्ग पु० तॄ–अङ्गच् । (ढेउ) जलस्य वायुना जलस्य सञ्चालनेन तिर्य्यगूर्द्ध्वादिभ्रमणे ।

तरङ्गिणी स्त्री० तरङ्ग+अस्त्यर्थे इनि नद्याम् ।

तरङ्गित त्रि०तरङ्गः संजातोऽस्य तारा० इतच् । जाततरङ्गे, चञ्चले च

तरण पु० तॄ–ल्यु । भेलके (डोङ्गा) स्वर्गे च । भावे ल्युट् । पारगमने, प्लवने च न० ।

तरणि पु० तॄ–अनि । सूर्ये, मेलके, अर्कवृक्षे, किरणे, ताप्ये च । नौकायां, घृतकुमार्याम् स्त्री० वा ङीप् । ङीबन्तः पद्मवारिण्यामपि ।

तरण्ड पु० न० तॄ–अण्डच् । वड़िशीवृक्षवल्लवल्लकाष्ठे, (क्लिप) प्लवे च । देशभेदे पु० । नौकायां त्रि० स्त्रीत्वपक्षे ङीप् ।

तरतम त्रि० न्यूनाधिकभावान्वितेऽर्थे । तारतम्येन वर्त्तमान इति शारीरकभाष्यम् । [स्त्री० ङीप् ।

तरन्त पु० तॄ–झच् । समुद्रे, प्लवे, भेदे राक्षसे च । नौकायां

तरपण्य न० तरस्य नद्यादिपारयानस्य पण्यं शुल्कम् । नद्यादेः पारयानार्थे देये शुल्के ।

तरल पु० तॄ–अलच् । हारमध्यस्थे मणौ, हारे, तले च । चपले, कामुके, विस्तारे, भास्वरे मद्यशून्ये–द्रव्ये, द्रवीभूते पदार्थे च त्रि० । यवागवाम्, सुरायाञ्च स्त्री० ।

तरलित त्रि० तरल इवाचरति तरल+क्विप्-क्त । आन्दोलिते कम्पिते, धूते, लुलिते च ।

तरवारि पु० तरं शत्रूणां गतिं वारयति तॄ–णिच् इन् । खड्गभेदे ।

तरस् न० तॄ–असुन् । जले, वेगे, सवेगगमने, रोगे, तीरे वानरे च । [यस्य बलप्रदत्वात् तथात्वम् ।

तरस न० तरो वेगोपलक्षितं बलमस्त्यस्मिन् अच् । मांसे, तद्वत्–

तरसा अव्य० तॄ–असाच् । झटितीत्यर्थे वैध्ये ।

तरस्विन् पु० तरस्+अस्त्यर्थे विनि । वायौ, गरुड़े च । वेगवति शूरे च त्रि० । [दधायाञ्च ।

तरि(री) स्त्री० तॄ–इ वा ङीप् । नौकायाम्, वसनपेटके, वसन-

तरिक पु० तराय पारगमनाय हितः ठन् । प्लवे, भेलके । नौकायां स्त्री० टाप् ।

तरी स्त्री० तॄ–ई । नौकायाम् । अङीबन्तत्वान्न सुलोपादि ।

तरु पु० तॄ–उ । वृक्षे । [वृक्षखण्डादयोऽप्यत्र ।

तरु(ष)खण्ड पु० तरूणां समूहः तरु–(ष)खण्ड । वृक्षसमूहे एवं

तरुण पु० तॄ-उनन् । एरण्डवृक्षे, स्थूलजीरके च । कुञ्ज पुष्पे न० । नूतने यूनि च त्रि० । युवत्यां स्त्री० ङीप् । डीबन्तस्तु घृतकुमार्य्यां, दन्तीवृक्षे (सेओंती) पुष्पवृक्षे च ।

तरुणज्वर पु० "आसप्तरात्रं तरुणं ज्वरमाहुर्मनीषिणः" इत्युक्ते सप्तरात्रपर्य्यन्ते ज्वरे ।

तरुरुहा स्त्री० तरुषु रोहति रुह-क । वल्लीके (परगाछा)

तरुवल्ली स्त्री० तरोर्वल्लीव । वल्लीके ।

तरुविलासिनी स्त्री० तरोर्विलासिनीव । नवमल्लिकायाम् ।

तर्क पु० तर्क-घञ् । आकाङ्क्षायां, वितर्के, वुद्धिसाध्ये विचारे, व्याप्यारोपेण व्यापकप्रसञ्जने, यथा अत्र यदि वह्निर्न स्यात् धूमोऽपि न स्यात् । मीमांसादिशास्त्रे, आगमाविरोधिन्यायेन आगमार्थपरीक्षणे, व्यभिचारशङ्कानिवर्त्तके न्यायोक्ते आत्माश्रयादिपञ्चके, अविज्ञाताथें कारणोपपत्तितत्त्वज्ञानार्थे-जल्पे, उत्प्रेक्षायाञ्च । [अततर्कत्-त ।

तर्क दीप्तौ अक० वितर्के सक० चुरा० उभ० सेट् । तर्कयति ते

तर्कविद्या स्त्री० तर्क० । गौतमोक्तानां प्रमाणप्रमेयादीनां षोड़शानां पदार्थानां विद्यायां, काणादोक्तषट्पदार्थादिविद्यायाञ्च ।

तर्कारी स्त्री० तर्कमर्हति तर्क-अण् । जयन्तीवृक्षे ।

तर्कु पु० तृत-उ नि० । (टेको) इति ख्याते यन्त्रभेदे ।

तर्कुलासक पु० तर्कुं लासयति चालयति लस-णिच्-ण्वुल् । तर्कुचालके यन्त्रे (चरका) ।

तर्ज्ज भर्त्सने भ्वा० पर० सक० सेट् । तर्ज्जति अतर्ज्जीत् ।

तर्ज्ज भर्त्सने चु० आ० सक० सेट् । तर्ज्जयते अततर्ज्जत ।

तर्जनी स्त्री० तर्ज्जयतेऽनया तर्ज-ल्युट् । अङ्गुष्ठान्तिकस्थे अङ्गुलौ ।

तर्ण पु० तृण्-अच् । वत्से । एवुल् । गोवत्से, "कृष्णसनाथा तर्णकषण्ढिरिति छन्दोम० । सद्योजाते-शिशौ च ।

तर्द हिंसे भ्वा० पर० सक० सेट् । तर्दति अतर्दीत् ।

तर्दू स्त्री० तर्द्-तृद-घा ज । काष्ठनिर्मितायां दर्व्यामु ।

तर्पण न० तृप–ल्युट्। तृप्तौ। क्षिप्–ल्युट्। प्रीणने, तर्पणकर्त्तव्ये पञ्चयज्ञान्तर्गते पितृयज्ञे, यज्ञकाष्ठे च।

तर्पिणी स्त्री० तर्पयति प्रीणयति णिनि। पञ्चचारिण्योषधौ।

तर्व गतौ भ्वा० पर० सक० सेट्। तर्वति अतर्वीत्।

तर्ष्मन् न० तृ–मनिन्। यूपाग्रभागे। इति भरतः।

तर्ष पु० तृष–घञ्। अभिलाषे तृष्णायाञ्च "निष्टप्ततर्षैरुपगीयमाना"।

तर्हि अव्य० तद्+र्हिल्। तस्मिन् काले इत्यर्थे।

तल प्रतिष्ठायां वा चुरा० उभ० पक्षे भ्वा० पर० अक० सेट्। तालयति ते तलति। अतीतलत् त अतालीत्।

तल पु० न० तल–अच्। स्वरूपे, यथा भूमितलं करतलम्। अधोभागे, चपेटे, तालवृक्षे च। खड्गमुष्टौ, आधारे, स्वभावे च पु०। यने न०। ज्याघातवारणे, गर्त्ते च स्त्री० न०।

तलप्रहार पु० तलेन चपेटेन प्रहारः प्र+हृ–घञ्। (चापड्मारा) चपेटाघाते।

तलातल न० अतलादिषु मध्ये पञ्चमे पाताले।

तलित न० तल+तारकादि० इतच्। भट्टमांसे। [च त्रि०।

तलिन न० तल–इनच्। शय्यायाम्, विरसे, स्तोके, तुच्छे, खले

तलुन पु० तृ–उनन् रस्य लः। वायौ। यूनि, तरुणे च त्रि० युवत्यां स्त्री० ङीप्।

तल्प पु० न० तल–पक्। शय्यायाम्, अट्टालिकायां, दारेषु च।

तल्पकीट पु० इत०। (आरपोका) कीटभेदे।

तल्पज पु० तल्प–जन–क। प्रशस्ते उत्तरपदस्थोयम् प्रशंसावचनैरिति समासेऽपि नियतलिङ्गत्वेन तेन ब्राह्मणीतल्पज इतीष्यते

तष्ट त्रि० तक्ष–क्त। तनूकृते द्विधाकृते, गुणिते च।

तष्टृ पु० तक्ष–तृच्। (छुतार) जातिभेदे, विश्वकर्मणि, वर्द्धकौ च।

तस अलङ्कारे वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट्, इदित्। तंसयति–ते तंसति अततंसत्–त अतंसीत्।

तंस उत्क्षेपे दिवा० पर० सक० सेट्। तंसति अतंसीत् अतांक्षीत्। तंसित्वा तंस्वा।

तस्कर पु० तत् करोति तद्+कृ–अच् नि०। चौरे, प्रकाशाप्रकाशाभ्यां परद्रव्यापहारके, दमनकवृक्षे, वृक्षमात्रे, च। कोपवत्यां स्त्रियां स्त्री० ङीष्।

तांच्छील्य न० तत् शीलमस्य ष्यञ्। नियततत्स्वभावे।

ताट(ड)ङ्क पु० ताड्यते ताडः वा डस्य टः अङ्कः चिह्नं यस्य सक०। कर्णभूषणभेदे।

ताटस्थ्य न० तटस्थस्य भावः ष्यञ्। औदासीन्ये, नैकट्ये च।

ताड़का स्त्री०। राक्षसीभेदे। [(चाबुक)।

ताड़नी स्त्री० ताड्यतेऽनया तड–आघाते ल्युट्। कशायाम् (कोड़ा)

ताड़पत्र न० ताड़यति अच् ताड़ं पत्रमिव। कर्णभूषणभेदे।

ताड़ि(डी) स्त्री० चु० तड–इ। (ताडियात) ख्याते वृक्षभेदे।

ताण्डव न० तण्डुना मुनिना प्रोक्तमनुष्ठानं यस्य अण्। "पुंनृत्यं ताण्डवं प्रोक्तं स्त्रीनृत्यं लास्यमुच्यते" इत्युक्ते पुंसां नृत्ये, रुद्रभेदे, उद्धतनृत्ये च।

ताण्डवप्रिय पु० ताण्डवं प्रिय० यस्य। शिवे, नृत्यप्रियमात्रे त्रि०।

तात पु० तन–क्त दीर्घश्च। पितरि। अनुकम्प्ये, पूज्ये च त्रि०।

तात्पर्य्य न० तत्परस्य भावः ष्यञ्। यत्नातिशयायाम्, अभिप्राये, तत्परतायाञ्च।

तादर्थ्य न० तस्मै इदम् तदर्थं तस्य भावः ष्यञ्। तदर्थत्वे, तदुद्देश्ये च।

तादात्म्य न० स आत्मा स्वरूपं यस्य तस्य भावः ष्यञ्। अभेदे, स्वरूपे च। [तादृक्। टक्। तादृशः। एतावप्युक्तार्थौ।

तादृच त्रि० तस्येव दर्शनमस्य दृश–क्विप्। तथाविधेऽर्थे। क्विप्।

तान पु० तन–घञ्। "विस्तार्य्यन्ते प्रयोगाय मूर्च्छनाग्रामसंश्रयाः। तानास्तेऽप्यूनषड्जाद्यत् सप्तस्वरसमुद्भवा" इत्युक्ते गानाङ्गे स्वरभेदे "तानप्रदायित्वमिवोपगन्तुमि"ति कुमारः विस्तारे च। ज्ञानविषये न०

तान्त्रिक त्रि० तन्त्रं सिद्धान्तं तन्त्रात्मकशास्त्रं वाधीते वेद वा ठक्। ज्ञातसिद्धान्ते, ब्रह्मवादिनि, तन्त्रशास्त्राभिज्ञे च।

ताप पु० तप-घञ्। सन्तापे, कृच्छ्रे च।

तापस न० तपसि साधु यत्। तमालपत्रे (तेजपात)। तपः अस्त्यस्य अच्। तपस्विनि त्रि०। दमनकवृक्षे, वकवृक्षे च पु०।

तापसतरु पु० तापसोपयुक्ततरुः। इङ्गुदीवृक्षे तत्तैलादिना तापसानां सर्वकर्मनिर्व्याहात्।

तापसप्रिय पु० तापसानां प्रियः छायाप्रदत्वात्। प्रियालवृक्षे।

तापिञ्छ(ञ्ज) पु० तापिनं छादयति जयति वा छद्-जि-वा ड। पृषो०। तमालवृक्षे। [वाहिनदीभेदे।

तापी स्त्री० तापयति अच् गौरा० ङीष्। विन्ध्याचलस्थे पश्चिम-

तामरस न० तामरे जले सरसि सस-ड। पद्मे, ताम्रे, स्वर्णे धुस्तूरे, द्वादशाक्षरपादके-छन्दोभेदे च।

तामलकी स्त्री० ताय क्विप् ताः कर्म०। भूम्यामलक्याम्।

तामस पु० तमसि अन्धकारे अविद्यागुणे वा रतः अण्। सर्पे, उलूके खले च। तमसा गुणभेदेन निर्वृत्तम् अण्। सांख्योक्ते तमोजन्ये अहङ्कारादौ त्रि०। तमसः राहोरपत्यम् अण्। राहुसुतेषु ज्योतिषोक्तेषु केतुषु। तमसा व्याप्ता अण् ङीप्। रात्रौ, जटामांस्याम्, तमोधिकायां स्त्रियाञ्च स्त्री०।

तामिस्र पु० तमिस्रमस्त्यस्मिन् ण। सांख्योक्ते अष्टादशविधेविपर्ययरूपाज्ञानभेदे, भोगेच्छाप्रतिघातजे क्रोधे, तमिस्राचारिणि राक्षसे च। अन्धकारमये नरकभेदे न०। [वल्लीदले गुवाके, च।

ताम्बूल न० तम-ऊलच् वुगागमः दीर्घश्च। (पान) ख्याते नाग-

ताम्बूलकरङ्क पु० ६त०। (पानबाटा) ताम्बूलाधारपात्रे।

ताम्बूलपत्र पु० ताम्बूलमिव पत्रमस्य। पिण्डालौ।

ताम्बूलवल्ली स्त्री० तम-क्विप् ताम्, वल-भक्षने क पृ० दीर्घः कर्म० ताम्बूलाख्या वल्ली। (पान) नागवल्लीम् स्वार्थे कन् अत इत्वं च।

ताम्बूलिक त्रि० ताम्बूलं पण्यमस्य ठक्। (तामूलि) ताम्बूलविक्रयोपजीविनि जातिभेदे।

ताम्बूलिन् त्रि० ताम्बूल+अस्त्यर्थे इनि। (तामूलि) जातिभेदे।

ताम्र न० तम–रक् दीर्घश्च। धातुभेदे (तामा) कुष्ठरोगभेदे च अरुणावर्णे पु० तद्वति त्रि०।

ताम्रकर्णी स्त्री० ताम्रौ अरुणौ कर्णौ यस्याः। पश्चिमदिग्घस्तिन्याम्

ताम्रकार पु० ताम्रं ताम्रमयं करोति कृ–अण्। (कांसारि) जातिभेदे।

ताम्रकूट न० ताम्रस्य ताम्रवर्णस्य कूटमिव (तामाकू) इति ख्याते पदार्थे, "संविदा कालकूटञ्च ताम्रकूटञ्च धुस्तूरमि"ति तन्त्रम्।

ताम्रचूड पु० ताम्रा चूडा यस्य। कुक्कुटे।

ताम्रत्रपुज न० ताम्रञ्च त्रपु च ताभ्यां जायते जन–ड। कांस्ये तल्लोभयधातुजन्यत्वात्।

ताम्रपट्ट न० ताम्रमयं पट्टम्। (पाटो) ताम्रमये लेखनपत्रे।

ताम्रपत्र पु० ताम्रवर्णं पत्रमस्य। जीवशाके। कर्म्म० ताम्रमये लेखनपत्रे न०। [रिति रघुः।

ताम्रपर्णी स्त्री० नदीभेदे "ताम्रपर्णीसमेतस्य मुक्ताधारं महोदधे"-

ताम्रपल्लव पु० ताम्राणि पल्लवानि यस्य। अशोकवृक्षे।

ताम्रपाकिन् पु० पच्यते पाकः फलपुष्पादि ताम्रः पाकः अस्त्यस्य इनि। गर्हभाण्डवृक्षे।

ताम्रपुष्प पु० ताम्राणि रक्तानि पुष्पाण्यस्य। भूमिचम्पके।

ताम्रपुष्पिका स्त्री० ताम्राणि पुष्पाण्यस्याः ङीप् संज्ञायां कन् ह्रस्वः। रक्तावित्तृति (लालतेओडि)।

ताम्रपुष्पी स्त्री० ताम्राणि पुष्पाण्यस्याः ङीप् अवायाम्, धातक्याञ्च।

ताम्रफल पु० ताम्रं फलमस्य। अशोकवृक्षे।

ताम्रमूला स्त्री० ताम्रं मूलमस्याः टाप्। दुरालभायाम् (आलकुशी)।

ताम्रवल्ली स्त्री० कर्म्म०। मञ्जिष्ठायाम्।

ताम्रबीज पु० ताम्रं बीजं यस्य। कुलत्थे।

ताम्रदत्त पु० कर्म्म०। रक्तचन्दनवृक्षे, कुलत्थे च।

ताम्रदन्त पु० ताम्रं दन्तमस्य। कुलत्थे, स्त्रीत्वमपि टाप्।

ताम्रशिखिन् पु० ताम्रवर्णा शिखास्त्यस्य इनि। कुक्कुटे।

ताम्रसार पु० ताम्रवर्णं सारमस्य। रक्तचन्दनवृक्षे। कर्म०। तत्सारे न०।

ताम्रसारिक पु० ताम्रः सारोऽस्त्यस्य ठन्। रक्तखदिरे, रक्तचन्दने च।

ताम्रिक पु० ताम्रघटनं शिल्पमस्य ताम्रस्यायं वा ठक्। कांस्यकारे (कांसारि) जातिभेदे, ताम्रनिर्म्मिते कर्म्मभिते पदार्थे च।

तायृ पालने विस्तारे च भ्वा० आत्म० सक० सेट्। तायते अतायि—अतायिष्ट। णिच् अततायत्—त।

तार पु० तॄ—स्वार्थे णिच् अच्, प्रेरणे णिच्—करणादौ घञ् वा। वानरभेदे, शुद्धस्फटिकायाम्, प्रणवे, देवीप्रणवे, (ह्रीं) तरणे, शिरोजातघ्वनौ च। नक्षत्रे नेत्रमध्यस्थकनीनिकायाञ्च स्त्री० न०। रूप्ये, न०। अत्युच्चनादे, अत्युच्चे निर्म्मले च त्रि०। महाविद्याभेदे, बालिप्रत्यां, बृहस्पतिभार्य्यायाञ्च स्त्री०।

तारक पु० तारयति तॄ—णिच्—ण्वुल्। नाविके, भेलके, दैत्यभेदे च। नक्षत्रे, नेत्रमध्यस्थकनीनिकायाम् स्त्री० टाप् चिपा० नेत्त्वम् तारका। तारणकर्त्तरि त्रि० तत्र स्त्रियां तारिका।

तारकजित् पु० तारकं जितवान् जि—भूते क्विप्। कार्त्तिकेये तारकहृद्योऽप्यत्र।

तारकित न० तारका जाताः अस्य इतच्। नक्षत्रयुक्ते—आकाशे।

तारण पु० तारयत्यनेन ल्युट्। भेलके। ईत० वर्षमध्ये "शस्यं भवति सामान्यं तारणे सुरवन्दिते" इत्युक्ते वत्सरभेदे च। तारयितरि त्रि०।

तारतम्य न० तरतमयोर्भावः ष्यञ्। न्यूनाधिक्ये। निर्द्धनं निधनमेतयोर्द्वयोस्तारतम्यविधिसूक्ष्मचेतसामि"त्युक्तेः।

तारपुष्य पु० तारं निर्म्मलं शुभत्वात् पुष्यमस्य। कुन्दवृक्षे।

तारमाक्षिक न० तारस्य रूपस्य माक्षिकम् उपधातुभेदः। रजततुल्ये उपधातुभेदे।

तारशुद्धिकर न० तारस्य रजतस्य शुद्धिं धात्वन्तरयोगात् जातमलशुद्धि-कृरोति क ठक् । सीसके तत्सम्मर्कोद्भि रजतस्य मलशुद्धिर्लोकसिद्धा

तारापति पु० ६त० । शिवे, चन्द्रे, बृहस्पतौ, वालिवानरे, सुग्रीवे च

तारापीड पु० तारापीडमिव यस्य । चन्द्रे, कादम्बरीकथाप्रसिद्धे नृपभेदे च । [कर्पूरे ।

तारास्र पु० तारो निर्म्मलः जलशून्यः अभ्रः मेघइव शुभ्रत्वात् ।

तारिणी स्त्री० तारयति तॄ+णिच्—णिनि । शिवपत्न्यां द्वितीयायां महाविद्यायाम्, तारयत्यन्यान् स्त्रियाञ्च ।

तार्किक त्रि० तर्कं वेत्त्यधीते वा ठक् । तर्कशास्त्राध्येतरि तदभिज्ञे च । तर्कशास्त्रञ्च गौतमकणादबृहस्पत्यादिप्रणीत शास्त्रम् ।

तार्क्ष्य पु० । कश्यपसुनौ । [रथे अश्वकर्णवृक्षे, रसाञ्जने च ।

तार्क्ष्य पु० तार्क्ष्यस्यापत्यम् यञ् । गरुड़े, अरुणे, धर्म्मे, अश्वे, सुवर्णे

तार्तीयीक त्रि० तृतीय—स्वार्थे ठक् । तृतीये ।

ताल पु० तल—घञ्, णिच्—अच् वा । स्वनामख्याते वृक्षे, विस्तृ-ताभ्याम् अङ्गुष्ठमध्यमाभ्यां, परिमिते दीर्घपरिमाणभेदे, करतले, करास्फोटे, (ताल) कांस्यमयवाद्यभेदे, (करताल) खड्गमुष्टौ च । लेखपत्रे न० "तालोद्वादशभिर्जानुभ्रमणात् परिकीर्त्तित" इत्युक्ते द्वादशधा हस्तेन जानुमण्डलपरिभ्रमणोपलक्षिते कालरूपे मानभेदे, गीतादौ द्वित्रमात्रादिकालक्रियामाने च ।

तालक न० तल—एवुल् । हारपिधानयन्त्रे, हरितालें, आढ़कद्रव्ये च ।

तालध्वज पु० तालचिह्नितो ध्वजो यस्य । बलभद्रे ।

तालनवमी स्त्री० भाद्रशुक्लनवम्याम् । तद्दिने देवेभ्योविधानेन ताल-दानं स्मृतौ विहितम् ।

तालपत्र न० तालस्य पत्रमिव । कर्णभूषणभेदे ताड़ङ्के ।

तालपत्रिका स्त्री० तालस्य पत्रमिव पत्रमस्याः ङीप् संज्ञायां कन् ह्रस्वः तालमूलीवृक्षे ।

तालपर्णी स्त्री० तालस्य पत्रमिव पत्रमस्याः । मूषिकपर्ण्याम् ।

तालपर्ण न० स्त्री० तालस्य पर्णमिव पर्णमस्य । सुरालामगन्धद्रव्ये ।

स्त्रीत्वे ङीप् । आढक्यां स्त्री० ङीप् । [तालमूलिकाप्यत्र ।

तालमूली स्त्री० तालस्य मूलमिव मूलमस्याः । सुषल्याम् स्वार्थे कन् ।

तालवृन्त न० ताले करतले वृन्तं बन्धनमस्य, तालस्येव वृन्तमस्य वा । व्यजने (पाखा) स्वार्थे कन् । अत्रार्थे ।

तालाङ्क पु० तालस्तालचिह्नितः अङ्कः ध्वजोऽस्य । बलदेवे ।

तालिक पु० तालेन करतलेन निर्वृत्तः ठक् । चपेटे (चापड़) (हात-ताळि) । तालो+स्वार्थे कन् । तालमूल्याम् स्त्री० ।

ताली स्त्री० तालेन तन्नियोसेन निर्वृत्ता अण् । (ताड़ी) तालजात-सुरायाम् । तल-एअन्तात् अच् गौरा० ङीष् । (ताड़ियात्) वृक्षभेदे, तालमूल्याम्, (भूइआमला) वृक्षभेदे, आढक्याम्, (अरहर) तालीशपत्राख्ये वृक्षे, तालकोद्घाटनयन्त्रे (काटि) कृष्णिकायाञ्च ।

तालीश न० तालीव रोगान् श्यति शो-ड । खनामख्याते वृक्षे ।

तालीशपत्र न० तालीशं तालीवद् रोगनाशकं पत्रं यस्य । खना-मख्याते वृक्षे, भूम्यामलक्याञ्च ।

तालु न० तरन्यनेन वर्णाः तृ-ऊण् रस्य लः । जिह्वेन्द्रियाधिष्ठाने (तेलो) स्थानभेदे । स्वार्थे कन् तालुकमप्यत्र ।

तालुजिह्व पु० तालु एव जिह्वा यस्य । कुम्भीरे तस्य जिह्वा मूल-त्वेऽपि तालुनैव रसास्वादात् ।

तावत् अव्य० तत्परिमाणमस्य मि० । यावत्ये, अवधौ, माने, अव-धारणे, प्रशंसायां पक्षान्तरे, वाक्यभूषणे, तदेत्यर्थे च । "भक्तोपि तावत् क्रथकैशिकाना"मिति रघुः । तत्परिमाणवति त्रि० स्त्रियां ङीप् तावती । [तेकृत् त ।

तिक गतौ भ्वा० आत्म० सक० सेट् । तेकते अतेकिष्ट णिच् अत-तिक आस्कन्दे वधे च स्वा० पर० सक० सेट् । तिक्नोति अतेकीत् ।

तिक्त पु० तिज-क्त । वरणवृक्षे, कुटजे, रसभेदे (तेत) च । तद्वति त्रि० । पर्पटोषधौ न० । कटुकायां पाठायां, झिण्टिकायाञ्च स्त्री० टाप् ।

तिक्तक पु० तिक्त+संज्ञायां कन् । भूनिम्बे, (चिरायता) चिरतिक्ते

कृष्णखदिरे, निम्बे, कटुरोहिण्यां, तिक्तार्थे, पटोले च। कटु-तुम्ब्यां स्त्री० टाप्।

तिक्तगन्धिका पु० तिक्तो गन्धो लेशोऽपि यस्याः। वराहक्रान्तायाम्।

तिक्तगुञ्जा स्त्री० गुञ्जेव तिक्ता राजदन्ता०। करञ्जे।

तिक्तनण्डुला स्त्री० तिक्तनण्डुलोऽन्तःसस्यं यस्याः पिप्पल्याम्।

तिक्ततुम्बी स्त्री० कर्म० कटुतुम्ब्याम् (तितलाउ)। [पटङ्ग्याञ्च।

तिक्तदुग्धा स्त्री० तिक्तं दुग्धं निर्यासो यस्याः। क्षीरिण्याम्, अज-

तिक्तपत्र पु० तिक्तं पत्रमस्य। (काकरोल) कर्कोटके।

तिक्तपर्वन् स्त्री० तिक्तं पर्व ग्रन्थिर्यस्याः। ग्रन्थिदूर्व्वायाम्।

तिक्तपुष्पा स्त्री० तिक्तानि पुष्पाण्यस्याः। (आकनादी) पाठायाम्।

तिक्तफल पु० तिक्तानि फलानि यस्य। कतकवृक्षे (निर्म्माल्ये)।

तिक्तभद्रक पु० भद्रं करोति णिच्-ण्वुल् तिक्तोऽपि भद्रकः कर्म्म०। पटोले।

तिक्तरोहिणी स्त्री० तिक्ता सती रोहति रुह-णिनि कर्म०। कटुकायाम् (कटकी) स्वार्थे कन् अत इत्वं।

तिक्तवल्ली स्त्री० कर्म्म०। मूर्व्वालतायाम्।

तिक्तवीजा स्त्री० तिक्तानि वीजानि यस्याः। कटुतुम्ब्याम्।

तिक्तशाक पु० तिक्तः शाकोऽस्य। वरुणवृक्षे, खदिरवृक्षे च।

तिक्तसार पु० तिक्तः सारो निर्यासोऽस्य। खदिरे।

तिक्तिका स्त्री० तिक्ता स्वार्थे कन् ह्रस्वे अतइत्त्वम्। कटुतुम्ब्याम्।

तिग आस्कन्दे हिंसायाञ्च स्वा०पर०सक० सेट्। तिग्नोति अतैगीत्।

तिग्म न० तिज-मक् जस्य गः। तीक्ष्णे, तद्वति त्रि०।

तिग्मरश्मि पु० तिग्मा रश्मयोऽस्य। सूर्य्ये। तिग्मांशाद्योऽप्यत्र।

तिघ घातने स्वा० पर० सक० सेट्। तिघ्नोति अतेघीत्।

तिज तीक्ष्णीकरणे, चु०उभ०सक० सेट्। तेजयति ते अतीतिजत् त

तिज क्षमायां स्वार्थे सन् निशाने न सन् भ्वा० आत्म० सक० सेट्। तितिक्षते तेजते। अतितिक्षिष्ट अतेजिष्ट। [चालन्याम्।

तितउ पु० तन-डउ सन्वच्च डउ इति निर्देशात् न सन्धिः।

तितिक्षा स्त्री० तिज–सन्नौ स्वार्थे सन्–अ टाप्। क्षमायां परापमानादिसहने, शीतोष्णादिद्वन्द्वसहने च।

तितिक्षु त्रि० तिज–सन् उ। प्राणवियोगफलकभिन्नशीतादिसहनशीले।

तित्ति(र)रि पु० तिक्ति इत्यव्यक्तशब्दं राति रा–क, डि वा। (तितिर) पक्षिभेदे। [क्रियारूपाणि प्रतिपदादिषु, पञ्चदशसङ्ख्यायाञ्च।

तिथि(थी) पु० स्त्री० अत–इथिन् पृ० वा ङीप्। पञ्चदशसु चन्द्रकला-

तिथिक्षय पु० तिथीनां तिथ्युपलक्षित चन्द्रकलानां क्षयः क्षयारम्भो यस्मिन्। दर्शे अमावास्यायाम्। ईत०। तिथीनां नाशे।

तिथिप्रणी पु० तिथीन् प्रणयति स्वगत्या निष्पादयति प्र+णी–क्विप्। चन्द्रे "सायन्तनीं तिथिप्रणम्" इति भट्टिः।

तिन्तिड़ीक न० तिम–आर्द्रीभावे अनीकादयश्चेति नि०। चुक्रे (तेतुल) वृक्षभेदे पु०। क–लोपे। तिन्तिड्यत्वार्थे स्त्री०। ङस्य वा खत्वे तिन्तिलीकादयोऽप्यत्र।

तिन्दु पु० तिज–कु–नुगभ्यादि० नि०। (तेंदु) ख्याते वृक्षे स्वार्थे कन् (गाव) इति ख्याते वृक्षे पु० स्त्री० स्त्रीत्वे ङीप्।

तिप रक्षणे भ्वा० आत्म० सक० वेट्। तेपते अतेपिष्ट अतिप्त।

तिम आर्द्रीभावे भ्वा० पर० अक० सेट्। तेमति अतेमीत्।

तिम आर्द्रीकरणे दिवा० पर० सक० सेट्। तिम्यति अतेमीत्।

तिमि पु० तिम–इन्। मत्स्ये, सप्तके, तद्भवे महाकाये मत्स्यभेदे च "अस्ति मत्स्यास्तिमिर्नाम तथाचास्ति तिमिङ्गिलः। तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवे"ति रामायणम्।

तिमिङ्गिल पु० तिमिं मत्स्यं गिरति गृ–निगरणे खश् मुम् च। मत्स्यभेदे, तं गिरति तिमिङ्गिलगिलः महामत्स्ये।

तिमित त्रि० तिम–क्तरि क्त। निश्चले, क्लिन्ने च (भिजे)।

तिमिर न०। तिम–किरच्। अन्धकारे, नेत्ररोगभेदे च।

तिमिष पु० तिम–इषक्। व्याघ्रकर्कट्याम्, नाटाख्ये च।

तिरश्चीन त्रि० तिर्यक्+स्वार्थे ख। तिर्यग्भूते। "गतं तिरश्चीनमनूरुसारथेरिति माघः।

तिरस् अव्य० तॄ–असुक्। अन्तर्द्धाने, तिरस्कारे, अवज्ञायाम्, तिर्य्यगर्थे च

तिरस्करिणी स्त्री० तिरस्+कृ णिनि ङीप्। जवनिकायां (परदा)

"तिरस्करिण्यो जलदा भवन्ती"ति कुमारः।

तिरस्कार पु० तिरस्+कृ–घञ्। अनादरे, अधिक्षेपे च।

तिरीट पु० तॄ–ईटक्। लोध्रवृक्षे।

तिरोधान न० तिरस्+धा–ल्युट्। अन्तर्द्धाने।

तिरोहित त्रि० तिरस्+धा–क्त। अन्तर्हिते, आच्छादिते च।

तिर्य्यक् अव्य० तिरस्+अञ्च क्विप् तिर्य्यादेशः। वक्रे, निरृजौ च।

पशुषु, पक्षिषु, वक्रगामिनि च त्रि०।

तिल गतौ भ्वा० पर० सक० सेट्। तेलति अतैलीत्।

तिल स्नेहे तु० पर० अक० अनिट्। तिलति अतेलीत्।

तिल स्नेहे चुरा० उभ० अक० सेट्। तेलयति ते अतीतिलत् त।

तिल पु० तिल–क। खनामख्याते वृक्षे, तत्फलेऽपि पु०।

तिलक पु० तिल–कन् तिल+स्वार्थे खल्वे वा कन् वा। तिल वृक्षे,

अश्वभेदे, रोगभेदे, मरुवके, च। सौवर्चले, मातुलुङ्गे न०।

खनामख्याते नासादौ धार्य्ये चन्दनादिविशेषके पु० न०। प्रधाने

त्रि०। रघुकुलतिलक इति नाटकम्।

तिलकट न० तिलस्य रजः तिल+कटच्। तिलानाम् चूर्णे।

तिलकल्क पु० तिलस्य कल्कः। पिण्याके (खल)।

तिलकालक पु० तिल इव कालकः कृष्णः। देहस्थे तिलाकारे

चिह्ने, रोगभेदे च।

तिलकिट्ट न० ईत०। (काट) तैलमले, पिण्याके च (खल)।

तिलतैल न० तिलस्य स्नेहः तिल+तैलच्। तिलस्नेहे। तिलरसोऽप्यत्र

तिलधेनु स्त्री०तिलनिर्म्मिता धेनुः। दानार्थं विधानेन तिलकृतायां धेनौ

तिलपर्णी स्त्री० तिलस्येव पर्णान्यस्याः ङीप्। रक्तचन्दने।

तिलपिञ्ज पु० निष्फलस्तिलः तिल+पिञ्ज। निष्फलतिले मेज।

तिलपेजोऽप्यत्र। [अजगरे सर्पभेदे।

तिलिञ्ज पु० तेलनं तिलिर्गतिस्तं ञ्यति क्षिपति गच्छति ड।

तिलोत्तमा स्त्री० 'तिलं तिलं समानीय रत्नानां यद्विनिर्मिता। तिलो-त्तमेति ततू तस्या नामे"त्युक्तनिर्वचने अप्सरोभेदे।

तिलौदन न० तिलमिश्रित ओदनो यत्र। नरके।

तिल्य न० तिलानां भवनं क्षेत्रम् यत्। तिलभवनयोग्ये क्षेत्रे।

तिल्ल गतौ भ्वा०पर०सक०सेट्। तिल्लति अतिल्लीत्।

तिल्व पु० तिल्यतेऽनेन तिल—ल्वेऽने वक्। लोध्रे स्वार्थे कन्। अत्रैव

तिष्ठद्गु अव्य० तिष्ठन्ति गावो यत्र नि०। दोहनकाले 'आ—तिष्ठद्गु जपनू सन्ध्या"मिति भट्टिः। अस्याव्ययीभावनिष्पन्नतयाव्ययत्वमेव पुंलिङ्गतोक्तिः प्रामादिकी।

तिष्य पु० तृप्यत्यस्मिन् तृप—क्यप् नि०। पुष्यनक्षत्रे तिष्यदीप्तौ यक् अश्वादि० नि०। कलियुगे। तिष्ये नक्षत्रे जातः अण् तस्य लुक्। पुष्यनक्षत्रजाते त्रि०।

तिष्यफला स्त्री० तिष्ये कलियुगेऽपि फलं यस्याः ५ब०। "नित्य-मामलके लक्ष्मी"रित्युक्तेः आमलक्याम्। [तीकृत—त।

तीक याचने भ्वा० आत्म० ङिक० सेट्। तीकते अतीकिष्ट अति-

तीक्ष्ण न० तिज—क्त्न दीर्घश्च। मरणे, युद्धे, विषे, लौहे, यकृति, शीघ्रे, खासुद्गलवणे, शुष्कके, चणके, उग्रे, (क्षारे) रसे च, तद्वति त्रि०। यवक्षारे, श्वेतकुशे, कुन्दुरुके,। ज्योतिषोक्ते आर्द्राश्लेषा-ज्येष्ठामूलनक्षत्रे च पु०। तीव्रे आत्मत्यागिनि, निरालस्ये सत्यवादी योगिनि च पु०।

तीक्ष्णक पु० तीक्ष्ण+संज्ञायां कन्। गौरसर्षपे, शुष्कके च।

तीक्ष्णकण्टक पु० तीक्ष्णः कण्टकोऽस्य। धुस्तूरे, वर्बुरे, इक्षु-दण्डे, वंशे च। कन्यारीवृक्षे स्त्री० टाप्।

तीक्ष्णकन्द पु० तीक्ष्णः कन्दोमूलमस्य। पलाण्डौ।

तीक्ष्णगन्ध पु० तीक्ष्णः गन्धोऽस्य। गोभाङ्गनवृक्षे। वा कप्। अत्रैवार्थे

तीक्ष्णगन्धा स्त्री० तीक्ष्णः गन्धोऽस्याः। वचायां, राजिकायाम्, कन्यार्य्यां, कृष्णजीरायाम्, जीवन्त्याञ्च।

तीक्ष्णतण्डुला स्त्री० तीक्ष्णास्तण्डुला यस्याः। पिप्पल्याम्।

तीक्ष्णतैल न० तीक्ष्णस्य स्नेहः तैलच्। स्नुहीक्षीरे, सर्ज्जरसे, मद्ये च

तीक्ष्णपत्र पु० तीक्ष्णानि पत्राण्यस्य। तुम्बुरुवृक्षे।

तीक्ष्णपुष्प न० तीक्ष्णं पुष्पमस्य। लवङ्गे। केतक्यां स्त्री० टाप्।

तीक्ष्णफल पु० तीक्ष्णं फलमस्य। तुम्बुरुवृक्षे।

तीक्ष्णमूल पु० तीक्ष्णं मूलमस्य। शोभाञ्जने, कुलाञ्जने च।

तीक्ष्णरस पु० तीक्ष्णो रसोऽस्य। यवक्षारे।

तीक्ष्णशूक पु० तीक्ष्णः शूकोऽग्रं यस्य। यवे।

तीक्ष्णसारा स्त्री० तीक्ष्णः कठिनः सारोऽस्याः। गिरिपलाशायाम् (गिरु)।

तीक्ष्णा स्त्री० धवायाम्, कपिकच्छायाम् महाज्योतिष्मत्याम् अत्यन्तपथ्यायाञ्च।

तीक्ष्णायस न० तीक्ष्णमयः अच् समा०। (इस्पात) लौहभेदे।

तीम क्लेदने दिवा० पर० अक० सेट्। तीम्यति अतीमीत्।

तीर पारगतौ कर्मसमाप्तौ अदा० चुरा० उभ० अक० सेट्। तीरयति-ते अतितीरत् त।

तीर न० तीर-अच्। नद्यादेः कूले, सायके च। शीसके पु०।

तीरभुक्ति पु० (तिरहोत) विदेहदेशे।

तीर्ण त्रि० तॄ-क्त। उत्तीर्णे, अभिभूते, आप्लुते च।

तीर्थ न० तॄ-थक्। घाटे, यज्ञे, क्षेत्रे, उपाये, क्षीरजले, नद्यादेरवतरणे, घट्टादौ, "ततस्तीर्थः पयस्तामिमाशय" इति भारविः। विद्यादिगुणयुक्तप्राप्ते, उपाध्याये, मन्त्रिणि, योनौ, दर्शने ब्राह्मणे आगमे, निदाने, अग्नौ, उपकूपजलाशये, दंष्ट्रिके, मानसिके, भौमिके च त्रिविधे पवित्रस्थाने च। तत्र दैहिकानि तीर्थानि "अङ्गुल्यग्रे दैवं तीर्थं स्वल्पाङ्गुल्योर्मूले कायम् (प्राजापत्यम्)। मध्येऽङ्गुष्ठाङ्गुल्योः पैत्रं मूलेऽङ्गुष्ठस्य ब्राह्म"मित्युक्तानि, मानसानि, यथा "सत्यं तीर्थं क्षमा तीर्थं तीर्थमिन्द्रियनिग्रहः। सर्वभूतदयातीर्थं सर्वत्रार्ज्जवमेव च। दानं तीर्थं दमस्तीर्थं सन्तोषस्तीर्थमुच्यते ब्रह्मचर्य्यं परं तीर्थं तीर्थञ्च प्रियवादिता। ज्ञानं तीर्थं धृतिस्तीर्थं पुण्यं तीर्थमुदाहृतम्। तीर्थानामपि तत्तीर्थं विशुद्धिः मनसः परे" त्यु-

क्तानि । भौमानि यथा "यथा शरीरस्योद्देशाः केचित् मेध्यतमा मताः । तथा पृथिव्या उद्देशाः केचित् पुण्यतमाः स्मृताः । प्रभावादङ्गसङ्गाच्च मेः सलिलस्य च तेजसः । परिग्रहात् मुनीनाञ्च तीर्थानां पुण्यता स्मृतेत्युक्तानि । [पिलादिषु ।

तीर्थंकर पु० तीर्थं हितशासनमागमं करोति कृ—टक् । गौतमकतीव स्थौल्ये भ्वा० पर० अक० सेट् । तीवति अतीवीत् ।

तीवर पु० तृ—ष्वरजन्तः नि० । सगुद्रे, व्याधे, वर्णसङ्करजातिभेदे (तेओर) ।

तीव्र पु० तीव—रक् । शिवे । लौहे, सीसके, तीक्ष्णे च म० । तद्वति दुःखहे, अत्युग्रे, नितान्ते च त्रि० । कटुरोहिण्यां, राजिकायां, गण्डदूर्वायां, महाज्योतिष्मत्यां, नदीभेदे च स्त्री० ।

तीव्रकण्ठ पु० तीव्रः कण्ठो यस्मात् ५ब० । सेवनेन कण्ठपीड़के शूरणे (ओल) तस्य कण्ठोद्वेजिता लोकप्रसिद्धा ।

तीव्रगन्धा स्त्री० तीव्रो गन्धोयस्याः । यवान्याम् ।

तीव्रज्वाला स्त्री० तीव्रं यथा तथा ज्वालयति उद्वेजयति शेषिनम् ज्वल—णिच्—अ । धातक्याम् । तस्यार्थने गात्रे ज्वरजनकं लोकप्रसिद्धम् ।

तीव्रवेदना स्त्री० कर्म्म० । अत्यन्तपीड़ायां यातनायाम् ।

तु हत्तौ अक० हिंसायां वृत्तौ च सक० अदा० पर० अनिट् । तौति तवीति । अतौषीत् ।

तु अव्य० तृ—मित० डु । समुच्चये, अवधारणे, नियोगे, प्रशंसायाम् । विनिग्रहे, उक्तशङ्कानिवृत्तौ, पादपूरणे च ।

तुगा(ङ्गा) स्त्री० तुज—तुनुज वा घञ् । वंशरोचनायाम् ।

तुङ्ग पु० तुनुज—घञ् । पर्वते, पुन्नागवृक्षे, नारिकेले, ज्योतिषोक्तेषु सूर्य्यादीनाम् अंशविशेषोपलक्षितमेषादिषु राशिषु च । उन्नतयुक्ते उच्चे प्रधाने च त्रि० । किञ्जल्के न० ।

तुङ्गभद्र पु० महोत्कटे हस्तिनि । दक्षिणदेशस्थे नदीभेदे स्त्री० ।

तुङ्गिनी स्त्री० तुनुज—णिनुन् ङीप् । महाशतावर्य्याम् ।

तुच्छ न० तुद्–सम्प० कप् तुदा व्यथया छाति छो–क । पुलाके शस्य-शून्ये धान्ये (तुष) । हीने, अल्पे शून्ये च त्रि० ।

तुच्छद्रु पु० कर्म० । एरण्डवृक्षे तस्य निःसारत्वात् तुच्छत्वम् ।

तुच्छधान्यक न० कर्म्म० । पुलाके (भुसी) ।

तुज दीप्तौ रु० उभ० सक० सेट् इदित् । तुञ्जयति–ते अतुञ्जत्–त ।

तुज प्राणे बले च भ्वा०पर०अक०सेट् इदित् । तुञ्जति अतुञ्जीत् ।

तुज हिंसे भ्वा० पर० सक० सेट् । तोजति अतोजीत् ।

तुट कलहे तु०कु० पर०अक०सेट् । तुटति अतुटीत् तुतोट ।

तुड भेदे तु०कु०पर०सक०सेट् । तुडति अतुडीत् तुतोड ।

तुड निष्पीडने भ्वा०आ०सक०सेट् इदित् । तुण्डते अतुण्डिष्ट ।

तुड द्विधाकरणे भ्वा०पर०सक०सेट् । तोडति अतोडीत् अतुतोडत्–त ।

तुड्ड अनादरे भ्वा० पर० सक० सेट् । तुड्डति अतुड्डीत् ।

तुण कुटिलीकरणे तु० पर० सक० सेट् । तुणति अतोणीत् ।

तुणि पु० तुण–इन् । तुन्नदक्षे (तुन्द) ।

तुण्ड न० तुडि–तोडने अच् । मुखे ।

तुण्ड(ण्डि)केरी स्त्री० प्रशस्तं तुण्ड(ण्डि) कन् तुद्–ईरयति ईर्त्ते वा ईर–अण् । कार्पासाम् तस्याः फलमुखविदारे हि विस्तीर्ण-सूत्राङ्कार्पासोत्पत्तेः । विम्बिकायाम् (तेलाकुचा) तस्याः फलेन हि मुखाङ्कोष्ठसादृश्यदानात् । स्वार्थे कन् तुण्डः । तुण्ड (ण्डि) केरिकाप्यत्र ।

तुण्ड(ण्डि)केशी स्त्री० तुण्डे (ण्डौ) मुखे काशते कै–क तुण्ड (ण्डि) कः ओष्ठः तत्र ईष्टे तत् तुल्यशोभाधारणात् ईश–अच् गौरा० ङीष् । विम्बिकायाम् (तेलाकुचा) ।

तुण्डि पु० तुण्ड–इन् । मुखे चञ्चौ च । विम्बिकायां, वन्द्यां, नाभौ च स्त्री० वा ङीष् । स्वार्थे कन् उभयत्र । [(भुंडियुक्ते)

तुण्डिभ(ल) त्रि० तुण्डि+वलि० भ सिध्मा० लच् वा । तुन्दिले

तुत्थ स्तुतौ अद० पु० उभ० सक० सेट् । तुत्थयति–ते अतुतुत्थत्–त ।

तुत्थ पु० तुद्–थक् । अग्नौ । तुत्थ–अच् । (तुंते) अञ्जनभेदे न० । नील्याम्, स्त्रीत्वे लाघात्त्वे स्त्री० । स्वार्थे कन् अत्रैव ।

तुत्थाञ्जन न० कर्म० । अञ्जनभेदे (तुंते) । वर्णत्वात् मयूरकण्ठे ।

तुद व्यथने तुदा०उभ०सक० अनिट् । तुदति–ते अतौत्सीत् अतुत्त ।

तुन्द न० तुण–अदने अन्दादि० नि० । उदरे कुक्षौ ।

तुन्दकूपी स्त्री० ह्रस्वः कूपः कूपी तुन्दस्य कूपीव । नाभौ । स्वार्थे कन् । तुन्दकूपिकाप्यत्र ।

तुन्दमृज त्रि० तुन्दमुदरं मार्ष्टि मृज–क । अलसे, मन्दे च ।

तुन्दि पु० तुद–इन् नि० । गन्धर्वभेदे, उदरे च । नाभौ स्त्री० वा ङीप् । स्वार्थे कन् अत्रार्थे ।

तुन्दिक त्रि० तुन्दमतिशयितमस्त्यस्य ठन् । वृहत्कुक्षौ । [कुक्षौ च ।

तुन्दिभ(ल) त्रि० तुन्दि–अस्त्यर्थे भ लच् वा । वृहत्कुक्षौ वृहत्–

तुन्दिलफला स्त्री० तुन्दिलं वृहत्फलमस्याः । त्वपुष्याम् (घशा) ।

तुन्न पु० तुद–क्त । (तुंद) वृत्ते । व्यथिते, खिन्ने च त्रि० । स्वार्थे कन् अत्रैवार्थे । [(दरजी) ।

तुन्नवाय पु० तुन्नं खिन्नं वयति वे–अण् । सौचिके सूच्याजीविनि

तुन्प बधे सक० पर० सेट् । तुम्पति अतुम्पीत् ।

तुन्प बधे सक०क्लेशे अक०तु०पर० सेट् । तुपति-तुम्पति अतुम्पीत् ।

तुन्फ बधे भ्वा० पर० सक० सेट् । तुम्फति अतुम्फीत् ।

तुन्फ बधे सक० क्लेशे अक० तुदा०पर० सेट् । तुफति तुम्फति अतुम्फीत् ।

तुप बधे भ्वा० पर० सक० सेट् । तोपति अतोपीत् ।

तुप बधे सक० क्लेशे अक०तु०क्षु०पर०सेट् । तुम्पति अतोपीत् ।

तुप अर्दने चुरा० उभ०सक० सेट् । तुम्पयति ते अतुतुम्पत्-त ।

तुफ बधे सक० क्लेशे अक०तु०क्षु०पर० सेट् । तुम्फति अतोफीत् ।

तुफ बधे भ्वा०पर०सक० सेट् । तोफति अतोफीत् ।

तुब अर्दने वा चुरा०उभ०सक० पक्षे भ्वा०पर० सेट् इदित् । तुम्बयति ते तुम्बति अतुतुम्बत्–त अतुम्बीत् ।

तुभ हिंसे भ्वा आत्म०लङि उभ० सक० सेट्। तोभते। अतुभत् अतोभिष्ट।

तुभ हिंसे दिवा०क्र्या० च पर०सक०सेट्। तुभ्यति तुभ्नाति अतोभीत्

तुमुल पु० यौ० तु–मुलक्। कलिद्रुमे (बयड़ा) व्याकुले युद्धे च। सङ्कुले-युद्धे न०।

तुम्ब पु० तुम्बति रुचिं तुबि–अर्दने अच्। अलाबूवाम् तुबि इन् वा ङीप् तुम्बीत्यप्यत्र, दृहत्फलायाम्, आमलक्यां, गवि च स्त्री०।

तुम्बुरु पु० तुबि–उरच्। गन्धर्वभेदे, धन्याके च। उरन् गो० ङीष्। तुम्बुरीत्यप्यत्र स्त्री०।

तुर वेगे जु०पर०अक० सेट्। तुतोर्त्ति अतोरीत्।

तुर न० तुर–क। तूर्णे, शीघ्र। वेगे स्त्रीत्वमपि तुराषाडिति दर्शनात्।

तुरग पु० तुरेण वेगेन गच्छति गम–ड। घोटके, चित्ते च।

तुरगस्कन्ध पु० तुरग+समूहे स्कन्धच्। अश्वसमूहे। ६त०। अश्वस्कन्धे।

तुरगी स्त्री० तुरगस्तुरगगन्धोऽस्यस्याः अच् गौरा० ङीष्। अश्वगन्धायाम्। [डित्त्वाभावे तुरङ्गोऽप्यत्र।

तुरङ्ग पु० तुरेण गच्छति गम–ख सुम् वा डित्त्व। घोटके, चित्ते

तुरि(री) स्त्री० तुर–इन् वा ङीप्। तन्त्रवायस्य काष्ठादिनिर्म्मिते वयनसाधने (माकु) "तट्टचातुरीतुरीति" नैषधम्।

तुरीय वि० चतुर+पूरणे तीय नि०। चतुर्थे वेदान्तोक्ते शुद्धे निर्गुणे ब्रह्मणि।

तुरीयवर्ण पु० कर्म्म०। शूद्रे।

तुरङ्गवदन पु० तुरङ्गस्येव वदनमस्य। किन्नरे, तुरङ्गवक्त्रादयोऽप्यत्र।

तुरङ्गारि पु० ६त०। करवीरे वृक्षे, महिषे च।

तुरासाह् पु० तुरां वेगं सहते तुरं वेगवन्तम् आसाह्यते अभिभवति वा क्विप् डत्वपक्षे षत्वम्। इन्द्रे। [(शिलारस)।

तुरुष्क पु० तुर उषिक् स्वार्थे कन् इसुसोरिति षत्वम्। गन्धद्रव्यभेदे

तुर्य्य वि० चतुर्णां पूरणः यत् नि०। चतुर्थे।

तुर्व हिंसे भ्वा० पर० सक० सेट्। तूर्वति अतूर्व्वीत्। तूर्त्तः।

तुर्वसु पु० ययातिनृपतिपुत्रभेदे ।

तुल उन्माने वा चुरा० उभ० पक्षे भ्वा० पर०सक० सेट् । तोलयति ते तोलति अतृतुलत् त । तुलयति तु तुलाशब्दात् णिच् ।

तुलसी स्त्री० तुलामर्हति अस—अण् शक० । "यस्या देवि ! तुला नास्ति विश्वेषु चाखिलेषु च । तुलसी तेन सा ख्याते"त्युक्ते स्वनामख्याते वृक्षे ।

तुला स्त्री० तुल—भिदा० अङ् । सादृश्ये, माने, गृहाणां दारुबन्धकाष्ठे, पलशते, भाराष्टके, मेषादावधितः सप्तमे राशौ, तोलनदण्डे, दिव्यप्रमाणरूपे "विप्रवर्जं ब्राह्मणस्य सर्वेषान्तु तुला स्मृते"ति भारद्वाजे परीक्षाभेदे च ।

तुलाकोटि(टी) स्त्री० तुलया तुलां वा कोटयति कुट—परितापे—इ वा ङीष् । नूपुरे, तुलाकोटिकारणैरित्युद्भटः ।

तुलाधर त्रि० तुलाया मानदण्डस्य धरः धृ—अच् । वाणिजके, तुलाराशौ, तुलादण्डधारके—गुणे च ।

तुलापुरुष पु० षोडशमहादानान्तर्गते दानभेदे विस्तरस्तु मत्कृततुलादानादिपद्धतौ । [तुलादण्डे ।

तुलामान न० तुलार्थं तोलनार्थं मानं मीयतेऽनेन मा—ल्युट् ।

तुलाबीज न० तुलायाः बीजं मूलम् । गुञ्जायाम् तदारभ्यैव हि । मानं शास्त्रे दर्शितं यथा "दशार्द्धगुञ्जं प्रवदन्ति माषमिति ।

तुलित त्रि० तुला+तत्करोति णिच्—कर्म्मणि क्त । परिमिते सदृशीकृते ।

तुल्य त्रि० तुलया सम्मितं यत् । सदृशे । [भिरेकत्व पाने ।

तुल्यपान न० तुल्येन सजातीयेन सह पानम् । सजातीयैर्बन्धु—

तुल्ययोगिता स्त्री० अलङ्कारोक्ते अर्थालङ्कारभेदे ।

तुवर पु० तरति क्षिनस्ति रोगान् सौ० तु—क्वरच् नि० गुणाभावः । धान्यभेदे, कषायरसे च तद्वति त्रि० । आढक्याम् सौराष्ट्रमृत्तिकायाञ्च स्त्री० । पित्त्वात् ङीष् । स्वार्थे कन् तुवरिकाप्यत्रैव ।

तुवरोशिम्ब पु० तुवर्या आढक्या इव शिम्बा यस्य । रक्तचक्रमर्द्दने ।

तुष तोषे दिवा० पर० अक० अनिट् । तुष्यति अतुषत् ।

तुष पु०तुष-क । विभीतकवृक्षे (बयड़ा) धान्यत्वचि स्वनामख्याते द्रव्ये च

तुषानल पु० तुषस्यानलः । तुषजाते अग्नौ ।

तुषार पु० अन्तर्भूतण्यर्थे तुष–आरक् । हिमे, कर्पूरे, शीते च । तद्वति त्रि० ।

तुषित पु० तुष–क्तितच् । "तोषः प्रतोषः सन्तोषो भद्रः शान्ति रिभ-स्मृतिः । हृष्मः कविर्विभुः स्वाहा हुदेवो रोचनो दिष्टः । तुषिता नाम ते देवा आसन् स्वायम्भुवोऽन्तरे" इत्युक्तेषु द्वादशसंख्येषु मतान्तरे षट्त्रिंशत्संख्यकेषु गणदेवेषु ।

तुष्टि स्त्री० तुष–क्तिन् । सन्तोषे "अकृतार्थस्य लोकस्य कृतार्थोऽस्मीति या मति"रित्युक्तायां बुद्धौ तुष्टिर्नवधेति साङ्ख्योक्तासु आध्यात्मिक-बाह्यभेदेन नवभेदासु सिद्धिषु मातृकाभेदेषु च ।

तुस ध्याने भ्वा० पर० सक० सेट् तोसति अतोसीत् ।

तुह वधे भ्वा० पर० सक० सेट् । तोहति । अतुहत्–अतोहीत् ।

तुहिन न० तुह–इनन् । हिमे, चन्द्रतेजसि च ।

तुहिनांशु पु० तुहिनमंशवो यस्य । चन्द्रे । हिमांशुप्रभृतयोऽत्र ।

तूड अनादरे भ्वा० पर० सक० सेट् । तूडयति अतूडीत् । णिच् अतितूडत् त ।

तूण सङ्कोचे अद० चु० उभ० सक० सेट् तूणयति ते अतितूणत् त ।

तूण सङ्कोचे चु० उभ० सक० सेट् । तूणयति ते अतितूणत् त ।

तूण पूरणे चु० आ० सक० सेट् । तूणयते, अतितूणत् त ।

तूण(णी) पु० स्त्री० तूण–क स्त्रीत्वपक्षे गौ० ङीष् । बाणाधारे स्वनामख्याते इषुधौ । तूण–इ वा ङीष् सङ्कोचे स्त्री० ।

तूणीर पु० तूणीं सङ्कोचं राति ददाति रा–क । तूणे, इषुधौ ।

तूर हिंसे, सक० वेगे अक० दिवा० आत्म० सेट् । तूर्यते अतूरिष्ट ।

तूर्ण न० त्वर–क्त ऊठ् नत्व न० । शीघ्रे, सत्वरे तद्वति त्रि० ।

तूर्य्य न० तूर–यत् । वाद्यभेदे ।

तूल पूरणे चुरा० आ० सक० सेट् । तूलयते अतितूलत ।

तूल द्रव्यापरिच्छेदे निष्कासने च भ्वा०पर०सक०सेट् । तूलति अतूलीत्

तूल पु० न० । तुल–क । कार्पासभेदे (तुला) "तूलराशिमिवानल" इति स्मृतिः । आकाशे, (तुंद) वृक्षभेदे च न० । कार्पास्यां स्त्री० । स्वार्थे कन् अत्रैव न० ।

तूलकार्मुक न० ईत्व० । तूलस्फोटनार्थे धनुषि । तूलचापादयोऽप्यत्र ।

तूलनाली स्त्री० तूलनिर्म्मिता नाली । पिञ्जिकायाम् (पाइज) स्वार्थे कन् अत्रैवार्थे ।

तूलपिचुपु०पिच–मर्द्दने कुन् तूलप्रधानः पिचुः । तूलवृक्षे (तुलारगाछ)

तूलवृक्ष पु० तूलसाधनं वृक्षः शाक० । शाल्मलिवृक्षे ।

तूलि(ली) स्त्री० तूल–इन् वा ङीप् । चित्रसाधने खनामख्याते पदार्थे

तूलिका स्त्री० तूल+अस्त्यर्थे ठन् । (तोषक) शय्योपकरणभेदे तूलयति खुल् । चित्रसाधने (तूली) द्रव्ये "उन्मीलितं तूलिकयेव चित्र"मिति कु० सुवर्णादेरावर्त्तनपरीचोपयोगिपदार्थे वीरणादिशलाकायाञ्च ।

तूलिनी स्त्री० तूल+इनि । शाल्मलिवृक्षे ।

तूलिफला स्त्री० तूलि तूलवत् फलं यस्याः । शाल्मलिवृक्षे ।

तूवर पु० तु–वर दीर्घश्च । कालेऽजातघट्टके गवि, अजातश्मश्रुके पुरुषे, कषायरसे च । वहति त्रि० । आढक्यां, सौराष्ट्रमृत्तिकायाञ्च स्त्री० ङीप् ।

तूष तुष्टौ भ्वा० पर० सक० सेट् । तूषति अतूषीत् ।

तूष्णींशील त्रि० तूष्णीं शीलं यस्य । मौनावलम्बिनि ।

तूष्णीक त्रि० तूष्णीं शीलं यस्य शीलेऽर्थे कन् मलोपश्च, मौनावलम्बिनि ।

तूष्णीम् अव्य० तूष–ईमुन् । मौने । अलक्प्रतिरूपे कामि । तूष्णीकामप्यत्र ।

तूस्त न० तुस–तन् दीर्घश्च । जटायां, संहतकेशेषु, धूलौ, वस्त्रे च ।

त्वट गतौ भ्वा० पर० सक० सेट् । त्वटति अत्वटीत् ।

त्वण भक्षे तना० उभ० सक० सेट् । त्वणोति तर्णोति त्वणुते-तर्णुते । अत्वर्णीत् अतर्णिष्ट । तर्णित्वा–त्वणित्वा ।

तृण न० तृह नक् ह्रलोपश्च । नडादौ, खटे (खड़) ।
तृणकाण्ड न० तृणानां समूहः दूर्वा० काण्डच् । तृणसमूहे ।
तृणकेतु पु० तृणेषु केतुरिव श्रेष्ठत्वात् । वंशवृक्षे, तालवृक्षे, असारत्वेन तृणद्रुमतृणध्वजावयव ।
तृणजाति स्त्री० तृणमेव जातिः । एलपादौ (खड़) ।
तृणद्रुम पु० तृणजातीया द्रुमा असारत्वात् शाक० । नारिकेले, तालेे, गुवाके, ताल्यां, केतक्यां, खर्ज्जूरे, खर्ज्जूर्य्याञ्च ।
तृणधान्य न० तृणमिव धान्यं अकृष्युत्पन्नत्वात् शाक० । नीवारे श्यामाकादौ च ।
तृणराज पु० तृणेषु राजते राज–अच् ६त० टच् वा । तालवृक्षे ।
तृणवीज न० ६त० । श्यामाके धान्ये ।
तृणसारा स्त्री० तृणमेव सारोऽस्याः । कदल्याम् तस्याः सर्व्वाङ्गसारत्वात्तथात्वम् । [धारपत्रयुक्ते तृणभेदे ।
तृणेक्षु पु० तृणमिक्षुरिव तीक्ष्णधारत्वात् । वल्लजायाम् तीक्ष्णपत्रायाम् ।
तृणौकस् न० तृणनिर्म्मितमोकः । तृणनिर्म्मिते गृहे (खड़ेरघर) ।
तृणौषध न० तृणात्मकमौषधम् । एलवालुकाख्ये गन्धद्रव्ये ।
तृण्या स्त्री० तृणानां समूहः पाशा० य । तृणसमूहे ।
तृतीय त्रि० त्रयाणां पूरणः त्रि+तीय सम्प्रसारणञ्च । त्रयाणां पूरणेन त्रित्वसंख्या पूर्य्यते तस्मिन् पदार्थे । [नपुंसके क्लीबे ।
तृतीयप्रकृति स्त्री० स्त्रीपुंसावपेक्ष्य तृतीया प्रकृतिः प्रकारः ।
तृतीया स्त्री० चन्द्रमण्डलस्य तृतीयकलायाः सूर्य्यमण्डलप्रवेशनिर्गमान्यतरक्षणक्रियात्मिकायां तिथौ । [त्रिवारकृष्टे क्षेत्रे ।
तृतीयाकृत त्रि० तृतीयं कृतं त्रिगुणार्थे तृतीय+डाच्+कृ–क्त ।
तृद अनादरे रु० उभ० सक० सेट् । तृणत्ति तृन्ते । अतर्दीत्–अतृदत् अतर्दिष्ट । तर्दित्वा–तृत्त्वा ।
तृन्प(म्प) प्रीणने तु० पर० सक० सेट् । तृपति तृम्पति अतृम्पीत् ।
तृन्फ(म्फ) प्रीणने तु० प० सक० सेट् तृफति तृम्फति अतृम्फीत् ।
तृन्ह हिंसे तु० प० सक० सेट् क्ता वेट् । तृंहति अतृंहत् ।

तृप प्रीणने स्वा० पर० सक० सेट् । तृप्नोति अतर्पीत् ।

तृप सन्दीपने प्रीणने च वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् । तर्पयति ते तर्पति अततर्पत् त अतीतृपत् त । अतर्पीत् ।

तृप प्रीणने दि० पर० सक० वेट् । तृप्यति अतर्पीत्–अतार्क्षीत्–अताप्सीत्–अतृपत् ।

तृप प्रीणने तु० स० पर० सक० सेट् । तृप्सति अतर्पीत् ।

तृप्ति स्त्री० तृप–क्तिन् । अतिशयभक्षणेन भक्षणेच्छानिवृत्तौ ।

तृफ प्रीणने तु० पर० सक० सेट् । तृफति । अतर्फीत् ।

तृ(त्रि)फला स्त्री० त्रयाणां फलानां समाहारः वा सम्प्रसारणञ्च । हरितक्यामलकीबिल्वस्थारूपफलत्रये ।

तृष तृष्णायां दिवा० पर० सक० सेट् । तृष्यति अतृषत् अतर्षीत् ।

तृष्(षा) स्त्री० तृप–क्विप् । भागुरिमते. हलन्तत्वात् वा टाप् । तृष्णायां, ऋरपुत्रग्राम्, लाङ्गलिकीवृक्षे च ।

तृषाभू स्त्री० ई० । क्लोमनि हृदयस्थे स्थानभेदे ।

तृषित त्रि० तृषा जातास्य तारं० इतच् । तृष्णान्विते ।

तृष्णज् त्रि० तृष–नजिङ् । तृष्णायुक्ते लुब्धे च ।

तृष्णा स्त्री० तृष–न किच्च । पिपासायां, लोभे, अप्राप्ताभिलाषे च ।

तृष्णाक्षय पु० तृष्णाया लोभस्य क्षयो यस्मात् ५ब० । मोक्षे, "तृष्णाक्षयसुखस्यैते नार्हन्ती"ति स्मृतिः ।

तृह हिंसे तु० पर० सक० वेट् । तृहति अतर्हीत् अतृक्षत् ।

तृह हिंसे वा चु० उ० पक्षे रुधा० पर० सक० वेट् । तर्हयति ते तृणेढि अततर्हत् त अतीतृहत्–तअतर्हीत् अतृक्षत् ।

तॄ तरणे प्लवने अभिभवे च भ्वा० प० सक० सेट् । तरति अतारीत् ।

तेज निशाने पालने च भ्वा० पर० सक० सेट् । तेजति अतेजीत् ।

तेजःफल पु० तेजस्करं फलं यस्य । (तेजवल) वृक्षभेदे ।

तेजन पु० तेजयति शस्त्रमग्निं वा तिज–णिच्–ल्यु । वंशे शुक्रे च । संज्ञायां कन् । शराभिधे तृणे, मूर्वायां, ज्योतिष्मत्याञ्च स्त्री० ङीप् ।

तेजपत्र न० तेज–अच् तेजं पत्रं यस्य । त्वचे (तेजपाता) ।

तेजवती स्त्री तेजनं तेजः अस्त्यर्थे मतुप् मस्य वः । गजपिप्पल्याम् ।

तेजस् न० तिज–असुन् । उष्णस्पर्शवति अन्नादौ द्रव्यभेदे सांख्यमते शब्दस्पर्शतन्मात्रसहिताद्भूतन्मात्रादुत्थिते भूते दीप्तौ प्रभावे, पराक्रमे, वीर्य्ये, नवनीतोद्भवे–घृतादौ, तापके ज्योतिषि सूर्य्यादौ, शरीरकान्तौ, सुवर्णादौ–धातुद्रव्ये, मज्जनि, पित्ते, "अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत् प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतमित्युक्ते अपमानादेरसहने "तेजो निसर्गजं सत्वं वाजिनां स्फुरणं रज इत्युक्ते अश्वानां स्वाभाविके बले, चैतन्यात्मके परमज्योतिषि ब्रह्मणि, सांख्योक्ते सत्त्वगुणे च ।

तेजस्वती स्त्री० तेजस्+अस्त्यर्थे मतुप् मस्य वः । गजपिप्पल्याम्, चव्ये, (चइ) महाज्योतिष्मत्यां वह्नेः पुर्य्यां, (तेजबल) वृत्तभेदे च ।

तेजस्विनी स्त्री० तेजस्+विनि । तेजोयुक्तायां स्त्रियां, ज्योतिष्मत्यां लतायाम् (तेजबल) तेजःफलायाञ्च ।

तेजीयस् त्रि० तेजस्विन्+अतिशायने ईयसुनि विनेर्लुक् । तेजोयुक्ते "तेजीयसां न दोषाय वह्नेः सर्वभुजो यथे"ति भागवतम् ।

तेजोमन्थ पु० तेजो मथ्नाति मन्थ–अण् । गणिकारिकायाम् ।

तेजोमय त्रि० तेजस्+प्रचुरार्थे मयट् । तेजःप्रचुरे तेजःप्रधाने ज्योतिर्मये च । स्त्रियां ङीप् । "तेजोमयी वागि"ति श्रुतिः ।

तेजोमात्रा स्त्री० तेजसां सत्त्वगुणानां मात्रांशः । इन्द्रियेषु भूतानां सात्विकांशेभ्य एव तेषामुत्पत्तिः सांख्यसिद्धा ।

तेप कम्पे, च्युतौ च भ्वा० आ० अक० सेट् । तेपते अतेपिष्ट ।

तेम पु० तिम–घञ् । आर्द्रीभावे ।

तेमन न० तिम–ल्युट् । आर्द्रीकरणे । कर्मणि ल्युट् । व्यञ्जने ।

तेव क्रीड़ने भ्वा० आ० अक० सेट् । तेवते अतेविष्ट ।

तैजस न० तेजसोविकारः । अण् । घृते, धातुद्रव्ये च । सांख्योक्ते सत्त्वगुणोत्पन्ने त्रि० ।

तैजसावर्त्तनी स्त्री०तैजस् धातुद्रव्यमावर्त्यतेऽत्र आ–वृत-णिच्–आधारे ल्युट् ङीप् । सूपायाम् । (रुचौ) ।

तैतिल पु० गण्डूषपशौ । वराहितश्चतुर्थे करणे न० ।

तैत्तिरीया स्त्री० तित्तिरिभ्योऽधिगता कृष्ण् । यजुर्वेदीयशाखाभेदे कृष्णयजुषि । याज्ञवल्क्येन हि गुरुतोऽधीत्य तेन सह विवादे मूर्त्तिमानेव यजुर्वेद उद्वान्तः तत्तयाश्चान्ये तस्यान्तेवासिनस्तित्तिरिपक्षिरूपं धृत्वा तं भक्षितवन्तस्तेभ्यस्तित्तिरूपेभ्य एव विप्रेभ्यो या शाखा गृहीता सा तैत्तिरीया शाखेति पुराणादौ प्रसिद्धम् ।

तैत्तिरीयिन्यायक त्रि० तैत्तिरीयां शाखां वेत्त्यधीते वा ठक् छन् वा । तैत्तिरीयशाखा ध्यायिनि ।

तैमिरिक न० तिमिरं नेत्ररोगभेदः अस्त्यस्य ठन् । नेत्ररोगभेदयुक्ते ।

तैर्थिक त्रि० तीर्थं दर्शनमस्यास्त्र छत्रमनेन ठक् । शास्त्रकारे कपिलकणादादौ ।

तैल न० तिलस्य विकारः अण् । "तिलादिस्निग्धवस्तूनां स्नेहस्तैलसुरादृते" मित्युक्ते तिलप्रभृतीनां स्निग्धवस्तूनां स्नेहरूपे विकारे । (तेल शिल्हके च शिलारस) ।

तैलकार पु० तैलं करोति कृ-अण् (तेली) (कलु) इति प्रसिद्धे वर्णसङ्करे चाक्रिके तैलिनि ।

तैलकिट्ट न० इत० (खाट) इति ख्याते तैलमले (खल) पिण्याके च ।

तैलङ्ग पु० श्रीशैलं तु समारभ्य चोलेशानुमध्यभागतः तैलङ्गदेशो देवेशी त्युक्ते देशे । तत्रस्थे जने ब० व० ।

तैलधान्य न० तैलोपयोगि धान्यं सतृणं धान्यम् । तिलातसी च तोरी (डी) च त्रिविधश्चापि सर्षपः । त्रिधा राजी खसश्चैव बीजं कौसुम्भसम्भवम् । एतानि तैलधान्यानीत्युक्तेषु तिलादिषु ।

तैलपर्ण पु० तैलाक्तमिव पर्णं यस्य मध्यपदलोपि स० । अश्विनपर्णवृक्षे ।

तैलपा स्त्री० तैलं पिबति पा-क । (तेलापोका) झींटभेदे ।

तैलपायिका स्त्री० पा-खुल्ङ्ईत० । (तेलापोका) (आरुला) झींटभेदे ।

तैलफला स्त्री० तैलं फले यस्याः । द्राक्षायां, विभीतके च ।

तैलभाविनी स्त्री० तैलं भावयति चु० भू-णिनि जातित्वात्ङीप्, तत्पुरुषेण वाधितं हि गन्धतैलं भजति ।

तैलम्याता स्त्री० तिलस्य पातोऽत्र ज नि० सुमुच् स्वधायाम्, तदुपलक्षिते आढ्ये च। [गन्धद्रव्यभेदे।

तैलसाधन न० तैलं साधयत्यनेन सिध-णिच्-ल्युट् (काकला)।

तैलीन त्रि० तिलानां भवनं क्षेत्रं ख। तिलभवनयोग्ये क्षेत्रे।

तैष पु० तिष्यनक्षत्रयुक्ता पौर्णमासी तैषी साऽस्मिन् मासे अण्। चान्द्रपौषमासे। [पौषस्य पौर्णमास्याम्।

तैषी स्त्री० तिष्येण नक्षत्रेण युक्ता पौर्णमासी अण्। चान्द्रपौषमास्याम्।

तोक न० सौ० तु-क तस्य नेत्त्वम्। अपत्ये, पुत्रे दुहितरि च।

तोटक न० द्वादशाक्षरपादके छन्दोभेदे। [अतुतोड तृ।

तोड अनादरे भ्वा० पर० सक० सेट् तोडति अतोडीत्। णिच्।

तोडी(री) स्त्री० तुड-अच् गौरा० ङीष् वा डस्य रः। स्वनामख्याते तैलसाधने धान्यभेदे। [चालनदण्डे च।

तोत्र न० तुद्-ष्ट्रन्। गवादिताडनदण्डे (पाचुनि) गजादि

तोदन न० तुद्यतेऽनेन ल्युट्। तुण्डे मुखे। भावे ल्युट्। व्यथायाम्।

तोमर पु० न० तु-विच् तोर्णतो म्रियतेऽनेन मृ-अच् हस्वश्चेष्ये शस्त्राग्ये दण्डाकारेऽस्त्रभेदे (रायबांश)।

तोमरिका स्त्री० तोमर+संज्ञायां कन्। आढक्याम्। [नक्षत्रे च।

तोय न० सौ० तु विच् तवे पूर्त्त्यै याति या-क। जले पूर्वाषाढा-

तोयकाम पु० तोयं कामयते कम-अण्। जलवेतसे। जलाभिलाषुके त्रि०

तोयकृच्छ्र न० जलमात्रपानरूपे व्रतभेदे। [जलदातरि त्रि०

तोयद पु० तोयं ददाति दा+क। मेघे, मुस्तके च। हृते न०।

तोयधि पु० तोयानि धीयन्तेऽत्र धा-कि। समुद्रे तोयनिध्यादयोऽप्यत्र।

तोयपिप्पली स्त्री० तोये पिप्पलीव। (कांचड़ा) शाकदेहे लाङ्गल्याम्।

तोयपुष्पी स्त्री० तोयेन बहुजलदानेन पुष्पाण्यस्याः। पाटला वृक्षे।

तोयप्रसादन पु० तोयं प्रसादयति फलयोगेन प्र+सद्-णिच् ल्यु। कतके (निर्म्माल्ये)।

तोयफला स्त्री० तोयप्रधानं फलं यस्याः। कर्कारौ कर्कटीभेदे।

तोयवल्ली स्त्री० तोयसन्निहितस्थाने वल्ली। कारवेल्ले (उच्चे)।

तोयसूचक पु० तोयं तोयवर्षं सूचयति रवेण सूच–एवुल् । भेके
तोरण पु० न० तुर–युच् । बहिर्द्वारे, स्तम्भोपरिस्थे सिंहाकारे काष्ठे
द्वारबाह्यभागे च । कन्धरायां न० । [वा । तोलकमप्यत्र ।
तोल पु० न० तुल–अच् । गुञ्जाशीतिपरिमाणे कर्षे । स्वार्थे कन् ष्वुल्
तौर्य्य न० तूर्य्ये सुरजादौ वाद्ये भवम् अण् । सुरजादिध्वनौ ।
तौर्य्यत्रिक न० तूर्य्यः परिमाणमस्य कन् तौर्य्येणोपलक्षितं त्रिकम् ।
नृत्यगीतवाद्येषु समुदितेषु "वनेऽपि तौर्य्यत्रिकमि"ति नैषधम् ।
तौलिक पु० तुल्या जीवति ठक् । चित्रकरे ।
त्यज हानौ दाने च भ्वा० पर० सक० अनिट् । त्यजति अत्याक्षीत् ।
त्यद् त्रि० त्यज–अदि डिच्च । तच्छब्दार्थे "योवा सोवा भवास्य–
दृष्टि"ति वेदव्याम् ।
त्यागिन् त्रि० त्यज–घिणुन् । दातरि, शूरे, वर्জ্জनशीले, कर्म्मफल-
त्यागिनि च "यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते" इति गीता
त्रक्क गतौ भ्वा० आत्म० सक० सेट् । त्रक्कते अत्रक्किष्ट ।
त्रख गतौ भ्वा० पर० सक० सेट् । त्रखति अत्रखीत् अत्राखीत् ।
त्रख गतौ भ्वा० पर० सक० सेट् इदित् । त्रङ्खति अत्रङ्खीत् ।
त्रग गतौ भ्वा० पर० सक० सेट् इदित् । त्रङ्गति अत्रङ्गीत् ।
त्रद चेष्टायां भ्वा० पर० अक० सेट् इदित् । त्रन्दति अत्रन्दीत् ।
त्रप लज्जायां भ्वा० आ० अक० वेट् वा घ० । त्रपते अत्रपिष्ट अ–
त्रप्त । णिच् । त्रपयति त्रपयति । त्रपा ।
त्रपा स्त्री० त्रप–भावे अङ् । लज्जायाम् । अच् । कुलटायाम् ।
कुले कीर्त्तौ च । [वीरुधि, रङ्गे च ।
त्रपु न० अग्निं दत्वा त्रपते लज्जते इव लज्जया द्रवीभवति वा
त्रपुटी स्त्री० त्रप–उटङ् गौरा० ङीष् । क्षुद्रलोहायाम् ।
त्रपुष स्त्री० त्रपते क्विप् त्रप् उष–दाहे क क० । कर्कटीवृक्षे गौरा०
ङीष् । (चोरा) (शशा) ख्याते वृक्षे ।
त्रपुस् न० त्रप–उसि । रङ्गे ।
त्रय न० स्त्री० त्रयाणामवयवः त्रयोऽवयवा येषां वा अयच् । त्रित्व-

संख्यायाम् "ऋणत्रयमपाकर्त्य"ति मनुः स्त्रीत्वपक्षे ङीप्। "असौ नरशिखित्रयी"ति माघः। त्रित्वसङ्ख्याविशिष्टे त्रि० स्त्रियां ङीप्। कगादिवेदत्रये, "त्रयीव नीताङ्गगुणेन विस्तर"मिति नैषधम्। ब्रह्मादिमूर्त्तित्रये, पुरन्ध्र्याम्, सुमतौ, सोमराजीवृक्षे च।

त्रयीधर्म्म पु० त्रया वेदत्रयेण विधीयमानो धर्म्म० शाक०। वैदिके धर्मे ज्योतिष्टोमादौ।

त्रयोदशन् त्रि० त्रयश्च दश च, त्र्यधिका वा दश। त्र्यधिकदशसङ्ख्यान्विते। तत्पूरणे तु डट्। त्रयोदशः त्रि०। चन्द्रस्य त्रयोदशकलाक्रियारूपे तिथौ स्त्री० ङीप्। [त्रसत्त।

त्रस भृतौ यत्ने निषेधे च चुरा० उभ० सक० सेट्। त्रासयति ते अति-

त्रस भासे वा० चुरा० उभ० पक्षे भ्वा० पर० अक० सेट् इदित्। त्रंसयति ते त्रंसति अतत्रंसत् त अत्रंसीत्।

त्रस भये वा दिवा० पक्षे भ्वा० फणा० पर० अक० सेट्। त्रसति त्रस्यति अत्रसीत् अत्रासीत् त्रेसतुः तत्रसतुः।

त्रस न० त्रस-भये घञर्थे क। वने। त्रस भृतौ अच्। जङ्गमे त्रि०।

त्रसरेणु पु० त्रसः चलो रेणुः क०। "जालान्तरगते भानौ सूक्ष्मं यद्दृश्यते रजः। प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते" इत्युक्ते गवाक्षान्तर्गतसूर्य्यकिरणेषु दोधूयमाने परमाणुषट्कात्मके द्व्याणुकत्रयात्मके रजसि

त्रस्त त्रि० त्रस-क्त। भीते चकिते। भीत्रे न०।

त्रस्नु त्रि० त्रस-क्नु। भीरौ त्रासशीले।

त्रापुष त्रि० त्रपुषा निर्वृत्तम् अण्। रङ्गमये पात्रादौ।

त्रायन्ती स्त्री० त्रै-सप्त० क्विप् ता अयति भ्वा० इ-ई-वा शत्। (वला) ख्यातायाम् लतायाम्।

त्रायमाण स्त्री० त्रायते त्रै-शानच्। (बला) ख्यातायां लतायाम्।

त्रि त्रि० ब०व० तृ-ड्रि। त्रित्वसंख्याविशिष्टे। स्त्रियाम् तिस्रा देवः। तिस्र इत्यादि।

त्रिंश त्रि० त्रिंशत्+पूरणे डट्। त्रिंशत्पूरणे, त्रिंशत्तमे, "त्रिं-

योगकल्पतरावे भोग" इत्यभिधीयते इति ज्योतिषम् ।

त्रिंशक त्रि० त्रिंशता क्रीतः वुन् । त्रिंशत्संख्यान्वितद्रव्येण क्रीते वस्तुनि । [तत्संख्यान्विते च ।

त्रिंशत् स्त्री० त्रयोदशतः परिमाणमस्य नि० । त्रिदशकसङ्ख्यायां,

त्रिंशत्पत्र न० त्रिंशत्सङ्ख्यानि पत्राणि दलानि प्रतिपुष्पमस्य । कुसुदे ।

त्रिक न० त्रयाणां संघः कन् । त्रित्वसंङ्ख्यायाम् पृष्ठवंशाधोभागे, कटिभागे, त्रिफलायाम् (हरितक्यामलकीबिल्वस्थाफलत्रये) त्रिकटुनि, (शुण्ठीपिप्पलीमरिचत्रये) । वातादिषु मिलितेषु च । त्रिषु कायति कै—क । गोत्तुरे वृक्षे पु० ।

त्रिककुद् पु० त्रीणि ककुदतुल्यानि पृष्ठाग्रण्यस्य ककुदस्य अन्त्यलोपः । त्रिकूटाख्ये पर्वतभेदे ।

त्रिकट पु० त्रीन् वातादिदोषान् कटति आवृणोति अच् । गोक्षुरवृक्षे

त्रिकटु न० त्रयाणां कटु रसानां समाहारः मिलितेषु शुण्ठीपिप्पलीमरिचेषु । [तत्प्रभेदे च (टेङ्करा) ।

त्रिकण्ट पु० त्रयः कण्टाः कण्टका अस्य । गोक्षुरे, क्षुद्रक्षोपवृक्षे,

त्रिकाल न० त्रयाणां कार्य्यकालभूतभविष्यत्कालानां समाहारः । भूतभविष्यद्वर्त्तमानकालत्रये प्रातर्मध्याह्नसायाह्नरूपकालत्रये च । "त्रिकालं पूजयेद्देवं" मिति तन्त्रम् ।

त्रिकालज्ञ पु० त्रिकालवर्त्तिपदार्थान् जानाति ज्ञा—क । सर्वज्ञे त्रिकालविदादयोऽप्यत्र ।

त्रिकूट पु० त्रीणि कूटान्यस्य । लङ्कापुरसन्निहिते सुवेलाख्ये पर्वते ।

त्रिकोण त्रि० त्रयः कोणायस्य । त्रिकोटियुक्ते पदार्थे, ज्योतिषोक्ते लग्नात् नवमपञ्चमस्थाने न० । "त्रिकोणगान् गुरुः पश्यन्ति" ति ज्योतिषम् ।

त्रिकोणफल न० त्रिकोणं त्रिकोणाकारं फलम् । (शृङ्गाटके पानीफल) । [कन् । तत्रैव ।

त्रिगर्त्त पु० सुशर्म्माख्यनृपतेर्देशे । तद्देशस्थे जने ब० व० । स्वार्थे

त्रिगुण न० त्रयाणां गुणानां समाहारः । सांख्योक्ते प्रधाने । त्रिभिर्गुण्यते गुण-संख्याने घञ् । त्रिभिर्गुणिते त्रि० ।

त्रिगुणाकृत त्रि० त्रिगुणं कृत्वा कृतं डाच् कृ-क्त । त्रिधा कृतेन कृते चेत्यादौ ।

त्रिगुणात्मक न० त्रयो गुणाः सत्त्वाद्य आत्मा स्वरूपं यस्य कप् । सांख्यमतोक्ते प्रधाने, वेदान्तोक्ते अज्ञाने च ।

त्रिजटा स्त्री० रामायणप्रसिद्धे राक्षसीभेदे ।

त्रिणाचिकेत पु० त्रिः कृत्वो नाचिकेतोऽग्निश्चितो येन । अध्वर्युभेदे "पञ्चाग्नयो ये च त्रिणाचिकेता" इति श्रुतिः ।

त्रिणे(नि)त्र पु० त्रीणि नेत्राण्यस्य । शिवे । पूर्वपदात् संज्ञायामिति णत्वे प्राप्ते गिरिनद्यादित्वात् वा णत्व मिति केचित् । ऋभ्वादि० नेत्रशब्दे ।

त्रितय न० त्रयाणामवयवः त्रयोऽवयवा येषाम् वा तयप् । त्रयशब्दार्थे त्रित्वसंख्यायाम् । त्रित्वसंख्यान्विते त्रि० ।

त्रिदण्ड न० त्रयाणां दण्डानां समाहारः । वाङ्मनःकायदण्डेषु, तयादण्डोपलक्षिते संन्यासाश्रमे च ।

त्रिदण्डिन् त्रि० त्रिदण्डमस्त्यस्य इनि । "वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च । यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते इति मनूक्ते संन्यासिभेदे । [गोधापदीलतायाम् ।

त्रिदला स्त्री० त्रीणि त्रीणि दलानि प्रतिपत्रं यस्याः । (गोयालिया)

त्रिदश पु० त्रिरो दशा जन्मवत्ताविनाशाख्या न तु वृद्धि परिणामत्तया सत्त्वानामिव दशाः येषाम् । देवेषु । अथ वा त्रयधिकास्त्रिरावृत्ताश्च दश परिमाणमेषां डट् षाक० अधिकावृत्तदशत्वोपः एकस्यैव त्रिशब्दस्य तन्त्र तयोच्चारण णात् उभयार्थपरत्वम् । त्रयस्त्रिंशन्मुख्यगणयति देवे यथा अर्का द्वादश, रुद्रा एकादश, वसवोऽष्टौ, विश्वे देवौ इतिति । अयमेव पक्षः सूत्यनुगुणः त्री च दश चेति ज्ञान्दोज्यभिहितत्वात् त्रयधिकारावृत्तताद्योतनार्थं त्री चेति द्विवचनान्ततया निर्देशः ।

त्रिदशाधिप पु० ६त० । इन्द्रे ।

त्रिदशाध्यक्ष पु० त्रिदशानां दशानां जाग्रत्स्वप्नसुषुप्तानां त्रिदशानां देवानां वाऽध्यक्षः । सर्वसाक्षिणि ब्रह्मणि, विष्णौ च ।

त्रिदशालय पु० ६त० । स्वर्गे । त्रिदशावासादयोऽप्यत्र ।

त्रिदिव पु० त्रयो ब्रह्मादयोदीव्यन्त्यत्र घञर्थे आधारे क, त्रिधा सत्त्वादिभेदेन दीव्यन्ति प्रकाशन्ते दिव–क वा । स्वर्गे, आकाशे, सुखे च न० ।

त्रिदिवेश पु० ६त० । देवे त्रिदिवौकसादयोऽप्यत्र ।

त्रिदोष पु० त्रयाणां वातपित्तश्लेष्मणां सन्निपातेन दोषः । वातादिसन्निपातजे विकारकारके रोगभेदे ।

त्रिधा अव्य० त्रि+प्रकारे धाच् । त्रिप्रकारे ।

त्रिधामन् पु० त्रीणि धामानि भूरादीनि स्थानानि, तेजांसि सत्त्वादीनि वा यस्य । शिवे, विष्णौ, अग्नौ च ।

त्रिधारक पु० त्रिषु भागेषु धारा यस्य कप् । गुडूचीवृक्षे ।

त्रिधारस्रुची स्त्री० त्रिषु भागेषु धारा यस्याः कर्म० । (तेकांटा-सिज्) स्नुहीभेदे ।

त्रिनयन पु० त्रीणि नयनानि यस्य । चुञ्चुणादिषु पाठात् संज्ञायामपि न णत्वम् । शिवे । नेत्रत्रयवति त्रि० । दुर्गायाम् स्त्री० टाप् । त्रिनेत्रादयोऽप्यत्र तत्र वा णत्वमिति भेदः ।

त्रिनेत्रा स्त्री० त्रीणि नेत्राणीव यस्याः । वाराहीकन्दे ।

त्रिपताक न० तिस्रः पताका इव यत्र । पताकाकारवलित्रयान्विते ललाटे, मध्यमानामिकासङ्कोचेनार्धमुष्टाङ्गुलित्रयोन्नतत्वेन त्रिपताकाकारितकरे पु० । 'त्रिपताकं करं कृत्वेत्यादि अलङ्कारे जनान्तिकशब्दनिर्वचने स्थितम् ।

त्रिपथगा स्त्री० त्रयाणां पथां समाहारः अच्समा० तेन गच्छति गम–ड । गङ्गायाम् ।

त्रिपदा स्त्री० त्रयः पादा अस्य पादस्य पाङ्क्त्वः टाबृचीति टापि भत्वात् पङ्क्त्वः । छन्दोभेदे ।

त्रिपदी स्त्री० त्रयः पादा अस्याः पादस्य पङ्क्तावपि पङ्क्तावः। (गोयालिया) गोधापदीलतायाम्। छन्दोभेदे, हंसपद्यां, हस्तिगात्रबन्धे, तत्पादबन्धने, "त्रिपदीच्छेदिनामपी"ति रघुः अर्च्यादिपात्राधारे च (तेपाया)। स्वार्थे कन् ह्रस्वः त्रिपदिकाप्यत्र।

त्रिपर्ण त्रीणि त्रीणि प्रतिपत्रं पर्णान्यस्याः किंशुके। वनकार्पास्यां स्त्री० वा टाप्। ङीप् शालपर्ण्यां, पृश्निपर्ण्यांभेदे च।

त्रिपाद् पु० त्रयः पादा अस्य पाद्भावः। विष्णौ "पादोऽस्य सर्वाभूतानि त्रिपादस्यामृतं दिवी"ति श्रुतिः। ज्वरे च।

त्रिपिबत् पु० त्रिभिः कर्णाभ्यां जिह्वया च पिबति स्पृशति जलं पा-शतृ। वार्षीणसे लम्बकर्णे छागभेदे।

त्रिपि(वि)ष्टप पु० मर्त्यपातालापेक्षया तृतीयं पि(व)ष्टपं भुवनम् दृप्तौ त्रिशब्दस्य पूरणार्थता। स्वर्गे।

त्रिपुट पु० त्रयः पुटा यस्य। (खेसारी) कलायभेदे शरे, तालकयन्त्रे, गोक्षुरे, हस्तभेदे च। स्फुल्लौलायां, मल्लिकायां (तेऽोड़ि) त्रिदोषधौ, कर्णस्फोटायां देवीभेदे च स्त्री० टाप्। त्रिदति एरण्डे वा ङीप्। त्रयाणां पुटानां समाहारः। पुटत्वे स्त्री० ङीप्।

त्रिपुटीफल पु० त्रिपुटी पुटत्रयं फलेऽस्य। एरण्डवृक्षे।

त्रिपुण्ड्र न० त्रयाणां पुण्ड्राणां ऋजुवदाकाराणां समाहारः। ललाटस्थे तिर्यग् रेखात्रयात्मके, ऊर्द्धरेखात्रयात्मके च तिलकभेदे। स्वार्थे कन्। "वक्राः ललाटगास्तिस्रो भस्मरेखास्त्रिपुण्ड्रक"मित्युक्ते तिलकभेदे।

त्रिपुर पु० त्रीणि स्वर्गादिस्थानि पुराण्यस्य। असुरभेदे। समाहार द्विगुः पात्रा० न ङीप्। पुरत्रयमात्रे न०।

त्रिपुरान्तक पु० ६त०। शिवे। त्रिपुरहरादयोऽप्यत्र।

त्रिपुषा स्त्री० त्रीन् वातादिदोषान् पुष्णाति पुष-क। कृष्णत्रिवृति (कालतेऽोड़ि)।

त्रिपुष्कर न० ज्येष्ठादिभेदेन त्रिधा स्थिते क्षेत्रे तीर्थे "वाराः क्रूरा-

त्रिथिर्द्रा मन्त्रवं भग्नपाद्कम् । जातेऽथ जारजो योगः मरणे च त्रिपुष्करं इति ज्योतिषोक्ते योगभेदे पु० ।

त्रिभण्डी स्त्री० त्रीन् वातादिदोषान् भण्डति भण्ड परिभाषणे अण् ङीष् त्रिदति (तेओड़ि) ।

त्रिभुज न० त्रयो भुजा अस्य । त्रिकोणक्षेत्रे 'त्रिभुजे भुजयोर्योग इति लीलावती ।

त्रिभुवन न० त्रयाणां भुवनानां लोकानां समाहारः द्वात्वं० न ङीप् । त्रिलोक्यां मिलितेषु स्वर्गमर्त्यपातालेषु ।

त्रिमधु न० त्रयाणां मधूनां मधुराणां समाहारः । "घृतं सिता मालिकं च त्रिज्ञेयञ्च मधुत्रय"मित्युक्ते मधुरत्रये । ऋग्वेदोक्ते मधुवाता" इत्यादिके मन्त्रविशेषे तदभिज्ञे च पु० ।

त्रिमार्गगा स्त्री० त्रिभिर्मार्गैर्गच्छति गम-ड । गङ्गायां "त्रिमार्गगेव त्रिदिवस्य मार्ग" इति कुमारः । [(पापड़ा) क्षुपभेदे ।

त्रियष्टि स्त्री० त्रिषु वातादिषु यष्टिरिव विद्रावकत्वात् । (चेत-

त्रियामा स्त्री० त्रयो यामाः प्रहरा अस्याः । "त्रियामां रजनीं प्राहुरष्टयामोत्तरत्रय"मित्युक्तायां रात्रौ, हरिद्रायाम्, ओल्यां, लक्षणान्वितेति च ।

त्रिरात्रिन न० तिसृणां रात्रीणां समाहारः अच् समा० । रात्रित्रये, तदुपलक्षिते दिनत्रये च "त्रिरात्रमशुचिर्भवेदि"ति स्मृतिः ।

त्रिरेख पु० तिस्रो रेखा यत्र । शङ्खे ।

त्रिलोकी स्त्री० त्रयाणां स्वर्गादीनां लोकानां समाहारः ङीप् । लोकत्रये "यदि त्रिलोकी गणनापरेति" नैषधम् ।

त्रिलोकेश पु० त्रयाणां लोकानामीशः उत्तरपदलुगु० । सूर्य्ये, शिवे, विष्णौ च । [तत्राभिधधातुत्रये ।

त्रिलोहक न० त्रयाणां लोहानां धातूनां समाहारः । सुवर्णरज-

त्रिवर्ग पु० त्रयाणां धर्मार्थकामानां वर्गः । धर्मार्थ—मरूपेषु, पुरुषार्थेषु त्रिफलायां, कटुत्रिके, साङ्ख्योक्ते [illegible] त्रयमोक्षपशुगुणत्रये ।

"त्रयःस्थानं च दृष्ट्वा त्रिवर्गे नीतिवेदिना" मित्युक्ते आयव्यय-दृष्टिरूपेषु पदार्थेषु च ।

त्रिवर्णक पु० त्रयो वर्णाः पुष्पेऽस्य कप् । गोजुरे समा० द्वि० पात्रा० स्वार्थे कन् । त्रिफलायां, त्रिकटौ, ब्राह्मणक्षत्रियवैश्य-रूपे द्विजातित्रितये च न० । [व्क्यां गवि ।

त्रिवर्षिका स्त्री० त्रीणि वर्षाणि वयोऽस्याः स्वार्थे कन् । त्रिवर्षवय-

त्रिविक्रम पु० त्रीन् लोकान् विशेषेण सामर्थ्येन क्रामति वि+क्रम-अच् । विष्णौ, "त्रिरित्येव त्रयोलोका कीर्त्तिता मुनिसत्तमैः क्रमते तांस्तथा सर्वान् त्रिविक्रमो जनार्द्दन" इति हरिवंशः बलि-बन्धनसमये हि तस्य तथारूपत्वम् ।

त्रिवीज पु० त्रीणि त्रीणि बीजानि प्रतिफलं यस्य । श्यामाके ।

त्रिवृत्(ता) पु० त्रीन् अवयवान् वृणोति वृ—क्विप् त्रिभिरवयवैर्वृता वा । (तेओडि) ओषधिभेदे, वर्त्तनं वृत् त्रिस्त्रो वृतो यत्र । त्रिगुणे त्रि० । "त्रिप्रस्रोर्द्वृतं त्रिवृ"दिति स्मृतिः । तासां त्रिवृतमेकैकां करोतीति श्रुत्युक्तेषु मिश्रितेषु तेजोजलान्नेषु च ।

त्रिवृत्पर्णी स्त्री० त्रिवृत् त्रिस्रोपघ्नम पर्ण मस्याः । (हेलञ्चा) क्षिल्ल मोचिकायाम् । [प्रवाहे च दक्षिणे उत्तरे च प्रयागे ।

त्रिवेणी स्त्री० त्रिस्रः वेणयः प्रवाहा यत्र कप् । शुक्लप्रवाहे युक्त-

त्रिवेणु पु० त्रयो वेणवोयत्र । रथसुखस्थेऽवयवभेदे ।

त्रिवेदिन् पु० त्रयो वेदाःपाठ्यत्वेन सन्त्यस्य इनि । ऋगादि-वेदत्रयपाठके ।

त्रिशङ्कु पु० सूर्य्यवंशीयनृपभेदे । त्रिषु अवयवेषु शङ्कुरिव । शलभे, मार्ज्जारे, चातके, खद्योते च ।

त्रिशाखपत्र पु० त्रिस्रः शाखा अस्य तादृशं पत्रं यस्य । बिल्वे ।

त्रिशिख पु० त्रिस्रः शिखाः प्रतिपत्तयस्य । बिल्वे । राक्षसभेदे च । त्रिशूले, मण्डलान्तरे च न० । शिखात्रयवति माणवकादौ त्रि० ।

त्रिशिरस् पु० त्रीणि शिरांस्यस्य । राक्षसभेदे, ज्वरे, कुबेरे च ।

त्रिशीर्षक न० त्रीणिशीर्षाण्यस्य कप् । त्रिशूले ।

त्रिशूल न० त्रीणि शूलानि शिखायाणि यत्र। खनामख्याते अस्त्रभेदे।
त्रिशूलिन् पु० त्रिशूलमस्त्यस्य इनि। शिवे। त्रिशूलधारि मात्रे त्रि० स्त्रियां ङीप्।
त्रिशृङ्ग पु० त्रीणि शृङ्गाण्यस्य। त्रिकूटपर्वते।
त्रि(ष्टु)ष्टुप् स्त्री० त्रिषु स्थानेषु स्तुभ्नाति स्तुभ–क्विप् षत्वम् तोः संप्रसारणं वा। एकादशाक्षरपादके छन्दोभेदे।
त्रिसंध्य न० त्रिसृणां सन्ध्यानां समाहारः। त्रिकाले प्राङ्मध्याह्नापराह्न-मध्याह्नरूपकालत्रये। त्रिसन्ध्यं यः पठेच्चित्यमिति।
त्रि(ष)सवन न० त्रीणि सवनानि यत्र काले वा षत्वम्। त्रिकाले। समाहारद्विगुः। त्रैकालिके स्नानत्रये च। 'वाग्यतश्चि(ष)सवनं चरेदि"ति स्मृतिः।
त्रिस्रोतस् स्त्री० त्रिषु लोकेषु स्रोतो यस्याः। गङ्गायाम्।
त्रिहल्य त्रि० त्रिवारं हलेन लष्टं यत्। त्रिवारलष्टे क्षेत्रे।
त्रिहायणी स्त्री० त्रयो हायना वयोमानमस्याः ङीप् णत्वम्। त्रिवर्षीयायां गवि। [टीत्।
त्रुट छेदने दिवा० तुदा० कु०पर० सक० सेट्। त्रुट्यति त्रुटति अत्रुटीत्।
त्रुट छेदने चुरा० आ० सक० सेट्। त्रोटयते अत्रुत्रुटत।
त्रुटि(टी) स्त्री० त्रुट–इन् किच्च वा ङीप्। लेशे संशये सूक्ष्मे लायां, निमेषद्वयरूपे कालभेदे, क्षानौ च।
त्रुभ्(प)म्प बधे भ्वा०पर०सक० सेट्। त्रुभ्यति अत्रुभ्यीत्।
त्रुभ्फ(म्फ) बधे भ्वा० पर० सक० सेट्। त्रुभ्फति अत्रुभ्फीत्।
त्रुप्र(फ) बधे भ्वा० पर० सक० सेट्। त्रोप(फ)ति अत्रोपी(फी)त्।
त्रेता स्त्री० त्रीन् इता नि०। दक्षिणाग्निगार्हपत्याहवनीयात्मके सम्बुद्धिते अग्नित्रये, सत्ययुगानन्तरवर्त्तिनि युगभेदे, द्यूतक्रीड़ासाधनस्याक्षस्य यस्मिन् पार्श्वे त्रयोऽङ्कास्तस्य पार्श्वस्य उत्तानतया पतने, द्यूतविशेषे वराटकानां मध्ये त्रयाणामुत्तानतया पतने च तेता-हृतसर्वस्व" मिति रघुकटिकटीका।
त्रेधा अव्य० त्रि+प्रकारार्थे धाच् त्रेस्त्रे इत्यादेशः। त्रिप्रकारे।

त्रै पालने भ्वा० आ० सक० अनिट्। त्रायते अत्रास्त।

त्रैगुणिक त्रि० त्रिगुणार्थं प्रयच्छति त्रिगुणं गृहीत्वैकगुणं प्रयुङ्क्ते "तत्प्रयच्छति गृह्णाति"ति ठक्। एकगुणं दत्त्वा त्रिगुणं ग्रहीतरि वार्द्धुषिकभेदे।

त्रैगुण्य न० त्रयाणां गुणानां सत्त्वरजस्तमसां समाहारः ततः स्वार्थे ष्यञ्। सत्त्वादिषु गुणेषु 'त्रैगुण्यविषया वेदा' इति गीता। गुणत्रयकार्य्ये पुण्यापुण्ये कर्मफलयुक्ते संसारे च।

त्रैधन० त्रिप्रकारम्। त्रि–धमुञ्। त्रिप्रकारार्थे।

त्रैलोक्य न० त्रयाणां लोकानां समाहारः ततः स्वार्थे ष्यञ्। स्वर्गमर्त्यपातालात्मके लोकत्रये।

त्रैलोक्यविजया स्त्री० त्रैलोक्यं विजयते सेवने स्वाधीनं करोति वि+जि–अच्। भङ्गायाम् (भाङ)।

त्रैविद्य पु० त्रिभ्यो विद्याभ्यः समाहृताः ऋग्यजुःसामरूपस्त्रिविधीं तदधीते वेद वा ष्यञ् वेदत्रयाभिज्ञे।

त्रैष्टुभ न० त्रिष्टुबेव स्वार्थे अण्। एकादशाक्षरपादके छन्दोभेदे।

त्रोटि(टी) स्त्री० त्रुट–इ वा ङीप्। कट्फले, चञ्चुम् (पक्षिर ठोँठ) पक्षिभेदे मत्स्यभेदे च।

त्रौत्र न० त्रु–उत्र। गवादिताड़ने (पांचनि) लगुडे।

त्रौक गत्यां भ्वा० आत्म० सक० सेट्। त्रौकते अत्रौकिष्ट। णिच्। अत्रुत्रौकत् त।

त्र्यम्बक पु० त्रीणि अम्बकानि नेत्राण्यस्य व्युत्पत्त्यन्तरं वाचस्त्यत्र। शिवे। क्वचित् भाषायामपि इयङादेशस्येष्टत्वात् त्रियम्बकोऽप्यत्र "त्रियम्बकं संयमिनं ददर्शे"ति कु०।

त्र्यम्बकसख पु० ईत० षच्समा० कुबेरे।

त्र्यहस्पर्श पु० त्रयाणामह्नां तिथीनां स्पर्शो यत्रैकस्मिन् सौरदिने। तिथित्रयस्पर्शयुक्ते एकस्मिन् सौरदिने।

त्र्यहस्पृश् पु० त्रीणि अहानि वारान् स्पृशति स्पृश–क्विन्। वारत्रयस्पर्शकारिण्यामेकस्यां तिथौ।

त्रयणी स्त्री० त्रीणि एतानि कर्बुराणि यस्या ङीप् तस्य न । (सजा० रलोम) त्रयविलोमनि ।

त्रि त्रि० तन–त्रिच् अनश्च वः भिन्ने अन्यस्मिन्नर्थे सर्वनामायम् ।

त्रिकपञ्चक न० त्रयः पञ्चकम् । "न्यग्रोधोदुम्बराश्वत्थशिरीषप्लक्षपादपाः पञ्चैते क्षीरिणो ह्येषां त्रिकपञ्चकं मतमित्युक्ते न्यग्रोधादिवल्कले ।

त्रिकपत्र न० । त्रयाणां पत्रमस्य । गुडत्वचि (दारचिनि) तेजपत्रे च । हिङ्गुपत्र्यां स्त्री० ङीप् ।

त्रिकपुष्प न० त्रयः पुष्पमिव । रोमाञ्चे । किलासरोगे पु० स्त्री० स्त्रीत्वे ङीप् ।

त्रिच काङ्क्षे भ्वा० पर० सक० वेट् । त्रिचति अत्रैचीत् अत्राचीत् ।

त्रिच संहतौ भ्वा० पर० सक० सेट् । त्रिचति अत्रैचीत् ।

त्रिकसार पु० त्रिचि, त्रिक् वा सारोऽस्य । वंशे, गुडत्वचि च (दारचिनि)

त्रिगन्ध पु० त्रिचि फलत्वक्फले गन्धोऽस्य । नारङ्गे, जम्बीरे ।

त्रिदोषान्त पु० त्रिदोषस्यान्तो यस्मात् पूष० । हस्तिकन्दे ।

त्रिच संवरणे तु० पर० सक० सेट् । त्रिचति अत्राचीत् अत्रैचीत् ।

त्रिच(चा) स्त्री० त्रिच संपा० क्विप् वा टाप् । वल्कले, चर्मणि गुडत्वचि च ।

त्रिच न० त्रिच–अच् । चर्मणि, वल्कले, त्रिकपत्रे च (तेजपात्) ।

त्रिचिसार पु० त्रिचि सारोऽस्य बहुव्री० सप्तम्या अलुक् । वंशे ।

त्रित् त्रि० तन–क्विप् अनो वः तुक् च । अन्यार्थे सर्वनामायम् ।

त्रिन्च गतौ भ्वा० पर० सक० सेट् । तत्रञ्चि अतत्रञ्चीत् । तत्रिञ्चित्वा तत्रक्ता ।

त्रिन्च सङ्कोचे रुधा० पर० सक० वेट् । त्रिनक्ति अत्रञ्चीत् अत्राङ्क्षीत् मतान्तरे क्ङावेट् अन्यत्र सेट् ।

त्रिर वेगे भ्वा० आत्म० अक० सेट् घटा० । त्रिरते अत्रिरिष्ट । णिच्– त्रिरयति । त्रिरा ।

त्रिरा स्त्री० त्रिर–अङ् । वेगे, अभीष्टलाभार्थं विलम्बाक्षमे च ।

त्रिरित न० त्रिर–क्त । शीघ्रे । तद्वति त्रि० ।

त्वरितोदित त्रि० त्वरितं शीघ्रं यथा तथोदितमुच्चारितम् ब०-क्त। शीघ्रोच्चारिते।

त्वष्टृ पु० त्वक्षु-तृन्। देवशिल्पिनि विश्वकर्मणि, द्वादशादित्य मध्ये आदित्यभेदे, तत्क्षणकारिणि (कुतार) वर्णसङ्करभेदे, चित्रानक्षत्रे च।

त्वादृश त्रि० तवेव दर्शनमस्य क्स। त्वत्सदृशे, ट। तादृशः। क्विप्। तादृक्। एतादृगप्युक्तार्थे।

त्वाष्ट्र पु० त्वष्टुरपत्यम्। दक्षासुरे संज्ञानाम्न्यां सूर्य्यपत्न्याम् स्त्री०। ङीप्। त्वष्टा देवताऽस्य कर्म्म। चित्रानक्षत्रे।

त्विष्(षा) स्त्री० त्विष-सम्प०क्विप् वा टाप्। दीप्तौ।

त्विष दीप्तौ भ्वा०उभ०अक०अनिट्। त्विषति ते। अत्विषत् अत्विक्षत

त्विषांपति पु० ईत० अलुक्स०। सूर्य्ये।

त्सर छद्मगतौ भ्वा० पर० सक० सेट्। त्सरति अत्सारीत्।

त्सरु पु० त्सर-उ। खड्गमुष्टौ।

थ

थ पु० थुड-ड। पर्वते, भयद्वारके, व्याधिभेदे, भयचिह्ने भक्षणे च। रक्षणे, मङ्गले, भये च न०।

थुड संवृतौ तु०कु० पर० सक० सेट्। थुडति अथुडीत्।

थुत्कार पु० थुदित्यव्यक्तशब्दस्य कारः क-घञ्। निष्ठीवनत्यागानुकरणशब्दे।

थुर्व बधे भ्वा०पर०सक०सेट्। थूर्वति अथूर्वीत्। थूर्त्तः।

द

द पु० दा-डैप-वा क। पर्वते, दन्ते खण्डने च। भार्य्यायाम् स्त्री० दातरि त्रि० दे! वः पतिर्विदुषी"ति नैषधम्।

दंश पु० दन्श-अच्। वनमक्षिकायाम् (डाँस) दन्श-करणादौ घञ्। कर्म्मणि, मर्म्मणि, दोषे, खण्डने, सर्पाघाते, दन्ते च।

दंशन न० दन्श–भावे ल्युट्। दन्तादिना खण्डने। करणे ल्युट्। वर्मणि।

दंशित त्रि० दंशः वर्म संजातोऽस्य। क्षतसन्नाहे धृतवर्मणि।

दंष्ट्रा स्त्री० दश्यतेऽनया दन्श–ष्ट्रन् अजा० न ङीष्। दन्तभेदे दन्तपङ्क्तिद्वयप्रान्तस्थायां द्विगुणाकृतायां दन्तावलौ।

दंष्ट्रिन् पु० दंष्ट्रा+अस्त्यर्थे इनि। शूकरे सर्पे च। दंष्ट्रायुक्ते त्रि०।

दक्ष वृद्धौ शीघ्रार्थे च भ्वा०आत्म० अक० सेट्, दक्षते अदक्षिष्ट।

दक्ष त्रि० दक्ष–अच्। निपुणे कार्य्यकुशले, शिक्षिते, अनलसे च कुक्कुटे, शिववृषे, सुनिभेदे, ब्रह्मणः दक्षाङ्गुष्ठाज्जाते प्रजापतिभेदे च पु०। [दक्षजादयोऽप्यत्रैव।

दक्षकन्या स्त्री० ६त०। अश्विन्यादितारापर्य्यन्तासु पञ्चाशत् संख्यकासु।

दक्षिण पु० दक्ष–इनन्। सर्वनायिकासु समानुरागे नायकभेदे। मध्यदेशात् दक्षिणे देशे शरीरस्य दक्षिणभागे च। अनुत्तरे सरले, परच्छन्दानुवर्त्तिनि अवामभागस्थे औदार्य्यवति च त्रि०।

दक्षिणकालिका स्त्री० दक्षिणचरणेन शिवहृदयारूढायां कालिकायाम्।

दक्षिणतस् अव्य० दक्षिण+अतसु। दक्षिणे देशे दिशि वा।

दक्षिणपूर्व्वा स्त्री० दक्षिणपूर्वयोरन्तराला दिक् ष०। अग्निकोणे विदिशि। [तन्त्रोक्ते आचारभेदे च।

दक्षिणमार्ग पु० कर्म्म०। पितृयानरूपे कर्म्मिणां गतागतस्वरूपे मार्गे

दक्षिणस्थ पु० दक्षिणे तिष्ठति स्था–क। सारथौ।

दक्षिणा अव्य० दिग्देशवृत्तेर्दक्षिणशब्दात् प्रथमापञ्चमीसप्तम्यर्थे आच्। प्रथमाद्यर्थविशिष्टे दक्षिणदिग्देशार्थे। याम्यदिशि, यज्ञशेषे कर्मणः साङ्गतार्थं देये द्रव्ये, यज्ञपत्न्याम्, "अध्वरस्येव दक्षिणे"ति रघुः। प्रतिष्ठायाम्, दक्षिणकालिकायाम्, क्वचिप्रजापतेः कन्यायां, परिक्रयद्रव्ये, नायिकाभेदे च स्त्री०।

दक्षिणाग्नि पु० कर्म०। अन्वाहार्य्यपचनाख्ये यज्ञियाग्निभेदे।

दक्षिणाचार पु० कर्म०। "स्वधर्मनिरतो नित्यं परतत्त्वेन पूजन–

वेत्तृ । स एव दक्षिणाचारः शिवोभूत्वा शिवां यजे"दित्युक्तौ आचारभेदे । [दक्षिदक्षिणशब्दस्यार्थे । आहि दक्षिणाहीत्यत्र ।

दक्षिणात् अव्य० दक्षिणा आति । प्रथमापञ्चमीसप्तम्यर्थवृत्तेर्दिग्देश-

दक्षिणापथ पु० ७त० । ऋक्षवदृक्षवन्तिनगरीमतिक्रम्य दक्षिणदिग्वर्त्तिदेशभेदे ।

दक्षिणामूर्त्ति पु० क० । न पुंवद्भावः । शिवस्य मूर्त्तिभेदे ।

दक्षिणायन न० दक्षिणस्यामयनम् गमनं, तत् यस्मिन् काले वा । कर्कटे रविसंक्रमणे, तदादिषण्मासे काले च ।

दक्षिणारुस् पु०दक्षिणे भागे अरुर्व्रणमस्य । व्याधलतदक्षिणाङ्गव्रणे मृगे

दक्षिणावर्त्त त्रि० दक्षिणे आवर्त्तते आवृत-अच् । दक्षिणावृत्तियुक्ते पदार्थे "दक्षिणावर्त्तशङ्खोऽयं"मिति नाटकम् ।

दक्षिणेर्ष्मन् पु० दक्षिणे इर्ष्मं व्रणं यस्य नि० अनिच् । व्याधलतव्रणयुक्तदक्षिणाङ्गके मृगे । [दक्षिणीयोऽप्यत्र ।

दक्षिण्य त्रि० दक्षिणामर्हति यत् । दक्षिणार्हे ऋत्विगादौ । ङ्क ।

दग्ध त्रि० दह-क्त । भस्मीकृते । कर्त्तरि न० ।

दग्धरुह पु० दग्धोऽपि रोहति रुह-क । तिलकवृक्षे, भस्मरोहायाञ्च ।

दग्धिका स्त्री० कुत्सिता दग्धा कुत्सिते कन् । (पोड़ाभात) दग्धाचे । दग्धा+स्वार्थे कन् अतइत्त्वम् । दग्धावृक्षे ।

दग्धेष्टका स्त्री० कर्म्म० । भाजने (भामा) ।

दघ त्यागे पालने च भ्वा० पर० सक० सेट् दघिति । दङ्क्ति अदङ्क्षीत् ।

दघ घातने स्वा० पर० सक० सेट् । दघ्नोति अदाघीत्-अदघीत् ।

दण्ड दण्डपातने अद० चुरा० उभ० सक० सेट् । दण्डयति-ते अददण्डत्-त ।

दण्ड न० म० दण्ड-अच् । लगुड़े (लाठि) । व्यूहभेदे, प्रकाण्डे अर्थे, कोणे, अन्यनदण्डे, सैन्ये च पु० । दम्यतेऽनेन दम-ड तस्य च नेत्त्वम् । घटिपलात्मके काले, भूमिमानभेदे, (काठा) सूर्य्यानुचरे पु० । दण्ड-भावे घञ् । अर्थोपहाररूपे राज्ञां चतुर्थोपाये । दण्ड-कर्त्तरि अच् । यमे पु० ।

दण्डका स्त्री० दण्डकारण्ये जनस्थाननामके वने ।

दण्डकाक पु० दण्डाकारः काकः । द्रोणकाके ।

दण्डकारण्य दण्डकनामनृपतेर्देशे शुक्रशापाद् वनतां गते जनस्थाने वने, तीर्थभेदे च ।

दण्डधर(धार) पु० दण्डं धारयति ष्ट णिच्–अच् हुस्वः अण् वा । यमे, नृपे, कुम्भकारे च । दण्डहस्ते त्रि० ।

दण्डनायक पु० ६त० । चतुरङ्गसेनाध्यक्षे । [युक्तनीतिशास्त्रे ।

दण्डनीति स्त्री० दण्डोनीयते बोध्यते यया नी–क्तिन् । शुक्रा–

दण्डपारुष्य न० दण्डेन पारुष्यं यत्र । अष्टादशविवादमध्ये विवाद-भेदे, राज्ञां व्यसनभेदे च ।

दण्डविष्कम्भ पु० दण्डं विष्कम्भ्नाति विरुणद्धि वि+स्कम्भ् अच् षत्वम् । दधिमन्थनकाष्ठभेदे (घोलमओया खुटि) ।

दण्डवृत्तक पु० दण्डाकारः पत्रादिहीनत्वात् वृत्तः । क्षुद्रवृक्षे ।

दण्डादण्डि अव्य० दण्डैश्च दण्डैश्च प्रकृत्येदं प्रवृत्तं युद्धम् क्रिया–व्यतिहारे इच् समा० पूर्वपदस्य दीर्घः । परस्परदण्डकरणकप्रहार-पूर्वकं प्रवृत्ते युद्धे ।

दण्डाहत न० दण्डेनाहन्यते आ+हन–क्त । तक्रे (घोल) ।

दण्डिन् पु० दण्ड+अस्त्यर्थे इनि । यमे, नृपे, द्वारपाले, मञ्जुघोषे ऋषेः पार्श्वचरभेदे, जिनभेदे, दमनवृक्षे, चतुर्थाश्रमविशिष्टे, काव्या दर्शकर्त्तरि कविभेदे च । दण्डधारके त्रि० । स्त्रियां ङीप् ।

दत्त त्रि० दा–क्त । विसृष्टे, त्यक्ते, रक्षिते च । द्वादशपुत्रमध्ये पुत्रभेदे (दत्तक) वैश्यस्योपाधिभेदे । "भूतिर्दत्तश्च वैश्यस्ये"तिस्मृतेः दत्तात्रेयाख्ये भगवतोऽवतारभेदे च । भावे क्त । दाने, "दत्तं सप्तविधं प्रोक्तमदत्तं षोडशात्मकम् । प्रत्यमूल्यं भृति स्तुत्या स्नेहात् प्रत्युपकारतः । स्त्रीणाञ्चानुग्रहार्थं च दत्तं सप्तविधं स्मृत"मित्युक्ते दानभेदे च न० । स्वार्थे कन् स्वनामख्याते "द-द्यात् माता पिता वा यं स पुत्रो दत्तको भवेदि"त्युक्ते पुत्रभेदे पु० ।

दत्ताप्रदानिक न० दत्तस्याप्रदानं पुनरादानमस्त्यस्मिन् ठन् । अष्टा-

दर्शविवादान्तर्गते दत्तवस्तुनः पुनरुपादानविषये "दत्त्वा द्रव्यमसम्यग् यः पुनरादातुमिच्छति । दत्ताप्रदानिकं नाम व्यवहारपदं हि तदि"ति नारदोक्ते व्यवहारभेदे ।

दत्तात्मन् पु० दत्त आत्मा येन । "दत्तात्मा तु स्वयं दत्त" इत्युक्ते पुत्रभेदे ।

दत्त्रिम त्रि० दानेन निर्वृत्तः दात्रि-क्रिमप् च । दाननिर्वृत्ते । "माता पिता वा दद्याच्च यमद्भिः पुत्रमापदि । सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुत" इत्युक्ते दत्तकपुत्रे पु० ।

दद दाने श्रुतौ च भ्वा० आ० सक० सेट् । ददते अदर्दिष्ट ददे ।

दद्रु पु० दद-रु । रोगभेदे (दाद) कच्छ्रे च ।

दद्रुघ्न पु० दद्रुं हन्ति हन-टक् । चक्रमर्दके । (दादमर्दन) ।

दद्रुण त्रि० दद्रु-अस्त्यर्थे न । दद्रू-न ह्रस्वश्च वा । दद्रुरोगवति ।

दद्रू पु० दरिद्रा-ऊ नि० । त्वग्रोगभेदे (दाद्रु) ।

दध दाने धारणे च भ्वा० आ० सक० सेट् । दधते अदधिष्ट ।

दधि न० दध-इन् । (दद्र) दुग्धविकृतिभेदे, वस्तौ च । धा-किन् ह्रस्वश्च । धारणकर्त्तरि त्रि० ।

दधिकूर्चिका स्त्री० "दध्ना सह पयः पक्वं यत् स्यात्तद्दधिकूर्चिके"त्युक्तायामामिक्षायाम् (छाना) ।

दधित्थ पु० दधिवद्दर्शनस्तित्थस्त्वक् स्था-क पृ० । कपित्थे (कएतबेल) ।

दधिपुष्पिका स्त्री० दधिवत् शुभ्रं पुष्पमस्याः कप् । अत इत्त्वम् । श्वेतापराजितायाम् । कवर्भावे ङीप् । कोलशिम्बाम् ।

दधिफल पु० दधिवत् द्रवः फलेऽस्य । कपित्थे ।

दधिमण्ड पु० ६त० । दध्नः मस्तुनि (सात) स्थाते पदार्थे ।

दधिसक्तु पु० ष० ब० । दध्युपसिक्ताः सक्तवः । दधिमिश्रितसक्तुषु ।

दधिसार न० ६त० नवनीते ।

दधीच(चि) पु० अथर्वमुनेरौरसे कर्दमप्रजापतिकन्यायां जाते मुनिभेदे, वृत्रासुरवधार्थं यस्यास्थिभिः देवैर्वज्रं निर्मितम् ।

दधीचास्थि न० ६त० । तेन निर्मितत्वेन तत्त्वारोपः । वज्रे तन्नामके हीरके च ।

दध्न पु० दध–न यमभेदे "औडम्बराय दध्नायेति यमतर्पणमन्त्रः ।

दनु स्त्री० कश्यपपत्न्याम् दक्षप्रजापतेः कन्यायां दानवमातरि ।

दनुज पु० दनोर्जायते जन–ड । असुरे, दनुजस्तनुप्रभृतयोऽप्यत (दांत) कुञ्जे, पर्वतनितम्बे, सानुनि, हस्तिदन्तसङ्ख्यायाञ्च ।

दन्त पु० अन्तर्भावितन्यर्थे दम+तन् । चर्वणसाधनभेदे ।

दन्तक त्रि० दन्ते प्रसिद्धः कन् । दन्तमार्জ্জनोपजीविनि । नागदन्ते, गिरिप्रदेशात् तिर्य्यक्निर्गते पाषाणे च पु० स्वार्थे कन् दन्ताख्यौ पु० ।

दन्तकर्षण पु० दन्तान् कर्षति कृष–ल्यु । जम्बीरे ।

दन्तकाष्ठ न० दन्तधावनार्थं काष्ठम् । दन्तधावनसाधने काष्ठे । तत् यस्मात् ५ ब० । विकङ्कतवृक्षे पु० ।

दन्तच्छद पु० दन्तोऽस्याद्यनेऽनेन छद–णिच्–घ ह्रस्वः । ओष्ठे (ठोट)

दन्तच्छदोपमा स्त्री० दन्तच्छदओष्ठ उपमीयतेऽनया अङ् । बिम्बी-लतायाम् (तेलाकुचा) तत्फलेन हि ओष्ठसादृश्यं प्रसिद्धम् ।

दन्तधावन पु० दन्तान् धावयति शोधयति धाव–ल्यु । खदिरवृक्षे, शुक्लकरञ्जे, वकुले च । भावे ल्युट् । दन्तशुद्धौ ।

दन्तपत्रक न० दन्तइव शुभ्रं पत्रं दलं यस्य । कुन्दपुष्पे ।

दन्तपुष्प न० दन्तइव शुभ्रं पुष्पमस्य । कुन्दे, कतकफले च ।

दन्तफल न० दन्तइव शुभ्रं फलम् । कतकफले । दन्तवत् फलमस्य । कपित्थे पु० । पिप्पल्याम् स्त्री० टाप् ।

दन्तमूलिका स्त्री० दन्तइव शुभ्रं मूलं यस्याः कप् । दन्तीवृक्षे ।

दन्तवक्त्र पु० दन्तप्रधानं वक्त्रमस्य । कृष्णद्वेष्ये ऋषभेदे ।

दन्तबीजक पु० दन्तवत् बीजानि यस्य । दाडिमे वृक्षे ।

दन्तशठ पु० दन्तान् शठति क्लेदयति शठ् । जम्बीरे, कपित्थे कर्मरङ्गे, नागरङ्गे च । चाङ्गेर्य्यां चुक्राम्लिकायां स्त्री० । [दन्तैराहनने ।

दन्ताघात पु० दन्तमाहन्ति आ+हन–अण् । निम्बूके । भावे घञ् ।

दन्तालिका स्त्री० दन्तान् अलति भूषयति, तेभ्यो वा पर्य्याप्नोति अल+अण्–ण्वुल् वा । वल्गायाम् । (लागाम) ।

दन्तावल पु० दन्त+अस्त्यर्थे वलच् पूर्वदीर्घः। हस्तिनि।

दन्तिका स्त्री० दम—तनू+गौरा० ङीष् स्वार्थे कन्। दन्तीवृक्षे।

दन्तिन् पु० दन्त—इनि। हस्तिनि।

दन्तिनी स्त्री० दन्त—इनि। दन्तीवृक्षे। [ओषधौ च।

दन्ती स्त्री० दम—तनू गौरा० ङीष्। उदुम्बरपर्ण्यां, प्रत्यक्पर्ण्यां-

दन्तीबीज न० ६त०। रेचके फलभेदे जयपाले।

दन्तुर त्रि० उन्नताः दन्ताः सन्त्यस्य दन्त+उरच्। उन्नतदन्तयुक्ते उन्नतानते विषमे स्थाने च।

दन्तुरच्छद पु० दन्तुर उन्नतानतः छदो यस्य। बीजपुरे।

दन्तोलुखलिक पु० दन्ताएव उलुखलः करणत्वेनास्त्यस्य विद्यतेऽस्य ठन्। तापसभेदे स हि दन्तैरेव व्रीह्यादीन् कण्डयित्वा खादति। इनि। दन्तोलुखलीत्यपि।

दन्त्य त्रि० दन्ते दन्तमूले वा भवः यत् दन्तदन्तमूलयोर्जाते तवर्गादौ वर्णे। दन्तेभ्यो हितः यत्। दन्तहितकारके।

दन्दशूक पु० गर्हितं दशति दन्दश—गर्हार्थे यङ्—ऊक। राजसे, सरीसृपे, सर्पे च। [दब्ध्वा।

दन्भ दम्भे स्वा० पर० अक० सेट्। दम्भोति अदम्भीत्। दम्भित्वा

दन्भ संधाते चु० आत्म० अक० सेट्। दम्भयते अददम्भत।

दन्श दंशने भ्वा० पर० सक० अनिट्। दशति अदाङ्क्षीत्।

दभ प्रेरणे चु० उभ० सक० सेट् इदित्। दम्भयति ते अददम्भत् त।

दभ प्रेरणे चु० उभ० सक० सेट्। दभयति ते अदीदभत् त।

दभ्र न० दन्भ—रक्। अल्पे, "अदभ्रदर्भमधिशय्ये"ति भारविः।

दम शमे दण्डे च दि० प्रका० अक० सेट्। दाम्यति अदमत्-अद-मीत्। दमित्वा दान्त्वा।

दम पु० दम०—घञ्। दण्डे, बाह्येन्द्रियाणां ध्येयविषयव्यतिरिक्तेभ्यो निवर्त्तने, "निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते" इत्युक्ते बाह्येन्द्रियव्यापारारोधे, विकारहेतुसन्निधानेऽपि मनसः स्थैर्ये, "कुत्सितात् कर्मणो विप्र! यच्च चित्त निवारणम्। स कीर्त्तितो

दम" इत्युक्ते कुकर्मभ्यो मनसो निवारणे, कर्म्मणि, दमने च ।

दमघोष पु० शिशुपालपितरि चन्द्रवंश्ये नृपभेदे, "तुदमोदम-घोषज" इतिमाघः ।

दमघोषसुत पु० ईत० । शिशुपाले । दमघोषजादयोऽप्यत्र ।

दमनक पु० दम–ल्यु स्वार्थे कन् । (दोना) दवभेदे, छन्दश्चे च ।

दमनी स्त्री० दम्यतेऽनया ल्युट् । अग्निदमनीदक्षे ।

दमयन्ती स्त्री० दम–णिच्–शतृ । नलराजपत्न्याम्, भद्रनलिकायाञ्च ।

दमित त्रि० दम–क्त नि० । दान्ते, भारवहनादिक्लेशसहे च ।

दमु(मू)नस् पु० दम–उनसि वा दीर्घः । अग्नौ, शुक्राचार्य्ये च ।

दम्पती पु० द्वि०व० । जाया च पतिश्च द्वन्द्वे जायाशब्दस्य दम्भावादेशः । मिलितयोः जायापत्योः ।

दम्भ पु० दभ–घञ् । कपटे शाठ्ये ।

दम्भोलि पु० दम्भोति खेदयति दभ–ओलि । वज्रेऽस्त्रे ।

दम्य पु० दम–यत् क्यप् वा । प्राप्तभारवहनयोग्यवयस्के वत्से, अनड्वहि च । दमनीये दमनार्हे शास्ये च त्रि० ।

दय गतौ वधे, दाने पालने च भ्वा०आत्म०सक०सेट् । दयते अदयिष्ट ।

दया स्त्री० दय–भिदा० अङ् । "यत्नादपि परक्लेशं कर्त्तुं वा हृदि जायते । कृच्छ्रा भूमिसुरश्रेष्ठ ! सा दया परिकीर्त्तिते" त्युक्त-लक्षणेच्छाभेदे

दयालु त्रि० दय–आलुच् । कृपायुक्ते । "दयालुरपि क्रव्यादः" इत्युञ्छटः ।

दयित पु० दय–क्त । पत्यौ । प्रियमात्रे त्रि० । भार्य्यायां स्त्री० ।

दर अव्य० दृ–अप् । ईषदर्थे । भये, गर्त्ते च पु०न० । "दरादराभ्यां दरकम्पिनी"ति नैषधम् । कन्दरे पु०स्त्री० स्त्रीत्वे ङीप् ।

दरकण्टिका स्त्री० दरः कण्टः यस्याः स्वार्थे कन् । शताह्वायाम् ।

दरद स्त्री० दृ–अदि । प्रपाते, भये, पर्वते, शरे, म्लेच्छजातिभेदे, हृदये च ।

दरद पु० भये, देशभेदे च। तद्देशस्थे ब० व०। दरदाः खसा इति मनुः। दरं भयं ददाति दा–क। भयप्रदे त्रि० क्षिङ्गुले पु०न०।

दरिद्र पु० दरिद्रा–अच् आलोपः। निर्द्धने, हीने च।

दरिद्रा दुर्गतौ अदा० स्वपा० जचा० परo अकo सेट्। दरिद्राति अदरिद्रीत्- अदरिद्राक्षीत्।

दर्दुर पु० दृणाति कर्णौ शब्दैः उरन् गि०। मेघे, भेके, वाद्यभेदे, पर्वतभेदे, कृष्णसर्षपात्रभेदे च। श्यामलाले न०।

दर्द्रू स्त्री० दरिद्रा–ऊ नि०। (दाद) रोगभेदे।

दर्प पु० दृप–घञ् अच् वा। मदभेदे, गर्वे, अहङ्कारे च।

दर्पक पु० दर्पयति दृप–णिच् ण्वुल्। कामदेवे।

दर्पण पु० चु० दृप–संदीपे ल्यु। रूपप्रतिबिम्बदर्शनाधारे, आदर्शे, पर्वतभेदे च। नेत्रे न०।

दर्भ पु० दृभ–अन्ये घञ् दृ–भ वा। "कुशाः काशा वल्वजाश्च तथान्ये तीक्ष्णरोमशाः। मौञ्जाश्च शाद्वलाश्चैव षड् दर्भाः परिकीर्त्तिताः" इत्युक्तेषु काशादिषु षट्सु तृणेषु।

दर्वि(र्वी) स्त्री० दृ–विन् वा ङीप्। व्यञ्जनादिसाधके (हाता) काष्ठादिनिर्मिते पदार्थे। स्वार्थे कन्। अत्रार्थे गोजिह्वालतायाञ्च।

दर्व्वीकर पु० दर्व्वीव करः फणो यस्य दर्व्वीमिव फणां करोति या कृ–अच्। सर्पे।

दर्श पु० दृश्यते शास्त्रे चन्द्रार्कसङ्गमो यत्र दृश–घञ्। अमावस्यायां तिथौ "अन्योन्यं चन्द्रसूर्यौ तु दर्शनादर्श उच्यते, इत्युक्तेः। तत्साध्ये यागभेदे च। दर्शपौर्णमासाभ्यां यजेतेति श्रुतिः। भावे घञ्। दर्शने। दृश–अच्। द्रष्टरि त्रि०।

दर्शक पु० दर्शयति राजानम् आगतान्। दृश–णिच्–ण्वुल्। द्वारपाले। दर्शयितरि त्रि०। दृश–ण्वुल्। द्रष्टरि त्रि०।

दर्शन न० दृश–ल्युट्। नेत्रे, स्वप्ने, बुद्धौ, धर्मे, उपलब्धौ, दर्शने, अध्यात्मज्ञानोपायेषु न्यायादिषु शास्त्रेषु च।

दर्शनीय त्रि० दृश–अनीयर्। मनोहरे, दर्शनयोग्ये च।

दर्शयितृ पु० दृश–णिच्–तृच्। द्वारपाले च हि द्वारागतान् राजानं दर्शयति दर्शनकारयितरि त्रि०।

दल भेदने भ्वा० पर० सक० सेट् वा घटा०। दलति अदालीत् णिचि दलयति दालयति।

दल भेदे चुरा० उभ० सक० सेट्। दालयति–ते अदीदलत् त।

दल न० दल–अच् शस्त्रच्छेदे, अपक्वशष्यद्रव्ये, पत्रे, तमालपत्रे, उच्चतायाम्, पङ्के, अर्द्धे च। खण्डे, उत्सेधशस्त्रवस्तुनि च पु०।

दलकोष पु० दलान्येव कोषोयस्य। कुन्दपुष्पवृक्षे तस्य पुष्पे कोषान्तराभावात्तथात्वम्।

दलनिर्म्मोक पु० दलतीति दलं शल्कलं निर्म्मोक इव यस्य। भूर्ज्जपत्रवृक्षे तस्य हि शल्कलस्य निर्म्मोकाकारत्वम्।

दलपुष्पा स्त्री० दलं स्वयं विदीर्णं पुष्पमस्याः कोतक्याम्।

दलाढक पु० दलेनाढक इव। स्वयंजाततिलवृक्षे, शुभ्रायाम्, कुन्दे, नागकेशरे, शिरीषे, करिकर्णे, फेने, खातके, गैरिके च।

दलामल न० दलेनामलम्। मरुवके। मदनवृक्षे दमनवृक्षे च पु०।

दलाम्ल न० दलेनाम्लम् चुक्रे (चुकापालङ्)।

दलित त्रि० दल–क्त। प्रफुल्ले, खण्डिते, अर्द्धीकृते च "व्येकादलिता विभाजितेष्वेनेति लीला०।

दलेगन्धिपु०दले गन्धो यस्याः ङीप् समा० सप्तम्या अलुक्। सप्तच्छदवृक्षे।

दव गतौ भ्वा० पर० सक० सेट्। दवति। दन्वति अदन्वीत्।

दव पु० दुनोति दु–अच्। वने, वनानले च। भावे अप्। उपतापे।

दवथु पु० दु–दु–उपतापे अथुच्। सन्तापे, गात्रादिदाहे च।

दवाग्नि पु० दवस्य वनस्याग्निः। दावानले।

दविष्ठ त्रि० अतिशयेन दूरः–इष्ठन् अन्यलोपः गुणश्च। अतिदूरे। ईयसुनि दवीयस। अत्रैवार्थे स्त्रियां ङीप्।

दश दीप्तौ चु० उभ० अक० सेट् इदित्। दंशयति–ते अददंशत्–त।

दश दंशने चुरा० आत्म० सक० सेट् इदित्। दंशयते अददंशत।

दशक न० दश परिमाणमस्य कन्। दशति, दशसङ्ख्यायाम्।

दशकण्ठ पु० दश कण्ठा यस्य । रावणे । दशकन्धरादयोऽप्यत्र ।

दशत् पु०दश परिमाणमस्य अति । दशानां वर्गे—दशके दशत्वप्रायायाम्

दशधा अव्य० दशप्रकारम् धाच् । दशविधे ।

दशन् त्रि० दन्तृ—कनिन् । (दश) सङ्ख्यायिशेषे ।

दशन पु० दश्यतेऽनेन नि० नलोपः । दन्ते, शिखरे च । करणे—ल्युट् । कवचे । भावे ल्युट् । दंशने, दन्तादिनाघाते च ।

दशनोच्छिष्ट न० दशनेनोच्छिष्टं यत्र । व्यधरादिचुम्बने "रेवतीदश-नोच्छिष्टपरिपूतपुटे" इति माघः । निश्वासे पु० दन्तोच्छिष्टे त्रि०।

दशपुर न० दश दिशः पिपर्त्ति पृ—क । कैवर्त्तीसुस्तजे । दशपुरो यत्र अच् समा० । मालवदेशैकखण्डे ।

दशबल पु० "दानशीलक्षमावीर्य्यध्यानप्रज्ञाबलानि च । उपायः प्रणि-धिस्तानि दश बुद्धबलानि वै" इत्युक्तानि दशबलानि यस्य बुद्धमुनौ ।

दशभुजा स्त्री० दश भुजा यस्याः । "कृतिद्वत्तं पुराकल्पे मनोःस्वय-म्भुवोऽन्तरे प्रादुर्भूता दशभुजा देवी"त्युक्तायां दुर्गायाम् ।

दशम त्रि०दशानां पूरणः डटि मट् । येन दश सङ्ख्या पूर्य्यते तस्मिन् । स्त्रियां ङीप् । [इनि । नवत्यूर्द्ध्ववयस्के अतिवृद्धे ।

दशमिन् त्रि० नवतेरूर्द्धं दशमी साऽवस्थाभेदोऽस्यास्य पूरणार्थात्

दशमी स्त्री० दशानां पूरणी । शतायुर्वै पुरुष इत्युक्ते नराणां शता-युष्त्वनियमात् तस्यायुषो दशधाविभागे नवत्यधिकायामवस्थायामति-वृद्धावस्थायाम्, चन्द्रस्य दशमकलायाः प्रवेशनिर्गमान्यतररूपात्मके तिथिभेदे "आरभ्य तस्यां दशमीं च यावद्"इति स्मृतिः "उन्मादो मूर्च्छा मतिरित्येताः शरदश्च दशैव स्यु"रिति विरहावस्थाभेदे मरणरूपावस्थायाञ्च ।

दशमीस्थ त्रि० दशम्यामवस्थायां तिष्ठति स्था—क । अतिवृद्धे नवत्य-धिकवयस्के—क्षीणरागे—स्मृतिहीने, विच्छेदवशात् मरणावस्थाप्राप्ते कामिवृन्दे च ।

दशमूल न० दश मूलानि यत्र । पाचनभेदे । दशानां मूलानां समा-हारः मात्वा० । "विल्वश्योनाकगाम्भारीपाटलागणिकारिकाः ।

बालपर्णी पृश्निपर्णी बृहतीद्वयगोक्षुरम्। उभाभ्यां पञ्चमूलाभ्यां दशमूलमुदाहृत"मित्युक्तेषु विल्वादिदशकमूलेषु।

दशरथ पु० दशसु दिक्षु गतो रथो यस्य। सूर्यवंश्ये नृपभेदे।

दशरथसुत पु० ६त०। रामे एवं दशरथौरसजादयोऽप्यत्र।

दशहरा स्त्री० दशविधानि दशजन्मार्जितानि च पापानि हरति हृ—ठक्। गङ्गाजन्मदिने ज्यैष्ठशुक्लदशम्याम् ज्येष्ठशुक्लदशमीसंबन्धित्वं "दशपापहरा यस्मात्तस्मात् दशहरा"स्मृतेत्युक्तम्।

दशा स्त्री० दंश—अङ् नि० नलोपः। अवस्थायां, दीपवर्त्त्यां च "अपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम्। परोपकारनिरता मणिदीपा इवोत्तमा" इत्युद्भटः। चित्ते, कालकृतविशेषरूपायां गर्भवासजन्माद्यवस्थायां बाल्ययौवनादिरूपायाञ्च, कामकृते विरहिणां नेत्ररागाद्यवस्थादशके, ज्योतिषोक्ते नक्षत्रानुसारेण सूर्य्यादिग्रहाणां स्वामित्वेन भोग्यकाले च विस्तरो वाचस्पत्ये।

दशाकर्ष पु० दशया तैलादिकमाकर्षति आ+कृष—अच्। प्रदीपे वस्त्राग्रे पु० स्त्री० पुंस्त्वे ब० व०।

दशाङ्गधूप पु० "मधु मुस्तं घृतं गन्धो गुग्गुल्वगुरुशैलजम्। सरलं शिल्हसिद्धार्थं दशाङ्गोधूप उच्यते" इत्युक्ते धूपभेदे प्रकारान्तरमप्यस्ति विस्तरो वाचस्पत्ये।

दशापवित्र न० दशा वस्त्राग्रं पवित्रमिव। आज्ञादिदेये वासःखण्डे।

दशारुहा स्त्री० दशसु दिक्षु आरोहति आ+रुह—क। कैवर्त्तीमुस्तके।

दशार्ण पु० दंश—कर्णानि दुर्गाणि जलानि वा यत्र कर्णशब्दवृद्धिः। देशभेदे। नदीभेदे स्त्री०।

दशार्ह पु० यदुराजदेशे। तद्देशस्थे ब० व०।

दशावतार पु० दश मीनादयोऽवतारा यस्य। विष्णौ ते चावतारा वाचस्पत्ये दर्शयिष्यन्ते।

दशाश्व पु० दश अश्वा रथे यस्य। "रथस्त्रिचक्रः सोमस्य कुन्दाभास्तस्य वाजिनः। वामदक्षिणतो युक्ता दश तेन चरत्यसाविति"त्युक्ते चन्द्रे।

दशाश्वमेधिक पु० दश अश्वमेधा ब्रह्मणा हताः सन्यत्र ठञ्। काशीस्थे तीर्थभेदे।

दशाह पु० दशानामहां समाहारः टच् समा० नाह्नादेशः। दशसु दिनेषु "दशाहं शावको भवेदि"ति स्मृतिः।

दशेन्धन पु० दशा वर्त्तिकैव इन्धनं यस्य। प्रदीपे।

दशेरक पु० मरुदेशे। तद्देशस्थे ब० व०। [सीत्। दसित्वा-दस्त्वा।

दस उत्क्षेपे दि० पर० सक० सेट्। दस्यति। अदसत् अदासीत्—अद-

दस भासे चु० उभ० सक० सेट् इदित्। दंसयति-ते अददंसत् त।

दस दर्शने दंशने च चु० आ० सक० सेट् इदित्। दंसयते अददंसत

दस्यु पु० दस-युच् नानादेयः। चौरे, रिपौ, महासाहसिके च।

दस्र पु० दस-रक्। गर्दभे। अश्विनीकुमारयोः, द्वि० ब०। अश्विनी-तारके च। [अददंहत् ब।

दह दीप्तौ अक० दाहे सक० चु० उभ० सेट् इदित्। दंहयति ते

दह दाहे भ्वा० पर० सक० अनिट्। दहति अधाक्षीत्।

दहन पु० दह—ल्यु। अग्नौ, चित्रकवृक्षे, भल्लातके, दुष्टचेतसि च। भावे ल्युट्। दाहे न०।

दहर पु० दह—अरन्। भूधात्र्याम् धातुद्रव्यद्रावणपात्रे (मुचि) क्षुद्रे "दहरोऽस्मिन् अन्तराकाश" इति श्रुतिः। अल्पे च त्रि०।

दहराकाश पु० कर्म०। चिदाकाशे ईश्वरे।

दा दाने भ्वा० पर० सक० सेट् ण इत्। यच्छति अदात्।

दा दाने जुहो० उभ० सक० सेट्। ददाति दत्ते अदात् अदित।

दा छेदने अदा० पर० सक० अनिट्। दाति अदात्।

दाक्षायणी स्त्री० दक्षस्यापत्यं स्त्री फिञ् गौरा० ङीष्। अश्वि-न्यादितारासु, सतीनाम्न्यां शिवपत्न्याञ्च। [दक्षिणदिग्भवमात्रे त्रि०।

दाक्षिणात्य पु० दक्षिणस्यां दिशि भवः दक्षिण+त्यक्। नारिकेले।

दाक्षिण्य न० दक्षिणस्य भावः ष्यञ्। अनुकूलत्वे। दक्षिणामर्हति आ। दक्षिणार्हे ऋत्विजि।

दाक्षी स्त्री० दक्षस्य गोत्रापत्यं स्त्री० इञ् ङीप्। पाणिनिमुनेर्मातरि।

दाक्षीसुत पु० ईत० । व्याकरणकर्त्तरि पाणिनिमुनौ ।

दाड़ि(लि)म द्वि० दल-यञ् दाल: तेन निर्वृत्तः इमप् वा लुक् डः । दाड़िम्बवृक्षे स्त्रियां ङीप् "वियोगिनीमैक्षत दाड़िमीम-षाधि"ति नै० । [ईत० । दाड़िम्बपुष्पे न० ।

दाड़िमपुष्प पु० दाड़िमस्य पुष्पमिव पुष्पमस्य । रोहितकवृक्षे ।

दाड़िम्ब पु० दा-ड़िम्ब डस्य नेत्वम् । खनामख्याते वृक्षे ।

दात त्रि० दो-तन् । छिन्ने । दंप-क्त । शुद्धे ।

दात्यूह पु० दो-क्तिन् दितिं खण्डनं वहति दितिवाट् सएव अण् वाह ऊठ्-आदेरित्वम् । कालकण्ठके पक्षि भेदे ।

दात्र न० दा-ष्ट्रन् । छेदसाधने (दा) यन्त्रे ।

दान खण्डनाकरणे, छेदने च । भ्वा० अक० स्वार्थे सन् । दीदांसते । अदीदांसिष्ट । [शुद्धौ, त्यागे च ।

दान न० दो-दै-दा-वा ल्युट् । हस्तिमदजले, पालने, छेदने,

दानव पु० दनोरपत्यम् अण् । असुरे ।

दानवारि पु० ईत० । देवे, विष्णौ च । कर्म० । हस्तिमदजले न०

दानशील त्रि० दानं शीलं सततमनुष्ठानं यस्य । बहुदातरि ।

दानशौण्ड त्रि० दाने शौण्डः दक्षः । बहुप्रदे । [शिष्टे च ।

दापित त्रि० दा-णिच्-क्त । साधिते, धनादिना वशीकृते, द-

दाम् क्लीं० न० दो-मनिन् । दोहनकाले पशुबन्धनरज्जौ रज्जुमात्रे, मालायाञ्च । स्त्रीत्वे वा ङीप् । दामा दामे ।

दामनपर्वन् न० ईत० । दमनभञ्जनतिथौ चैत्रशुक्लचतुर्दश्याम् ।

दामनी स्त्री० दामैव प्रज्ञा० अण् वा ङीप् । पशुबन्धनरज्जौ ।

दामोदर पु० "दामानि लोकनामानि तानि यस्योदरान्तरे । तेन दा-मोदरो देव" इत्युक्ते विष्णौ ।

दाम्भिक त्रि० दम्भेन चरति धर्म्मं ठक् । लोकेषु कीर्त्त्यादिख्यापनार्थं धर्मचारिणि वैडालव्रतिके, दम्भयुक्ते च । वकपक्षिणि पु० ।

दाय दाने भ्वा० आ० सक० सेट् । दायते अदायिष्ट णिच्-अद्-दायत्-त ।

दाय पु० दा–कर्मणि घञ्। "विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते" इत्युक्ते पितृसम्बन्धवति तदुपरमे तत्सम्बन्धिभिः पुत्रादिभिः विभजनीये द्रव्ये, विवाहकाले जामातृत्वादिभ्यो देये धने च। भावे घञ्। दाने। दो–भावे घञ्। खण्डने। दैप–करणादौ घञ्। अम्बुनि, स्थाने, क्षये, सोल्लुण्ठनवाक्ये च।

दायभाग पु० दायस्य सम्बन्धिस्वामिकधनस्य तत्सम्बन्धिमरणादौ तस्य सम्बन्धिभिः पुत्रादिभिर्भागः विभजनं गुटिकापातादिना व्यञ्जनम्। अष्टादशविवादान्तर्गते विवादभेदे, तादृशविवादविषये पुत्रादिभिः पितृादिधनस्य विभजने च।

दायाद पु० दायं विभजनीयधनमादत्ते आ+दा–क। पुत्रे। दायमर्हति अद–अण् उपपदसमासः। सपिण्डे।

दार पु० ब० व० दारयन्ति भ्रातृत्वेन दृ–णिच्–अच्। पत्न्याम् सा हि पत्युः भ्रातृत्वेन भिनत्तीति लोकप्रसिद्धम्।

दारक पु० दृणाति भिनत्ति उदरं दृ–ण्वुल्। बालके बालिकायां स्त्री० टाप् अत इत्त्वम् भेदके त्रि०। श्यामसूकरे पु०।

दारकर्मन् पु० दारोपयिकं दारसम्पादकं कर्म०। विवाहे "सवर्णाग्र्ये द्विजातीनां दारकर्मणी"ति स्मृतिः।

दारद पु० दरदि देशे भवः अण्। विषभेदे, पारदे हिङ्गुले च। दरदा देशेन एकदिक् अण्। दरदेशसन्निकृष्टे समुद्रे।

दारु न० दृ–उण्। काष्ठे, पित्तले, देवदारौ च। गिल्लिनि, दारके च त्रि०। [काष्ठे च न०

दारुक पु० कृष्णसारथौ। दारु–स्वार्थे कन्। देवदारुवृक्षे,

दारुगन्धा स्त्री० दारूणि गन्धो यस्याः। (वीड़ा) गन्धद्रव्ये।

दारुण पु० दारयति चित्तं दृ–भये उनन्। चित्तके, रौद्ररसे, भयानकरसे च। भयावहे, दुःसहे, भीषणे, भयहेतौ च त्रि०।

दारुणिशा स्त्री० दारुमयी–निशा यत्वम्। दारुहरिद्रायाम्।

दारुपत्री स्त्री० दारुमयं पत्रं यस्या ङीप्। छिङ्गपत्र्याम्।

दारुपुत्रिका स्त्री० दारुमयी पुत्रिका। काष्ठपुत्तलिकायाम्।

दारुसार न० दारुषु सारं श्रेष्ठम् । चन्दने ।
दारुसिता स्त्री० दारुमयी सिता मधुरत्वात् । (दारचिनी)पदार्थे ।
दारुहरिद्रा स्त्री० दारुमयी हरिद्रा । खनामख्यातायाम् हरिद्रायाम् ।
दारुहस्तक पु० हस्त इव कन् दारुमयः हस्तकः । काष्ठनिर्म्मिते हस्ताकारे (हाता) पदार्थे ।
दार्वट न० दारुवत् निश्चलतया निरूपणीयविषयनिश्चयार्थमटन्त्यत्र अट-घञर्थे क । चित्राग्टहे, मन्त्रगृहे च ।
दार्षीघाट(त) पु० दारूणि आहन्ति हन-अण् वा टाना देशः । (काट्ठोकरा) पक्षिभेदे ।
दार्विका स्त्री० दारयति उत्वादि० वि० दार्वी दारुहरिद्रा तस्या विकारः ठक् । दारुहरिद्राकाथोद्भवे तुत्थे । दार्वी+संज्ञायां कन् अणो ह्रस्वः । गोजिह्वालतायाम् ।
दार्वी स्त्री० दृ-ञुण् गौ० ङीष् । देवदारुणि । उत्वा० वि० । हरिद्रायाम् गोजिह्वायाम् दारुहरिद्रायाञ्च ।
दाल पु० चु० दल-अच् । कोद्रव्ये (कोदो) धान्यभेदे, मधुभेदे च । देवतालीलतायां स्त्री० ङीष् । [मांसे ।
दाव पु० दुनोति दु-ण । वने, वनभवेऽग्नौ, अग्निमात्रे च भावे घञ् ।
दावाग्नि पु० दावस्य वनस्याग्निः । वनोद्भवेऽग्नौ । दावानलादयोऽप्यत्र ।
दाविक वि० देविकायां नद्यां भवः । अण् देविकादेरेत आत्त्वम् । देविकानदीभवे ।
दाश(स) हिंसने स्वा०पर० सेट् । दाश्नो(श्नो)ति अदाशी(सी)त् ।
दाश दाने चु० उभ० सक० सेट् । दाशयति-ते अदिदाशत्-त ।
दाश दाने स्वा० उ० सक० सेट् । दाशति-ते अदाशीत् अदाशिष्ट । णिच् अदिदाशत्-त ।
दाश(स) पु० दशति भक्षान् दनुश घञ् वि०, दाशते मूल्यमर्थी दास-घञ् वा । भक्षोपजीविनि धीवरे ।
दाश(स)पुर न० दाशा(सा)नू कैवर्त्तान् पिपूर्त्ति पालयति पृ-क । कैवर्त्तीसुतजे ।

दाशरथ पु० दशरथस्येदम् अण्। श्रीरामे "प्रदीयतां दाशरथाय मैथिली"ति नाटकम्।

दाशरथि पु० दशरथस्य पत्यम् अत इञ्। दशरथस्यापत्येषु श्रीरामादिषु चतुर्षु। [विष्णौ, दशार्हदेशजे त्रि०।

दाशार्ह पु० दाशं दानमर्हति अर्ह-अण् दशार्हवंशे भवः अण् वा।

दाशेरक पु० मालवदेशे। तद्देशस्थे जने ब० व०।

दास दाने भ्वा० उभ० सक० सेट्। दासति ते अदासीत् अदासिष्ट। णिच् अददासत् त।

दास पु० दास-अच्। मूढे, ज्ञातात्मनि, धीवरे, दानपात्रे मूढस्योपाधौ "मूढे दासं प्रयोजयेदि"ति स्मृतिः। दासते दीयतेऽस्मै भक्तादि दास-घञ्। भृत्ये सेवके च त्रि०। स्त्रियां ङीप् दासी।

दासी स्त्री० दस क्षेपे कर्मणि घञ्। झिण्टाम्, काकजङ्घायाम्, नीलझिण्टायां चेष्यते। दासस्य पत्नी ङीप्। मूढपत्न्यां, कैवर्त्तभार्य्यायाञ्च।

दासेय पु० दास्या अपत्यं ढक्। दासीगर्भजाते दासे। दासस्य धीवरस्या पत्यं ढक्। व्यासजनन्यां स्त्री०।

दासेर पु० दास-एरक्। उष्ट्रे। दास्या अपत्यं ढक्। दासीपुत्रे दासे। स्वार्थे कन्। अत्रैवार्थे।

दाह पु० दह-घञ्। भस्मीकरणे, गात्रादिसन्तापे च।

दाहक पु० दह-ण्वुल्। चित्रकवृक्षे, रक्तचित्रके च। दाहकर्त्तरि त्रि०। स्त्रियां दाहिका।

दाहहरण न० दाहो ह्रियतेऽनेन ल्युट् णिच्-कर्त्तरि ल्यु वा। वीरणमूले (वेणार मूल)। दाहहारके त्रि०।

दिक्कर पु० दिशं कीर्य्यतेऽसौ कृ-अण्। तरुणे। युवत्यां स्त्री०।

दिक्पति पु० ईत०। दिशामधीश्वरेषु "इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत्। कुबेर ईशः पतयः पूर्वादीनां मघोश्वरा" इत्युक्तेषु इन्द्रादिषु "सूर्य्यः शुक्रः क्षमापुत्रः सैंहिकेयः शनिः शशी।

सौम्यस्त्विदृशमन्त्री च पूर्वादीना मधीश्वरा" इत्युक्तेषु सूर्यादिषु च। "पवनो दिक्पतिर्भूमिरिति मन्त्रः। एवं दिक्पालादयोऽपि इन्द्रादिष्वेव।

दिगम्बर पु० दिक् स्यन्यमेवाम्बरं यस्य। शिवे, क्षपणकभेदे, "दिगम्बरा मध्यमत्वमाङ्गरापादमस्तकम्। चैतन्यस्यापि संदृष्टे रा नखाग्रमृतेरपी"त्युक्तो जीवस्य देहपरिमाणाङ्गीकारके, बौद्धभेदे च। नग्ने त्रि०। कालिकायां स्त्री० ङीप्। दिशामम्बरमिवावरकत्वात्। तमसि न०।

दिग्गज पु० ६त०। ऐरावतः पुण्डरीकः वामनः कुमुदोऽञ्जनः पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजा"इत्युक्तेषु पूर्वादिदिक्षु भूमिधारणाय स्थितेषु ऐरावतादिषु गजेषु।

दिग्ध पु० दिह—क्त। विषाक्तबाणे, यक्षौ, च। भावे क्त। स्नेहे, लेपने च न०। कर्मणि क्त। लिप्ते त्रि०।

दिङ्मात्र न० दिशोरीतेर्मात्रा अंशः। एकदेशे। ई० स्वल्पमात्रे त्रि०

दिति(ती) स्त्री० दो—अवखण्डने क्तिच् वा ङीप्। दैत्यमातरि कश्यपपत्न्याम्। भावे क्तिन् न ङीप्। खण्डने।

दितिज पु० दितेर्जायते जन—ड। असुरे। दितिसुतादयोऽप्यत्र।

दिधिषु(पू) पु० दिधिषूमात्मन इच्छति क्यच्—क्विप् ष्टु० वा ह्रस्वः। द्विरूढायाः स्त्रियाः स्वामिनि।

दिधिषू स्त्री० दधाति पाणिं धिष्यते वा धा—धिष—वा ऊ नि०, दिधिं धैर्यं स्यति सो—ऊवा षत्वम्। द्विरूढायां स्त्रियां पुनर्भूस्त्रियाम्, "ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा। सा चाप्येदिधिषूर्ज्ञेया पूर्वा तु दिधिषूः"स्मृतेत्युक्तायां ज्येष्ठायामनूढायां सत्यामूढायां कनिष्ठनगिन्यां च।

दिधिषूपति पु० ६त०। "भ्रातुर्मृतस्य भार्यायां योनुरज्येत कामतः धर्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपति"रित्युक्तौ पुनर्भूपतौ। ज्येष्ठाविवाहाभावे ऊढायाः कनिष्ठाया अगिन्याः पत्यौ च।

दिन पु० द्यति तमः। सूर्यकिरणोपलक्षिते षष्टिदण्डात्मके तद्विशिष्टे

या चतुर्यामात्मके काले। तच्च मनुष्याणां षष्टिदण्डात्मकम्, पितृणाम्, गौणचान्द्रमासात्मकं तेषां हि चन्द्रलोकोपरिस्थितेः कृष्णाष्टमीतएव सूर्य्यस्य तल्लोके किरणसर्यसम्भवः शुक्लाष्टम्यां पुनर्भूष्टत्तेर्नाच्छादनाच्च न तत्सम्पर्कः। देवानामसुराणाञ्च सौरवर्षकालात्मकं तदुविस्तरस्तु वाचस्पत्ये। ब्रह्मणो दिव्यमानेन युगसहस्रकल्पकालात्मकमिति विवेकः। [यज्ञ वा। सूर्य्ये।

दिनकर पु० दिनं करोति खोदयेन क्र—टक्, दिने—करः किरणो

दिनक्षय पु० "एकर्क्षन्तु सावने स्वर्क्षतिथीनां त्रितयं यदा तदा दिनक्षयः प्रोक्त" इत्युक्ते एकसावनदिनवृत्तितिथि त्रयरूपे काले।

दिनपति पु० ६त०। सूर्य्ये, अर्कवृक्षे च। दिनेशादयोऽप्यत्र।

दिनमणि पु० दिने मणिरिव प्रकाशकत्वात्। सूर्य्ये, अर्कवृक्षे च।

दिन्भ संघाते चु० आत्म०अक० सेट्। दिम्भयते अदिदिम्भत।

दिनादि पु० ६त०। प्रातः काले।

दिनान्त पु० ६त०। दिवावसाने सायं काले। [दिम्भत् त।

दिभ प्रेरणे चुरा० उभ० सक० सेट् इदित्। दिम्भयति—ते अदिदिम्भ संघाते चुरा० उभ० सक० सेट्। दिम्भयति ते अदिदिम्भत्—त।

दिलीप पु० सूर्य्यवंश्ये नृपभेदे रघोः पितरि।

दिव प्रीतौ भ्वा० पर० सक० सेट् इदित्। दिव्यति अदिव्दीत्।

दिव जिगीषायां पणे व्यवहारे इच्छायां आशायाञ्च दिवा० पर० अक० सक० च सेट्। दीव्यति अदेवीत्। देवित्वा द्यूत्वा।

दिव कूजने चु० आत्म० सक० सेट्। देवयते अदिदेवत।

दिव अर्हे चु० उभ० सक० सेट्। देवयति ते अदीदिवत् त।

दिव् स्त्री० दिव—डिवि। स्वर्गे, आकाशे च। [वसे, वने च।

दिव न० दिव—क। स्वर्गे, "दिवौकस" इत्यत्रादन्तता। आकाशे, दि०

दिवस पु० दीव्यन्त्यत्र दिव—असच् किच्च। "नाडीषष्टिसमैस्तत्र सावनो दिवसः स्मृतः। त्रिंशभागोऽर्कराशेस्तु दिवसः सौर उच्यते। चान्द्रस्तु तिथ्यवच्छिन्नो भौमो भूपरिवर्त्तत" इत्युक्तेषु सावनादिषु दिनेषु।

दिवसमुख न० ६त० । प्रभाते ।

दिवस्पति पु० ६त० असुक् स० सत्वञ्च । इन्द्रे ।

दिवस्पृथिवी स्त्री० द्वि० व० । दिवञ्च पृथिवी च इ० द्वन्द्व० । स्वर्ग-मर्त्ययोः भूमिस्वर्गयोः रोदस्योः ।

दिवा अव्य० दिव—डा । दिवसे ।

दिवाकीर्त्ति पु० दिवैव कीर्त्तिः ज्ञात्यं यस्य रात्रौ तुरकर्मनिषेधात् । नापिते [पङ्कजानां दिवाकीर्त्तिनीशि"ति भट्टिः ।

दिवातन त्रि० दिवा भवः ट्यु ट्युट् च । दिवाभवे । स्त्रियां ङीप् ।

दिवान्ध पु० दिवा दिने अन्धः दर्शनाभावात् । पेचकादौ "दिवान्धाः प्राणिनः केचि"दिति चक्रपाणी । [शिवान्धकारणि"ति कुमारः ।

दिवाभीत पु० दिवा दिवसे भीतः । चौरे, चन्द्रे, पेचके च । 'दिवाभीत-

दिवि पु० दिव कि । चाषपक्षिणि ।

दिविज पु० दिवि जायते जन—ड ह्रस्व० असुक् स० । स्वर्गीये दिक्षिकादयोऽप्यत्र । [क्षादयोऽप्यत्र ।

दिविषद् पु० दिवि सीदति क्विप् सुपमादि० सत्वम् । देवे दिवि-

दिवौ(वौ)कस्(स) पु० दिवि दिवम् वा ओकस् यस्य ब० अदन्तत्वम् । देवे । "तारकेव दिवौकस"इति कुमारः ।

दिवोदास पु० चन्द्रवंशीये काशिराजे नृपभेदे ।

दिव्य न० दिवि भवं यत् । स्वर्गे चन्दने, शुक्लवर्णे, अलौकिक प्रमाणभेदे गुग्गुलौ, तन्त्रोक्ते भावभेदे च । नायकभेदे पु० । दीव्यतेऽनेन दिव—क्यप् । मनोहरे द्योतनात्मके च त्रि० ।

दिव्यगन्ध पु० दिव्यो मनोहरो गन्धोऽस्य । गन्धके । स्वर्गे न० । लक्ष्मीलतायां स्त्री० । कर्म० । उत्तमगन्धे पु० ।

दिव्यगायन पु० कर्म० । गन्धर्वे ।

दिव्यतेजस् स्त्री० दिव्यं तेजो यस्याः । ब्राह्मीलतायाम् ।

दिव्यदोहद न० "यत् दीयते तु देवेभ्यो मनोराज्यस्य सिद्धये । उप-

यावितर्कं दिव्यदोहदं तद्विदुर्बुधा" इत्युक्ते अभीष्टसिद्धये देवेभ्यो देये द्रव्ये ।

दिव्यपुष्प पु० दिव्यं पुष्पमस्य । करवीरे । महाद्रोण्यां स्त्री० ।

दिव्यलता स्त्री० कर्म० । मूर्व्वालतायाम् ।

दिव्यसार पु० दिव्यः सारो यस्य । शालवृक्षे ।

दिव्या स्त्री० दीव्यतेऽनेन दिव—क्यप् । बन्ध्याकर्कोट्यां शतावर्य्याम्, महाभेदायां, ब्राह्मण्याम्, श्वेतदूर्व्वायां, श्वेतजीरके, हरितक्यां च ।

दिव्योदक न० कर्म० । मेघजले ।

दिव्योपपादुक पु० उपपद्यते मातृपित्रादिदुष्कारणमनपेक्ष्यैव अदृष्टसहकृतेभ्य एव उत्पद्यते उप+पद—ण्वुल् पिशाचादिव्यावृत्तये दिव्य इति विशेषणं तेषाञ्च मातृपित्रादिदुष्कारणापेक्षाभावेऽपि दिव्यत्वाभावान्न तथात्वम् । देवे ।

दिव्यौषधि स्त्री० कर्म० । अनन्तमूलायाम् ।

दिश दाने आज्ञापने च तु० उभ०सक० अनिट् । दिशति अदिशत ।

दि(ग्)शा स्त्री० दिश्—क्विप् वा टाप् । आशायाम् ककुभि ।

दिश्य त्रि० दिशि भवं दिग्भ्य उपनीतं वा यत् । दिग्भवे, दिग्भ्य उपनीते च । [पु० । उपदिष्टे त्रि० ।

दिष्ट न० दिश—क्त । भाग्ये "न दिष्टमिष्टं कुरुते" इति भाषः । काले

दिष्टान्त पु० दिष्टस्य भाग्यस्यान्तः । भाग्यस्यान्तोपलब्धिते मरणे ।

दिष्ट्या अव्य० दिश—यक् अन्नादि नि० । मङ्गले, हर्षे, भाग्ये—नेत्यर्थे च । [अधिक्षत—अदिग्ध ।

दिह लेपने अदा० उभ० सक० अनिट् । देग्धि दिग्धे अधिक्षत्

दी क्षये दि० आत्म० अ० अनिट् । दीयते अदात्त । दित्ये । दीनः ।

दीक्ष मौण्ड्ये, यागे, उपनयने, नियमव्रतयोरादेशे च भ्वा०आ०सक० सेट् । दीक्षते अदीक्षिष्ट ।

दीक्षणीया स्त्री० दीक्ष—अनीयर् । सोमसाध्ये यज्ञभेदे ।

दीक्षा स्त्री० दीक्ष—अ । नियमे, संस्कारे "विधाद्दीक्षां निरवर्त्तय-दृषुरि"ति रघुः । "दीयते विमलं ज्ञानं क्षीयते कर्मवासना

तेन दीक्षितेति सा प्रोक्ते"ति तन्त्रोक्ते अभीष्टप्रदमन्त्रसंस्कारे, तदुपदेशे, यागे, च ।

दीक्षागुरु पु० दीक्षायां गुरुरुपदेष्टा । मन्त्रादेरुपदेष्टरि ।

दीक्षान्त पु० दीक्षायाः प्रधानयागस्य अन्तः अन्तोपलक्षितः तत्समापको यागभेदः । अवभृथरूपे यागभेदे ।

दीक्षित त्रि० दीक्ष-क्त । सोमयागादौ संकल्पं विधाय धृतनियमे । दीक्षा तन्त्रोक्ता संजाताऽस्य इतच् । तान्त्रिकदीक्षावति ।

दीदिवि पु० दिव-किनु अभ्यासोदीर्घश्च । इन्द्रस्तौ । अग्नौ पु०न० । उद्दिते त्रि० ।

दीधिति स्त्री० दिधी-क्तिन् यङादित्वादिट् इकारलोपश्च । किरणे ।

दीधी देवने दीप्तौ च अदा० जुहो० आत्म० अक० सेट् । दीधीते अदीधिष्ट । [भ्रूधिकायां स्त्री० ।

दीन त्रि० दी-क्त तस्य नः । दुःखिते, भीते च । तगरपुष्पे न० ।

दीनार पु० दी-आरक् नुट् च । स्वर्णभूषणे, मुद्रायां, सुवर्णकर्षद्वये, निष्कमाने, द्वात्रिंशद्वृत्तिकापरिमितकाञ्चने च ।

दीप दीप्तौ दि० आत्म० अक० सेट् । दीप्यते-अदीपि-अदीपिष्ट । दीप्तः । णिच् अदीदिपत् त अदिदीपत् त ।

दीप पु०दीप-क । प्रदीपे तैलादिस्नेहयोगेन वर्त्तिकादाहकशिखान्विते

दीपक पु० दीप+स्वार्थे कन् । प्रदीपे, श्येनपक्षिणि, रागभेदे च । कुङ्कुमे अर्थालङ्कारभेदे च न० । दीपयति णिच् ण्वुल् । यमान्याम्, स्त्री० । काव्यप्रकाशके, कुशले च त्रि० । स्त्रियां टाप् अत इत्त्वम् । ग्रन्थप्रभेदे ।

दीपन पु० दीपयति भक्षणात् जठराग्निसुत्तेजयति दीप-णिच् ल्यु । पलाण्डौ, काशमर्दने, मयूरशिखायां धान्यिकायाके, तगरमूले, कुङ्कुमे च । दीपनकर्त्तरि त्रि० । पाठायां, मेथिकायां, तालीशे च स्त्री० ङीप् ।

दीपपुष्प पु० दीप इव पुष्पमस्य । चम्पकवृक्षे ।

दीपमालिका स्त्री० दीपानां माला ह्रस्वात् कप् अत इत्त्वम् । दीपान्वितायामावस्यायाम् । ईत० । दीपसमूहे ।

दीपवृक्ष पु० स्वार्थे कन् दीपस्याधारो वृक्षः । (पितलसुच) दीपाधारे तैजसे काष्ठादिनिर्म्मिते वा पदार्थे । [चाम्पिलस्यामावस्यायाम् ।

दीपान्विता स्त्री० दीपैरन्विता । सौभाग्यचान्द्रेच कार्त्तिकस्य, लक्ष्मीचान्द्रे-

दीप्त पु० दीप–क्त । विद्युति, सिंहे च । स्वर्णे क्लिन्नुनि च न० । ज्वलिते, दग्धे भासिते, दीप्तिमति च त्रि० । काकलिकायाम्, अग्निशिखौषधौ, ज्योतिष्मत्यान्च स्त्री० टाप् ।

दीप्तजिह्वा स्त्री० दीप्ता ज्वलनी जिह्वा यस्याः । उल्कासुख्यां मृगालीभेदे तस्या हि रात्रौ जिह्वाज्वलतीति प्रसिद्धिः ।

दीप्ताग्नि पु० दीप्तः अग्निर्जठराग्नो यस्य । अगस्त्ये । तीक्ष्णजठराग्निमति त्रि० ।

दीप्ति स्त्री० दीप–क्तिन् । कान्तौ, "कान्तिरेव वयोभोगदेशकालगुणादिभिः । उद्दीपिताऽतिविस्तारं प्राप्ता दीप्तिरिहोच्यते" इत्युक्तौ स्त्रीणां गुणभेदे ।

दीप्तिक स्त्री० दीप्ता कायति कै–क । दुग्धपाषाणवृक्षे ।

दीप्य पु० दीप–यत् । जीरके श्वेतजीरके न० । दीपने साधुर्यत् । यमाज्यां पु० स्त्री० । [स्वरवर्णे च । आयते त्रि० ।

दीर्घ पु० दृ–घञ् धस्य नेत्त्वम् । शालतालवृक्षे, उष्ट्रे, हिमालये

दीर्घकक्षा स्त्री० दीर्घः कक्षो लेखो यस्याः । श्वेते जीरके ।

दीर्घकण्टक पु० दीर्घः कण्टको यस्य । वर्बुरे (बाबला) ।

दीर्घकण्ठ पु० दीर्घः कण्ठो यस्य । वके । आयतकण्ठमात्रे त्रि० ।

दीर्घकन्द न० कर्म० मूलके । दीर्घः कन्दो यस्याः कप् अत इत्त्वम् । मूषल्यामू स्त्री० । [तत्रैवार्थे ।

दीर्घकील पु० दीर्घः कीलो यत्र । अखोटके । स्वार्थे कन् ।

दीर्घकोषिका स्त्री० दीर्घः कोषो यस्याः कप् अत इत्त्वम् । (झिनुक) दुर्णामायाम् । तालव्यमध्योऽपि ।

दीर्घग्रन्थि पु० दीर्घो ग्रन्थिः पर्व यस्य । गजपिप्पल्याम् ।

दीर्घग्रीव पु० दीर्घा ग्रीवा यस्य । उष्ट्रे, मीलकौञ्चे च ।
दीर्घच्छद पु० दीर्घाश्छदा यस्य । वृक्षे ।
दीर्घजङ्घ पु० दीर्घा जङ्घा यस्य । उष्ट्रे, वके च ।
दीर्घजिह्व पु० दीर्घा जिह्वा यस्य । सर्पे ।
दीर्घतरु पु० कर्म० । तालवृक्षे । [क्षा स्त्री० ङीप् ।
दीर्घदण्ड पु० दीर्घो दण्ड इव काष्ठेन । एरण्डवृक्षे । गोर-
दीर्घदर्शिन् पु० दीर्घात् पश्यति दृश-णिनि । दूरदर्शिनि पण्डिते,
भल्लूके च । आगामिकार्य्यज्ञे, दूरदर्शिमात्रे त्रि० ।
दीर्घदृष्टि पु० दीर्घा दृष्टिरस्य । पण्डिते । दीर्घा दूरगा दृष्टिर्यया
इव० । दूरवीक्षणे यन्त्रभेदे । [न णत्वम् । शङ्के ।
दीर्घनाद पु० दीर्घा दूरगामित्वात् विस्तीर्णो नादोऽस्य जुम्ना०
दीर्घनिद्रा स्त्री० कर्म० जुम्ना० न णत्वम् । मृत्यौ, बहुकालिकनिद्रा-
याञ्च । "दीर्घनिद्रामवाप्तित" इति रघुः । [लताभेदे ।
दीर्घपटोलिका स्त्री० कुत्सिता पटोली कन् कर्म० । (धुधुल)
दीर्घपत्र पु० दीर्घाणि पत्राण्यस्य । राजपलाण्डौ, विष्णुकन्दे, कु-
रिदर्भे, कुन्दुरे, तालेऽ, कृपीलौ च अल्पजम्बुवृक्षे, गन्धपत्रायाञ्च
स्त्री० टाप् । सज्ञायां कन् अत इत्वम् । क्षतकुशायां, श्वेतपत्रचा-
यान्च । चक्षुष्याके, पलाशीलतायाञ्च स्त्री० ङीप् ।
दीर्घपर्णी स्त्री० दीर्घाणि पर्णान्यस्याः ङीप् । भूम्निपर्ण्यां
(चाकलिया) ।
दीर्घपल्लव पु० दीर्घः पल्लवोऽस्य । शणवृक्षे । कर्म० । दीर्घच्छदे पु०।
न० । दीर्घच्छदयुक्तमात्रे त्रि० ।
दीर्घपादप पु० कर्म० । तालेऽ, पूगे च ।
दीर्घपृष्ठ पु० दीर्घं पृष्ठमस्य । सर्पे ।
दीर्घफल पु०दीर्घाणि फलान्यस्य । आरग्वधे (सोनाल) संज्ञायां कन् ।
अगस्त्यवृक्षे पु० । कपिलद्राक्षायां, जतुकायाञ्च स्त्री० ।
दीर्घमूल पु० दीर्घं मूलं यस्य । मोरटालतायां, बिल्वभेदे च । वीरणे
न० । कर्म० । संज्ञायां कन् । मूलके । श्यामालतायां स्त्री०

टाप्। दुरालभायां स्त्री० ङीप्। [रिङ्गायाम्।
दीर्घराग पु० दीर्घो बहुकालस्थायी रागो रञ्जनं यस्याः। ब०
दीर्घरात्र न० कर्म०। दीर्घायां रात्रौ। ७त० बहुरात्रि युक्ते चिरकाले।
दीर्घरोमन् पु० दीर्घाणि रोमाण्यस्य। भल्लूके।
दीर्घवल्ली स्त्री० कर्म०। पलाश्यां, पातालगरुड़ीलतायां, माषेन्द्र वा रुणयाम्, आयनायां लतायाञ्च।
दीर्घवृन्त पु० दीर्घं वृन्तमस्य। म्योनाके वृक्षे। स्वार्थे कन्। तत्रार्थे। चन्द्रचिर्भट्यां स्त्री० टाप्। संज्ञायां कन् अत इत्त्वम्। एलापर्ण्यां स्त्री०।
दीर्घशाख पु० दीर्घा शाखा यस्य। शालवृक्षे। संज्ञायां कन् अत इत्त्वम्। एलापर्ण्यां स्त्री० टाप्। [राजाम्रे।
दीर्घशूक पु० दीर्घः शूकोऽग्रमस्य। शालिभेदे। संज्ञायां कन्।
दीर्घसत्र न० कर्म०। दीर्घकालिके यज्ञभेदे ६ ब०। तत्कर्तरि त्रि० "कृविषे दीर्घसत्रस्य साचेदानीं प्रचेतस" इति रघुः।
दीर्घसूत्र त्रि० दीर्घेण चिरकालेन सूत्रमीप्सितकर्म्म यस्य। चिरकालेन प्रारब्धकर्मान्तकर्तरि। कर्म०। आयतन्तौ न०।
दीर्घस्कन्ध पु० दीर्घः स्कन्धः काण्डोऽस्य। तालवृक्षे।
दीर्घायुष्य पु० दीर्घमायुष्यं यस्य श्वेतमन्दारकवृक्षे, मार्कण्डेये च।
दीर्घायुस् पु० दीर्घम् आयुर्जीवनकालोऽस्य। काके, शालमलिवृक्षे च।
दीर्घिका स्त्री० दीर्घैव विस्तारमपेक्ष्य आयतैव। जलाशयभेदे अस्या लक्षणं तड़ागशब्दे द्रष्टव्यम्।
दीर्ण स्त्री० दृ-क्त। विदारिते, भीतेच भावे क्त। विदारे, भये च न०।
दु गतौ भ्वा० पर० सक० अनिट्। द्वति अदौषीत् केचित्तु वेडयमिच्छन्तेन अदावीदित्यपि। [दूनः। दवथुः।
दु उपतापने भ्वा० पर० सक० वेट्। दुनोति अदावीत् अदौषीत्
दुःख दुःखकरणे अद० चुरा० उभ० सक० सेट्। दुःखयति ते अदुदुःखत् त।

वर्त्तमध्ये "प्राणिनां जायते हर्षो दुन्दुभौ वरवर्णिनी" त्युक्तलक्षणे वस्त्रभेदे च । पाणौ स्त्री० ।

दुर(स्) अव्य० दुष्टं किरति क्विप् सुक् वा । दुष्टे निन्द्यायां, निषेधे, दुःखे च ।

दुरक्ष पु० दुष्टोऽक्षः प्रा० । कपटपाशके । दुष्टोऽक्षो यत्र । द्यूते

दुरत्यय त्रि० दुःखेनात्ययते दुर्+अति–इ–खल् । दुरतिक्रमणीये, दुस्तरे च ।

दुरदृष्ट न० दुष्टमदृष्टं प्रा० । दुर्भाग्ये पापे । दुर्गमे, दुर्ज्ञेये च ।

दुरधिगम त्रि० दुःखेनाधिगम्यते दुर् अधि–गम–खल् । दुरापे ।

दुरध्व पु० दुष्टोऽध्वा प्रा० अच् दुष्टवर्त्मनि ।

दुरन्त त्रि० दुष्टोऽन्तोऽवसानं यस्य । मृगयाद्यूतपानादिषु व्यसनेषु तानि हि प्रथमं सुखयित्वा अन्ते दुःखयन्ति । दुष्टोऽन्तः परिच्छेदो यस्य । दुर्ज्ञेये, गभीरे च ।

दुरभिग्रह पु०दुःखेनाभिगृह्यतेऽसौ गृहेतेर्वा खल् । अपामार्गे दुःखेन ग्राह्ये त्रि० । दुरालभायां, कपिकच्छायाञ्च स्त्री० ।

दुराग्रह पु० दुष्ट आग्रहः निर्बन्धः । युक्तिरहितेऽभिनिवेशे, ई ब० । तद्युक्ते त्रि० ।

दुराचार पु० दुष्ट आचारः प्रा० । विरुद्धाचरणे । ई ब० । तदाचारयति त्रि० । "अपि चेत् सुदुराचारः" इति गीता ।

दुरात्मन् त्रि० दुष्ट आत्मा चित्तं यस्य । दुष्टचित्ते जने ।

दुराधर्ष पु० दुष्टान् राक्षसान् आधर्षयति अच् । श्वेतसर्षपे तत्तेलपथ्यो हि वेतालादीनामपसर्पणं स्मृतौ दर्शितम् । दुःखेन दूषयितुमशक्यम् दुर्+आ+धृष–खल् । धर्षयितुमशक्ये त्रि० । कटुतुम्बिनीवृक्षे स्त्री० ।

दुरारुह पु० दुःखेनारुह्यतेऽसौ दुर्+आ+रुह–बाहुलकात् कर्मणि क । बिल्वे, नारिकेले च खर्ज्जूर्यां स्त्री० ।

दुरारोह पु० दुःखेनारुह्यते दुर्+आ+रुह–खल् । शाल्मलिवृक्षे । श्रीवल्लयां स्त्री० । दुरारोहमात्रे त्रि० ।

दुःख न० दुःख–अच्–घञ् वा प्रतिकूलवेदनीये चित्तधर्मभेदे, न्यायमते आत्मधर्मभेदे, पीड़ायां, कष्टे च। दुःखसाधने पदार्थे, तद्वति च त्रि०। [दुःखानां त्रितये]

दुःखत्रय न० द्वि त०। आध्यात्मिकाधिदैविकाधिभौतिकरूपे।

दुःशासन पु० दुःखेन शिष्यतेऽसौ शास–खलर्थो युच्। भारत प्रसिद्धे दुर्योधनस्यानन्तरानुजे धृतराष्ट्रसुते।

दुःषमस् अव्य० दुष्टं समयमत्र तिष्ठद्रु० अच्० षत्वम्। गर्हे ई० अषत्वम्। असमञ्जसे त्रि०।

दुःसहा स्त्री० दुःखेन सह्यते दुर्+सह–खञ्। नागदमन्याम्।

दुःस्थ त्रि० दुःखेन तिष्ठति स्था–क। दीने, मूर्खे, लुब्धे च।

दुःस्थित त्रि० दुर्+स्था–क्त। अनवस्थिते, दुःखेन स्थिते च।

दुःस्पर्श पु० स्त्री० दुःखेन स्पृश्यतेऽसौ दुर् स्पृश–खल्। दुरालभायाम्। लताकरञ्जे पु०। कण्टकार्य्याम्, कपिकच्छ्वाम्, आकाशवल्लीप्राञ्च स्त्री०। दुःस्पर्शवस्तुमात्रे त्रि०।

दुकूल न० दु–ऊलच् कुक् च दुष्टं कूलमिव कूलमावरणे क वा पृ०। क्षौमाम्बरे, श्लक्ष्णवस्त्रे, सूक्ष्मवस्त्रे च।

दुग्ध न० दुह–क्त। पयसि क्षीरे, स्त्रीजातिस्तननिष्यन्दिद्रव द्रव्ये। कर्मणि क्त। क्षतदोहायां धेन्वादौ स्त्री०। प्रपूरिते त्रि०। भावे क्त। दोहने न०।

दुग्धपाषाण पु० दुग्धं निर्यासः पाषाणइव यस्य। (शिरगोला) ख्याते वृक्षभेदे। स्वार्थे कन्। अत्रैवार्थे।

दुग्धिका स्त्री० दुग्धं क्षीरमिव निर्यासोऽस्यस्याः ठन्। (दुधि) (क्षीरा) इति ख्याते वृक्षभेदे।

दुग्धी स्त्री० दुग्धमिव निर्यासोऽस्यस्य अर्शआद्यच् गौ० ङीष्। दुग्धिकायाम् (दुधि)।

दुद्रुभ पु० दुष्टो द्रुमः पृ०। हरितपत्रे पलाशवृक्षे।

दुन्दुभि पु० दुन्दु इति शब्देन उभति पूरयति उभ–क शकं०। वृहद्ढक्कायां, भेर्य्यां, वरुणे, दैत्यभेदे, राक्षसभेदे, विषे, ई०

दुरालभा(भ्या) स्त्री० दुःखेनालभ्यते स्पृश्यते असौ दुर्+आ+लभ–खल् वा सुम् । (आलकुशी) खताकाम् ।

दुरालाप पु० दुष्ट आलापः प्रा० । दुष्टवचनकथने ग्लानिप्रकाशे च । ई० । तद्वति त्रि० ।

दुरासद त्रि० दुःखेनासद्यते गम्यतेऽसौ दुर्+आ+सद–खल् । दुर्गम्ये दुर्धर्षे च स बभूव दुरासद" इति रघुः ।

दुरित न० दुष्टमितं गमनं नरकादिस्थानप्राप्तिरनेन । पापे ।

दुरुत्तर न० दुष्टमुत्तरम् । पापे । [दुर्निवारे ।

दुरुच्छेद त्रि० दुःखेन उच्छिद्यतेऽसौ दुर्+उद्+छिद–खल् ।

दुरुत्तर त्रि० दुःखेन उत्तीर्यते दुर्+उद्+तॄ–खल् । दुस्तरे दुष्टमुत्तरम् प्रा० । दुष्टे उत्तरे न० ।

दुरूह त्रि० दुःखेन ऊह्यते वितर्क्यते ऊह–खल् । दुर्विज्ञेये ।

दुरोदर पु० दुष्टम् समन्तादुदरमस्य । द्यूतकारे, पणे, अक्षे च । द्यूते न० । "दुरोदरच्छद्मजितामि"ति भारविः ।

दुर्ग पु० दुःखेन गम्यतेऽसौ कर्मणि ड । असुरभेदे, तद्वधार्थं देव्यां स्त्री० । "ततश्च वधिष्यामि दुर्गमाख्यं महासुरम् दुर्गादेवीति विख्यातमिति चण्डी । अपराजितायां, नीलख्यात्रे । गुल्मौ पु० । दुःखेन गच्छत्यत्र दुर्+गम–आधारे ड । पर्वतादिभिर्दुर्गमे पुरे, कोट्टे (किल्ला) (गढ़) ख्याते न० । दुर्गमदेशे, उच्छ्रिते, दुःखेन सम्पाद्ये च त्रि० । कामक्रोधादिदुःखेन दुस्तरे संसारे न० ।

दुर्गत त्रि० दुर्गच्छति दुर्+गम+क्त । हरिद्रे दोषगते च ।

दुर्गति स्त्री० दुर्+गम–क्तिन् । नरके, दारिद्र्ये, दुष्टायां गतौ च ।

दुर्गन्ध पु० दुष्टोगन्धः । पूतिगन्धे । ई० । तद्वति त्रि० । पलाण्डौ पु० ।

दुर्गसञ्चय पु० दुर्गे देशे सञ्चरत्यनेन । (सांको) संक्रमे ।

दुर्गानवमी स्त्री० ई० । जगद्धात्रीनामकदुर्गापूजाकालरूपायां कार्त्तिकशुक्लनवम्याम् ।

दुर्जन त्रि० दुष्टो जनो यस्मात् यदाचरत्वेन साधुरपि दुष्यति । खले । दुष्टः जनः प्रा० स० । खले पु० ।

दुर्जर त्रि० जॄ-अङ् जरा दुःखेन जरा जीर्णता यस्य । दुःखेन जीर्यति पदार्थे । ज्योतिष्मतीलतायां स्त्री० ।

दुर्जात न० दुष्टं जातम्, प्रा० । व्यसने, आपदादौ । ईषद० अस-व्यग्जाते अनुचिते च त्रि० । [(झिनुक) ।

दुर्णामा स्त्री० दुष्टं निन्दितं नामास्य ङीप् णत्वम् । दीर्घकोषिकायाम्

दुर्दान्त पु० दुष्टं दान्तं दमनं यत्र । कलहे । दुःखेन दम्यते स्म दम-क्त । अशान्ते बलवति त्रि० ।

दुर्दिन न० दुष्टं दिनं प्रा० । मेघाच्छन्ने दिवसे । दुष्टं खरूपहीनं दिनं यस्मात् ५ब० । मेघान्धकारे, वर्षणे च ।

दुर्दुर पु० दुर्+दृ-खल् । नरकभेदे, कफपीडधौ, मल्लातके दैत्यभेदे च "दुर्दुरं दुर्मुखञ्चैवेति" चण्डी । दुःखेन सत्सुभिर्हृदये धार्य्यते, केनापि न धार्य्यते वा खल् । विष्णौ । दुःखधार्य्ये दुर्द्धर्षे च पदार्थे त्रि० । [कन्यारीदृक्षे च स्त्री० ।

दुर्द्धर्ष त्रि० दुःखेन दृष्यते । अक्षोभ्ये, अप्रधृष्ये च । नागदमन्यां

दुर्बल त्रि० दुष्टं बलं यस्य । बलशून्ये, क्षये, अल्पमांसे च ।

दुर्भग त्रि० दुष्टं भगं भाग्यं यस्य । अल्पभाग्ये । पतिस्नेहशून्या-न्यायां स्त्रियां स्त्री० ।

दुर्भाग्य न० दुष्टं भाग्यं प्रा० । दुरदृष्टे पापे । ईषद० । तद्वति त्रि० ।

दुर्भिक्ष अव्य० भिक्षाया अभावः अर्थाभावेऽव्ययीभावः अदन्तत्वादम् तृतीयासप्तम्योर्वा तेन "दुर्भिक्षे राष्ट्रविप्लवे" इति दुर्भिक्षमल्पभि-त्यादि च सिद्धम् । भिक्षाया अभावे, तदुपलक्षिते काले अल्पा-न्नकाले च ।

दुर्मति त्रि० दुष्टा मतिर्यस्य । विवेकप्रतिबन्धकपापेन कलुषित बुद्धौ जने, ईषद० वर्षमध्ये "भवेद्वै मध्यमा दृष्टिर्दुर्मतौ सस्यसम्पत्ते इत्युक्त-कालरूपे वर्षभेदे पु० । प्रा० स० । दुष्टायां बुद्धौ ।

दुर्मनस् त्रि० दुष्टं चिन्तादिना व्याकुलं मनोऽस्य । विमनस्के । अतावर्थी स्त्री० ।

दुर्मरा स्त्री० दुःखेन म्रियते मृ–अच् । दूर्व्वायाम् ।

दुर्मुख पु० दुष्टं मुखमस्य । अग्नौ, वानरे, नागभेदे, दैत्यभेदे च । अप्रियवादिनि त्रि० । [वर्णचित्ते ।

दुर्मेधस् त्रि० दुष्टा मेधाऽस्य अस्तिच् समा० । मन्दबुद्धौ विवेकाः

दुर्य्योधन पु० दुःखेन युध्यतेऽसौ युध–खलर्थे युच् । धृतराष्ट्रदुष्पतेर्ज्येष्ठपुत्रे नृपभेदे । दुःखेन योध्ये त्रि० ।

दुर्लभ पु० दुर्–लभ–खल् । कर्चूरे । दुष्प्राप्ये त्रि० "मानुष्यं दुर्लभं लोके विद्या तत्र सुदुर्लभे"ति पुराणम् । दुरालभायां, श्वेतकण्टकार्य्यां च स्त्री० ।

दुर्ललित न० दुष्टं ललितम् इष्टम् खल–ईषे क । चन्द्रप्रार्थनादिरूपे अलभ्यविषये आग्रहे । (आवदार) दुस्त्यजे च । "दुष्टं ललितं यस्य । तादृशाग्रहयुक्ते (आवदारे) । दुस्त्यजे च त्रि० ।

दुर्व्व बधे भ्वा० पर० सक० सेट् । दूर्वति अदूर्वीत् । दूर्त्तः ।

दुर्वर्ण न० दुष्टोऽपि वर्ण्यते रज्यतेऽनेन दुष्टं मलिनं वा वर्णयति शुक्लतापादनेन रूपान्तरं करोति । रजके, एलवालुके च । दुष्टवर्णवति मलिने त्रि० ।

दुर्व्वासस् त्रि० दुष्टं वासोऽस्य । मलिनवस्त्रे । अत्रिपुत्रे शङ्करांशजाते मुनिभेदे पु० । [नैघण्टुके खले मूर्खे च ।

दुर्विध त्रि० दुष्टा विधा यस्य । दरिद्रे "विदधाते रुचिरैर्वदुर्विधमि"ति

दुर्हृद् त्रि० दुष्टं हृदयं यस्य यत्नार्थे नित्यं हृदादेशः । शत्रौ । दुष्टचित्ते त्रि० अत्र दुर्हृदयोऽपि ।

दुल उत्क्षेपे चुरा० उभ० सक० सेट् । दोलयति–ते अदूदुलत् ।

दुलि(ली) स्त्री० दुल–इन् नि० णिलुक् वा ङीप् । कमठ्याम् । मुनिभेदे पु० । [इति स्वल्पके महापातकजचिह्नवति ।

दुश्चर्म्मन् पु० दुष्टं चर्म्म यस्य । अप्राह्यतमे क्रे "दुश्चर्मा गुरुतल्पी स्यात्"

दुश्च्यवन पु० दुःखेन च्यवनं पतनं यस्य, दुष्टः क्रुद्धश्च्यवनो मुनिरस्य वा । इन्द्रे, स हि च्यवनेन कदाचित् कोपात् स्वपदात् पातितः ।

दुष वैकृत्ये दिवा० पर० अक० अनिट् । दुष्यति अदुषत् अदुषत् ।

दुष्कर न० दुःखेन कीर्य्यते कृ–खल्। आकाशे। क–खल्। दुःखेन कार्य्ये त्रि०।

दुष्कर्म्मन् न० दुष्टं कर्म्म प्रा० स०। पापे। ई ब०। तद्वति त्रि०।

दुष्कृत न० दुष्टं कृतं कृतिः। पापे। "सुकृतं दुष्कृतं लोके नक्तन्नमनुगच्छती"ति क्तिन् दुष्कृतिरप्यत्र। ई ब०। तद्वति त्रि०।

दुष्ट त्रि० दुष–क्त। दुर्जने, अधमे, दुर्ज्जने, दोषयुक्ते च। (कुड़) कुष्ठे पु०। पुंस्त्वस्त्रीत्वे स्त्री०।

दुष्ठु अव्य० दुर्+स्था–कु षत्वम्। निन्दायां, निकृष्टतायां, दुःस्थाने च।

दुष्पत्र पु० दुष्टानि पत्राण्यस्य। चोरनामगन्धद्रव्ये।

दुष्प्रधर्षणी स्त्री० दुःखेन प्रधृष्यते कर्म्मणि ल्युट्। वार्त्ताकायाम्।

दुष्प्रवेशा स्त्री० दुःखेन प्रवेशो यत्र। कन्यारीष्टभे।

दु(ष्य)ष्मन्त पु० चन्द्रवंशीये राजभेदे भरतराजपितरि शकुन्तलापतौ।

दुह दोहे अदा० उभ० द्विक० अनिट्। दोग्धि दुग्धे। अधुक्षत् अधुक्षत अदुग्ध।

दुह बधे भ्वा० पर० सक० सेट्। दोहति अदुहत्–अदोहीत्।

दुहितृःपति पु० ई तृ० अलुक् स०। जामातरि।

दुहितृ स्त्री० दुह–तृच् गुणाभावः इट् च नि०। सुतायाम्।

दू खेदे दिवा० आत्म० अक० सेट्। दूयते अदूयिष्ट। दूनः।

दूत पु० दु–क्त दीर्घश्च। सन्देशहरे वार्त्ताहरे।

दूति(ती) स्त्री० दू–क्तिच् वा ङीप्। स्त्रीपुंसयोः सन्देशहारिकायां स्त्रियाम्। "रतिदूतिपदे निवेशिते"ति कुमारः।

दूत्य न० दूतस्य दूत्या वा भावः कर्म्म वा यत्। दूतकर्म्मणि दूतस्वभावे च।

दून त्रि० दू–क्त। अध्वगत्यादिना श्रान्ते, सन्तप्ते च "पित्तेन दूने रसने सितापी"ति नैषधम्। [विप्रकृष्टे अगोचरे च।

दूर त्रि० दुःखेनेयते प्राप्यते दुर्+इण्–रक् दूरो लोपश्च।

दूरदर्शन पु० दूरात् पश्यति दृश–युच्। रत्ने।

दूरदर्शिन् पु० दूरात् कार्य्योत्पत्तेः प्राक् पश्यति दृश–णिनि। प्रज्ञिते। दूरात् दर्शके त्रि०।

दूरमूल पु० दूरपर्य्यन्तं मूलमस्य । शुक्लदर्भे (सुज) ।

दूर्व्वा स्त्री० दूर्व–हिंसायां अ । खनामख्याते घासभेदे ।

दूर्व्वाकाण्ड न० दूर्वाणां समूहः काण्डच् । दूर्वासमूहे ।

दूर्व्वाष्टमी स्त्री० भाद्रशुक्लाष्टम्यां तद्दिने दूर्वया देवार्च्चनस्य स्तुतौ विधानात्तथात्वम् । दूर्वामत्र "श्रावणी दौर्गलक्ष्मी दूर्वा चैव शुभाशनीति स्तुतौ तत्रार्थे दूर्वाशब्दप्रयोगात् ।

दूषण पु० रावणस्य मातृष्वस्रेये राक्षसभेदे । दूष–णिच्–ल्युट् । दोषदाने न० । [(विषुटि) ।

दूषिका स्त्री० दूषयति नेत्रं क्लिन्नं करोति दुष–णिच् ण्वुल् । नेत्रमले

दूषित त्रि० दुष–णिच्–क्त । अभिशस्ते, निन्दिते, दत्तदोषे च ।

दूष्य न० दुष–णिच्–यत् । वस्त्रनिर्म्मिते वस्त्रे । दूषणीये त्रि० दूष्यं वचो मम पुनर्निदूषणं विधास्ये"ति शिरोमणिः । कन्यायां राजमध्यबन्धनरज्ज्वाञ्च स्त्री० ।

दृ भये स्वा० पर० सक० अनिट् दृणोति अदार्षीत् ।

दृ आदरे तुदा० आ० सक० अनिट् आङ्पूर्वः । अद्रियते आदृत ।

दृक्प्रसाद स्त्री०दृशं प्रसादयति प्र+सद–णिच् अच् । कज्जल्यां तदञ्जनेन हि दृशः प्रसादो भवति ।

दृढ न० दृह–क्त नि० दृढभावः लौहे रूपककाव्यभेदे, अतिशये, निस्तब्धे च । तनुति, स्थूले, प्रगाढे, बलवति शक्ते, कठिने च त्रि० ।

दृढ़कण्टक पु० दृढ़: कण्टकोऽस्य । (धत्तूरवृक्षे) शुष्ककण्टक युक्ते वृक्षभेदे । [हिज्जले न० ।

दृढ़काण्ड पु० दृढ़: कठिनः काण्डः स्कन्धोऽस्य । बंशवृक्षे दीर्घरो-

दृढ़क्षुरा स्त्री० दृढं क्षुरमिवाग्रं यस्याः । वल्लजातायाम् वृक्षभेदे ।

दृढ़ग्रन्थि पु० दृढ़ो ग्रन्थिः पर्व्वास्य । बंशे ।

दृढ़तृण पु० दृढं कठिनं तृणं कर्म० । शुक्लतृणे । वल्लजायां स्त्री० ।

दृढ़नीर पु० कालेन दृढ़तां प्राप्तं नीरं यस्य । नारिकेले तस्य जलेनैव हि क्रमशः तत्कक्षस्थत्वमुच्यते ।

दृढ़पत्र पु० दृढं पत्रं यस्य । बंधे । वल्लजायां स्त्री० गौरा० ङीष् ।

दृढ़पादा स्त्री० दृढः पादोमूलमस्या ङीप् । (भुइआमला) वृक्षभेदे ।

दृढ़प्ररोह पु० दृढः प्ररोहः अङ्कुरोऽस्य । प्लक्षवृक्षे ।

दृढ़फल पु० दृढानि फलानि यस्य । नारिकेले ।

दृढ़बन्धिनी स्त्री० दृढं बध्नाति यद्वाति स्वाश्रयं णिनि ङ्यामायाम् ।

दृढ़भूमि त्रि० दृढा भूमिरस्य । योगविघ्नैरेव संस्कृतान्तः करणे विषयसुखरागादिना चालयितुमशक्ये चित्ते ।

दृढ़मुष्टि पु० दृढा मुष्टिः यत्र, यस्मात् वा खड्गे तद्वारणे हि मुष्टेर्दृढता । दृढा मुष्टिर्यस्य, यस्मै वा । कृपणे । स हि धनादिकं मुष्टौ विधाय अदत्तया दृढतरं बध्नाति ।

दृढ़मूल पु० दृढं मूलमस्य । मुञ्जतृणे, नारिकेले च ।

दृढ़वल्कल पु० दृढं वल्कलमस्य । पूगवृक्षे । अम्बष्ठायां स्त्री० तत्र दृढत्वात्तथा ।

दृढ़बीज पु० दृढं बीजमस्य । बदरे, चक्रमर्दे, वर्बुरे च ।

दृढ़व्रत त्रि० दृढं व्रतं नियमोऽस्य । आफलोदयं प्रारब्धकार्य्यात्यागिनि ।

दृढ़सन्धि त्रि० दृढः सन्धिः सन्धानं यस्य । निश्छिद्रतया संहते ।

दृढ़सूचिका स्त्री० दृढं सूचं यस्याः स्वार्थे कन् अत इत्त्वम् । मूर्वालतायाम् ।

दृढ़स्कन्ध पु० दृढः स्कन्धोऽस्य । चीरिकावृक्षे ।

दृति स्त्री० दृ्यते इ–क्तिच् । जीरके ।

दृति पु० दृ–क्तिच् । चर्म्मनिर्म्मितोदकपात्रे, चर्म्मनिष्पन्नचर्मयन्त्रे (भिस्ति) मत्स्यभेदे च ।

दृतिहर पु० दृतिं चर्मपात्रं हरति हृ–अच् । कुक्कुरे ।

दृन्फ क्लेशे तु० पर० अक० सेट् । दृफति अदृम्फीत् ।

दृन्भ पु० दृभ–ञ नि० । दृप्ते, दक्षे, दृब्धे, दर्पे, चक्रे च ।

दृप वाधने तु० पर० सक० सेट् । दृपति अदर्पीत् ।

दृप सन्दीपने वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् । दृपयति ते दर्पति । अदीदृपत्–त अददर्पत्–त अदर्पीत् ।

दृप हर्षे गर्वे च दिवा० पर० अक० सेट्। दृप्यति अदृपत् अदर्पीत् दर्पित्वा दृप्त्वा। दृप्तः। [चरान्" इति रामकवचम्।

दृप्त त्रि० दृप-क्त। गर्वते "वरदृप्तान् जघानैव रावणादिनिशा-

दृफ क्लेशे तु० उ० पर० अक० सेट्। दृम्फति अदृर्फीत्।

दृब्ध त्रि० दृभ-क्त। खचिते, भीते च।

दृभ यत्ने वा चुरा० उभ० पक्षे तु० पर० सक० सेट्। दर्भयति ते दृभंत अदीदृभत् त अददर्भत् त अदर्भीत्।

दृभ भये वा चुरा० उभ० पक्षे भ्वा० पर० अक० सेट्। दर्भयति ते दर्भति। अदीदृभत् अददर्भत् त। अदर्भीत्।

दृम्प राशीकरणे चुरा० उभ० सक० सेट्। दृम्पयति ते अदृदम्पत्-त।

दृश चाक्षुषज्ञाने भ्वा० पर० सक० अनिट्। पश्यति अदर्शत्-अद्राक्षीत्।

दृग्(ग्रा) स्त्री० दृश-सम्प्र० भावे क्विप् वा टाप्। दर्शने ज्ञाने। करणे क्विप्। नेत्रे, द्वित्वसंख्यायाञ्च। कर्त्तरि क्विप्। साक्षिणि, द्रष्टरि ज्ञातरि च त्रि०।

दृग्(ष)द् स्त्री० दृ-विदारे अदि क्विप् (गुक्) वा ह्रस्वः। पाषाणे निष्पेषणशिलायाञ्च (शिल)। [त्यो" रिति मनुः।

दृग्(ष)दती स्त्री० दृषद्+मतुप् मस्य वः। नदीभेदे "वरत्वती दृषद्-

दृष्ट न० दृश-क्त। स्वपरचक्रभये। वीक्षिते, लौकिके च त्रि०।

दृष्टरजस् स्त्री० दृष्टं रजो यया। प्रौढ़ायां स्त्रियाम्।

दृष्टान्त पु० दृष्टोऽन्तो नाशोऽवसानं परिच्छेदश्च यस्मिन्। भरणे, शास्त्रे, प्रतिपाद्यप्रतिपादकयोः बुद्धिमास्थविषयरूपे उदाहरणे, यथा यो धूमवान् स वह्निमान् यथा पाकस्थानमित्यादौ धूमवह्निमत्त्वयोर्व्याप्तौ पाकस्थानमुदाहरणम् अलङ्कारोक्ते अर्थालङ्कारभेदे च।

दृष्टि स्त्री० दृश-भावे क्तिन्। दर्शने, बुद्धौ च। करणे क्तिन्। नेत्रे, द्वित्वसंख्यायां "चक्षुर्जन्यमनोवृत्तिर्विद्वद्भा रूपभासिका दृष्टिरि-त्युच्यते" इत्युक्तायां मनोवृत्तौ च।

दृष्टिविष पु० दृष्टौ विषं यस्य। सर्पभेदे। [ढंहति अदृंहीत्।

दृंह दृढ़ौ भ्वा० पर० अक० सेट्। दर्हति अदर्हीत् अयमिदित् तत्

दृ भये भ्वा० पर० सक० सेट् घटा० । दरति अदारीत् णिच् दरयति ।

दृ विदारे दिवा० क्रया० च पु० पर० सक० सेट् । दीर्य्यति दृणाति । अदारीत् ।

दृ भये क्रया० पु० पर० अक० सेट् । दृणाति अदारीत् ।

दे पालने भ्वा० आत्म० सक० अनिट् । दयते अदात्त ।

देव क्रीड़ने भ्वा० आत्म० अक० सेट् । देवते अदेविष्ट ।

देव पु० दिव–घञ्वा वृ । अमरे । द्योतनात्मके आत्मनि "दीव्यति क्रीड़ते यस्माद्द्योतते द्योतते दिवि । तस्माद्देव इति प्रोक्तः स्तूयते सर्वदेवते"रित्युक्ते परमेश्वरे ब्राह्मणक्षोधौ च इन्द्रिये न० । पूज्ये त्रि० । नाक्षोक्षौ राजनि पु० ।

देवक पु० श्रीकृष्णस्य मातामहे देवक्याः पितरि उग्रसेने ।

दे(दै)वकी स्त्री० देवकस्य अपत्यं देवक+अण् ङीप् । यौगे वेकमपीति वहु ङीप् । श्रीकृष्णस्य मातरि वसुदेवस्य भार्य्यायाम् अपत्यार्थे ऽण् दैवकीति तत्रैव ।

दे(दै)वकीनन्दन पु० ई त० श्रीकृष्णे वसुदेवात्मजे दे(दै)वकीसुतादयोऽप्यत्र ।

देवकुसुम न० देवानां प्रियं योग्यं वा कुसुमम् शाक० । लवङ्गे ।

देवखात न० देवेन खातं खन–क्त । अकृत्रिमे जलाशये । ७त० देवसम्बन्धिनि खाते च ।

देवखातविल न० देवेन खातं विदारितं विलम् । गुहायाम् ।

देवगायन पु० ई त० । गन्धर्वे ।

देवगिरि पु० देवानां प्रियः गिरिः । पर्वतभेदे ।

देवगुरु पु० ई त० । वृहस्पतौ ।

देवच्छन्द पु० देवं स्वच्छन्दते प्रार्थ्यते छन्द कर्मणि घञ् । मृतयष्टिके स्तारे ।

देवजग्धक न० देवैरद्यते खा अद–क्त जग्धादेशः स्वार्थे कन् । शस्त्रतृणे, गन्धतृणे च । [दृक्षेषु ।

देवतरु पु० ई त० । मन्दारपारिजातसन्तानकल्पवृक्षहरिचन्दनेषु पञ्चसु

देवता स्त्री० देव+स्वार्थे तल् "क्वचित् स्वार्थिका अपि प्रत्यया: प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते" इति भाष्योक्तेः स्त्रीत्वम् । इन्द्रादौ सुरे ।

देवताड पु० देवमिन्द्रियं ताडयति ताड–अण् । (देवताड) दृक्ष-भेदे, अग्नौ, राहौ, मेघे च ।

देवदण्डा स्त्री० देवमिन्द्रियं दण्डयति दण्ड–अच् । नागबलायाम् ।

देवदत्त पु० देवा एनं ददुरिति आर्षिषि क्त्च् । देवार्पिते तन्नामके जने, अर्जुनशङ्खे "देवदत्तं धनञ्जय" इति गीता जृम्भणकरे वायौ च । देवाय दत्तः । देवोद्देशेन त्यक्ते त्रि० ।

देवदारु न० देवानां प्रियं दारु यस्य तत्काष्ठचन्दनस्य देवप्रियत्वात् । स्वनामख्याते वृक्षे अयं पुमानप्यत्र अस्तं पुरः पश्यसि देवदारु-मिति रघुः । [पूरके, वेश्यायाञ्च ।

देवदामी स्त्री० देवमिन्द्रियं दास्नोति दास–बधे अण् । वनबीज–

देवदीप पु० देवेषु इन्द्रियेषु दीप इव रूपप्रकाशकत्वात् । लोचने ।

देवदुन्दुभि पु० देवानां दुन्दुभिरिव हर्षप्रदत्वात् । रक्ततुलस्याम् । ई० । देवढक्कायाम् । [वनबीजपूरके ।

देवदूती स्त्री० देवानि इन्द्रियाणि दूयन्ते खिद्यन्तेऽनया दूक्तिच् ङीप् ।

देवदेव पु० देवेषु मध्ये दीव्यति दिव–अच् । महादेवे ।

देवधान न० देवानां योग्यं धान्यम् । (देधान) धान्यभेदे ।

देवन पु० दीव्यत्यनेन दिव–करणे ल्युट् । पाशके । भावे ल्युट् । क्रीड़ायां, दीप्तौ, व्यवहारे, जिगीषायां, स्तुतौ च न० । दीव्यत्य-स्मिन्नाधारे ल्युट् । लीलोद्याने, पद्मे च ।

देवनदी स्त्री० ई० । गङ्गायाम्, "असंबाधा देवनदी"ति महाभा०

देवनिर्म्मिता स्त्री० देवैः निर्म्मिता । गुडूच्याम् ।

देवपथ पु० देवैरर्च्चिरादिभिरातिवाहिकैरुपलक्षितः पन्थाः अच् समा० । उत्तरमार्गे । देवानां पन्थाः । छायापथे (यमनाला) ।

देवपुरोधस् पु० ई० । बृहस्पतौ ।

देवप्रिय पु० ई० । पीतभद्दराजे । वकपुष्पे न० ।

देवबला स्त्री० देवानामिन्द्रियाणां बलं यस्याः ५ ब० । महादेवीलतायाम् ।

देव(व)ल्लभ पु० ई० । पद्मरागरत्ने ।

देवभवन न० देवानां भवनमिव । अश्वत्थवृक्षे । ई० । स्वर्गे ।

देवभूय न० देवस्य भावः भू—क्यप् । देवत्वे देवसायुज्ये ।

देवमणि पु० देवेषु मणिरिव प्रकाशकत्वात् । शिवे, अश्वस्य कण्ठस्थे रोमावर्त्ते, कौस्तुभमणौ, महाश्वेतायाञ्च ।

देवमातृक त्रि० देवः पर्ज्जन्यरूपेन्द्रः मातेव पालको ऽस्य । वृष्टि-जलसम्पन्नक्षेत्रपालिते देशे ।

देवयान न० ६त० । देवरथे देवैरुपलक्षितं यानं मार्गः । अर्च्चि-रादिमार्गे शुक्राचार्य्यकन्यायां स्त्री० ङीप् ।

देवयोनि पु० देवा एव योनिः कारणमस्य । विद्याधरादौ देवांशभूते ।

देवर पु० देव—अर । पत्युः कनिष्ठभ्रातरि ।

देवरथ पु० ६त० । देवानां नभोगमनसाधने विमानादौ याने ।

देवराज पु० देवानां राजा टच् समा० । इन्द्रे देवाधिपादयोऽप्यत्र ।

देवरात पु० देवा एनं रायासुः क्त च् । अभिमन्युसुते परीक्षिद्भूपे ।

देवर्षि पु० वेद द्रष्टा ऋषिः देव एव सन् ऋषिः । नारदादिमुनौ ।

देवल पु० मुनिभेदे व्यासशिष्ये धौम्यस्य ज्येष्ठभ्रातरि, देवान् जीविकार्थं लाति ला—क । देवोपजीविनि । स्वार्थे कन् अत्रैव "देवकोपोप-जीवी च नाम्ना देवलको भवे"दित्युक्ते विप्रे ।

देवलता स्त्री० दीव्यति प्रकाशते देवा कर्म्म० । नवमल्लिकायाम् ।

देवलोक पु० ६त० । स्वर्गे । देवस्य ईश्वरस्य सम्पदुरूपोलोकः । "भूर्लोकोऽथ भुवर्लोकः स्वर्लोकोऽथ महर्जनः । तपः सत्यञ्च सप्तैते देवलोकाः प्रकीर्त्तिता" इत्युक्तेषु भूरादिषु सप्तसु लोकेषु ।

देववर्द्धकि पु० ६त० । विश्वकर्म्मणि । [वृक्षे पु, गुग्गुलौ च ।

देववृक्ष पु० दीव्यति देवः कर्म्म० । सप्तपर्णवृक्षे, ६त० मन्दारादि-

देववृत पु० देवम् इन्द्रियसंयमनं व्रतमस्य । भीष्मे ।

देवसात् अव्य० देवेभ्यो देयं तदधीनं सातिर्वा देवेभ्योदेये, तदधीने च

देवसायुज्य न० युनक्ति युज-क सह युज्येन सयुजः तस्य भावः सायुज्यं देवेन सायुज्यमेकासनयोगिता । देवसहयोगे ।

देवसेना स्त्री० इन्द्रस्य सुतायां षष्ठीनाम्न्यां कार्त्तिकेयपत्न्याम्, मात्र-वाचके । ६त० । देवानां सेनायाञ्च ।

देवसेनापति पु० ६त० । कार्त्तिकेये । इन्द्रसुते, देवसेनानामीशेच ।
देवस्व न० "यज्ञनं यत्नशीलानां देवस्वं तद्विदुर्बुधा" इत्युक्ते धने ।
देवहूति स्त्री० स्वायम्भुवमनोः कन्यायाम् ।
देवा स्त्री० दिव–अच् । पञ्चचारिण्यां लतायाम्, अश्वनपर्ण्याञ्च ।
देवागारिक त्रि० देवागारे नियुक्तः ठन् । देवागारे नियुक्ते ।
देवाजीव त्रि० देवं देवप्रतिमाद्रव्यमाजीवति जीव अण् । (पूजारी)
देवले । णिनि देवाजीवीत्यपि ।
देवात्मन् पु० देवो विष्णुरात्मा यस्य । अश्वत्थे तस्य विष्णुरूपत्वम्
अश्वत्थरूपी भगवानिति मन्त्रात् सिद्धम् ।
देवानांप्रिय पु० । अलुक्समासः । छागे । मूर्खे त्रि० ।
देवापि पु० चन्द्रवंश्ये नृपभेदे ।
देवार्ह न० देवानर्हति अण् । सुरपर्णे । महादेवीलतायां स्त्री० ।
देवयोग्यमात्रे त्रि० । [यतनमप्यत्र ।
देवालय पु० देवानामालयः । स्वर्गे, देवप्रतिमादीनां गृहे च देवा-
देवावास पु० ६त० । अश्वत्थवृक्षे ।
देविका स्त्री० दिव–एवुल् । "अर्द्धयोजनविस्तारां पञ्चयोजनमायताम् । एतामहे विकामाहु"रित्युक्ते नदीभेदे धुस्तूरे च ।
देवी स्त्री० दीव्यति दिव अण् गौ० ङीष् । दुर्गायाम्, मूर्व्वायां, पृक्कायाञ्च । देवस्य पत्नी ङीष् । देवपत्न्यां, नाट्योक्तौ लताभिषेकायां राजवनितायां, विप्रस्त्रीणासुपाधौ च देव्यन्ता विप्रयोषित" इत्युक्तेः ।
देवृ पु० दिव–कृ । देवरे स्वामिनः कनिष्ठभ्रातरि ।
देवेश न० ६त० । महादेवे । तत्पत्न्यां दुर्गायां स्त्री० ङीष् ।
देवेष्ट पु० देवानामिष्टः । गुग्गुलौ । दैत्यमेदजातत्वात् देवप्रियत्व-
मस्य । वनबीजपूरके स्त्री० ।
देवोद्यान न० ६त० देवोद्यानानि वैश्राजं मिश्रकं सिद्धकारणम् ।
नन्दनञ्चेति चत्वारीत्युक्तेषु चतुर्षु वनेषु । [प्रदेशे स्थानमात्रे च ।
देश पु० दिश–अच् । भूगोलविभागमात्रे कुरुपाञ्चालादिषु प्रसिद्धजन-
देशरूप न० देशनं देशः प्रशस्तदेशः उचिते समङ्गसे ।

देशान्तर न० अन्योदेशः मयूर० । "वाचो यत्र विभेदान्ते गिरि वा व्यवधायकः । महानद्यन्तरं यत्र तद्देशान्तरमुच्यते, इत्युक्ते देशभेदे, ज्योतिषोक्ते सुमेरुलङ्कयोर्मध्यरेखावर्त्तिदेशावधिके देशे तदवधिके अन्तरयोजनादौ च ।

देशिक पु० देशेषु प्रथितः ठन् । पथिके । देशोदेशनोपदेशस्तत्र साधु ठन् । गुरौ ।

देशिनी स्त्री० दिशति दिश–करणस्य कर्त्तृत्वविवक्षायां णिनि । तर्ज्जन्याम् ।

देश्य न० दिश–ण्यत् । पूर्वपक्षे । देशमर्हति यत् । देशयोग्ये त्रि० ।

देह पु० न० दिह–घञ् । स्थूलसूक्ष्मकार्य्यकारणरूपे शरीरे ज्योतिषोक्ते लग्ने च । भावे घञ् लेपने पु० ।

देहधारक पु० न० देहं धारयति धृ–णिच् ण्वुल् । अस्थि ।

देहभृत् पु० देहं बिभर्त्ति भृ–क्विप् । जीवे ।

देहयात्रा स्त्री० देहो याति गच्छत्यनेन या–करणे ष्ट्रन् न ङीष् । शरीररक्षासाधने भोजने । हृत० । मरणे तदुपलक्षिते यमपुरीगमने च ।

देहली(लि) देहं लेपनं लाति गृह्णाति ला–क गौरा० ङीष् पृ० वा ह्रस्वः । लेपनयोग्यायां द्वारपिण्डिकायां, (देयाल) कपाटस्थेऽधःकाष्ठखण्डे च ।

देहसार पु० हृत० । मज्जनि ।

देहात्मवादिन् पु० देहमेव आत्मतया वदति वद–णिनि । चार्व्वाके ।

देहिन् त्रि० देह+अस्त्यर्थे इनि । प्राणिनि देहात्माभिमानिनि जीवे ।

दैप शोधने भ्वा० पर० सक० सेट् पित् । दायति अदासीत् दायात् ।

दैतेय पु० दितेरपत्यम् दिति ढक् । असुरे । ण्य । दैत्योऽप्यत्र ।

दैत्यगुरु पु० हृत० । शुक्राचार्य्ये, दैत्याचार्य्यादयोऽप्यत्र ।

दैत्यनिसूदन पु० दैत्यान् निसूदयति निनत्ति सूद णिच् ल्यु । विष्णौ

दैत्यमेदज पु० दैत्यानां मेदाज्जायते जन ड । गुग्गुलौ । पृथिव्यां ।

स्त्री० मधुकैटभमेदजातत्वात्तस्यास्तथात्वम् । [द्रव्ये, चरुक्षोपधौ च ।

दैत्या स्त्री० दैत्यस्य प्रिया यत्। दैत्यभार्य्यायाम्, सुरायां, सुरानामगन्ध-

दैत्यारि पु० ईत० । विष्णौ ।

दैन न० दीनस्य भावः । दीनत्वे । दिने भवं अण् । दिनभवे त्रि० ।

दैनन्दिन त्रि० दिनं दिनं प्रतिदिनम् तत्र भवम् अण् नि० । प्रतिदिनभवे ।

दैनन्दिनप्रलय पु० ७त० ब्रह्मणः स्वमानानुसारेण प्रतिदिनावसाने सर्व्वसृष्टवस्तुनां लये । विस्मरो वाचस्त्ये ।

दैन्य न० दीनस्य भावः ष्यञ् । दीनत्वे, कार्पण्ये च ।

दैव न० देवादागतम्, देवोदेवताऽस्य, देवस्येदं वा अण् । भाग्ये फलोन्मुखे शुभाशुभकर्म्मणि, "प्राग्जन्मनि कृतं कर्म्म शुभं वा यदि वाऽशुभम् । दैवशब्देन निर्द्दिष्टमिह जन्मनि तद् बुधैरित्युक्ते पूर्वजन्मार्ज्जिते कर्मणि, दक्षिणहस्ताङ्गुलीनामग्ररूपे देवतीर्थे मन्त्राणामनुष्याहृतदेवतास्थाने, उत्पातस्थाने च । विवाहभेदे, त्रिविधभूतादिसर्गे च पु० । देवसम्बन्धिनि आङ्गिरोमादौ त्रि० ।

दैवज्ञ पु० दैवं पूर्वजन्मार्जितशुभाशुभं जानाति ज्ञा—क ईत० । गणके ज्योतिर्विदि । लक्षणादिना शुभाशुभज्ञायां स्त्रियां स्त्री० टाप् । [समूहे अण् । दैवज्ञसमूहे न० ।

दैवत पु० न० । देवएव देवता ततः प्रज्ञाद्यण् । देवे । देवतानां

दैवतन्त्र त्रि० दैवस्यैव तन्त्रमायत्तम् । भाग्याधीने ।

दैवपर त्रि० दैवमेव परं श्रेष्ठं यस्य । दैवसारे यङ्गविष्ये ।

दैवप्रश्न पु० "नक्तं निर्गत्य वक्तिश्चिच्छुभाशुभकरं वचः । श्रूयते तद्विदुर्धीरा दैवप्रश्न"मित्युक्ते रात्रौ अकस्मात् आकाशादौ श्रूयमाणे शुभाशुभसूचके वाक्ये ।

दैवलेखक पु० दैवं लिखति । गणके ।

दैववाणी स्त्री० देवस्येयम् अण् कर्म० । आकाशवाण्याम् संस्कृतवाण्याञ्च

दैवसर्ग पु० देवस्य सत्त्वगुणस्य सर्गः । सांख्योक्तभूतसर्गभेदे सात्त्विकांशरूपे ।

दैवात् अव्य० दैवमतति क्षिप्। कृदादित्वम्। दैवेन।

दैविक न० देवोद्देवताऽस्य ठक् "देवानुद्दिश्य यच्छ्राद्धं दैविकं तत्तु प्रचक्षते" इत्युक्ते देवोद्देश्यके श्राद्धे। देवस्येदं देवादागतं वा ठक्। देवादागते देवसम्बन्धिनि च त्रि०।

दैवी स्त्री० देवस्येयम् अण्। सात्विकप्रकृतौ, "दैवी सम्पद्विमोचा-येति गीता। देवसम्बन्धिन्याञ्च।

दैवोदासि पु० दिवोदासस्यापत्यम् अत इञ्। प्रतर्दने नृपे।

दैव्य न० देवेन कृतम् देवानामिदम् वा यञ्। भाग्ये। देवसम्बन्धिनि त्रि०।

दैशिक त्रि० देशेन निर्वृत्तं देशस्येदं वा ठक्। देशसम्बन्धिनि न्यायोक्ते देशकृतस्वरूपभेदे विशेषणसम्बन्धे च। स्त्रियां ङीप्।

दैष्टिक त्रि० दिष्टं भागधेयमेव सर्वसाधनमिति यस्य मतिः ठक्। भाग्याधीनतावादिनि।

दो छेदे दिवा० पर० सक० अनिट्। द्यति अदात्।

दोःशिखर न० ६त०। स्कन्धे [स्त्री० ङीप्।

दोग्धृ पु० दुह-तृच्। वत्से, गोपाले, दोहनकर्त्तरि त्रि०। भवि

दोर्दण्ड पु० दोर्दण्डवद्दीर्घत्वात् कार्य्यसाधकत्वाच्च। बाहुदण्डे। एवं भुजदण्डादयोऽप्यत्र।

दोर्मूल न० ६त०। कक्षे बाहुमूले। [दोलयात्रादोलोत्सवोऽप्यत्र।

दोल पु० दुल-भावे घञ्। श्रीकृष्णस्य दोलनरूपे उत्सवभेदे।

दोला स्त्री० दुल-अच् टाप् अ वा। (डोली) यानभेदे, उद्यानादौ क्रीडार्थं दोलनयन्त्रे च। स्वार्थे कन्। अत्रार्थे।

दोलायमान त्रि० दोलां दोलनमाचरते क्यङ-यानच्। दोलनं कुर्वति दोलायन्त्रारूढे।

दोष पु० दूष-घञ्। दूषणे पापे "वातः पित्तःकफश्चेति त्रयोदोषाः समासत" इत्युक्तेषु वातादिषु, अलङ्कारोक्ते रसाद्यापकर्षाधायके दुःशब्दादिभेदे न्यायोक्तेषु रागद्वेषमोहेषु च।

दोषग्राहिन् त्रि० दोषानेव गृह्णाति न गुणान् ग्रह-णिनि। दोष-

याही गुणत्यागी चालनीव हि दुर्जनः" इत्युक्ते दुर्जने ।

दोषज्ञ त्रि० दोषान् जानाति ज्ञा–क । भिषजि, वातादिदोषज्ञे चिकित्सके च ।

दोषत्रय न० दोषाणां त्रयम् । वातपित्तकफेषु ।

दोषा अव्य० दुष–अच् । रात्रौ ।

दोषाकर पु० दोषा रात्रिं करोति तस्मिन् करः किरणो यस्य वा । चन्द्रे । दोषाणामाकरः दोषाश्रये पु० ।

दोषाख्या स्त्री० दोषा रात्रौ ख्यायति अच् टाप् । वनवर्तुरिकायाम्

दोषैकदृक् त्रि० दोषे एव न गुणे एकादृग् यस्य । खले ।

दोस्(घा) ए० दम करणे डोसि । भुजे, भागुरिमते टापि घत्वम् ।

दोह पु० दुह–कर्मणि घञ् । दुग्धे "सन्दोहवाट्मेऽहनी" ति स्मृतिः । आधारे घञ् । दोहनपात्रे । भावे घञ् । दोहने ।

दोहद ए० न० द्वयोः गर्भिणीतदपत्ययोर्हृदयमत्र नि० । गर्भे सुदत्विषा दोहदलक्षणमिति रघुः । दोहदमाकर्मं ददाति दा–क । (साद) गर्भिण्यभिलाषे बालसायाञ्च । चिह्ने, गर्भलक्षणे च न० । ष्ठ० औत् । दौहृदमप्यत्र । [नारीमाङ्दौहृदिनीमित्युक्तेः ।

दोहदिनी स्त्री० दोहदोऽस्त्यस्याः इनि । गर्भिण्याम् "तास्तु द्विहृदया

दोहनी स्त्री० दुह्यतेऽत्र आधारे ल्युट् । दोहनपात्रे ।

दोहा स्त्री० मात्रावृत्तभेदे ।

दौत्य न० दूतस्य भावः कर्म वा ष्यञ् । दूतस्य भावे तत्कर्मणि च ।

दौर्भागिनेय पु० दुर्भगाया अपत्यम् ढक् इनङादेशः द्विप्रदङ्ङिः । दुर्भगापुत्रे ।

दौर्मनस्य न० दुर्मनसो भावः ष्यञ् । बाह्याभ्यन्तरकारणैर्मनसः दौस्थ्ये, स्वस्थीभावे दुःखहेतुके चित्तस्यावसादे च ।

दौवारिक पु० द्वारे नियुक्तः ठक् । द्वारपाले । प्रतीहार्य्यां स्त्री० ।

दौष्कुलेय त्रि० दुष्कुलस्यापत्यम् ढक् । निन्दितकुलजादौ ।

दौहित्र पु० दुहितुरपत्यम् अण् । दुहितुः सुते "दौहित्र' खड्ग-

नित्याङ्कुरपत्त्वं दधिसक्थिलाः । कपिलाया इतश्चैव दौहित्रमिति योच्यते इत्यूक्षेषु खड्गादिषु न० ।

द्यावापृथिवी स्त्री० द्वि० व० । द्यौश्च पृथिवी च द्व० द्यावादेशः । स्वर्गपृथिव्योर्मिलितयो एवं द्यावाभूस्यादयोऽप्यत्र द्यावाभूमी जगत्यस्मिन्निति श्रुतिः ।

द्युत् अभिसर्पणे अदा० पर० सक० अनिट् । द्योति अद्योदीत् ।

द्यु पु० दिव–क्विप् ष० तुक् । अग्नौ, सूर्ये, अर्कवृक्षे च आकाशे, दिवसे च न० ।

द्युत दीप्तौ भ्वा० आत्म० सक० सेट् । द्योतते अद्युतत् अद्योतिष्ट ।

द्युति(ती) स्त्री० द्युत–इन् वा ङीप् । कान्तौ दीप्तौ, शोभायाम् प्रकाशे च । [प्यादयोऽप्यत्र ।

द्युपति पु० द्यु तत् । सूर्ये अर्कवृक्षे च एवं दिवोमणिरिव । द्युम-

द्युम्न पु० दिव मनति मन्–क । धने, बले च ।

द्यूत न० दिव क्त । (जुया) पाशकक्रीड़ायाम् अप्राणिकरणक क्रीड़ायां, कैतवे च ।

द्यूतकर त्रि० द्यूतं करोति कृ–टक् । पाशकादिक्रीड़ाकारके (जुआरी) एवुल् । द्यूतकारकोऽप्यत्र । क्विप् । द्यूतकृदप्यत्र ।

द्यूतपूर्णिमा स्त्री० द्यूतस्य द्यूतार्थं पूर्णिमा । आश्विनपौर्णमास्यां कोजागरपौर्णमास्याम् ।

द्यूतप्रतिपद्(द) स्त्री० चतुर्थ्यर्थे तत्० । कार्त्तिकशुक्लप्रतिपदि । "द्यूतप्रतिपदा नाम तव भावी महोत्सव" इति स्मृतिः ।

द्यूतवृत्ति पु० द्यूतमेव वृत्तिर्जीविका यस्य । सभिके ।

द्यै तिरस्कारे भ्वा० पर० सक० अनिट् । द्यायति अद्यासीत् ।

द्यो स्त्री० द्यु–डो स्वर्गे, आकाशे च ।

द्योल पु० द्यु–घञ् । प्रकाशे, आतपे च ।

द्रढिमन् पु० दृढस्य भावः इमनिच् द्रढादेशः । दृढत्वे दार्ढ्ये ।

द्रप्स(स्क) न० दृप्यत्यनेन सृ (स्क) क्विप् च । घनीभूते दधि ।

द्रम गतौ भ्वा० पर० सक० सक० सेट् । द्रमति अद्रमीत् ।

द्रम्म पु० "वराटकानां दशकद्वयं यत्र सा काकिणी तास्र प्रपञ्चतस्तै ते षोड़श द्रम्म" इत्युक्ते परिमाणभेदे (काहन)।

द्रव पु० द्रु—अप्। रसे पलायने, गतौ, वेगे परीक्षासे च।

द्रवज पु० द्रवात् रसात् जायते जन—ड। गुड़े। द्रव्यजातमात्रे त्रि०।

द्रवत्व न० द्रवति स्यन्दते द्रु—अच् तस्य भावः। न्यायोक्ते स्यन्दनकारणे पृथिवीजलतेजोवृत्तौ गुणभेदे।

द्रवद्रव्य न० द्रवतीति द्रवं कर्म्म०। दुग्धदधिघृतादौ निष्यन्दिनि द्रव्ये।

द्रवन्ती स्त्री० द्रु—शतृ। नद्याम्। शतमूलिकायां मूषिक पर्य्यायाञ्च।

द्रविड पु० देशभेदे। तद्देशस्थे ब० व०।

द्रविण न० द्रु—इनन्। वित्ते, काञ्चने, पराक्रमे, बले च।

द्रविणनाशन पु० द्रविणं बलं नाशयति नश—णिच् ल्यु। शोभाञ्जनवृक्षे।

द्रव्य न० द्रु—यत्। पित्तले, वित्ते, विलेपनद्रव्ये, भेषजे, भव्ये, जतुनि, विनये, मद्ये, न्यायोक्तेषु पृथिव्यादिषु गुणवत्सु नवसु। व्याकरणोक्ते लिङ्गसंख्यान्वयिनि पदार्थे। द्रोर्द्रुवस्य विकारः तस्येदम् वा यत्। द्रुविकारे तत्सम्बन्धिनि च त्रि०।

द्रष्टृ क्रि० दृश—तृच्। विचारकृशले—चेतने, साक्षिणि, द्रष्टा दृष्टेः कर्त्तरीत्युक्ते दर्शनकर्त्तरि च।

द्रा स्वप्ने पलायने अदा० अक० अनिट्। द्राति अद्रासीत्।

द्राक् अव्य० द्रा—कु। शीघ्रे झटितीत्यर्थे।

द्राक्ष काङ्क्षायां भ्वा०पर० सक० सेट् इदित्। दाक्षति अद्राक्षीत्।

द्राक्षा स्त्री० द्राक्षि—अ नि० लोपः। गुच्छीकायाम् (किसमिस्) "द्राक्षे! द्राक्षन्ति के"त्यमिति जयदेवः।

द्राख शोषणे अलमर्थे च भ्वा० पर० स० सेट्। द्राखति अद्राखीत्। णिच् अदद्राखत्। [अद्राषीत्। णिच् अदद्राषत्।

द्राघ आयासे शब्दे च भ्वा० पर० सक० सेट्। द्राघति

द्राघिमन् पु० दीर्घस्य भावः इमनिच् द्राघादेशः। दीर्घत्वे।

द्वा:(द्वा)स्थ पु० द्वारि तिष्ठति स्था–क वा विसर्गलोपः । द्वारपाले स्था कर्त्तरि–क्त । द्वाः (द्वा)स्थितोऽस्यत्र ।

द्वाचत्वारिंशत् स्त्री० द्व्यधिका चत्वारिंशत् द्वौ च चत्वारिंशच्च वा आत्मम् । (बेयाल्लिश) संख्याभेदे द्वात्रिंशदादयोऽस्यत्र ।

द्वादश त्रि० द्वादशानां पूरणः डट् । येन द्वादशसंख्या पूर्य्यते तस्मिन्

द्वादशन् पु० द्वौ च दश च द्व्यधिका वा दश आत्मम् (वारो) संख्याभेदे द्विराद्दत्ता दश विंशतिसंख्यायाम् ।

द्वादशकर पु० द्वादश करा इस्वा अस्य । कार्त्तिकेये इस्वत्वतौच द्वादशहस्तादयोऽस्यत्र । [अलोचनादयोऽस्यत्र ।

द्वादशनेत्र पु० द्वादश नेत्राण्यस्य । षड़ानने कार्त्तिकेये । द्वाद–

द्वादशाङ्गुल पु० द्वादश अङ्गुलयः प्रमाणमस्य तद्धितार्थे द्विगुः तद्धितस्य लुकि अच् समा० । वितस्तिप्रमाणे ।

द्वादशात्मन् पु० द्वादश आत्मानोमूर्त्तयोऽस्य । सूर्य्ये, अर्कदण्डे च ।

द्वादशायुस् पु० द्वादश वर्षमायुर्यस्य । कुक्कुरे ।

द्वापर पु० द्वौ परौ प्रकारौ विषयौ वा यस्य पृ० आत्वम् । संज्ञये सत्यत्रेतानन्तरे युगभेदे द्वाभ्यङ्कसङ्ख्यान्वितपाशकपार्श्वे च ।

द्वापराय पु० पाशकस्य द्वाभ्यङ्कसङ्ख्यान्वितं पार्श्वं द्वापरं तस्य अयः उत्तानतया पतनम् । द्यूतभेदे द्वाभ्यङ्कान्वितपार्श्वस्योत्तानतया पतने ।

द्वामुष्यायण पु० द्वयोरमुयोरपत्यम् । नि० । द्वयोः पुत्रे । गौतमे मुनौ च ।

द्वार् स्त्री० दृ–वरणे णिच्–घिच् । गृहादि निर्गमनस्थाने, प्रतीहारे, उपाये, सुखे च । [सुखे च ।

द्वार न० दृ–णिच् अच् । गृहादिनिर्गमनस्थाने, प्रतीहारे, उपाये,

द्वारका स्त्री० द्वारेण प्रशस्तद्वारेण कायति कै–क । समुद्रसन्निकृष्टे तीर्थभेदे द्वारवत्यादयोऽस्यत्र ।

द्वारकेश पु० ६त० श्रीकृष्णे । [खुल् च । एतावप्युक्तार्थे ।

द्वारप त्रि० द्वारं पाति रक्षति पा–क । द्वारपाले । पाल–अण्,

द्वारयन्त्र न० ६त० । तालके । (ताला) (कुलुप) ख्याते पदार्थे

द्वारावती स्त्री० द्वाराणि नीचोपायाः सन्त्यस्याम् मतुप् पूर्व दीर्घः । तीर्थभेदे पुरी द्वारावती चैव सप्तैता इति पुराणम् द्वार+अस्त्यर्थे ठनि द्वारिकाप्यत्र ।

द्वारिन् त्रि० द्वारं पार्श्वत्वेनास्त्यस्य इनि । द्वारपार्श्वे ।

द्वाविंशति स्त्री० द्वयधिकानिंशतिः द्वौ च विंशतिश्च आत्वम् । (बा-हुल्य) सङ्ख्याभेदे ।

द्वि त्रि० द्वि+वच् । डु—डि । द्वित्वसङ्ख्यान्विते ।

द्विक पु० द्वौ कौ काकारौ यत्र । काके, कोके, द्वयवयवम् कन् द्वित्व-सङ्ख्यायाम् तद्वति च न० । एकं द्विकं त्रिकञ्चेति कारिका ।

द्विककुद् पु० द्वे ककुदे यस्य अन्यपदलोपः । उष्ट्रे ।

द्विगु पु० व्याकरणोक्ते समासभेदे । द्वि+व० । गोद्वयस्वामिनि त्रि० ।

द्विगुण त्रि० द्वाभ्यां गुण्यते गुण—घञर्थे क । द्वाभ्यां गुणिते ।

द्विगुणाकृत त्रि० द्विगुणं कृत्वा कृष्टम् डाच्+कृ—क्त । द्विवार-कृष्टे क्षेत्रे ।

द्विज पु० द्विर्जायते जन ड वृत्तौ सङ्ख्यायाः वारार्थत्वम् । ब्राह्मणे ब्राह्मणादिवर्णत्रये, "जन्मना जायते शूद्रः संस्कारैर्द्विज उच्यते" इति स्मृतिः । दन्ते, अण्डजे विहगादौ, तुम्बुरुवृक्षे च ।

द्विजकुल्पित पु० इत० । क्लेष्मातकवृक्षे तत्फलस्य द्विजानामभक्ष्य-त्वात् तच्चिन्त्यत्वम् ।

द्विजदेव पु० द्विजेषु देवत्वम् । ब्राह्मणे, वृक्षे च ।

द्विजन्मन् पु० द्वि जन्मनी यस्य । ब्राह्मणक्षत्रियवैश्यरूपवर्णत्रये, "मातरस्येऽधिजननं द्वितीयं मौञ्जीबन्धने इति स्मृतिः दन्ते, अण्डजे च ।

द्विजबन्धु पु० द्विजो बन्धुर्यस्य तद्गोत्रोत्पन्नत्वात् । स्वकार्यरहितेषु जन्म-मात्रोपजीविषु अधमेषु ब्राह्मणक्षत्रियवैश्येषु ।

द्विजराज पु० ईत० टच् समा० । चन्द्रे, अनले, गरुडे च ।

द्विजवर पु० द्विजेषु वरः । विप्रे । द्विजवर्य्य द्विजोत्तमादयोऽप्यत्र ।

द्विजप्रिय पु० ३त० । राजमाषे (बरबटी) ।

द्विजा स्त्री० द्विर्जायते जन–ड टाप्। पाचक्ष्यां, भार्य्यां, रेणु-कागस्तुल्ये च।

द्विजाति पु० द्वे जाती जन्मनी यस्य। "ब्राह्मणः क्षत्रियोवैश्यस्त-योवर्णा द्विजातय" इति मनूक्ते वर्णत्रये मातुरप्येऽधिजननं द्वितीयं मौञ्जीबन्धने" इत्युक्तेस्तेषां तथात्वम्।

द्विजिह्व पु० द्वे जिह्वे यस्य। सर्पे। खले, चौरे, दुःसाध्ये च त्रि०।

द्वितय त्रि० द्वावयवावस्य द्वयवयं वा द्वि–तयप्। द्वित्वसङ्ख्यान्विते "यदि वायौ द्वितयेऽपि तेऽचला" इति भारविः स्त्रियां ङीप्। द्वित्वसङ्ख्यायाञ्च न०।

द्वितीय त्रि० द्वयोः पूरणः तीय। द्वयोः पूरणे। चन्द्रस्य द्वितीय-कलाक्रियारूपे तिथौ स्त्री० भागार्थेऽण्। द्वितीये भागे।

द्वितीयाकृत त्रि० द्वितीयं कृत्वा कृतम् डाच्+कृ–क्त। द्विधा कृते च।

द्विदत् त्रि० द्वौ दन्तावस्य वयसि दन्तस्य दतादेशः। द्विदन्तोपलक्षि तवयस्के हृष्टादौ स्त्रियां ङीप्।

द्विदेव पु० द्वौ देवावस्य अण् उत्तरपदवृद्धिः। विशाखानक्षत्रे तस्याः यत्राग्निदेवताकत्वात् तथात्वम्।

द्विधा अव्य० द्विप्रकारम् द्वि+धाच्। द्विप्रकारे।

द्विधालेख्य पु० द्विधा लेखा रेखामर्हति यत्। छिन्नालङ्के। द्विप्रकारलेखनीये त्रि०।

द्विप पु० द्वाभ्यां शुण्डाभ्यां पिबति पा–क। हस्तिनि।

द्विपद पु० द्वे पदे यस्य। मनुष्ये, देवे, पक्षिणि, राक्षसे, च। "मिथुनतुलाधटकन्याद्विपदाख्या चापपूर्वभागश्चेति" ज्योतिषोक्ते राशिभेदे च।

द्विपदा स्त्री० द्वौ पादावस्या वादस्यान्त्यलोपः टापि भत्वात् पदादेशः। अर्य्यायभेदे। छन्दोभेदे ङीप् द्विपदी।

द्विपर्णी स्त्री० द्वे द्वे पर्णे प्रतिपर्णमस्याः ङीप्। वनकोल्यां शालपर्ण्यां, पृश्निपर्ण्यां च। पर्णद्वययुक्ते त्रि०। स्त्रियां टाप्।

द्विमातृक पु० द्वे मातरावस्य। दुर्गायासुरुण्डापालिते गणेशे जरासन्धे च

द्विमुख पु० द्वौ मुखे यस्य ।। राजसर्पे । मुखद्वयवति त्रि० । जलौकायां स्त्री० ङीप् । एवं द्विमूर्द्धादयोऽप्यत्र अक्षरभेदे च ।

द्विरद पु० द्वौ रदौ यस्य ।। हस्तिनि ।।

द्विरागमन न० द्विराहृत्तमागमनम् शाक० । "दत्ते पाणिग्रहे नेतुं पितुः पतिगृहं प्रति ।। पुनरागमनं यत् स्यात्तत् द्विरागमनं विदुः" इत्युक्ते विवाहानन्तरं कन्यायाः पुनर्गमने ।

द्विरुक्त त्रि० विवादादिना द्विरुक्तमुच्चारितम् । "विवादे विक्रये हर्षे खेदे दैन्येऽवधारणे ।। प्रसादने सम्भ्रमे च द्विरुक्तं न दुष्यती"-त्युक्तैः विवादादिभिः द्विवारमुक्ते व्याकरणोक्ते अभ्यासंज्ञके च ।

द्विरूढा स्त्री० द्विवारमूढा वह-क्त । पुनर्भूस्त्रियाम् ।

द्विरूप पु० द्वे रूपे यस्मिन् । कोषभेदे । रूपद्वयवति त्रि० ।

द्विरेफ पु० द्वौ रेफौ वाचकनाम्नि यस्य । भ्रमरे तच्छब्दस्य रेफद्वयवत्त्वेन तद्वाच्यमधुकरपदार्थेऽपि द्विरेफवत्त्वम् । [औत्सर्गिकप्रष्टतिप्रत्यये ।

द्विवचन न० द्वौ वक्ति द्वौ वा उच्येते अनेन । व्याकरणोक्ते द्वित्वबोधके

द्विवर्षा स्त्री० द्वे वर्षे वयः परिमाणमस्य आर्हीयः ठक् अध्यर्धेति स्वार्थे कन् तस्य लुक् । द्विवर्षवयस्कायां गवि । [तराड्वादौ ।

द्विवार्षिक त्रि० द्वयोर्वर्षयोः भवः ठक् उत्तरपदवृद्धिः । द्विवर्षभवे

द्विशफ पु० द्वौ शफौ यस्य । "गौरजोमहिषः कृष्णःशूकरो गवयो रुरुः । द्विशफाः पशवश्चैते अविरुष्ट्रश्च सप्तम" इत्युक्तेषु पशुषु ।

द्विश्स् अव्य० द्वौ द्वौ ददाति करोति वा । एकक्रियया द्वयोर्व्याप्तौ ।

द्विष वैरे अदा० उभ० सक० अनिट । द्वेष्टि द्विष्टे अद्विषत् अद्विषत ।

द्विषत् पु० द्विष-शतृ । शत्रौ ।

द्विषन्तप पु० द्विषन्तं तापयति तप-णिच्-खच् मुम् च । शत्रुतापने

द्विष्ट त्रि० द्वयोस्तिष्ठति स्था-क सुघ्नघा० षत्वम् । द्वयोः स्थिते संयोगादौ पदार्थे ।

द्विस् अव्य० द्वि+क्रियाहृत्तिगणने सुच् । द्विराहृत्तक्रियायाम् द्विवारार्थे

द्विसप्तति स्त्री० द्व्यधिका सप्ततिः द्वौ च सप्ततिश्च वा नात्वम् । (बा-हुत्तर) संख्याभेदे ।

द्विस्रिपात्र न० द्विराढक्तं स्निग्धं पक्वम् । (घिउचाउल) घृततण्डुले ।
द्विहस्त त्रि० द्विवारं हस्तेन लब्धम् यत् । दिवारं हस्तेन लब्धे क्षेत्रे ।
द्विहायनी स्त्री० द्वौ हायनौ वयोमानं यस्याः ङीष् । द्विवर्षवय-
स्कायां गवि । [हृदयेन च तस्यास्तथात्वम् ।
द्विहृदया स्त्री० द्वे हृदये यस्याः । गर्भिण्यां स्त्रियाम् । स्वहृदयेन गर्भ-
द्वीन्द्रियग्राह्य पु० द्वाभ्यां नेत्रत्वगिन्द्रियाभ्यां ग्रह्यते ऽसौ । न्यायोक्ते
"सङ्ख्यादिपरत्वान्तो द्रव्यत्वं स्नेह एव च । एते तु द्वीन्द्रियग्राह्या
इत्युक्ते गुणभेदे ।
द्वीप न० द्वयोर्गता आपोऽत्र अच् आदेरत ईच्च । जलमध्यस्थे स्थल-
भागे "जम्बुशाकशकौक्षशाल्मलिप्लक्षपुष्करा" इत्युक्तेषु लवणसमु-
द्राद्याश्रितेषु भूमिप्रदेशभेदेषु, द्विवर्णे चर्म्मणि च ।
द्वीपवत् पु० द्वीप अस्त्यर्थे मतुप् मस्य वः । नदे । सप्तद्वे च । नद्यां
भूमौ च स्त्री० ङीप् । [व्याघ्रभेदे (चितावाघ) ।
द्वीपिन् पु० द्वौ वर्णावयते ई—पक् द्वीपं द्विवर्णं चर्म तदस्यास्ति इनि ।
द्वीपिशत्रु पु० ६त० । गतमूल्यामु तद्भक्षणे हि तस्य नाशः ।
दृ सम्बरणे भ्वा० पर० सक० अनिट् । दरति अदृरीत् ।
द्वेधा अव्य० द्वि+प्रकारे धाच् एदादेशः । द्विधार्थे ।
द्वेष पु० द्विष—घञ् । विरोधे, अनिष्टसाधनताज्ञानजन्ये रागप्रति-
बन्धिचित्तवृत्तिभेदे ।
द्वेषण त्रि० द्विष—युच् । यत्नौ । भावे ल्युट् । द्वेषे न० ।
द्वेष्य त्रि० द्विष—ण्यत् । यत्नौ । [वाच्यौ ।
द्वैगुणिक त्रि० द्विगुणं गृहीतुमेकगुणं प्रयच्छति ठक् । वृद्धाजीवे
द्वैत न० द्विधा कृतम् द्वीतं तस्य भावः अण् । द्विधाभेदे, द्वित्वसङ्ख्या-
याञ्च । स्वार्थेऽण् । द्विधाभेदवति त्रि० । [वनभेदे ।
द्वैतवन न० द्वे—इते गते यस्मात् कर्म० । शोकमोहादिद्वन्द्वरहिते
द्वैतवादिन् त्रि० द्वैतं वदति वद—णिनि । जीवेश्वरयोर्भेदाभ्युपगन्तरि
नैयायिकादौ ।
द्वैतीयीक त्रि० द्वितीय एव स्वार्थे ईकक् । द्वित्वसङ्ख्यापूरणेऽर्थे ।

द्वैध न० द्वि+प्रकारे धसुञ् । द्विप्रकारे ।

द्वैप पु० द्वीपिनो विकारः अञ् । व्याघ्रविशेषचर्म्मणि । तेन परिकृतो रथः पुनरञ् । द्वीपिचर्म्मणा परिवृतोढते रथे ।

द्वैपायन पु० द्वीपमयनं जन्मभूमिर्यस्य द्वीपायनः स एव प्रज्ञाद्यण् । "द्वीपे न्यस्तस्तया बालस्तस्मात् द्वैपायनोऽभव" दित्युक्ते व्यासे ।

द्वैमातुर पु० द्वयो र्मात्रोरपत्यम् अण् उक्तं रपरत्वम् । दुर्गाचासुण्डाभ्यां पालिते गणेशे, जरासन्धे नृपे च ।

द्व्यणुक न० द्वयोरणोः संयुक्तयो र्भवः कन् । परमाणुद्वयजाते द्रव्यभेदे ।

द्व्यष्ट न० द्वे च ते अष्ट च व्याप्नोति अश-क्त । ताम्रे ।

द्व्यामुष्यायण पु० अमुष्य प्रसिद्धस्यापत्यम् फक् आमुष्यायणः द्वयो रामुष्यायणः द्वैत० । "उभयोरपि तौ रिक्थौ पिण्डदाता च धर्मतः" इत्युक्ते तव, मम चायमिति समवेत परिग्रहीते पुत्रभेदे ।

द्व्याह्निक त्रि० द्वयोरह्नोः समाहारः द्व्यह्नः तत्र भवः ठञ् । द्व्यह्नजाते ज्वरादौ ।

ध

ध पु० धे धा-वा ड । धर्म्मे, कुबेरे, ब्रह्मणि च । धने न० ।

धक्क नाशने चुरा० उभ० सक० सेट् । धक्कयति-ते अदधक्कत्-त ।

धट पु० धन अच् टात्वादेशः । तुलायां (तराजु) दिव्यप्रमाणरूपे परीक्षाभेदे च ।

धटक पु० द्विचत्वारिंशद्वृत्तिकालके परिमाणभेदे ।

धण ध्वाने भ्वा० पर० सक० सेट् । धणति अधार्णीत् अधणीत् ।

धन्वन् पु० धयति धातून् धा-अनि नुट् । धुस्तूरे ।

धन धान्योत्पादने जु०हो० पर० अक० सेट् । दधन्ति अधानीत् अधनीत् ।

धन रवे भ्वा० पर० अक० सेट् । धनति अधानीत् अधनीत् ।

धन न० धन-अच् । वस्तुनि अर्थे, स्वर्णे, धनिष्ठानक्षत्रे च ।

धनञ्जय पु० धनं जयति जि-खच् मुम् च । अर्জ্জुने, वह्नौ, नागभेदे, पोषणकरे देहव्यापिवायौ, वकुभट्टस्य चित्रकट्टस्य च ।

धनद पु० धनं ददते दे—पालने । कुबेरे हिङ्गलवृक्षे च । दो—क धनदातरि त्रि० ।

धनदानुचर पु०ई०तत्पु० यक्षे कुबेरस्य यक्षराजतया यक्षाणां तदनुचरत्वम्

धनदानुज पु० ई०त० । रावणे ।

धनपति पु० ई०त० । कुबेरे ।

धनपिशाची स्त्री० धने पिशाचीव । धनाशायां धनलोभे ।

धनहरी स्त्री० धनं हरति अच् गौरा० ङीष् । चोरनामकगन्धद्रव्ये ।

धनाधिप पु० ई०त० । कुबेरे । धनानामधिपे त्रि० । धनाधिपत्यादयोऽप्यत्र ।

धनिक पु० न० धनिवत् कायति कै—क । धन्याके । धने पु० धनं विद्यतेऽस्यस्य ठन् । धनस्वामिनि उत्तमर्णे त्रि० "धनिकस्य यथा-रुची"ति स्मृतिः । स्त्रियां टाप् । सा च प्रियङ्गुवृक्षे, बध्वाञ्च ।

धनिष्ठा स्त्री० अतिशयेन धनवती इष्ठन् इनेर्लुक् । स्वनामख्याते नक्षत्रभेदे ।

धनुष्पाट पु० धनुषदृव पाटो विस्तारोऽस्य । पियालवृक्षे ।

धनुर्गुण पु० ई०त० । मौर्व्यां ।

धनुर्द्रुम पु० ई०त० । वंशे, ततएव धनुषो जननात् ।

धनुर्द्धर पु० धनुर्धारयति धृ—अच् । धानुष्के (तीरन्दाज) ।

धनुर्वृक्ष पु० धनुषः साधनं वृक्षः । भल्लातके, वंशे, अश्वत्थे च ।

धनुर्वेद पु० धनुषः उपधारात् तत्सम्पेषणीयास्त्रप्रयोगादेः उपयोगी वेदः । यजुर्वेदस्योपवेदे शस्त्रास्त्रप्रयोगोपसंहारप्रतिपादकमन्त्र-सहिते शास्त्रभेदे ।

धनुष्क पु० धनुःकरे यस्य षत्वम् । धानुष्के (तीरन्दाज) ।

धनुष्मत् पु० धनुरस्यस्य मतुप् षत्वम् । धानुष्के ।

धनुस् पु० धन—उसि । पियालवृक्षे धनुर्द्रुरे त्रि० । चापे, मेषादितो नवमे राशौ च न० ।

धन्य पु० धनाय हितम् धनं लब्धा धनस्य निमित्तं संयोगः उत्पातो धनं प्रयोजनमस्य वा यत् । अश्वकर्णवृक्षे । श्लाघ्ये, कृतार्थे,

पुरुषयोगे, धनोपयोगिन्यर्थशास्त्रे, धनाय हिते, धनस्य कारणे च त्रि० । आमलक्याम्, धन्याके च स्त्री० टाप् ।

धन्याक न० धन–आकन् पित्वाकादि० त्रि० । (धनिया) इति ख्याते वृक्षे ।

धन्वदुर्ग न० धन्वना मरुणा कृतं दुर्गम् । चतुर्हस्तं पञ्चयोजनं मरुभूमिष्टिते दुर्गभेदे ।

धन्व न० सौ० धन्व अच् । चापे ।

धन्वन् न० सौ० धन्व कनिन् । धनुषि, मरुदेशे च ।

धन्वन्तरि पु० धन्वन् शिल्पशास्त्रं तस्यान्तमियर्ति इ–इन् शक० । नारायणांशो भगवान् स्वयं धन्वन्तरिर्महान् । पुरा समुद्रमथने समुत्तस्थौ महोदधे"रित्युक्ते स्वर्गवैद्यभेदे, द्विोदासे काशिराजे, विक्रमादित्यसभासदे प्रसिद्धभेदे च "धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टेत्यादि । [तेन तस्याम्नायः कृतः ।

धन्वन्तरिग्रस्ता स्त्री० ३त० । (कटकी) कटुक्याम् रोगोपशमनाय

धन्वयवास पु० धन्वनो मरुभूमेर्यवासः तत्रोत्पन्नत्वात् । दुरालभायाम्

धन्वयास पु० धन्वनो यासो निर्यास इव । दुरालभायाम् ।

धन्वी पु० धन्वं विद्यतेऽस्य इनि । अर्জ্জुने, कङ्कभद्रुमे, दुरालभायाम्, वकुले च । विदग्धे, धानुष्के त्रि० ।

धन्विस्थान न० ६त० । "वैक्लवं समपादञ्च वैशाखं मण्डलं तथा । प्रत्यालीढं तथालीढं स्थानान्येतानि धन्विनामित्युक्तेषु धानुष्कस्थितिभेदेषु ।

धम ध्माने सौ० पर० सक० । धमति अधमीत् ।

धमन पु० ध्मायतेऽनेन धम–ल्यु । बले, भस्त्याध्मायके, क्रूरे च त्रि० ।

धमनि(नी) स्त्री० धम–अनि वा ङीप् । नाड्यां, शिरायां, वृक्षविशाखिन्यां, ग्रीवायां, हरिद्रायाञ्च ।

धम्मिल्ल पु०सौ० धम–विच् मिल–क पृ०कर्म० । संयतेषु केशेषु (खोपा)

धर पु० धृ–अच् । पर्वते, कूर्म्मराजे, वसुभेदे, कार्पासवृक्षे च ।

धरण पु० धृ–युच् । पर्वतभेदे, लोके, गुणे, धान्ये दिवाकरे, सेतौ च । चतुर्विंशतिरत्तिकामाने दशरत्तिकापरिमाणे च ।

धरणि पु० धृ-अनि वा ङीप् भूमौ, कन्दविशेषे, कन्दाली वनकन्दे च स्त्री०
धरणि(णी)धर पु० धरणिं(णीं) धरति धृ-अच्। पर्वते, विष्णौ, कच्छपे च।
धरा स्त्री० धृ-अच्। पृथिव्याम्, गर्भाशये-जरायौ, मेदोवृक्षायां नाड्याम्
धराधर पु० धरां धारयति धृ-अच्। पर्वते वराहरूपे विष्णौ च।
धरामर पु० धरायामर इव। ब्राह्मणे एवं भूदेवादयोऽप्यत्र।
धरित्री स्त्री० धृ-इत्र गौरा० ङीष्। भूमौ।
धर्म्म पु० न०। धृ-मन्। शास्त्रविहितकर्म्मानुष्ठानजन्ये भाविफलसाधनभूते शुभादृष्टे "श्रुतिस्मृतिभ्यामुदितं यत् स धर्म" इत्युक्ते श्रौते स्मार्त्ते कर्मणि। "विहितक्रियया साध्यो धर्मः पुंसां गुणो मतः" इत्युक्ते कर्मजन्ये अदृष्टे च आत्मनि, देहधारणात्, जीवे, आचारे, वस्तुगुणरूपे, स्वभावे, उपमायाम्, यागादौ, अहिंसायां, न्याये, उपनिषदि, यमे, सोमाध्यायिनि, सत्यरूपे, धनुषि ज्योतिषोक्ते लग्नात् नवमस्थाने च। दानादौ न०।
धर्म्मक्षेत्र न० "ब्रह्मवेदिः कुरुक्षेत्रं पञ्चरामह्रदान्तरम्। धर्म्मक्षेत्रं कुरुक्षेत्रं द्वादशयोजनावधी"त्युक्ते कुरुक्षेत्रे। ईत०। धर्म्मस्थाने
धर्म्मघट पु० धर्म्मार्थो घटः। सौरवैशाखे प्रत्यहं दातव्ये सुगन्धोदकपूर्णे घटे।
धर्म्मचारिणी स्त्री० धर्मं दाम्पत्यधर्मं चरति चर-णिनि। भार्य्यायाम्।
धर्म्मदान न० "पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम्। केवलं धर्म्मबुद्धा यत् धर्मदानं प्रचक्षते" इत्युक्ते प्रयोजनान्तरानुद्देशेन दाने
धर्म्मद्रवी स्त्री० धर्मजनको द्रवो यस्याः। "विष्णुपादाब्जसंभूते! गङ्गे त्रिपथगामिनि! धर्म्मद्रवीति विख्याते" इत्युक्तायां गङ्गायाम्।
धर्म्मध्वजिन् त्रि० धर्म्मोध्वजमिवास्यस्य इनि। जीविकार्थं जटादिधारिणि
धर्म्मपत्नी स्त्री० धर्म्मार्थं पत्नी। प्रथमं समूढायां सवर्णायाम् स्त्रियां, कीर्त्तौ, वाचि, स्मृतौ, मेधायां, धृतौ, क्षमायाञ्च।
धर्म्मपुत्र पु० इत०। युधिष्ठिरे। [यमे, युधिष्ठिरे च।
धर्म्मराज पु० धर्मश्च राजते राज-अच्। धर्मस्य राजा वा टच् स०।

धर्म्मलक्षण न० धर्म्मो लक्ष्यतेऽनेन लक्ष–ल्युट्। "धृतिः क्षमादमो-ऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधः दशकं धर्म-लक्षण"मित्युक्ते धृत्यादौ दशके।

धर्म्मवाणिजिक पु० वणिगेव स्वार्थे ठक् वाणिजिक; ७त०। पुण्यक-र्मफलाभिसन्धुके। [दातरि।

धर्म्मवैतंसिक पु० धामेन धनमुपार्ज्जयतीति धर्म्मिकत्वख्यापनाय

धर्म्मशास्त्र न० धर्म्मप्रतिपादकं शास्त्रम्। मन्वादिप्रयुक्ते स्मृतिशास्त्रे।

धर्म्मशील त्रि० धर्म्मः शीलं सततमनुष्ठेयं यस्य। धार्म्मिके।

धर्म्मसंस्थापन न० धर्म्मस्य सम्यक् अधर्म्मनिराकरणेन स्थापनम्। "वेदोदितधर्म्मव्यवस्थापने धर्म्मसंस्थापनार्थैव सम्भवामि युगेयुगे" इति पुराणम्। [मन्वादिप्रोक्ते धर्म्मप्रतिपादनार्थे शास्त्रे।

धर्म्मसंहिता स्त्री० धर्म्मबोधार्थं संहिता ब्रह्मा रचिता सम्+धा–क्त।

धर्म्मात्मन् पु० धर्म्म आत्मा स्वभावो यस्य। धर्म्मानुगतचित्ते।

धर्म्माधिकरण पु० धर्म्मार्थमधिक्रियतेऽसौ कर्म्मणि ल्युट्। "सभः शास्त्रौ च मित्रे च धर्म्मशास्त्रविशारदः। "विप्रमुख्यः कुलीनश्च धर्म्माधिकरणो भवे"दित्युक्ते धर्म्माध्यक्षे। ६त०। "धर्म्मशास्त्रा-नुसारेण अर्थशास्त्रनिरूपणम्। यत्राधिक्रियते स्थाने धर्म्माधि-करणं हि त"दित्युक्ते विचारस्थाने न०।

धर्म्माध्यक्ष पु० "कुलशीलगुणोपेतः सर्व्वकर्म्मपरायणः। प्रधीरः प्रेष-णाध्यक्षो धर्म्माध्यक्षोऽभिधीयते" इत्युक्ते धर्म्माधिकरणे। ६त०। सर्व्वधर्म्मस्य साक्षिणि परमेश्वरे च।

धर्म्माभास पु० धर्म्मइवाभासते अशास्त्रोक्तत्वात्। "स्मृतिस्मृतिभ्यासु-दितं यत् स धर्म्मः प्रकीर्त्तितः। अन्यशास्त्रेषु यः प्रोक्तो धर्म्मा-भासः स उच्यते" इत्युक्ते अन्यशास्त्रोक्ते अप्रशस्ते धर्म्मे।

धर्म्मासन न० ६त०। राज्ञोधर्म्मतोदर्शनार्थमासने।

धर्म्मिन् त्रि० धर्म्म+अस्त्यर्थे इनि। पुण्यवति वस्तुगुणस्वरूपधर्म्मयुक्ते त्रि०।

धर्म्मिष्ठ त्रि० अतिशयेन धर्म्मी इष्ठन् इनेर्लुक्। अत्यन्तधर्म्मवति।

धर्म्य त्रि० धर्म्मादनपेतः धर्म्मेण प्राप्तो वा यत् । धर्मयुक्ते धर्मलभ्ये च ।
धर्ष पु० धृष–घञ् । प्रागल्भ्ये, अमर्षे, शक्तिभञ्जने, संस्तवे, हिंसायाञ्च
धर्षण न० धृष–भावे ल्युट् । परिभवे, रमणे धर्षशब्दार्थे च । कर्म्मणि ल्युट् । अभिसारिकायां स्त्रियाम् स्त्री० ङीप् ।
धर्षित न० धृष–भावे क्त । मैथुने । कर्मणि क्त । कृतधर्षणे तिरस्कृते च त्रि० । अक्षतायां स्त्रियाम् स्त्री० ।
धव गतौ भ्वा० पर० सक० सेट् इदित् । धन्वति अधन्वीत् ।
धव पु० धवति धुवति धुनोति धुनाति वा धु धू-वा अच् । पत्यौ, धूर्त्ते, नरे, स्वनामख्याते वृक्षे च । भावे अप् । कर्म्मणे ।
धवल पु० धवं कर्म्म लाति ला–क । धववृक्षे, वीरणवृक्षे श्वेतमरिचे, वृषभश्रेष्ठे, चीनकर्पूरे, श्वेतवर्णे च । तद्वति, सुन्दरे च त्रि० । शुक्लवर्णायां गवि स्त्री० टाप् । गौरा० ङीष् वा ।
धवलपक्ष पु० धवलौ पक्षौ यस्य । हंसे । कर्म्म० । शुक्लपक्षे ।
धवलमृत्तिका स्त्री० कर्म्म० । खटिन्याम् । (खड़ि) ।
धवलोत्पल न० कर्म्म० । कुमुदे ।
धविच न० धूयतेऽनेन धू–इत्र । व्यजने ।
धा धारणे पोषणे दाने च जुहो० उभ० सक० अनिट् । दधाति धत्ते अधात् अधित । धात्तमम् । [शुक्लभेदे ।
धातकी स्त्री० धातुं करोति णिच् कृञ् प्रियङ्ग्वादि० ङीष् (धाइ)
धातु पु० धा–तुन् । "धारणाद्धातवस्ते स्युर्वातपित्तकफात्मय" इत्युक्तेषु वातादिषु "रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातव" इत्युक्तेषु, रसादिषु, "सुवर्णरूप्यताम्राणि हरितालं मनःशिला । गौरिकाञ्जनकासीससीसकोहं सकिङ्कुलम् । गन्धकोऽभ्रकमित्याद्या धातवोगिरिसम्भवा" इत्युक्तेषु, सुवर्णादिषु, "हेमतारारनागाश्च ताम्ररङ्गे च तीक्ष्णकम् । कांस्यकं कान्तलौहञ्च धातवो नव कीर्त्तिता इत्युक्तेषु हेमादिषु नवसु, "हिरण्यं रजतं कांस्यं ताम्रं सीसकमेव च । रङ्गमायसं रैत्यञ्च धातवोऽष्टौ प्रकीर्त्तिता इत्युक्तेषु अष्टसु, "सुवर्णं रजतं ताम्रं लौहं कुप्यञ्च पारदम् ।

शैङ्गश्च शीसकञ्चैव दृत्यष्टौ देवसम्भवा" इत्युक्तेषु अष्टसु वस्तुषु, लोकेषु सर्वधारणात् परमेश्वरे स एष चिद्धातुरिति श्रुतिः। व्याकरणोक्ते गणपठिते क्रियावाचके भूप्रभृतौ शब्दभेदे च।

धातुघ्न न० धातून् हन्ति हन-टक्। काङ्क्षिके।

धातुद्रावक न० धातून् द्रावयति स्वसम्बन्धात् द्रु-णिच् ण्वुल्। (सोहागा) टङ्कणे। [पुष्पाम्।

धातुपुष्पिका स्त्री० धातुरिव पुष्पमस्यस्य ठन्। (धाइफुल) धातु-

धातुपुष्पी स्त्री० धातुरिव पुष्पमस्या ङीष्। (धाइफुल) धातुपुष्पाम्

धातुभृत् पु० धातून् बिभर्त्ति भृ-क्विप्। पर्वते देहस्थ धातुभेदे रसकृषे प्रथमे धातौ च।

धातुमाक्षिक न० धातुषु मध्ये माक्षिकम्। माक्षिके उपधातुभेदे।

धातुमारिणी स्त्री० धातून् स्वर्णादीन् मारयति मृ-णिच्। णिनि। मर्ज्जिकायां (सोहागा)।

धातुर्वैरिन् पु० ई तत्०। गन्धके।

धातुशिखर न० धातूनां शेखरमिव। कांसीसे उपधातुभेदे।

धात्र पु० दधाति धा-ष्ट्रन्। चतुर्मुखे ब्रह्मणि विष्णौ च। धारण-कर्त्तरि, पालके च त्रि०। [स्वार्थे कन् तुल्यः। अर्कवृक्षे।

धात्रपुष्पी स्त्री० धात्र पोषकं पुष्पं यस्याः। (धाइफुल) वृक्षभेदे।

धात्री स्त्री० धीयते पीयतेऽसौ धा-ष्ट्रन् पित्त्वात् ङीष्। मातरि, आमलक्यान्च। स्वार्थे कन्। आमलक्याम्।

धात्रीपत्र न० धात्र्या इव पत्रमस्य। तालीशपत्रे। ई तत्०। आमलकीदले। [तुल्यः। तत्रैवार्थे।

धात्रिपत्री स्त्री० धात्री+इवार्थे टच्। उपमातरि (धाइमा) स्वार्थे कन्

धानक न० धीयते कर्म्मणि ल्युट्। संज्ञायां कन्। धान्याके।

धानी स्त्री० धा-न-ङीष्। धान्याके, अङ्कुरे, चूर्णे सक्तुषु च। स्वार्थे क० व०।

धानाचूर्ण न० धानानां भृष्टयवानां चूर्णम्। सक्तुषु (छातु)।

धानी स्त्री० धीयतेऽस्याम् आधारे—ल्युट् । ङीप् । आधारे यथा राजधानी सत्यधानीत्यादि । पीलुवृक्षे च ।

धानुष्क त्रि० धनुःप्रहरणमस्य ठक् धनुषा जीवति ठञ् वा । धनुर्द्धरे । अपामार्गे स्त्री० ।

धानुष्य पु० धनुषे हितः यञ् । वंशे ।

धानेय न० धानाय साधु ढक् । धन्याके ।

धान्य न० धाने भोजने साधु यत् । सतुषे तण्डुलादौ शालितिल-यवादौ च तद्भेदो वाचस्पत्ये । धन्याके, चतस्रोऽञ्जलिपरिमाणे पूर्वद्वारवृक्षे च ।

धान्यकीष्टक न० ईत० । धान्यरक्षार्थे वृक्षे (गोला) ।

धान्यत्वच् स्त्री० ईत० । तुषे

धान्यपञ्चक न० ईत० । "शालिधान्यं व्रीहिधान्यं शूकधान्यं तृतीयकम् । शिम्बिधान्यं क्षुद्रधान्यमित्युक्तं धान्यपञ्चकमित्युक्तेषु शाल्यादिषु ।

धान्यराज पु० धान्येषु राजा टच् समा० । यवे । [वार्द्धुषिकत्वे ।

धान्यवर्द्धन न० धान्यस्य ऋणप्रयुक्तस्य वर्द्धनं यत्र । (बाड़ी)

धान्यवीर पु० धान्येषु वीर इव बलहेतुत्वात् । नाथे ।

धान्यशीर्षक न० ईत० । धान्यस्य मञ्जर्याम् धान्याग्रादयोऽध्यत्र ।

धान्याक न० धान्यमिवाकति अक—कुटिलगतौ अच् । धन्याके ।

धान्याचल पु० दानार्थं विधानेन धान्यनिर्म्मिते पर्व्वते । तत् प्रकारस्तु वाचस्पत्ये ।

धान्याम्ल न० धान्येषु अभिषुतमम्लम् शाक० । काञ्जिके ।

धान्योत्तम पु० धान्येषूत्तमः । शालिधान्ये ।

धामन् न० धा—मनिन् । गेहे, देहे, रश्मौ, आश्रये, स्थाने जन्मनि, तिथि, ज्योतिषि, प्रभावे, स्वयं प्रकाशे च ।

धामनिधि पु० धामानि तेजांसि निधीयन्तेऽत्र नि+धा+कि । सूर्य्ये, अर्कवृक्षे च । [याम्, घोषके च ।

धामार्गव पु० धान्नोऽर्गं याति वा—क । अपामार्गे, पीतघोषा

धाय्या स्त्री० धीयते पुष्यतेऽग्निरनया, धीयतेऽर्थ्यते समिदनया वाधा-ण्यत् नि० । अग्निज्वालनार्थायाङ्गवि सामिधेन्याम् ।

धार न० धाराभिर्निर्वृत्तम् अण् । "धाराभिः पतितं तोयं गृहीतं स्फोतवासमा" शिलायां वसुधायां वा धौतायां पतितञ्च यत्' इत्युपक्रम्य "भाजने मृण्मये वापि स्थापितं धारमुच्यते" इत्युक्ते शिलादिभाजनस्थिते वर्षोद्भवे जले ।

धारणा स्त्री० धृ-णिच्-युच् । "यमादियुगसंयुक्ते मनसः स्थितिरात्मनि । धारणा प्रोच्यते सद्भिर्योगशास्त्रविशारदैः" इत्युक्तायामात्मनि चित्तस्य स्थितौ, मर्य्यादायां न्याय्यपथस्थितौ, निश्चये च । धृ-णिच्-ल्युट् । नाड्यां श्रेण्यौ च स्त्री० ङीप् ।

धारा स्त्री० धृ-णिच्-अङ् । घटादिच्छिद्रे, सन्ततौ, द्रवद्रव्यस्य सन्तत्या पतने, खड्गादेर्निशितायै, उत्कर्षे यशसि, अतिवृष्टौ, समूहे, मेघस्यासारवर्षणे, सद्मनि पुरीभेदे, "अश्वानान्तु गतिर्धारा विभिन्ना सा च पञ्चधे" त्युक्ते अश्वानां गतिपञ्चके, "इतीव धारासम्पातवर्षीयं" ति नै० । सैन्यायिमस्कन्धे च ।

धाराकदम्ब पु० धाराकालिकः कदम्बः शक० । प्रावृषेण्ये कदम्बभेदे । धाराणां कदम्बं समूहो यत्र । मेघे ।

धाराट पु० धारामटति धारां, धारया वा अटति अच् । चातके, अश्वे, मेघे, मत्तमातङ्गे च ।

धाराधर पु० धारां धारयति धृ-णिच्-अच् हृस्वः । मेघे धाराधर ! धरा वारिधारये" ति चातकाष्टकम् ।

धाराफल पु० धारायुक्तानि श्रेणीबद्धानि फलान्यस्य । मदनवृक्षे ।

धारावाहिन् त्रि० धारया सन्तत्या वहति वह-णिनि । सन्तत्या पातके, क्रमेणाविच्छेदेन जायमाने च । स्वार्थे कन् । धारावाहिकोऽप्यत्रार्थे ।

धारासम्पात पु० धाराणां सम्पातः पतनम् । महावृष्टौ ।

धारास्नुही स्त्री० धारा स्नुता स्नुही शक० । त्रिधारायां स्नुह्याम् (तेकाटासिज्) ।

धारिणी स्त्री० धृ–णिनि । भूमौ, शाल्मलिवृक्षे ।

धारिन् पु० धृ–णिनि । पीलुवृक्षे । धारणकर्त्तरि त्रि० ।

धार्त्तराष्ट्र पु० धृतराष्ट्रे सुराजदेशे भवः अण् । धर्म्मभेदे कृष्णवर्ण-चञ्चुचरणोपलक्षिते श्वेतकाये हंसे च । धृतराष्ट्रस्यापत्यम् अण् । दुर्य्योधनादौ "निघ्नन्ति धार्त्तराष्ट्रा" इति वेणीसंहारम् ।

धार्म्मिक त्रि धर्म्मं चरति सततमनुशीलयति ठक् । धर्म्मशीले ।

धार्ष्ट्य न० धृष्टस्य भावः ष्यञ् । निर्लज्जत्वे ।

धाव जवे सक० शुद्धौ च भ्वा० आत्म० शीघ्रगतौ अक० सेट् । धावते अधाविष्ट । सन्नेर्धावादेशस्तु पर० ।

धावक पु० धाव–णिच्–ण्वुल् । रजके । धाव–ण्वुल् । शीघ्रगे । धावनकर्त्तरि त्रि० (धाउड़िया) ।

धावन न० धाव–ल्युट् । शोधने, शीघ्रगमने च ।

धावनि(नी) स्त्री० धाव–अनि वा ङीप् । वृश्चिकपर्य्यां कण्टकार्य्याञ्च ।

धि धृतौ तु० पर० सक० अनिट् धियति अधैषीत् ।

धिक् अव्य० धा–धक्–वा डिकि । अनिष्टशब्दैर्भयजनने, निर्भर्त्सने निन्दायाम्, "धिग्धिक् शक्रजितम्" इति नाटकम् । निन्दनीये च । तदर्थे तु न द्वितीया "धिक् च कवितं" त्युद्भटः ।

धिक्कार पु० धिक्+कृ–घञ् । तिरस्कारे ।

धिक्कृत त्रि० धिक् निन्दनीयः कृतः कृ–क्त । निर्भर्त्सिते ।

धिक्ष सन्दीपने सक० क्षये जीवने अक० भ्वा० आत्मा० सेट् । धिक्षते अधिक्षिष्ट । [अधिक्षीत् ।

धिन्व प्रीणने अक० गतौ सक० स्वा० पर० सेट् इदित् । धिनोति

धिष रवे जु० पर० अक० सेट् । दिधेष्टि अधेषीत् ।

धिषण पु० धृष–क्यु धिषादेशः । बृहस्पतौ ।

धिषणा स्त्री० धृष्णोत्यनया धृष क्यु धिषादेशः । बुद्धौ ।

धिष्ण्य न० धृष–ण्य नि० । स्थाने, गृहे, शक्तौ, नक्षत्रे च । अग्नौ, अग्निभेदे, शुक्रे च पु० । [धीनः ।

धी अनादरे आराधने च दिवा० आत्म० सक० अनिट् धीयते अधेष्ट ।

धी स्त्री० ध्यै–क्विप् संप्रसारणञ्च । बुद्धौ ज्ञाने ।

धीगुण पु० ईत० । "शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा । ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणा" इत्युक्तेषु अष्टसु बुद्धिधर्मेषु ।

धीमत् पु० धीः प्रज्ञास्त्यस्य मतुप् । बृहस्पतौ । बुद्धिमति पण्डितादौ त्रि० ।

धीर अवज्ञायां अद० चुरा० उभ० सक० सेट् । नित्यमवपूर्वः । अवधीरयति–ते अवादिधीरत् त । अवधीर्य ।

धीर त्रि० धियं राति रा–क, धियमीरयति ईर–अण् धी–क्रन् वा । धैर्यान्विते, विनीते, बलयुते, पण्डिते च । ह्रस्वभोषधौ, बलिराजे, बुद्धिप्रेरके बुद्धिसाक्षिणि परमेश्वरे च पु० । वुङ्कुमे न० । नायिकाभेदे, काकोल्यां, महाज्योतिष्मत्यां, स्थिरायां चित्तवृत्तौ च स्त्री० ।

धीराधीरा स्त्री० धीरा च अधीरा च । नायिकाभेदे ।

धीरोदात्त पु० नायकभेदे ।

धीवर पु० दधाति मत्स्यान् धा–क्वरच् नि० । कैवर्त्ते ।

धीशक्ति स्त्री० ईत० शुश्रूषादिषु अष्टसु धीगुणशब्दे दर्शितेषु बुद्धिगुणेषु ।

धीसख पु० धियः सखा टच्समा० । आमात्ये धीसचिवे ।

धु कम्पने स्वा० उभ० सक० अनिट् । धुनोति धुनीते । अधौषीत् अधोष्ट ।

धुक्ष सन्दीपने भ्वा० आत्म० सक० सेट् । धुक्षते । अधुक्षिष्ट ।

धुत त्रि० धु–क्त । त्यक्ते, कम्पिते च ।

धुनि(नी) स्त्री० धुनोति वेतसादीन् धु–निक् वा ङीप् । नदीमात्रे ।

धुन्धुमार पु० बृहदश्वसुते, इन्द्रगोपे कीटे, बृहद्धूमे (भुल) च ।

धुर्(रा) स्त्री० धुर्व–क्विप् वा टाप् । चिन्तायाम्, रथाद्यग्रभागे, यानमुखे, भारे च ।

धुरन्धर त्रि० धुरं धारयति धृ–णिच्–खच् मुम् ह्रस्वश्च । भारवाहके वृषादौ, भारसहे च । धवलवृक्षे पु० ।

धुरीण त्रि० धुरं वहति ख । भारवाहके, ज्ञेये च ।

धुर्य्य त्रि० धुरं वहति यत् । भारवाहके, श्रेष्ठे च ।

धुर्व हिंसे भ्वा० पर० सक० सेट् धूर्वति अधूर्वीत् । धूर्त्तः ।

धुविचन ० कु० धु–इत्र । यत्नादौ वक्ष्यमाणे ।

धु(धू)स्तू(स्तु)र पु० धूस–क्विप् तूर–क कर्म० ष० वा दृस्तूरः । (धुतुरा) ख्याते वृक्षे ।

धू कम्पने भ्वा० उभ० सक० वेट् । धवति ते अधावीत् अधविष्ट अधोष्ट ।

धू कम्पने वा० चुरा० उभ० पन्थे तुदा० कु० पर० सक० सेट् । धूनयति ते धुवति अदूधुनत् अधुवीत् ।

धू कम्पने स्वा० क्र्यादि० प्वादिश्च उभ० सक० वेट् । धूनोति धूनुते धुनाति धुनीते । अधावीत् अधविष्ट अधोष्ट "धूनोति चम्मकवनानि धुनोत्यशोक"मिति । "वायुर्विधूनयती"ति च कविरहस्यम् ।

धूत त्रि० धू–क्त । भर्त्सिते, कम्पिते, तर्किते त्यक्ते च ।

धूपक पु० धूनयति संधुक्षते वह्निम् चु० धू–ण्वुल् नुगागमः । यज्ञधूपे (धुना) । [धुपत्–त ।

धूप दीप्तौ चुरा०उभ०अक०दीपने सक० सेट् । धूपयति–ते । अदूधूपत् तापे अक०तापने सक० भ्वा० पर० सेट् । धूपायति अधूपायीत् अधुपीत् । [गन्धद्रव्योत्थे धूमे, तत्साधनद्रव्ये च ।

धूप पु० धूपयति रोगान् दोषान् वा धूप–अच् । गुग्गुलुप्रभृति

धूपन पु० धूप–ल्यु । यज्ञधूपे (धुना) ।

धूपवृक्ष पु० ६त० सरलवृक्षे । धूपोऽङ्गमस्य । धूपाङ्गमयत्र ।

धूपित त्रि० धूप–क्त वा आयासादिः । अध्वादिगमनेन श्रान्ते, सन्तापिते च । [ध्वजे पदार्थे ।

धूम पु० धू–मक् । आर्द्रदारुजाते मेघकज्जलयोः कारणे वह्नि

धूमकेतन पु० धूम–केतनो यस्य । वह्नौ । धूम इव केतनः । तारापुञ्जात्मके धूमकेतौ उत्पातभेदे ।

धूमकेतु पु० धूमइव केतुः । उत्पातरूपेऽशुभसूचके तारापुञ्जभेदे । ६त० । वह्नौ, धूमध्वजादयोऽप्यत्र ।

धूमगन्धिका न० धूमस्येव गन्धोऽस्यास्य ठन् । रोहिषतृणे ।

धूममहिषी स्त्री० धूमस्य महिषीव । कृष्णवर्णिकायाम् ।
धूमयोनि पु० धूमोयोनिरस्य । मेघे, शुक्लो च । ह्रस्व० । वह्नौ आर्द्रकाष्ठे च ।
धूमल पु० धूमं धूमवर्णं लाति ला—क । कृष्णलोहिते वर्णे । तद्वति त्रि० ।
धूमाभ पु० धूमस्येवाभा यस्य । धूम्रवर्णे । तद्वति त्रि० ।
धूमावती स्त्री० महाविद्याभेदे । [यत् । धूमसाधने त्रि० ।
धूम्या स्त्री० धूमानां समूहः प्राग्वादि० य । धूमसमूहे । धूमाय हितं
धूम्याट पु० धूम्या इव अटति अट—अच् । (झिङ्गा) पक्षिभेदे ।
धूम्र पु० धूमं तद्वर्णं राति रा—क० पृ० । सिन्धुके, खरलोमवर्णाभे कृष्णलोहिते वर्णे च । तद्वति त्रि० ।
धूम्रक पु० धूम्रइव कायति कै—क । उष्ट्रे ।
धूम्रलोचन पु० धूम्रे लोचने यस्य । कपोते, महिषासुरसेनापतिभेदे च
धूम्रवर्ण पु० धूम्रो वर्णोऽस्य । सिन्धुके, कृष्णलोहितवर्णे च । तद्—युक्ते त्रि० । [तस्य धूम्रसारत्वात्तथात्वम् ।
धूम्रिका स्त्री० धूम्रोवर्णः सारोऽस्यस्य ठन् । (शिशु) शिंशपा वृक्षे
धूर् वधे गतौ च दि० आ० सक० सेट् । धूर्यते अभूरिष्ट । धूर्त्तः
धूर्जटि पु० जट—संघाते इन् धुरस्त्रैलोक्यचिन्तायां जटिः सङ्घातोऽस्य । शिवे ।
धूर्त्त पु० धूर्व—धूर—क्त । धूर्तुरवृक्षे, चोरकवृक्षे, नायकभेदे, "धूर्त्तोऽपरां चुम्बतीति सा० ३५० । लौहकीटे, विड्लवणे च । द्यूतकारके, वञ्चके च त्रि० ।
धूर्त्तक पु० धूर्त्त इव वञ्चक इवार्थे कन् । शृगाले ।
धूर्वह त्रि० धुरं वहति वह—अच् रेफे दीर्घः । भारवाहके धुरन्धरे । धूर्वह इति वहयुक्तकल्पं प्रागादिकम् ।
धूलि(ली) स्त्री० धू—लिक् वा ङीप् । रजसि परागे ।
धूलिध्वज पु० धूलिरेव ध्वजोऽस्य । वायौ ।
धूलिपुष्पी स्त्री० धूलिप्रचुरं पुष्पमस्या ङीप् । केतक्याम् । खार्जू

कन् ह्रस्वः । अल्पार्थे । [च । ईत० । धूलीसमूहे न० ।

धूलिकदम्बपु० धूलीनां कदम्बं यत्र । कदम्बवृक्षे, वरुणवृक्षे, तिलिशवृक्षे

धूश(ष)(स) शोभने चुरा० उभ०सक० सेट् । धूश(ष)(स)यति ते अद् धुश(ष)(स)त् त ।

धूमर पु० धू-मर किच्च न षत्वम् । गर्दभे, उष्ट्रे, कपोते, तैलाकारे, ईषत्माण्डुवर्णे, कृष्णश्वेतवर्णे, शुक्लपीतवर्णे च तत्तद्-र्णवति त्रि० । [शुशुड्डवृक्षे ।

धूमरपत्रिका स्त्री० धूमरं पत्रमस्त्यस्याः ठन् । (त्रातिशुंड़ा) वृक्षे

धृ पतने भ्वा० आ० अक० अनिट् । धरते अधृत । [अधृत ।

धृ स्थितौ अक० धृतौ सक० भ्वा० उभ० अनिट् । धरति ते अधार्षीत्

धृ स्थितौ अक० धृतौ० सक० तुदा० आ० अनिट् । ध्रियते अधृत ।

धृ धारणे, चुरा० उभ० सक० अनिट् । धारयति ते अदीधरत् त ।

धृज गतौ भ्वा० पर० सक० सेट् इदित् । धृञ्जति अधृञ्जीत् ।

धृतराष्ट्र पु० चन्द्रवंश्ये दुर्योधनपितरि नृपभेदे, नागभेदे, पक्षिभेदे च ।

धृति स्त्री० धृ-क्तिन् । तुष्टौ, धारणे, योगे, विष्कम्भावधिके अष्टमे योगे, सुखे, धारणायाम्, अवसादेऽपि शरीरादे स्तम्भनशक्तौ, अष्टादशाक्षरपादके छन्दोभेदे, अष्टादशसङ्ख्यायाञ्च । [धृत्वा ।

धृष संहतौ अक०हिंसे सक०भ्वा०पर० सेट् । धर्षति अधर्षीत् धर्षित्वा

धृष प्रागल्भ्ये स्वा० पर० अक० सेट् । धृष्णोति अधर्षीत् । धृष्टः ।

धृष सामर्थ्यविज्ञाने चुरा० आत्म० अक० सेट् । धर्षयते अदीधृषत अदधर्षत ।

धृष क्रोधे अभिसंधे च वा चु० उभ० पक्षे भ्वा० सक० सेट् । धर्षयति ते धर्षति अदीधृषत् त अदधर्षत् त अधर्षीत् ।

धृषाज् त्रि० धृष-नाजिच् । प्रगल्भे निर्लज्जे वेगुदले च (कञ्चो) ।

धृषु त्रि० धृष-कु । प्रगल्भे निर्लज्जे च ।

धृष्ट त्रि० धृष-क्त । निर्लज्जे, प्रगल्भे, नायकभेदे च ।

धृष्टद्युम्न पु० धृष्टं प्रगल्भं द्युम्नं बलं यस्य । द्रुपदपुत्रे ।

धेनु स्त्री० धयति सुतान् धे-नु ह्रस्व । नवप्रसूतायां गवि ।

धेनुक पु० धेनुरिव इवार्थे कन्। असुरभेदे। हस्तिन्यां स्त्री०। स्वार्थे कन्। धेनौ। [कफादयोऽश्यत्व।

धेनुकसूदन पु० धेनुकं सूदयति हिनस्ति सूद-ल्यु। श्रीकृष्णे धेनु-

धेनुदुग्धकर पु० धेनोर्दुग्धमिव किरति कृ-अच्। गर्जरे (गाजर)।

धेनुष्या स्त्री० धेनु+संज्ञायां यत् सुक् च। कृणशोधनार्थसुत्तमर्णाय बन्धकत्वेन दीयमानायां धेनौ।

धैनुक न० धेनूनां समूहः ठक्। धेनुसमूहे।

धैर्य्य न० धीरस्य भावः ष्यञ् "स्थिरचित्तोन्नतियां तु तद्धैर्य्यमिति गीयते" इत्युक्ते मनसः स्थैर्य्ये, औन्नत्ये, "मनसो निर्विकारत्वं धैर्य्यं सत्स्वपि हेतुषु"ल्युक्ते मनसो विकाराभावे" अव्याकुलत्वे, विघ्नाद्युपस्थितावपि प्रारब्धापरित्यागहेतौ चित्तवृत्तिभेदे च।

धैवत पु० "गत्वा नाभेरधोभागं वस्तिं प्राप्योर्द्ध्वगः पुनः। धावन्निव च यो याति कण्ठं देशं स धैवत" इत्युक्ते कण्ठोत्थिते स्वरभेदे।

धोर गतिचातुर्य्ये भ्वा० पर० अक० सेट्। धोरति अधोरीत्। णिच् अदुधोरत् त। [ल्युट्। अश्वगतिभेदे।

धोरण न०धोरत्यनेन धोर-ल्यु ल्युट् वा। हस्त्यश्वरथादौ याने। भावे

धोरणि(णी) स्त्री० धोर-अनि वा ङीप्। परम्परायाम् "सद्यः खलत्नमाधुरीधाराधोरणिधौतधामनी"ल्युट्टः। [रजते न०।

धौत त्रि० धाव-क्त जठ्। मार्ज्जिते, प्रक्षालिते, उत्तेजिते, शुभ्रे च।

धौतकौषेय न० कर्म०। प्रक्षालिते क्षौमकोषजाते वस्त्रे।

धौरित न० धोर-क्त प्रज्ञाद्यण्। अश्वानां चतुरायां गतौ। स्वार्थे कन्। तत्रैवार्थे।

धौरेय त्रि० धुरं वहति ढक्। भारवाहके वृषादौ।

ध्मा अग्निसंयुतौ दीर्घश्वासहेतुके शब्दभेदे भ्वा० पर० तादृश शब्देन वादने सक० अनिट्। धमति अध्मासीत्।

ध्मात त्रि० ध्मात-क्त। संधुक्षिते दीर्घश्वासहेतुकशब्दयुक्ते।

ध्माक्ष आकाङ्क्षे सक० घोरत्वे अक० भ्वा० पर० सेट् इदित्। ध्माङ्क्षति। अध्माङ्क्षीत्।

ध्वाङ्क्ष पु० ध्वाङ्क्षि–अच्। काके, मत्स्यभक्षके, पक्षिभेदे, भिक्षुके च कङ्कोलिकायां स्त्री० गौ० ङीष्।

ध्वाङ्क्षोली स्त्री० ध्वाङ्क्षि–ओल गौ० ङीष् काकोलीलतायाम्।

ध्यान न० ध्यै–ल्युट्। चिन्तने, ध्येयवस्तुविषयचिन्तने, चित्तैकस्यैकतानप्रवाहे, "ब्रह्मैवाहमिति सद्वृत्त्या निरालम्बतया स्थितिः। ध्यानशब्देन विख्याता परमानन्ददायिनी"ति वेदान्तोक्ते ब्रह्मविषये चित्तस्थैर्ये "ध्यै चिन्तायां क्षतो धातुश्चिन्ता तत्त्वेन निश्चला। एतद् ध्यानमिह प्रोक्त"मिति तन्त्रोक्ते ध्येयस्य चित्तस्थिरतया निश्चये च। [कर्तृ। रोहिषवृक्षे।

ध्याम न० ध्यायते पशुभिः ध्यै–मन्। गन्धतृणे दमनकाख्ये च। संज्ञायां

ध्यै चिन्तने भ्वा० पर० सक० अनिट्। ध्यायति अध्यासीत्।

ध्रज गतौ भ्वा० पर० सक० सेट्। ध्रजति अध्राजीत् अध्रजीत् क्वयमिदित्त्वे ध्रङ्क्षति अध्रङ्क्षीत्।

ध्रण ध्याने भ्वा० पर० अक० सेट्। ध्रणति अध्रणीत्–अध्राणीत्।

ध्रस कणत्र आदाने क्र्या० पर० सक० सेट्। ध्रस्नाति अध्रसीत् अध्राषीत्। ध्रसित्वा ध्रस्वा। [अदिप्रभृत्व त।

ध्रस उत्क्षेपे कणत्र आदाने च चुरा०उभ० सक० सेट्। ध्रासयति ते

ध्राङ्क्ष काङ्क्षे घोररवे च भ्वा०प० स०सेट् क्वदित्। ध्राङ्क्षति अध्राङ्क्षीत्।

ध्राख शोधने अलमर्थे च भ्वा० पर० सक० सेट्। ध्राखति अध्राखीत्। धक्ङि अदध्राखत्।

ध्राघ शक्तौ भ्वा०आ०अक० सेट्। ध्राघते अध्राघिष्ट। धक्ङि अदध्राघत्

ध्राड विभेदे भ्वा० आत्म० सक० सेट्। ध्राडते अध्राडिष्ट।

ध्रिज गतौ भ्वा० पर० सक० सेट्। ध्रेजति अध्रेजीत्।

ध्रु स्थैर्ये अक० सर्पणे सक० तु० कु० पर० अनिट्। ध्रुवति अध्रुवीत् दुध्राव।

ध्रु स्थैर्ये अक० सर्पणे सक० भ्वा० पर० अनिट्। ध्रवति अध्रौषीत्।

ध्रुव पु० कु० ध्रु–अच्। शङ्खौ, विष्णौ, हरे, उत्तानपादतनयपुत्रे बहुभेदे, ज्योतिषोक्ते योगभेदे, नासाग्रे, स्थाणौ, ललाटस्थे आवर्त्त–

भेदे, भूगोलस्योत्तरदक्षिणकेन्द्रद्वयोपरिस्थे, स्थिरे ताराभेदे च। निश्चिते, तर्के, आकाशे, उत्तराद्वयरोहिणी नक्षत्रेषु च न०। सन्ततेऽपरिणामिनित्ये, स्थिरे च त्रि०। मूर्च्छायाम्, शालम-यष्यांश्च स्त्री०। मुरारिपक्षिणि पु० स्त्री०। संज्ञायां कन्। गीतिभेदे न० (ध्रुवा)। [चक्रि न हृस्वः।

ध्रेक उत्क्षेपे शब्दे च भ्वा० आत्म० अक० सेट्। ध्रेकते अध्रेकिष्ट।

ध्रै तृप्तौ भ्वा० पर० अक० अनिट्। ध्रायति अध्रासीत्।

ध्रौव्य न० ध्रुवस्य भावः ष्यञ्। स्थैर्ये।

ध्वंस पु० ध्वन्स घञ्। विनाशे।

ध्वंसन न० ध्वन्स ल्युट्। अधःपतने, गमने, नाशे च।

ध्वज गतौ भ्वा० पर० सक० सेट्। ध्वजति अध्वजीत् अध्वाजीत् अयमिदितपि। ध्वङ्क्षति अध्वङ्क्षीत्।

ध्वज पु० ध्वज-अच्। शौण्डिके, सर्पे च। चतुष्कोणाकारे वंशद-ण्डोपरिस्थे वस्त्रखण्डे, खड्गाङ्गे, मेढ्रे च पु० न०।

ध्वजद्रुम पु० ध्वजाकारः द्रुमः। तालवृक्षे। [वृक्षके रोगभेदे।

ध्वजभङ्ग पु० ध्वजस्य मेढ्रस्य भङ्गः खण्डामर्थ्यहीनता यत्र। क्लीबत्व-

ध्वजाहृत न० ध्वजेन सहाहृतः। "संग्रामाद्याहृतं यत्तु विजित्य द्विषतां कुलम्। स्वाम्यर्थं जीवितं त्यक्त्वा तद्ध्वजाहृतमुच्यते" इत्युक्ते धनविशेषे। तादृशे दासे पु०

ध्वजिन् पु० ध्वज+अस्त्यर्थे इनि। रथे, रथे, ब्राह्मणे, तुरङ्गे, सर्पे, मद्यविक्रयोपजीविनि शौण्डिके, मयूरे च।

ध्वजिनी स्त्री० ध्वजः अस्त्यस्याः इनि। सेनायाम्।

ध्वण ध्याने भ्वा० पर० अक० सेट्। ध्वणति अध्वाणीत् अध्वणीत्।

ध्वन रवे भ्वा० पर० अक० सेट् वा षटादि। ध्वनति अध्वानीत्-अध्वनीत्। ध्वनयति ध्वानयति।

ध्वन शब्दे अद०चु०उभ०सक० सेट्। ध्वनयति अदिध्वनत् अध्वनयीत्

ध्वन पु० चु० ध्वन-घञ्। शब्दे।

ध्वनि पु० ध्वन+इन्। अव्यक्ते स्फुटवर्णादिशब्दे, अलङ्कारोक्ते उत्तमकाव्ये च।

ध्वनिविकार पु० ध्वनेर्विकारः। घोषादिना शब्दस्य विकारे काकुप्रभृतौ।

ध्वन्स गतौ भ्रंशे अधःपतने च भ्वा० आत्म० अक० सेट्। ध्वंसते अध्वंसत। क्त्वा वेट्।

ध्वस्त त्रि० ध्वन्स–क्त। च्युते, नष्टे, गलिते च। [अध्वाङ्क्षीत्।

ध्वाक्ष(काङ्क्ष) घोररवे च भ्वा० पर० सक० सेट् इदित्। ध्वाङ्क्षति

ध्वाङ्क्ष पु० ध्वाचि–अच्। काके, वके, भिक्षुके, गृध्रे च।

ध्वान पु० ध्वन–घञ्। शब्दे।

ध्वान्त न० ध्वन–क्त नि०। अन्धकारे।

ध्वान्तारि पु० ६त०। सूर्ये अर्कवृक्षे, चन्द्रे, वह्नौ च।

ध्वान्तोन्मेष पु० ध्वान्ते अन्धकारे उन्मेषोऽस्य। खद्योते।

न

न अव्य० नञ्–बभ्रुने ड। निषेधे। तत्त्व क्रियायोगे अभावे तद्भिन्नयोगे भेदे उपमायाञ्च। बन्धे, प्रस्तुते, रत्ने च पु०।

नकुल त्रि० नास्ति कुलमस्य। निष्कुले। सर्पवैरिणि बभ्रौ, शिवे, चतुर्थपाण्डवे च पु०। कुकुद्यां जटामांस्यां शल्लिन्यां कुङ्कुमे च स्त्री० ङीप्।

नकुलेष्टा स्त्री० ६त०। राज्ञायां तस्या नकुलप्रियत्वात्तथात्वम्।

नक्क नाशने चु० उभ० सक० सेट्। नक्कयति–ते अननक्कत्–त।

नक्त न० नज–क्त। रात्रौ, सर्व्वादिनातिक्रमेण रात्रिभोजनरूपे व्रते च

नक्तक पु० नज–तकन्। (न्याकुड़ा) कर्पटे जीर्णवस्त्रखण्डे।

नक्तचारिन् पु० नक्ते रात्रौ चरति चर–णिनि। मेचके, बिड़ाले च रात्रिचारिमात्रे त्रि०।

नक्तच(ञ्च)र पु० नक्ते, नक्तं वा चरति ठक्। राक्षसे, चौरे, मेचके, बिड़ाले च। रात्रिचरे त्रि० स्त्रियां ङीप्।

नक्तन्दिव न० नक्तञ्च दिवा च नि०। समस्यर्थवृत्तौ अहोरात्रे।

नक्तम् अव्य० नज–क्तोङ तस्। रात्रौ।

नक्तमाल पु० नक्तम् रात्रौ आ अलति अच्। करञ्जवृक्षे।

नक्तव्रत न० "नक्तं निशायां कुर्व्वीत गृहस्थो विधिसंयुतः। निशि व्रतं तु विज्ञेयं यामार्द्धं प्रथमे सदे" त्युक्तलक्षणे दिवाभोजनाभाव-विशिष्टे रात्रौ प्रथमयामार्द्धं भोजनरूपे व्रते।

नक्र पु० न क्रामति दूरस्थलम् न+क्रम–ड। कुम्भीरे। (झणकाट) द्वारार्गलाकाष्ठे, नासिकायाञ्च न०।

नक्रराज पु० ६त० टच् समा०। (हाङ्गर) जलजन्तुभेदे।

नक्षत्र न० नक्ष–अत्रन्। अश्विन्यादितारकासु।

नक्षत्रचक्र न० नक्षत्रघटितं चक्रम्। अश्विन्यादिसप्तविंशति नक्षत्रात्मके खगोलस्थे राशिचक्रे। तन्त्रोक्ते मन्त्रयन्त्रोपयोगि-चक्रभेदे च। [विष्णौ च।

नक्षत्रनेमि पु० नक्षत्राणां नेमिरिव। ध्रुवाख्ये तारके, चन्द्रे,

नक्षत्रमाला स्त्री० नक्षत्राणामिव माला। सप्तविंशतिमौक्तिकैर्निर्मिते हारभेदे। ६त०। नक्षत्रपङ्क्तौ।

नक्षत्रसूचक पु० नक्षत्राणि शुभाशुभतया सूचयति ण्वुल्। "अभि-दित्यैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते। स पङ्क्तिदूषकः पापी त्रेयो नक्षत्रसूचक" इति "तिथ्युत्पत्तिं न जानन्ति ग्रहाणां नैव साध-नम्। परवाक्येन वर्त्तन्ते ते वै नक्षत्रसूचका" इत्युक्ते सिद्धान्ता नभिज्ञे ज्योतिर्विदि। णिनि नक्षत्रसूचीत्यपत्ये।

नक्षत्रेश पु० ६त०। चन्द्रे नक्षत्रपत्यादयोऽप्यत्र।

नख सर्पणे भ्वा० पर० सक० सेट्। नखति अनखीत् अनाखीत्।

नख पु० न०। नखं छिद्रमत्र। करजे अङ्गुल्यग्रस्थे कण्टके।

नखकुट्ट पु० नखान् कुट्टयति कुट्ट–अण्। नापिते।

नखनिकृन्तन न० नखानि कृत्यतेऽनेन कृत–ल्युट् ष० सम्। नख-च्छेदनार्थे नापितास्त्रभेदे।

नखर पु०न० नखं राति रा–क। नखे [युधोऽप्यत्र।

नखरायुध पु० नखरमायुधं यस्य। सिंहे, व्याघ्रे, कुक्कुटे च नखा-

नखशङ्कु पु० नख इव शङ्कुः । क्षुद्रशङ्कौ ।

नखाङ्क पु० नखमङ्क इव यस्य । व्याघ्रनख्याम् ।

नखी स्त्री० नखमस्त्यस्य अर्श आदित्वादच् गौरा० ङीष् । खनामख्याते गन्धद्रव्ये ।

नग पु० न गच्छति गम–ड । पर्वते, वृक्षे च ।

नगण पु० छन्दोग्रन्थोक्ते लघुरूपवर्णत्रये । न गण्यते गण–अच् (माल-कांकनी) वृक्षभेदे, पारावतपद्याम् स्त्री० टाप् ।

नगनन्दिनी स्त्री० ६त० । हिमालयपुत्र्यां दुर्गायाम् ।

नगभिद् पु० नगान् भिनत्ति भिद–क्विप् । इन्द्रे । पर्वतभेदने त्रि०

नगभू स्त्री० नग एव भूरुत्पत्तिस्थानं यस्याः । क्षुद्रपाषाण भेदा-याम् ।

नगर न० नगाः वृक्षाः पर्वता वा सन्त्यस्मिन् नग+र । "पुण्यक्रियादि-निपुणैश्चातुर्वर्ण्यजनैर्युतम् । अनेकजातिसंबद्धं नैकशिल्पिसमाकुलम् । सर्वदैवतसंबद्धं नगरं त्वभिधीयते इत्युक्तलक्षणे पुरभेदे । वा गौरा० ङीष् । नगरीत्यत्र ।

नगरध्वङ्कर पु० नगस्य क्रौञ्चपर्वतस्य रन्ध्रं करोति कृ–अच् । कार्त्तिकेये "स नगरं नगरन्ध्वङ्करोजभ" इति रघु ।

नगरोत्था स्त्री० नगरादुत्तिष्ठति उद्+स्था–क । नगरस्थायां स्त्रियां नागरमुस्तायाञ्च ।

नगरौषधि स्त्री० ६त० । कट्फल्याम् ।

नगाट पु० नगेषु वृक्षेषु अटति अच् । वानरे ।

नगाधिप पु० नगानामधिपः । हिमालयपर्वते ।

नगाश्रय पु० नगः पर्वतः आश्रयोऽस्य । हस्तिकन्दवृक्षे । पर्वतवा-सिनि त्रि० ।

नगौकस् पु० नग ओको यस्य । पक्षिणि, शरभे, सिंहे च ।

नग्न त्रि० नज–क्त । विवस्त्रे । दिगम्बराख्ये बौद्धभेदे पु० । "द्विक-च्छः कोच्छशेषस्तु सुक्तकच्छस्तथैव च । एकवासा अवासास्तु नग्नः पञ्चविधः स्मृत" इत्युक्तेषु द्विकच्छादिषु, "कच्छयजुः सामसंज्ञेय

त्रयी वर्णादतिर्हिज ! । एतासुज्झति यो मोहात् स नग्नः पातकी स्मृत" इत्युक्ते वेदत्रयीरूपावरणत्यागिनि जने च ।

नग्निका स्त्री० नग्नैव स्वार्थे कन् । अङ्गरजस्कायां स्त्रियाम् ।

नज व्रीडायां भ्वा० आ० अक० सेट् । नजते अनजिष्ट । नग्नः ।

नञ् अव्य न+अञ् (अदनुबन्धोनलोपनञर्थः तेन अजिनोन नादिलोपः नैकधेत्यादि । अभावे, निषेधे, अल्पत्वे, अप्राशस्त्ये, अतिक्रमे, ईषदर्थे, सादृश्ये, विरोधे, भेदे च । तत्र सादृश्ये अब्राह्मणः । अभावे अपापम् । भेदे अघटः पटः । ईषदर्थे अनुदरी कन्या । अपत्ये अजेशा । विरोधे असुरः ।

नट पु० नटति नट–अच् । नाटकादिदृश्यकाव्यानिनयकर्त्तरि नर्त्तकभेदे, जायाजीविनि धर्मसङ्करभेदे, अशोकवृक्षे, शोनाकवृक्षे, मले किण्व, पर्वणि, गोदन्तहरितालें च ।

नट नृत्ते हिंसने च भ्वा० पर० सक० सेट् । नटति अनटीत् अनाटीत् अशोपदेशतया न णत्वम् परिनटति ।

नट भंगे च्युतौ च चु० उभ० अक० सेट् । नाटयति–ते अनीनटत् । न णत्वम् ।

नटन न० नट–ल्युट् । नृत्ये । [नाट्योऽप्यत्र ।

नटभूषणा नटान् भूषयति भूष–ल्यु । हरितालें । नटमण्ड-

नटी स्त्री० नट–अच् । गौरा० ङीष् । नलीनामगन्धद्रव्ये, वेश्यायाञ्च । नट–पुंयोगे ङीष् । नटयोषिति स्त्री० ।

नड भंगे चु० उभ० अक० सेट् । नाडयति–ते अनीनडत्–त । शोपदेशत्वाभावान्न णत्वम् ।

नड पु० नड अच् । नलतृणे ।

नडकीय त्रि० नडाः सन्त्यस्य छ कुक् च । नड्वति देशे ।

नडप्राय पु० नडः प्रायो यत्र । नडबहुले देशे ।

नड्वा स्त्री० नडानां समूहः प्राणा० य । नडसमूहे । [ङीष् ।

नड्वत् त्रि० नडाः सन्त्यस्य मतुप् मस्य व । नडयुक्ते देशे स्त्रियां

नड्वल् त्रि० नडाः सन्त्यस्य ड्वलच् । नडयुक्ते देशे ।

नत त्रि० नम–क्त । ऋजुतामने ज्योतिषोक्ते दिनार्द्धान्तरितजन्मनाडि-कायां पु० विस्तारस्तु वाचस्पत्ये । तगरमूले न० ।

नतद्रुम पु० कर्म० । लताशालवृक्षे ।

नतनासिक त्रि० नता नासिकाऽस्य । चिपिटनासिके (खान्दा) ।

नताङ्गी स्त्री० नमजघनभारात् नतमङ्गमस्याः ङीप् । नार्य्याम् ।

नति स्त्री० नम–क्तिन् । नम्रतायाम् "त्रिकोणमथ षट्कोणमर्द्धचन्द्रं प्रदक्षिणम् । दण्डमष्टाङ्गसंयुक्तं षड्विधा नतिलक्षणमित्युक्ते षड्-भेदे नमनभेदे च एतल्लक्षणं वाचस्पत्ये ।

नद सन्नोदे भ्वा० पर० अक० सेट् इदित् । नन्दति अनन्दीत् न-न्दतुः । प्रनन्दति ।

नद पु० नद–अच् । सिन्धुभैरवशोणादौ ऽऋक्षनिर्झरे जलप्रवाहे ।

नदी स्त्री० नद–अच् नदट् इतिनिर्देशात् । टित्त्वात् ङीप् । गङ्गा-यमुनादिषु गुरुलघुजलप्रवाहेषु "धनुःसहस्राण्यष्टौ च गतिर्यासां न विद्यते । न ता नदीशब्दवहा" इत्युक्ते धनुःसहस्राष्टकान्यून-देशवाहिन्यासेव नदीशब्दप्रवृत्तिः । तासु च "सर्वा गुर्वी प्राङ्मुखी वाहिनी स्यात् नदी पश्चाद्वाहिनी निम्नगेन" इति "प्रायो मृदुवहा गुर्व्यो लघ्व्यः शीघ्रवहाः स्मृता" इति च विशेषः ।

नदीकान्त पु० नदी कान्ता यस्य । समुद्रे, हिज्जलवृक्षे, सिन्धुवारके च । जम्बूवृक्षे काकजङ्घौषधौ च स्त्री० ।

नदीकूलप्रिय पु० नदीकूलं प्रियं यस्य । जलवेतसे ।

नदीज पु० नद्याः समीपे जायते जन–ड । अर्জ্জুनवृक्षे अग्निमन्थवृक्षे च । हिज्जलवृक्षे स्रोतोजले च न० । नदीजातमात्रे त्रि० । "नदीज ! लङ्केश्वरनारिकेतु"रिति भारतम् ।

नदीन पु० इत० । समुद्रे, वरुणे च । नदीभिन्ने त्रि० ।

नदीमातृक त्रि० नदी मातेव पोषिकाऽस्य । नदीजलसम्पन्ने व्रीहि-पालिते देशे ।

नदीष्ण त्रि० नद्यां स्नातुं जानन्ति स्ना–क षत्वम् । नदी स्नानकुशले । यस्यां यस्यां नद्यां यथायतरणीयं तज्ज्ञानयुक्ते ।

नदीसर्ज्जं पु० नद्यां स्रज्यतेऽसौ स्रज-अप् । अर्ज्जुनवृक्षे ।
नड्व त्रि० नह-क्त । बद्धे, उद्गृत्ते च ।
नड्वी स्त्री० नह्यतेऽनया ह्रस्व ङीप् । चर्म्मनिर्म्मितरज्ज्वाम् ।
नदन्तृ स्त्री० न नन्दति क्रतायामपि सेवायां न तुष्यति न+नन्द-ऋन् । भर्त्रभिगन्त्र्याम् (ननद) ष्ट० वृद्धौ । ननान्दाप्यत्र ।
ननु अव्य० न नुदति नुद-डु । प्रश्ने, अवधारणे, निश्चये, अनुमतौ अनुज्ञायाम्, अनुनये, सान्त्वने, आमन्त्रणे, सम्बोधने, परिक्रतौ, अधिकारे, सम्भ्रमे, दुष्टोक्तौ, सत्यवादे, स्तुतौ, आक्षेपे, प्रतारणौ, उत्प्रेक्षायाञ्च ।
ननुच अव्य० ननु च चेत समाहार द्व० । विरोधे क्तौ ।
नन्द पु० नन्द-अच् । श्रीकृष्णस्य पितरि गोपभेदे, महानन्दि सुते महापतिभेदे, आनन्दे, निधिभेदे, प्राग्दक्षिणहारगृहे, वास्तुभेदे च ।
नन्दक पु० नन्दयति नन्द-णिच् ण्वुल् । हरेः-खड्गे, भेके च । आनन्दजनके, कुलपालके च त्रि० ।
नन्दकिन् पु० विद्यामयोनन्दकोऽस्तिरस्य ठन् । विष्णौ ।
नन्दगोपित स्त्री० ३त० । रात्र्याम् ।
नन्दथु पु० नन्द-अथुच् । आनन्दे "यस्यासौ तस्य नन्दथु" रितिभट्टिः
नन्दन पु० नन्दयति नन्दि-णिच् । पुत्रे, भेके, पर्वतभेदे वसुदेवौरसे गावो नन्दनं नन्दने प्रिये !" इत्युक्ते ६०वर्षमध्ये वत्सरभेदे च । इन्द्रोद्याने न० । आनन्दकारके त्रि० ।
नन्दनन्दन पु० नन्दस्य नन्दनः । श्रीकृष्णे, नन्दसुतादयोऽप्यत्र ।
नन्दनन्दिनी स्त्री० ६त० । दुर्गायाम् "नन्दगोपगृहे जाता यशोदागर्भसम्भवे"ति चण्डी । नन्दसुतादयोऽप्यत्र ।
नन्दा स्त्री० नन्द-अच् । "नन्दते सुरलोकेषु नन्दने वसतेऽथवा । हिमाचले महापुण्ये नन्दादेवी ततोऽभव"दित्युक्तायां गौर्य्याम् अलिज्झरे, (नाद) सम्मदि, "प्रतिपदेकादशी षष्ठी नन्दा चेया मनीषिभि"रित्युक्तेषु तिथिभेदेषु, "स्थिरे जीववारे तु नन्देति संज्ञेति; सूर्य्यसंक्रान्तिभेदे, ननन्दरि, तीर्थभेदे च ।

नन्दि पु० नन्द–इन् । स्वनामख्याते हृष्टे आनन्दे कौशल्यानन्दिवर्द्धनो रामः इति रामायणम् । महादेवस्य पार्श्वचरभेदे नन्दिकेश्वरे । द्यूताङ्के पु०न० ।

नन्दिकेश्वर पु० शिवस्य पार्श्वचरभेदे । तेन प्रोक्तमण् तस्य लुक् । पुराणभेदे । [दयोऽप्यत्र ।

नन्दितरु पु० नन्दयति णिच्–णिनि कर्म० । धवभृक्षे । नन्दिवृक्षा-

नन्दिन् पु० नन्द–णिनि । शिवद्वारपाले । गर्दभाण्डे; वटद्रुमे च

नन्दिनी स्त्री० नन्दयति नन्द–णिनि । वशिष्ठधेनौ, सुतायाम्, उमायां, गङ्गायां, ननन्दरि, व्याडिमातरि, रेणुकौरधौ च ।

नन्दिनीसुत पु० ईत० । व्याकरणसंग्रहकारके व्याडिमुनौ ।

नन्दिपुराण न० नन्दिना प्रोक्तं पुराणम् । उपपुराणभेदे ।

नन्दिवर्द्धन पु० नन्दिं नन्दं नन्दिनं वा वर्द्धयति वृध–णिच् ल्यु । तनये, मित्रे, शिवे च । आनन्दवर्द्धके त्रि० ।

नन्दीवृक्ष पु० नन्द–इन् वा ङीप् कर्म० । अश्वत्थभेदे, हृक्षे, (तट) कुबेरके, मेषशृङ्गाच्च । [स्वरादयोऽप्यत्र ।

नन्दीश पु० नन्दी ईश इव । शिवद्वारपाले । ईत० । शिवे नन्दी-

नन्द्यावर्त्त पु० "दक्षिणानुगतानिन्द्यं यत् पश्चिमासुखम् । पूजनीयोत्तरच्छायं नन्द्यावर्त्तं वदन्ति त" दित्युक्ते वृक्षभेदे, तगरवृक्षे, मत्स्यभेदे च ।

नपुंसक पु०न० न स्त्री न पुमान् नि० । "स्तनकेशवती नारी लोमशः पुरुषः स्मृतः । उभयोरन्तरं यच्च तदभावे नपुंसक" मित्युक्तलक्षणे क्लीवे । शब्दे तद्व्यवहारस्तु सत्वरजोभ्यां साम्यावस्थापन्नाभ्यामुत्-पन्नत्वात् अनादिसंस्कारविशेषवत्त्वाद्वा ।

नप्तृ पु० न पतन्ति पितरोऽनेन न+पत–तृच् नि० । पौत्रे, दौहित्रे च । पौत्र्यां, दौहित्र्याञ्च स्त्री० ङीप् ।

नभ न० नभ–अच् । आकाशे । श्रावणे मासि पु० ।

नभःसद् पु० नभसि सीदति सद–क्विप् । देवे ।

नभश्चर पु० नभसि चरति अच्। मेघे, वायौ, पक्षिणि, विद्याधरे, सूर्य्यादिषु ग्रहेषु, राक्षसे च। आकाशगामिनि त्रि०।

नभस न० नभ-असच्। आकाशे।

नभस् पु० नभ-असि। श्रावणे मासि, मेघे, पतद्ग्रहे च आकाशे न०।

नभसङ्गम पु० नभसं गच्छति गम-खच् मुम् च्। पक्षिणि।

नभस्य पु० नभसि मेघे साधु यत्। भाद्रपदमासि।

नभस्वत् पु० नभोऽस्त्यस्याश्रयत्वेन मतुप् मस्य व। वायौ।

नभोमणि पु० नभस आकाशस्य मणिरिव प्रकाशकत्वात्। सूर्य्ये।

नभोरजस् न० नभसो रज इव इच्छावरकत्वात्। अन्धकारे।

नभ्राज् पु० न भ्राजति भ्राज-क्विप्। मेघे।

नमस् अव्य० नम-असि। नतौ, त्यागे, हुते च।

नमस्कार पु० नमस्+कृ-घञ्। कराभ्यां शिरःसंयोगविशेषेण स्वापकर्षकसूचके व्यापारभेदे।

नमस्य त्रि० नमस् करोति नमस्+क्य-नमस्य-कर्मणि यत्। नमस्कारणीये। भावे क्य। नतौ, पूजायाञ्च स्त्री०।

नमुचि पु० न मुञ्चति न+मुच-कि। शुम्भनिशुम्भयोः कनिष्ठभ्रातृजेऽसुरभेदे।

नमुचिसूदन पु० ईत०। इन्द्रे, नमुचिसूदनादयोऽप्यत्र।

नमेरु पु० नम-एरु। सुरपुन्नागवृक्षे, रुद्राक्षे च।

नम्ब गतौ भ्वा०पर०सक० सेट्। नम्बति अनम्बीत्।

नम्र त्रि० नम-र। नते, विनयान्विते च।

नम्रक पु० नम्र इव कायति कै-क। इवार्थे कन् वा। वेतसे स्वार्थे कन्। नम्रे त्रि०।

नय गतौ भ्वा० आत्म० सक० सेट्। नयते अनयिष्ट।

नय पु० नी-अच्। नीतौ शुक्राचार्य्यादिप्रणीते शास्त्रभेदे, द्यूतभेदे च। कर्त्तरि अच्। नेतरि न्याय्ये च त्रि०।

नयन न० नीयतेऽनेन करणे ल्युट्। नेत्रे चक्षुषि। भावे ल्युट् प्रापणे

नर पु० नृ-अच्-वा अच्। परमात्मनि 'आपो वै नरसूनवः' इति

मनुः । विष्णौ, नरावतारे, अर्জ্জুনে, ऋषिभेदे, मनुष्ये, गणितशास्त्रोक्ते छायाप्रमाणज्ञानोपयोगिनि, शङ्कौ च ।

नरक पु० नृ—पुन् । भूमिगर्भे वराहाख्याते दैत्यभेदे, पापिनां दुःखभोगस्थानभेदे रौरवप्रभृतौ च । तेषां विभेदो वाचस्पत्ये ।

नरककुण्ड न० ६त० । पापिनां यातनाभोगकुण्डेषु । विस्तरस्तु वाचस्पत्ये ।

नरकजित् पु० नरकं नरकासुरं जितवान् जि—भूते—क्विप् । श्रीकृष्णे । नरकान्तकादयोऽप्यत्र ।

नरदेव पु० नरोदेव इव । नृपतौ ।

नरनारायण पु० द्वि० । नरश्च नारायणश्च द्व० । "कृष्णार्জ্জুनावतारिणोः मुनिभेदयोः । भगवतोऽवतारभेदे एकशब्दप्रभवदेवे च० ।

नरपति पु० ६त० । राजनि । नरेशादयोऽप्यत्र ।

नरपुङ्गव पु० पुमान् गौः पुङ्गवः इव नरः पुङ्गव इव भारवहनयोग्यत्वात् । मनुष्यश्रेष्ठे, नृपे च ।

नरमाला स्त्री० नराणां तन्मुण्डानां माला । नरमुण्डनिर्मितायां मालायां "नरमालाविभूषणे"ति चण्डी ।

नरमेध पु० नरो मेध्यते बध्यते प्रोक्षणादिभिः संस्क्रियते यत्र । नरमांसकृपहव्यकरणके यागभेदे ।

नरवाहन पु० नरा वाहनान्यस्य । कुबेरे, स हि मनुष्यैर्वह्यते । मनुष्यवाह्यमात्रे त्रि० ।

नरसिंह पु० नरश्चासौ सिंहश्च । अवयवभेदेन नरसिंहयोराकारयुक्ते हिरण्यकशिपोर्नाशार्थमाविर्भूते भगवदवतारभेदे नरहर्य्यादयोऽप्यत्र । नरः सिंह इव शौर्य्यादिमत्त्वात् । नरश्रेष्ठे । [ष्यत्वार्थे ।

नरस्कन्ध पु० नर—समूहे स्कन्ध । नरसमूहे एवं मनुष्यस्कन्धादयो-

नरेन्द्र पु० नर इन्द्र इव । राजनि, विषवैद्ये, एकविंशत्यक्षरपादके छन्दोभेदे च ।

नरोत्तम पु० नरेषु उत्तमः । एकादशे नारायणे, 'यः स्वकात् परतो वेह जातनिर्वेद आत्मवान् । हृदि कृत्वा हरिं गेहात् प्रव्रजेत्

स नरोत्तम' इत्युक्ते वैराग्यवति पुरुषे श्रेष्ठे च 'नराणाञ्च नरोत्तम' इति गीता ।

नर्त्तक पु० नृत–ण्वुल् । चारणे, नलहणे च यादृशं नृत्यपात्रं स्यात् गीतं योज्यं च तादृशम् । नृत्यस्य धारणात् पात्रं नर्त्तकः परिकीर्त्तितः" इत्युक्ते नृत्याभिज्ञे नटे त्रि० । स्त्रियां ङीष् ।

नर्त्तन न० नृत–ल्युट् । नृत्ये । [न णत्वम् प्रनर्हति ।

नर्द्द शब्दे अक० गतौ सक० भ्वा० पर० सेट् । नर्द्दति अनर्दीत् ।

नर्म्मद पु० नर्म्म परिहासं ददाति दा–क । केलिसचिवे । परिहासदायके त्रि० । सोमोद्भवायां दक्षिणस्थायां नद्यां स्त्री० ।

नर्म्मन् न० नृ–मनिन् । परीहासे केलौ ।

नल बन्धे भ्वा० पर० सक० सेट् वा घटा० । नलति अनालीत् । णिच् नलयति नालयति ।

नल पु० नल–अच् । तृणभेदे, चन्द्रवंश्ये, नृपभेदे, वानरभेदे, श्राद्धदेवे, पितृगणभेदे, "कव्यवालस्तथा नल" इति पुराणमन्त्रः दैत्यभेदे च । पद्मे न० । [पदार्थे, पर्वणि च ।

नलक न० नल इव इवार्थे कन् । शाकास्थि, नाडीवत् सच्छिद्रे

नलकिनी स्त्री० नलकं सच्छिद्रमस्ति अस्य इनि । जङ्घायाम् ।

नलकूवर पु० नलः कूवरो युगन्धरोऽस्य । कुबेरपुत्रे ।

नलद न० नलं बन्धं गतिं वा ददाति दो–क । उशीरे । "स्यादस्या नलदं विने"ति नैषधम् । पुष्पकरथे, जटामांस्यां च स्त्री० ।

नलपट्टिका स्त्री० नलनिर्म्मिता पट्टिकेव । (दरमा) । कटभेदे ।

नलमीन पु० नलाश्रयः मीनः । (चिंड़ी) मत्स्यभेदे ।

नलिका स्त्री० नल–स्वार्थे कन् टाप् । नाड्याम्, सुगन्धिद्रव्यभेदे च ।

नलित पु० नल–क्त । (नालता) शाकभेदे ।

नलिन न० नल–इनन् । पद्मे, शैवाले, तोये च । [कायाञ्च ।

नलिनी स्त्री० नलाः सन्त्यस्या इनि । पद्मवंशे, पद्मयुक्तदेशे, नलि-

नलिनीखण्ड न० नलिनी+समूहे खण्ड । पद्मिनीसमूहे ।

नली स्त्री० नल-ऊङ् गौरा० ङीष् । मनः शिलायां, विष्णुमूलतायाञ्च नलिकायाञ्च । (नालुताघाक) ।

नल्व पु० नल—व । चतुःशतहस्तमितदेशे, हस्तचतुः शते च ।

नव पु० नु अप् । स्तवे, रक्तपुनर्नवायाञ्च । अच् । नूतने त्रि० ।

नवग्रह पु० कर्म० संज्ञात्वात् न द्विगुः । "सूर्य्यचन्द्रौ मङ्गलश्च बुधश्चापि बृहस्पतिः शुक्रः शनैश्चरो राहुः केतवश्च नवग्रहा" इत्युक्तेषु नवसु ग्रहेषु तेषां स्यानादि वाचकत्वे ।

नवति स्त्री० नव दशतः परिमाणमस्य त्रि० । (नब्बुइ) सङ्ख्याभेदे ।

नवदल न० कर्म० । कमलकर्णिकासमीपस्थे दले, नूतने पत्रे च ।

नवदुर्गा स्त्री० कर्म० संज्ञायाम् न द्विगुः । 'प्रथमा शैलपुत्री च द्वितीया ब्रह्मचारिणी । तृतीया चन्द्रघण्टेति कुष्माण्डेति चतुर्थिका । पञ्चमी स्कन्दमातेति षष्ठी कात्यायनीति च । सप्तमी कालरात्रिश्च महागौरीति चाष्टमी । नवमी सिद्धिदा प्रोक्ता नव दुर्गा मता भुवी" त्युक्तासु शैलपुत्र्यादिषु नवसु दुर्गामूर्त्तिषु ।

नवद्वारपुर न० नव द्वाराणि यत्र तादृशं पुरम् । देहे तत्रहि द्वे श्रोत्रे, चक्षुषी, नासिके च मुखमेकमिति ऊर्द्ध्वस्थानि सप्त, द्वे पायूपस्थे अधः स्थिते नव छिद्ररूपाणि द्वाराणि सन्ति । "नवद्वारपुरे देही" ति गीता ।

नवधा अव्य० नवन्+प्रकारे धाच् । नवप्रकारे ।

नवधातु पु० कर्म० संज्ञात्वात् न द्विगुः 'हेमताराररागाश्च ताम्ररङ्गे च तीक्ष्णकम् । कांस्यञ्च कान्तलौहञ्च धातवो नव कीर्त्तिता' इत्युक्तेषु हेमादिषु नवसु ।

नवन् त्रि० व० । नु—क्वनि । (नय) संख्याभेदे ।

नवनीत न० नवं नीयते स्म नी—क्त । (माखन) पयः सारभेदे ।

नवनीतक न० नवनीतस्य विकारः कन् । घृते ।

नवपत्रिका स्त्री० कदली दाड़िमी धान्यं हरिद्रा मानकं कचुः । विल्वोऽशोको जयन्ती च विज्ञेया नवपत्रिका' इत्युक्तायाम् नवसु कदल्यादिषु पत्रिकासु ।

नवमल्लिका स्त्री० कर्म० । नवमालिकायाम् पुष्पप्रधाने वृक्षभेदे ।

नवम त्रि० नवानां पूरणः डटि मट् । नवसंख्या येन पूर्य्यते तस्मिन्, चन्द्रस्य नवमकलाक्रियारूपे तिथिभेदे स्त्री० ङीप् ।

नवमालिका स्त्री० कर्म० । [नवमाम् प्रधाने पुष्पप्रधाने वृक्षभेदे ।

नववधू स्त्री० कर्म० । नवोढायां स्त्रियाम् । [आगमने ।

नववध्वागमन न० ६त० । नववध्वाः प्रथमतः पितृगृहात् पतिगृहे

नवरत्न न० नवानां रत्नानां समाहारः । 'मुक्तामाणिक्यवैदूर्य्य गोमेदा वज्रविद्रुमौ । पद्मारागं मरकतं नीलञ्चे'त्युक्तेषु नवसु रत्नेषु । 'धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः । ख्यातो वराहमिहिरश्च नवापि रत्नान्यासंसभास्य वररुचिर्नवविक्रमादित्यसभ्य बुधेषु ।

नवरात्र न० नवानां रात्रीणां समाहारः अच्समा० । आश्विन्यादिमासेषु शुक्लप्रतिपदावधिशुक्लनवमीपर्य्यन्तेषु नवसु तिथिषु तद्विशेषु कर्त्तव्ये व्रतभेदे च । 'चैत्रेऽश्विने तथाषाढे माघे कार्य्योमहोत्सवः । नवरात्रे महाराजे'ति देवीभागवते नवसु दिवसेष्वपि नवरात्रशब्दप्रयोगः ।

नववस्त्र न० कर्म० । अनाहृते नूतने वस्त्रे ।

नवश्राद्धक पु० 'गोपोमाली तथा तैली तन्त्री मोदकवारजी । कुलालः कर्मकारश्च नापितो नव श्रायका' इत्युक्तेषु जातिभेदेषु ।

नवश्राद्ध न० कर्म० । एकादशाहकर्त्तव्ये श्राद्धे ।

नवसूतिका स्त्री० नवं सूतं प्रसवोऽस्त्यस्याः ठन् । धेनौ, नूतनप्रसूतायां गवि ।

नवान्न न० कर्म० । नवीनान्ने नवसस्यं यत्र । नवान्नागमकाले 'नवोदके नवान्ने च गृहप्रच्छादने, तथा पितरः सृष्टिरन्यन्नमितिस्मृतिः ।

नवीन त्रि० नव+ख । नूतने ।

नवोदक न० कर्म० । नवजले । नवमुदकं यत्र । रवेरार्द्रानक्षत्रस्थितिसमये सौराषाढस्य कतिपयदिने ।

नवोद्भूत न० कर्म०। नवतीते, नूतनोद्भूतमात्रे त्रि०।

नव्य त्रि० नु-यत्। नूतने। रक्तपुनर्नवायां पु०।

नष्ट त्रि० नश-क्त। तिरोहिते, दर्शनायोग्ये, भ्रष्टे च।

नष्टचन्द्र पु० "नष्टचन्द्रो न दृश्यश्च भाद्रे माघि सितासिते। चतुर्थ्यां-शुदितोऽशुद्धः प्रतिषिद्धो मनीषिभि"रित्युक्ते सौरभाद्रमासे उभय-पक्षचतुर्थ्यांशुदिते चन्द्रे।

नष्टचेष्टता स्त्री० नष्टा चेष्टा यस्य तस्य भावः तल्। हर्षशोकादिभिः सर्वचेष्टाराहित्ये। [आर्त्तवक्त्रौ, निरग्नौ च।

नष्टाग्नि पु० नष्टोऽग्निर्यस्य। प्रमादादिना नष्टवैतानिकाग्नौ लुप्त-

नष्टेन्दुकला स्त्री० नष्टा इन्दुकला यस्याम्। चतुर्दशीयुक्ते दर्शे। "चतुर्दश्यष्टमे यामे क्षीणो भवति चन्द्रमा इति स्मृतेस्तद्युक्तामा-वास्यायां हि इन्दुकलाक्षयः।

नस्य न० नसे हितम्। नासिकादौ अपस्मारादिरोगनिवारणार्थं नसि देये चूर्णे। [बलीवर्दे।

नस्योत पु० नसि नासिकायाम् स्यत् क्तः स्या+वे-क्त (नाकफोड़ा)

नह अव्य०। न च ह च। प्रत्यारम्भे।

नहि अव्य०। नह-इन्। निषेधे।

नहुष पु० चन्द्रवंश्ये नृपभेदे, नागभेदे च।

नहुषात्मज पु० ययातिनामके नृपे। नहुषपुत्रादयोऽप्यत्र।

ना अव्य० नह-डा। निषेधे।

नाक पु० न कमकं दुःखं तन्नास्ति यत्र। स्वर्गे। "यत्र दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत् सुखं स्वःपदास्पदं" मित्युक्तेः स्वर्गस्य दुःखशून्यत्वम्।

नाकिन् पु० नाको वासस्थानत्वेनास्त्यस्य इनि। देवे।

नाकु पु० नम-उ नाक्यादेशः। वल्मीके, पर्व्वते च।

नाकुली स्त्री० नकुलस्येदम् प्रियत्वात् अण्। कुक्कुटीकन्दे चविके, (वच्) राज्ञायां यवतिक्तायां, श्वेतकण्टक्याञ्च।

नाग न० न गच्छति अगः न अगः। मनुष्याकारेषु फणलाङ्गूलविशिष्टेषु

वासुकयादिषु सर्पेषु, हस्तिनि, मेघे, नागकेसरे, नागदन्तके, मुखस्थे उकारकारके पवनभेदे, यवादिमध्यकरणभेदे च । नगे भवः अण् । पर्वतभवे त्रि० । रङ्गे, सीसके, च न० ।

नागकेसर पु० नागाख्यः केसरः । खनामख्याते पुष्पवृक्षे ।

नागगन्धा स्त्री० नागस्येव गन्धोऽस्याः । नाकुलीकन्दे ।

नागज न० नागात् जायते जन–ड । सिन्दूरे, रङ्गे च ।

नागजिह्वा स्त्री० नागानामिव जिह्वा मूलान्यस्याः । अनन्तमूलायाम् लतायाम् । [दन्ते । स्वार्थे कन् । तत्रैव ।

नागदन्त पु० नागस्य दन्त इव । वृक्षादिनिर्गतदारुणि ।हैत० । हस्ति-

नागदन्तिका स्त्री० नागस्य सर्पस्य दन्तस्तत्सदृशविषमस्त्यत्र ठन् । (शिकाकाई) इति ख्यातायाम् लतायाम् ।

नागदन्ती स्त्री० नागदन्त आख्यात्वेनास्त्यस्य अच् गौ० ङीष् । (हातिशुंडा) लतायाम्, वेश्यायाञ्च ।

नागदमनी स्त्री० नागाः सर्पा दश्यन्ते अनया दम–ल्युट् ङीप् । (दरेरमूल) लताभेदे ।

नागद्रु न० नागप्रियः द्रुः । द्रु, क्ष्वेडत्वे तस्य सर्पपूजास्थानत्वेन तत् प्रियत्वम् अतएव "द्रुक्ष्वेडिटपतंस्थितामि"ति स्मृतौ सर्पाधिदेवतायाः द्रुक्ष्वेडाश्रितत्वमुक्तम् । [निर्गतकाष्ठखण्डे ।

नागनिर्यूह पु० नागाकारः निर्यूहः । नागदन्तके भित्तिस्थे नागाकारे

नागपाश पु० नागः पाश इव बन्धनहेतुत्वात् । वरुणास्त्रभेदे । नागाकारः पाशः । "सार्द्धद्वयावर्त्तनात्तु नागपाश इति स्मृतः" इति तन्त्रोक्ते ग्रन्थिभेदे ।

नागपुर न० दक्षिणदेशप्रसिद्धे नगरभेदे, हस्तिनापुरे च हैत० । पातालस्थे नागानां नगरे । [दक्षे ।

नागपुष्प पु० नागगन्धं नागं हस्तिमदगन्धयुक्तं पुष्पमस्य । नागकेसरे

नागपुष्पफला स्त्री० नागाकारं पुष्पं फलति प्रसूते फल–अच् । कुष्माण्डयाम् ।

नागपुष्पी स्त्री० नागाकारं पुष्पमस्याः ङीप् । नागिन्यां लतायाम् ।

नागफल पु० नागाकारं फलमस्य दीर्घत्वात् । पटोलभेदे (धुधुल) ।

नागबला स्त्री० नागानां दन्तिनां बलं यस्याः ५ब० । (गोरक्ष-चाकुलिया) लताभेदे ।

नागमात स्त्री०६त० । कद्रुसमाख्यायां कश्यपपत्न्याम्, मनसादेव्याञ्च ।

नागमार पु० नागं हस्तिनं मारयति मृ-णिच्-अण् । भृङ्गराजे तन्मरणे हि हस्तिनो मरणम् । हस्तिमारके त्रि० ।

नागयष्टि स्त्री० नागाश्रयार्था यष्टिः । (रङ्गकाष्ठ) पुष्करिण्यादौ अष्टानां नागानां मध्ये उच्चतानामानुसारेण तदीयस्याश्रयत्वेन कल्पिते दीर्घयूपाकारे काष्ठे ।

नागर त्रि० नगरे भवः । विदग्धे । अगं राति अगरः न अगरः । देवरे, नागरङ्गे, जम्बीरभेदे, सुस्तकभेदे च (नागरमुथा) ।

नागरक पु० नगरे भवः ततः कुत्सितार्थे प्राचीव्ये वा कन् । चौरे, चित्रलेखनकारे शिल्पिनि च ।

नागरघन पु० नागराख्यः घनः सुस्तकः । (नागरमुथा) सुस्तकभेदे ।

नागरङ्ग पु०नागस्य सिन्दूरस्येव रङ्गोरागो यत्र । जम्बीरभेदे (नारङ्गी)

नागरमुस्तक पु०न०कर्म०। स्वनामख्याते सुस्तकभेदे । नागरमुस्ताभ्यत्र

नागराज पु० नागानां सर्पाणां हस्तिनां च राजा टच् समा० । अनन्ते—वर्षे, ऐरावते—गजे च । [लिङ्गे च ।

नागलता स्त्री० नागाकारा नागलोकस्य वा लता । ताम्बूल्यां पुरुष-

नागलोक पु० ६त० । पाताले । [ताम्बूल्याम् नागवल्ल्यादयोऽप्यत्र ।

नागवल्लरी स्त्री० नागाकारा नागलोकस्य वा वल्लरी लता ।

नागसम्भव न० नागं सीसं सम्भवोऽस्य । सिन्दूरे ।

नागस्रोता स्त्री० नाग इव स्रोतो । नागदन्तीवृक्षे, दन्तीवृक्षे च ।

नागहनु पु० नागस्य हस्तिनो हनुरिव । लवणभागसम्भवद्रव्ये ।

नागह्वी स्त्री० नागान् सर्पान् हन्ति टच् ङीप् । वन्ध्याकर्कट्याम् ।

नागान्तक पु० ६त० । गरुडे । नागारातिरत्यत्र वन्ध्याकर्कट्याञ्च ।

नागालाबु स्त्री०नागः नागकुम्भ इवालाबूः। कुम्भाकारायां तुम्बीवृक्षे ।

नागाशन न० नागान् अश्नाति अश-ल्यु । गरुडे ।

नागाह्व न०नागेन युक्ताह्वा यस्य । हस्तिनापुरे । नागाह्वयादयोऽस्यत्र ।
नागी स्त्री० नाग+पुंयोगे ङीप् । सर्पयोषिति, हस्तियोषिति च । स्थौल्ये अनपदेत्यादिना ङीप् । स्थूलगुणयोगात् हस्तित्वस्यास्ति स्त्रियाम् । दीर्घगुणयोगात् सर्पत्वस्यास्तीति स्त्रियां न ङीप् किन्तु टाप् ।
नाचिकेतस् पु० अग्नौ, ऋषिभेदे, तत्राग्नेः, वेदोक्ते उपाख्यानभेदे च ।
नाट पु० नट–घञ् । नृत्ये, कर्णाटदेशे च ।
नाटक पु० कामाख्यास्थपर्वतभेदे, "नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वित" मित्याद्युक्तलक्षणे सा० दृश्यकाव्ये भेदे न० । नाटयति चुरा० नट–एवुल् । नर्त्तके त्रि० ।
नाटाल्ल पु० (तरसुज) लतापनसे ।
नाटार पु० नटस्यापत्यम् आरक् । नटस्य पुत्रे ।
नाटिका स्त्री० नाटकप्रभेदे ।
नाटेय(र) नट्या अपत्यम् ढक् । नट्या अपत्ये । ढ्रक् । नाटेरोऽयत्र ।
नाट्य न० नटानां कर्म यञ् । नटकर्त्तव्ये नृत्यगीतवाद्यरूपे त्रिके ।
नाट्यशाला स्त्री० नाट्यस्य नाट्यार्थं शाला । (नाटमन्दिर) । देवप्रासादसम्मुखस्थे गृहे । [तद्विस्तरस्तु वास्तुशास्त्रे ।
नाट्योक्ति स्त्री० नाट्ये नटकर्मणि उक्तिः । नाटकविषये वचने ।
नाडिन्धम पु० नाडीं वंशनलीं धमति धमा–खश् धमादेशः हस्वश्च । कर्मकारे । [(नालिताशाक) ।
नाडिपत्र पु० नाडीमयं पत्रं यस्य ब० हस्वः । नाड़ीचशाके ।
नाडि(डी) स्त्री० नड–भंगे पु० नड–इन् । वा ङीप् । देहस्थायां शिरायां, शुष्कस्य काण्डे, नाले, व्रणभेदे, गण्डदूर्व्वायां, षष्टिपलात्मके काले, व्रणभेदे, वंशनल्यां च ।
ना(डि)डीका स्त्री० नाड़ी नालं विद्यतेऽस्य ठन् वा हस्वः (कलम्बी) शाके "कुसुम्भं नाडिकाशाक" मिति स्मृतिः पट्टशाके पु० ।
नाडीच पु० नाडिं चमति चम–ड । (नालिता) शाकभेदे ।
नाडीचक्र न० "नाडीमण्डलमासाद्य कुक्कुटाण्डमिव स्थितम् । नाडी-

चक्रमिति प्राञ्चस्तत्साधवः सन्तुदन्ता" इत्युक्तौ नाभिस्थे नाड़ी-निष्कारणचक्रभेदे। [स्तनिभेदे च।

नाडिजङ्घ पु० नाड़ीव जङ्घाऽस्य। काके, ब्रह्मणः प्रिये चक्रभेदे,

नाडीतरङ्ग पु० नाड़ी तरङ्ग इव यस्य। कङ्कोले।

नाणक पु० न अणकः कुत्सितः नञर्थनञ्शब्देन स०। प्रत्यूषे, सुद्रा-चिह्निते निष्कादौ न०। "तुलामाषसमानानां कूटकृत् नाणकस्य चे"ति स्मृतिः।

नाथ उपतापे प्रार्थने च पर०, आशीर्व्यादे आत्म०, सक० ऐश्वर्ये अक० सेट्। नाथति अनाथीत् आशिषि नाथते अनाथिष्ट। णिचि अजनाथत्।

नाथ पु० नाथ–ऐश्वर्ये अच्। अधिपे स्वामिनि, प्रार्थनीये त्रि०।

नाथवत् त्रि० नाथोऽस्त्यस्य मत्व मस्य व। पराधीने परतन्त्रे।

नाथहरि पु० नाथं हरति हृ–इन्। पद्मौ।

नाद पु० नद–घञ्। शब्दे, अर्द्धमात्रात्मके अर्द्धचन्द्राकृतिव्यङ्ग्ये अनुस्वारतुल्ये वर्णे, 'नाभेरूर्द्धं हृदि स्थानात् मारुतः प्राणसंज्ञकः। नदति ब्रह्मरन्ध्रान्ते तेन नादः प्रकीर्त्तित" इत्युक्तौ, "आकाशा-नलैर्मरुज्जातो नाभेरूर्द्धं सनुस्वरम्। सुखेऽभिव्यक्तिमापन्नः यः स नाद इतीरित" इत्युक्तौ च प्राणवायुवृत्तिभेदे च।

नादेय न० नद्या नदस्य वा इदम् ढक्। सैन्धवलवणे सौवीराञ्जने नदीनदसम्बन्धिजले च। कायस्थे वेतसवृक्षे च पु०। नदी भवे त्रि०। नागरङ्गे, जयायां, प्रतीकायाम्, अम्लवेतसे, भूमिज-ब्रह्मणि, अग्निमन्थे, जवायां, काकजङ्घायां च स्त्री० ङीप्।

नाध नाधार्थे भ्वा० आ० सक० सेट्। नाधते अनाधिष्ट।

नाना अव्य० न+नाञ्। विनार्थे, अनेकार्थे, उभयार्थे च।

नानाकन्द पु० नाना कन्दा यस्य। पिण्डालौ। बहुविधमूले त्रि०।

नानार्थ त्रि० नानाविधाः अर्थाः अभिधेयानि प्रयोजनानि वा यस्याः बहुविधाभिधेये, बहुप्रयोजने च।

नान्तरीयक त्रि० अन्तरं प्रतिबन्धादिना व्यवधानं तदनुभवति ठ

नञर्थनञ्शब्देन समासे नान्तरीयं ततः स्वार्थे कन्। अवश्यमा-विनि, व्याप्ते च।

नान्दी स्त्री० नन्दन्ति देवाः पितरो वा यत्र-नन्द्-इन् ङीप् पृ०। सङ्घट्टे। "नान्दीश्राद्धं ततः कुर्य्यादि"ति स्मृतिः, नाटकादौ सूत्रधारेण कर्त्तव्ये "देवद्विजनृपादीनामाशीर्वादपरायणाः। नन्दन्ति देवता यस्मात्तस्मान्नान्दी प्रकीर्त्तिते"त्युक्ते मङ्गलाचरणभेदे च।

नान्दीमुख पु० नान्द्यर्थं मुखं इवार्थे वन्वनान्वितं मुखं यस्य। कूपादिसु-खवन्मुखे पटे। नान्दी इष्टिसदृशं श्राद्धं चास्मुखे यस्य। नान्दीश्रा-द्धभुजि पितृगणे। मात्रादौ स्त्री० ङीप्।

नान्दीवादिन् पु० नान्द्यर्थं वदति वादयति वा। नाटकादौ नान्दीकरे सूत्रधारे, तदर्थं तूर्य्यादिवादके नटादौ च।

नापित पु० क्षुरकर्मकारके जातिभेदे।

नाभि पु० नह्यन्ते अत्र नह्यतेऽनेन वा नह इञ् आत्वादेशः। द्वादशनृपचक्रस्य मध्ये, रथचक्रस्य वामपिण्डाम्, क्षत्रिये च। मृगभेदे स्त्री०। प्राणयन्त्रभेदे (नाइ) पु० स्त्री०। स्त्रीत्वे वा ङीप्। प्रधाने, मुख्ये त्रि०।

नाभिज पु० नाभौ विष्णुनाभौ जायते जन-ड। चतुर्मुखे ब्रह्मणि, नाभिजन्मादयोऽप्यत्र।

नाम अव्य० नामयति नम-णिच् ड। स्वीकारे, विस्मये, स्मरणे सम्भा-वनायां, निन्दायां प्राकाश्ये, विकल्पे, अलीके, कोपे च।

नामकरण न० नाम क्रियतेऽत्र कृ-ल्युट्। 'दशमेऽहनि पिता नाम कुर्या'दिति स्मृत्युक्ते दशमादिदिने कर्त्तव्ये संस्कारभेदे।

नामधेय न० नामैव स्वार्थे धेय। नामनि वाचकशब्दे संज्ञायाम् 'वाचारम्भणं विकारो नामधेय"मिति श्रुतिः।

नामन् न० नम्यतेऽभिधीयतेऽर्थोऽनेन नामनुसीमन्निति नि०। आ-काङ्क्षादिप्रयुक्तार्थबोधके संज्ञाशब्दे, आख्यायाम् तानि च पञ्च 'उणादयन्तं कृदन्तं च तद्धितान्तं समासजम्। शब्दानुकरणं चेति नाम पञ्चविधं स्मृत'मित्युक्तेः।

नामशेष त्रि० नामैव शेषो न देहादिरस्य । मृते । नामशब्दः शेषो यत्र । मरणे पु० ।

नायक पु० नी–ण्वुल् । नेतरि, स्वामिनि, प्रभौ हारमध्यमणौ, सेनापतौ मृङ्गारसावलम्बने पत्युपपत्यादौ च । प्रापयितरि च त्रि० ।

नायिका स्त्री० नी–ण्वुल् । मृङ्गाररसावलम्बने भार्य्यादौ, दुर्गायाः सहचरीषु उपचक्रादिषु च ।

नार पु० नरस्यायम् अण् । बालके, जले च । 'आपो नारा इति प्रोक्ता' इति मनुः । परमात्मसम्बन्धिनि मनुष्यसम्बन्धिनि च त्रि० "नारं स्तृहा तु सङ्घे च" मिति स्मृतिः । नराणां समूहः अण् । नरसमूहे न० ।

नारक पु० नृ–वुन् प्रज्ञाद्यण् । नरके । नरके भवः अण् । नरकस्थे त्रि० । [भोगिनि जीवे ।

नारकिन् त्रि० नारकं भोग्यत्वेनास्त्यस्य इनि । नरकयातना

नारङ्ग पु० न अरङ्गः अरञ्जनं यस्य । स्वनामख्याते जम्बीरभेदे, पिप्पलीरसे, विटे च । गर्ज्जरे न० ।

नारद पु० नारं जलं ददाति दा–क । "नारं पानीय" मित्युक्तं तत् पितृभ्यः सदा भवान् । ददाति तेन ते नाम नारदेति भविष्यती" त्युक्तनिर्वचनयुते मुनिभेदे । नारमज्ञानं द्यति दो–क, नारं ज्ञानं ददाति दा–क वा । मुनिभेदे तत्प्रोक्ते पञ्चविंशतिसहस्रात्मके महापुराणे न० ।

नारदीय न० नारदेन प्रोक्तम् छ । उपपुराणभेदे ।

नारसिंह न० नरसिंहमधिकृत्य कृतः ग्रन्थ इत्यण् । उपपुराणभेदे ।

नाराच न० नराणां समूहः नारमाचमति चम–ड । सर्व्वलौहमये अस्त्रभेदे ।

नारायण पु० "आपो नारा इति प्रोक्ता आपो वै नरसूनवः । ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः" इति मनूक्तनिर्वचनवति विष्णौ ।

नारायणक्षेत्र न० ६त० । "प्रयागमवधिं कृत्वा यावद्वक्षवटत्रयम् ।

अत्र नारायणः स्वामी" त्युक्तो गङ्गायाः प्रवाहा वधिकृत्वावतुर्व-
र्तितस्थाने । [चित्तालके विधानभेदे ।

नारायणबलि पु० स्वत्युक्तो व्रतानां-- पापक्षयादीनां प्राय-

नारायणी स्त्री० "जलायना नराधारा सप्तद्वयवनाधि गा । नारा-
यणी समाख्याता नरनारी प्रकीर्त्तिते" त्युक्तायां विष्णुशक्तौ
लक्ष्म्यां, दुर्गायां, "नारायणि नमोऽस्तु ते" इति चण्डी गङ्गायां,
मतावर्य्यान्च ।

नारिकेल पु० नल-ण्वुल् नालिः जलेन वायुना जलेन वा इलति
चलति इल-क कर्म्म० रलयोरैक्यम् । स्वनामख्याते द्रुमे ।

नारीष्टा स्त्री० नारीभिरिष्टा । मल्लिकायाम् ।

नाल न० नल-ज्वलादि० ण । काण्डे, उत्पलादिदण्डे, क्षुद्राङ्गे न०
स्त्री० । "नाला क्षुद्राङ्गमृजो भजाम" इति मे० ।

नालि(ली) स्त्री० नल-इञ् वा ङीप् । इक्षुस्थिरायाम्, शाकभेदे,
पद्मादिदण्डे च । संज्ञायां कन् । श्वेतकलम्ब्याम्, काटीयाके,
वर्णनवकषायाम्, कृत्तिकर्णवेधभेदे, नाले, क्षुद्रिक्रिये, वेणुभा-
जने, दण्डालके काले च ।

नालिता स्त्री० नल-णिच् क्त । स्वनामख्याते शाकभेदे ।

नालीक पु० नाल्या कायति कै-क । सुखनाले लौहसंयुक्ते अस्त्र-
स्फिरे शरभेदे, शरीरे च । द्रव्यगुणे न० ।

नाविक पु० नावा चरति ठक् । कर्णधारे ।

नाव्य त्रि० नावा तीर्य्यतेऽसौ नौ-यत् । नौतार्य्ये देये ।

नाश पु० नश-घञ् । प्रलयने, अदर्शने, निधने, अनुपलब्धौ च ।

नासत्य पु० द्वि० व० । नासि असत्यं ययोः नञ् प्रज्ञाद्या, नासां
त्यजतः त्यज-ड नि० वा । अश्विनीकुमारयोः तौ हि सूर्य्यते-
जोऽसहमानाया संज्ञायाः उत्तरकुरुषु अश्वरूपं धृत्वा तपश्चर्य्याः
अश्वरूपधारिणा सूर्य्येण संगतायाः कन्यापुरुषधिया तद्रेतो नासा-
रन्ध्रेण त्यजन्त्यास्तस्यास्तत्प्रभावेण जातावि"ति पुराणकथा ।

नासा स्त्री० नाश-घञ् वा । नासिकायां गन्धग्राहकेन्द्रियभेदे, गन्धे च ।

नासादारु न० नासायै शब्दाय दारु । द्वारोर्ध्वस्थे काष्ठखण्डे (ऊर्ध्वकाठ)

नासानु पु० नासायै नासिकाशब्दाय अलते पर्य्याप्नोति अल उण् । कटफलवृक्षे तत्फलचूर्णयोगे हि नासिकाशब्दो भवति ।

नासिका स्त्री० नास—ण्वुल् । गन्धग्राहकेन्द्रियभेदे नासायाम् ।

नासिक्य त्रि० नासिकायै हितं तत्र भवो वा यत् । नासाभवे, नासिकाहिते च । नासाभवयोरश्विनीकुमारयोः पु० द्वि० व० ।

नासीर न० नास—ईरन् । अपसरे सैन्ये, सेनामुखे च । अपसरे त्रि० ।

नास्ति अव्य० अस्तीति विभक्तिप्रतिरूपमव्ययं सुप् सुपेति नञ् शब्देन स० । अविद्यमानतायां, सत्त्वाभावे, यथा अस्ति नास्ति न जानातीति चाणक्यः ।

नास्तिक त्रि० नास्ति परलोकस्तत्साधनमदृष्टं, तत्त्वाचीश्वरो वा इति मतिरस्य ठन् । परलोकाभाववादिनि तत्साधनादृष्टाभाववादिनि, तथाचिच्च ईश्वरस्यासत्त्ववादिनि च चार्वाकादौ ।

नास्तिकता स्त्री० नास्तिकस्य भावः । मिथ्यादृष्टौ परलोकाद्यभावज्ञानस्य मिथ्यात्वात् ।

नास्तिक्य न० नास्तिकस्य भावः कर्म वा यत् । वाक्योक्तेषु फलवत्कर्मसु अफलताबुद्धौ ।

नि अव्य० नी—डि । निषेधे, भर्त्सार्थे, नित्यार्थे, संशये, कौशले, क्षेपे, उपदेशे, सामीप्ये, आदरे, दाने, मोक्षे, अन्तर्भावे, बन्धने, राशौ, अधोभागे, विश्वासे, निश्चये, निवेशे, च ।

निःशलाक त्रि० निर्गतः शलाकायाः निर्गता शलाका यस्मात् वा । निर्लज्जे रण्डि । [शीघ्रं शल्यं निर्गच्छति ।

निःशल्या स्त्री० निर्गतं शल्यं यस्याः पृ० व० । दन्तोद्भेदे । तत्रोक्ते ।

निःशेष त्रि० निर्गता शेषात् प्रा० ब० । निखिले सकले ।

निःशोध त्रि० निर्गतं शोधनमस्मात् पृ० व० निर्मले, शुद्धे, शोधिते च ।

निःसङ्गता स्त्री० निःसंगस्य भावस्तत्तया त्रि—ष्युट् स्त्रीप् । अधिरोहित्वात् (पद) ।

निःश्रेणि(णी) स्त्री० निर्गता श्रेणिः पंक्तिरत्र । पंक्तिनिर्गते कोष्ठे माने, खर्ज्जुरीवृक्षे च ।

निःश्रेयस न० नितरां श्रेयः नि० अच् सभा० । मोक्षे, मङ्गले, विज्ञाने, भक्तौ, अनुभावे च ।

निःश्वास पु० निर्+श्वस–घञ् । मुखनासाभ्यां निर्गते वायौ ।

निःसत्त्व त्रि० निर्गतं सत्त्वं यस्य । धैर्य्यशून्ये, बलशून्ये, प्राणिशून्ये च ।

निःसम्पात पु० निर्गतः सम्पातो गतायतं यस्मात् । अश्वरत्ने ।

निःसरण न० निःसरत्यस्मात् निर्+सृ–अपादाने ल्युट् । मेढ्रादिद्वारे । भावे ल्युट् । निर्गमे, मरणे निर्याणे च । करणे ल्युट् उपसर्गे ।

निःसार पु० निर्गता सारात् । शाखोटवृक्षे, स्रोतोवृक्षे च । सार-रहिते त्रि० । कदलीवृक्षे स्त्री० ।

निःसारण न० निः सार्य्यतेऽनेन निर्+सृ–णिच्–ल्युट् सृदृ-दिभ्योनिर्गमप्रथने ।

निःस्नेहा स्त्री० निर्गच्छति स्नेहो यस्मात् । अतसीवृक्षे (सविना) स्नेहशून्ये त्रि० ।

निःस्राव पु० निःस्रवति स्रु–घञ् । (घाड़) (क्षेप) मलरसे ।

निःस्व पु० नास्ति स्वमस्य । दरिद्रे । [निर्द्धन च ।

निकट न० नि+कटच् । नि+कट–अच् वा । समीपे ।

निकर पु० नि+कृ–अप् समूहे, सारे, न्यायदेये, विष्ठे, निधौ च ।

निकर्षण न० निर्गतः कर्षणात् । आमादौ स्वल्पादिरजसार्द्धं परि-क्लिन्ने देये, वह्निर्विरेचनभूमौ च ।

निकष(स) पु० नि+कष(स) अच् च वा । (कटीपाथर) कषणसाध्ये पाषाणे, अक्षादितीक्ष्णतासाधने पाषाणादौ च ।

निकषण न० नि+कष–भावे ल्युट् । उल्लेखने ।

निकषा अव्य० नि+कष आ निकटे, सभायाञ्च । राक्षसमातरि स्त्री० ।

निकषात्मज पु० ६त० । राक्षसे निकषात्मजादयोऽप्यत्र ।

निकषोपल पु० कर्म० । पाषे । स्वर्णादिकषणसाधने प्रस्तरे च (क-ष्टोपाथर) ।

निकाम न० नि+कम–घञ्। वयेच्छिते, दृष्टातिक्रमे, अतिशये, निकामतप्तायो"ति कु० दृष्टे, परमात्मनि च।

निकाय पु० नि+चि–घञ् कुत्वम्। समानधर्मप्राणिसंघे, निवासे च।

निकाय्य न० निचीयतेऽत्र नि+चि यत् कुत्वम्। दृष्टे।

निकार पु० नि–कृ–घञ्। परिभवे, अपकारे, तिरस्कारे च। कृ–घञ्। धान्यादेर्हुंथेभे।

निकार पु० नि+कृ–णिच् घञ्। मारणे, परिभवकरणे।

निकुञ्च न० निःशेषेण कौ जायते जन–ड पृ०। सतादिसिद्धितस्थले।

निकुम्भ पु० नि–कुम्भ–अच् पृ०। कुम्भकर्णराक्षसभ्रातरि, दन्तिदन्ते च गौरा० ङीष् निकुम्भीत्यत्र। [स्यामां देव्यान्च।

निकुम्भिला स्त्री० लङ्कायाः पश्चिमभागस्थायां गुहायां तत्-

निकुरम्ब न० नि+कुर–घञ् वेदे अम्बच्। समूहे।

निकृत त्रि० नि+कृ–क्त। परिभूते, उपद्रुते, प्रत्याख्याते, वञ्चिते, नीचे, भ्रष्टे च।

निकृति स्त्री० नि+कृ–क्तिन्। माये, क्षेपे, तिरस्कारे, दैन्ये च।

निकृष्ट त्रि० नि+कृष–क्त। आचाराद्यभिर्निन्दिते, अपकृष्टे, अधमे।

निकेत पु० नि+कित–निवासे आधारे घञ्। गृहे, निकेतने,।

निकेतन न० नि+कित–निवासे आधारे ल्युट्। गृहे। कर्मणि ल्युट्। प्रसादवृक्षौ पु०।

निकोचक पु० नि+कुच–घञ्रे वुन्। अक्षोटवृक्षे।

निकोठक पु० नि+कुठि–वुन् पृ० नलोपः अक्षोटवृक्षे।

निक्क(का)ण पु० नि+कण–अप्, घञ् वा। वीणायाः यन्त्रे।

निक्षिप्त त्रि० नि+क्षिप–क्त। न्यस्ते, स्थापिते, (गच्छित)।

निक्षेप पु० नि+क्षिप–कर्मणि घञ्। अन्यस्मिन् अर्पिते स्वधनादौ, मित्रिणस्ते संरक्षणार्थं प्रदत्ते च। भावे घञ्। स्वद्रव्यस्यान्यस्मिन् विश्वासात् स्थापनरूपे "स्वद्रव्यं यदि विश्वासात् निक्षिप्तत्वविशङ्किते। निक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैरि"त्युक्ते व्यवहारभेदे च।

निखर्व पु० निखर्वति नि+खर्व–गतौ अच् । अर्बुदसंख्यं खर्वनिखर्वमहापद्मशङ्खवृन्दमकादि"ति लीलावत्युक्ते दशसहस्रकोटिरूपे संख्याभेदे तत्संख्येये च । वामने त्रि० ।

निखात त्रि० नि+खन–क्त । खनित्वा स्थापिते ।

निखिल त्रि० निष्टत्तं खिलं शेषो यस्मात् । सकले समग्रे ।

निगड पु० न० । नि+गल–अच् डलयोरैक्यात् डत्वम् । शृङ्खलायाम् । (बेड़ी) निष्टत्तो गडः सेचनमस्मात् कठिनत्वात् । [illegible] हस्तिपादबन्धने अन्दुके ।

निगडित त्रि० निगडो जातोऽस्य तारं० इतच् । बद्धे संयते ।

निगद पु० नि+गद–अच् । भाषणे, शब्दमात्रे च ।

निगम पु० निगम्यतेऽत्र अनेन वा नि+गम–घञ्, निगमे पुरभेदे भवः अण् न वृद्धिः वा । वाणिजे, पुरभेदे, कटभेदे वणिक्पथे, निश्चये, अध्वनि, प्रतिज्ञायाम्, पदार्थावकथनेन वेदार्थबोधके ग्रन्थभेदे, न्यायमतसिद्धे पञ्चावयवन्यायमध्ये चरमावयवे, न्यायशास्त्रे, तन्नभेदे, वेदे च "निगमकल्पतरो"रिति भागवतम् ।

निगमन न० नि+गम–ल्युट् । प्रतिकूलप्रमाणबाधनेन प्रकृतप्रमाणोपसंहारात्मके पञ्चावयवन्यायमध्ये "तस्मात् वह्निमान्" इत्याद्याकारके चरमावयवे ।

निग(गा)र पु० नि+गॄ–अप्, घञ् वा । भोजने ।

निगाल पु० नि+गल–अदने घञ् । अन्नगलदेशे ।

निगूढ पु० नि+गुह–क्त । वनसर्पे । गुप्ते, आलिङ्गिते च त्रि० ।

निगृहीत त्रि० नि+ग्रह–क्त । तर्जिते, पीडिते, अवरुद्धे च ।

निग्रह पु० नि+ग्रह–अप् । भर्त्सने, सीमायाम्, बन्धने, अनुग्रहाभावे, चिकित्सायां, निषिद्धप्रवृत्तस्य तिरस्कारे मारणे, प्रवृत्तिवारणाय रोधे च ।

निग्रहस्थान न० निग्रहस्य वादिन[illegible]स्य स्थानम् । गौतमोक्तेषु षोडशसु पदार्थेषु मध्ये [illegible] विस्तरस्तु वाचस्पत्ये ।

निग्राह पु० नि+ग्रह–घञ्। अनिष्टं ते भृत्यादिर्न्येवं रूपे शासने।

निघ पु० निर्घिशेषेण हन्यते हन–क नि०। समविस्तारदैर्घ्ये, तुल्यारोहपरिणाहे च पदार्थे।

निघण्टिका स्त्री० नि+घट–एवुल्। गुलञ्चवृक्षे।

निघण्टु पु० नि+घट–उ। नामग्राहके कोषाभिधानादौ।

निघस पु० नि+अद–अप् षत्वादेशः। भोजने।

निघृण त्रि० नि+घृण–अर्शआद्यच्। अधीने, घृणिते च "द्विगुणान्त्यनिघ्न" इति लीलावती।

निचय पु० नि+चि–भावे अच्। अवयवराशिना उपचिते पदार्थे, "सर्वं जगान्ता निचया" इति पुराणम्। भावे अच्। समुच्चये, वस्तुसमूहे, निश्चये च।

निचाय पु० नि+चि–घञ्। राशीकृते धान्यादौ।

निचित त्रि० नि+चि–क्त। व्याप्ते, पूरिते, सङ्कीर्णे, निर्म्मिते च।

निचुल पु० नि+चुल–क। हिज्जलवृक्षे, वेतसे, निचोले च।

निचूल पु० नि+चुल–क पृ० दीर्घः। हिज्जले वृक्षे, निचोले च।

निचोल पु० नि+चुल–अच्। प्रच्छदपटे (येन शय्यादि प्रच्छाद्यते तस्मिन्) दोलिकाद्यावरणवस्त्रे, स्त्रीपिधानपटे च।

निचोलक पु० नि+चुल–एवुल्। सैन्यादेः चोलाकृतौ सन्नाहे, वारवाणे, कूर्पासे च।

निचोली स्त्री० नि+चुल–क गौरा० ङीष्। स्त्रीणां प्रच्छादने पटे।

निज त्रि० नि+जन–ड। आत्मीये, स्वाभाविके, नित्ये च।

निञ्जिका स्त्री० (तेओड़ा) कलायभेदे।

नितम्ब पु० नि+तम्ब–अच्, निष्टतं तम्यते काम्यते कामुकैः तम–अच् वा। स्त्रीणां पश्चात् कटितटे, स्कन्धे, कूले, कक्षा अधोभागे, कटके, (पर्वतवर्त्मस्थाने) कटिमात्रे च।

नितम्बिनी स्त्री० नितम्ब+प्राशस्त्ये इनि। प्रशस्तनितम्बवत्यां, स्त्रियां, स्त्रीमात्रे च।

नितराम् अव्य० नि+तर–आम्। सुतरामित्यर्थे, अतिशयेनेत्यर्थे च।

नितल न० निःशेषेण तलमधोभागः । पातालभेदे ।

नितान्त न०नितान्यति क्त नि+तम-क्त । एकान्ते अत्यन्ते । तद्वति त्रि० ।

नित्य न० नियमेन वा भवं नि+त्यप् । सतते अहरहः क्रियमाणत्वेन विधिबोधिते, प्रत्यवायसाधनाभावप्रतियोगिनि कर्मणि, यथा अहरहः सन्ध्यामुपासीतेति अत्र सन्ध्याभावे प्रत्यवायसाधनत्वम् । अविच्छिन्नपरम्पराके, उत्पत्तिविनाशरहिते च यथा वर्षा नित्याः । तद्वति, शाश्वते, कालत्रयस्थे, वस्तुनि च त्रि० । सत्यङ्गे पु० ।

नित्यकर्म्म न० कर्म० । अकरणे प्रत्यवायसाधने सन्ध्यावन्दनादौ ।

नित्यतृप्त त्रि० नित्यं तृप्तः नित्येन ब्रह्मानन्देन वा तृप्तः । परमानन्दलाभेन सतततृप्ते "नित्यतृप्तो निराश्रय इतिगी० ।

नित्यदा अव्य० नित्य+दाच् । सातत्ये, सदेत्यर्थे ।

नित्यमुक्त पु० नित्यं मुक्तः । कालत्रयेऽपि बन्धशून्ये परमात्मनि ।

नित्ययज्ञ पु० कर्म० । फलयोगं विना जीवनमात्रनिमित्तेन विधिते यथाकथञ्चित् प्रतिनिध्यादिना, अशुष्यद्द्रव्येण वानुष्ठेये, अग्निहोत्रादौ यज्ञे ।

नित्यसत्त्वस्थ त्रि० नित्यमचलं यत् सत्त्वं धैर्य्यं गुणभेदो वा तत्र तिष्ठति स्था-क । धैर्य्यावलम्बिनि, रजस्तमसी अभिभूय सदा सत्त्वगुणावलम्बिनि च ।

नित्यसमास पु० कर्म० । व्याकरणोक्ते समस्यमानयावत्पदरहितविग्रहवाक्यसूचिते समासभेदे ।

नित्यानध्याय पु० सर्व्वथा वर्ज्जनीयवेदपाठकालादौ । "द्वावेव वर्ज्जयेन्नित्यमनध्यायौ प्रयत्नतः । स्वाध्यायभूमिञ्चायुञ्चात्मानं चायुषिं द्विजः" इति "इमावित्यमनध्यायानधीयानो विवर्ज्जयेदि"ति मनुना प्रदर्शितेऽनध्यायभेदे ।

नित्याभियुक्त त्रि० नित्यमभि समन्तात् युक्तः योगे व्याप्तः । देहयात्रामात्रार्थं प्रयतमाने, इतरत्यागासक्ते योगिनि ।

निदर्शन न० नि+दृश-ल्युट् । उदाहरणे, च अर्थालङ्कारभेदे स्त्री० टाप् ।

निदाघ पु० नितरां दह्यतेऽत्र नि+दह्—घञ् न्यङ्वादि० कुत्वम् । उष्णे, घर्मे, घर्मकाले ज्यैष्ठाषाढ़मासयोः, घर्मजले च ।

निदाघकर पु० निदाघं घर्मं करोति कृ—अच् । सूर्ये ।

निदाघकाल पु० ६त० । ग्रीष्मर्त्तौ ज्यैष्ठाषाढ़मासयोः ।

निदान न० नितरामवधारणया दीयते दा—ल्युट् । आदिकारणे, कारणमात्रे, शुद्धौ, तपसः फलयाचने, बन्धदामनि, अवसाने, रोग-निर्णायके ग्रन्थभेदे, रोगहेतौ च ।

निदिग्ध त्रि० नि+दिह्—क्त । उपचिते, लेपादिना वर्द्धिते च एलायां स्त्री० । ततः संज्ञायां कन् । कण्टकारिकायां स्त्री० ।

निदिध्यासन न० "निरन्तरं विचारो यः श्रुतार्थस्य गुरोर्मुखात् । तन्निदिध्यासनं प्रोक्त"मिति निरुक्ते विचारभेदे "तास्यां निर्वि-चिकित्सेऽर्थे चित्तस्य स्थापितस्य यत् । एकतानत्वमेतद्धि निदिध्या-सनमुच्यते" इत्युक्ते ध्यानभेदे च ।

निदेश पु० नि+दिश—घञ् । शासने, आज्ञायां, कथने निकटे, भाजने च ।

निद्रा स्त्री० नि+द्रा—अङ् । शयने "यदा तु मनसि क्लान्ते कर्म्मात्मानः क्लमान्विताः । विषयेभ्यो निवर्त्तन्ते तदा स्वपिति मानवः" इत्युक्त-हेतुके विषयेभ्यो कर्मेन्द्रियाणां व्यापारोपरमरूपे जीवस्याव-स्थाभेदे स्वप्ने । [वधिके अष्टमस्थाने ।

निधन पु० न० नि+धा—क्यु । मरणे, नाशे, कुले, ज्योतिषोक्ते लग्ना-

निधान न० नि+धा—ल्युट् । शङ्खपद्मादौ निधौ, "निधानकुम्भस्य यथेति रघुः । आश्रये, कार्य्यावसाने च ।

निधि पु० नि+धा—कि । धनाधिदेवशङ्खपद्मादिभेदे । विस्तरस्तु वाच-स्पत्ये । पुनरादानाय क्वचित्प्रदेये अर्पणे, अस्वामिके द्रव्यभेदे च । आधारे कि । आधारे । यथा गुणनिधिः । वारिधिरि-त्यादि सप्तदृष्टे, नलिकानाममन्धद्रव्ये च पु० ।

निधीश पु० ६त० कुबेरे निधिपत्यादयोऽप्यत्र ।

निधुवन न० नितरां धुवनं हस्तादिकम्पनं यत्र । सुरते स्त्रीपुंसयोः केलिभेदे । "निधुवनविनोदेन च मनु"मिति श्यामास्तोत्रम् ।

निन(ना)द पु० नि+नद–अप्, घञ् वा ध्वनौ शब्दे रवणेऽपि च ।

निन्दा स्त्री० निन्द्–अ । अपवादे, गर्हायां कुत्सायां, दूषणे च ।

निप पु० न० । नियतं पिबत्यनेन पा–क । कलसे, कदम्बवृक्षे पु० ।

निपत्या स्त्री० निपतत्यत्र आधारे क्यप् । पिच्छिलभूमौ, युद्धभूमौ च ।

निपात पु० निकृष्टः पातः । अन्तिमपतने मरणे, व्याकरणोक्तेषु चादिषु, प्रादिषु च । [धारस्थाने, गोदोहनपात्रे च ।

निपान न० नियतं पीयतेऽत्र । कूपसमीपस्थे जलाधारे, कूपोद्धृतजला-

निपीडित त्रि० नितरां पीडितः नि+पीड–क्त । (नेंड़ान) कृत–निष्पीड़ने ।

निपुण त्रि० नि+पुष–कर्मणि क । प्रवीणे, क्रियासु दक्षे ।

निफला स्त्री० निकृष्टं फलं यस्याः । ज्योतिष्मत्याम् लतायाम् ।

निबन्ध पु० नि+बन्ध–घञ् । कालविशेषे देयत्वेन प्रतिश्रुते वस्तुनि, "निबन्धो द्रव्यमेवमवे"ति स्मृतिः संग्रहग्रन्थभेदे, मूत्ररोधरूपे रोग-भेदे, बन्धने च । 'निबन्धायासुरीमते'ति गीता । निबध्नाति कोष्ठम् अच् । निम्बवृक्षे तत्सेवने हि कोष्ठरोधो भवति ।

निबन्धन न० निबध्यतेऽनेनात्र वा ल्युट् । हेतौ, वीणायास्तन्त्रीनि-बन्धनोर्द्ध्वभागे च । भावे ल्युट् । बन्धने ।

निभ पु० निभाति नि+भा–क । व्याजे । उत्तरपदस्थः । सदृशे त्रि० । यथा पितृनिभः मातृनिभेत्यादि तत्सदृशः इत्यर्थः । स्वातन्त्र्येणास्य न प्रयोगः ।

निभालन न० नि+चुरा० भल+ल्युट् । दर्शने ।

निभृत त्रि० नि+भृ–क्त । धृते, विनीते, निश्चले, एकाग्रे, गुप्ते, नि-र्जने, अस्तायोपस्थिते च "नभसा निभृतेस्दुने"ति रघुः ।

निमज्जथु पु० नि+मस्ज–अथुच् । अवगाहने, निश्चेष्टतया स्थितौ च ।

निमज्जन न० नि+मस्ज–ल्युट् । अवगाहने, जलादौ प्रवेशे, निश्च-लतया स्थितौ च ।

निमन्त्रण न० नि+मन्त्र–ल्युट् । अकरणे प्रत्यवायसाधने नियोगभेदे

यथा आद्यादौ भोजनार्थं नियोगः "तस्याकरणे प्रत्यवायो जायते" इति स्मृतौ प्रसिद्धम् आह्निके च ।

निमान न० निमीयते क्षीयतेऽनेन मा–लुट् । मूल्ये ।

निमि पु० इक्ष्वाकुवंश्ये, चन्द्रवंश्ये च नृपभेदे ।

निमित्त न० नि+मिद्–तक् । कारणे, हेतौ, शरव्ये, चिह्ने, भाविशुभाशुभसूचके ज्योतिषाद्युक्ते शकुने च "निमित्तन्न स्मपोधन" इति रघुः "निमित्तानि च पश्यामी"ति गीता । उद्देश्ये च । "निमित्तात् कर्मसंयोगे" इति पाणिनिः ।

निमित्तकारण न० कर्म० । न्यायोक्ते समवाय्यसमवायिभिन्ने कारणे यथा घटादौ कृदादिः समवायिकारणं कपालद्वयसंयोगश्चासमवायिकारणम् तदुभयभिन्नं कुलालादि निमित्तकारणम् ।

निमि(मे)ष पु० निमेषति नि+भ्वा० मिष–क अच् वा । कालभेदे, चक्षुषः स्वाभाविकस्पन्दनमितकाले (पलक), भावे अप् कु०न गुणः, घञ् वा गुणः । चक्षुर्मीलने ।

निमीलन न० नि+मील–लुट् । मरणे, सङ्कोचने, चक्षुर्मुद्रणे च ।

निम्न त्रि० निम्नं नमति स्ना–अच्यासे क । गभीरे नीचे ।

निम्नगा स्त्री० निम्नं गच्छति गम–ड । नदीमात्रे । नीचगामिनि त्रि० ।

निम्नोन्नत त्रि० निम्नं तदुन्नतञ्च । उच्चतानते बन्धुरे ।

निम्ब पु० निम्बति स्वास्थ्यं निबि सेचने अच् । (निम) वृक्षे ।

निम्बतरु पु० निम्ब–अच् कर्म० । मन्दारवृक्षे ।

निम्बबीज पु० निम्ब–अच् तद्बीजं यस्य । राजादनीवृक्षे ।

निम्बू स्त्री० निम्ब–ऊ । (नेबू) वृक्षभेदे । स्वार्थे कन् । अत्रैव ।

निम्लीचन न० नि+म्लुच–लुट् । अस्तप्राये ।

नियत त्रि० नि–यम–क्त । निश्चिते, नित्ये, आचारयुक्ते, नियमवति, वशीकृतेन्द्रिये च । नित्यकर्मणि न० ।

नियति स्त्री० नि+यम–क्तिन् । नियमे, भाग्ये "नियतिः केन बाध्यते" इति पुराणम् । प्राक्तनशुभाशुभकर्मणि, पुण्ये च ।

नियन्तृ पु० नियच्छति वाहान् नि+यम–तृच् । सारथौ । शास्तरि पशुप्रेरके त्रि० । स्त्रियां ङीप् ।

नियन्त्रित त्रि० नितरां यन्त्रितः नि+यन्त्र–क्त । अबाधे, प्रतिरुद्धे च

नियम पु० नि+यम–घञ् । यन्त्रणे, प्रतिज्ञायां, निश्चये, अङ्गीकारे, पूर्वमीमांसोक्ते प्रत्यक्षस्य इतर प्रत्यवृदासेन एकतरपक्षे व्यवस्थापने, यथा व्रीहिनवहन्ति । अत्र विलक्षीकरणसाधनभूतस्य नखादेरवहननस्य या उभयोः प्राप्तौ अवघात इव प्रवृत्तिर्व्यवस्थाप्यते । स्मृते, "नियमस्तु स यत् कर्म्मानित्यमागन्तुसाधनं"मित्युक्ते अनित्ये आगन्तुकसाधने उपवासादौ कर्मणि, शौचादिषु च । विस्तरस्तु वाचस्पत्ये ।

नियामक पु० नि+यम–ण्वुल् । कर्णधारे । नियन्तरि त्रि० ।

नियुत न० "शतं सहस्रमयुतं नियुतं प्रयुतं तथे"त्युक्तायां लक्षसङ्ख्यायां "लक्षञ्च नियुतञ्चैव"त्युक्तायां दशलक्षसंख्यायां, तत्तत्सङ्ख्यान्विते च ।

नियुद्ध न० निश्चला नितरां वा युद्धम् । बाहुयुद्धे ।

नियोग पु० नि+युज–भावे घञ् । अवधारणे, आज्ञायाम्, निश्चयेन प्रेरणे च । नियुज्यतेऽस्मिन् आधारे घञ् । कार्य्ये ।

नियोग्य त्रि० नियोक्तुमर्हति ण्यत् । नियोगकरणार्हे प्रभौ ।

नियोज्य त्रि० नियोक्तुं शक्यते कर्मणि ण्यत् क्त्वाभावः । प्रेष्ये प्रेरणार्हे भृत्ये । [व्याप्त्यादार्थे च

निर् अव्य० नृ–क्विप् । न दीर्घः । निषेधे, निश्चये, बहिर्भावे नि–

निरंश त्रि० निर्गतोऽंशोऽस्य । अंशरहिते पतितक्लीवादिपुत्रादौ । राश्यंशरहिते प्रथमदिने अन्तिमदिने संक्रान्तिदिने च ।

निरग्नि पु० नास्ति अग्निरस्य । अग्निसाध्यश्रौतकर्मशून्येषु विप्रादिषु त्रिषु वर्णेषु ।

निरङ्कुश त्रि० निर्गतोऽङ्कुशात् । बाधाशून्ये, अनिवार्य्ये च ।

निरञ्जन त्रि० निर्गतमञ्जनं यस्मात् । अञ्जनशून्ये निर्मले । अञ्जनं तमः मलिनस्वभावत्वात् तस्मात् निर्गतं तन्निर्गतं यस्मादिति । परमब्रह्मणि "निरञ्जनं साम्यमुपैति दिव्य"मिति स्मृतिः ।

निरतिशय त्रि० निर्गतोऽतिशयोऽस्मात् । अतिशयशून्ये परमोत्कृष्टे ।
निरत्यय त्रि० निर्गतोऽत्ययोऽस्मात् । निर्बाधे अमायिके च "निरत्ययं साम" इति भारविः । [निरबधौ, निष्क्रिङ्के च ।
निरन्तर त्रि० निर्गतमन्तरात् निर्गतमन्तरं वा यस्मात् । निबिडे,
निरपत्रप त्रि० निर्गतोऽपत्रपायाः । निर्लज्जे ।
निरर्गल त्रि० निर्गतमर्गलं यस्मात् । अबाधे प्रतिबन्धरहिते च ।
निरर्थक त्रि० निर्गतोऽर्थो यस्मात् कप् । निष्प्रयोजने अभिधेयशून्ये च ।
निरवग्रह त्रि० निर्गतोऽवग्रहात् । निष्प्रतिबन्धे ।
निरवद्य त्रि० निर्गतोऽवद्यात् । दोषशून्ये, उत्कृष्टे च । [त्रि० ।
निरवयव पु० निर्गतोऽवयवात् । परमाणौ । आकारशून्ये आकाशादौ
निरवशेष त्रि० निर्गतोऽवशेषो यस्मात् । सर्वस्मिन् ।
निरवसित त्रि० निर+अव+सो—क्त । मातृवहिष्कृते (यस्य भोजन-पात्रं संस्कारेणापि न शुध्यति तस्मिन्) चाण्डालादौ नीचवर्णे ।
निरसन न० निर्+अस—ल्युट् । परित्यागे, प्रतिक्षेपे बधे, निष्कासने च ।
निरस्त त्रि० निर+अस—क्त । त्वरितोच्चारिते, निष्ठ्यूते, क्षिप्ते, प्रतिक्षिप्ते, भर्त्सिते च ।
निराकरण न० निर्+आ+कृ—ल्युट् । निवारणे, दूरीकरणे च ।
निराकरिष्णु त्रि० निर्+आ+कृ—इष्णुच् । निवारणशीले प्रतिक्षेपकर्त्तरि च ।
निराकृत त्रि० निर्+आ+कृ—क्त । दूरीकृते, निवारिते च ।
निराकृति स्त्री० निर्+आ+कृ—क्तिन् । निवारणे ।
निरामय त्रि० निर्गत आमयात् । रोगरहिते । वनकुक्कुटे, शूकरे च पु० ।
निरामालु पु० नितरां रमतेऽत्र रम—आलु । कपित्थवृक्षे ।
निरालम्बा स्त्री० निर्गत आलम्बोऽस्मात् । आकाशलम्बिन्यां सांख्याम् ।
निरीश न० निर्गतमीशायाः । फाले । ईश्वरशून्यतावादिनि नास्तिके त्रि० ।
निरुक्त न० निश्चयेनोच्यतेऽत्र । निर्+वच—क्त । "वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्त" मित्युक्तादिशा प्रकृतिप्रत्ययाद्यवयवार्थनिर्-

घनप्रतिपादके वेदाङ्गे ग्रन्थभेदे । [सन्दिग्धार्थबोधने ।
निरुक्तिस्त्री० निर्+वच-क्तिन्। निर्वचने प्रकृतिप्रत्ययाद्यवयवार्थकथनद्वारा
निरुपाख्य त्रि० निर्गता उपाख्या यस्मात् । असत्यर्थे बन्ध्यापुत्रादौ,
वाचोमनसश्च विषयतयोल्लेखनायोग्ये अस्फुटस्वरूपे च ब्रह्मणि ।
निरूढ़ पु० निर्+वह-क्त । शक्तितुल्यलक्षणयार्थबोधके शब्दे ।
निरूढ़लक्षणा स्त्री० निरूढ़ा शक्तितुल्या लक्षणा । व्याकरणकोषादि-
हेतुतः प्रसिद्धार्थे शक्तितुल्यायां लक्षणरूपायां शब्दस्यार्थबोधनायक्तौ ।
निरूढ़ि स्त्री० निर्+वह-क्तिन् । प्रसिद्धौ [निदर्शने, आलोके च ।
निरूपण न० नि+रूप-ल्युट् । तत्त्वज्ञानानुकूलशब्दप्रयोगे विचारे,
निरूपित त्रि० नि+रूप-क्त । नियुक्ते, कृतनिरूपणे, कल्पिते, न्या-
योक्ते निरूपकतासम्बन्धेन सम्बन्धिनि च ।
निरोध पु० नि+रुध-घञ् । नाशे, "[illegible]धो नचोत्पत्ति[illegible]ति
पुराणम् । प्रलये, प्रतिरोधे च ।
निरोधन न० नि+रुध-ल्युट् । कारागारादौ प्रवेशनेन गतिरोधने ।
निर्ऋति नियता ऋतिर्हिंसा यत्र । दक्षिणपश्चिमविदिक्पतौ । अल-
क्ष्म्राम् स्त्री० । निरुपद्रवे त्रि० ।
निर्गन्धपुष्पी स्त्री० निर्गतं गन्धमूल्यं पुष्पं यस्याः ङीप् । शाल्मलीवृक्षे ।
निर्गुण पु० निर्गतो गुणेभ्यः । सत्त्वरजस्तमोरूपगुणत्रयशून्ये निर्धर्मके
परमात्मनि । निर्गताः गुणाः शौर्यादयोरूपादयो वा यस्मात् ।
गुणहीने त्रि० ।
निर्गुण्डी स्त्री० निर्गता गुण्डात् वेष्टनात् पृ० गौरा० ङीष् ।
नीरसे, कलिकायां, सिन्धुवारवृक्षे, पद्मकन्दे च ।
निर्ग्रन्थ पु० निर्गतो ग्रन्थेभ्यः । क्षपणके, दिगम्बरे, बौद्धभेदे, द्यूत-
कारे, मुनिभेदे च । निर्धने, मूर्खे, निःसहाये, निर्वेदं गते च
त्रि० । स्वार्थे कन् । क्षपणे, निष्फले च पु० वस्त्ररहिते त्रि० ।
निर्ग्रन्थन न० निर्+ग्रथि-कौटिल्ये ल्युट् । मारणे ।
निर्ग्रन्थिक पु० निर्गतो ग्रन्थिर्ग्रन्थिर्यस्य कप् । क्षपणके । निर्गुणे,
ग्रन्थिहीने च त्रि० ।

निर्घात पु० निर्+हन–घञ् । "पवनः पवनाभिहतो, मगनाद्वनौ यदा पतति । भवति तदा निर्घात" इत्युक्ते पवनाहतपवनजन्ये शब्दभेदे । "निर्घाते भूमिचलने" इति स्मृतिः ।

निर्घृण त्रि० निर्गता घृणा दया यस्मात् । निर्दये ।

निर्घोष पु० निर्+घुष–घञ् । शब्दमात्रे ।

निर्जन निर्गतो जनो यस्मात् । जनैरनाकीर्णे विजने ।

निर्जर पु० निर्गता जरा यस्मात् । देवे । जरामृत्यू त्रि० । ५ब० । अमृते न० ।

निर्जरा स्त्री० निर्गता जरा यस्याः ५ब० । गुडूच्यां, तालपर्ण्यां च ।

निर्झर पु० निर्+झृ–अप् । पर्वतादिःस्रुतजलप्रवाहे (झरणा) ।

निर्झरिणी स्त्री० निर्झरः पर्वतादिःस्रुतजलप्रवाहः कारणत्वेनास्त्यस्या इनि । [illegible]

[illegible] पुं० निर्+नी–अच् । निश्चये, तदभावबोधिते इति तद्व्याख्यायां हरिणि ज्ञाने, सन्देहे, वा भावाभावौ ज्ञानेन विषयतया भासेते नैवं निश्चये तत्र एकविध एवावभासते । विरोधपरिहारे, मीमांसोक्ते पञ्चावयवन्यायमध्ये चरमावयवे, न्यायोक्ते "सन्दिग्धे पक्षप्रतिपक्षयोः साधनबाधनाभ्यामर्थावधारणे च ।

निर्णयपाद पु० चतुष्पादव्यवहारमध्ये चरमावयवे येन सभासद्भिः जयपराजयपदार्थनिर्णयस्तस्मिन् पादे ।

निर्णिक्त त्रि० निर्+निज–क्त । शोधिते, अपगतमले च ।

निर्णेजक पु० निर्+निज–ण्वुल् । रजके ।

निर्दहन पु० निः शेषेण दहति ल्यु । भल्लातके । करणे ल्युट् ङीप् । मूर्वालतायां स्त्री० । निर्गतोदहनोऽस्मात् । औतादिवह्निशून्ये त्रि० ।

निर्दिष्ट त्रि० निर्+दिश–क्त । उपदिष्टे प्रदर्शिते, कथिते च ।

निर्देश पु० निर्+दिश–भावे घञ् । शासने, आज्ञायां, उपदेशे च । निर्दिश्यतेऽभिधीयतेऽनेन घञ् । प्रतिपादकशब्दरूपे वाक्ये, वेतने च "कालमेव प्रतीक्षेत निर्देशं भृतको यथे"ति पुराणम् । कथने, कथाने, देशाद्विर्गते च त्रि० ।

निर्धन पु० निकृष्टं धनमस्मात् । जरद्गवे । धनहीने त्रि० ।

निर्द्धारण न० निर्+धृ–णिच्–ल्युट् जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणे । यथा नराणां क्षत्रियः शूरः इत्यादौ नरस्वरूपसमुदायात् क्षत्रियजातिरेकदेशस्य शूरत्वेन पृथक्करणम् ।

निर्द्धारित त्रि० निर्+धृ–णिच्–क्त । ज्ञातनिश्चये निर्द्धारणविषये च ।

निर्द्वन्द्व त्रि० निर्गतोद्वन्द्वेभ्यः शीतोष्णादिविरुद्धधर्मयुगलेभ्यः । रागद्वेषशीतोष्णलाभालाभादिद्वन्द्वरहिते ।

निर्बन्ध पु० निर्+बन्ध–घञ् । आग्रहे, अभिनिवेशे ।

निर्बाध त्रि० निर्गता बाधा यस्मात् । निरुपद्रवे बाधाशून्ये च ।

निर्भय पु० निर्+भी–अच् । हर्षभेदे । भयरहिते त्रि० ।

निर्भर न० निःशेषेण भरो भारोऽत्र । अतिभावे । तद्युक्ते त्रि० ।

निर्मक्षिक अव्य० मक्षिकायाः अभावः । मक्षिकाया अभावे ।

निर्मन्थ्यदारु न० निर्मन्थ्यस्य अग्न्युत्पादनस्य दारु काष्ठम् । घर्षणेनाग्न्युत्पादनसाधने काष्ठे । [शून्ये योनिभेदे ।

निर्मम त्रि० निर्गतो ममकारो यस्मात् । पुत्रदेहादौ ममता–

निर्मल त्रि० निर्गतो मलात् । रजस्तम आदिमलहीने, रागादिमलरहिते अशुद्धिरहिते, शुद्धे च । अभ्रके न० । निर्गतोमलो यस्मात् ब्रु० । कतके तस्य हि फलसम्बन्धात् जलमलनाशकत्वम् प्रसिद्धम् । [कामभेदे च ।

निर्माण न० निर्+मा–ल्युट् । रचनायाम्, सारे, सजलसे,

निर्माल्य न० "विसर्ज्जिते तु देवेशे निर्माल्यं भवति स्मृतम्" त्यु० देवविसर्ज्जनोत्तरं देवदत्तद्रव्ये देवोच्छिष्टे ।

निर्मुक्त पु० निर्+मुच–क्त । मुक्तकञ्चुके सर्पे (खोलसछाड़ासाप) निःशेषेण मुक्तः । निष्परिग्रहे, सङ्गरहिते, बन्धशून्ये च ।

निर्मोक पु० । निर+मुच–घञ् । सर्पकञ्चुके, (खोलस) मोचने, सन्त्यागे, आकाशे च । [नदीभेदे, अध्यादिनिर्गमे, मोक्षे च ।

निर्याण न० निर्+या ल्युट् । गजादीनां स्कन्धदेशे, प्रभूतानां यादवबन्धु-

निर्यातन न० निर्+यत-णिच्-ल्युट्। वैरशुद्धौ, प्रतिदाने, दाने, न्यासस्समर्पणे च।

निर्यास पु० निर्+यस-घञ्। वृक्षात् तरलतया निर्गते क्षीरे कठिनतां प्राप्ते, रसे (गँद) वृक्षरसे, क्वाथे च। [पीड़े गोखरे च।

निर्यूह पु० निर्+ऊह-क पृ०। नागदन्तके, द्वारे, निर्यासे, आ-

निर्ऋयनी स्त्री० नितरां ऋयति अङ्गिरस्याम् त्वचि ल्युट् ङीप् पृ० सर्पत्वचि (खोलस) "यथाहिनिर्ऋयनी प्रत्यस्ता मृता शेते" इति स्मृतिः। [पायां निरुक्तौ।

निर्वचन न० निर्+वच-ल्युट्। प्रकृतिप्रत्ययविभागेन अर्थ कथनरू-

निर्वपण न० निर्+वप-ल्युट्। अन्नादीनां विभागे, दाने च।

निर्वर्त्तित त्रि० निर्+वृत-णिच्-क्त। निष्पादिते।

निर्वहण न० निर्+वह-ल्युट्। नाट्योक्तौ प्रस्तुतकथासमाप्तौ, प्र-कृताभिनयस्य निर्वाहे, नाटकसन्धिभेदे च।

निर्वाण न० निर्+वा-भावे क्त नि० न। मोक्षे, आत्यन्तिकमोक्षे, निवृत्तौ, विनाशे, गजमज्जने, कर्दमे च। कर्त्तरि क्त। निर्वृत्ते, शान्ते, शुष्के, निश्चले, शून्ये, विश्रान्ते च त्रि०।

निर्वाद पु० निर्+वद-घञ्। लोकापवादे।

निर्वापण न० निर्+वप, वा णिच्-ल्युट् मारणे बधे दाने च।

निर्वासन न० निर्+वस-णिच्-ल्युट्। नगरात् बहिष्करणे, मारणे, हिंसने, विसर्जने च।

निर्वाह न० निर्+वह-घञ्। कार्य्यसम्पादने, निष्पत्तौ, समाप्तौ च।

निर्विकल्प त्रि० निर्गतो विकल्पो ज्ञातृज्ञेयादिविभागो विशेष्यविशेष-णतासम्बन्धो वा यस्मात्। वेदान्तोक्ते ज्ञातृज्ञेयादिविभागशून्ये विशेष्यविशेषणतासम्बन्धरहिते च ब्रह्मात्मैकात्मविषये अखण्डाकारको एकविषयके ज्ञाने, "आत्मारामा विक्षिप्ततरयो निर्विकल्पे समाधा" विति वेणी० वा कप्। तत् प्रमा नाप्रमा नापि ज्ञानं यन्निर्विकल्पकम्। प्रकारतादिशून्यं हि सम्बन्धानवगाहि यत्" इतिन्यायोक्ते अलौकिके आलोचनात्मके ज्ञानभेदे।

निर्विकार पु० प्रकृतेरन्यथाभावः स निर्गतो यस्मात् । जन्मादिषड्भावविकारहीने परमात्मनि । विकारशून्ये त्रि० ।

निर्वीजा स्त्री० निर्गतं बीजं यस्याः । द्राक्षाभेदे "अल्पबीजे बीजशून्ये च त्रि० । साङ्ख्योक्ते समाधिभेदे पु० ।

निर्वृति स्त्री० निर्+वृ-क्तिन् सुखे, सुस्थितौ, अस्तगमने, मोक्षे, मृत्यौ च ।

निर्वृत्त त्रि० निर्+वृत-क्त निष्पन्ने । निर्गता वृत्तिर्यस्य । वृत्तिरहिते त्रि० ।

निर्वेद पु० निर्+विद-घञ् । स्वस्यावमाने, बहुकालेनाप्यसिद्धे पदार्थे निष्प्रयोजनत्वेन अनुतापे, औदासीन्ये, वैराग्ये, "तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य चे"ति गीता अलङ्कारोक्ते शान्तिरसस्य स्थायिभावे च ।

निर्वेश पु० निर्+विश-घञ् । भोगे, वेतने, मूर्च्छने, विवाहे च ।

निर्व्यथन न० व्यथ-भावे ल्युट् निश्चयेन व्यथनं भयं चलनं वा यत्र । छिद्रे, शोकस्थाने, व्यसनादौ दुःखोत्पादके व्यापारे च ।

निर्व्यूढ त्रि० निर्+वि+वह-क्त । त्यक्ते, असमाप्ते, यत् वस्तु सम्यक्पूर्णापर्याप्तं तत्किन् च । यथा पत्न्यादीनां भर्त्रधने न सम्यक् स्वत्वं यथेष्टदानासामर्थ्यात् इति न तस्य निर्व्यूढत्वं भवति च दौहित्रादेः स्वत्वं सम्यगेव पर्याप्तमतस्तन्निर्व्यूढम् । [निष्कासने च ।

निर्हरण न० निःशेषेण हरणम् । दाहार्थं शवादिहरणे,

निर्हार पु० निर्+हृ-घञ् । निखातशल्यादेः उद्धरणे, मलमूत्रादित्यागे, "आहारनिर्हारविहारयोगा" इति स्मृतिः । प्रेतदेहस्य दाहार्थं बहिर्नयने, यथेष्टविनियोगे च । "न निर्हारं स्त्रियः कुर्युरि"ति मनुः ।

निर्हारिन् पु० निर्हरति दूरं गच्छति निर्+हृ-णिनि । दूरगामिगन्त्रे । निर्हरणकर्त्तरि त्रि० ।

निर्ह्राद पु० निश्चयेन ह्रादः ह्लद-घञ् । शब्दे ।

निलय पु० निलीयते अत्र ली–अच् । गृहे, आवासस्थाने च ।

निवचने अव्य० वचननियमे । निवचनेकृत्य वाचं नियम्येत्यर्थः ।

निवपन न० नियतं वपनम् । पित्राद्युद्देशेन दाने ।

निवर्त्तन न० उभयतो विंशतिसंख्यविते क्षेत्रादौ "निवर्त्तनं विंशति-संख्यसंख्ये"रिति लौ० । नि+वृत–ल्युट् । निवारणे ।

निवर्हण न० नितरां वर्हणं वर्ह–हिंसायां ल्युट् । मारणे ।

निवसति स्त्री० नि+वस–आधारे अतिच् । गृहे ।

निवसथ पु० न्युष्यतेऽत्र नि+वस–अथच् । ग्रामे ।

निवसन न० न्युष्यतेऽत्र ल्युट् । गृहे । नि+वस–आच्छादने ल्युट् । वस्त्रे । [सम्भवायुमध्ये वायुभेदे ।

निवह पु० नितरामुह्यते वह–घ । समूहे । नि+वह–अच् ।

निवात पु० निहतो निरुद्धो वा वातोऽस्मात् । दृढकवचे शस्त्राद्यभे-द्यकवचे, आश्रये च । वातशून्ये देशे त्रि० ।

निवातकवच पु० हिरण्यकशिपोः पुत्रस्य संह्लादस्य दैत्यस्य पुत्रे दैत्यभेदे ।

निवाप पु० न्युप्यते नि+वप–घञ् । पितृद्देशेन दानमात्रे च ।

निवास पु० नि+वस–आधारे घञ् । गृहे, आश्रये च "जगन्निवासो वसुदेवसद्मनी"ति माघः ।

निविड त्रि० नितरां विड्यति संहन्यते नि+विड–क । सान्द्रे घने नीरन्ध्रे दृढे च । निगता नासिका नि+नासायाः विड्च् । नत-नासिकायाम् स्त्री० ।

निवीत न० नि+अञ–क्त । कण्ठलम्बिते यज्ञसूत्रे । व्येञ् संवरणे क्त संप्रसारणादि । प्राचीनावस्त्रे ।

निवृत्त नि+वृत–भावे क्त । निषेधे, "निवृत्तं पदार्थे"इति भाष्यम् कर्त्तरि क्त । विरते त्रि० ।

निवृत्ति स्त्री० नि+वृत–क्तिन् । उपरमे, विरतौ च "निवृत्तिस्तु मफाले"ति मनुः ।

निवेदन न० नि+विद्–णिच्–ल्युट् । सम्मानपूर्वकं ज्ञापने, समर्पणे च ।

निवेश पु० नि+विश-घञ्। विन्यासे, शिविरे, आगन्तुकसैन्यनिवेशने, उद्वाहे, स्थाने च।

निवेशन न० नि+विश-आधारे ल्युट्। गेहे। भावे ल्युट्। प्रवेशे, स्थितौ च। [रात्रौ, हरिद्रायाञ्च।

निश् स्त्री० नितरां श्यति तनूकरोति व्यापारान् शो-क पृ०।

निश(ग)मन न० नि+शम-णिच्-ल्युट्। वा छुक्। श्रवणे, दर्शने च।

निशा स्त्री० नितरां श्यति व्यापारान् शो-क। रात्रौ हरिद्रायाम्, "अजगोपतियुग्मञ्च कर्किधन्विहरा निशा" इति ज्योतिषोक्तेषु मेषादिराशिषु च।

निशाकर पु० निशां करोति क-ट। चन्द्रे, कुक्कुटे च।

निशाचर पु० निशायां चरति चर-ट। राक्षसे, शृगाले, पेचके, भर्गे, पिशाचे, चक्रवाके, चौरे च। रात्रिचरमात्रे त्रि०। ङीप्। राक्षस्याम् कुवटायां केशिनीनामगन्धद्रव्ये च स्त्री०।

निशाशि(ती)त त्रि० नि+शो-क्त वा इत्त्वम्। तेजिते तीक्ष्णीकृते।

निशान न० नि+शो-ल्युट्। तीक्ष्णीकरणे।

निशान्त न० निशायामन्यते स्म अम-गतौ कर्मणि क्त। गृहे। नितरां शान्ते त्रि०।

निशापति पु० ६त०। चन्द्रे, कर्पूरे च।

निशिपुष्पा स्त्री० निशि रात्रौ पुष्पमस्य पुष्प-अच् अनुक् स०। शे-फालिकायाम्। निशिपुष्पीत्यादयोऽप्यत्र।

निशीथ पु० निशेरतेऽत्र नि+शी-थक्। अर्द्धरात्रे, रात्रिमात्रे च।

निशीथिनी स्त्री० निशीथोऽस्त्यस्या इनि। रात्रौ।

निशुम्भ पु० नि+शुभ-अच् घञ् वा। शुम्भासुरानुजे दैत्यभेदे। मर्दने च "प्रागप्राप्तनिशुम्भशम्भुमथनः" इति वीरचरितम्।

निशुम्भमर्द्दिनी स्त्री० निशुम्भं मर्द्दयति मृद्-णिनि ६त०। दुर्गायाम्

निश्चय पु० निश्-चि-अच्। संशयाभावज्ञाने निर्णये, सिद्धान्ते, इदमेवेति विषयपरिच्छेदे च।

निश्चल त्रि० निर्+चल–अच् । स्थिरे, अचले, असम्भावनाविपरीतभावनारहिते च । भूमौ, शालपर्य्यां च स्त्री० टाप् ।

निश्वास पु० नि+श्वस–घञ् । सुखनासिकाभ्यां प्राणवायोर्निःसरणे ।

निषङ्ग पु० नितरां सजन्ति शरा यत्र सन्+घञ् । तूणीरे ।

निषङ्गिन् त्रि० निषङ्ग+अस्त्यर्थे इनि । धनुर्द्धरे ।

निषद्या स्त्री० निषीदन्त्यस्याम् जनाः सद–क्यप् । पण्यविक्रययशालायां (हाटचाला) हट्टे, क्षुद्रखट्वायाञ्च ।

निषद्वर पु० नि+सद–क्विप् निषद् आसनं तां वृणाति वरः आवरकः वृ–अच् । जम्बाले कर्द्दमे ।

निषध पु० नि+सद–अच् पृ० । कठिने, देशभेदे च तद्देशस्थे ब० ब० । तद्देशबद्धे, निषादस्वरे, हरिवर्षस्य मर्य्यादापर्व्वते च पु० ।

निषाद पु० निषीदति मनः, पापं वा यस्मिन् सद–घञ् । "निषादं रौति कुञ्जर" इत्युक्ते तन्त्रीकण्ठोत्थिते स्वरभेदे, चण्डाले, ब्राह्मणात् जड़ायां शूद्रायामुत्पन्ने पारशवाख्ये वर्णसङ्करे च ।

निषादिन् पु० निषादयति उपवेशयति हस्तिनं नि+सद–णिच् णिनि । हस्तिपाले ।

निषिद्ध त्रि० नि+सिध–क्त । निषेधविषये, दुष्टसाधनताभ्रमनिषेधकेन नञ्प्रदेन, लिङाद्यनुषक्तनञ्प्रदेन वा बोध्ये, पदार्थे बाधिते च ।

निषेक पु० नि सिच–घञ् । गर्भाधाने "निषेकादि श्मशानान्त" मिति मनुः ।

निषेध पु० नि+सिध–घञ् । निवृत्तौ, प्रतिषेधे, नञादिना बोधितार्थे ।

निष्क माने चु० आत्म० सक० सेट् । निष्कयते अनिनिष्कत । प्रादिभ्यो न णत्वम् ।

निष्क पु० न० निश्चयेन कायति कै–क । शास्त्रीयषोड़शमाषकपरिमितसुवर्णानामष्टाधिकशते, व्यवहारिकरूपके दीनारे, (टाका) चतुर्भिः सुवर्णपरिमिते मानभेदे, षोड़शद्रम्मे (काहन) परिमाणे, वक्षोभूषणे, हेममात्रे पलपरिमाणे च ।

निष्कण्ठ पु० निर्गतः कण्ठोऽस्मात् । स्कन्धशून्ये वरुणाख्ये द्रुमे ।

निष्कर्ष पु० निर्+कृष-घञ्। दृढतापरिच्छेदे, निश्चये च।

निष्कल त्रि० निर्गता कला यस्मात्। कलाभून्ये, नष्टवीर्य्ये च। आधारे पु०। कलाऽवयवस्तत्कून्ये ब्रह्मणि-न०। "निष्कलस्त्वद्वितीयस्ये"ति पुराणम्। विगतार्त्तवायाम् दृङ्गायां स्त्रियां स्त्री० वा गौरा० ङीष्।

निष्कासित त्रि० निस्+कस-गतौ णिच्-क्त। निःसारिते।

निष्कुट पु० निस्+कुट-क। गृहवनीपस्थे उपवने, केदारे क्षेत्रे, राज्ञाम् अन्तःपुरे च। [ङीप् एलायाम्।

निष्कुटि(टी) स्त्री० कुट-इन् कौटिल्यम् निर्गता कुटिर्यस्याः वा

निष्कुषित त्रि० निर्+कुष-क्त। खण्डिते, निस्त्वचीकृते च "काकैर्निष्कुषित"मिति गङ्गास्तवः। [जाते रन्ध्रे कोटरे।

निष्कुह पु० निःशेषेण कुह्यते विस्मापयति कुह-क। वृक्षादिस्थे स्वयं

निष्कृति स्त्री० निर्+कृ-क्तिन्। निस्तारे, निर्मुक्तौ, पापादिभ्य उद्धारे च "कृतघ्ने नास्ति निष्कृति"रिति स्मृतिः।

निष्कृष्ट त्रि० निर्+कृष-क्त। सारांशे।

निष्कोषण न० निर्+कुष-ल्युट्। अन्तरवयवानां वह्निर्निःसारणे।

निष्क्रम पु० निर्+क्रम-घञ्। बुद्धिसन्न्यासे, निर्गमे, दुष्कुले च।

निष्क्रमण न० निर्+क्रम-ल्युट्। बहिर्गमने, चतुर्थे मासि शिशोः कर्त्तव्ये संस्कारभेदे च "चतुर्थे मासि कर्त्तव्यं शिशोर्निष्क्रमणं गृहा"दिति मनुः।

निष्ठा स्त्री० नि+स्था-अङ्। नाट्योक्ता प्रस्तुतकथासमाप्तौ, निष्पत्तौ, नाशे, अन्ते, याच्ञायाम्, उत्कर्षे, व्यवस्थायाम्, क्लेशे, व्रते, गुरुशुश्रूषादौ, तत्परतायां, धर्म्मादौ श्रद्धायां च लोकेऽस्मिन् द्विविधा निष्ठे"ति गीता। निश्चयेन स्थितौ च "तेषां निष्ठां तु तामसी"ति गीता। [व्यञ्जने।

निष्ठान न० निष्ठीयतेऽत्र स्था-ल्युट्। भक्ष्याद्यन्नोपसेचने दध्यादौ

निष्ठी(ष्ठि)व पु० नि+ष्ठिव-घञ् वा दीर्घः। मुखेन श्लेष्मनिरसने। ल्युट् वा दीर्घः। निष्ठिवननिष्ठेवने एते अप्यत्र।

निष्ठुर न० नि+स्था–उरच् । परुषवाक्ये । कठोरे, त्रि० । "गुह्याङ्गमेध्यशब्दानां वचनं निष्ठुरं विदुः । यद्व्यङ्गा वचो नीचं स्त्रीपुंसमैथुनाश्रय"मित्युक्तौ, अश्लीलवाक्ये न० । तत्तद्विशिष्टे त्रि० ।

निष्ठूत त्रि० नि+ष्ठिव–क्त । क्षिप्ते । [निष्ठुरे, पारङ्गते च ।

निष्णात त्रि० नितरां स्नातः पारं गतः शुद्धो वा नि+स्ना–क्त षत्वम् ।

निष्पक्व त्रि० निरतिशयं पक्वम् । अतिशयेन पक्वे क्वाथिते दग्धमूलादौ । पक्वं पाकः निरा० स० । पाकशून्ये त्रि० ।

निष्पत्ति स्त्री० निर्+पद–क्तिन् । समाप्तौ, सिद्धौ च ।

निष्पत्राकृति स्त्री० पत्रं पुष्पमस्यास्ति अच् पत्रः शरः तस्यापरपार्श्वे निष्कासनं सपत्रं ततः कृञि । "सपत्रनिष्पत्राभ्यामत्यन्तव्यधने" इति डाच्–क्तिन् । अतिव्यथायाम् ।

निष्पत्रिका स्त्री० निर्गतं पत्रं यस्याः ५ब० । करीरवृक्षे (टाउरकाटा)

निष्पन्न त्रि० निर्+पद–क्त । सिद्धे, समाप्ते च ।

निष्परिग्रह त्रि० निर्गतः कन्थाकौपीनपुस्तकाद्यतिरिक्तः परिग्रहोऽस्मात् । परमहंसे परिव्राजके । त्यक्तसङ्गे त्रि० ।

निष्पाव पु० निष्पूयते शुद्धाद्यपनयनेन शोध्यतेऽनेन निर्+पू-करणे घञ् । शूर्पादिवायौ तेन हि खलस्थधान्यादिकं कडङ्करादिशून्यं करोति । कर्म्मणि घञ् । कडङ्करे (आगडा) राजमाषे (वरवटी) श्वेतशिम्बिधान्ये, शिम्बीमात्रे च । निर्छिल्के त्रि० ।

निष्पावक पु० निर्+पू–ण्वुल् । श्वेतशिम्बधान्ये (वरवटी) शौतादित्वात् ङीषभावे त्रि० ।

निष्पावी स्त्री० निर्+पू–घञ् गौ० । श्वेतशिम्बीधान्ये (वरवटी) ।

निष्पृह त्रि० निर्गता स्पृहा यस्य । वैषयिके सुखे इच्छाशून्ये ।

निष्पेष पु० निर्+पिष–घञ् । संघर्षे ।

निष्प्रतिभ त्रि० निर्गतः प्रतिभायाः । जडे, अज्ञे, प्रागल्भ्यरहिते च ।

निष्प्रवाणि त्रि० प्रोयतेऽस्यामनया वा प्र+वेञ्–ल्युट् ङीप् प्रवाणी तन्त्रवायशलाका निर्गतः प्रवाण्याः निरा० स० । नवाक्षरे, अभिनवे । (तान्तकाटा) वयने ।

निष्फल त्रि० निर्गतं फलं यस्मात् । फलरहिते । फलाले फलशून्ये धान्यकाण्डे, (नाड़ा) पु० । विगतार्त्तवायां स्त्रियां स्त्री० ।

निस् अव्य० निर्जसो-क्विप् पु० । निषेधे, विस्मये, साकल्ये, अतीते च

निसर्ग पु० नि+सृज-घञ् । स्वभावे, स्वरूपे, सृष्टौ च ।

निसिन्धु पु० नितरां सिन्धुरिव बहुत्वपत्वादिसत्त्वात् । सिन्धुसारे (निसिन्दा)

निसूदन न० नि+सूद-ल्युट् । मारणे वधे ।

निसृता स्त्री० नितरां सृता सृ-क्त । विद्रुतायाम् (तेओड़ि) ।

निसृष्ट त्रि० नि-सृज क्त । न्यस्ते, मध्यस्थे च ।

निसृष्टार्थ पु० "उभयोर्भावमुद्वीय स्वयं वदति चोत्तरम् । सन्दिष्टः कुरुते कर्म निसृष्टार्थस्तु स स्मृत" इत्युक्ते दासभेदे ।

निस्तरण न० निर्+तॄ-करणे ल्युट् । उपाये । भावे ल्युट् । निस्तारे, पारगमने, तरणे, निर्गमे च ।

निस्तर्हण न० नि+स्तृह-हिंसायां ल्युट् । मारणे ।

निस्तल त्रि० निरस्तं तलं प्रतिष्ठा यस्य । वर्तुले, तलशून्ये, चले च । गौरा० ङीष् । वटिकायाम् स्त्री० । नितरां तलम् । तले न० ।

निस्तार पु० निःशेषेण तारः पारगमनम् । उद्धारे, पारगमने, अभीष्टप्राप्तौ च । [तस्य हि चूर्णं क्षीरवत् शुभ्रम् ।

निस्तुषक्षीर पु० निस्तुषमन्तः शस्यं क्षीरमिव शुभ्रं यस्य । गोधूमे

निस्तुषित त्रि० निस्तुष+कृतौ णिच्-क्त । त्वग्विहीने कृते तण्डुलादौ, लघूकृते, त्यक्ते च ।

निस्त्रिंश पु० निर्गतस्त्रिंशद्भ्योऽङ्गुलिभ्यः डच् समा० । खड्गे, त्रिंशदङ्गुल्यधिकस्यैव खड्गत्वात् ततो न्यूनत्वे छुरिका । तच्चुल्यहिंसकत्वात् निर्घृणे त्रि० । [क्षुद्रीभेदे ।

निस्त्रिंशपत्रिका स्त्री० निस्त्रिंशदिव पत्रमस्त्यस्याः ठन् । (मनसा)

निस्त्रैगुण्य त्रि० निष्क्रान्तः त्रैगुण्यात् त्रिगुणकार्य्यात् संसारात् त्रिगुणकार्य्येभ्यः कामादिभ्यो वा । कामनादिशून्ये संसारातीते च "निस्त्रैगुण्यो भवार्जुने"ति गीता ।

निस्नेहफला स्त्री० निस्नेहं स्नेहशून्यं फलं यस्याः । श्वेतकण्टकार्य्याम्

निस्य(य)न्द पु० निस्य(य)+न्द–घञ् वा घत्वम् । स्यन्दने द्रवत्वरणे निष्क्रान्तं स्यन्दनं यस्मात् । स्यन्दनशून्ये त्रि० । [अपसरणे च ।

निस्व(स्वा)व पु० नि+स्रु–अप्, संज्ञायां घञ् वा । भक्तमण्डे (माड़)

निस्व(स्वा)न पु० नि+स्वन–अप् घञ्, वा । शब्दे ।

निहनन न० नि+हन ल्युट् । बधे ।

निह्नव पु० नि+ह्नु–अप् सम्प्रसारणञ्च । आच्छादने ।

निहाका स्त्री० नियतं जहाति भुवं हा–कन् न ह्रस्वः । गोधिकायाम्

निहित त्रि० नि+धा–क्त । स्थापिते, गुप्ते, स्थिते, निक्षिप्ते च । नितरां हितः । अत्यन्तहिते ।

निह्नव पु० नि+ह्नु–अप् । शाठ्ये अन्यथा स्थितस्य वस्तुनोऽन्यथात्वेन सूचने अपलापे । ह्नु–क्तिन् । अपह्नुतिरत्यत्र ।

निह्राद पु० नितरां ह्रादः नि+ह्लद–घञ् । अव्यक्ते शब्दे ।

नीकाश पु० नि+काश–घञ् दीर्घः । निश्चये । पचाद्यच् । सदृशे किन्तु निभादिवत् परपदस्थतयैवास्य प्रयोगो नान्यथा वज्रनीकाश इत्यादि । [चोरनामके गन्धद्रव्ये पु० ।

नीच त्रि० निकृष्टामीं लक्ष्मीं चमति चम–ड । पामरे, निम्ने वामने च

नीचभोज्य पु० ३त० । पलाण्डौ । पामरभक्ष्यमात्रे पु०

नीचैस् अव्य० निकृष्टं चीयते चि–डैसि दीर्घश्च । नीचे, अल्पे, क्षुद्रे च

नीड पु० निश्चिता दलन्त्यत्र दल–क डलयोरैक्यात् लस्य ड । निवासस्थाने पक्षिणां कुलाये च ।

नीड़ज पु० नीडे जायते जन–ड । विहगे नीड़ोद्भवादयोऽप्यत्र ।

नीति स्त्री० नीयन्ते उन्नीयन्तेऽर्था अनया नी–क्तिन् । शुक्राचार्योक्तशास्त्रविद्यायां कार्य्यकारणयोरभेदात् तच्छास्त्रे च । भावे क्तिन् प्रापणे । [भारतहितोपदेशादौ शास्त्रे ।

नीतिशास्त्र न० नीतिबोधकं शास्त्रं शाक० गुरुशुक्रकामन्दकप्रभृतन्त्रमहा–

नीभ्र(त्र) न० निश्चयेन धरति दृणोति वा जलादि–भृ–ड वा मूल० क दीर्घः । पटलप्रान्तभागे । वने, नेमौ चन्द्रे, रेवतीनक्षत्रे च ।

नीप पु० नी–पक्, । कदम्बे वन्धूके, नीलाशोकवृक्षे च ।

नीर न० नी–रक, निर्गतं रादग्निनो वा "व्यग्नेरग्नि इति" श्रुतेस्तस्मा-जन्यत्वम् । जले, रसे च ।

नीरज न० नीरे जायते जन–ड । पद्मे, सुक्तायां कुष्ठोषधौ च । जलजातमात्रे त्रि० । जलजन्तुभेदे पु० (उदवेराल) ।

नीरद पु० नीरं ददाति दा–क । मेघे, मुस्तके च । निर्गतोरदो दन्तोऽस्मात् । दन्तशून्ये त्रि० ।

नीरन्ध्र त्रि० निर्गतं रन्ध्रं यस्मात् । सान्द्रे घने ।

नीरस पु० निःसरन् रसो यस्मात् । दाड़िमे । रसहीने त्रि० "नीर-सतरुरय" मित्युङ्गटः ।

नीराजन न० नीरस्य शान्त्युदकस्य अजनं क्षेपोऽत्र । नि०, निःशेषेण राजनमत्र वा । दीपादिना सत्कारे निर्मञ्छने, "पञ्चनीराजनं कु-र्य्यात् प्रथमं दीपमालया । द्वितीयं सोदकाब्जेन तृतीयं धौतवा-ससा । चूताश्वत्थादिपत्रैश्च चतुर्थं परिकीर्त्तितम् । पञ्चमं प्रणिपातेन साष्टाङ्गेन यथाविधी" त्युक्तादिना दीपादिभिः पञ्चवारसंस्कारे आरा-त्रिके, आश्विनमासादौ घोटकादेः पूजनविशेषे च ।

नीराजना स्त्री० निःशेषेण राजना राज–णिच्–युच् । दीपादिना-संस्कारे "नीराजनां जनयतामिनि" नैषधम् । वाजिनीराजनावि-धाविति रघुः ।

नीरुज् स्त्री० निष्टुता रुक् । स्वास्थ्ये । निर्गता रुक् यस्मात् । रोगरहिते त्रि० ।

नीरुज न० निष्टुता रुजा यस्मात् पृष० । कुष्ठोषधौ (कुड़)

नील पु० नील वर्णे क । इलावृतवर्षस्योत्तरस्थे रम्यक वर्षस्य मर्य्या-दापर्वते, भारतवर्षस्थे पर्वतभेदे, वानरभेदे, निधिभेदे, लाक्षके, वटवृक्षे, "चरणानि सुखं पुच्छं यस्य श्वेतानि गोपते । लाक्षा-रससवर्णश्च तं नीलमिति निर्दिशेदि" त्युक्ते, "लोहितो यस्तु वर्णेन पुच्छाग्रेण तु पाण्डुरः श्वेतः । खुरविषाणाभ्यां स नीलो वृष उच्यते" इत्युक्ते च वृषभेदे, "नीलं वा वृषरूपजेदि" ति वायुपुराणम् ।

कृष्णवर्णो च। तद्वति त्रि०। औषधौ स्त्री० ङीप्। नील्या रक्तमन्। नीलीरक्ते त्रि०। इन्द्रनीलमणौ (नीलम) तालीशपत्रे, विषे, सौवीराञ्जने च (सुर्मा) न०।

नीलक न० नील इव कायति कै-क। (कालालवण) काचलवणे, बीजगणितोक्तायां यावत्तावत्कानक्षापनार्थायामव्यक्तराशिसंज्ञायां, लौहभेदे च। अमनवृक्षे पु०।

नीलकण्ठ पु० नीलः कण्ठोऽस्य। "क्षीराब्धेर्मथ्यमानाच्च विषं हालाहलोद्भवम्। हरेण धारितं कण्ठे नीलकण्ठस्ततो हर" इत्युक्ते शिवे, मयूरे, दात्यूहे, श्यामचटके, खञ्जने, पीतसारे—चन्दनभेदे च। मूलके न०।

नीलकन्द पु० नीलः कन्दो मूलमस्य। विषकन्दे, महिषकन्दे च वृक्षे

नीलकुरण्टक पु० कर्म०। नीलझिण्टाम्। नीलझिण्टीत्यपत्र।

नीलताल पु०तलमेव तालं नीलं तालमस्य। हिन्तालेतमालवृक्षे च।

नीलदूर्वा स्त्री० कर्म०। हरितवर्णदूर्वायाम्। [त्रि०।

नीलध्वज पु० नीलाकारो ध्वज इव। तालवृक्षे। नीलध्वजवति

नीलनिर्यासक पु० नीलवर्णो निर्यासो यस्य कप्। नीलवर्णेऽसनवृक्षे। नीलवर्णनिर्यासे पु०। इव०। तद्वति त्रि०।

नीलपत्र न० नीलं पत्रं पर्ण पुष्पदलं वा (पावड़ि) यस्य। नीलवर्णे कुमुदे, गुगुडलणे, अश्वत्थकवृक्षे नीलामनवृक्षे दाड़िमे च। कर्म० नीलवर्णपर्णे न० ईव० तद्वति त्रि०।

नीलपुष्प पु० नीलं पुष्पमस्य। नीलभृङ्गराजे, नीलाम्लाने च। ग्रन्थिपर्णे न०। अपराजितायां स्त्री०। अतस्यां (मसिना) ङीप्। स्वार्थे कन् तत्रैव।

नीलफला स्त्री० नीलं फलं यस्याः। जम्बुवृक्षे।

नीलमणि पु० कर्म०। (नीलम) इन्द्रनीलमणौ।

नीलमाष पु० कर्म०। माषभेदे (कालकलाइ)।

नीललोहित पु० नीलः कृष्णे लोहितः केशेषु शिवे तदुद्देश्यके व्रतभेदे, कृष्णरक्तमिश्रिते वर्णे च। तद्वति त्रि०कर्म०। जम्बुवां स्त्री०।

नीलवर्षाभू पु० वर्षायां भवति भू–क्विप् कर्म० । कृष्णवर्णभूवर्षा-तायां, कृष्णभेके च ।

नीलवल्ली स्त्री० कर्म० । वन्द्यायाम् (परगाछा) ।

नील(ली)वस्त्र नील्या रक्तं नीलं कर्म० नील्या वा रक्तं वस्त्रं शाक० । नील्या रञ्जिते वस्त्रे "नीलीवस्त्रं न स्पृशेद्" इति स्मृतिः । नील-वसनादयोऽप्यत्र । ङीष् । तद्वति त्रि० ।

नीलवृन्त न० नीलं वृन्तमस्य । तूले ।

नीलवृषा स्त्री० नीलवर्णं पत्रं पुष्पं फलं च वर्षति प्रसूते वृष–क । वार्त्ताकीभेदे । [सरस्वी"ति तारास्तोत्रम् ।

नीलसरस्वती स्त्री० द्वितीयविद्यायां तारायाम् । "मातर्नील-

नीलसार पु० नीलः सारोऽस्य । तिन्दुवृक्षे (केँद) । [योऽप्यत्र

नीलसिन्दुक पु० कर्म० । कृष्णवर्णसिन्दुवारे नीलसिन्दुवाराद्-

नीलाञ्जन पु० कर्म । सौवीराञ्जने (तुँते) ।

नीलाम्बर न० नीलमम्बरं यस्य । बलदेवे, शनैश्चरे च । कर्म० । नी-लीरक्ते वस्त्रे न० । ङीष् तद्वति त्रि० ।

नीलाह्वा पु० ईषत्कालेन ह्वायति ख्या+ह्वा–क कर्म० । नीलझि-ण्टाम् । तस्या हि पुष्पमल्पकालेनैव गलति ।

नीलालु पु० कर्म० । श्यामवर्णकन्दे आलुभेदे ।

नीलासन पु० कर्म० । (पियाशाल) वृक्षभेदे । [च ।

नीलिनी स्त्री० नीलोवर्णोऽस्त्यस्याः इनि । नीलीवृक्षे कृष्णनिर्गुण्डी

नीलोत्पल न० कर्म० । इन्दीवरे सौगन्धिके नीलवर्णे कुसुदे ।

नीवाक पु० नियतं वाको वचनं यत्र–घञ् दीर्घः । महार्घहेतौ धान्य-सञ्चयादरे । [कडङ्करीदेरि"ति रघुः ।

नीवार पु० नि+वृ–घञ् दीर्घः । तृणाद्यान्यभेदे "नीवारपाकादि

नीवि(वी) स्त्री० निव्ययति निवीयते वा नि+व्ये इन् यलोपः दीर्घौ डिच्च वा ङीप् । वणिजां मूलधने, कटीवस्त्रबन्धे च "नीविं प्रति प्रणिहिते तु करे" इति मा० ३५० । [पदे ।

नीवृत् पु०स्त्री० नियतं वर्त्ततेऽत्र नि+वृत–क्विप् दीर्घः । देशे, जन-

नीशार पु० नितरां शीर्य्यते हिमानिलावलानेन वा नि+शॄ–घञ् दीर्घः । हिमानिलनिवारणे प्रावरणे काण्डपटे च (कानात्) ।

नीहार पु० निह्रियते नि+हृ-घञ् दीर्घः । घनीभूते शिशिरे, हिमे च ।

नु अव्य० नुदति नौति वा नित०डु । विकल्पे, अनुनये, अतीते, प्रश्ने, हेतौ, वितर्के, अपमाने, अपदेशे, अनुतापे च ।

नुड बधे तु०क्र० प०सक०सेट् । नुडति अनुडीत् । न णत्वम् ।

नुति स्त्री० नु–क्तिन् । स्तवे, प्रणामे च ।

नुत्त(न्न) त्रि० नुद–क्त तस्य वा नः । प्रेरिते, क्षिप्ते च ।

नूतन त्रि० नव एव नव+तन नवस्य नूः । अभिनवे नवीने । त्व । नूनोऽप्यत्र ।

नूद पु० नुदति पापं क नूद० दीर्घः । अश्वत्थाकारे ब्रह्मदारुणि वृक्षे ।

नूनम् अव्य० नु+अन–अमि । वितर्के, निश्चिते, स्मरणे, वाक्यपूरणे, उत्प्रेक्षाद्योतने च । [पादाङ्के ।

नूपुर न० नू–क्विप् तुवि पुरति पुर–अन्तगमने क । (नेपुर)

नृ पु० नी–ऋन् डिच्च । मनुष्ये, पुरुषे च । जातौ ङीप् । नारी

नृग पु० इक्ष्वाकुवंश्ये नृपभेदे ।

नृकरोटिका स्त्री० ईत० । नरकपाले ।

नृचक्षस् पु० नृन् चष्टे पश्यति भक्ष्यत्वेन चक्ष–असुन् न ख्या देशः । राक्षसे । [नर्क्षति ।

नृत नर्त्तने दि० पर० अक० सेट् नृत्यति अनर्त्तीत् नर्त्तिष्यति–

नृत्त(त्य) न० नृत–क्त क्यप् वा । तालमानयुक्ते सविलासाङ्गविक्षेप-रूपे नर्त्तने ।

नृप पु० नॄन् पाति पा–क । "चतुर्योजनपर्य्यन्तेष्वधिकारी नृपो भवेत्" दिग्भक्ते राजविशेषे, राजमात्रे च ।

नृपकन्द पु० कन्दानां नृपः श्रेष्ठः राजद० । राजपलाण्डौ ।

नृपति पु० ईत० । कुबेरे, राजनि च । [त्वोऽप्यत्र ।

नृपद्रुम पु० द्रुमाणां नृपः राजद० । राजवृक्षे आरग्वधे राजवृक्ष-

नृपप्रिय पु० ६त० । (वेड्राँश) वंशभेदे तस्य दुर्गवेष्टनकारित्वात्तत्रि-यत्वम् । राजप्रलाण्डौ, शालिधान्ये, आम्रे च । राजवल्लभे त्रि० । केतक्यां राजवर्ज्यूर्ष्यां च स्त्री० ।

नृपप्रियफला स्त्री० नृपप्रियं फलं यस्याः । वार्त्ताक्याम् । [वाङ्ग ।

नृपसभ न० नृपाणां सभा शाला संज्ञति वा । राजसमूहे राजाख्यदशाला-

नृपोचित पु० नृपेषु उचितः । राजमात्रे । राजयोग्ये त्रि० ।

नृयज्ञ पु० नृणां यज्ञः । अतिथिपूजने । नरयज्ञादयोऽप्यत्र ।

नृवराह पु० ना वराहः । अंशाभ्यां मनुष्यवराहाकृतौ भगवदवतारभेदे

नृशंस त्रि० नृन् शंसति शनुस हिंसायाम् अण् । घातुके, क्रूरे, पर-क्रोहिणि च ।

नृसिंह पु० ना सिंहः । अंशाभ्यां मनुष्यसिंहाकृतियुक्ते भगवतोऽवतारभेदे

नृ नीतौ क्र्यादि० पर० सक० सेट् । नरीनाति अनारीत् अणोपदेशत्वान्न णत्वम् । [नरयति । न णत्वम् ।

नृ नये भ्वा० पर० सक० सेट् षटा० । नरति अनारीत् । णिच् नेजक पु० निज-शुद्धौ-ण्वुल् । रजके । शोधकमात्रे त्रि० ।

नेट त्रि० नी-टच् । प्रभौ, निर्वाहके नायके, प्रवर्त्तके, प्रापके, च । स्त्रियां ङीप् । निम्बवृक्षे पु० ।

नेत्र न० नयति नीयते वाऽनेन ष्ट्रन् । मन्थनदामनि, वस्त्रभेदे, वृक्षमूले, रथे, जटायाम्, नाड्याम्, शलाकायाम्, चक्षुषि च । प्रापयितरि, नयनसाधने, प्रवर्त्तके च त्रि० । [चर्ममये नेत्रपुटे ।

नेत्रच्छद पु० नेत्रे छादयते अनेन छद णिच्-क हुस्वः । नेत्रपिधायके

नेत्रपर्य्यन्त पु० नेत्रयोः पर्य्यन्तः कोणः सीमा । अपाङ्गे ।

नेत्रमल न० ६त० । चक्षुर्मले दूषिकायाम् (पिचुटि) ।

नेत्ररञ्जन न० नेत्रे रज्यते अनेन रञ्ज-करणे ल्युट् । कज्जले ।

नेत्ररोगहन् पु० नेत्ररोगं हन्ति हन-क्विप् । दृष्टिकालीदत्ते तस्य हि नेत्ररोगनाशकत्वं वैद्यके प्रसिद्धम् ।

नेत्राम्बु न० ६त० । चक्षुर्जले अश्रुणि ।

नेचोपमफल पु० नेत्रे उपमा यस्य तादृशं फलमस्य । (बादाम) वृक्षभेदे
नेत्री(धि)धी स्त्री० इत० वा ङीप् । अजशृङ्ग्याम् (गाड़रशिङ्गी) ।
नेदिष्ठ त्रि० अतिशयेनान्तिकः इष्ठन् नेदादेशः । अतिशयनिकटस्थे ।
नेदीयस् त्रि० अतिशयेनान्तिकः ईयसुन् नेदादेशः । अत्यन्तसमीपस्थे ।
नेपथ्य न० नी–विच् नयः नेतुः पथ्यम् । भूषणे, वेशे, वेशस्थाने नाट-
कादेरभिनयार्थसज्जाभूमौ च ।
नेपाल पु० स्वनामख्याते "जटेश्वरं समारभ्य योगेशान्तं महेश्वरि ! ।
नेपालदेशो देवेशी"त्युक्ते देशभेदे ।
नेपालकम्बल पु० ईत० । कुथाख्ये चित्रकम्बले ।
नेपालनिम्ब पु० इत० । ज्वरान्तके तृणनिम्बे, निम्बभेदे च ।
नेपालमूलक न० ईत० । कृष्णकन्दखण्डे मूलभेदे ।
नेपालिका स्त्री० नेपाले भवा ठन् । मनःशिलायाम् ।
नेम पु० नी–मन् । अवधौ, काले, अर्द्धे, प्राकारे, कैतवे, गर्त्ते, नाट्ये,
अन्यस्मिन्नर्थे च । अर्द्धार्थेऽस्य सर्वनामता ।
नेमि पु० नी–मि । तिनिशवृक्षे । कूपसमीपे-रज्जुधारणार्थे त्रिकाष्ठ-
यन्त्रे, चक्रान्ते च । (रथचक्रस्य भूमिस्पर्शनयोग्ये भागे) कूपान्ति-
कस्थे–समानस्थलभागे स्त्री० वा ङीप् ।
नेमिश न० ब्रह्मणा सृष्टस्य चक्रस्य नेमिः शीर्य्यतेऽत्र शॄ-ड । नैमि-
शारण्ये क्षेत्रे । स्वार्थेऽण् । नैमिशमप्यत्र ।
नैकभेद त्रि० न एके अनेके नञ्शब्देन सुप्सुपेति स० नैके भेदा यस्य ।
अनेकप्रकारे उच्चावचे ।
नैगम पु० निगम एव प्रज्ञाद्यण् । नीत्याम्, उपनिषदि ब्रह्मविद्यायाम्,
तत्प्रतिपादके-वेदान्ते च । निगमेभवः अण् । वणिग्जने, नागरे च
नैचिकी स्त्री० नीचैरगच्छं चरति ठक् टिलोपः गौ० ङीष् ।
उत्तमायां गवि ।
नैत्य(त्यि)क न० नित्यमनुष्ठेयम् कन् ठन् वा । नित्यानुष्ठेये, "नैत्य-
(त्यि)कान्ने भुञ्जिक्रियेति"ति स्मृतिः ।
नैपुण्य(ण) न० न० निपुणस्य भावः ष्यञ् अण् वा । दक्षतायाम् ।

नैमित्तिक त्रि० निमित्तादागतम् ठक्। पुत्रजन्मादिनिमित्तमाश्रित्य विहिते जातेष्ट्यादौ "नित्यं नैमित्तिकं चरे"दिति स्मृतिः।

नैमित्तिकलय पु० कर्म०। "चतुर्युगसहस्रान्ते ब्राह्मो नैमित्तिको लयः" इत्युक्ते ब्रह्मदिनावसाने जगतां प्रलये।

नैमिष न० तीर्थभेदे निमेषेण विष्णुना तत्रासुरविनाशात् तथात्वम्।

नैमेय पु० नि+मि-ढक् स्वार्थेऽण्। विनिमये परीवर्त्ते।

नैयग्रोध न० न्यग्रोधस्य विकारः अण् तस्य नलुक्। वटफलादौ।

नैयायिक त्रि० न्यायं वेत्त्यधीते वा ठक्। न्यायज्ञे।

नैरन्तर्य्य न० निरन्तरस्य भावः ष्यञ्। अविच्छेदे।

नैराश्य न० निराशस्य निष्कामस्य भावः ष्यञ्। आशाशून्यत्वे "नैराश्यं परमं सुख"मिति पुराणम्।

नैर्ऋती स्त्री० निर्ऋतेरियम् अण्। दक्षिणपश्चिमायां विदिशि "नैर्ऋतीं दिशमाश्रये"दिति स्मृतिः।

नैर्मल्य न० निर्मलस्य भावः ष्यञ्। निर्मलत्वे स्वच्छत्वे। "विषयेष्वतिसंरागो मानसो मल उच्यते। तेष्वेव हि विरागस्तु नैर्मल्यं सप्तदाकृतमि"त्युक्ते विषयवैराग्ये च।

नैवेद्य न० निवेदं निवेदनमर्हति ष्यञ् नि+विद-णिच् कर्मणि यत् स्वार्थे ष्यञ् वा। "निवेदनीयं द्रव्यन्तु नैवेद्यमिति, कथ्यते" इति स्मृत्युक्ते देवतोद्देशेन त्यक्तव्ये द्रव्ये।

नैषध पु० निषधानां जनपदानामयं अण्। नलनामनि-भूपतौ, तदधिकृत्य कृते ग्रन्थे, न०। तद्देशभवे तत्सम्बन्धिनि च त्रि०।

नैष्कर्म्य न० निष्कर्मणो भावः। विधिना सर्वकर्मत्यागे "न कर्मणामनारम्भात् नैष्कर्म्य"मिति गीता। [ध्यञ्, ठक्शालायां नियुक्ते।

नैष्किक पु० निष्के वेतनेन दीनारे तदगारे वृत्ते नियुक्तः ठक्। कोषा-

नैष्ठिक पु० निष्ठा संसारसमाप्तिः प्रयोजनमस्य ठक्। ब्रह्मचर्य्येण यावज्जीवं गुरुकुलवासिनि-ब्रह्मचारिभेदे। निश्चलतयास्थितिः निष्ठा तत्रासक्तः ठक्। निश्चलायां स्थितौ सक्ते त्रि० स्त्रियां ङीप् नैष्ठिकी।

नैसर्गिक त्रि० निसर्गेण स्वभावेन निर्वृत्तः ठक् । स्वाभाविके ।

नैस्त्रिंशिक त्रि० निस्त्रिंशः प्रहरणमस्य ठक् । खड्गे योद्धरि ।

नो अव्य० नञ्-डो । अभावे ।

नोचेत् अव्य० नो च चेच्च द्व० । निषेधे ।

नोपस्थात त्रि० न० उपतिष्ठति स्था-क्त । दूरस्थे । हीने "अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तर" इति स्मृत्युक्ते दुष्टवादिभेदे ।

नौ स्त्री० नुद-डौ । जलोपरि प्लवनसाधने तरणिभेदे । स्वार्थे कन् । नौकाप्यत्रैवार्थे ।

नौकादण्ड पु० ६त० । नौकायाः चालनार्थे पार्श्वद्वयवद्धे काष्ठदण्डे (दांड़) । [न्यक्कृतिरप्यत्रार्थे ।

न्यक्कार पु० न्यक्+कृ-घञ् । नीचकरणे तिरस्कारे च । क्विन् ।

न्यग्रोध पु० न्यक् रुणद्धि रुध-अच् । वटवृक्षे, शमीवृक्षे वाङ्मयविस्तारकृतव्यासरूपपरिमाणे (बांझो) सर्व्वाणि न्यक्कृत्य स्थिते विष्णौ, विषघर्ण्यां मोहनौषधौ च मृषिकपर्ण्यां स्त्री० ङीष् ।

न्यग्रोधपरिमण्डला स्त्री० "स्तनौ सुकठिनौ यस्या नितम्बे च विशालता । मध्ये क्षीणा भवेद्या सा न्यग्रोधपरिमण्डले" त्युक्तलक्षणायां नार्य्याम् । [कृगभेदे च ।

न्यङ्कु पु० नितरामञ्चति नि+अन्च-उ कुत्वम् । मुनिभेदे, वङ्गगृङ्गे

न्यङ्कुभूरुह पु० न्यङ्कुरिव भूरुहः । श्योनाकवृक्षे । तस्य वङ्गगृङ्गाकारत्वात्तथात्वम् ।

न्यच् त्रि० निम्नमञ्चति नि-अन्च-क्विन् । नीचे निम्ने ।

न्यञ्चित त्रि० नि+अन्च-क्त । अधःचिप्ते ।

न्यस्त त्रि० नि+अस-क्त । क्षिप्ते त्यक्ते, विन्यस्ते, निहिते च ।

न्याद पु० नि+अद-घञ् न षत्वादेशः । भोजने ।

न्याय पु० नि+इ-घञ् वा घञ् । उचिते गौतमोक्ते शास्त्रभेदे, तदुक्ते प्रतिज्ञादिपञ्चकप्रातिपादिकवाक्यविशेषे, नीतौ नयोपाये, भोगे, युक्तौ, युक्तिमूलदृष्टान्तभेदे च ।

न्याय्य त्रि० न्यायादनपेतं यत् । उचिते, युक्तियुक्ते च ।

न्यास पु० नि+अस–कर्मणि, भावे वा घञ्। स्थापयद्रव्ये (गच्छित) अर्पणे विन्यासे, संन्यासे च। [अतिप्रिये च त्रि०।

न्युङ्ख पु० नि+उङ्ख–अच्। सामवेदाङ्गेषु षट्सु प्रणवेषु। मनोहरे,

न्युञ्ज त्रि० नि+उञ्ज–घञ् कृत्वाभावः। अधोमुखे कुब्जे। (कुजो) यज्ञपात्रभेदे (दर्वीमयस्रुचि) पु०। कर्मरङ्गफले न०।

न्यून त्रि० न्यूनयति नि+ऊन–परिमाणे अच्। ऊने गर्ह्ये च।

प·

प पु० पत, पा–वा ड पवने, पातरि, पर्णे, पाने च।

पक्कण पु० पचति पच–क्विप् कण–अच् कर्म०। श्वपचालये।

पक्त्रिम त्रि० पच–क्त्रि–ततो–मप्। पाकनिर्वृत्ते।

पक्व त्रि० पच–क्त तस्य वः। परिणते, दृढे, विनाशोन्मुखे, कृतपाके च

पक्वकृत् पु० पक्वं करोति कृ–क्विप्। निम्बवृक्षे।

पक्ष परिग्रहे चु० उभ० सक० सेट्। पक्षयति ते अपपक्षत् त।

पक्ष परिग्रहे अद० चु० उभ० सक० सेट् अयं भ्वादिश्च पर०। पक्षति पक्षयति ते अपपक्षत् त अपक्षीत्।

पक्ष पु० पक्ष–अच्। शुक्लकृष्णप्रतिपदादिपञ्चदशात्मपञ्चदशतिथ्यात्मके काले, खगानां पतत्रे (पाखा) शरस्य पुङ्खस्थे पत्रे, केशात् परः। समूहार्थे, यथा केशपक्ष इत्यादि। पार्श्वे, गृहे, न्यायोक्ते संदिग्धसाध्यवति पदार्थे, यथा पर्वतो वह्निमान्। विरोधे, बले, सहाये, सख्यौ, चुल्लीरन्ध्रे राजकुञ्जरे, खगे, बलये, समूहे, पिच्छे, देहार्द्धे, च।

पक्षक पु० पक्षइव कायति कै–क। पार्श्वद्वारे (खिड़की)।

पक्षता स्त्री० पक्षस्य भावः। न्यायोक्ते अनुमानेच्छाभाव समानाधिकरणे साध्यवत्तानिश्चयाभावे यत्र वह्न्यादिकं साध्यते तत्र धर्मिणि वह्निमत्त्वनिश्चयाभावे एव पक्षत्वं तत्र तन्निश्चयसत्त्वे तु अनुमानेच्छासत्त्वएव पक्षता नेतरथेति न्याये स्थितम्।

पक्षति स्त्री० पक्षस्य मूलम् ति। पक्षारम्भके प्रतिपदि तिथौ खगानां पक्षस्य मूले च (डाना)।

पक्षद्वार न० पक्षे पार्श्वे द्वारम् । (खिडकी) पार्श्वस्थे द्वारे ।

पक्षपात पु० पक्षे अन्यायसाहाय्ये पातः अभिनिवेशः । अन्यायसाहाय्ये

पक्षपातिता स्त्री० पक्षपात+अस्त्यर्थे इनि तस्य भावः तल् । साहा-य्यकरणाभिनिवेशे, पक्षाभ्यां पतने च "न परं पथि पक्षपातिते"ति नैषधम् ।

पक्षान्त पु० पक्षस्यान्तो यत्र । अमावास्यायां पूर्णिमायाञ्च तिथौ ।

पक्षिणी स्त्री० पक्षतुल्ये अङ्गे विद्येते अस्या इनि । आगामिव-र्त्तमानदिनाभ्यां युक्तायां रात्रौ । [कारे वात्स्यायनमुनौ पु० ।

पक्षिल त्रि० पक्षः साहाय्यमस्त्यर्थे इलच् । साहाय्यकारके । न्यायभाष्य-

पक्षिन् पु० पक्ष+अस्त्यर्थे इनि । बाणे, विहङ्गमे च ।

पक्ष्मन् न० पक्ष-मनिन् । नेत्रावरके लोम्नि, पक्ष्मादेः लोम्नरे, सूत्रा-देरत्यल्पभागे, खगादेः पक्षे च ।

पङ्क पु० न० पचि-घञ् नि० । कुत्वम् । कर्द्दमे, पापे च ।

पङ्क(ङ्के)ज न० पङ्के जायते जन-ड पक्षे अलुक् स० । पद्मे, सारस-पक्षिणि च । पङ्कजन्मादयोऽप्यत्र ।

पङ्कशूरण पु० पङ्के शूरण इव । शालूके ।

पङ्कार पु० पङ्कमृच्छति ऋ-अण् उप० । शैवले, सेतौ च ।

पङ्किल त्रि० पङ्क+अस्त्यर्थे इलच् । कर्द्दमवति देशे ।

पङ्केरुह न० पङ्के रोहति रुह-क अलुक् स० । पद्मे, सारसखगे च ।

पङ्क्ति स्त्री० पचि-क्तिन् । सजातीयसन्ततौ (पांत) पद्माक्षरपादके, दशाक्षरपादके च छन्दोभेदे, दशसङ्ख्यायाञ्च तेन पङ्क्तिरथ इति दशरथसंज्ञा । पृथिव्यां, गौरवे, प्राप्ते, प्रपञ्चे च ।

पङ्क्तिदूषक पु० पङ्क्तिं श्राद्धे भोजनार्थमुपविष्टानां विप्राणामावलिं दूषयति दुष-णिच् ण्वुल् । अपाङ्क्तेये श्राद्धादौ अभोजनीये क्षितवादौ । विस्तरस्तु वाचस्पत्ये ।

पङ्क्तिपावन पु० पङ्क्तिं श्राद्धे भोजनार्थमुपविष्टानामावलिं पुनाति पू-णिच्-ल्यु । श्राद्धभोजनार्थमुपविष्टानां पङ्क्तिपवित्रताकारके विद्याविशिष्टादौ । विस्तरस्तु वाचस्पत्ये ।

पञ्चत्रिंशीज पु० पञ्चत्रिं भूतानि बीजानि यस्य । वर्बुरवृक्षे ।
पङ्गु त्रि० खञ्जि-कु-पगादेशः नुक् च । गतिहीने स्त्रियां ऊङ् ।
अनैश्वरे पु० । [पङ्गिमः पचा ।
पच पाके भ्वा० उ० सक० अनिट् । पचति ते । अपाक्षीत् अपक्त ।
पच व्यक्तीकारे भ्वा० आत्म० अनिट् । पचते । अपक्त ।
पच विस्तारे चु० उ० सक० सेट् कुटित् । पञ्चयति ते अपपञ्चत् त ।
पचनी स्त्री० पच्यतेऽनया ल्युट् । वनबीजपूरके जम्बीरभेदे ।
पचम्पचा स्त्री० पचति पच अच् पृ० सुम् द्वित्वञ्च । दारुहरिद्रायाम् ।
पज आवरणे भ्वा० पर० सक० सेट् कुटित् । पङ्क्ति अपञ्जीत् ।
पज्ज पु० पद्भ्यां ब्रह्मणश्चरणाभ्यां जायते जन-ड । शूद्रे, "पद्भ्यां शूद्रोऽजायते" इति स्मृतिः । [नक्षत्रपञ्चके च ।
पञ्चक न० पञ्चानामवयवम् कन् । पञ्चसंख्यायां ज्योतिषोक्ते धनिष्ठादि-
पञ्चकषाय पु० कर्म० "जम्बुशाल्मलिप्लक्षवकुलं वदरं तथा ।
कषायाः पञ्च विज्ञेया" इत्युक्तेषु पञ्चसु कषायेषु । [पाचनभेदे ।
पञ्चकोल न० पञ्चकोलं कणामूलं कृष्णा चव्याग्निनागरैरिति त्युक्ते
पञ्चकोष पु० पञ्च कोषा इवावरका यस्य । वेदान्तोक्ते अन्नमयादिपञ्च-
कोषाभिमानिनि जीवे । समा० द्वि० । पञ्चसु अन्नमयादिको-
षाख्येषु देहादिषु न० ।
पञ्चगव्य न० गोर्विकारः यत् पञ्चानां गव्यानां समाहारः । 'पञ्चगव्य'
'दधिक्षीरघृतगोमूत्रगोमयै'रित्युक्तेषु दध्यादिषु पञ्चसु ।
पञ्चचूड़ा स्त्री० पञ्च चूड़ा यस्याः । अप्सरोभेदे ।
पञ्चजन पु० पञ्चभिः भूतैर्जन्यते जन-घञ् न दृद्धिः मनुष्ये, दैत्यभेदे
च यस्यास्त्वा कृष्णस्य पाञ्चजन्यः पञ्चजातः ।
पञ्चतत्त्व न० 'मद्यं मांसं तथा मत्स्यो मुद्रा मैथुनमेव च पञ्चतत्त्व-
मिदं प्रोक्तमिति तन्त्रोक्तेषु मद्यादिषु पञ्चसु, साङ्ख्योक्तेषु भूम्या-
दिषु पञ्चसु भूतेषु च ।
पञ्चवटी स्त्री० वटो वृक्षः समा० द्वि० । "अश्वत्थोविल्वबटश्च वट-

धात्रयोक्तः । शास्त्रे पञ्चवटीत्युक्ते"त्युक्तेषु अश्वत्थादिषु पञ्चसु वृक्षेषु, रामायणप्रसिद्धे जनस्थानस्थे स्थानभेदे च ।

पञ्चवक्त्र पु० पञ्च वक्त्राणि यस्य । शिवे रुद्राक्षभेदे च । पचि—विस्तारे—अच् पञ्चं वक्त्रमस्य । सिंहे, पञ्चास्यपञ्चमुखादयोऽप्यत्र ।

पञ्चवल्कल न० समा० द्वि० । 'न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलम् । पञ्चवल्कलमित्युक्तमित्युक्तेषु वटादिवल्कलेषु ।

पञ्चवाण पु० पञ्च वाणा यस्य । 'सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा । स्तम्भनश्चेति कामस्य शराः पञ्च प्रकीर्त्तिता'इत्युक्तशरपञ्चकयुक्ते कामे । पञ्चशरादयोऽप्यत्र ।

पञ्चशस्य न० समा०द्वि० । 'धान्यसङ्ख्यासिद्धा माषाः यवाः सिद्धार्थकोऽथ वा । पञ्चशस्यमिति प्रोक्त'मित्युक्तेषु धान्यादिषु ।

पञ्चशाख पु० पञ्च शाखाकारा अङ्गुलयो यत्र । हस्ते ।

पञ्चशिख पु० मुनिभेदे, 'बोढुः पञ्चशिखस्ये'ति पुराणम् ।

पञ्चसुगन्धिक 'कर्पूरककोलवङ्गपुष्पागुरुकजातीफलपञ्चकेन । समांशभागेन च यं जितेन मनोहरं पञ्चसुगन्धिकं स्या'दित्युक्तेषु मिलितसुगन्धिद्रव्येषु ।

पञ्चसूना स्त्री० पञ्चसूनाः प्राणिवधस्थानानि । 'पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः । कण्डनी चोदकुम्भश्चे'त्युक्तेषु पञ्चसु कीटवधस्थानेषु ।

पञ्चाग्नि पु० पञ्च अग्नय उपास्या यस्य । छन्दोग्ये 'वेत्थ यथा सौम्य ! पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति प्रश्नपूर्वकं प्रदर्शितायां स्वर्गसेवादिषु पञ्चसु स्थानेषु अग्नित्वेनोपासनरूपायां विद्यायाम् 'पञ्चाग्नयो ये च त्रिणाचिकेता' इति स्मृतिः । पञ्चाग्निमति च ।

पञ्चाङ्ग न० समा०द्वि० । 'त्वक् पत्रं कुसुमं मूलं फलञ्चैकस्य यास्यिनः । एकत्रस्थं तु पञ्चाङ्ग'मित्युक्ते एकवृक्षस्य त्वगादिषु पञ्चसु, 'तिथिर्वारश्च नक्षत्रं योगः करणमेव च । पञ्चाङ्गमेतद्विज्ञेय'मित्युक्तेषु तिथ्यादिषु च । पञ्च अङ्गानि यस्य । 'जपश्चोमौ तर्पणञ्चाभिषेको विप्रभोजनम् । पञ्चाङ्गोपासनं लोके पुरश्चरणमिष्यते" इति

तन्त्रोक्तपुरश्चरणभेदे, पञ्च अङ्गानि आयत्तानि यस्य। कूर्म पु० तस्य हि हस्तपादग्रीवारूपाङ्गपञ्चकस्य यथेष्टं सङ्कोचविकाशयोः स्वेच्छया करणादायत्तत्वम्।

पञ्चाङ्गुल पु० पञ्च अङ्गुलय इव पत्त्राकारा यस्य अच् समा० एरच्। पञ्चाङ्गुलयुक्ते त्रि०।

पञ्चामृत न० समा० द्वि०। 'दुग्धं च गर्करा चैव घृतं दधि तथा मधु। पञ्चामृतमिदं प्रोक्तं' मित्युक्तेषु पञ्चसु दुग्धादिषु।

पञ्चाम्र न० अम्बत्थ एकः पिचुमर्द एको द्वौ चम्पकौ तीणि च कोरकाणि। सम्पाद्य ताला नव नारिकेलाः। पञ्चाम्रसेवी नरकं न याती" त्युक्तेषु अम्बत्थादिषु त्रिषु।

पञ्चाल पु० देशभेदे। तद्देश्ये ब० व०।

पञ्चाली स्त्री० पञ्चं प्रपञ्चमलति पर्य्याप्नोति अल—अण्। बह्वलतपुत्तलिकायां, गानभेदे च (पाचाली)।

पञ्चाशत् स्त्री० पञ्च दशतः परिमाणमस्य त्रि०। (पञ्चाश) पञ्चाभेदे, तत्संख्यातेषु च।

पञ्चेन्द्रिय न० समा० द्वि०। "श्रोत्रत्वग्नेत्ररसनघ्राणं पञ्चेन्द्रियं मत" मित्युक्तेषु श्रोत्रादिषु ज्ञानेन्द्रियेषु, "वाक्पाणिपादपायूपस्थानि कर्म्मेन्द्रियाणि चे" त्युक्तेषु वागादिषु कर्म्मेन्द्रियेषु च पञ्चसु।

पञ्जर पु०न० पञ्ज (पिञ्ज-)वा अरच्। शरीरास्थिवृन्दे कङ्काले। विहङ्गादिबन्धनस्थाने न०।

पञ्जल पु० पञ्ज—अलच्। कोलकन्दे।

पञ्जि(ञ्जी) स्त्री० पञ्ज—इन् वा ङीप्। सूत्रसाधनतालिकायां (पार्श्वद्वय) स्वार्थे कन्। अत्र, पाणिनीयसूत्रवृत्तिभेदे तिथिवारादिपञ्चाङ्गबोधिकायां पत्रिकायाञ्च (पाँजि)।

पञ्चतपस् त्रि० पञ्चाग्निसाध्यं तपोऽस्य। चतुःपार्श्वस्थाग्निचतुष्टयोर्ध्वस्थसूर्य्यरूपतेजः पञ्चकैस्तप्यमाने "पञ्चसु पञ्चतपस" इति माघः।

पञ्चतय न० पञ्चानामवयवः पञ्चावयवा येषां वा तयप्। पञ्चसंख्यायाम्। तत्सङ्घाते त्रि०।

पञ्चतन्मात्र न० तदेव तन्मात्रं पञ्चानां तन्मात्राणां समाहारः। शब्दस्पर्शरूपरसगन्धसमुदायेषु महाभूतकारणीभूतेषु शब्दस्पर्शरूपरसगन्धसमुदायाधारेषु पञ्चसु सूक्ष्मभूतेषु।

पञ्चत्व न० पञ्चानां पृथिव्यादिभूतानां भावः त्व। मरणे, तत्र हि देहारम्भकभूतानां स्वस्वांशस्य स्वेषु स्वेषु प्रवेशः इति तस्य पञ्चरूपता। तल्। पञ्चताप्यत्र।

पञ्चदश त्रि० पञ्चदशानां पूरणः डट्। येन पञ्चदशसङ्ख्या पूर्य्यते तस्मिन्। स्त्रियां ङीप्। सा च चन्द्रस्य पञ्चदशकलात्मिकायारूपायां पूर्णिमायाममावस्यायाञ्च तिथौ, विद्यारण्यप्रणीते वेदान्तग्रन्थभेदे च।

पञ्चधा अव्य० पञ्चप्रकारम् पञ्चन्+धाच्। पञ्चप्रकारे।

पञ्चन् त्रि० पचि—विस्तारे अनि। (पाँच) सङ्ख्यायुक्ते।

पञ्चनख पु० पञ्च नखा यस्य। श्वापदे, व्याघ्रे च। पञ्चनखयुक्ते त्रि०। ते च शशकादयः "शशकः शल्लको गोधा खड्गी कूर्मश्च पञ्चमः। भक्ष्यान् पञ्चनखेष्वाहु"रिति मनुः।

पञ्चनद पु०पञ्च नद्यो यत्र। 'वितस्तेरावती चन्द्रभागां यद्वे सरिद्वरा। शतद्रुञ्च विपाशा च तेन पञ्चनदः स्मृत" इत्युक्ते (पञ्जाब) इति ख्याते महादेशे। पञ्चानां नदीनां समाहारः। काशीखण्डे तु "किरणा धूतपापा च सुप्रतीया सरस्वती। गङ्गा च यमुना चैव पञ्च नद्यः प्रकीर्त्तिता" इत्युक्तास्तु सिन्धुसाधवतीर्थसन्निहितासु पञ्चसु नदीषु।

पञ्चपर्णी स्त्री० पञ्च पञ्च पर्णानि प्रतिपर्व्व यस्याः। (गोरचवाकुलिया) क्षुपभेदे। स्वार्थे कन् अत्रैव।

पञ्चपल्लव न० समा० द्विगुः। "आम्राश्वत्थवटप्लक्षयज्ञोडुम्बरपल्लवाः। पञ्चपल्लवमित्युक्त"मित्युक्ते वैदिककर्म्मणि "पनसाम्रं तथाश्वत्थं वटं वकुलमेव चे"ति तन्त्रोक्ते तान्त्रिककर्म्मणि च स्थाप्यघटोपरि देये पल्लवपञ्चके।

पञ्चपाच न० पञ्च पात्राणि श्राद्धोद्देश्यानि यत्र। देवपञ्चयं पित्रा-

दिति कमिति पात्रपञ्चकोद्देशेन कर्त्तव्ये त्रिकृतिपार्व्वण श्राद्धे पञ्चानां पात्राणां समाहारः । पञ्चसु पात्रेषु ।

पञ्चप्रदीप पु० पञ्च प्रदीपा यत्र । आरात्रिकार्थं पञ्चप्रदीपात्मके दीपपात्रभेदे ।

पञ्चभद्र पु० पञ्चसु देहस्थानेषु भद्रः । "पञ्चभद्रस्तु कृत्पृक्ते सुख- [पार्श्वेषु दुग्धित, इत्युक्ते अश्वभेदे ।

पञ्चभूत न० पञ्चानां भूतानां समाहारः । वैशेषिकाद्युक्तेषु चित्यप्रेजोवायुव्योमात्मकेषु भूतेषु ।

पञ्चम त्रि० पञ्चानां पूरणः पञ्चन्+मट् । येन पञ्चसंख्या पूर्य्यते तस्मिन् । स्त्रियां ङीप् । सा च चन्द्रस्य पञ्चमकला क्रियाकूपायां तिथौ च ।

पञ्चमकार न० पञ्चानां मकारादिवर्णानां समाहारः । तन्त्रोक्तेषु मद्यमांसमत्स्यमुद्रामैथुनेषु ।

पञ्चमहायज्ञ पु० महान् यज्ञः महायज्ञ ततः कर्म० । नित्यं गृहस्थकर्त्तव्येषु स्वाध्यायपाठाग्निहोत्रयागातिथिपूजनपितृतर्पणबलिकर्म्माख्येषु पञ्चसु पञ्चसूनादोषापनोदकेषु कर्मसु । पञ्चयज्ञशब्दोऽत्रार्थे ।

पञ्चमास्य पु० पञ्चमः स्वरभेदः आस्ये तदेकदेशकण्ठे यस्य । कोकिले पञ्चमं रौति कोकिल" इति हि श्रूयते ।

पञ्चमूल न० समा० द्वि० । "विल्वशोनाकगाम्भारीपाटलागणिकारिकाः । पञ्चमूलमिति ख्यात"मित्युक्ते पाचनभेदे ।

पञ्चरत्न न० समा० द्वि० । विद्रुमं हीरकं नीलं पद्मरागञ्च मौक्तिकम् । पञ्चरत्नमिदं प्रोक्तमित्युक्तेषु पञ्चसु रत्नेषु ।

पञ्चरात्र न० "रात्रन्तु ज्ञानवचनं ज्ञानं पञ्चविधम् स्मृतम् । पञ्चरात्रमिति ख्यात"मित्युक्ते पञ्चज्ञानसाधने नारदाद्युक्ते ग्रन्थभेदे ।

पञ्चलाङ्गलक न० पञ्चभिर्लाङ्गलैः स्वर्णमयैः कार्य्यति कै—क । षोड़शमहादानमध्ये महादानभेदे ।

पञ्चलौहक न० लौहं धातुः समा० द्वि० । "सुवर्णं रजतं ताम्रं रङ्गं नागं तथैव च । पञ्चलौहमिति प्रोक्त"मित्युक्ते धातुपञ्चके ।

पट गतौ भ्वा० पर० सक० सेट् । पटति । अपाटीत् अपटीत् ।

पट दीप्तौ चु० उभ० अक० सेट् । पाटयति ते अपीपटत् त ।

पट वेष्टने अद० चु० उभ० सक० सेट् । पटयति ते अपपटत् त ।

पट त्रि० पट्यते वेष्ट्यते अच् । वस्त्रे । स्त्रियां गौ० ङीष् । पियालवृक्षे पु० । पुरस्कृते त्रि०

पटकार पु० पटं करोति कृ-अण् । तन्तुवाये । [पटगृहादयोऽप्यत्र ।

पटकुटी स्त्री० पटनिर्म्मिता कुटी शा० । पटमये गृहे (तँबु)

पटक्षर न० पट्यते आवेष्ट्यते पट–अति, भूतपूर्वं पटत् चरट् । जीर्णवस्त्रे । पटनिव वेष्टित इव चरति चर–अच् । चौरे पु० ।

पटल न० पट–वेष्टने कलन् । (चाल) छदिषि । स्त्रीत्वमप्यत्र गौ० ङीष् । वृत्ते, ग्रन्थभेदे च पु० ।

पटवासक पु० पटान् वासयति सुरभीकरोति वास–ण्वुल् । वसनवासके कुङ्कुमादिचूर्णे ।

पटह पु० न० । पटेन हन्यते हन, पट इत्वं यङ्लुगन्तो वा हा–वा ड । ढक्कावाद्ये । समारम्भे पु० ।

पटि(टी) स्त्री० पट–इन् वा ङीप् । पटभेदे, कृत्रिमकाष्ठे च ।

पटीर न० पट–ईरन् । चालन्धाम् मूलजे, केदारे, मेघे, वंशसारे, खदिरे, उदरे, कन्दर्पे, चन्दने च । "परिपीतपटीररसैरलम" रत्नमुकुटः । उच्चे, हरणीये च त्रि० ।

पटीयस् त्रि० अतिशयेन पटुः ईयसु । अतिशयकार्य्यदक्षे ।

पटु त्रि० पट–उ । नपुणे, नीरोगे, तीक्ष्णे स्फुटे, निष्ठुरे धूर्त्ते च । स्त्रियां वा ङीप् । पटसे पु० । लवणे, पांशुलवणे क्षत्रारे च न० ।

पटुजातीय त्रि० पटुप्रकारः जातीयर् । पटुप्रकारे ।

पटुपर्णी स्त्री० पटूनि पर्णान्यस्याः । स्वर्णक्षीरिणीवृक्षे ।

पटुरूप त्रि० प्रशस्तः पटुः प्राशस्त्ये रूपप् । अतिशयदक्षे ।

पटोल पु० पट–ओलच् । स्वनामख्याते लतामेदे । वस्त्रभेदे न० ।

पटोली(लिका) स्त्री० अपकृष्टः पटोलः ङीप् (झिङ्गा) ख्यातायां लतायाम् । स्वार्थे कन् । तत्रैवार्थे ।

पट्ट न० पट क्त नेट् ट वा तस्य नेत्त्वम् । नगरे । चतुष्पथे, राजादि-लेख्यपत्रे, (पाट्टा) पीटे, "ललाटपट्ट" मित्युक्तेः । फलके (ढाल) राजसिंहासने, उत्तरीयवस्त्रे, कौशेये, (रेशम) मेघरवे च । पाषाणे पु० ।

पट्टज न० पट्टात् जायते । पट्टनिर्मिते वस्त्रे (रेशमिकापड़) ।

पट्टदेवी स्त्री० पट्टे राजासने देवी अताभिषेका स्त्री । राजमहिष्याम् (पाटराणी) पट्टमहिष्यादयोऽप्यत्र । [प्रधाननगरे ।

पट्ट(त्त)न न० पट(त)न्ति जना यत्र पट–पत, वा तनन् । नेट् ।

पट्टरङ्ग न० पट्टं रज्यतेऽनेन रनुज–करणे घञ् । (वक्रम्) इति ख्याते पदार्थे । ल्युट् । पट्टरञ्जनमप्यत्र ।

पट्टशाक पु० कर्म० (नालित) शाकभेदे । [पट्टिलोध्रादयोऽप्यत्र ।

पट्टिकालोध्र पु० पट्टिकाकारः लोध्रः । (पटियालोध) लोध्रभेदे ।

पट्टिन् पुंस पट्ट+अस्त्यर्थे इनि । रक्तलोध्रे ।

पट्टिल पु० पट्ट अस्त्यर्थे इलच् । पूतिकरजे ।

पठ लिखिताक्षरवाचने भ्वा०पर०सक०सेट् । पठति अपाठीत्–अपठीत् ।

पड गतौ भ्वा० आ० सक० सेट् इदित् । पण्डते अपण्डिष्ट ।

पड संहतौ वा चु० उ० पक्षे भ्वा० अक० सेट् इदित् । पण्डयति-ते पण्डति अपपण्डत्–त अपण्डीत् ।

पण व्यवहारे (क्रयविक्रयादौ) स्तुतौ च भ्वा० आ० सक० सेट् । पणायति–ते पणते व्यवहारे तु पणायति इत्येव । अपणायीत् अपणायिष्ट अपणिष्ट ।

पण पु० पण्यतेऽनेन पण–अच् । मूल्ये, धने, ताम्रे कर्षपरिमिते (पयसा) ख्याते द्रव्ये च । भावे अच् । भर्त्सनायां, द्यूते, स्तुतौ, (पराजये, इदं देयमित्येवं) नियमे । व्यवहारे च "या कार्षिणी ताम्र पणश्चतस्र" इत्युक्ते चतुःकार्षिणीपरिमाणे च ।

पणन न० पण–भावे ल्युट् । विक्रये ।

पणव पु० स्त्री० पणं व्यवहारं वाति वा–क । पटहभेदे "पणवा-

चक्रगोचुखा" इति गीता। ["वणिजां पण्याया" इति भट्टिः।
पण्याया स्त्री० पण्य–स्वार्थे अण्–ततः–अ। व्यवहारे "न चोपलेभे
पण्यायित त्रि० पण्य–आय–क्त। स्तुते। आयाभावपक्षे पणितमप्यत्र।
पणितव्य त्रि० पण–तव्य। विक्रेतव्ये, क्रीतव्ये, व्यवहार्ये च यत्।
पण्यमप्यत्र। [बहौ स्त्री० टाप्।
पण्ड पु० पण–ड तस्य नेत्वम्। क्लीबे, निष्फले च। तत्त्वानुसारिण्यां
पण्डापूर्व न० पण्डं फलासाधनमपूर्वम्। वस्तुतः फलसाधनयोग्ये फला-
नुपचिते धर्माधिकारिके ऽदृष्टे यथा सन्ध्यावन्दनादेरभावे दुरदृष्टं
जायते सन्ध्यादेर्वन्दने तु तस्यानुत्पत्त्या फलानुपचितं दुरदृष्टं
नश्यतीति तत्पण्डापूर्वमिति मीमांसा। [तात्पर्य्यटीकायां विदुषि।
पण्डित पु० पण्डा तत्त्वानुगा बुद्धिर्जाताऽस्य तारं० इतच्। शास्त्र–
पण्यवीथी स्त्री० ६त०। विक्रेयद्रव्यविक्रयशालायां (हाटचाला) रुढे
च। स्वार्थे कन्। पण्यवीथिका, पण्यशाला चात्र।
पण्यस्त्री स्त्री० कर्म०। वेश्यायाम्, पण्यादनादयोऽप्यत्र।
पण्याजीव पु० पण्येन क्रयविक्रयद्रव्येणाजीवति आ+जीव अच्।
वणिग्जने। [अपपतत्–त।
पत गतौ अद० पु० उभ० सक०, ऐश्ये अक० सेट्। पतयति–ते
पत ऐश्ये दि० आ० अक० सेट्। पत्यते अपतिष्ट।
पत गतौ भ्वा० पर० सक०, ऐश्ये अक० ज्वला० सेट्। पतति अपप्तत्।
पतग पु० पतत्यनेन पतः पक्षेण गच्छति गम–ड। विहङ्गमे।
पतङ्ग पु० पतन् सन् गच्छति गम–खच् डिच्च। सूर्य्ये, शलभे,
(फड़िङ्ग) खगे, शालिभेदे, मधूकवृक्षे च।
पतङ्गिका स्त्री० क्षुद्रः पतङ्गः पतङ्गी ततः कन्। क्षुद्रमक्षिकायाम्।
पतञ्जलि पु० पतन् अञ्जलिर्यस्मै नमस्कारात् अक०। पाणिनीयसूत्र-
भाष्यकारे, योगसूत्रकारे च मुनिभेदे।
पतत् पु० पत–शतृ। पक्षिणि।
पतत्त्र पु० पतत्रं तायते त्रै–क। पक्षिणां पक्षे (याका)।
पतत्रि पु० पत–अत्रिन्। पक्षिणि, पतत्री पतत्रयः।

पतत्रिन् पु० पतत्रोऽस्त्यस्य इनि । पक्षिणि पतत्रिणौ ।

पतद्ग्रह पु० पतत् सुखादिभ्यः खेत्वं जलादि गृह्णाति । (पिक-दानी) पात्रभेदे ।

पतयालु त्रि० पु० पत–आलुच् । पतनशीले पातुके ।

पताका स्त्री० पत्यते बोध्यते योधादिभेदोऽनया पत–आकन् । वंशोपरि देये त्रिकोणाकारे वस्त्रखण्डे, सौभाग्ये, नाटकाङ्के, अङ्के, कैतौ, छन्दोग्रन्थोक्ते लघुगुरुव्यक्तिज्ञानार्थे चक्रभेदे च ।

पताकिन् त्रि० पताका+अस्त्यर्थे इनि । पताकाधारिणि । ज्योतिषोक्ते तदाकारवति रिष्टसूचके चक्रभेदे पु० ।

पति पु० पा–डति । भर्त्तरि । अधिपतौ त्रि० । स्त्रियां वा ङीप् ।

पतित त्रि० पत–क्त । चलिते, गलिते धर्म्मादित्यागादिजन्यदुरदृष्टवति जने च "पतितानां न दाहः स्या"दिति स्मृतिः ।

पतिम्बरा स्त्री० पतिं वृणोति वृ–खच् । स्वेच्छया पतिवरणकारिकायां कन्यायाम्, क्षणजीरके च । [सधवायां स्त्रियाम् ।

पतिवत्नी स्त्री० पतिरस्त्यस्या मतुप् नि० नुक्, मस्य वः, ङीप् च ।

पतिव्रता स्त्री० पतिः पतिसेवनं व्रतं यस्याः । सत्यां योषिति ।

पत्ति पु० पद–तिन् । सेनायाम् । क्तिन् । गतौ, (१ रथः, १ गजः ३ अश्वाः, ५ सेनाः) एतत् संख्यान्विते सेनाभेदे च स्त्री० ।

पत्नी स्त्री० पति+यत्नसम्बन्धे ङीप् नुक् च । पतिकृतयत्नवत्यां विधिना जड़ायां योषिति ।

पत्र न० पत–ष्ट्रन् । वाहनमात्रे पर्णे पक्षिणां पक्षे, लेखनाधारे द्रव्ये, धातुमयपत्राकारे द्रव्ये च । स्त्रियां स्त्री० ङीप् ।

पत्रगुप्त पु० ३त० । (तैकाटासिज्) वृक्षे ।

पत्रघना स्त्री० पत्रैर्घना सान्द्रलाद्वृक्षे ।

पत्रदारक पु० पत्राकारः दारकः कर्म० । (करात्) ककचाख्ये ।

पत्रपुष्प पु० पत्रमेव पुष्पमिव सुगन्धित्वात् यस्य । रक्तसुरसायाम् । संज्ञायां कन् । सुनसायां स्त्री० टाप् ।

पत्रभङ्ग पु० पत्रस्येव भङ्गः खण्डो यत्र । स्तनादौ पत्रखण्डाकृतिरूपेण लेख्ये तिलकादौ । गौरा० ङीष् । पत्रभङ्गीत्यपि ।

पत्ररथ पु० पत्रं पत्रः रथस्य गतिसाधनं यस्य । पक्षिणि ।

पत्रलेखा स्त्री० पत्रस्य लेखा । चन्दनादिना पत्राकृतिलेखने ७त० । स्तनादौ तथालेख्ये तिलकादौ ।

पत्रवल्ली स्त्री० पत्रस्य वल्ली श्रेणीव । चन्दनादिना लेख्ये पत्राणां श्रेणीवल्ये तिलकाकारे पदार्थे ।

पत्रश्रेष्ठ पु० पत्रेण श्रेष्ठः । बिल्ववृक्षे ।

पत्रसूचि स्त्री० पत्राणां सूचिरिव । कण्टके ।

पत्राङ्ग न० पत्रेषु अङ्गति अच्, पत्रमेवाङ्गमस्य वा । भूर्जपत्रे (वकम) काष्ठभेदे, रक्तचन्दने च । [पत्रयुक्ताङ्गुल्याकारे तिलकभेदे ।

पत्राङ्गुलि स्त्री० पत्रसहिताङ्गुलिर्यत्र । चन्दनादिना स्तनादौ लेख्ये

पत्राच्छन न० पत्रं लेखनपत्रमच्यतेऽनेन ल्युट् । मसाम् ।

पत्रालु पु० पत्राकृत आलुः । कालालुभेदे ।

पत्रावलि स्त्री० ईत० । पर्णश्रेणौ पत्राणां लेख्यपत्राणामावलौ च । वा ङीप् । पत्रभङ्गे । [स्वार्थे कन् तत्रैव ।

पत्री स्त्री० पद–ष्ट्रन् ङीष् । लिपौ तदाधारत्वात् पत्रे च ।

पत्रिन् पु० पत्रं पत्रः अस्यास्ति इनि । पक्षिणि, शरे, श्येने, रथिनि, पर्वते, ताले च । पर्णयुते त्रि० ।

पत्रोर्ण न० पत्रवत्ता ऊर्णा (रेशम) अस्यास्ति अर्श आद्यच् । पट्टवस्त्रे, कौषेये । पत्रेषु ऊर्णा यस्य । श्येनाकवृक्षे पु० ।

पथ गतौ भ्वा० प० स० सेट् । पथति अपथत् ।

पथ गतौ वा चु० उभ० पक्षे भ्वा० प० सक० सेट् इदित् । पन्थयति ते पन्थति । अपपन्थत् त । अपन्थीत् ।

पथ पु० पथ–अच् । मार्गे, पथि ।

पथिक त्रि० पन्थानं गच्छति पथिन्+कन् । देशान्तरयानाय गृहाद्विरहत्य पथिगन्तरि । [कपिलद्राक्षायाम् ।

पथिका स्त्री० पथे पथिगमनाय हिता अनायासभक्ष्यत्वात् ठन् ।

पथिद्रुम पु० पथ—द्रुम० । खदिरवृक्षे ।

पथिन् पु० पथ+इनि । (पथ) ख्याते अध्वनि ।

पथ्य त्रि० पथे चिकित्सानुसारिमार्गाय हितम् । चिकित्सोपयोगिनि रोगिसेव्ये वस्तुनि, हितकारके च । हरितकीवृक्षे, वन्ध्याकर्कोट्यां च स्त्री० ङीष् ।

पथ्याशाक पु० कर्म० । तण्डुलीयशाके ।

पद् स्थैर्ये भ्वा० पर० अक० सेट् । पदति अपादीत् अपदीत् ।

पद् गतौ दि० आ० सक० अनिट् । पद्यते अपादि ।

पद् गतौ अद० चु० आत्म० सक० सेट् । पदयते अपपदत ।

पद न० पद्—अच् । चिह्ने, स्थाने, पादे, उद्यमे, त्राणे, वस्तुनि शब्दभेदे, (सुप्तिङन्तरूपे) प्रदेशे, श्लोकपादे च ।

पद् न० पद्—क्विप् पादे । किरणे पु० ।

पदग त्रि० पदेन गच्छति गम—ड । पदातिके ।

पदन्यास पु० पदस्य गोष्पदैकदेशशुरसस्य न्यासः तन्नामाक्षरं यत्र । गोत्वुरत्नुपे । ईत० । पदस्यार्पणे ।

पदवि(वी) स्त्री० पद—अवि वा ङीप् । पथि

पदाजि पु० पादाभ्यामजति ऐन् वीभावाभावः पदादेशः । पादगामिनि

पदाति पु० पादाभ्यामतति अत—इन् पदादेशः । पदगामिनि ।

पदार्थ पु० पदबोध्योऽर्थः शाक० । अभिधेये, वस्तुमात्रे सर्वेषां शब्दबोध्यत्वात्तथात्वम् ।

पद्म पु० पद्भ्यां गच्छति गम—ड । पादेन गामिनि । [त्तापकग्रन्थभेदे च।

पद्मति(ती) स्त्री० पद+इन—क्तिन् वा ङीप् । पथि, षड्क्तौ पूजादि-

पद्म न० पद+मन् । कमले, गजसुखादिस्थे, विन्दुसमुदाये कमलाकारेण सैन्यादेरभिनिवेशनरूपे व्यूहभेदे, निधिभेदे, "अर्बुदमब्ज" मिति पर्य्यायनाम्नोक्तायां दशार्बुदसंख्यायां, तत्संख्यातेषु, पुष्करमूले, शीधके, धातौ, शरीरस्थे, नाड़ीचक्रभेदे च ।

पद्मकन्द पु० ईत० । शालूके ।

पद्मकाष्ठ न० ईत० । औषधिभेदे । [भूर्जपत्रवृक्षे ।

पद्मकिन् पु० पद्मकानि गजविन्दुजालाकृतयो विन्दवः सन्त्यस्य इनि ।

पद्मकेशर पु० ६त०। किञ्जल्के, पद्मपराटसमीपस्थे पीतवर्णे केशाकारे पदार्थे। [कर्म०। कमलमध्ये न०।

पद्मगर्भ पु० पद्मं विष्णुनाभिपद्मं गर्भस्तुत्पादकं यस्य। चतुर्मुखे ब्रह्मणि।

पद्मचारिणी स्त्री० पद्ममिव चरति स्थानं परित्यज्य दूरं गच्छति णिनि। उत्तरकुरुदेशे प्रसिद्धे लतामेदे।

पद्मनाभ पु० पद्मं नाभौ यस्य अच्। विष्णौ।

पद्मपत्र न० ६त०। कमलपत्रे। पद्मस्य पत्रं वाहनमिव। कमलमूले।

पद्मपुराण न० पद्ममधिकृत्य कृतमण् तस्य लुक् कर्म०। महापुराणान्तर्गते पुराणभेदे।

पद्मपुष्प पु० पद्ममिव पुष्पं यस्य। कर्णिकारवृक्षे।

पद्मबन्ध पु० पद्माकारो बन्धः सन्निवेशः। शब्दालङ्कारभेदे।

पद्मबन्धु पु० ६त०। सूर्ये, भ्रमरे च। पद्ममित्रादयोऽप्यत्र।

पद्मभू पु० पद्मं विष्णोर्नाभिपद्मं भूरुत्पत्तिस्थानं यस्य। चतुर्मुखे ब्रह्मणि। पद्मोद्भवादयोऽप्यत्र।

पद्मराग न० पद्मस्येव रागो यस्य। रक्तवर्णे मणिभेदे (माणिक)।

पद्मलाञ्छन पु० पद्मं लाञ्छनमस्य। सूर्ये, ब्रह्मणि, नृपे, कुबेरे च

पद्मवासा स्त्री० वसत्यत्राधारे घञ् ६त०। सरस्यां लक्ष्म्याम्, लक्ष्म्यङ्के च। पद्मं निवासो निलयो यस्याः। पद्मनिवासादयोऽप्यत्र।

पद्मबीज न० ६त०। कमलबीजे (कमलगट्टा)।

पद्मबीजाम न० पद्मबीजमिवाभाति आ+भा—क। (माखना) जलजे फलभेदे। [कुसुम्भपुष्पे च।

पद्मा स्त्री० पद्ममस्त्यस्य अर्श आद्यच्। लक्ष्म्याम्, लक्ष्म्यङ्के, मनसादेव्यां,

पद्माकार पु० ६त०। पद्मयुक्ते तद्योग्ये वा अगाधे जलाशये।

पद्माट पु० पद्मवदटति अट—अच्। चक्रमर्दवृक्षे (दादमर्दन)।

पद्मावती पु० पद्म+अस्त्यर्थे मतुप् मस्य वः दीर्घश्च। (पद्मा) नदीभेदे, मनसादेव्यां, पद्मचारिणीलतायाञ्च।

पद्मासन न० पद्ममिवासनम्। योगशास्त्रप्रसिद्धे आसनभेदे।

पद्मिनी स्त्री० पद्मानां—समूहः, सन्निकृष्टदेशो वा इनि । कमलसमूहे तद्युक्तदेशरूपायां, सरोवरस्थलतायां, स्त्रीभेदे च ।

पद्मिनीकान्त पु० ६त० । सूर्य्ये, पद्मिनीप्रियादयोऽप्यत्र ।

पद्मिन् पु० पद्मं विन्दुजालमस्त्यस्य इनि । हस्तिनि । पद्मयुक्ते त्रि० ।

पद्मेशय पु० पद्मे शेते शी—अच् अलुक् स० । विष्णौ ।

पद्य न० पदं चरणमर्हति पद+यत् । कविकृते चतुश्चरणात्मके "पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधे"त्युक्ते, वाक्यभेदे । पद्म्यां स्त्री० । पद्मां जातः यत् । मुद्गे पु० । पदं विध्यति यत् । शर्करायां स्त्री० । [अपनायिष्ट अपनिष्ट ।

पन स्तुतौ भ्वा० आत्म० सक० सेट् । पनायते पनायति अपनायीत्

पनस पु० पन—असच् । (कांटाल) कण्टकिफले ।

पन्न त्रि० पद—क्त । गलिते, च्युते च । पद—नन् । अधोमुखगतौ न० ।

पन्नग पु० पन्नमधोमुखं यथा तथा गच्छति, पद्भ्यां न गच्छति वा, नम—ड । सर्पे, पद्मकाष्ठे च जातौ ङीप् । सर्प्यां ।

पन्नगाशन न० पन्नगानश्नाति अश—ल्यु । गरुडे ।

पन्नद्धा स्त्री० पदि नद्धा बद्धा नह—क्त । चर्मपादुकायाम् ।

पन्नद्धी स्त्री० पद् नह्यतेऽनया नह-घ्रन् घित्त्वात् ङीष् । चर्मपादुकायाम् ।

पम्पा स्त्री० नदीभेदे, "पश्य लक्ष्मण ! पम्पायामि"ति रामायणम् ।

पय गतौ भ्वा० आत्म० सक० सेट् । पयते अपयिष्ट ।

पयःकन्दा स्त्री० पयः क्षीरं कन्दे यस्याः । क्षीरविदार्य्याम् ।

पयस् न० पा—असुन् इकारस्यान्तादेशः । दुग्धे, जले च ।

पयस्य त्रि० पयसो विकारः यत् । दुग्धविकारे दध्यादौ । विड्० पु० । क्षीरिकाकोल्याम्, अर्कपुष्पिकायां, कुटुम्बिन्याञ्च स्त्री० ङीष् । आमिक्षायां स्त्री० टाप् ।

पयस्विनी स्त्री० पयस्+अस्त्यर्थे विनि । धेनौ, नद्यां, काकोल्यां क्षीरकाकोल्यां, दुग्धफेन्यां, क्षीरविदार्य्यां, छाग्यां, जीवन्त्यां रात्रौ च ।

पयोधर पु० पयांसि धारयति धृ णिच्—अच् मुम्० । मेघे, स्तने,

क्षने । "प्रायः पयोधरसमुन्नतिरत्र हेतु"रित्युक्तेः नारिकेले, कर्कशेऽपि, कोपकारे च । [दयोऽप्यत्र ।

पयोधि पु० पयांसि धीयन्तेऽत्र पयस्+धा—कि । समुद्रे पयोनिध्या-

पयोर पु० पयो जलं रजति रन्जि—ड । खदिरे ।

पयोलता स्त्री० पयःप्रधाना लता शाक० । क्षीरविदार्याम् ।

पयोव्रत न० पयोमात्रप्रधानरूपं व्रतम् । हादशाहः साध्ये व्रतभेदे ।

पर त्रि० पृ—भावे अप्, कर्त्तरि अच् वा । अन्यस्मिन् भिन्ने इत्यर्थे, उत्तरे, दूरे, सीमापरिच्छिन्ने, श्रेष्ठे च मोक्षे, कैवल्ये, ब्रह्मणि च न० । "द्वे ब्रह्मणी वेदितव्ये परञ्चापर"मिति श्रुतिः । यतौ पु० ।

परःशत न० शतात् परे त्रि० । शताधिकसंख्यायां, तत्सङ्ख्यातेषु च ।

परःश्वस् अव्य० श्वः परे दिने नि० । आगामिपरदिवसात् पर-

श्विन् दिने । [त्रितेषु च ।

परःसहस्र न० सहस्रात् परे त्रि० । सहस्राधिकसंख्यायां तत्सं-

परकीय त्रि० परस्येदम् छ-कुक् च । परसम्बन्धिनि । उपनायिकायां स्त्री०

परच्छन्द पु० ६त० । परेच्छायां परच्छन्दानुवर्त्तिनीत्युक्तेः परस्य छन्देन छन्दो यस्य । पराधीने त्रि० ।

परजात त्रि० परस्मात्, परकर्त्तृकपोषणाद्वा जातः जन—ड । अन्येन जाते, परप्रयत्नेन पुष्टे च ।

परतन्त्र त्रि० परस्तन्त्रं प्रधानं यस्य । पराधीने परायत्तादयोऽप्यत्र ।

परत्व न० परस्य भावः त्व । वैशेषिकमतसिद्धे गुणभेदे, भेदे च ।

परपाकनिवृत्त पु० परार्थः देवातिथ्याद्यर्थः पाकस्तस्मान्निवृत्तः । "अहोत्वाग्निं समारोप्य पञ्च यज्ञान् निर्वपेत् । परपाकनिवृत्तोऽ-

साव"ित्युक्ते पञ्चयज्ञाकारके ।

परपाकरत पु० परस्य पाकस्तत्र रतः रम—क्त । "पञ्चयज्ञान् स्वयं कृत्वा परान्नमुपजीवति । सततं प्रातरुत्थाय परपाकरतश्च स"

इत्युक्ते परपाकान्नभक्षणे सततं प्रवृत्ते । [क्षोपजीविनि ।

परपिण्डाद त्रि० परस्य पिण्डं आसमन्ति अद—अण् । नित्यं परा-

परपुष्ट पु० परया काक्या पुष्टः पुष—क्त सर्वनाम्नः पुंवत् । कोकिले,

कोकिलया हि डिम्बस्फोटनादनया नीडस्थं कार्कडिम्बमपसार्य स्वडिम्बे तत्र स्थापिते काक्या स्वडिम्बवद्भ्राऽसौ पुष्यते इति लोक प्रसिद्धिः। परभृतादयोऽत्र। अन्यपालिते त्रि०। वेश्यायाम् स्त्री०

परपूर्व्वा स्त्री० पर इतरः पूर्वो यस्याः। "पतिं हित्वापकृष्टं स्वत-त्कृष्टं या निषेवते। परपूर्वेति सा प्रोक्ते"त्युक्तायां पुनर्भुवि स्त्रियाम्।

परभाग पु० भज्यते सेव्यतेऽनेन भागः उत्कर्षः कर्म०। अत्यन्तोत्कर्षे "लब्धपरभागतये"ति रघुः। भागः खण्डः कर्म०। अंशांशे, इत०। परस्य भागे अंशे।

परभृत् पु० परं कोकिलडिम्बं स्वडिम्बवद्भ्रा बिभर्त्ति, भृक्विप्। काके।

परम् अव्य० पृ—अमि। नियोगे, क्षेपे कोपे च।

परम त्रि० परं परत्वं माति मा—क। उत्कृष्टे, प्रधाने, आद्ये, प्रणवे च।

परमम् अव्य० पर+मा—डमि। अनुज्ञायाम्, स्वीकारे च।

परमर्षि पु० परमं ब्रह्म ऋषति गच्छति जानाति वा ऋष-गतौ इन्। "ऋषति परमं यस्मात् परमर्षिस्ततः स्मृत"इति निरुक्ते ब्रह्मवेत्तरि। कर्म०। श्रेष्ठे मुनौ। [संन्यासिभेदे।

परमहंस पु० कर्म०। कुटीचकादिषु चतुर्षु सन्न्यासिषु मध्ये

परमाणु पु० कर्म०। वैशेषिकसिद्धे पृथिव्यादीनां चतुर्णां भूतानां द्व्यणुकरूपावयवारम्भके सूक्ष्मभूते।

परमात्मन् पु० कर्म०। "आत्माऽस्य जगतो यस्मात् सर्व्वोत्कर्षाश्रयो मतः। परमात्मा परं ब्रह्म तेन वेदे प्रकीर्त्तित"इत्युक्ते परब्रह्मणि

परमान्न न० कर्म०। पायसे दुग्धपक्वेऽन्ने देवादिप्रियत्वात् परमत्वमस्य

परमायुध पु० परममायुर्यस्य पृ०। असनवृक्षे।

परमायुस् न० परमं श्रेष्ठाबधिकं आयुर्जीवितकालः। मनुष्यादीनां ज्योतिषोक्ते शताब्दादिकाले। विस्तरस्तु वायवीये।

परमेश्वर पु० कर्म०। जगत्सृष्ट्यादिकारके सगुणे त्रिमूर्त्तिके ब्रह्मणि, चक्रवर्त्तिनि नृपे च।

परमेष्ठिन् पु० परमे ब्रह्मणि तिष्ठति लीयते स्था–इनि डिच्च षत्वम् । चतुर्मुखे ब्रह्मणि, शालग्राममूर्त्तिभेदे च ।

परम्परा स्त्री० परम् अतिशयेन पृणाति पिपूर्त्ति वा पृ–पृ–श अच् । वंशे, व्यवधाने, सन्ततौ अविच्छिन्नधारायाम् "एवं परम्पराप्राप्त" मिति गीता । बधे, अनुक्रमे च ।

परम्पराक न० परम् अतिशयेन परा श्रेष्ठा परम्परा तया धारया आकोर्हिंसनं यत्र अक कुटिलगतौ घञ्, प्रशस्ता परम्परा हिंसा अनिष्टजनकत्वात् कन् वा नपुंसकत्वं कोपात् । यज्ञार्थे पशुहनने । "या वेदविहिता हिंसा नियतास्मिंश्चराचरे । अहिंसामेव तां विद्यादि"ति मनूक्तेस्तस्या अहिंसात्वेन हि प्राशस्त्यम् ।

परम्परीण त्रि० परम्परया धारयागतः ख । अविच्छेदसन्तत्यागते ।

परवश त्रि० परस्य वशः आयत्तः । पराधीने ।

परवत् त्रि० परः परायत्तताऽस्यास्ति मतुप् मस्य वः । पराधीने ।

परशु पु० परं पृणाति पृ–क डिच्च । परश्वधे (टाङ्गी) अस्त्रभेदे । शॄ–शुन् पृ आदेशः पर्शुरप्यत्र, अस्त्रमात्रे च ।

परशुराम पु० परशुधारी रामः शाक० । जमदग्निजे भगवदवतारभेदे येन परशुना त्रिःसप्तकृत्वो भूमिर्निःक्षत्रिया कृता ।

परश्व(स्व)ध पु० श्वि–ड स्वो दृद्धिः परस्य स्वं धयति, परस्य स्वं काष्ठं धयति वा धे–क । कुठारे अस्त्रभेदे ।

परस्पर त्रि० पर+वीप्सायां द्वित्वम् सुट् च । अन्यं न्यञ्चिनं पदार्थं । स्त्रीनपुंसकयोस्तु सार्वविभक्तिक आसु असुच् । परस्पराम् परस्परमिति सर्वविभक्तौ ।

परस्मैपद न० परस्मै परोद्देशेन पदं फलबोधनं यस्मात् । व्याकरणोक्तेषु तिबादिषु । स्वरितेतः, ञितश्च धातोरुत्तरतिबादिभिर्नवभिर्हि परार्थमेव फलं बोध्यते ।

परा अव्य० पृ–आ । प्रातिलोम्ये प्राधान्ये धर्षणे, आभिमुख्ये, त्यागे, विक्रमे, भृशार्थे, गतौ, भङ्गे, अनादरे, तिरस्कारे, प्रत्याहृत्तौ च । वैद्यकोक्तौ "परा वागनपायिनी"त्युक्ते मूलाधारस्थे शब्दभेदे,

"सा परा यथाक्षरमधिगम्यते" इति श्रुत्युक्तायां ब्रह्मविद्यायाञ्च स्त्री०

पराक पु० "यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम्। व्रतं पराको-नाम" त्युक्ते द्वादशाहोपवाससाध्ये प्रायश्चित्तरूपे व्रतभेदे।

पराक्पुष्पी स्त्री० पराक् पुष्पं यस्याः। अपामार्गे।

पराक्रम पु० परा+क्रम-घञ् न वृद्धिः। बले देहजशामर्थ्ये च।

पराग पु० परागच्छति परा+गम-ड। धूलिमात्रे, पुष्परजसि, "स्फुटपरागपरागतपङ्कज" मिति माघः। ज्ञानीयग्रन्थे-कुङ्कुमचू-र्णादौ, उपरागे, चन्दनेच।

पराङ्मुख त्रि० पराक् प्रत्यावृत्यं मुखं यस्य। विमुखे आरब्धकार्य्यात् निवृत्तावप्युन्मुखे।

पराच् त्रि० परा अञ्चति अनुच-क्विन् प्रत्यक्षतत्त्वभिन्ने-इदंव्यवहार-विषये-बाह्ये वस्तुनि।

पराचित त्रि० परेणाचितः पुष्टः व्याप्तो वा आ+चि क्त। परेण प्रति-पालिते सम्यगव्याप्ते च।

पराचीन त्रि० परागभवः पराच्+ख। पराङ्मुखे, परकालिके च।

पराजय पु० परा+जि-अच् पराभवे (हारि)।

पराधीन त्रि० परोऽधि इति वाक्ये समासे अध्युत्तरपदात् ख, परस्या-धीनो वा। परायत्ते। [अव्ययशब्दे न०।

परान्न त्रि० परस्यान्नमेवान्नमस्य। परान्नोपजीविनि। हेम०।

परिभव पु० परा+भू-अप्। तिरस्कारे, अभिभवे, विनाशे च।

परामर्श पु० परा+मृश-घञ्। युक्तौ, विवेचने, न्यायादयुक्ते व्या-प्तिविशिष्टतया पक्षस्य ज्ञाने च यथा वह्निव्याप्यधूमवान् पर्वत इत्यादिज्ञानम्।

परायण न० परमयनं यत्र। अत्यन्तासक्तौ, उत्तमाश्रये च हेम०। अत्यासक्ते, यथा धर्म्मपरायणः धर्मे अत्यन्तासक्तः। तत्परे, अभीष्टे च त्रि०।

परारि अव्य० पूर्वतरे वर्षे पूर्वतर+अरि परादेशः नि०। पूर्वतरवत्सरे गतप्रतीयवत्सरे। परोऽरिः। अत्यन्तशत्रौ पु०।

परार्क पु० परार्कतिं परा+कृ–घञ्। कार+कारणेलक्षणे (उक्का)।

परार्द्ध न० ऋध–अच् कर्म०। चरमसंख्यायां "मारे परार्द्धं गच्छितं यदि स्या"दिति नैषधम्। कर्म०। ब्रह्मण आयुषोद्वितीयार्द्धे।

परार्द्ध्य त्रि० परार्द्धं चरमसंख्यात्वमर्हति यत्। श्रेष्ठे "परार्द्ध्यवर्णालङ्कारे"ति रघुः।

परावर्त्त पु० परा+वृत–घञ्। परीवर्त्ते विनिमये।

परावह पु० परा+वहति परा+वह–अच्। सप्तवायुमध्ये परिवहवायोरूर्द्ध्वे वायुभेदे।

पराशर पु० व्यासपितरि, मुनिभेदे।

पराश्रया स्त्री० परमाश्रयति आ+श्रि–अच्। वन्द्याम् (परगाछा) अन्यावलम्बिनि त्रि०।

परासन न० परा+असु–ल्युट्। मारणे।

परासु त्रि० परागताः असवो यस्य। मृते।

परास्कन्दिन् पु० परान् आस्कन्दति–णिनि। चौरे।

परास्त त्रि० परा+अस–क्त। निरस्ते, पराजिते च।

पराह्ण पु० परमुत्तरमहः कर्म० टच् समा० पुंवत्त्वञ्च। परदिने।

पराह्ण पु० परमह्नः एकदेशित्व० टच् समा० अकारादेशः पूर्वम्। दिवसस्य चरमभागे, शुक्लपक्षेऽपराह्णकाले च।

परि अव्य० पॄ–इन्। सर्वतः सूचार्थे, वर्জ্জने, आधौ, शेषे, कञ्चित् प्रकारं प्राप्ते, निरसने, पूजायां, भूषणे, उपरमे, योगे, सम्भोगभाषणे, अतिशये, लाभे, नियमे च।

परिकर पु० परि+कृ–अप्। पर्য্যङ্কे परिवारे, समारम्भे, समूहे प्रगाढ़गाढालिङ्गने, विवेके, सङ्कचारिणि च।

परिकर्म्मन् न०। कर्म संस्कारादि, तद्व्याख्या ५व० देहसंस्कारे, शुश्रूषाद्यङ्गोद्वर्त्तनीयद्रव्ये, भूषणे च गणितानुयुक्तेषु सङ्कलनव्यवकलनगुणनभागजातितत्पदघनतत्पदरूपेषु अष्टविधेषु संस्कारेषु च। ष्ठ्व०। सेवके त्रि०।

परिक्रम पु० परि+क्रम–घञ् न वृद्धिः । क्रीड़ादौ, पूजादौ, प्रदक्षिणीकरणाद्यर्थं पादेन गमने च ।

परिक्रिया स्त्री० परितः क्रिया वेष्टनम् । परिखादिना पुरादेर्वेष्टने ।

परिक्षित् पु० अर्ज्जुनेन सुभद्रायामुत्पादिते कुरुवंश्ये नृपतिभेदे परिक्षितोऽप्यत्र ।

परिखा स्त्री० परितः खन्यते खन–ड । पुरादौ रिपुप्रभृतीनां दुरवेशतासिद्धये मर्त्तकृतायां जलाधारस्थाने वेष्टनाकारभूभौ ।

परिगत त्रि० परि+गम–क्त । प्राप्ते, ज्ञाते, विक्षते, वेष्टिते, वेष्टिते, गते च ।

परिग्रह पु० परि+ग्रह–अच् । स्वीकारे, सैन्यपश्चाद्भागे च कर्मणि च । भार्य्यायां, परिजने च । करणे अप् । मूले, यशसे च ।

परिघ पु० परि+हन–क नि० । परिघातास्त्रे लौहमुद्गरादौ, लौहमुखे लगुड़े–मुद्गरे, मूले, काचघटे, गृहे, विघ्नन्यायधिक्ये जनविंशतितमे योगे च । [च ।

परिचय पु० परि+चि–अच् । ज्ञातस्य पौनःपुन्येनज्ञाने, संस्तवे, प्रणये

परिचर्य्या स्त्री० परिचर+ण्यप् । सेवायाम् ।

परिचाय्य पु० परिचीयते संस्क्रियतेऽसौ चि–ण्यत् । यज्ञाग्नौ ।

परिचारक त्रि० परि+चर–ण्वुल् । सेवके, भृत्ये ।

परिच्छद पु० परि+छद+घ ह्रस्वः । उपकरणे हस्त्यश्वरथपदातौ, वस्त्रादिभूषणे, परिवारे च । "सेना परिच्छदस्थे"ति रघुः ।

परिच्छेद पु० परि+छिद–घञ् । विशेषरूपेण दृश्यत्वाकरणे, सर्गादिस्थानीये ग्रन्थस्य विच्छेदस्थाने च ।

परिजन पु० परिगतो जनः । परिवारे, प्रतिपाल्ये जने ।

परिणत त्रि० परि+नम–क्त णत्वम् । परिपक्वे, वृद्धिं गते, अवस्थान्तरं प्राप्ते, तिर्य्यग्भावापत्तिमति गजे च ।

परिणय पु० परि+नी–अच् । विवाहे ।

परिणाम पु० परि+नम–घञ्। प्रकृतेरन्यथाभावे विकारे, मेघे, अर्थालङ्कारभेदे च।

परिणाह पु० परि+नह–घञ्। विस्तारे।

परिणेतृ पु० परि+नी–तृच्। विवाहकर्त्तरि भर्त्तरि।

परितस् अव्य० परि–तसिल्। सर्वत इत्यर्थे चतुर्द्दिक्षु।

परिताप पु० परितप्यते, अत्र वा भावादौ घञ्। दुःखे, उष्णतायाम्, शोके, भये, कर्म्मणि, नरकभेदे। [रणे च।

परित्राण न० परि+त्रै–ल्युट्। रक्षणे, अनिष्टे प्रवृत्तस्य निवा-

परिदान न० परियत्नेन दानम् दा–ल्युट्। विनिमये द्रव्यान्तरग्रह-णेन द्रव्यान्तरदाने।

परिदेवन न० परि+दिव–ल्युट्। अनुशोचने, विलापे, कृतस्य कर्म-णोऽनुचितत्वधियानुतापे च। स्त्रियां ङीप्–युच्। परिदेवनाप्यत्र, लाभे च स्त्री०।

परिधान न० परिधीयते परि+धा–कर्मणि ल्युट्। परिच्छितवस्त्रे अधोरधोधृतवसने।

परिधि पु० परि+धा–कि। चन्द्रसूर्य्यसमीपस्थे मेघादिसन्निकर्षात् जायमाने वेष्टनाकारे मण्डले (सूर्य्यसभा) (चन्द्रसभा) यज्ञियपशुब-न्धनार्थं निखातायां यज्ञियतरोः पलाशादेः शाखायाम्, गोधन-मण्डलस्य परितो वेष्टनस्थलमाने, परितः पार्श्वे च।

परिधिस्थ त्रि० परिधौ तिष्ठति स्था–क। परिचारके, युद्धादौ रथिनो रक्षार्थं परितः स्थिते सैन्यादौ च।

परिपन न० परिपन्यते व्यवह्रियतेऽनेन पन–घञ्। मूलधने।

परिपन्थक पु० परिपन्थयति दोषाख्यानं गच्छति ण्वुल्, पन्थानं वर्त्त-यित्वा गच्छति वा कन् पन्थादेशः। शत्रौ।

परिपन्थिन् पु० परि+पन्थि–इनि। शत्रौ।

परिपाक पु० परि+पच–घञ्। नैपुण्ये, उत्तमपाके च।

परिपाकिनी स्त्री० परिपाक+अस्त्यर्थे इनि। तिक्तति (तेओटी)।

परिपाटि(टी) स्त्री० परि+पुट–इन्। अनुक्रमे, आनुपूर्व्याम्।

परिपुङ्करा स्त्री० परितः पुङ्खारं लुखं यस्याः । (गोलुक) । गोलु-
ब्यायाम् । [यमाने लुक्षाकारे पदार्थे ।
परिपेल न० परि+पेल-अच् । कैवर्त्तीसुस्तकै यैवलमध्ये ज-
परिपेलक न० परितः पेलकं लुंदुता यस्य । कैवर्त्तीसुस्तके ।
परिप्लव न० परि+प्लु-अच् । चञ्चले अस्थिरे ।
परिबर्हे पु० परि+बर्ह-घञ् । रूपवौन्यं हंसमयूरपादिपरिच्छदे ।
परिभ(भा)व पु० परि+भू-अप् घञ् वा । अनादरे, तिरस्कारे च ।
परिभाषण न० परि+भाष-ल्युट् । निन्दया दुष्टवचने आलापे,
नियमे च । [अनादृत्य यदुदायार्थं विभिष्टसंज्ञायाम ।
परिभाषा स्त्री० परि+भाष-अ । ज्ञातिसंज्ञायाम् अवयवार्थ-
परिभूत त्रि० परि+भू-क्त । तिरस्कृते, अनादृते च ।
परिमण्डल त्रि० परितो मण्डलम् । वर्त्तुलाकारे ।
परिमल पु० परि+मल-अच् । कुङ्कुमचन्दनादिसर्हणे, सर्हणोद्भूते
सुगन्धौ, परितः सम्बन्धे च । "सतां परिमल" इत्युदयनः ।
परिमाण न० परिमीयतेऽनेन परि+मा-ल्युट् । (माप) लुलाङ्गुल
प्रस्थादिभिर्द्रव्यस्य परिच्छेदे । [च ।
परिमित त्रि० परि+मा-क्त । ज्ञातपरिमाणे, युक्ते यथार्हपरिमाणे
परि(री)रम्भ पु० परि+रभ-घञ् लुमच वा दीर्घः । आलिङ्गने ।
परिवत्सर पु० संवत्सरपञ्चकान्तर्गते वत्सरभेदे ।
परिवर्জ্জन न० परिवर्জ্यतेऽनेन परि+वृज-णिच्-ल्युट् । त्यागे ।
वृज-भावे+ल्युट् । त्यागे ।
परि(री)वर्त्त पु० परि+वृत-भावे घञ् वा दीर्घः । विनिमये । आधारे,
घञ् । युगान्ते काले, ग्रन्थविच्छेदे अध्यायादौ च कर्त्तरि अच् ।
कूर्मराजे, । भावे ल्युट् । परिवर्त्तनं विनिमये ।
परिवह पु० परि+वह-अच् । सप्तवायुमध्यपातिनि वायुभेदे ।
परि(री)वाद पु० परि+वद-घञ् वा दीर्घः । अपवादे "गुरोर्यत्र
परीवाद" इति मनुः ।
परिवादिनी स्त्री० परितो वदति खरादारभिव नदति वद-णिनि ।

सप्ततन्त्रीयुक्तायां, वीणायाम् अपवादकर्त्र्यां स्त्रियाञ्च ।

परि(री)वाप पु० परि+वप–घञ् वा दीर्घः । वपने । वप–णिच्–घञ् । मुण्डने । ल्युट् । परिवापयतीत्यत्र ।

परिवापित त्रि० परि+वप–वा–वा णिच्–क्त । मुण्डिते ।

परि(री)वार पु० परिक्रियतेऽसौ अनेन वा परि+वृ+घञ् वा दीर्घः । परिजने कुटुम्बादौ, खड्गकोशे, (खाप) परिवादे च ।

परि(री)वाह पु० परि+वह–घञ् वा दीर्घः । अलोक्वासे परितः क्षमनाज्जलानामुच्छलनात् तथात्वम् ।

परिविन्न त्रि० परिविद्यतेऽसौ कर्मणि–क्त । अनुजस्य विवाहकाले अग्रजे ज्येष्ठे । तादृश्यां भगिन्यां स्त्री० । ज्येष्ठानूढताकालेऽनुजोद्वाहरूपः दोषः, परिवेदनं तेन दुष्यत इति तस्य परिवेदनकर्मत्वम् ।

परिविन्नि पु० परिविद्यते परिवेदाजन्यदोषेण दुष्यतेऽसौ परि+विद–कर्मणि क्निच् प्राग्वदानुजस्यानूढे ज्येष्ठे ।

परिविष्ट त्रि० परि+विष–क्त । व्याप्ते प्रभौ ।

परिवेत्तृ पु० परि+विद–तृच् । ज्येष्ठेऽनूढे प्रग्विवाहरूपपरिवेदनकर्त्तरि अनुजे भ्रातरि ।

परिवेदन न० परि वर्ज्जयित्वा उचितकालं वेदनं विवाहः लाभो वा । ज्येष्ठे, अनूढे, अक्षताग्न्याधाने च वर्त्तमानस्य विवाहकरणे, अग्न्याधानकरणे च दुरदृष्टजनके स्मृत्युक्ते दोषे ।

परिवेदनी स्त्री० परिविद्यते यया परि+विद–करणे ल्युट् ङीप् । यामूढा परिवेदनदोषो भवति तस्यां स्त्रियाम्, "परिवेत्ता परिविन्नितिः यया च परिविद्यते । सर्वे ते नरकं यान्ति दात्रयाजकपञ्चमाः" इति मनुः ।

परिवेष पु० परि+विष–व्याप्तौ भावे घञ् । वेष्टने, मेघादिसम्पर्कात्जायमाने चन्द्रार्कमण्डलस्य वेष्टनाकारे । "वाताद्यैर्मण्डलीभूताः सूर्य्यचन्द्रमसोः कराः । मालाभा व्योम्नि दृश्यन्ते परिवेषस्तु स स्मृतः" इत्युक्ते मण्डले पदार्थे । [दाने ।

परिवेषण न० परि+विष–णिच् ल्युट् । भोजनार्थमन्नादेः भोजनपात्रे

परिव्याध पु० परि+व्यध–कर्त्तरि घञ्। अन्वेषके।

परिव्राज् पु० परि+व्रज–क्विप् नि०। सर्वकर्म्माणि परित्यज्य आश्रमान्तरगामिनि चतुर्थाश्रमिणि यतौ।

परिव्राज(क) पु० परित्यज्य सर्वकर्म्माणि व्रजति व्रज–घञ् ण्वुल् वा। चतुर्थाश्रमिणि यतौ। [प्रतिपादके ग्रन्थे।

परिशिष्ट न० परि+शिष–क्त अवशेष अस्त्यर्थे अच्। अवशिष्टांश

परिश्रम पु० परि+श्रम–घञ् न दृद्धिः। व्यायामे क्लेशकारके आयासे।

परिश्रय पु० परि+श्रि–आधारे अच्। सभायाम्।

परिषद् स्त्री० परितः सीदत्यस्याम् सद्+क्विप्। सभायां, धर्म्मोपदेशकपण्डितसमुदाये च। [परिश्रमे च।

परिषद् पु० परितः सीदति गच्छति सद्–अच्। अनुचरे पार्श्वचरे,

परिषद्बल त्रि० परिषद्+अस्त्यर्थ वलच्। सभासदे।

परिष्क(ष्क)न्द त्रि० परिष्कादयते पूर्य्यते परि+स्कन्द–घञ् वा। षत्वम्। परपुष्टे। क्त। परिष्कन्नमप्यत्र वा षत्वे परिष्कन्नञ्च।

परिष्कार पु० परि+कृ–घञ् सुट् च। भूषणे विद्यमानवस्तुनो गुणान्तरस्य सर्ज्जनादौ, संस्कारे च। [संस्कारे च।

परिष्कृत त्रि० परि+कृ–क्त सुट् च। भूषिते चेष्टिते, लतमार्ज्जनादि-

परिष्वङ्ग पु० परि+स्वञ्ज–घञ्। आलिङ्गने।

परिसर पु० परि+सृ–अप्। नदीनगरपर्वतादेः समीपस्थाने, सृत्यौ, विधाने च। [गमने च।

परिसर्ग पु० परितः सृज्यते सृज–घञ्। परितोवेष्टने समन्तात्

परिसर्य्या स्त्री० परि+सृ–यत्। सर्वतो गमने।

परिस्कन्द पु० परि+स्कन्द–घञ्। समन्तात् चलने, कुसुमपत्रादेः रचनाभेदे, परिष्कारे, परिजने च।

परि(री)स्रुत् स्त्री० परिस्रवति प्राकारादिना निर्गच्छति स्रु–क्विप् वा दीर्घः। मदिरायाम्। क्त। परिस्रुताप्यत्र। [अनादरे च।

परि(री)हार पु० परि+हृ–घञ् वा दीर्घः। त्यागे, दोषापकरणे,

परि(री)हास पु० परि+हस–घञ् वा दीर्घः। केलौ।

परीक्षक त्रि० प्रमाणेन परीक्ष्यते परि+ईक्ष–ण्वुल् । प्रमाणोपन्यासेन विषयनिरूपके ।

परीक्षण न० परि+ईक्ष–ल्युट् । प्रमाणेन वस्तुनिरूपणे ।

परीक्षा स्त्री० परि+ईक्ष–अ । दृष्टादृष्टत्वावलोकने प्रमाणेन वस्तुनिरूपणे, कृत्युक्ते दृष्टादृष्टत्वसाधके तुलादिप्रमाणे च ।

परीष्टि स्त्री० परि+इष–क्तिन् । अन्वेषणायाम्, परिचर्य्यायाञ्च ।

परीसार पु० परि+सृ–घञ् । सर्वतोगमने ।

परुत् अव्य० पूर्वस्मिन् वर्षे उत् परश्चान्तादेशः । गतसंवत्सरे ।

परुत्न त्रि० परुत्सम्बन्धः त्न । गतवर्षभवे पदार्थे ।

परुष न० पॄ–उषन् । निष्ठुरवचने । नीलीभिण्टाम् पु० । चित्रवर्णे, कठोरे च त्रि० ।

परुस् न० पॄ–उसि । ग्रन्थौ, (गांट) पर्वणि च ।

परेत त्रि० परा+इण–क्त । मृते । [वा । यमे ।

परेतराज(ज्) पु० ईत० टच् समा०, परेतेषु राजते राज–अच् क्विप्

परेद्यवि अव्य० परस्मिन्नह्नि नि० । परदिवसे इत्यर्थे ।

परेद्युस् अव्य० परस्मिन्नह्नि पर+एद्युस् । परदिने ।

परेष्टुका स्त्री० परैरिष्यते इष–तु स्वार्थे कन् । बहुप्रसवायां गवि ।

परैधित् त्रि० परैरैधितः एध-णिच्–क्त । अन्यपालिते ।

परोक्ष अव्य० अक्ष्णः परम् अव्य० सुट् नि० । अप्रत्यक्षे, अर्थ–अच् । तद्विषये त्रि० ।

परोष्णी स्त्री० परा–उष्णा–कर्म० गौरा० ङीष् । तैलपायिकायाम् ।

पर्कटि स्त्री० पृच–अटि न्वङ्का० कुत्वम् (पाकुड़) वृक्षभेदे ।

पर्कटिन् पु० पृच–अटिनि नि० कुत्वम् । वृक्षभेदे । (पाकुड़) ।

पर्जन्य पु० पृषु सेचने अन्य आन्तादेशः । इन्द्रे, मेघे, यस्माद्भवति पर्य्यन्न' इति मनुः । मेघयुक्ते च । दारुहरिद्रायां स्त्री० ।

पर्ण कुत्सितभावे अ० चु० उभ० सक० सेट् । पर्णयति–ते अपपर्णत्–त ।

पर्ण न० पॄ–न, पर्ण–अच् वा । पत्रे, पक्षे च "सुपर्णो गरुडो मतः" इति । पलाशवृक्षे पु० । ताम्बूले न० । पत्रयुक्ते त्रि० ।

पर्णखण्ड पु० पर्णमेव खण्ड्यते यस्य पुष्पहीनत्वात् । पुष्पहीने वृक्षे स्वतो दृक्षे ।

पर्णचोरक पु० पर्णं चोरयति चुर–ण्वुल् + चोरनामगन्धद्रव्ये ।

पर्णनर पु० पर्णनिर्मितः नराकारः शवः । अस्थ्यलाभादौ क्षत्यु० दाह्ये शवप्रतिनिधीभूते पर्णनिर्मिते नराकारे ।

पर्णभेदिनी स्त्री० पर्णानि भिनत्ति भिद्–णिनि । प्रियङ्गुवृक्षे ।

पर्णलता स्त्री० पर्णप्रधाना लता शाक० । ताम्बूलीलतायाम् ।

पर्णवल्ली स्त्री० पर्णं प्रधाना वल्ली शाक० । पलाशीलतायाम् ।

पर्णशाला स्त्री० पर्णनिर्मिता शाला शाक० । पत्रनिर्मिते कुटीरे ।

पर्णाशन पु० पर्णानि अश्नाति अश–ल्यु । मेघे तस्य पत्रभक्षणकाले गलल्लालाम्बुसम्भव इति प्रसिद्धिः ।

पर्णास(सि) पु० पर्णानि अस्यति अस–अच् इन् वा । तुलस्याम् ।

पर्णिन् पु० पर्ण+अस्त्यर्थे इनि । वृक्षे । माषपर्ण्यां स्त्री० ङीप् ।

पर्ह अपानवायुक्रियायां भ्वा० आत्म० अक० सेट् । पर्हते अपर्हिष्ट ।

पर्प गतौ भ्वा० पर० सक० सेट् । पर्पति अपर्पीत् ।

पर्प न० पृ–प । गृहे, नवहरणे, खड्गवाहनसाधने पीठादौ ।

पर्पट पु० पर्प–अटन् । (जोतपापड़ा) क्षुपभेदे, सुश्रादिधूर्णकृते (पापर) ख्याते पिष्टकभेदे, सौराष्ट्रमृत्तिकायाम्, उत्तरदेशभवे सुगन्धिद्रव्ये च स्त्री० गौरा० ङीष् ।

पर्व गतौ भ्वा० पर० सक० सेट् । पर्वति अपर्वीत् ।

पर्यङ्क पु० परिगतोऽङ्कम् प्रा० । खट्वायाम्, योगपट्टे "पर्यङ्कबन्धनिबद्धद्विगुणितभुजगाश्लेषे" त्यादि मृच्छकटिकम् ।

पर्यङ्कपादिका स्त्री० पर्यङ्क इव पादा यस्याः संज्ञायां कन् । कोल-शिम्बाम् ।

पर्यङ्कबन्ध पु० पर्यङ्कस्य योगपट्टस्य बन्धः बन्ध–घञ् । योगपट्ट-वस्त्रादिना पृष्ठजानुजङ्घाबन्धने "पर्यङ्कबन्धं निविडं बिभेदेति कुमारः । ल्युट् । अत्रैव न० ।

पर्यटन न० परितोऽटनम् । पुनःपुनर्भ्रमणे ।

पर्य्यनुयोग पु० परितोऽनुयोगः प्रश्नः । दूषणार्थं जिज्ञासायाम् एते नाक्षापि पर्य्यनुयोगस्थानवकाश इति दायभागः ।

पर्य्यन्त पु० परिगतोऽन्तं सीमाम् । ग्रामवनादेः शेषसीमायाम् ।

पर्य्यन्तभू स्त्री० पर्य्यन्तस्य शेषसीमायाः भूः । सीमादेः शेषसीमास्थाने । परिसरे । [लोकव्यवहारातिक्रान्ते आचारे ।

पर्य्यय पु० परित्यज्य शास्त्रलौकिकमर्य्यादाम् अयः इण—अच् । शास्त्र-

पर्य्यवस्था स्त्री० परि+अव+स्था—अङ् । विरोधे, प्रतिपत्तवादे च । ल्युट् । तत्रैव न० । टाप् तत्कर्त्तरि त्रि० ।

पर्य्यस्त त्रि० परि—अस—क्ते पे क्त । विक्षिप्ते, पतिते, क्षते च ।

पर्य्याण न० परि+या—ल्युट् पृ० । अश्वसज्जायां पल्ययने (जिन्) इण—ल्युट् पर्य्ययणमस्यत्र ।

पर्य्याप्त न० परि+आप—भावे—क्त । यथेष्टे, तृप्तौ, सामर्थ्ये, निवारणे, योग्यत्वे च । कर्त्तरि क्त । समर्थे, प्राप्ते च त्रि० ।

पर्य्याप्ति स्त्री० परि+आप—क्तिन् । मरणादितो निवारणे, प्रकाशे, प्राप्तौ, सामस्त्येन प्राप्तौ, न्यायमतसिद्धे समुदाये वर्त्तमानपदार्थानां सर्वत्र सम्बन्धरूपे सम्बन्धभेदे च ।

पर्य्याय पु० परि+इण घञ् । अनुक्रमे, प्रकारे, अवसरे, निर्म्माणे, द्रव्यधर्मभेदे, समानार्थबोधके शब्दे च ।

पर्य्यायशयन न० पर्य्यायेण क्रमेण शयनम् । यामिकभटानां क्रमेण शयने

पर्य्युदञ्चन न० पर्य्युदञ्च्यते उद्ध्रियते कर्म्मणि ल्युट् । क्षणे ।

पर्य्युदस्त त्रि० परि+उद्+अस—क्त । निवारिते फलप्रत्यवायशून्यतया भेदार्थकनञा निषिध्यमाने "यथा रात्रौ श्राद्धं न कुर्व्वीत" इति अत्र हि रात्रौ श्राद्धेन फलं न वा प्रत्यवायः इति रात्रिः पर्य्युदस्ता तद्भिन्नासायस्यायां श्राद्धम् ।

पर्य्युदास पु० परि+उद्+अस—घञ् । निवारणे फलप्रत्यवायशून्यतया भेदार्थकनञा बोध्ये "प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानता । पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्" इत्युक्तलक्षणे निषेधे च विज्ञेयस्तु वाक्यस्थे ।

पर्य्युषित त्रि० परिक्रम्य स्वकालमतिक्रम्य उषितम् वस—क्त । (बासि) वातयामादौ पदार्थे, "वातयामं गतरसं पूति पर्य्युषितञ्च यदि"ति मनुः । [पदार्थपरीक्षायाम्, अन्येषामायाञ्च ।

पर्य्येषणा स्त्री० परितस्तर्कादिना एषणा परीक्षा । तर्कादिद्वारा

पर्व्व पूर्त्तौ भ्वा० पर० सक० सेट् । पर्वति अपर्वीत् ।

पर्वत पु० पर्व—अतच्, पर्व्वाणि भागाः सन्त्यस्य तं वा । गिरौ भूधरे, दानार्थं कल्पिते पर्वताकारे गुड़ादिशैलदृश्ये, मुनिभेदे "नाम चित्रमनु तं प्रयथौ यत् पर्वतस्तु खलि"ति नैषधं मल्लभेदे (पावदा) दृश्ये, शाकभेदे च ।

पर्वतमोचा स्त्री० ६त० । गिरिकदल्याम् । [गायत्र्याञ्च ।

पर्वतवासिनी स्त्री० पर्वते वसति वस—णिनि । आकाशकांक्षाम्,

पर्वतीय पु० पर्वते भवः छ । (पाहाड़ीया) जातिभेदे "पर्वतीयग—गौरभूदि"ति रघुः । पर्वतजातमात्रे त्रि० ।

पर्व्वन् न० पॄ—वनिप् । उत्सवे, ग्रन्थौ (गांट) लक्षणभेदे, प्रस्तारे, ग्रन्थविच्छेदस्थाने "चतुर्द्दश्यष्टमी चैव अमावस्या च पूर्णिमा । पर्व्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव चे"ति स्मृत्युक्तेषु पञ्चसु कालभेदेषु च ।

पर्व्वयोनि पु० पर्व ग्रन्थिर्योनिरुत्पत्तिस्थानं यस्य । इक्षुप्रभृतौ वृक्षे ।

पर्व्वरुह पु० पर्वणि रोहति रुह—किप् । दाड़िमे ।

पर्व्ववल्ली स्त्री० पर्वप्रधाना ग्रन्थिश्रेष्ठावल्ली । नालादूर्वायाम् (गाटदूर्वा)।

पर्वसन्धि पु० पर्वणः सन्धिः । पञ्चदश्याः (पूर्णिमायाः अमावस्या याश्च) प्रतिपदस्तिथेरन्तराले चन्द्रसूर्य्यग्रहणयोग्ये काले ।

पर्शुका स्त्री० पर्शुरिव कायति प्रकाशते कै—क । पार्श्वस्थे अस्थि । तस्य परशुधाकारत्वात् तथात्वम् । पर्शूरप्यत्र ।

पर्ष क्षेपे भ्वा० आत्म० सक० सेट् । पर्षते अपर्षिष्ट ।

पर्षद् स्त्री० पृष—क्विप् । सभायाम्, धर्म्मोपदेशकपण्डितसमाजे च । ततः अस्यर्थे वलच् । सभासदे त्रि० ।

पल गतौ भ्वा० पर० सक० सेट् जला० । पलति अपालीत् ।

पल्ल रचणे चुरा० उभ० सक० सेट् । पालयति ते अपीपलत्–त ।

पल्ल न० पल–अप् । मांसे, आमिषे, कर्षचतुष्टयपरिमाणे, शास्त्रीय-तोलकचतुष्टये लौकिकसाष्टरत्तिद्विनाषकाधिकतोलकौलितयपरिमाणे, षष्टिपुर्वाक्षरीक्षारणकोन्मे दण्डपरिमाणे विनाडिकाख्ये काले च । पातालें (तुच्छधान्ये) पुं० ।

पल्लगण्ड पुं० पल्लं मांसं गण्डति गण्डमिव करोति । रोगभेदकरे(राज)

पल्लङ्क पुं० पल्लं मांसमङ्कति क्षपति क्षिणक्ति खच् । राक्षसे, कण-गुग्गुलौ च । राक्षस्यां, लाक्षायाम्, गुग्गुलौ, गोलुरे, महा-श्रावण्यां, पलाशे, मल्लिकायाञ्च स्त्री० टाप् । [राक्षसे पुं० ।

पल्लल न० पल-कलच् । मांसे, पङ्के, तिलचूर्णे च । पल्लं लाति ला-क ।

पल्लाण्डु पुं० पल्लं मांसमण्डति अण्ड–उ । (पेयाज) मूलभेदे "प-लाण्डुं कवकानि चे"ति मनुः । [स्थानगमने ।

पल्लायन न० परा–अय–ल्युट् रस्य लः । भयादिना स्थानत्यागेनान्य-

पल्लाल पुं० न०पल–कालन् । शस्यशून्ये धान्यकाण्डे (नाडा)(पोयाल)

पल्लालदोहद पुं० पलालं दोहदं यस्य । आम्रवृक्षे पलालवेष्टने हि तस्य दोहदः ।

पल्लाश न० पल-गतौ घञर्थे क पलं चलनमश्नुते, पलं वियोगिनां मांसमिवाश्नाति शोषकत्वाद्वा अश–अण् । स्वनामख्याते वृक्षे "नवपलाशपलाशवन"मिति माघः । पर्णसदृशपर्णत्वात् हरिद्वर्णे पुं० । तद्वति त्रि० । लाक्षायां, लताभेदे च स्त्री० गौ० ङीष् ।

पल्लाशक पुं० पलं मांसमश्नाति एवुल् । गन्धाम्, पलाशवृक्षे च ।

पल्लाशपर्णी स्त्री० पलाशवृक्षस्येव पर्णमस्याः । अश्वगन्धायाम् ।

पल्लाशिन् पुं० पलाशानि सन्त्यस्य इनि । वृक्षे । [गवि च ।

पल्लिक्नी स्त्री० पलित+ङीप् नि० । वृद्धायां योषिति, बालगर्भिण्यां

पलित न० पल–भावे क्त । केशादौ जरया जातायां श्वेतितायाम्, मांसादेर्वलिपरीतभावे च । कर्त्तरि क्त । वृद्धे । स्त्रियां पलिता । योषिति तु पलिक्नीत्युक्तम् ।

पल्यङ्क पुं० परिगतोऽङ्कं रस्य लः । मञ्चायाम् । (पालङ्क) ।

पल्ययन न० परि–इण–ल्युट् रस्य लः । घोटकसञ्चारभेदे (जिन्) ।
पल्यूल छेदने, भ्वौ च अद० चुरा० उभ० सक० सेट् । पल्यूलयति
ते अपपल्यूलत् त । [ते अपपल्यूलत् त ।
पल्यूल छेदने पवित्रताकरणे च अ०पु०उभ०सक० सेट् । पल्यूलयति
पल्ल गतौ भ्वा० चर० सक० सेट् । पल्लति अपल्लीत् ।
पल्ल पु० पल्ल–अच् । स्थूलकुल्माले दृष्टति धान्यादिस्थापनस्थाने
(पालुई) (मराइ) ।
पल्लव पु० पल्यते सम्भ० क्विप् पल्, लूयते लू–अप् कर्म० । अभिनवे
पत्रविस्तारे, "लवोऽपि पल्लवे" इति नैषधम् तद्भङ्गशाखायां वि-
स्तारे, बले, अलङ्कारभागे, बलये, वादने च ।
पल्लवद्रु पु० पल्लवप्रधानः द्रुः । अशोकवृक्षे ।
पल्लवित त्रि० पल्लवं नूतनपत्रं विस्तारो वा जातः अस्य तारक० इतच् ।
पल्लवयुक्ते, विस्तारयुक्ते च "स्निग्धपल्लवितं पल्लवितञ्च विस्तृत"मिति
नैषधम् ।
पल्लि(ल्ली) स्त्री० पल्ल–इन् वा ङीप् । क्षुद्रग्रामे, कुग्रामे, गेहे च ।
पल्लं गृहमाश्रयत्वेनास्त्यस्याः अच् । गृहगोधिकायाम् स्त्री०ङीप् ।
पल्लिका स्त्री० पल्लां गृहे कायति कै–क । गृहगोधिकायाम् ।
पल्वल पु० न० पल–वल । क्षुद्रे सरसि (डोबा) "स पल्वलजलेऽधु-
नेति भामिनीविलासः । [अच् । वायौ ।
पव पु० पू–अप् । धान्यादेः शोधने, वस्तुशोधनीकरणे च व्यापारे । कर्त्तरि
पवन पु० पू–युच् । धान्यादेः शोधने, वस्तुशोधनीकरणे च व्यापारे, क-
र्त्तरि ल्यु । वाते । भावे ल्युट् । शोधने न० । करणे ल्युट् ।
जले न० । आधारे ल्युट् । आमघटादिपाकस्थाने । (पोवान) ।
"पवनोर्ध्वरिपङ्क्लेप" इत्युक्तेः ।
पवनव्याधि पु० पवनजनितो व्याधिर्यस्य बहु० । उन्मादे, संज्ञाभ्रं
पवनव्याधे"रिति माधवः । कर्म० । वातरोगे पु० ।
पवनात्मज पु० ईत० । हनुमति, भीमे, वस्त्रौ च "वायोरग्निरि"ति
श्रुतेश्च वायुजातत्वात्तनूजत्वम् । पवनसुताद्योऽप्यत्र ।

पवनाग्र पु० पवनमग्रमति अग्र-अच्। सर्पे, वायुभक्षके त्रि०। युच्। पवनाशनोऽप्यत्र।

पवमान पु० पूज्-शानच्। वायौ।

पवि पु० पू-इनि। वज्रे।

पवित्र त्रि० पू-क्त्र। पवित्रे, क्षते च मरिचे न०।

पवित्र क्ली० न० पू-इत्र। यज्ञाद्यर्थे, कुशे "पवित्रादि वैष्णवी"ति यजुर्मन्त्रः। ताम्रे, जले, वर्षणे, घर्षणे, अधोमकरणे, यज्ञोपवीते, मधुनि, घृते, "अनन्तगर्भितं साम्यं कौशं हिन्दलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं सर्व कर्म"स्वित्युक्ते कुशहये च न०। व्रतादिना शुद्धे त्रि०। तिलवृक्षे, पुत्रजीववृक्षे च पु०। तुलस्यां, हरिद्रायां, नदीभेदे च स्त्री०।

पवित्रक पु० पवित्र-स्वार्थे कन्। अश्वत्थे, उदुम्बरे, कुशे, दमनकवृक्षे च।

पवित्रारोपण न० पवित्रस्य यज्ञोपवीतस्य विष्णवे आरोपणं दानं यत्र। "श्रावणशुक्लद्वादश्यां केशवोद्देशेन यज्ञोपवीतदानरूपे उत्सवे। पवित्रारोहणमप्यत्र।

पश(ष) बाधे भ्वा० उभ० आ सक० सेट्। पशा(ष)ति ते अपशी(षी)त् अपाशी(षी)त् अपशि(षि)ष्ट।

पश(ष) स्पर्शे, गतौ, अनुपसर्गात् बन्धे, बाधे च अद० चु० उभ० सक० सेट्। पश(ष)यति ते अपपश(ष)त् त।

पश(ष) बन्धे चुरा० उभ० सक० सेट्। पाश(ष)यति ते अपीपश(ष)त् त।

पशु पु० सर्वमविशेषेण पश्यति हन्य-कु पशादेशः। छागादौ लोमवल्लाङ्गूलवति जन्तुभेदे, देवे च। दर्शनार्थेऽव्ययम्।

पशुपति पु० पशूनां सर्वत्र समदर्शिनां देवानां पतिः। महादेवे।

पशुराज पु० पशूनां राजा टच् समा०। सिंहे।

पशुहरितकी स्त्री० पशूनां हरीतकीव हितकारित्वात्। आम्रातकफले

पश्चात् अव्य० अपर+प्रथमापञ्चमीसप्तम्यर्थे आति पश्चादेशः। प्रथमार्थेऽस्य परशब्दस्यार्थे, चरमे, अधिकारे च। [अनुशोचने।

पश्चात्ताप पु० पश्चात् चरमस्तापः। अनुशये कृतस्य कर्मणोऽनुचितत्वधिया

पश्चार्द्ध पु० अपरमर्द्ध पश्चादेशः । शेषार्द्धे अपरभागे, "पश्चार्द्धेन प्रविष्टः शरपतनभया"दिति शकुन्तला ।

पश्चिम त्रि० पश्चात् भवः डिमच् । शेषभवे । प्रतीच्यामस्ताचलसन्निकृष्टायां दिशि स्त्री० । [चौरभेदे ।

पश्यतोहर पु० पश्यन्तमनादृत्य हरति हृ-अच् अलुक् ६त० ।

पश्यन्ती स्त्री० दृश-शतृ-ङीप् । परादिशब्दचतुष्टयमध्ये शब्दभेदे विस्तरो वाचस्पत्ये ।

पशुाचार पु० पशुरिव समटशी तस्येवाचारः । तन्त्रोक्ते वैदिकमार्गानुसारिणि आचारे । [अपसिद्ध ।

पस बाधे, अन्ये च भ्वा०उभ०सक०सेट् । पसति ते अपसीत्-अपासीत्

पस नाशने चु० उभ० सक० सेट् दृदित् । पंसयति ते अपपंसत्-त ।

पह्लव पु० म्लेच्छधारिस्त्रेच्छजातिभेदे, "शका यवनकाम्बोजाः पारदाः पह्लवास्तथे"ति मनुः ।

पा पाने भ्वा०पर०सक०अनिट् । पिबति अपात् । णिच् पाययति ।

पा रक्षणे अदा०पर०सक०सेट् । पाति अपासीत् । णिच्-पालयति ।

पांशव पु० पांशोर्विकारः अण् । (पाङ्गा) लवणभेदे, पांशुजादयोऽप्यत्र

पांशु(सु) पु० पस-पसि-वा कु० पृ० । धूलौ, शस्यार्थं चिरसञ्चिते शुष्कगोमये, कर्पूरभेदे च ।

पांशुपत्र न० पांशुभिः सञ्चितगोमयं पत्रमस्य । वास्तूकशाके ।

पांशुर पु० पांशु राति-रा क । खञ्जे, दंशके च (डांश) ।

पांशुल पांशुः पांशु तुल्यं पापमस्यास्ति । पापवति, पुंश्चले च । कुलटायां स्त्री० । "अपांशुलानां धुरि कीर्त्तनीये"ति रघुः । विभूतियुक्ते शिवे पु० । धूलियुक्ते त्रि० । "त्वेषा निदधे पदं समूढमस्य पांशुले" इति श्रुतिः ।

पांसन त्रि० पसि-ल्यु पृ० । दूषके ।

पाक पु० पच भावे घञ् । पचने, क्लेदने, क्लेदनेन निष्पादने निष्पत्तौ, परिणामे च आधारे घञ् । स्थाल्यादौ, मेचके, राङ्गादिभङ्गे,

भवे च। पिबति स्तनं पा–क। शिशौ त्रि० स्त्रियां पाका।

पाकक्षण पु० फलपाके क्षणः। (पानीआमला) वृक्षभेदे।

पाकक्षणफल पु० पाके परिणामे क्षणं फलं यस्य। (पानीआमला) वृक्षभेदे।

पाकज न० पाकाज्जायते जन–ड। काचलवणे। पाकजातमात्रे त्रि०।

पाकयज्ञ पु० पाकसाध्यो यज्ञः। चरुपाकसाध्ये इष्टोत्तर्गादौ कर्मणि।

पाकरञ्जन न० पाकं पच्यमानं रञ्जयति रन्ज–णिच्–ल्यु ट्। तेजपत्रे। [पु०। कर्कोट्यां स्त्री० गौ० ङीष्।

पाकल न० पाकं लाति ला–क। कुष्ठौषधौ (कुड)। वह्नौ, वायौ च

पाकशाला स्त्री० ङीन०। पाकस्थाने। पाकमट्टपाकस्थानादयोऽत्र।

पाकशासन पु० पाकं तन्नामासुरं शास्ति शास–ल्यु। इन्द्रे।

पाकिम त्रि० पाकेन निर्वृत्तम् इमन्। पाकनिष्पन्ने।

पाक्य न० पच ण्यत् कुत्वम्। विड्लवणे पांशुलवणे च। यवक्षारे पु०

पाक्षिक त्रि० पक्षतः प्राप्तः ठक्। पक्षतः प्राप्ते, प्राप्यप्राप्तिसम्भावनाविषये एकतरपक्षे दृष्टहेतौ नियमे, "नियमः पाक्षिके सतीति मीमांसा।

पाचक पु० पचति पच–एवुल्। वह्नौ। पाककर्त्तरि सूदादौ भुक्तान्नजारकौषधौ च त्रि०। पित्ताख्ये धातुभेदे न०।

पाचन न० पच–णिच्–ल्युट्। पित्तादिदोषनाशके वैद्यकोक्ते क्वाथभेदे, प्रायश्चित्ते च। पच–णिच्–कर्त्तरि ल्यु। वह्नौ, अम्लरसे, रक्तैरण्डे च पु०। हरितक्यां स्त्री० ङीप्।

पाञ्चजन्य पु० पञ्चजने दैत्यभेदे भवः यञ्। विष्णुशङ्खे "पाञ्चजन्यं हृषीकेशः" इति गीता। [पाञ्चाली।

पाञ्चाल त्रि० पञ्चालदेशे भवः अण्। पञ्चालदेशभवे। स्त्रियां ङीप्

पाटचर पु० पटचर एव स्वार्थे प्रज्ञादित्वादण्। चौरे।

पाटल पु० पाटयति पट–णिच्–कलच्। श्वेतरक्तवर्णे। तद्वति त्रि० (पाकल) ख्याते वृक्षे स्त्री०। तत्पुष्पे, आशुधान्ये च न०।

पाटलि स्त्री० पट–णिच् अलि वा ङीप् (पाकल) ख्याते वृक्षे "पा-

टलिसंसर्गेहुरभिवनवाता" इति शकुन्तला । घण्टापाटलौ च ।

पाटलिपुत्र न० (पाटना) इति ख्याते नगरभेदे ।

पाटव न० पटोर्भावः अण् । पटुतायाम् क्रियायोग्यतायाम् आरोग्ये च "अपाटवाद्यशोवाद्यै" रिति स्मृतिः ।

पाटी स्त्री० पट–णिच् इन् ङीप् । धारायां, व्यक्तगणनायां लीलावत्यादौ (वाला) इति ख्याते ग्रन्थे च । [च ।

पाठ पु० पठ–घञ् । अक्षराणामुच्चारणे गुरुमुखश्रवणपूर्वकोच्चारणे

पाठक पु० पठति पाठयति वा ण्वुल् अध्येतरि, अध्यापके च ।

पाठशाला स्त्री० ६त० । पाठमन्दिरे ।

पाठा स्त्री० पठ–कर्मणि घञ् पाप् । विडङ्गवृक्षे (आकनादि ।

पाठिन् पु० पठ–णिनि । चित्रवृक्षे । पाठके त्रि० ।

पाठीन पु० पाठिं पृष्ठं नमयति नम–ड दीर्घः । गुडगुलुब्धे मत्स्यभेदे च (पोयाल) "पाठीन रोहितावाद्यावि" ति मनुः पठ–इनण् । पाठिनि त्रि० । पठ्यशीलायां, वृद्धे च स्त्री० ।

पाणि पु० पण–इण् आयाभावः । करे, कुलिके वृक्षे च (कलेखाड़ ।

पाणिगृहीती स्त्री० पाणिर्गृहीतो यस्याः ङीप् । भार्य्यायाम् ।

पाणिग्रहण न० पाणिर्गृह्यतेऽत्र अच्–आधारे ल्युट् । विवाहे । "पाणिग्रहणसंस्कारः सवर्णास्वुपदिश्यते" इति मनुः । पाणिपीडनाद्योऽप्यत्र ।

पाणिघ पु० पाणिं हन्ति, पाणिना वा हन्ति वादयति हन–टक् कुत्वम् । पाणिताड़के, पाणिना मृदङ्गादिवादके च ।

पाणिनि पु० पणनं पणः ततः अस्त्यर्थे इनि तदपत्यम् अण् तस्य छात्रः वृञ् । अष्टाध्यायीव्याकरणादिकारके दाक्षीपुत्रे शालातुरीयग्रामभवे मुनिभेदे । "सिंहोव्याकरणस्य कर्त्तुरहरत् प्राणान् प्रियान् पाणिने" रिति पञ्चतन्त्रम् ।

पाणिनीय त्रि० पाणिनिना प्रोक्तम्, तस्येदम् वा छ । पाणिनिना कृते अष्टाध्यायीरूपादौ व्याकरणादौ ।

पाणिभुज् पु० पाणिरिव भुज्यते भोज्यते भुज–भोजने क्विप् । उदु-

स्वरवृक्षे । पाणिना भुङ्क्ते भुज क्विप् । हस्तेन भक्षके त्रि० ।

पाणिवाद पु० पाणिं, पाणिना वा मृदङ्गादिकं वादयति वद-णिच्-अच् वा । हस्ततालके, हस्तेन मृदङ्गादिवादके च । ण्वुल् । पाणिवादकोऽप्यत्र ।

पाणिसूत्र्या स्त्री० पाणिना सूत्र्यतेऽसौ सूत्र-ण्यत् । रज्जौ ।

पाण्डर पु० पण्ड-अर दीर्घश्च । मरुवकवृक्षे, श्वेतवर्णे च । तद्वति त्रि० । कुन्दपुष्पे, गैरिके च न० । [युधिष्ठिरादौ ।

पाण्डव पु० पाण्डोरपत्यम् अण् । चन्द्रवंश्यस्य नृपभेदस्य क्षेत्रजे पुत्रे

पाण्डु पु० पण्ड-कु नि० दीर्घः । चन्द्रवंश्ये, नृपभेदे, श्वेतवर्णे, केतकी धूलिसन्निभे पीतवर्णाङ्गे वर्णभेदे च । तद्वति त्रि० नागनेदे, श्वेतहस्तिनि, रोगभेदे, पटोलवृक्षे च पु० । मापपर्ण्यां स्त्री० ।

पाण्डुकण्टक पु० पाण्डुवर्णानि कण्टकानि यस्य । अपामार्गे ।

पाण्डुकम्बल पु० कर्म० । श्वेतवर्णप्रावारे । कम्बल इव । पाण्डुः राज० । प्रस्तरभेदे । [वर्णकम्बलप्रावृते रथे ।

पाण्डुकम्बलिन् पु० पाण्डुकम्बल+अस्त्यर्थे इनि । पाण्डु-

पाण्डुतरु पु० कर्म० । धववृक्षे । [हस्तिनि, श्वेतवर्णे च ।

पाण्डुनाग पु० नाग इव पाण्डुः राज० । पुन्नागवृक्षे, श्वेत

पाण्डुफल पु० पाण्डूनि फलान्यस्य । पटोले । चिर्भट्यां स्त्री० ।

पाण्डुर पु० पाण्डुवर्णोऽस्यास्ति र । श्वेतपीतमिश्रिते वर्णे । पण्ड-उर पृ० दृद्धिः । श्वेतवर्णे च । तद्वति त्रि० कामलाख्ये रोगे, श्वित्ररोगे च न० । मापपर्ण्यां स्त्री० टाप् ।

पाण्डुरङ्ग पु० पाण्डुरमङ्गमस्य अक० । (पाटराङ्गा) शाके ।

पाण्डुरद्रुम पु० कर्म० । कुटजवृक्षे (कुड़ची) ।

पाण्डुराग पु० पाण्डुः रागो वर्णो यस्य । टमनकवृक्षे ।

पाण्डुलोमशा स्त्री० पाण्डूनि लोमानीवाङ्गानि सन्ति यस्याः श । मापपर्ण्याम् । श्वेतलोमवति त्रि० ।

पात पु० पत-घञ् पतने । पा-क्त । रचिते त्रि० । पत-ण । ज्योति-ष्के क्रान्तिसाम्यसम्पादके राहुरूपे ग्रहभेदे ।

पातक न० पातयति अधो गमयति पत–णिच्–एवुल् । पातित्य सम्पादके पापे, पापजनके प्राणिवधादौ च ।

पातञ्जल न० पतञ्जलिना प्रोक्तम् अण् । पाणिनिसूत्रवार्त्तिकव्याख्यानरूपे "अथ शब्दानुशासन"मित्यादिके महाभाष्ये, "अथ योगानुशासन"मित्यादिके–योगशास्त्रे च ।

पाताल न० पत–आलच् । धरायास्तलस्थे भुवने, ज्योतिषोक्ते लग्नाच्चतुर्थे स्थाने च ।

पातालनिलय पु० नि+वस–आधारे घञ् पातालं निवासो यस्य । दैत्ये पातालनिलयादयोऽप्यत्र ।

पतुक त्रि० पत–उकञ् पतनशीले । प्रपाते, जलहस्तिनि च पु० ।

पात्र न० स्त्री० पाति रक्षत्याधेय, पिबत्यनेन वा पा-ष्ट्रन् स्त्रियां ङीप् । जलाद्याधारे भोजनयोग्ये अमत्रे, विद्यादियुक्ते दानयोग्ये ब्राह्मणे "ब्राह्मणं पात्रमाहुः" इतिस्मृतिः, यज्ञिये स्रुवादौ, तीरहृयमध्यवर्त्तिनि जलाधारस्थाने, नाटके अभिनेये नायकादौ च न० ।

पात्रीय त्रि० पात्रे यज्ञपात्रे योग्यः छ । यज्ञद्रव्ये । स्वार्थे छ । योग्ये, "विप्रः पात्रीयतामियादि"ति स्मृतिः ।

पात्रसमित त्रि० पात्रे भोजनपात्रासादनकाले एव समितः सङ्गतः । भोजनादन्यत्र अनुपस्थिते कार्य्यादौ ।

पाय न० पीयतेऽद्यः । जले । पाति रक्षति य । अग्नौ, सूर्य्ये च ।

पायस न० पाति रक्षति, पीयते वा पा–पाने, रक्षणे वा असुन् धुक् च । जले, अन्ने च अन्नभोजने हि देहरक्षा ।

पायेय त्रि० पथि हितं ढञ् । पथि भोजनोचिते द्रव्ये ।

पाद पु० पद–णिच् क्विप् । चरणे पादे । [देर्मूले च ।

पद पु० पद्यते गम्यतेऽनेन करणे घञ् । चरणे, चतुर्थांशे, इदा-

पादकटक पु० पादस्य कटक इव । नूपुरे ।

पादकृच्छ्र पु० पादमितश्चतुर्थांशमितः कृच्छ्रः शाक० । "उपवासेन चैकेन पादकृच्छ्र उदाहृत" इत्युक्ते व्रतभेदे ।

पादग्रहण न० पादयोः ग्रहणं यत्र । पादग्रहणपूर्व्वके प्रणामभेदे अमुष्य पादग्रहणं प्रत्यहञ्चाभिवादन"मिति मनुः ।

पादचारिन् पु० पादेन चरति चर–णिनि ह्रस्व० । पदातौ । पद्भ्यां गन्तरि त्रि० ।

पादत्राण न० पादौ त्रायेते येन त्रै–करणे ल्युट् । पादुकायाम् ।

पादप पु० पादेन मूलेन पिबति सिक्तं जलम् पा–क । वृक्षे । पादं पाति रक्षति पा–क । पादपीठे ।

पादपद्धति स्त्री० पादपं रोहति रुह–क । वल्लायाम् (परगाछा) ।

पादपीठ न० ६त० । पादस्थापनासने । सिंहासनं तस्य सपादपीठमिति भट्टिः । पादुकायां स्त्री० टाप् ।

पादमूल न० ६त० । चरणस्याधोभागे ।

पादरोह पु० पादेन मूलेन रोहति रुह–अच् । वटवृक्षे ।

पादवल्मीक न० पादस्य वल्मीकमिव । स्त्रीपदरोगे (गोद) ।

पादविक त्रि० पदवीं धावति ठक् । पथिके पथिधावके ।

पादविरजस् स्त्री० पादौ विरजसौ धूलिशून्यौ यस्याः । ब्रु० । पादुकायाम् । [टानाटौ ।

पादशस् अव्य० पादं पादं ददाति करोति वा शस् । (पोयापोया)

पादशैल पु० पादाकारः शैलः । प्रत्यन्तपर्व्वते ।

पादस्फोट पु० । पादौ स्फोटयति अण् । रोगभेदे ।

पादाग्र न० ६त० । चरणाग्रभागे प्र५दे ।

पादाङ्गद न० पादस्य अङ्गदमिव । नूपुरे ।

पादात न० पदातीनां समूहः अण् । सैन्यसमुदाये पादाभ्यामतति गच्छति अच् । पदातौ सैन्ये । पादातिपादातिकोऽप्यत्र ।

पादुका स्त्री० पद–णिच्–उक तत: स्वार्थे कन् ह्रस्वः । चर्म्ममये पादाच्छादने पदार्थे (जुता) । कनभावे पादूरप्यत्र ।

पादुकाकार पु० पादुकां करोति कृ–अण् उप० । चर्म्मकारे पादूकृत्यादुकाकृदादयोऽप्यत्र ।

पाद्य न० पादाय पादप्रक्षालनाय साधु यत् । पादप्रक्षालनार्थे जले

अपां स्त्रीत्वेन स्त्रीत्वमपि । पाद्याः पाद्याः इत्यादि पाद्यस्थानमन्त्रः ।

पान न० पा–ल्युट् । द्रवद्रव्यस्य गलाधःसंयोजने, रत्नादौ च आधारे ल्युट् । पानभाजने ।

पानगोष्ठी स्त्री० पानार्थं गोष्ठीसभा । (चक्र) पानार्थं सभायाम् ।

पानभाजन न० पीयतेऽस्मिन् पा–ल्युट् कर्म० । पानपात्रे पान-पात्रादयोऽप्यत्र ।

पानीय न० पीयते यत् पा–अनीयर् । जले । पातव्ये रक्षितव्ये च त्रि० । [कुम्भ्राम् ।

पानीयपृष्ठज पु० पानीयपृष्ठे जलोपरि जायते जन–ड । (पाना)

पानीयफल न० ६त० । (भाखना) जलकन्दफलभेदे ।

पानीयमूलक न० पानीये मूलं यस्य कप् । सोमराज्याम् ।

पानीयशालिका स्त्री० पीयतेऽस्याम् आधारे अनीयर् तादृशी पा-नीयपितरणार्थं या या शाला स्वार्थे कन् । प्रपायाम् (जलछत्रगृहे) ।

पानीयामलक न० कर्म० । (पानिआमला) वृक्षभेदे ।

पान्थ पु० पन्थानं गच्छति पथिन्+अण् पन्थादेशः । पथिके ।

पाप न० पाति रक्षति आत्मानमस्मात् पा–अपादाने प । नरकहेतौ दुरदृष्टे, तत्साधने हिंसादौ, ज्योतिषोक्तेषु अर्द्धोनचन्द्ररविप्रभृतिषु ग्रहेषु । [पापनाशके त्रि० ।

पापघ्न पु० पापं हन्ति टक् । तिले तस्य हि दानेन पापनाशकत्वम् ।

पापचेली स्त्री० पुनः पुनः पचति पा–यङ्–अच् पापचोवायुस्तमीर-मति ईर–अण् रस्य लः । (आकनादि) पाठालतायाम् ।

पापपुरुष पु० पापात्मकः पुरुषः पुरुषाकारः । तन्त्रोक्ते वाम कुक्षिस्थे पापात्मके ध्येये नराकारे पदार्थे ।

पापप्रशमनी स्त्री० पापं शम्यतेऽनया शम–णिच्–करणे ल्युट् । ङीप् । शमीवृक्षे ।

पापात्मन् पु० पापयुक्त आत्मा अन्तः करणं यस्य । पापान्विते जीवे "पापात्मा पापसम्भव" इति पुराणम् ।

पाप्मन् पु० आप्नोति व्याप्नोति आप–मनिन् नि० । पापे ।

पामन् न० पा–मनिन् । विचर्चिकायां (खोस पाचड़ा) स्त्रीत्वमपि मनन्नात् ङीप् । पामाप्यत्र ।

पामघ्न पु० पाम हन्ति हन–टक् । गन्धके । कटुक्यां स्त्री० ङीप् ।

पामन त्रि० पामाऽस्यस्य अस्त्यर्थे न । पामरोगवति ।

पामर त्रि० पाति क्विप् पाः त्रयीधर्म्मः स म्रियतेऽनेन मृ–घ । मूर्खे, नीचे, खले च । [गुडूच्याम् ।

पामरोद्धारा स्त्री० पामरमुद्धरति उद्–हृ अण् अजादित्वात् टाप् ।

पामारि पु० ६त० । गन्धके तत्प्रयोगेण हि पामरोगनाशः ।

पायस पु० पयसि दुग्धे संस्कृतः अण् । परमान्ने । पयः सम्बन्धिनि त्रि० "पायसं दधिसक्तव" इति स्मृतिः । चन्द्रे च ।

पायु पु० पा–उण् । अपानवायुस्थाने ।

पाय्य न० पीयतेऽनेन पा–ण्यत् नि० पादेर्नः । परिमाणे । पानीये न० । निन्द्यनीये त्रि० । [अपपारत् त ।

पार कर्म्मसमाप्तौ अदा० पु० उभ० सक० सेट् । पारयति ते

पार न० परमेव अण् पारं परं तीरं पृ–घञ् वा । नदीलङ्घनेन प्राप्ये परे तीरे । पार–अच्–घञ् । प्रान्तभागे ।

पारक्य त्रि० परलोकाय हितं ष्यञ् । कुक् च । परलोकहितसाधने कर्म्मणि । [श्रेयोगामिनि च ।

पारग त्रि० पारं गच्छति गम–ड । कर्म्मसमाप्तिकर्त्तरि, परपारंगतारि

पारण न० पार–ल्युट् । व्रतान्तभोजने । युच् । तत्रैव स्त्री० । "तव पारणा स्या" दिति रघुः । पृ–णिच्–ल्युट् । मेघे पु० ।

पारतन्त्र्य न० परतन्त्रस्य भावः ष्यञ् । पराधीनत्वे "पारतन्त्र्यं विधेः कृत" इति मीमांसा । [कर्म्मणि परलोकभये च ।

पारत्रिक त्रि० परत्र भवं, हितं वा ठक् । परलोकहितकारके

पारद(त) पु० पृ–णिच्–तन्, पृ० तस्य दः वा । धातुभेदे (पारा) पारं ददाति दा–क । पारदायिनि त्रि० ।

पारदारिक पु० परस्य दारान् गच्छति ठक् । यथेष्टं परस्त्रीगामिनि ।

पारदार्य्य पु० परस्य दारा एव दारा यस्य तस्य भावः ष्यञ् । पर-

दारगमने "पारदार्य्यं पारिवित्त्य" मत्र्युपपातकगणने स्मृतिः ।

पारमार्थिक त्रि० परमार्थाय पारलौकिकधर्माय हितं ठक् । परमार्थोपायभूते श्रेयःसाधने कर्मणि ।

पारम्पर्य्य न० परम्परैव स्वार्थे ष्यञ् । कुलादिपरम्परायाम् "पारम्पर्य्यक्रमागत" इति स्मृतिः ।

पारम्पर्य्योपदेश पु० पारम्पर्य्येण पित्रादिपरम्परया उपदेशः न तु साक्षात्कारादिज्ञानम् । ऐतिह्ये "यथा इक्ष वटे यक्ष" इत्यादिरुपदिश्यते एव सर्व्वैः, न तु तत्र यक्षः केनचित् दृश्यते ।

पारलौकिक त्रि० परलोकाय हितं ठक् द्विपदवृद्धिः । परलोके, जन्मान्तरादौ, हिते कर्मणि ।

पारशव पु० "निषादः शूद्रकन्यायां यः पारशव उच्यते । स पारयत्येव शवस्तस्मात् पारशवः स्मृत" इति मनुक्ते ऊढायां शूद्रायां ब्राह्मणेनोत्पादिते निषादरूपे सङ्कीर्णवर्णे, परस्त्रीतनये, लौकिके च । परशु+इदमर्थेऽण् । परशुसम्बन्धिनि त्रि० ।

पारश्वध पु० परश्वधः प्रहरणमस्य अण् । परशुना युद्धकर्त्तरि । ठक् । पारश्वधिकोऽप्यत्र ।

पारसीक पु० देशभेदे तद्देशस्थे जने ब० व० । "पारसीकांस्तथोजेतु" मिति रघुः । तद्देशस्थे घोटके पु० (आरबिघोड़ा) ।

पारस्त्रैणेय त्रि० परस्त्रिया अपत्यं ढञ् ढनञादेशः । जारजे परस्त्रियाः सुते । [(पायरा) ।

पारापत पु० पारादप्यापतति प्रेम्णा आ+पत–अच् । पारावते

पारापा(वा)र न० पारमपारञ्चास्यस्य अर्श आद्यच् । समुद्रे द्व० । तटद्वये । पारावारशब्दोऽप्युभयतोर्थे ।

पारायण न० पारं समाप्तिमयतेऽनेन अय–ल्युट् । साकल्ये, अध्यादीनामाद्यने, तत्पाठे च । [रादौत्तमपाठके ।

पारायणिक त्रि० पारायणमाद्यन्तमावर्त्तयति ठक् । पुराणादे-

पारावत पु० परं जीवमवति ज्ञानोपदेशेन अव–अत परावन् दत्तात्वेयः तस्येदमित्यण् । कपोते (पायरा) ।

पारावतपदी स्त्री० पारावतस्येव पादौ यस्याः ङीप् पदादेशः। काकजङ्घायाम्।

पारावताङ्घि पु० पारावतस्याङ्घ्रिरिव मूलमस्य। ज्योतिष्मतीलतायाम्।

पारावारीण त्रि० पारमवारञ्च गच्छति खञ्। तटद्वयगामिनि, समुद्रपारगे च। पारापारीणोऽप्यत्र।

पाराशर पु० पराशरस्यापत्यम् शिवादित्वात् अण्। वेदव्यासे। तेन प्रोक्तमित्यण्। पराशरोक्ते भिक्षुसूत्रे। तत्सूत्रौ स्त्री० ङीप्। "कलौ पाराशरो स्मृति"रिति स्मृतिः।

पाराशरिन् पु० पराशरेण प्रोक्तं भिक्षुसूत्रमध्येतव्यतयाऽस्यास्ति इनि। भिक्षुके सर्वकर्मत्यागिनि संन्यासिनि।

पाराशर्य्य पु० पराशरस्यापत्यं गर्गादित्वात् यञ्। वेदव्यासे। अत इञ् पाराशरिरप्यत्र।

पारिकाङ्क्षिन् पु० पारमस्यास्ति इनि पारि ब्रह्मज्ञानं तत्काङ्क्षतीति णिनि। मौनव्रतधारिणि वाचं यमे मुनिभेदे।

पारिजात पु० पारमस्यास्ति पारी समुद्रस्तत्र जातः जन—क। देवतरुभेदे। स्वार्थे कन्। अत्रैव।

पारिणाय्य त्रि० परिणयकाले लब्धम् यञ्। विवाहकाले लब्धे धने। "मातुः पारिणाय्यं स्त्रियो विभजेरन्नि"ति स्मृतिः।

पारि(री)न्द्र पु० पृणाति छिनत्ति णिनि पारी इन्द्रइव शक्तस्त्वा० वा। सिंहे, अजगरसर्पे च।

पारिपन्थिक पु० परिपन्थं गच्छति ठक्। पन्थादेशस्थे। चौरे।

पारिपा(या)त्र पु० विन्ध्यपर्वतपश्चिमदेशे मालवदेशस्य सीमापर्वते। स्वार्थे कन्। तत्रैव।

पारिपार्श्विक पु० परिपार्श्वं गच्छति तत्र चरति वा ठक्। सूत्रधारस्य पार्श्वचरे नटे, "नटो विदूषको वापि पारिपार्श्विक एव वे"ति सा० द० प०।

पारिप्लव न० परि+प्लु—अच् स्वार्थेऽण्। चञ्चले, आकुले च।

पारिभद्र(क) पु० परितो भद्रमस्यस्य प्रज्ञादि० अण् (पालेभान्दार) वृक्षे

परिभद्राय कायति कै—क । देवदारुवृक्षे, निम्बवृक्षे च पु० । कुष्ठौषधौ न० ।

पारिभाव्य न० परिभवाय रोगप्रशमनाय हितः यञ् । कुष्ठौषधौ ।

प्रतिभुवः प्रतिभुवो भावः ष्यञ् । प्रतिभूभवने "साक्षित्वं प्रातिभाव्यञ्चे"ति स्मृतिः ।

पारिमाण्डल्य न० परितो मण्डलं यस्य, सर्वत्र विद्यमानत्वात् परिमण्डलः परमाणुरस्य भावः ष्यञ् । न्यायोक्ते कारणतानुत्वे परमाणुपरिमाणे । [ख्याते वृक्षे ।

पारिश पु० पिपूर्त्ति पॄ णिनि पारो तं श्यति शो—क । (पलाश पिपुल)

पारिषद त्रि० परिषदि भवः तिष्ठति वा अण् । सभास्थे सभ्ये । यञ् । पारिषद्योऽप्यत्र । [बलये, कटके ।

पारिहार्य्य पु० परिहियतेऽसौ परि+हृ—कर्मणि घञ् स्वार्थे ष्यञ् ।

पारीण त्रि० पारं गच्छति पार—खञ् । पारगे, कर्मसमाप्तिकारके ।

पार्थ पु० पृथाया अपत्यम् अण् । पृथापुत्रे, युधिष्ठिरादौ, अर्জ্জুने वृक्षे, पृथिवीपतौ च ।

पार्थिव पु० पृथिव्या ईश्वरः अण् । राजनि । पृथिव्या विकारः इदं वा अण् । भूमिभवे त्रि० । सीतायां स्त्री० । तगरपुष्पे न० ।

पार्वण त्रि० पर्वणि पूर्णिमादौ भवः अण् । पूर्णिमादिभवे "न शारदः पार्वणशर्वरीशुर" इति नैषधम् पर्वणि अमावस्यादौ विहितम् अण् । स्मृत्युक्ते श्राद्धभेदे न० । पू-वनिप् प्रज्ञाद्यण् । मृगभेदे पु० ।

पार्वत पु० पर्वते भवः अण् । (घोड़ानिम) निम्बभेदे, पर्वतजातमात्रे त्रि० । शल्लक्यां, गोपालपूतिकायां, जीवन्त्यां, सौराष्ट्रमृत्तिकायाम्, क्षुद्रपाषाणभेदायां, धातक्यां, दुर्गायाञ्च स्त्री० ङीप् ।

पार्वतीनन्दन पु० कृत० । कार्त्तिकेये, पार्वतीसुतादयोऽप्यत्र ।

पार्वतेय न० पर्वते भवं ढक् । सौवीराञ्जने । सूर्य्यावर्त्तवृक्षे पु० ।

पार्श्व पु० न० स्पृश-क्वन् धातोः पृ च । कक्षाधोभागे, समीपे, चक्रे, पार्श्वे च । पर्शूनां पार्श्वास्थां समूहः पर्शु+यत् । पर्शुसमूहे न० ।

पार्श्वपरिवर्त्तन न० पार्श्वेन परिवर्त्तनम् । यत्पार्श्वमधःस्थापयित्वा

श्रयितं तत्पार्श्वस्थोर्द्वयने (पाशमोड़ा) पार्श्वस्य परावृत्तौ ।
हरेः भाद्रशुक्लद्वादश्यां कर्त्तव्ये पार्श्वपरिवर्त्तनाख्ये उत्सवभेदे च।
पार्श्वास्थास्थि न० कर्म० । (पाजर) शरीरपार्श्वस्थिते अस्थि ।
पार्षद पु० पर्षदि भवस्तत्र स्थितो वा अण् सभास्थे । ष्यञ् पार्षद्योऽप्यत्र
पार्ष्णि पु० स्त्री० पृष-नि नि० दीर्घः । पादपश्चे गुल्फस्याधोभागे ।
(गोड़ारि) पृष्ठे, सैन्यपृष्ठे, जिगीषायाञ्च पु० ।
पार्ष्णिग्राह पु० पार्ष्णिं पृष्ठपदं गृह्णाति अण् । विजयार्थं जिगमिषोः
पश्चात्पदव्याहिणि पृष्ठस्थे शत्रौ ।
पाल रक्षणे चु० उ० स० सेट् । पालयति ते अपीपलत् त ।
पाल त्रि० पालयति पाल-अच् । रक्षके "पालदोषविनाशे च पाले
दण्डोविधीयते" इति स्मृतिः ।
पालक पु० पालयति पाल-ण्वुल् । अश्वरक्षके, चित्रकवृक्षे च ।
पालघ्न पु० पालं क्षतं हन्ति हन-टक् । क्षताख्ये जलजव्रणरोगे ।
पालङ्क पु० पाल-सम्प० क्विप् पाला अङ्क्ते अङ्क-घञ् । (पालङ)
शाकभेदे स्त्रीत्वमपि ङीप् । अतएव । कुन्दुरुवृक्षे स्त्री० गौ०ङीप् ।
कर्मणि यत् पालङ्क्याप्यत्र ।
पालाश न० पलाशं पर्णमस्यस्य प्रज्ञाद्यण् । तेजपत्रे । तद्वर्णोऽस्यस्य ।
हरिद्वर्णे पु० तद्वति, पलाशस्येदम् अण् । पलाशसम्बन्धिनि च
त्रि० । "ब्राह्मणस्य पालाशोदण्ड" इति स्मृतिः ।
पालि(ली) पाल-इन् वा ङीप् । कोणे, पङ्क्तौ, यूकायाम्, सेतौ,
प्रान्तभागे, प्रशंसायां, क्रोड़े, च । स्वार्थे कन् । कोणे, कर्णपत्रे च ।
पालिन्द पु० पालिं ददाति दा-क पृ० सुम् । कुन्दुरुवृक्षे । श्यामा-
लतायां स्त्री० गौरा० ङीष् ।
पावक पु० पुनाति पू-ण्वुल् । वह्नौ, वैद्युताग्नौ च ।
पावकि पु० पावक+अपत्यार्थे इञ् । कार्त्तिकेये स हि शिवर्यौर्यात्
वह्नौ निक्षिताज्जात इति पुराणम् ।
पावन पु० पावयति पू-णिच्-ल्यु । अग्नौ, व्यासे, सिक्थके, पीतभृ-
राजे च । गोमये, प्रायश्चित्ते, क्षच्छ्राख्ये कर्मणि, च न० ।

पाद्यतेऽनया क्युट् ङीप् । गङ्गायां, हरीतक्यां, तुलस्यां च स्त्री० । पवित्रतासाधके त्रि० ।

पाश पु० पश्यते बध्यतेऽनेन पश-घञ् । मृगविहगादिबन्धने रज्जुभेदे (फांद) रज्जुमात्रे च । केशादुत्तरं पाशः सङ्ख्यार्थः । यथा केश-पाशः । कर्णात् परः शोभार्थः । यथा कर्णपाशः शोभनकर्ण इत्यर्थः । ज्ञात्रादिभ्यः पाशप् । अपक्षपाशाद्यात इत्यादौ ।

पाशक पु० पश-ण्वुल् । द्यूतक्रीड़ासाधने गुटिकादौ (पाशा) ।

पाशपाणि पु० पाशः पाणौ यस्य । वरुणे पाशहस्तादयोऽध्यत्र पाश+इनि । पाशीत्यप्यत्र ।

पाशुपत पु० पशुपतेरिदं, सोऽस्य देवता वा अण् । वकवृक्षे । व्रत-भेदे, अस्त्रभेदे च न० । तद्भक्ते त्रि० । [वैश्यधर्मे ।

पाशुपाल्य न० पशून् पालयति अण् तस्य भावः ततः ष्यञ् ।

पाश्चात्य त्रि० पश्चाद् भवः त्यक् । पश्चिमदेशभवे ।

पाश्या स्त्री० पाशानां समूहः यत् । पाशसमूहे ।

पाष(ख)ण्ड पु० पाति रक्षति दुरितेभ्यः पा-क्विप् पाः वेदधर्मस्तं षण्डयति निष्फलं करोति, खण्डयति वा । "पालनात्त्रयीधर्मः पाशब्देन निगद्यते (ष)खण्डयन्ति तु तं यस्मात् पा(ष)खण्डस्तेन कीर्त्तिता" इत्युक्ते वेदाचारत्यागिनि ।

पाषण्डिन् पु० यां वेदधर्मं षण्डयति षण्ड+णिच् इनि । पाषण्डे

पाषाण पु० पिनष्टि पिष-संचूर्णने आनच् पृ० । प्रस्तरे अल्पार्थे ङीप् । (वाटखारा) तुलामानपाषाणे ।

पाषाणदारक पु० पाषाणं दारयति ड-ण्वुल् । टङ्कास्त्रे (पाथरकाटालेनी) । युच् । पाषाणदारणोऽप्यत्र ।

पाषाणभेदन पु० पाषाणं भिनत्ति ल्यु । (हाड़जोड़ा) वृक्षभेदे ।

पाषाणभेदिन् पु० पाषाणं भिनत्ति भिद-णिनि (पाथुरचुर) । वृक्षभेदे ।

पि गतौ तु० उभ० पर० अनिट् । पियति । अपैषीत् ।

पिक पु० अपि-कायति कै-क अपेरतोलोपः । कोकिले ।

पिकप्रिया स्त्री० ६त० । महाजम्बूराम् ।

पिकबन्धु पु० ६त० । आम्रवृक्षे ।

पिङ्ग पु० पिजि-वर्णे-अच् नङ्का० कुत्वम् । मूषके दीपशिखायां पिङ्गलवर्णे च । तद्वति त्रि० । हरितालें न० । गोरोचनायां, नास्तिकायां दुर्गायाम् हरिद्रायां, हिङ्गुनि, वंशरोचनायाञ्च स्त्री० टाप् । शमीवृक्षे स्त्री० ङीप् ।

पिङ्गल पु० पिङ्गं लाति-ला-क, पिजि-कलच् वा कुत्वम् । नागभेदे, कवे, सूर्य्यपारिपार्श्विके, वानरे, निधिभेदे, मुनिभेदे, मङ्गले ग्रहे, स्थावरविषभेदे, जम्बूद्वीपस्थे ६०वर्षमध्ये "पिङ्गले चारुपद्माक्षि ! दुर्भिक्षं नर्म्मदातटे" इत्युक्तलक्षणे वत्सरभेदे, प्राकृतलक्षन्दोव्यन्यकारके, नागरूपे मुनिभेदे, दीपशिखातुल्ये वर्णे च तद्वति त्रि० । "कुमुदद्विग्गजस्य योषिति" नाड़ीभेदे, राजनीतौ, शिंशपावृक्षे वामनाख्यदिग्गजस्य योषिति, वेश्याभेदे च स्त्री० टाप् । "यथा संक्षिप्य कान्तायां सुखं सुष्वाप पिङ्गले"ति पुराणम् ।

पिङ्गललोह न० लौहं धातुः कर्म्म० । पित्तले ।

पिङ्गाक्ष पु० पिङ्गे अक्षिणी यस्य बच् समा० । शिवे तस्य तृतीयेक्षणस्याग्निरूपत्वात्तथात्वम् । पिङ्गेक्षणोऽप्यत्र ।

पिचण्ड पु० अपि+चम-ड तस्य नेत्त्वम् अपेरक्षोपः । उदरे, प्रशोरवयवे च । पृ० इत्त्वम् । पिचिण्डोऽप्यत्र ।

पिच(चि)पिण्डिल त्रि० पिच्च(चि)ण्ड+अस्त्यर्थे इलच् । तुन्दिले, वृहत्कुक्षौ ।

पिचव्य पु० पिचवे तूलाय साधु यत् । कार्पासवृक्षे ।

पिचु पु० पच-उ पृ० । कार्पासतूले, (तुला) कुष्ठभेदे, कर्षे, असुरभेदे, शस्यभेदे, च ।

पिचुक पु० पिचुरिव कायति कै-क । मदनवृक्षे (मयना) ।

पिचुतूल न० ६त० । तूले, (तुला) । [वृक्षे ।

पिचुमन्द(ह) पु० पिचुं कुष्ठं मन्दयति, मद्नाति वा अच् । निम्ब-

पिचुल पु० पिचुं लाति ला–क । भावुकवृक्षे (भाउ) वृक्षले, तृणे, जलशायसे च ।

पिच्च क्षेपे चु० उभ० सक० सेट् । पिच्चयति ते अपिपिच्चत् त ।

पिच्चट न० पिच्च–अटन् । सीसके, रङ्गे, नेत्ररोगभेदे च ।

पिच्छ बाधे तु० प० सक० सेट् । पिच्छति अपिच्छीत् ।

पिच्छ न० पिच्छ–अच् । मयूरपुच्छे, चूड़ायाञ्च । लाङ्गूले पु० । शाल्मलिवृक्षे, पूगे, परम्परायाम्, कोषे, मोचायां, भक्तसंभृत मण्डे, पङ्क्तौ, शिंशपावृक्षे, कोलिकायाम्, अश्वस्य चरणरोगभेदे च स्त्री० टाप् ।

पिच्छल त्रि० पिच्छ+कलच् । (पिचल) स्निग्धे मसृणे ।

पिच्छलदला स्त्री० पिच्छलं दलं यस्याः । वदरीवृक्षे, पिच्छिलपक्षादयोऽस्यत्र । [शिंशपायाम् ।

पिच्छितिका स्त्री० पिच्छ–क्तिच् पृ० इट् ततः स्वार्थे कन ।

पिच्छिल त्रि० पिच्छा+अस्त्यर्थे इलच् । (पिचल) मसृणे स्निग्धे पिच्छलानि च दधीनी"ति काव्यप्र० । भक्तमण्डे, सरसव्यञ्जनरूपादौ, मण्डयुक्तभक्ते च । श्लेष्मातकवृक्षे पु० ।

पिच्छिलत्वच् पु० पिच्छिला श्लक्ष्णा त्वक् यस्य । नागरङ्गवृक्षे ।

पिच्छिलसार पु० पिच्छिलः सारोऽस्य । मोचरसे ।

पिञ्ज दीप्तौ वासे, बले च अक० हिंसायां दाने च सक० चु० उभ० सेट् इदित् । पिञ्जयति ते अपिपिञ्जत् त ।

पिञ्ज न० पिञ्ज–अच् । बले । कर्पूरभेदे पु० । व्याकुले त्रि० । तृणे, हरिद्रायां, अहिंसायां च स्त्री० । भावेऽच् । बधे पु० ।

पिञ्जट पु० पिञ्ज–अटन् । नेत्रमले (पिचुटि) ।

पिञ्जर न० पिञ्ज–अरच् । हरितालें, स्वर्णे, नागकेशरे, विहगादिबन्धनस्थाने, देहास्थिवृन्दे च । अश्वभेदे पु० । पीतरक्तवर्णे, च पु० । तद्वति त्रि० ।

पिञ्जल न० पिञ्ज–कलच् । हरितालें, कुशपत्रे च अत्यन्ताकुलसैन्यादौ पु० कुशान्तरवेष्टिते सायकुशपत्रद्वये स्त्री ङीष् ।

पिच्छिका स्त्री० पिच्छिरेव स्वार्थे कन् इत्वम्। तूलनालिकायां। (पांइज)

पिट संहतौ ध्वनौ च भ्वा० पर० अक० सेट्। पेटति अपेटीत्।

पिट(क) पु० पिट–क, । वंशपत्रादिनिर्मिते पात्रभेदे (पेटरा) विस्फोटे त्रि०। स्वार्थे कन् अतएव।

पिठ क्लेशे, अक० वधे सक० भ्वा० पर० सेट्। पेठति अपेठीत्।

पिठर पु० पिठ–करन्। मटहभेदे। सुस्तायां, मन्थानदण्डे च न०। स्त्रियां पु० स्त्री० स्त्रीत्वे ङीष्।

पिड राशीकरणे भ्वा० आत्म० सक० सेट् इदित्। पिण्डते अपिण्डिष्ट। अयं चुरादिरपि उभ०। पिण्डयति ते अपिपिण्डत्–त।

पिण्ड त्रि० पिड–घञ् अच् वा। संहते घने च। देहे, देहैकदेशे, मटहैकदेशे, शास्त्रगानां पिलभ्यो देये गोलाकारे अन्ने, गोले, शिल्लके, ओड्रे, वृन्दे कवले गजकुम्भे, मदनवृक्षे च पु०। आज्यधने, लौहे, यजुर्वेदिभिः पिलभ्यो देये आज्ये पिण्डाकारेऽन्ने च न०।

पिण्डक पु० पिण्ड इव कायति कै–क। पिण्डालौ, स्वार्थे कन्। सिल्हकगन्धद्रव्ये।

पिण्डकन्द पु० पिण्डाकारः कन्दः। पिण्डालौ।

पिण्डखर्জ্জুर पु० स्त्री० पिण्डाख्यः खर्জ্জूरः। स्वनामख्याते वृक्षे।

पिण्डपुष्प न० पिण्डं संहतं पुष्पम्। अशोकपुष्पे, जवापुष्पे, पद्मपुष्पे, तगरपुष्पे च।

पिण्डपुष्पक पु० पिण्डं पुष्पमिव कायति कै–क। वास्तूकशाके।

पिण्डफला स्त्री० पिण्डमिव फलं यस्याः। कटुतुम्ब्याम्।

पिण्डमुस्ता स्त्री० पिण्डा संहता मुस्ता। नागरमुस्तायाम्।

पिण्डमूल न० पिण्डिमिव मूलमस्य। गर्জरे (गाजर)।

पिण्डबीजक पु० पिण्डाकारं बीजं यस्य कप्। कर्षिकारवृक्षे।

पिण्डाभ्र पु० पिण्डः संघात इवाभाति अच्। सिल्हके।

पिण्डाभ्र न० अभ्रस्येदं अण् आभ्रं पिण्डमिवाभ्रम्। मेघजातकरकायाम्।

पिण्डायस न० पिण्डं संहतमयः अच् समा० । तीक्ष्णायसे ।

पिण्डार पु० पिण्डं संघातमच्छति क—अण् । विकङ्कतरुक्षे, व्याघ्रभेदे गोमे च । [ज्याङ्क । स्वार्थे कन् अत्रैव ।

पिण्डालु पु० पिण्डाकार आलुः । (गोलआलु) कन्दभेदे, कन्दगुडू-

पिण्डि(ण्डी)(ण्डिका) स्त्री० पिण्डि—इन् वा ङीप् स्वार्थे कन् वा । सर्वकाष्ठासञ्जनाधारे रथचक्रमध्ये स्थाने रथनाभौ, पीठे, जानुनोऽधःस्थे मांसलप्रदेशे च ।

पिण्डित त्रि० पिण्ड-क्त । संहते, घनीभूते, गुणिते च । तुरङ्के पु० ।

पिण्डिला स्त्री० पिण्ड पिण्डाकारं फलमस्त्यस्याः इलच् । गोलु-स्वायां (गोलुक) ।

पिण्डीतक पु० पिण्डीं खल्वपिण्डं फलपुष्पद्वारा तनति अनुकरोति तक—क्वसे अच् । मदनवृक्षे, तगरे च ।

पिण्डीतगर पु० पिण्डीव खल्वपिण्डेनोपलक्षितस्तगरः । तगरवृक्षे

पिण्डीपुष्प पु० पिण्डीव उपलक्षितं पुष्पमस्य । अशोकवृक्षे ।

पिण्डीर पु० पिण्डं पिण्डाकारं फलमीरयति ईर—अण् । दाडिम-वृक्षे । नीरसे त्रि० ।

पिण्डीशूर पु० पिण्डीं भोजने एव नान्यत्र शूरः । गेहेनर्द्दिनि, युद्धादावसमर्थे । [ज्योतिष्मतीलतायाम् ।

पिण्या स्त्री० पण्यते स्तूयते रोगहन्तृत्वेन यत् पृ० इत्वम् ।

पिण्याक पु० न० पण—व्यवहारे आकन् नि० । तिलकल्के (खल) हिङ्गुनि, वार्ताके च । सिक्थके पु०स्त्री० स्त्रीत्वे ङीप् ।

पितामह पु० पितुः पिता पितृ+डामह । पितुः पितरि, पितृपित्रा-दयोऽप्यत्र । तत्पत्न्यां स्त्री० ङीप् ।

पितृ पु० माति रचति पा—तृच् नि० । जनके । मातरि सङ्कोचौ पितृ-शेषः । मातापित्रोः द्विव० ।

पितृकानन न० ई० । श्मशाने । पितृवनपितृगृहादयोऽप्यत्र ।

पितृतीर्थ न० ई० । गयायाम् तर्ज्जन्यङ्गुष्ठयोर्मध्यभागे च ।

पितृपति पु० ई० । यमे । पितृराजादयोऽप्यत्र ।

पितृप्रसू स्त्री० पितृणां प्रसूरिवात्रदानयोग्यकालत्वात् । अपरपक्षाकाले, पितृमातरि च ।

पितृप्रिय पु० ६त० । भल्लातके ।

पितृभोजन पु० पितृभिर्भुज्यते कर्मणि ल्युट् । श्राद्धे, श्राद्धे तद्दानस्य प्रशस्तत्वात् । भावे घञ् ६त० । पितृभक्षणे ।

पितृयज्ञ पु० ६त० पितृद्देशेन यज्ञः । पितृतर्पणे । "पितृयज्ञस्तु तर्पण"मिति मनुः ।

पितृयाण पु० पितृभिर्यायतेऽनेन करणे ल्युट् पूर्व्व० णत्वम् । धूम-रात्रिदिचिह्निते मृतैः कर्म्मभिर्गन्तव्ये पथिभेदे । [वाचस्पत्ये ।

पितृलोक पु० ६त० । चन्द्रलोकस्योपरिस्थे लोकभेदे विस्तरस्तु

पितृबन्धु पु०६त० । "पितुः पितुःस्वसुःपुत्राः पितुर्मातुःस्वसुःसुताः पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबन्धव" इत्युक्तेषु पितुः पितृष्वसृपुत्रादिषु ।

पितृव्य पु० पितुर्भ्राता पितृ+व्यत् । ज्येष्ठे कनिष्ठे वा पितुर्भ्रातरि ।

पितृष्व(स्व)सृ स्त्री० ६त० वा षत्वम् । पितुर्भगिन्याम् ।

पितृष्वस्रीय पु० स्त्री० पितुः स्वसुरपत्यम् छ । पितृष्वसुःपुत्रे ।

पितृसन्निभ पु० पिता सन्निभा तुल्यता यस्य । पितृतुल्ये ।

पित्त न० अपि दो–क्त तादेशः अक्षोपः न दीर्घः । देहस्थे धातुभेदे ।

पित्तघ्नी स्त्री० पित्तं हन्ति हन–टक् ङीप् । गुडूच्याम् ।

पित्तद्रावित् पु० पित्तं द्रावयति द्रु+णिच्–णिनि । मधुरजम्बीरे ।

पित्तल न० पित्तं लाति ला–क । ताम्रादिजाते धातुभेदे तोयपिप्पल्यां स्त्री० ।

पित्तारि पु० ६त० । पर्पटे (क्षेतपापड़ा) खाद्यायां, वर्व्वरे च ।

पित्र्य त्रि० पितुः, इदं, प्रियं वा पितृत आगतं वा यत् । पितृसम्बन्धिनि । पितृतीर्थे तर्ज्जन्यङ्गुष्ठयोर्मध्यस्थाने, मधुनि, मघानक्षत्रे च । पितृप्रिये भाद्रे पु० । अमावस्यायां तिथौ स्त्री० ।

पित्सन् पु० पत–सन् । पक्षिणि । पतनेच्छावति त्रि० ।

पिधान न० अपि+धा–ल्युट् अक्षोपः । छादने, उद्घने च ।

पिनद्ध त्रि० अपि+नह-क्त अल्लोपः परिहिते वस्त्रादौ ।
पिनाक पु० न० पाति पा-आकन् नि० । शिवधनुषि, तच्छूलास्त्रे, पांशुवर्षणे च
पिनाकिन् पु० पिनाक+अस्त्यर्थे इनि । महादेवे ।
पिपासा स्त्री० पातुमिच्छा पा+सन्-अ । पानेच्छायाम् ।
पिपासु त्रि० पातुमिच्छुः पा-सन् उ । पानेच्छावति तृषिते ।
पिपीतकी स्त्री० वैशाखशुक्लद्वादश्याम् । विप्रभेदे पु० ।
पिपीलक पु० अपि-पील-ण्वुल् । अल्लोपः । (डोंकोपिपड़ा) ख्याते कीटे (लुदेपिपड़ा) ख्याते कीटे स्त्री० टाप् ।
पिप्पल न० पा-अलच् पुट् । जले, वस्त्रखण्डभेदे च । अन्नत्यक्ते बन्धनशून्ये पक्षिणि च पु० । कणायां (पिपुल) स्त्री० ङीप् का ह्रस्वः पिप्पलिः पिप्पली चात्र ।
पिप्पलीमूल न० पिप्पल्या इव मूलमस्य । (पिपुलमूल) ख्याते वृक्षे ।
पिप्लु पु० अपि-प्लुष-डु अपेरल्लोपः । जटुले ।
पियाल पु० पी-पाने कालन् । प्रियाले (पेयासाल) (सुरगो) वृक्षभेदे ।
पिल प्रेरणे चु० उभ० सक० सेट् । पेलयति ते अपीपिलत्-त ।
पिलुक पु० पिल-कु ततः कन् । पीलुवृक्षे ।
पिलुपर्णी स्त्री० पिलु पर्णमस्याः ङीप् । मोरटालतायाम् ।
पिल्ल न० क्लिद-ल पिलादेशः । क्लिन्नचक्षुषि । तद्युक्ते त्रि० ।
पिव सेचने भ्वा० पर० सक० सेट् इदित् । पिन्वति अपिन्वीत् ।
पिश अवयवे तु० सु० पर० सक० सेट् । पिंशति अपेशीत् ।
पिशङ्ग पु० पिश-अङ्गच् किच्च । पद्मधूलितुल्ये पिङ्गलवर्णे तद्वति त्रि० ।
पिशाच पु० पिशितमश्नाति अश-अण् पुट् । देवयोनिभेदे, प्रेते च ।
पिशाचद्रु पु० ईत० । द्राक्षोटवृक्षे । पिशाचद्रुवादयोऽप्यत्र ।
पिशित न० पिश-क्त । मांसे । जटामांस्यां स्त्री० वा ङीप् ।
पिशुन न० पिश-उनन् किच्च । कुङ्कुमे । नारदे, काके च पु० । खलके, क्रूरे च त्रि० । (पिड़िङा) शाकभेदे स्त्री० टाप् ।
पिष चूर्णने रु० पर० सक० अनिट् । पिनष्टि अपिषत् ।

पिष्ट न० पिष—क्त । सीसके, पिष्टके च । चूर्णिते त्रि० ।

पिष्टक पु० न० पिष्टानां, तण्डूलचूर्णानां विकारः कन् । (पिठे) खाद्यभेदे ।

पिष्टपचन न० पिष्टं पच्यतेऽनेन पच—करणे ल्युट् । पिष्टकपाकपात्रे कटाहादौ ।

पिष्टप पु० न० । पिष्यते, पिष्टते वात्र पिष—पिष—वा प नि० । भुवने

पिष्टात पु० पिष्टमत्ति अत—अण् । पटवासनार्थे चूर्णगन्धद्रव्ये ।

पिष्टिक न० पिष्टे भवः ट । (पिटालि) तण्डुलचूर्णजाते दुग्धाकारे द्रवे पदार्थे । द्विदलपिष्टजाते स्त्री० टाप् ।

पिस गतौ भ्वा० पर० स० सेट् । पेसति अपेसीत् चङि न ह्रस्वः ।

पिस दीप्तौ वा चु० उभ० पक्षे भ्वा० पर० अक० सेट् इदित् । पिंसयति ते अपिपिंसत् त । पक्षे पिंसति अपिंसीत्

पिस वासे बले च अक० बधे दाने गतौ च सक० चु० उभ० सेट् । पेसयति-ते अपीपिसत् त ।

पिहित त्रि० अपि धा—क्त अकारोपः । तिरोहिते आच्छादिते च ।

पी पाने दि० आत्म० अनिट् । पीयते अपैट । ल्यप् निपीय ।

पीठ पु० न० पीयते पिबते वा अत्र पा—ठक् पिठ—क वा पृ० दीर्घः । (पीढ़े) आसनभेदे क्षतिनामासने च ।

पीठसर्पि त्रि० पीठेन सर्पति रूप—णिनि । खञ्जे ।

पीड बधे विलोड़ने च चु० उभ० सक० सेट् । पीड़यति-ते अपि-पीड़त्-त अपीपिड़त्-त ।

पीडन न० पीड—ल्युट् । परराष्ट्रस्यन्दपादिनाऽभिभवे, शत्रुस्यन्दपादिना आक्रमणे, दुःखोत्पादने च ।

पीडा स्त्री० पीड—अ । व्यथायां, दुःखे च ।

पीडित त्रि० पीड़—क्त । मर्दिते, वन्दिते, दुःखिते च ।

पीत न० पा—क्त पाने, हरितालें च । हरिद्रावर्णे पु० । कर्मणि क्त । पानकर्मणि, पीतवर्णवति च त्रि० ।

पीतक न० पीत+स्वार्थे कन् । कुङ्कुमे, हरितालें च । अमुकणि-पत्र-

काशे, पित्तले, माक्षिके, श्योनाकभेदे, किरातदण्डे, नान्दीवृक्षे, पीतशाले च पु० । अव्यक्तलालार्थे संज्ञाभेदे न० ।

पीतकदली स्त्री० कर्म० । स्वर्णकदल्याम् (चांपाकला) ।

पीतकन्द न० पीतः कन्दो यस्य (गर्जरे) (गाजर) ।

पीतकावेर न० कुत्सितं वेरं कावेरं पीतं कावेरं यस्मात् ५ब० । कुत्सिताङ्गं पीतं कुर्वति कुङ्कुमे, पित्तले च ।

पीतकाष्ठ न० कर्म० । पीतचन्दने पीतागुरुणि ।

पीतघोषा स्त्री० कर्म० पीतपुष्पवत्यां घोषातक्याम् । [स्त्री० टाप् ।

पीततण्डुल पु०पीततण्डुलो यस्य । (काङ्गनी) धान्यभेदे । क्षीरिकावृक्षे

पीततैला स्त्री० पीतं तैलं यस्याः । ज्योतिष्मतीलतायाम् ।

पीतदारु न० कर्म० । सरलवृक्षे, देवदारुणि, हरिद्रुवृक्षे च ।

पीतद्रु पु० कर्म० । सरलवृक्षे, दारुहरिद्रायाञ्च ।

पीतन न० पीतं करोति पीत+णिच्—ल्यु । कुङ्कुमे, हरितालें, पीतदारुणि च । प्लक्षे, अम्लातके च पु० । स्वार्थे कन् । आम्लातके (आमड़ा) पु० ।

पीतपर्णी स्त्री० पीतं पर्णं यस्याः । (विछिटी) लतायाम् ।

पीतपुष्प पु० पीतं पुष्पं यस्य । कर्णिकारवृक्षे । आदृक्याम्, इन्द्रवारुण्याञ्च स्त्री० टाप् । शङ्खपुष्प्यां, सहदेव्यां, महाकोषातक्यां, अपुष्पां, (यशा) च स्त्री० ङीष् ना टाप् ।

पीतफल(क) पु० पीतं फलं यस्य वा कप् । श्याखोटवृक्षे, कर्मारवृक्षे च

पीतवालुका स्त्री० पीता वालुकेव चूर्णनात् । हरिद्रायाम् ।

पीतमुद्ग पु० कर्म० । (सोनामुग) मुद्गभेदे ।

पीतयूथी स्त्री० कर्म० स्वर्णयूथ्याम् ।

पीतराग न० पीतो रागो वर्णो यस्य । किञ्जल्के, सिक्थे च । कर्म० पीतवर्णे पु० ६क० । तद्वति त्रि० ।

पीतवासस् पु० पीतं वासो यस्य । श्रीकृष्णे, पीतवस्त्रपीताम्बरादयोऽप्यत्र

पीतवीजा स्त्री० पीतं वीजं यस्याः । मेथिकायाम् । पीतवर्णवीजयुक्ते त्रि० ।

पीतशाल पु० पीतं शलति याति अण्। असनवृक्षे। (पियासाल)

पीतसार न० पीतं सारं यस्य। पीतवर्णे चन्दनकाष्ठे, हरिचन्दने च। मलयजे, गोमेदमणौ, अक्षोटवृक्षे, तरक्षौ, वीजके च पु०। ततः कन्। निम्बे अक्षोटवृक्षे च पु०।

पीतसालक पु० कर्म० स्वार्थे कन्। (पेयासाल) प्रियालवृक्षे।

पीताङ्ग पु० पीतमङ्गमस्य। श्योनाकभेदे।

पीवी(वी)ति पु० पा-क्तिच् अज-क्तिच् व्यादेशः वा। घोटके। पा-भावे क्तिन्। पाने, गतौ, शुण्ठ्यायाञ्च।

पीतिका स्त्री० पीतयति पीत+णिच्-ण्वुल्। हरिद्रायाम्, दारु हरिद्रायाम्, स्वर्णयूथ्याञ्च।

पीतिन् स्त्री० पीतमनेन इष्टादित्वादिनि। घोटके।

पीन त्रि० प्याय-क्त सम्प्रसारणम्। स्थूले, दृढे, सम्पन्ने च।

पीनस पु० पीनं पीनतां स्यति सो-क। नासिकारोगभेदे कर्कश्यां स्त्री० ङीप्। [गवि।

पीनोधी स्त्री० पीनमूधोऽस्याः ङीप् अनङ्नादेशः। पीवरो धस्कायां

पीय प्रीणने सौ० पर० सक० सेट्। पीयति अपीयीत्।

पीयूष न० पीय-ऊषन्। देवानां पेयभेदे अमृते। दुग्धे च। नव-प्रसूतायाः गोः आसन्नप्रसवभवे दुग्धे तत्र पेयूषमपि।

पील रोधे भ्वा० पर० सक० सेट्। पीलति अपीलीत्।

पीलु पु० पील-उ। परमाणौ, पीलुपाकः पिठरपाकः इति वैद्यकोक्त-भेदः। गजे, अस्थिखण्डे, तालकाष्ठे, वासे, क्रमौ, कोङ्कणदेश-ख्याते गुडफले वृक्षे, कसुमे च।

पीलुनी स्त्री० पील-उन गौ० ङीष्। मूर्व्वायाम्।

पीलुपत्र पु० पीलुयुक्तं क्रमिकलितं पत्रं यस्य। मोरटालतायाम्।

पीलुपर्णी स्त्री० पीलुकलितानि पर्णान्यस्याः ङीप्। मूर्व्वायाम्, बिम्बिकायाञ्च।

पीव स्थौल्ये भ्वा० पर० अक० सेट्। पीवति अपीवीत्।

पीवन् त्रि० प्यै-क्वनिप्। स्थूले, बलवति च। वायौ पु०।

पौवर त्रि० पृ-वरच् । स्थूले । स्त्रियां ङीष् । अश्वगन्धायां, शता-वर्य्यांञ्च स्त्री० टाप् । तरुण्यां गवि, शतमूल्यां, शालपर्ण्यांञ्च स्त्री० ङीष् । [व्याकरणोक्ते संस्कारविशेषयुक्ते शब्दविशेषे पु०।

पुंलिङ्ग न० ६त० । पुंसश्चिह्ने अङ्गभेदे । पुंसश्चिह्न लिङ्गमस्य ब० ।

पुंश्चली स्त्री० पुंसो भर्त्तुः सकाशात् चलति पुरुषान्तरं गच्छति अच् गौरा० ङीष् । असत्यां स्त्रियाम् ।

पुंस मर्दे चु० उभ० सक० सेट् । पुंसयति ते अपुपुंसत् त ।

पुंसवन न० पुमान् स्रूयतेऽनेन स्रू-ल्युट् । गर्भसंस्कारभेदे, दुग्धे च ।

पुंस्त्व पु० पुंसोभावश्चिह्नं वा । पुंसश्चिह्ने अङ्गभेदे, तत्कार्य्ये शुक्रे, पुरुषत्वे व्याकरणोक्ते शब्दवृत्तौ संस्कारविशेषार्हत्वे च ।

पुक्कस(श) पु० पुक् कुत्सितं कसति कस-गतौ अच् पृ० वा शः । चण्डाले । अधमे त्रि० ।

पुङ्ख पु० पुमांसं खनति खन-ड । बाणमूले, पुङ्खाले च ।

पुङ्गव पु० पुमान् गौः कर्म० यच् समा० । वृषे, श्रेष्ठौषधौ च । उत्तरपदस्थः श्रेष्ठवाचकः । यथा । नरपुङ्गवः नरः पुङ्गवइव इति उपमितसमासवाक्यम् नरश्रेष्ठार्थे ।

पुच्छ प्रमाणे भ्वा० प० अक० सेट् । पुच्छति अपुच्छीत् । रायमुकुटादयः

पुच्छ न० पुच्छ-अच् । पश्चाद्भागे लाङ्गूले च ।

पुच्छटि(टी) स्त्री० पुच्छ-अटि वा ङीष् । अङ्गुलिमोटने (आङ्गुलमटकान)

पुच्छिन् पु० पुच्छ-णिनि । कुक्कुटे, अर्कवृक्षे च । पुच्छ+अस्त्यर्थे इनि । लाङ्गूलयुक्ते त्रि० ।

पुञ्ज पु० उच्चत्वा पुमांसं जयति जि-ड । राशौ चये ।

पुट दीप्तौ अक० चूर्णने सक० चुरा० उभ० सेट् । पोटयति-ते अपूपुटत् त ।

पुट श्लेषे तु० कु० पर० सक० सेट् । पुटति अपुटीत् पुपोट ।

पुट संसर्गे अद० चु० उ० सक० सेट् । पुटयति ते अपुपुटत् त ।

पुट न० पुट-क । जातीफले, उपर्य्यधोभावापन्नेन मृदादि कपालद्व-येन निर्मिते" । औषधपाकपात्रभेदे च । अश्वत्थरे पु० न० ।

मिश्रसम्बन्धे, आच्छादने च पु०। पत्रादिरचिते द्रुग्धादिधारणपात्रे त्रि० (दोना) स्त्रियां ङीप्।

पुटपाक पु० पुटेन पाकः। पुटपात्रेण औषधपाकभेदे।

पुटभेद पु० पुटं संश्लेषं भिनत्ति अण्। नद्यादेशकाकारे जलावर्त्ते, पत्तने नगरे, आतोद्ये च।

पुटभेदन न० पुटानि पात्राणि भिद्यन्तेऽत्र भिद-आधारे ल्युट्। नगरे

पुटालु पु० पुटः संश्लिष्ट आलुः। कोलकन्दे।

पुटिका स्त्री० पुट-क स्वार्थे कन्। एलायाम्।

पुटित त्रि० पुट-क्त। ग्रथिते, पाटिते, तन्त्रोक्ते, आद्यन्तयोः अकारादिवर्णाभ्यां, मन्त्रान्तराभ्यां च पुटयत् आवृते च।

पुटोदक पु० पुटं संश्लिष्टमुदकं यस्य, पुटे कपालाकारपात्रद्वयमध्ये उदकं वा यस्य। नारिकेले।

पुट्ट अनादरे चु० उ० सक० सेट्। पुट्टयति-ते अपुपुट्टत्-त।

पुड भर्त्सने भ्वा० पर० सक० सेट् इदित्। पुण्डति अपुण्डीत्।

पुड उत्सर्गे तु० पर० सक० सेट्। पुडति अपोडीत्।

पुण धर्म्मकृत्यकरणे तु० पर० सक०सेट्। पुणति अपोणीत्।

पुण्डरीक पु० पुण्डि-ईक नि०। अग्निकोणस्थे, दिग्गजे, व्याघ्रे च। सितपद्मे, श्वेतपत्रे, भेषजे च न०। आखे, राजिलसर्पे, हस्तिज्वरे, दमनकवृक्षे, कमण्डलौ, श्वेतवर्णे, कुष्ठभेदे च पु०। श्वेतवर्णवति त्रि०।

पुण्डरीकाक्ष पु० पुण्डरीकमिव अक्षिणी यस्य षच् समा०। विष्णौ, बालपर्णीतुल्यपर्णके नेत्रहितकारके क्षुपभेदे च न०।

पुण्ड्र पु० पुण्ड्-रक्। (पुड़िया) इक्षुभेदे, माधवीलतायां, तिलके, तिलकवृक्षे, क्षुद्रमुस्ते, दैत्यभेदे च।

पुण्ड्रक पु० पुण्ड्र+कन्। माधवीलतायाम्, तिलकवृक्षे, इक्षुभेदे च।

पुण्य न० पुनाति पू-कुण्यत्। शुभादृष्टे धर्म्मे। तद्वति त्रि०।

पुण्यकव्रत न० पुण्य+स्वार्थे कन् कर्म्म०। पुराणप्रसिद्धे व्रतभेदे, भास्कबोधिते धर्म्मप्रदे उपवासादिव्रतभेदे च।

पुण्यगन्ध पु० पुण्यो गन्धो यस्य । चम्पके ।

पुण्यजन पु० पुण्यः विरुद्धलक्षणया पापी जनः कर्म० । राक्षसे ।

पुण्यजनेश्वर पु० ६त० । कुबेरे ।

पुण्यतृण न० कर्म० । श्वेतकुशे ।

पुण्यभूमि स्त्री० पुण्यस्य पुण्योत्पादनार्था भूमिः । आर्य्यावर्त्तदेशे "आ समुद्रात्तु वै पूर्व्वादासमुद्रात्तु पश्चिमात् । तयोरेवान्तरं गिर्य्योरार्य्यावर्त्तं" मिति मनुः तयोर्विन्ध्यहिमाचलयोः ।

पुण्यवत् त्रि० पुण्य+भूमार्थे मतुप् मस्य वः । बहुपुण्ययुक्ते ।

पुण्यश्लोक त्रि० पुण्यः पुण्यदायकः श्लोको यशश्चरित्रं वा यस्य । "पुण्यश्लोको नलोराजा पुण्यश्लोको युधिष्ठिरः । पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्द्दनः" इत्युक्तेषु नलादिषु । पुण्यचरितयुक्तमात्रे च ।

पुण्याह न० पुण्यमहः टच् समा० । पुण्यजनके दिने ।

पुण्याहवाचन न० पुण्याहस्य पुण्यजनकदिनस्य वाचनं ब्राह्मणद्वारा वादनम् वच-णिच्-ल्युट् । वैदिकसंस्कारे तद्दिनस्य पुण्यतया ब्राह्मणद्वारा वादने ।

पुत्तिका स्त्री० पुत् इति शब्दं तनोति तन-ड स्वार्थे कप् ह्रस्वः अत इत्वम् । क्षुद्रमक्षिकायाम् ।

पुत्त्र) पु० पुतस्त्रायते पुत्+त्रै-क "पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः । तस्मात् पुत्र इति ख्यात" इत्युक्ते तनये । पू-क्त्रन्च । औरसादिद्वादशविधे तनये । कन्यायां ङीप् पुत्री ज्योतिषोक्ते लग्नात् पञ्चमे स्थाने पु० । पुत्रपुत्रीशब्दयोरेकशेषे पुत्र एव शिष्यते तयोरर्थयोः द्विव० ।

पुत्रक पु० पुत्र+स्वार्थेकन्प्रत्ययादौ कन् । पुत्रे, धूर्त्ते, अर्भके, वृक्षभेदे, अनुकम्पान्विते च । कन्यायां टाप्, पुत्रिका ।

पुत्रजीव पु० पुत्रं जीवयति जीव-अण् । (जियापुता) वृक्षभेदे एवुल् । स्वार्थे / पृ० क्तम् । पुत्रजीवकोऽप्यत्र ।

पुत्रदा स्त्री० पुत्रं ददाति सेवनात् गर्भं ददाति दा–क। बन्ध्याकर्कट्यां, लक्ष्मणाकन्दे च। गर्भप्रदे पुत्रप्रदे च त्रि०।

पुत्रभद्रा स्त्री० पुत्रस्य भद्रं यस्याः ५ब०। दृष्टज्जीवत्यां स्त्रियाम्।

पुत्रिका स्त्री० "अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम्। अस्यां यो जायते पुत्रः स मे पुत्रो भवे"दिति समयेन प्रदत्तायां कन्यायां, "पुत्रिकाधर्मशङ्कये"ति स्मृतिः।

पुत्रिकापुत्र पु० पुत्रिकैव पुत्रः पुत्रिकायाः पुत्रः वा। पुत्रिकाकरणेन पुत्रत्वेनाभ्युपगतायां कन्यायां, तत्पुत्रे च।

पुत्रेष्टि स्त्री० पुत्रस्य पुत्रार्था इष्टिः यज–क्तिन्। पुत्रनिमित्तके यागभेदे "गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमं चरेदि"ति।

पुथ हिंसे दि०पर०सक० सेट्। पुथ्यति अपोथीत्।

पुथ बधे सक० क्लेशे अक० भ्वा० पर० सेट् इदित्। अपुन्थति अपुन्थीत्।

पुथ दीप्तौ चु० उभ० सक० सेट्। पोथयति–ते अपूपुथत्–त।

पुद्गल पु० गलतीति गल–अच् पुत् कुत्सितं गलो यस्मात् ५ब०। परमाणुरूपादिविशिष्टे द्रव्ये, द्व्यणुकादिस्कन्धरूपे बौद्धादुक्ते पदार्थे च।

पुनःपुनर् अव्य० पुनर्+वीप्सायां द्विर्वचम्। सकृदित्यर्थे अभीक्ष्णे।

पुनःपुना पु० पुनःपुनाति पू–नक् पृ०। नदीभेदे "कौकटेषु गयापुण्या नदी पुण्या पुनः पुने"ति वायुपुराणम्।

पुनःसंस्कार पु० पुनर्वारः संस्कारः उपनयनविवाहादिः। सम्+कृ–घञ् सुट्च। पापादिहेतुभिः कृतस्य संस्कारस्यान्यथाभावे द्वितीयसंस्कारे "पुनर्मौञ्जी कृतो विप्रः पुनः संस्कारमर्हती"ति ज्योतिषम् पौनर्भवेन भर्त्रा सा पुनः संस्कारमर्हतीति" मनुः।

पुनर् अव्य० पन अरु पृ०। अवधारणे, भेदे, अधिकारे, पक्षान्तरे द्वितीयवारे च।

पुनरुक्तवदाभास पु० "आपाततो यदर्थस्य पौनरुक्त्येव भासते। "पुनरुक्तवदाभास इत्युक्तो अलङ्कारभेदे।

पुनर्नव पु० क्षिप्तोऽपि पुनरपि नवः नञ्भ्रादि० न णत्वम् । नखे । खनामख्याते शाकभेदे स्त्री० टाप् । [ङीप् ।

पुनर्भव पु० क्षिप्तोऽपि पुनर्भवति भू–अच् । नखे । रक्तपुनर्नवायाम्

पुनर्भू स्त्री० पुनर्भवति प्रथममेकस्य जाया भूत्वापरस्य पुनर्जाया भवति भू–क्विप् । "कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता । पुनर्भूः प्रथमा प्रोक्ता पुनः संस्कारकर्मणा" इत्युद्वाहायां द्विरूढायां स्त्रियाम् । पुनर्जातमात्रे त्रि० ।

पुनर्वसु पु० पुनर्+वस–उ । विष्णौ, शिवे च । अस्मिन्यवधिके सप्तमे नक्षत्रे द्विव० ।

पुनाग पु० पुमान् नाग इव श्रेष्ठः प्रधानत्वात् स इव । खनामख्याते पुष्पप्रधाने वृक्षभेदे, श्वेतोत्पले, जातीफले, पाण्डुवर्णहस्तिनि, नरश्रेष्ठे च । [पुन्नाडोऽप्यत्र ।

पुन्नाट पु० पुमानिव नाटयति नट–अच् । चक्रमर्दे । नड–अच् ।

पुन्नामनरक पु० पुत् इति नाम यस्य कर्म० परदाराभिगमनादिभिः षोड़शभि पातकैः भोग्ये नरकभेदे, परदारादिकं प्रकृत्य "एतैस्तु पापैः पुरुषः पुन्नामनरके पचेदि"ति पुराणम् ।

पुमस् पु० पाति पा–डु–मसुन् । पुरुषे, मनुष्ये च । व्याकरणोक्ते संस्कारविशेषाधारे शब्दभेदे च ।

पुर् अग्रगतौ तु० प० सक० सेट् । पुरति अपोरीत् ।

पुरःसर त्रि० पुरोऽग्रे सरति सृ–ट । अग्रगामिनि स्त्रियां ङीप् ।

पुर न० पुर–अग्रगमने क । गेहे देहे पाटलिपुत्रे नगरभेदे, कुसुमदल-वृत्तौ, नागरमुस्तायां, चर्मणि, रटहोपरिरटहे च । बङ्गग्रामीण-व्यवहारस्थाने बङ्गहट्टादियुक्ते प्रधानग्रामे न० स्त्री० । स्त्रीत्वे ङीप् । राशौ, पीतभिण्टाम्, गुग्गुलौ च पु० ।

पुर् ङी० पिपर्त्ति पृ–दीर्घे क्विप् । नगर्याम् ।

पुरञ्जन पु० पुरं देहं स्वाश्रयेण स्वसान्निध्येन वा जनयति जन–ल्युट् । जीवे तदाश्रयेण तत्सान्निध्ये न च हि देहारम्भः ।

पुरञ्जय पु० काकुत्स्थाख्ये सूर्य्यवंश्ये नृपभेदे ।

पुरतस् अव्य० पुर–अतसुच् । अग्रत इत्यर्थे ।

पुरद्विष् पु० पुराणां मयनिर्मितानां नगराणां दाहकत्वात् द्विट् द्विष–क्विप् । शिवे । पुरारिप्रभृतयोऽप्यत्र ।

पुरन्दर पु० पुरं दारयति दृ–खच् । इन्द्रे, चौरे, (चइ) चव्ये च ।

पुरन्ध्रि(न्ध्री) पुरं गेहं धारयति पालयति धृ–खच् गौरा० ङीष् वा हृस्वः । बहुकुटुम्बवत्याम् पतिपुत्रवत्याञ्च स्त्रियां, "गृहेशगृहे व्यपपुरन्ध्रिवर्गमि"ति कुमारः ।

पुरस् अव्य० पूर्वस्मिन् कालादौ व्यपि पुरादेशः । अग्रत इत्यर्थे ।

पुरस्कार पु० पुरस्+कृ–घञ् । अग्रकरणे, पूजने च ।

पुरस्कृत त्रि० पुरस्+कृ–क्त । पूजिते, अग्रगते च । "पशुनाप्यपुरस्कृतेने"ति नैषधम् । अभिमुखे, अग्रिमस्थे, स्वीकृते, क्षिप्ते च त्रि० ।

पुरस्तात् अव्य० पूर्व–अस्तातिं पुरादेशः । दिग्देशकालवृत्तेः प्रथमापञ्चमीसप्तम्यन्तस्य पूर्वशब्दस्यार्थे, अग्रत इत्यर्थे च ।

पुरा अव्य० पुर–का । अविच्छेदेन क्रियाकरणे, पुराणे अतीते, भाविनि, निकटे, पुरावृत्ते च । पुर+क टाप् । पूर्वस्यां दिशि स्तुगग्निद्रव्यभेदे च स्त्री० ।

पुराण त्रि० पुरा–भवः यु त्रि० लुट् न, पुरा नीयते नी–ड वा पूर्व० णत्वम्, पुराभवे । सर्गश्च प्रतिसर्गश्च वंशोमन्वन्तराणि च वंशानुचरितञ्चैव पुराणं पञ्चलक्षण"मित्युक्ते व्यासादिप्रणीते शास्त्रभेदे न० ।

पुरातन त्रि० पुरा भवं पुरा यु+लुट् च । पुराभवे ।

पुराणपुरुष पु० पुराणैरुपस्तुत्यः पुरुषः शाक०, कर्म० वा । विष्णौ, वृद्धे पुरुषे च ।

पुरावृत्त न० पुरा पूर्वस्मिन् काले यत् वृत्तं भूतं लक्षणया तदाश्रितकथादि । इतिहासे, तत्प्रतिपादकग्रन्थे महाभारतादौ च ।

पुरासिनी स्त्री० पुरं गृहमस्यति अस णिनि । सहदेवी लतायाम् ।

पुरीतत् स्त्री० न० पुरीं देहं तनोति तन-क्विप्। देहावरणके (आंत) अन्त्राख्ये नाड़ीभेदे।

पुरीमोह पुरीं देहं मोहयति मुह-णिच्-अण्। धुस्तूरे।

पुरीष न० पृ-दीर्घ ईषन् किच्च। विष्ठायाम्।

पुरु पु० पृ-दीर्घ कु। ययातेर्द्वयस्य कनिष्ठपुत्रे यदुभ्रातृ कुरूणां पौरवेति संज्ञा। स्वर्गे, परागे दैत्यभेदे, नदीभेदे च। प्रचुरे त्रि०।

पुरुषकार पु० पुरुषस्य कारः कृप-घञ्। पौरुषे पुरुषचेष्टिते "दैवं पुरुषकारश्चे"ति स्मृतिः।

पुरुषद्वय त्रि० पुरुष उन्मानं यस्य दघच्। पुरुषतुल्योन्माने, द्वयसच्। पुरुषाद्वयसोऽण्यत्र स्त्रियां ङीप्। [नागादयोऽण्यत्र।

पुरुषसिंह पु० पुरुषः सिंह इव उपमि०। नरश्रेष्ठे एवं पुरुषव्याघ्रादयोऽपि।

पुरुषार्थ पु० ष० त०। धर्मार्थकाममोक्षरूपेषु पुरुषप्रयोजनेषु।

पुरुषोत्तम पु० पुरुषेषु उत्तमः कर्म० वा। विष्णौ, उत्तमपुरुषे च। अथ मुक्तिं पुरुषोत्तमादिति नैषधम्।

पुरुहू त्रि० पुरु+हन-ड। प्रचुरे। डु। पुरुहूरध्यत्र।

पुरुहूत पु० पुरूणि प्रचुराणि हूतानि नामान्यस्य। इन्द्रे।

पुरूरवस् पु० बुधेनेलायामुत्पादिते उर्वशीकान्ते चन्द्रवंश्ये नृपे।

पुरोग त्रि० पुरोऽग्रे गच्छति गम-ड। अग्रगामिनि" प्रधाने च। अच्। पुरोगमः, णिनि। पुरोगामीतिचाग्यत्र।

पुरोडाश(ग्र) पु० पुरोदाश्यते दाश-कर्मणि क्विप्, घञ् वा। हविर्विशेषे यज्ञियद्रव्ये।

पुरोधस् पु० पुरोऽग्रे धीयते धा-असि किच्च। पुरोहिते।

पुरोभागिन् त्रि० पुरः पूर्वं भजते भज-घिनुण् गुणत्यागेन दोषमात्रत्यागिनि। अग्रभागवति त्रि०।

पुरोहित पु० पुरोऽग्रे इष्टाऽनिष्टफलेषु कर्मसु धीयतेऽसौ धा-क्त। राज्ञां इष्टाऽनिष्टफलकेषु कर्मसु पुरस्कृते जने।

पुर्व पूर्त्तौ भ्वा० पर० सक० सेट्। पूर्वति अपूर्वीत्।

पुर्व निकेतने अक० चु० उ० सेट्। पूर्वयति ते अपुपूर्वत् त।

पुल उच्छ्रितौ वा चु० उभ० पक्षे तु० प० अक० सेट्। पोलयति ते पुलति अपूपुलत् त अपोलीत्।

पुल महत्त्वे भ्वा० प० सक० सेट्। पोलति ते अपोलीत्।

पुल(क) पु० पुल-कतत; स्वार्थे कन् वा। रोमाञ्चे, कङ्कुष्ठे च पुलाके न०।

पुलकिन् पु० पुलकसदाकारं पुष्पमस्यस्य इनि। धाराकदम्बे।

पुलस्ति(स्त्य) पु० मुनिभेदे।

पुलह पु० मुनिभेदे।

पुलाक पु० पुल+अक-अण्। संक्षेपे, यवमूल्ये (आगड़ा) धान्ये, भक्तगुलिकायां, क्षिप्रे च।

पुलायित न० पुल+क्यच् क्त। अश्वगतिभेदे।

पुलिन न० पुल-इनन् किच्च। तोयादुत्थिते तटे (चड़ा)।

पुलिन्द पु० पुल-किन्दच्। चाण्डालभेदे।

पुलोमजा स्त्री० पुलोमा असुरभेदस्तस्मात् जायते जन-ड। इन्द्राण्यां, शच्याम्। [उपयेमे।

पुलोमन् पु० इन्द्रस्य द्वेष्ये असुरभेदे यं जित्वा तत्कन्यां शचीमिन्द्रः

पुलोमारि पु० ६त०। इन्द्रे पुलोमयत्नुप्रभृतयोऽप्यत्र।

पुष पुष्टौ अक० पोषणे सक० दि० पर० अनिट्। पुष्यति अपुषत्।

पुष पुष्टौ अक० पोषणे सक० क्र्या० प० सेट्। पुष्णाति अपोषीत्।

पुष पुष्टौ भ्वा० पर० अक० सेट्। पोषति अपोषीत्।

पुष पुष्टौ चु० उभ० सक० सेट्। पोषयति ते अपूपुषत् त।

पुषा स्त्री० पुष्णाति पुष-क टाप्। खाङ्गलीढचे।

पुषित त्रि० पुष-क्त। पुष्टे, प्रतिपालिते पक्षिबन्धनादौ।

पुष्कर न० पुष-करन् कस्य नेत्त्वम्। गजकराग्रे, वाद्यभाण्डे, सुखे, जले, आपणे, खड्गफलके, पद्मे, तीर्थभेदे कुशौषधौ, पद्मकोषे, द्वीपभेदे, युद्धे च। नागभेदे, रोगभेदे, नृपभेदे, सारसपक्षिणि च पु०।

पुष्करकर्णिका स्त्री० पुष्करस्येव कर्णिकाख्याः। स्वनामख्यातायाम्। पुष्करनाभीत्यत्र।

पुष्करिणी स्त्री० पुष्कर+समूहार्थे सन्निकृष्टदेशार्थे च इनि। स्वनाम-

श्चिन्याम्, पद्मतमूहे, तद्युक्तलतायाञ्च । पुष्करमूले, शतधनुःपरिमितदीर्घविस्तारे जलाशयभेदे च ।

पुष्करिन् पु० पुष्करं शुण्डाग्रमस्त्यस्य इनि । गजे ।

पुष्कल त्रि० पुष—कलच् कस्य नेत्त्वम् । "अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कल"मित्युक्ते परिमाणभेदे । श्रेष्ठे, बहुत्वोपस्थिते च त्रि० ।

पुष्टि स्त्री० पुष—क्तिन् । पोषणे, वृद्धौ, तद्धेतुत्वात् अश्वगन्धायां, वृद्ध्यादौ पूज्यषोड़शमातृकामध्ये मातृकाभेदे च । [स्त्रियाम्] ।

पुष्टिदा स्त्री० पुष्टिं ददाति दा-क । अश्वगन्धायाम्, वृद्धौ, पोषणदात्र्यां

पुष्प विकाशे दि० पर० अक० सेट् । पुष्प्यति अपुष्पीत् ।

पुष्प न० पुष्प—अच् । कुसुमे स्त्रीरजसि, विकाशे, कुबेरस्य विमाने, नेत्ररोगभेदे च । स्वार्थे कन् । कुबेरस्य विमाने, नेत्ररोगभेदे, रत्नमयकङ्कणे, रसाञ्जने, लोहकांस्ये, स्फटिकारयोः शकल्यां, कांसीसे च ।

पुष्पकरण्डक न० ६त० । (फुलेरसाज) वंशादिनिर्मिते पुष्पचयनपात्रे

पुष्पकेतु पु० पुष्पनिर्मितः केतुरञ्जनम् । कुसुमाञ्जने ।

पुष्पचाप पु० पुष्पमयं चापमस्य । कामदेवे पुष्पधन्वादयोऽप्यत्र ।

पुष्पचामर पु० पुष्पं चामर इव यस्य । मदनवृक्षे ।

पुष्पदन्त पु० वायुकोणस्थे दिग्गजे, विद्याधरभेदे च ।

पुष्पदन्तक पु० महिम्न इत्यादिस्तवकर्त्तरि गन्धर्वभेदे ।

पुष्पपुर न० पाटलिपुत्रनगरे कुसुमपुरे (पाटना) ।

पुष्पफल पु० पुष्पयुक्तं फलमस्य । कपित्थे ।

पुष्पमास पु० पुष्पप्रधानो मासः शाक० । चैत्रे, वसन्तसमये ।

पुष्परस पु० ६त० । मकरन्दे कुसुमनिर्य्यासे ।

पुष्पराग पु० पुष्पस्येव रागो वर्णो यस्य । मणिभेदे (पद्मराग) ।

पुष्परोचन पु० पुष्पं रोचनेव यस्य । नागकेशरे ।

पुष्पलिह् पु० पुष्पं लेढि लिह-क्विप् । मधुकरे । क । पुष्पलिह्योऽप्यत्र

पुष्पवती स्त्री० पुष्पं स्त्रीरजः अस्त्यस्य मतुप् मस्य वः । ऋतुमत्यां स्त्रियाम् । पुष्पविशिष्टे त्रि० दिवाकरनिशाकरयोः मिलितयोः द्वि० ।

पुष्पवाटी स्त्री० ६त० । पुष्पोद्याने । स्वार्थे कन् । अत्रैव । "दक्षि-

रोन पुष्पवाटिकामालाप इव श्रूयते" इति शकुन्तला ।

पुष्पवाण पु० पुष्पाख्येव वाणा अस्य । कामे पुष्पशरादयोऽप्यत्र ।

पुष्पशरासन पु० पुष्पमयं शरासनं धनुर्यस्य । कामे ।

पुष्पशून्य पु० ६त० । उडुम्बरे । "पुष्परहितमात्रे त्रि० ।

पुष्पसमय पु० ६त० । वसन्ते ऋतौ ।

पुष्पाजीव पु० पुष्पमाजीवति आ+जीव-अण् । मालाकारे ।

पुष्पाञ्जन न० ६त० । कुसुमाञ्जने (कोमकाजल) ।

पुष्पासव न० ६त० । रीतीपुष्पे तस्य पुष्पे ह्लत्वात् मादकत्वाच्च तथात्वम्

पुष्पाह्वा स्त्री० पुष्पमित्याह्वा यस्याः । शतपुष्पायाम् ।

पुष्पिताग्रा स्त्री० अर्द्धसमे छन्दोभेदे ।

पुष्य पु०स्त्री० कार्य्यं पुष्यति पुष-कर्तरि यत् नि० । अश्विन्यादि (२७) नक्षत्रमध्ये अष्टमे नक्षत्रे, स्त्रीत्वे टाप् ।

पुष्यरथ पु० कर्म० यात्रोत्सवार्थं रथे ।

पुष्यलक पु० पुष-इन् पुषिः पुष्टिस्तस्यै अलति पर्य्याप्नोति अल-अच् । गन्धप्रधाने मृगभेदे । "सोऽग्नि पुष्यलकोहत" इति ।

पुष्यस्नान न० पुष्यनक्षत्रकाले स्नानम् । शास्त्रोक्तविधानेन पुष्यनक्षत्र-युक्तकालेऽभिषेकभेदे । [अपुपुस्तत् त ।

पुस्त बन्धे, अनादरे, आदरे च चु० उभ० सक० सेट् । एस्तयति ते

पुस्त न० पुस्त-अच् । "शटा वा दारुणा वापि वल्केनाप्यथ चर्मणा लौहरत्नैः कृतं वापि पुस्तमित्यभिधीयते" इत्युक्ते लिख्यादिशिल्प-कर्मणि । स्वार्थे कन् । लिख्याधारे ग्रन्थे, पु० स्त्री० स्त्रीत्वे ङीष् ।

पू शोधे दि० आत्म० सक० सेट् । पूयते अपपूत ।

पू शोधे भ्वा० आ० सक० सेट् । पवते अपवित ।

पू शोधे क्र्यादि० पर० उभ०सक०सेट् पुनाति पुनीते अपावीत् । अपवित

पूग पु० पू-गन् किञ्च (सुपारि) वृक्षे, समूहे छन्दसि, गाने कण्ठकि-वृक्षे च

पूज पूजने चु० उभ० सक० सेट् । पूजयति ते अपूपुजत् त ।

पूजा स्त्री० पूज-अ । अर्चने । ल्युट् । पूजनमप्यत्र न० ।

पूजार्ह त्रि० पूजामर्हति अण् । पूजनयोग्ये ।

पूज्य पु० पूज–यत् । गुरौ । पूजनीयमात्रे त्रि० ।

पूरण राधीकरणे चु० उभ० सक० सेट् । पूरणयति ते अपूपुरत् त ।

पूत द० पू–क्त । अपनीतमुषे, (आगड़ारहित) बहुलीकृते धान्ये च । व्रतादिना शुद्धे त्रि० । सत्ये । सङ्घे, श्वेतकुष्ठे, विकङ्कतवृक्षे च पु० । दूर्व्वायां स्त्री० टाप् ।

पूतक्रतायी स्त्री० पूतक्रतोरिन्द्रस्य पत्नी ङीप् ऐङ् च । शच्याम् ।

पूतक्रतु पु० क्रतुभिः पूतः, पूता; पवित्रतासम्पादकाः; क्रतवो यज्ञा यस्य वा । इन्द्रे ।

पूतगन्ध पु० पूतोगन्धो यस्य । वर्व्वरे । (बावुइतुलसी) ।

पूतकुष्ठ न० कर्म० । श्वेतकुष्ठे ।

पूतना स्त्री० पूतं करोति पूत+णिच्–युच् । हरीतक्यां, गन्धमांस्यां, वकासुरभगिन्यां, या विषाक्तं स्तन्यं पाययन्ती कृष्णेन हता । रोगभेदे, बालकमातृकाभेदे च "पूतना जम्भकादयः" ।

पूतनारि पु० ६त० । श्रीकृष्णे ।

पूतफल पु० पूतानि फलान्यस्य । पनसे (कांटाल) ।

पूति न० पू–क्तिच् । रोहिषतृणे । क्तिन् । पवित्रतायाम् । पूयविश्रवणे दुर्गन्धे च क्तिच् । दुर्गन्धे । दुर्गन्धवति त्रि० ।

पूतिक न० पूत्या दुर्गन्धेन कायति कै–क । विष्ठायाम्, पूतिकरञ्जे पु० । शाकभेदे स्त्री० (पुइ) "पूतिका ब्रह्मघातिके"ति स्मृतिः ।

पूतिकरज(ञ्ज) पु० पूतियुक्तः करजः(ञ्जः) (नाटाकरमजा) करञ्जभेदे ।

पूतिकाष्ठ पु० ६त० पूतेः पाचनार्थं काष्ठम् चतुर्थ्यर्थे ६त० । देवदारुणि । संज्ञायां कन् । सरलवृक्षे पु० । [दुर्गन्धे पु० ।

पूतिगन्ध पु० पूतिर्दुष्टो गन्धो यस्य । गन्धके, इङ्गुदीवृक्षे च कर्म० ।

पूतिगन्धि पु० पूतिर्दुष्टोगन्धो यस्य इत् समा० । दुर्गन्धवति ।

पूतितैला स्त्री० पूति दुर्गन्धं तैलं यस्याः । ज्योतिष्मत्याम् ।

पूतिपत्र पु० पूतीनि पत्राण्यस्य । श्योनाकभेदे ।

पूतिपुष्पिका स्त्री० पूतीनि पुष्पाण्यस्याः मातुलुङ्गायाम् जम्बीरभेदे ।

पूतिफला (ली) पूतीनि फलान्यस्याः वा ङीप् । सोमराज्याम् ।

पूतिमयूरिका स्त्री० पूतिर्मयूरीव तत: स्वार्थे कन् । अजमोदायाम् ।

पूतिमेद पु० पूतिर्मेदोऽस्य । अरिमेदे विट्खदिरे ।

पूतिवात पु० पूत्यै पवित्रतायै वातोऽस्य । बिल्ववृक्षे । कर्म० । दुरन्ध्ययुक्तवायौ पु० ।

पूतिवृक्ष पु० कर्म० । श्योनाकवृक्षे ।

पूप पु० पू–पक् । पिष्टके (पिठा) ।

पूपाष्टका स्त्री० अष्ट परिमाणं यस्याः कन् अष्टका अष्टमी उपचारात् तत्कर्त्तव्यं आद्धम् पूपद्रव्यसाधनाष्टका । कर्म० अग्रहायणस्याः परतः कृष्णाष्टमीविहिते श्राद्धे । [अपूपिष्ट ।

पूय दुर्गन्धे अक० भेदने विशरणे च सक० दिवा० आत्म० सेट् । पूय्यते

पूय न० पूय–अच् । व्रणादिनिःसृते रक्तविकारभेदे (पूज) ।

पूयारि पु० इत० । निम्बवृक्षे पूयनाशकादयोऽस्यत्र ।

पूर पूर्त्तौ प्रीणने च दिवा० आत्म० सक० सेट् । पूर्य्यते अपूरि अपूरिष्ट ।

पूर पु० पूर–क । जलसमूहे, खाद्यभेदे, ब्रह्मणश्च ।

पूरक पु० पूर–ण्वुल् । बीजपूरे, जम्बीरभेदे (टाबा लेबु) चक्रशास्त्रप्रसिद्धे गुणके, तन्त्रादिप्रसिद्धे प्राणायामाङ्गे वायूत्कर्षणरूपे व्यापारभेदे च । पूरणकर्त्तरि त्रि० । मृतस्यातिवाहिकदेहोत्तरं प्रेतदेहनिर्वाहकेऽशौचमध्ये देये पिण्डदशके न० ।

पूरण न० पूर ल्युट् । अङ्कशास्त्रप्रसिद्धे गुणने, वृद्धौ, कुटज्वटे, वापतन्तुषु च । ल्यु । सेतौ, समूहे च पु० । सङ्ख्यापूरणे पूरयितरि च त्रि० । यथा द्वयोः पूरणः । द्वितीयः । [शाल्मलिवृक्षे च ।

पूरणी स्त्री० पूर्य्यतेऽनया । पूरणसङ्ख्यायां यथा द्वयोः पूरणी द्वितीया ।

पूरित त्रि० पूर–क्त । पूर्णे, गुणिते च ।

पूरुष पूर–उषन् । पुरुषे, नरे ।

पूर्ण त्रि० पूर–क्त नि० । पूरिते, सकले, समग्रे च ज्योतिषोक्तेषु उभयपक्षयोः पञ्चमीदशमीपञ्चदशीषु च स्त्री० ।

पूर्णकोष्ठा स्त्री० पूर्णं कोष्ठं यस्याः । नागरमुस्तायाम् ।

पूर्णपात्र न० कर्म०। हर्षकाले पुत्रजननोत्सवजहर्षात् आकृष्टं वस्त्रादेर्यत्र दाने, होमान्ते ब्रह्मदक्षिणार्थतया देये "अष्टमुष्टिर्भवेत् कुक्षिः कुक्ष्योऽष्टौ च पुष्कलम्। पुष्कलानि च चत्वारि पूर्णपात्रं विधीयते" इत्युक्तमानवति तण्डुलादौ।

पूर्णमास पु० पूर्णमास्यां विहितः अण्। पूर्णिमायां कर्त्तव्ये यागभेदे "दर्शपूर्णमासाभ्यां यजेते"ति श्रुतिः।

पूर्णमासी स्त्री० पूर्णोमासश्चन्द्रमा यया गौरा० ङीष्। पूर्णिमातिथौ

पूर्णबीज पु० पूर्णानि बीजान्यत्र। बीजपूरे। (टाबालेबु)।

पूर्णिमा स्त्री० पूर-क्तिन् नि० पूर्णिं पूरणं चन्द्रकलापूरणं मिमीते मा-क। चन्द्रस्य पञ्चदशकलापूरण्यां तिथौ।

पूर्त्त न० पूर-क्त नि०। खातादिकर्मणि विश्वजनोद्देशेन जलाशयदानादौ। भावे क्त। पूरणे न०। काले, ऋक्षे, पूरिते च त्रि०।

पूर्व(र्व) निवासे अक० निमन्त्रणे सक० चुरा० उभ० सेट् पक्षे भ्वा० पर०। पूर्ब(र्व)यति पूर्ब(र्व)ते अपपूर्ब(र्व)त्। अपूर्बी(र्वी)त्।

पूर्ब(र्व) त्रि० पूर्ब(र्व)-अच्। प्रथमे, आदौ-दिग्देशकाले, समस्ते, ज्येष्ठे भ्रातरि च। सर्वनामतास्य।

पूर्ब(र्व)ज पु० पूर्ब(र्व) जायते जन-ड। ज्येष्ठभ्रातरि। ज्येष्ठभगिन्यां स्त्री० ङीष्।

पूर्ब(र्व)दिक्पति पु० ईत०। इन्द्रे।

पूर्ब(र्व)दिश् स्त्री० कर्म०। प्रथमस्यूर्य्योदयसम्बद्धायां दिशि।

पूर्ब(र्व)देव पु० पूर्ब(र्व) देवः पश्चात् पापाचारणात् भ्रष्टः, अथ वा पूर्बः(र्वः) श्रेष्ठो देवः। असुरे।

पूर्ब(र्व)देश पु० कर्म०। प्राच्यामवस्थिते जनपदे।

पूर्ब(र्व)पक्ष पु० कर्म०। अष्टादशविवादरूपे व्यवहारे प्रतिज्ञारूपे प्रथमेऽवयवे, "पूर्ब(र्व)पक्षोभवेद्यस्य भवेयुस्तस्य साक्षिणः" इति स्मृतिः। "विषयी विषयश्चैव पूर्ब(र्व)पक्षस्तयोरपि। निर्णयस्तेति सिद्धान्तः शास्त्रेऽधिकरणं स्मृत"मिति मीमांसोक्ते न्यायावयवभेदे सिद्धान्तविरुद्धकोटिप्रतिपादके वाक्ये।

पूर्ब(र्व)पद न० कर्म०। व्याकरणोक्ते उत्तरपदादव्यवहिते प्राग्वर्त्तिनि समासस्य प्रथमावयवे च सुप्तिङन्तरूपे पदे।

पूर्ब(र्व)पर्वत पु० कर्म०। उदयाचले। यत्र सूर्य्यस्य प्रथमदर्शनं तत्रस्थे पर्वते। स चानियतस्थितिकोऽपि यतः स्थानात् प्रथमं सूर्य्योदर्शनयोग्यो भवति तदेव स्थानं पर्वत इति व्यवह्रियते। पूर्ब(र्व)शैलादयोऽप्यत्र।

पूर्ब(र्व)फल्गुनी स्त्री० द्विव०। अस्मिन्यवधिके एकादशे नक्षत्रे।

पूर्ब(र्व)भाद्रपद पु० स्त्री०। अश्विन्यादिनक्षत्रेषु पञ्चविंशतितमे नक्षत्रे।

पूर्ब(र्व)रङ्ग पु० नाट्ये आदौ नटकर्त्तव्ये सङ्गीतादौ। "पूर्बरङ्गं विधायैव स्तब्धारो निवर्त्तते" इति सा० द० प०।

पूर्ब(र्व)राग पु० रञ्ज-घञ् नलोपः कर्म०। नायकयोर्मेलनात् प्राग्वर्त्तिनि "अदर्शनाद्दर्शनाद्वापि मिथःसंरूढरागयोः। दशाविशेषो योऽप्राप्तौ पूर्ब(र्व)रागः स उच्यते" इत्युक्तलक्षणे अवस्थाभेदे।

पूर्ब(र्व)रूप न० कर्म०। वैद्यकोक्ते भाविरोगनिदानभूते चिह्नभेदे।

पूर्ब(र्व)वादिन् पु० व्यवहारे पूर्ब(र्व) प्रथमं वदति वद-णिनि। प्रथमाभियोक्तरि वादिनि (फरादि)।

पूर्बा(र्वा)षाढ़ा स्त्री० अश्विन्यादिषु नक्षत्रेषु विंशतितमे नक्षत्रे।

पूर्बा(र्वा)ह्ण पु० पूर्ब(र्व)अह्नः एकदेशिस० टच् समा० अह्नादेशः णत्वम्। त्रिधा विभक्तदिवसस्य प्रथमे भागे, "पूर्ब्बाह्णो वै देवानां" मिति श्रुतिः। प्रथमे अर्द्धदिने च "अयुग्मं वन्द्येच्चित्यं पूर्बा(र्वा)ह्णे प्रहरद्वये" इति पुराणम्।

पूर्बे(र्वे)द्युस् अव्य० पूर्ब(र्व)शब्दात् दिवसे पूर्ब+(र्व)+एद्युस्। प्रथमदिवसे

पूल संहतौ वा चु० उभ० पक्षे भ्वा० पर० अक० सेट्। पूलयति-ते पूलति। अपूपुलत् त अपूलीत्।

पूष वृद्धौ अक० भ्वा० पर० सेट्। पूषति अपूषीत्।

पूष पु० पूष-क। ब्रह्मदारुवृक्षे (तुत) रत्नञ्च। पूषकोऽपि अत्रैव।

पूषन् पु० पूष-कनिन्। सूर्य्ये। [व्याप्तः।

पॄ व्यापारे तु० आत्म० अक० अनिट् प्रायेणायम् व्याङ्पूर्वः। व्यापियते

पॄ प्रीतौ स्वा० पर० सक० अनिट्। पृणोति अपार्णीत्।

पॄ पालने जुहो० पर० सक० अनिट् वा दीर्घः। पिपर्त्ति पिपृतः-पिपूर्त्तः। अपार्णीत्-अपारीत्। पप्रतुः-पपरतुः।

पृ पूर्त्तौ चु० उभ० सक० सेट्। पारयति-ते अपीपरत्-त।

पृक्का स्त्री० पृच-कन् न्यङ्क्वा० कुत्वम्। (पिड़िङ्) शाकभेदे।

पृच्च सम्पर्के अदा० आत्म० अक० सेट्। पृक्ते अपर्चिष्ट। क्त। पृक्णः।

पृच सम्पर्के रु० पर० अ० सेट्। पृणक्ति अपर्चीत्। क्त। पृक्णः।

पृच संयमने सक० सम्पर्के अक० चु० उभ० पक्षे भ्वा० पर० सेट्। पर्चयति-ते पर्चति। अपीपृचत्-त अपपर्चत्-त अपर्चीत्।

पृच्छा स्त्री० प्रच्छ-अङ् सम्प्रसारणम्। प्रश्ने धातुनिरूपणाकथनाय प्रेरणे।

पृज सम्पर्के, अदा० आ० सक० सेट्। पृक्ते अपर्जिष्ट। क्त पृ-गुणः।

पृड हर्षे तु० पर० अक० सेट्। पृडति। अपर्डिष्ट।

पृण तर्पणे तु० पर० सक० सेट्। पृणति अपर्णीत्।

पृतना स्त्री० पृ-तनन्-किच्च। सेनायाम्, सङ्ग्रामविशेषान्वितरथहस्त्यश्वादिसैन्यभेदे च (रथाः २४३ गजाः २४३ अश्वाः ७२९ पदातयः १२१५)।

पृतनासाह पु० पृतनां साह्यते सह-णिच्-किप्। इन्द्रे। छत्व प्रसङ्गे एव षत्वम् नान्यत्र।

पृथ प्रक्षेपे चुरा० उभ० सक० सेट्। पार्थयति-ते अपीपृथत्-त अपपर्थत् त

पृथक् अव्य० पृथ-ककि। भिन्ने, नानारूपे, विनार्थे च।

पृथक्त्व न० पृथक् इत्यस्य भावः त्व। वैशेषिकोक्ते पृथक्त्वबुद्धिसम्पादके गुणभेदे।

पृथक्त्वचा स्त्री० पृथक् त्वचा यस्याः। मूर्व्वायाम्।

पृथक्पर्णी स्त्री० पृथक् पर्णान्यस्याः ङीप्। (चाकुलिया) क्षुपभेदे।

पृथगात्मता स्त्री० पृथक् आत्मा स्वरूपं यस्य तस्य भावः तल्। भेदे, विशेषे।

पृथगात्मिका स्त्री० पृथक् भिन्न आत्मा यस्याः कप्। व्यक्तौ सामान्यधर्मस्य यथा सर्वत्र समरूपतया सम्बन्धानुगमकत्वम् नैवं व्यक्तेस्तस्याः भिन्नभिन्नास्पदत्वात्।

पृथक्जन पु० पृथक् भिन्नो जनो यस्मात्। नीचे, मूर्खे, पामरे च।

पृथग्विध त्रि० पृथक् भिन्ना भिन्ना विधा यस्य। नानारूपे।

पृथग्बीज पु० पृथक् बीजान्यस्य। भल्लातकवृक्षे (भेला)।

पृथा स्त्री० कुन्तिभोजकन्यायाम् कुन्त्याम्।

पृथाज पु० पृथायां जायते जन—ड। कुन्तीपुत्रे युधिष्ठिरादौ, अर्जुनवृक्षे च। पृथाङ्गजादयोऽप्यत्र।

पृथि(थ)वी स्त्री० प्रथते विस्तारमेति प्रथ—षिवन् (षवन्) वा नि० सम्प्रसारणं पित्त्वात् ङीष्। धरायाम् क्षितौ।

पृथिवीपति पु० ६त०। नृपतौ भूपतौ। पृथिवीपालादयोऽप्यत्र।

पृथु पु० पृथ—डु। सूर्यवंश्ये वेनराजस्य दक्षिणबाहुमन्थनजाते नृपभेदे, कृष्णजीरके च। महति, स्थूले, दत्ते च त्रि०। स्त्रियां ङीष् वा।

पृथुक पु० न०। पृथुवत् कायति कै—क। चिपिटके, 'हिः स्त्रिलक्षणं पृथुक"मिति स्मृतिः। बालके पु०। पृथुकार्त्त स्वरपाले"मिति हिङ्गुपत्र्यां, बालिकायाञ्च स्त्री०।

पृथुकोल पु० कर्म० राजबदरे।

पृथुपत्र पु० पृथूनि पत्राण्यस्य। रक्तशुने। [शयाम्।

पृथुपलाशिका स्त्री० पृथूनि पालाशान्यस्याः गौ० ङीष् स्वार्थे कन्।

पृथुरोमन् पु० पृथूनि रोमाणि रोमस्थानीयशल्कान्यस्य। मत्स्ये।

पृथुल त्रि० पृथ+स्वार्थे लच्, पृथुः पृथुत्वमस्त्यस्य लच् वा। स्थूले। हिङ्गुपत्र्यां स्त्री०।

पृथुशिम्ब पु० पृथ्वी शिम्बा यस्य। श्योनाकभेदे।

पृथूदर पु० पृथु—उदरं यस्य। मेघे, बृहदुदरयुक्ते त्रि०।

पृथ्वी स्त्री० पृथुत्व गुणयुक्ता स्त्री ङीष्। भूमौ, हिङ्गुपत्र्यां, स्थूलैलायाम्, पुनर्नवायां, कृष्णजीरके च। स्वार्थे कन्। पृथ्वीका। बृहदेलायाम् हिङ्गुपत्र्यां, कृष्णजीरके च।

पृथ्वीकुरुवक पु० पृथ्वां भूमौ कुरुवक इव शुभ्रत्वात् । श्वेतमन्दारके ।
पृदाकु पु० पर्द–गतौ काकु सम्प्रसारणम् । सर्पे, दृष्टिके व्याघ्रे गजे, चित्रके वृक्षे च ।
पृश्नि त्रि० स्पृश–नि, प्रच्छ–नि वा पृ० । खर्वदुर्वर्णास्थिके, स्वल्पे च । रत्ने, देवकन्यां, रश्मौ च स्त्री० । संज्ञायां कन् । कृष्णिकायां (पाना) स्त्री० वा ङीष् ।
पृश्निगर्भ पु० ईत० । देवकीसूनौ श्रीकृष्णे ।
पृश्निपर्णी स्त्री० पृश्नि स्वल्पं पर्णमस्याः ङीष् । (चाकुलिया) विख्यातायां लतायाम् ।
पृष सेके भ्वा० या० सक० सेट् । पर्षते अपर्षिष्ट ।
पृषत् न० पृष–अति किच्च । बिन्दौ । सेकयुक्ते त्रि० ।
पृषत पु० पृष–अतच् किच्च । शुभ्रबिन्दुमति मृगभेदे, बिन्दौ च ।
पृषतास्पति पु० ईत० अलुक् स० । वायौ ।
पृषताश्व पु० पृषतो मृगभेदोऽश्व इव गतिसाधनं यस्य । वायौ ।
पृषत्क पु० पृषत्+संज्ञायां कन् । बाणे ।
पृषद्श्व पु० पृषतो बिन्दोरश्व इव वाहकत्वात् । वायौ ।
पृषदाज्य न० पृषद्युक्तं दधिबिन्दुयुक्तं दधिसेकयुक्तं वा आज्यम् म.क० । दधिसिक्ते घृते ।
पृषन्ति पु० पृष–झिच् किच्च । बिन्दौ ।
पृषोदर त्रि० पृषदुदरे यस्य पृषो० नि० । बिन्दुगर्भिते ।
पृष्ठ न० पृष–थक् इडभावः । तनोः पश्चाद्भागे, वेदप्रसिद्धे स्तोत्रभेदे च ।
पृष्ठतस् अव्य० पृष्ठ+तसिल् । पश्चाद्भागे इत्यर्थ ।
पृष्ठदृष्टि पु० पृष्ठे पश्चात् दृष्टिरस्य । भल्लूके ।
पृष्ठवंश पु० ईत० । पृष्ठस्थे दण्डाकारेऽस्थ्नि ।
पृष्ठवाह् पु० पृष्ठेन वहति वह–ण्वि । पृष्ठेन शकटादिवाहके वृषादौ ।
पृष्ठ्य न० पृष्ठानां स्तोत्राणां समूहः यत् । स्तोत्रसमूहे । तद्वति यागभेदे, पृष्ठेन वहति यत् । पृष्ठवाहकावृषादौ च त्रि० ।
पृष्णि स्त्री० प्रच्छ–निङ् सम्प्रसारणं षत्वम् । अग्निशब्दार्थे, पार्ष्णौ च ।

पॄ पालने पूर्त्तौ च क्रया० पृ० पर०सक० सेट्। पृणाति अपारीत्।
पॄ पूर्त्तौ चु० उभ० सक० सेट्। पारयति–ते अपीपरत् त।
पेचक पु० पच–वुन् दृच। (पेंचा) उलूके, गजपुच्छमूलोपान्ते, पर्य्यङ्के, यूके, मेघे च।
पेचुली स्त्री० पच–उलच् दृच गौ० ङीष्। (कचु) शाकभेदे।
पेटक पु० न० पिट–ण्वुल्। पुस्तकादीनां स्थापनार्थे वेत्रादिनिर्म्मिते पदार्थे, समूहे च। [दृचे।
पेटिका स्त्री० पेटीव कायति कै–क पृ०। (टेपारी) पेटकाकारफलयुते
पेटी स्त्री० पिट–अच् गौरा० ङीष्। खल्पपेटके।
पेण गतौ पेषे च सक० क्षेपे अक० भ्वा० पर० सेट्। पेणति अपेणीत्। चङि न ह्रस्वः। [न ह्रस्वः।
पेल कम्पे अक० गतौ सक० भ्वा०पर० सेट्। पेलति अपेलीत् चङि
पेल न० पेल–अच्। पुंसस्निग्धे अङ्गभेदे (अमरकोष)।
पेलव त्रि० पेल-घञ् पेलं वाति वा–क। कोमले, क्षये, विरले च।
पेव सेवने भ्वा आत्म० सेट्। पेवते अपेविष्ट। चङि न ह्रस्वः।
पेश(स)ल त्रि० पिश(ष)–अलच्। सुन्दरे, दक्षे, कोमले च।
पेशि(शी) स्त्री० पिश–इन् वा ङीप्। अण्डे, मांसपिण्डे, खड्गकोषे, नदीभेदे, पिशाचीभेदे राक्षसीभेदे च।
पेष सेवने निश्चये च भ्वा०आ०सक०सेट्। पेषते अपेषिष्ट चङि न ह्रस्वः
पेषण न० पिष–ल्यु। चूर्णने। ल्युट्। खले, (तेकाटासिज) शतगुन्नायाञ्च।
पेषणि स्त्री० पिष्यतेऽनया अनि वा ङीप्। पेषणशिलायाम्।
पेस गतौ भ्वा० पर० सक० सेट्। पेसति अपेसीत्। चङि न ह्रस्व।
पै शोषे भ्वा० पर० सक० अनिट्। पायति अपासीत्।
पैठर त्रि० पिठरे स्थाल्यां संस्कृतम् अण्। स्थालीपक्के मांसादौ।
पैठीनसि पु० मुनिभेदे।
पैत्तक न० पित्तेन आगतम् ठण्। पित्ततः प्राप्ते दाये।
पैत्तृष्वसेय(स्वसीय) पु० स्त्री० पितुः स्वसुरपत्यं ठक् छण् वा ढकि

टिलोपः । पितृरस्यपत्ये ।

पैत्र न० पितुरिदं पिता देवता अस्य वा अण् । तर्ज्जन्यङ्गुष्ठयोर्मध्यस्थाने पितृतीर्थे, पितृदेवताके, पितृसम्बन्धिनि च त्रि० ।

पत्ल पु० मुनिभेदे ।

पैशाच पु० पिशाचेन निर्वृत्तः अण् । "सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति । स पापिष्ठो विवाहानां पैशाच" इत्युक्ते विवाहभेदे । पिशाचलते, तत्सम्बन्धिनि च त्रि० ।

पैष्टिक न० पिष्टानां समूहः ठक् तद्विकारो वा ठक् । पिष्टसमूहे, तद्विकारे व्यासे, मद्ये च ।

पैष्टी स्त्री० पिष्टस्य विकारः अण् ङीष् । पिष्टकविकाररूपे मद्यभेदे ।

पोगण्ड त्रि० पवते पुनाति वा पू–क्विप् पौर्गण्ड एकदेशो यस्य । विकलाङ्गे न्यूनाधिकाङ्गे "पौगण्डः पञ्चमाद्वर्षात् च दशमाद्धन", इत्युक्तवयस्के बालके पु० ।

पोटगल पु० पोटेन संज्ञेनमालेन गलति गल–अच् । नले, काशे च

पोटा स्त्री० चुप–अच् । पुरुषलक्षणयुक्तायां स्त्रियाम् ।

पोत पु० स्त्री० पू–तन् । बालके । नौकारूपे याने, समुद्रयाने, वस्त्रस्थाने, वस्त्रे, दशवार्षिकहस्तिनि च पु० गौरा० ङीष् । भूतिकायाम् स्त्री० ततः स्वार्थे कन् । पोतिकाप्यत्र ।

पोतवणिज् पु० पोते वणिक् । नौकया वाणिज्यकारे ।

पोतवाह पु० पोतं नावं वहति वह–अण् । नौकावाहके (दांडि) ।

पोताधान पु० पोतानां शिशूनामण्डजातमत्स्यानामाधानम् । क्षुद्रमत्स्यप्रक्षेपे (पोनारकाक) ।

पोत्र न० पू–त्र । वज्रे, शूकरमुखाग्रे लाङ्गलमुखाग्रे, वह्नौ च ।

पोत्रिन् पु० पोत्रमस्यास्ति इनि । शूकरे ।

पोष्ट्र पु० पुष–ष्ट्रन् । (कांटा करमजा) करञ्जभेदे । पोषके त्रि० ।

पोष्यवर्ग पु० पोष्याणां पाल्यानां वर्गः समुदायः । "माता पिता" गुरुः पत्नी त्वपत्यानि समाश्रिताः । अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृत" इत्युक्ते, "माता पिता गुरुर्भ्राता प्रजा दीनः समा-

श्रिताः । अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृत" इत्युक्तौ च अवश्यप्रतिपाल्यगणे ।

पौगण्ड न० पोगण्डस्य भावः अण् । कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधौ" त्युक्तौ त्रिशोरवस्थाभेदे ।

पौण्ड्र पु० देशभेदे तद्देशवासिनि ब० व० । स्वार्थे कन् इत्युभेदे ।

पौण्ड्रवर्द्धन पु० देशभेदे (बेहार) तद्देशवासिनि ब० व० ।

पौत्र पु० स्त्री० पुत्रस्यापत्यं शिवादाण् । एतस्य पुत्रे नप्तरि, 'पौत्रे-णानन्त्यमस्मृते" इति स्मृतिः । स्त्रियां ङीप् ।

पौनःपुनिक त्रि० पुनःपुनः भवः ठक् टिलोपः । मुहुर्भवे ।

पौनःपुन्य न० पुनः पुनरित्यस्य भावः ष्यञ् । यत्नद्भावे ।

पौनर्भव पु० पुनर्भुवि द्विरूढायां भवः अण् । द्वादशपुत्रमध्ये पुत्र-भेदे । अयम् अण् । पुनर्भूसम्बन्धिनि त्रि० । "पौनर्भवेन भर्त्रा सै"ति स्मृतिः । [त्रि० ।

पौर न० पुरे नगरे भवः अण् । रौहिषगणे (रामकर्पूर) पुरभवमात्रे

पौरव पु० पुरोर्गोत्रापत्यमण् । पुरुनामचन्द्रवंश्यनृपस्यापत्ये ।

पौरस्त्य त्रि० पुरोभवः त्यक् । पूर्व दग्भवे, अग्रभवे च ।

पौराणिक त्रि० पुराणं वेत्त्यधीते वा ठण् । पुराणज्ञे ।

पौरुष न० पुरुषस्य भावः कर्म वा अण् । पुरुषत्वे, विक्रमे, उद्यमे च । पुरुषस्येदम् अण् । ऊर्द्ध विस्तृतबाहुपार्श्विकमनुष्यपरिमाणे । "जवेऽपि मानेऽपि च पौरुषाधिक"मिति नैषधम् ।

पौरोगव पु० पुरोऽग्रे भाव्यवस्तुषु गौर्नेत्रं यस्य पुरोगुः ततः स्वार्थे प्रज्ञादाण् । पाकशालाध्यक्षे ।

पौर्णमास पु० पौर्णमास्यां विहितम् अण् । यागभेदे । तत्र कर्त्त-व्यायामिष्टौ स्त्री० । "पौर्णमास्यां पौर्णमास्या यजेते'ति श्रुतिः ।

पौर्णमासी स्त्री० पूर्णो मासोऽस्यस्याः प्रज्ञादित्वात् अण् ङीप् । पूर्णिमायाम् ।

पौलस्त्य पु० स्त्री० पुलस्त्यस्यापत्यम् यञ् । कुबेरे, रावणादौ च शूर्पणखायां स्त्री० ङीप् यलोपः ।

पौलि पु० पुल–महत्त्वे इलाच् ण तत, इञ्। ईषत्पक्वे कलाय यवादौ।

पौलोमी स्त्री० पुलोम्नोऽपत्यम् स्त्री अण्। शच्याम्।

पौष पु० पौषी पुष्यनक्षत्रयुक्ता पौर्णमासी अस्मिन् मासे अण्। पुष्य-नक्षत्रयुक्तपौर्णमासीघटिते चान्द्रे मासभेदे।

पौषी स्त्री० पुष्यनक्षत्रेण युक्ता पौर्णमासी अण् ङीप्। पुष्यनक्ष-त्रयुक्तायां पौर्णमास्याम्। [रीतिपुष्पकज्जले।

पौष्पक न० पुष्पेण निर्वृत्तम् अण् ततः स्वार्थे कन्। कुसुमाञ्जने

प्याय वृद्धौ भ्वा० आ० अक० सेट्। प्यायते, अप्यायि–अप्यायिष्ट।

प्युष उत्सर्गे चु० उभ० सक० सेट्। प्योषयति ते। अपुप्युषत् त।

प्युष विभागे दि० पर० सक० सेट्। प्युष्यते अप्युषत् अप्योषीत्।

प्यै वृद्धौ भ्वा० आ० अक० अनिट्। प्यायते अप्यास्त।

प्र अव्य० प्रथ–ड। आरम्भे, गतौ, उत्कर्षे, प्राधान्ये, सर्वतोभावे, उत्पत्तौ, ख्यातौ, व्यवहारे च।

प्रकट त्रि० प्र+कट–अच्। स्पष्टे।

प्रकटित त्रि० प्र+कट–क्त। प्रकाशिते।

प्रकम्पन पु० प्र+कपि–णिच्–युच्। "वायौ प्रकम्पनेनालु चकम्पिरे" इति माघः नरकभेदे च। [प्रकीर्ण पुष्पादौ त्रि०।

प्रकर पु० प्र+कृ–भावे अप्। समूहे अधिकारे च। कर्मणि अप्।

प्रकरण न० प्र+कृ–ल्युट्। प्रस्तावे, अभिनेयनायकादिके दृश्यकाव्य-भेदे, ग्रन्थसन्धौ, एकार्थप्रतिपादकग्रन्थांशे च।

प्रकर्ष पु० प्र+कृष–घञ्। उत्कर्षे।

प्रकाण्ड पु० प्रकृष्टः काण्डः प्रा०। वृक्षस्य मूलादारभ्य शाखान्ते भागे। प्रशस्ते न०। [अत्यर्थेऽनुमतौ च अव्य०।

प्रकाम त्रि० प्रगतः कामम् प्रा० स०। यथेष्टे। प्र+कम–घञ्।

प्रकार पु० प्र+कृ–घञ्। भेदे, सादृश्ये च।

प्रकाश पु० प्र+काश–कर्त्तरि अच् घञ् वा। आतपे, विकाशे च। कर्त्तरि अच्। विकाशयुक्ते त्रि०।

प्रकाशात्मन् पु० प्रकाशः आतपः अवभासो वा आत्मा स्वरूपं यस्य । सूर्ये, परमेश्वरे च । व्यक्तस्वरूपे त्रि० ।

प्रकीर्ण न० प्र+कृ—भावे क्त । चामरे, भिन्नजातीयानां मिश्रणे च पूतिकरञ्जे पु० कर्मणि क्त । विक्षिप्ते, विस्तृते भिन्नजातीयैः मिश्रिते च त्रि० । स्वार्थे कन् । अत्र चामरे न० अन्ये पु० ।

प्रकीर्य्य पु० प्रकीर्य्यतेऽसौ प्र+कृ—क्यप् । (नाटाकरमजा) करञ्जभेदे । व्याप्ते त्रि० ।

प्रक्रान्त त्रि० प्र+क्रम—क्त । अधिक्रान्ते, आरब्धे, प्रकरणप्राप्ते च ।

प्रकृति स्त्री० प्रकरोति प्र+कृ-क्तिच् । सांख्यमतसिद्धे जगदारम्भके सत्त्वरजस्तमोरूपगुणत्रयात्मके प्रधाने, उपादानकारणे, "प्रकृतिश्च दृष्टान्तानुपरोधादि"ति शारीरकसूत्रम् । स्वभावे प्रकृतिस्त्वां नियोक्ष्यती"ति गीता । लिङ्गे, स्वामिनि, अज्ञाने, शुक्रादि, बीजे, राष्ट्रे, स्वस्यादौ राज्याङ्गे, पौरुषेयौ, "नृपतिः प्रकृतीरवेक्षतु"मिति रघुः । दुर्गे, बले, गिल्लिनि, भक्तौ, योषिति, परमात्मनि, पञ्चभूतेषु करणे, गुच्छे, जन्तौ, एकविंशत्यक्षरपादके छन्दोभेदे मातरि, व्याकरणोक्ते प्रत्ययोत्पत्तिनिमित्ते शब्दभेदे च ।

प्रकृष्ट त्रि० प्र+कृष—क्त । उत्कर्षयुक्ते ।

प्रकोष्ठ पु० प्रगतः कोष्ठं प्रा० स० । कूर्परस्याधोभागस्थे मणिबन्धपर्य्यन्ते हस्तावयवे, गृहद्वारपिण्डे च ।

प्रक्रम पु० प्र+क्रम—घञ् न वृद्धिः । क्रमे, अवसरे, उपक्रमे च ।

प्रक्रिया स्त्री० प्र+कृ—श । अधिकारे, प्रकरणार्थे, राज्ञां छत्रचामरधूननादिव्यापारे च ।

प्रक्व(का)ण पु० प्र+क्वण—अण् घञ् वा । वीणायाः शब्दे ।

प्रक्ष्वेडन पु० प्र+क्ष्वेड—ल्यु । नाराचास्त्रे । [अश्वतरे च पु० ।

प्रखर त्रि० प्रकृष्टः खरः प्रा० स० । अत्यन्तोग्रे । हयशब्दायां, कुक्कुटे,

प्रख्या त्रि० प्र+ख्या—अ । सादृश्ये । ब० । उत्तरपदस्थः । तुल्यार्थे यथा पितृप्रख्यः एवं निभादयोऽप्यत्र ।

प्रगण्ड पु० गण्डि वदनैकदेशे अच् प्रकृष्टो गण्डः अवयवः । कूर्परोपरि

रिक्तपर्व्वभागे । बहिःप्राकारे दुर्गप्राकारभित्तौ, सैन्यानां निवेशनस्थाने च स्त्री० गौरा० ङीष् ।

प्रगल्भ त्रि० प्र+गल्भ–अच् । प्रत्युत्पन्नमतौ, प्रतिभान्विते च नायिकाभेदे स्त्री० ।

प्रगाढ़ त्रि० प्रकर्षेण गाढ़म् गाह–क्त । अत्यन्तश्लिष्टे, दृढ़े च ।

प्रगुण त्रि० प्रकृतौ गुणः येन प्रकृष्टो गुणो यस्य वा । ऋजुतायुक्ते, दक्षे च । प्रकृष्टगुणोऽप्यत्र ।

प्रगृह्य न० प्र+ग्रह-क्यप् । व्याकरणोक्ते स्वरसन्धिराहित्ययोग्ये पदे ।

प्रगे अव्य० प्रगीयतेऽत्र प्र+गै–के । अतिप्रातःकाले ।

प्रघण(न) न० प्र+हन–अप् नि० कुत्वणत्वे । बहिर्द्वारप्रकोष्ठके अलिन्दे । मतान्तरे णत्वम् ।

प्रग्र(ग्रा)ह पु० प्रगृह्यते प्र+ग्रह+अप् घञ् वा । ग्रहणे अश्वादीनां रज्ज्वौ, किरणे, तुलास्तम्भे, बन्धाम्, नियमने, भुजे, कर्णिकारवृक्षे च ।

प्रचक्र न० प्रगतञ्चक्रं प्रा० स० । स्वचक्रात् परचक्रं प्रति चलिते,

प्रचण्ड त्रि० प्रकर्षेण चण्डः प्रा० । दुर्द्धर्षे, दुर्वहे, दुरन्ते, प्रतापान्विते च । श्वेतकरवीरे ए० । दुर्गायां नायिकाभेदे स्त्री० ।

प्रचण्डमूर्त्ति पु० प्रचण्डा मूर्त्तिरस्य । वरुणवृक्षे । भयानकदेहे त्रि० ।

प्रचय पु० प्र+चि–अच् । समूहे, उपचये, तज्जनके शिथिलसंयोगे च ।

प्रच(चा)र पु० प्रचरत्यत्र प्र+चर–अप् घञ् वा । पथि । भावे घञ् । प्रसारे गतौ च । [घूर्णिते ।

प्रचलायित त्रि० प्रचलवदाचरितः प्रचल+क्यच्–क्त । निद्रादिना

प्रचुर त्रि० प्र+चुर–क । बहुले ।

प्रचेतसी स्त्री० प्रकर्षेण चेतयति मूर्च्छितं चित-णिच्–असिच् ङीप् । कट्फले तच्चूर्णस्य हि मूर्च्छानाशकता वैद्यकसिद्धा ।

प्रचेतस् पु० प्र+चित–असि च । वरुणे, मुनिभेदे, प्रकृष्टहृदये त्रि० ।

प्रचोदनी स्त्री० प्रचोद्यते अपसार्य्यते रोगोऽनया चुद–णिच्–ल्युट् ङीप् । कण्टकारिकायाम् ।

प्रच्छ जिज्ञासायां तु० पर० द्विक० अनिट् । पृच्छति अप्राक्षीत् ।

प्रच्छर्दपट पु० प्रच्छाद्यतेऽनेन प्र+छद-णिच् घ ह्रस्वः कर्म्म० । (पाचुड़ि) प्रावरणवस्त्रे ।

प्रच्छन्न न० प्र+छद्-क्त । गुप्तद्वारे अन्तर्द्वारे । आच्छन्ने त्रि० ।

प्रच्छर्दिका स्त्री० प्रच्छर्दयति छर्द-णिच्-ण्वुल् । वमिरोगे ।

प्रच्छादन न० प्रच्छाद्यतेऽनेन छद-णिच्-ल्युट् । उत्तरीयवस्त्रे ।

प्रजन पु० प्रजायतेऽनेन प्र+जन-अप् । स्त्रीगव्यादिषु पुंगवस्य संयोजने (पालदेओया) ।

प्रजा स्त्री० प्र+जन-ड । सन्ततौ, जने च ।

प्रजाता स्त्री० प्रजातं प्रजननं गर्भमोचनमस्त्यस्याः अर्श आद्यच् । प्रसूतायां स्त्रियाम् । प्र+जन-क्त । जाते त्रि० ।

प्रजापति पु० ईत० । चतुर्मुखे ब्रह्मणि, प्रजासर्ज्जके दक्षादौ, नरपाले, जामातरि, सूर्य्ये, वह्नौ, त्वष्टरि च ।

प्रजावती स्त्री० प्रजा विद्यतेऽस्याः मतुप् मस्य वः । भ्रातृजाय भाप, "सर्वेषामेकजातानामेकश्चेत् पुत्रवान् भवेत्" सर्वांस्तांस्तेन पुत्रेण पुत्रिणः" इत्युक्ते भ्रातुष्पुत्रस्यात्मनः पुत्रत्वात् भ्रातृजायायाम् आत्मपुत्रवत्त्वम् । सन्तानवत्यां स्त्रियाञ्च ।

प्रज्ञा स्त्री० प्र-ज्ञा अ । बुद्धौ, सरस्वत्याञ्च ।

प्रज्ञान न० प्र-ज्ञा भावे ल्युट् । बुद्धौ । करणे ल्युट् । चिह्ने, अर्श आद्यच् । परिज्ञाते त्रि० ।

प्रज्ञु त्रि० प्रगते विरले ज्ञानुनी यस्य ज्ञानुनी ज्ञुः । विरलजानुके जने

प्रडीन न० प्र+डी-क्त तस्य नः । पक्षिणां गतिभेदे ।

प्रणय पु० प्र+नी-अच् । प्रीतौ, तया प्रार्थने, प्रसवे, स्नेहे, विश्वासे, निर्व्वाणे च ।

प्रणयिन् पु० प्रणयः प्रेम अस्त्यस्य इनि । भर्त्तरि नायके च । भार्य्यायां स्त्री० ङीप् ।

प्रणव पु० प्रकर्षेण नूयतेऽनेन प्र-नू-अप् । ओङ्कारे वेदादौ पाठे [शब्दभेदे ।

प्रणाद पु० प्र+नद-घञ् । अनुरागजे गीतकृतादौ शब्दे उच्चशब्दे, कर्णरोगभेदे च ।

प्रणाम पु० प्र+नम–घञ् । प्रणतौ स्वापकर्षबोधकव्यापारे करशिरः-संयोगादौ, "पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा । वचसा मनसा चैव प्रणामोऽष्टाङ्ग उच्यते, इत्युक्ते अष्टाङ्गव्यापारभेदे च ।

प्रणाय्य त्रि० । प्र+नी यत् । असम्मते द्वेष्ये, प्रीतिशून्ये, साधौ, प्रिये च ।

प्रणाली स्त्री० प्र+नल-घञ् गौरा०ङीष् । जलवहनमार्गे परम्परायाञ्च

प्रणिधान न० प्रणिधीयते प्र+नि+धा–ल्युट् । प्रयत्ने, अभिनिवेशे, योगशास्त्रोक्ते चित्तनविशेषरूपे समाधिभेदे च ।

प्रणिधि पु० प्रणिधीयते प्र+नि+धा–कि । चरे, अनुचरे, याचने, अवधाने च । [गीता ।

प्रणिपात पु० प्र+नि+पत–घञ् । प्रणामे । "तद्विद्धि प्रणिपातेने"ति

प्रणिहित त्रि० प्र+नि+धा–क्त । प्राप्ते, स्थापिते, समाहिते च ।

प्रणीत त्रि० प्र+नी–क्त । पाकेन रूपरसान्यथाभावापन्ने पदार्थे, चिप्ते, निवेशिते विहिते च । यज्ञे संस्कृताग्नौ पु० । यज्ञपात्रभेदे स्त्री०

प्रणेय त्रि० प्र+नी–यत् । वश्ये अधीने ।

प्रतति स्त्री० प्र+तन–क्तिन् । विस्तारे, बल्लग्राञ्च । बल्लां वा ङीप् ।

प्रतन पु० प्र+ट्युल तुट् च । पुरातने पदार्थे ।

प्रतल न० प्रकृष्टं तलम् । पातालभेदे । प्रकृष्टं तलमस्य । विस्तृताङ्गु-लिके पाणौ पु० । [लतायाम् ।

प्रतानिनी स्त्री० प्रतानः विस्तारोऽस्त्यस्याः इनि । विस्तारवत्यां

प्रताप पु० प्र+तप-घञ् । कोपदण्डजाते तेजसि, तापे, अर्कवृक्षे च ।

प्रतापन पु० प्रतापयति तप–णिच्–ल्यु । नरकविशेषे । तापके त्रि०

प्रतापस पु० तपसि साधु अण् प्रकृष्टस्तापसः । शुक्लार्कवृक्षे ।

प्रतारण न० प्र+तॄ–णिच्–ल्युट् । वञ्चने । युच् । प्रतारणात स्त्री०

प्रति अव्य० प्रथ इति । व्याप्तौ, लक्षणे, कथञ्चित् प्रकारसापेक्षस्य कथने, भागे, प्रतिदाने, प्रतिनिधीकरणे, स्तोके, क्षेपे, निश्चये, व्याप्तौ, आभिमुख्ये, स्वभावे च । [कृत्रिमभूषायाञ्च ।

प्रतिकर्मन् न० प्रति+कृ–मनिन् । विद्यमानस्य गुणान्तराधाने

प्रति(ती)कार पु० प्रति+कृ-घञ् वा दीर्घः। वैरनिर्यातने कृतस्य-
पकारस्य तुल्यरूपापकारकरणेन शोधने, रोगादेश्चिकित्साद्याञ्च।
प्रति(ती)काश प्रतिरूपं काशते काश-घञ् वा दीर्घः। तुल्यरूपे।
प्रतिकूल त्रि० प्रतिरूपं कूलं पक्षोऽस्य। अनुकूले विरुद्धपक्षा-
वलम्बिनि।
प्रतिकृति स्त्री० प्रति+कृ-क्तिन्। प्रतिमायां, सादृश्ये, प्रतिनिधौ च।
प्रतिक्षण अव्य० क्षणं क्षणं व्याप्य व्याप्तौ अव्ययी०। अभीक्ष्णे।
प्रतिक्षिप्त त्रि० प्रति+क्षिप-क्त। प्रेषिते अधिक्षिप्ते बाधिते तिरस्कृते च
प्रतिग्रह पु० प्रति+ग्रह-अप्। स्वीकारे, अदत्तार्थदत्तद्रव्यस्य ग्रहणे,
सैन्यपृष्ठे, पक्षदूषणे च।
प्रतिघ पु० प्रति+हन-ड न्यङ्क्वा० कुत्वम्। प्रतिघाते, कोपे च।
प्रतिघातन न० प्रति-हन स्वार्थे णिच् ल्युट्। मारणे।
प्रतिच्छन्दस् न० छन्दोऽभिप्रायः प्रतिगतश्छन्दः। अभिप्रायानुरूपे,
प्रतिरूपे, अनुरोधे च। [सादृश्ये च।
प्रतिच्छाया स्त्री० प्रतिरूपा छाया प्रा०। प्रतिमायां, प्रतिरूपतायां
प्रतिजागर पु० जागरस्य प्रतिनिधिः। प्रत्यवेक्षणाय गृहमवेक्षस्वेति
नियोगे। [(आलजिय)।
प्रतिजिह्वा स्त्री० प्रतिरूपा जिह्वा। तालूमूलस्थे जिह्वाकारे मांसपिण्डे
प्रतिज्ञा स्त्री० प्रति+ज्ञा-अ। कर्त्तव्यतयोपदेशे, साध्यवचनेन पक्षनि-
र्देशे, यथा पर्वतोऽग्निमान् इत्यादिवाक्यम् अनेन वह्निमत्त्वेन पर्व-
तस्य निर्देशः। व्यवहारे पक्षाभिधायके "इदमनेन मम गृहीतं न
ददाती"ति वाक्ये च। ल्युट्। प्रतिज्ञानमप्यत्र न०।
प्रतिज्ञात त्रि० प्रति+ज्ञा-क्त। प्रागुक्तप्रतिज्ञाविषये "ततोऽर्थीलेख-
येत् सद्यः प्रतिज्ञातार्थसाधन"मिति स्मृतिः।
प्रतिदान न० प्रतिरूपं तुल्यरूपं दानम् प्रा० स०। विनिमये तुल्य-
रूपदाने, न्यस्तस्य द्रव्यस्य प्रत्यर्पणे च। [क्षिणस्ये"ति भट्टिः।
प्रतिध्वनि पु० प्रतिरूपोध्वनिः। प्रतिशब्दे "प्रतिध्वनीनालक्षता-
प्रतिध्वान पु० प्रति+ध्वन-घञ्। प्रतिशब्दे।

प्रतिनप्तृ पु० प्रतिनिर्दिष्टो नप्ता पौत्रः प्रा० । प्रपौत्रे ।

प्रतिनिधि पु० प्रति+निधीयते तुल्यरूपतया स्थाप्यते प्रति+नि+धा-कि । प्रतिरूपे, प्रतिमायां च ।

प्रतिपक्ष पु० प्रतिकूलः पक्षो यस्य । शत्रौ, व्यवहारे विरुद्धपक्षे प्रतिवादिनि च । प्रा० ब० । सादृश्ये ।

प्रतिपत्ति स्त्री० प्रति+पद्-क्तिन् । प्रवृत्तौ, प्राप्तौ, गौरवे प्राप्तौ पदप्राप्तौ, कर्त्तव्यताज्ञाने च 'विषादल्लुप्तप्रतिपत्तिविक्लिवम्" इति रघुः

प्रतिपत्फला स्त्री० प्रतिपत्फलं फलं यस्याः । क्षुद्रकारवेल्ले । (छोटउच्चे)

प्रतिपद् स्त्री० प्रतिपद्यते उपक्रम्यते पक्षोऽनया प्रति+पद्-क्विप् । पक्षारम्भके तिथौ ।

प्रतिपन्न त्रि० प्रति+पद्-क्त । अवगते, स्वीकृते, "प्रतिपन्नं हि विचेतनैरपी"ति कुमारः । विश्वस्ते च ।

प्रतिपादन न० प्रति+पद्-णिच्-ल्युट् । दाने, बोधने, प्रतिपत्तौ च।

प्रतिप्रसव पु० प्रति+प्र+सू-अप् । विधिद्वय पुनःप्राप्तिसम्भावनायाम्

प्रतिबन्ध पु०प्रति+बन्ध घञ् । कार्य्यप्रतिघाते । एवं ल्। प्रतिरोधके त्रि०

प्रतिबन्धि(न्दि) पु० प्रति+बन्ध-(बन्ह्) वा इन् । अनिष्टान्तर-प्रसङ्गके बाक्ये ।

प्रतिबल पु० प्रतिकूलं बलं यस्य । "यत्नौ प्रतिबलजधे"रिति वेणी० । प्रतिरूपं बलं यस्य । तुल्यबले त्रि० "यो मे प्रतिबलो लोके" इति चण्डी ।

प्रतिभय त्रि० प्रतिगतं भयमस्मात् । भयहेतौ भयङ्करे ।

प्रतिभा स्त्री० प्रति+भा-क । बुद्धौ, प्रत्युत्पन्नबुद्धौ च ।

प्रतिभू पु० प्रतिनिधि र्भवति भू-क्विप् । लग्नके (जामिन) ।

प्रतिमा स्त्री० प्रति+मा-क । गजदन्तस्य बन्धे, सदृशीकरणे, सदृश-मृत्तिकाशिलादिमूर्त्तौ । "प्रतिमायां शिलाबुद्धि"रिति पुराणम् । ष० । उत्तरपदस्थः । सदृशे त्रि० । यथा देवप्रतिमः ।

प्रतिमान न० प्रतिमीयतेऽनेन प्रति-मि-मा-या ल्युट् । प्रतिबिम्बे, प्रतिमायां, गजकुम्भस्याधोभागे तद्दन्तयोर्मध्यस्थाने च ।

प्रतिमुक्त त्रि० प्रति+मुच–क्त । परित्यक्ते, परित्यागे च ।

प्रतियत्न पु० प्रति+यत–नङ् । वाञ्छायाम्, उपपत्तौ, निष्पत्तौ, बन्ध्यां सतो गुणान्तराधानरूपे संस्कारे, यत्नेन, प्रतिपत्तौ च । प्रतिरूपो यत्नो यस्य ब० । प्रतियत्नयुक्ते त्रि० ।

प्रतियातना स्त्री० प्रति+यात्यतेऽनया पु० यत–युच् । प्रतिज्ञायाम् पा० ष० । तुल्यरूपयातनायाम् ।

प्रतियोगिन् त्रि० प्रतिरूपं युज्यते प्रति+युज+घिनुण् । प्रतिकूलसम्बन्धवति । यथा अभावस्य प्रतिकूलसम्बन्धवत्त्वात् घटादिरस्य प्रतियोगी । विरुद्धपक्षे च ।

प्रतिरूप न० प्रतिगतं रूपम् । प्रतिच्छायायां, प्रतिबिम्बे च प्रतिगत रूपमस्य ब० । सदृशे त्रि० । स्वार्थे कन् । अत्रैव ।

प्रतिविरोध पु० प्रति+रुध–भावे घञ् । बाधे, प्रतिबन्धे, निरोधे, तिरस्कारे, चौर्ये च । कर्त्तरि क्विप् । चौरे । रघुलुण्ठिन्यलावण्यत ।

प्रतिलोम त्रि० प्रतिगतं लोम आनुकूल्यमस्मात् प्रति+लोमन् अच् समा० । वामे विपरीते ।

प्रतिलोमज पु० प्रतिलोमात् जातः जन–ड । उत्तमवर्णस्त्रियाम् अधमवर्णात् जाते सङ्कीर्णवर्णे ।

प्रतिवचन न० प्रतिरूपं वचनम् । प्रतिवाक्ये, उत्तरे, विरुद्धवाक्ये च ।

प्रतिवात त्रि० प्रतिगतो वातो यतः । यस्मात् प्रदेशात् वायुः प्रत्यागच्छति तस्मिन् देशे "प्रतिवातेऽनुवाते चे"ति मनुः ।

प्रतिवादिन् पु० त्रि० प्रतिकूलं वदति वद–णिनि । प्रतिपक्षे व्यवहारे प्रत्यर्थिनि अभियोज्ये (आसामी) "कारणे प्रतिवादिनी"तिस्मृतिः

प्रतिवासि(वेशि)न् त्रि० प्रत्यारूढं वसति (विशति) प्रति+वस-(विश) वा णिनि । (पड़सि) गृहासन्नवासिनि । स्त्रियां ङीप् । "दर्शि हि प्रतिवासि(वेशि)नी"ति सा हे० २५० ।

प्रतीकार पु० प्रति+कृ–घञ् । प्रतीकारे ।

प्रतीकाश न० प्रतिरूपं बिम्बम् । बिम्बसदृशे प्रतिच्छायायाम् ।

प्रतीविषा स्त्री० प्रतिविष्टं विषं यया । अतिविषायाम् (आतइच्) ।

प्रतिग्रासन न० प्रति+ग्रास-ल्युट्। भक्ष्यादेर्निगरणे नियोगे
प्रतिग्राह्य पु० प्रति+ग्रै-ण। दोषकरोगे। [गृहे, आश्रये च।
प्रतिश्रय पु० प्रतिश्रीयते प्रति+श्रि-अच्। यज्ञगृहे, सभायां,
प्रतिश्रव पु० प्रति+श्रु-अप्। स्वीकारे।
प्रतिश्रुत् स्त्री० प्रतिरूपं श्रूयते श्रु-क्विप्। प्रतिशब्दे प्रतिध्वनौ।
प्रतिषेध पु० प्रति+सिध-घञ्। निषेधे "मा कुरु" इत्यादिना निवारणे। ल्युट्। तत्रैव न०।
प्रतिष्कम्भ पु० प्रति+स्तम्भ-घञ् षत्वम्। प्रतिबन्धे।
प्रतिष्ठा स्त्री० प्रति+स्था-अच्। चिन्तौ, व्रतयागादेः समाप्तौ, चतुरक्षरपादके छन्दोभेदे, कूपादेः संस्कारे, व्रतानां समाप्तौ कर्त्तव्ये कर्मभेदे, आश्रये च "ब्रह्म पुच्छं प्रतिष्ठे"ति श्रुतिः।
प्रतिसर पु० प्रति-सृ+अच्। सैन्यपश्चाद्भागे, हस्तसूत्रे च।
प्रतिसर्ग पु० प्रतिरूपः प्रतिकूलो वा सर्गः। ब्रह्मणः सृष्टि-तुल्यायां मरीच्यादिसृष्टौ प्रलये च। [निकायाम् (परदा)
प्रतिसीरा स्त्री० प्रतिसिनोति सीयते वा रक् दीर्घश्च। जव-
प्रतिसूर्यक पु० प्रतिरूपः सूर्यः स्वार्थे कन्। उपसूर्यकमण्डले (सूर्यसभा)। तत्समवर्णे स्फटिकादौ च।
प्रतिसृष्ट त्रि० प्रति+सृज-क्त। प्रत्याख्याते, प्रेषिते च।
प्रतिसीमा स्त्री० प्रतिनिर्दिष्टा सीमा सीमवल्ली। मक्षिकवल्लाम्।
प्रतिहत त्रि० प्रति+हन-क्त। क्षिप्ते, रुद्धे निरस्ते, प्रतिस्खलिते च।
प्रतिहार पु० प्रति+हृ-घञ् वा दीर्घः हारे अण्। द्वारपे, मायाकारे च त्रि० स्त्रियांङीप्। ण्वुल्। द्वारपाले त्रि०। णिनि। प्रतीहारीत्यत्र, मायाकारे च। [त्रि०।
प्रतीक पु० प्रति-कन् नि० दीर्घः। अवयवे। प्रतिरूपे, विलोमे च
प्रतीक्षा स्त्री० प्रति-ईक्ष अ। अपेक्षायाम्।
प्रतीच्य त्रि० प्रति+ईच-यत्। पूज्ये "प्रतीच्यं तत्प्रतीच्यायैपिप्रेष्ठ-श्चक्रे" इतिमाघः। [प्रतीच्योऽत्र।
प्रतीचीन त्रि० प्रतीच्यां भवः ख। पश्चिमदिग्भवे। यतु।

प्रतीत त्रि० प्रति-इण-क्त । ख्याते, ज्ञाते, दृष्टे, आदरे च ।
प्रतीति स्त्री० प्रति-इण क्तिन् । ज्ञाने, ख्याती, आदरे, हर्षे च ।
प्रतीप त्रि० प्रति+अप्-अर्म्मा० अच् नि० । प्रतिकूले । चन्द्रवंश्ये, नृपभेदे पु० । [णिनि । आर्य्यायाम् ।
प्रतीपदर्शिनी स्त्री० प्रतीपं प्रतिकूलं दर्शयति दृश-णिच् ।
प्रतीर न० प्रतीर्य्यते प्र+तीर-क । तटे, तीरे ।
प्रतीवाप पु० प्रति+वप घञ् दीर्घः । गलितखर्णादेरचूर्णने ।
प्रतीह पु० प्रहृष्यतेऽनेन हृष-घञ् । अश्वादिताड़नदण्डे (चाबुक्) ।
प्रतोली स्त्री० प्र+तुल-अच् गौ०ङीष् । रथ्यायाम्, पुराभ्यन्तरवर्त्मनि, दृढ़ादौ निर्म्मिते पथि च ।
प्रत्न त्रि० प्र+त्न । पुरातने ।
प्रत्यक्पर्णी स्त्री० प्रत्यञ्चि पर्णान्यस्याः ङीप् । अपामार्गे प्रत्यक्पुष्पी-त्यप्यत्र । [वृक्षे, मूषिकपर्य्यायञ्च ।
प्रत्यक्श्रेणी स्त्री० प्रतीची श्रेणीव अस्याः न कप् । दन्ती-
प्रत्यक्ष अव्य० प्रतिरूपमक्ष्णः अव्ययी० अच् । इन्द्रियजन्ये ज्ञान-भेदे । अर्श आद्यच् । तद्विषये त्रि० ।
प्रत्यग्र त्रि० प्रतिगतमग्रमस्यत्वम् प्रा० । नूतने, शोधिते च ।
प्रत्यङ्गिरा स्त्री० देवीभेदे ।
प्रत्यच् त्रि० प्रति+अनुच-क्विप् । पश्चिमकाले, पश्चिमदेशे च पश्चिमायां दिशि स्त्री० ङीप् । प्रतीची ।
प्रत्यनीक पु० प्रतिकूलमनीकं यस्य । रिपौ, विघ्ने च ।
प्रत्यन्त पु० प्रति गतोऽन्तम् प्रा० । म्लेच्छदेशे । सन्निकृष्टदेशे त्रि० ।
प्रत्यन्तपर्व्वत पु० प्रत्यन्तः सन्निकृष्टः पर्व्वतः । दुर्गतपर्वतसमीपस्थे पर्वते
प्रत्यभियोग पु० प्रतिरूपोऽभियोगः । अभियुक्तेन प्रतिवादिना स्वाभियोगिनं प्रति अभियोगान्तरकरणे ।
प्रत्यभिवाद पु० प्रति+अभि+वद णिच्-घञ् । अभिवादस्य प्रतिरूपे आशीर्व्वचनादौ । ल्युट् । प्रत्यभिवादनमप्यत्र न० ।
प्रत्यय पु० प्रति+इण्-अच् । शपथे, ज्ञाने, विश्वासे, अधीने, शब्दे,

छिद्रे, आधारे, निश्चये, खादुनि, कारणे, "अमेक्षते प्रत्ययवृत्त-मभि"ति कुमारः व्याकरणोक्ते प्रकृतिं निमित्तीकृत्य विधीयमाने शब्दभेदे च ।

प्रत्ययित त्रि० प्रति+अय–क्त । आप्ते, विश्वस्ते, प्रतिगते च ।

प्रत्यर्थिन् त्रि० प्रत्यर्थयते प्रति–अर्थ–णीङ्ने णिनि । शत्रौ, प्रतिकूल-मर्थयते णिनि । व्यवहारे प्रतिवादिनि । [पुनर्दाने ।

प्रत्यर्पण न० प्रति+ऋ–णिच्–युक्–ल्युट् । प्रतिदाने गृहीतस्य धनादेः

प्रत्यवसान न० प्रति+अव+सो–ल्युट् । भोजने ।

प्रत्यवसित त्रि० प्रति+अव+सो–क्त । भुक्ते ।

प्रत्यवस्कन्द पु० प्रति+अव+स्कन्द–घञ् । व्यवहारे चतुर्विधोत्तर-मध्ये उत्तरभेदे । ल्युट् । "अर्थिनाभिहितो योऽर्थः प्रत्यर्थी यदि तं तथा । प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं हि तदि"ति स्मृत्युक्तलक्षणे उत्तरभेदे, औषधभेदे च न० ।

प्रत्यवस्थातृ त्रि० प्रत्यवतिष्ठते प्रतिपक्षतया विवदते प्रति+अव+स्था–तृच् । प्रतिपक्षवादिनि शत्रौ ।

प्रत्यवाय पु० प्रति+अव+इण् । पापे ।

प्रत्याख्यात त्रि० प्रति+आ+ख्या–क्त । निराकृते दूरीकृते ।

प्रत्याख्यान न० प्रति+आ+ख्या–ल्युट् निराकरणे ।

प्रत्यादिष्ट त्रि० प्रति+आ+दिश–क्त । निरस्ते ।

प्रत्यादेश पु० प्रति+आ+दिश–घञ् । निराकरणे ।

प्रत्यालीढ न० प्रति+आ+लिह–क्त । "आलीढं दक्षिणं पादं प्रत्या-लीढन्तु वामक"मित्युक्ते वामपादस्याग्रेण दक्षिणपादप्रसारणरूपे धनिनां स्थितिविशेषे । आस्वादिते त्रि० ।

प्रत्यासन्न त्रि० प्रति+आ+सद–क्त । अतिनिकटस्थे ।

प्रत्याहार पु० प्रति+आ+हृ–घञ् । योगशास्त्रप्रसिद्धे इन्द्रियाणां स्वस्वविषयेभ्योनिराकरणे ।

प्रत्युत्क्रम पु० प्रति+उद्+क्रम–घञ् न वृद्धिः । युद्धार्थोद्योगे, प्रधा-नप्रयोजनोद्देशेनाप्रधानारम्भे च ।

प्रत्युत्तर न० प्रतिरूपमुत्तरमस्य । उत्तरस्योत्तरवाक्ये ।

प्रत्युत्थान प्रति+उद्+स्था-ल्युट् । अभ्युत्थाने आगतस्य सम्मानार्थमासनादुत्थितौ । [चित्तमुद्भौ ।

प्रत्युत्पन्नमति त्रि० प्रत्युत्पन्ना तत्कालोचिता मतिर्यस्य । तत्कालो-

प्रत्युद्गमनीय न० प्रति+उद्+गम-अनीयर् । धौतवस्त्रयुग्मे, "गटछी ततप्रत्युद्गमनीयवस्त्रे"ति कुमारः पाठान्तरं प्रच्छे वेति न शुरुत्वम् सम्मुपस्थानयोग्ये, पूजनीये च त्रि० ।

प्रत्यूष पु० प्रत्यूषति रुजति कान्तिकान् ऊष-रुजायां क । प्रभाते, अष्टवसुमध्ये वसुभेदे च । अस्मि । प्रत्यूषम् । प्रभाते ।

प्रत्यूह पु० प्रति-ऊह-घञ् । विघ्ने ।

प्रथ ख्यातौ भ्वा० आ०सक० सेट् घटा० । प्रथते अप्रथिष्ट णिच् प्रथयति । अ प्रथा । [अपप्रथत् त ।

पृथ ख्यातौ अक० विस्तारे सक० चुरा० उभ० सेट् । प्रथयति-ते

प्रथम त्रि० प्रथ-अमच् । प्रधाने, आद्ये च । अस्मि सर्वनामतास्य ।

प्रथा स्त्री० प्रथ-अङ् । ख्यातौ ।

प्रथित त्रि० प्रथ-क्त । ख्याते ।

प्रथिमन् पु० पृथोर्भावः पृथु-इमनिच् प्रथादेशः । पृथुत्वे स्थूलत्वे ।

प्रथुक पु० प्रथ-कुकन् । चिपिटके ।

प्रदर पु० प्र-दृ-अप् । विदारणे, भङ्गे, योनिरोगभेदे च ।

प्रदीप पु० प्र+दीप-क । दीपे । [विषभेदे । प्रकाशके त्रि० ।

प्रदीपन पु० प्रदीपयति जठराग्निम् प्र+दीप+णिच्-ल्यु । स्यावरे

प्रदेश पु० प्र+दिश+घञ् । एकदेशे, "पितुः प्रदेशास्तवे"ति कुमारः । देशमात्रे च तर्ज्जन्यङ्गुष्ठसम्मिते माने, भित्तौ च ।

प्रदेशन न० प्रदिश्यते दिश-ल्युट् । न्यादेरुपहारे (भेटी) ।

प्रदेशिनी स्त्री० प्रदिश्यतेऽनया प्र+दिश-करणे ल्युट् ङीप् । तर्जन्यां तया हि वस्तु निर्दिश्यते खिनि । प्रदेशिनी अत्रैव ।

प्रद्युम्न पु० प्रकृष्टं द्युम्नं बलं यस्य । कन्दर्पे वैष्णवागमोक्ते चतुर्व्यूहात्मकविष्णोरंशभेदे च ।

प्रद्रव पु० प्र+द्रु–अप् । पलायने, घञ् । प्रद्रावोऽप्यत्र ।

प्रधन न० प्र+धा–ल्यु । युद्धे ।

प्रधान न० प्र+धा–ल्युट् । साङ्ख्यमतसिद्धायाम् सत्त्वरजस्तमोरूपगुण-त्रयात्मिकायां प्रकृतौ, तत्कार्य्ये बुद्धितत्त्वे, परमात्मनि, प्रधस्ते, मन्त्रिवे च । सेनापत्यध्यक्षे पु० । श्रेष्ठे त्रि० ।

प्रधि पु० प्रधीयन्ते काष्ठान्यत्र प्र+धा–कि । चक्रावयवकाष्ठासङ्घ-स्थाने रथनाभौ ।

प्रधूपिता स्त्री० प्र+धूप–क्त । सन्तापितायां "व्यसनप्रधूपिता"मिति-कुमारः । ज्योतिषोक्तायां सूर्य्यगन्तव्यायां दिशि च ।

प्रपञ्च पु० प्र+पञ्च–विस्तारे घञ् । विस्तारे, वैपरीत्ये, सङ्घये, प्रता-रणे, संसारे च ।

प्रपथ्या स्त्री० प्रकृष्टा पथ्या प्रा० स० । हरीतक्याम् ।

प्रपद न० प्रारब्धं पदम् प्रा० स० । पादस्याग्रभागे ।

प्रपन्न त्रि० प्र+पद–क्त । शरणागते, "प्रपन्नार्त्तिहरे ! देवी"ति चण्डी ।

प्रपा स्त्री० प्रपीयतेऽस्यां पा–ड । पानीयगृहे (जलसत्रघर) ।

प्रपाठक पु० प्रकृष्टः पाठोऽत्र कप् । वेदस्याध्यायावयवेऽंशभेदे ।

प्रपात पु० प्रपतत्यस्मात् पत–घञ् । तटरहिते निरवलम्बे पर्वतस्थाने, निर्झरे, कूले, अवस्कन्दे च । भावे–घञ् पतने ।

प्रपितामह पु० प्रजातः पितामहो यस्मात् प्रकृष्टः पितामहो वा । दक्षादिप्रजापतिरूपायां प्रजाजनकानामुत्पादके चतुर्मुखे ब्रह्मणि, पितामहपितरि च । तत्पत्न्याम् स्त्री० ङीप् ।

प्रपुन्नाड(ट) पु० पुमांसं नाडयति नाटयति नड-भंशे नट–अवस्कन्दने वा अण् प्रकृष्टः पुन्नाडः (पुन्नाटः) प्रा० । चक्रमर्दे (चाकुन्दा) वृक्षे । डस्य लत्वे प्रपुन्नालोऽप्यत्र दद्रुमर्दने च ।

प्रपूरिका स्त्री० प्रकर्षेण पूर्य्यते कण्टकैः । पूर-घञ् टाप् स्वार्थे कन् । कण्टकार्य्याम् ।

प्रपौण्डरीक पु० पुण्डरीक+स्वार्थेऽण् । प्रकृष्टं नदिव पुष्पं यस्य । गजमनुष्याणां चक्षुर्व्रणकारके शालपर्णीतुल्यपत्रके प्रभेदेक्षु ।

प्रपौत्र पु० प्रगतः कारणतया पौत्रम्। पौत्रस्य पुत्रे, तत्कन्यायां स्त्री० ङीप्।

प्रफुल्ल त्रि० प्र+फुल्ल विकाशने अच्। विकाशयुक्ते। प्र+फल–क्त इड-भावे अत इत्त्वम्। प्रफुल्लितमम्बजम्। "लोप्रहृतं वातुलतः प्रफुल्ल (ल्लित) मिति रघुः।

प्रबन्ध प्र+बन्ध–अच्। संदर्भे, ग्रन्थादेः रचने च।

प्रबन्धकल्पना स्त्री० ६त०। "प्रबन्धकल्पनां श्लोकसत्यां प्राज्ञाः कथां विदु"रित्युक्तलक्षणायामल्पसत्तायां वक्तुमिच्छाकथायाम्।

प्रबाल न० प्रकर्षेण बलति अवकम्पते उज्वलादित्वात् णः। नवपल्लवे "पुष्पं प्रबालोपहितं यदि स्यादि"ति कुमारः।
रक्तवर्णे मणिभेदे, (मुगा) वीणादण्डे च।

प्रबोध पु० प्र+बुध–घञ्। प्रकृष्टबुद्धौ, निद्राराहित्ये च।

प्रबोधन न० प्र–बुध–णिच्–ल्युट्। कालादिहेतुभिः पूर्वगन्धस्य न्यून-तायां प्रयत्नविशेषेण तद्दीपने।

प्रबोधनी स्त्री० प्र+बुध्यतेऽनया प्र+बुध–ल्युट्। दुरालभायाम् प्रबुध्यते हरिरत्र। कार्त्तिकशुक्लैकादश्याम्। प्र+बुध–णिच्–णिनि ङीप्। प्रबोधिनी तत्रैव।

प्रभञ्जन न० प्रभञ्जति वृक्षादीन् प्र+भञ्ज–युच्। वायौ।

प्रभद्र पु० प्रकृष्टं भद्रमस्मात् ५ब०। निम्बवृक्षे।

प्रभव पु० प्रभवत्यस्मात् प्र+भू–अप्। आद्यप्रकाशस्थाने, उत्पादके। "क्व सूर्य्यप्रभवो वंश" इति रघुः। ६० वर्षमध्ये वत्सरभेदे च। प्र+भू–भावे अप्। पराक्रमे जन्मनि च।

प्रभा स्त्री० प्र–भा अङ्। दीप्तौ।

प्रभाकर पु० प्रभां करोति कृ–अच्, सूर्य्ये मीमांसकभेदे च।

प्रभाञ्जन पु० प्रभयाञ्जयति अञ्ज–णिच्–ल्यु। शोभाञ्जने।

प्रभात न प्रा+भा–भावे क्त प्रकृष्टं भातमत्र। प्रातःकाले प्रा+भा–कर्त्तरि क्त। प्रभायुक्ते त्रि०।

प्रभाव पु० प्र+भू-घञ्। राज्ञां कोशदण्डजाते तेजसि, तेजसि, शक्तौ, सामर्थ्ये, विक्रमे, शान्तौ, उद्भवे च।

प्रभाष पु० प्र+भाष-अच्। अष्टवसुमध्ये वसुभेदे, प्रज्ञाष्टकथने च।

प्रभास पु० तीर्थभेदे "प्रभासः पुष्कराणि चे"ति स्कान्दमस्य।

प्रभिन्न पु० प्र+भिद-क्त। स्वनाम्नि गजे। प्रभेदवति त्रि०।

प्रभु पु० प्र+भू-डु। विष्णौ, शम्भौ, पारदे च। स्वामिनि, अधिपतौ च त्रि०।

प्रभूत त्रि० प्र+भू-क्त। प्रचुरे, उद्भूते, भूते उद्भते च।

प्रभृति अव्य० प्र+भृ-क्तिच्। तदारभ्येत्यर्थे। ब० उत्तरपदस्थः। तदादिके त्रि०।

प्रभेद् पु० प्रभिद्यतेऽनेन प्र+भिद-घञ्। प्रकारे। भावे घञ् भेदे।

प्रभ्रष्टक न० प्र+भ्रस्ज-क्त ततः कन्। चूड़ातोलम्बमाने माल्ये।

प्रमथ पु० प्र+मथ-अच्। शिवानुचरभेदे, ऋषे च। हरितक्यां स्त्री०।

प्रमथन न० प्र+मथ-ल्युट्। वधे, क्लेशने, विलोड़ने च।

प्रमथाधिप पु० ६त०। शिवे, महादेवे।

प्रमद् पु० प्र+मद-अप्। हर्षे। प्रमाद्यत्यनेन अप्। धुस्तूरफले न०। कर्त्तरि अच्। प्रमत्ते त्रि०।

प्रमदवन प्रमदस्य हर्षस्य वनम्। राज्ञोऽन्तःपुरस्थे वने।

प्रमदा स्त्री० प्रमाद्यत्यनया अप्। उत्तमयोषिति।

प्रमदावन न० प्रमदाया उचितं वनम्। अन्तःपुरसेवनयोग्ये वने प्रमदाकाननादयोऽप्यत्र।

प्रमनस् त्रि० प्रहृष्टं मनो यस्य हृष्यदलोपः। प्रहृष्टचित्ते।

प्रमा स्त्री० प्र+मा-अङ्। यथार्थज्ञाने भ्रमभिन्ने ज्ञाने।

प्रमाण न० प्रमीयतेऽनेन। प्रमाज्ञानसाधने इन्द्रियादौ, मर्य्यादायाम्, शास्त्रे, सत्यवादिनि, हेतौ प्रमातरि च। 'न प्रमाणं यदीन्दु'रिति मुद्राराक्षसम्। भावे ल्युट्। यथार्थज्ञाने।

प्रमातामह पु० प्रारब्धो मातामहो येन। आरब्धदलोपः मातामहपितरि। तत्पत्न्यां स्त्री० ङीप्।

प्रमाद पु० प्र+मद्–घञ् । कर्त्तव्ये अकर्त्तव्यबुद्धया ततो निवृत्तौ, अकर्त्तव्ये कर्त्तव्यबुद्धया तत्र प्रवृत्तौ वा अनवधानतायाम् ।

प्रमापण न० प्र+मीञ् हिंसायां स्वार्थे णिच्–आत्वे युक् ल्युट् । मारणे ।

प्रमिति स्त्री० प्र+मा–क्तिन् । प्रमायां यथार्थज्ञाने ।

प्रमीत त्रि० प्र+मीञ् हिंसायां क्त । मृते । "प्रमीतौ पितरौ यस्ये"ति स्मृतिः यत्रार्थे हतपत्नौ च ।

प्रमीला स्त्री० प्र+मील अ । तन्द्रायाम् ।

प्रमुख न० प्रकृष्टं मुखमारम्भः । तदादित्वे । ब० उत्तरपदस्थः । तदादिके, मान्ये, प्रथमे, प्रधाने, श्रेष्ठे च त्रि० । एकागदर्शे, समूहे च पु० ।

प्रमुद् त्रि० प्रकृष्टा मुद् यस्य । हृष्टे हर्षयुक्ते ।

प्रमुदित त्रि० प्र+मुद्–क्त । हृष्टे हर्षयुक्ते ।

प्रमेह पु० प्र+मिह–घञ् । रोगभेदे ।

प्रमोचनी स्त्री० प्रकर्षेण मुच्यते निष्क्रयीक्रियते भोजनार्थम् मुच–कर्मणि ल्युट् ङीप् । गोडुम्बायाम् (गोसुक) ।

प्रमोद पु० प्र+मुद्–हर्षे घञ् । हर्षे ।

प्रयत त्रि० प्र+यम–क्त । पवित्रे, नियमयुक्ते च ।

प्रयत्न पु० प्र+यत–नङ् । कार्य्यानुकूले यत्नभेदे । "प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम्"मिति न्यायोक्ते त्रिविधयत्ने स चात्मगुण इति वैशेषिकादयः बुद्धिधर्म्म इति सांख्यादयः । प्रयासे च ।

प्रयाग पु० प्रकृष्टो यागो यस्मात् ५ ब० । गङ्गायमुनयोः सङ्गमजाते तीर्थभेदे, इन्द्रे शतक्रतौ च । ५ ब० । अत्र अश्वमेधाङ्गस्नानस्य तथात्वम् । कर्म० । प्रकृष्टे यज्ञे ।

प्रयाम पु० प्र+यम–घञ् । महार्घ्यतावधात् धान्यादौ जनानामादरातिशये

प्रयास पु० प्र+यस–घञ् । प्रयत्नशब्दार्थे, अज्ञाने च ।

प्रयुत न० दशलक्षसङ्ख्यायां तत्संख्याते च "लक्षं प्रयुतकोटयः" इति लीलावती ।

प्रयोक्तृ त्रि० प्र+युज–तृच् । प्रयोगकर्त्तरि ऋणदानादौ धनप्रयोग-कर्त्तरि उत्तमर्णे, प्रयोजकमात्रे च ।

प्रयोग पु० प्र+युज–घञ् । अनुष्ठाने वशीकरणे, निदर्शने, अस्त्रे च ।

प्रयोजक त्रि० कार्य्यादौ भृत्यादौ प्रयुङ्क्ते प्र+युज–ण्वुल् । निकृष्टस्य भृत्यादेः प्रेरके, व्याकरणोक्ते हेतुसंज्ञे कर्त्तरि च ।

प्रयोजन न० प्र+युज–ल्युट् । कार्य्ये, उद्देश्ये, हेतौ च ।

प्रयोज्य त्रि० प्रयोक्तुं शक्यते प्र+युज–शक्यार्थे यत् । नियोज्ये निकृष्टे भृत्यादौ । [प्ररोह ।

प्ररूढ़ त्रि० प्र+रुह–क्त । प्रवृद्धे, बहुमूले, जाते च । भावे घञ् ।

प्ररोह पु० प्र+रुह–अच् । अङ्कुरे "प्रूयप्ररोह इवे"ति रघुः । आरोहे च ।

प्रलम्ब पु० दैत्यभेदे । प्र+लम्ब–अच् । प्रकर्षेण लम्बमाने त्रि० ।

प्रलम्बघ्न पु० प्रलम्बं हन्ति हन–टक् । बलदेवे प्रलम्बहादयोऽस्य ।

प्रलय पु० प्रलीयतेऽस्मिन् प्र+ली–अच् । कृत्स्नपदार्थानां नाशाधिकरणे काले, ब्रह्मणोदिनावसाने च । भावे घञ् । नाशे, चेष्टाभावे च "प्रलयान्योन्मिषिते विलोचने" इति कुमारः ।

प्रलाप पु० प्र+लप–घञ् । अनर्थकवाक्ये, निष्प्रयोजने उन्मत्तादिवाक्ये च ।

प्रलापघ्न् पु० प्रलापं हन्ति हन–क्विप् । कुलत्थजातेऽङ्गने ।

प्रवचन न० प्र+वच–ल्युट् । वेदार्थज्ञाने, प्रकृष्टवाक्ये च ।

प्रव(ब)ण पु० प्र+व(ब)ण–अच् । चतुष्पथे निम्नस्थाने, उदरे च नञ्, आयते, प्रगुणे त्रणे, मृते, स्निग्धे, आसक्ते, क्लीबे च त्रि० ।

प्रवयस् त्रि० प्रकृष्टं वयोऽस्य । प्रवृद्धे ।

प्रवर पु० प्र+वृ–अप् । सन्तते, गोत्रे, गोत्रप्रवर्त्तकमुनिव्यावर्त्तके मुनिभेदे च । श्रेष्ठे त्रि० । अनुष्ठचन्दने न० ।

प्रवर्ग पु० प्र+वृज–घञ् । होमाग्निभेदे ।

प्रवर्त्तक त्रि० प्रवर्त्तयति प्र+वृत–णिच्–ण्वुल् । प्रवृत्तिजनके ।

प्रवर्त्तना स्त्री० प्र+वृत–णिच्–युच् । प्रवृत्तिजनकव्यापारे विध्यादौ "अस्ति प्रवर्त्तनारूपमनुरूपं चतुर्ष्वपी"ति भर्त्तृहरिः ।

प्रवर्ह त्रि० प्र+वृह-अच् । श्रेष्ठे, प्रधाने च ।

प्रवह पु० प्रवह-अच् । वायुभेदे । भावे अप् । नगराद्बहिर्गमने ।

प्रवहण न० प्र+वह-करणे ल्युट् । मनुष्यवाह्ये वस्त्राच्छादिते स्त्रीवाहने कर्णीरथे (मङ्गापाल) ।

प्रवाणी स्त्री० प्र+वे-ल्युट् ङीप् । तन्तुवायशलाकायाम् (माकु) ।

प्रवाद पु० प्र+वद-घञ् । परम्परागतवाक्ये, परम्परकथोपकथने च ।

प्रवारण न० प्र+वृ णिच्-ल्युट् । काम्यदाने काम्यस्य उत्तमवस्तुनो दाने

प्रवास पु० प्र+वस-घञ् । विदेशवासे ।

प्रवासन न० प्र+वस-णिच्-ल्युट् । विदेशवासने--"सीताप्रवासनपटो"रित्युत्तरचरितम् । मारणे च ।

प्रवासिन् त्रि० प्र+वस-णिनि । विदेशे वासिनि, "प्रवासी सुखमायाती"ति षट्पञ्चाशिका ।

प्रवाह पु० प्र+वह-घञ् । प्रवृत्तौ, जलस्रोतसि, व्यापारे, उत्तमाश्वे च

प्रवाहिका स्त्री० प्रवाहयति मलं खल् । यकृद्रोगे ।

प्रवाङ्ग पु० प्रकृष्टो वाङ्गः । कूर्मरसाधीभागे ।

प्रविदारण न० प्र+वि+दृ-णिच्-ल्युट् । युद्धे, विदारणे, आकीर्णे च ।

प्रविश्लेष त्रि० प्रकर्षेण विश्लेषो यस्य । विधुरे, परमविश्लेषे च ।

प्रविषा स्त्री० प्रकृतं विषं यथा । अतिविषायाम् । (आतश्च) ।

प्रवीण त्रि० वीणया प्रगायति प्र+वीणा+णिच्-अच् । निपुणे ।

प्रवृत्ति स्त्री० प्र+वृत+क्तिन् । प्रवाहे, वार्त्तायाम्, अवन्त्यादि देशे, हस्तिभदे, न्यायोक्ते चिकीर्षाकृतिसाध्यतासाधनाधीने प्रयत्नभेदे च ।

प्रवृद्ध त्रि० प्र+वृध-क्त । वृद्धियुक्ते, प्रौढे च ।

प्रवेक त्रि० प्र+विच-घञ् । प्रधाने ।

प्रवे(णि)णी स्त्री० प्र+वेण-इनि वा ङीप् । गजस्कन्धस्थे चित्रकम्बले ।

प्रवेल पु० प्र+वेल-अच् । पीतसुङ्गे (सोनासुग) ।

प्रवेश पु० प्र+विश-घञ् । अन्तर्गमने ।

प्रवेशन न० प्रविश्यतेऽनेन विश-करणे ल्युट् । प्रधानद्वारे, सिंहद्वारे च । भावे ल्युट् । प्रवेशे ।

प्रवेष्ट पु० प्र+वेष्ट–अच्। बाहौ, बाहुमूलभागे हस्तिदन्तमाने। गजपृष्ठस्थाने च। [स्त्रियाम् स्त्री०।

प्रव्रजित पु० प्र+व्रज–क्त। सन्न्यासिनि। सांख्यं, सुश्रुतोक्तौ, तापप्रव्रज्या स्त्री० प्र+व्रज–क्यप्। सन्न्यासे, सर्वकर्मत्यागेन विधानेनात्मज्ञानान्तरगमने। [क्त। सन्न्यासभ्रष्टे।

प्रव्रज्यावसित पु० प्रव्रज्यातः संन्यासात् अवसितः भ्रष्टः अव+सो–क्त। सन्न्यासभ्रष्टे।

प्रशंसा स्त्री० प्र+शंस्+अ। गुणाविष्कारेण स्तुतौ।

प्रशमन न० प्र+शम–णिच्–ल्युट्। वधे, शान्तिकरणे च। "लक्ष्मणप्रशमनस्तस्याग्नि"रिति रघुः। शान्तौ च "सर्वाबाधाप्रशमनमि"ति चण्डी

प्रशस्त त्रि० प्र+शंस्+क्त। प्रशंसनीये, श्रेष्ठे, क्षेमे च।

प्रश्न पु० प्रच्छ–नङ्। जिज्ञासायाम् ज्ञातुमिच्छया कथनाय प्रेरणे।

प्रश्नी स्त्री० प्रच्छ+निङ् ङीप्। कुम्भिकायाम् (पाना)।

प्रश्रय पु० प्र+श्रि–अच्। प्रणये।

प्रश्रित त्रि० प्र–श्रि–क्त। विनीते।

प्रष्ठ त्रि० प्र+स्था–क नि० षत्वम्। अग्रगामिनि, श्रेष्ठे च।

प्रष्ठौही स्त्री० प्रष्ठं प्रथमगर्भं वाति वह–क्विप्। प्रथमगर्भिण्याम्।

प्रष्ठवाह् पु० प्रष्ठं वहति वह। युगपार्श्वस्थे हयादौ, युगपार्श्वे प्रथमयोजिते, दम्ये च। [क्विप् प्रष्ठवाट्।

प्रस प्रसवे तनौ च सक० दिवा० आ० सेट्। घटा०। प्रस्यते अप्रसिष्ट।

प्रसक्त त्रि० प्र+सञ्ज–क्त। प्रसङ्गविषये।

प्रसक्ति स्त्री० प्र+सञ्ज–क्तिन्। प्रसङ्गे, आपत्तौ, अनुमितौ च।

प्रसङ्ग पु० प्र+सञ्ज–घञ्। आपत्तौ, सम्बन्धभेदे ऋतस्योपेक्षानर्हत्वरूपे सङ्गतिभेदे, ऋत्युक्ते अन्योद्देशेन ऋतकर्मणान्यस्य विधिरूपे अवान्तरकार्य्यनिर्व्याहे, प्रसक्तौ, प्रस्तावे च।

प्रसक्ति स्त्री० प्र+सद–क्तिन्। नैर्मल्ये प्रसन्नतायाम्।

प्रसन्न त्रि० प्र+सद–क्त। निर्मले, सन्तुष्टे, ऋतानुग्रहभेदे च सुरायां स्त्री० प्रसन्नता स्त्री० प्रसन्नस्य भावः तल्। प्रसादे अनुग्रहभेदे।

प्रसभ न० प्रगता सभा सभाधिकारोऽस्मात् । बलात्कारे, "प्रसभोद्धृतारि"रिति रघुः ।

प्रसर पु० प्र+सृ–अप्–अच् वा । प्रभवे, वेगे, समूहे, युद्धे, नीवारे निकटाभिगमने ब्रह्मादेर्विसरणे सैन्यादेः सर्वतो व्याप्तौ च ।

प्रसर्पण न० प्र+सृप–ल्युट् । सैन्यानां सर्वतोव्याप्तौ, अस्य स्त्रीत्वञ्च तत्र ङीप् ।

प्रसव पु० प्र+सू–अप् । गर्भमोचने । उत्पत्तौ, कार्य्यरूपे फले च "अदश्चराचरं विश्वं प्रसवस्तस्य गीयते" इतिकुमारः ।

प्रसवबन्धन न० प्रसवस्य पुष्पस्य बन्धनम् बन्ध–करणे ल्युट् । वृन्ते (बोंटा)

प्रसविनी स्त्री० प्र+सू–इनच् । जननयाम् ।

प्रसव्य त्रि० प्रगतं सव्यं वामत्वम् । प्रतिकूले ।

प्रसह्या स्त्री० प्र+सह–अच् । हठात्याम् । [गतैरिति भाषः ।

प्रसह्य अव्य० प्र+सह–ल्यप् । हठादित्यर्थे । "प्रसह्य तेजोभिरसंख्यतां

प्रसह्यचौर पु० प्रसह्य बलात्कारेण चौरः । (डाकात) । प्रकाशचौरे ।

प्रसाद पु० प्र+सद–घञ् । नैर्मल्ये, अनुग्रहे, काव्यगुणभेदे, स्वास्थ्ये, प्रसन्ने, देवनैवेद्ये, गुरुजनभुक्तावशिष्टे च ।

प्रसादना स्त्री० प्र+सद–णिच्–युच् । सेवायाम् ।

प्रसाधक त्रि० प्रसाधयति भूषयति प्र+सिध–णिच्–ण्वुल् । निष्पादके-ऽलङ्कर्त्तरि च स्त्रियां टाप् । प्रसाधिकालम्बितमप्यपाद्"मिति रघुः । नीवारे स्त्री० टाप् । [कङ्कतिकायाम् स्त्री० ङीप् ।

प्रसाधन न० प्र+सिध-णिच्-ल्युट् । कृत्रिमभूषणे वेषे । करणे ल्युट् ।

प्रसाधित त्रि० प्र+सिध–णिच्–क्त । अलङ्कृते, निष्पादिते च ।

प्रसारण न० प्र+सृ-णिच्–ल्युट् । विस्तारकरणे क्रियाभेदे च ।

प्रसारणी स्त्री० प्र+सृ-णिच्-ल्यु गौरा० ङीष् । (गन्धभादाल)लताभेदे

प्रसारिणी स्त्री० प्र+सृ–णिनि । लज्जालुलतायाम् ।

प्रसारिन् त्रि० प्र+सृ–णिनि । विस्तारकारके ।

प्रसित त्रि० प्र+सो–क्त । आसक्ते ।

प्रसिति स्त्री० प्र+षि-बन्धने करणे क्तिन् । बन्धनसाधने, निगडादौ ।

प्रसिद्ध त्रि० प्र+सिध–क्त । भूषिते, ख्याते च ।

प्रसू स्त्री० प्र+सू–क्विप् । जनन्याम्, कदल्यां, वीरुधि, घोटक्याञ्च ।

प्रसूति स्त्री० प्रसू–क्तिन् । प्रसवे, अपत्ये, उदरे, मातरि च ।

प्रसूतिका स्त्री० प्रसूतेव कन् । जातसन्तानायां स्त्रियाम् ।

प्रसूतिज न० प्रसूत्या जायते जन–ड । दुःखे, प्रसवादिजन्यं दुःखं हि सर्वलोकप्रसिद्धम् ।

प्रसून न० प्र+सू–क्त तस्य नः । पुष्पे, फले च । जातमात्रे त्रि० ।

प्रसृत पु० प्र+सृ–क्त । अञ्जलौ, प्रदृब्धे, प्रसादिते, विनीते, वेगिते, गते, नियुक्ते च त्रि० । जङ्घायां स्त्री० ।

प्रसेवक पु० प्र+सिव-ण्वुल् । वीणाप्रान्तवर्त्ति काष्ठे ।

प्रस्कन्न पु० कविभेदे । स्कन्द–क्त तस्य नः । अवस्कन्दयुक्ते त्रि० ।

प्रस्तर पु० प्र+स्तृ–अच् । पाषाणे, मणौ च ।

प्रस्तार पु० प्र+स्तृ–घञ् । तृणवने, पल्लवादिरचितशय्यायां, छन्दो ग्रन्थोक्ते व्यक्तिभेदसंख्याज्ञानार्थ "प्रस्तारे तु लघुं न्यस्य प्रथमस्य गुरोरधः । यथोपरि तथा शेष"मित्युक्ते प्रक्रियाभेदे च ।

प्रस्ताव पु० प्र+स्तु-घञ् । अवसरे, प्रकरणे, प्रसङ्गे च ।

प्रस्तावना स्त्री० प्र+स्तु–णिच्–युच् । आरम्भे, सूत्रधारेण नट्या-दिभिः सह प्रकृताभिनेयकथाप्रसङ्गार्थं कथनीये वाक्यसन्दर्भे "नटी विदूषको वापीत्या"दि सा० दृ० त० ।

प्रस्तुत त्रि० प्र+स्तु–क्त । प्रकरणप्राप्ते, प्रासङ्गिके, उपस्थिते, उद्यते, प्रतिपन्ने, प्रकर्षेण स्तुते च ।

प्रस्थ पु० प्र+स्था–क । चतुःकुडवात्मके, आढकचतुर्थांशे वा धान्या-देः परिमाणभेदे, विस्तारे च । पर्वतस्य वासयोग्यभूमौ पु० न० ।

प्रस्थान न० प्र+स्था–ल्युट् । जिगीषोर्युद्धार्थगमने, गमनमात्रे च ।

प्रस्फोटन न० प्र+स्फुट–करणे ल्युट् । मूर्षे । भावे ल्युट् । ताड़ने, विकाशने, पाके, च । [ल्यु । मालवर्त्ति पर्वते पु० ।

प्रस्रवण न० प्र+स्रु–ल्युट् । अविच्छेदेन स्रवज्जले, उत्से, स्वेदे च ।

प्रस्राव पु० प्रस्रु–घञ् । मूत्रे ।

प्रहर पु० प्रह्रियते यामिकैरुद्घोषणादिरूपेण प्र+हृ-अप् । दिवसस्याष्टमे भागे
प्रहरण न० प्रह्रियतेऽनेन हृ-ल्युट् । अस्त्रे, कर्णीरथे च । आधारे ल्युट् । युद्धे । भावे ल्युट् । प्रहारे, दमे च ।
प्रहर्षणी स्त्री० प्रहृष्यत्यनया हृष-ल्युट् ङीप् । हरिद्रायाम् । त्रयोदशाक्षरपादके छन्दोभेदे च । तत्र प्रहर्षिणीशब्दे ।
प्रहसन न० प्र+हस-ल्युट् । हास्ये, दृश्यकाव्यरूपकभेदे च । सा० ६ प० ।
प्रहसन्ती स्त्री० प्र+हस-शतृ ङीप् । यूथिकायां, वाचन्यां च ।
प्रहस्त पु० प्रकृष्टो हस्तः प्रा० । विस्तृताङ्गुलिके पाणौ, रावणसेनापतिभेदे च । [रोहिण्याम् ।
प्रहारवल्ली स्त्री० प्रहारस्य वेदनोपशमना वल्ली शाक० । मांस-
प्रहि पु० प्रह्रियतेऽत्र प्र+हृ-इन् डिच्च । कूपे ।
प्रहित त्रि० प्र+हि-क्त । क्षिप्ते, निरस्ते, प्रेरिते च । क्लीबे न० ।
प्रहेलिका स्त्री० दुर्बोधार्थज्ञानाय प्रश्ने (हेयालि) "तरुण्यालिङ्गितः-कण्ठे नितम्बस्थानमाश्रितः । गुरूणां सन्निधानेऽपि कः कूजति सुडर्मुड"इत्यादिरूपे, अस्योत्तरम् ईषदपूर्णजलः कलसः ।
प्रह्लाद पु० प्र+ह्लद-घञ् । हिरण्यकशिपोर्दैत्यस्य पुत्रेऽसुरभेदे ।
प्रह्व त्रि० प्र+ह्वे-क । नम्रे विनीते, आसक्ते च ।
प्रांशु त्रि० प्रकृष्टा अंशवोऽस्य । उच्चे, उन्नते ।
प्राकाम्य न० प्रकामस्य भावः ष्यञ् । अष्टविधैश्वर्यमध्ये, इच्छानभिघातरूपे ऐश्वर्ये स्वाच्छन्द्यानुमतौ च । "प्राकाम्यं ते विभूतिष्वि"ति कुमारः । [प्राचीरादौ ।
प्राकार पु० प्रकीर्यते कृ-घञ् दीर्घः । इष्टकादिरचिते वेष्टनाकारे
प्राकृत त्रि० प्रकृष्टमकृतमपकार्यं यस्य । नीचे । प्रकृतेरयम् अण् । प्रकृतिसम्बन्धिनि । प्रकृत्या स्वभावेन निर्वृत्तः अण् । स्वाभाविके । प्रकृतेः संस्कृतशब्दात् आगतः अण् । नाटकादौ प्रसिद्धे कप्रभ्रंशशब्दभेदे ।
प्राकृतप्रलय पु० कर्म० । कार्यब्रह्मणो नाशे तेन सह कार्यजातस्य प्रकृतौ लये, तत्काले च ।

प्राक्तनमित्र कर्म० । स्वसमवयस्के मित्रे, विषयानन्तरस्थ नृपरूपात् प्राक्तनयोः अव्यवहितोत्तरविषयस्थे नृपे ।

प्राक्तनशत्रु पु० कर्म० । विषयानन्तरवर्त्तिनि नृपे ।

प्राक्तन त्रि० प्राचि काले, देशे, प्राच्यां दिशि वा भवः ख्युट् च । प्राग्भवे । "प्रपेदिरे प्राक्तनजन्मविद्या" इति कु० ।

प्राग्भाव पु० प्राग्वर्त्ती अभावः । इह कपाले घटो भविष्यतीत्यादिप्रतीतिसिद्धे अभावभेदे ।

प्रागुदीची स्त्री० प्राच्या उदीच्याश्चान्तराला दिक् दिगन्तराल्यन्तराले इति ब० । पूर्व्वोत्तरदिशि ईशानकोणे ।

प्राग्ज्योतिष न० कामरूपदेशे तद्देशस्थे व० ब० ।

प्राग्भार पु० प्रकृष्टो भारः । उत्कर्षे परभागे, "सांसमस्निग्धपङ्क प्राग्भारः इति प्रबोधचन्द्रोदयः । पर्वताग्रभागे च ।

प्राग्वहतर त्रि० प्रकर्षेण अग्रे ह्रियतेऽसौ अप् । श्रेष्ठे ।

प्राग्र्य त्रि० प्रकर्षेणाग्रे भवः यत् । श्रेष्ठे ।

प्रागवंश पु० प्राक् वंशः सपत्नीकयजमानादिसमुदायोऽत्र । हविर्द्धानात् पूर्वभागस्थे यजमानादिस्थित्यर्थे गृहे ।

प्राघार पु० प्र+घृ क्षरणे घञ् दीर्घः । यज्ञादौ वह्नेरुपरिघृतादेःक्षरणे

प्राघुण पु० प्र+आ+घुण-क । अतिथौ ।

प्राङ्गण न० प्रकृष्टमङ्गनं पूर्व० णत्वम् । गृहभूमौ (उठान) अजिरे, पण्यवाट्यां च ।

प्राङ्न्याय पु० 'आचारेणावसन्नोऽपि पुनर्लेखयते यदि । सोऽभिधेयो जितः पूर्वं प्राङ्न्यायश्च स उच्यते' इत्युक्ते व्यवहारस्थे उत्तरभेदे

प्राच् त्रि० प्र-अञ्च्-क्विन् । पूर्वस्मिन् काले देशे च । स्त्रियां ङीप् प्राची । सा च पूर्वस्यां दिशि, तन्त्रोक्ते पूज्यपूजकयोर्मध्यदेशे च ।

प्राचीन त्रि० प्राक्+भवार्थे ख । पूर्वदिग्देशादौ भवे । (आवृतादि) वनतिक्तायाम्, रास्नायाञ्च स्त्री० टाप् ।

प्राचीनबर्हिस् पु० । इन्द्रे, नृपभेदे च ।

प्राचीनामलक न० कर्म० । धात्रीफलभेदे ।

प्राचीनावीत न० 'सव्यं बाहुं समुद्धृत्य दक्षिणे तु द्विजातयः ।' प्राचीनावीतमित्युक्तं पैतृके कर्मणि योजये"दित्युक्ते । आद्यादौ वामकरे बर्हिष्कृते सति दक्षिणस्कन्धार्पिते यज्ञसूत्रादौ ।

प्राचीर न० प्राचीयते प्र+आ—चि-क्रन् दीर्घश्च । सर्वतो वेष्टनाकारे इष्टकादिनिर्मिते आवरणे (पाँचिर) । [च ।

प्राचेतस पु० वाल्मीकिमुनौ प्राचीनबर्हिषो ऋषेः पुत्रे, वरुणस्य पुत्रे

प्राच्य पु० प्राचि भवः । शरावत्या नद्याः प्राग्दक्षिणे देशे ।

प्राजक पु० प्र+अज—ण्वुल् वीभावाभावः । सारथौ ।

प्राजन न० प्र+अज—ल्युट् । तोदने पश्चादेशालनदण्डे (पाँचनो) ।

प्राजापत्य पु० प्रजापतिर्देवताऽस्य यज् । अष्टविवाहमध्ये विवाहभेदे, 'ब्राह्मं प्राजापत्यं तथा ब्राह्ममाद्यादयाचितम् । ब्राह्मं परस्य नाम्नीयात् प्राजापत्यमितिस्मृत"मिति स्मृत्युक्ते ह्यादशाहःसाध्ये ऋतुभेदे न० । प्रजापत्यधिदेवताके चर्वादौ त्रि० । प्रव्रज्याश्रमाङ्गे सर्वस्वदक्षिणकेष्टिभेदे स्त्री० ।

प्राजित्र पु० प्र+अज-इत्र वीभावाभावः । सारथौ ।

प्राज्ञ पु० प्रकर्षेण जानाति प्र-ज्ञा-क स्वार्थे अण् । पण्डिते । राजयुक्ते च । प्रज्ञाऽस्यस्य अण् । बुद्धिमति, दक्षे च त्रि० प्रज्ञा+स्वार्थे अण् । बुद्धौ, प्राज्ञस्य पत्नी ङीप् । प्राज्ञपत्न्यां स्त्री० ।

प्राज्य न० प्रकृष्टमाज्यं प्र+अनुज-क्यप् वा । प्रकृष्टदीप्ते । प्रचुरे त्रि० ।

प्राञ्जल त्रि० प्र+अनुज—अलच् । सरले, सुबोधे च ।

प्राड्विवाक पु० अर्थिप्रत्यर्थिनौ पृच्छति प्रच्छ-क्विप् प्राट्, तयोर्वाक्यं विरुद्धाविरुद्धतया विवेचयति वि+विच-घञ् कर्म० । राजनियुक्ते व्यवहारदर्शके, "विवादानुगतं दृष्ट्वा पूर्ववाक्यं प्रयत्नतः । विचारयति येनासौ प्राड्विवाकस्ततः स्मृत"इति स्मृतिः अत्र प्राड्विवाक इति केचित् पठन्ति ।

प्राण पु० प्र+अन-घञ् । हृदयस्थे नासाग्रवर्त्तिनि वायौ, काव्यजीवने रसे, वायुमात्रे, बले, च । पञ्चवृत्तिके देहस्थे वायुभेदे, इन्द्रिये च ब०व० ।

प्राणद पु० प्राणं ददाति दा–क । जले, अन्ने च । जीवकट्टक्षे पु० । हरितक्यां, वृद्धिवृक्षे च स्त्री० । प्राणदातरि त्रि० "प्राणदा यमकूतिके"त्यनुवृत्तेः ।

प्राणनाथ ईत० । पत्यौ ।

प्राणमयकोष पु० रागादिकर्मेन्द्रियसहितः प्राणपञ्चकप्रचुरः कोशवदाच्छादकत्वात् कोष इव । वेदान्तोक्ते जीवस्वरूपाच्छादके, कर्मेन्द्रियसहिते प्राणपञ्चके ।

प्राणसंयम पु० प्राणस्य प्राणरूपवृत्तिभेदस्य नासाग्रवर्त्तिनो वायोः संयमो यत्र व्यापारे । प्राणायामे तेन हि व्यापारेण प्राणवायोर्बहिर्निःसरणप्रतिरोधेन प्राणसंयम इति योगशास्त्रादिप्रसिद्धम् ।

प्राणसमा स्त्री० प्राणैः समा तुल्या प्रियत्वात् । प्रियतमायां पत्न्याम् ।

प्राणायाम पु० प्राणः प्राणवायुरायम्यते संयम्यते येन आ+यम-घञ् । योगादिशास्त्रप्रसिद्धे प्राणवायोर्निरोधसाधने व्यापारे । बहिःस्थप्राणवायोरुत्कर्षणरूपपूरणेन, देहस्थस्य तस्य कुम्भवत् निश्चलतया रोधेन, निरुद्धस्य तस्य क्रमेण बहिर्निःसारणरूपरेचनेन च प्राणवायोर्यत्नविनियोगरूपवश्यतासम्पादनमित्यसौ व्यापारसमुदायः प्राणायाम इत्युच्यते "प्राणाख्यमनिलं कश्यमभ्यासात् कुरुते तु यत् । प्राणायामः स विज्ञेयः" इत्युक्तलक्षणे प्राणायामशब्दस्य पूरण कुम्भकरेचनरूपव्यापारसमुदाये रूढिरिति बहवः पूर्व्वे केचिदपि रूढिरित्यन्ये विस्तरो वाचस्पत्ये ।

प्राणिद्यूत न० प्राणिभिः मेषकुक्कुटादिभिः पणपूर्वं द्यूतं, देवनम् दिव–भावे क्त । प्राणिभिः पणपूर्वके देवने ।

प्राणिन् पु० प्राण+अस्त्यर्थे इनि । जीवे चेतने ।

प्रातःकृत्य न० प्रातः प्रभाते कृत्यं कर्त्तव्यम् । प्रभाते कर्त्तव्ये शौचस्नानादौ । [प्रातरुपास्ये मन्त्ररूपे देवभेदे ।

प्रातःसन्ध्या स्त्री० प्रातरुपास्या सन्ध्या । वैदिके तान्त्रिके च ।

प्रातर् अव्य० प्र+अत–अरु । प्रभाते, "प्रातः कालो मुहूर्त्ता स्त्रीनि" इति स्मृत्युक्ते सूर्य्योदयावधित्रिमुहूर्त्तकाले च ।

प्रातराश पु० अश्यते भुज्यते अश–घञ् प्रातः प्रभाते आशोभोज्यम् । प्रातः काले भोज्ये ।

प्रातिका स्त्री० प्र+अत–ण्वुल् टाप् । जलाहृते ।

प्रातिपदिक पु० प्रतिपदि श्रूयते ठक् । अग्नौ, "इन्द्राग्नी यत्र हूयेते" इति श्रुतौ यत्र प्रतिपदीत्यर्थः । व्याकरणोक्ते "अर्थवद् अधातुरप्रत्ययः प्रातिपदिकमि"त्यादुक्ते प्रत्ययप्रत्ययान्तनिघ्ने धातुभिन्ने कृत्तद्धितसमासनिष्पन्ने च शब्दभेदे न० ।

प्रातिभाव्य न० प्रतिभुवो भावः । (जामिनो) प्रतिभुवोभावे "प्रातिभाव्यागतं सुत" इति स्मृतिः । [स्वासाधारणे धर्मे ।

प्रातिस्विक न० प्रतिस्वे एकैकस्मिन् भवः ठक् । प्रत्येकपदार्थ-

प्रातिहारिक त्रि० प्रतिहियतेऽनेन प्रतिहारः कार्य्यं मायादिः प्रयोजनमस्य ठक् । मायाकारके ।

प्राथमकल्पिक त्रि० प्रथमकल्पे भवः ठक् । प्रथमारम्भोचिते वेदाध्ययनादौ ।

प्राथमिक त्रि० प्रथमे भवः ठञ् प्रथमकालभवे । स्त्रियां ङीप् ।

प्रादुर्भाव पु० प्रादुस्+भू–घञ् । प्रकाशे आविर्भावे ।

प्रादुस् अव्य० प्र–अद–उसि । स्फुटत्वे, प्रकाशे, नास्ति, सम्भावनायां, इच्छौ च ।

प्रादेश पु० प्र+दिश–घञ् दीर्घः । तर्जनीमध्यमाविस्तृताङ्गुष्ठे देशमाने च "अङ्गुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते" इत्युक्ते परिमाणभेदे च ।

प्रादेशन न० प्र+आ+दिश–ल्युट् । दाने ।

प्राङ्ग पु० प्रगतोऽध्वानम् अच् समा० रथादौ, प्रकृष्टोऽध्वा प्रा० अच् । प्रकृष्टे पथि । नम्रे, बद्धे च त्रि० । [याज्ञ ।

प्राञ्जम् अव्य० प्र+आ+ध्वन–डाच् । आनुकूल्ये, नम्रने, नम्रता-

प्रान्त पु० प्रकृष्टोऽन्तः । शेषसीमायाम् ।

प्रान्तर न० प्रकृष्टमन्तरं व्यवधानं यत्र । दूरगम्ये पथि । इत्यादिव्युत्पत्त्या शून्ये पथि, वने, कोटरे च ।

प्रापन्नत्व त्रि० प्राप्तं पञ्चत्वं मरणं येन । मृते ।

प्रापरूप त्रि० प्राप्तं रूपं येन । मनोहरे, पण्डिते च ।

प्राप्ति स्त्री० प्र+आप-क्तिन् । लब्धौ, लाभे, स्थानान्तरगतौ, संहतौ, अणिमाद्यैश्वर्यमध्ये ऐश्वर्यभेदे, उदरे च ।

प्राप्य त्रि० प्र+आप-ण्यत् । गम्ये लभ्ये च । व्याकरणोक्ते "क्रियाजनितविशेषाणां सिद्धिर्यत्र न विद्यते दर्शनादनुमानाद्वा तत् प्राप्यमिह कथ्यते" इत्युक्ते कर्मभेदे न० ।

प्राभृत न० प्र+आ+भृ-क्त । उपढौकनद्रव्ये । स्वार्थे कन् अत्रैव

प्राभृत्य पु० प्रभृतादाय हितः अत्र । वासकटुत्वे ।

प्रामाणिक त्रि० प्रमाणेन निर्वृत्तः सिद्धः ठक् । प्रत्यक्षादिप्रमाणसिद्धे च स्त्रियां ङीप् ।

प्रामाण्य न० प्रमाणस्य भावः । तद्वति तत्प्रकारकत्वरूपे ज्ञानधर्मे, तच्च न्यायमते परतोग्राह्यं मीमांसकादिमते स्वतः, स्वसामग्र्या वा ग्राह्यमिति भेदः विस्तरो वाचस्पत्ये ।

प्राय पु० प्र+अय-घञ्-वा घञ् अच् वा । मृत्यौ, अनशनमृत्यौ बाहुल्ये च । "प्रायेण सामग्र्याविधा" वितिवत् कुत्वाभावः ।

प्रायश्चित्त प्रायम्+चित-क्त "प्रायो नाम तपः प्रोक्तम् चित्तं निश्चय उच्यते । तपो निश्चयसंयुक्तम् प्रायश्चित्त मिति स्मृतं" इत्युक्तलक्षणे पापक्षयमात्रसाधनत्वेन विधिबोधिते कर्मणि चान्द्रायणादौ ।

प्रायश्चित्तिन् त्रि० प्रायश्चित्तं कर्त्तव्यतयास्त्यस्य इनि । प्रायश्चित्तकरणयोग्ये पापनिश्चयवति जने ।

प्रायस् अव्य० प्र+अय-असि । बाहुल्ये, तपसि च । "प्रायः पयोधरसङ्गतिरत्र हेतु"रित्युद्भटः । [अनशनेन मरणायोद्युक्ते ।

प्रायोपविष्ट त्रि० प्रायाय अनशनमृत्यवे उपविष्टः उप+विश-क्त ।

प्रायोपवेश पु० प्रायाय अनशनमृत्यवे उपवेशः स्थितिः । सङ्कल्पपूर्वकम् सकलकार्य्यत्यागेन अनशनमरणार्थमुद्यमे ।

प्रारब्ध न० आ+रभ–आरब्धे क्त प्रकृतमारब्धं स्वकार्य्यं जनयायकृतारब्धं येन। देहाद्यारब्धके अदृष्टभेदे तस्य च भोगेनैव क्षय इति शास्त्रे प्रसिद्धम्। कृतारब्धे त्रि०।

प्रार्थना स्त्री० प्र–अर्थ–युच्। याच्ञायां, हिंसायाञ्च। ल्युट्। याचने, हिंसने च न०।

प्रार्थित त्रि० प्र+अर्थ-क्त। याचिते। अभिहिते, हते, यत्नसंयते च।

प्रालम्ब न० प्रकर्षेणालम्बते प्र+आ+लम्ब–अच्। ऋजुतया कण्ठात् लम्बमाने माल्यादौ।

प्रालेय न० प्रकर्षेण लीयते प्र+आ+ली–यत् आत्वे ऐत्त्वम्, प्रलयायैं हितम् अण् नि० एत्त्वम् वा। हिमे। [रोऽयत्र पु०।

प्रावरण न० प्राव्रियतेऽनेन ल्युट् उत्तरीयवस्त्रे। घञ्। प्रावा-

प्रावृत त्रि० प्र+आ+वृ+क्त। प्रकर्षेणावृते वस्त्रे।

प्रावृष् (षा) स्त्री० प्रकर्षेणावर्षत्यत्र वृष–क्विप् वा टाप्। वर्षाकाले।

प्रावृषायणी स्त्री० प्रावृषायामयनं यस्याः पूर्व० णत्वम्। कपि-कच्छ्वाम् (आलकुशी)

प्रावृषेण्य पु० प्रावृषि भवः एन्य। कदम्बवृक्षे, धाराकदम्बे, कुटजवृक्षे च। वर्षाकालभवे त्रि० "स्वं प्रावृषेण्यैरिवे"ति भट्टिः पुनर्नवायां, कपिकच्छ्वाञ्च स्त्री०।

प्रावृष्य प्रावृषि भवः यत्। कुटजे, कदम्बे च।

प्राश्निक त्रि० प्रश्नं करोति ठक्। कुशलादिप्रश्नकारके। सभ्ये पु०।

प्रास पु० प्रकर्षेणास्यते अस–कर्मणि घञ्। कुन्तास्त्रे।

प्रासङ्ग पु० प्रसजते प्र–सृज–घञ् दीर्घः। दृश्यत्वानां स्वत्वे थिक्यार्थमासज्यमाने काष्ठे।

प्रासङ्गा पु० प्रासङ्गं वहति यत्। कृलादिकाष्ठवाहके वृषादौ।

प्रासाद पु० सीदत्यस्मिन् प्र+सद–घञ् पूर्वपद दीर्घः। देवानां राज्ञाञ्च गृहभेदे।

प्रासिक पु० प्रासः प्रहरणमस्य ठक्। कुन्तास्त्रेण योद्धरि।

प्रास्थिक त्रि० प्रस्थं तत्परिमितं धान्यादिकं स्वस्मिन् समावेशयति,

प्रचति वा ठञ् । प्रख्यातिधान्यसमावेशयोग्ये पात्रे, तन्निर्मितधान्यादिपात्रके च । स्त्रियां ङीष् ।

प्राङ्क पु० प्रकृष्टं, प्रथमं वा अङ्कः ठच् अलोपादेशः णत्वम् । पूर्वाह्णे ।

प्राङ्कैतन त्रि० प्राङ्के पूर्वाह्णे भवः ष्युञ् तुट् च निपातनादेत्वम् । पूर्वाह्णभवे । [अतिप्रत्यूषे ।

प्राङ्केतराम् अव्य० अतिशयेन प्राङ्के तर-आम् तु एत्वं नि० ।

प्रिय पु० प्रीणाति प्री-तर्पणे क । भर्त्तरि, पत्यौ, मृगभेदे, ऋद्धिनामौषधौ च । हृद्ये त्रि० । भार्य्यायां,एलायां, मल्लिकायां, मदिरायां, वार्त्ताकीयाञ्च स्त्री० ।

प्रियंवद त्रि० प्रियं प्रियकरं मधुरं वदति खच् मुम् च । प्रियवादिनि खेचरे, गन्धर्वभेदे च पु० ।

प्रियक पु० प्रिय+संज्ञायां कन् । प्रीतसाले वृक्षे, कदम्बे, विचिलवृक्षे, प्रियङ्गौ, भ्रमरे, कुङ्कुमे, असनवृक्षे च ।

प्रियङ्कर त्रि० प्रियङ्करोति खच् मुम् च । प्रियकारिणि श्वेतकण्टकार्य्यां, वृहज्जीवन्त्याम्, अश्वगन्धायाञ्च स्त्री० ङीष् ।

प्रियङ्गु पु० प्रिय+गम-डु नि० मुम् च । खनामख्याते वृक्षे "प्रियङ्गुकलिकाकार" मिति बुधप्रणामसन्त्रः । राजिकायां, पिप्पल्याम्, कङ्गौ (काङ्गनी) कटक्यान्च ।

प्रियजीव पु० प्रियो जीवो यस्य । श्योनाकभेदे । [त्रि० ।

प्रियतम पु० अतिशयेन प्रियः तमप् । मयूरशिखावृक्षे, अतिप्रिये

प्रियता स्त्री० प्रियस्य भावः तल् । स्नेहे प्रियत्वे । [त्रि० ।

प्रियदर्शन पु० प्रियं दर्शनमस्य । क्षीरिकावृक्षे, शुकवृक्षे च वृहत्सं

प्रियवर्णी स्त्री० प्रियो वर्णो यस्याः गौ०ङीष् । प्रियङ्गौ ।

प्रियव्रत पु० स्वायम्भुवमनोः जेष्ठे पुत्रे ।

प्रियव्रती स्त्री० कर्म० । प्रियङ्गौ । [संवादे ।

प्रियसन्देश पु० प्रियं सन्दिशति कर्मण् चन्द्रकवृक्षे । वृत० । प्रिय-

प्रियसालक पु० कर्म० स्वार्थे कन् । असनवृक्षे (पियासाल) ।

प्रियास्य पु० प्रियं पितॄणां प्रियमस्य मूले सिक्तं जलमस्य आस्यवृक्षे ।

प्रियाल पु० प्रियाय अलति पर्य्याप्नोति अल-अच् प्रियवाले (पि-यासाल)। द्राक्षायां स्त्री०।

प्री तर्पणे भ्वा० उभ० सक० अनिट्। प्रियति ते अप्रैषीत् अप्रैष्ट।

प्री प्रीतौ कान्तौ दिवा० आत्म० अक० अनिट्। प्रीयते अप्रैष्ट।

प्री तर्पणे सक० क्रया० उभ० कान्तौ अक० अनिट्। प्रीणाति प्री-णीते अप्रैषीत् अप्रैष्ट।

प्रीञ् तर्पणे सक० चु० उभ० अनिट्। प्रायवति ते अपिप्रयत्-त।

प्रीणन न० प्री-णिच्-ल्युट्। तर्पणे।

प्रीत त्रि० प्री-क्त वा नत्वाभावः। हृष्टे। तस्य नत्वे प्रीणोऽप्यत्र त्रि०।

प्रीति स्त्री० प्री-भावे क्तिच्। हर्षे, आमोदे, तृप्तौ च।

प्रुङ् सर्पणे भ्वा० आत्म० सक० अनिट्। प्रुवते अप्रोष्ट।

प्रुट् मर्दने भ्वा० पर० सक० सेट्। प्रोटति अप्रोटीत्।

प्रुष् भस्मीकरणे भ्वा० पर० सक० सेट्। प्रोषति अप्रोषीत् क्वा वेट्।

प्रुष् सेके पूर्त्तौ च सक० स्नेहे अक० क्रया० पर० सेट्। प्रुष्णाति अप्रोषीत्।

प्रुष्ट त्रि० प्रुष-क्त। दग्धे।

प्रेक्षा स्त्री० प्रकर्षेण प्रमाणादिना ईक्षा। पर्य्यालोचनायाम्।

प्रेक्षावत् त्रि० प्रेक्षा अस्त्यर्थे मतुप् मस्य वः। समीक्ष्यकारिणि।

प्रेङ्खा स्त्री० प्र+इङ्खि अ। दोलायाम्, परिभ्रमणे, स्वार्थिकगतौ, नटभेदे, नृत्ये च।

प्रेङ्खित त्रि० प्र+इङ्खि-क्त। कम्पिते।

प्रेङ्खोल दोलने अ० चुरा० उ० सक० सेट्। प्रेङ्खोलयति ते अप-प्रेङ्खोलत् त। प्रेङ्खोपसर्गत्वमपीत्यन्ये तेन प्राङ्खिखोलत् त।

प्रेत पु० प्र+इण-क्त। नरकस्थे जीवे, पिशाचभेदे, आतिवाहिक-देहोत्तरं जायमाने देहभेदे, "कृते सपिण्डीकरणे नरः सञ्जायतेऽतरात् परम् प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते इति स्मृतिः, मृते च

प्रेतकर्म्मन् न० ६त०। मृतस्य दाहादिके सपिण्डाकरणान्ते कर्मणि।

प्रेतगृह न० ६त०। श्मशाने प्रेतपुरादयोऽप्यत्र।

प्रेतनदी स्त्री० प्रेतगम्या नदी। यमद्वारस्थे वैतरणीनामके नदीभेदे।

प्रेतशिला स्त्री० गयातीर्थस्थे पूर्वोत्तरदिग्भागे शिलाभेदे ।
प्रेत्य अव्य० प्र+इण-क्त्वा । लोकान्तरे 'प्रेत्य चेह च मोदते'ति स्मृतिः ।
प्रेमन् पु० न० प्रियस्य भावः इमनिच् प्रादेशः । स्नेहे, नर्म्मणि च इन्द्रे, वायौ च पु० ।
प्रेयस् त्रि० अतिशयेन प्रियः ईयसु प्रियस्य प्रादेशः । अतिशयप्रिये । स्त्रियां ङीप् प्रेयसी वा च प्रियतमायां, योषिति च ।
प्रेरण न० प्र-ईर-णिच्-ल्युट् । पूर्वके निजस्य भृत्यादेः कार्य्यादौ नियोगे । णिच्-युच् । प्रेरणाऽप्यत्र स्त्री० ।
प्रेष गतौ भ्वा० पर० सक० सेट् । प्रेषति अप्रेषीत् ।
प्रे(प्रै)ष पु० प्र+इष-घञ् वा परस्मै । प्रेषणे, पीड़ने च ।
प्रेष्ठ त्रि० अतिशयेन प्रियः इष्ठन् प्रादेशः । अतिशयप्रिये ।
प्रे(प्रै)ष्य पु० प्र-इष यत् वा परस्मै । दासे । प्रेष्यपोषे त्रि० जङ्घायां स्त्री० । [पूषणे च ।
प्रोक्षण न० प्र+उक्ष-ल्युट् । यज्ञार्थं सेचने, वधे, यज्ञार्थं पशुनां
प्रोक्षित त्रि० प्र+उक्ष-क्त । सिक्ते, हते, यज्ञार्थं संस्कृते मांसादौ च "अप्रोक्षितं भक्षयेत्" मिति स्मृतिः ।
प्रोञ्छन न० प्र+उञ्छि-ल्युट् । मार्जने (पोंछा) ।
प्रोत त्रि० प्र-वे क्त । गुम्फिते, सूते, खचिते च । वस्त्रे न० ।
प्रोत्फुल्ल पु० प्रकर्षेण उत्फुल्लति प्र+उद्+फुल्ल-अच् । सिंहलाङ्गूलाकारपुष्पवति वृक्षभेदे ।
प्रोथ परिपूर्णतायाम् सार्व्वधा० भ्वा० उभ० अक० सेट् । प्रोथति-ते अप्रोथीत् अप्रोथिष्ट । अकि न लुक् ।
प्रोथ पु० न० । प्रु-थन् । अश्वनासिकायाम् । कक्षां, घाटके, स्त्रीगर्भे गर्त्ते, भीरुणे, स्फिचि, अश्वमुखे च पु० । पाम्ये, स्थापिते, पूरिते च त्रि० ।
प्रोषित त्रि० प्र+वस-क्त षट् । प्रवासं गते विदेशं गते ।

प्रोषितभर्तृका स्त्री० प्रोषितः भर्त्ता यस्याः कप्। विदेशस्थपतिकायां नायिकायाम्। [वा ङीष्। प्रोषीत्यन्यत्र।

प्रो(प्रौ)ष्ठ पु० प्रकृष्टः ओष्ठोऽस्य वा दृष्टिः। (पुंटि) मत्स्यभेदे गवि च।

प्रो(प्रौ)ष्ठपद पु० प्रो(प्रौ)ष्ठो गोस्तस्येव पदं यस्य। भाद्रपदाख्ये नक्षत्रविशेषे तेन युक्ता पौर्णमासी अण् सा यत्र मासे पुनरण् वा न दृष्टिः। चान्द्रभाद्रमासे।

प्रो(प्रौ)ष्ठपदा स्त्री० ब०व० प्रो(प्रौ)ष्ठस्य गोरिव पदान्यस्याः। भाद्रपदनक्षत्रे पूर्वभाद्रपदतारायां उत्तरभाद्रपदतारायाञ्च चतुर्नक्षत्रात्मकत्वात् बहुत्वम्। [भाद्रपौर्णमास्याम्।

प्रो(प्रौ)ष्ठपदी स्त्री० प्रोष्ठ(प्रौ)पदाभिर्युक्ता पौर्णमासी अण् वा न दृष्टिः।

प्रौढ़ त्रि० प्र+वह—क्त दृष्टिः। प्रगल्भे, प्रगल्भे, निपुणे च नायिकाभेदे "तरुणी त्रिंशता मता पञ्चपञ्चशता प्रौढे"त्युक्तवयस्कायां स्त्रियाम् च स्त्री० टाप्।

प्रौढ़पाद पु० 'आसनारूढपादस्तु जानुनोर्जङ्घयोस्तथा। कृतावसक्थिको यस्तु प्रौढपादः स उच्यते" इत्युक्तलक्षणे आसनारूढपादे वस्त्रादिना कटिजङ्घाबन्धनेन स्थिते जने।

प्रौढ़ि स्त्री० प्र+वह—क्तिन् दृष्टिः। सामर्थ्ये, उद्यमे च।

प्लक्ष भक्षणे भ्वा० उभ० सक० सेट्। प्लक्षति अप्लक्षीत्।

प्लक्ष पु० प्लक्ष्यते कीर्टैः प्लक्ष—घञ्। (पाकुड़) वृक्षे, प्लक्षद्वीपचिह्निते द्वीपभेदे च।

प्लव पु० प्लु—भावे अप्। प्लवने। कर्त्तरि अच्। भेलके (भेला) भेके, मेषे, वानरे, श्वपचे, जलकाके, प्रवणे, पर्कटीवृक्षे, कारण्डवखगे, शब्दे, रिपौ, जलभेदे जलकुक्कुटे, जलचरपक्षिमात्रे सारसादौ च। कैवर्त्तीसुतके, गन्धतृणे च न०।

प्लवग पु० प्लवन् सन् गच्छति गम—ड पृ०। वानरे, भेके, सूर्य्यसारथौ, प्लवपक्षिणि, शिरीषवृक्षे च। [प्लक्षवृक्षे च।

प्लवङ्ग पु० प्लवन् सन् गच्छति गम—ड खच् पृ०। वानरे, कृगभेदे,

प्लवङ्गम पु० प्लवन् सन् गच्छति गम खच् पृ०। वानरे, भेके च।

प्लाक्ष न० प्लक्षस्य समूहः, तस्य विकारः, क्षस्य, फलं वा अण् न लुप्।
प्लक्षवृक्षफले, तद्विकारे, तत्समुदाये च।

प्लावन न० प्लु-णिच्-ल्युट्। (उथ्लान) द्रवद्रव्यस्य समन्ताद्गतौ।

प्लावित त्रि० प्लु-णिच्-क्त। जलादिना समन्तात् व्याप्ते।

प्लिह गतौ भ्वा० पर० सक० सेट्। प्लेहति अप्लेहीत्।

प्लि(प्ली)हन् पु० प्लिह-कनिन् पृ० वा दीर्घः। (पिला) वामकुक्षिपार्श्वस्थे
मांसखण्डे, तद्वृद्धिहेतुके रोगभेदे च।

प्ली गतौ क्रया० पर० सक० अनिट्। प्लीनाति अप्लैषीत्।

प्लीहघ्न पु० प्लीहानं हन्ति हन-क। (रोडा) दाड़िमतुलाकुसुमवृक्ष
वृक्षभेदे। प्लीहयत्नु प्रभृतयोऽप्यत्र।

प्लीहारि पु० ६त०। अश्वत्थवृक्षे (रोडा) वृक्षभेदे च।

प्लु सर्पणे उत्प्लुत्य गतौ च भ्वा०आत्म०अक०अनिट्। प्लवते अप्लोष्ट।

प्लुत न० प्लु-क्त। तिर्य्यग्गतौ, भस्मेन, गतौ, अश्वगतिभेदे च।

प्लुष दाहे भ्वा० पर० सक० सेट्। प्लोषति अप्लोषीत्। क्त्वा वेट्।

प्लुष दाहे दिवा० पर० सक० सेट्। प्लुष्यति अप्लुषत्।

प्लुष सेके पूर्त्तौ च सक०अक० स्नेहे क्रया०पर०सेट्। प्लुष्णाति अप्लोषीत्
प्लुष्ट त्रि० प्लुष-क्त। दग्धे। [अप्लोषीत्।

प्लुस दाहे विभागे च दिवा० पर० सक० सेट्। प्लुस्यति अप्लुसत्—

प्लेव सेवने भ्वा०आ० सक० सेट्। प्लेवते अप्लेविष्ट। चङि न ह्रस्वः।

प्लोष पु० प्लुष-घञ्। दाहे।

प्सा भक्षणे अदा० पर० सक० अनिट्। प्साति अप्सासीत्।

प्सात त्रि० प्सा-क्त। भक्षिते।

फ

फ न० फक्-ड। कूजनकथने, निष्फलवाक्ये, फुत्कारे च। भक्ष्यावर्त्ते
वर्त्तके, जृम्भाविष्कारे, फलभागे च पु०।

फक्क असदाचारे, मन्दगतौ च भ्वा०पर०अक०सेट्। फक्कति अफक्कीत्।

फक्किका स्त्री० फक्क-धातुनिर्देशे भावे एवुल्-टाप्, अतइत्त्वम्। अस-

द्यवहारे (फाकि) तत्त्वनिर्णयार्थं पूर्वपक्षे च। "फणिभाषित-भाष्यफक्किके"ति नैषधम्।

फञ्जिकाक्षी० भञ्जति रोगान् भनज-मर्दने ण्वुल् पृ०।(वामनहाटि)वृक्षे

फञ्जिपत्रिका स्त्री० भनज-णिनि पृ० फञ्जि रोगमर्दि पत्रं यस्याः। आखुपर्ण्याम् (इदुरकानि)।

फञ्जि(ञ्जी) स्त्री० भनज-इन् पृ० वा ङीप्। भार्य्यायाम्। (वामनहाटि)

फट पु० स्त्री० स्फुट-विकाशे अच् पृ०। सर्पाणां फणायाम् स्त्रियां टाप्। सा च दन्ते, कितवे च।

फट् अव्य० स्फुट-क्विप् पृ०। योगे, तन्त्रोक्ते अस्त्रनामके मन्त्रभेदे च।

फण अनायासेनोत्क्षो भ्वा० पर० सक० सेट् फणा०। फणति अफाणीत्-अफणीत्। फेणतुः-पफणतुः।

फण गतौ भ्वा० पर० सक० सेट्। फणति अफाणीत्-अफणीत् वा घटादि०। णिचि फाणयति फणयति।

फण पु० स्त्री० फण-अच्। दर्व्याकारे सङ्कोचविकाशवति सर्पभस्तके।

फण(णा)धर पु० फणं(णां) धरति धृ-अच्। सर्पे। फण(णा)भृदादर्योऽप्यत्र। [सामान्ये च।

फणिजक्ष पु० फणिनमुज्झति एषुल् पृ०। तुलसीभेदे, जम्बीर

फणिप्रिय पु० फणिनां प्राणप्रदत्वात् प्रियः। वायौ। सर्पाणां वायु-भक्षकत्वेन वायोस्तत्प्रियत्वम्।

फणिफेन न० फणिनां फेनमिव। (आफिङ्)अहिफेने।

फणिवल्ली स्त्री० फणिसदृशी दीर्घा, फणिलोकस्था या वल्ली। नाग-वल्लाम् (पानलता)।

फणिहन्त्री स्त्री० फणिनं हन्ति हन-टच् ङीप्। गन्धनाकुलायाम्।

फणिक्षुत्स्त्री० फणिनं क्षरति अपसारयति क्षृ-क्विप्। क्षुद्रदुरालभायाम्

फणिन् पु० फणोऽस्त्यस्य इनि। सर्पे। फणवदादयोऽप्यत्र।

फणीश्वर पु० ६त०। अनन्ते, वासुकौ च।

फल्ल भेदने भ्वा० पर० सक० सेट्। फलति अफालीत् फेलतुः आदर्शे ता। फुल्लतः। अन्यत्र स्फेलितः।

फल निष्पत्तौ भ्वा०पर०अक० सेट् । फलति अफालीत् । क्त फलितः ।
फल गतौ भ्वा० पर० सक० सेट् । फलति अफालीत् । ण्वुल्ला०कर्त्तरि या णः फलः फालः ।
फल न० फल-अच् । वृक्षादीनां यस्मे, लाभे, फलके, (ढाल) कार्य्ये, उद्देश्ये, प्रयोजने, जातीफले, त्रिफलायां, कक्कोले, बाणाग्रे, फाले, दाने, शुष्के च । कुटजवृक्षे पु० । स्वार्थादौ कन् । (ढाल) इति ख्याते चर्ममये अस्त्रप्रतिघातनिवारके पदार्थे । अस्थिखण्डे, नागकेशरे, काष्ठादिपट्टके च पु० ।
फलकपाणि पु० फलकः पाणौ यस्य । (ढाली) चर्मिणि ।
फलकर्कशा स्त्री० फलेन कर्कशा कठोरा । वनकोलायाम् ।
फलकृष्ण पु० फलेन कृष्णः । पानीयामलके ।
फलकेशर पु० फले केशरा इवास्य । नारिकेलवृक्षे ।
फलत्रय(त्रिक) न० द्वित० । वयस्थामलकीहरीतकीरूपेषु द्राक्षापरूष-काश्मीररूपेषु च त्रिषु फलेषु ।
फलद पु० फलं ददाति दा-क । वृक्षभात्रे । फलदातरि त्रि० ।
फलपाक पु० फलेषु पाको यस्य । करमर्द्दके, पानीयामलके च ।
फलपाकिन् पु० फलपाकोऽस्त्यस्य । गर्द्दभाण्डे ।
फलपुष्पा स्त्री० फलानि पुष्पाणीव यस्याः । पिण्डखर्জूर्य्याम् ।
फलपूर पु० फलेन पूरः पूर्णः पूर-क । बीजपूरे । कन् । तत्रैव ।
फलप्रिया स्त्री० फलं प्रियं यस्याः । प्रियङ्गौ । अनुभवे ।
फलभोग पु० द्वित० । फलानां कर्मफलानां सुखदुःखादीनां भोगे
फलमुख्या स्त्री० फलेन मुख्या श्रेष्ठा । अजमोदायाम् ।
फलमुद्गरिका स्त्री० मुद्गं गिरति इन् फलं मुद्गरि यस्याः । पिण्ड-खर्জूर्य्याम् ।
फलवर्त्तुल पु० फलं वर्त्तुलं यस्य । कालिङ्गे वृक्षे । तत्फले न० ।
फलवृक्षक पु० फलप्रधानो वृक्षः संज्ञायां कन् । पनसवृक्षे ।
फलशालिन् त्रि० फलेन शालते राजते णिनि । फलयुक्ते स्त्रियां ङीप् ।
फलशैशिर पु० शिशिरं प्राप्तमस्य अण् फलं शैशिरं यस्य । बदरवृक्षे ।

फलश्रेष्ठ पु० फलेन श्रेष्ठः प्रशस्त तरः । आम्रवृक्षे ।

फलस न० फलं स्यति खो-क । धनसद्मनि ।

फलस्नेह पु० फले स्नेहो यस्य । अक्षोटवृक्षे ।

फलाढ्या त्रि० फलेनाढ्या सम्पन्ना । फलयुक्ते । काकदुम्बर्याम् स्त्री० ।

फलाध्यक्ष पु० फलमध्यक्षमिव यस्य । राजादने । फलदानाध्यक्षे ईश्वरे पु० । फलसाक्षीत्यादयोऽत्यत्र ।

फलाम्ल न० फलमम्लं यस्य । वृक्षाम्ले । अम्लवेतसे पु० ।

फलिन त्रि० फल+अस्त्यर्थे इनच् । फलयुक्ते तादृशे वृक्षे पु० ।

फलिन् त्रि० फल+अस्त्यर्थे इनि । फलयुक्ते तादृशे वृक्षे पु० प्रियङ्गु-वृक्षे स्त्री० ङीप् ।

फली स्त्री० फलमस्त्यस्याः अच् गौ० ङीष् । प्रियङ्गुवृक्षे ।

फलेग्रहि पु० फले-यह इन् । योग्यकाले फलधरे वृक्षे । "फले-ग्रहीन् हंसीति" भट्टिः । ह्रस्व । फलेग्राहिरत्यत्र ।

फलेन्द्र पु० फलेन इन्द्र ऐश्वर्यान्वितः । राजजम्बुवृक्षे ।

फलेरुहा स्त्री० फले रोहति रुह-क । पाटलिवृक्षे ।

फलोत्तमा स्त्री० फलेन उत्तमा । द्राक्षाभेदे ।

फलोदय पु० ६त० । फलोत्पत्तौ लाभे, स्वर्गे, हर्षे च ।

फल्गु त्रि० फल-उ गुक् च । रम्ये, सारे, निरर्थके च गयातीर्थस्थ नद्यां स्त्री० । (फाल्गु) इति ख्याते धूलिरूपे पदार्थे, काको-डुम्बरिकायाम्, वसन्तसमये मिथ्यावाक्ये च पु० ।

फल्गुन पु० फल्गुषु ऋर्भेदो नीयतेऽस्मिन् नी-ड । फाल्गुनेमासि ।

फल्गुनी स्त्री० फल-उनन् गुक् गौ०ङीष् । काकोडुम्बुरिकायाम् । अस्मिन्यधिके एकादशे, द्वादशे च नक्षत्रे च ब०व० ।

फल्गुवाटिका स्त्री० फल्गूनां वाटीव इवार्थे कन् । काकोडुम्ब-रिकायाम् ।

फल्गुवृन्ताक पु० फल्गु रम्यं वृन्ताकं यस्य । क्षोनाकभेदे ।

फल्गूत्सव पु० फल्गुनिमित्तक उत्सवः । फाल्गुनपौर्णमास्यादिषु कर्त्तव्ये (आधीर) फल्गुद्रव्यकरणे उत्सवे ।

फल्ग्य न० फलाय हितं यत् । पुष्पे ।

फाणि पु० स्फाय-नि पृ० । गुड़विकारे, करम्भे दधिमिश्रितसक्तौ च ।

फाणित न० फण-णिच् क्त । गुड़विकारभेदे (फेणी) ।

फाण्ट न० फण-क्त नि० । अनायासेन क्वथे । "क्वित्योष्णतोये क्वथितः फाण्ट इत्यभिधीयते" इत्युक्ते क्वाथभेदे ।

फाल न० फलाय शस्त्राय यितम् अण्, फल्यते विदार्य्यते भूमिरनेन वा घञ् । खनामख्याते लाङ्गलमुखस्थे लौहभेदे । फालमस्त्रस्य अच् । बलदेवे, महादेवे च पु० । फलस्य विकारः अण् । कार्पासवस्त्रे त्रि० । फालकरणके दिव्यपरीक्षाभेदे न० । फलेषु भवः अण् । जम्बीरबीजादौ पु० ।

फाल्गुन पु० फल्गुनन् युक् च स्वार्थे प्रज्ञादयण् । अर्জ্জুने मध्यमपाण्डवे, अस्मिन्यर्थके एकादशे द्वादशे नवमे च स्त्री० ब०व० ङीप् । फल्गुनीभिर्युक्ता पौर्णमासी अण् । चान्द्रफाल्गुनमासपौर्णमास्यां स्त्री०ङीप् । सौरमासे अण् । चैत्रार्थके द्वादशे मासे पु० । वर्षस्य हि चैत्रादित्वम् ।

फाल्गुनिक पु० फाल्गुनी फल्गुनीनक्षत्रयुक्ता पौर्णमासी अस्मिन् मासे ठक् । चैत्रार्थके द्वादशे मासे ।

फु पु० फल-डु । मन्त्रोच्चारणपूर्वके फुत्कारे, तुच्छवाक्ये च ।

फुट त्रि० स्फुट-क पृ० । विदीर्णे, प्रस्फुटिते च ।

फु(फू)त् अव्य० फल-डुति पृ० वा दीर्घः । अनुकरणशब्दे ।

फुल्ल विकाशे भ्वा०पर०अक० सेट् । फुल्लति अफुल्लीत् ।

फुल्ल त्रि० फुल्लविकाशे अच् । विकशिते । पुष्पे ।

फेण(न) पु० स्फाय-न पृ० मतान्तरे णत्वम् । दुग्धजलादेरुपर्य्युपरिस्थे बुद्बुदाकारे पदार्थे (फेना) अस्य थान्तत्वमपि "हंसश्रेण्यो नदीनिनदे संप्रतीयिरे । यथा सारस्वता मन्त्रा अन्तरे फेणसङ्गता" इत्युक्तौ पक्षे अन्ते रेफेण अन्त्यस्वरकारेण संयुता इत्यर्थः । हिमे च । गुड़विकारभेदे स्त्री० ङीप् ।

फेणा(ना)ग्र न० ६त० । बुद्बुदे ।

फेणि(नि)ल त्रि० फेन+अस्त्यर्थे इलच्। फेनविशिष्टे। कोविदारे, सदृशफले च न०। वदरवृक्षे, अरिष्टवृक्षे च पु०।

फेरव पु० फे इत्यव्यक्तो रवोऽस्य। शृगाले, राक्षसे च। तद्गुणयोगात् धूर्त्ते, हिंस्रे च त्रि०।

फेरु पु० फे इत्यव्यक्तं रौति रु-डु। शृगाले।

फेल(ला) न०स्त्री० फेल-अच् वा टाप्। भुक्तसक्तुज्झिते, उच्छिष्टे।

फेल गतौ भ्वा०पर०सक० सेट्। फेलति अफेलीत्। चङि न ह्रस्वः

ब

ब पु०बल-ड। सूचने, तन्तुतन्त्राने, वपने, वरुणे, घटे समुद्रे, योनौ, जले च। गमने स्त्री०।

बंहिष्ठ त्रि०अतिशयेन ब(व)ढः दृढन् बंहादेशः। अतिशयेन ब(व)ढले।

बंहीयस् त्रि०अतिशयेन बहुः ईयसु बंहादेशः। अतिशयेन ब(व)ढले।

बठ दृब्धौ सामर्थ्ये च भ्वा० पर० अक०सेट् बठति अबठीत्अबाठीत्। बेठतुः। [अश्विनीनन्तरे, दासाश्च।

बडवा स्त्री० बलं वाति वा-क लस्य डः। घोटक्याम्, तद्देवताके

बडवाकृ(हृ)त न० बडवया दास्या कृतः (हृतः) वा। दासभेदे "भक्तदासस्य वित्तेयस्तथैव बडवाकृ(हृ)त" इति स्मृतिः।

बडवाग्नि पु० बडवायाः शिवसृष्टाश्वायासुखस्योऽग्निः। समुद्रस्थिते घोटकीमुखस्थे कालानले। बडवानलादयोऽप्यत्र।

बडवामुख पु० बडवाया मुखं स्थानत्वेनास्त्यस्य अर्श आदित्वादच्। समुद्रस्थे कालानले।

बडवासुत पु० द्वि० व० ईत०। अश्विनीकुमारयोः।

बण शब्दे भ्वा०पर०सक०सेट्। बणति अबाणीत् अबणीत्। बेणतुः।

बणिक्पथ पु० ईत० अच्समा०। हट्टे।

बणिग्बन्धु पु० बणिजां बन्धुरिव पोषकत्वात्। नीलीवृक्षे।

बणिग्भाव पु० ईत०। वाणिज्ये आजीवनार्थं क्रयविक्रयकरणे।

बणिज्(ज) पु० पणायते व्यवहरति पण-इञ् इञो वा पस्य बः।

आजीवनार्थं क्रयविक्रयव्यवहारकर्त्तरि, ज्योतिर्मोक्षे ववादिः षष्ठे करणे च ।

वणिज्य न० वणिजो भावः कर्म० यत् । वणिजे आजीव नार्थं क्रयविक्रयादिव्यवहारे, स्त्रीत्वमपि । "चतुरेव चतुर्वर्गचिन्तामणि-वणिज्यवेति तुलाफलम् । [अवदीत् । वेदतुः ।

वद् स्थैर्य्ये निश्चलभवने च भ्वा० पर० सक० सेट् । वदति अवादीत्-

वद् भाषणे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट् । वादयति-ते अवीवदत् । पक्षे वदतीत्यादि ।

व(व)दर पु० व(व)द्-अरच् । कोलिवृक्षे । देवसर्षपवृक्षे, कार्पास-बीजे च न० । वराहक्रान्तायां स्त्री० टाप् ।

व(व)दरफली स्त्री० व(व)दरस्येव फलमस्याः । भूमिव(व)दर्याम् ।

व(व)दरवल्ली स्त्री० व(व)दरफलप्रधाना वल्ली शाक० । भूमिव(व)दरी-तिख्याते लताभेदे ।

व(व)दरामलक न० व(व)दरमिवामलकम् । प्राचीनामलके ।

व(व)दरि(री) स्त्री० व(व)द्-अरि या ङीष् । कोलिवृक्षे, कार्पास्यां, कपिकच्छ्वाञ्च ।

व(व)दरिकाश्रम पु०न० । बदरी+स्वार्थे कन् तस्याः समीपे, तच्चिह्नि-तोऽाश्रमः । तीर्थविशेषे । व(व)दरीशैलोऽप्यत्र ।

व(व)दरीच्छदा स्त्री० व(व)दर्या इव च्छदो यस्याः । कपिकोलवृक्षे ।

व(व)दरीपत्र पु० व(व)दर्या इव पत्रमस्याः । नखीगन्धद्रव्ये । स्वार्थे कन् । तत्रैव । [याम् ।

व(व)दरीफला स्त्री० व(व)दर्या इव फलमस्याः । नीलझेफालिका-**बहुफल** पु० बहूनि फलान्यस्य । करञ्जवृक्षे ।

बहुमुष्टि त्रि० बहु बहुतरः दानायाप्रसारितो मुष्टिर्यस्य । कृपणे ।

बहुशिख पु० बहवः शिखा यस्य । शिखौ । शिखाबहुलयुक्ते त्रि० । उच्चटायां स्त्री० ।

बध हनने-घञ् कर्मादेयः । हननेप्राणवियोगफलके व्यापारे ।

बध संयमने पु० उ०उक० सेट् । बाधयति-ते अबीबधत्-त ।

बंध निन्दायां बन्धने च भ्वादि० आत्म० सक० सेट्। बीभत्सते अबीभत्सिष्ट।

बधिर त्रि० बध्न–किरन्। श्रुतियन्त्रिमूले अवयवेन्द्रियरहिते।

ब(व)धू स्त्री० बध्नात्यविद्यया बध्न–उ नलोपः, उद्यते वह–ऊ धस्य धादेशः वा। भार्य्यायाम्, स्नुषायां श्वश्र्याम्, नवोढायाम्, भार्य्यायां, पुत्रिकायाञ्च।

ब(व)धू(टि)टी स्त्री० अल्पा ब(व)धूः अल्पार्थे टि वा ङीष्। अल्पवयस्कायां भार्य्यायाम् "गोपव(ब)धूटीदुकूलचौरावे"ति भाषापरिच्छेदः।

ब व)धूत्सवप्रसव पु० ब(व)ध्वा उत्सव आर्त्तवम् रजः सदृश प्रसवः पत्न्या दिर्यस्य। रक्ताश्वाने।

बध्य त्रि० बधमर्हति बध+यत्। बधार्हे।

बध्यभूमि स्त्री० ङन–भावे यत् बधादेशः बध्यस्य भूमिः। श्मशाने बधस्थाने। बध्यस्थानादयोऽप्यत्र।

बभ्रु न० बध्न–ष्ट्रन् नलोपः। सीसके, चर्मनयरज्ज्वां स्त्री० ङीष्। पु० नख रः। बभ्रीत्यत्र स्त्री०।

बन याचने तना० आत्म० द्विक० सेट्। बनुते अबनिष्ट। ङा वेट्।

बन्ध बन्धने क्र्या० पर० सक० अनिट्। बध्नाति अबान्त्सीत्।

बन्ध संयमने चुरा० उभ० सक० सेट्। बन्धयति, ते अबबन्धत् त।

बंध पु० बध्न–घञ्। संयमने निगडादिना गतिरोधने रज्ज्वादिवेष्टनस्थले च। कर्मणि घञ्। देहे, ऋणशोधनविश्वासाय स्थापिते द्रव्ये आधौ च।

बन्धक पु० बन्ध–ण्वुल्। विनिमये तुल्यरूपद्रव्यादानेन द्रव्यान्तरप्रदानरूपे परिवर्त्ते। आधौ न०। "अशीतिभागो दृद्धिः स्यात् मासिमासि सबन्धके" इति स्मृतिः पुंवल्लक्षणत्वात् स्त्रियाम् स्त्री० गौरा० ङीष्।

बन्धन न० बन्ध–भावे ल्युट्। निगडादिना संयमने, बधे च। करणे ल्युट्। रज्ज्वौ।

बन्धनवेश्मन् न० ६त०। कारागारे बध्यागारादयोऽप्यत्र।

बन्धनस्तम्भ पु० ईत० । हस्तिसंयमनकाष्ठे आलाने ।

बन्धु पु० बध्नाति मनः स्नेहादिना बन्ध-उ । भ्रातरि, मातुलपुत्रादौ, बन्धुश्च: पितृभ्रातृत इति स्मृतिः" बान्धवे, मित्रे, स्वजने, पितरि, मातरि, भ्रातरि, बन्धुजीववृक्षे च । [बाधुआलि) वृक्षभेदे च ।

बन्धुजीव पु० बन्धुरिव जीवयति अण् स्वार्थे कन् । बन्धुजीववृक्षे ।

बन्धुता स्त्री० बन्धु+सङ्केत, भावे तल् वा । बन्धुसमूहे, तद्भावे च ।

बन्धुर न० बन्ध-उरच् । मुकुटे । स्त्रीचिह्ने, तिलकवृक्षे बन्धुजीववृक्षे, बधिरे, हंसे, विड्वृक्षे, क्षुपौषधे, वके विड्वृक्षे च पु० । रम्ये, नम्रे, उन्नतानते च त्रि० । वेश्यायां, शकुनौ । स्त्री० । बन्ध उरच् । रम्ये त्रि० ।

बन्धुल पु० बन्ध-उलच् । असतीपुत्रे । सुन्दरे, रम्ये, नम्रे च त्रि० ।

बन्धूक पु० बन्ध-ऊक । (बान्धुली) वृक्षे बन्धूकपुष्पसङ्काश" मिति रवि-प्रणाममन्त्रः रक्तपीतादिपुष्पे मध्याह्ने प्रकाशवति पुष्पवृक्षे, पीत-शालके च । [ईत० । बन्धूककुसुमे न० ।

बन्धूकपुष्प पु० बन्धूकस्येव पुष्पमस्य । पीतशालके वृक्षे, जीरके च ।

बन्धूलि पु० बन्ध-अलि । बन्धुजीववृक्षे ।

बन्ध्य पु० त्रि० बन्ध-यत् । कालप्राप्तावपि फलशून्ये वृक्षे । निष्फले, 'अबन्ध्यकोपस्ये'ति भारविः बन्धनीये च त्रि० । अपुत्रायां स्त्री-जातौ, बालाख्ये गन्धद्रव्ये च स्त्री० ।

बन्ध्याकर्कोटी स्त्री० बन्ध्याया उपकारिणी पुत्रप्रदत्वात् कर्कोटी । तिक्तकर्कोट्याम् अस्याः पुत्रदायित्वेन बन्ध्योपकारित्वम् । स्वार्थे कन् अतइत्वम् । तत्रैव ।

बभ्र गतौ भ्वा० पर० सक० सेट् । बभ्रति अबभ्रीत् ।

बभ्रु पु० भृ-कु-द्वित्वम् बभ्र-उ वा । शिवे, विष्णौ, नकुले, वह्नौ, मुनिभेदे, देशभेदे, च तद्देशवासिनि ब० व० । पिङ्गलवर्णे पु० । तद्वति त्रि० । स्त्रियां ङीप् । खलतौ बकुकरे पु० (फरास) ।

बभ्रुधातु पु० कर्म० । स्वर्णे, धुलूरे, गैरिके च ।

बम्ब गतौ भ्वा० पर० सक० सेट् । बम्बति अबम्बीत् ।

बर्ह न० बृ-असुन् । बृहत्वे । बृ-असुन् । आधिक्ये । असु । ऐश्वर्ये अमर० । कर्मणि असुन् । आसनादिरे देशादिभेदः आसाद्ये, सिंहले, आरे च पु० । भावेऽप् । बरत्वे । बृहन्मां, सिंहलाबां, मेदाबां, आह्लाद्यां, विकङ्कतेषु पाठायां, कण्टिकारायां स्त्री० टाप् । अतावर्यां स्त्री० गौ० ङीष् ।

बर्ब गतौ भ्वा० पर० सक० सेट् । बर्बति अबर्बीत् ।

बर्बट पु० बर्ब-अटन् । राजमाषे (बरबटी) । गौ० ङीष् । तत्रैव त्रीव्हौ, मेखलायाञ्च ।

बर्ह दाने बधे स्तुतौ वाचि च भ्वा०आ०सक० सेट् । बर्हते अबर्हिष्ट ।

बर्ह न० बर्ह-असुन् । मयूरपिच्छे, पक्षे, परीवारे च ।

बल जीवने, भाव्यावरोधे च भ्वा० पर० अक० सेट् । बलति । अबालीत् बेलतः । [अबलिष्ट ।

बल दाने बधे निरूपणे च भ्वा०उभ०सक०सेट् । बलति-ते अबालीत्

बल जीवने चु० उ० अक० सेट् घटा० । बलयति-ते अबीबलत् त अबलादि० च । बलः बालः ।

बल्ह निरूपणे चु० आत्म० सक० सेट् । बाल्हयते अबीबल्हत् ।

बल न० बल-असुन् । सैन्ये, देहजे सामर्थ्ये स्त्रीत्वे, गन्धरसे, रूपे, शुक्ले, देहे, पक्षिणे, रक्षे च । बलयुक्ते त्रि० । कामे, बलदेवे, बलवृक्षे, दैत्यभेदे च पु० ।

बलक्ष पु० बलं बालत्वात् क्षै-क । शुक्लवर्णे तद्वति त्रि० ।

बलज न० बलात् जायते जन-ड । क्षेत्रे, पुरद्वारे, मुखे, मुखे च । बलजाते त्रि० ।

बलद पु० बलं ददाति दा-क । "पौष्टिके बलदः स्मृत" इत्युक्ते पौष्टिककर्मणि बलिभेदे । अश्वगन्धायां स्त्री० । बलदातरि त्रि० ।

बलदेव पु० बलेन दीव्यति दिव-अच्, बलोऽधिको देवो वा मध्य० । बलरामे । नागबलौषधौ स्त्री० ।

बलभद्र पु० बल+अर्श आद्यच् बलो बलवानपि भद्रः सौख्यः । बलदेवे, गवये च । बलेषु भद्रा । नागबलौषधौ स्त्री० स्वार्थे अण् । तत्रैव

बलराम पु० बलेन रमते रम-घञ्। बलभद्रे रोहिणीनन्दने वसुदेवे रामे।

बलवत् अव्य० बल+अतिशये मतुप् वत्वञ्च। अतिशये "बलादिभ्यो मतिबहुलम्" मिति मतुप्। बलमस्यास्ति मि०। 'बीजे बलवती नाड़ी'ति वैद्यकम्।

बलवर्द्धिनी स्त्री० बलं वर्द्धयति वृध-णिच्-णिनि। ओषधीभेदे।

बलविन्यास पु० बलानां सैन्यानां विन्यासेन दुर्गसुखार्थे व्यासः स्थापनम्। व्यूहे सेनासन्निवेशविशेषे।

बलशालिन् त्रि० बलेन शालते शल-णिनि। बलविशिष्टे।

बलसूदन पु० बलं तन्नामकमसुरं सूदयति सूद-ल्यु। इन्द्रे।

बला स्त्री० बल कार्य्यत्वेनास्त्यस्याः। (बेलियाड़ा) क्षुपभेदे, विष्णु-भिदेच रामाय दत्ते अस्त्रविद्याभेदे च।

बलाका स्त्री० बलं कल्मषमकति नक्कति अक-अच्। बकभेदे।

बलाट पु० बलमटति ददाति अट-अच्। शुल्के।

बलात् अव्य० बल सामर्थ्य कारणत्वेनास्तीति अत-क्विप्। हठादिशब्दे। पञ्चम्यन्तबलशब्देनास्य सगतार्थता बलात्कार इत्यादिविग्रहे तस्या बलसम्बन्धीकार्य्यत्वात्।

बलात्कार पु० बलात्+कृ+घञ्। बलपूर्वकरणे, हठात्करणे च।

बलात्मिका स्त्री० बलमेवात्मा स्वरूपं कारणत्वात् यस्याः सा बहु व्रतरक्तम्। (हातिशुण्डा) हस्तिशुण्डीवृक्षे।

बलाढ्या स्त्री० बलार्थं आढ्या। (बेलियाड़ा) क्षुपभेदे।

बलानुज पु० अनुजायते अनु+जन-ड ईत०। श्रीकृष्णे।

बलामोटा स्त्री० बलमामोटयति आ+मुट-अच्। नागदमन्याम्। अयन्तत्वेऽपि पृषोदरादि तथात्वे ङीप् स्यात्।

बलार्य पु० बलस्यार्यः स्वामी अर्य-घञ्। बलभद्रे।

बलारांति पु० बलस्य तन्नामासुरस्यारातिः। इन्द्रे। बलयतु पृषोदरादित्वात्।

बलालक पु० बलाय सामर्थ्याय अलति पर्य्याप्नोति अल–ण्वुल् । पानीयामलके ।

बलाहक पु० बलं कम्पनमाजहाति आ+हा–कनू । मेघे सुस्तके, पर्वते, दैत्यभेदे, नागभेदे च । गुलञ्चकन्दे ।

बलाहकन्द पु० बलं सामर्थ्यमाकृष्यति आ+कृष–क तादृशः कन्दः ।

बलि पु० वल–इन् । पूजोपहारे, दत्ते "स्तौ बलिं चैव निजगालाहरुक्तिम्" इति चण्डी राजग्राह्ये भागे, उपप्लवे, चामरदण्डे गृहस्थकर्त्तव्यपञ्चयज्ञमध्ये भूतयज्ञे, "बलिकर्म ततः कुर्य्यादिति स्मृतिः । दैत्यभेदे विरोचनपुत्रे च 'येन बद्धो बलीराजा दानवेन्द्रो महाबली'ति रक्षाबन्धनमन्त्रः । जरया श्लथचर्मणि स्त्री० वा ङीप् । 'गृहस्थस्तु यदा पश्येत् वलीपलितमात्मन' इति स्मृतिः । उदरावयवे । 'बलिवयं चारु बभार बाले"ति कुमारः । गुह्यस्थे अङ्कुराकारे मांसपिण्डे, गृहदारुभेदे च (पाड) स्त्री० स्वार्थे कन् । तत्र, अतिबलायाञ्च ।

बलिध्वंसिन् पु० बलिं ध्वंसयति स्वस्थानात् पातयति ध्वंस-णिच्–णिनि । विष्णौ वामनावतारेण हि तस्य तथात्वम् ।

बलिन(भ) त्रि० बलि+अस्त्यर्थे–इन भ वा । जरया शिथिलचर्मवति ।

बलिन् त्रि० बलमस्त्यस्य इनि । बलवति । उष्ट्रे, महिषे, वृषे, शूकरे, बलरामे कुन्दवृक्षे, कफे, माषे च पु० । (वेलिआड़ा) क्षुपे स्त्री० ङीप् ।

बलिपुष्ट पु० बलिना पूजोपहारद्रव्येण पुष्टः पुष–क्त । काके ।

बलिप्रिय पु० बलिनं प्रीणाति प्री–क । लोध्रवृक्षे । [काके ।

बलिभुज् पु० बलिं पूजोपकरणद्रव्यं गृहस्थदत्तबलिं वा भुङ्क्ते क्विप् ।

बलि(ली)मुख पं० बलि(ली)युक्तं मुखमस्य शाक० । वानरे ।

बलिष्ठ त्रि० अतिशयेन बली बलिन्+इष्ठन् । अत्यन्तबलवति । उष्ट्रे पु०

बलिसद्मन् न० ष तत्० । पातालें बलिपुरादयोऽस्यत्र ।

बलीक पु०न० वालयति आवृणोति वल ईकन् नि० । पटलप्रान्ते (छांव)

बलीयस् त्रि० अतिशयेन बली बलिन्+ईयसुन् । अत्यन्तबलवति ।

बलीवर्द पु० वृ–क्विप् बर् दृ लक्षणेन बलं दृणाति तौ दद्राति दा–क वा दृवर्द्दः बली चासौ दृवर्द्दश्चेति । वृषे ।

बल्य न० बलाय हितं बल+यत् । प्रधानधातौ, शुक्रे, बलसाधने च । अश्वगन्धायाम्, अतिबलायां, प्रसारिण्याञ्च स्त्री० ।

बल्ह स्तुतौ दाने, बधे, च सक० याचने द्विक० भ्वा० आत्म० सेट् । बल्हते अबल्हिष्ट ।

बष्क(स्क)यि(यी)नी स्त्री० भस्क गतौ अयन् पृ० भस्य बः भस्य वा षत्वम् बष्क(स्क)योऽस्त्यस्यां इनि ङीप् षमध्यत्वे णत्वम् । चिर-प्रसूतायां गवि । बष्क(स्क)यं नयतीति नी–ड गौ० ङीप् षमध्यत्वे पूर्व० णत्वम् । बष्क(स्क)यणी(नी)त्यपि ।

ब(व)ह वृद्धौ भ्वा० आत्म० अक० सेट् इदित् । बंव(वं)हते अबंव(वं)हिष्ट । महिसाहर्य्यादयश्चोज्ज्वलदत्तादिरितिपाणिनीयाः । दन्त्योष्ठा-दिरिति बोपदेवः । [स्त्रियां वा ङीप् ब(व)ह्वी ।

ब(व)हु त्रि० बंव(वं)हि–कु नलोपः । त्रिप्रभृत्यनेकसङ्ख्यान्विते, विपुले च

ब(व)हुकण्टक पु० ब(व)ह्वनि कण्टकान्यस्य । क्षुद्रगोक्षुरे (गोखुरी) क्षुपभेदे । [कायाम् ।

ब(व)ह्वी स्त्री० ब(व)ह्वयः कण्टाः कण्टकाः यस्याः । कण्टकारि-

ब(व)हुकन्द पु० ई ब० । शूरणे (ओल) । कर्कट्यां स्त्री० ।

ब(व)हुकर त्रि० बंव(वं)हनि किरति कृ-अच् । (फराश्) मार्ज्जन-करे । सम्मार्ज्जन्यां स्त्री० गौ० ङीष् । क–अच् ई त० । उष्ट्रे । अनेककार्य्यकरे त्रि० ।

ब(व)हुकर्णिका स्त्री० ब(व)ह्वयः कर्णा इव पर्णान्यस्य । आखुक-ण्यां । [चम्पककलिकायां, जीरके च स्त्री० ।

ब(व)हुगन्ध पु० ई ब० । कन्दुरुके । त्वचे, (तेजपात) न० । यूथ्यां,

ब(व)हुगन्धदा स्त्री० ब(व)ह्वीं गन्धं ददाति दा–क । जगमेदे ।

ब(व)हुग्रन्थि पु० ई ब० । भार्ङ्गे (भाङ) ।

ब(व)हुच्छिद्रा स्त्री० ब(व)ह्व यथा स्यात् छिद्यते स्म छिद्–क तस्य दश्च नः । कन्दगुडूच्याम् ।

ब(व)ह्वतिक्ता स्त्री० ब(व)ह्व यथा तथा बाहुल्येन वा तिक्ता । काकमाच्याम् ।

ब(व)ह्वतिथ त्रि० ब(व)ह्वनां पूरणः ब(व)ह्वन्+तिथुक् च । अनेकसंख्याते, "काले गते बहुतिथे, इत्युद्भटः ।

ब(व)ह्वच अव्य० ब(व)ह्वच् तल् । अनेकेषु कालादिषु ।

ब(व)ह्वत्वच् पु० ई ब० । भूर्जपत्रवृक्षे । स्वार्थे कन् तत्रैव ।

ब(व)ह्वदुग्ध पु० ब(ब)ह्वनि दुग्धानीव चूर्णानि शुभ्रवर्णत्वात् यस्य । गोधूमे । प्रचुरक्षीरवत्यां गवि, क्षुद्रक्षीरवृक्षे च स्त्री० । स्वार्थे कन् अत इत्वम् । क्षुद्रक्षीरवृक्षे ।

ब(व)ह्वधा अव्य० ब(व)ह्व+प्रकारे-धाच् । अनेकप्रकारे ।

ब(व)ह्वपत्र पु० ई ब० । पलाशवृक्षे अनेकपर्णयुक्ते त्रि० । सिद्धिन्याम्, हतकुमार्याम्, तुलस्याम्, हरितायां गोरक्षदुग्धायां, जतुकायाञ्च स्त्री० गौ० ङीष् । ततः संज्ञायां कन् । भूम्यामलक्यां, मेथिकायां, महाशतावर्य्याञ्च ।

ब(व)ह्वपर्ण पु० ई ब० । सप्तच्छदवृक्षे तस्य प्रतिपर्णं सप्त सप्तपर्णत्वात् । अनेकपर्णयुक्ते त्रि० । मेथिकायां स्त्री० ङीष् । ततः संज्ञायां कन् । आखुकर्ण्यां स्त्री० टाप् । [विच्चात्तत्वात्वम् ।

ब(व)ह्वपाट्(द) पु० ई ब० । वा अन्यलोपः । वटवृक्षे अनेक शिफा-

ब(व)ह्वपुच्च ब(व)ह्वः पुत्रा-इवः पर्णान्यस्य । सप्तच्छदे । अनेकपुत्रा-इव मूलान्यस्य । शतमूल्यां स्त्री० ङीष् ।

ब(व)ह्वपुष्प पु० ई ब० । निम्बवृक्षे । संज्ञायां कन् अत इत्वम् । धातक्यां स्त्री० । [तुल्यप्रचुरत्वणत्वात् सुह्वल्ये पु० ।

ब(व)ह्वप्रज त्रि० ई ब० । बहुसन्तानवति । शूकरे पु० । प्रजा-

ब(व)ह्वफल पु० ई ब० । कदम्बवृक्षे, विकङ्कते, तेजःफले च । अनेकफलयुक्ते त्रि० । माषपर्ण्यां, क्षविकायां, काकमाच्यां, त्रिपुटायां, (गगा) क्षुद्रकारवेल्लयां, भूम्यामलक्याञ्च स्त्री० । संज्ञायां कन् अत इत्वम् । भूमिवर्दर्यां स्त्री० । आमलक्यां स्त्री० ङीष् ।

ब(व)ह्वमञ्जरी स्त्री० ई ब० संज्ञात्वात् न कप् । तुलस्याम् ।

ब(व)हुमल पु० ६ब० । सीसके । अनेकमलयुक्ते त्रि० ।

ब(व)हुमूर्त्ति स्त्री० ६ब० । वनकार्पासे । नानाकारवति त्रि० ।

ब(व)हुमूल त्रि० ६ब० । अनेकमूलवति । शिंशौ पु० । संज्ञायां कन् । उशीरे न० । शतावर्य्यां स्त्री० टाप् । माकन्द्यां ङीप् ।

ब(व)हुरश्मि स्त्री० ६ब० । महाज्योतिष्मत्याम् । नानारसवत्यां त्रि० ।

ब(व)हुरूप पु० ६ब० । सर्ज्जरसे (धुना) शिवे, विष्णौ, हिरण्यगर्भे, कामे केशे च । नानारूपवति त्रि० ।

ब(व)हुरोमन् त्रि० ६ब० अनेकरोमवति रोमशे । मेषे पु० ।

ब(व)हुल त्रि० ब(व)हि-कुलच् नि० लोपः । अनेकसंख्यान्विते प्रचुरे । ब(व)हूनि लाति ला-क । अग्नौ, कृष्णवर्त्मे च पु० । बहति त्रि० । कृष्णपक्षे पु० "ब(व)हुलेऽपि गते निशाकर" इति कुमारः । आकाशे न० । नीलिकायां नीलवर्णायां गवि च स्त्री० । कलच् पु० । ब(व)हुलः । प्रचुरे त्रि० । अग्निदैवत्यात् कृत्तिकानक्षत्रे स्त्री० टाप् ब० व० ।

बहुलगन्धा स्त्री० ६ब० । एलायाम् ।

ब(व)हुलच्छद पु० ६ब० । रक्तशोभाञ्जने ।

ब(व)हुलीकृत त्रि० ब(व)हुल+च्वि-कृ-क्त । (आगड़ा) कुत्सितवर्णेन राशीकृते खलस्थे धान्ये, राशीकृतमात्रे च ।

ब(व)हुवल्क पु० ६ब० । प्रियाल (पियाल) ।

ब(व)हुवाहक पु० ब(व)हूनि वाहयति अण्, ततः कन्, णुल्वा । संघातके (लोना खाता) ।

ब(व)हुविस्तीर्णा स्त्री० ब(व)ङ्या यया तया विस्तीर्णा वि-स्तृ-क्त । (कुचड़) कृचिकायुक्ते ।

ब(व)हुवीज पु० ६ब० । (आता) आम्रे वृक्षे । प्रचुरबीजवति त्रि० ।

ब(व)हुवीर्य्य पु० ६ब० । जिगीतके, (वयड़ा) लघुवीर्यशाके, (नटे-शाक) शाल्मलिवृक्षे, मरुके च । भूम्यामलक्यां स्त्री० ।

ब(व)हुव्रीहि त्रि० ६ब० । अनेकधान्यादियुक्ते । व्याकरणोक्ते प्रधानेन अन्यपदार्थविधाने समानभेदे पु० ।

ब(व)हुशस् अव्य० ब(व)हु+शस् । अनेकवारानिष्यर्थे "गुणक्रियो ब(व)हुशो नियोजिता" इति कुमारः ।

ब(व)हुशल्य पु० ६त० । रक्तखदिरे । अनेकशल्ययुक्ते त्रि० ।

ब(व)हुशाल पु० ब(व)हुभिः शालते शल-संज्ञायां कर्त्तरि घञ् । क्षुद्रीवृक्षे । [त्रि० ।

ब(व)हुशिखा स्त्री० ६त० । जलपिप्पलाम् । अनेकशिखा युक्ते

ब(व)हुसार पु० ६त० । खदिरे । अनेकसारवति त्रि० ।

ब(व)हुसुता स्त्री० ब(व)हवः सुता इव मूलान्यस्याः । शतमूल्याम् । अनेकपुत्रवति त्रि० । [नानायुक्ते त्रि० ।

ब(व)हुसूति स्त्री० ६त० । अनेकप्रसववत्यां गवि । ब(व)हुस

ब(व)हुस्रवा स्त्री० ब(व)हु स्रवा यथा तथा स्रवति स्रु-अच् । शतमूल्याम् । अनेकधा चरणवति त्रि० ।

ब(व)ह्रृच पु० ६त० अच् समा० । ऋग्वेदे । सूक्ते न० । तदभिज्ञे त्रि० । तत्पाठ्यां स्त्री० । [अबा(बा)ड्डिष्ट ।

बा(वा)ड आह्वावने सक०स्नाने अक० भ्वा० आ० सेट् । बा(वा)ड़ते

बाडव न० बड़वानां समूहः अण् । घोटकसमुदाये । बाड़-घञ् बल-घञ् वस्य डः वा बाड़ो वृद्धिः तं वाति वा-क । ब्राह्मणे पु० । बड़वायां जातः अण् । और्वे समुद्रस्थे कालाग्निभेदे पु० । वा-ड़वाग्न्यादयोप्यत्र पु० ।

बाडवेय पु० द्वि० बड़वायाः अपत्ये-ढक् । अश्विनीकुमारयोः ।

बाड्य न० बाड़व+संघे-यत् । विप्रसमुदाये ।

बा(वा)ण पु० वण-शब्दे वण-गतौ वा संज्ञायां कर्त्तरि घञ् । शरे, गोक्षुरे, (बांट) विरोचनसुते दैत्यभेदे, केवले च । शरपुङ्खे स्त्री० । नीलझिण्टाम् पु० स्त्री० । मेदिन्यां दन्त्योष्ठ्य वादित्वेन पठितः रायमुकुटादयः वणशब्दे इति धातुप्रकृतिकत्वमाङ्करतोऽस्योभयवि-धादित्वम् ।

बा(वा)णलिङ्ग बाणदैत्येन संपूज्याविस्तृत्य नर्म्मदायां निक्षिप्ते शिवलिङ्गभेदे । [शरो वाचस्पत्ये ।

बाणिज्य न० बणिजो भावः, कर्म वा ब्राह्मणादित्वात् ष्यञ् । क्रय-विक्रयादौ "बाणिज्येन गतस्य मे गृहपते"रिति मा० ३ प० ।

बाणि(णी) बण–इ णिच् । वस्त्रादीनां वपनक्रियायाम् । वा ङीप् । वस्त्रादीनां वपनक्रियायां, वाक्ये, सरस्वत्याञ्च ।

बा(व)दर पु० स्त्री० ब(व)दर+स्वार्थेऽण् । कार्पासवृक्षे, ब(व)दरस्येदं तस्य विकारो वा अण् । कार्पासवस्त्रे न० । तद्वस्त्रादौ त्रि० ।

बा(वा)दरायण पु० ब(व)दर्य्या भवः फक् । वेदव्यासे । इञि । बा(वा)दरिरप्यत्र ।

बाध पु० बाध–घञ् । प्रतिरोधे । न्यायमते स्वाभावव्यवहार्थे । यथा वह्निमुद्दो बह्न्यभाववान् हृदो बाधः । । बाध–कर्त्तरि अच् । प्रतिबन्धके त्रि० । भावे घञ् । बोधप्रतिबन्धे, पीड़ने, उपद्रवे च । [चण्डि न ह्रस्वः ।

बाध विलोडने स्वादि० आत्म० सक० सेट् । बाधते अबाधिष्ट ।

बाधक त्रि० बाध–ण्वुल् । प्रतिबन्धके । स्त्रीणां ऋतुकाले प्रजा जनन-शक्तिप्रतिरोधके रोगभेदे पु० ।

बाधिर्य्य न० बधिरस्य भावः ब्राह्मणादित्वात् ष्यञ् । श्रवणशक्तिरा-हित्ये रोगभेदे । [अपत्ये ।

बाभ्रकिनेय पु० स्त्री० बभ्रुकायाः अपत्यं ढक् ढनङ् च । अपत्ये ।

बान्धव पु० बन्धु+स्वार्थे अण् । बन्धुशब्दार्थे, पितृमातृसम्बन्धिनि मातुलादौ च ।

बाल पु० न० (बाला) गन्धद्रव्यभेदे । मूर्खे, शिशौ च त्रि० । केशे पु० । अर्श आदित्वादच् । अश्वशिशौ, अश्वबालधौ, हस्तिबा-लधौ, नारिकेले, पशुपुच्छे च पु० ।

बालक बाल+स्वार्थे कन् । शिशौ, (बाला) गन्धद्रव्ये च अङ्करीयके न० । अश्वकरिपुच्छयोः, बलये च पु० । [लघौ) कदल्याञ्च ।

बालकप्रिया स्त्री० बालकं प्रीणानि प्री–क । इन्द्रवारुण्यां (राखा-ल,लालि)खिल्य पु० अङ्गुष्ठपर्व्वमितेषु प्रष्टिवत्कृष्णेषु एतत्संज्ञक-न्यायां क्रतोः पुत्रेषु मुनिभेदेषु ।

बालग्रह पु० ६त० बालानां पीडके उपग्रहभेदे "बालग्रहाभिभूतानां बालानां शान्तिकारक" मिति चण्डी ।

बालतनय पु० बालास्तनया इव पत्त्राग्रमस्य । खदिरे बालदलबालि-पत्त्राद्योऽप्यत्र पु० ।

बालधि पु० बाला धीयतेऽत्र धा-कि । केशयुक्तलाङ्गूले ।

बालधी स्त्री० बालान् लातीति पृषो० बालस्य धीः डीष् । यूथिकायाम् । स्वार्थे कन् । तत्रैव ।

बालभोज्य पु० ६त० । चणके । बालकभक्षणीये त्रि० ।

बालमूषिका स्त्री० कर्म० । क्षुद्रमूषिकायाम् । [इति कुमारः ।

बालव्यजन न० बाला एव व्यजनम् । चामरे । 'कुर्वन्ति बालव्यजनैरभर्यं'

बालहस्त पु० बालानां केशानां समूहः बाल+हस्त । केशसमूहे । बाला हस्तइव यत्र । प्रस्तूनां लाङ्गूले ।

बाला स्त्री० बालाः केशाकाराः पदार्थाः सन्त्यस्य अच् । नारिकेले, हरिद्रायां मल्लिकाभेदे, बलये, त्रुटौ षष्ठकुमार्य्यां (बाला) गन्ध-द्रव्यभेदे, अम्बष्ठायां, नीलझिण्टयाम्, षोड्शवर्षीयायां स्त्रियां, कन्यायाञ्च । स्वार्थे कन् । तत्रैव बालुकायां, कर्णभूषणे (कान-बाला) एलायाञ्च । [प्यत्र ।

बालि पु० बल-इन् णिच् । इन्द्रपुत्रे कपिराजे । णिनि । बालीत्य-

बालिश त्रि० बाड-इन् बाडिं इड्डिं श्यति शो-क डस्य लः । मूर्खे, शिशौ च बालिशमाखि ! श्यान" मित्युद्भटः । बालाः सन्त्यस्य इनि बाली मूर्खा शेतेऽत्र शी-ड । उपधाने न० । [न्नादयोऽप्यत्र पु० ।

बालिहन् पु० बालिं बालिनं वा हन्ति हन-क्विप् । रामे बालिह-

बालु पु० बल-उण् । एलबालुकनामगन्धद्रव्ये । स्वार्थे कन् । तत्रैव न० । प्रानीयामलके पु० । सिकतासु स्त्री० ।

बालुकायन्त्र न० ६त० । औषधपाकार्थे यन्त्रभेदे । [बालुङ्कीत्यप्यत्र

बालुकी स्त्री० चु०बल-उक गौरा० ङीष् । कर्कोटीभेदे । पृ० नुक्

बालेटा पु० बलेरपत्यं, बलाये हितं वा ढक् । रासभे, दैत्यभेदे, अ-ङ्गारवल्ल्यां च । कोमले, बलिहिते च त्रि० ।

बालेयशाक पु० बलये हितः ढक् कर्म० (शामनहाटि) शाकभेदे ।
बालिष्ट पु० बालानामिष्टः इष-क्त । ब(-)ःरे । बालकाभीष्टे त्रि० ।
बाल्य न० बालस्य भावः, कर्म वा वयोवचनत्वात् ष्यञ् । "आधोड़-शाद्वत्सरेद्बाल्य" इत्युक्ते अवस्थाभेदे ।
बाष्प(स्य) पु० बाध-ष्ट० पत्वं सत्वं वा । नेत्रजले, ऊष्मणि च ।
बा(वा)ह प्रयत्ने भ्वादि० आत्म० अक० सेट् । बाहते अबाहिष्ट ।
चङि न ह्रस्वः ।
बाहु पु० बाध-कु धस्य हः । भुजे कक्षावध्यङ्गुलिपर्य्यन्तेऽवयवे ।
बाहुज पु० बाहुभ्यां ब्र(ब्र)ह्मबाहुभ्यां जायते जन-ड । क्षत्रिये "बाहुं राजन्यमि"ति श्रुतिः ।
बाहुत्र पु० न० बाहुं त्रायते त्रै-क । अस्त्राघातवारणार्थे हस्तबद्धे लौहचर्म्मादौ ।
बाहुदा स्त्री० (करतोया) नदीभेदे । सा हि अवगाहनात् लिखितस्य मुनेः लिखहस्तं पुनर्ददाविति पुराणम् ।
बाहुमूल न० ६त० । कक्षे (कांख) ।
बाहुयुद्ध न० ३त० । मल्लयुद्धे ।
बाहुल पु० बहुलानां कृत्तिकानामयं (स्वामी) अण् बह्वौ । बहुलाभि-र्युक्ता पौर्णमासी अण् । कार्त्तिकपौर्णमास्यां स्त्री० । सप्त मासे पुनरण् । चान्द्रकार्त्तिकमासे पु० ।
बाहुलेय पु० ब(व)हुलानामपत्यं ढक् । कार्त्तिकेये ।
बि(वि)ट व्याप्तौ भ्वा० पर० सक० सेट् । बे(वे)टति अबे(वे)टीत् ।
बिट् अवयवे भ्वा० पर० सक० सेट् इदित् । बिन्दति अबिन्दीत् ।
बि(वि)न्दु पु० विदि-उ विद उ नि० वा । अल्पेऽर्थे ।
बिल भेदने वा चुरा० उभ० पक्षे तु० पर० सक० सेट् । बेलयति ते बिलति । अबीबिलत् त अबिलीत् ।
बिस क्षेपे दि० पर० सक० सेट् । बिसति अबिसत्-अबैसीत् ।
बीभत्स त्रि० बध-निन्दायां स्वार्थे सन् कर्मणि घञ् । पाणिनि, जुगुप्सते, इत्यादिविधये च । साङ्ख्यादौ प्रसिद्धे जुगुप्सास्थायिभावके

रसभेदे, अर्ज्जुने च पु० । तद्रसविषये विकृतमांसादौ त्रि० । ङ । बीभत्सुः । अर्ज्जुने पु० ।

बुक्क कुक्कुरादिशब्दे कथने च वा चु० उभ० पक्षे भ्वा० पर० सक० सेट् । बुक्कयति ते बुक्कति अबुबुक्कत् त अबुक्कीत् ।

बुक्क न० बुक्क-अच् । हृदयस्थे मांसपिण्डे, अपमांसे, हृदये च अस्य स्त्रीत्वमपि स्त्रीत्वे टाप् गौ० ङीप् वा । बुक्काधातैर्युवतिनिकटे प्रौढ़वाक्येन राधे"त्युज्ज्वटः । छागे, (बोका) समये, च पु० । योषिति स्त्री० टाप् । पृ० । बूक्कबृक्के अपि हृदये ।

बुक्कायमांस न० ६त० । हृदयस्थे मांसपिण्डाकारे अपमांसे ।

बुट छिंसायां चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् । बोटयति ते । बोटति । अबुबुटत्-त । अबोटीत् ।

बुड त्यागे संवरणे च तु० कुटा० सक० सेट् । बुडति अबुडीत् ।

बुद् निशामने भ्वा० उ० सक० सेट् । बोदति ते । अबुदत्-अबोदीत् अबोदिष्ट । क्त्वा वेट् । [जागरिते, ज्ञातवति च त्रि० ।

बुद्ध पु० बुध-क्त । भगवतोऽवतारभेदे येन वेदतत्कर्म्मणोर्निन्दाकृता ।

बुद्धि स्त्री० बुध-क्तिन् । ज्ञाने, सांख्योक्ते सुखदुःखाद्यष्टविधधर्म्मवति प्रकृतिपरिणामभेदे, अन्तःकरणविशेषे, वेदान्तोक्ते निश्चयात्मकवृत्तिमति अन्तःकरणे च ।

बुद्धीन्द्रिय न० ६त० । 'मनः करणौ तथा नेत्रे रसना त्वक् च । नासिके । बुद्धीन्द्रियाणि प्रोक्तानि"त्युक्तेषु इन्द्रियेषु ।

बुद्बुद न० बुद-क० पृ० ह्रित्वम् । जलस्य गोलाकारे विकारभेदे ।

बुध ज्ञापने भ्वा० प० सक० अनिट् । बोधति अबौत्सात् शिष्यं गुरुः

बुध ज्ञाने भ्वा० उभ० सक० सेट् । बोधति ते । अबुधत्-अबोधीत् । अबोधि अबोधिष्ट । ज्वला० वा ण पक्षे क । बोधः बुधः ।

बुध ज्ञाने दि० आ० सक० अनिट् । बुध्यते अबोधि अबोधिष्ट ।

बुध पु० बुध-क । पण्डिते, बृहस्पतिभार्य्यायां तारायां चन्द्रेण जनिते पुत्रे ग्रहभेदे, तस्य रोहिण्या प्रतिपालनात् रौहिणेयत्वम् ।

बुधरत्न न० बुधप्रियं रत्नं शाक० । मरकतमणौ ।

बुधा स्त्री० बोधयति ज्ञापयति रोगिणं बुध–ज्ञापने क। जटामांस्याम्

बुधाष्टमी स्त्री० बुधवारयुताष्टमी शाक०। चैत्रपौषफाल्गुनादितत्र काले बुधवारयुतायां शुक्लपक्षाष्टम्यां, तत्कर्त्तव्ये व्रते च।

बुधित त्रि० भ्वा० उभ० बुध–क्त इट्। ज्ञाते।

बुध्न न० बन्ध–नक् नलोपः बुधादेशश्च। वृक्षमूले, मूलमात्रे च पृषो० बुध्नोदराकृतिरिति घटविशेषणं शास्त्रेऽप्युक्तम्।

बुन्द् निशामने भ्वा० उभ० सक० सेट्। बुन्दति ते। अबुदत् अबुन्दीत्। अबुन्दिष्ट। क्त्वा वेट्। [अबुन्त्सीत् अबुन्त्सिष्ट।

बुन्ध निशामने भ्वा उभ० सक० सेट् क्त्वा वेट्। बुन्धति ते अबुधत्

बुन्ध बन्धे चु० उभ० सक० सेट्। बुन्धयति ते अबुबुन्धत् त।

बुभुक्षा स्त्री० भुज–सन्–अ। भोजनेच्छायां क्षुधायाम्।

बुभुक्षित त्रि० बुभुक्षा+तारं० इतच्। क्षुधायुक्ते 'बुभुक्षितः किं न करोति पापं क्षीणा नरा निष्करुणा भवन्ति" इत्युक्तेः।

बुल मज्जने चु० उभ० अक० सेट्। बोलयति ते अबूबुलत्।

बुष(स) न० बुष्यते उत्सृज्यते बुस–उत्सर्गे क पृ० वा षत्वम्। (आगड़ा) तुच्छधान्ये फलरहितधान्ये।

बुस उत्सर्गे दि० पर० सक० सेट्। बुस्यति अबुसत्–अबोसीत्।

बुस्त आदरे अनादरे च चु० उभ० सक० सेट्। बुस्तयति ते अबुबुस्तत् त। [त्याज्ये अंशे, (भुषि) मांसपिष्टकभेदे च

बुस्त न० बुस्यते नाद्रियते आद्रियते वा बुस्त-घञ्। धनसादि फलस्य

बृ वृत्यां भृतौ च क्रया० पर० सक० सेट्। बृणाति अबारीत्।

बे(वे)ह प्रयत्ने भ्वा० आत्मने सक० अनिट्। बे(वे)हते अबे(वे)ढिष्ट चङि न ह्रस्वः।

बोध पु० बुध–घञ्। ज्ञाने, जागरणे च। ज्वलादि-बुध–ण। ज्ञानवति त्रि०। ण्वुल्। बोधकोऽप्यत्र त्रि०। णिच् ण्वुल् स्तूचके त्रि०

बोधकर पु० बोधं निशान्ते जागरणं करोति कृ–अच्। निशान्ते प्रबोधकरे वैतालिके। ज्ञापके त्रि०।

बोधन न० बुध–णिच्–ल्युट्। विज्ञापने, कालवशात् गन्धादेर्नूतनतायां

तद्दीपने, जागरणे च । 'शयनं बोधनं हरे"रिति पुराणम् । "सायाह्ने बोधनं कुर्य्या"दिति स्मृतिः ।

बोधनी स्त्री० बोध्यतेऽनया, कर्त्तरि वा बुध–णिच्–ल्युट् । पिप्पल्यां तया हि मूर्च्छितो बोध्यते । कार्त्तिकैकादश्यां तत्र हि हरेर्बोधनम् ।

बोधि पु० बुध–इन् । अश्वत्थवृक्षे, समाधिभेदे च । ज्ञातरि त्रि० ।

बोधितरु पु० कर्म० । अश्वत्थवृक्षे । बोधिद्रुमादयोऽप्यत्र पु० ।

बौद्ध न० बुद्धेन प्रोक्तमण् । बुद्धप्रणीते निरीश्वरवादे शास्त्रे । तदधीयते इति पुराणम् । बौद्धागमाध्येतरि त्रि० ।

ब्यु चलने विभागे च धु०उ०सक०सेट् । व्यौपयति-ते अव्युप्यत् त ।

ब्रण शब्दे भ्वा० पर० सक० सेट् । ब्रणति । अब्रणीत्-अब्राणीत् ।

ब्र(व्र)तति स्त्री० प्रतनोति प्र+तन–क्तिच् पृ० पक्षे वः । लतायाम् व्रतमिव करोतीति णिच् अति । दन्त्योष्ठादित्वमपि ।

ब्र(व्र)ध्न पु० बध्न–नक् बधादेशः । सूर्य्ये, अर्कवृक्षे, शिवे, इक्षुमूले च । मेदिनीकरेण दन्त्योष्ठ्यादित्वेन जिघ्रनात्तथात्वमपि तन्मूलं मृग्यम् ।

ब्र(व्र)ह्मकूर्च न० "अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः । पञ्चगव्यं पिबेत् प्रातः ब्र(व्र)ह्मकूर्चमिति स्मृतम्"त्युक्ते व्रतभेदे ।

ब्रह्मकोशी स्त्री० ब्र(व्र)ह्मणः कोशीव । अजमोदायाम् ।

ब्र(व्र)ह्मचर्य्य न० ब्र(व्र)ह्मणे वेदलाभाय चर्य्यते चर–यत् । वेदज्ञानार्थमुपनयनोत्तरमाश्रमे, मैथुनराहित्ये च ।

ब्र(व्र)ह्मचारिणी स्त्री० ब्र(व्र)ह्म चर्य्यतेऽनया चर–णिच् करणे ल्युट्–ङीप् ईत० । ब्र(व्र)ह्मचर्य्यां भार्य्याम् ।

ब्र(व्र)ह्मचारिन् ब्र(व्र)ह्मणे वेदाय तदुपदेशाय चरति चर–णिनि । उपनयनानन्तरं प्रथमाश्रमयुक्तेषु त्रिषु वर्णेषु, कटभीवृक्षे, मैथुनराहित्यादि ब्र(व्र)ह्मचर्य्यव्रतधारिण्यां स्त्रियां च स्त्री० ङीप् । "आसीतामरणात् क्षान्ता नियतं ब्र(व्र)ह्मचारिणी"ति स्मृतिः ।

ब्र(व्र)ह्मजटा स्त्री० ब्र(व्र)ह्मणो जटेव संहतशाखत्वात् । दमनकवृक्षे ।

ब्र(ब्र)ह्मज्ञ त्रि० ब्र(ब्र)ह्म वेदं, तुरीयं शुद्धचैतन्यं वा जानाति वेत्ति ज्ञा-क। वेदज्ञे, तुरीयशुद्धचैतन्यज्ञे च। [विस्तरो वाचस्पत्ये।

ब्रह्मज्ञान न० ई त०। त्रिगुणावच्छिन्नातीततुरीयशुद्धचैतन्यविषयज्ञाने

ब्र(ब्र)ह्मण्य न० ब्र(ब्र)ह्मणे वेदाय प्रभवति शुद्धचैतन्यज्ञानाय वा साधु ब्र(ब्र)ह्मणोहितो वा यत्। विप्रवेदरक्षणकर्त्तरि विष्णौ, "नमो ब्रह्मण्यदेवाये"ति विष्णुसहस्रनामस्तोत्रम्। विप्रधर्मे ब्र(ब्र)ह्मदारुवृक्षे च

ब्र(ब्र)ह्मतीर्थ न० ई त०। पुष्करतीर्थे, पुष्करमूले च।

ब्र(ब्र)ह्मत्व न० ब्र(ब्र)ह्मणो भावः त्व। ऋत्विग्विशेषस्य ब्र(ब्र)ह्मणो धर्मे, शुद्धतुरीयब्र(ब्र)ह्मभावे च।

ब्र(ब्र)ह्मदण्ड पु० ई त०। विप्रस्य अभिशापरूपे दण्डने ब्र(ब्र)ह्म दण्डः क्षत्रा ते वेति स्मृतिः। विप्रस्य यष्टौ च।

ब्र(ब्र)ह्मदर्भा स्त्री० ब्र(ब्र)ह्मणो दर्भो यज्ञनमस्याः यमान्याम्।

ब्र(ब्र)ह्मदाय पु० ब्र(ब्र)ह्मणि(णे) वा वेदाध्ययनसमाप्तौ, विप्राय वा राज्ञा दीयते दा कर्मणि घञ्। समाहृत्तविप्राय देये धने "ब्र(ब्र)ह्मदायागतां भूमिं कूटयुद्धेन वा ह्मणा" इति स्मृतिः।

ब्र(ब्र)ह्मदारु पु० ब्र(ब्र)ह्मणो विप्रस्य हितः दारु अश्वत्थाकारे वृक्षभेदे।

ब्र(ब्र)ह्मन न० बृह—मनिन् बृहेर्नोऽच्चेति नकारस्थाकारे रत्वम्। वेदे, तपसि, सत्ये, तत्त्वे, यथार्थे, तुरीये सर्वगुणातीते विशुद्धचित्स्वरूपे च। हिरण्यगर्भे विप्रे ऋत्विग्विशेषे च पु०। उच्चवलदत्तेन दृलोपप्रादित्वमेव साधितम् मेदिनीकरेण ब्रोऽप्रादित्वेन कीर्त्तनात्तथात्वमपि किन्तु तन्मूलं मृग्यम्।

ब्र(ब्र)ह्मनाल न० काश्यां मणिकर्णिकासमीपस्थे तीर्थभेदे।

ब्र(ब्र)ह्मनिर्वाण न० ब्र(ब्र)ह्मणि निर्वाणं निर्वृतिः। ब्र(ब्र)ह्मभावलाभे सकलानर्थनिवृत्तिरूपे परमानन्दे।

ब्र(ब्र)ह्मपर्णी स्त्री० ब्र(ब्र)ह्मेव विस्तीर्णं मूलादारभ्य स्थितानि पर्णान्यस्याः ङीप्। वृश्चिकपर्ण्याम्।

ब्र(ब्र)ह्मपवित्र पु० ब्र(ब्र)ह्मैव वेदोक्तकर्मणि वा पवित्रः । कुशे ।

ब्र(ब्र)ह्मपादप पु० ब्र(ब्र)ह्मणः प्रियः वैदिककर्मयोग्यत्वात् विप्रब्र(ब्र)ह्मचारिधार्य्यदण्डार्थत्वाद्वा । पलाशवृक्षे ।

ब्र(ब्र)ह्मपुत्र पु० ब्र(ब्र)ह्मण पुत्रत्व कपिलवर्णत्वात् । विषभेदे, उत्तरदेशप्रसिद्धे नदभेदे, क्षेत्रभेदे च । सरस्वत्यां नद्यां स्त्री० । तस्याः पितामहजातत्व पुराणप्रसिद्धम् ।

ब्र(ब्र)ह्मपुरी स्त्री० हृत० ब्रह्मोपासनास्थाने हृदये, तदाधारस्थाने सत्यलोके, काश्याञ्च ।

ब्र(ब्र)ह्मबन्धु पु० ब्र(ब्र)ह्मा विप्रो बन्धु रुत्पादको यस्य । विप्राचाररहिते निन्द्यकर्म कारिणि जात्या विप्रे, विप्रतुल्ये भट्टादौ च ।

ब्र(ब्र)ह्मभूय न० ब्रह्मणो भावः भू-क्यप् । ब्र(ब्र)ह्मभावे तत्सायुज्ये च ।

ब्र(ब्र)ह्मयज्ञ पु० ब्र(ब्र)ह्मनिमित्तकस्तद्ध्ययनतद्ध्यापनानिमित्तको यज्ञः । वेदाध्ययनाध्यापनादौ । [दृक्ष ।

ब्र(ब्र)ह्मयष्टि स्त्री० ब्र(ब्र)ह्मणो यष्टिरिवालम्बनत्वात् (वामनहाटि)

ब्र(ब्र)ह्मरन्ध्र न० हृत० उत्तमाङ्गस्थिते ब्रह्मप्राप्तिहेतुके छिद्रस्थाने । तच्छिद्रेण निष्क्रमणे हि जीवस्य ब्र(ब्र)ह्मप्राप्तिः श्रूयते

ब्र(ब्र)ह्मराक्षस पु० ब्र(ब्र)ह्मा विप्रोऽपि कुकर्मभिः राक्षसः । राक्षसरूपतां प्राप्ते भूतभेदे "अपहृत्य च विप्रस्वं भवति ब्र(ब्र)ह्मराक्षस" इति मनुः ।

ब्र(ब्र)ह्मर्षि पु० ब्र(ब्र)ह्मा विप्रः चतुर्मुखतुल्यो वा ऋषिः वेदस्य कर्त्ता। वेदकर्त्तृषु वशिष्ठादिषु ऋषिषु ।

ब्र(ब्र)ह्मर्षिदेश पु०हृत०। "कुरुक्षेत्रञ्च मत्स्यश्च पाञ्चालाः शूरसेनकः । एष ब्र(ब्र)ह्मर्षिदेशो वै" इति मनूक्ते, कुरुक्षेत्रादिदेशचतुष्टये ।

ब्र(ब्र)ह्मलोक पु० हृत० । ब्रह्माधिष्ठाने भुवने सत्यलोके तुरीय ब्र(ब्र)ह्मस्वरूपे च ।

ब्र(ब्र)ह्मवर्चस न० ब्र(ब्र)ह्मणा वेदाध्ययनेन तदनुष्ठानेन च कृतं वर्चः तेजः अच्समा० । वेदाध्ययनजन्ये तेजसि ब्र(ब्र)ह्मवर्चसकामस्य कर्य्याद्विप्रस्य पञ्चमे" इति मनुः ।

ब्र(ब्र)ह्मवादिन् पु० ब्र(ब्र)ह्म वेदं वदति पठति णिनि । वेदपाठके ब्र(ब्र)ह्म शुद्धं चैतन्यं सर्वात्मकतया वदति वेत्ति वा वेदान्तप्रतिपाद्य-सर्वात्मकब्र(ब्र)ह्मत्वे शुद्धचैतन्यं वदति बोधयति ब्र(ब्र)ह्मबोधके शास्त्रे

ब्र(ब्र)ह्मविद्या स्त्री० ६त० शुद्धचैतन्यात्मकस्य ब्रह्मणोऽभेदेन ज्ञाने ।

ब्र(ब्र)ह्मवि(बि)न्दु पु० ब्र(ब्र)ह्मणि वेदपाठकाले (बि)विन्दुः । वेदाध्ययनकाले निःसृतजल(बि)विन्दौ ।

ब्र(ब्र)ह्मवैवर्त्त न० अष्टादशमहापुराणमध्ये अष्टादशसहस्र संख्ये पुराणभेदे ।

ब्र(ब्र)ह्मशल्य पु० ब्र(ब्र)ह्मव सूक्ष्मं शल्यं कण्टकाग्रं यस्य । (बादामा) वृक्षभेदे ।

ब्र(ब्र)ह्मसंहिता स्त्री० वैष्णवाचारसिद्धान्ते अध्यायशतात्मके ग्रन्थभेदे ।

ब्रह्मसायुज्य न० सह युनक्ति युज-क्विप् सयुक् तस्य भावः ष्यञ् सायुज्यं न० ब्र(ब्र)ह्मभावे ।

ब्र(ब्र)ह्मसूत्र पु० ब्र(ब्र)ह्माणं सूतयति सू-क्विप् । चतुर्व्यूहात्मकस्य विष्णोर्मूर्त्तिभेदे अनिरुद्धे, तस्यावतारभेदे उपायतौ च ।

ब्र(ब्र)ह्मसूत्र न० ब्र(ब्र)ह्मणि वेदग्रहणकाले उचितं सूत्रम् । यज्ञोपवीते, ब्रह्मप्रतिपादके शारीरकसूत्रे च ।

ब्रह्महत्या स्त्री० हन-क्यप् ६त० । विप्रहनने ।

ब्र(ब्र)ह्महन् त्रि० ब्र(ब्र)ह्माणं हतवान् हन-क्विप् । विप्रहत्याकारिणि । "ब्र(ब्र)ह्महा न भवत्यन्यो ब्र(ब्र)ह्महा वृषलीपतिः । यस्यास्यामाहितोगर्भः स तेन ब्रा(ब्रा)ह्मणो हत" इत्युक्ते वृषलीपतौ, "श्रुतोत्पन्नतज्ज्ञाने जीवोतिष्ठाङ्गुलिध्वनिः । गुरोरपि च कर्त्तव्यमन्यथा "ब्रह्महा" भवेदित्यादिस्मृत्युक्तातिदेशिकब्र(ब्र)ह्महत्यापापयुक्ते च पु०।

ब्र(ब्र)ह्महुत न० ब्र(ब्र)ह्मणे विप्राय अतिथये हुतं दत्तम् । नित्यं गृहस्थकर्त्तव्यपञ्चयज्ञान्तर्गतेऽतिथिपूजनरूपे यज्ञभेदे ।

ब्र(ब्र)ह्माञ्जलि पु० ब्र(ब्र)ह्मणे वेदपाठाय अञ्जलिः गुरौ विनयाञ्जलिः, स्वरविशेषज्ञापनार्थं वा अञ्जलिः संकुचितपाणिः । वेदपाठार्थं

गुरुनिकटे कार्य्ये विनयाञ्जलौ, स्वरविशेषार्थज्ञापनाय कृतसङ्कोचे पाणिद्वये च ।

ब्रह्माणी पु० ब्र(ब्र)ह्माणम् आनयति जीवयति अन–णिच्–अण् पूर्व० णत्वम् । ब्रह्मशक्तौ "हंसयुक्ते विमानेस्था साक्षसूत्रकमण्डलुः । आयाता ब्र(ब्र)ह्मणः शक्तिः ब्र(ब्र)ह्माणी साभिधीयते" इति चण्डी । "ब्रह्माणी ब्र(ब्र)ह्मजननादि"ति पुराणम् । ब्रह्मशब्दात् ङीप् आतङ् चेति त्वपाणिनीयम् ।

ब्र(ब्र)ह्माण्ड न० ६त० । "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिन् यत्ते स्वयं ब्र(ब्र)ह्मा सर्वलोकपितामहः" इति मनूक्ते ब्र(ब्र)ह्मण उत्पादके अण्डाकारे भुवनकोशे "ब्र(ब्र)ह्माण्डभाण्डोदरभाण्य-त्यखण्डितचण्डिमेति वीरचरितम् । तत्प्रमाणस्वरूपादिकं तु वाच-स्पत्ये वक्ष्यते ।

ब्र(ब्र)ह्मावर्त्त पु० "सरस्वतीदृशद्वत्योर्देवनद्योर्यदन्तरम् । तं देवनिर्मितं देशं ब्र(ब्र)ह्मावर्त्तं प्रचक्षते" इति मनूक्ते देशभेदे ।

ब्र(ब्र)ह्मासन न० ब्र(ब्र)ह्माणोध्यानार्थमासनम् । ईश्वरध्यानोपयोगि आसने स्वस्तिकपद्मासनादौ ।

ब्र(ब्र)ह्मी स्त्री० ब्रह्मण इयम् अण् टिलोपः ङीप् पृ० न ह्रस्वः । (वामनहाटी) शाकभेदे ।

ब्र(ब्र)ह्मीघृत न० मेधास्वरबलादिकारके घृतभेदे विस्तरो वाचस्पत्ये ।

ब्र(ब्र)ह्मोपनेत पु० ब्र(ब्र)ह्मणं विप्रमुपनयते तद्धेतुदण्डहेतुत्वात् उप-नी–तच् । पलाशदण्डे विप्रस्य पालाशो दण्ड" इति स्मृतिः ।

ब्रा(ब्रा)ह्म न० ब्रह्मण इदम्, तेन प्रोक्तम् वा अण् टिलोपः । अङ्गुष्ठ-मूले तीर्थे, तेन हि तीर्थेन द्विजाचमनं विहितमिति तस्य तत्सम्ब-न्धित्वम् "प्राग्वा ब्रा(ब्रा)ह्मण तीर्थेन द्विजो नित्यमुपस्पृशे"दिति स्मृतिः । ब्र(ब्र)ह्मणोक्ते अष्टादशपुराणान्तर्गते पुराणभेदे च । विवाहभेदे, पारदे च पु० । सरस्वत्यां, सोमलतायां, ब्राह्मीशाके (वामनहाटी) शाकभेदे च स्त्री० "आहिताग्नानां गुरुकुलात् विप्राणां पूजको भवेत् । नृपाणामभयो ह्येष ब्रा(ब्रा)ह्मो धर्म्मो विधीयते

इति मनूक्ते राज्ञां धर्मभेदे पु० । मातृभेदे स्त्री० ङीप् । ब्रा(ब्रा)ह्मी नारायणी तथेति तन्त्रम् ।

ब्रा(ब्रा)ह्मण पु० ब्र(ब्र)ह्म वेदं गुरुं परचैतन्यं वा वेत्त्यधीते वा अण् ब्र(ब्र)ह्मणो जातावितिण टिलोपः । ब्रह्मणो मुखजातत्वात् ब्रह्मणोऽपत्यम् अण् तेन ण टिलोपः । विप्रे जातिभेदे । मुक्तायां स्त्री० । 'ब्र(ब्र)ह्म जानाति ब्राह्मण' इत्युक्ते परब्र(ब्र)ह्मज्ञे त्रि० । स्त्रियां ङीप् तत्पत्न्यां स्त्री० ङीप् ।

ब्रा(ब्र)ह्मणब्रुव पु० ब्रा(ब्रा)ह्मणं जातिमात्रेणात्मानं ब्रूते । 'विप्रसंस्कारयुक्तोऽपि नित्यं सन्ध्यादिकञ्च यः । नैमित्तिकं च नो कुर्यात् ब्रा(ब्र)ह्मणब्रुव उच्यते' इत्युक्ते कदाचारवति विप्रे ।

ब्रा(ब्रा)ह्मणयष्टि स्त्री० ई त० । वा ङीप् (वामनहाटी) दृढभेदे स्वार्थे कन् । अत्रैव विप्रदण्डे च । [ब्राह्मणधर्मे विप्रत्वे च

ब्रा(ब्रा)ह्मण्य न० ब्रा(ब्रा)ह्मणानां समूहः भावो वा ष्यञ् विप्रसमूहे

ब्रा(ब्रा)ह्ममुहूर्त्त पु० ब्र(ब्र)ह्मा देवतास्य अण् टिलोपः कर्म० । अरुणोदयात् प्राग्वर्त्तिनि 'रात्रेश्च पश्चिमे यामे मुहूर्त्तौ ब्रा(ब्रा)ह्म उच्यते' इत्युक्ते दण्डद्वयात्मके काले ।

ब्रा(ब्रा)ह्मीकन्द पु० ई त० । ब्रा(ब्रा)ह्म्या इव कन्दो यस्य । वाराहीकन्दे ।

ब्रूञ् ब्रूयोचत

ब्रू कथने अदा० उभ० द्विक० सेट् । ब्रवीति—आह ब्रूते । अब्रोचत

भ

भ न० भा—क । नक्षत्रे, मेषादिराश्यौ, यशे च । शुक्राचार्य्ये पु० । भण—ड । भ्रमरे, आन्ध्रौ । छन्दोपन्योक्ते आदियुक्ते अन्त्यो यान्त्यलघुयुक्ते वर्णत्रिके च पु० ।

भक्त पु०न० भज-क्त । अन्ने ओदने । भक्तियुक्ते तदात्मके, विभक्ते च त्रि० ।

भक्तदास पु० भक्तेन अन्नमात्रलाभेन दासः अङ्गीकृतदासभावः । सप्तदशदासान्तर्गते दासभेदे । "भक्तदासश्च विज्ञेय" इति स्मृतिः ।

भक्तमण्ड पु०न० ६त० । भक्तस्य निस्रावे (माड) ।

भक्ति स्त्री० भज–क्तिन् । सेवायाम् आराधनायां तदेकाग्र्यचित्तवृत्तिभेदे, विभागे, गौण्यां वृत्तौ, उपचारे, अवयवे, भङ्ग्याम्, श्रद्धायाम्, रचनायाञ्च, "भवति विरलभक्ति"रिति रघुः ।

भक्तियोग पु० भक्तिरेव योगः एकाग्र्यचित्तवृत्तिभेदः । तदेकाग्र्यचित्तता रूपे योगे । [रतिभेदे ।

भक्तिरस पु० भक्तिरेव रस आस्वाद्य । भक्तिरूपे ध्येयानुभवात्मके

भक्ष अदने चु० उभ० सक० सेट् । भक्षयति ते अबभक्षत्-त भ्यादित्व-मपीत्येके भक्षति अभक्षीत् । [जीविनि आपूपिके ।

भक्ष्यकार पु०वि० भक्ष्यं करोति कृ–अण् । भक्ष्यपिष्टकादिविक्रयोप-

भक्ष्यपत्र स्त्री० भक्ष्यं पत्रं यस्याः । ताम्बूल्याम् ।

भक्ष्यालाबू स्त्री० कर्म० । राजालाबूवाम् ।

भग पु०न० भज–घ । सूर्ये, अणिमाद्यष्टविधैश्वर्ये, वीर्ये, यशसि, श्रियां, ज्ञाने, वैराग्ये, योनौ, इच्छायाम् माहात्म्ये, यत्ने, धर्मे, मोक्षे, सौभाग्ये, कान्तौ चन्द्रे च । ज्योतिषोक्ते योनिनक्षत्रदैवते पूर्वफल्गुनीनक्षत्रे गुह्यसुष्कयोर्मध्यस्थाने च पु० ।

भगदत्त पु० महाभारतप्रसिद्धे कामरूपदेशाधिपे नृपभेदे ।

भगन्दर पु० भगं गुह्यस्थानमध्यस्थानं दारयति दृ-खश् मुम् च । स्वनामख्याते रोगभेदे ।

भगवत् त्रि० भगं "ऐश्वर्यस्य समग्रस्य, वीर्यस्य, यशसः, श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गनेत्युक्तम् ऐश्वर्यादि अस्त्यस्य मतुप् मस्य वः । ऐश्वर्यादियुक्ते परमेश्वरे, दुर्गायां स्त्री० ङीप् । "भगवत्या कृतं सर्वमि"ति चण्डी ।

भगाङ्कुर पु० भगे गुह्यस्थानेऽङ्कुर इव । अर्शोरोगे ।

भगिनी स्त्री० भगं यत्नः पित्रादितो द्रव्यादानेऽस्त्यस्याः इनि । सोद-रायाम् स्वसरि ।

भगीरथ पु० सूर्यवंश्ये दिलीपराजपुत्रे नृपभेदे । येन गङ्गाभूमि-तलमवतारिता ।

भग्न त्रि० भञ्ज–क्त । पराजिते, खण्डिते च भग्नं "शस्त्रमुद्यम्य भग्नेन रुपहर्तुमि"ति नाटकम् ।

भग्नप्रक्रम पु० भग्नः प्रक्रमो यत्र । अलङ्कारोक्ते काव्यदोषभेदे ।

भङ्ग पु० भञ्ज+घञ् । पराजये, खण्डे, भेदे, तरङ्गे, कौटिल्ये, भये, पत्ररचनाभेदे, गमने, जन्मनिर्गमे च । मातुलान्याम्, शणाख्ये शस्ये, त्रिवृत्तायां (तेउडी) विजयायाञ्च (भाङ्) स्त्री० ।

भङ्गि (ङ्गी) स्त्री० भञ्ज–क्त पृ० कृत्वम् वा ङीप् । विच्छेदे, कौटिल्ये विन्यासे, कल्लोले, भेदे, व्याजे च ।

भङ्गुर त्रि० भञ्ज–घुरच् । कुटिले, क्षय भङ्गनशीले, नदीनां वक्रे च । प्रियङ्गौ, अतिविषायाम् च (आतइच) स्त्री० ।

भङ्गय न० भङ्गानां भवनं क्षेत्रं यत् । भङ्गाभवनयोग्ये क्षेत्रे ।

भज भागे सेवायाञ्च भ्वा० उभ० सक० अनिट् । भजति ते अभाक्षीत् । भेजतुः भेजे ।

भज पाके दाने च चु० उभ० सक० सेट् । भाजयति-ते अबीभजत्-त ।

भज दीप्तौ चु० उभ० अक० सेट् इदित् । भञ्जयति-ते अबभञ्जत्-त ।

भजमान त्रि० भज–शानच् । न्यायागतद्रव्यादौ, विभाजके, सेवके च

भट पोषणे भ्वा० पर० सक० सेट् भटति । अभाटीत्–अभटीत् । भाषणेऽप्य घटा० । णिचि भटयति ।

भट पु० भट–अच् । योद्धरि, "बद्धटधातुरौतुरी"ति नैषधम् । वीरे, म्लेच्छभेदे, नीचभेदे, रात्रिञ्चरे च । इन्द्रवारुण्यां (राखालशशा) स्त्री० ।

भटित्र न० भट–इत्र । मृतपक्के मांसादौ (कावाब) ।

भट्ट पु० भट–तन् । स्तुतिपाठवृत्तिमति (भाट) जातिभेदे स्वामित्वे, वेदाभिज्ञे पण्डिते च ।

भट्टार पु० भट्टं स्वामित्वमृच्छति ऋ-अण् । पूजे । संज्ञायां कन् । सूर्ये

भट्टारक पु० भट भाषणे क्विप् तुणिच्-ण्वुल् कर्म० । नाट्योक्तौ नटे

भट्टिनी स्त्री० भट्टं स्वामित्वमश्नुते इनि ङीप् । विप्रभार्यायाम्, नाट्योक्तौ अज्ञताभिषेकायां राज्ञः स्त्रियां च ।

भण्ड परिभाषणे भ्वा० आ० सक० सेट् इदित् । भण्डते अभण्डिष्ट ।

भण्ड कल्याणभाषणे चु० उ० सक० सेट् इदित् । भण्डयति-ते अब-भण्डत्-त ।

भण्ड पु० भडि-अच् पृ० नलोपः । वर्णसङ्करभेदे ।

भण कथने भ्वा० पर० सक० सेट् । भणति । अभाणीत्-अभणीत् । चङि वा ह्रस्वः । अबीभणत्-त अबभाणत्-त ।

भणिति स्त्री० भण-क्तिन् अकृदादित्वादिट् । कथने । गौडोर्वीशकुल-प्रशस्तिभणितेरिति नैषधम् ।

भणाकी स्त्री० भटि-घाकन् ङीष् । वार्त्ताक्याम्, वृहत्यां च ।

भणटु(टू)क पु० भटि-उक, ऊक वा । म्लेच्छजातौ ।

भण्ड पु० भडि-अच् । अश्लीलवाक्यभाषके (भांड) "त्रयोवेदस्य कर्त्तारो-भण्डधूर्त्तपिशाचका" इति चार्व्वाकवाक्यम् ।

भण्डिर(ल) पु० भडि-इरच्, इलच् वा । शिरीषवृक्षे । इनजन्तस्तु । शुभे, शिल्पिनि, दूते च ।

भण्डी स्त्री० भडि-अच् गौरा० ङीष् । भस्त्रिकायाम्, शिरीषे च । स्वार्थे कन् ह्रस्वः । तत्रैवार्थे ।

भण्डीर पु० भडि-ईरन् । तण्डुलीयशाके, शिरीषवृक्षे च । गौरा० ङीष् । भस्त्रिकायाम् स्त्री० । [भस्त्रिकायाम् ।

भण्डीरलतिका स्त्री० भडि-ईरन् क्षुद्रा लतालतिका कर्म० ।

भद्र हर्षे, शुभकथने, प्रीतौ च भ्वा० आ० अक० सेट् इदित् । भन्द्रते अभन्द्रिष्ट । [भन्द्रत्-त ।

भद्र कल्याणकरणे चु० उ० सक० सेट् इदित् । भन्द्रयति-ते अब-

भद्रन्त पु० भदि-झच् नलोपः । बौद्धभेदे । पूजिते त्रि० ।

भद्र न० भदि-रक् नि० नलोपः । मङ्गले हस्तके, स्वर्णे च ज्योतिषोक्ते वबादितः सप्तमे करणे स्त्री० न० । मङ्गलदेवे, हर्षे, खञ्जने, कदम्बे, हरिण जातिभेदे बलदेवे रामचन्द्रे सुमेरुशैले, क्षुद्रोहटके च पु० । ज्योतिषोक्तास्तु द्वितीयासप्तमीद्वादशीतिथिषु च स्त्री० । साधौ, श्रेष्ठे च त्रि० । स्वार्थे कन् । भद्र हस्तके न० । देवदारुणि पु० ।

भद्रकाली स्त्री० भद्राय कालते अच् गौ० ङीष् । भद्रसुस्तायाम् ।
भद्रकुम्भ पु० भद्रकारकः कुम्भः । पूर्णकुम्भे, जलपूर्णघटे ।
भद्रगन्धिका स्त्री० भद्रो गन्धोऽस्याः कप् अतइत्त्वम् । मुस्तके ।
भद्रचूड पु० भद्रा चूडा यस्य । (लङ्गाखिज) वृक्षभेदे ।
भद्रज न० भद्राय जायते जन–ड । इन्द्रयवे ।
भद्रतरु पो स्त्री० भद्रदायिका तरुर्णीव । कुञ्जकवृक्षे ।
भद्रतुरग न० भद्रास्तुरगा यत्र । जम्बुद्वीपस्य नववर्षमध्ये वर्षभेदे भद्राश्वादयोऽप्यत्र न० ।
भद्रदन्तिका स्त्री० कर्म० स्वार्थे कन् । दन्तीवृक्षभेदे ।
भद्रदारु पु० न० । कर्म० । देवदारुवृक्षे ।
भद्रनामिका स्त्री० भद्रं मङ्गलं नामयति प्रापयति नम–णिच् ण्वुल् । त्रायन्तीवृक्षे । [भाद्रपदाख्ये ।
भद्रपदा स्त्री ब० व० भद्रस्य वृषस्येव पदं यासाम् । पूर्वोत्तर
भद्रपर्णी स्त्री० भद्रं पर्णमस्याः अजादि० । टाप् । कटभरावृक्षे । प्रसारिण्यां, गाम्भार्यांञ्च ङीष् ।
भद्रमल्लिका स्त्री० कर्म० । मल्लिकाभेदे नवमल्लिकायाम् ।
भद्रमुञ्ज पु० कर्म० । शरभेदे ।
भद्रमुस्तक पु० कर्म० । नागरमुस्तके । भद्रसुस्ताप्यत्र स्त्री० ।
भद्रयव न० भद्रं यवइव । इन्द्रयवे । [गाम्भार्याम् ।
भद्रवती स्त्री० भद्राणि पर्णानि सन्त्यस्या मतुप् मस्य वः ङीष् ।
भद्रवर्त्मन् पु० भद्रं वर्त्मेव वर्त्मनि इ–मनिन् । नवमल्लिकायाम् ।
भद्रवला स्त्री० भद्राय वलति चलति वल+अच् । (गन्धभादाल) लता–भेदे गन्धिकायां, माधवीलतायाञ्च । [गोपवल्लयाम् ।
भद्रवल्ली स्त्री० कर्म०संज्ञायां कन् ह्रस्वः अतइत्त्वम् । (अनन्तमूल) ।
भद्रश्रय न० भद्राय श्रीयते श्री–अच् । चन्दनरसे ।
भद्रश्री पु० भद्रा श्रीर्यस्य । चन्दनवृक्षे ।
भद्रालपत्रिका स्त्री० भद्रायालति पर्य्याप्नोति अल–अच् तादृशं पत्रं यस्याः कन् अतइत्त्वम् । गम्भार्याम् (गाम्भार) ।

भद्राली स्त्री० भद्रायालति पर्य्याप्नोति अच् गौरा० ङीष्। गम्भाल्याम् (गाम्भाल)। [दीर्घः। कट्फलवृक्षे।

भद्रावती स्त्री० भद्र-अस्त्यर्थे मतुप् मस्य वः संज्ञायां पूर्वपद

भद्राश्रम पु० ६त०। चन्दने। [रूपासने।

भद्रासन न० भद्राय लोकक्षेमायास्यतेऽत्र आस-आधारे ल्युट्।

भद्रावली स्त्री० भमित्यव्यक्तशब्दस्य भरमालाति गृह्णाति आला-क गौ० ङीष्। (डांग) मल्लिकायां। स्वार्थे कन्। तत्रैवार्थे।

भय न० बिभेत्यस्मात् भी-अच्। भयहेतौ। भावेऽच्। दैन्यात्मके, परतः स्वानिष्टसम्भावनारूपे वा चित्तवृत्तिभेदे, नाटकप्रसिद्धे रसभेदे च। [डुवङ्लवित्वगे च पु०।

भयङ्कर त्रि० भयं करोति कृ-अच सुम् च। भयजनके, रसभेदे,

भयनाशिनी स्त्री० भयं नाशयति नश-णिच्-णिनि। लायमाणालतायाम्। [भयङ्करे त्रि०।

भयानक पु० बिभेत्यस्मात् भी-आनक। व्याघ्रे, राहौ, रसभेदे च।

भर पु० भृ-अप्। अतिशये। कर्त्तरि अच्। भरणकर्त्तरि त्रि०।

भरण न० भृ-ल्युट्। वेतने, पोषणे, धारणे च। अश्विन्यादिसप्तविंशे द्वितीये नक्षत्रे, घोषकलतायाञ्च स्त्री० ङीष्।

भरण्य न० भरणाय हितम् यत्। मूल्ये, वेतने च। स्त्रीत्वमपि।

भरण्यभुज् त्रि० भरण्यं वेतनं भुङ्क्ते भुज-क्विप्। वैतनिके कर्म्मकरे।

भरत पु० भरं तनोति तन-ड। (जड़भरत) इति ख्याते मुनिभेदे, नाट्यशास्त्रस्य, अलङ्कारशास्त्रस्य च कर्त्तरि मुनिभेदे। शवरे, तन्तुवाये, क्षत्रे, कैकयीसुते रामानुजे च। भरतेन प्रोक्तम् भारतं नाट्यशास्त्रमधीयते अण् तस्य लुक्। नटेषु। दुष्मन्तेन शकुन्तलायामुत्पादिते नृपभेदे पु० तस्यापत्यानि दृञ् तस्य बह्वृषु लुक्। भरतवंश्ये नृपे पु० ब०व०।

भरतखण्ड न० भरतस्य नृपस्य चिह्नितं खण्डम्। भारतवर्षान्तर्गते कुमारिकाख्ये खण्डे।

भरतवर्ष न० ६त०। भारते वर्षे।

भरताग्रज पु० ६त० । दशरथज्येष्ठपुत्रे श्रीरामे ।

भरद्वाज पु० ज्येष्ठस्य भ्रातृकृतत्यस्य पत्न्यां ममतायां बृहस्पतिना जनिते मुनिभेदे । [तस्य गोत्रञ्च । भरिणी ।

भरित पु० भृ–क्तच् हरिद्वर्णे । तद्वति त्रि० । स्त्रियां ङीप्

भर्ग पु० भ्रस्ज–घञ् भर्ज्जादेशे कुत्वम् । शिवे, ज्योतिः पदार्थे, आदित्यान्तर्गते ऐश्वरे तेजसि, "आदित्यान्तर्गतं वर्चो भर्गाख्यं तन्मुमुक्षुभिः । जन्ममृत्युविनाशाय दुःखस्य त्रितयस्य च ध्यानेन पुरुषैर्यच्च द्रष्टव्यं सूर्यमण्डले" इति याज्ञवल्क्यः तस्य तेजस ऐश्वरत्वं "यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजोविद्धि मामकमि"ति गीतायामुक्तम् । भावे घञ् भर्जने च । [धातरि च त्रि० ।

भर्त्तृ पु० भृ–तृच् । स्वामिनि, अधिपतौ राजनि, च । पोषके,

भर्त्तृदारक पु० भर्तुरधिपस्य राज्ञः दारकः पुत्रः । नाट्योक्तौ राजकुमारे । तत्कन्यायां स्त्री० कन् । भर्त्तृदारिका ।

भर्त्तृहरि पु० भर्त्ता हरिरिव । स्वनामख्याते वाक्यपदीयादिग्रन्थकर्त्तरि विक्रमादित्यस्य ज्येष्ठे भ्रातरि राजभेदे ।

भर्त्स अधिक्षेपे, चुरा० उभ० सक० सेट् । भर्त्सयति ते अवभर्त्सीत् त

भर्त्सन न० भर्त्स–ल्युट् । अपकारवचने अधिक्षेपे तिरस्कारायाप-कारार्थकवाक्योक्तौ । युच् । भर्त्सनाप्यत्र स्त्री० ।

भर्त्स्यपत्त्रिका स्त्री० भर्त्स्यं निन्दनीयं पत्त्रमस्याः कप् अत इत्त्वम् । महानीलीवृक्षे ।

भर्भ हिंसायां भ्वा० पर० सक० सेट् । भर्भति अभर्भीत् ।

भर्म(न्) न० भृ–मन्, मनिन् वा । स्वर्णे, भृतौ नाभौ, धुस्तूरे च ।

भर्व हिंसे भ्वा० पर० सक० सेट् । भर्वति अभर्वीत् ।

भल बधे दाने निरूपणे च भ्वा० चु० सक० सेट् । भलते अभलिष्ट ।

भल निरूपणे चु० आ० सक० सेट् । भालयते अबीभलत ।

भलता स्त्री० भाति+भा–क कर्म० । राजवल्लालतायाम् ।

भल्ल दाने, बधे, निरूपणे च भ्वा० प० [illegible] सेट् । भल्लति अभल्लीत् ।

भल्ल पु० भल्ल–अच् । भल्लूके । अस्त्रभेदे पु० न० । स्वार्थे कन् भल्लूके पु० । वा गौरा० ङीष् तत्रैव । स्वार्थे कन् । भल्लकाप्यत्र ।

भल्लपुच्छी स्त्री० भल्लस्य पुच्छमिव पुष्पमस्याः ङीष् । (गोरक्षतण्डुला) क्षुपभेदे ।

भल्लात पु० भल्लं भल्लास्त्रमिवातति स्वर्गिनम् अत–अच् । (भेला) वृक्षभेदे स्वार्थे कन् । अत्रैव । गौ० ङीष् । भल्लातकाप्यत्र ।

भल्लु(लू)क पु० भल्ल–उ(ऊ) क । (भालूक) जन्तुभेदे ।

भव पु० भू–भावे अप् । जन्मनि, सत्तायाम्, प्राप्तौ च । भवत्यस्मात् अपादाने अप् । जलमूर्त्तिधरे महादेवे, जलस्य पृथिवीहेतुत्वेन तद्रूपस्य शिवस्य जन्महेतुतम् । आधारे अप् । संसारे । कर्त्तरि अच् । भव्ये, (चालता) वृत्ते, मङ्गले च ।

भवत् त्रि० भा–डवतु । युष्मदर्थे, सर्वनामता चास्य । भवान् भवत्याः पुत्रः भवत्पुत्रः । भू–शतृ । वर्त्तमानकालार्थे भवन कर्त्तरि च भवन् स्त्रियामुभयत्र ङीप् शतृनस्यनुम् ।

भवदीय त्रि० भवतस्तवायम् छ पदत्वम् अभावः । त्वत्सम्बन्धिनि ।

भवन न० भू–आधारे ल्युट् । गृहे । भावे ल्युट् भावे, जन्मनि, सत्तायाञ्च ।

भवादृग्(श)क्ष त्रि० भवतस्तवेव दर्शनमस्य भवत्+दृश–क्विप् ढक्, क्स वा भवत्तुल्ये जने । [दुर्गायाम् ।

भवानी स्त्री० भवस्य पत्नी भव+ङीष् आनुक् च शिवभार्य्यायाम्

भवाभीष्ट पु० भवस्य महादेवस्याभीष्टः अभि+इष–क्तः । गुग्गुलौ ।

भविक न० भवाय हितम् ठन् । कुशले । अर्घ आदाच् । तद्वति त्रि० ।

भवितव्य न० भू–भविष्यति कर्त्तरि च नि० तव्यत् । अवश्य भव्ये "भवितव्यं भवत्येव यद्बुद्धेर्मनसि स्थितमि"ति ।

भवितव्यता स्त्री० भवितव्यस्य भावः तल् । अवश्यम्भावे, भाग्ये च ।

भविष्णु त्रि० भू–इष्णुच् । भवनशीले ।

भविष्य(त्) पु० भू–लृटः सद्देति शतृ–स्यट् च पृ० वा तलोपः । भाविनि काले । तत्कालवर्त्तिनि पदार्थे त्रि० । स्त्रियाम् ङीप्

तम् च "अव्याच्चोभविष्यन्त्या" इति रघुः । तलोप पक्षे स्त्री-वता । उत्तरपदस्थः त्रि० । "यद्भविष्यो विनश्यती"ति मनु-तन्त्रम् । भविष्यमधिकृत्य कृते पुराणभेदे न० ।

भव्य त्रि० भू-कर्त्तरि नि० यत् । भाविनि "अवश्यभव्येऽनवक्लृप्त्यपेक्षेति नैषधं (चालत्त) फलभेदे मङ्गले च न० । शुभे, सत्ये योग्ये च न० तद्वति त्रि० । कर्मरङ्गे, गजपिप्पल्यां च स्त्री० ।

भष कुक्कुरशब्दे भ्वा० पर० सक० सेट् । भषति अभषीत्-अभाषीत् ।

भषक पु० भष-कन् । कुक्कुरे । [अभसीत् ।

भस दीप्तौ अक० भर्त्से सक० जु० पर० सेट् । बभस्ति । अभासीत्-

भस्त्रा स्त्री० भस-त्रन् । चर्म प्रसेविकायाम् अग्निसन्धुक्षणे चर्म्मनि-र्म्मिते यन्त्रभेदे । (यांता) गौ० ङीष् । अत्रैव । स्वार्थे कन् टाप् न ह्रस्वम् । भस्त्रकाप्यत्रैव ।

भस्मक न० भस्म करोति क-ड । (भस्मकरोटे) बहुभोजनकारके रोगभेदे । भस्मेव इवार्थे कन् । कलधौते रूप्ये, विड्रङ्गे च ।

भस्मगन्धा स्त्री० भस्मन इव गन्धोऽस्याः । रेणुकाख्यगन्धद्रव्ये । स्वार्थे कन् अत इत्त्वम् । तत्रैव । [गन्धद्रव्ये ।

भस्मगन्धिनी स्त्री० भस्मन इव गन्धोऽस्त्यस्या इनि । रेणुकाख्ये ।

भस्मगर्भ पु० भस्म गर्भे यस्याः । तिनिशवृक्षे, कपिलशिंशपायां च । रेणुकाख्यगन्धद्रव्ये स्त्री० टाप् ।

भस्मन् न० भस-मनिन् । (छाइ) दग्धगोमयादिविकारे ।

भस्मरोहा स्त्री० भस्मनि रोहति रुह-अच् । दग्धिकायाम् ।

भस्मसात् अव्य० भस्म कार्त्स्न्येन सम्पन्नं करोति भस्मन् + सात् । साकल्येन भस्मरूपकरणे ।

भा दीप्तौ अदा० पर० अक० अनिट् । भाति अभासीत् ।

भा स्त्री० भा-क्विप् । टाप् । दीप्तौ ।

भाक्त त्रि० भक्तेः गौणीवृत्तेः रागतः अण् । औपचारिके गौणीवृत्त्या बोधितेऽर्थे । भक्तस्यान्नस्येदम् अण् । अन्नसम्बन्धिनि त्रि० ।

भाग पु० भज-भावे घञ्। भजने। कर्मणि घञ्। अंशे, दृष्टवस्तुनोऽर्द्धे, एकदेशे, भाग्ये, 'त्रिंशांशकस्तथा राशेर्भाग इत्यभिधीयते इति ज्योतिषोक्ते राशेः त्रिंशांशके च।

भागधेय न० भाग+स्वार्थे धेय अभिधानात् नपुंसकत्वम्। भाग्ये। भागेन धीयतेऽसौ धा-यत्। राजदेये करे। भागो धीयते ऽस्मै धा-सम्प्रदाने यत्। दायादे सपिण्डे।

भागवत त्रि० भगवतः, भगवत्या वा इदम् सोऽस्यदेवता वा अण् भगवतः भगवत्या वा भक्ते, तत्सम्बन्धिनि च 'भग्नाः कृष्णेभागवता भवन्तीत्यु" क्तेः तयोः सम्बन्धिगुणवर्णने पुराणे उपपुराणे च न० 'यैर्न श्रुतं भागवतं पुराणमि"ति पुराणम् तत्र कस्य पुराणत्वं कस्य वोपपुराणत्वं तद्वाचस्त्वत्वे विस्तरेण निरूपयिष्यते। [दानादौ।

भागशस् अव्य० भागं भागं ददातीत्यादृर्थे शस। एकैकभागस्य

भागहर त्रि० भागमंशं हरति अधिकारित्वेन गृह्णाति हृ-अच्। अंशग्राहिणि।

भागहार पु० भज्यते इति भागोविभाज्यस्तस्य हारो हरणम्। हृ-घञ्। अङ्कशास्त्रोक्ते भाज्यस्य विभागकरणे।

भागिन् त्रि० भज-घिनुण्। अंशविशिष्टे। [स्त्री० ङीप्।

भागिनेय पु० भगिन्या अपत्यम् ढक्। स्वसृपुत्रे। तत्कन्यायां।

भागीरथी स्त्री० भगीरथेन निर्वृत्ता आनीता तत्सम्बन्धिनी वा अण्। गङ्गायाम्। 'भागीरथीनिर्झरशीकराणा"मिति कु०।

भागुरि पु० स्मृतिव्याकरणादिकर्त्तरि मुनिभेदे।

भाग्य न० भज-ण्यत् कुत्वम्। शुभाशुभसूचके कर्म्मणि। भागः प्रयोजनमस्य यत्। भागवति त्रि०।

भाङ्गीन न० भङ्गायाः विजयायाः भवनं क्षेत्रं खञ्। (भाङ्) भङ्गाभवनयोग्ये क्षेत्रे। यञ्। भाङ्गप्रयोजने। [भाजत् त।

भाज पृथक्करणे, अद० चु० उभ० सक० सेट्। भाजयति ते अब-

भाजन न० भाज्यतेऽनेन भाज-ल्युट्। पात्रे, आधारे, योग्ये च।

भाजी स्त्री० भाज-कर्म्मणि घञ् नि० ङीप्। भक्ष्यव्यञ्जनभेदे।

भाज्य त्रि० भाज्यते विभज्यते भाज-कर्म्मणि यत् । विभजनीये 'भाज्यो हरः शुध्यति वदृगुणः स्यादि'ति लीलावती ।

भाटक न० भट-पोषणे एवुल् । परगृहस्थानादेरुपभोगार्थं तत्स्वामिने दीयमाने धने । (भाड़ा)

भाण पु० भण-घञ् । 'भाणः स्याद्धूर्त्तचरित" इत्याद्युक्तलक्षणे दृश्यकाव्यभेदे साहि० दृ०प० ।

भाण्ड न० भा-अण्डच्, भण-ड-स्वार्थे अण् वा । पात्रे, तैलाधारे भाजने, (भांड़) वटहभेदे, (भाड़ार) 'ब्रह्माण्डभाण्डोदरे' ति वीरचरितम् । वणिजां मूलधने, अश्वभूषायां, नटीकुलद्वयमध्ये पात्रे च । गर्हभाण्डे दृश्ये पु० । भण्डस्य भावः अण् । भण्डचरित्वे न० (भाड़ामि) ।

भाण्डारिन् पु० भाण्डमर्हति वह-णिनि । (भाण्डारी) । अश्वादिद्रव्यवहेषु कृताधिकारे ।

भाण्डिकाह्व पु० भाण्डिं क्षुराद्याधारं (भाड़ि) वहति अण् । नापिते । भाण्डि+अस्त्यर्थे लच् । भाण्डिलोऽप्यत्र ।

भाण्डीर पु० भण्ड-ईरच् पृ० । वटवृक्षे, वृन्दावनस्थे वटवनभेदे च ।

भाति स्त्री० भा-क्तिन् । शोभायाम् ।

भाद्र पु० भद्राभिर्युक्ता पौर्णमासी भाद्री सा यस्मिन् मासे । अण् चैत्रादितः षष्ठे चान्द्रे मासे । तन्मासीयपौर्णमास्यां स्त्री० ङीप् । भद्रेव स्वार्थे अण् । पूर्व्वोत्तरभाद्रपदाख्यनक्षत्रे न० । 'भद्रहये भागरे" इति ज्योतिषम् ।

भाद्रपदा स्त्री० ब०व० । भद्रस्येदं अण् भाद्रं भाद्रमिव पदमासाम् । अश्विन्यवधिके पञ्चविंशपञ्चविंशयोर्नक्षत्रयोः । तद्युक्ता पौर्णमासी अण् ङीप् । भाद्रमासस्य पौर्णमास्याम् साऽत्र मासे अण् । चान्द्रे भाद्रे मासि । [पुत्रे ।

भाद्रमातुर पु० भद्रायाः मत्स्याः मातुः अपत्यम् अण् ङुरच् । मत्स्यी-

भानु पु० भा-नु । सूर्य्ये, अर्कवृक्षे, किरणे, प्रभौ, राजनि च ।

भानुफला स्त्री० भानुरिव दीप्तिमत् फलं फलवती यस्याः । कदल्याम्

तस्याः मोचकस्य सूर्य्यतुल्यवर्णत्वात्तथात्वम् । [त्र्यम्बत्र ।

भानुमत् पु० भानुः किरणोऽस्यास्ति मतुप् । सूर्य्ये । भानुमाली-

भानुमती स्त्री० विक्रमादित्यबन्धुपतेः पत्न्याम् ।

भाम क्रोधे भ्वा० आत्म० अक० सेट् । भामते, अभामिष्ट ।

भाम पु० भाम–घञ् । क्रोधे, दीप्तौ च । कर्त्तरि अच् । सूर्य्ये । कोपवत्यां स्त्रियां स्त्री० टाप् ।

भामिनी स्त्री० भाम–णिनि । कोपशीलायां स्त्रियां, स्त्रीमात्रे च ।

भार पु० भृ-घञ् । गुरुत्वपरिमाणे, तद्वति द्रव्ये विंशतितुलापरिमाणे (अष्टसहस्रतोलकपरिमाणे) च पु० ।

भारत न० भरतानां भरतवंश्यानामिदमित्य ऋतोऽन्यत्र: अण् भारः वेदादिशास्त्रेभ्योऽपि सारांशः अस्त्यस्य वा । वेदव्यासप्रणीते लक्षश्लोकात्मके ग्रन्थभेदे । भरतेन चिह्नितं, तस्येदं वा अण् । 'हिमाह्वं दक्षिणं वर्षं भरताय ददौ पिता । तस्माच्च भारतं वर्षं मित्युक्तं जम्बुद्वीपान्तर्गते वर्षभेदे । भरतस्य गोत्रापत्यम् अण् । भरतोऽपत्यस्य वंश्ये । भरतेन मुनिना प्रोक्तमण् । भरतमुनिकृते नाटकशास्त्रादौ न० । तदधीयते पुनरण् । नटे, अग्नौ च ।

भारती स्त्री० भृ–अतच् स्वार्थे प्रज्ञाद्यण् । वाक्ये तदधिदेवतायां सरस्वत्यां, पत्निभेदे, 'भारती संस्कृतप्रायो वाग्व्यापारो नराश्रय' इति सा० दैप० अलङ्कारोक्ते वृत्तिभेदे च ।

भारद्वाज पु० भरद्वाजस्य गोत्रापत्यम् अण् । गोत्रप्रवर्त्तके ऋषिभेदे, द्रोणाचार्य्ये, अगस्त्यसुनौ, व्याघ्राटविहगे, वृहस्पतिपुत्रे च । तत्कार्यादिषु स्त्री० ङीप् । पु० । भारद्वाजीत्यत्र ।

भारयष्टि स्त्री० भारस्य वहनार्था यष्टिः शाक० । भारवहनदण्डे (बांक)

भारवाह(क्) पु० भारं वहति अण्, ण्वि वा । भारवाहिनि । खुल् । भारवाहकोऽत्यत्र ।

भारवि पु० किरातार्जुनीयकाव्यकारके कविभेदे ।

भारवृक्ष पु० भारीभूतो वृक्षः । काचीनामगन्धद्रव्ये ।

भारिक पु० भारं वहति भार–ठक् । भारवाहके ।

भार्गव पु० भृगोरपत्यमु तस्योत्पत्यं वा अण् । शुक्राचार्ये, परशुरामे, धन्विनि, गजे च । तेन प्रोक्ता तेनाधीता ज्ञाता वा अण् । वेद-प्रसिद्धे विद्याभेदे, पार्व्वत्यां लक्ष्म्यां दूर्व्वायां च स्त्री० ङीप् ।

भार्गी स्त्री० भर्गस्येयमण् । (वामनहाटि) वृक्षभेदे ।

भार्य्या स्त्री० भृ-ण्यत् । विधिनोढायां स्त्रियाम् भरणीये त्रि०

भाल न० भा-लच् । ललाटे भ्रुवोरूर्द्धभागे ।

भालदर्शन न० भाले दृश्यते कर्म्मणि ल्युट् । सिन्दूरे ।

भालनेत्र पु० भाले नेत्रमस्य । शिवे । भाललोचनादयोऽप्यत्र ।

भालाङ्क पु० भालस्येवाङ्को यस्य, भाले अङ्को यस्य वा । शाकभेदे, करपत्रोऽस्त्रे (करात्) रोहितमत्स्ये, महापुरुषचिह्नयुक्ते, पुरुष-भेदे, शिवे, कच्छपे च ।

भाल्लु(ल्लू)क पु० भल्लूक-स्वार्थे अण् या पृ०हुस्वः । जन्तुभेदे भल्लूके । पृ० । भालुकोऽप्यत्र ।

भाव पु० भावयति चिन्तयति पदार्थान् भु०भू-अच् । नाट्योक्तौ नाना पदार्थचिन्तके प्रसिद्धते । भावयति ज्ञापयति हृदयगतम् भू-णिच् अच् । हृद्गतावस्थाविशेषके मानसविकारे स्वेदकम्पादौ, व्यभिचारि-भावे । भू-घञ् । साध्यरूपे सिद्धरूपे वा क्रियारूपे धातोरर्थे, रागे आशये च । [च त्रि० ।

भावक पु० भाव-स्वार्थे कन् ; मानसविकारे । पदार्थचिन्तके उत्पादके

भावत्क पु० भवतोऽयं ठक् । भवत्सम्बन्धिनि । [चिन्ताभेदे च

भावन न० भू णिच्-ल्यु । (चालता) फलभेदे, भावे ल्युट् । युच् । चिन्तायाम्, अधिवासने, ध्याने, पर्य्यालोचनायां, वैद्यकोक्ते औषधसंस्कारभेदे स्त्री० ।

भावबोधक भावस्य रत्यादेर्बोधकः अनुमापकः । रत्यादानुमापके भ्रूक्षेपादिदेहचेष्टाविशेषे, सुखरागादौ च ।

भावानुगा स्त्री० भावं पदार्थमाशयं वानुगच्छति गम-ड । छायायाम् अभिप्रायानुगन्तरि त्रि० ।

भावित त्रि० भू-णिच् । वासिते, प्राप्ते, युक्ते चिन्तिते मिश्रिते च ।

भाविनी स्त्री० भावः हृदयचेष्टाभेदोऽस्त्यस्या इनि । स्त्रीभेदे, स्त्रीमात्रे च । भू-णिनि । भविष्यत्कालवर्त्तिनि त्रि० स्त्रियां ङीप् ।

भावुक न० भू-उकञ् । मङ्गले, तद्वति त्रि० 'सुन्दरहो रसिकाभुवि भावुका" इति भागवतम् । [न हुस्वः ।

भाष वचने भ्वा० आत्म० द्विक० सेट् । भाषते अभाषिष्ट । चङि

भाषा स्त्री० भाष-अ । वाक्ये, संस्कृतादिवाक्ये च । अष्टादश भाषावारविलासिनीभुजङ्गः" इति सा० ६प० । व्यवहारे प्रतिज्ञाहेतूदाहरणवाक्ये 'यदावेदयते राज्ञे तद्भाषेत्यभिधीयते" इति स्मृतिः । [प्रथमेऽंशे]

भाषापाद पु० कर्म्म० चतुष्पादव्यवहारे प्रतिज्ञाहेतूदाहरणे वाक्यरूपे

भाषित न० भाष-भावे-क्त । कथने । कर्म्मणि-क्त । कथिते त्रि० । "भाषितपुंस्का" दिति पाणिनिसूत्रम् ।

भाष्य न० "सूत्रार्थो वर्णते यत्र पदैः सूत्रानुसारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो जना" इत्युक्त लक्षणे सूत्रव्याख्या ग्रन्थभेदे । कथनीये त्रि० ।

भास दीप्तौ भ्वा० आत्म०अक० सेट् । भासते अभासिष्ट । चङि वा हुस्वः । अबीभसत् अबभासत् ।

भास स्त्री० भास-सम्पदा० क्विप् । दीप्तौ, मयूखे इच्छायाञ्च ।

भास पु० भास-घञ् अच् वा । दीप्तौ, गोष्ठे, कुक्कुरे शुक्रे च । "यत्नार्थमदत्त वस्तु भासः काकोऽथवा भवे" दिति स्मृतिः ।

भासुर त्रि० भास-उरच् । दीप्तिशीले, स्फटिके च । वीरे पु० । कुष्ठौषधे न० ।

भासुरपुष्पी स्त्री० भासुराणि पुष्पाण्यस्याः । वृश्चिकाली (बिछाति) ।

भास्कर पु० भासं करोति भास्+कृ-टच् कस्का० । सूर्य्ये, अग्नौ वीरे, अर्कवृक्षे सिद्धान्तशिरोमणिग्रन्थकर्त्तरि च । स्वर्णे न० ।

भास्करप्रिय पु० ६त० । पद्मरागमणौ (चुनि) ।

भास्वर त्रि० भास-वरच् । दीप्तियुक्ते, सूर्य्ये, दिने, अर्कवृक्षे च पु० । कुष्ठौषधे न० (कूड़) । [वीरे च । दीप्तिमति त्रि० ।

भास्वत् पु० भास्+अस्त्यर्थे मतुप् मस्य वः । सूर्य्ये, अर्कवृक्षे ।

भिक्ष लोभे लाभायोक्तौ सक० याचने द्विक० क्लेशे अक० भ्वा० आत्म० सेट् । भिक्षते अभिक्षिष्ट ।

भिक्षा स्त्री० भिक्ष–अ । याच्ञायाम् ।

भिक्षाक त्रि० भिक्ष–घाकन् । भिक्षाकारके । स्त्रियां ङीष् ।

भिक्षाशिन् त्रि० भिक्षालब्धमश्नाति अश–णिनि । भिक्षालब्धोपजीविनि

भिक्षु पु० भिक्ष–उ । संन्यासिनि चतुर्थाश्रमे ।

भिक्षुक पु०स्त्री० भिक्ष–उकञ् । भिक्षोपजीविनि ।

भिण्ड पु०स्त्री० भण–ड पृ० । कराकृतिरक्तवर्णपर्णे वर्त्तुलाकारबीजे क्षुपभेदे । स्त्रीत्वे टाप् ।

भिन्न न० भिद–क्त नि० तस्य नः । खण्डे ।

भिन्नि स्त्री० भिद–क्विन् । घटादेः कुम्भे (हेयाले) । स्वार्थे कन् । तत्र, पक्षा० च ।

भिद द्विधाकरणे, विशेषकरणे च रुधा० उभ० सक० अनिट् भिनत्ति भिन्ते अभिदत् अभैत्सीत् अभित्त ।

भिद अंशकरणे भ्वा०पर०सक०सेट् इदित् । भिन्दति अभिन्दीत् ।

भिदा स्त्री० भिद–अङ् । विदारणे, द्वैधीकरणे, विशेषकरणे च ।

भिदुर पु० भिद–कुरच् । वज्रे । इरच् । भिदिरमप्यत्र न० । शुक्लदृचे पु० ।

भिन्दिपाल पु० भिदि–विदारणे इन् भिन्दिं भेदनं पालयति पाल अण् । हस्तत्रये नालिकास्त्रे, हस्तप्रमाणेऽस्त्रे च ।

भिन्न पु० भिद–क्त । विदारिते, भिन्नते, सङ्कते, अन्ये, प्रस्फुटिते च ।

भिन्नगात्रिका स्त्री० भिन्नं विदारितं गात्रमवयवो यस्याः । कर्कौट्याम्

भिन्नपरिकर्मन् न० भिन्नस्य अंशसहितस्य परिकर्म संस्कारविशेषः । अङ्कशास्त्रोक्ते सांशस्य गुणभागादिसंस्कारे ।

भिन्नभिन्नात्मन् पु० भिन्नप्रकारः प्रकारे द्वित्वम् तादृश आत्मा यस्य । चणके (छोला) । [ङीप् । पाषाणभेदके वृक्षे ।

भिन्नयोजनी स्त्री० भिन्नं युज्यतेऽनया युज करणे ल्युट् ।

भिल भेदने वा चु०उ० पक्षे तु०पर०सक० सेट् । भेलयति ते भिलति

अबीभिलत् त अभैलीत् । [षे "ति स्मृतिः ।

भिल्ल पु० भिल-लक् । म्लेच्छजातिभेदे । (भिल) 'कैवर्त्तभेदभिल्ला

भिल्लतरु पु० भिल्लप्रियः तदुपजीव्यत्वात् तरुः । लोध्रे ।

भिल्ली स्त्री० भिल लक् गौ० ङीष् । लोध्रे ।

भिष रोगप्रतीकारे सौ० पर० सक० सेट् । भेषति अभेषीत् ।

भिषक्प्रिय पु० ई तत० । गुडूच्याम् ।

भिषग्भद्रा स्त्री० ई ब० । भद्रदन्तिकायाम् ।

भिषज् पु० भिषति चिकित्सते भिष-अजिक् । वैद्ये रोगप्रतीकारेच ।

भिस्सटा स्त्री० भिस्सामत्रं टीकते टीक-ड पृ० । दग्धान्ने । पृ० ।
भिस्सिटा भिस्सिटा भिस्सिटा भिस्सिका इत्यादयोऽप्यत्रार्थे ।

भिस्सा स्त्री० भिद् किप् सो क पृ०दस्य सः । अन्ने ।

भी भये जु०पर०अक०अनिट । बिभेति अभैषीत् बिभयामास बिभाय ।

भी भये अक० भरणे सक० क्र्यादि० वा प्रा०पर०अनिट् । भीनाति-भिनाति । अभैषीत् ।

भी स्त्री० भी-सम्प० किप् । भये ।

भीति स्त्री० भी-क्तिन् । भये, कम्पे च । क्त भीतः । भययुक्ते त्रि० ।

भीम त्रि० बिभेत्यस्मात् भी-मक् । भयहेतौ । भयानकरसे, महादेवे, भीमसेने, अस्त्रभेदेसे च पु० । दुर्गायां स्त्री० 'भीमा "देवीति विख्यातं तन्मे नाम भविष्यती"ति चण्डी ।

भीमरथी स्त्री० 'सप्तसप्ततिमे वर्षे, सप्तमे मासि सप्तमी । रात्रिर्भीमरथी नामेत्युक्तायां रात्रौ ।

भीमसेन पु० युधिष्ठिरानुजे मध्यमपाण्डवे, कर्पूरभेदे च । [स्याम् ।

भीमैकादशी स्त्री० भीमेनोपाख्या एकादशी शाक० । माघशुक्लैकाद-

भीरु त्रि० भी-कु+भयशीले । शतावर्य्यां, कपटकार्य्यां, शतपदिकायां कायायां योषिति च । स्त्री० वा ङीष् । भययुक्तायां योषिति ।

भीरुक पु० भी-कुकन् । शृगाले । व्याघ्रे । इक्षुभेदे च । भययुक्ते त्रि० ।

भीरुपत्री स्त्री० भीरूणि पत्राणि यस्याः । शतमूल्याम् ।

भीलु त्रि० भी कु भयशीले । लुकन् । तत्र । भल्लूके पु० ।

भीषण पु० भीषयते भी- णिच्-ल्यु भीषादेशः । भयानकरसे, कुन्दुरुके, हिङ्गुले, शल्लक्यां च । महादेवे-कपोते च पु० । गाढ़े दारुणे च त्रि० ।

भीम पु० भी-मक् सुक् च । भयानकरसे । भयहेतौ त्रि० । गङ्गागर्भजे शान्तनुसुते खनामख्याते कुरुवंश्ये क्षत्रिये पु० ।

भीष्मजननी स्त्री० ६त० । गङ्गायाम् । भीष्मस्य प्रभवतयोऽयत्व ।

भीष्मपञ्चक न० भीष्मेणोपदिष्टं पञ्चकम् । कार्त्तिकशुक्लैकादश्यादिषु पञ्चसु तिथिषु, तत्कर्त्तव्ये व्रतभेदे च ।

भीष्माष्टमी स्त्री० ६त० । भीष्मस्य देहत्यागदिवसे माघशुक्लाष्टम्याम् अतस्तस्मिन् दिने सर्व्ववर्णैस्तस्य तर्पणं कार्य्यम् ।

भुक्त त्रि० भुज-कर्म्मणि क्त । भक्षिते । भावे-क्त । भक्षणे न० ।

भुक्तसम्भुञ्जित त्रि० पूर्व्वं भुक्तं पश्चात् सम्भुञ्जितं त्यक्तम् । भोजनोत्तरं त्यक्ते अन्नादौ ।

भुक्ति स्त्री० भुज-क्तिन् । भोजने भोगे, च 'आगमो निष्फलस्तत्र भुक्तिः स्तोकापि यत्र नो' इति स्मृतिः । [सुखे ।

भुक्तिप्रद त्रि० भुक्तिं भोगं भोजनं वा प्रददाति खल्पायासमत्वात् ।

भुग्न त्रि० भुज-भोटने क्त । रोगादिना कुटिलीकृते ।

भुज भोटने तु० प० सक० अनिट् । भुजति अभौक्षीत् । क्त भुग्नः ।

भुज भक्षणे आ० पालने पर० सक० रुधा० अनिट् । भुङ्क्तेऽन्नम् अभौक्षीत् । भूमिं भुनक्ति पालयति । 'दिवं मरुत्वानिव भोक्ष्यते महीमिति रघुः भुक्तः ।

भुज पु० स्त्री० भुज्यतेऽनेन भुज-घञर्थे क । बाहौ, करे, त्रिकोणचतुष्कोणादिक्षेत्रस्थरेखाविशेषे लीलावत्यादौ प्रसिद्धे 'तथा यतेस्तद्भुजकोटिघात" इति लीलावती ।

भुजग पु० भुज-वक्रणे क भुजः कुटिलीभवन् सन् गच्छति गम-ड । सर्पे, अश्लेषानक्षत्रे च ।

भुजगान्तक पु० ६त० । गरुडे । भुजगनाशनादयोऽयत्व ।

भुजगाशन पु० भुजगान् अश्नाति अश-ल्यु । गरुडे, भुजगभक्षणादयोऽयत्व ।

भुजङ्ग पु० भुजः सन् गच्छति गम-खच्डिच्च । सर्पे, जारे, अश्लेषानक्षत्रे च ।

भुजङ्गप्रयात न० । द्वादशाक्षरपादके छन्दोभेदे ।

भुजङ्गम पु० भुजः कुटिलीभवन् सन् गच्छति गम-खच् मुम् । सर्पे, अश्लेषानक्षत्रे च । सीसके न० । [रास्नायाम् ।

भुजङ्गाक्षी स्त्री० भुजङ्गस्येवाक्षि पुष्पं यस्याः षच् समा० । ङीष् ।

भुजङ्गाख्य पु० भुजङ्गतुल्या आख्या यस्य । नागकेशरे ।

भुजशिरस् पु० ह्रस्वः । स्कन्धदेशे ।

भुजान्तर न० भुजयोरन्तरं मध्यम् । क्रोडे ।

भुजिष्य पु० भुज-किष्यन् । दासे, रागे, स्वतन्त्रे, कुक्कुरसूत्रे च । दासी, वेश्यायाञ्च स्त्री० ॥ [संख्यायाञ्च ।

भुवन न० भवत्यत्र भू-क्युन् । जगति, जले, आकाशे, चतुर्दश-

भुवनकोष पु० भुवनस्य कोष इव । भूगोले ज्योतिषप्रन्थभेदे च ।

भुवर् अव्य० भू अर-क्वुन् किच्च । आकाशात्मके द्वितीये लोके ।

भुवर्लोक पु० कर्म्म० । भूरादिसप्तलोकमध्ये द्वितीयलोके ।

भू प्राप्तौ चु० आ० सक० सेट् । भावयते अभीभवत ।

भू प्राप्तौ भ्वा० उ० सक० सेट् । भवति-ते अभूत् अभविष्ट ।

भू गुद्धौ अक० चिन्तने मिश्रणे च सक० चुरा० उभ० सेट् । भावयति-ते अबीभवत्-त ।

भू सत्तायां भ्वा० पर० अक० सेट् । भवति अभूत् । [यज्ञाग्नौ च ।

भू स्त्री० भू-संप० क्विप् । पृथिव्याम्, एकसंख्यायां, स्थानमात्रे-

भूकन्द पु० भुवः कन्दइव । (थुलकुड़ि) । मकाम्रावणिकाख्ये ।

भूकदम्ब ए० भुवि कदम्ब इव । (कोकसिमा) अलम्बुसवृक्षे ।

भूकदम्बक पु० भुवि कदम्ब इव कायति कै-क । यवान्याम् ।

भूकम्प पु० ह्रस्वः । लोकानामनिष्टसूचके अद्भुतरूपे पृथिव्या स्वयं चलने

भूकुम्भी स्त्री० भुवि कुम्भीव । भूमिपारुल्याम् ।

भूकुष्माण्डी स्त्री० भुवि कुष्माण्डीव । वट्यर्याम् ।

भूकेश पु० भुवः पृथिव्याः केश इव । वटे, शैवले च ।

भूखर्ज्जूरी स्त्री० भुवि लग्ना खर्जूरी शाक० । क्षुद्रखर्जूर्याम् भूमि-खर्ज्जूर्याकृत्योऽप्यत्र ।

भूगोल पु० भूर्गोल इव । गोलाकारे भूमण्डले तत्प्रमाणस्वरूपादिकं वाच्यत्वे 'मध्ये समन्तादण्डस्य भूगोलो व्योम्नि तिष्ठति । बिभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकां" मिति सूर्य्यसिद्धान्तः ।

भूच्छाया स्त्री० भुवश्छाया । सूर्य्यकिरणसम्पर्कवशात् । जायमाने राहुग्रहाभिधाने तमसि अन्धकारे ।

भूजम्बू स्त्री० भुवो जम्बूरिव स्वादुत्वात् । गोधूमे, विकङ्कतफले च । (वहचि) ह्रस्व० । क्षुद्रजम्बूम् । भूमिजम्बादयोऽप्यत्र स्त्री० ।

भूत न० भू-क्त । न्याय्ये, उचिते, पृथिवीजलतेजोवायुगगनरूपेषु गन्धादिविशेषगुणवत्सु, द्रव्येषु, जन्तुषु सत्ये, यथार्थे, वास्तविके, 'भूतमप्यनुपन्यस्तं क्षीयते व्यवहारत इति स्मृतिः तत्त्वानुसन्धाने च 'छलं निरस्य भूतेने"ति स्मृतिः । पिशाचादौ, कुमारे, योगीन्द्रे, कृष्णपक्षे पाणिनि च पु० । अतीते वृत्ते, सदृशे, प्राप्ते, सत्ये च त्रि० । कृष्णचतुर्द्दश्यां स्त्री० टाप् ।

भूतकेश पु० भूतानां केशइव । (भूतकेश) नामके तृणभेदे । स्त्रीत्वमपि, साच तत्र, शेफालिकायां च टाप् । नीलसम्भवारे ङीप्

भूतगन्धा स्त्री० भूतः प्रभूतः गन्धो यस्याः । सुरानामगन्धद्रव्ये ।

भूतघ्न पु० भूतं हन्ति हन-टक् । भूर्ज्जपत्रे तद्वारणे हि बालग्रह-भूतादिनिवारणम् । भूतं प्राकृतं गन्धं हन्ति अधःकरोति लशुने, उष्ट्रे च । भूतनाशके त्रि० । तुलस्यां स्त्री० ङीप् ।

भूतचतुर्द्दशी स्त्री भूतप्रिया चतुर्द्दशी तदुद्देशेन तस्यां दीपदानात् । आश्विनकृष्णपक्षचतुर्द्दश्यां दीपान्वितामावास्यापूर्वतिथौ यमचतुर्द्दश्याम् ।

भूतजटा स्त्री० भूतस्य जटेव । जटामांस्याम् ।

भूतद्राविन् पु० भूतान् द्रावयत्यपसारयति द्रु-णिच्-णिनि । रक्त-करवीरवृक्षे, भूताङ्कुशवृक्षे, शाखोटवृक्षे च ।

भूतद्रुम पु० भूतइव द्रुमः । श्लेष्मातकवृक्षे । भूतवृक्षादयोऽप्यत्र ।

भूतधात्री स्त्री० भूतानि जन्तून् धारयति धा+तृच् ङीप्। पृथिव्याम्। [वटुकस्तोत्रम्। भूतेशभूतपत्याद्योऽप्यत्र।

भूतनाथ पु० ६त०। शिवे, वटुकभैरवे च। "भैरवो भूतनाथश्चे"ति

भूतनाशन न० भूतान् नाशयति नश–णिच्–ल्यु। रक्षोघ्ने। सर्षपे, भल्लातके च पु०।

भूतपत्र पु० भूतप्रियः पत्रः अभ्रकारवत्त्वात्। कृष्णपत्रे।

भूतपत्री स्त्री० भूत इव कृष्णं पत्रं यस्याः। कृष्णतुलस्याम्।

भूतपुष्प पु० भूतइव कृष्णं पुष्पं यस्य। ध्योनाकवृक्षे।

भूतभावन पु० भूतानि पृथिव्यादीनि भावयति जनयति भू–णिच्–ल्यु, भूता सत्या यथार्था भावना यस्य वा। विष्णौ, वटुकभैरवे च "भूतात्मा भूतभावन" इति। तयोः स्तोत्रे।

भूतयज्ञ पु० भूतान् प्राणिनो वायसादीन् उद्दिश्य यज्ञो बलिः। नित्यं गृहस्थकर्त्तव्यपञ्चयज्ञान्तर्गते बलिवैश्वदेव कर्मणि "भूतेभ्यो बलिहरणं भूतयज्ञ" इति स्मृतिः।

भूतल न० भूरेव तलम्। पृथिव्याम्। ६त०। पातालेभूमेरधोभागे

भूतलिका स्त्री० भूतलं पातालं मूलत्वेनास्त्यस्याः ठन्। पृक्कायाम् (पिण्डिङ्गशाक) बहुदूरगमूलत्वात्तस्यास्तथात्वम्।

भूतवास पु० ६त०। (वयड़ा) विभीतकवृक्षे। भूतावासादयोऽप्यत्र।

भूतशुद्धि स्त्री० भूतानां देहारम्भकपृथिव्यादीनां शुद्धिर्भावना विशेषात् शोधनम्। तन्त्रादौ प्रसिद्धे देहारम्भकचतुर्विंशति तत्त्वानां भावनाविशेषेण संस्कारेण देवरूपतासम्पादने।

भूतसार पु० भूतइव कृष्णः सारोऽस्य। ध्योनाकवृक्षे।

भूतहन्त्री स्त्री० भूतान् तद्भयं हन्ति हन–तृच् ङीप्। वन्ध्याकर्कोट्यां, श्वेतदूर्वायाञ्च तद्धारणे हि स्त्रीणां प्रजाप्रतिरोधकभूतभयनाशः।

भूतहर पु० भूतान् हरति अपसारयति हृ–अच्। गुग्गुलौ।

भूतहारिन् पु० भूतान् हरति स्थानान्तरं नयति हृ–णिनि। देवदारुवृक्षे।

भूताङ्कुश पु० भूतानां पिशाचानामङ्कुशइवापसारकत्वात् । स्वनाम-ख्याते वृक्षे ।

भूतात्मन् पु० भूतानि पृथिव्यादीनि पञ्च द्रव्याणि आत्मा स्वरूपं यस्य । देहे । भूतानि पञ्च द्रव्याणि भूताः प्राणिनश्च आत्मा स्वरूपं यस्य । परब्रह्मणि, 'सर्व्वं खल्विदं ब्रह्म तज्जलानि"ति श्रुतिः । सर्व्वभूतात्मके हिरण्यगर्भे, विष्णौ, वटुके भैरवे च 'भूतात्मा भूतभावन"इति तयोः स्तोत्रे ।

भूतारि पु० ६त० । हिङ्गौ तद्भक्षेण हि भूतापसरणम् ।

भूताली स्त्री० भूतानीव अलति पर्य्याप्नोति अल-अच् गौरा० ङीष् । भूमिपाटलौ, भूपल्याञ्च । [विभीतकवृक्षे च ।

भूतावास पु० भूतानां प्राणिनामावासः अधिष्ठानत्वात् । विष्णौ,

भूति स्त्री० भू-क्तिन् । भवने, अणिमाद्यष्टविधैश्वर्य्ये, शिवाङ्गभस्मनि, भूतौ, सम्पत्तौ, जात्यां, वृद्धिनामौषधे च ।

भूतिक पु० भूत्या सम्पत्त्या कायति कै-क । भूनिम्बे, यमान्यान्च । चन्दने, कट्फले कत्तृणे च न० । पृ०वा दीर्घः । भूतीकोऽप्यत्र ।

भूतृण न० भुवः तृणं गन्धवत्त्वात् (गन्धखड) तृणभेदे । रोहि-षतृणे पु० । [(उन्दुरकानि)

भूदारीभवा स्त्री० भूदार्य्यां भूमिविले भवति भू-अच् । आखुकरञ्जाम्

भूदार पु० भुवं दृणाति खनति सुखाद्यर्थम् दृ-अण् । शूकरे ।

भूदेव पु० भुवि देव इव । विप्रे ।

भूधर पु० भुवं धरति धृ-अच् । पर्व्वते । [लक्ष्याम् ।

भूधात्री स्त्री० भुवि लग्ना धात्री आमलकी शाक० । भूम्यामल-

भूनिम्ब पु० भुवि लग्नः निम्बः शाक० । (चिरात) क्षुपभेदे ।

भूनीप पु० भुवि लग्नो नीपः शाक० । भूमिकदम्बे ।

भूप पु० भुवं पाति पा-क । भूमिपाले भूमिपादयोऽप्यत्र ।

भूपद्म पु० भुवि पद्मं मूलं यस्य । वृक्षभाते । मल्लिकायां स्त्री० ङीष् ।

भूपलाश पु० भुवि पलाशं यस्य । विश्वस्यकारके क्षुपभेदे ।

भूपाल पु० भुवं पालयति पाल-अण् । भूपतौ ।

भूपिष्ट पु० भूपस्येष्टः । राजादनीवृक्षे (पियासाल) तद्वीजस्य चिरञ्जि इति ख्यातस्य राजप्रियत्वात्तथात्वम् ।

भूभुज् पु० भुवं भुङ्क्ते भुनक्ति पालयति वा भुज-क्विप् । भूपाले ।

भूभृत् पु० भुवं बिभर्त्ति धारयति, पालयति वा भृ-क्विप् । पर्व्वते, भूपाले च ।

भूमन् पु० बहोर्भावः इमनिच् नि० बहोर्लोपो भूश्च । बहुत्वे ।

भूमि(मी) स्त्री० भवन्त्यस्मिन् भूतानि भू-मिक् या ङीप् । पृथिव्याम्, स्थानमात्रे, जिह्वायां, योगशास्त्रोक्ते योगिनां चित्तस्यावस्थाभेदे, एकसङ्ख्यायाञ्च ।

भूमिका स्त्री० भूमिरिव कायति कै क । रचनायां 'अन्यरूपैर्यदन्यस्य प्रवेशस्तत्र भूमिकेत्युक्ते नाट्ये-अभिनेयपात्रादिवेषान्तरग्रहणे पात्रे-वक्तव्यकथोद्घाते, कव्यायाञ्च 'नैयायिकादिभिरात्मा प्रथमभूमिकाया-मवतारित इति सांख्यप्रवचनभाष्यम् ।

भूमिचम्पक पु० भूमिलग्नः चम्पकः शाक० । (भुइचांपा) वृक्षभेदे

भूमिज पु० भूमेर्जायते जन-ड । मङ्गलग्रहे, नरकासुरे, भूमिकदम्बे, मनुष्ये च । भूमिजातमात्रे त्रि० ।

भूमिजगुग्गुल पु० कर्म्म० । आशापुरजाते गुग्गुलौ ।

भूमिपिशाच पु० भूमौ पिशाच इव । तालवृक्षे ।

भूमिमण्ड पु० भूमिं मण्डयति मण्ड-अण् । (हापरमालि) लताभेदे ।

भूमिमण्डपभूषण स्त्री० भूमिं मण्डपइव भूषयति भूष-ल्यु । माधवीलतायाम् ।

भूमि (मी)रुह पु० भूम्यां भूमौ वा रोहति रुह-क । वृक्षे । भूरुहादयोऽप्यत्र । [णिच्-ल्यु । अत्रे वृक्षे ।

भूमिवर्द्धन पु० भूमिं वर्द्धयति स्वदेहस्यपार्थिवांशोपचयेन, वृक्ष

भूमिष्ठ पु० भूमौ तिष्ठति स्था-क अम्ब० षत्वम् । भूपृष्ठस्थे ।

भूमिस्पृश पु० भूमिं स्पृशति स्पृश-क्विप् । वैश्ये, मनुष्ये, चौरभेदे वृक्षे, अन्धे च ।

भूमीन्द्र पु० भूमौ इन्द्र इव। नृपे।
भूम्यामलकी स्त्री० भूमिलग्ना आमलकी शाक०। स्वनामख्याते क्षुपे
भूम्यामली स्त्री० भूम्या सह आमलति सम्बध्नाति आ+मल अच् गौ० ङीष्। भूम्यामलक्याम्।
भूयस् अव्य० भुवे भावाय यस्यति यस भावे क्विप्। पुनरर्थे।
भूयस् त्रि० अतिशयेन बहुः ईयसु नि० बहोर्भादेशः। बहुतरे। स्त्रियां ङीप्।
भूयिष्ठ त्रि० अतिशयेन बहुः इष्ठन् नि० भादेशः। बहुतरे प्रचुरेच।
भूयुक्ता स्त्री० भुवा युक्ता संबद्धा। भूमिखर्ज्जूर्य्याम्।
भूरि पु० भू-क्रिन्। विष्णौ, शिवे, इन्द्रे च। स्वर्णे न० प्रचुरे त्रि०।
भूरिगन्धा स्त्री० भूरिः प्रचुरो गन्धो यस्याः। सुरानामगन्धद्रव्ये।
भूरिगम पु० भूरि भारयुक्तत्वेऽपि बहु गच्छति गम-अच्। गर्द्दभे।
भूरिदुग्धा स्त्री० भूरीणि दुग्धानि निर्यासा यस्याः। दन्तिकाली।
भूरिपुष्पा स्त्री० भूरीणि पुष्पाण्यस्याः। शतपुष्प्राम्।
भूरिफेना स्त्री० भूरीणि फेनान्यस्याः। (चामकषा) सप्तलक्षे।
भूरिबला स्त्री० भूरीणि बलानि यस्याः पूव०। अतिबलायाम्।
भूरिमल्ली स्त्री० भूरि बहु यथा स्यात् तथा मलति मल-अच् गौरा० ङीष्। अम्लवेतसे।
भूरिमाय पु० भूरयः माया यस्य। शृगाले।
भूरिशस् अव्य० भूरि-शस्। बहुश इत्यर्थे।
भूरिश्रवस् पु० चन्द्रवंश्ये सोमदत्तसुते नृपभेदे।
भूरुण्डी स्त्री० भुवं रुणद्धति आच्छादयति रुडि आदृतौ (माधवदुर्गौ पठितः) अण्। (हातिशुंड़ा) हस्तभेदे।
भूर्ज्ज पु० भर्ज्ज-अच् ७त०। स्वनामख्याते वल्कप्रधाने वृक्षे। "भूर्ज्जत्वचः स्वर्णवर्तीर्दधाना" इति कुमारः।
भूर्ज्जपत्र पु० भुवि-भर्ज्जं पत्रं यस्य। स्वनामख्याते वृक्षे भूर्ज्जत्वचादयोऽप्यत्र।
भूर् पु० भू-रुक्। अन्तरीक्षलोकादधःस्थे चरणपञ्चारयोग्यस्थाने लोके।

भूलग्ना स्त्री० भुवि लग्ना । गङ्गपुष्प्राम् । [दयोऽप्यत्र ।
भूवदरी स्त्री० भुवि लग्ना वदरी । चुद्रकोल्याम् । भूमिवदर्या-
भूष मण्डने वा चु० उभ० पचे भ्वा० पर० सक० सेट् । भूषयति ते
भूषति अबूभुषत्-त अभूषीत् ।
भूषण न० भूष्यतेऽनेन भूष-करणे ल्युट् । अलङ्कारे किरीटादौ ।
भावे ल्युट् । भूषायाम् ।
भूषा स्त्री० भूष-अ । मण्डनक्रियायाम् ।
भूषित त्रि० भूष-क्त । अलङ्कृते ।
भूष्णु त्रि० भू-ष्णुच् । भवनशीले ।
भूस्तृण न० भुवस्तृणम् ष० तत्स० । भूतृणे ।
भृ भरणे भ्वा० उभ० सक० अनिट् । भरति-ते अभार्षीत् ।
भृ धारणे, पोषणे च जु० उभ० सक० अनिट् । बिभर्त्ति बिभृते
अभार्षीत् अभृत । बिभराभास-बभार । अयु भरथुः ।
क्विप् च । भृत्रिमः ।
भृकुंस (ग) पु० भ्रुवा कुंसा(शा) इङ्गितज्ञापनं यस्य ष० भुव;
संप्रसारणम् । स्त्रीवेशधारिणि नटे ।
भृकुटि(टी) स्त्री० भ्रुवः कुटिः भङ्गिः संप्रसारणं वा ङीप् ।
भ्रुभङ्गे । 'रचितभृकुटिबन्धं नन्दिना द्वारिरुद्धे इति हरविलासः ।
भृगु पु० भ्रस्ज्-कु पृ० । मुनिभेदे शिवे, शुक्रग्रहे, पर्व्वतसानौ, जम-
दग्नौ, उच्चप्रदेशे च । भृगोर्गोत्रापत्यम् अण् बहुषु लुक् ।
भृगोर्विंश्ये ब०व० । [हैहयपतितो हि तेन रक्षा कृता ।
भृगुपति पु० भृगूणां भार्गववंशस्य पतिः । परशुरामे, तेषां ।
भृगुसुत पु० ६त० । परशुरामे, शुक्राचार्य्ये च ।
भृङ्ग पु० भृ-गन् कित् नुट् च । भ्रमरे कलिङ्गविहगे, भृङ्गराजे,
जारे, भृङ्गारे, भृङ्गरोले च । अभ्रके, गुडत्वचि न० ।
भृङ्गजा स्त्री० भृङ्गादव जायते जन-ड । भार्य्यायाम् । अगुरुचन्दने न०
भृङ्गपर्णी स्त्री० भृङ्गादव लघ्वं पर्णं यस्याः ङीप् । क्षुद्रशैलजायाम् ।
स्वार्थे कन् । अत्रैव ।

भृङ्गप्रिया स्त्री० ६त०। माधवीलतायां प्रचुरमधुमत्त्वात् तत्प्रियत्वम्।
भृङ्गरज पु० भृङ्गान् रञ्जयति अन्तर्भूतण्यर्थे रन्ज–अच् ष्ट० नलोपः। भृङ्गराजे (केशुरिया)।
भृङ्गरजस् पु० भृङ्गान् रजयति अन्तर्भूतण्यर्थे रन्ज–असुन् नलोपः। भृङ्गराजे। [(केशुरिया)। क्षुपभेदे।
भृङ्गराज पु० भृङ्गान् रञ्जयति रन्ज–णिच्–कनिन् नि०। ६त०।
भृङ्गरिट(टि) पु० भृङ्गइव रटति अच्, इन वा ष्ट० अतद्गुणत्वम्। शिवपार्श्वचरभेदे।
भृङ्गरीट पु० भृङ्गइव रौति रु–क। (भीमरुल) ख्याते कीटभेदे।
भृङ्गवल्लभ पु० ६त०। धाराकदम्बे, भूमिकदम्बे च। भृङ्गइव वल्लभः। भूमिजम्ब्वाम् स्त्री०। [यूथिकलतायाम् (जुई)।
भृङ्गानन्दा स्त्री० भृङ्गान् आनन्दयति आ+नन्द्+णिच्–अच्।
भृङ्गाभीष्ट पु० अभि+इष क्त ६त०। आम्रवृक्षे।
भृङ्गार पु० बिभर्त्ति जलं भृ–आरक् नि०। स्वर्णमयजलपात्रे, जलपात्रभेदे च (झारी)। भृङ्ग इव वष्टक्ति वृ–अच्। भृङ्गराजे क्षुपभेदे, सुवर्णे च न०। झिल्लीनामकीटे स्त्री० गौरा० ङीष्। स्वार्थे कन्। तत्रैव।
भृङ्गि पु० भृ–गिक् नुट् च। शिवपार्श्वचरभेदे।
भृङ्गिन् पु० भृङ्ग अस्त्यर्थे इनि। शिवपार्श्वचरभेदे वटवृक्षे च।
भृङ्गी स्त्री० भृ–गन् कित् नुट् च गौरा० ङीष्। अतिविषायाम्।
भृङ्गीफल पु० भृङ्गया० अतिविषाया इव फलमस्य। आम्रातके।
भृङ्गेष्टा स्त्री० ६त०। घृतकुमार्याम्, भार्य्यां, तरुण्यां, काकजम्ब्वाञ्च
भृज भर्ज्जने भ्वा० आत्म० सक० सेट्। भर्ज्जते अभर्ज्जिष्ट। णिजन्तायां नेट् भृक्षः। [(भाजनाखोवा) भर्ज्जनपात्रभेदे।
भृज्जन पु० भर्ज्जयतेऽनेन भृस्ज–ल्युट् ष्ट० सं प्रसारणम्।
भृतक त्रि० भृ–क्त स्वार्थे कन्। वेतनेन कर्मकरे, "भृतकाध्यापकौ यत्ने"ति मनुः। [मूल्ये च।
भृति स्त्री० भृ–क्तिन्। भरणे, पोषणे च। करणे क्तिन्। वेतने,

भृतिभुज् त्रि० भृतिं वेतनं भुङ्क्ते भुज–क्विप्। वेतनोपजीविनि कर्मकरे
भृत्य पु० भृ–क्यप् तुक् च। दासे। भरणीये त्रि०। भावे क्यप्।
भरणे स्त्री० टाप्। 'कुमारभृत्याकुशलै"रिति रघुः।
भृ(भ्रं)मि पु० भ्रम–इन् पृ० वा संप्रसारणम्। (घूर्णी) वायुभेदे,
भ्रमणे च। "किंतु चक्रभ्रमिकारिता गुण" इति नैषधम्।
भृश अधःपतने दि० पर० अक० सेट्। भृश्यति। अभृशत् अभ-
शीत्। क्ता वेट्।
भृश्य न० भृश–क। अतिशये। तद्वति त्रि०।
भृष्ट त्रि० भ्रस्ज–क्त। जलोपसेकं विना वालुकाग्निसंयोगेन पक्वे
भृ भर्त्सने भर्त्सने भरणे च क्र्यादि० पृ० पर० सक० सेट्। भृणाति
अभारीत्। [भरण्डूकपर्य्यां स्त्री० ङीप्।
भेक पु० भी–कन् कस्य नेत्वम् (व्याङ) जन्तुभेदे, मेघे च।
भेकपर्णी स्त्री० भेकस्येव पर्णमस्याः ङीप्। भरण्डूकपर्य्याम्।
भेड पु० भी–ड तस्य नेत्वम्। मेषे, (भेड़ा)।
भेद् पु० भिद–घञ्। पृथक्करणे अन्यतो विशेषे, राज्ञां विपक्ष ग्राम-
नार्थं तत्पक्षीयामात्यादिभेदने, न्यायमतोक्ते अन्योन्याभावे च
यथा घटात् पटस्य भेदः (तादात्म्यानाभावः)।
भेदक त्रि० भिद–ण्वुल्। रेचके, विदारके, भेदकारके, विशेषणे च।
भेदन त्रि० भेदयति भिद–णिच् ल्यु। विरेचने, विशेषणे च क्लीबे
व्यञ्जनेतसे पु०न०। भिद–भावे ल्युट्। विदारणे।
भेदित त्रि० भिद–णिच–क्त। विदारिते, भिन्ने च। [यदि"त्यमरः।
भेद्य त्रि० भिद–ण्यत्। विदार्ये विशेष्ये च। "त्रिभ्यो भेद्यागमि
भेरि(री) स्त्री० भी–क्रि वङ्क्रा० नि० वा ङीप्। दुन्दुभ्याकायाम् पटहे
"रवः प्रगल्भाहतभेरिसम्भवः" इति कुमारः "स्तुत्युच्चलद्वत्तः ततः
शङ्खाश्च भेर्य्यश्चे"ति गीता।
भेल पु० भी–एलच् रस्य लः। नद्यादितारणार्थे प्लवे (भेला) ख्याते,
पदार्थे। स्वार्थे कन् तत्रैव। [चक्रि न हृस्वः।
भेष भये भ्वा० उभ० अक० सेट् भेषति ते अभेषीत् अभेषिष्ट।

भेषज न० भेष–घञ् भेषं रोगभयं जयति जि–ड । औषधे ।

भेषजाङ्ग न० ६त० । औषधस्य अनुपेये वस्तुनि ।

भैक्ष न० भिक्षैव तत्समूहो वा अण् । भिक्षायां, भिक्षासमूहे च ।

भैक्षचर्य्या स्त्री० चर–भावे ण्यप् ६त० । भिक्षाक्रियाकरणे ।

भैक्ष्य न० भिक्षाणां समूहः ष्यञ् । भिक्षासमूहे ।

भैमी स्त्री० भीमेनोपार्जितं तस्येदं वा अत्रण् ङीप् । माषगुल्लैका-कादश्याम्, भीमराजस्य पुत्र्यां दमयन्त्याञ्च । "विहाय भैमीम-पदर्पणा कथे"ति नैषधम् ।

भैरव न० भीरोरिदम् अण् । भये, तद्वति त्रि० । नाट्यादिप्रसिद्धे भयानके रसे । भयसाधने त्रि० स्त्रियां ङीप् । शङ्करे, तदवतार-भेदे रागभेदे, नदभेदे च पु० । शिवपत्न्यां स्त्री० ङीप् ।

भैषज्य न० भेषजमेव भिषजः कर्म वा ष्यञ् । औषधे ।

भो अव्य० भा डो । सम्बोधने ।

भोग पु० भुज–कर्मादौ घञ् । सुखे, सुखादुःखाद्यनुभवे, परस्य स्त्रीणां भाटकादिरूपे वेतने, सर्पस्य फणायां, तत्कायें, धने, पालने, आहारे च । अर्थ आद्यच् । सर्पे । आधारे घञ् । देहे, माने च । ज्योतिषोक्ते यहाणां तत्तद्राशिस्थितौ, भूम्यादिषु उत्पन्नद्रव्य-विनियोगे, यज्ञेष्टविनियोगे च "बन्धुनामविभक्तानां भोगं नैव प्रदापये"दिति स्मृतिः ।

भोगदेह पु० भुज्यते सुखदुःखादिकमत्र भुज–आधारे घञ् कर्म० । पुण्यपापफलभोगार्थे देहे, "प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते" इति स्मृतिः ।

भोगभूमि स्त्री० भोगस्यैव भूमिः स्थानम् । भारतवर्षातिरिक्ते वर्षे तत्र हि भोग एव न कर्म इति शास्त्रे स्थितम् ।

भोगवती स्त्री० भोगः सर्पशरीरं भूम्नाऽस्त्यस्याम् अतुप् मस्य वः । पातालगङ्गायाम् "भोगवती च पाताले" इति पुराणम् ।

भोगिन् स्त्री० भोग+अस्त्यर्थे इनि । सर्पे, नृपे, शासाध्यक्षे, नापिते च । भोगयुक्ते त्रि० । भोगवदादयः सर्पे । भोगयुक्ते त्रि० ।

भोगिवल्लभ पु० ६त० । चन्दने ।

भोगीन्द्र पु० भोगिनामिन्द्रः स्वामित्वात्, भोगी इन्द्र इव वा, अनन्त-देवे वासुकौ च भोगीशादयोऽप्यत्र ।

भोग्य न० भुज-ण्यत् कुत्वम् । धने, धान्ये च । भोगार्हे त्रि० । भोगार्हस्त्रियां, वेश्यायाञ्च स्त्री० ।

भोज पु० भुज-अच् । स्वनामख्याते देशभेदे धारापुरस्थ नृपभेदे धन्यः श्रीभोजराजस्त्रिभुवनविजयी"त्युद्भटः ।

भोजकट पु० भोजाख्ये देशे ।

भोजन न० भुज-ल्युट् । कठिनद्रव्यस्य गलविलाधः संयोजने ।

भोज्य त्रि० भुज-ण्यत् भक्षणार्थत्वात् कुत्वम् । भक्षणीयद्रव्यमात्रे ।

भोटाङ्ग पु० (भोटान) देशभेदे ।

भोस् अव्य० भा-डोसि । सम्बोधने, प्रश्ने विषादे च ।

भौतिक त्रि० भूतानि पृथिव्यादीनि पिशाचान् वा अधिकृत्य जातानि ठक् । भूताधिकारेण जाते उपद्रवे व्याध्यादौ ।

भौम पु० भूमेरपत्यं तस्या इदं वा अण् । नरकासुरे "त्वयि भौमं गते जेतु"मिति माघः । मङ्गलग्रहे च । भूमिभवे त्रि० ।

भौमरत्न न० भौमप्रियं रत्नं शाक० । प्रवाले ।

भौमिक त्रि० भूमौ अधिकृतः ठक् । भूम्यधिकारिणि ।

भौरिक त्रि० भूरिणि स्वर्णे अधिकृतः ठन् । स्वर्णाध्यक्षे ।

भ्यस भये भ्वा० आ० अक० सेट् । भ्यसते अभ्यसिष्ट ।

भ्रण शब्दे भ्वा०पर० सक० सेट् । भ्रणति अभ्राणीत् अभ्रणीत् ।

भ्रकुं(श)स पु० भ्रुवा कुं(शा)सा यस्य ब० वि० । भ्रकुंसशब्दार्थे ।

भ्रकुटि(टी) स्त्री० भ्रुवः कुटिर्भङ्गः ष० वा ङीप् । भ्रूभङ्गे ।

भ्रम चलने भ्वा० पर० सक० सेट् । भ्रमति अभ्रमत् अभ्रमीत् ।

भ्रम चलने दिवा० पर० सक० सेट् श्यमा० । भ्राम्यति अभ्रमीत् ।

भ्रम चलने, भ्वा० पर० अक० सेट् । भ्रमति अभ्रमीत् कर्त्रा०

भ्रमतः बभ्रमतुः । चङि नच्छसः । ज्वला० भ्रमः भ्रामः ।

भ्रम पु० भ्रम-घञ् । मिथ्याज्ञाने (अन्यथाभूतस्य वस्तुनोऽन्यथारूपेण

स्नाने) जलनिर्गमस्थाने, कुन्दे, (कुंद) भ्रमणे च ।

भ्रमर पु० भ्रम-करन् । मधुकरे ।

भ्रमरक पु० भ्रमर इव कायति कै-क । ललाटलम्बिते भ्रमरतुल्ये चूर्णकुन्तले । स्वार्थे कन् । भ्रमरे, पुष्पे, बालमधिकायाञ्च ।

भ्रमरप्रिय पुं० ई त० । धाराकदम्बे ।

भ्रमरातिथि पु० भ्रमरः अतिथिर्यस्य । चम्पके ।

भ्रमरानन्द पु० भ्रमरान् आनन्दयति आ-नन्द-णिच्-अच् । वकुले ।

भ्रमरालक पु० भ्रमर इव अलति पर्य्याप्नोति अल-खुल् । ललाटस्थिते भ्रमरतुल्ये चूर्णकुन्तले ।

भ्रमरी स्त्री० भ्रम-करन् गौ० ङीष् । जतुकायां भ्रमरभार्य्यायाञ्च ।

भ्रमरेष्ट पु० ई त० । श्योनाकवृक्षे । भार्य्यां भूमिजम्बुञ्च स्त्री० ।

भ्रमरोत्सवा स्त्री० भ्रमराणामुत्सवो मोदोयत्र । माधवीलतायाम् ।

भ्रश अधःपतने दि० पर० सक० सेट् । भ्रश्यति अभ्राशीत् अभ्रशीत् । क्त्रा वेट् ।

भ्रष्ट त्रि० भ्रश-क्त । च्युते अधःपतिते ।

भ्रस्ज पाके तु० उ० सक० अनिट् । भृज्जति अभ्राक्षीत् । बभर्ज-बभ्रज्ज

भ्राज दीप्तौ भ्वा० आत्म० कण्ड्वा० अक० सेट् । भ्राजते अभ्राजिष्ट भेजे बभ्राजे । चङि वा ह्रस्वः । अभ्रु भ्राजशुः ।

भ्राजिष्णु त्रि० भ्राज-इष्णुच् । दीप्तिशीले ।

भ्रात पु० भ्राज-क्तच् पृ० । एकपितृजाते (भाई) इति ख्याते स्वसृसहोत्थौ । भ्रातृभगिन्योः द्वि०व० ।

भ्रातृज पु० भ्रातुर्जायते जन-ड । भ्रातुष्पुत्रे । तत्कन्यायां स्त्री० ।

भ्रातृव्य पु० भ्रातुः पुत्रः भ्रातृ+व्यत् भ्रातुष्पुत्रे, शत्रौ च ।

भ्रातृश्वशुर पु० भ्रातापि पत्युर्ज्येष्ठभ्रातापि श्वशुरस्थानीयस्तत् । पितृतुल्यत्वात् । (भासुर) भर्तुर्ज्येष्ठभ्रातरि 'भर्तृश्वशुरता ज्येष्ठे' इति भारतान्तरम् ।

भ्रात्रीय पु० भ्रातुरपत्यमिदं वा छ । भ्रातुष्पुत्रे भ्रातृसम्बन्धिनि त्रि० ।

भ्रान्त न० भ्रम-भावे क्त । भ्रमणे 'जनस्थाने भ्रान्तमि'ति नाटकम् ।

कर्त्तरि क्त । मिथ्याज्ञानयुक्ते, भ्रमणयुक्ते च त्रि० । धुस्तूरे पु० ।

भ्रान्ति स्त्री० भ्रम-क्तिन् । भ्रमणे, अयथार्थज्ञाने च ।

भ्रान्तिमत् पु० अलङ्कारोक्ते अर्थालङ्कारभेदे ।

भ्रामक त्रि० भ्रामयति भ्रम-ण्वुल् । घृष्टगाले, धूर्त्ते, सूर्य्यावर्त्ते मणौ, अयस्कान्ते प्रस्तरे च ।

भ्रामर न० भ्रमरेण संस्कृतं सम्पादितम् अस्येदं वा अण् । मधुनि । भ्रमरसम्बन्धिनि त्रि० । अयस्कान्ते पु० । 'भ्रामरं रूपं कृत्वासंख्येयषट्पद' मित्युपक्रम्य 'भ्रामरीति च मां लोका" इति चण्डीप्रस्तुते चण्डीमूर्त्तिभेदे ।

भ्राग् भासे भ्वा० प० कण्ठ्या० अक० सेट् । भ्राग्यति भ्राग्यते अभ्राग्यिष्ट । भ्रेगे बभ्राग्ये । चङि न ह्रस्वः । अभ्रुभ्राग्युः ।

भ्राष्ट्र न० भ्रस्येदं तत्पचनसाधनत्वात् (भाजनाखोला) भर्ज्जनपात्रभेदे । अष्टुरिदम् अण् । भ्राष्ट्रमित्यप्यत्र ।

भ्रास दीप्तौ भ्वादिवत् सर्वम् ।

भ्री भये अक० भरणे सक० क्र्या० वा पृ० पर० अनिट् । भीणाति भिणाति अभ्रैषीत् ।

भ्रुड संवरणे सक० संघाते अक० तु० कु० पर० सेट् । भ्रुडति अभ्रुडीत् ।

भ्रु(भ्रू)कुंस पु० भ्रुवः कुंसा यस्य ष० वा ह्रस्वः । भ्रुकुंसवत् ।

भ्रु(भ्रू)कुटि ईत० । ष० वा ह्रस्वः । भ्रुकुटिवत् सर्वम् ।

भ्रू स्त्री० भ्रम-डू । नेत्रयोरुर्द्ध्वस्थायां रोमराजौ ।

भ्रूक्षेप पु० ईत० । भ्रूभङ्गे सङ्केतज्ञापनाय भ्रुवोस्तिर्य्यक्चालने 'भ्रूक्षेपमात्रानुमितप्रवेशामि"ति कुमारः । [भ्रुणत ।

भ्रूण आशायां विघङ्कायाञ्च पु० आत्म० सक० सेट् । भ्रूणयते अभ्रुभ्रूण पु० भ्रूण-घञ् । स्त्रीणां गर्भे, बालके च ।

भ्रूणघ्न त्रि० भ्रूणं गर्भं हन्ति हन-क । भ्रूणहत्याकारके । क्विप् भ्रूणहाप्यत्र ।

भ्रूभङ्ग पु० ईत० । क्रोधादिज्ञापनार्थं भ्रुवस्तिर्य्यक्चालने "भ्रूभङ्गदुष्प्रेक्षसख्य तस्ये"ति कुमारः ।

भ्रेज भासि भ्वा० आत्म० अक० सेट्। भ्रेजते अभ्रेजिष्ट। चङि न ह्रस्वः।

भ्रेष(ङ्ग्लेष) पतने चलने च अक० भ्वा० उभ० सेट्। भ्रेष(ङ्ग्लेष)ति ते अभ्रेष(ङ्ग्लेष)ीत् अभ्रेष(ङ्ग्लेष)िष्ट। चङि न ह्रस्वः।

भ्रेष पु० भ्रेष-घञ्। उचितस्थानात् पतने।

भ्लक्ष भक्षणे भ्वा० उभ०सक० सेट्। भ्लक्षति ते। अभ्लक्षीत्। अभ्लक्षिष्ट। दुर्गमते भ्लक्षधातुरयम्।

भ्लाश दीप्तौ वा दि० पक्षे भ्वा० आ० अक० सेट् कण्ठ्य०। भ्लाश्यते भ्लाशते अभ्लाशिष्ट भ्लेशे बभ्लाशे। (अशु) भ्लाशयुः। बोपदेवमते भ्लाशधातुरयम्।

म

म पु० मा क। चन्द्रे, शिवे ब्रह्मणि, यमे समये, मधुसूदने च शिवे कलन्तमकारोऽपि 'मकारस्तु महेश्वर" इति प्रणवान्तर्गतमकारार्थोक्तेः

मक भूषे गतौ च भ्वा० आ० सक० सेट् दृदित्। मक्कते अमक्किष्ट।

मकर पु० मनुष्यं क्षणाति क्षिनस्ति कृ-अच् ष्ठ०। जलजन्तुभेदे। मकराकारत्वात् मेषादितो दशमे राशौ च। मकि-घञ् पु० तं राति-रा-क। निधिभेदे। [कर्णभूषणे।

मकरकुण्डल पु० मकराकृति कुण्डलं कर्णभूषणम्। मकराकृतौ

मकरकेतन पु० मकरः मकरचिह्नितः केतनो ध्वजो यस्य। कन्दर्पे मकरकेतुप्रभृतयोऽप्यत्र।

मकरन्द पु० मकरमपि द्यति कामजनकत्वात् दो-अवखण्डने क पृ० ह्रस्वः। पुष्पमधौ, कुन्दवृक्षे च। किञ्जल्के न०।

मकरन्दवती स्त्री० मकरन्द+बाहुल्ये मतुप् मस्य वः ङीप्। पाटलायाम्। मधुविशिष्टे त्रि०। [करञ्जभेदे।

मकराकार पु० मकरस्येवाकारः फलस्य यस्य। (काठाकरमचा)

मकरालय पु० ईत०। समुद्रे। मकराधाराद्योऽप्यत्र।

मकुट न० मकि+भूषणे उट पृ०। शिरोभूषणे मुकुटे।

मकुरपु० मकि-उरच् पृ० दर्पणे, वकुलवृक्षे, कुलालदण्डे, मल्लिकायाञ्च
मकुल पु०न० मकि—उलच् पृ० । सुकुले, वकुलवृक्षे च ।
मकुष्टक पु० मकि-भूषायां उ—पृ० मकुं भूषां स्यति प्रतिरुन्धि स्क—अच् सुधागा० पत्वम् । वनसुद्गे (सुगानि) ।
मकुष्ठ पु० कुत्सितं तिष्ठति स्था—क अम्बष्ठा० षत्वम् मीयते मा—ड कर्म० । व्रीहिभेदे, वृद्धुगामिनि त्रि० । स्वार्थे कन् । वनसुद्गे ।
मकूलक पु० मकि—ऊलच् पृ० दन्तीवृक्षे, सुकुले च ।
मक्क गतौ भ्वा०आ०सक० सेट् । मक्कते अमक्किष्ट ।
मक्कुल न० मक्क—उलच् । शिलाजतुनि ।
मक्ष रोषे संघाते च भ्वा०पर०अक० सेट् । मक्षति अमक्षीत् ।
मक्षवीर्य्य पु० मक्षं संहतं वीर्य्यं यस्मात् ५ब० । प्रियालवृक्षे ।
मक्षि(क्षी)का स्त्री० मक्ष—कन् टाप् अत इत्वम् पृ० वा दीर्घः । (माछि) कीटभेदे । [सिक्थकाधारे पदार्थे (मौचाक) ।
मक्षिकासन पु० ६त० मक्ष सिकन् तया आस्तेऽत्र ल्युट् ।
मख सर्पणे भ्वा०पर०सक० सेट् । मखति अमाखीत् अमखीत् ।
मख सर्पणे भ्वा०पर० सक० सेट् इदित् । मङ्खति अमङ्खीत् ।
मख पु० मख-घ । यज्ञे । [मूलजे फलभेदे ।
मखान्न न० मखकाले भोज्यमन्नं सुन्यसत्त्वात् । (माखना) जलजाते
मग सर्पणे भ्वा०पर०सक० सेट् इदित् । मङ्गति अमङ्गीत् ।
मगध पु० मङ्गयते अधोगम्यतेऽनेन मगि—अच् पृ० मगं दोषं पापं वा दधाति धा—क । देशभेदे । तद्देशस्थे जने ब०व० ।
मगधोद्भवा स्त्री० मगधदेशे बाहुल्येनोद्भवति अच् । पिप्पल्याम् तद्देशप्रचुरभवत्वात्तथात्वम् ।
मघ कैतवे, द्यूतक्रीडादौ अक० गतौ निन्दायां आरम्भे च सक०भ्वा० आ० सेट् इदित् । मङ्घते अमङ्घिष्ट ।
मघ भूषणे भ्वा०पर०सक० सेट् इदित् । मङ्घति अमङ्घीत् ।
मघवत् पु० मघ—मत्वर्थे क पृषो० घः मघः पूजा अस्त्यर्थे मतुप् मस्य वः । इन्द्रे मघवन्तौ मघवतः । तत्पत्न्यां ङीप् मघवती ।

मघवन् पु० मह—कनिन् नि० । इन्द्रे मघवा मघवानौ बहवः । —तत्पत्न्यां स्त्रीत्व ङीष् मघोनी ।

मघा स्त्री० मह—क्विप् दीर्घश्च । सप्तविंशतिधिष्ण्ये दक्षजे दक्षाख्य पञ्चतारात्मकत्वात् बहुत्वमपि "पितरः स्मृत्यन्वयसङ्काश्च मघास्वेति" स्मृतिः । मघां मूलस्य वर्ज्जये"दिति मघाशब्दं मिश्रदानमेति स्मृतिस्तु सप्तदशर्क्षत्वाभिप्रायेण ।

मघात्रयोदशी स्त्री० मघानक्षत्रेण युक्ता त्रयोदशी । भाद्रशुक्लयोदश्यां तत्रैव मघानक्षत्रसंयोगसम्भवात् "प्रौष्ठपद्यामतीतायां मघायुक्ता त्रयोदशी"ति स्मृतिः ।

मघवी पु० मघानक्षत्रे भवः अण् ङीप् पु० वृद्धः ङीष् । मघानक्षत्रस्थ रविभुज्यमानभुक्ते कालेऽतिवृष्ट्यादौ जायमाने (आशु)धान्ये

मङ्कुर पु० मङ्कि—उरच् । दर्पणे ।

मङ्कु अव्य० मङ्कि—उन् धैर्य्ये लक्षार्थे च । पु० खञ्जे खलमपि ।

मङ्गल पु० मगि—अलच् । भूमिसुते, मङ्गभेदे मङ्गले अभीष्टार्थसिद्धौ च । तद्वति त्रि० । दुर्गायां, हरिद्रायां, दूर्वायां, पतिव्रतायाञ्च स्त्री०

मङ्गलचण्डिका स्त्री० मङ्गलवारे पूज्यायां चण्डिकायां दुर्गाभेदे ।

मङ्गलच्छाय पु० मङ्गला प्रभवला छाया यस्य । पटदृषे ।

मङ्गलपाठक पु० मङ्गलार्थं स्तुतीः पठति पठ—ण्वुल् । स्तुतिपाठके "आद्यामङ्गलपाठक ! शैवूषापवहे"ति मेघीसंहारः ।

मङ्गलप्रदा स्त्री० मङ्गलं प्रददाति प्र+दा—क । हरिद्रायाम् ।

मङ्गल्य न० मङ्गलाय हितं यत् । चन्दने, मङ्गलागुरुणि, स्वर्णे, सिन्दूरे, दधनि च । दधिरे मङ्गलकरे च त्रि० । "सर्वमङ्गलमङ्गल्ये" इति भवानी । कार्पासे, बिल्वे, जीरके, मङ्गलके, नारिकेले, कपित्थे, दीप्ताकरञ्जे, त्रायमाणौषधे च पु० ।

मङ्गल्यक पु० मङ्गल्यपङ्क्ति प्रियः तद्दोषनिवारणार्थं दीर्घमानत्वेन शास्त्रविधानात् । मङ्गुरे ।

मङ्गल्यकुसुमा स्त्री० मङ्गल्यं कुसुमं यस्याः । शतपुष्पायाम् ।

मङ्गल्या स्त्री० मङ्गलाय हिता यत् । जीवन्त्यां, मल्लिकागन्धवृक्षाश्वरचि, रोचनायाम्, अवाक्पुष्प्याम्, गव्यां शुक्लवचायां, शिवङ्क्षौ, माष-पर्ण्यां, शतपुष्प्याम्, ऋद्धिनामौषधौ, कुरिण्टायां, दूर्वायां, दुर्गा-यां च स्त्री० ।

मच दम्भे यात्रे च अक० भ्वा० आ० सेट् कुटिल् । मञ्चते अमञ्चिष्ट

मच उच्छ्रायकरणे, धारणे, पूजायां च सक० दीप्तौ अक० भ्वा०आत्म० सेट् कुटिल् । मञ्चते अमञ्चिष्ट ।

मञ्चर्चिका स्त्री० चर्च–धात्वर्थनिर्देशे ण्वुल् मञ्च इवोरिव चर्चिका ध्यानम् । प्रमस्ते । अव्युत्पन्नोऽवमित्यके ।

मज्जज्ञत् न० मज्जानं करोति ज्ञ–क्विप् । देहस्थे अस्थिरूपे कोशे अन्नादिषु भुक्तेषु रसादिपरिपाकेन क्रमेण शोणितमांसत्वगस्थि-मज्जशुक्राणामुत्पत्तेः अस्थ्नः मज्जाज्ञत्वम् ।

मज्जन् पु० मस्ज–कनिन् । अस्थिजाते अस्थिमध्यस्थे स्नेहाकारे पदार्थे, इन्द्रादेः सारांशे च ।

मज्जन न० मस्ज–ल्युट् । स्नाने ।

मज्जप्रसूभव न० मज्जः प्रसूयते प्र+सू+भू–अच् ऊ० । शुक्रे तस्य मज्जजातत्वम् मज्जज्ञच्छब्दे द्रष्टव्यम् ।

मज्जा स्त्री० मस्ज-अच् टाप् । अस्थिसारे इन्द्रादेः सारांशे च ।

मज्जाज न० मज्जातो जायते जन–ड । भूमिजे गुग्गुलौ ।

मज्जारस पु० मज्जायाः रसः परिपाकः । शुक्रे तस्य मज्जासम्भवत्वं मज्जज्ञच्छब्दे उक्तम् ।

मञ्च पु० मचि–उच्छ्राये घञ् । खट्वायाम् (मांचा) वंशनिर्मिते उच्चासने उच्चमञ्चपभेदे "मञ्चस्थं रघुनन्दनमि"ति पुराणम् । स्वार्थे कन् । "तत्रैव दृष्ट्वोऽन्धः पतितेव मञ्चकगतः" इति सा०द० ३प० ।

मञ्जर पु० मनृज–अरच् । तिलकवृक्षे, मुक्तायाञ्च ।

मञ्जरि(री) स्त्री० मञ्जु अञ्चति अच–इनि–ग्लक० पर० वा ङीष् । अभिनवोद्गतायां सुकुमारायां पल्लवाङ्कुरूपायां वल्लर्याम् ङीवन्तस्तु तत्र, मुक्तायां, तिलकलतायां, तुलस्याञ्च ।

मञ्जरीनम्र पु० मञ्जर्यै व तदवस्थावाचिषि नम्रः । वेतसे ।
मञ्जि(ञ्जी) स्त्री० मनृज–क्विप् वा ङीष् । मञ्जर्याम् ।
मञ्जिफला स्त्री० मञ्जिः मञ्जरी फले यस्याः । कदल्याम् ।
मञ्जिष्ठा स्त्री० अतिशयेन मञ्जिमती दृढम् । अनालक्ष्यातावां लतायाम्
मञ्जीर न० मनृज–ध्वनौ ईरन् । नूपुरे, "मञ्जुमञ्जिमञ्जीरे कलमञ्जीरे"
इति सा० १०प० । दधिमण्डमण्डवमद्यखण्डे च ।
मञ्जु त्रि० मनृज–उन् । मनोहरे ।
मञ्जुघोष पु० तन्त्रोक्ते उपास्यदेवभेदे ।
मञ्जुल त्रि० मनृज–उलच् । मनोहरे, निकुञ्जे शैवले च न० ।
मञ्जूषा स्त्री० मनृज–ऊषन् । (पेटरा) पेटिकायाम् मञ्जिष्ठायाञ्च ।
मट वाहे भ्वा०पर०सक० सेट् । मटति अमटीत् अमाटीत् ।
मटची स्त्री० मट–अचि ङीप् । प्रायाणयष्टौ "मटचीरुद्गृह्णीयु कुरुञ्चि"ति
छान्दोग्यश्रुतिः ।
मठ वाहे सक०भर्त्सने सक०भ्वा०पर०सेट् । मठति अमठीत्-अमाठीत् ।
मठ आध्याने आ० सक० सेट् दृदित् । मठते अमठिष्ट ।
मठ पु० मठत्यत्र मठ–घञर्थे क । आत्मादयावासे, देवागारे, मन्त्रीरथे च
मड मोदे पु०उभ०अक० सेट् दृदित् । मण्डयति-ते अममण्डत्-त ।
विभाषे भ्वा० आत्म० मण्डते ।
मड भूषणे चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् दृदित् । मण्ड-
यति ते मण्डति अममण्डत्-त अमण्डीत् ।
मण्ड पु० मडि–क्नु पृ० नलोपः । धान्यभेदे (मेडुया) ।
मण्डु पु० मण्डन्ति अत्र यद्वा अत्र मण्ड+उ पृ० । वाद्यभेदे (विपुल-
डमरौ) । स्वार्थे मनृ अत्रैव ।
मण्ड अध्ययनयज्ञे भ्वा०प०अक० सेट् । मण्डति अमाण्डीत् अमण्डीत् ।
मणि(णी) पु०स्त्री० मण-इन् स्त्रीत्वपक्षे वा ङीष् । "अनुकादौ रत्ने
"मणिकारावलिरामणीयकमिति, अपणीलमणीन्दृत्विमेति च"
नैषधम् अलक्तकपात्रभेदे अलिञ्जरे (जाला) शिक्याधे, नागभेदे
मणिबन्धे च । स्वार्थे कन् अलिञ्जरे न० ।

मणिकर्णिका स्त्री० मणिवत् कर्णोऽस्याः मणिसदृशकर्णभूषणयुक्तत्वात् ठन् विष्णुतपस्यादर्शनात् विष्णुना शिवस्य मणिसदृशकुण्डलयुक्तकर्णस्थाने कार्योऽत्र तीर्थभेदे ।

मणिकार पु० मणिमयं भूषणं करोति क्र—अण् । (ऊ.झरि) मणिसदृशभूषणकारके प्रसङ्गादिचन्द्रः कस्यचिद्ब्राह्मणस्यार्थं चिन्तामणिनामकमन्त्रकारे गङ्गोपाध्याये च ।

मणिकूट पु० मणीनां कूट इव मणिप्रचुरं कूटं शृङ्गं यस्य । उत्तरदेशस्थे पर्वतभेदे । [आर्क्षीजन्मनि च ।

मणिच्छिद्रा स्त्री० मणिरिव छिद्रमस्यात् । भेदानामौषधे, अम०

मणित न० मण—क्त । रतिकाले स्त्रीणामव्यक्तशब्दभेदे ।

मणिद्वीप पु० मणिमयः मणिप्रचुरः द्वीपः । क्षीरसमुद्रमध्यस्थे श्वेते द्वीपभेदे ।

मणिपर्वत पु० ६त० । पर्वतभेदे ।

मणिपूर न० मणिभिरिव पूर्यते प्रचुरद्वीप्तिमत्त्वात् । तन्त्रोक्ते नाभिदेशस्थे दशदलपद्मान्तर्गते पद्माकारे चक्रभेदे ।

मणिबन्ध पु० मणिर्बध्यतेऽत्र बन्ध—घञ् । प्रकोष्ठस्यार्वाग्भागस्थे करभागे, वैद्यकसमयाकरे पर्वतभेदे च ।

मणिभूमि स्त्री० ६त० । मणीनामाकरे । [मणिद्वीपे ।

मणिमञ्जुप पु० मणिमयः मणिप्रचुरः मञ्जुपः । मणिखचिते

मणिमन्थ पु० मणिर्मथ्यते निःसार्यतेऽस्मात् मन्थ—अपादाने घञ् । पर्वतभेदे । स कारणत्वेनास्यास्त्य च् । वैद्यकसमये तस्य मणिमन्थ (मन्थ) विन्ध्यदेशान्तिकस्थपर्वतजातत्वात् ।

मणिमाला स्त्री० ६त० । मणीनां माला । हारभेदे दन्तजातिभेदे, दीप्तौ, ब्रह्मण्याम् । पु० ।

मणिराग न० मणेरिव रागो वर्णोऽस्य । सिन्दूरे । ६त० । मणिवर्णे

मणिवीज पु० मणय इव बीजान्यस्य । दाडिमे ।

मणिसर पु० मणीन् सरति सारयत्यनेन मण्यति स्तु—अच् । मणिखचिते हारभेदे ।

मण्ड पु०न० मण्ड-ड तस्य नेत्वम् । सर्वौषधसमपरसे, (माड) सारे, पिण्डे च । आसवक्वाथे, सुरायाञ्च स्त्री० । दधिमण्डे (दारु) न० । एरण्डवृक्षे, शाकभेदे, भूषायां च पु० ।

मण्डक पु० मण्ड-एवुल् । पिष्टकभेदे । [वाच्० न० ।

मण्डन पु० मण्डयति मण्ड-ल्यु । अलङ्कारके । भावे ल्युट् । भूषा-

मण्डप पु० न० मण्ड-घञ् मण्डं भूषां पाति रक्षति पा-क मण्ड-कन् वा । जनसन्निवासस्थाने, देवादिगृहे च । तथा च पञ्चीमण्डपः विष्णुमण्डपस्त्यादि । मण्डपवासकर्त्तरि त्रि० । निम्बायां (नुर्ग-निम्बभेदे) स्त्री० ।

मण्डल न० मण्ड-कलच् । चक्राकारेण वेष्टने, तथा सूत्रमण्डलं भू मण्डलम् चतुः शतयोजनमिते-देशभेदे, मण्डलाकारेण विस्तृते पदार्थे, ज्योतिश्चक्रोक्ते, गोले, समूहे "अर्कमण्डलमण्डल" मिति गोपदेवः चक्रे, "मण्डलाकारपादाढ्यं मण्डलं स्थानमीरित" मित्युक्ते धनिनां स्थानभेदे मण्डलं वर्त्तोऽस्ति" रित्युक्ते वैद्यव्यूहभेदे, अस्त्रिमरेखाविशेषेण रचिते पदार्थे च यथा चक्रमण्डलं सर्वतोभद्रमण्डलमित्यादि । विम्बे त्रि० स्त्रियां स्त्री० ङीष् । सा गण्डदूर्वायाञ्च कुक्कुरे वर्णभेदे च पु० । ततः स्वार्थेकन् । विम्बे, कुष्ठभेदे, आदर्शे मण्डलाकारे, व्यूहे कुक्कुरे च पु० ।

मण्डलनृत्य न० मण्डलाकारेण नृत्यम् । चक्राकारेण परिभ्रमण-रूपे नृत्ये ।

मण्डलपत्रिका स्त्री० मण्डलाकारं पत्रमस्याः । रक्तपुनर्नवायाम् ।

मण्डलाधीश पु० मण्डलस्य देशविशेषस्याधीशः । मण्डलेश्वरे चतुः शतयोजनमितदेशाधिपे ।

मण्डलिन् पु० मण्डलं कुण्डलमस्यास्ति इनि । सर्पे, विडाले वटवृक्षे च ।

मण्डित त्रि० मण्ड-क्त । भूषिते ।

मण्डूक पु० मण्डयति वर्णसमूहं मण्ड-ऊक । भेके, शोधके, । मद्यभेदे च ।

मण्डूकपर्णी पु० मण्डूक इव पर्णमस्य । शाकभेदे, शोधके च ।

मल्लिकायां स्त्री० टाप् ङीष् वा । मल्लिका (वासन्तीलता) स्त्री० ओषधिभेदे (गुलकुड़ी) च स्त्री० ङीष् ।

मल्लूकी स्त्री० मल्लूक इव मल्लमल्लस्य अच् गौरा० ङीष् । मल्लिकायाम् आदित्यभक्तायां, द्राक्षायाम्, ओषधिभेदे, प्रगल्भनायिकायां, मल्लूकवोषिति स्त्री० ङीष् ।

मल्लूर न० मल्लि-ऊरच् । लौहमले । [(लोहियमला)

मल्होदक न० मल्लस्योदकम् । आतपतप्तलूर्णमिश्रितजले

मद त्रि० मद-क्त । मत्ते, अभिप्राये, ज्ञाने, अर्चिते च । भावे क्त । मत्तौ, अभिप्राये, ज्ञाने, अर्चायाञ्च न० ।

मदङ्क पु० माद्यति अनेन मद-अङ्कच् दस्य तः । मेषे, क्षुद्रभेदे च ।

मदङ्कज पु० मदङ्कात् अधेर्जातः अण-ड । गजे ।

मदन्तिका स्त्री० मदं मदिष्यति मूर्धयति खुक् पृ० । प्रथमे अव्युत्पन्नोऽवस्थाभेदे । [शाकभेदे च ।

मति स्त्री० मद-भावे क्तिन् । ज्ञाने, दृष्टान्ते, स्तुतौ च । क्तिच् ।

मतिदा स्त्री० मतिं द्यति दो-क । ज्योतिष्मतीलतायाम् । (गिलुडी) ।

मतिभ्रंश पु० मतेर्भ्रंशः अयथार्थविषयत्वेन भ्रमणम् । बुद्धिभ्रंशे भ्रान्तौ ।

मतिविभ्रम पु० मतिं बुद्धिं विभ्रमयति वि+भ्रम-णिच् अण् । उन्मादरोगे, ।

मत्कुण पु० मद-क्विप् स्वार्थे कन् । मत्कुणे (खटमल) मत्तेदम् कन् । मत्तसम्बन्धिनि "नैतन्मात्तं मत्कुणि"ति भट्टि. ।

मत्कुण पु० मद-क्विप् कुत्सितं कुत्स-अच् कर्म० । कीटभेदे (खटमल) ।

मत्कुणारि पु० ६त० । (खिट्टि) भक्षणात् तत्सम्बन्धेन हि तस्य नाशः

मत्त पु० मद-क्त । दुर्दुरे गजे । धत्तूरे, मदयुक्ते, हृष्टे च त्रि० ।

मत्तकाशि(शी)नी स्त्री० मत्तेव क्षीवेव काशते कवति नशति वा णिनि पृ० ह्रस्वः । उन्मत्तयोषिति, स्त्रीमात्रे च ।

मत्तमयूर पु० मत्तो मयूरो यत्र । मेघे, छन्दोभेदे च ।

मत्तवारण पु० कर्म० । मत्तहस्तिनि । मत्तं वारयति वृ–णिच्ल्यु । प्रासादवरण्डे न० । (वारेण्डा) ।

मत्तालम्ब पु० मत्तैरालम्ब्यते आ+लबि–घञ् । (वारेण्डा) प्रासादवरण्डे ।

मत्स्य शुद्धभावयो पु० आ० सक० सेट् इदित् । मत्स्यते अमत्स्यन्त ।

मत्सर पु० मद–सरन् । अन्यशुभद्वेषे, परसम्पत्त्यसहने, क्रोधे च –तस्य इति, अपत्ये च ञि० । मत्सरिणी स्त्री० । [मत्सी ।

मत्स्य पु० मद–स्यन् । जलजन्तुभेदे (माछ) जातौ स्त्रियां ङीप् ।

मत्स्यकरण्डिका स्त्री० मत्स्यानां करण्डिकेवाधारः । (खालुइ) मत्स्यरक्षणाधारे पात्रभेदे । [जलपिप्पल्याञ्च ।

मत्स्यगन्धा स्त्री० मत्स्यस्येव गन्धोऽस्याः । व्यासमातरि, सत्यवत्याम्,

मत्स्यण्डी स्त्री० मन्दं खण्डते अच् ड० । खण्डविकारे (मिछरि) स्वार्थे कन् । अत्रैव ।

मत्स्यधानी स्त्री० मत्स्या धीयन्तेऽस्यां धा–ल्युट् ङीप् । मत्स्यरक्षणाधारे (खालुइ) पात्रभेदे । [एतन्नाम् (कटकी)

मत्स्यपित्ता पु० मत्स्यस्य पित्तमिव रसोऽस्यस्याः अच् । कटुरोहि–

मत्स्यरङ्ग पु० मत्स्येन रज्यते रञ्ज–कर्त्तरि संज्ञायां घञ् । (माछरांगा) पक्षिभेदे त्रिभुवनविहितो हा मत्स्यरङ्ग इत्युद्घटः ।

मत्स्यराज पु० ६त० । रोहितमत्स्ये ।

मत्स्यविद्धा स्त्री० विद–क्त आभे क्तः मत्स्योमत्स्यारसो विद्धो यया तुल्यतिक्तत्वात् । कटुक्याम् ।

मत्स्यवेधन न० मत्स्यो विध्यतेऽनेन विध–ल्युट् । वडिशे स्त्रीत्वमपि ङीप् । मत्स्यबन्धिनि (मानकौड़ि) पु० ।

मत्स्याक्षी पु० मत्स्यस्याक्षीव पुष्पमस्याः । नाड्याम् (वामनहाटि) वोमत्स्यायां, गण्डदूर्वायां, किण्वीशिकायाञ्च ।

मत्स्याक्षी स्त्री० मत्स्यस्येव तन्मिश्रतन्निभाक्षं तिक्तत्वात् यस्याः । किण्वीशिकायाम् । [पिप्पल्याम् ।

मत्स्यादनी स्त्री० मत्स्यैरद्यते आस्वाद्यते अद–कर्मणि ल्युट् । जल-

मत्स्योदरी स्त्री० मत्स्यागन्धयुक्तसुदन्मस्याः । व्यासमातरि, मत्स्यगन्धायां, काशीस्थे तीर्थभेदे च । [मथः माथः ।

मथ विलोडने भ्वा०पर०सक०सेट् । मथते अमन्थीत् अमाथीत् वा थः;

मथ वधे सक० क्रौर्ये अक०भ्वा०पर० सेट् इदित् । मन्थति । अमन्थीत्

मथन न० मथ-ल्युट् । वधे, क्रौर्ये, विलोडने च । 'क्षीरोदमथनोद्भूतं इति पुराणम् । [कारिकादृश्ये ।

मथन पु० मथ्नातेऽग्निचयनार्थमसौ मथ-ल्युण्णि ल्युट् । गणि-

मथित न० मथ-क्त । निर्ज्जलतक्रे । पीड़िते, हते च त्रि० ।

मथुरा स्त्री० मथ-उरच् । स्वनामख्यातायां नगर्य्याम् ।

मद हर्षे दि० पर० अक० सेट् श्यमा० । माद्यति अमदत् अमादीत् अमदीत् । निष्ठायामनिट् यथाहिरयं तेन अमददित्येवेति माणि-नीयाः । घटा० मदयति । [घटा० मदयति ।

मद गर्व्वे दैन्ये च भ्वा० पर०अक० सेट् । मदति अमादीत्-अमदीत्

मद तर्पणे चु० सक० सेट् । मादयते । अमीमदत ।

मद आस्वादे, स्तुतौ मदे च । आमोदे स्तुतौ दीप्तौ यथायथं अक०सक० च भ्वा० आत्म० इदित् । मन्दते अमन्दिष्ट ।

मद पु० मद-अच् । हस्तिगण्डजले, आमोदे गर्वे रेतसि, मृगमदे, मत्ततायाम्, नदे, कल्याणकरे वस्तुनि च ।

मदकट पु० मदेन कटति कट-अच् । षण्डे (षाँड़) मदोत्कटे त्रि० ।

मदकल पु० मदेन कलति कल अच् । मत्तहस्तिनि-मदोत्कटे अव्य-क्तशब्दकारिणि च त्रि० । [स्त्री० टाप् ।

मदगन्ध पु० मदस्य हस्तिदानस्येव गन्धोऽस्य । वप्रच्छदवृक्षे मदिरायां

मदन्ती स्त्री० मदं मदिरामर्हतां मत्तां करोति-कृ ट ङीप् । पूतिकायाम् ।

मदन पु० माद्यत्यनेन मद-करणे ल्युट् । कामदेवे, सुरायां स्त्री० ङीप् ।

मदनक पु० मदयति मद-णिच्-ल्युट् स्वार्थे कन् । दमनकवृक्षे ।

मदनचतुर्दशी स्त्री० मदनस्य तदुपासनार्था चतुर्दशी । चैत्र-शुक्लचतुर्दश्याम् ।

मदनत्रयोदशी स्त्री० मदनक्षोपासनार्थं त्रयोदशी । चैत्रशुक्लत्रयोदश्याम् । मदनत्रिरात्रादयोऽप्यत्र ।

मदनमोहन पु० मदनमपि मोहयति मुह-णिच् ल्यु । श्रीकृष्णे ।

मदनसदन न० ईत० । स्त्रीयोनिभेदे । ज्योतिषोक्ते लग्नावधिके सप्तमे स्थाने च । [दयामेदे ।

मदनावस्था स्त्री० मदनकृतावस्था । कामिनां स्मरकृते उन्मादादौ

मदनी स्त्री० मादृत्वनया मद-ल्युट् । सुरायाम्, मदनाभौ, अतिमुक्तके च ।

मदभञ्जिनी स्त्री० मदं भञ्जति भनज-णिनि । धनभूम्नाम् ।

मदयन्ती स्त्री० मद णिच्-अच् ङी० ङीष् । वनमल्लिकायाम् (काठमल्लिका) स्वार्थे कनु ह्रस्वः । तत्रैवार्थे ।

मदयित्नु पु० मद णिच्-इत्नुच् । कामदेवे, मेघे, शौण्डिके, च । मद्ये न० । मादके त्रि० ।

मदमार पु० मदं मारयति नाशयति मृ-णिच्-अण् उप० । तृणवृक्षे ।

मदाक्ष्य पु० मदेन मदकारणेन (ताड़ि) रक्तेनाक्षः । तालवृक्षे । रक्ताभिधट्टाम् स्त्री० ।

मदालापिन् पु० मदेनालपति आ+लप-णिनि । कोकिले ।

मदिरा स्त्री० मद-किरच् । 'माध्वीकं पानसं द्राक्षं खार्जूरं ताल-मैक्षवम् । मैरेयं गौडिकं टाङ्कं मधूकं नारिकेलजम् । सुरासव-विकारोत्थं मद्यानि द्वादशैव तु" त्यमरः । मद्यसामान्ये, मत्तकारिणे च । रक्तखदिरे पु० ।

मदोत्कट पु० मदेन दानवारिणा उत्कटः उद्भूतः । मत्तगजे । मदिरायां स्त्री० । मदोद्भूते त्रि० ।

मदोदग्र पु० मदेन उदग्रः उग्रः । मत्ते "मदोदग्राः करुह्मन" इति रघुः । नार्य्यां स्त्री० ।

मदोद्धत त्रि० मदेन उद्धतः । मत्ते । [पश्चिमदेशे ।

मद्गु पु० मद्ग-उ-पु० धातोर्मदादेशः गुक्च । (जलकौड़ि)

मद्गुर पु० मद-उरच् गुक्च । (मागुर) मत्स्यभेदे स्वार्थे कनु तत्रैव ।

मद्य न० माद्यत्यनेन करणे यत्। मदिराशब्दे उक्तमाध्वीकादिद्वादश-विधे मादकद्रव्ये। [धातकीवृक्षे (धाइफुल)।

मद्यवासिनी स्त्री० मद्यस्येव वासो गन्धोऽस्त्यस्याः इनि।

मद्यबीज न० ई त०। किण्वादौ (बाकल) मद्यकारणे पदार्थजाते।

मद्यसन्धान न० मद्याय मद्योत्पादनाय सन्धानम् अभिषवः। मद्योत्पादनव्यापारे।

मद्यामोद पु० मद्यस्येव आमोदः गन्धोऽस्य। बकुलवृक्षे।

मद्र पु० मद-रक्। विराटपार्श्वद्वयोर्मध्ये पूर्व्वदक्षिणभेदयोश्च। मद्रदेशः समाख्यात" इत्युक्ते देशे, हर्षे, मङ्गले च।

मधु न० मन-उ नस्य धः। मद्ये, 'गर्ज्ज गर्ज्ज क्षणं मूढ! मधु यावत् पिबाम्यहम्" इति चण्डी। क्षौद्रे, 'मधु वाता ऋतायते" इति मधुस्रुतम् पुष्परसे 'मधु हिरेफः कुसुमैकपात्रे" इति कुमारः। जले मधुररसे च। 'मधु क्षरन्ति सिन्धव" इति मधुस्रुतम्। विष्णु कर्णमलजाते दैत्यभेदे। 'विष्णुकर्णमलोद्भूतावसुरौ मधुकैटभाविति पुराणं कुम्भीनस्या भर्त्तरि दैत्यभेदे वसन्तर्त्तौ, चैत्रे मासि, (मौल) वृक्षभेदे, अशोकवृक्षे, यष्टिमधौ च पु०। प्राणिनां शुभाशुभकर्मणि न०। जीवन्त्यां स्त्री०। स्वार्थे कन्। यष्टिमधौ, तत्पुष्पि च न०।

मधुकर पु० मधूनि करोति सञ्चिनोति निष्पादयति क-अच्। भ्रमरे, तत्स्त्रीत्वे स्त्री० ङीप्। कोकिलजाते, भृङ्गराजे च पु०। मधु-भटादयोऽपि भ्रमरे।

मधुकर्कटी स्त्री० मधुः मधुरा कर्कटी। जम्बीरभेदे, मिष्टखर्जूरिका-याञ्च। स्वार्थे कन् ह्रस्वः टाप्। बीजपूरे।

मधुका स्त्री० मधुरिव स्वार्थे कन्। यष्टिमधौ, मधुपर्णीवृक्षे च।

मधुकोष पु० मध्वर्थं कृतः कोषः। (मौचाक) मक्षिकाकृते कोषाकारे पदार्थे

मधुक्षीर पु० मधु मधुरं क्षीरमस्य। खर्जूरवृक्षे।

मधुखर्जुरी स्त्री० मधुर्मधुरा खर्जूरी। अतिमिष्टखर्जूरीभेदे। स्वार्थे। कन्। तत्रैव।

मधुज न० मधुनो जायते जन ड। सिक्थके (मोम)। मधुदैत्य मेदोजातायां भसौ स्त्री०।

मधुजम्बीर पु० मधुर्मधुरः जम्बीरः। अतिमिष्टजम्बीरे।(कमलालेबु)।

मधुजित् पु० मधुनामासुरं जितवान् जि भूते क्विप्। विष्णौ मधुभिन्मधुरिपुप्रभृतयोऽत्र।

मधुतृण न० कर्म०। दूर्व्वायाम्। पुंस्त्वमपि। [मधुत्रिकमप्यत्र न०।

मधुत्रय न० मधूनां मधुराणाम् त्रयम्। मधुघृतसितानां त्रये।

मधुदूत पु० मधोर्वसन्तस्य दूत इवाग्रसरत्वात्। आम्रवृक्षे। पाटलायां स्त्री० ङीप्।

मधुद्रव पु० मधुरो द्रवोऽस्य। रक्तशिग्रौ।

मधुद्रुम पु० मध्वर्थं मद्यार्थं द्रुमः। (मौल) वृक्षभेदे, तत्पुष्पेण हि पौष्पमधुसम्भवः। [विकारादौ।

मधुधूलि स्त्री० मधुर्मधुरा धूलिरिव। खण्डे (खांड) गुड़-

मधुधेनु स्त्री० दानार्थं कल्पितायां मधुप्रभृतिद्रव्यकृतधेनौ।

मधुप पु० मधु पिबति पा-क। भ्रमरे। मधुपायिनि त्रि०। 'प्रारब्धो मधुपैरकारणमहो' इत्युद्भटः।

मधुपर्क न० पृष-घञ् मधुनः पर्को योगो यत्र। मधुयुते कांस्यपात्रस्थे कांस्यपात्रान्तरेणाहृते दधि 'दध्नश्चर्पिर्जलं क्षौद्रं सिता चैतैश्च षड्भिः प्रोच्यते मधुपर्कस्तु" इत्युक्ते दध्यादिद्रव्यषट्के च।

मधुपर्णी स्त्री० मधु इव हितकरं पर्णं यस्याः। गुडूच्यां, गाम्भार्य्यां, नीलीवृक्षे, वराहक्रान्तायाम्, मधुबीजपूरे च।

मधुपालिका स्त्री० मधूनि पालयति पाल ण्वुल्। गाम्भार्य्याम्।

मधुपीलु पु० कर्म०। मधुरपीलौ।

मधुपुरी स्त्री० मधोर्दैत्यस्य पुरी। मथुरायाम्।

मधुपुष्प पु० मधुप्रचुरं पुष्पं यस्य। मधुद्रुमे, (मौल) गिरीषवृक्षे, अशोकवृक्षे, वकुलवृक्षे च। दन्तीवृक्षे, नागदन्तीवृक्षे च स्त्री० टाप्।

मधुप्रिय पु० मधु मधुरं प्रियं यस्य। बलरामे। मधुरव प्रियः। भूमिलम्बूवृक्षे। [टाप्।

मधुफल पु० मधुरं फलं यस्य । मधुनारिकेले । मधुखर्जूरिकायां स्त्री०

मधुबल्ली स्त्री० मधु बल्लं यत्र । माधवीलतायाम् ।

मधुमक्षिका स्त्री० मधुस्वादिका मक्षिका (मौमाछि) सरघायाम् ।

मधुमज्जन् पु० मधुरं मज्ज सारोऽस्य । आखोटवृक्षे ।

मधुमत् त्रि० मधुर्मधुररसोऽस्यास्त मतुप् । माधुर्य्यवति 'मधुमत् पार्थिवं रज" इति मधुरलक्षम् । नदीभेदे, योगशास्त्रप्रसिद्धे योगिनां चित्तवृत्तिभेदे, वैदिकप्रसिद्धे 'मधु वाता" इत्यादौ ऋक्-त्वे, तन्त्रोक्ते देवी नायिकाभेदे च स्त्री० ङीप् ।

मधुमर्कटी स्त्री० मधुजाता मर्कटी शाक० । (सितास्वण्ड) मधु-जाते खण्डे । [मालत्याम् । स्वार्थे कन् । तत्रैव ।

मधुमल्लि (ल्ली) स्त्री० मल्ल-इन् वा ङीप् मधुप्रधाना मल्लिः (ल्ली)

मधुमूल न० मधुरं मूलम् । (मौआलु) आलुभेदे । [वा ङीप् ।

मधुयष्टि स्त्री० मधुरा यष्टिः काण्डम् । इक्षौ । यष्टिमधौ स्त्री०

मधुयष्टिका स्त्री० मधुरा यष्टिरिव स्वार्थे कन् । यष्टिमधौ ।

मधुर पु० मधु माधुर्य्यं राति रा-क, अस्त्यर्थे र वा । गुडादिस्थे मिष्ट-रसे, माधुर्य्यरसयुक्ते, इक्षादौ, मनोहरे, 'मधुरयामधुबोधितमा-धवी"ति माघः प्रिये च त्रि० । रक्तशिग्रौ, राजाम्रे, रक्तेक्षौ, गुडे, शाकौ, जीरके च पु० । वङ्गे, सीसे च न० स्वार्थे कन् । जीरके शतपुष्पायां यष्टिमधौ, काकोल्यां, शतावर्य्यां इक्षुक्षीर-कल्यां, मधुकर्कटिकायां मधूल्यां, भेदायां शालङ्कशाके (मौरी) मिश्रायाञ्च स्त्री० । स्वार्थे कन् अत इत्त्वम् । मिश्रायाम् स्त्री० ।

मधुरजम्बीर पु० कर्म० । (कमलालेबु) जम्बीरभेदे ।

मधुरत्वच पु० मधुरा त्वचा यस्य । धववृक्षे ।

मधुरफल पु० मधुरं फलमस्य । राजवदरे ।

मधुरबल्ली स्त्री० कर्म० । मधुयोजपूरे, जम्बीरभेदे च ।

मधुरस पु० मधुन इव रसो यस्य । इक्षौ, जले च । मूर्व्वायां, द्राक्षा-यां, दुग्धिकायां, गव्याय्यांञ्च स्त्री० ।

मधुरस्रव स्त्री० मधुरं स्रवति स्रु-अच् । पिण्डखर्জ্জूर्य्याम् ।

मधुराम्लक पु० कर्म० । आम्रातके ।

मधुलग्न पु० मधुर्मधुररसो लग्नो यत्र । रक्तशोभाञ्जने ।

मधुलिका स्त्री० मधु माधुर्यं लिटति गाहते लिट-क पृ० । राजि-कायां (राइसर्षा) । [मधुलेहीत्यत्र ।

मधुलिह् पु० मधु लेढि आस्वादयति लिह-क्विप् । भ्रमरे शिनि ।

मधुवन न० मधुदैत्याधिष्ठितं वनम् । मथुराप्रान्तस्थे वनभेदे किष्किन्धा-स्थे मधुप्रचुरे वनभेदे च ।

मधुवल्ली स्त्री० मधुप्रधाना वल्ली । यष्टिमधौ ।

मधुवार पु० मधुनो मद्यस्य वारः क्रमः । पुनःपुनर्मद्यपानक्रमे ।

मधुवीज पु० मधु मधुरं वीजं यस्य । दाड़िमे ।

मधुवीजपूर पु० कर्म० (लेबुभेदे) मधुकर्कटिकायाम् ।

मधुव्रत पु० मधु तत्सञ्चयो व्रतं सततानुशीलनं यस्य । भ्रमरे ।

मधुशाख पु० मधुर्मधुरा शाखाऽस्य । (मौल) वृक्षे ।

मधुशिग्रु पु० मधुः मधुरः शिग्रुः । रक्तशोभाञ्जनवृक्षे ।

मधुशेष पु० न० मधुनः शेषः उच्छिष्टम् । सिक्थके । मोम) ।

मधुश्रेणी स्त्री० मधुनः श्रेणीव । मूर्च्छायाम् ।

मधुश्चुत् स्त्री० मधुन इव श्रुतित्वात् श्रुत-क्विप् । जीव-न्तीवृक्षे ।

मधुष्ठील पु० मधु ष्ठीले गर्भोऽस्य । (मौल) गुडपुष्पवृक्षे ।

मधुसख पु० मधोर्वसन्तस्य सखा सहचरः अच् स० । कामदेवे । मधु-शारख्यादयोऽप्यत्र ।

मधुसूदन पु० मधुं तन्नामासुरं सूदयति, मधु, जीवानां शुभाशुभकर्म, ज्ञानदानेन सूदयति वा सूद-ल्यु । श्रीकृष्णे । 'भक्तानां कर्म्मणा-श्चैव सूदनात् मधुसूदन" इति निरुक्तेः मधु माध्वीकं सूदयति भ-क्षयति । भ्रमरे । मधुरेव सूद्यते भक्ष्यते ल्युट् ङीप् । पालङ्कीशाके ।

मधुस्रव पु० मधूनि मद्यानि स्रवन्त्यस्मात् स्रु-अप् । (मौल वृक्षे)

मधुस्रवस् पु० मधु स्रवति अस्मात् स्रु-असुन् । । (मौल) वृक्षे ।

मधुस्वर पु० मधुर्मधुरः स्वरोऽस्य । कोकिले । मधुरस्वरवति त्रि० ।

मधुहन् पु० मधुनामासुरं कर्मफलं वा ज्ञानद्वारा हन्ति हन् क्विप् । विष्णौ

मधूक न० मद्द-ऊक् हस्य धः । यष्टिमधौ । (मौल) वृक्षे पु० ।

मधूच्छिष्ट न० मधुन उच्छिष्टमवशिष्टम् । (मोम्) सिक्थके मधूच्छि-ष्टमपत्र ।

मधूपघ्न पु० न० मधुदैत्यस्योपघ्नमाश्रयः । मथुरानगरे ।

मधूल पु० मधु लाति ला क पृ० । जलजगिरिजमधूकवृक्षयोः । मधुकवृक्षार्थाम् आम्रे च स्त्री० गौरा० ङीष् । स्वार्थे कन् अत इत्त्वम् टाप् । मूर्वायाम् ।

मध्य पु० मस-यक् नस्य धः । देहस्यावयवभेदे । (माजा) "मध्येन सा वेदिविलग्नमध्ये"ति कुमारः । स्त्यादौ-मन्दत्वशीघ्रत्वभिन्ने व्यापारभेदे, पूर्वापरकोटिमयोरन्तराले, परार्द्धसंख्यातोऽर्वाचीनायां सङ्ख्यायां, तत्संख्याते च । "अन्त्यं मध्यं परार्द्ध"मिति लीला० ज्योतिषोक्ते ग्रहाणां गतिभेदे स्त्री० तद्वति ग्रहे पु० । न्याये, व्यन्तर्वर्त्तिनि च त्रि० ।

मध्यगन्ध पु० मध्ये फलमध्ये गन्धो यस्य । आम्रवृक्षे । [स्वार्थे ।

मध्यतस् अव्य० मध्य+तसिल् । प्रथमापञ्चमीसप्तम्यर्थवृत्तेर्मध्यशब्द-

मध्यदेश पु० कर्म० । "हिमवद्विन्ध्ययोर्मध्यं यत् प्राग्विनशनादपि । प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तित" इत्युक्ते देशभेदे ।

मध्यन्दिन न० मध्यं दिनस्य लुक्समा० । मध्याह्ने ।

मध्यपदलोपिन् पु० मध्यपदस्य लोपोऽस्त्यस्य इनि । व्याकरणप्रसिद्धे शाकपार्थिवादिके समासभेदे ।

मध्यम त्रि० मध्ये भवः म । मध्यभवे । सप्तस्वरमध्ये क्रौञ्चस्वरतुल्ये पञ्चमे स्वरे पु० । [वर्त्तित्वात् ।

मध्यमपाण्डव पु० कर्म० । अर्জ্জुने तस्य पूर्वापरयोर्ज्येष्ठयोर्मध्य-

मध्यमशृतक पु० कर्म० । "मध्यमस्तु क्षणीवल" इत्युक्ते मध्यमे दासे क्षणीवलादौ ।

मध्यमलोक पु० कर्म० । पृथिव्याम् तस्याः पातालस्वर्गलोकयोर्मध्य-

वर्त्तित्वात् "मध्यमलोकपाल" इति रघुः मध्यलोकोऽत्र ।

मध्यमसंग्रह पु० कर्म० । "प्रेषणं गन्धमाल्यानां धूपभूषणवाससाम् । प्रलोभनञ्चान्नपानैर्मध्यमः संग्रहोमत" इत्युक्ते मध्यमे स्त्रीसंग्रहरूपे विवादभेदे ।

मध्यमसाहस कर्म० "वासः पशुन्नपानानां यष्टेश्चोपकरणस्य च । एतैरेव प्रकारैश्च मध्यमं साहसं स्मृत" मित्युक्ते परकीयवस्त्रादेर्बलात्कारादिरूपे बलकरणकक्रमरूपे साहसभेदे "पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः । मध्यमः पञ्च विज्ञेय" इत्युक्ते पञ्चपणात्मके दण्डभेदे पु० ।

मध्यमा स्त्री० मध्य+म । हस्तजङ्घायां नार्याम्, तर्जन्यनामिकयोरन्तःस्थायामङ्गुलौ, पद्मादीनां कर्णिकायाम् कृत्योत्पत्तासु वैखर्य्यादिषु मध्ये वाणीभेदे नायिकाभेदे च ।

मध्यमाहरण न० बीजगणितप्रसिद्धे अव्यक्तमानज्ञापके गणनाभेदे ।

मध्यरात्र पु० मध्यं रात्रेः एकदेशि स० अच् समा० । निशीथे अर्द्धरात्रे ।

मध्यवर्त्तिन् त्रि० मध्ये वर्त्तते वृत—णिनि । वादिप्रतिवादिनोरन्यतरयोर्वा पक्षप्रतिपक्षयोर्वाक्यादिविषयविमर्शपूर्वकं तत्त्वनिर्णायके, स्वार्थाविरोधेन परार्थसम्पादके, कार्य्यसम्पादके च मध्यस्थे ।

मध्यस्थ पु० मध्ये तिष्ठति स्था—क । मध्यवर्त्तिनि, उदासीनेच । "माध्यस्थमिष्टेऽप्यवलम्बतेऽर्थं" इति कुमारः ।

मध्या स्त्री० स्त्रियां टाप् । त्र्यक्षरपादके छन्दोभेदे नायिकाभेदे मध्यमाङ्गुलौ च ।

मध्याङ्क पु० मध्य मङ्कः एक० स० टच् समा० अङ्कादेशः । त्रिधा विभक्तदिनस्य द्वितीये भागे, "प्रातः कालो मुहूर्त्तांस्त्रीन् सं गवस्तावदेव तु । मध्याङ्कस्त्रिमुहूर्त्तं स्या" दित्युक्ते पञ्चधाविभक्तदिनस्य तृतीये भागे, च । [तत्रैव ।

मध्वालुक पु० मधुर्मधुर आलुः । (मौ आलु) मूलभेदे । ततः कन् ।

मध्वासव पु० मधुना पुष्परसेन कृत आसवः । (मौल) मधुकुसुमपुष्पजाते मद्ये ।

मन पूजायां सक०गर्वे अक०भ्वा०पर०सेट्। मनति। अमानीत् अमनीत्

मन गर्वे अक० चु० आ० सेट्। मानयते अमीमनत।

मन बोधे तना० आ०सक०सेट्। मनुते अमनिष्ट।

मन बोधे दि० आ० सक० अनिट्। मन्यते। अमंस्त।

मन ष्टतौ अद०चु०उ०सक०सेट्। मनयति ते अममनत् त।

मन पु० मन–अच्। जटामांसयाम्।

मनःशिला स्त्री० मनः शब्दवाच्या शिला। (मन्छल) रक्तवर्णो उपधातुभेदे "मनःशिलाविच्छुरिता निषेदुरि"ति कुमारः। पृ० वा ह्रस्वे पुंस्त्वमपि। "टङ्कैर्मनः शिलगुहैरविदार्य्यमाणे"ति।

मनस् न० मन्यतेऽनेन मन–असि। सर्वेन्द्रियप्रवर्त्तके अन्तरिन्द्रिये, तच्च वेदान्तमते सङ्कल्पविकल्पात्मकवृत्तिमदन्तः करणं सुखदुःखाद्याधारः "कामः संकल्पोविचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीरित्येतत् सर्वंमनएवे"ति श्रुतेः न्यायमते तत्तज्ज्ञानसाधनमिति भेदः। मनः शिलायाञ्च।

मनसा स्त्री० मनन मन स्यति सो–क। आत्मीकस्य सुनेर्मातरि वासुकिभगिन्याम् जरत्कारुपत्न्याम्।

मनसादेवी स्त्री० मनसा दीव्यति दिवः करणस्य कर्म्मत्वात् कर्म्मोपपदत्वेन अण् ङीप् अलुक्स०। मनसाशब्दार्थे।

मनसिज पु० मनसि जायते जन–ड सप्तम्या वा अलुक्। कामदेवे। लक्षि। मनोजोऽभवत्। एवं चित्तजातादयोऽप्यत्र।

मनसिशय पु० मनसि शेते शी–अच् वा अलुक्। कामदेवे।

मनस्कार पु० कृ–घञ् मनसः कारोव्यापारभेदः। चित्तस्य सुखतत्परत्वे।

मनस्ताप पु० मनसस्तापः अनुतापः। अनुतापे, मनःपीड़ायाञ्च।

मनस्विन् वि० प्रशस्तो मनोऽस्यास्ति विनि। प्रशस्तमनस्के। स्त्रियां ङीप्। "मनस्विनीनां प्रतिमत्तिरीहशी"ति कुमारः।

मनाक् अव्य० मन–आकि। ईषदर्थे, मन्दे च "क्षुत्क्षामक्षान्तमनामनागभू"दिति नैषधम्।

मनाक्कर न० मनाक् करोति क—अच्। अल्पिकाणभवयुक्ते अनुद्यमेदे। ईषत्करे त्रि०।

मनाशी स्त्री० मनोः पत्नी वा ङीष् औङ् च। मनोः पत्न्याम्।

मनित त्रि० श्वा० मन—क्त। श्वाते।

मनीषा स्त्री० ईष—अङ् मनस ईषा शक०। बुद्धौ।

मनीषिन् पु० मनीषा अस्त्यस्य इनि। पण्डिते। बुद्धियुक्ते त्रि०।

मनु स्त्री० मन—उ। पृक्कायाम् (पिण्डिकृयाक) मनुपत्न्याञ्च। प्रजापतिभेदे, धर्म्मशास्त्रकर्त्तरि स्वायम्भुवे मुनिभेदे च पु०।

मनुज पु० मनोः स्वायम्भुवात् जायते जन—ड। मनुष्ये स्त्रियां जातौ ङीप्। [ङीप्।

मनुष्य पु० मनोरपत्यं यत् सुक् च मानवे जातिभेदे। स्त्रियां जातौ

मनुष्यधर्म्मन् पु० मनुष्यस्येव धर्म्मो यस्य मरवाहनत्वात् अनिच् समा०। कुबेरे। [शिलायाम्।

मनोगुप्ता स्त्री० मनसा मनः शब्देन तच्छब्दवाच्यत्वात् गुप्ता। मनः

मनोजव त्रि० जु अच् मनो जवं वेगवत् समनाय यस्मिन्। पित्तलुख्ये। मनस इव जवो यस्य। अतिवेगवति त्रि०। अग्निजिह्वायां स्त्री०। [दृच्छे।

मनोजवृद्धि पु० मनोजस्य कामस्य वृद्धिर्यस्मात् ५ब०। कामवृद्धि-

मनोज्ञ त्रि० मनो जानाति ज्ञापयति बोधनाय प्रत्यीकरोति अन्तर्भूतण्यर्थे ज्ञा—क। मनोहरे। मनः शिलायां, वन्यवाकर्कोट्यां, कटभ्यां, जीरके, मदिरायाञ्च स्त्री०।

मनोभव पु० मनसि भवति भू—अच्। कामदेवे मनोजमनोभूभ्यतयोऽप्यत्र। [कत्वात्। पृक्कायाम्।

मनोरथ पु० मनस्येव रथोऽत्र, मनसो रथइव वा दृश्यत्वात् प्राप्त-

मनोरम त्रि० मनोरमयति रम—णिच—अच् उप०। मनोहरे। गोरोचनायां स्त्री०।

मनोहृत त्रि० मनो हृतं यस्य। प्रतिहृते, प्रतिबद्धे च।

मनोहर त्रि० मनो हरति स्वदर्शनाय हृ-अच्। रुचिरे। कुन्दवृक्षे

पु० । जात्यां, स्त्रियां यूथ्यां च स्त्री० । स्वर्णे न० । णिनि । मनोहारीति मनोहरे ।

मनोह्वा स्त्री० मनः शब्देनाह्वयते कृ—घञर्थे क । मनःशिलायाम् ।

मन्ज मार्ज्जने सक० भ्वा० पर० सेट् । मञ्जति अमञ्जीत् ।

मन्तु पु० मन—कु तुट् च । अपराधे, मनुष्ये, प्रजापतौ च ।

मन्त्र पु० मत्रि—अच् । गुप्तभाषणे, रहसि कर्त्तव्यावधारणार्थसूक्तौ देवादीनां साधनार्थं तन्त्रादुक्ते शब्दभेदे, वेदविभागभेदे च ।

मन्त्रजिह्व पु० मन्त्रएव जिह्वा आस्वादनसाधनं यस्य । अग्नौ, मन्त्रेण दत्तहविरास्वादकत्वात्तस्य तथात्वम् ।

मन्त्रदात्र पु० दा—तृच् ह्रस्वः । गुरौ ।

मन्त्रिन् पु० मन्त्रयते णिनि । धीसचिवे येन सह रहसि कर्त्तव्यमवधीयते तस्मिन् अमात्ये ।

मन्थ क्लेशे सक० विलोडने सक० भ्वा० पर० सेट् । मन्थति अमन्थीत् ।

मन्थ विलोडे क्र्या० पर० द्विक० सेट् । मथ्नाति अमन्थीत् ।

मन्थ पु० मन्थ—करणे घञ् । मन्थनकरणदण्डे । "सक्तुभिः सर्पिषाभ्यक्तैः शीतवारिपरिप्लुतैः । नात्यच्छो नातिसान्द्रश्च मन्थ इत्यभिधीयते" इत्युक्ते पेयभेदे, सूर्य्ये, अर्कवृक्षे, नेत्रमले, किरणे च । भावे घञ् । आलोडनादौ ।

मन्थज न० मन्थात् दधिमन्थनात् जायते जन—ड । नवनीते ।

मन्थन पु० मथ्यतेऽनेन करणे ल्युट् । मन्थानदण्डे ।

मन्थर न० मन्थ—करच् । कुसुम्भाम्बु । कोचे, फले, बाधे मन्थानदण्डे च पु० वक्रे, नीचे, जड़े, मन्दे च त्रि० । "मदर्थसन्देश मृणालमन्थर" इति नैः । केकैयाः दास्यां स्त्री० । [रपर्वते ।

मन्थशैल पु० ह्रस्व० । सहजमन्थनाय मन्थनदण्डरूपेण कल्पिते मन्द-

मन्थान पु० मन्थ—आनच् । मन्थनदण्डे, आरग्वधवृक्षे च (सोन्दाल)

मन्द त्रि० मदि—अच् । मूर्खे जडे, अभाग्ये, रोगिणि, अल्पे, स्वतन्त्रे, खलेच । शनिग्रहे, कृत्तिभेदे, यमे, प्रलये च पु० । ज्योतिषोक्ते रविसंक्रान्तिभेदे स्त्री० ।

मन्दग त्रि० मन्दं गच्छति गम–ड । मृदुगामिनि शनि, क्षानि, पुरुष, हय, हंस, गज, वरस्त्रिय इत्येते स्वभावान्मन्दगतयः । णिनि मन्दगामीत्यप्यत्र त्रि० । स्त्रियां ङीप् ।

मन्दट पु० मन्दं टीकते टीक–ड । पारिभद्रवृक्षे । (पालदेमादार)

मन्दता स्त्री० मन्दस्य भावः तल् । आलस्ये, जाड्ये, मन्दभावे च । "उच्चैरश्वति मन्दतामरसता"मिति चन्द्रालोकः ।

मन्दर पु० मदि–अरन् । सप्तब्रह्मण्याने पर्वतभेदे, मन्दारवृक्षे, स्वर्गे, हारभेदे, दर्पणे च । बद्धले, मन्दे च त्रि० ।

मन्दाकिनी स्त्री० मन्दमकति अक–णिनि । स्वर्गगङ्गायां "स्वर्गे मन्दाकिनी तथे"ति पुराणम् ।

मन्दाक्रान्ता स्त्री० सप्तदशाक्षरपादके छन्दोभेदे ।

मन्दाक्ष न० मन्दं सङ्कुचितमक्षि यस्मात् बहु० समा० । लज्जायाम् ।

मन्दाग्नि पु० मन्दः पचने अल्पशक्तिकः अग्निः अनलः स यस्मात् । देहस्थे अपाचनशक्तिकेऽनले तज्जेतौ रोगभेदे च ।

मन्दार पु० मदि–आरक् । स्वर्गस्थे देववृक्षभेदे, पारिभद्रवृक्षे च ।

मन्दिर न० मन्द्यतेऽत्र मदि–किरच् । गृहे, पुरे च । तस्य द्विलिङ्गत्वमित्येके । सप्तद्वे जानुपश्चाद्भागे च पु० ।

मन्दुरा स्त्री० मदि–उरच् । अश्वशालायाम्, शयनीयकटे च । (मादुर)

मन्दोदरी स्त्री० मयदानवकन्यायां रावणमहिष्याम् ।

मन्दोष्ण न० मन्दमीषदुष्णम् । ईषदुष्णस्पर्शे । तद्वति त्रि० ।

मन्द्र पु० मदि–रक् । वाद्यभेदे, गम्भीरध्वनौ च । अर्शआद्यच् तद्वति त्रि० । [चिन्तायां, कपित्थवृक्षे च ।

मन्मथ पु० मनं मत् मन–क्विप् मथति अच् ह्रस्तः । कन्दर्पे, कामः

मन्मथालय पु० ह्रस्तः । आम्रवृक्षे स्त्रीलिङ्गभेदे च ।

मन्या स्त्री० सेट्–मन–क्यप् । ग्रीवायाः पश्चाद्भागस्थायां शिरायाम् ।

मन्यु पु० मन–युच् । शोके, दैन्ये, क्रतौ क्रोधे, अहङ्कारे च ।

मन्वन्तर न० मनूनामन्तरमवकाशस्तदुपलक्षितकालो वा । स्वायम्भुवादिमनूनामधिकारे तदुपलक्षिते काले च सत्ययुगमितवर्षाधिका

एकसप्ततिचतुर्युगमिता (३११४४८०००) एतन्मितवर्षात्मकदिवसेति ।

मभ्र गतौ भ्वा० पर० सक० सेट् । ममभ्रति अमभ्रीत् ।

मम अव्य० मा–डम । षष्ठ्यर्थद्योतके अव्ययेऽर्थे तेन ममत्वमिति ।

ममता स्त्री० मम भावः तल् । स्नेहे मदकारे मत्वबन्धे च । एवं मम-त्वमप्यत्र "तवापि ममतावर्त्मे" ति "ममत्वं ममराजस्ये"ति च चण्डी ।

मय गतौ भ्वा० आ० सक०सेट् । मयते अमयिष्ट ।

मय पु० मय–अच् । उष्ट्रे अश्वतरे । दानवभेदे च ।

मयष्टक पु० मि+अच् मयं प्रक्षेपं स्यति प्रतिबध्नाति स्यकन्अच् पु० पत्वम् । वनमुद्गे ।

मयु पु० मि–उ । किन्नरे, म्लेच्छे च ।

मयुष्टक पु० मिनोति मि–उ मयुः स्या क्नुण् स्यकः धर्म० । पृ०पत्वम् षत्वम् वनमुद्गे पु० । मयुस्कोऽप्यत्र । [त्रिका० ।

मयूख पु० माङ्–ऊख मकादेशः । त्विषि, किरणे शिखायां शोभा

मयूर पु० मी–ऊरन् । खनामख्याते खगभेदे । दृशार्थे कन् । तु-त्थाञ्जने (तुते) न० । अपामार्गे, मयूरशिखाद्यर्थे च पु० ।

मयूरग्रीवक न० मयूरग्रीवेव वुन् । तुत्थे (तुते) ।

मयूरजङ्घ पु० मयूरस्य जङ्घेव मूलमस्य । स्नोनाकवृक्षे ।

मयूरतुत्थ न० मयूरइव तद्वर्णं तुत्थम् । तुत्थे (तुते) ।

मयूरविदला स्त्री० मयूरैर्विदल्यते मयूर इव विशिष्टदलमस्या वा । अम्लतायाम् । (युट्) (आमरुल) । [मयूरचूडादयोऽप्यत्र ।

मयूरशिखा स्त्री० मयूरस्येव शिखाऽस्याः । खनामख्याते क्षुपभेदे

मयूरिका स्त्री० मयूरो विद्यतेऽस्याः तच्छब्दकतुच्छदलत्वात् ठन् । अम्लतायाम् (युट्) (आमरुल) ।

मरक पु० मृ–वुन् । दैविकभौतिकोपद्रवजन्ये प्राणिनामकालमरणे (मड़क) मारिभये । [(पाखा) ।

मरकत न० मरकं मारिभयं तरत्यनेन तॄ–ड । फरिद्वर्णे मणिभेदे

मरकतपत्री स्त्री० मरकतमिव हरिद्वर्णं पत्रमस्याः ङीप् । पाठा-यामृ । (निघण्टु शुप)

मरण न० म्रियतेऽनेन मृ-करणे ल्युट् । यत्नसाध्ये विषे । भावे ल्युट् । देहात्मनोर्विच्छेदरूपे, प्राणवायोरुत्क्रमणरूपे वा व्यापारे । [सुम् । मरन्ते ।

मरन्द पु० मरं मरणं दाति अमराणां जीवनहेतुत्वात् दो-क पृ०

मराकाली स्त्री० मरो मरणकारिकं दुःखमिवाकति याचनेन मराको दुष्टिकः स दवालति पर्य्याप्नोति दुःखदानाय अल-अच् गौ०ङीषु । दुष्टिकाली (विछाति) ।

मराल पु० मृ आलच् । राजहंसे, 'तलामरालनयमरालमरालकेशी'ति नैषधम् । कञ्जले, कारण्डवे, अश्वे, मेघे, खले, दाडिमीवने च । चिक्कणे त्रि० ।

मरि (री) च पु० मृ इच पृ० वा दीर्घः । खनामख्याते वृक्षे ।

मरि(री)चपत्रक पु० मरिचस्येव पत्रमस्य कप् । सरलवृक्षे ।

मरीचि पु० मृ-ईचि । सप्तर्षिमध्ये ब्रह्मणो मानसे ज्येष्ठे पुत्रे मुनि-भेदे, कृपणे च । किरणे पु० स्त्री० ।

मरीचिका स्त्री० मरीचौ सूर्य्यकिरणे कमिव जलमिव यत्र आनौ । सूर्य्यकिरणजलभ्रान्तौ, मृगतृष्णायाम् । [च ।

मरु पु० मृ-उ । पर्व्वते, निर्जलदेशे च कुरुवकवृक्षे (माडयार) देशे

मरुज पु० मरुदेशे जायते जन-ड । मरुदेशजातमात्रद्रव्ये, निर्जलजाते त्रि० । मृगकर्कोशाम् स्त्री० ।

मरुत् पु० मृ-उति । वायौ, देवे च । स्वार्थे प्रज्ञादित्वात् । मारुतोऽ-प्यत्र । मरुत्वके, यन्त्रिपर्णे च न० । पृक्कायां स्त्री० । पृ० हुस्वः । मरुतोऽपि वायौ ।

मरुत्कर पु० मरुतमपानवायुं करोति कृ-अच् । राजमाषे ।

मरुत्त पु० चन्द्रवंश्ये नृपभेदे । ततः संज्ञायां कन् । मरुत्तके ।

मरुत्पथ पु० ६त० । आकाशे । मरुद्भ्यां दीयोऽध्वन् ।

मरुत्पाल पु० । मरुतो देवान् पालयति पाल-अण् । इन्द्रे ।

मरुत्वत् पु० मरुत्पाल्यत्वेनास्त्यस्य मतुप् मस्य वः इन्द्रे ।
मरुत्सख पु० मरुतो वायोः सखा—टच् । इन्द्रे, वह्नौ, चित्रकवृक्षे च
मरुदान्दोल न० मरुतमान्दोलयत्यनेन करणे घञ् । व्यजने ।
मरुदिष्ट पु० मरुतां देवानामिष्टः । गुग्गुलौ ।
मरुद्भवा स्त्री० मरुतो वायो र्भवति यद्भवते भू—अच् । (तालमूली) क्षुपे (खिराट) ।
मरुद्रुम पु० मरोर्निर्जलदेशस्य द्रुमस्तत्रजातत्वात् । विट्खदिरे ।
मरुद्वह पु० मरुत् वाह इव यस्य धूमे, वह्नौ च ।
मरुन्माला स्त्री० मरुतो मालेव । (पिडिङ्गशाक) पृक्कायाम् ।
मरुभू पु० न० मरुर्भूमिर्यत्र (मारुआर) देशभेदे, कर्म० । निर्जलभुवि
मरुवृक्ष पु० मरुभुवि निर्जलभूमौ रोहति रुह—क । करवीरे ।
मरुव पु० मरुं निर्जलदेशं वाति कारणत्वेन वा—क । (मालदाना) (मरुआ) वृक्षभेदे । स्वार्थे कन् । तत्र, वृक्षभेदे, (मयना) क्षुपपत्रतुलस्याम्, जम्बीरभेदे, पुंप्रधाने वृक्षभेदे, (मरुयाफुल) व्याघ्रे, राक्षौ, भयानके च ।
मरुसम्भवा स्त्री० मरौ सम्भवति अच् । क्षुद्दुरालभायाम् मरुस्थादयो ऽप्यत्र । [खदिरे च ।
मरूद्भवा स्त्री० मरौ उद्भवति उद्+भू—अच् । कार्पास्यां, क्षुद्र-
मर्क गतौ सौ० पर० सक० सेट् । मर्कति अमर्कीत् ।
मर्कट पु० मर्क—अटन् । वानरे । ऊर्णनाभे (माकड़सा) स्थावर विष-भेदे (काड़गिला) पक्षिभेदे च स्वार्थे कन् । तत्रैव ।
मर्कटतिन्दुक पु० मर्कटप्रियस्तिन्दुकः शाक० । कपीलौ ।
मर्कटपिप्पली स्त्री० मर्कटप्रिया पिप्पली शाक० । अपामार्गे ।
मर्कटप्रिय पु० ईत० । क्षीरवृक्षे (खिरुइ) ।
मर्कटवासस् पु० ईत० । (माकड़साजाल) लूतास्यूते ।
मर्कटशीर्ष न० मर्कटस्य वानरस्य शीर्षमिव । क्षिङ्गुले ।
मर्कटास्य मर्कटस्य वानरस्यास्यमिव रक्तत्वात् । ताम्रे तद्वति त्रि० ।
मर्कटी स्त्री० मर्कटोऽस्त्यस्याः स्निग्धत्वेन अच गौ० ङीष् । अपामार्गे,

अजमोदायाम्, करञ्जभेदे (माकड़ाकरमचा) वानरयोषिति च ।

मर्कटीजाल न० छन्दोग्रन्थोक्ते प्रस्तावे लघुगुरुस्थानविवेकज्ञानाय चक्रभेदे ।

मर्कर पु० मर्क-अरच् । शृङ्गराजे (केशुरिया) भाण्डे सुरङ्गायां, बन्ध्यायां-स्त्रियाञ्च स्त्री० टाप् ।

मर्क्ष अर्षणे चु० उभ० सक० सेट् । मर्क्षयति-ते अममर्क्षत्-त ।

मर्त्त पु० मृ-तन् । मनुष्ये भूलोके च । तत्र भवः यत् । मर्त्यः । मनुष्ये ।

मर्द्दन न० मृद्-ल्युट् । गात्रपादादिसंवाहने, चूर्णने च ।

मर्द्दल पु० मृद्-घञ् मर्दं लाति ला-क । वाद्यभेदे (मादल) ।

मर्द्दित त्रि० चु० मृद्-क्त । चूर्णिते मन्थिते च ।

मर्ब गतौ भ्वा०पर० सक०सेट् । मर्बति अममर्बीत् ।

मर्म्मज्ञ पु० मर्म जानाति ज्ञा-क । तत्त्वज्ञे । मर्म्मविदादयोऽप्यत्र ।

मर्म्मन् न० मृ-मनिन् । जीवनस्थाने सन्धिस्थाने तात्पर्य्ये च "अपि धर्म्मागममर्म्मपारगैरि"ति नैषधम् ।

मर्म्मर पु० मृ-अरन् मुट् च । वस्त्रपर्णानां शब्दे (मड़मड़) इत्यव्यक्तशब्दे । पीतदारुणि, हरिद्रायाञ्च स्त्री०गौ० ङीष् ।

मर्म्मस्पृश् त्रि० मर्म्म प्राणस्थानं स्पृशति स्पृश-क्विन् । अरन्तुदे मर्म्म पीडके । [मर्म्मपीडके ।

मर्म्मविध् त्रि० मर्म्म सन्धिस्थानं विध्यति विध-क्विप् पूर्वदीर्घश्च ।

मर्य्या० अव्य० म्रियते-ऽवश्यिष्यतेऽत्र मृ-यत् । सीमायाम् स्त्रीत्वमपि । कर्त्तरि यत् । मनुष्ये पु० । "मेधो मर्य्या अपशस" इति कौथुमन्तः मर्य्यामनुष्या इति सायनवेदभाष्यम् ।

मर्य्यादा स्त्री० मर्य्यायां सीमायां दीयते दा-क्यच् पर्य्यादीयते वा परि+आ-दा-अङ् पृ०पस्य मः । न्याय्यपथस्थितौ, सीमायाम् कूले च ।

मर्व पूर्त्तौ भ्वा० पर० सक० सेट् । मर्वति अममर्वीत् ।

मल धृतौ भ्वा० आ० अक० सेट् । मलते अममलिष्ट ।

मल पु० ह्रियते शोध्यते मृज-कल-टिलोपः । पापे, पुरीषे, लौहादीनां

किट्टे कलङ्के, मण्डूरादौ, देहजाते, स्वेदस्नेहादौ, कर्पूरे, क्षपणे, वातपित्तकफेषु च।

मलघ्न पु० मलं विष्ठां हन्ति रेचयति हन-क। शाखोटवृक्षे क्लिप्। मलहाप्यत्र। नागदमन्यां स्त्री० ङीप्।

मलदूषित त्रि० ३त०। मलिने। [तत्फलस्य रेचकत्वात्।

मलद्राविन् पु० मलं द्रावयति रेचयति द्रु-णिच्-अण्। जयपाले

मलपू स्त्री० मलं मलस्थानं पुनाति पू-क्विप्। काकोडुम्बरिकायाम्।

मलभेदिनी स्त्री० मलं भेदयति रेचयति भिद्-णिच्। कटुकायाम्। (कट्की)।

मलमास पु० मलो दुष्टोमासः। 'अमावस्याहयं यत्र रविसंक्रान्तिवर्জ्जितम् मलमासः स विज्ञेय' इत्युक्ते रविसंक्रान्तिशून्ये शुक्लप्रतिपदादिदर्शान्तरूपे चान्द्रे मासे।

मलय पु० मल-कयन्। दक्षिणस्थे पर्व्वतभेदे। यत्र चन्दनजन्म तत्पर्व्वतान्तिकस्थे देशभेदे, उपवने, नन्दनवने नवसु द्वीपेषु मध्ये द्वीपभेदे, ऋषभदेवस्य पुत्रभेदे च।

मलयज न० मलये पर्व्वते जायते जन-ड। चन्दने। मलयदेशजाते वायौ पु०। तद्देशजाते त्रि०। [(तेजोडि)।

मलया स्त्री० मलयो देशोऽस्यस्याः कारणत्वेन अच्। त्रिदलतायां

मलविनाशिनी स्त्री० मलं तद्दोषं विनाशयति वि-नश-णिच्-णिनि। शङ्खपुष्पयाम्।

मलारि पु० मलस्य कलङ्कस्किट्टादेररिः। सर्व्वचारद्रव्ये।

मलिन त्रि० मल+अस्त्यर्थे इनच्। मलयुक्ते, दूषिते, कृष्णे च इनि। मलीत्यप्यत्र, दीपे, टङ्कणे, (सोहागा)।

मलिनमुख पु० मलिनं मुखं यस्य। वङ्गे, तस्यादौ धूमायमानत्वेन कृष्णत्वात् वानरे च। क्रूरे, खले च त्रि०।

मलिम्लुच पु० मली वैदिककर्म्मानर्हत्वेन दुष्टः सन् म्लोचति गच्छति म्लुच-क। मलमासे, वायौ, अग्नौ, चौरे च।

मलीमस त्रि० मल-ईमस च्। मलिने, लोहे, पुष्पकासीसे च।

मल्ल् धौ भ्वा० आ० अक० सेट् । **मल्लते अमल्लिष्ट ।**

मल्ल पु० मल्ल अच् । वायुपुराणोक्ते नियोद्धरि, **पात्रे**, देशभेदे कर्पोले च।

मल्लक पु० मल्लति धियतेऽत्र । **दीपाधारे पात्रे**, नारिकेलफलजाते पात्रे च (साला) स्वनामख्याते **स्त्री० टाप् अत इत्त्वम् ।**

मल्लज न० मल्ल इवे आयति जन्-ड । मरिचे ।

मल्लभू क्ली० मल्लक्रीडनस्य मल्लयुद्धस्य **योग्या भूःस्थानम्** देशभेदे ।

मल्लयुद्ध क्ली० । मल्लयुद्धे ।

मल्लार पु० मल्ल इव मल्लयति ल्ल-अच् । **रागभेदे रागिणीभेदे** मल्लिकायाञ्च स्त्री० ङीष् ।

मल्लि(ल्ली) स्त्री० मल्ल-इन् या-ङीप् । **मल्लिकायाम्** संज्ञायां कन् । [मल्लीहृदे आमोदितत्व [मल्लिके हंसभेदे, **मल्लिकाच्चोऽयत ।**

मल्लिकाक्षु पु० मल्लिकाया इव क्षुरस्य । **कुटजवृक्षे** करञ्ज वृक्षे च हला० । मल्लिकाक्षुमे ।

मल्लिषेण न० मल्लिषि षणस्य । आवे ।

मव बन्धे भ्वा० पर० सक० **सेट्** । मवति अमवीत् अमावीत् ।

मव्य बन्धे भ्वा० पर० सक० सेट् । मव्यति अमव्यीत् । [माषीत् ।

मश आमौ अक० कोपे सक० भ्वा० पर० सेट् । **मशति अमशीत्—अ-मशक** पु० मश-वुन । दंशमेदे (मशा) ।

मशकिन् पु० मशकोऽस्त्यस्य इनि । उदुम्बरवृक्षे ।

मशि (शी) स्त्री० मश (स) इन् या ङीप् । (काशी) **मषलेखन-द्रव्ये**, नीलमेघालिकाद्रव्ये च ।

मष वधे भ्वा० पर० सक० सेट् । मषति अमषीत् अमाषीत् ।

मस परिणामे परिमाणे च दि० पर० अक० सेट् । **मस्यति अमसत् अमसीत् अमासीत् ।** पुषादित्वं तेन अमसदित्येवेति पाणिनीयाः।

मसन न० मस-ल्यु । सोमराजीवृक्षे ।

मसया स्त्री० मस अच् या । मत्सरे ।

मसिना स्त्री० मसि इवार्थे कन् । मसि-तुल्ये [मात् ।

मसिजल न० मसिनिश्रितं जलम् । (काली) लेखनद्रव्ये ।

मसिधान न० मसिर्धीयतेऽत्राधारे ल्युट् । मस्याधारे (दोआत स्त्रीत्वमपि तत्र ङीप् ।

मसिपण्य पु० मसिस्तदुपलक्षितमक्षरमेव पण्यं विक्रेयं यस्य । लेखनोपजीविनि । [लेखन्याम् ।

मसिप्रसू स्त्री० मस्याः प्रसूरिव । मस्याधारे । मसिः प्रसूरिव यस्याः ।

मसीना स्त्री० मस—ईनच् । अतस्याम् (तिसि) ।

मसु (सू) र पु० मस—उरच् ऊरच् वा । कलायभेदे (मसूरी) वेस्यायां, व्रीहिभेदे च स्त्री० टाप् । [ओटी ।

मसूरद्विदला स्त्री० मसूरस्येव द्विदलं यस्याः । कृष्णत्रिवृति कालतेमसूरिका स्त्री० मसूरेव इवार्थे कन् । वसन्तरोगे, कुट्टिन्याञ्च ।

मसूरी स्त्री० मस-उरच् गौ० ङीष् वसन्तरोगे, त्रिवृति, रक्तत्रिवृतिति च । [अतस्यां स्त्री० ।

मसृण त्रि० मस-क्त्रण, मस्+ऋष-कपु० वा । स्निग्धे, अकर्कशे च ।

मस्क गतौ भ्वा० पर० अक० सेट् । मस्कति अमस्कित । [ज्ञाने च ।

मस्कर पु० मस्क अरच् । वंशे, रज्जुयुक्तदण्डे च । भावे अरच् । मतौ,

मस्करिन् पु० मस्करो ज्ञानं गतिर्वाऽस्यास्ति इनि, मा कर्त्तुं कर्मनिषेद्धुं शीलमस्य मा+क्र-इनि, मस्करमस्करिणावितिनि० । परिव्राजके विधानेन स्वकर्म्मपरित्यागके भिक्षौ । 'धारयन् मस्करिव्रत'मिति भट्टिः चन्द्रे च । [अणु मस्कर्य्यणु:

मस्ज शाने तु० पर० अक० अनिट् । मस्जति अमाङ्क्षीत् । क्त मग्नः ।

मस्त (क) न० मस-क्त । मस्तके । उच्चे त्रि० । संज्ञायां कन् शिरसि ।

मस्तकस्नेह पु० स्नेन० । शिरः स्थितमज्जायाम् मस्तिष्के ।

मस्तङ्ग न० मस्यति परिणमते मस्तञ्च कर्म्म० । देवदारुणि ।

मस्तिष्क न० मस-क्तिन् मस्तिं परिणतिभेदं कुष्कति कुष्क गतौ क्त पृ० । मस्तकस्थे स्नेहाकारे पदार्थे (मगज) सांख्यमस्तिष्क पक्ष प्राग्भारे" इति प्रबोधचन्द्रोदयम् । [यम् ।

मस्तमूलक न० मस्तस्य मूलमिव इवार्थे कन् । शिरोधरायाम् ग्रीवा-

मह पूजायां भ्वा० पर० सक० सेट् । महति अमहीत् ।

मह दीप्तौ चु० उ० अक० सेट् इदित् । मंहयति-ते अममहत्-त ।

मह इच्छौ भ्वा० आ० अक० सेट् इदित् । मंहते अमंहिष्ट ।

मह पूजने अद० चु० उभ० सक० सेट् । महयति-ते अममंहत्-त ।

मह पु० मह-अच् । उत्सवे, सततानन्दजनकव्यापारे, तेजसि यज्ञे, महिम्नि च ।

महत् त्रि० मह-अति । विपुले, दृढ़े च स्त्रियां महती । राज्ञे न० । साङ्ख्योक्ते महत्तत्वे पु० "प्रकृतेर्महानिति" स्मृतिः ।

महती स्त्री० मह-अति गौ० ङीष् । वीणाभेदे नारदवीणायाम् । अवेक्षमाणं महतीं मुहुर्मुहुरिति माघः । दृढ़त्वां, याच्ञोक्तौ, विपुलायां स्त्रियाञ्च ।

महत्तत्व न० कर्म्म० । सांख्योक्तप्रकृत्यादिचतुर्विंशतितत्त्वमध्ये प्रकृति-कार्य्ये अहङ्कारादिकारणे निश्चयात्मकवृत्तिविशिष्टे तत्त्वभेदे ।

महर् अव्य० मह-अरु । ऊर्द्ध्वे लोकभेदे ।

महर्लोक पु० कर्म्म० । भूरादिषु ऊर्द्ध्वे सप्तलोकान्तर्गते चतुर्थे लोके तत्परिमाणादिकं वाचस्पत्ये दर्शयिष्यते ।

महर्षि पु० कर्म्म० । परमर्षिशब्दार्थे वेदव्यासादौ ।

महस् न० मह-असुन् । तेजसि, यज्ञे, उत्सवे च ।

महा स्त्री० मह-अच् । (गोरुचनाकलिया) गोपवल्लभाम् ।

महाकपालिनी स्त्री० महत् कपालकमस्यास्त्यनि ङीष् । कपिलमनसा वृक्षभेदे ।

महाकन्द पु० कर्म० । लशुने, राजपलाण्डौ, मूलके च ।

महाकपित्थ पु० कर्म० । बिल्ववृक्षे ।

महाकरञ्ज पु० कर्म्म । करञ्जभेदे (कांटाकरमचा) ।

महाकर्णीहार पु० कर्म० । आरग्वधे (सोंदाल ।

महाकाय पु० ब्व० । शिवानुचरभेदे नन्दिनि, हस्तिनि च । विपुलदेहवति त्रि० । कर्म० स्थूलदेहे पु० ।

महाकार्त्तिकी स्त्री० कार्त्तिकीमधिकृत्य 'प्रजापत्यं यदाक्षं तद्यैत-

स्यां नराधिप ! । सा महाकार्त्तिकी प्रोक्ते"त्युक्तायां रोहिणी-नक्षत्रयुक्तायां कार्त्तिकपौर्णमास्याम् ।

महाकाल पु० कर्म० । अनवच्छिन्ने काले, शिवे च 'महाकालेन च स-मिभि"तिकालिकाध्यानम् (माकाल) लताभेदे, भैरवभेदे च 'महा-कालं यजेद्देव्या दक्षिणे धूम्रवर्णक"मिति तन्त्रम् ।

महाकाव्य न० कर्मः कर्म० काव्यं कर्म० । सर्गबन्धरूपे अष्टाधिक-सर्गके ग्रन्थभेदे तल्लक्षणं साहित्यदर्पणे दृष्ट० ।

महाकुक्षी स्त्री० महती कुक्षीव (पाना) लट्फले ।

महाकुल न० कर्म० । 'देशपुरुषविख्यातं श्रोत्रियाणां महाकुल"मिति मनुनोक्ते दशपुरुषावधिवेदाध्ययनवंशे ।

महाकुलीन त्रि० महाकुले भवः खञ् । महाकुलोद्भवे ।

महाकोशफला स्त्री० कर्म० । देवदालीलतायाम् ।

महाकोषातकी स्त्री० कर्म० । हस्तिघोषायाम् ।

महागन्ध न० महान् गन्धोऽस्य । हरिचन्दने, बोले च । जलवेतसे पु० । नागबलायां, कविकायां, कूटजे च स्त्री० ।

महागुरु पु० कर्म० । 'त्रयः पुरुषस्यातिगुरवो भवन्ति पिता माता चाचार्यश्चे"ति स्मृत्युक्ते पुरुषस्य पित्रादौ 'पतिरेकोगुरुः स्त्रीणा' मित्युक्ते दत्तकन्यायाभर्त्तरि, अदत्तकन्यायाः पितरि, मातरि च । महागुरुनिपाते च 'काम्यं किञ्चिन्नचाचरेदि"ति स्मृतिः ।

महागुल्मा स्त्री० महान् गुल्मोऽस्याः । सोमवल्ल्याम् ।

महागुहा स्त्री० महती गुहेव मूलमस्याः बहुव्रीहिः । अश्वत्थवृक्षे ।

महाग्रीव पु० महती ग्रीवास्य । उष्ट्रे । दीर्घग्रीवायुक्ते त्रि० ।

महाघोषा स्त्री० घुष्यते कर्म्मणि घञ् कर्म० । कर्कटशृङ्ग्याम् । (काक-ड़ाशिङ्गे) । कुन्दुरुक्यां च । महान् घोषोऽस्य । विपुलशब्दयुक्ते त्रि० । [वयसि त्रि० । कर्म० । विपुलाङ्गे न० ।

महाङ्ग पु० महदङ्गमस्य । उष्ट्रे । गोजुरके रक्तचित्रके च । विपुला-

महाच्छद पु० महान् छदोऽस्य । देवदारुवृक्षे ।

महाच्छाय पु० महती छाया यस्य । वटवृक्षे । विपुलच्छायायुक्ते त्रि०

महाच्छिद्रा स्त्री० महत् छिद्रमस्याः महाभेदायाम् ।

महाजटा स्त्री० महती जटा यस्याः । वटवृक्षे । विपुलजटावति त्रि० । कर्म० । वृहत्यां, जटायाम् स्त्री० ।

महाजन पु० कर्म्म० । वेदवाक्येषु श्रद्धावति जने । 'महाजनो येन गतः स पन्थाः' इति भारतम् ।

महाजम्बू स्त्री० कर्म० । राजजम्बूम् ।

महाजाली स्त्री० कर्म० । पीतवर्णघोषायाम् ।

महाज्यैष्ठी स्त्री० 'ऐन्द्रे मुरुः मणौ चैव प्राजापत्ये रविस्तथा । पूर्णिमा रविवारेण महाज्यैष्ठी प्रकीर्त्तिते" त्यादयुक्तलक्षणायां ज्यैष्ठपौर्णमास्याम् । 'महाज्यैष्ठ्यां तु यः पश्येत् पुरुषः पुरुषोत्तमम्' इति पुराणम् ।

महाज्योतिष्मती स्त्री० (वडमालकाक्रान्ती) लताभेदे ।

महाढ्य पु० महेन उत्सवेनाढ्यः । कदम्बे कर्म्म० । महाधनवति त्रि० ।

महातरु पु० कर्म० । स्नुहीवृक्षे विपुलवृक्षे च ।

महातल न० कर्म० । अधःस्थेषु पातालेषु मध्ये पञ्चमे पाताले ।

महातारा स्त्री० कर्म० । तन्त्रोक्ते तारिणीभेदे, जिनदेव्याञ्च ।

महातालो स्त्री० कर्म० । विपुलतालीभेदे राजताल्याम् ।

महातिक्त पु० कर्म० । निम्बवृक्षे । अतिशयतिक्तरसवति त्रि० । यवतिक्तायां स्त्री० ।

महातीक्ष्ण स्त्री० कर्म० । भल्लातकवृक्षे (भेला) अतितीक्ष्णे त्रि० ।

महातेजस् पु० महत् तेजोऽस्य । पारदे । अतितेजस्विनि त्रि० कार्त्तिकेये वह्नौ च पु० ।

महात्मन् त्रि० महान् आत्मा स्वभाव आशयो यस्य । महाशये ।

महादान न० कर्म्म० । विनायकादिरुद्रान्तजपाङ्गे तुलापुरुषादि षोड़शपदार्थदाने 'अथातः संप्रवक्ष्यामि महादानस्य लक्षणं" मित्युपक्रम्य 'आद्यन्तु सर्व्वदानानां तुलापुरुषसंज्ञकमित्यादिना षोड़शदानान्यभिधाय 'विनायकादिपञ्चलोकपाल वसुद्वादित्यमरुद्गणानाम् । 'ब्रह्माच्युतेशार्कधनपतीनां स्वमन्त्रतोऽष्टोत्तशतद्वयं स्यात् । जप्यानि

लक्षणानि तत्रैव चैषामनुक्रमेणाऽपि यथा स्वरूप"मित्युक्तं मात्स्ये ।
विस्तरस्तु मत्कृतसत्तादानादिपद्धतौ ज्ञेयः ।

महादाह न० कर्म्म० देवदाहवि ।

महादेव पु० कर्म्म० । 'ब्रह्मादीनां सुराणाञ्च मुनीनां ब्रह्मवादिनाम्
तेषां महत्त्वात् देवोऽयं महादेवः प्रकीर्त्तितः' इति इत्युक्ते,
"महती पूजिता विष्णे मूलप्रकृतिरीश्वरी तस्याः देवः पूजितत्व
महादेवस्ततः स्मृत"इत्युक्ते च शिवे । [बृहद्धर्म्मे च ।

महाद्रुम पु० कर्म० । अश्वत्थवृक्षे । तस्य विष्णुरूपत्वात् महत्त्वम्

महाधन पु० महत् मूल्यरूपं धनमस्य । बहुमूल्ये । सुवर्णे विल्वके,
मनोज्ञवस्त्रे च क्लीबे पु० । अतिधनवति त्रि० ।

महाधातु पु० कर्म० । स्वर्णे ।

महानदी स्त्री० । ओड्रदेशस्थे नदीभेदे, सप्तद्रमामित्यां नद्याञ्च ।

महानन्द पु० महान् अतिहृद्यः आनन्दो यत्र । मोक्षे कर्म० अति-
शयानन्दे पु० "माघमासस्य या शुक्ला नवमी लोकपूजिता । महा-
नन्देति सा प्रोक्ते"त्युक्तायां माघशुक्लनवम्यां सुरायां नदीभेदे
च स्त्री० ।

महानन्दि पु० कलौ स्वतान्त्रिकस्य महापद्मानन्दपमेदस्य पितरि ।

महानवमी स्त्री० कर्म० । आश्विनशुक्लमधिकृत्य "ततोऽपि नवमी
यस्मात् सा महानवमीस्मृते"त्युक्तायाम् आश्विनशुक्लनवम्याम् ।

महानस न० महदनः संज्ञायाम् अच् । पाकस्थाने ।

महानाटक न० दृश्यकाव्यनाटकभेदे 'एतदेव यदा सर्वैर्ख्याति सा० दं० ।

महानाद पु० महा+नादोऽस्य । गजे, गर्जन्मेघे, सिंहे, उष्ट्रे च ।

महानिद्रा कर्म० । मरणे तत्र पुनः प्रत्युत्थानाभावात् ।

महानिम्ब पु० कर्म० । (धोड़ानिम) वृक्षभेदे ।

महानिशा स्त्री० "महानिशा तु विज्ञेया मध्यमप्रहरद्वय"मित्युक्ते रात्रेर्मध्यमप्रहरद्वये । [तन्त्रभेदे न० ।

महानील पु० कर्म० । भृङ्गराजे, पानभेदे, नागभेदे, महाजम्बूवृक्षे च

महानुभाव पु० महान् अलौकिक आशयो यस्य । महाशये ।

महापञ्चविष "पृष्ठे च कालकूटस्य सुलको वत्सनाभकः । शृङ्गकर्णेति योगोऽयं महापञ्चविषाभिध" इत्युक्ते पञ्चविधे विषे ।

महापत्त्रा स्त्री० महत् पत्त्रमस्याः । महाजम्बूवृक्षे । [च ।

महापथ पु० कर्म० । राजमार्गे, हिमालयोत्तरस्थे स्वर्गारोहणपथे

महापद्म पु० कर्म० अष्टनागमध्ये, नागभेदे, कुबेरस्य निधिभेदे, "अर्बुदमब्जं खर्वं निखर्व्वमहापद्मेति लीलावत्युक्तायाम् अयुतकोटिसंख्यायां, तत्संख्यान्विते, नृपभेदे च ।

महापातक न० 'ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः महान्ति पातकान्याहुस्तत्संसर्गश्च पञ्चमः इत्युक्तेषु पञ्चसु पातकेषु ।

महापिण्डीतक पु० कर्म० । कृष्णवर्णे विपुलमदनवृक्षे ।

महापीलु पु० कर्म० । मधुपीलौ अतिमधुरत्वात्तस्य हि महत्त्वम् ।

महापुराण न० "सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषाञ्च पालनम् । कर्मणां वासना वार्त्ता मन्वन्तराञ्च क्रमेण च । वर्णानां प्रलयानाञ्च मोक्षस्य च निरूपणम् । उत्कीर्त्तनं हरेरेव देवानाञ्च पृथक् पृथक् । महापुराणं विज्ञेयमेकादशक लक्षणैः" त्युक्ते व्यासप्रणीते पुराणभेदे ।

महापुरुष पु० कर्म० । सुरश्रेष्ठे, नारायणे च । "वन्दे महापुरुष ! ते चरणारविन्दमि"ति भागवतम् । [न्यस्य । यत्नमूल्याम् ।

महापुरुषदन्ता पु० महापुरुषस्य विष्णोः दन्ता इव महत्त्वात् मूला-

महापुष्पा स्त्री० महत् यन्त्रपुष्पत्वेन प्रशस्तं, पत्त्रापेक्षया स्थूलं वा पुष्पं यस्याः । अपराजितायाम् ।

महाप्रलय पु० कर्म० । ब्रह्मणो दिनावसाने जायमानः सर्वभूत क्षयः प्रलयः तस्यैव स्वमानेन शतवर्षावसाने जायमानस्तु महान् प्रलयः तस्मिन्, तदुपलक्षिते, जन्यद्रव्यानधिकरणीभूते काले च । जन्यभावानधिकरणीभूते काले इत्यन्ये ।

महाप्रसाद पु० "पादोदकञ्च निर्म्माल्यं नैवेद्यञ्च विशेषतः । महाप्रसाद इत्युक्ता याह्यं विष्णोः प्रयत्नत" इत्युक्ते देवनैवेद्यादौ विपुलप्रशस्तायाञ्च ।

महाप्राण पु० महान् बहुकालस्थायित्वात् श्रेष्ठः प्राणोऽस्य । द्रोणकाके कर्म० । वर्णोच्चारणस्य बाह्यप्रयत्नभेदे, स च वर्ग्यद्वितीयचतुर्थवर्णानां शषसहानामुच्चारणप्रयत्नः तेषामुच्चारणे हि प्राणवायोर्भूयान् प्रयास इति तेषामपि महाप्राणत्वमुपचारात् ।

महाफल पु० महत् पक्वापेक्षया बृहत् फलमस्य । बिल्ववृक्षे । इन्द्रवारुण्यां (राखालशशा) स्त्री० ।

महाबल पु० महत् बलं यस्य । बायौ, बुद्धे च बलवति त्रि० महत् बलं यस्मात् पू ब० । सीसके न० । पीतवाद्यालके स्त्री० ।

महाभारत पु० न० "चत्वारश्चैकतो वेदा भारतञ्चैतदेकतः । पुरा किल सुरैः सर्वैः समस्य तुलया धृतम् । चतुर्भ्यः सरहस्येभ्यो वेदेभ्योऽभ्यधिकं यदा । तदा प्रभृति लोकेऽस्मिन् महाभारतमुच्यते । महत्त्वात् भारतत्वाच्च महाभारतमुच्यते" इत्युक्तलक्षणे व्यासप्रणीते लक्षश्लोकात्मके ग्रन्थभेदे ।

महाभीता स्त्री० कर्म० । लज्जालुलतायाम् स्पर्शमात्रेण हि सङ्कोचेन तस्या अतिभीतत्वम् । अतिभीते त्रि० ।

महाभूत न० कर्म० । सर्वेषां पञ्चात्मकतापाप्या स्थूलतापन्नेषु बृहत्सु पृथिव्यप्तेजोवायुाकाशेषु पञ्चसु भूतेषु । "तं वेधा विदधे नूनं महाभूतसमाधिने" ति रघुः ।

महाभृङ्ग पु० कर्म० । नीलभृङ्गराजे ।

महामनस् त्रि० महदुदारं मनस्तद्व्यापारोऽस्य । महाशये ।

महामात्र पु० "मन्त्रे कर्मणि भूषायाम् पित्ते माने परिच्छदे । मात्रा तु महती येषां महामात्रास्तु ते स्मृता" इत्युक्ते । प्रधानामात्ये ।

महामाया स्त्री० कर्म० अन्यस्मिन् अन्यधर्मारोपभासो हि माया सर्वजगन्मूलत्वात्तस्या महत्त्वम् । जगत्कारणभूतायाम् अविद्यायां तदधिष्ठातृयां दुर्गायाञ्च "महामाया हरेश्चैषा यया संमोह्यते जगदि" ति चण्डी ।

महामाष पु० कर्म० । राजमाषे मुद्गाद्यपेक्षया तस्य हि महत्त्वम् ।

महामूल पु० महत् वीर्यकारित्वात् श्रेष्ठं मूलमस्य । राजपलाण्डौ ।

महामृग पु० महान् मृगः यत्नः । गजे, भरभे च तयोर्हि पशुषु महत्त्वात् तथात्वम् ।

महामेद पु० स्त्री० ६ब० । वैद्यकप्रसिद्धाष्टवर्गोक्ते ओषधिभेदे ।

महामोह पु० महान् मोहः आत्मिकेतरको वस्तुनोऽनिष्टेऽपि रागः । संसारतद्विषयकारणरूपेऽज्ञानभेदे "तमोऽविवेको मोहः स्यादन्तः करणविभ्रमः । महामोहस्तु विज्ञेयो राज्यभोगसुखेषणेत्युक्ते मैथुनादिसुखभोगेच्छारूपे अन्तः करणवृत्तिभेदे च वैषयिकसुखस्य वस्तुतोऽनिष्टत्वात् तथात्वम् ।

महाम्ल न० कर्म० । अम्लवर्गे, तिन्तिड़ीफले च तद्वृक्षे पु० ।

महायज्ञ पु० कर्म० । नित्यं गृहस्थकर्त्तव्ये वेदाध्ययनाग्निहोत्रयज्ञ-पितृतर्पणभूतबलिमनुष्यातिथिपूजनरूपेषु पञ्चसु कर्मसु ।

महारजन न० कर्म० । काष्ठने । तस्य हि रक्तकत्वात् महत्त्वम्, वृक्षद्रौण्ये धुस्तूरे च पु० ।

महारजन न० रजनेन ल्युट् कर्म० । कुसुम्भपुष्पे, स्वर्णे च ।

महारथ पु० "एको दश सहस्राणि योधयेद्यस्तु धन्विनाम् । अस्त्र-शास्त्रप्रवीणश्च विज्ञेयः स महारथः" इत्युक्ते योधभेदे । [न० ।

महारस पु० ६ब० खर्ज्जूरे, कशेरुणि, द्राक्षे, पारदे च । काडिके

महाराज(जि)का पु० महान् चासौ राजते वृन् पृ०इत्वं वा । विंशत्य-धिकशतद्वयसंख्याते गणदेवभेदे ।

महाराजद्रुम पु० कर्म० । आरग्वधे (सोन्दाल) ।

महारात्रि स्त्री० "ब्रह्मणश्च निपाते च महाकल्पो भवेन्नृप ! । प्रकी-र्त्तिता महारात्रि"रित्युक्ते महाकल्पाख्ये महाप्रलये "अहोरा-त्रात् परं यत्तु मुहूर्त्तद्वयमुच्यते । सा महारात्रिरुद्दिष्टे"ति तन्त्रो-क्ते अहोरात्रोपरि मुहूर्त्तद्वयात्मके रात्रिकाले ।

महाराष्ट्र पु० कर्म० । (महाराट्टा) देशभेदे । तद्वासिनः कारणत्वेन तस्येदमा० यच् गौ ङीप् । जनपदत्वात्, भाषाभेदे च स्त्री० ।

महारिष्ट पु० कर्म० । गिरिजाते निम्बभेदे । अम्लफले न० ।

महारोग पु० कर्म० । "उन्मादो राजयक्ष्मा च श्वासश्चाम्लपित्तमेव च ।

मधुमेहश्चाश्मरी च तथोदरभागन्दरौ । इत्येतेऽष्टौ महारोगा महापातकसम्भवा' इत्युक्ते महापातकजन्येषु उन्मादादिषु रोगेषु ।

महारौरव पु० रौरवस्य अण् कर्म० । 'महारौरवसंज्ञस्तु ऊर्द्धाधस्ताच्चसंपुटे । धम्यते खदिराङ्गारैः पच्यते कालमत्यय'मित्युक्ते नरकभेदे ।

महार्घ त्रि० महानर्घो मूल्यं यस्य । बहुमूल्ये ।

महार्णव पु० कर्म० । महासमुद्रे ।

महार्द्रक न० कर्म० । वनार्द्रके ।

महालय पु० महान् आत्यन्तिको लयो यत्र । परमात्मनि कर्म० । वृहद्गालये तीर्थस्थाने, विहारे, भौराश्विनकृष्णपक्षे च न० । 'तस्यां दद्यात् न चेद्वित्तं पितॄणां वै महालये इति स्मृतिः ।

महालक्ष्मी स्त्री० कर्म० । चण्डीद्वितीयचरितदेवतारूपे 'त्रिनेत्रैरिभमर्द्दिनीमिह महालक्ष्मीं सरोजस्थितां मित्युक्तलक्षणे अष्टादशभुजान्विते दुर्गाशक्तिभेदे, तन्त्रोक्ते लक्ष्मीभेदे च ।

महालोभ ० कर्म० । लोभभेदे (पाठिया लोध) ।

महावराह स्त्री० वृणोति विस्तृणाति वृ—अच् कर्म० । दूर्वायाम् ।

महावराह पु० कर्म० । वृहद्वराहरूपधारिणि भगवदवतारभेदे ।

महावरोह पु० महान् अवरोहोऽस्य । वटवृक्षे ।

महावल्ली स्त्री० कर्म० । माधवीलतायाम् ।

महावाक्य न० कर्म० । परस्परसंबद्धार्थके वाक्यसमुदायरूपे एकवाक्ये "वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते" इति मीमांसकाः । वेदान्तोक्ते ब्रह्मविद्याप्रतिपादके "तत्त्वमस्यादयुपनिषद्वाक्ये, दानादौ अभिलाषवाक्ये च ।

महाविद्या स्त्री० कर्म० । "काली तारा महाविद्या षोड़शी भुवनेश्वरी भैरवी, छिन्नमस्ता च विद्या धूमावती तथा । बगला सिद्धविद्या च मातङ्गी कमलात्मिका । एता: दश महाविद्या" इत्युक्तासु कालीआदिषु दशसु देवीषु ।

महाविषुव न० रवेर्महाविषुवसंक्रमणे । तत्संक्रमणञ्च स्वरूपतः संक्रमणं,

प्रभापुञ्जस्य संक्रमणं वा। तत्र प्रभापुञ्जसंक्रमणमयनांशानुसारेण अष्टमाशाधिकषट्नक्षत्रैरेकैकार्शं परित्यज्य ततः पश्चात्पश्चात्तरादौ स्थाने भवति इदानीं च पश्चादयनं, पूर्वायने तु पूर्वपूर्वतरादौ स्थाने भविष्यति। इत्यतस्तज्जलमनियतस्थानत्वात् खल्वपसंक्रमस्तु स्थिरः सर्वदैकस्थाने जायमानत्वात्।

महावीचि पु० नास्ति वीचिः सुखं यत्र स अवीचिः कर्म्म०। सुखरहिते, "यत्र कल्लोलेन नीयते" इत्युक्ते वा नरकभेदे।

महावीर पु० कर्म्म०। गरुडे, हनुमति, सिंहे, यज्ञाग्नौ, वज्रे श्वेतलशुने, कोकिले, धनुर्द्धरे, एकवीरदत्ते, महाशूरे च वीरका-कोलीदत्ते स्त्री०।

महावीर्य्य पु० ईश्व०। वाराहीकन्दे, परमात्मनि च। अतिबलवति त्रि०। वनकार्पास्यां, संज्ञायां-स्त्र्यर्थत्वाच्च स्त्री०।

महावृहती स्त्री० कर्म्म०। वार्त्ताक्याम्।

महावृक्ष पु० कर्म्म० क्षुद्रवृक्षे, वृहत्तरौ च।

महाव्याधि पु० कर्म्म०। महारोगे, कुष्ठादौ रोगे च।

महाव्याहृति स्त्री० कर्म्म०। वैदिके भूर्भुवःस्वरात्मके मन्त्रत्रये।

महाव्रण न० कर्म्म०। (नालिघा) दुष्टव्रणे।

महाव्रत न० कर्म्म०। अतिशयव्रते शारदीयदुर्गापूजादौ 'महाव्रतं महापुण्यं शङ्करादैरनुष्ठितमि"ति पुराणम्। हादशवार्षिके प्रायश्चित्तात्मके व्रतभेदे च।

महाशङ्ख पु० कर्म्म०। तन्त्रे वीराचारप्रसिद्धे नरकपालास्थिजाते 'नरललाटास्थिखण्डेन रचिता जपमालिका। महाशङ्ख मयी माला तारिणीराजपे प्रिये"त्युक्ते माल्यभेदे, वृहच्छङ्खे च। 'पौण्ड्रं दध्मौ महाशङ्ख'मिति गीता।

महाशठ पु० कर्म्म०। राजधुस्तूरे। अतिधूर्त्ते त्रि०।

महाशणपुष्पी स्त्री० शणस्येव पुष्पमस्य ङीप् कर्म्म०। वृहच्छणपुष्पायाम्। स्वार्थे कन्। तत्रैव।

महाशता स्त्री० शतं मूलानि सन्त्यस्य अच् कर्म्म०। वृहच्छतावर्य्याम्

महाशतावरी स्त्री० कर्म्म० । वृक्षशतावर्य्याम् ।
महाशय त्रि० महान् उदार आशयो यस्य । महानुभावे ।
महाशाखा स्त्री० महती शाखास्याः । नागबलायाम् ।
महाशालि पु० कर्म्म० । स्थूलशाली । [शीतले त्रि० ।
महाशीता स्त्री० महता शीता शीतलगुर्य्या । शतमूल्याम् अति-
महाशुक्ति स्त्री० महती शुक्ताकारणत्वेन प्राशस्त्यात् शुक्तिः । शुक्ताहेतौ शुक्तौ ।
महाशूद्र पु० कर्म्म० । आभीरे (आहीर) जातिभेदे तत्कन्यायां ङीप् ।
महाश्मशान न० कर्म्म० । काश्मान् शवमूलकर्म्म सहितसर्व्वजीवानां पुनरुत्पादनाय नाशाधारत्वात् तस्यात्तथात्वम् ।
महाश्यामा स्त्री० कर्म्म० । श्यामालतायां, शिंशपभेदे च ।
महाश्रावणिका स्त्री० कर्म्म० । (शुलकुड़ी) क्षुपभेदे ।
महाश्वेता स्त्री० कर्म्म० सरस्वत्याम्, क्षुपभूमिकुष्माण्डे च ।
महाष्टमी स्त्री० कर्म्म० । 'आश्विने शुक्लपक्षस्य भवेद्या तिथिरष्टमी । महाष्टमीति सा प्रोक्तो'त्युक्तायामाश्विनशुक्लाष्टम्याम् ।
महासर्ज्ज पु० कर्म्म० । असनवृक्षे, धनवृक्षे च (काटाल) ।
महासह पु० कर्म्म० । पुष्पाधाने वृक्षभृत्ते, मापपर्ण्यां, अस्थान-वृत्ते च स्त्री० । अतिसहे त्रि० ।
महासान्तपन न० । कर्म्म० । सप्ताहसाध्ये स्मृत्युक्ते व्रतभेदे ।
महासार पु० महान् सारोऽस्य । दृढ़सदिरे ।
महासुगन्धा स्त्री० सुष्ठु गन्धोऽस्याः कर्म्म० । गन्धनाकुल्याम्, अति-सुगन्धयुक्ते त्रि० ।
महासेन पु० महती सेनाऽस्य । कार्त्तिकेये । बहुसैन्याधिपतौ त्रि० ।
महास्कन्ध पु० महान् स्कन्धोऽस्य । जम्बूवृक्षे ।
महाहास पु० कर्म्म० । अट्टहासे, उच्चैर्हासे ।
महाहिगन्धा पु० अहेर्गन्धो हिंसा यस्मात् अहिगन्धो नकुलः सम-लोमत्वात्तस्य अच् कर्म्म० । गन्धनाकुल्याम् ।
महाह्वा स्त्री० कर्म्म० । क्षुपविशेषे (आवकुशी) अतिथौ त्रि० ।

महि (ही) स्त्री० मह क्तन् वा ङीप् । पृथिव्याम् । ङीबन्तस्तु मा-लवदेशस्थे नदीभेदेऽपि ।

महिका स्त्री० महते मह-कन् । हिमे ।

महिमन् पु० महतो भावः इमनिच् टिलोपः । महत्त्वे, ऐश्व-रैश्वर्यभेदे च ।

मृ (मि) हिर पु० मह-(सिह-) किरच् । सूर्य्ये ।

महि(हे)ला स्त्री० मह-इलच् । योषिति, प्रियङ्गुलतायां, रेणुका-गन्धद्रव्ये, मत्तायां स्त्रियाञ्च । एलच् । महेलापि, योषिति ।

महिष पु० मह-इषच् । खनामख्याते पशुभेदे, महिषासुरे च । रा-ज्ञः कृताभिषेकायां स्त्रियां, महिषजातिस्त्रियाम्, ओषधिभेदे च स्त्री० ङीप् । [मादयोऽध्यात ।

महिषध्वज पु० महिषो ध्वजचिह्नं वाहनत्वेनास्य । यमे । महिषवाह-

महिषमर्दिनी स्त्री० महिषं महिषासुरं मृद्नाति, मृद्-णिनि ङीप् ह्रस्व० । दुर्गाभेदे ।

महिषाक्ष पु० महिषस्याक्षीव अच् । गुग्गुलुभेदे । स्वार्थे कन् । तत्रैव ।

महिषासुर पु० रम्भासुरेण महिष्यामुत्पादिते असुरभेदे, महिषाक्ष-गुग्गुलौ च । [भूमिजगुग्गुलौ ।

महिषासुरसम्भव पु० महिषासुरात्तनूभेदसः सम्भवति भू-अच् ।

महीक्षित् पु० महीं क्षयते ईष्टे क्षि-ईश्वर्ये क्विप् तुक् च । नृपे ।

महीज न० महा जायते जन-ड । आर्द्रके । मङ्गल्यपद्मे, मर-काखरे च पु० ।

महीध्र पु० महीं धारयति धृ-क । पर्व्वते । अच् । महीधरोऽप्यत्र ।

महीप्राचीर न० महाः प्राचीरमिवावरकत्वात् । सस्यक्षेत्रे ।

महीभृत् पु० महीं बिभर्त्ति धारयति पालयति वा भृ-क्विप् । पर्व्व-ते, भूमिपाले च ।

महीयस् त्रि० अतिशयेन महान् महत्+ईयसु । अतिमहति 'महतो महीयानि"ति स्मृतिः ।

महीयमान त्रि० महीयते मही+कण्ड्वा० यक्—शानच् । पूज्ये, श्रेष्ठे च 'महीयमाना भवतातिमात्र" इति भट्टिः ।

महीरुह पु० महां रोहति रुह—क । वृक्षे, शाके च ।

महीलता स्त्री० महा लतेव । (केंचो) किञ्चुलके ।

महेच्छ त्रि० महती इच्छा यस्य । महाशये ।

महेन्द्र पु० महान् इन्द्रः इन्द्रस्यापि नियन्तृत्वात् । परमेश्वरे, महेन्द्रार्थवति इन्द्रे, जम्बु द्वीपस्थपर्व्वतभेदे च ।

महेन्द्रकदली स्त्री० महेन्द्रप्रिया तद्वर्णा वा कदली । कदलीभेदे ।

महेन्द्रपुरी स्त्री० ६त० । अमरावत्याम् । महेन्द्रनगर्य्यादयोऽप्यत्र ।

महेन्द्रवारुणी स्त्री० महेन्द्रश्च वरुणश्च तयोरियं प्रियत्वात् । अण् देवताद्वन्द्वे उत्तरपदवृद्धिः । (माकाल) लताभेदे ।

महेरणा स्त्री० महं गजोत्सवमीरयति रि ल्यु । शब्दकारयितृचूते ।

महेश पु० कर्म्म० । शिवे । महेश्वरोऽप्यत्र 'महेश्वरस्त्र्यम्बक एव नापरः' इति रघुः ।

महेशवन्धु पु० ६त० । विल्ववृक्षे ।

महैला स्त्री० कर्म्म० । स्थूलैलायाम् (बड़एलाची)

महोक्ष पु० महान् उक्षा अच समा० । वृहद्वृषे, 'महोक्षं वा महाजं वा श्रोत्रियाय प्रकल्पयेदि"ति मनुः ।

महोटी स्त्री० महान्ति फलापेक्षया स्थूलानि उटानि पर्णान्यस्याः ङीप् । वृहत्यां उत्तले च ।

महोत्पल पु० कर्म्म० । पद्मे, सारसपक्षिणि च ।

महोत्सव पु० कर्म्म० । सन्ततसुखसम्पादकव्यापारे ।

महोत्साह त्रि० महान् उत्साहो यस्य । अत्यन्तोद्यमयुक्ते ।

महोदधि पु० कर्म्म० । समुद्रे ।

महोदय ० महान् उदयो वृद्धिराधिपत्यं वा यत्र । कान्यकुब्जदेशे । तत्रस्थे पुरभेदे न० । कर्त्तृकार्य्योदययोगात् 'अमावसि मित्रः' इत्यादिलक्षणात् 'मित्रिदूने महोदय' इत्युक्ते मित्रिदूने योग भेदे पु० । नागवल्लायां स्त्री० ।

महोदरी स्त्री० महदुदरं यस्याः । शतमूल्याम् बृहदुदरयुक्ते त्रि० ।
महोन्नत पु० कर्म्म० । तालवृक्षे । अत्यन्तोच्चतियुक्ते त्रि० ।
महोरग पु० कर्म्म० । बृहत्सर्पभेदे महोरगाकारोऽस्यास्य अच् । तगरमूले न० ।
महोल्का स्त्री० कर्म्म० । बृहदुल्कायाम् ।
महौषध न० कर्म्म० । शुण्ठ्याम्, लशुने, वाराहीकन्दे, वल्गनाभे विषे, पिप्पल्याम्, अतिविषायां, वाय्यादौषधमात्रे च ।
महौषधि स्त्री० कर्म्म० । दूर्व्वायां, लक्ष्मालुचुपे "तक्रदेवो तथा व्याघ्रो बला चातिबला तथा । शङ्खपुष्पी तथा सिंही अष्टमी च सुवर्चला । महौषध्यष्टकं प्रोक्तं" मित्युक्ते देवादीनां स्नानद्रव्यभेदे । श्वेतकण्टकार्य्यां ङीप् ।
मा शब्दे अक० माने सक० जु० आ० अनिट् । मिमीते अमित ।
मा माने अदा० प० सक० अनिट् । माति अमासीत् ।
मा माने दि० आ० सक० अनिट् । मायते अमास्त ।
मा अव्य० ङिदनुबन्धात् देवादिकात् मा-धातोः क्विप् । वारणे । धातोर्ङित्त्वेन गन्दे ङित्त्वव्यवहारात् न माङ्योगे इति पाणिनिसूत्रम् । ङिदनुबन्धभूयधातुनिष्पन्नस्तु न ङित् तेन तद्योगे अडागमः स्यादेव मा निषाद ! प्रतिष्ठां त्वमगमः" इति रामायणम् । मा-क-टाप् । लक्ष्म्याम्, मातरि च स्त्री० माभावे क्विप् । माने स्त्री०
मांस न० मन-स दीर्घश्च । 'मां स भक्षयितामुत्र यस्य मांसमिहाद्म्यहम्' इति मांसस्य मांसत्वमित्युक्ते प्राणिदेहस्थशोणितपरिपाकजे धातुभेदे । [रोहिण्यां लतायाम् ।
मांसच्छदा स्त्री० मांसं छादयति छद-णिच्-अच् तुक् च । मांस
मांसज न० मांसाज्जायते जन-ड । देहस्थे मांसजन्ये भेदे ।
मांसदलन प० मांसं श्लाघात्मकं मांसं दलयति दल-णिच्-ल्यु । श्लीहघातकवृक्षे
मांसद्रविन् प० मांसं द्रावयति णिच् णिनि । अम्लवेतसे ।
मांसपेशि स्त्री० ६त० । गर्भस्थावयवभेदे । वा ङीप् तत्रैव ।

मांसफला स्त्री० मांसमिव भोजनं फलं यस्याः । वार्त्ताक्याम् ।
मांसमासा स्त्री० मस-परिणामे वञ् मांसस्य परिणामो यस्याः ५ब० । माषपर्ण्याम् । [सुगन्धिद्रव्यभेदे (चामकण)
मांसरोहिणी स्त्री० मांसं रोहयति रुह-णिच् णिनि वा न पुक् ।
मांसल त्रि० मांस+बलवत्यर्थे लच् । बलवति स्थूले, पुष्टे च ।
मांसलफला स्त्री० मांसलं पुष्टं फलमस्याः । वार्त्ताक्याम् ।
मांससार पु० ६त० । मेदसि । मांसस्नेहादयोऽप्यत्र ।
मांसहासा स्त्री० मांसेन हस्यते कर्मणि घञ् । देहस्यचर्मणि ।
मांसिक त्रि० मांसं पण्यमस्यठक् । मांसविक्रयोपजीविनि । (कसाइ) ।
मांसिनी स्त्री० मांसस्तदाकारस्तद्वत्वं वाऽस्त्यस्याः इनि । जटामांसाख्यगन्धद्रव्ये ।
मांसी स्त्री० मांसमस्त्यस्य अच् गौ० ङीष् । जटामांस्याम् ।
माकन्द पु० माति मा-किप् माः परिमितः कन्दोऽस्य । आम्रे । आम्रवृक्षे, पीतचन्दने, (बकुलवृक्षे) चन्दने, नगरभेदे च स्त्री० गौरा० ङीष् ।
माकरी स्त्री० मकरस्ततस्त्यरविकालस्य दृश्यम् अण् । मकरस्थितरविकाले तदारब्धमाघमासस्य शुक्लसप्तम्यां 'तस्मे रोगश्च शोकश्च माकरी हन्तु सप्तमी"ति स्मृतिः ।
माक्ष स्तृ० हायां भ्वा० पर० सक० सेट् इदित् । माक्षति अमाक्षीत् ।
माक्षि(क्षी)क न० मक्षिकाभिः सम्भृत्य कृतम् अण् पृ० वा दीर्घः । उपधातुभेदे मधुनि तत्तुल्यगुणे स्वर्णमाक्षिके रौप्यमाक्षिके च ।
माक्षिकज न० माक्षिकाज्जायते जन-ड । सिक्थके (मोम) ।
माक्षिकफल पु० माक्षिकमिव मधुरं फलमस्य । मधुनारिकेले ।
माक्षिकशर्करा स्त्री० ६त० । मधुजाते खण्डभेदे (सिताखण्ड) ।
मागध पु० मगधदेशे भवः अण् । श्वेतजीरके स्तुतिपाठके (भाट) वर्णसङ्करभेदे च यूथिकायां, विप्पल्यां, क्षुद्रौषधौ, शकरायां, भाषाविशेषे च स्त्री० ङीष् । मगधदेशजाते त्रि० ।
मागधखारिका स्त्री० द्रोणावच्छिन्ने परिमाणभेदे ।

माघ पु० मघानक्षत्रयुक्ता पौर्णमासी माघी सास्त्र मासेऽण्। चैत्रावधिके एकादशे चान्द्रे मासे। तत्पौर्णमास्यां स्त्री० ङीप्। शिशुपालवधकाव्ये, तत्कर्त्तरि च पु०। "तावद्भा भारवे र्भाति यावन्माघस्य नोदय" इत्युद्भटः।

माघ्य न० माघे भवं यत्। कन्दपुष्पे।

माङ्गल्य न० मङ्गलमेव मङ्गलाय हितं वा यञ्। मङ्गले, मङ्गलसाधने च। [यामु।

माङ्गल्यार्हा स्त्री० माङ्गल्यमर्हति अर्ह—अच्। वाद्यमाणालता-

मचिका स्त्री० मच—एवुल्। अम्बष्ठायां, मचिकायाञ्च।

माञ्जिष्ठ न० मञ्जिष्ठया रक्तमण्। रक्तवर्णे। तद्वति त्रि०।

माठर पु० मठ—अरन् ठान्तादेशः ततः स्वार्थे अण्, सूर्य्यस्य पारिपार्श्वे मठति अरण् वा। सूर्य्यस्य पारिपार्श्विके गणभेदे।

माण(न)क न० मा—अनच् णुट् नुट् वा। स्वनामख्याते वृन्दभेदे "हरिद्रा माण(न)कं कचुरिति भवपक्षिकाप्रमाणम्।

माणव पु० मनोरपत्यं अण् अल्पार्थेणत्वम्। अल्पवयस्के मनुष्ये। स्वार्थे कन्। तत्र, क्षारभेदे च।

माणवीन त्रि० माणवस्येदम् खञ्। बालकसम्बन्धिनि।

माणव्य न० माणवानां समूहः यत्। बालकसमूहे।

माणिक्य न० मणिरिव कायति कै—क स्वार्थे ष्यञ्। (माणिक) रक्तवर्णे रत्नभेदे, गटहगोधिकायाञ्च। [जवणे।

माणिबन्ध(मन्थ) न० मणिबन्ध (मन्थ) पर्वते भवः अण्। सैन्धव-

मातङ्ग पु० मतङ्गस्य सुनेरयम् अण्। गजे, किरातजातिभेदे, अश्वत्थवृक्षे च। दशमहाविद्याभेदे स्त्री० ङीप्।

मातङ्गमकर पु० मातङ्ग इव मकरो जलजन्तुः। महामत्स्यभेदे।

मातरपितृ स्त्री० माता च पिता च द्वन्द्वे मातृपौ मातरादेशः। मातापितोः। पक्षे मातृरा ङङ्। तयोरर्थयोः।

मातरिश्वन् पु० मातरि आकाशे श्वयति वर्द्धते श्वि—कनिन् डिच्च्वल्लुक्च। वायौ।

मातलि पु० मतं जानाति ज्ञा–क मतज्ञस्य पत्यम् इञ्। इन्द्रसारथौ

माता स्त्री० मा–अतच्। जनन्याम्। "विश्वेश्वरीं विश्वमाता" मिति दुर्गास्तवः। [स्त्री० ङीप्।

मातामह पु० मातुः पिता मातृ+डामह। मातुः पितरि। तत्पत्न्यां

मातुल पु० मातुर्भ्राता मातृ–डुलच्। मातृभ्रातरि तत्पत्न्यां वा ङीप् वा आनुक्च। मातुलानी मातुली मातुला च। मद–णिच्–उलच् पृ० दस्य तः। धुस्तूरे, मदनवृक्षे, सर्षपभेदे च।

मातुलपुत्रक न० मातुलस्य धुस्तूरस्य पुत्र इव कायति कै–क। धुस्तूरे इत० कन् मातुलसुते।

मातुलुङ्ग पु० मातुलं गच्छति गम–खच् डिच्च पु०। बीजपूरे, मधुककोष्ठाच्च। संज्ञायां कन्। वनबीजपूरे।

मातृ त्रि० मा–तृच्। प्रमाणकर्त्तरि परिमाणकर्त्तरि, जीवे आकाशे च औ मातारौ। मा–तृ। "ब्राह्मी माहेश्वरी चण्डी वाराही वैष्णवी तथा कौमारी चैव चामुण्डा चर्चिकेत्यष्टमातर इत्युक्ते, शिवसहचरीभेदे, जनन्याम् भूमौ, विभूतौ, लक्ष्म्याम्, रेवत्याम्, आखुकर्ण्याम्, इन्द्रवारुण्याम्, (राखालशषा) जटामांस्यां, चण्डीप्रसिद्धासु देवीशक्तिषु च "मातः कोमलयाविष्ट" इति चण्डी।

मातृका स्त्री० मातेव कायति कै–क। उपमातरि, ब्राह्म्यादिषु चण्डीप्रसिद्धदेवीमूर्तिषु सर्वशब्दोत्पादकेषु अकारादिकोलपञ्चाशद्वर्णेषु, करणे, क्षुरे च। मातृ+स्वार्थे कन्। मातृशब्दार्थे।

मातृबन्धु पु० ईत०। मातुः पितुः भ्रातुः सुता मातुर्मातुः भ्रातुः सुताः। मातुर्मातुलत्वाच्च तस्या मातृबन्धव, इत्यतेषु मातुः पितृष्वस्रीयादिषु। मातृबन्धोऽस्यत्व।

मातृष्वसृ स्त्री० ईत०। मातुर्भगिन्याम् "अलुक्स०। मातुः ष्वसाघ्यत्व।

मातृष्वस्रेय पु० मातृष्वसुरपत्यम् ठक्। मातुर्भगिनीपुत्रे तत्कन्यायां स्त्रा० ङीप्। ढक्। मातृष्वस्रीयोऽस्यत्व।

मातृसिंही स्त्री० मातुः प्रमातुः सिंहीव। वासकवृक्षे।

मात्र न० मा–त्रन्। साकल्ये अवधारणे च। अविच्छेदे, अल्पे,

परिमाणे कर्णभूषायाम्, वित्ते, लघुदीर्घोच्चारणकाले वर्णविशेषभेदे, "कालेन यावता पाणिः पर्य्येति जानुमण्डले। सा मात्रा कविभिः प्रोक्ता" इत्युक्तेषु ह्रस्वदीर्घप्लुतादिषु च स्त्री०। मीयन्तेऽनया विद्यया: मा–त्रन्। इन्द्रियवृत्तौ। "मात्रास्वर्यांस्तु कौलवे"ति गीता। [चक्रे।

मात्रापताका स्त्री० छन्दोग्रन्थोक्ते मात्राप्रस्तावानुगुणे पताकाकारे

मात्रामर्कटी स्त्री० छन्दोग्रन्थोक्ते मात्रावृत्तप्रस्तावानुगुणे मर्कटीजालचक्रभेदे।

मात्रामेरु पु० छन्दोग्रन्थोक्ते मात्रावृत्तप्रस्तावानुगुणे मेरुचक्रे।

मात्रावृत्त न० मात्रया कृतं वृत्तम्। आर्य्यादौ छन्दोभेदे।

मात्सर्य्य न० मत्सरस्य भावः ष्यञ्। परगुणद्वेषे 'मात्सर्य्यं हृत्यार्य्यविचार्य्ये"ति साहि०।

मात्र बधे मरु० क्लेशे अक०भ्वा०प० सेट् इदित्। मान्यति अमान्यीत्।

माथ पु० मथ–घञ्। मथि, मन्थने च।

माथुर त्रि० मथुरायां भवो मथुरायाः आगतो वा अण् मथुरानगरीभवे, तत आगते च।

माद पु० मद–घञ् हर्षे, रूपे च।

मादक त्रि० मादयति मद–णिच् ण्वुल्। मत्तताकारके द्रव्ये मादयति कर्त्तरि ण्वुल्। दात्यूहे पु०।

मादन न० मादयति मद–णिच्–ल्यु। लवङ्गे। कामदेवे, मदन वृक्षे च पु०। विजयायां, माकन्द्याञ्च स्त्री० गौ० ङीष्,

माद्दृश(श्य) त्रि० ममेव दर्शनमस्य दृश–क्सट क्विप्, वा। मम तुल्यदर्शने मत्सदृशे।

माद्री स्त्री० मद्रे भवा अण्। पाण्डुराजस्य द्वितीयपत्न्याम् अतिविषायाञ्च।

माधव पु० माया धवः। नारायणे। मधु+स्वार्थे अण्। वसन्ते "स माधवेनाभिमतेन सख्ये"ति कुमारः। मधुने पुष्परसाय मद्याय वा हितः अण्। वैशाखे तस्य मद्यपुष्पवत्त्वम् तद्धितत्वम्।

मधूकवृक्षे च तत्पुष्पेण हि मद्यसम्भवः । मधु बाहुल्येनास्यस्याः अण् । वासन्तीलतायाम् स्त्री० ङीष् ।

माधवीलता स्त्री० कर्म्म० । स्वनामख्यातायां लतायाम् ।

माधवेष्टा स्त्री०माधवे वैशाखे माधवस्य कृष्णस्य वा इष्टा । वाराहीकन्दे

माधवोचित न० माधवः उचितो यस्य । कङ्कोलके ।

माधवोद्भव पु० माधवे वैशाखे उद्भवति फलत्वेन उद्+भू–अच् । (पियाल) राजादन्याम् । [मल्लिकापुष्पे ।

माधुर न० मधु–रा॑त भ्रमरेभ्यो ददाति रा क–स्वार्थे अण् ।

माधुरी स्त्री० मधुरस्य भावः ष्यञ् माधुर्य्यं तिक्तत्वात् स्त्रीत्वपक्षे ङीष् यलोपः । "माधुर्य्यं मधुरत्वे, सद्यस्खलन्माधुरीधारे"त्युद्भटः । मधुर+स्वार्थे अण् । मदिरायाम् ।

माध्यन्दिन न० मध्यन्दिनमेव–अण् । मध्यमदिने तदधिकृत्य कृतो ग्रन्थः अण् शुक्लयजुर्वेदीयशाखाभेदे ।

माध्वीक स्त्री० मधुना मधूकपुष्पेण निर्वृत्तम् ठक्क् । मधूकपुष्पजाते मद्ये । मधु एव स्वार्थे ठक्क् द्राक्षाफले साध्वी माध्वीक ! चिन्ता विजहीत्यति जयदेवः ।

माध्वीकफल पु० माध्वीकमिव मधुरं फलमस्य । मधुनारिकेले ।

माध्वीमधुरा पु० माध्वीकमिव मधुरा पृ० कलोपः । मधुरखर्जूरिकायाम् । [सांसिष्ट

मान विचारे भ्वा० आ० सक० सेट् स्वार्थे सन् । मीमांसते अमीमान अर्च्चे वा चु० उ०पक्षे० भ्वा० पर० सक० सेट् । मानयति ते मानति अमीमनत्–त अमानीत् ।

मान न० मा–ल्युट् । परिमाणे हस्ततुलाप्रस्थादौ द्रव्यपरिच्छेदे, प्रमाणे गानाङ्गे कालक्रियायां तालविरामोपलक्षिते कालव्यापारे च । मन–घञ् । आत्मनि उत्कर्षाभिमानात्मिकायां चित्तवृत्तौ । स्वाभीष्टस्त्रीत्वादिविरोधी मान उच्यते" इत्युक्ते अनुरक्तदम्पत्योः अवस्थाभेदे "सुभ्रु मयि मानमनिदानमि"ति जयदेवः सम्माने च ।

मानग्रन्थि पु० मानस्य ग्रन्थिर्बन्धनं यस्मात् । अपराधे ।

मानरज्जा स्त्री० मानाय कालप्रमाणज्ञानाय रज्जुर्यस्याः । ताम्रनिर्म्मिते सच्छिद्रे कालज्ञानहेतौ घटीयन्त्रभेदे ।

मानव पु० मनोरपत्यम् अण् । मनुष्ये स्त्रियां जातौ ङीप् ।

मानस न० मन एव अण् । मनसि, कैलासान्तिकस्थे ब्रह्मणा कृते सरोवरभेदे च ।

मानसव्रत न० मनसा कृतं मानसं कर्म्म० । "अहिंसासत्यमस्तेयं ब्रह्मचर्य्यमलुब्धता । एतानि मानसानि स्युर्व्रतानी'त्युक्तेषु अहिंसादिषु ।

मानसौकस् पु० मानसमनोको यस्य । हंसे ।

मानिनी स्त्री० मान-इनि । फलीहृक्षे, मानवत्यां स्त्रियां च ।

मानुष पु० मनोरयम् अण् सुक् च । मानवे, ततोजातौ स्त्रियां ङीप् मानुषी ।

मानुष्य न० मानुषस्य भावः यत् । मनुष्यत्वे ।

मान्द्य न० मन्दस्य भावः ष्यञ् । रोगे, मन्दतायाञ्च ।

मान्धात पु० मामिन्द्रं धयति धे-क्त । "मामयं धास्यतीत्यस्मात् मान्धातासौ प्रकीर्त्तित" इति निरुक्तेः युवनाश्वराजपुत्रे नृपभेदे ।

मान्य पु० मान-अर्शायां कर्म्मणि यत् । पूज्ये ।

मामक त्रि० मम-इदम् अञ्गतु+कन् ममादेशः । मत्सम्बन्धिनि खञ् । मामकीनोऽप्यत्र ।

माया स्त्री० मा-य नेत्त्वम् । छद्मनि, कापट्ये, इन्द्रजालादौ, मिथ्याबुद्धिहेत्वज्ञानभेदे, कृपायां, दम्भे, लक्ष्म्यां बुद्धमातरि, ईश्वरस्योपाधौ, अघटनघटनसाधिकायां शक्तौ । [कर) ।

मायाकृत् पु० मायामिन्द्रजालं करोति कृ-क्विप् । मायाकरे (बाजी-

मायादेवीसुत पु० ६त० । बुद्धे ।

मायावत् त्रि० माया+अस्त्यर्थे मतुप् मस्य वः । मायाविशिष्टे कंसराजे पु० । कामपत्न्यां स्त्री० ङीप् ।

मायाविन् त्रि० माया+अस्त्यर्थे विनि । मायारे स्त्रियां ङीप् ।

मायिक त्रि० मायास्त्यस्य ठन् । मायारे । इनि मायीत्यपत्र ।

मायु पु० मा–यु । देहस्थे पित्ते । [सम्बन्धिनि त्रि० ।

मायूर न० मयूराणां समूहः तस्येदं वा अण् । मयूरसङ्घे । मयूर-

मायूरी स्त्री० मयूरस्येदं प्रियत्वात् । अण् ङीप् । अजमोदायाम् ।

मार पु० मृ–घञ् । मरणे । मारयति मृ–णिच्–अच् । कामदेवे, विघ्ने, धुस्तूरे च । [मारिभये । (बाज) पक्षिभेदे च ।

मारक पु० मृ–णिच् ण्वुल् मृ–णिच् घञ् स्वार्थे कन् वा । मारणे

मारकस्थान न० मारणकारणे स्थाने । "अष्टम चायुषः स्थानमष्-माष्टमञ्च यत् । तयोरपि व्ययस्थानं मारकस्थानमुच्यते" इत्युक्ते जन्मलग्नात् सप्तमे द्वितीये च स्थाने ।

मारि स्त्री० मृ–णिच्–इन् । मारणे वा ङीप् मारोत्पन्यत्र । 'मारे-भये राजभये" इति वटुकस्वरः ।

मारिष पु० रिष–हिंसायाम् निषेधार्थकमाशब्देन स० । माननीयौ आर्यौ, हिंसानिवारकतया तस्य तथात्वम् । तस्यापत्यादिषु; टक्मातरि च स्त्री० टाप् ।

मारीच पु० तारकाराक्षसीपुत्रे रावणानुचरे राक्षसविशेषे ।

मारुतव्रत न० 'प्रविश्य सर्वभूतानि यथाचरति मारुतः । तथा चरेः प्रवेष्टव्यं व्रतमेतद्धि मारुतमित्युक्ते रात्रौ धर्मभेदे ।

मारुतात्मज पु० ६त० हनुमति, भीमे च इञ् । मारुतिरप्यत्र ।

मारुतापह पु० मारुतं वायुदोषमपहन्ति अप+हन–ड । वरुणवृक्षे । वायुनाशके त्रि० ।

मार्कण्ड पु० मृकण्डोरपत्यम् अण् पृ० । मुनिभेदे टक् । शक० मार्कण्डेयोऽप्यत्र । तत्सृष्टे लताभेदे स्त्री० ।

मार्कव पु० मारयति किप्–मारि केशकलापे कूयते कू अच् । भृङ्गराजे

मार्ग संस्कारे सर्पणे च चुरा० उभ०सक० सेट् । मार्गयति अमार्गत् त

मार्ग अन्वेषणे वा० चु०उभ०पक्षे भ्वा०प० सक० सेट् । मार्गयति-ते मार्गति अमार्गत् त । अमार्गीत् । 'न्यपतेरमार्गीदि"ति भट्टिः भ्वा० आ० इत्यन्ये तेन मार्गते, मार्गमाण इत्यादि सिद्धम् ।

मार्ग पु० मृज–गुणे-मार्ग-अन्वेषणे वा घञ् । पथि-तद्विशेषे

प्रमाणम् वाचस्पत्ये वक्ष्यते । [ल्यू । याचके त्रि० घरे पु० ।

मार्गण न० मार्ग-ल्युट् । अन्वेषणे याचने, प्रणये च । कर्त्तरि

मार्गशिर पु० मृगशिरया युक्ता पौर्णमासी अण् सा यत्र मासे पुनरण् । चान्द्रे अग्रहायणे मासि तत्पौर्णमास्यां स्त्री० ङीप्

मार्गशीर्ष पु० साधनं मार्गशिरवत् । अग्रहायणे मासि । तत्पौर्णमास्यां स्त्री० ङीष् ।

मार्गित त्रि० मार्ग-क्त । अन्वेषिते । [अमार्ज्जत्-त ।

मार्ज्ज मार्ज्जने सक० ध्वनौ अक० चुरा० उभ० सेट् । मार्ज्जयति-ते

मार्ज्जन न० मार्ज्ज-ल्युट् । प्रोक्षणादिना निर्मलीकरणे । युच् । तत्रैवार्थे स्त्री० सा च सुरजध्वनौ च । करणे ल्युट् । सम्मार्ज्जन्याम् (झाटा) । स्त्री० ङीप् ।

मार्ज्जार पु० मृज-आरन् वा रस्य नः । विड़ाले रक्तचित्रके खटासे च । ततः संज्ञायां कन् मयूरे ।

मार्ज्जारगन्धा स्त्री० मार्ज्जारस्येव गन्धो यस्याः । क्षुद्रमर्षीभेदे । स्वार्थे कन् । तत्रैव ।

मार्ज्जारी स्त्री० मृज-आरक् गौ० ङीप् । कसूर्य्याम् खटासजन्तौ, मार्जारयोषिति च ।

मार्ज्जारी(रीय) पु० मार्ज्जार+(ञ)स्वार्थे छ, मृज-आरीयक् रस्य लत्वम् वा । विड़ाले, शूद्रे च कायस्थोधने न० ।

मार्जित पु० मार्ज-क्त । शोधिते । दधि-खण्डगुडमधुघृतैर्मरिचादिकृते, कर्पूरादिवासिते भक्ष्यभेदे (रसा) ।

मार्त्तण्ड पु० मृते अण्डे भवः अण् मकः । सूर्य्ये । तस्य च मृताण्डजन्म 'मारितश्च यः प्रोक्तमेतदण्डं त्वयादितिम् तस्मात्सुते ! सुतस्तेऽयं मार्त्तण्डाख्यो भविष्यती'ति पुराणोक्तम् ।

मार्त्तिक न० मृत्तिकया निर्म्मितम् अण् । घराटे (घरा) मृण्मये त्रि०

मार्द्दङ्गिक त्रि० मृदङ्गं तद्वादनं शिल्पमस्य ठक् मृदङ्गवादके ।

मार्द्दव न० मृदोर्भावः । मृदुत्वे, परदुःखासहिष्णुत्वाम् द्वेषाभावे च 'अभितप्तमयोऽपि मार्द्दवं भजते कैव कथेति सूक्तेः ।

मार्ष पु० मृष-क ततः स्वार्थे अण् । तण्डुलीयशाके ।
मार्ष्टि स्त्री० मृज-क्तिन् । शोधने ।
माल पु० मल-संज्ञायां घञ् । "भिल्ला किरातास्ते" म्लेच्छे जातिभेदे ।
मालक न० मल-एवुल् । स्थलपद्मे (माला) नारिकेलपात्रभेदे च ।
मालती स्त्री० मां लक्ष्मीं शोभां वा लतति वेष्टते लत-अण् ङीप् । जातीलतायां, युवत्यां, काकमाच्यां, नदीभेदे, विशल्यायां, ज्योत्स्नायां, निशायाञ्च ।
मालतीरज ए० मालत्या नदीभेदस्य तीरे जायते जन-ड । टङ्कणे टङ्कणे (सोहागा) मालतीतीरभवादयोऽप्यत्र ।
मालतीपत्री स्त्री० मालत्याकृत्रिमकजात्याद्यत्र पत्रमस्याः । जातीपत्र्याम् (जैयत्री) । [फले ।
मालतीफल न० मालत्याकृत्रिमकजात्याः फलम् । (जायफल) जाती-
मालभारिक त्रि० मालानां भारोऽस्यस्य ठन् पूर्वपदवृद्धिः मालानां भारवति ।
मालव पु० अवन्तिदेशे (मालवोया देश) रागभेदे च ।
मालविका स्त्री० मालवे भवा ठक् । लिट्टति (तेंयोड़ि) ।
मालसी स्त्री० मालं मलनं जटादिना दुष्टत्वं स्यति सो-क गौ०ङीष् । केशपुष्टिकारके वृक्षे, रागिणीभेदे च ।
मालाकण्ट पु० मालाकारः कण्टः कण्टको यस्य । अपामार्गे ।
मालाकन्द पु० मालाकारः कन्दो यस्य । मूलभेदे ।
मालाकार पु० मालां करोति कृ-अण् । (माली) वर्णसङ्करभेदे । माल्यकारके त्रि० ।
मालाग्रन्थि पु० मालया ग्रन्थिरत्र । मालादूर्वाम् ।
मालाङ्ग न० मालाकारं तृणम् । भूतृणे । स्वार्थे कन् । तत्रैव ।
मालादीपक न० अलङ्कारोक्ते अर्थालङ्कारभेदे ।
मालादूर्वा स्त्री० मालाकारा दूर्वा । (गाठिदूर्वा) दूर्वाभेदे ।
मालारिष्टा स्त्री० मालाभूतमरिष्टं यस्याः ५ब० । प्राचाम् ।
मालाली स्त्री० मालामलति भूषयति अल-अण् ङीष् । पुष्पायां (पिडिङ्गशाके) स्वार्थे कन् । तत्रैव ।

मालिक पु० माला तत्रिर्माणं शिल्पमस्य ठन् । मालाकारे जातिभेदे पक्षिभेदे, रङ्गके च । मालाकारके च त्रि० ।

मालिका स्त्री० माल्येव कन् अत इत्वम् । नवमल्लिकायां, पीतावल्लरयां, नदीभेदे सुरायां अतसायाम् । पुष्पमालायां च । 'पाषाणमालिकाम्बोजेति' लक्ष्मीध्यानम् ।

मालिन् पु० माला शिल्पमस्यास्ति इनि । मालाकारे, माल्यवति त्रि० मालाकारमस्यां पञ्चदशाक्षरपादके, छन्दोभेदे, नीर्याम् चम्पकगर्भायां, मन्दाकिन्यां, कण्वाश्रमान्तिकस्थे नदीभेदे, अग्निशिखावृक्षे, दुरालभायां च स्त्री० ङीप् ।

मालु स्त्री० मल–उण् । पतलतायां (पातलता) मालौञ्च ।

मालुधान पु० मालुरिव पतलतेव धीयतेऽसौ धा–कर्म्मणि ल्युट् । (मालुयासाप) सर्पभेदे । लतामेदे स्त्री० ङीप् ।

मालूर पु० मां लक्ष्मीं परेषां लुनाति लू–रक् । बिल्वे, कपित्थे च ।

मालेय त्रि० मालायां साधुः ढक् । मालारचनानिपुणे ।

माल्य न० मालायै हितं यत् । पुष्पे । स्वार्थे ष्यञ् । पुष्पमालायाम्, मूर्द्धिस्थायां पुष्पमालायाञ्च ।

माल्यपुष्प पु० मालायै हितं पुष्पमस्य । मयूरशिखे मयपुष्पायाम् स्त्री० ङीप् । स्वार्थे कन् । तत्रैव ।

माल्यवत् त्रि० माल्यमस्यास्तीति मतुप् मस्य वः । माल्य युक्ते केतुमालेखण्डतवर्षयोः सीमाभूते पर्वतभेदे, सुकेशराक्षस पुत्रे रावणमन्त्रिणि राक्षसभेदे च ।

माषट्किक त्रि० मेति शब्दं निषेधाय करोति ठक् । निषेधकारके ।

माष पु० मष–संज्ञायां घञ् । (माषकलाय) व्रीहिभेदे 'दशार्द्धपुष्पं प्रवदन्ति माषमि'त्युक्ते 'शुक्लाभिर्दशभिर्माष इत्युक्ते च परिमाणभेदे ।

माषकलाय पु० माषाख्यः कलायः । खनामख्याते व्रीहौ ।

माषपर्णी स्त्री० माषस्येव पर्णान्यस्याः ङीप् । वनमाषे ।

माषभक्तबलि पु० माषमिश्रितं भक्तमेवबलिः पूजोपहार द्रव्यम् । माषमिश्रिते भक्तरूपे पूजोपहारे ।

माषवर्त्तक पु० माषं माषपरिमितं स्वर्णं वर्त्तयति आच्छिनत्ति अपहरति वर्त्त-छेदने एवुल् । स्वर्णकारे ।

माषीण न० माषाणां भवनं क्षेत्रं खञ् । माषौहिभवने योग्ये क्षेत्रे । यत् । माष्यमन्यत् ।

मास् पु० मासि परिच्छिनत्ति स्वगत्या कालम् मा—असुन् । चन्द्रे त्रिंशदहोरात्रकालरूपे मासे च ।

मास पु० मास्यते अत्र । चन्द्रे त्रिंशदहोरात्रके काले च । स च सौरसावनचान्द्रभेदात्त्रिविधः । मासश्चन्द्रमसोभवम् अण् चान्द्रे मासे तु ह्रस्वः । मस्यते परिमीयते मस—परिमाणे करणे घञ् पक्षद्युक्षात्रके शब्दार्थे माष स्वार्थे कन् ततैव ।

मासन न० मासं नयति नी—ड । सोमराजीलतायाम् ।

मासप्रमित पु० मास प्रमातुमारब्धः । प्र+मा—क्त । कालाः कृति ब० । प्रतिपच्चन्द्रे । [मण्डूके ।

मासर पु० मस—परिणामे घञ् मासं परिणामं राति रा—क । भक्त-

मासान्त पु० मासस्य सौरस्य चान्द्रस्य वा अन्तः अवसानम् । मासावसाने संक्रान्त्यादौ ।

मासिक त्रि० मासे भवः कालाट्ठञ् । मासभवे, प्रेतोद्देशेन कृतसज्ञातीयतिथौ, प्रतिमासम् अमावस्यायां च कर्त्तव्ये श्राद्धे न० । "मासिकानि स्वकीयेति"ति स्मृतिः । "पितृणां मासिकं श्राद्धमाहार्यं विदुर्बुधा" इति स्मृतिः ।

मास् अव्य० मस—क्विप् अप् । निषारणे ।

माह् दाने भ्वा० उभ० सक० सेट् माहति ते अमाहीत् अमाहिष्ट । चङि न ह्रस्वः ।

माहाकुल त्रि० महाकुले भवः अण् । महाकुलीनत्वे । ष्यञ् । महाकुलीनोऽप्यत्र ।

माहात्म्य न० महात्मनो भावः ष्यञ् । महिमनि अनुत्वे ।

माहिष न० महिष्या इदम् अण् महिषीदुग्धादौ महिषस्वेदे च अण् । तच्छकृदादौ त्रि० ।

माहिष्य पु० महिष्या अपत्यं यञ् । क्षत्रेण वैश्यायामुत्पन्ने वर्णसङ्करजातिभेदे ।

माहेन्द्र पु० महेन्द्रस्यायम् अण् । ज्योतिषोक्ते महेन्द्रादिसम्बन्धिनि दण्डभेदे । पूर्वस्यां दिशि, इन्द्रपत्न्यां, गवि च स्त्री० ङीप् ।

माहेय पु० महया अपत्यम् महो+ढक् । मङ्गले नरकासुरे च स्त्रीगर्भ्यां स्त्री० ङीप् ।

माहेश्वर त्रि० महेश्वरादधिगतम् ततः आगत अण् महेश्वरतः प्राप्ते । यवतिक्षायां स्त्री० ङीप् । तस्येदम् अण् । 'माहेश्वरो वृषारूढ़ा, इत्युक्ते मातृभेदे दुर्गामात्रे स्त्री०ङीप् ।

मि क्षेपे स्वा० उभ० सक० अनिट् । मिनोति मिनुते अमासीत् अमास्त । क्ति अप् च मितिमम् ।

मिक्ष बधे भ्वा० पर० सक० सेट् । मिक्षति अमिक्षीत् ।

मित त्रि० मि मा-या-क्त परिमिते, गर्हिते, अवच्छिन्ने, क्षिप्ते च ।

मितङ्गम पु० मितं परिमितं क्रमु-गच्छति गम-खच् मुम् च । गजे परिमितगामिनि त्रि० ।

मितद्रु पु० मितं द्रवति द्रव-क्विप् तुक् च । समुद्रे । [यज्ञे त्रि० ।।

मितम्पच पु० मितं पचति पच-खच् मुम् च । ब्राह्मणे । परिमितपाचके त्रि० ।

मिति स्त्री० मा-मि-वा क्तिच् । ज्ञाने, माने, अवच्छेदे, विक्षेपे च ।

मित्र न० मिद्यति स्निह्यति मिद-त्र । स्नेहान्विते सुहृदि, राज्ञां विग्रहावस्थितशत्रुपार्ष्णिग्राहादिरक्षितरि राजनि तयोर्द्वयोरपि मध्यस्थरूपस्य राज्यहरणरूपैककार्य्यकरत्वात् मित्रत्वम् । मि-त्र । सूर्य्ये ।

मित्रयु पु० मित्रं याति या-कु । मित्रवत्सले ।

मिध बधे मेधायाञ्च सक० भ्वा० उभ० सेट् । मेधति-ते अमेधीत् अमेधिष्ट । धकि न हुस्वः ।

मिथस् अव्य० मिथ-असुन् । रहसि, अन्योन्यक्रियार्थे ।

मिथिला स्त्री० मिथ-क्विलच् । खनामख्यातायां राजधान्याम् ।

मिथुन न० मिथ–उनन् किच्च । स्त्रीपुंसयोः मेथादितत्तृतीये राशौच।
मिथ्या अव्य० मिथ–क्यप् । अयथार्थे असत्ये ।
मिथ्यादृष्टि स्त्री० मिथ्या–सफलस्यापि अफलत्वेन दृष्टिः । नास्तिकतायां सफलस्यापि वैदिककर्मणो निष्फलत्वज्ञाने ।
मिथ्यानिरसन न० मिथ्या निरस्यतेऽनेन निर्+अस–ल्युट् । अपवादे ।
मिथ्याभियोग पु० मिथ्याभूतेनासत्येनाभियोगः राज्ञोऽन्तिके वेदनम् अभि–युज–घञ् । यतं मे धारयतोत्यसत्यशङ्का राज्ञोऽन्तिके अभियोगे ।
मिथ्याभिशंसन न० मिथ्याभूतेनासत्येनाभिशंसनम् अपवादः । 'त्वया स्वर्णमपहृतमि"त्यपवादकथने ।
मिथ्याभिशाप पु० मिथ्याभूतेनासत्येनाभिशापोऽपवादः । मिथ्यापवादे ।
मिथ्यामति स्त्री० मिथ्याभूतस्य मतिः कन–ङीप् । भ्रान्तौ अतद्वति तद्बुद्धेन ज्ञाने ।
मिथ्योत्तर न० कर्म० व्यवहारे 'मिथ्यैतत् नाभिजानामि तदा तत्र न सन्निधिः । अजानत्यापि तत्काले इति मिथ्या चतुर्विध"मित्युक्तप्रकारे, उत्तरभेदे, ('मिथ्योत्तरे पूर्व्ववादे) इति स्मृतिः ।
मिद् अधे मेधायाञ्च भ्वा० उ० सक० सेट् । मेदति–ते अमेदीत् अमेदिष्ट । चक्ति न क्तः ।
मिद् स्नेहे भ्वा० आ० क्रुधि प० अक० सेट् । मेदते अमिदत् भावादौ क्ते मिन्नं मेदितम् ।
मिद् स्नेहे वा चु० उभ० पक्षे भ्वा०प० अक० सेट् इदित् । मिन्दयति। अमिन्दत्–त । पक्षे मिन्दति अमिन्दीत् ।
मिद् स्नेहे दि० पर० सक० सेट् । मेद्यति–ते अमिदत् अमेदीत् । क्त मेदितं मिन्नम् ।
मिद् स्नेहे चु० उभ० सक० सेट् । मेदयति–ते अमीमिदत्–त ।
मिल श्लेषे तु० उभ० सक० सेट् । मिलति अमेलीत् अमेलिष्ट कुटादिरयमित्येके तेन अमिलीत् ल्युटि मिलनम् ।

मिव सेवने भ्वा० पर० सक० सेट् इदित् । मिम्वति अमिम्वीत् ।

मिश्र श्वनौ कोपे च तु० पर० अक० सेट् । मिश्रति अमिश्रीत् ।

मिश्रि (श्री) स्त्री० मिश्र–इन् वा ङीप् । मधुरिकायां, (सौरी) शतपुष्पायां, (शुलफा) जटामांस्याञ्च । अत्र पृ० मिश्रि–मिश्री मिश्रि–मिश्री इत्यादयः । उक्तार्थेषु ।

मिश्र (स्व) योजने अद० चु० उभ० सक० सेट् । मिश्र (स्व) यति-ते अमिमिश्र(स्व)त् त ।

मिश्र त्रि० मिश्र–अच् । संयुते उत्तरफल्गुन्याः भेदार्थे । यथा आर्क्ष–मिश्राः । गजजातिभेदे, ज्योतिषोक्ते कृत्तिकाविशाखा नक्षत्रगणे च पु० ।

मिश्रकारण न० मिश्रकनामकं वर्णं पूर्व्वं दीर्घो यत्वञ्च । इन्द्रोद्याने ।

मिश्रपुष्पा स्त्री० मिश्रं पुष्पं यस्याः अजा० टाप् । मेथिकायाम् ।

मिश्रवर्ण न० मिश्रश्चित्रो वर्णो यस्य । कृष्णगुरुणि । मिश्रितवर्णसाते त्रि० । [क्याम् ।

मिश्रवर्णफला स्त्री० मिश्रवर्णं चित्ररूपान्वितं फलं यस्याः । वार्त्ता–

मिश्रव्यवहार पु० लौकिकव्यवहारे गणनभेदे ।

मिश्रिता स्त्री० मिश्रा चैव विज्ञेया मिश्रितर्क्षेषु संक्रमः इत्युक्ते कृत्तिकाविशाखानक्षत्रकाले रविसंक्रमणे ।

मिश्रेया स्त्री० मिश्र अच् मिश्रा देवते ई–गतौ यत् एय कर्म्म० शक० । मधुरिकायां (मौरी) शतपुष्पायाञ्च (शुलफा) ।

मिष सेवने भ्वा० पर० सेट् । मेषति अमेषीत् (क्षा वेट् ।

मिष पराभिभवेच्छयोः तु० पर० सक० सेट् । मिषति अमेषीत् ।

मिष न० मिष–क । क्षेले, खर्ज्जने पु० ।

मिषिका स्त्री० मिषी–कन् । जटामांस्याम् ।

मिष्ट त्रि० मिष–क्त । स्निग्धे, स्वर्द्विते च । मधुररसे पु० तद्वति त्रि० ।

मिह सेचने भ्वा० पर० सक० अनिट् । मेहति अमिहत् ।

मिहिका स्त्री० मिह–कन् अत इत्वम् । नीहारे ।

मिहिर पु० मिह–किरच् । सूर्य्ये, अर्कवृक्षे, इन्द्रे, मेघे, वायौ, चन्द्रे, विक्रमादित्यसभास्थे ज्योतिर्विदे च ।

मी धातौ दि० आ० सक० अनिट् । मीयते अमेष्ट ।

मी धातौ क्र्या० उ० सक० सेट् । मीनाति मीनीते अमासीत् । अमास्त । क्त मीनः ।

मी गत्यां अत्याङ्गे वा पु० उ० पक्षे भ्वा० पर० सक० सेट् । मावयति-ते मयति अमीमत्–त अमैषीत् ।

मीढ त्रि० मिह–क्त । मूत्रिते ।

मीढुष्टम पु० मीढुस्+तम त्रि० । स्निग्धे ।

मीढवस पु० मिह–कसु त्रि० । स्निग्धे ।

मीन पु० मी–नक् । मत्स्ये, मेषादितो द्वादशे राशौ भगवत्तारभेदे च ।

मीनकेतन पु० मीनः केतनो यस्य । कन्दर्पे । मीनध्वजादयोऽप्यत्र ।

मीननेत्रा स्त्री० मीनस्य नेत्रमिव यन्निरक्षाः । गण्डदूर्व्वायां मीनाक्षीत्यादयोऽप्यत्र ।

मीनाण्डा स्त्री० मीनस्याण्डमिवाकारो रेणुकाऽस्यास्य अच् गौ० ङीष् । शर्करायाम् । [ण्डिन् न्नुस्रः ।

मीम धातौ अक० गतौ सक० भ्वा० पर० सेट् । मीमति अमीमीत् ।

मीमांसक पु० मीमांसां वेत्त्यधीते वा वुन् । मीमांसाशास्त्रज्ञे, तदध्येतरि च । मान–स्वार्थे सन् एव ण्वुल् । सिद्धान्तकारके ।

मीमांसा स्त्री० मान–स्वार्थे सन् अ । विचारपूर्व्वकतत्त्वनिर्णये तत्प्रतिपादकग्रन्थभेदे च स च ग्रन्थः कर्म्मब्रह्मविषय भेदेन द्विविधस्तत्र कर्म्मण एतद्विषयसंशयनिवारण प्रतिपादको ग्रन्थो जैमिनिप्रणीतः स च पूर्व्वमीमांसात्वेन प्रसिद्धः ब्रह्मविषयसंशयनिर्णायकग्रन्थः स च वेदान्तत्वेन प्रसिद्धः । [न्नुस्रः ।

मील निमेषे भ्वा० पर० अक० सेट् । मीलति अमीलीत् । चङि वा

मीलन न० मील–ल्युट् । सङ्कोचे, सङ्कोचने च ।

मीलित त्रि० मील–क्त । अप्रफुल्ले, सङ्कुचिते च 'मीलितं यद्धिरा-मतामि'ति काव्यप्रकाशः ।

मीव सङ्घीभवने भ्वा० पर० अक० सेट् । मीवति अमीवीत् ।

मु पु० मोचयति मोचान् यत्नार्थे सुच डु । मङ्गले ।

मुकन्दक पु० मुद्गः मुद्गे कन्दो यस्य कम् पृ० मुद्गो दलोपः । मल्लायुधौ ।

मुकु पु० मुच–कु पृ० यस्य कः । मोक्षे, उत्सर्गे च ।

मुकुट पु० मकि–उट पृ० शिरोभूषणे ।

मुकुन्द पु० मुकुं ददाति दा–क पृ० मुम् । "मुक्तमव्ययमात्मन्न निर्वाण-मोक्षवाचकम् तद्ददाति च यो देवः मुकुन्दस्तेन कीर्तित" इति निरुक्ते विष्णौ ।

मुकुम् अव्य० मकि उकुच् पृ० । निर्वाणमोक्षे ।

मुकुर पु० मकि उरच् पृ० । दर्पणे, वकुलवृक्षे बकुलवृक्षे, मल्लिका-वृक्षे, कोलीवृक्षे, चोरके च ।

मुकुल पु० न० मकि उलच् पृ० । दैवहेतिकाग्रितकलिकायाम् देहे, आत्मनि च ।

मुकुष्क पु० मुकुर्गलोत्सर्गं स्कति स्क–अच् पृ० मत्वम् । वनशूकरे (शुगानी) ।

मुकूलक पु० मकि–उलच् कन् । दन्तिवृक्षे ।

मुक्त त्रि० मुच–क्त । त्यक्ते, प्राप्त मोक्षे, आनन्दिते च ।

मुक्तरसा स्त्री० मुक्तो रसो यस्याः । राज्ञायाम् ।

मुक्तसङ्ग त्रि० मुक्तः सङ्गोविषयासक्तिर्येन । त्यक्तसर्व्वविषयासक्ते । परि-व्राजके पु० ।

मुक्तहस्त त्रि० मुक्तः दानाय प्रसारितः न वद्ध इति यावत् हस्तो येन । बहुदानशीले ।

मुक्ता स्त्री० मुच–क्त । राज्ञायाम् (मति) शुक्तिजे रत्नभेदे च ।

मुक्तापुष्प पु० मुक्तेव शुभ्रं पुष्पमस्य । कुन्दवृक्षे ।

मुक्ताप्रसू स्त्री० मुक्तां प्रसूते प्र+सू–क्विप् दीर्घः । शुक्तौ ।

मुक्ताप्रालम्ब पु० मुक्तया मुक्ताविशिष्टतया प्रालम्बते अच् । मुक्ताहारे ।

मुक्ताफल न० मुक्ता फलमिव । मौक्तिके, जलबुद्बुदफले, (मोथाड़) कर्पूरे, बोपदेवकृते भक्तिप्रधाने ग्रन्थभेदे च "चतुरेण चतुर्वर्ग चिन्तामणि-

कणिज्यया हेमाद्रिर्मोपदेवेन मुक्ताफलमीकरदि"ति तद्व्याख्यानं श्लोकः।

मुक्तालता स्त्री० मुक्तायाः लतते । मुक्ताहारे ।

मुक्तावली स्त्री० मुक्तायाः आवली हारभेदः । मुक्ताहारे । दैत० । मुक्ताश्रेणौ भाषा परिच्छेदव्याख्यटीकायां सिद्धान्तमुक्तावल्यां च ।

मुक्तास्फोट पु० स्त्री० स्फुट्यते विदीर्य्यते स्फोटः मुक्तायै स्फोटः । शुक्तौ।

मुक्ति स्त्री० मुच-क्तिन् । मोचने संसारबन्धनराहित्ये मतभेदेन आत्यन्तिकदुःखनिवृत्तौ, ब्रह्मस्वरूपावाप्तौ च देहेन्द्रियाभ्यामात्मनो बन्धशून्यत्वे च ।

मुक्तिमण्डप पु० मुक्तिप्रदो मण्डपः शाक० । काशीस्थे जगन्नाथक्षेत्रस्थे च मण्डपभेदे तीर्थे । [निर्मुक्ते ।

मुक्तिमुक्त पु० मुक्तैर्मोचनं तेन मुक्तोरहितः संश्लिष्ट इति यावत् ।

मुख न० खन-अच् डित् धातोर्मुट् च । 'प्रजाहूजा यतः खातं तस्मादाहुर्मुखं बुधः" इत्युक्तौ देहावयवभेदे । "ओष्ठौ च दन्तमूलानि दन्तजिह्वा च तालु च । गलो गलादिसकलं समाङ्गं मुखमुच्यते" इत्युक्ते गलादिभ्रान्तिकावयविति वदने । प्रवेशस्य निःसरणवर्त्मनि, वृक्षमण्डपादेः प्रवेशनिर्गमे, आरम्भे, उपाये, नाटकादौ सन्धिभेदे, नाटकादिशब्दभेदे, आदौ, प्रधाने, श्रेष्ठे, नाटकभेदे च । नकुचटकौ पु० (छेओ) ।

मुखगन्धक पु० मुखस्य गन्धो यस्य सेवनात् कम् । पलाण्डौ ।

मुखचपला स्त्री० आर्य्यावान्तरे छन्दोभेदे ।

मुखज प० ब्रह्मणो मुखाज्जायते जन-ड । विप्रे, "ब्राह्मणोऽस्य मुखमासीदि"ति श्रुतिः । [गडौ ।

मुखदूषण पु० मुखं दूषयति सेवनात् दुर्गन्धेन दूष-णिच् ल्यु । पला-

मुखधौता स्त्री० मुखं धौतं यया धाव-क्त जठ् पर० नि० । ब्राह्मणयष्टौ (बामनहाटि) ।

मुखनिरीक्षक त्रि० मुखमितरस्यं निरीक्षते ण्वुल् । अन्यो यदि स्व कार्य्यं कुर्य्यात् तदा नाहं करोमीत्याग्रयेण इतरमुखं निरीक्षमाणः स्वकार्य्ये न प्रवर्त्तते ।

मुखपूरण न०मुखं पूरयति पूर–ल्यु । गन्धद्रव्यमिश्रितजलादौ । [त्रि० ।

मुखप्रिय न० मुखं प्रीणाति प्री–क उप० । लवङ्गे मुखरोचक त्रि० ।

मुखभूषण न०मुखं भूषयति भूष–ल्यु । ताम्बूले । मुखमण्डने त्रि०

मुखमण्डनक पु० मुखस्य मण्डनमिव स्वार्थे कन् । तिलकवृक्षे । ह्रस्व० । स्वार्थे कन् मुखभूषणे न० । पृष० कप् । मुखभूषके त्रि०

मुखमोद पु० मुखं मोदयति मुद–णिच् अण् । गोभाङ्गने ।

मुखर त्रि० मुखं मुखव्यापारं कथनं राति आदत्ते करोतीति यावत् रा–क । अप्रियवादिनि अग्रेवादिनि "मुखरस्तलक्ष्यते इति हितोपदेशः । काके, शब्दे च पु० ।

मुखरित त्रि० मुखर इवाचरति मुखर+क्विप्–क्त । शब्दायमाने ।

मुखलाङ्गल पु० मुखं लाङ्गलमिव भूमिविदारकं यस्य । शूकरे ।

मुखवल्लभ पु० ह्रस्व० । दाडिमवृक्षे तत्फलस्य मुखप्रियत्वात् । मुखप्रिये त्रि० ।

मुखवाचिका स्त्री० मुखं वाचयति अजडीकरोति सेवनात् वच णिच् ण्वुल् । व्यम्बष्टायाम् ।

मुखवास पु० मुखं वासयति सुरभीकरोति अण् । गन्धद्रव्ये, कर्पूरादौ च ।

मुखवासन पु० मुखं वासयति वस–ल्यु । मुखसौरभकारके गन्धे । तद्वति त्रि० ।

मुखविष्ठा स्त्री०मुखं विष्ठेव दुर्गन्धं यस्याः । तैलपायिकायां तन्मुखस्यैवमत्वे हि द्रव्यान्तरे दुर्गन्धो भवति ।

मुखव्यादान न० वि+आ+दा–ल्युट् ह्रस्व० । मुखप्रसारणे ।

मुखशोधन न० मुखं शोधयति शुध–णिच्–ल्यु त्वचे (दारचिनि) कटुरसे पु० ।

मुखशोधिन् पु० मुखं शोधयति शुध–णिच्–णिनि । जम्बीरे ।

मुखस्राव पु० स्रवति स्रु–ण ह्रस्व० । लालाख्ये मुखस्यन्दिद्रवे ।

मुखाग्नि पु० मुखमेवाग्नितुल्यं तापदानेन दाहकत्वात् यस्य । विप्रे, दावानले च ।

मुखाख्य पु० मुखमेवाख्यं यस्य । कर्कटे ।

मुख्य त्रि० मुखे आद्ये भवः यत् । प्रथमकल्पे, श्रेष्ठे च ।

मुग्ध त्रि० मुह-क्त । मूढे । मोहयति अन्तर्भूतण्यर्थं मुह-कर्त्तरि क्त । सुन्दरे । नायिकाभेदे स्त्री० ।

मुच दम्भे भाषे भ्वा० आत्म० सक० सेट् । मोचते अमोचिष्ट इदित्-त्वात्यम् । मुञ्चते ।

मुच त्यागे चुरा० उ० सक० सेट् । मोचयति-ते अमूमुचत्-त ।

मुच त्यागे तु० सुचादि० उभ० सक० अनिट् । मुञ्चति-ते अमुचत् अमुक्त ।

कर्म्मकर्त्तरि अकर्म्मकः 'मुच्यते सर्वपापेभ्य, इति पुराणम् ।

मुचकुन्द पु० मुच-कु मुचुः कुन्द इव । स्वनामख्याते पुष्पवृक्षे, नृप-भेदे च ।

मुज भ्वनौ अक० मार्ज्जने सक० वा चुरा०पक्षे भ्वा० पर० सेट् । मोजयति ते मोजति अमूमुजत्-त अमोजीत् । इदित्यत्वार्थं । मुञ्जयति ते मुञ्जति अमुमुञ्जत्-त अमुञ्जीत् ।

मुञ्ज पु० मुजि-अच् । (मुज) रज्जुसाधने तृणभेदे ।

मुञ्जकेशिन् पु० मुञ्जइव केशः अस्यास्य इनिः । विष्णौ ।

मुञ्जर न० मुजि-अरन् । घासूके ।

मुट मर्दने भ्वा० पर० सक० सेट् इदित् । मुण्टति अमुण्टीत् ।

मुट छोदे वा चु०उभ० पक्षे भ्वा० पर० सक० सेट् । मोटयति ते मोटति अमूमुटत् त अमोटीत् ।

मुट छोदने आक्षेपे च तु०कु०पर०सक०सेट् । मुटति अमुटीत् मुमोट

मुठ पलायने भ्वा० आ० अक० सेट् इदित् । मुण्ठते अमुण्ठिष्ट ।

मुड केशादिच्छेदे मर्द्दने च भ्वा० पर० सक० सेट् इदित् । मुण्डति अमुण्डीत् ।

मुड मज्जने भ्वा० आ० अक०सेट् इदित् । मुण्डते अमुण्डिष्ट ।

मुण प्रतिज्ञाने तु० पर०सक० सेट् मुणति अमोणीत् ।

मुण्ड पु० न०मुडि–कर्म्मणि घञ् । मस्तके, घोले, मुण्डायसे च दैत्यभेदे नापिते, स्यामुण्डे च पु० । मुण्डिते त्रि० । महाश्रावणिकायां, मुण्डरीकाबाह्व स्त्री० टाप् ।

मुण्डक पु० मुण्डयति मुडि–णिच्–ण्वुल् नापिते ।

मुण्डचणक पु० मुण्डश्चणकइव । कलाये ।

मुण्डन न० मुडि–भावे ल्युट् । केशच्छेदे वपने ।

मुण्डफल पु० मुण्डं शिरइव फलमस्य । नारिकेले ।

मुण्डमालि पु० मुण्डाः शुष्कशून्याः मालिः । निःसुखे मालिभेदे ।

मुण्डायस न० मुण्डमयः अच् समा० । लौहभेदे ।

मुण्डितिका स्त्री० मुण्डि–इत स्वार्थे कन् अत इत्वम् टाप् । (मुण्डारी) वृत्तभेदे ।

मुण्डिन् पु० मुण्डयति मुडि–णिच् णिनि । नापिते ।

मुण्डीरी स्त्री० मुडि–ईरच् गौ० ङीष् । स्वनामख्याते वृत्तभेदे ।

मुद संमाज्जने चु० उ०सक० सेट् । मोटयति ते अमुमुदत् त ।

मुद हर्षे भ्वा० आ० अक० सेट् । मोदते अमोदिष्ट ।

मुद्(दा) स्त्री० मुद०सम्प० क्विप् वा टाप् । हर्षे, त्रायमाणोषधौ च ।

मुद्दिर पु० मुद–किरच् । मेघे, भेके च । कामुके त्रि० ।

मुद्ग पु० मुद–गक् नेट् । (मुग) कलायभेदे, पक्षिभेदे, जलकाके च ।

मुद्गपर्णी स्त्री० मुद्गस्येव पर्णमस्याः । (मुगानी) वनमुद्गे ।

मुद्गर न० मुद्गं गिरति गॄ–अच् । मल्लिकाभेदे, लोहभेदने, (मुगर) पुष्पवृक्षे, कर्म्मारवृक्षे, (कामराङ्गा) च पु० । स्वार्थे कन् । तत्रैव ।

मुद्गल न० मुद्गं गिलति गॄ–अच् रस्य लः । वनवृक्षे, रोहिष वृक्षे च । गोत्रिवृक्षे प्रवरकारके मुनिभेदे, ऋषभेदे च पु० ।

मुद्गष्ट पु० मुद्गं स्रकति प्रतिबध्नाति स्रक–ड पृ० षत्वम् । वनमुद्गे । अच् । मुद्गष्टकोऽप्यत्र ।

मुद्रा स्त्री० मुद–रक् । प्रत्ययकारिण्याम्, (मोहर) अङ्गुलिन्यस्ते । मुद्राङ्कनयुक्ताङ्गुलीयके, स्वर्णरौप्यादिनिर्म्मितायां अभरणे, मुद्रालिपिः

लिलिपिर्लिपिर्लेखनसम्भवा । मुद्रिका मुखसम्भूता लिपयः पञ्च-धा मता" इत्युक्तलिपिभेदे लिपिभेदे, "तन्त्रप्रसिद्धे वीराचारदेव्यै पूजनकालखण्डवा अष्टौ गोधूमचक्रादयः । तस्य नाम भवेत्कुट्टे" त्युक्ते पञ्चमकारादिद्रव्यभेदे, देवविशेषाराधनयाकुल्यादिषट्चिक्रभेद-विशेषे "मुद्रामद्यगुणमि"ति तन्त्रम् बन्धोत्थे च ।

मुद्रालिपि स्त्री० मुद्रया लिपिः । पञ्चधा विभक्तलिपिभेदे लिपिभेदे (छापार अक्षर) ।

मुद्रिका स्त्री० मुद्रैव स्वार्थे कन् । स्वर्णरौप्यादि निर्म्मिते अङ्गुलिस्थे अङ्गुलभाषणयोग्ये पदार्थे ।

मुद्रित त्रि० मुद्रा जाताऽस्य इतच् । अप्रकाशिते, अङ्किते च ।

मुधा अव्य० मुह का पृ० धक्ष धः (मिथ्याशब्दार्थे ।

मुनि पु० मन इन् पृ० उत्वम् । दुःखेष्वनुद्विग्नमनाः सुखेषु विगत-स्पृहः । वीतरागभयक्रोधः स्थिरधीर्मुनिरुच्यते. इत्युक्तलक्षणे स्थिरचित्ते वीतरागादौ जने । ते च मन्वत्रि विष्णुहारीतादयः । सप्तसंख्यायाञ्च ।

मुनिखर्ज्जूरी स्त्री० ई० । खर्ज्जूरीभेदे ।

मुनिच्छद पु० मुनिसंख्याताः सप्तसंख्याः छदाः प्रतिपर्ण यस्य । सप्तच्छदे (छातिम) ।

मुनितरु पु० मुनिरत्नमनामकस्तरुः वकवृक्षे ।

मुनिद्रुम पु० मुनिनां प्रियो मुनिनामको वा द्रुमः । प्लक्षनामकवृक्षे वक-वृक्षे च ।

मुनिपुत्रक पु० मुनेः पुत्रः संज्ञायां कन् । दमनकवृक्षे, खञ्जने च । ईत० । खञ्जिते ।

मुनिपुष्प न० मुनिद्रुमस्य पुष्पं मौनो भीमसेनश्चतुरश्चदलोपः । वकपुष्पे ।

मुनिभेषज न० मुनीनां भेषजमिव फलरसानां अगस्त्ये मुनौ, मौन-नामाये च ।

मुनीन्द्र पु० मुनिः इन्द्र इव । बुद्धे । ७त० । अग्निवेशे ।

मुन्थ गत्यां भ्वा॰पर॰ सक॰ सेट् मुन्थो वेट्। मुन्थति अमुन्थीत्।

मुन्था स्त्री॰ तालवप्रसिद्धे जन्मावधिवधि एकैकवर्षे जन्मत एकैकराज्ञ-जरे जन्मनि गतिभेदे। मुथकाप्यत्र।

मुन्थन न॰ मुनियोन्यमन्त्रम्। नीवारकन्दादौ।

मुमुक्षु त्रि॰ मोक्षुमिच्छुः सुच-सन्-उ। मोक्षेच्छावति। संसारबन्ध-नाभावेच्छावति। यतौ पु॰।

मुमूचान पु॰ सुच-कान पृ॰ दीर्घः। मेघे, सुक्षवति त्रि॰। 'द्रुच-दादिव सुमूचान इति वेदमन्त्रः।

मुमूर्षु त्रि॰ मर्तुमिच्छुः मृ-सन्-उ। आसन्नमरणे।

मुर वेष्टने तु॰ पर॰ सक॰ सेट्। मुरति अमोरीत्।

मुर पु॰ मुर-क। दैत्यभेदे, 'पार्थेनाथ हिषम् मुर'मिति माघः।

मुर पु॰ मुर-क। वेष्टने। स्वनामख्याते गन्धद्रव्ये स्त्री॰ टाप्।

मुरज पु॰ मुरात् वेष्टनात् जायते जन-ड। मर्दले वाद्यभेदे।

मुरजफल पु॰ मुरज इव फलं यस्य। पनसवृक्षे। मर्दलफलादयोऽप्यत्र।

मुररिपु पु॰ ६त॰। विष्णौ। मुरारिमुरमथनादयोऽप्यत्र।

मुरला स्त्री॰ मुरं लाति ला-क। नर्म्मदायाम्। 'मुरलामारुतोद्भूते'ति रघुः। वंशीनाम्नि वाद्ये गौरा॰ ङीष्।

मुरलीधर मुरलीं धरति धृ-अच्। श्रीकृष्णे, मुरलीवादनादयोऽप्यत्र।

मुर्च्छ मोहे दृढौ च भ्वा॰पर॰सक॰सेट्। मूर्च्छति अमूर्च्छीत्। भावे क्त। मूर्तम् मूर्च्छितम्।

मुर्मुर पु॰ मुर-क। पृ॰ ह्रस्वम्। मुखाग्नौ, कन्दर्पे, खद्योते च।

मुर्व बन्धे भ्वा॰ पर॰सक॰ सेट्। मूर्वति अमूर्वीत् निष्ठायामनिट्।

मल रोपणे चु॰उभ॰सक॰सेट्। मोलयति ते अमूमुलत् त।

मुशटी स्त्री॰ मुष-अटच् गौ॰ङीष् पृ॰। खिनकरौ।

मुश(ष)ली स्त्री॰ मुष मुस वा अलच् पृ॰ ह्रस्व यः गौरा॰ ङीष्। तालमूल्याम् वल्लीप्राच्च स्वार्थे कन् पक्षेऽम्।

मुष बधे भ्वा॰पर॰सक॰सेट्। मोषति अमोषीत्।

मुष छेदने दिवा०पर०सक०सेट् । मुष्यति अमुषत्-अमोषीत् । पुषादिर-यमित्यन्ये ।

मुष लुण्ठने क्र्या० पर० द्विक०सेट् । मुष्णाति अमोषीत् ।

मुष(ष)(ष)ल पु० मुष कलन् । पृ० षस्य वा सः (षा) वा अयोध्ये स्वनामख्याते धान्यादिकण्डनसाधने पदार्थे ।

मुषा स्त्री० मुष-क-टाप् । धातुद्रावणे पात्रभेदे (मुचौ) ।

मुषित त्रि० मुष-क्त । अपहृतद्रव्ये जने ।

मुष्क पु० मुष-टाप् । पुरुषचिह्नभेदे अण्डकोषे, (वराटाबीज) इक्षौ तस्करे, मांसले, च स्वार्थे कन् तत्रैव ।

मुष्कशून्य पु० इत० । इषुधरहिते राज्ञामन्तः पुररक्षके (खोजा) ।

मुष्टि पु० स्त्री० मुष-क्तिच् । बद्धपाणौ, पलपरिमाणे, कुञ्चप्रकोष्ठे च । क्तिन् । मोषणे स्त्री० ।

मुष्टिक पु० मुष्टा कायति कै-क । कंसराजमल्लभेदे । मुष्टिनौषधं प्रयो-जनमस्य कन् । स्वर्णकारे ।

मुष्टिकान्तक पु० ६त० । बलदेवे तस्य मुष्टिकासुरहननात्तथात्वम् ।

मुष्टिन्धय पु० मुष्टिं धयति धे-खच् मुम् च । बालके ।

मुष्टिबन्ध पु० मुष्टेर्बन्धो यत्र । संग्रहे । ६त० । मुष्टिबन्धने ।

मुस खण्डने दि०पर०सक० सेट् । मुस्यति अमुसत् आमोसीत् पुषादि-रयमित्यन्ये ।

मुस(ष)(ष)लिन् पु० मुस(ष)(ष)ल+अस्त्यर्थे इनि । बलदेवे ।

मुस(ष)(ष)ल्य त्रि० मुस(ष)(ष)लेन वेध्यः यत् । मुषलवेध्ये ।

मुस्त संहतौ चु० उभ० सक० सेट् मुस्तयति ते अमुसस्तत् त ।

मुस्त पु० स्त्री० मुस्त अच् स्त्रीत्वे टाप् । मुस्तके । (मुता) स्वार्थे कन् । अत्रैव अस्त्री० । स्थावरविषभेदे पु० ।

मुस्ताभ न० मुस्तेव भाति भा-क । (नागरमुथा) मुस्तकभेदे ।

मुह मोहे वैचित्त्ये दि० उभ० सक० सेट् । मुह्यति अमुहत् मोहिता, मोग्धा, मोढा ।

मुहिर पु० मुह किरच् । कामे, मूर्खे च ।

मुहुम् अव्य० मुह-डुमिक् । पौनः पुन्ये ।

मुहूर्त्त स्त्री० हुर्च्छ-क्त धातोर्मुट् च । द्वादशलग्नगमिते काले, पञ्चदशधा विभक्तस्य दिनस्य पञ्चदशभागे, किञ्चिन्नून्यूनाधिकघटिकाद्वयरूपे काले च ।

मूङ् बन्धे भा० आ० सक० सेट् । मवते अमविष्ट ।

मूक पु० मूक्-क् । मन्त्रे, दैत्यभेदे, दीने, वाक् शक्तिरहिते च त्रि० ।

मूढ त्रि० मुह-क्त । मूर्खे, बाले, जडे, औरसे च ।

मूत त्रि० यू-क्त । द्रुते, संयते च ।

मूत्र स्रावे अदा० चु० उभ० अक० सेट् । मूत्रयति ते अमुमूत्रत् त ।

मूत्र न० मूत्र-अच् प्रस्रावे उपस्थात् क्षरितजले ।

मूत्रदोष पु० मूत्रस्य दोषो यस्मात् दुष-घञ् ६त० । प्रमेहरोगे ।

मूत्रनिरोध पु० मूत्रं निरुणद्धि नि+रुध-अण् । मूत्रावतिबन्धकरोगे ।

मूत्रफला स्त्री० मूत्रमेव फलं यस्याः । त्रपुष्याम् (शशा) ककोट्याञ्च ।

मूत्राघात पु० मूत्रमाक्रान्ति आ+हन-अण् । मूत्रक्षननकारिणि रोगभेदे ।

मूत्राशय पु० ६त० । नाभेरधोदेशे वस्तिनामकस्थाने ।

मूर्ख त्रि० मुह--ख सुडागमः । मूढे गायत्रीरहिते सार्धगायत्रीसहिते च । "क्रियाहीनश्च मूर्खश्चे"ति स्मृतिव्याख्यायां निबन्धकारैस्तथार्थकतया व्याख्यानात् ।

मूर्च्छना स्त्री० मुर्च्छ-युच् । "स्वरः संमूर्च्छितो यत्र रागतां प्रतिपद्यते । मूर्च्छनामिति तां प्राहुः कवयो ग्रामसम्भवा"मित्युक्ते गानाङ्गभेदे "स्फुटीभवद्ग्रामविशेषमूर्च्छना"मिति भावः ।

मूर्च्छा स्त्री० मुर्च्छ-अङ् । मोहे, अनिद्रायामपि वाह्येन्द्रिय व्यापारशून्यावस्थायां, द्रुतौ च ।

मूर्च्छाल त्रि० मूर्च्छा+अस्त्यर्थे लच् । मूर्च्छाविशिष्टे ।

मूर्च्छित त्रि० मूर्च्छा जातास्य इतच् । मूर्च्छायुक्ते, द्रुते, उच्छ्रिते च ।

मूर्त्त त्रि० मुर्च्छ-क्त । मूर्च्छान्विते, मूढे, कठिने च । मूर्तिरस्यास्त

अच्। मूर्त्तिमति न्यायोक्तेषु अवच्छिन्नपरिमाणवत्सु क्षितिजल-पावकपवनमनःसु च।

मूर्त्ति स्त्री० मूर्च्छ-क्तिन्। देहे, काठिन्ये, आकारे, प्रतिमायाञ्च।

मूर्त्तिमत् पु० मूर्त्तिरस्यस्य मतुप्। देहे। आकारयुक्ते, काठिन्यवति च त्रि०।

मूर्द्धज पु० मूर्द्धनि जायते जन-ड। केशे। मस्तकजातमात्रे त्रि०।

मूर्द्धन्य त्रि० मूर्द्धनि भवः यत्। मस्तकजाते। शिक्षाग्रन्थोक्तेषु अकार-टवर्गषवर्णेषु पु०।

मूर्द्धन् पु० मुर्व्व-कनिन् धुट् च। मस्तके।

मूर्द्धपुष्प पु० मूर्द्धनि पत्त्रशिरसि पुष्पं यस्य। शिरीषवृक्षे।

मूर्वा स्त्री० मुर्व्व-अच्। स्वनामख्याते धनुर्गुणोपयुक्ते लताभेदे। गौरा० ङीष्। मूर्वीत्यपत्रत्व।

मूल प्रतिष्ठायां भ्वा० उभ० अक० सेट्। मूलति ते अमूलीत् अमूलिष्ट।

मूल रोपणे चुरा० उभ० सक० सेट्। मूलयति ते अमूमुलत् त।

मूल न० मूल-क। शिफायाम् (जड़) (शिकड़) आद्ये च निकुञ्जे, वाणिज्यादुपयोगिनि मूलधने, अन्तिके, निजे, चरणे, मूलरणे, पिप्पलीमूले, टीकादिना व्याख्येयग्रन्थे च। अश्विन्यवधिके जन-विंशे नक्षत्रे त्रि०।

मूलक न० मूल+संज्ञायां कन्। कन्दभेदे (मूला) "वर्ज्जनीयं सदा माघे मूलकं मदिरासम" मिति गौडीयस्मृतिः। विषभेदे पु०।

मूलकपर्णी स्त्री० मूलकस्येव पर्णा यस्य। शोभाञ्जने।

मूलकमूला स्त्री० मूलकस्येव मूलमस्याः। क्षीरकाकोलीवृक्षे।

मूलकर्म्मन् न० मूलेन मन्त्रौषधादिना यत् वशीकरणादि कर्म्म। औ-षधादिना वशीकरणकर्म्मणि।

मूलकृच्छ्र न० मूलेन साधितस्तत्कृच्छ्रम्। व्रतभेदे। तद् यस्य। "मूलकृच्छ्रः स्मृतो मूलै"रिति स्मृत्युक्ते तद्व्रति त्रि० [मात्रे त्रि०।

मूलज न० मूलाज्जायते जन-ड। आर्द्रके। उत्पलादौ पु० मूलजातं-

मूलत्रिकोण न० सिंहोष्टस्य मेषस्य कन्या धन्वी घटोघटः । अर्कादीनां त्रिकोणानी"त्युक्ते रव्यादीनां क्रमेण सिंहादिषु राशिषु ।

मूलद्रव्य न० कर्म्म० । मूलधने यदवलम्ब्य वाणिज्यादिकं क्रियते तस्मिन् (पुँजि) मूलधनादयोऽप्यत्र ।

मूलपर्णी स्त्री० मूलमारभ्य पर्णान्यस्याः ङीप् । मयङ्कूपण्याम् ।

मूलपुष्कर न०पुष्करस्य मूलं राज० पर० । पुष्करमूले ।

मूलपोती स्त्री० पू-तच् गौ० ङीष् मूलं प्रधाना पोती । पूतिकायाम्

मूलप्रकृति स्त्री० मूलीभूता सर्वाद्या प्रकृतिः । सांख्यमतोक्ते सर्वेषां कारणीभूते साम्यावस्थापन्ने सत्त्वरजस्तमोरूपे त्रिगुणात्मके प्रधाने "मूलप्रकृतिरविकृति"रिति सांख्यकारिका । दुर्गायाञ्च ।

मूलफलद पु० मूलेऽपि फलं ददाति प्रहृते दा-क । धनसृष्टे ।

मूलरस पु० मूले रसो यस्याः । मोरटालतायाम् ।

मूलशाकट न० मूलानां क्षेत्रं शाकटन् । मूलभक्षनयोग्ये क्षेत्रे । शाखिन । मूलशाकिनोऽप्यत्र ।

मूला स्त्री० मूलाभि बाहुल्येन सन्त्यस्याः अच् । शतमूल्याम् ।

मूलाधार पु० ६त० । नाभिलिङ्गयोर्म्मध्ये तस्य हि शरीरस्थसकल-नाडीनां मूलस्थानत्वात्तथात्वम् "मूलाधारे त्रिकोणाख्ये इच्छाज्ञान-क्रियात्मके, मध्ये स्वयम्भूलिङ्गन्तु कोटिसूर्य्यसमप्रभमित्युक्तलक्षणे त्रिकोणाकारे तन्त्रोक्ते चक्रभेदे च ।

मूलिन् पु० मूलमस्त्यस्य इनि । वृक्षे । ठन् । मूलिकोऽप्यत्र ।

मूल्य न० मूलाय पटादिकारणतत्त्वादये इदम् यत् । तन्त्वाद्यादानाय दीयमाने धने ।

मूष लुण्ठने भ्वा० पर० सक०सेट् । मूषति अमूषीत् ।

मूष पु० स्त्री० मूष-क । मूषिके तैजसद्रव्यद्रावणपात्रे, (मुचि) च । गवाक्षे "एकद्वित्रादिमूषावक्त्रे"ति लीला० देवताडवृक्षे च स्त्री०

मूषक पु० स्त्री० मूष-स्वुल् स्त्रीत्वे टाप् अत इत्त्वम् उन्दुरौ ।

मूषककर्णी स्त्री० मूषककर्णइव पुष्पाण्यस्याः । (उन्दुरकानी) आ० खुपल्याम् मूषाकरकर्ण्यादयोऽप्यत्र ।

मूषिक पु० मूष-किकन्। उन्दुरौ। मूषिकपर्णी स्त्री०।
मूषिकपर्णी स्त्री० मूषिककर्णइव पर्णान्यस्याः जलजतृणभेदे।
मूषी स्त्री० मूष+गौ०ङीष्। स्वर्णादेर्द्रावणपात्रे (हुची)।
मूषीक पु० स्त्री० मूष कीकन् स्त्रीत्वे टाप्। उन्दुरौ।
मृ मृतौ तु० सार्वधातुके लुङि आशी र्लिङि च आ० अन्यत पर०अक० अनिट्। म्रियते। अमृत। ममार। मर्त्तासि मृषीष्ट।
मृकण्ड पु० मुनिभेदे।
मृक्ष संघाते भा० प० अक० सेट्। मृक्षति अमृक्षीत्।
मृग अन्वेषणे याचने च अ० चु०आ०सक०सेट्। मृगयते अमृगत।
मृग अन्वेषणे दिवा० पर० सक० सेट् मृग्यति अमृगीत्।
मृग पु० मृग-क। पशुमात्रे, हरिणे, गजभेदे, अश्विन्यधिके पञ्चमे नक्षत्रे अ० चु० मृग-भावे अच्। अन्वेषणे, याचने, यज्ञभेदे च। अच्। मृगमदे, मकरराशौ च पु०।
मृगगामिनी स्त्री० मृग इव गच्छति गम, णिनि विड्भाषायाम्। मृगतुल्यगमनवति त्रि० स्त्रियां ङीप्।
मृगजीवन पु० मृगैस्तन्मांसादिभिर्जीवति जीव-ल्यु। व्याधे।
मृगणा स्त्री० मृग+युच् टाप्। नक्षत्रव्यस्यान्वेषणे।
मृगतृष्णा स्त्री० मृगाणां तृष्णेव तृष्णाहेतुत्वात्। सूर्य्यकिरणे जलभ्रान्तौ, निर्ज्जलदेशस्थं सूर्य्यकिरणं दूरतो वीक्ष्य मृगैर्जलभ्रान्त्या तृष्णार्त्तैः सद्भिः वम्भ्रम्यते न च जलं लभ्यते इति, ग्रीष्मे मरुदेशे सिकतादौ पतितरविकिरणेषु जलभ्रान्तिरिति च प्रसिद्धम्। स्वार्थे कन्। तत्रैव।
मृगदंशक पु० मृगं दंशति दृंश-ण्वुल्। कुक्कुरे।
मृगधूर्त्तक पु० मृगेषु धूर्त्तकः। शृगाले।
मृगनाभि पु० मृगस्य नाभिः नाभिजन्यः। कस्तूर्य्याम् मृगभेदे।
मृगनाभिजा स्त्री० मृगस्य नाभेर्जायते जन-ड। कस्तूर्य्याम्।
मृगनेत्रा स्त्री० मृगो मृगशिरो नक्षत्रं नेत्रमिव प्रकाशकं यस्यां रात्रिषु।

सौरमार्गस्य किञ्चिदूनद्विकलयोर्विंशद्दिनावधिमार्गशीर्षशेषपर्यन्तदिवसीय रात्रिषु ।

मृगपति पु० ६त० । मृगाणां पशूनां पतिः स्वामी । सिंहे मृगेन्द्राद्यो ऽप्यत्र ।

मृगप्रिय न० ६त० । पर्वतलशे ।

मृगबधाजीव मृगबधेनाजीवति जीव-अच् । व्याधे ।

मृगबन्धनी स्त्री० मृगोबध्यतेऽनया बन्ध ल्युट् ङीप् । मृगबन्धनार्थे जाले । करणस्य कर्तृत्वविवक्षायां ल्युनि ङीप् । मृगबन्धिनीत्यप्यत्र

मृगभक्ष्या स्त्री० मृगैर्भक्ष्यते भक्ष-यत् । जटामांस्याम् ।

मृगमद पु० मृगस्य मदो गर्वो यस्मात् । कस्तूर्याम् ।

मृगमदवासा स्त्री० मृगमदस्येव वासः सौरभमस्याः । कस्तूरीमल्लिकायाम् ।

मृगया स्त्री० मृगं याचनया या घञर्थे क । (शीकार) । पशुबधफलके व्यापारे आखेटके ।

मृगयु पु० मृग-अस्यर्थे यु । व्याघ्रादि मृगालादीनां व्यापारभेदे, व्याधे च "मृगयुर्भिल मृगोऽथ दक्षिणेम्मे" ति भट्टिः ।

मृगरमा पु० मृगो मृगमांसं तस्येव रसोऽस्याः । मरुदेवीलतायाम् ।

मृगराज पु० मृगाणां पशूनां राजा टच् । सिंहे मृगेषु राजते अच् । चन्द्रे ।

मृगराटिका स्त्री० मृगं रटति जीव्यत्वेन रट-ण्वुल् गौ० ङीष् स्वार्थे कन् । जीवन्त्याम् ।

मृगरिपु पु० ६त० । सिंहे मृगशत्रुप्रभृतयोऽप्यत्र ।

मृगलक्षण पु० मृगो लक्षणं यस्य । चन्द्रे मृगाङ्कादयोऽप्यत्र ।

मृगवल्लभ न० ६त० । कुन्दरलशे ।

मृगवाहन पु० मृगो वाहनं यस्य । वायौ 'धावन् हरिणपृष्ठस्थ' इति वायुध्यानम् ।

मृगव्य न० मृगान् व्यथतेऽत्र व्यध ड । मृगयायाम् ।

मृगशिरस् न० पु० । मृगस्येव शिरोऽस्य । आश्विन्यधिके पञ्चमे

नक्षत्रे मृगशिरोयुक्ते स्त्री० टाप् । मृगशीर्षेण, मृगशीर्षे, एतावयुक्ते पु० न० ।

मृगा स्त्री० मृगो मृगमांसतुल्यरसोऽस्त्यस्य अच् । सहदेवीलतायाम् ।

मृगाक्षी स्त्री० मृगस्येवाक्षि पृथ्वं यस्याः षच् समा० ङीष् । विश्वस्यां मृगतुल्यनयनवत्यां स्त्रियां च ।

मृगाण्डजा स्त्री० मृगस्याण्डाकारात् नाभिस्थितमांसपिण्डात् जायते जन-ड । कस्तूर्याम् ।

मृगादन पु० मृगान् अत्ति अद-ल्यु । क्षुद्रव्याघ्रे । मृगान्नकोऽप्यत्र ।

मृगादनी स्त्री० मृग इवाद्यते अद-कर्मणि ल्युट् । सहदेव्याम्, इन्द्रवारुण्याम्, (राखालशशा), कर्कोटीभेदे च ।

मृगाराति पु० ६त० । कुक्कुरे, मृगशत्रौ, सिंहे च ।

मृगारि पु० ६त० । कुक्कुरे, सिंहे, व्याघ्रे, रक्तशोभाञ्जने च । तत्रोषवने हि तस्य नाशः ।

मृगाविध् पु० मृगं विध्यति विध-क्विप् पूर्वं दीर्घः । व्याधे ।

मृगित त्रि० मृग-क्त । अन्वेषिते, याचिते च ।

मृगेन्द्र पु० मृगः इन्द्र इव । सिंहे ।

मृगेन्द्रचटक पु० मृगेन्द्रइव सिंहस्यटकः पक्षी । श्येनपक्षिणि ।

मृगेन्द्राणी स्त्री० मृगेन्द्रेण सिंहेनाश्यते भक्ष्यते अश-कर्मणि यत् । वासके

मृगेर्व्वारु स्त्री० मृगप्रिया इर्व्वारुः कर्कोटी । श्वेतायामिन्द्रवारुण्याम् (सादा राखालशशा) ।

मृगेष्ट पु० ६त० । सुक्षुद्वृक्षे ।

मृगेक्षणा स्त्री० मृगस्य ईक्षणमिव पृथ्वमस्याः । मृगेर्व्वारौ ।

मृज शोधने भूषणे च वा चु० उभ० पक्षे अदा० सक० वेट् । मार्जयति-ते मार्ष्टि अमीमृजत्-त अममार्जत्-त अमार्क्षीत् अमार्जीत् अमृजत् ।

मृजा स्त्री० मृज-अङ् । मार्ज्जने ।

मृड तोषणे क्र्या० तु० च पर० सक० सेट् । मृडनाति मृडति अमर्डीत् ।

मृड पु० मृड क । शिवे तत्पत्न्याम् स्त्री० ङीप् आनुक् च ।

मृण हिंसे तु० प० सक० सेट् । मृणति अमर्णीत् ।

मृणाल न० मृण-कालन् । पद्मादेर्नालरूपे स्कन्धे, वीरणमूले च गौरा० ङीष् । मृणालीत्यपि विस्तन्त्रौ स्त्री० ।

मृणालिन् स्त्री० मृणालं विद्यतेऽस्य अच् मृणालं पद्मं ततः समूहे तदुत्पत्तिदेशे वा इनि । पद्मसमूहे, पद्मयुक्तदेशे, तदुत्पन्नलतायाञ्च ।

मृत न० मृ-भावे क्त । मरणे । तत्तुल्यदुःखजनके याचितके दत्तौ च । कर्त्तरि क्त । गतप्राणे त्रि० । [वेति कृतिः ।

मृतक न० मृतेन मरणेन कायति कै-क । मरणाशौचे 'स्पृतके मृतकोऽध-

मृतकल्प त्रि० ईषदसम्प्राप्तो मृतः मृत+कल्पप् । मृतप्राये ।

मृतजीव पु० मृतः नष्टः सन् पुनर्जीवति जीव-अच् । तिलकवृक्षे ।

मृतवत्सा स्त्री० मृतो वत्सो यस्याः । मृतापत्यायां-स्त्रियां स्त्री गव्याञ्च 'मृतवत्सा च या नारीति' तन्त्रम् ।

मृतसञ्जीवनी स्त्री० मृतान् संजीवयति सम्+जीव-णिच् ल्यु गौ० ङीष् । गोरक्षदुग्धायामोषधौ तन्त्रोक्ते विद्याभेदे च ।

मृतस्नात त्रि० मृतं मरणं तन्निमित्तं स्नातः स्ना-क्त । मरणनिमित्तं कृतस्नाने ।

मृतालक न० मृतमालयति भूषयति आल-णिच्-ण्वुल् । आढक्याम् । मृत् मृत्तिका तालः प्रतिष्ठा यस्य । मृत्तालमस्यत्र । कन् तत्रैव ।

मृतफली स्त्री० मृतेष्वपि फलमस्याः । कुष्ठौषधौ । (कुड़)

मृत्तिका स्त्री० मृद+तिकन् टाप् । मृदि (माटि) सा क्षेत्रत्वेनास्त्यस्य अच् टाप् । आढक्याम् ।

मृत्यु पु० मृ-त्युक् । यमे, देहादिभ्यः प्राणवियोगे विजातीयात्ममनः-संयोगनाशे वा मरणे च ।

मृत्युनाशक पु० मृत्युं नाशयति नाशि-ण्वुल् । पारदे तस्य हि रसायनक्रियादिना शोधयित्वा सेवने मृत्युनाशकत्वम् मृत्युनाशक-मात्रे त्रि० ।

मृत्युपुष्प पु० मृत्यवे स्वामिमरणाय पुष्पं यस्य । धत्तूरे । तस्मिन् पुष्पिते हि तत्स्वामिनो नाशः ।

मृत्युफला स्त्री० मृत्यवे स्वनाशाय फलं यस्याः । कदल्यां फलपाके हि तस्या नाशः । [वाङ्मुरादेरुद्भवः ।

मृत्युबीज पु० मृत्योः दाह एव बीजं कारणमस्य । वंशे तस्य दाहादे-

मृत्युसूति स्त्री० मृत्यवे सूतिः प्रसवोऽस्याः । कर्कटकयोषिति प्रसवादेव हि तस्या नाशः 'यथा कर्कटकी गर्भमाधत्ते मृत्यवे निजम्' इति पुराणम् । [अर्धआद्यच् । आढक्याम् ।

मृद्गी (क्ष्मा) स्त्री० मृद्+प्रशस्तार्थे स क्ष्म, वा । प्रशस्तमृत्तिकायाम् ।

मृद क्षोदे क्या० प० सक० सेट् । मृद्नाति । क्रमदीत् ।

मृद् (दा) स्त्री० मृद्यते क्षुद्यते मृद-सम्प० क्विप् । मृत्तिकायाम् (माटी) टाप् । मृदाख्यत्व ।

मृदङ्ग पु० मृद-अङ्गच् किच्च । वाद्यभेदे ।

मृदङ्गफलिनी स्त्री० मृदङ्गाकारं फलमस्यस्य इनि । घोषा तक्याम् । तत्फलं साम्यादस्यस्य च्च । मृदङ्गाख्यत्व ।

मृदु त्रि० मृद क्नु । कोमले । स्त्रियां वा ङीप् मृद्वी मृदुः । चित्रानुराधामृगेषुतीक्ष्णचन्द्रेषु च । [पत्रवृक्षे ।

मृदुचर्म्मिन् पु० मृदु कोमलं चर्म्म त्वचास्यस्य व्रीह्या० इनि । भूर्ज्ज-

मृदुच्छद पु० छाद्यतेऽनेन छदः त्वक् इव० । भूर्जवृक्षे । पर्व्वतजपीलु-वृक्षे, कुन्दवृक्षे, श्वेतालवृक्षे च ।

मृदुताल स्त्री० कर्म० । श्वेतालवृक्षे (तेऊड) ।

मृदुत्वच् (च) पु० मृदुः त्वक् त्वचा वा यस्य । भूर्जत्वचवृक्षे ।

मृदुपत्र पु० मृदूनि पत्त्राण्यस्य । नले । कर्म० । कोमलपर्णे न० इत० । तद्वति त्रि० । चिल्लीशाके स्त्री० गौरा० ङीष् ।

मृदुपर्व्वक पु० मृदूनि पर्व्वाण्यस्य । वेतसे । मृदुग्रन्थियुक्ते त्रि० ।

मृदुपुष्प पु० मृदूनि पुष्पाण्यस्य । शिरीषवृक्षे । इव० मृदुकुसुमवति त्रि० । कर्म० । कोमलपुष्पे न० ।

मृदुफल न० मृदूनि फलान्यस्य । विकङ्कते (वदरि) मधुनारिकेले च । इव० कोमलफलवति त्रि० । कर्म० । कोमलफले न० ।

मृदुल न० मृद-कुलच् । जले । कोमलमात्रे त्रि० ।

मृदुलोमक पु० ६त० । मृगभेदे । कोमललोमयुक्ते त्रि० । कर्म० कोमललोम्नि न० ।

मृदूत्पल न० कर्म० । नीलोत्पले, नीलपद्मे च ।

मृद्वीका स्त्री० मृदु + स्वार्थे कन् । द्राक्षायाम् कपिलद्राक्षायाञ्च

मृध न० मृध्यतेऽत्र वज्रार्थे क । युद्धे । [अमर्द्धिष्ट ।

मृध आदीभावे भ्वा० उभ० सक० सेट् क्त्वा वेट् । मर्द्धति-ते अमर्द्धीत्

मृध्र स्वर्शने, ग्रन्थिभाने च तु० पर० सक० अनिट् । मृध्नोति अम्रार्च्छीत् अमार्च्छीत् अमृच्छत् । मृध इत्येके ।

मृध क्षमायां तु० उभ० अनिट् । मृध्नुते अमृच्छत् त ।

मृध क्षमायां अ० चु० उभ० सक० सेट् । मृधयति त अममृधत् त ।

मृध क्षमायां अ० भ्वा० उभ० सक० सेट् । मर्धति ते अमर्धीत् ।

मृप सेचने भ्वा० पर० सक० सेट् । मर्पति अमर्पीत् । क्त्वा वेट् ।

मृष क्षमायां चु० उ० सक० सेट् । मर्षयति ते अमीमृषत्त अममर्षत्त ।

मृष क्षमायां भ्वा० आ० सक० सेट् । मर्षते अमर्षीत् ।

मृष क्षमायां दिवा० उभ० सक० सेट् । मृष्यति ते अमर्षीत् अमर्षिष्ट ।

मृषा अव्य० मृष—का । मिथ्यार्थे ।

मृषार्थक न० मृषा अत्यन्तासम्भूतोऽर्थो यस्य । 'कूर्म्मलोमतनुत्राणः शशशृङ्गधनुर्द्धर' इत्यादिवाक्ये ।

मृषालक पु० मृषालक इव मञ्जरी अस्य । आम्रवृक्षे ।

मृषावाद पु० मृषा+वद घञ् । मिथ्यावाक्ये यथा छदो यज्ञिया-नित्यादिवाक्यम् ।

मृषोद्य न० मृषा+वद—क्यप् । मिथ्याकथने ।

मृष्ट न० मृज-क्त । मरिचे घृष्टे शोधिते च त्रि० ।

मृ वधे क्र्या० प० प० सक० सेट् । मृणाति अमारीत् ।

मे परीवर्त्ते भ्वा० आत्म० सक० अनिट् । मयते अमास्त ।

मेक(ख)ल पु० मि-कलच् खलच् वा नेत्त्वम् । अद्रिभेदे ।

मेक(ख)लकन्यका स्त्री० ६त० । नर्मदानद्याम् ।

मेक(ख)लाद्रिजा स्त्री० मेक(ख)लाद्रेर्जायते जन-ड । नर्मदा नद्याम् ।

मेखला स्त्री० मि खलच् । स्त्रीकट्याभूषणे उपनयनकाले ब्रह्मचारिधार्य्ये कटीसूत्रे, खड्गादेर्मुष्ट्याधारणार्थे उपर्य्यधोभागेन बन्धे, शैलनितम्बे, नर्म्मदायां, पुन्निषण्णाम्, होमकुण्डोपरिस्थे भूत्यूहे वेष्टनभेदे च ।

मेघ पु० मिह-घञ् कुत्वम् । धूमज्योतिः पवनसलिलसंघातजन्ये जलधरे, मुस्तके रात्रसभेदे रागभेदे च ।

मेघजीवन पु० मेघो जीवनं यस्य । चातकपक्षिणि ।

मेघज्योतिस् न० ६त० मेघजन्यं ज्योतिः । वज्राग्नौ ।

मेघनाद पु० मेघस्येव नादोऽस्य । वरुणे, रावणस्य पुत्रे इन्द्रजिति । ६त० । मेघशब्दे ।

मेघनादानुलासक पु० मेघस्य नादेनानुलसति अनु+लस–ण्वुल् । मयूरे । णिनि । मेघनादानुलासीत्यपत्र ।

मेघनामन् पु० मेघस्य नामेव नाम यस्य । मेघवाचकशब्दवाच्ये मुस्तके ।

मेघपुष्पक न० मेघस्य पुष्पमिव । जले ।

मेघयोनि स्त्री० ६त० । धूमे ।

मेघवर्णा स्त्री० मेघस्येव वर्णोऽस्याः । नीलीवृक्षे ।

मेघवर्त्मन् न० ६त० । आकाशे । मेघवीथ्यादयोऽप्यत्र ।

मेघवह्नि पु० मेघजन्यो वह्निस्तद्घर्षणजातोऽग्निः । वज्राग्नौ एवं मेघानलादयोऽप्यत्र । [वा वह-णिच्-ल्यु । इन्द्रे ।

मेघवाहन पु० मेघो वाहनमिव यस्य, मेघान् वाहयति चालयति

मेघसार पु० मेघस्य कर्पूरस्य सारः । चीनकर्पूरे ।

मेघस्तनितोद्भव पु० मेघस्तनिताद्भवति भू अच् । विकटवृक्षे ।

मेघागम पु० मेघानामागमो यत्र । वर्षाकाले वर्षर्तौ ।

मेघनन्दिन् पु० मेघेन तद्ध्वनिना नन्दति णिनि । मयूरे ।

मेघान्त पु० मेघानामन्तो यत्र । शरत्काले मेघात्ययादयोऽप्यत्र ।

मेघास्थि न० मेघानामस्थीव संहतकठिनत्वात् । करकायाम् ।

मेचक न० मच-ण्वुल् पृ० । अन्धकारे, स्रोतोऽञ्जने च । मयूरचन्द्रके, मेघे, श्यामवर्णे च पु० । तद्वति त्रि० ।

मेठ(ड) उन्मादे भ्वा० पर० सक० सेट् चक्रि न ह्रस्वः । मेठ(ड)ति अमेठी(डी)त् ॥

मेठुला स्त्री० मेठ–उलच् । आमलक्याम् ।

मेढ्र पु० मिह–ष्ट्रन् । मेघे, पुंसोऽस्यधारणचिह्ने च ।

मेढ्रशृङ्गी स्त्री० मेढ्रस्य शृङ्गं यस्याः । मेषशृङ्ग्याम् (गाडरसिङ्गी) ।

मेध बधे मेधायाञ्च सक० सङ्गे अक० भ्वा० उभ० सेट् । मेधति ते अमेधीत् अमेधिष्ट । चङि न ह्रस्वः ।

मेधि(धि) पु० मेध(ध)–इन् । धान्यनर्द्दनार्थं पशुबन्धनकाष्ठे (मेड़काठ)

मेधिका स्त्री० मेध–ण्वुल् । (मेधि) धाकभेदे । णिनि । अत्रैव स्त्री० ङीष् । अच् गौरा० ङीष् । अत्रैवार्थे ।

मेद बधे मेधायाञ्च सक० भ्वा० उभ० सेट् । मेदति ते अमेदीत् अमेदिष्ट । चङि न ह्रस्वः ।

मेदःसारा स्त्री० मेदसः इव सारोऽस्याः । अष्टवर्गप्रसिद्धौषधिभेदे ।

मेदक पु० मेद–ण्वुल् । जगले (मैदा) ।

मेदज पु० मेदात् महिषासुरमेदसो जायते जन–ड । भूमिजगुग्गुलौ । मेदोजातमात्रे त्रि० ।

मेदस् न० मेद–असुन् । मांसजन्ये धातुभेदे (वसा) अच् । अत्रैव पु० ।

मेदस्कृत् न० मेदः करोति खपरिपाकेन जनयति क्विप् । मांसे ।

मेदा स्त्री० मेदः कारणत्वेनास्त्यस्याः अच् । अष्टवर्गप्रसिद्धौषधिभेदे ।

मेदिनी स्त्री० मेदः मधुकैटभमेदोऽस्त्यस्याः कारणत्वेन, इनि । वसुन्धरायाम् 'मधुकैटभयोर्मेदोमेदसैव परिप्लुता । तेनेयं मेदिनी देवी प्रोच्यते' इति पुराणम् । मेदायुक्ते ।

मेदुर त्रि० मिद–घुरच् । अतिशयस्निग्धे । 'मेघैर्मेदुरमम्बर'मिति जयदेवः । कर्कोल्यां स्त्री० टाप् ।

मेदोज न० मेदसो वसातो जायते जन–ड । देहस्थे मज्जहेतौ अस्थिनामके धातौ ।

मेदोऽम्बा स्त्री० मेदादुद्भवति भू–अच् । अष्टवर्गप्रसिद्धौषधिभेदे ।

मेध मेधयत् सर्व्वम् । मेधति ते अमेधीत् अमेधिष्ट ।

मेधा स्त्री० मेध–अङ् । धारणावत्यां बुद्धौ यया बुद्ध्या ज्ञातस्य न विस्मरणं तत्र । अच् । यागे पु० । (ङीप् ।

मेधाविन् पु० मेधा+अस्त्यर्थे विनि । शुकखगे । मेधावति त्रि० स्त्रियां

मेधस् पु० मेध–असुन् । स्वायम्भुवस्य मनोः पुत्रभेदे ।

मेधिर त्रि० मेधा+अस्त्यर्थे इरच् । मेधावति । [ज्ञने ।

मेधिष्ठ त्रि० अतिशयेन मेधावान् इष्ठन् मतोर्लुक् । अतिशयमेधावति

मेध्य त्रि० मेध–यत् । पवित्रे, शुचौ च । मेधाय यज्ञाय हितः यत् । छागे, खदिरे, यवे च पु० । केतक्यां, शङ्खपुष्प्यां, रक्त-यवायाम्, रोचनायां, शम्याम्, मण्डूक्याञ्च स्त्री० ।

मेनका स्त्री० मि–नक । स्वर्वेश्याभेदे । मेनैव कन् । हिमालयपत्न्याम्

मेनकात्मजा स्त्री० ६त० । हैमवत्यां दुर्गायाम् मेनासुतादयोऽप्यत्र ।

मेना स्त्री० मि–न । हिमालयपत्न्याम् पितॄणां मानस्यां कन्यायाम् ।

मेन्धी स्त्री० मा लक्ष्मीरिव इन्धते इन्ध–घञ् गौरा० ङीष् । (मेहदी) वृक्षे तत्पत्रमर्हणे, हि लक्ष्मीतुल्यरक्तहस्तता ।

मेप गतौ भ्वा० आ० सक० सेट् । मेपते अमेपिष्ट । चङि न ह्रस्वः ।

मेय त्रि० मा–मि–वा यत् । परिच्छेद्ये, ज्ञेये च ।

मेरु पु० मि–रु । सर्ववर्षेभ्य उत्तरस्थे पर्व्वतभेदे, जपमालोपरिस्थे, फलबीजादिके, कररूपमालायामङ्गुलिपर्व्वभेदे च ।

मेरुक पु० मेरुरिव पीतवर्णत्वात् इवार्थे कन् । यज्ञधूपे (धुना) ।

मेरुसावर्णि पु० चतुर्दशस्तु मनुषु एकादशे मनौ ।

मेलक त्रि० मेलयति मिल–णिच्–ण्वुल् । विवाहे–योटकभेदे । मेल–घञ् कन् । सङ्घे । [मेलने च ।

मेला स्त्री० मिल–णिच्–अच्–टाप् । नीलीवृक्षे, मक्षाम्, कज्जले,

मेलान्धु पु० मेलाया मक्षा अन्धुरिव । मक्षाधारे (दोआत) ।

मेव सेवने भ्वा० आ० सक० सेट् । मेवते अमेविष्ट । चङि न ह्रस्वः ।

मेष पु० मिष–अच् । (मेढा) पशुभेदे, चक्रमर्दवृक्षे, ज्योतिश्चक्रस्य द्वादशांशे अश्विनीभरणीकृत्तिकानवमपादात्मके राशिभेदे ।

मेषकम्बल पु० मेषेण तल्लोम्ना निर्मितः कम्बलः । मेषलोमजाते यस्मा-
क ठे पदार्थे ।

मेषलोचन पु० मेषस्य लोचनमिव पुष्पमस्य । चक्रमर्दे, मेषनेत्रादयोऽ-
प्यत्र । [लताभेदे ।

मेषवल्ली स्त्री० मेषशृङ्गाकारफलयुक्ता वल्ली शाक० (गाडरशिङ्गा)

मेषविषाणी स्त्री० मेषस्य विषाणं शृङ्गमिव फलं यस्याः गौरा० ।
ङीष् । (गाडरशिङ्गा) लताभेदे । स्वार्थे कन् तत्रैव ।

मेषशृङ्ग पु० मेषशृङ्गमिवाकारोऽस्त्रस्य अच् । स्थावरविषभेदे (गाडर-
शिङ्गा) अजशृङ्ग्यां स्त्री० गौरा० ङीष् ।

मेषा स्त्री० मिष–कर्मणि घञ् । (गुजराटी) कृष्णैलायाम् ।

मेषाक्षिकुसुम पु० मेषाक्षीव कुसुमं यस्य । चक्रमर्दे । मेष पुष्पादयो-
ऽप्यत्र । [मेषाखण्डेन तत्करणमिति पुराणम् ।

मेषाण्ड पु० मेषस्याण्ड एवाण्डोऽस्य । इन्द्रे तस्य हि दक्षयज्ञेऽण्डनाशे

मेषालु पु० मेषाणामालुरिव प्रियः । वर्ब्बरीवृक्षे ।

मेषी स्त्री० मिष–अच् गौ० ङीष् । जटामांस्यां, तिनिशवृक्षे, च ।
जातौ ङीष् । मेषजातिस्त्रियाम् ।

मेह पु० मिह–घञ् । प्रस्रावे, प्रमेहरोगभेदे च । अच् । मेघे ।

मेहघ्नी स्त्री० मेहं हन्ति हन–ठक् ङीष् । हरिद्रायाम् आर्द्रतन्मूल-
रससेवनाद्धि मेहनाश इति वैद्यकप्रसिद्धिः ।

मेहन न० मिह्यतेऽनेन मिह–करणे ल्युट् । शिश्ने । कर्मणि ल्युट् ।
मूत्रे । भावे ल्युट् । मूत्रोत्सर्गे ।

मैत्र न० मित्रोदेवतास्य अण् मैत्रं पायुस्तस्येदं पुनरण् । 'विण्मूत्रोत्सर्गे
मैत्रं कर्म समाचरेदिति स्मृतिः मित्रो देवताऽस्य, मित्रत आगतं,
तस्येदं वा अण् । अनुराधानक्षत्रे न० । तस्य हि मित्रो देवता ।
मित्रतः प्राप्ते, 'मैत्रमौद्दालिकस्यैवेति स्मृतिः । मुहूर्तसम्बन्धिनि
च त्रि० । मित्रएव स्वार्थे प्रज्ञादित्वात् अण् । मित्रे, ब्राह्मणे च ।

मैत्रावरुण पु० मित्रश्च वरुणश्च देवता इज्ये अानङ् मित्रावरुणयोर-

पत्यम् अण् । अगस्त्ये । इञ् । मैत्रावरुणिरप्यत्र । कल्पभेदे हि तस्य तयोः पुत्रत्वं पुराणप्रसिद्धम् । [मैत्र्यमप्यत्र ।

मैत्री न० स्त्री० मित्रस्य भावः अण् स्त्रीत्वपक्षे ङीप् । सौहार्दे ष्यञ् ।

मैत्रेय पु० मित्राया अपत्यम् ढक् । मुनिभेदे, बुद्धदेवे च ।

मैथिली स्त्री० मिथिलायां भवा अण् । सीतायाम् । मिथिलाया राजा अण् मिथिलादेशाधिपे पु० ।

मैथुन न० मिथुनेन स्त्रीपुंसाभ्यां निर्वृत्तम् अण् । अन्याधानादौ कर्मणि 'सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने' इति स्मृतिः अन्याधाने हि सपत्नीकस्यैवाधिकारः इति तस्य तत्साध्यत्वम् । स्त्रीपुंससङ्गमरूपे स्वाभ्यधर्मे च ।

मैनाक पु० मेनकायां भवः अण् । पर्वतभेदे ।

मैरेय पु० मिरायां देशभेदे ओषधिभेदे वा भवः ढक् । मिरा देशजाते आसवे, 'मैरेयं धातकीपुष्पगुडधान्यसमुद्भवं मित्युक्तं मद्यभेदे न० । [मोक्षति अमुमोक्षत् त अमोक्षीत् ।

मोक्ष क्षेपे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट् । मोक्षयति ते

मोक्ष पु० मोक्ष–घञ् । मुक्तौ मोचने 'नीविमोक्षोहि मोक्ष' इति मरणे च । [पाटलीवृक्षे, विड़ङ्गे च स्त्री० प्राचीरे पु० ।

मोघ त्रि० मुह–घ अच् वा कुत्वम् । निरर्थके, हीने च । पारिभद्रवृक्षे,

मोघपुष्पा स्त्री० मोघं पुष्पमार्त्तवं यस्याः । बन्ध्यायां स्त्रियाम् ।

मोच न० मुच–अच् कदलीफले । शोभाञ्जने पु० । कदल्यां, नीलीवृक्षे, शाल्मलिवृक्षे च स्त्री० टाप् । [त्रु० ।

मोचक पु० मुच–ण्वुल् । मोक्षे, कदल्यां, शोभाञ्जने च । वैराग्यवति

मोचन न० मुच–णिच्–वा भावे ल्युट् । मुक्तौ, मोचने, दम्भे, श्राद्धे च । मुच्यते रोगात् अनया करणे ल्युट् । कण्टकार्य्याम् ।

मोचरस पु० ६त० । शाल्मलिनिर्य्यासे खनामख्याते पदार्थे ।

मोचाट पु० मुच–णिच्–अच् मोचाय रोगमोचनाय अटति अट्–अच् । कृष्णजीरके रम्भास्थ्नि च ।

मोटक न० मुट–ण्वुल् । श्राद्धे पितृदानार्थं भुग्नकुशपत्रद्वये ।

मोटा स्त्री० मुट-अच् । बलायाम् ।

मोट्टायित न० 'कान्तस्मरणवार्त्तादौ हृदि तद्भावभावतः प्राकट्यमभिलाषस्य मोट्टायितमिति युक्ते स्त्रीणामभिलाषभेदे ।

मोद पु० मुद-घञ् । हर्षे । [जातिभेदे (मयरा) ।

मोदक पु० मोदयति मुद-णिच् ण्वुल् । खाद्यभेदे (मोया) वर्णसङ्कर-

मोदमोदिनी स्त्री० मोदइव मोदयति मुद-णिनि । जम्ब्वाम् ।

मोदयन्ती स्त्री० मुद-णिच्-शतृ ङीप् । वनमल्लिकायाम् (काठमल्लिका)

मोदा स्त्री० मोदयति अजान् मुद-णिच्-अच् । अजमोदायाम् ।

मोदाख्या स्त्री० मोदः अजमोदस्तेनाख्या । अजमोदायाम् हर्षयुक्ते त्रि०

मोदिनी स्त्री० मोदयति मुद णिच् णिनि । अजमोदायाम् मल्लिकायाम्, यूथिकायां, कस्तूर्य्यां, मदिरायाञ्च ।

मोरट न० मुर-अटन् । इक्षुमूले, अङ्कोटपुष्पे, सप्तरात्रोत्थिते क्षीरे च । मूर्व्वालतायां स्त्री० । क्षीरमोरटायां पु० ।

मोषक पु० मुष्णाति मुष-ण्वुल् । तस्करे चौरे ।

मोषण न० मुष-ल्युट् । लुण्ठने, छेदने, वधे च ।

मोह मुह-घञ् । मूर्च्छायाम् अज्ञाने, भ्रान्तिसाधने, वेदान्तोक्तौ अविद्यावृत्तिभेदे, दुःखे, देहादिष्वात्माभिमाने च ।

मोहन पु० मोहयति मुह-णिच्-ल्यु । धुस्तूरे, कन्दर्पस्य शरभेदे च । मोहकारके त्रि० । स्त्रियां ङीप् ।

मोहरात्रि स्त्री० ब्रह्मणो निजपरिमाणेन पञ्चाशदब्दे गते प्रलयभेदे 'कालरात्रि र्महारात्रि र्मोहरात्रिश्चेति चण्डी ।

मौक्तिक न० मुक्तैव स्वार्थे ठक् । मुक्तायाम् ।

मौक्तिकप्रसवा स्त्री० मौक्तिकं प्रसूते प्रसू अच् । शुक्तिभाते मुक्तास्फोटे शुक्तौ च ।

मौक्तिकशुक्ति स्त्री० इत० । मुक्तास्फोटे शुक्तौ ।

मौञ्जी स्त्री० मुञ्जस्येयम् अण् । कटिसूत्रे त्रिवृत्तसुश्लक्ष्णतायां मेखलायाम् मुञ्ज एव अण् । मुञ्जरज्जौ (कुज) स्त्री० ।

मौञ्जीपत्री स्त्री० मौञ्जीव पत्रमस्याः । वल्लजायाम् ।

मौञ्जीबन्ध(न) पु० मौञ्जा मेखलाया बन्धो यत्र । उपनयनसंस्कारे 'मौञ्जीबन्धः शुभः प्रोक्तस्त्रैवृते मीनगते रवावि'ति स्मृतिः ६त० । तद्बन्धने न० । 'द्वितीयं मौञ्जीबन्धनमिति स्मृतिः ।

मौढ्य न० मूढस्य भावः ष्यञ् । मोहे, बाल्ये च ।

मौद्गल्य पु० मुद्गलस्य मुनेरपत्यं यञ् । गोत्रकारके मुनिभेदे ।

मौद्गीन न० मुद्गानां भवनं क्षेत्रं । खञ् । मुद्गभवनयोग्ये क्षेत्रे ।

मौन न० मुनेर्भावः । वाग्व्यापाररहित्ये 'उच्चारे मैथुने चैव प्रस्रावे दन्तधावने । स्नाने भोजनकाले च षट्सु मौनं समाचरे'दिति स्मृतिः

मौनिन् त्रि० मौनमस्त्यस्य इनि । वाग्व्यापाररहिते । मुनौ पु० ।

मौरजिक त्रि० मुरजवादनं शिल्पमस्य ठक् । मृदङ्गवादनशीले ।

मौर्ख्य न० मूर्खस्य भावः ष्यञ् । जाड्ये. मूर्खतायाञ्च । [ङ्याञ्च ।

मौर्वी स्त्री० मूर्व्वा लता तत्तन्तुना निर्वृत्ता अण् । धनुर्गुणे, अजशृङ्ग्याञ्च ।

मौल त्रि० मूलं वेत्ति मूलादागतो वाऽण् । भूम्यादेरागमादिमूलज्ञे, 'यं परम्परया मौलाः सामन्ताः स्वामिनं विदु'रिति स्मृतिः मूलादागते च ।

मौलि पु० स्त्री० मूलस्यादूरभवः इञ् । चूड़ायां, किरीटे, संयतकेशेषु च । अशोकवृक्षे पु० । भूम्नि स्त्री० वा ङीप् ।

मौषल न० मुषलस्येदम् मुषलमस्त्यस्मिन् अण् । मुषलतुल्यनिश्चेष्टे 'गङ्गायां मौषलं स्नानं महापातकनाशन'मिति पुराणम् । मुषलमधिकृत्य कृतो ग्रन्थः अण् । महाभारतान्तर्गते 'मुषलं कुलनाशन'मित्यादिप्रतिपादके षोड़शे पर्व्वणि ।

मौहूर्त्त पु० मुहूर्तं तत्प्रतिपादकं शास्त्रं वेत्त्यधीते वाऽण् । ज्योतिःशास्त्रज्ञे । ठक् । तत्रैव ।

म्ना अभ्यासे भ्वा० पर० सक० सेट् । मनति अम्नासीत् ।

म्रक्ष संयोजने स्नेहने च चु० उ० स० सेट् । म्रक्षयति ते अमम्रक्षत् त

म्रक्ष संघाते संयोजने च भ्वा० पर० सक० सेट् । म्रक्षति अम्रक्षीत् ।

म्रक्षण न० म्रक्ष-ल्युट् । संयोजने, राशीकरणे, तैले यज्ञपात्रे च ।

म्रच गतौ भ्वा० पर० सक० सेट् क्वा वेट् । म्रचति अम्रचत् अम्राचीत् अम्रचीत् । [अङ् म्रदा ।

म्रद क्षोदे भ्वा० आ० सक० सेट् घटा० । म्रदते अम्रदिष्ट । म्रदयति

म्रदिमन् पु० म्रदोर्भावः म्रदु+इमनिच् म्रदादेशः । म्रदुत्वे ।

म्रदिष्ठ त्रि० अतिशयेन म्रदुः इष्ठन् म्रदादेशः । अतिम्रदुत्ववति । ईय-सुन् । म्रदीयानथत्र त्रि० । स्त्रियां ङीप् । [चीत् ।

म्रुच गतौ भ्वा० पर० सक० सेट् क्वाविट् । म्रोचति अम्रुचत् अम्रो-

म्रुन्च गतौ सर्व्वं म्रुचवत् । म्रुञ्चति अम्रुचत् अम्रुञ्चीत् ।

म्रेट(ड) उन्नादे भ्वा० पर० सक० सेट् । म्रेट(ड)ति अम्रेटी(डी)त् चङि न ह्रस्वः ।

म्लक्ष चु० अक्षवत् सर्व्वम् । म्लक्षयति ते । अमम्लक्षत् त ।

म्लान त्रि० म्लै—क्त । मलिने, ग्लानियुक्ते च ।

म्लानि म्लो० ग्ला—क्तिन् । कार्शिल्ये ।

म्लिष्ट न० म्लेच्छ—क्त निं० । अविस्पष्टवाक्ये तद्वाक्ययुक्ते, म्लाने च त्रि०

म्लुच गतौ भ्वा० पर० सक० सेट् क्वा वेट् । म्लोचति । अम्लुचत्—अम्लोचीत् ।

म्लुन्च गतौ म्लुचवत् सर्व्वम् । म्लुञ्चति अम्लुचत् अम्लुञ्चीत् ।

म्लेच्छ अपशब्दे वा० चु० उभ० पक्षे भ्वा० पर० अक० सेट् । म्लेच्छ-यति ते म्लेच्छति अममम्लेच्छत् त अम्लेच्छीत् ।

म्लेच्छ पु० म्लेच्छ-वञ् । अपशब्दे 'म्लेच्छोहि वा यदपशब्दः' इति श्रुतिः । कर्त्तरि अच् । पामरजातौ, नीचजातौ च पु० पापरते त्रि० क्रियालुके न० ।

म्लेच्छकन्द पु० म्लेच्छप्रियः कन्दः । लशुने ।

म्लेच्छजाति स्त्री० म्लेच्छाभिधा जातिः । गोमांसादिभक्षके किरातादिजातिभेदे ।

म्लेच्छदेश पु० म्लेच्छाधारो देशः । चातुर्वर्ण्याचाररहिते देशे ।

म्लेच्छभोजन न० म्लेच्छैर्भुज्यते कर्म्मणि ल्युट् । यावके अन्नभेदे ।

म्लेच्छमण्डल न० ६त० । म्लेच्छदेशे ।

म्लेच्छमुख न० म्लेच्छानां मुखमिव रक्तत्वात् । ताम्रे म्लेच्छास्यमप्यत्र
म्लेच्छित न० म्लेच्छ-क्त । अपगन्धे असंस्कृतशब्दे ।
म्लेट(ड) उन्मादे भ्वा० पर० सक० सेट् । म्लेट(ड)'त अम्लेटी(डी)त् ।
चङि न ह्रस्वः ।
म्लेव सेवने भ्वा० आ० सक० सेट् । म्लेवते अम्लेविष्ट । चङि न ह्रस्वः
म्लै कान्तित्वये भ्वा० पर० सक० अनिट् । म्लायति अम्लासीत् ।

य

य पु० या-ड । वायौ, यशसि, योगे, गतौ च । यम-ड । संयमे ।
या-कर्त्तरि ड । यातरि त्रि० ।
यकृत् न० यं संयमं करोति क-क्विप् तुक् च । कुक्षौ दक्षिणभागस्थे
मांसपिण्डे । तद्वद्रोगे च ।
यकृदात्मिका स्त्री० यकृतइवात्मा स्वरूपं यस्याः कप् । तेलपायिका-
याम् (तेलापोका) ।
यकृद्दैरिन् पु० यकृतो रोगभेदस्य वैरी हन्ता । रोहितकवृक्षे ।
यज्ञ पूजायां चु० आ० सक० सेट् । यज्ञयते अयज्ञत । [यष्टे च ।
यज्ञ पु० यज्ञ्यते यज्ञ-कर्मणि घञ् । देवयोनिभेदे, तदीश्वरे कुबेरे इन्द्र-
यज्ञकर्दम पु० यज्ञप्रियः कर्दमः । 'कङ्कुमागुरुकस्तूरीकर्पूरं चन्दनं
तथा महासुगन्धमित्युक्तं नामतो यज्ञकर्दम' इत्युक्ते समभागेन
मिश्रिते कुङ्कुमादौ ।
यज्ञतरु पु० यज्ञानां वासयोग्यस्तरुः । वटवृक्षे यज्ञतरुत्वादयोऽपत्र ।
यज्ञधूप पु० यज्ञे पूजने योग्यो धूपः । (धुना) सर्ज्जरसे ।
यज्ञराज पु० यज्ञानां राजा टच् समा० । कुबेरे । यज्ञेषु राजते
राज-क्विप् । यज्ञराड्पत्र पु० ।
यज्ञरात्रि त्रि० यज्ञप्रिया रात्रिः । कार्त्तिकपूर्णिमारात्रौ ।
यज्ञामलक न० यज्ञानामामलकमिव । पिण्डखर्ज्जूरफले ।
यज्ञावास पु० ६त० । यज्ञानामावासः । वटवृक्षे ।
यज्ञोडुम्बरक न० यज्ञानामुडुम्बरमिव इवार्थे कन् । अश्वत्थफले ।

यक्ष्मघ्नी स्त्री० यक्ष्माणं हन्ति हन-टक् ङीप् । द्राक्षायाम् ।

यक्ष्मन् पु० यक्ष्-मनिन् । रोगभेदे ।

यज देवपूजने, दाने, सत्कृतौ च भ्वा० उभ० यजादि० अनिट् ।
यजति ते अयाक्षीत् अयष्ट । [श्रुतिः ।

यजति पु० यज-अतिच् । यागभेदे । 'यजतिषु ये यजामहे' इति

यजन न० यज-ल्युट् । होत्रादिना पशुचोराज्यादिभिः मन्त्रपूर्वकं
वह्नौ प्रक्षेपरूपे यागे । ल्यु । उत्तरपदस्थः समभिव्याहृतदेवादेर्य-
ष्टरि त्रि० यथा देवयजन इत्यादि ।

यजमान पु० यज-शानच् । होत्रादे र्नियोक्तरि प्रधानकर्मफलवति ।

यजि पु० यज इन् । यष्टरि, याजे, यज्धातौ च ।

यजुर्वेद पु० यजूंषां कृष्णसामभिन्नानां मन्त्राणां प्रतिपादको वेदः ।
वेदभेदे स च शुक्लकृष्णभेदेन द्विधा तद्विवरणं वाचस्पत्याभिधाने ।

यजुस् न० यज उसि । कृष्णसामभिन्ने पादच्छेदरहिते मन्त्रभेदे ।

यज्ञपशु पु० इज्यते, हविर्दीयतेऽत्र वा यागार्थकयजेर्भावे आधारे वा
न यज्ञः यज्ञार्थः पशुः । अश्वे, छागे च ।

यज्ञपुरुष पु० यज्ञरूपः पुरुषः । विष्णौ ।

यज्ञभूषण पु० यज्ञम् भूषयति भूष-णिच्-ल्यु । श्वेतदर्भे ।

यज्ञयोग्य पु० यज्ञे योग्यः । उडुम्बरवृक्षे तत्समिदादिभि र्हि यज्ञः
साध्यते ।

यज्ञवल्ली स्त्री० यज्ञार्था वल्ली । सोमवल्ल्याम् ।

यज्ञवराह पु० यज्ञरूपोवराहः । आदिवराहे भगवदवतारभेदे ।

यज्ञवाट पु० इतः । यज्ञस्थाने ।

यज्ञवृक्ष पु० यज्ञार्थः वृक्षः । वटवृक्षे ।

यज्ञश्रेष्ठा स्त्री० यज्ञेषु तत्साधनेषु श्रेष्ठा । सोमवल्ल्याम् ।

यज्ञसार पु० यज्ञेषु यज्ञसाधनेषु सारः श्रेष्ठः । यज्ञोडुम्बरवृक्षे ।

यज्ञसूत्र न० यज्ञार्थं योगत्रं संस्कृतं वा सूत्रं शाक० । उपवीते ।

यज्ञाङ्ग पु० यज्ञस्याङ्गं साधनत्वेनाङ्गत्वस्य कच् । यज्ञोडुम्बरे, खदिरे,
अक्षयष्टिकायाञ्च । ते हि समित्पात्रादिना यज्ञं कल्पादयन्ति ।

यज्ञान्त पु० ६त० । अवभृथे यज्ञसमाप्तौ स्नानादिक्रियाभेदे, यज्ञशेषे च

यज्ञिक पु० यज्ञः यज्ञाङ्गं साध्यत्वेनास्त्यस्य ठन् । पलाशे तत्समिदादिभिर्हि यज्ञोऽभिधीयते ।

यज्ञिय त्रि० यज्ञाय हितः घ । यज्ञकर्मयोग्ये । द्वापरयुगे पु० ।

यज्ञियदेश पु० कर्म० । यज्ञकर्मयोग्यदेशे 'कृष्णसारस्तु चरति मृगो यत्र स्वभावतः । स ज्ञेयो यज्ञियोदेश'इत्युक्ते देशे । [त्रि० ।

यज्ञीय पु० यज्ञाय हितः तस्येदं वा छ । यज्ञोडुम्बरे । यागसम्बन्धिनि

यज्ञोपवीत न० ६त० । विकङ्कतवृक्षे (वरुचि) 'वैकङ्कतीं स्रुवमादत्ते' इति श्रुतिः ।

यज्ञेश्वर पु० यज्ञस्य प्रवर्त्तयिता ईश्वरः । विष्णौ ।

यज्ञेष्ट न० ७त० । दीर्घरोचितदृष्टे ।

यज्ञोडुम्बर पु० यज्ञार्थं उडुम्बरः । स्वनामख्याते वृक्षे ।

यज्ञोपवीत न० यज्ञेन संस्कृतमुपवीतम् । यज्ञकृते उपनयनसंस्कारेण पवित्रीकृते त्रिवृति ऊर्द्धकृते वामस्कन्धात् दक्षिणकुक्षितो लम्बमानतया धृते सूत्रभेदे ।

यज्वन् पु० यज–भूते क्वनिप् । विधानेन कृतयागे ।

यत ताड़ने उपस्करे च भ्वा० उ० स० सेट् । यातयति । अयीयतत् त

यत यत्ने भ्वा० आत्म० अक० सेट् । निष्ठायामनिट् । यतते अयतिष्ट

यतस् अव्य० यद्+तसिल् । यस्मादित्यर्थे ।

यतम त्रि० एषां मध्ये यः यद्+डतमच् । एषां मध्ये यदित्यर्थे ।

यतर त्रि० अनयोर्मध्ये यः यद्+डतरच् । अनयोर्मध्ये यदित्यर्थे ।

यति पु० यतते मोक्षाय यत–इन् । परिव्राजके संन्यासिनि । यम्यते जिह्वा अत्र यम–क्तिन् । छन्दोग्यव्याख्याते जिह्वाया विश्रामस्थाने, उच्चारणकालविच्छेदे स्त्री० । सा च 'क्वचित् छन्दस्यास्ते यतिरभिहिता पूर्व्वकृतिभिः पदान्ते सा शोभां व्रजति पदमध्ये त्यजति चेत्याद्युक्ता सुप्तिङन्तपदान्ते एव छन्दोग्यव्याख्यानुसारेण जिह्वाया विश्रामरूपोच्चारणाभावरूपा । यद्–डति । यत्परिमाणे ब० व० त्रि० ।

यतिचान्द्रायण न० यतिनेव कर्त्तव्यं चान्द्रायणं व्रतभेदः । 'अष्टावष्टौ समश्नीयात् पिण्डान् मध्यदिने स्थिते । नियतात्मा हविष्याशी यतिचान्द्रायणं चरन्' इत्युक्ते व्रतभेदे ।

यतिन् पु० यमनं यतं यम—क्त यतमनेन इनि । संन्यासिनि परिव्राजके । विधवायां स्त्री० ङीप् ।

यत्न पु० यत—नङ् । आयासे, उद्योगे, वैशेषिकोक्ते प्रवृत्तिनिवृत्तिजीवनयोनिरूपत्वैविध्यापन्ने गुणभेदे च । स च आत्मगुणः इति नैयायिकादयः चित्तगुण इति सांख्यवैदान्तिकाः ।

यत्र अव्य० यद्+त्रल् । यस्मिन्नित्यर्थे ।

यत्र सङ्कोचने वा चु० उभ० पक्षे स्वा० पर० सक० सेट् इदित् । यन्त्रयति ते यन्त्रति अययन्त्रत् त अयन्त्रीत् ।

यथा अव्य० यद्+प्रकारे थाल् । येन प्रकारेणेत्यर्थे, सादृश्ये, योग्यतायां, आनुरूप्ये पदार्थानतिवृत्तौ च ।

यथाकाम अव्य० कामनतिक्रम्य अव्ययी० । स्वाच्छन्द्ये यथेष्टतायाञ्च ।

यथाकामिन् त्रि० यथाकामं स्वाच्छन्द्यमस्त्यस्य इनि । स्वेच्छाचारिणि जने । स्त्रियां ङीप् ।

यथाक्रम अव्य० क्रमस्य आनुरूप्यं तस्यानतिक्रमो वा अव्ययी० । क्रमानुरूप्ये, क्रमानतिक्रमे च ।

यथाजात त्रि० जातं समयविशेषमनतिक्रम्य यथाजातं तदस्यास्ति अच् । मूर्खे, नीचे च ।

यथातथ अव्य० तथानतिक्रम्य अनतिवृत्तौ अव्ययी० । याथार्थ्ये यस्य वस्तुनो यद्रूपं भवितुमुचितं तथारूपभावे । यथायथमप्यत्रार्थे ।

यथार्थ अव्य० अर्थमनतिक्रम्य अव्ययी० । सत्यतायाम् अर्थस्याभिधारे सत्यस्वरूपे अर्थादच् । सत्ये त्रि० ।

यथार्ह अव्य० अर्हं योग्यतामनतिक्रम्य अव्ययी० । यथायोग्ये ततः अर्थ आद्यच् । सत्यभूते पदार्थे त्रि० ।

यथार्हवर्ण पु० यथार्हं यथायोग्यं वर्णयति वर्ण—अण् । चरे ।

यथाशक्ति अव्य० शक्तेरानुरूप्यम् आनुरूप्ये ऽव्ययी०। शक्तेरनुरूपे, शक्त्यनुसारे। [नुसारे।

यथाशास्त्र अव्य० शास्त्रस्यानुरूप्यम् अनतिक्रमो वा अव्ययी०। शास्त्रा-

यथास्थित अव्य० यथा येन रूपेण स्थातुं योग्यं तथास्थितम्। योग्यतायाम् अव्ययी०। सत्यतायाम्। अर्श आद्यच्। सत्ये त्रि०

यथास्व अव्य० स्वस्यानतिक्रमोऽव्ययी०। याथार्थ्ये। अर्श आद्यच्। यथार्थे त्रि०।

यथेप्सित अव्य० ईप्सितस्यानतिक्रमः अव्ययी०। स्वाच्छन्द्ये, अर्श आद्यच्। यथाभीष्टे त्रि० यथेष्टमपत्र। [उचिते त्रि०।

यथोचित अव्य० उचितस्यानतिक्रमः। औचित्ये, अर्श आद्यच्।

यद् त्रि० यज्—अदि डिच्च। (ये) इत्येवं बुद्धिविशेषविषये अस्य उक्तार्थे सर्वनामता। यच्छादित्यर्थे अव्य०।

यदा अव्य० यद्+दाच्। यस्मिन् काले इत्यर्थे।

यदि अव्य० यद्+णिच्—इन् णिलोपः। पक्षान्तरे, सम्भावनायाञ्च।

यदु पु० ययातिनृपतेः ज्येष्ठपुत्रे, यस्य वंशे श्रीकृष्णावतारः तस्य गोत्रा-पत्यमण्। बहुषु तस्य लुक्। यदुवंश्ये दशार्हदेशे च ब० व०।

यदुनाथ पु० यदूनां नाथे रक्षकत्वात्। श्रीकृष्णे, यदुपत्यादयोऽप्यत्र।

यदृच्छा स्त्री० यद्+कृच्छ्—अ+टाप्। स्वातन्त्र्ये, स्वैरतायाम्, यद्-च्छालाभसन्तुष्ट इति गीता।

यद्वा अव्य० यदि च उ च वा च द्व०। यद्यर्थे पक्षान्तरद्योतने, यद्वावत्तरसम्भारस्तर्हि पशुनैवेति श्रुतिः यद्वा उभयं चिकी-र्षेदिति च तिथ्यादितत्त्वम्। [हरिकारिका।

यद्वा अव्य० यच्च वा च द्व०। पक्षान्तरे 'यद्वाभ्युदययोगतेति भर्तृ०

यन्तृ पु० यम—तृच्। सारथौ, हस्तिपालके च। संयमयुक्ते त्रि०।

यन्त्र न० यम्—अच्। संयमने, तन्त्रोक्ते देवाद्यधिष्ठाने चक्रभेदे पात्र-भेदे, सुगमतया ज्योतिश्चक्राद्यवेक्षणसाधने पदार्थभेदे, शस्त्रधारा-दर्दारुवेधकादौ (सुरविन्) (भमर) (कुन्द) पदार्थे।

यन्त्रक न० यन्त्रमिव इवार्थे कन् (कुंदे) दारुभाजनयन्त्रभेदे ।

यन्त्रगृह न० ६त० । तैलिकयन्त्रालये (घानिघर) ।

यन्त्रगोल पु० यन्त्रमिव ज्योतिश्चक्राकृतिगोलवन्त्रमिव गोलः वर्त्तुलः । कलायभेदे (मटर) । [याम् स्त्री० टाप् ।

यन्त्रण न० यत्रि-ल्युट् । नियमने, रक्षणे, बन्धने च । युच् । पोडा-

यन्त्रपेषणी स्त्री० यन्त्रेणेव पिष्यतेऽनया पिष-ल्युट् । (याता) पेषण-यन्त्रे ।

यभ मैथुने भ्वा० पर० सक० अनिट् । यभति अयाप्सीत् ।

यम उपरतौ भ्वा० पर० सक० अनिट् क्त्वेट् । यच्छति अयंसीत् यन्ता । [अयीयमत् त अययामत् त

यम परिवेषणे चु० उ० सक० सेट् या घटा० । यमयति यामयति

यम पु० यम-वञ् । 'अहिंसा सत्यवचनं ब्रह्मचर्य्यमकल्कता । अस्तेय-मिति पञ्चैते यमाख्यानि व्रतानि चेत्युक्ते अहिंसादौ, इन्द्रिया-दीनां संयमने च । यमयति अच् । प्राणिनां शुभाशुभकर्म्मानु-सारेण दण्डविधायके ईश्वरानुयुक्ते दक्षिणस्थे देवभेदे तत्स्वामि-कत्वात् काले च । एकगर्भजायमाने यमजे त्रि० । भ्रातृत्वेन यम-सम्बन्धिनि शनौ, द्वित्वसंख्यायां योगे च पु० ।

यमक न० 'सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः क्रमेण तेनैवावृत्ति-र्यमकं विनिगद्यते' इत्युक्ते शब्दालङ्कारभेदे ।

यमकोटि पु० स्त्री० भूगोलस्य चतुर्थपादान्तरिते लङ्कातः पूर्व्वस्यां स्थितायां देवनिर्म्मितायां पुर्य्याम् 'लङ्का कुमध्ये यमकोटिरस्याः प्राग्गिति सिद्धान्तशिरोमणिः ।

यमज त्रि० द्वि० व० । यमः एकदा एकत्र गर्भे सहचरः सन् जायते जन-ड । एकदा एकगर्भजातयोः ।

यमदूतिका स्त्री० यमस्य दूतीव इवार्थे कन् । सिन्दिडीवृक्षे ।

यमद्रुम पु० यमस्य द्रुमः । यमद्वारस्थे शाल्मलिवृक्षे तत्तुल्यशोकमय-कीलाकीर्णत्वेन हि नारकिपीडनाश्रयस्य यमद्रुमत्वम् ।

यमद्वितीया स्त्री० ६त० । कार्त्तिकशुक्लद्वितीयायाम् 'तथा यमद्वितीयायां यात्रायां मरण'मिति ज्योतिषम् ।

यमदग्नि पु० मुनिभेदे ।

यमन न० यम-ल्युट् । बन्धने, उपरमे च । यमयति ल्यु । यमे पु० ।

यमप्रिय पु० ६त० । वटवृक्षे ।

यमराज पु० यमानां चतुर्दशानां राजा यमनियामको राजा वा टच् समा० । प्रेतानां राजनि धर्म्मराजे । यमेषु राजते राज-क्विप् । यमराड्यत्र ।

यमल न० यमं योगं लाति ला क । युग्मे, वृन्दावनस्थे वृक्षभेदे च ।

यमलपत्र पु० यमलानि युग्मानि पत्त्राणि यस्य । अश्मन्तकवृक्षे ।

यमवाहन पु० यमं वाह्यति स्थानात् स्थानान्तरं नयति । वह स्वार्थे णिच्-ल्यु । महिषे ।

यमानी स्त्री० यच्छति अग्निमान्द्यमनया यम-करणे ल्युट् ङी० आत्वम् । अजमोदायाम् । स्वार्थे कन् । तत्रैव ।

यमुना स्त्री० यम उनन् । कालिन्द्यां नद्यां यमभगिन्याम् सूर्य्यसुतायाम्, दुर्गायाञ्च ।

यमुनाभ्रातृ पु० ६त० । यमे । [भेदे ।

ययाति पु० यस्य वायोरिव यातिः सर्व्वत्र गतिरस्ति । नहुषात्मजे राज-

ययु पु० या-उ द्वित्वञ्च । अश्वमेधीयेऽश्वे, अश्वमात्रे च ।

यव पु० यु-अच् । स्वनामख्याते शूकधान्यभेदे, 'यवस्ते सर्व्वशस्यानां जायते पत्त्रशातनम् मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः' इति मीमांसा । स्वार्थे कन् । अत्रैव ।

यवक्ष्य न० यवानां भवनं क्षेत्रं यत् कुक् च । यवभवने क्षेत्रे ।

यवक्षार पु० यवजातः क्षारः । यवजातक्षारभेदे लवणभेदे (शोरा) च

यवज पु० यवात् जायते जन-ड । यवक्षारे, यवान्यान्च ।

यवतिक्ता स्त्री० यवाकारं तिक्तं फलं यस्याः । राजायां शङ्खिन्यान्च ।

यवन पु० यु-ल्यु । देशभेदे, तद्देशस्थे जने ब० व० । म्लेच्छे, अधिकवेशव-

म्लेच्छे, गोधूमे, गर्जरक्षे, तरच्छजातौ, यवादि यत्नस्य तत्पुरुषस्तु तुर्वसोवंश्ये जातिभेदे च । वेगयति त्रि० ।

यवनदिष्ट पु० यवनैर्द्विष्टः द्विष-क्त । गुग्गुलौ ।

यवनप्रिय न० ६त० । मरिचे ।

यवनाचार्य्य पु० ताजकादिज्योतिःशास्त्रकारके पण्डितभेदे ।

यवनानी स्त्री० यवनानां लिपिः ङीप् आनुक् च । यवनानां लिप्याम् ।

यवनारि स्त्री० यवनस्यारिः । श्रीकृष्णे ।

यवनाल पु० यवानामिव नाला (नाडा) यस्य । (देधान) धान्यभेदे ।

यवनालज पु० यवानां नालात् काण्डात् (नाडा) जायते । यवक्षारे

यवनिका स्त्री० युवन्यस्यां यु—ल्युट् ङीप् कन् अत इत्वम् । (कानात्) जवनिकायाम् ।

यवनी स्त्री० यु-ल्युट् ङीप् । यवानीनामकोषधौ यवनभाव्यौषाच्चैव-नीयुषधमानाभिति रघुः ।

यवनेष्ट न० ६त० । खीरके । मरिचे, रक्तोने लशुने राजपलाण्डौ निम्बे च पु० । खर्जूर्यां स्त्री० टाप् ।

यवफल पु० यवाकारं फलमस्य । वंशे कुटजे च यस्य फलमिन्द्रयवः प्रलवृक्षे, जटामांस्याञ्च ।

यवमध्य न० यवाकृति मध्यं यस्य । चान्द्रायणभेदे प्रथमदिनादारभ्य-दशदिनमेकैकग्रासवृद्ध्या, तदुत्तरं च आपञ्चदश दिनं क्रमेणै-कैकग्रासहान्या मासमाध्ये व्रते तस्य मध्यदिवसानां हि बहुल-ग्रासवत्त्वेन यवमध्यतुल्यत्वम् ।

यवलास पु० यवेन लसते संज्ञायां कर्त्तरि घञ् । यवक्षारे ।

यवशूक पु० यवानां शूकः कारणत्वेनास्त्यस्य अच् । यवक्षारे यव-शूकजादयोऽप्यत्र ।

यवस न० यु-असच् । घासे, तृणे च ।

यवागू स्त्री० यूयते मिश्र्यते यु आगू । षड्गुणजलपक्वे द्रवभेदे (याउ)

यवाग्रज पु० यवस्याग्रात् शूकात् जायते जन-ड । यवक्षारे, यवान्याञ्च

यवानी स्त्री० इष्टो यवः ङीप् आनुक् च । (जोयानि) पदार्थे ।

यवापत्य न० यवस्यापत्यमिव तज्जातत्वात् । यवक्षारे ।

यवाम्लज न० यवजातात्म्लाज्जायते जन-ड । सौवीरके ।

यवास पु० यु-आस । दुरालभायाम्, खदिरभेदे च । सप्तच्छदे हृक्षे स्त्री० टाप् । स्वार्थे कन् । तत्रैव ।

यविष्ठ त्रि० अतिशयेन युवा युवन्+इष्ठन् यवादेशः अतितरुणे ।

यवीयस् त्रि० अतिशयेन युवा युवन्+ईयसु यवादेशः 'अंशभंश यवीयांस' इति स्मृतिः । कनिष्ठे स्त्रियां ङीप् ।

यवोत्थ न० यवादुत्तिष्ठति उद्+स्था-क । सौवीरके ।

यव्य न० यवानां भवनं क्षेत्रं यत् । यवभवनयोग्ये क्षेत्रे । युक्तस्वन्द्रार्कायत्र यत् । चान्द्रे मासे पु० । 'यव्यद्वयं श्रावणादि सर्षा नद्योरजस्वला' इति स्मृतिः ।

यशःपटह पु० यशःख्यापकः पटहः । ढक्कायाम् वाद्यभेदे ।

यशःशेष त्रि० यशएव शेषोऽस्य । मृते । कीर्त्तिशेषादयोऽप्यत्र ।

यशस् न० अस असुन् धातोः युच् । शौर्य्यादिप्रभूते ख्यात्यपरपर्य्याये पदार्थे

यशस्या स्त्री० यशसे हिता यशस्+यत् । जीवन्त्याम् वल्लिनामोषधौ च । यशःसाधने त्रि० । 'धन्यं यशस्यमायुष्यमिति ।

यशस्वत् त्रि० यशस्+मतुप् मस्य वः । यशोविशिष्टे । विनि । यशस्वीत्यत्र स्त्रियां ङीप् । ङीबन्तस्तु तत्र ज्योतिष्म यशस्तिकायां, वनकार्पासाच्च ।

यशोद पु० यशो ददाति दा-क । पारदे । यशोदातरि त्रि० । नन्दगोपपत्न्यां स्त्री० । 'नन्दगोपगृहेजाता यशोदागर्भसम्भवे' इति चण्डी

यष्टृ पु० यज-तृच् । यागयोक्ते ।

यष्टि स्त्री० यज क्तिन् नि० । ध्वजादिदण्डे, भुजाद्यवलम्बने दण्डे च क्तिच् । तन्वी, हारलतायां, भार्य्यां, मधूकायां (यष्टिमधु) वा ङीप् । यवभेदे च ।

यष्टीक न० यष्टिः कायति कै-क । यष्टीमधौ, लतामेदे ।

यष्टीपुष्प पु० यष्टीव पुष्पमस्य । जीवद्वृक्षे ।
यष्टीमधु पु० यष्ट्यां मधु अस्य । (यष्टिमधु) खनामख्याते लतार्भेदे ।
यस यत्ने दिवा० पक्षे भ्वा० पर० अक० सेट् । यस्यति यसति संयस्यति संयसति अनुयस्यति अयसत् अयासीत् अयसीत् ।
या गतौ अदा० पर० सक० अनिट् । याति अयासीत् ।
याग पु० यज-घञ् । मन्त्रकरणके यज्ञप्राद्यधिकरणे हविःप्रक्षेपरूपे यज्ञे
याच याचने भ्वा० उभ० द्विक० सेट् । याचति ते अयाचीत् अयाचिष्ट । चङि न ह्रस्वः । अयु याचथुः । याचित्वम् ।
याचक त्रि० याच-ण्वुल् । याच्ञाकारके ।
याचन न० याच-ल्युट् । याच्ञायाम् । युध् । याचनाप्यत्र स्त्री० ।
याचनक त्रि० याच-ल्यु स्वार्थे कन् । याचके ।
याचित न० याच-भावे क्त । याचनहत्तौ याच्ञायाञ्च । कर्म्मणि क्त । प्रार्थिते त्रि० । [(चाच्योया द्रव्य) ।
याचितक न० याचितेनाधिगतम् कन् । याच्ञया धनस्वामिनो गृहीते
याच्ञा स्त्री० याच-नङ् । प्रार्थनायाम् ।
याजक पु० याजयति यज-णिच्-ण्वुल् । धनादिलाभाय परार्थं यज्ञकर्त्तरि ऋत्विगादौ ।
याज्ञवल्क्य पु० ऋषिभेदे ।
याज्ञसेनी स्त्री० यज्ञसेनस्य द्रुपदराजस्यापत्यं स्त्री० अत इञ् ङीप् । द्रौपद्यां पाण्डवभार्य्यायाम् ।
याज्ञिक पु० यज्ञाय हितः यज्ञः प्रयोजनमस्य वा ठक् । दर्भभेदे, खदिरे, पलाशे, अश्वत्थे, याजके, ऋत्विगादौ, यजमाने च ।
याज्य न० इज्यतेऽत्र यज-ण्यत् । यागस्थाने देवप्रतिमायाञ्च 'याजयं क्षेत्रमलङ्कारमिति स्मृतिव्याख्यायां दायभागे याजयं यागस्थानं देवता वेत्युक्तम् याजनीये त्रि० । करणे ण्यत् । ऋग्विशेषे स्त्री० ।
यातना स्त्री० चु० यत-युच् । तीव्रवेदनायाम् ।
यातयाम त्रि० यातो गतो याम उचितसमयो यस्य । जीर्णे पर्य्युषिते 'यातयामं गतरसमिति गीता । उच्छिष्टे, परिभुक्ते च ।

यातव्य पु० यायतेऽसौ या-तव्य। रूपाणां युद्धार्थमभिगम्ये यत्नौ गन्तव्ये त्रि०।

यातायात न० यातञ्चायातञ्च या-भावे क्त आ+या-भावे क्त षसमाहार द्व०। गमनागमनयोः।

यातु पु० या-तु। राक्षसे। गन्तरि त्रि०। [कृन्तरि त्रि०।

यातुघ्न पु० यातुं राक्षसं गन्त्रेन हन्ति हन-टक्। युगपुत्रौ, राक्षस-

यातुधान पु० यातु इति धीयतेऽभिधीयते धा-ल्युट्। राक्षसे।

यात्र स्त्री० या-ष्ट्रच्। देवरपत्न्याम् (या) यातरौ। तृन्। गन्तरि त्रि० यातारौ।

यात्रा स्त्री० या-ष्ट्रन्। जिगीषया राज्ञां गमने, गमनमात्रे, देवोद्देशेनोत्सवभेदे रथयात्रादौ च।

यात्रिक त्रि० यात्रायै हितम्। उत्सवे, उपाये, गमनहितेनक्षत्रादौ च

यात्रातथ्य न० तथा तद्रूपस्यौचित्यम् अव्ययी० तस्य भावः ष्यञ्। यद्वस्तु यथा भवितुं युक्तं तस्य तथाभावे।

यात्रार्थ्य न० यथार्थस्य भावः। सत्यत्वे वास्तविकत्वे।

यादःपति पु० यादसां जलजन्तूनां पतिः। वरुणे, समुद्रे च।

यादव पु० यदोर्गोत्रापत्यमण्। यदुवंश्ये स्त्रियां ङीप्। तत्प्रधाने श्रीकृष्णे पु०। यदूनामिदम् अण्, गोमहिष्यादिके धने न० दुर्गायां स्त्री० ङीप्।

यादस् न० या-असुन् दुक् च। जलजन्तुमात्रे। [पत्यादयोऽप्यत्र।

यादसांनाथ पु० ६त०। अलुक् समा०। वरुणे, समुद्रे च। यादसां-

यादृक्(ग)(श) त्रि० यस्येव दर्शनमस्य यद्+दृश्-क्विप्, (ट) क्विप् वा। यत्सदृशे यथाविधे। टान्तात्तु स्त्रियां ङीप्।

यादृच्छिक त्रि० यदृच्छया आगतः ठक्। यथेच्छया प्राप्ते।

यान न० या-भावे ल्युट्। गमने, उपचितशक्तेः राज्ञः मूलराष्ट्रादिरक्षां कृत्वा रिपोराक्रन्दनाय गमने च। करणे ल्युट्। गमनसाधने रथादौ।

यापन न० या-णिच्-ल्युट्। कालादौ क्षेपणे, निरसने च

याप्य त्रि॰ या-णिच्-ण्यत् । निन्द्ये अधमे, क्षेपणीये निःश्रेयसप्रति-कार्ये उपशमनीये रोगभेदे च ।

यापयान पु॰ याप्यं क्षेप्यं कुत्सितं वा पद्भ्यूत्थत्वात् इतरवाहत्वाद्वा यानम् (सङ्घाणा) शिविकायाम् । [सा॰ ।

याम पु॰ यम-घञ् । समये प्रहरे च 'यामोयातस्तथापि नायात' इति

यामघोष पु॰ यामे घोषोऽस्य । कुक्कुटे । घटियन्त्रभेदे स्त्री॰ ।

यामल न॰ यमल+स्वार्थेऽण् । युगले, तन्त्रशास्त्रभेदे च ।

यामवती स्त्री॰ यामाः बहवः त्रित्वसंख्यायुताः सन्त्यस्याः भूम्नि मतुप् मस्य वः । रात्रौ, हरिद्रायाञ्च ।

यामाद पु॰ जायां माति दत्ते पृ॰ । जामादशब्दार्थे । [मनुः ।

यामि स्त्री॰ यम-इन् । कुलस्त्रियां भगिन्यां 'यामयोयानि गेहानीति

यामित्र न॰ जन्मतिथेरुक्ते लग्नराशिभ्यां सप्तमे स्थाने ।

यामित्रवेधः पु॰ यामित्रे सप्तमस्थाने वेधः पापग्रहसंयोगः विवाहादौ वर्ज्ये पापात् सप्तमगशनीत्याद्युक्ते योगभेदे ।

यामिनी स्त्री॰ यामाः त्रिसंख्याताः सन्त्यस्य वाहुल्ये इनि । रात्रौ, हरिद्रायाञ्च ।

यामिनीपति पु॰ इत॰ । चन्द्रे, कर्पूरे च । रजनीशादयोऽप्यत्र ।

यामी स्त्री॰ यमस्येयम् यमो देवतास्या वा अण् । दक्षिणस्यां दिशि यमसम्बन्धिन्यां यातनायां च । यामि+वा ङीप् । यामिशब्दार्थे

यामुनेष्टक न॰ यमुनायां भवं तदिवेष्टकम् । सोसके तस्य हि कृष्ण-त्वात् यामुनजलतुल्यत्वम् ।

याम्य पु॰ यामी दिक् नियासोऽस्य यत् । अगस्त्ये, चन्दनवृक्षे च यमोदेवतास्य । यमसम्बन्धिनि त्रि॰ । दक्षिणदेशस्थे त्रि॰ ।

याम्यायन न॰ याम्यायाम् अयनं सूर्य्यस्य गतिः । दक्षिणायने रवेः कर्कसंक्रान्तितः परेषु षट्सु मासेषु ।

याम्योद्भूत पु॰ याम्ये दक्षिणदेशे उद्भूतः । श्रीतालवृक्षे ।

यायजूक पु॰ यज यङ-ऊक । पुनःपुनर्यागशीले ।

यायावर पु० देशाद्देशान्तरं याति या-यङ्-वरच्। अश्वमेधीयाश्वे जरत्कारुसुनौ च। भृशवक्रगमनशीले त्रि०।

याव पु० यु-अप् स्वार्थे अण्। अलक्ते। स्वार्थे कन्। तत्र याव इव कन् (कुलतीकलाद) श्रीव्रिभेदे।

यावत् त्रि० यत् परिमाणमस्य मतुप्। यत्परिमाणे। यावति। साकल्ये, व्याप्तौ, सीमायाञ्च अव्य०।

यावत्तावत् अव्य० यावच्च तावच्च द्व०। वीजगणितप्रसिद्धे अव्यक्तमानानयनाय कल्पिते प्रथमे राशौ।

यावतिथ त्रि० यावतां पूरणः यावत्+डट् इथुक् च। यावत् परिमाणपूरणे।

यावन पु० यु-णिच्-ल्यु। सिल्हाख्यगन्धद्रव्ये।

यावनाल पु० यवनालएव स्वार्थे अण्। धान्यभेदे।

यावनालशर पु० यावनालइव शरभेदे।

यावनाली स्त्री० यावनालस्य विकारः अण् ङीप्। यावनाल भवायां शर्करायाम्।

यावशूक पु० यवशूकस्य विकारः अण्। यवक्षारे।

याष्टीक पु० यष्टिः प्रहरणमस्य ठक्। यष्ट्या योद्धरि।

यास पु० यस-कर्त्तरि संज्ञायां घञ्। दुरालभायाम्।

यु मिश्रणे अभिश्रणे च अ० पर० सक० सेट्। यौति अयावीत्।

यु बन्धे क्र्या० उ० सक० अनिट्। युनाति युनीते अयौसीत् अयोष्ट

यु निन्दने चु० आत्म० सक० सेट्। यावयते अयीयवत।

युक्त त्रि० युज-क्त। मिलिते। अध्यस्तयोगे योगिनि पु०। उचिते, न्यायागतद्रव्यादौ च न०।

युक्तरसा स्त्री० युक्तो रसो यस्याः। राज्ञायां (काटायामरली)।

युक्ति स्त्री० युज-क्तिन्। न्याये, व्यवहारे, अनुमाने तत्साधकक्रियाज्ञानादौ, 'युक्तिरर्थावधारणमि'त्युक्ते नाटकाङ्गविशेषे च

युग वर्जने भ्वा० पर० सक० सेट् इदित्। युङ्क्ति अयुङ्क्षीत्।

युग न० युगि-अच् पृ० नलोपः। युग्मे, द्वित्वसंख्यान्विते, सत्यत्रेता-

द्वापरकलिरूपे कालविशेषे तत्प्रमाणं वाचस्पत्याभिधाने । दृष्टि-
नामौषधे, हरीतक्यादिरङ्गभेदे पु० (जोयाल) । [भेदे ।
युगकीलक पु० ६त० । रथाद्यङ्गयुगधारणार्थे कीलकाकारे काष्ठखण्ड-
युगन्धर पु० युगं रथस्य युगकाष्ठं धरति धृ-खच् । रथस्य युगकाष्ठा-
वलम्बने कुबराख्ये काष्ठभेदे, पर्वतभेदे च ।
युगपद् अव्य० युगमिव पद्यते पद-क्विप् । एककाले इत्यर्थे ।
युगपत्र पु० युगमिव संहतं पत्त्रमस्य । कोविदारवृक्षे स्वार्थे कन् ।
तत्रैव । स्त्रियामादृक्षे स्त्री० टाप् । अत इत्त्वम् । [वृक्षे इषे ।
युगपार्श्वग पु० युगपार्श्वे गच्छति गम ड । अश्वाश्वार्थं लाङ्गलपार्श्वे
युगल न० युगं द्वित्वं विद्यतेऽस्यस्य लच् । युग्मे, द्वित्वसंख्यान्विते च ।
युगलाख्य पु० युगलेन वरूथेन व्यञ्जनवर्णद्वयेनाख्यायते आ+ख्या-क ।
वर्वरवृक्षे । [च ।
युगान्त पु० युगानां सत्यादीनामन्तस्तदुपलक्षितः कालः । प्रलये, तत्काले
युग्म न० युज यक् घञ् जस्य गः । द्वित्वसंख्यान्विते (जोड़ा) युगले ।
'युग्माग्निकृतभूतानि धृणसुन्योर्बसुरन्ध्रयोः । रुद्रेण द्वादशी युक्ता
चतुर्दश्याथ पूर्णिमा । प्रतिपदाद्यमावस्या तिथ्योर्युग्मं महाफल-
मि'त्युक्ते तिथिविशेषयोगे समराशिषु च ।
युग्मपत्र पु० युग्मानि पत्त्राण्यस्य । रक्तकाञ्चनवृक्षे । युग्मपर्णादयो-
ऽप्यत्र । संज्ञायां कन् । स्त्रियामादृक्षे स्त्री० टाप् अत इत्त्वम् ।
युग्मफला स्त्री० युग्मानि फलानि यस्याः । इन्द्रवारुण्यां, दन्तिकाली च
युग्य न० युगमर्हति यत् । वाहने याने । युगं वहति यत् । युग-
वाहकेऽश्वादौ त्रि० ।
युच्छ प्रमादे भ्वा० पर० सक० सेट् । युच्छति अयुच्छीत् ।
युज संगमे युतौ च धा चु० उभ० पक्षे भ्वा० पर० सक० सेट् । योज-
यति ते योजति अयूयुजत् त अयोजीत् ।
युजं युतौ रु० उ० सक० अनिट् । युनक्ति युङ्क्ते उद्युङ्क्ते प्रयुङ्क्ते
निर्युनक्ति । अयुजत् अयौक्षीत् अयुक्त ।

युज योगे समाधौ दिवा० अक० अनिट् । युज्यते अयुक्त ।

युज निन्दायां चु० आ० सक० सेट् । योजयते अयूयुजत ।

युज् पु० दि० युज–क्विप् । समाधिमति । युक् युजौ । रू० युज-क्विप् । संयोगवति त्रि० युङ् युञ्जौ युञ्जः ।

युञ्जान पु० युज शानच् । योगविशेषवति भावनासंस्कारेण सर्व्वपदार्थानां ज्ञातरि, रथसारथौ, विप्रे च ।

युत दीप्तौ भ्वा० आ० अक० सेट् । योतते । अयोतिष्ट ।

युत त्रि० यु-क्त । संयुक्ते, मिलिते, अमिलिते च ।

युतक न० युक्त युत-क वा ततः स्वार्थे कन् । संशये, युगे, स्त्रीवस्त्राञ्चले, चरणाग्रे, यौतुके धने, मैत्रीकरणे, संभवे, शूर्पाग्रे च । संयुक्ते त्रि० ।

युतवेध पु० विवाहादौ वर्ज्ये चन्द्रेण सह पापग्रहयोगे ।

युद्ध न० युध क्त । शस्त्रादिक्षेपणव्यापारे, योधने, तदाधारे संग्रामे ज्यौतिषोक्ते अष्टानां गतिभेदानां, योधनरूपे परस्परमिलनविशेषे च ।

युध युद्धे दिवा० आ० सक० अनिट् । युध्यते । अयुद्ध ।

युध्(धा) स्त्री० युध सम्प० क्विप् वा टाप् । युद्धे ।

युधान पु० यु-कानच् । क्षत्रिये ।

युधिष्ठिर पु० युधि युद्धे स्थिरः गविषुधिभ्यां स्थिरः इति षत्वम् । पाण्डवज्येष्ठे ।

युप विमोहे दिवा० पर० अक० सेट् । युप्यति ह्यपुप्त् अयोपीत् ।

युयुधान पु० युध-कानच् द्वित्वम् । इन्द्रे, सात्यकिनामनि यादवे क्षत्रियभेदे, क्षत्रियमात्रे च ।

युवखलति स्त्री० युवतिरेव खलतिः । (टाक्) रोगवत्यां युवत्यां युवजरतीत्यर्थे ।

युवति(ती) स्त्री० युवन्+ति ङीप् वा । यौवनवत्यां स्त्रियाम् । युवन्–ङीप् । यूनीत्यर्थे ।

युतोटा स्त्री० युतीनामिष्टा । स्वर्णयूथिकायाम् ।

युवन् त्रि० यु कनिन् । श्रेष्ठे निसर्गबलवति । 'आधोऽशाङ्गवेदूधाबल्ल-कृणस्तत उच्यते' इत्युक्तवयस्के तरुणे च ।

युवनाश्व पु० सूर्यवंश्ये, मान्धातरितरि नृपभेदे । [राजपुत्रे ।

युवराज पु० युवैव राजा टच् समा० । राजयोग्यक्रियत्कार्यकरे

युष भजने सौ० पर० सक० सेट् । योषति अयोषीत् ।

युष्मद् त्रि० युष मदिक् । संबोध्यचेतने भवच्छब्दार्थे तस्य चोक्तार्थे सर्वनामता, त्रिषु लिङ्गेषु समरूपता च ।

यूक पु० स्त्री० यू-किप् कन् । मत्कुणे, (उकुण) स्त्रीत्वे टाप् ।

यूति स्त्री यु-क्तिन् नि० दीर्घः । मिश्रीकरणे ।

यूथ न० यु-थक् पृ० दीर्घः । सजातीयसमुदाये ।

यूथनाथ पु० ६त० । वन्यगजादीनां प्रधाने । यूथपादयोऽप्यत्र ।

यूथिका स्त्री० यु-थक् पृ० दीर्घः स्वार्थे कन् अत इत्त्वम् टाप् । अल्पानके, पाठायां, यूथ्याञ्च (युहफुल) ।

यूथी स्त्री० यु थक् पृ० दीर्घः गौ० ङीप् । (युहफुल) पुष्पप्रधाने वृक्षे ।

यूप पु० न० यु-पक् पृ० दीर्घः । यज्ञीयपशुबन्धनकाष्ठभेदे, यागसमाप्ति-चिह्नार्थे स्तम्भे च । जयस्तम्भे पु० ।

यूपकटक पु० ६त० । यज्ञसमाप्तिसूचककाष्ठस्य शिरःस्थे वलयाकारे काष्ठमये पदार्थे ।

यूपद्रु पु० यूपाय द्रुः प्रकृतिविकृतिभावात् ४त० । खदिरवृक्षे यूपद्रु-मादयोऽप्यत्र ।

यूष वधे भ्वा० पर० सक० सेट् । यूषति अयूषीत् ।

यूष पु० न० पूष क पृ० पस्य यः । सुप्रादिकाथे । ब्रह्मदारुवृक्षे पु० ।

येष यत्ने भ्वा० आ० अक० सेट् । येषते अयेषिष्ट । चङि न ह्रस्वः ।

योक्त्र न० युज्यतेऽनेन युज-ष्ट्रन् । रेशादण्डादौ युगबन्धनार्थे दामनि (योत) ।

योग पु० युज-भावादौ घञ् । संयोगे, मिलने, उपाये, वर्म्मादिधारणे, ध्याने 'योगश्चित्तवृत्तिनिरोध' इति पातञ्जलोक्ते सर्वविषयेभ्योऽन्तः-करणवृत्तेर्निरोधे, 'सयोगं योगमित्याहुर्जीवात्मपरमात्मनो'रित्युक्ते

जीवात्मपरमात्मनोरैक्ये, युक्तौ, कृते, अलभ्यार्थलाभचिन्तायाम्, हेतुत्वैर्ये शब्दादीनां प्रयोगे, समुदायशब्दस्यावयवार्थसम्बन्धे, योगबलं समाख्येति मीमांसकाः। 'योगः कर्मसु कौशलमित्युक्तौ यथास्थितवस्तुसोऽन्यथारूपप्रतिपादने, यथा संसारबन्धहेतोरपि कर्मणोऽबन्धमोक्षहेतुत्वम्। ज्योतिषोक्तेषु रविचन्द्रयोगाधीनेषु विष्कुम्भादिषु, सप्तविंशतौ पदार्थेषु तिथिवारनक्षत्राणाम् अन्यतरान्यतमानां योगविशेषे, अमृतयोगः अर्कोदययोग इत्यादि उपाधौ च योगाधमनधिक्रीतमिति स्मृतिः।

योगक्षेम न० योगश्च क्षेमश्च समाहारः द्व०। अलभ्यलाभचिन्तासहिते लब्धपरिरक्षणे 'योगक्षेमं वहाम्यहं'मिति पुरा०।

योगज न० योगात् जायते जन ड अयुरुचन्द्रने। योगजातज्ञाने त्रि०। न्यायादुक्ते प्रत्यक्षादिसाधने अलौकिकसन्निकर्षभेदे पु०।

योगदान न० योगेन क्लेन उपाधिना वा दानम्। 'योगदानातिमुच्यते'मिति स्मृत्युक्ते सोपाधिके दाने।

योगनिद्रा स्त्री० योगरूपा निद्रा। प्रलये परमेश्वरस्य सर्वजीवसंहारेच्छया योगरूपे व्यापारे 'योगनिद्रामुपेयुषे' इति चण्डी तदधिष्ठात्र्यां दुर्गायाञ्च।

योगपट्ट न० योगाभ्यासार्थं पट्टम्। योगिधार्ये पट्टसूत्रभेदे।

योगपीठ पु० न० योगयोग्यं पीठमासनम्। देवादीनामासनभेदे।

योगमाया स्त्री० योगएव माया। भगवतो जगत्सर्ज्जनार्थायां शक्तौ, 'योगमायामुपाश्रित' इति भागवतम्। तदधिष्ठात्र्यां दुर्गायाञ्च।

योगरङ्ग पु० योगेन रङ्गोऽत्र। (नारङ्ग) जम्बीरभेदे योगरङ्गाधत्व स्त्री०।

योगरूढ़ पु० योगोऽवयवशक्तिः रूढिः समुदायशक्तिः एते स्तोऽस्य यच्। अवयवशक्त्या समुदायशक्त्या च अर्थबोधके पङ्कजशब्दादौ अत्र हि उभयशक्त्या पङ्कजन्मकर्तृत्वरूपावयवार्थविशिष्टपद्मत्वविशिष्टस्य बोधः। उभयार्थबोधनाच्च पङ्कजाते-कुमुदादौ, स्थलजाते-पद्मे च न तत्तदप्रयोगप्रसङ्गः।

योगदाहिन् पु० योगेन वहति वह–णिनि । पारदे, क्षारभेदे च ।

योगाचार पु० योगेनाचरति आ+चर–अच् । बौद्धभेदे तन्मताचार-विवरणं वाचस्पत्याभिधाने ।

योगाधमन न० योगेन ऋणेनोपाधिना वाधनम् । सोपाधिके ऋणदेतुके च बन्धकदाने । 'योगाधमनविक्रीत'मिति स्मृतिः ।

योगारूढ पु० योगमारूढः आ+रुह–क्त । 'यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्यते । सर्वसंकल्पसन्यासी योगारूढस्तदोच्यते' इत्युक्ते योगिभेदे 'योगारूढस्य तस्यैव शमः कारणमुच्यते' इति गीता ।

योगासन न० योगार्थमासनम् । योगशास्त्रोक्ते स्वस्तिकादौ आसनभेदे

योगिन् त्रि० युज–घिनुण् । 'आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ! सुखं वा यदि वा दुःखं स योगी परमोमतः' इत्यादि-गीताद्युक्तयोगयुक्ते संयोगवति च त्रि० स्त्रियां ङीप् । सा च तत्र, दुर्गायां तत्प्रकृतिभेदेषु नारायणस्वादिषु चतुःषष्टिप्रकारेषु, प्रतिपच्चतुर्थी इत्युक्ते पूर्वादिदिग्भेदादु तिथिभेदेषु च ।

योगीश्वर पु० ६त० । याज्ञवल्क्यमुनौ योगिनां श्रेष्ठे च । दुर्गायां स्त्री० ङीप् ।

योगीश्वर पु० ६त० । श्रीकृष्णे, 'योगेश्वर ! ततो मे त्वं दर्शयात्मान'मिति गीता । दुर्गायां बन्ध्याकर्कोट्यां च स्त्री० ङीप् ।

योगीष्ट न० योगाय योजनार्थमिष्टम् । खीसके ।

योग्य त्रि० योगमर्हति यत् युज–ण्यत् वा । योगार्हे, उचिते, निपुणे, शक्ते च । पुष्यनक्षत्रे पु० । क्षत्रियौषधे न० ।

योग्यता स्त्री० योग्यस्य भावः तल् । सामर्थ्ये, शाब्दबोधसाधने 'पदार्थे तत्र तद्वत्ता योग्यता परिकीर्त्तिते'त्युक्ते तत्पदार्थे तत्पदार्थवत्तारूपे, परस्परान्वये बाधाभावरूपे वार्थे च ।

योग्या स्त्री० योगमर्हति यत् युज–कृत्यम् ण्यत् वा । अभ्यासे शास्त्राभ्यासे, सूर्य्यस्त्रियाञ्च ।

योग्यानुपलब्धि स्त्री० योग्यस्य प्रत्यक्षादिना उपलब्धुमर्हस्यानुपलब्धिः

ज्ञिरज्ञानम्। न्यायादयुक्ते अभावव्याहके साधनभेदे। तथाहि घटादिसत्त्वे तत्र घटाभावो नानुभूयते तस्य प्रति योगिनो घटादेः सत्त्वेऽपि तत्प्रत्यक्षकारणसामग्र्या सत्त्वेन तत्प्रत्यक्षाभावात् किन्तु घटाद्याभावो गृह्यते पिशाचाद्यभावस्य तु न प्रत्यक्षता तत्प्रति-योगिपिशाचादेर्दर्शनायोग्यत्वात्।

योजन न० युज-भावादौ ल्युट्। संयोगे। क्विप्-ल्युट्। संयोग-करणे। चतुर्थ्यु क्तोक्षेषु। प्रथमसमग्रमदङ्क्षा योजने इति लीलावती

योजनगन्धा स्त्री० योजनं व्याप्य गन्धो यस्याः। कस्तूर्याम्, सीतायां, व्यासमातरि-सत्यवत्याञ्च। स्वार्थे कन् अत इत्त्वम्। तत्रैव।

योजनपर्णी स्त्री० योजनं व्याप्य पर्णान्यस्याः विस्तीर्णपर्णत्वात्। मल्लिकायाम्। [अत इत्त्वम्। तत्रैव।

योजनवल्ली स्त्री० योजनं व्याप्य वल्लीव। मल्लिकायाम्। स्वार्थे कन्

योत्र न० यु-ष्ट्रन्। योक्ते (योत)।

योद्धृ पु० युध-तृच्। युद्धकर्त्तरि।

योध पु० युध-अच्। युद्धकारके। भावे घञ् युद्धे।

योधन न० युध भावे ल्युट्। युद्धे। करणे ल्युट्। अस्त्राद्यायुधे। कर्त्तरि ल्यु। युद्धकर्त्तरि पु०। [परस्परास्फालने।

योधसंघात्त पु० योधाय युद्धाय संघातः आस्फालनम्। योधानां युद्धार्थे

योनल पु० यवस्य नल इव काण्डोऽस्य पृ० उत्त्वम्। (देधान) शस्यभेदे

योनि पु० स्त्री० यु-नि। मायादीनामुपलक्षणे-व्याकरे, कारणे, जले, स्त्रीचामसाधारणचिह्ने, तद्वेतौ पूर्वफलगुनीनक्षत्रे च। स्त्रीत्वे वा ङीप्। [च देहे।

योनिज न० योनिस्थानात् जायते जन ड। देहभेदे जरायुजेऽण्डजे

योनिमुद्रा स्त्री० योन्याकारा मुद्रा। तन्त्रोक्ते देवताविशेषपूजाङ्गे प्रदर्शनीये अङ्गुलीसंचालनविशेषे लक्षणन्तु वाचस्पत्याभिधाने।

योषा स्त्री० युष अच् टाप्। स्त्रियाम् नार्याम्।

योषित् स्त्री० युष-इति। नार्याम् हलन्ताद्वा टाप्। योषितामपत्ये।

योषित्प्रिया स्त्री० ६त०। हरिद्रायाम्।

यौक्तिक त्रि० युक्तित आगतः ठक्। युक्तिसिद्धे, योग्ये च। युक्तौ च अधिकृतः ठक्। नर्मसचिवे पु०।

यौगिक त्रि० योगात् प्रकृतिप्रत्ययार्थसम्बन्धात् अधिगतः ठक्। प्रकृतिप्रत्ययलभ्यार्थवाचके शब्दे यथा पाचकादिशब्दः पाककर्त्तृवाचकः। योगे योग्यः ठक्। योगयोग्ये। [सुखः।

यौट संबन्धे भ्वा० पर० सक० सेट्। यौटति अयौटीत्। चडि न [धने।

यौड यौटवत् सर्वम्। यौडति अयौडीत्।

यौतक न० युतकाले विवाहकालेऽधिगतम् कण्। विवाहकाले लब्धे

यौतव न० युतु तस्य भावः अण्। परिमाणे।

यौतुक न० यौतुर्यौमकालस्तत्र लब्धं कण्। विवाहकाले लब्धे धने।

यौधेय पु० योध एव ढक्। योद्धरि। ढ। योधेयोऽपत्यत्र।

यौन त्रि० योनितः योनिसम्बन्धात् आगतम् अण्। पापे, योनेरयमण्। वैवाहिकसम्बन्धे पु०।

यौवत न० युवतीनां समूहः अण्। युवतिसमुदाये।

यौवन न० यूनो भावः अण्। तारुण्ये अवस्थाभेदे। 'आ षोड़शाद् भवेद्बाल स्तरुणस्तत उच्यते। वृद्धः स्यात् सप्ततेरूर्द्ध्वं मित्युक्तोऽवस्थाभेदे। [वणभेदे।

यौवनकण्टक पु० न० यौवनस्य कण्टक इव चिह्नम्। (वयस् फोड़ा)

यौवनदशा स्त्री० कर्म०। तारुण्ये अवस्थाभेदे।

यौवनलक्षण न० ६त०। स्तने, लावण्ये च।

यौष्माक त्रि० युष्माकमिदम् युष्मद् अण् युष्माकादेशः। युष्मत् सम्बन्धिनि। खञ्। यौष्मकीनोऽपत्यत्र त्रि०।

र

र पु० रा-ड। वह्नौ, उष्मे, कामानले च।

रंहस् न० रहि-असुन्। वेगे।

रक खादे प्राप्तौ च चु० उ० सक० सेट्। राकयति-ते अरीरकत् त।

रक्त न० रञ्ज-करणे क्त। कुङ्कुमे, ताम्रे, सिन्दूरे, हिङ्गुले च।

शरीरस्थे रसपाकजन्ये मांसहेतौ रुधिराख्ये धातुभेदे च । भावे क्त । रागे । कुसुम्भे क्लिञ्जके रोहितवर्णे च पु० तद्वति त्रि० । कर्त्तरि-क्त । अनुरक्ते क्रीडारते च त्रि० । कर्म्मणि-क्त । नील्यादिभिरञ्जिते त्रि० । करणे क्त । मञ्जिष्ठायां, लाक्षायां, गुञ्जायाञ्च स्त्री० टाप् ।

रक्तक पु० रक्तं रुधिरमिव कायति कै-क, ह्रस्वार्थे कन् वा । अस्थानदृक्षे, बन्धूकवृक्षे, रक्तपोभाञ्जने, रक्तैरण्डे च । रुधिरे रक्तवस्त्रे च न० । अनुरागिणि विनोदिनि च त्रि० ।

रक्तकन्द पु० रक्तवर्णः कन्दोऽस्य । विद्रुमे प्रवाले । [न० ।

रक्तकमल न० रक्तं कमलमिव । रक्तवर्णोत्पले । पृ० । रक्तकम्बलमयत्व

रक्तकरवीर पु० कर्म्म० । रक्तवर्णपुष्पककरवीरवृक्षे ।

रक्तकाञ्चन पु० कर्म्म० । रक्तवर्णपुष्पककाञ्चनवृक्षे ।

रक्तकाण्डा स्त्री० रक्तः काण्डोऽस्याः । रक्तपुनर्नवायाम् ।

रक्तकुमुद न० कर्म्म० । रक्तवर्णपुष्पककैरवे । कर्म० । रक्तकैरवरक्तकोकनदे अप्यत्र न० ।

रक्तकुसुम पु० रक्तानि कुसुमान्यस्य । पारिभद्रे (पालदामादार) ।

रक्तकेशर पु० रक्ता केशरा अस्य । पारिभद्रे, पुन्नागवृक्षे च ।

रक्तखदिर पु० सारतो रक्तवर्णः खदिरः । रक्तवर्णसारके खदिरवृक्षे ।

रक्तगन्धक न० रक्तेन गन्धकमिव । वोले (गन्धरस) ।

रक्तघ्न पु० रक्तं हन्ति हन-टक् । रोहितकवृक्षे । दूर्व्वायां स्त्री० ।

रक्तचन्दन न० कर्म्म० । खनामख्याते चन्दनभेदे ।

रक्तचित्रक न० कर्म्म० । (लालचिता) क्षुपभेदे ।

रक्तचूर्ण न० कर्म्म० । सिन्दूरे ।

रक्तझण्टी स्त्री० कर्म्म० । (लालझाटि) पुष्पप्रधानकवृक्षभेदे ।

रक्ततुण्ड पु० रक्तं तुण्डमस्य । शुकपक्षिणि ।

रक्ततृणा स्त्री० रक्तं तृणं यस्याः । गोभूमिकायाम् ।

रक्तत्रिवृत्(ता) स्त्री० कर्म्म० । (लालतेओड़) वृक्षभेदे ।

रक्तदन्तिका स्त्री० रक्ता दन्ता अस्याः ङीप् संज्ञायां कन् अत

दन्तवत्। दाडिमीपुष्पे दुर्गाशक्तिभेदे 'भक्षयन्त्यास्य तानुग्रान् वैप्रचित्तान् महासुरान्। रक्ता रक्ता भविष्यन्तीत्युपक्रम्य ततो मां देवताः सर्वे मर्त्यलोके च मानवाः। स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकां'मिति चण्डी।

रक्तदन्ता स्त्री० रक्तानि दन्ता यस्याः। नालिकायाम् (नालते)।

रक्तदृश् पु० रक्ता दृक् नेत्रमस्य। कपोते। रक्तनेत्रादयोऽप्यत्र।

रक्तधातु पु० कर्म्म०। गैरिके, ताम्रे च। देहस्थे रुधिररूपे रसधातुदाते मांसधातुहेतौ धातुभेदे च।

रक्तनाल पु० रक्तो नालोऽस्य। जीवशाके।

रक्तप पु० रक्तं पिबति पा-क। राक्षसे। रक्तपानकर्त्तरि त्रि०। जलौकायां, डाकिन्यान्च स्त्री०। [पुष्पजवायाम्, राक्षायाञ्च।

रक्तपत्रिका स्त्री० रक्तानि पुष्पपत्त्राण्यस्याः कप् अत इत्त्वम्। रक्तरक्तपल्लव पु० ६त०। अशोकवृक्षे।

रक्तपाकी स्त्री० रक्ताः पाकः फलं यस्याः ङीप्। इक्ष्वाकुलतायाम्।

रक्तपाद पु० ६त०। शुकपक्षिणि। लज्जालौ लतायां, हंसपद्याञ्च स्त्री० ङीप्। [(जोंक)।

रक्तपायिनी स्त्री० रक्तं पातुं शीलमस्याः पा+णिनि। जलौकायाम्।

रक्तपारद पु० न० कर्म्म०। सिन्दूरे। [काश' इति वैद्यकम्।

रक्तपित्त न० रक्ताय दुष्टं पित्तम् यस्मात्। रोगभेदे 'रक्तपित्तात् ज्वरः

रक्तपुष्प पु० रक्तं पुष्पमस्य। करवीरे, रोहितकवृक्षे, रक्तकाञ्चनवृक्षे, दाड़िमवृक्षे, रक्तबकवृक्षे, बन्धूकवृक्षे, पुन्नागवृक्षे च स्वार्थे कन्। पलाशे। कर्म्म०। रक्तवर्णकुसुमे न०। पद्मे, शालमलिवृक्षे, जपावृक्षे च स्त्री० टाप्।

रक्तपुष्पिका स्त्री० रक्तानि पुष्पाणि यस्याः ङीप् अत इत्त्वम्। लज्जालुलतायाम्, रक्तपुनर्नवायाम्, भूनिपाटलौ च।

रक्तपुष्पी स्त्री० रक्तानि पुष्पाण्यस्याः ङीप्। पाटलिवृक्षे (पाकल)। जवायाम्, आवर्त्तकीलतायाम्, नागदमन्याम् करञ्जवृक्षे च।

रक्तपूरक न० रक्तं रुधिरं पूरयति सेवनात् पूर-ण्वुल्। इक्षुरसे।

रक्तप्रसव पु० रक्तवर्णः प्रसवः पुष्पमस्य । करवीरे रक्तास्फाने च ।

रक्तफल पु० रक्तानि फलान्यस्य । वटवृक्षे । बिम्बिकायां स्त्री० टाप् (तेलाकुचा) ।

रक्तवालुक न० कर्म्म० । सिन्दूरे रक्तवालुकाप्रभव स्त्री० ।

रक्तमञ्जर पु० रक्तवर्णा मञ्जरी अस्यस्य अच् । निचुलवृक्षे ।

रक्तमूला स्त्री० ब्रु० । लज्जालुलतायाम् ।

रक्तमेह पु० कर्म्म० । रोगभेदे ।

रक्तमोक्षण न० ब्रु० । रुधिरस्रावणे ।

रक्तयष्टि स्त्री० रक्तवर्णा यष्टिरस्याः । मञ्जिष्ठायाम् । स्वार्थे कन् तत्रैव

रक्तरेणु पु० रक्ता रेणवोऽस्य । पद्मागकलिकायाम् ।

रक्तलशुन न० कर्म्म० । (लालरशुन) मूलभेदे ।

रक्तला स्त्री० रक्तं रुधिरं हेतुत्वेनास्त्यस्याः लच् तत् लाति सेवनात् ला-क वा । काकतुण्डयाम् ।

रक्तवटी स्त्री० रक्तवर्णा वटीव । मञ्जरिकायाम् ।

रक्तवर्ग पु० रक्तानां वर्गः समुदायः । दाडिमकिंशुकलाक्षाबन्धूक-हरिद्राजयाकुसुम्भपुष्पमञ्जिष्ठालक्तकरूपे समूहे । [५० ।

रक्तवर्ण पु० रक्तो वर्णोऽस्य । इन्द्रगोपकीटभेदे । कर्म्म० । रोहितवृक्षे

रक्तवर्द्धन पु० रक्तं रुधिरं वर्द्धयति वृध-णिच्-ल्यु । वार्त्ताकौ ।

रक्तवर्षाभू पु० वर्षायां भवति भू किप् कर्म्म० । रक्तपुनर्नवायाम् ।

रक्तबीज पु० रक्तवर्णानि बीजान्यस्य । दाडिमे । रक्तं रुधिरमेव बीजमुत्पत्तिः कारणं यस्य । 'रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः । समुत्पतति मेदिन्यास्तत्प्रमाणस्तदा सुरः' इति चण्डीपति-पादितेऽसुरभेदे ।

रक्तवल्ली स्त्री० रक्तवर्णा वल्ली यस्याः । शेफालिकायाम् ।

रक्तवृष्टि स्त्री० ब्रु० । दैवक्लेशोपद्रवभेदे रुधिरवर्षणे ।

रक्तशालि पु० कर्म्म० । (लालधान) धान्यभेदे ।

रक्तशिग्रु पु० कर्म्म० । (लालसजना) वृक्षभेदे ।

रक्तशीर्षक पु० रक्तं शीर्षमिव कप् । सरलद्रुमे ।

रक्तशृङ्गिका न० रक्तं शृङ्गमिवास्त्रस्य ठन् । विषभेदे ।
रक्तसन्ध्यक न० रक्ता सन्ध्येव कन् । रक्तवर्णे कह्लारे, पद्मे च ।
रक्तसरोरुह न० कर्म्म० । रक्तपद्मे ।
रक्तसर्षप पु० कर्म्म० । (राइशर्षा) राजिकायाम् ।
रक्तसहा स्त्री० रक्तं सहते सह-अच् । रक्तास्फाने ।
रक्तसार न० रक्तः सारोऽस्य । रक्तचन्दने । अस्तवेतसे पु० ।
रक्तसौगन्धिक न० कर्म्म० । (नालसुदि) रक्तवर्णकह्लारे ।
रक्ताकार पु० रक्तवर्ण आकारो मूर्त्तिर्यस्य । प्रवाले ।
रक्ताक्ष पु० रक्ते अक्षिणी यस्य षच् समा० । पारावते, सक्षिके, चकोरे, सारसे च । रक्तनेत्रवति, क्रूरे, जने च त्रि० स्त्रियां ङीष् ।
रक्ताङ्ग न० रक्तमङ्गं यस्य यस्माद्वा । कङ्कुमे । मङ्गल्यवृक्षे कम्पिल्ले (डहरकरमचा) च पु० । प्रवाले पु० न० । जीवन्त्याम्, मञ्जिष्ठायां तु स्त्री० ङीष् । [रोगभेदे ।
रक्ताति(ती)सार पु० रक्तमिश्रितोऽति(ती)सारः । वैद्यकप्रसिद्धे
रक्ताधार पु० ६त० । देहावरके चर्म्मणि ।
रक्तापह न० रक्तं रुधिरमपहन्ति अप+हन ड । गन्धरसे बोले ।
रक्तापामार्ग पु० कर्म्म० । (लाल आपाङ) । वृक्षभेदे ।
रक्तास्फान पु० कर्म्म० । रक्तमहासहालतायाम् ।
रक्तालु पु० कर्म्म० । (रक्तकन्द) आलुभेदे । [मांसभेदे च ।
रक्तिका स्त्री० रक्तोव कन् अत इत्त्वम् । गुञ्जायां, राजिकायां, परिरक्तेक्षु पु० कर्म्म० (काजला) इक्षुभेदे ।
रक्तैरण्ड पु० कर्म्म० । (लालभेरण्डा) वृक्षभेदे ।
रक्तोत्पल न० कर्म्म० । कोकनदे लोहितवर्णे—पद्मे । रक्तोत्पलमिव पुष्पमस्त्रस्य अच् । शाल्मलिवृक्षे (शिमुल) पु० रक्तमुत्पलमिव । गैरिके न० । [त्रि० ।
रक्तोत्पलाभ पु० रक्तोत्पलस्य कोकनदस्येवाभा यस्य । रक्तरूपे तद्वति
रक्ष पालने भ्वा० पर० सक० सेट् । रक्षति अरक्षीत् ।
रक्षःसभ न० रक्षसां राक्षसानां सभा । राक्षससमूहे ।

रक्षक त्रि० रक्ष-ण्वुल्। रक्षाकर्त्तरि स्त्रियां टाप् अत इत्त्वम्।
रक्षणि(णी) स्त्री० रक्ष-अनि वा ङीष्। त्रायमाणालतायाम्।
रक्षस् न० रक्ष्यते हविरस्मात् रक्ष-अपादानेऽसुन्। राक्षसे।
रक्षा स्त्री० रक्ष-अ टाप्। रक्षणे। रक्षति अच् टाप्। जतुनि, भक्षणे च स्त्री०। रक्ष-अच्। रक्षके त्रि०।
रक्षापञ्च पु० रक्षार्थं पञ्चमस्य। भूर्जपत्रवृक्षे।
रक्षित त्रि० रक्ष्यतेऽत्र रक्ष-क्त। भारद्वे। उपाधिभेदे तदुपाधिविशिष्ट-जनकृते वैद्यकग्रन्थभेदे च।
रक्षिवर्ग पु० रक्षिणां वर्गः। सैन्यादिरक्षके (प्रकरिगण)।
रक्षोघ्न न० रक्षो हन्ति हन-ठक्। कार्श्मर्के, किङ्कणे च। तद्गन्धा-घ्राणसम्बन्धाद्धि रक्षसामपसरणम्। भल्लातवृक्षे श्वेतसर्षपे च पु०। ऋग्वेदादिप्रसिद्धे 'क्षणुरसि' इत्यादिके सूक्तभेदे न०। वचायां स्त्री०। राक्षसघातकद्रव्यमात्रे त्रि०।
रक्षोहन् पु० रक्षो हन्ति हन+क्विप्। युगपत्तद्गन्धाघ्राणाद्धि राक्ष-सानामपसरणम्। श्वेतसर्षपे च। राक्षसघ्नारि त्रि० 'रक्षस्त्वं बलगहन इति यजुर्व्वेदः।
रक्षु पु० रक्ष-नङ्। त्राणे।
रख सर्पणे भ्वा० परं० अक० सेट् इदित्। रङ्खति अरङ्खीत्।
रख सर्पणे भ्वा० परं० सक० सेट्। रखति अरखीत् अराखीत्।
रग शङ्कायाम् भ्वा० ए० सक० सेट् चटा० एदित्। रगति अरगीत्। रगयति।
रग गतौ भ्वा० परं० सक० सेट् इदित्। रङ्गति अरङ्गीत्।
रग स्वादे आभी च चु० उभ० सक० सेट्। रागयति अरीरगत् त।
रघ दीप्तौ चु० उभ० सक० सेट् इदित्। रङ्घयति ते अरराङ्घत्।
रघ गतौ भ्वा० आ० सक० सेट् इदित्। रङ्घते अरङ्घिष्ट।
रघु पु० लघ-उ लस्य रत्वम्। सूर्य्यवंश्ये दिलीपसूनौ नृपतिभेदे रघो-रपत्यमण् उङ्प्रत्ययस्य लुक्। रघुवंश्ये अजदशरथौ क्षत्रिये ब० व०। तान् अधिकृत्य कृतो ग्रन्थः अण् आख्यायिकायां तस्य लुक्

कालिदासप्रणीते जनविंशतिसर्गात्मके महाकाव्यभेदे पु० ।

रघुनन्दन पु० रघून् नन्दयति नन्द् णिच् ल्यु । दशरथज्येष्ठपुत्रे श्रीरामे । [दयोऽप्यत्र ।

रघुनाथ पु० रघूणां नाथः रक्षकत्वात् श्रेष्ठत्वाद्वा । श्रीरामे रघुपत्या-

रघुवंश पु० ६त० । रघुकुले । तमधिकृत्य कृतो ग्रन्थः आख्यायिकायां तस्य लुक् । कालिदासप्रणीते जनविंशतिसर्गात्मके महाकाव्यभेदे ।

रघुवंशतिलक पु० रघुवंशे तिलक इव । दशरथज्येष्ठपुत्रे श्रीरामे ।

रघुवर पु० रघुषु वरः श्रेष्ठः । श्रीरामे । [ज्येष्ठपुत्रे श्रीरामे ।

रघूद्वह पु० रघुषु उद्वहः रक्षादिभारधारकः उद्+वह-अच् । दशरथ-

रङ्क त्रि० रकि-अच् । क्षपणे, मन्दे च ।

रङ्कु पु० रकि-उ । मृगविशेषे ।

रङ्ग पु० रगि-अच् । धातुभेदे, (राङ्) रनृज भावे घञ् । रागे आधारे घञ् । रणभूमौ, नाट्यस्थाने च । करणे घञ् । स्वर्णे, टङ्कणे, (सोहागा) खादिरसारे च ।

रङ्गज न० रङ्गात् रङ्गधातोर्जायते जन-ड । सिन्दूरे ।

रङ्गजीवक पु० रङ्गेण रञ्जनेन जीवति जीव-ण्वुल् । (रङ्गरेज) शिल्पिभेदे, चित्रकरे, नाटकजीविनि च ।

रङ्गद पु० रङ्गं रञ्जनं रागं ददाति दा-क । टङ्कणे, खदिरसारे च

रङ्गदायक पु० रङ्गं ददाति दा-ण्वुल् । कङ्कुष्ठे, (काङ्नी) धान्य-भेदे । [हि नीलरागसम्भवः ।

रङ्गपत्री स्त्री० रङ्गाय पत्रमस्याः ङीप् । नीलीवृक्षे तत्पत्ररसादिना

रङ्गपुष्पी स्त्री० रङ्गाय पुष्पमस्ति अण् ङीप् । नीलीवृक्षे ।

रङ्गभूमि स्त्री० रज्यतेऽत्र रनृज-घञ् कर्म्म० । नाटकभूमौ 'रङ्गभूमिं समासाद्येति' सा० ६प० । मल्लभूमौ च ।

रङ्गमात्र स्त्री० रङ्गस्य रागस्य मातेवोत्पादिका । लाक्षायाम् कुट्टिन्याञ्च सा हि नायकयोर्नार्त्तीं दद्वारा रागं वर्द्धयति ।

रङ्गलासिनी स्त्री० रङ्गं रागं लासयत्युल्लासयति हृन्तरसेन लस णिच् णिनि । वेश्यालिकायाम् ।

रङ्गवीज न० रङ्गस्येव बीजमुत्पत्तिसाधनं यस्य । रूप्ये, रजते ।
रङ्गशाला स्त्री० रज्यतेऽत्र कर्म्म० । (नाचघर) नाट्यगृहे ।
रङ्गाजीव पु० रङ्गं रञ्जनं नाट्यस्थानं वा आजीवति आ+जीव-अण् । (रङ्गरेज) छिल्लिभेदे, चित्रकरे, नटे च । [जीर्णता ।
रङ्गारि पु० रङ्गस्यारिरिव जारकत्वात् । कारवीरे तद्रससंबन्धात्तस्य
रङ्गावतारक पु० रङ्गे नाट्यस्थानेऽवतरति वेशान्तरपरिग्रहेण अव+तृ-ण्वुल् । नटे, शैलूषे । णिनि । उक्तार्थे ।
रङ्गिणी स्त्री० रङ्गमिव शुभ्राणि मूलानि सन्त्यस्याः इनि । शतमूल्याम्, कैवर्त्तिकासस्तके च । रङ्गयुक्ते त्रि० ।
रङ्गस् न० रंघ-असुन् । वेगे । [तत्रैव न० ।
रचना स्त्री० रच-युच् । रचने, पुष्पपत्रादेर्विन्यासे । भावे ल्युट् ।
रच रचनायां अद० चु० उभ० सक० सेट् । रचयति ते अररचत् त ।
रज न० रन्ज क । स्त्रीकुसुमे । परागे, रेणौ गुणभेदे च पु० ।
रजक पु० रजति रन्ज-ण्वुल् नलोपः । वस्त्रादेः रागकारके जातिभेदे (धोपा) ।
रजत न० रन्ज-अतच् नलोपः । रूप्ये, गजदन्ते, रुधिरे, क्षारे, शैले, स्वर्णे, धवले च । शुक्लगुणवति त्रि० ।
रजताचल पु० रजतकल्पितोऽचलः । दानार्थं कल्पिते, रजतमये पर्व्वते । रजतमिव शुभ्रोऽचलः । कैलासपर्व्वते रजतगिर्य्यादयोऽप्यत्र पु० ।
रजन न० रन्ज-ल्यु । रागे । [जतुकाया च ।
रजनि(नी) स्त्री० रज्यतेऽत्र रन्ज-कनि वा ङीप् । रात्रौ, हरिद्रायां,
रजनीकर पु० रजनीं सततं करोति कृ-ट । चन्द्रे । [दुग्धे ।
रजनीगन्धा स्त्री० रजन्यां गन्धो यस्याः । स्वनामख्याते पुष्पप्रधाने
रजनीचर पु० रजन्यां चरति चर-ट । राक्षसे, चौरे, य मिकभटे च
रजनीजल न० रजन्या जलमिव । नीहारे । [करञ्जभेदे ।
रजनीपुष्प पु० रजन्या हरिद्राया इव पुष्पमस्य । (पूतिकरमचा)

रजनीमुख न० ६त०। प्रदोषे सूर्य्यास्तकालात् चतुर्घण्डात्मके, सन्ध्यात्मके वा काले।

रजनीहासा स्त्री० रजन्यां हासो विकाशो यस्याः। मेफालिकायाम्

रजस् न० रनृज-असुन् नलोपः। पुष्परेणौ, परागे, धूलौ, साङ्ख्योक्ते चेष्टादिकारके प्रकृतिगुणभेदे च। [वत्यां स्त्रियां स्त्री०।

रजस्वल त्रि० रजोऽस्यास्ति वलच्। रजोयुक्ते। महिषे पु० आर्त्त-

रज्जु स्त्री० रुज-डु नि०। बन्धनसाधने दामनि (दड़ि) वेण्यां च।

रञ्जक न० रञ्जयति रनृज-णिच्-ण्वुल्। चित्रके प्रीतिकारके त्रि० काम्पिल्लवृक्षे पु० (डहरकरमचा)।

रञ्जन न० रज्यतेऽनेन रनृज-करणे ल्युट्। रक्तचन्दने, मञ्जिष्ठायां, मोरट्यां, गुग्गुलारोचनिकायां, (कमलागुंडि) मेफालिकायां, हरिद्रायां, पर्पटाख्ये स्त्री० ङीप्। भावे ल्युट्। रागे। ल्यु। रागजनके त्रि०। सङ्गरणे न०। संज्ञायां कन्। कट्फले पु०।

रट भाषणे भ्वा० पर० सक० सेट्। रटति अरात्रीत् अरटीत् 'माघे मासि रटन्त्याप' इति क्षीरः।

रटन्ती स्त्री० रट-झष् ङीप्। 'माघे माघमासिने पक्षे रटन्त्याख्या चतुर्थी। तस्यां प्रदोषसमये पूजयेत् सुवासिनी'सित्युक्तायां माघकृष्णचतुर्थ्याम्।

रठ भाषणे भ्वा० पर० सक० सेट्। रठति अराठीत् अरठीत्।

रण गतौ भ्वा० पर० सक० सेट्। रणति अराणीत् अरणीत् घटादि०। रणयति।

रण रवे भ्वा० पर० अक० सेट्। रणति अराणीत् अरणीत्।

रण न० रण्यते शब्द्यतेऽत्र रण-घञर्थे क। युद्धे, भावे क। शब्दे, कणे, गतौ च पु०। [उद्वेगे अतिशये च।

रणरणक पु० रणः शब्दस्तत्प्रकारः द्वित्वम् ततः संज्ञायां कन्।

रणसङ्कुल न० रणमेव सङ्कुलम्। तुमुलयुद्धे।

रण्ड पु० रण-ड तस्य नेत्वम्। भृत्ते, विफले अङ्गाकृविधिष्टतया

हितावयवे त्रि० मूषिकपर्ण्यां विधवायाञ्च स्त्री०। स्वार्थे कन्। अफलवृक्षादौ।

रण्डाश्रमिन् पु० रण्डः विफलः प्रजाहीनत्वात् आश्रमः अस्त्रस्य इनि। 'चत्वारिंशद्वत्सराणां यावत्नाञ्च परे यदि। स्त्रिया विप्रयुक्ते कश्चित् स तु रण्डाश्रमी मतः' इत्युक्तवयसि स्त्रीवियुक्ते पुरुषे। [कर्त्तरि क्त। अनुरक्ते त्रि०।

रत न० रम-भावे क्त। रमणे स्त्रीपुंसयोः सङ्गमे, मैथुने, युद्धे च।

रति स्त्री० रम-क्तिन्। रागे, युद्धे, रमणे तदधिष्ठात्र्यां कामदेवपत्न्यां च [साध्ये मैथुने।

रतिक्रिया स्त्री० रतये रतिरूपो वा क्रिया व्यापारः। स्त्रीपुंसयोः सङ्गम-

रतिपति पु० ६त०। कन्दर्पे रतिकान्तादयोऽप्यत्र।

रतिप्रिय पु० ६त०। कामदेवे। ६ब०। रमणप्रिये त्रि०।

रतिमन्दिर न० ६त०। रतिगृहे स्त्रीणामसाधारणचिह्ने च।

रतिरमण पु० रतिं रमयति रम-णिच्-ल्यु। कामदेवे।

रतिलक्ष न० रतेर्लक्षं पदम्। मैथुने। [(पिड़िङ्ग) ग्राके।

रतिसत्वरा स्त्री० रतिं सत्वरयति सत्वरा+करोत्यर्थे णिच्-अण्।

रत्न न० रमतेऽत्र रम-न तान्तादेशः। माणिक्यादिप्रस्तरे, स्वस्वजातिषु श्रेष्ठे, माणिक्ये, हीरके च।

रत्नकन्दल पु० रत्नेषु कन्दल इव रक्तत्वात्। प्रवाले।

रत्नकूट पु० रत्नमयकूटः शृङ्गमस्य। पर्व्वतभेदे।

रत्नगर्भ पु० रत्नयुक्तं गर्भं मध्यं यस्य। समुद्रे, कुबेरे च। पृथिव्यां रत्नोत्पत्तायां नार्य्याञ्च स्त्री०। [ध्येये रत्नमयेऽन्तरीपे।

रत्नद्वीप पु० न०। रत्नमयो द्वीपः। तन्त्रोक्ते सुधासमुद्रमध्यस्थिततया

रत्नधेनु स्त्री० रत्नकल्पिता धेनुः। दानार्थं कल्पितायां रत्ननिर्मितायां धेन्वाम्। [धारे 'रत्नपारायणं नाम्ना सङ्के'ति भट्टिः।

रत्नपारायण न० रत्नानां पारायणं साकल्येन ज्ञानम्। सर्वरत्ना-

रत्नमुख्य न० रत्नेषु मुख्यम्। हीरके। [युक्ते त्रि०।

रत्नवती स्त्री० रत्नानि सन्त्यस्याः मतप् मस्य वः। पृथिव्यां, रत्न-

रत्नसानु पु० रत्नानि सानावस्य । सुमेरुपर्व्वते ।
रत्नसू स्त्री० रत्नानि सूते सू-क्विप् । पृथिव्याम् ।
रत्नाकर पु० इत० । समुद्रे रत्नोत्पत्तिस्थाने, मणिखनौ च । [पर्व्वते ।
रत्नाचल पु० रत्ननिर्म्मितः अचलः । दानार्थं कल्पिते रत्ननिर्म्मिते
रत्नाभरण न० रत्नघटितमाभरणम् शाक० । (जड़ाऊ) भूषणभेदे ।
रत्नावली स्त्री० इत० । रत्नसमूहे, तद्घटितहारे, वत्सराजपत्नीभेदे
च रत्नावलीमधिकृत्य कृतः ग्रन्थोऽस्य आख्यायिकायां तस्य लुक् ।
श्रीहर्षकृते चतुरङ्कात्मके नाटिकाभेदे ।
रत्नि पु० स्त्री० रत्न-कत्निच् । बद्धमुष्टिहस्तपरिमाणे । स्त्रीत्वे वा ङीप् ।
रथ पु० रथ्यतेऽनेन रथ्य वा रम-क्थन् । स्वनामख्याते यानभेदे, देहे
च 'आत्मानं रथिनं विद्धि शरीरं रथमेव चेति गीता । पादे,
वेतसवृक्षे, तिनिशवृक्षे च ।
रथकट्या स्त्री० रथानां समूहः रथ+कट्यच् । रथसमूहे ।
रथक(का)र पु० रथं करोति कृ+अच्-अण् वा । रथनिर्म्माणकारके
(सूत्रधार) वर्णसङ्करभेदे ।
रथकुटुम्बिन् पु० रथस्य कुटुम्बीव पालकत्वात् । सारथौ ।
रथगर्भक पु० रथस्य गर्भमिव इवार्थे कन् । कर्णीरथे, स्वल्पवाहयाने
(पालकी) । [नेमि । रथस्य भग्नवारणार्थे गुप्तस्थाने ।
रथगुप्ति स्त्री० रथस्य गुप्तिः भग्नवारणार्थं रक्षा उपचारात् तत्स्था-
रथचरण पु० रथस्य चरण इव गतिहेतुत्वात् । रथचक्रे, तन्नामनामके
चक्रवाकविहगे रथपादादयोऽपत्ये ।
रथद्रु पु० रथनिर्म्माणाय द्रुः रथनामको वा द्रुः । तिनिशवृक्षे ।
रथन्तर त्रि० रथेन तरति तॄ-खच् मुम् च । रथनेतरि । 'अभित्वा
शूर इत्यस्यामृचि गीते सामभेदे न० ।
रथयात्रा स्त्री० रथस्य यात्रा । आषाढशुक्लद्वितीयायां कर्त्तव्ये उत्सव-
भेदे । [शब्दः वाचकत्वेनास्त्यस्य अच् । चक्रवाके पु० ।
रथाङ्ग न० अङ्ग्यते गम्यतेऽनेन अङ्ग-करणे घञ् इत० । चक्रे रथाङ्ग-

रथाङ्गपाणि पु० रथाङ्गं चक्रं पाणौ यस्य । चक्रधरे विष्णौ ।
रथाश्व पु० रथे युक्ताश्वियतेऽसौ आ+दृ मूल० क । वेतसवृक्षे ।
रथाभ्रपुष्प पु० अभ्रमिव पुष्पमस्य रथनामकोऽभ्रपुष्पः कर्म० । वेतस-
वृक्षे । [युद्धकारके च ।
रथारोहिन् पु० रथमारोहति आ+रुह णिनि । रथिनि रथेन
रथिक पु० रथो युद्धसाधनाधारत्वेनास्त्यस्य ठन् । रथिनि । इर
रथिरः । इन । रथिवः । इनि । रथी एतेऽस्यत्व ।
रथोपस्थ न० रथस्य उपस्थ इव । रथमध्ये ।
रथ्य पु० रथं वहति यत् । रथवाहके घोटके । रथस्येदं यत् ।
रथसम्बन्धिनि त्रि० रथ्य तद्गमनस्य योग्या सरणिः । प्रशस्तपथे,
अभ्यन्तरमार्गे, रथानां समूहः यत् । रथसमूहे च स्त्री० ।
रद उत्खाते भ्वा० प, सक० सेट् । रदति अरादीत् अरदीत् ।
रद पु० रदति उत्खनति रद अच् । दन्ते । भावे अच् । उत्खनने ।
रदच्छद पु० रदान् छादयति छद णिच् व हुलः । ओष्ठयोः रदना-
दिच्छादयोऽस्यत्व ।
रदन पु० रद-ल्यु । दन्ते, भावे-ल्युट् । विदारणे ।
रध चिन्तने पाके च दि० पर० सक० वेट् । रध्यति अरन्धत् रधिता-रद्धा
रन्ज रागे, (वर्णान्तराधाने) सक० आसक्तौ अक० भ्वा० उभ० अनिट् ।
रजति ते अरङ्क्षीत् अरङ्क्त । घटा० रञ्जयति क्षणमारक्षे तु
रजयति ।
रनज रागे आसक्तौ दिवा० उभ० सक० अनिट् । रज्यति रज्यते
अराङ्क्षीत् अरङ्क्त । घटा० रञ्जयति । रजयति । [च ।
रन्तिदेव पु० रन्तिः संज्ञायां तिक् कर्म्म० । चन्द्रवंश्ये नृपभेदे ककुरे
रन्धन न० रध पाके ल्युट् नुमागमः । 'पाके सुरङ्गर ! रन्धनसमये'
इत्युद्भटः । [भक्षनतोऽष्टमस्थाने च ।
रन्ध्र न० रध-क्विप् ध-मूख क कर्म० । छिद्रे, दूषणे, ज्योतिषोक्ते
रन्ध्रकारट पु० रन्ध्रे रन्धे कारटः काटकोऽस्य । जातपर्य्युरकनद्धे ।
रन्ध्रवंश पु० रन्ध्रवद्धलो वंशः शाक० । (तलतावाद्य) वंशभेदे ।

रप व्यक्तवाचे भ्वा० प० सक० सेट्। रपति अरापीत् अरपीत्।

रफ गतौ हिंसे च भ्वा० प० सक० सेट्। रफति। अरफीत्-अरा-फीत्। इदित्त्वयम्। रम्फति अरम्फीत्।

रब गतौ सक० प० शब्दे अक० आ० भ्वा० सेट् इदित्। रम्बति-ते अरम्बीत् अरम्बिष्ट।

रभ औत्सुक्ये भ्वा० आ० अक० अनिट्। रभते अरब्ध।

रभ शब्दे भ्वा० आ० अक० सेट् इदित्। रम्भते अरम्भिष्ट।

रभस न पु० रभ-असच्। वेगे, हर्षे, औत्सुक्ये, पौर्वापर्याविचारे च।

रम क्रीड़ायां भ्वा० आ० ध्वला० अक० अनिट्। रमते विरमति उपरमति अरंस्त उपारंसीत् क्त्वा वेट्। स्व रामः।

रम न० रम-अच्। काम्ये, अयोकृष्णे, कामदेवे च।

रमठ न० रम-अठन्। हिङ्गुनि। स्वार्थेऽण्। अत्रैव न०।

रमठध्वनि पु० रमठ इति शब्देन ध्वन्यते ध्वन-इन्। हिङ्गुनि।

रमण पु० रमयति-रम-णिच् ल्यु। कामदेवे, गर्हभे, इन्द्राणे, महादिरे (निम) पत्यौ। 'रमण! त्वामनुयामीति कुमारः। जम्बुद्वीपान्तर्गते रम्यकवर्षान्विते वर्षे च। रम-भावे ल्युट्। सुरते। करणे ल्युट्। पटोलमूले, कन्। जघने च न०। रम्यतेऽनया ल्युट् ङीप्। नार्याम्, उत्तमनार्यां, बालाख्यवृक्षे च स्त्री०।

रमणीय त्रि० रम्यतेऽत्र रम-आधारे-ल्युट्। सुन्दरे।

रमल न० ज्योतिःशास्त्रभेदे।

रमा स्त्री० रमयति रम-अच। लक्ष्म्याम्।

रमापति पु० ६त०। नारायणे रमानाथतत्कान्तादयोऽप्यत्र।

रमाप्रिय न० ६त०। पद्मे। विष्णौ पु०।

रम्भ पु० रभि-अच्। रेणौ, महिषासुरजनकेऽसुरभेदे च। कदल्याम्, अप्सरोभेदे, वेश्यायां, गवां ध्वनौ, गौर्याञ्च स्त्री०।

रम्भातृतीया स्त्री० मार्गशीर्षे शुक्लतृतीयायाम्, उपचारात्, तत्र कर्त्तव्ये व्रतभेदे च।

रम्य त्रि० रम्यतेऽत्र यत्। सुन्दरे, मनोहरे च। चम्पके, वकवृक्षे च,

पु० । पटोलमूले न० । संज्ञायां कन् । जम्बुद्वीपस्य नवसु वर्षेषु मध्ये 'दक्षिणेन सुमेरोस्तु श्वेतस्य चोत्तरेण च वाचव्यं रम्यकं नामेत्युक्ते वर्षभेदे ।

रम्यपुष्प पु० रम्याणि पुष्पाण्यस्य । शालमलिवृक्षे ।

रम्या स्त्री० रम्यतेऽत्र यत् । स्थलपद्मिन्याम्, रात्रौ च ।

रय गतौ भ्वा० आ० सक० सेट् । रयते अरयिष्ट ।

रय पु० रय-अच् । वेगे, प्रयाणे च ।

रल्लक पु० रम-क्विप् मलोपे लुक् ला-क कर्म्म० । मृगभेदे ।

रव गतौ भ्वा० आ० सक० सेट् इदित् । रवते अरविष्ट ।

रव पु० रु-ध्वनौ अप् । शब्दे । [तीक्ष्णे च त्रि० ।

रवण पु० रु-युच् । कोकिले, भृङ्गे च । कांस्ये न० । शब्दकारके,

रवि पु० रु-इन् । सूर्य्ये, अर्कवृक्षे च ।

रविज पु० रवेर्जायते जन-ड । शनौ, सावर्णिमनौ, वैवस्वते मनौ, सुग्रीवे, वानरे, यमे च यमुनायां स्त्री० रवितनयादयोऽप्यत्र ।

रविनाथ न० रविर्नाथः प्रकाशकत्वात् यस्य । पद्मे, बन्धूके च ।

रविनेत्र पु० रविर्नेत्रं यस्य । विष्णौ । रविलोचनादयोऽप्यत्र

रविप्रिय न० ६त० । रक्तकमले । करवीरे पु० ।

रविरत्न न० रवेः प्रियं रत्नम् । माणिक्ये, ताम्रे च ।

रविलोह न० रवेः प्रियं लौहं धातुः । ताम्रे ।

रश स्वने सौ० पर० अक० सेट् । रशति । अराशीत्-अरशीत् ।

रशना स्त्री० रश-ल्यु । काञ्च्याम्, जिह्वायाञ्च । [च पद्मे न० ।

रश्मि पु० अश-मि धातोरुट् रश-मि वा । किरणे, अश्वादि दामनि

रस स्वने भ्वा० प० सक० सेट् । रसति । अरासीत्-अरसीत् ।

रस आस्वादे अ० चु० उ० सक० सेट् । रसयति-ते अररसत्-त ।

रस पु० रस्यते रस-अच् । आस्वाद्ये, रसनेन्द्रियग्राह्ये माधुर्य्यादि गुणभेदे, देहस्थे भुक्ताद्यादेः प्रथमपरिणामे, 'सम्यक् पक्वस्य भुक्तस्य सारोनिर्गदितोरस इत्युक्ते' धातुभेदे माधुर्य्यादिरसवति, गुडादौ, पुष्पस्य मधुनि, अलङ्कारोक्ते सञ्चारिव्यभिचारिसहकारिव्यङ्ग्ये

रत्यादिस्थायिभावके शृङ्गारादौ दृष्टे, वीर्ये, माधुर्यादिगुणे, रागे, द्रवे, पारदे, जले च गन्धरसे पु० न० ।

रसकर्पूर न० रसेन कर्पूरमिव । (रसकर्पूर) गन्धद्रव्यभेदे ।

रसकेशर न० रसेन केशरमिव नागकेशरसुगन्धित्वात् । कर्पूरे ।

रसगन्ध पु०न० रसे गन्धोऽस्य । बोले गन्धरसे स्वार्थे कन् तत्रैव ।

रसगर्भ न० रसो गर्भे यस्य । पित्तलधातुद्राजे रसाञ्जने, हिङ्गुले च ।

रसघ्न पु० रसं पारदं हन्ति हन-टक् । टङ्कणे (सोहागा)

रसज न० रसात् भुक्ताद्रसारात् प्रथमधातोर्जायते जन-ड । रुधिरे । रसात् दुग्धप्रभूतेः द्रवात् जायते जन-ड । गुड़े, मद्यकीटे च पु० । रसभवादयोऽप्यत्र । [साधने जिह्वास्थानस्थेन्द्रिये ।

रसज्ञा स्त्री० रसं जानाति अनया ज्ञा-ड । जिह्वायाम् रसज्ञान-

रसज्येष्ठ पु० रसेषु ज्येष्ठः श्रेष्ठः । मधुररसे शृङ्गाररसे च ।

रसतेजस् न० रसस्य भुक्ताद्रसारस्य तेजः सारः । रुधिरे ।

रसदालिका स्त्री० रसार्थं दल्यते दल-कर्म्मणि घञ् गौ० ङीष् कन् । पुण्ड्रेक्षौ (पुंड ऊख) ।

रसधातु पु० रसाख्यो द्रवरूपो वा धातुः । पारदे ।

रसधेनु स्त्री० दानार्थं कल्पितायाम् दुग्धरसनिर्म्मितायां धेनौ ।

रसन न० रस-ल्युट् । स्वादे ध्वनौ च करणे ल्युट् जिह्वायां पित्तेन दूने रसने सितापीतेति नैषधम् ।

रसना स्त्री० रस्यतेऽनया । रस-करणे ल्युट् अजा० टाप् । जिह्वायां, राज्ञायां, काञ्च्यां, रज्जौ च ।

रसनेत्रिका स्त्री० रसो नेत्रमिव अस्त्यस्या ठन् । मनःशिलायाम् ।

रसपाकज पु० रसपाकेन जायते जन-ड । गुड़े ।

रसफल पु० रसो जलं फले यस्याः । नारिकेलवृक्षे ।

रसमाणिक्य न० रसेन पारदेन माणिक्यमिव तत् पाकजत्वात् । खनामख्याते पदार्थे । [पारदे रसनाथादयोऽप्यत्र ।

रसराज पु० रसेषु रसोवाराजेव श्रेष्ठत्वात् रसः द्रव द्रव राजते वा

रसवती स्त्री० रस आस्वाद्यद्रव्यमस्यादि अस्त्यस्याम् मतुप् मस्य वः। पाकस्थाने। [णिच-ल्यु। टङ्कणे (सोहागा)।

रसशोधन न० रसं पारदं दूषीभूतं द्रव्यं खर्पराद्दि वा शोधयति शुध-

रसस्थान न० रसस्य पारदस्य स्थानम्। क्षिङ्गले।

रसा स्त्री० पाकजः रसो माधुर्य्यादिरूपोऽस्त्यस्याः अच्। पृथिव्याम्।

रसाग्रज न० रसस्य पित्तलधातुद्रवस्याग्रात् जायते जन-ड। रसाञ्जने

रसाञ्जन न० रसजातं पित्तलधातुजमञ्जनम्। खनामख्याते 'रीत्यान्तु ध्रूयमानायां तत्किट्टन्तु रसाञ्जनमि'त्युक्ते पदार्थे।

रसाढ्य पु० रसेन मधुररसेनाढ्यः। आम्रातके। रसवति त्रि०।

रसातल न० रसायास्तलम्। पातालभेदे सप्तमे भूमेरधोभागे।

रसाधिक पु० रसाय द्रवाय स्वर्णादिद्रावणाय अधिकः आदीयमानत्वात्। टङ्कणे। रसेनाधिका। काकोडुम्बरिकायां स्त्री०।

रसान्तर न० अन्योरसः मधुर० त्रि०। प्रकृतरसादन्यस्मिन् रसे।

रसाभास पु० रस इव आभासते आ+भास-अच्। अलङ्कारोक्ते 'अनौचित्यप्रवृत्तत्वे आभासौ रसभावयोरित्युक्ते पद्मादिपरनायके गन्धद्रव्यभेदे। [पु०।

रसाम्ल न० रसेनाम्लम्। इक्षाम्ले, रुक्षे च (चुकपालङ्ग) अम्लवेतसे

रसायन न० रसस्यायनमिव। तक्रे कथ्याम्, विषभेदे वैद्यक प्रसिद्धे औषधभेदे च गरुडे, विष्णौ च पु०।

रसायनफला स्त्री० रसायनमौषधविशेष इव फलं व्याधि घातकं यस्याः। हरितक्याम्।

रसायनश्रेष्ठ पु० रसायनेषु औषधभेदेषु श्रेष्ठः। पारदे।

रसायनी स्त्री० रसायनं रसस्थानमस्त्यस्या अच् गौ० ङीष्। गुडूच्याम्, काकमाच्यां, मञ्जिष्ठायाञ्च। गोरक्षदुग्धायाञ्च।

रसाल न० रसमालाति आ+ला-क। सिक्थके, गन्धरसे, शिखरिण्याम्, (पेयभेदे) रसनायां, दूर्व्वायां, विदार्य्यां, द्राक्षायाञ्च स्त्री०। रसां भूमिमालयति आ+ली-ड। आम्रे, रसालः साल: समदश्शालसने'ति नैषधम् इक्षौ, पनसे, गोधूमे, पुण्ड्रेक्षौ च पु०।

रसालिका स्त्री० रसां भूमिं लेढि स्पृशति लिह्-क। (चाकुलिया) क्षुपभेदे। [इक्षुभेदे।

रसाला स्त्री० रसमालाति आ+ला क गौरा० ङीष्। (पुंडिआख)

रसाश्वसा स्त्री० रसां भूमिमाश्वसिति दलैः आ-श्वस-क्विप् अच्। पलाशीलतायाम्।

रसास्वादिन् पु० रसं पुष्परसमास्वदते आ+स्वद्-णिनि। भ्रमरे, मधुरशृङ्गारादिरसास्वादके त्रि० स्त्रियां ङीप्।

रसिक पु० रसं वेत्ति अनुभवति ठन्। सारसपक्षिणि, अश्वे, गजे च। रसक्ते, रसोऽस्त्यस्य ठन्। रसवति च त्रि०।

रसित न० चु० रस आस्वादे क्त। मेघादिगर्जे विहगादिशब्दे कर्त्तरि क्त। शब्दयति, कर्मणि-क्त। आस्वादिते च त्रि०।

रसुन पु० रस-उनन्। लसुने। ओनन् रसोनः। तत्रैव। स्वार्थे कन्। तत्रार्थे।

रसेन्द्र पु० रसः द्रवीभूतः इन्द्र इव श्रेष्ठत्वात्। पारदे।

रसोत्तम पु० रस उत्तमो यस्य। सूते।

रसोद्भव न० रसः पारदम् उद्भवत्यस्मात् उद्+भू-अच्। हिङ्गुले।

रसोपल न० रसः पारदमिव उपलीयते उप+ली-ड शुभ्रत्वात् मौक्तिके

रस्य न० रसाद्भुक्तान्नपरिणामादागतः यत्। रुधिरे। रज्यते आस्वाद्यते रस यत्। आस्वाद्ये त्रि०। रस्याः, 'स्निग्धाः स्थिरा हृद्या' इति गीता। पाठायां, राज्ञायाञ्च स्त्री०।

रंह गतौ अ० चु० उभ० सक० सेट्। रंहयति-ते अररंहत्-त।

रंहस् न० रंह-असुन्। वेगे।

रह गतौ भ्वा० प० सक० सेट् इदित्। रंहति अरंहीत् तदनन्तर प्रतिपत्तौ रंहति संपरिष्वक्त इति शारीरकसूत्रम्।

रह त्यागे भ्वा० प० सक० सेट्। रहति अरहीत्।

रह त्यागे अद० चु० उभ० सक० सेट्। रहयति ते अररहत्-त।

रहस् न० रह-असुन्। निर्जने, गोप्ये, याथार्थ्ये, रमण्ये च।

* निर्जने अव्य०।

रहस्य त्रि० रहसि भवः यत्। गोप्ये, रहस्यमस्याः स महदिति नैषधम्। निर्ज्जनभवे च। पाठायां, राज्ञायाञ्च स्त्री० टाप्।

रहित त्रि० रह-त्यागे कर्म्मणि क्त। वर्ज्जिते।

रा दाने ग्रहणे च अदा० पर० सक० अनिट्। राति अरासीत्।

रा स्त्री० रा-सम्प० क्विप्। काञ्चने, रभसे, दाने च।

राका स्त्री० रा-क। प्रतिपद्युक्तायां पूर्णमास्यां सम्पूर्णेन्दु तिथौ, नदीभेदे नवजातरजस्कायां नार्य्याञ्च।

राक्षस पु० रक्ष एव स्वार्थे अण् 'क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते' इति भाष्योक्तेः पुंस्त्वम्। खनामख्याते निकषात्मजे जातिभेदे। जातौ ङीप्। राक्षसजातिस्त्रियाम् स्त्री०। रक्षस इदम् अण्। राक्षसमन्त्रिणि त्रि० स्त्रियां ङीप्। 'राक्षसी रात्रिरन्यत्रे'ति स्मृतिः। दंष्ट्रायां, चण्डिकायां चौरनामगन्धद्रव्ये च स्त्री० ङीप्।

राक्षसेन्द्र पु० राक्षस इन्द्र इव श्रेष्ठत्वात्। विश्रवसः ज्येष्ठपुत्रे निकषात्मजे रावणे। [लाक्षायाम्।

राक्षा स्त्री० लक्ष्यतेऽनया रक्ष-कर्म्मणि घञ् पृ० ह्रस्वः। लस्य रश्च।

राख शोधने भूषणे निवारणे च सक० सामर्थ्ये अक० भा० पर० सेट्। राखति अराखीत्। चङि न ह्रस्वः।

राग पु० रञ्ज-भावे घञ् नि० नलोपकुत्वे। रञ्जने, वर्णने, प्रीतौ, अनुरागे, नृपे, चन्द्रे च। करणे घञ्। करणे घञ्। लोहितवर्णे तद्विशिष्टलाक्षादौ च 'तेन रक्तं रागादि'ति पाणिनिसूत्रम् आधारे घञ्। वसन्तादिनामभिः प्रसिद्धे स्वरविशेषे।

रागचूर्ण पु० रागस्य रतेश्चूर्ण इव। कामे। रागाय चूर्ण्यतेऽसौ चूर्ण-घञ्। खदिरे, लाक्षायां च। रागयुक्तचूर्णे पु०।

रागदालि पु० दल्यतेऽसौ दल-णिच् इन् पृ० ह्रस्वः रागेण रक्ततया युक्तो दालिः। मञ्जरे। [ङीप्।

रागपुष्प पु० रागयुक्तं रक्तवर्णं पुष्पमस्य। बन्धूके। जवायां स्त्री०

रागप्रसव पु० रागयुक्तो रक्तवर्णः प्रसवोऽस्य। बन्धूके, रक्तलाक्षाते

रागयुज् पु० रागेण रक्तवर्णेन युज्यते युज-कर्म्मणि क्विप्। माणिक्ये। रक्तवर्णयुक्ते त्रि०।

रागसूत्र न० रागयुक्तं सूत्रम्। पट्टसूत्रे।

रागाङ्गी स्त्री० रागयुक्तमङ्गं यस्याः ङीप्। मञ्जिष्ठायाम्। श्रुत०। रागाद्यायत्त स्त्री०।

रागिणी स्त्री० रागोऽस्त्यस्या इनि। गीत्यङ्गे स्वरभेदे। रागवति, अनुरक्ते, कामुके, रतियुक्ते च त्रि०।

राघ शब्दौ भ्वा० आ० सक० सेट्। राघते अराघिष्ट। चङि न ह्रस्वः

राघव पु० रघोर्गोत्रापत्यम् अण्। रघोर्वंश्ये, तत्प्रधाने श्रीरामे च।

राङ्कव न० रङ्कोरयं, विकारो वा तल्लोमजातत्वात् अण्। मृगविशेषलोमजाते वस्त्रभेदे।

राज दीप्तौ भ्वा० उभ० अक० सेट् फणादिः। राजति ते अराजीत् अराजिष्ट रेजतुः—रराजतुः। चङि न ह्रस्वः।

राजक न० राज्ञां समूहः कन्। नृपसमुदाये। राजैव कन्। नृपे पु०। राज—ण्वुल्। दीप्तिमति त्रि०।

राजकल्प पु० ईषदसमाप्तो राजा राजन्+कल्पप्। राजतुल्ये।

राजकदम्ब पु० कदम्बानां राजा राजद० षत्व०। कदम्बभेदे।

राजककेटी स्त्री० राजते राज—अच् कर्म्म० चीनार्कक्ष्याम्।

राजकशेरु पु० कशेरूणाम् राजा राजद०। भद्रमुस्तायाम्।

राजकीय त्रि० राज्ञ इदम् छ कुक् च। राजसम्बन्धिकार्य्यादौ।

राजकुमार पु० राज्ञः कुमारः। अप्राप्तवयस्के युवराजकार्य्यानारूढे राजपुत्रे।

राजकुष्माण्ड पु० राज्ञः कुष्माण्ड इव प्रियत्वात्। वार्त्ताक्याम्।

राजकोषातकी स्त्री० राजप्रिया कोषातकी। (घियाभिङ्गा) लताभेदे। [राजसर्षपे (राइसर्षा)।

राजक्षवक पु० क्षवत्यनेन क्षु-अप् राजते राज—अच् कर्म्म० कन्।

राजखर्জ্জूरी स्त्री० राजप्रिया खर्জ্জूरी। खर्জ্জूरीभेदे।

राजगिरि पु० राजाश्रमं गिरिः। मगधस्थे पर्व्वतभेदे।

राजघ्न त्रि० राजानं हन्ति हन्—क नि०। राजहन्तरि, तीक्ष्णे च 'रराज नीरजनया स राजघ्नं दूत नैषधम्।

राजजम्बू स्त्री० राज्ञः जम्बूरिव। पिण्डखर्জ্জूरे राजते अच् कर्म०। महाजम्बाम्।

राजज(य)क्ष्मन् पु० राज्ञः चन्द्रस्य क्षयकारको ज(य)क्ष्मा। रोगभेदे 'राजज(य)क्ष्मेव रोगाणामि'ति माघः।

राजतरु पु० तरूणां राजा राजद० नि०। कर्णिकारवृक्षे।

राजताल पु० राज्ञस्ताल इव प्रियः 'गुवाकवृक्षे। स्त्रीत्वमपि ङीप्। 'राजतालीवनध्वं नरि'ति रघुः। [तालवृक्षे।

राजदन्त पु० दन्तानां राजा परः नि०। ऊर्द्ध्वपङ्क्तिस्थे मध्यवर्त्ति-

राजदेशीय पु० ईषदसाधौ राजा राजन्+देशीयर्। राजतुल्ये राजकल्पे। [राजशूरकोऽप्यत्र पु०।

राजधुस्तूरक पु० धुस्तूराणां राजा राज० परः कन्। वृहद्धुस्तूरे

राजधर्म्म पु० राज्ञो धर्म्मः। राज्ञामवश्यकर्त्तव्ये प्रजापालनादौ कर्म्मणि [यासे महानगर्याम्।

राजधानी स्त्री० राजा धीयतेऽस्यां धा—आधारे ल्युट् ङीप्। राजा-

राजधान्य न० धान्येषु राजा परः। (श्यामा) श्यामाकधान्ये।

राजन् पु० राज—कनिन्। नृपे, चन्द्रे, शुचौ, क्षत्रिये, यक्षे, इन्द्रे, च। पूर्वपदस्थः उत्तरपदस्थश्च समभिव्याहृतपदार्थस्यैव वाचकः। यथा राजमाषः मुनिराज इत्यादि।

राजनीति स्त्री० राज्ञां नीतिः। राजज्ञेये सामादावुपाये, तत्प्रतिपादके शास्त्रे च। [अग्नौ, क्षीरिकावृक्षे च।

राजन्य पु० राज्ञोऽयम् यत्, राज—अन्य वा। क्षत्रिये राजन्ये,

राजन्यक न० राजन्यानां क्षत्रियाणां समूहः कन्। क्षत्रियसमूहे।

राजवत् त्रि० प्रशस्तो राजाऽस्यास्ति प्राशस्त्ये मतुप् मस्य वः। सुन्दर-राजवति देशे। [ङीप्।

राजपटोल पु० राजप्रियः पटोलः। पटोले। मधुरपटोल्यां स्त्री०।

राजपट्ट पु० राज्ञः पट्ट इव। मणिभेदे।

राजपथ पु० पथां राजा राजगमनयोग्यो वा पन्थाः अच्। 'धनूंषि दश विस्तारे श्रीमान् राजपथः स्मृतः। व्यवाजिरथनागानामसंबाध-सुखसञ्चरः' इत्युक्ते राजमार्गे। [पलाण्डौ।

राजपलाण्डु पु० पलाण्डूनां राजा श्रेष्ठत्वात् पर०। रक्तवर्ष-

राजपीलु पु० राज प्रियः पीलुः। महापीलुवृक्षे।

राजपुत्र पु० राज्ञश्चन्द्रस्य क्षत्रस्य वा पुत्रः। बुधभेदे, क्षत्रकुमारे वर्णसङ्करभेदे (रजपुत) वैश्यात्कन्यकायां राजपुत्रस्य जन्म' इति पराशरः।

राजपुत्री स्त्री० राजपुत्रस्य पत्नीव। कटुतुम्बुरम् रेणुकायां क्षुपरीतौ, मालत्यां च। हृत०। क्षत्रकन्यायाम्।

राजपुष्प पु० राजा चन्द्र इव शुभ्रत्वात् पुष्पमस्य। नागकेशरवृक्षे। करञ्जवृक्षे। स्त्री० ङीष्।

राजफणिज्झक पु० राज—अच् कर्म०। नागरङ्गवृक्षे।

राजफल न० राजप्रियं फलम्। पटोले। राजप्रियं फलमस्याः। जम्ब्वाम् स्त्री० टाप्। [राजद० प०। उत्तमकोलौ पु०।

राजबदर न० राज्ञो बदरमिव प्रियत्वात्। रक्तामलके बदराणां राजा

राजभद्रक पु० राज्ञो भद्रं यस्मात् कप्। कुष्ठे, (कढ) निम्बे, भारिभद्रवृक्षे च। [राजत्वे।

राजभूय न० राज्ञो भावः राजन्+भू—क्यप्। राज्ञोऽसाधारण धर्मे

राजभोग्य न० राज्ञा भोक्तुं योग्यम् भुज—यत् कुत्वम्। जातीकोषे, प्रियालवृक्षे पु०। क्षत्रभोग्यवस्तुमात्रे त्रि०।

राजमार्ग राजयोग्यः मार्गः। राजपथे। [भेदे।

राजमाष पु० माषेषु कलायेषु राजा श्रेष्ठत्वात्। (बरबटी) व्रीहि-

राजमृग पु० मृगेषु राजा प० नि०। (मृगानि) मृगभेदे।

राजरङ्ग न० राजयोग्यं रङ्गम्। रजते।

राजराज पु० राज्ञां नृपे राजा प्रभूतधनत्वात् टच् समा०। कुबेरे, सार्वभौमक्षत्रिये, चन्द्रे च। [यतात्मनि क्षत्रिये च।

राजर्षि पु० राजा ऋषिरिव श्रेष्ठत्वात् संयतत्वाच्च। राजश्रेष्ठे,

राजवंश्य त्रि० राजवंशे भवः यत् । राजवंशोद्भवे । जातिभेदे पु० ।
राजवर्त्मन् न० राजयोग्यं वर्त्म । प्रायुक्तलक्षणे राजपथे । ६त० राज्ञः कर्त्तव्ये कर्म्मणि च । [लताभेदे ।
राजवला स्त्री० राज–अच् राजं बलं यस्याः ५ब० । (गन्धभादाल)
राजवल्लभ पु० ६त० । प्रियाले, राजबदरे, राजाम्रे, द्रव्यगुणप्रतिपादके तन्त्रान्तरविहितकृते ग्रन्थभेदे च । राज्ञः प्रिये त्रि० ।
राजवल्ली स्त्री० राजते राज–अच् राजा चासौ वल्ली कर्म्म० वृ० । (उच्चा) लताभेदे । [वति देशे ।
राजवत् त्रि० राजा राजमात्रं विद्यतेऽस्य मतुप् मस्य वः । राजमात्र
राजवीजिन् त्रि० राजा बीजी कारणं यस्य । राजवंशकृते ।
राजवृक्ष पु० वृक्षाणां राजा पर० नि० । आरग्वधे (सोन्दाल) राजप्रियो वृक्षस्तत्फलबीजजातलड्डुकाया राजप्रियत्वात् । प्रियाले ।
राजशृङ्ग पु० राज–अच् राजः शृङ्गः कर्म्म० । पट्टे (पाट) ।
राजशाक पु० शाकानां राजा पर० नि० । वास्तूकशाके ।
राजशृङ्ग न० राज्ञां शृङ्गमिव ऊर्द्धस्थितत्वात् । राजचिह्नछत्रे ।
राजस त्रि० रजसा निर्म्मितः अण् । रजोगुणात् जाते कर्म्मेन्द्रियादौ 'येनाक्षिप्तं कर्म्मणा लोके ख्यातिमाप्नोति पुष्कलाम् । न च शोचत्यसम्पत्तौ तद्विद्मेयन्तु राजस'मित्युक्ते ख्याप्ये क्रियमाणे कर्म्मणि च । रजःप्रधानमस्य अण् । रजःप्रधाने, सर्व्वेषां वस्तूनां त्रिगुणात्मकत्वेऽपि 'भूयस्त्वात्तद् व्यपदेशः, इत्युक्तेः क्वचित् तत्प्रधानत्वेन व्यपदेशः ।
राजसभा न० स्त्री० राज्ञां नृपाणां सभा । नृपसमाजे ।
राजसर्षप पु० सर्षपाणां राजा श्रेष्ठत्वात् पर० । (राइसर्षा) सर्षपभेदे
राजसूय पु० राज्ञा क्रियते कृ-क्यप् । राजमात्रकर्त्तव्ये यज्ञभेदे ।
राजस्व न० राज्ञे देयं स्वं कररूपम् धनम् । राजदेये करे ६त० । राजधने ।
राजस्वर्ण पु० स्वर्णानां धुस्तूराणां राजा पर० । धुस्तूरे ।
राजहंस पु० हंसानां राजा श्रेष्ठत्वात् पर० । रक्तवर्णचञ्चुचरण-

वृक्षे श्वेतवर्षे हंसभेदे, कलहंसे च। राजा हंस इव सार-असत्त्वात् रूपभेदे।

राजहर्षणा न० राज्ञः रूपात् हर्षयति हृष-णिच्-ल्यु। तगरपुष्पे।

राजातन पु० राजार्हमातनोति फलबीजम् आ+तन-अच्। चीर-झीतिख्यातबीजहेतुफलवति पियाले।

राजादन न० राज्ञा अद्यते तत्फलबीजजातखड्डुका अद-कर्मणि ल्युट्। प्रियालवृक्षे यस्य फलबीजं (चिरञ्जि) तेन हि खड्डुकां कृत्वा राज्ञा भुज्यते। क्षीरिकायां (क्षीरई) किंशुके च। क्षीरिणां स्त्री० ङीप्।

राजाम्र पु० आम्राणां राजा श्रेष्ठत्वात् षर० नि०। आम्रभेदे।

राजाम्ल पु० अम्लानां राजा श्रेष्ठत्वात् षर० नि०। अम्लवेतसे।

राजार्क पु० अर्काणां राजा श्रेष्ठत्वात् षर० नि०। श्वेतार्कवृक्षे।

राजार्ह त्रि० (बादा आकन्द)। जम्बां स्त्री०।

राजार्ह न० राजानमर्हति अर्ह-अण्। अयुद्धचुम्बने राजयोग्ये

राजालाबू स्त्री० राजते राजा अलाबूः कर्म०। मिष्टालाबाम्।

राजावर्त्त पु० राजानमावर्त्तयति अनुकूलयति आ-वृत-णिच् अच्। उपरत्नभेदे।

राजि(जी) स्त्री० राज-इन् वा ङीप्। श्रेण्याम्, षड्क्तौ, रेखा-याञ्च। स्वार्थे कन्। रेखायाम्। राजते राज-क्युन्। राजवर्षपे स्त्री०।

राजिकाफल पु० राजिकाया इव फलमस्य। श्वेतवर्षपे।

राजि(जी)फला स्त्री० राजिभूतानि श्रेणिभूतानि फलानि यस्याः। चीनाकर्कट्याम्।

राजिल पु० राज-इलच्। कुण्डुभसर्पे (डोड़ासाप)।

राजीव न० राजी दलराजी अस्त्यस्य व। पद्मे 'राजीवराजीवमणो-लेति माघः। हरिणभेदे, मत्स्यभेदे, राजीवविकसितश्रीयेति मनुः। गजे, सारसपक्षिणि च पु०।

राजेन्द्र पु० राज्ञा इन्द्रइव श्रेष्ठत्वात् । चतुर्योजनपर्य्यन्तमधिकारी नृपो भवेत् । यो राजा तच्छतगुणः स एव मण्डलेश्वरः । तच्छतगुणो राजा राजेन्द्र इत्युक्ताधिकारवति भूपतिभेदे ।

राज्ञी स्त्री० राज्ञः पत्नी ङीप् स्वयं वा राजते राज–क्विन् ङीप् वा । (राणी) राजपत्न्याम् स्वयं राजकर्मकर्त्र्याञ्च ।

राज्य न० राज्ञो भावः कर्म वा राजन्+यत् । राजकर्म्मणि, राजभावे च । [नादौ ।

राज्यधुरा स्त्री० ६त० अच् समा० । राज्यभारे तत्कर्त्तव्ये प्रजापालन-

राज्याङ्ग न० ६त० । स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलप्रकृतिरूपेषु अष्टसु राज्यस्योपायेषु ।

राटि पु० रट–इञ् । (घरात्त) विक्षेपे, युद्धे स्त्री० वा ङीप् । पृ० टस्य डत्वम् । राड़िरप्युक्तार्थे ।

राढ़ पु० रह-घञ् पृ० ढत्वम् । देशभेदे (राड़) स्वार्थे कन् तत्रैव

राढ़ा स्त्री० रह-घञ् ढत्वम् । पुरीभेदे गौड़ं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढ़ा पुरीति प्रबोधचन्द्रोदयः ।

राढ़ीय त्रि० राढ़ो निवासोऽस्य वृद्धाच्छ इति छ । राढ़देशोद्भवे ।

रात्रि(त्री) स्त्री० रा-त्रिप् वा ङीप् । रजन्यां स्वस्वदेशस्य सूर्य्य-मण्डलस्य अदर्शनयोग्ये काले, हरिद्रायाञ्च ।

रात्रिकर पु० रात्रिं करोति कृ-अच्, रात्रौ करः किरणोऽस्य वा । चन्द्रे, कर्पूरे च ।

रात्रि(त्री)चर पु० रात्रौ चरति चर-अच् वा सुम् । राक्षसे, तज्जा-तिस्त्रियां स्त्री० ङीप् ।

रात्रिपुष्प न० रात्रौ पुष्पाति पुष्प-अच् ७त० । उत्पले ।

रात्रिमणि पु० रात्रौ मणिरिव दीप्तिमत्त्वात् । चन्द्रे ।

रात्रिवासस् न० रात्रेर्वास इवाच्छादकम् । अन्धकारे । रात्रौ परि-धेयं वासः घञ् । रात्रौ परिधेये वस्त्रे ।

रात्रिविगम पु० ६त० । रजन्यवसाने तदुपलक्षिते प्रभातकाले च ।

रात्रिहास पु० रात्रेर्हास इव शुभ्रत्वात् । श्वेतोत्पले ।

रात्रान्ध त्रि० रात्रावन्धः दृष्टिक्षययुक्तः। निशादृष्टिमूल्ये कामादौ। रात्रौ रोगकृतदृष्टिमूल्ये (रातकाणा) च।

राद्ध त्रि० राध-कर्त्तरि क्त। कर्मणि वा क्त। सिद्धे, पक्के च।

राद्धान्त पु० राद्धः सिद्धः अन्तो निर्णयो यस्मात् ५ब०। सिद्धान्ते संशय्य वादिदूषितपक्षनिराकरणपूर्व्वकं यथार्थपक्षप्रतिपादके शास्त्रे।

राध सिद्धौ अक० निष्पादने, पाके च सक० स्वादि० दिवा० च पर० अनिट्। राध्नोति राध्यति अराद्ध।

राध पु० राधा विशाखा तद्युक्ता पौर्णमासी अण् ङीप् राधी सा यत्र मासे पुनरण। चान्द्रे वैशाखेमासि। तत्पर्णिमायां स्त्री० ङीप्। [पञ्जने स्त्री० टाप्।

राधन न० राध-ल्युट्। साधने, प्राप्तौ, तोषे च। राध-णिच्-युच्।

राधा स्त्री० राध-अच्। विशाखानक्षत्रे रिरंसया रमणीकृत्येनाविर्भूते गोलोकस्थे परमेश्वरार्द्धाङ्गस्वरूपे शक्तिभेदे, तत्रैव श्रीदामशापात् वृन्दावने जातायां वृषभानुसुतायां प्रधानगोपिकायाम्, कर्णस्य पालयित्र्यां मातरि च।

राधाकान्त पु० राधायाः कान्तः। श्रीकृष्णे राधावल्लभादयोऽप्यत्र।

राधातनय पु० राधायास्तनयः। कर्णे स हि कन्यावस्थायां सूर्य्यात् कानीनगर्भजातस्तया च त्यक्तः राधया सूतपत्न्या पालित इति भारतम्। [ढक्। कर्णे।

राधेय पु० राधाया अपत्यम् पुत्रत्वेन परिग्रहणेन तत्पालिततत्वात्

राम पु० रम-कर्त्तरि घञ् ण वा। परशुरामे दशरथस्यैतपुत्रे श्रीरामे, बलरामे च। मनोहरे, शुभे च त्रि० यावूके, कुष्ठे (कुड़) तमालपत्रे न०। [ख्याते लक्ष्मणभेदे च।

रामकर्पूरक पु० रामं मनोहरं कर्पूरमिव कन्। मौक्तिके, खनाम-

रामगिरि पु० रामाश्रितः गिरिः। चित्रकूटपर्व्वते स हि रामेण वनवासगमनकाले प्रथममाश्रितः।

रामचन्द्र पु० रामश्चन्द्र इवाह्लादकत्वात्। दशरथस्यैतपुत्रे श्रीरामे।

रामच्छद्मनक पु० रामममिरामं छद्मयति कृद्-णिच्-ल्युल्। मदन-वृक्षे (मयनागाछ)।

रामजननी स्त्री० ६त०। वसुदेवपत्न्यां रोहिण्यां, जमदग्निपत्न्यां रेणुकायां, दशरथपत्न्यां कौशल्यायाञ्च। [च (नेट)।

रामण न० रमयति रम-णिच् ल्यु-पृ० इट्। निरिनिम्बे, तिन्दुके

रामणीयक न० रमणीयस्य भावः रमणीयमेव वा रमणीय+वुञ्। रमणीयत्वे 'मणिहारावलिरामणीयकमिति नैषधम् रमणीये च।

रामतरुणी स्त्री० रामा अभिरामा तरुणीव। (सेओती)पुष्पे ६त०। सीतायां, रेवत्याञ्च। [लङ्कायां सीताया आजहार।

रामदूत पु० रामस्य दूतः वार्त्ताहरः। हनूमति, स हि रामवार्त्तां

रामदूती स्त्री० रामा अभिरामा दूतीव गन्धद्वारा प्रचारात्। तुलसी-भेदे। (रामतुलसी)।

रामनवमी स्त्री० रामस्य जन्माधारो नवमी। चैत्रशुक्लनवम्याम्। चैत्रेमासि नवम्यान्तु जातो रामः स्वयं हरि'रित्यमरसंहिता।

रामपूग पु० रामः अभिरामः पूगः। गुवाकभेदे।

रामभद्र पु० राम एव भद्रः मङ्गलदायकत्वात्। श्रीरामे 'रामेति रामचन्द्रेति रामभद्रेति वा स्मरन्निति' पुराणम्।

रामलक्षण न० कर्म्म०। शाश्वरिलक्षणे।

रामवल्लभ न० रामस्य वल्लभं प्रियम्। भूर्जपत्रे तद्धि रामेण वन-वासाश्रमे प्रियतया धृतम्। [मनोहरः।

रामशर पु० कर्म०। शरतृणभेदे स हि कागडद्वारा वाणरूपेतृत्वात्

रामसख पु० ६त० टच्। सुग्रीवे वानरराजे।

रामा स्त्री० रम-णिच् कर्त्तरि घञ्। गौतादिकलाभिज्ञायां नार्य्यां नारीमात्रे, नद्याम् छिकुनि, छिकुले, श्वेतकण्टकार्य्यां, सुरूप-कन्यायां, अशोके, गोरोचनायां, बलायां, गौरिके च।

रामायण न० रामस्यायनं चरितमधिकृत्य कृतोग्रन्थोऽण्। रामचरित-प्रतिपादके वाल्मीकिकृते महाकाव्यभेदे। [रक्षाबन्धने।

रामालिङ्गनकाम पु० रामाणाम् स्त्रीणामालिङ्गनस्य कामोऽत्र।

राम्भ पु० रम्भोवेषुक्तस्य विकारोऽण् । व्रतभेदे-धार्य्यै-यंशभवे दक्षभेदे
राल पु० रा-अलच् । सालवृक्षनिर्य्यासे (धुना) ।
रालकाय्य पु० रालः कार्य्यो यस्य । सालवृक्षे ।
राव पु० रु-घञ् । शब्दे । [वा, लङ्काधिपतौ राक्षसे]
रावण पु० रावणस्यापत्यम् शिवा० अण् रावयति शत्रून् णिच्-ल्यु
रास शब्दे भ्वा० आ० सक० सेट् । रासते अरासिष्ट चङि न ह्रस्वः
रावणगङ्गा स्त्री० रावणनिर्म्मिता गङ्गा नदी । सिंहलदेशस्थे नदी-भेदे ।
रावणारि पु० ६त० । श्रीरामे रावणान्तकादयोऽप्यत्र ।
रावणि पृ० रावणस्यापत्यम् अत इञ् । मेघनादाख्ये रावणज्येष्ठपुत्रे ।
राश शब्दे भ्वा० आ० अक० सेट् । राशते अराशिष्ट चङि न ह्रस्वः ।
राशि पु० अश्नुते व्याप्नोति अश्-इन् धातोरुडागमश्च । धान्यादीनां पुञ्जे, ज्योतिश्चक्रस्य द्वादशांशे मेषादौ, द्रव्ये राशिप्रसिद्धये' इति लीलावतीप्रसिद्धे व्यक्ताव्यक्तगणभेदे ।
राशिचक्र न० राशिघटितं चक्रं षष्ठ्यम् । मेषादिद्वादशराशि युक्ते गोलाकारे वायुपथेन पर्य्यन्तः पश्चात् क्रमिणं वंशस्थमाधे ज्योतिर्मये 'षड्विंशतिभिर्ज्योतिश्चक्रं स्त्रिभिनवायुग'मित्युक्ते ज्योतिश्चक्रे
राशिभोग पु० राशीनां स्वस्वगत्या यद्भोगैः भज-घञ् कुत्वम् । रव्यादीनां स्वस्वगत्यनुसारेण राशिषु गतिभेदे ।
राशीकृत पु० अराशिः राशिः कृतः राशि+अभूतद्भावे च्वि, तदर्थे समासो वा (ढेरी) पुञ्जीकृते एकत्रस्थीकृते ।
राष्ट्र न० राज-ष्ट्रन् । जनपदे 'गौडं राष्ट्रमनुत्तममिति' प्रबोधचन्द्रोदयः । उपद्रवे च । [याम् ।
राष्ट्रिका स्त्री० राज-ष्ट्रन् पित्त्वात् ङीष् स्वार्थे कन् । कण्टकारिका-
राष्ट्रिय पु० राष्ट्रे भवः घ । नाट्योक्तौ राजश्याले । छ तत्रार्थे । उभावपि राष्ट्रभवे त्रि० ।
रास पु० रस-घञ् रास-घञ् वा । शब्दे, ध्वनौ, धवले शृङ्खलाबन्धवृद्धयोर्मध्यस्थित्या क्रीड़ाभेदे, कोलाकृले च ।

रासभ पु० रास-अभच्। गर्दभे।

रासभवन्दिनी स्त्री० रासभस्य वन्दिनीव। मल्लिकायाम्।

रासमण्डल न० रासार्थं हस्तबन्धवत् द्वयोर्द्वयोर्मध्यस्थित्वा क्रीड़ाभेदेन मण्डलं मण्डलाकारेण भ्रमणं यत्र। रासक्रीड़ाधारस्थाने, श्रीकृष्णस्य तदुत्सवाङ्गे मण्डपभेदे च।

रासेश्वरी स्त्री० ६त०। राधिकायाम्।

रास्ना स्त्री० रस-नण्। स्वनामख्यातायां लतायाम् (काटा आमरल)

राहु पु० रह-उण्। त्यागे, त्यक्तरि, ज्योतिश्चक्रस्थे सूर्य्यकिरणसंपर्काभावेन जायमानपृथिवीच्छायाधिष्ठातरि ग्रहभेदे सिंहिकासुते दानवे च।

राहुच्छत्र न० राहोर्ग्रहस्य छत्रमिव। आर्द्रके।

राहुदर्शन न० राहोर्दर्शनं यत्र। चन्द्रसूर्य्ययोरुपरागरूपे ग्रहणे 'स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने' इति स्मृतिः तेन उपरक्ते एव चन्द्रे सूर्ये च तस्य ग्रहणता नान्यदा।

राहुमूर्द्धभिद् पु० राहोः सिंहिकासुतस्य मूर्द्धानं भिनत्ति भिद क्विप्। विष्णौ अमृतपानकाले देवपङ्क्तौ देवरूपेण स्थित्वाऽमृतं पिबन्तं दृष्ट्वा विष्णुस्तस्य शिरश्चिच्छेदेति पुरा०।

राहुरत्न न० राहोः प्रियं रत्नम्। गोमेदमणौ।

राहुस्पर्श पु० राहोः स्पर्शः स्वाधिष्ठितभूच्छायाद्वारा यत्र। चन्द्रसूर्य्ययोः उपरागरूपे ग्रहणे।

राहूच्छिष्ट पु० ६त०। लशुने।

राहूत्सृष्ट पु० ६त०। लशुने।

रि गतौ तु० पर० सक० अनिट्। रियति अरैषीत्। [वि०]

रिक्त वि० न० रिच-क्त। शून्ये, वने, निरर्थके च। स्वार्थे कन्। तत्रैव

रिक्ता स्त्री० रिच-क्त। उभयपक्षयोश्चतुर्थीनवमीचतुर्दशीतिथिषु।

रिक्तभाण्ड न० रिक्तं भाण्डम्। तैलादिशून्ये भाण्डे।

रिक्तहस्त वि० रिक्तो धनादिशून्योहस्तो यस्य। निर्द्धने, भूरिदानादिना व्ययितधने च।

रिक्थ न० रिच भक्। धने। मिताक्षरादृष्टे अप्रतिबन्धे दाये च 'स्वामी रिक्थक्रयसंविभागेत्यादि' स्मृतिः।

रिक्थग्राहिन् त्रि० रिक्थं दायं हरति गृह्णाति। दायग्राहिणि पुत्रादौ। अण्। रिक्थग्राह्योऽत्र।

रिक्थिन् त्रि० रिक्थं ग्राह्यत्वेनास्त्यस्य इनि। दायहारिणि दायादे 'उभयोरप्यसौ रिक्थी'ति स्मृतिः।

रिख गतौ भ्वा० पर० अक० सेट् इदित्। रिङ्खति अरिङ्खीत्। अनिदित्त्वात्प्रत्यये केरेखति अरेखीत्।

रिग गतौ भ्वा० पर० सक० सेट् इदित्। रिङ्गति अरिङ्गीत्।

रिङ्गण न० रिगि-ल्युट्। स्खलने। रिखि ल्युट्। रिङ्खणमप्यत्र।

रिच सम्पर्के वियोगे च वा चु० उभ० पक्षे भ्वा० पर० सक० सेट्। रेचयति ते रेचति। अरीरिचत् त अरेचीत्।

रिच विरेके (अतिशय पृथग्भावे) रुधा० उभ० सक० अनिट्। रिणक्ति रिङ्क्ते अरिचत् अरैक्षीत् अरिक्त।

रिज भर्जने भ्वा० आ० सक० सेट्। रेजते अरेजिष्ट।

रिपु पु० रप-उ-पृ०। शत्रौ, चारनामगन्धद्रव्ये, जन्मराशितोऽष्टमे राशौ तत्स्थे च ग्रहे। [ज्ञातके त्रि०।

रिपुघातिनी स्त्री० रिपुं हन्ति हन णिनि। (कटुकी) तिक्तभेदे शत्रु-

रिपुञ्जय त्रि० रिपुञ्जयति जि-खच्। शत्रुजयिनि, नृपभेदे पु०।

रिम्फ बधे तु० प० सक० सेट्। रिम्फति अरिम्फीत्।

रिप्फ पु० रिफ स्वार्थे कन्। लग्नाद्द्वादशे स्थाने।

रिफ कत्थने भौ० पर० सक० सेट्। रेफति अरेफीत्।

रिफ हिंसायां निन्दायां बोधने च सक० श्लाघायाम् अक० तु० पर० सेट्। रिफति अरेफीत्।

रिब गत्यां भ्वा० पर० सक० सेट् इदित्। रिम्बति अरिम्बीत्।

रिभ रवे भ्वा० पर० सक० सेट्। रेभति अरेभीत्।

रिरंसा पु० रम-सन्-अ। रमणेच्छायाम्।

रिष गतौ भ्वा० पर० सक० सेट् इदित्। रिष्वति अरिषीत्।

रिश हिंसायां तु० पर० सक० अनिट् । रिशति अरिक्षत् ।

रिश्य पु० रिश्यते रिश-क्यप् । मृगभेदे ।

रिष बधे भ्वा० पर० सक० सेट् । रेषति अरेषीत् ।

रिष्ट न० रिश-क्त । मङ्गले, अशुभे च । भावे क्त । नाशे, पापे च । अशुभादिमति त्रि० । खड्गे, रक्तगिरौ च पु० । स्वार्थे कन् । तेषु

रिष्टि स्त्री० रिष-रिश-वा क्तिन् । अशुभे, यज्ञभेदे च । क्तिच् रन्ध्रे पु० ।

रिह बधे भ्वा० पर० सक० सेट् । रेहति अरेहीत् ।

री क्षरणे दि० आ० अक० अनिट् । रीयते अरेष्ट निष्ठातस्य न रीयः

री गतौ बधे च सक० रवे अक० क्र्या० पा० अनिट् । रिणाति अरैषीत्

रीठा स्त्री० री-ठक टस्य नेत्त्वम् । रीठाकरञ्जे ।

रीठाकरञ्ज पु० कर्म० । खनामख्याते वृक्षे ।

रीढा स्त्री० रिह-क्त ढत्वभावः । अवज्ञायाम् ।

रीण त्रि० री-क्त । क्षरिते स्रुते ।

रीति स्त्री० री-क्तिन् । पित्तले, प्रस्रावे, क्षरणे, लौहकिट्टे, सीमायां, गतौ, स्वभावे, अलङ्कारोक्ते गौडादिरचनाभेदे च ।

रीतिक न० रीतिरिव कायति कै-क । पुष्पाञ्जने स्त्रीत्वमपि स्वार्थे कन् । पित्तले न० ।

रीतिपुष्प न० रीतेः पुष्पमिव । कुसुमाञ्जने ।

रीव गत्यर्हणे, संवरणे च भ्वा० उ० सक० सेट् । रीवति ते अरीवीत् अरीविष्ट । चङि न ह्रस्वः ।

रु ध्वनौ अदा० प० अक० वेट् । रौति रवीति अरावीत् अरौषीत् ।

रु बधे गतौ च भ्वा० आ० सक० अनिट् । रवते अरोष्ट ।

रुक्प्रतिक्रिया स्त्री० रुजः प्रतिक्रिया प्रतिकारः प्रति+क्र-भावे घ । चिकित्सायाम् ।

रुक्म न० रुच्-मन् नि० कुत्वम् । काञ्चने, धत्तूरे, लौहे, नागकेशरे च

रुक्मकारक पु० रुक्मं तन्निर्मितं भूषणं करोति कृ० ण्वुल् । स्वर्णकारे जातिभेदे ।

रुक्मिन् पु० रुक्मं विद्यतेऽस्य इनि । राजभेदे । स्वर्णस्वामिनि त्रि० । रुक्मिराजकन्यायां श्रीकृष्णपत्न्यां स्त्री० ङीप् ।

रुक्ष त्रि० रुक्ष-क्स पु० वा दीर्घः । अचिक्कणे, निस्नेहे, कठोरे च

रुग्ण त्रि० रुज-क्त । रोगान्विते, भुग्ने च । [चत् अरोचिष्ट ।

रुच प्रीतौ प्रकाशे च भ्वा० आ० अक० सेट् । रोचते लुङि उ० अरु-

रुचक न० रुच कन् । सर्जिकाक्षारे, माङ्गल्ये द्रव्ये, उत्कटे, अम्बुधरे, माल्ये, सौवर्चले आस्वाद्यरसे, रोचनायाम्, विड्रङ्गे, लवणे च । वीजपूरे, दन्ते, निष्के, कपोते च पु० । [च ।

रुचा(चा) स्त्री० रुच सम्प० किप् वा टाप् । दीप्तौ, शोभायां, प्रकाशे

रुचि(ची) स्त्री० रुच-कि वा ङीप् । अनुरागे, आसङ्गे, मृच्छायाम्, अभिलाषे, किरणे, शोभायां, द्युच्छायां, गोरोचनायां च । प्रजापतिभेदे पु० ।

रुचिर त्रि० रुचिं राति ददाति रा-क । मनोहरे, सुन्दरे, मधुरे च । मूलके, कुङ्कुमे लवङ्गे च न० । गोरोचनायाम् स्त्री० ।

रुचिराञ्जन पु० अञ्जयतेऽनेन अन्ज करणे ल्युट् रुचिरशोभायुक्तोऽञ्जनः । शोभाञ्जने ।

रुच्य त्रि० रुचये हितः यत् । सुन्दरे, रुचिकरे च । सौवर्चले न० । पत्यौ, कतकवृक्षे, शालिधान्ये च पु० ।

रुच्यकन्द पु० रुच्यः रुचिकरः कन्दो मूलमस्य मूरणे (ओल) ।

रुज भङ्गने तु० प० सक० अनिट् । रुजति अरौक्षीत् निष्ठातस्य नः । रुग्णः ।

रुज हिंसायां चु० उभ० सक० सेट् । रोजयति ते अरूरुजत् ।

रुज(जा) स्त्री० रुज-सम्प० किप् वा टाप् रुज अङ् वा । रोगे, भङ्गे, मेघ्यां, कुष्ठे च (कुड़) । [रोगकारके त्रि० ।

रुजाकर न० रुजां रोगं करोति ल-अच् । कर्मरङ्गफले (कामरङ्गा)

रुट चौर्य्ये भ्वा० पर० सक० सेट् इदित् । रुण्टति अरुण्टीत् ।

रुट रोधे सक० दीप्तौ अक० चु० उ० सेट् । रोटयति ते अरूरुटत् त ।

रुट दीप्तौ प्रतिघाते च भ्वा० आ० अक० सेट्। रोटते लुङि अभ० अरुटत् अरोटिष्ट।

रुठ उपघाते भ्वा० पर० सक० सेट्। रोठति अरोठीत्। [ठिट।

रुठ प्रतीघाते भ्वा० आ० सक० सेट्। रोठते लुङि उ० अरुठत्। अरो-

रुठ गतौ चौर्य्ये सक० मन्दीभावे खञ्जीभावे च अक० भ्वा० पर० सेट् रुठित। रुण्ठति अरुण्ठीत्।

रुण्ड पु० रुटि अच् पृ० ठ्य डः। मूर्द्धशून्ये देहे कबन्धे।

रुत न० रु क्त। रवे पशुपक्षिशब्दानां शब्दे।

रुद रोदने अदा० पर० रुदा० अक० सेट्। रोदिति अरुदत अरोदीत्

रुदित न० रुद भावे क्त। क्रन्दने। कर्त्तरि क्त। क्षतरोदने त्रि०।

रुद्ध त्रि० रुध क्त। आवरणादनावेष्टते क्षतगतिरोधे च।

रुद्र पु० रुदित रुद रक। शिवमूर्त्तिभेदे 'सोऽरोदीत यदरोदीत् तत् रुद्रस्य रुद्रत्वमिति श्रुतिः। अजैकपादहिर्बुध्नो विरूपाक्षः सुरेश्वरः। जयन्तोपेन्द्ररूपश्च त्र्यम्बकोऽपराजितः। वैवस्वतश्च सावित्रो हरोबहुरिति स्मृता इत्युक्तेषु एकादशसु शिवमूर्त्तिभेदेषु।

रुद्रज पु० रुद्रात् जायते जन ड। शिववीर्य्यजाते पारदे।

रुद्रजटा स्त्री० रुद्रस्य जटेव पिङ्गत्वात् जटिलत्वात्। खनामख्याते लताभेदे।

रुद्रपत्नी स्त्री० ६त०। दुर्गायाम् अतलायाञ्च (मंसना)।

रुद्रप्रिया स्त्री० ६त०। रिलक्यास् दुर्गायाञ्च।

रुद्रविंशति स्त्री० रुद्रसंख्यिका विंशतिः। प्रभवादिषु षष्टिसंवत्सरेषु ज्योतिषोक्तेषु शतिसंवत्सरेषु।

रुद्रमार्गिणी पु० चतु[illegible] मध्ये, द्वादश मनौ।

रुद्राक्रीड न० रुद्रस्य क्रीड़ा यत्र। श्मशाने।

रुद्राक्ष पु० रुद्रस्याक्षीव यत्र। खनामख्याते वृक्षे।

रुद्राणी स्त्री० रुद्रस्य पत्नी रुद्र+ङीप् आनुक् च। शिवपत्न्याम्।

रुद्रारि पु० रुद्रः अरिर्यस्य। कामदेवे।

रुद्रावास पु० ६त०। कैलासे। काश्याम्, श्मशाने च

रुध कामे दि० आ० सक० अनिट् प्राग्वेणानुपूर्व्वः । अनुरुध्यते अन्वरुद्ध
रुध आवरणे रु० उभ० सक० अनिट् । रुणद्धि रुन्धे अरुधत् अरौत्सीत्
रुधिर न० रुध-किरच् । 'शरीरस्थे रसपाकजन्ये धातुभेदे । मङ्गल-
यहे' रक्तवर्णे च पु० तद्वर्णवति त्रि० ।
रुप आक्षेपीकरणे दि० पर० सक० सेट् । रुप्यति-अरुपत् । अरोपीत्
रुमा स्त्री० रु मक् । सुग्रीवभ्रातरभार्य्यायाम् लवणस्थाने देशभेदे च ।
रुरु पु० रु-कु । मृगभेदे । [रुरूकोऽप्यत्र ।
रुरु पु० रु क । एरण्डवृक्षे । कनू । तत्र, रक्तैरण्डे च पु० । रु-वुक् ।
रुश हिंसायां तु० पर० सक० अनिट् । रुशति अरुक्षत् ।
रुष रोषे भ्वा० पर० सक० सेट् । रोषति अरोषीत् ।
रुष क्रोधे दि० पर० अक० सेट् । रुष्यति अरुषत् अरोषीत् ।
रुष क्रोधे चु० उभ० अक० सेट् । रोषयति ते अरूरुषत् त ।
रुष्(षा) स्त्री० रुष संप० क्विप् वा टाप् । क्रोधे ।
रुषित त्रि० रुष-क्त वा इट् । क्रोधयुक्ते दुष्टभावयुक्ते रुष्टोऽप्यत्र ।
रुह जन्मनि भ्वा० पर० अक० अनिट् । रोहति अरुक्षत् । उवला० ।
रुह त्रि० रुह-क । जाते । दूर्व्वायां स्त्री० उत्तरपदस्थः तत्प्रादुर्भूते
त्रि० यथा भूरुहः वारिरुहम् ।
रुक्ष पारुष्ये कठोरतायाम् निःस्नेहे च । चु० आ० अक० सेट् ।
रुक्षयति ते अरूरुक्षत् त । [वृक्षे स्त्री० ।
रुक्ष त्रि० रुक्ष-अच् । अचिक्कणे, स्नेहशून्ये च । वृक्षे पु० । दन्ती-
रुक्षान्ध्र पु० रुक्षो गन्धो यस्य । गुग्गुलौ ।
रुक्षदर्भ पु० कर्म० । हरिदर्भे कुशभेदे ।
रुक्षपत्त्र पु० रुक्षं पत्त्रमस्य । शाखोटवृक्षे ।
रुक्षप्रिय पु० रुक्षं प्रियं यस्य । धवभौषधे ।
रुढ त्रि० रुह-क्त । जाते, प्रसिद्धे च 'रूढिरस्त्रियाम् अच् । प्रकृति
प्रत्ययार्थमनपेक्ष्य समुदायशक्त्यार्थबोधके शब्दे यथा घटः गौरि-
त्यादि । शब्देन समुदायशक्त्यार्थस्यबोधने च ।
रुति स्त्री० रुह-क्तिन् । जन्मनि, प्रसिद्धौ, प्रकृतिप्रत्ययार्थमनपेक्ष्य

रूप रूपान्वितकरणे अक० चुरा० उभ० सक० सेट्। रूपयति ते अरूरूपत् त।

रूप न० रूप—क भावे अच् वा। स्वभावे, सौन्दर्ये, पद्मे, नाम्नि, शब्दे, पद्याद्यक्षरे, दृश्यकाव्ये नाटकादौ, स्त्रीके, शब्दधातूनां विभक्तियोगेन निष्पन्नशब्दे, शुक्लादिवर्णे च सहति त्रि०। उत्तरपदस्थः सदृशार्थे त्रि० यथा पिङ्गरूपजलयः आङ्गरूपा कन्या। एकसंख्यान्विते न० 'रूपं भजेत् स्यात् परिपूर्त्तिकाले' इति बीजावती। एकाव्यक्तं शोधयेदन्यपक्षात् रूपाण्यन्यक्षेतरक्षात् पक्षादिति बीजगणितोक्ते अव्यक्तराशिसङ्ख्यरितव्यक्तसंख्यान्विते च।

रूपक न० रूपयत्यत्र रूप—अच् कन्। अभिनयप्रदर्शके दृश्यकाव्यप्रभेदे, रूपमस्त्यस्य वुच्। मूर्त्ते त्रि० रूप+स्वार्थे कन्। शुक्लादिवर्णे, आकारे च रूपकं रूपितारोपादित्यलङ्कारोक्ते अर्थालङ्कारभेदे, शुक्लत्वपरिमाणे, रजते च।

रूपधारिन् त्रि० रूपं धारयति धारि—णिनि। रूपवति, सौन्दर्यान्विते, वेशान्तरव्याप्तिथि नटे च।

रूपवत् त्रि० रूप+मतुप् मस्य वः। शुभ्रादिरूपविशिष्टे, सौन्दर्ययुक्ते, आकारविशिष्टे च। [याम्।

रूपाजीवा स्त्री० रूपं सौन्दर्यमाजीवति आ+जीव— अच्। वेश्या-

रूपिका स्त्री० रूपमस्त्यस्य ठन्। श्वेतार्कवृक्षे।

रूप्य न० रूपाय आहन्यते स्वार्थादि यत्। अलङ्कारादिनिर्म्माणाय आहन्यमाने स्वर्णे रजते च स्वार्थे यत्। रजतमात्रे। सुन्दरे त्रि०।

रूप्याध्यक्ष पु० रूप्येषु अध्यक्षः। कोषाध्यक्षे।

रूष धूल्यादिना मिश्रीकरणे अद० चु० उभ० अक० सेट्। रूषयति ते अरूरूषत् त।

रूषक पु० रूष—क्वुन्। वाधके दृष्टे।

रूषित त्रि० रूष—क्त। धूल्यादिभिर्मिश्रिते, अविक्रयीकृते च।

रे अव्य० र—के डित्। नीचादेः सम्बोधने।

रेक शङ्कायां भ्वा० आ० स० सेट्। रेचते अरेचिष्ट। चक्रि न तुरुः।

रेक पु० रिच-घञ् । विरेचने । रेक-अच् । शङ्खावर्ते, नीचे, भेके च । रेक-अ । तन्नेत्रे स्त्री० टाप् ।

रेखा स्त्री० लिख-अच् लस्य रः । अल्पे, लघ्वे, आभोगे, विन्दुपुञ्जगते दण्डाकारेऽपि चिह्नभेदे, पङ्क्तौ च ।

रेचक न० रेचयति रिच-णिच्-ण्वुल् । कङ्कुष्ठे, यवक्षारे, जयपाले, तिलकल्के च । दुरीषनिस्सारणकारके त्रि० ।

रेचन न० रिच्-ल्युट् । मलभेदनेन तन्निःसारणे ।

रेचनक पु० रिच्यतेऽनेन ल्युट् संज्ञायां कन् । कम्पिल्लवृक्षे । कनभावे वा ङीप् । रेचनी रेचनाऽप्यत्र स्त्री० ।

रेची स्त्री० रेचयति अच् गौ० ङीष् । कम्पिल्लवृक्षे, अङ्कोठे च ।

रेज दीप्तौ भ्वा० आत्म० अक० सेट् । रेजते अरेजिष्ट । चङि न ह्रस्वः

रेट याचने वाचि च द्वि० भ्वा० उभ० सेट् । रेटति ते अरेटीत् अरेटिष्ट । चङि न ह्रस्वः ।

रेणु पु० स्त्री० रि-नु । परागे, धूलौ, पांशौ च । पर्पटे पु० ।

रेणुका स्त्री० रेणुना कायति कै-क । मरिचाख्यतौ सुगन्धिद्रव्ये, जमदग्निपत्न्यां परशुरामजनन्यां च ।

रेणुकासुत पु० ६त० । परशुरामे रेणुकात्मजादयोऽप्यत्र ।

रेणुदूषित पु० रेणुभिः दूषितः । गर्दभे । धूलिधूसरे त्रि० ।

रेणुसार पु० रेणुरिव सारोऽस्य । कर्पूरे । स्वार्थे कन् । तत्रैव ।

रेतस् न० री-असुन् तुट् च । पुंसो रक्तादिपरिपाकजन्ये देहस्थे मलक्षेत्रके चरमधातौ शुक्रे, शिवबीर्य्ये पारदे च । [न ह्रस्वः ।

रेप शब्दे अक० गतौ सक० भ्वा० आत्म० सेट् । रेपते अरेपिष्ट चङि

रेप त्रि० रेप-अच् । निन्दिते, क्रूरे, जघन्ये च ।

रेफ पु० र+इफ । रकारात्मके वर्णे । रिफ-अच् । कुत्सिते त्रि० असुन् रेफस् । क्रूरे, अधमे, दुष्टे जघन्ये च त्रि० ।

रेव(व) गतौ० सक० मुतौ अक० भ्वा० आ० सेट् । रेव(व)ते अरेविष्ट (वि)ष्ट चङि न ह्रस्वः ।

रेभ शब्दे भ्वा० आत्म० अक० सेट्। रेभते अरेभिष्ट। चङि न ह्रस्वः

रेवत पु० रेव-अतच्। जम्बीरे आरग्वधे बलरामश्वशुरे राजभेदे।

रेवती स्त्री० रेवतस्यापत्यमण् ङीष्। रेवतराजकन्यायां बलदेवपत्न्याम्। रेव-अतच् गौ० ङीष्। अश्विन्यवधितः सप्तविंशतिसंख्याते नक्षत्रे, तत्संज्ञायां, मातृकाभेदे स्त्रीगव्याम्, नदीभेदे, दुर्गायाञ्च।

रेवतीरमण पु० रेवतीं रमयति रम-णिच्-ल्यु। बलरामे। ६त०। रेवतीशाद्योऽप्यत्र।

रेवन्त पु० रेव-झच्। गुह्यकाधिपतौ सूर्य्यपुत्रभेदे।

रेवा स्त्री० रेव-अच्। नर्म्मदाख्यनद्याम्।

रेष हेषायां (घोटकशब्दे) भ्वा० आत्म० अक० सेट्। रेषते अरेषिष्ट। चङि न ह्रस्वः।

रै शब्दे भ्वा० पर० अक० अनिट्। रायति अरासीत्।

रै पु० रा-डै। धने, स्वर्णे च।

रैत्य त्रि० रीतेः पित्तलस्य विकारः रीति+ष्यञ्। पित्तलमये पात्रादौ।

रैवत पु० रेवत्या नद्या अदूरो देशः अञ्। द्वारिकासमीपस्थे पर्व्वतभेदे स्वर्णालुवृक्षे, शिवे, दैत्यभेदे च। रेवत्यां भवः अण्। चतुर्दशे मनुषु मनुभेदे।

रैवतक पु० रैवतएव कन्। रैवतपर्व्वते।

रोक न० रु-कन् तस्य नेत्वम्। छिद्रे, 'तन्त्रे रोकं च शोकञ्चेति' स्मृतिः नौकायाम् च। रुच-घञ् नि० कुत्वम्। क्षयभेदे, दीप्तौ च पु०।

रोग पु० रुज-घञ्। धातुवैषम्यजाते व्याधौ, कुष्ठौषधे च (कट)।

रोगघ्न न० रोगं हन्ति हन-क। औषधे, वैद्यकशास्त्रे च रोगनाशके त्रि०।

रोगराज पु० ६त० टच् समा०। राजयक्ष्मव्याधौ।

रोगलक्षण न० रोगो लक्ष्यते ज्ञायतेऽनेन लक्ष-ल्युट्। रोगानुमापके धातुवैषम्यहेतुके चिह्नभेदे।

रोगशिला स्त्री० रोगाय तच्चिकित्सये शिला। मनःशिलायाम्।

रोगह्न० रोगं हन्ति हन-ड। औषधे, हन-क्विप् रोगहन्।
रोगहन्तरि-वैद्यादौ त्रि०।
रोगहर त्रि० रोगं हरति हृ-अच्। व्याधिनाशके द्रव्यादौ।
रोगहारिन् पु० रोगं हरति हृ-णिनि। चिकित्सके वैद्ये।
रोगितरु पु० रोगिप्रियस्तरुः शाक०। अशोकवृक्षे।
रोगिन् त्रि० रोग+अस्त्यर्थे इनि। व्याधियुक्ते स्त्रियां ङीप्।
रोचन पु० रुच ल्यु रोचयति वा ल्यु। कूष्माण्डमलिङ्गे श्वेतशोभाञ्जने, पलाण्डौ, करञ्जे, अङ्कोटे, आरग्वधे दाड़िमे च। उत्तमयां नार्य्यां, रक्तकह्लारे गोपित्ते, गोरोचनायाञ्च स्त्री० टाप्। रुचिकारके त्रि०।
रोचनक पु० रोचनाय रुचिजननाय कायति कै-क। जम्बीरे।
रोचनफल्ल पु० रोचनं रुचिकरं फलमस्य। बीजपूरके जम्बीरभेदे, चिर्भटयां स्त्री०।
रोचना स्त्री० रोचयतीति कर्त्तरि संज्ञायां ल्युट् अजा० टाप् मनःशिलायाम्, गोरोचनायां, आमलक्याम्, श्वेतनिर्गुण्डि, गन्धद्रव्यभेदे (गुडारोचना) च।
रोचमान पु० रुच-शानच्। अश्वग्रीवास्थरोमावर्त्ते। रुचियुक्ते त्रि०।
रोचिष्णु त्रि० रुच-इष्णुच्। दीप्तिशीले।
रोचिस् न० रुच-इसुन्। प्रभायाम्।
रोचौ स्त्री० रोचयति रुच-णिच् अच् गौ० ङीष्। छिल्लीचिकायाम्
रोटिका स्त्री० रुट-ण्वुल्। गोधूमादिचूर्णनिर्मिते पिष्टकभेदे (रुटी)।
रोड अनादरे भ्वा० पर० सक० सेट्। रोडति अरोडीत् चड्डि न ह्रस्वः
रोदन न० रुद-ल्युट्। क्रन्दने, करणे ल्युट् ङीप्। दुरालभायां संज्ञायां कन्। यवासायाम्। [द्यावाभूभ्योः स्त्री० द्वि० व०।
रोदस् न० रुद-असुन्। स्वर्गे, भूमौ च गौरा० ङीष् रोदसीत्यपत्
रोध पु० रुध-घञ्। रोधने, आवरणे च। [न०।
रोधन त्रि० रुणद्धि रुध-ल्यु। रोधकर्त्तरि, भावे ल्युट्। प्रतिबन्धे
रोधस् न० रुध-असुन्। नद्यादिकूले।

रोध्र न० रुध-रन् । पापे, अपराधे लोध्रवृक्षे च ।

रोध्रपुष्प पु० रोध्रस्य लोध्रस्येव पुष्पमस्य । मधूकवृक्षे (महुल) ।

रोध्रपुष्पिणी स्त्री० रोध्रइव पुष्पमस्ति पुष्पविकारो वास्ति । धातकीवृक्षे (धाइफूल) ।

रोप पु० रुह-णिच्-घञ् पः कर्म्मणि अच् । वापने । भावे अच् । रोपणे, धान्यादेर्जननाय अङ्कुरादेरारोपणे च । छिद्रे न० ।

रोपण न० रुह-णिच्-ल्युट् पः । जनने, अङ्कुरभेदे, रुप-ल्युट् । विमोहने, अन्यथाभूतस्य वस्तुनोऽन्यथा ज्ञापने । [पणे ।

रोपित त्रि० रुह-णिच्-क्त पः । वृक्षादेर्जननाय कृताङ्कुरारो-

रोमक न० रोमेव निबिडं कायति कै-क । (रुम) नगरे, पांशुलवणे च

रोमकन्द पु० रोम्णा युक्तः कन्दो मूलमस्य । पिण्डालौ ।

रोमकपत्तन न० कर्म्म० । (रुम) नगरभेदे ।

रोमकूप पु० रोम्णां कूपइव । रोमाधारे विवरे 'न रोमकूपैघमिषा-दिति नैषधम् ।

रोमकेशर न० रोमभिः केशरः सिंहसटेव । चामरे ।

रोमगुच्छ न० रोमभिर्गुच्छं स्तवकमिव । रोमसमुदायात्मके चामरे । कन् । अत्रैवार्थे । [रोंआ ।

रोमन् न० रु-मनिन् । देहजाते अङ्कुराकारे केशतुल्ये पदार्थे

रोमन्थ पु० रोम मथ्नाति मन्थ-अण् पृ० नलोपः । भुक्तस्य घासादेः पशुभिरुद्गीर्य चर्व्वणे 'रोमन्थमभ्यस्यतीति' ।

रोमभूमि स्त्री० ६त० । चर्म्मणि ।

रोमलता स्त्री० रोमाणि लतेव । रोमराजौ ।

रोमविकार पु० ६त० । रोमोद्गमे ।

रोमश त्रि० रोमाणि सन्त्यस्य श । प्रचुररोमयुक्ते । मेषे, पिण्डालौ, शूकरे, क्षुभ्राजे पु० (पाना) ।

रोमहर्ष पु० रोम्णः हर्षइव तद्व्यञ्जकत्वात् । रोमाञ्चे, हर्षोत्तुक्या-दिभिः रोमकूपे जायमाने कण्टकाकारे पदार्थे । ल्युट् । रोम-रोमहर्षणमप्यत्र न० ।

रोमहर्षण पु० रोमाणि हर्षयति हृष-णिच्-ल्यु। विभीतकवृक्षे, सूतभेदे च।

रोमाञ्च पु० रोम्णामञ्चः उद्गमः अनुच-अच्। रोमहर्षे।

रोमाञ्चित त्रि० रोमाञ्च जातोऽस्य तारं० इतच्। जातपुलके।

रोमाली स्त्री० ङीप्। रोमावली तदुद्भवसाधने तारुण्यावस्थायाञ्च।

रोमालु पु० रोमयुक्त आलुः शाक०। पिण्डालौ। रोम+आलुच्। रोमन्ति त्रि०।

रोम वृविटपिन् स्त्री० रोमालुः रोमयुक्तः विटपी। कृष्णोदुम्बरे।

रोमावलि(ली) स्त्री० ङीप्। रोमश्रेणौ नाभेरूर्द्ध्वरोमपङ्क्तौ, तदुपलक्षिते तारुण्यावस्थायाञ्च। [योऽप्यत्र।

रोमोद्गम पु० रोम्णामुद्गमः उद्-गम-घञ्। रोमहर्षे। रोमोद्भेदाद-

रोरुदा स्त्री० रुद-यङ्-च टाप्। अतिशयरोदने।

रोल पु० रु-लच्। पानीयामलके।

रोलम्ब पु० रौति रु विच् रौः सन् लम्बते गच्छति लम्ब-अच् कर्म०। रोड-अम्बच् डस्य लो वा। भ्रमरे।

रोष पु० रुष घञ्। क्रोधे। [त्रि०।

रोषण पु० रुष-युच्। पारदे, निकषप्रस्तरे, उषरभूमौ च क्रोधयुक्ते

रोह पु० रुह-अच्। अङ्कुरे। रोहणकर्त्तरि त्रि०।

रोहण पु० रुह्यतेऽसौ रुह-ल्युट्। पर्व्वतभेदे।

रोहन्त पु० रुह झच्। वृक्षभेदे, वृक्षमात्रे च। लतायाञ्च स्त्री० गौ० ङीष्।

रोहि पु० रुह-इन्। बीजे, वृक्षे च। धार्म्मिके त्रि०।

रोहिण न० रुह-इनन्। पञ्चदशधा विभक्तर्क्षाणस्य नवमे भागे 'ऋक्षाधिदारोहिणं बुधः' इति स्मृतिः रोहिणी देवताऽस्य अण्। रौहिणमप्यत्र। वटवृक्षे, रोहितकवृक्षे च पु०।

रोहिणी स्त्री० रुह इनन् गौ० ङीष्। स्त्रीगव्याम्, अश्विन्यादिके चतुर्थे नक्षत्रे, वसुदेवपत्न्यां बलभद्रमातरि, विद्युति, कटुतुम्ब्यां लतायां, सोमवल्लके च। रोहित+स्त्रियां ङीप तस्य नक्षत्रे

त्वम् । रक्तवर्णवत्यां स्त्रियाम् । सा च हरितक्यादौ, काश्मर्य्यां, भल्लातक्यां च ।

रोहिणीपति पु० ६त० । चन्द्रे वसुदेवे च रोहिणीनाथादयोऽप्यत्र ।

रोहिणीव्रत न० रोहिणीयुक्ताष्टम्यां व्रतम् । रोहिण्यृक्षलक्षितायां भाद्रशुक्लाष्टम्यां कर्त्तव्ये उपवासरूपे व्रते ।

रोहित् पु० रुह-इति । सूर्य्ये, वर्णभेदे च । खनाभेदे, मत्स्याच्च स्त्री०

रोहित न० रुह-इतच् । रुधिरे, सरले, इन्द्रधनुषि, खनामख्याते मत्स्यभेदे, रोहितकवृक्षे च । रक्तार्थे पु० तद्वति त्रि० कन् । उक्तार्थे, मत्स्यभेदे खनामख्याते वृक्षे च ।

रोहिताश्व पु० रोहितवर्णाः अश्वा यस्य । वह्नौ ।

रोहितेय पु० रोहित एव स्वार्थे ढक् । रोहितकवृक्षे ।

रोहिन् पु० रोहति पुनर्म्रियमाणोऽपि प्रादुर्भवति रुह, णिनि । रोहितकवृक्षे । रोहणवति त्रि० । स्त्रियां ङीप् ।

रोहिष पु० रुह-इषन् । खनामख्याते वृक्षे ।

रौक्ष्य न० रूक्षस्य भावः ष्यञ् । पारुष्ये अचिक्कणतायाञ्च ।

रौचनिक त्रि० रोचनया रक्तः अण् । रोचनया रक्ते । [न ह्रस्वः ।

रौट(ड) अनादरे भ्वा० पर० सक० सेट् । रौटति अरौटीत् । चङि

रौद्र न० रुद्रो देवतास्य अण । सूर्य्यतापे, उग्ररसे च । तद्वति, भीषणे च त्रि० । दुर्गायां रुद्रजटावृक्षे च स्त्री० ङीप् ।

रौप्य न० रूपमेव अण् । रजते । [तत्रैवार्थे ।

रौम न० रुमायां नद्यां भवः अण् । शाम्भरिलवणे । स्वार्थे कन्

रौरव पु० रोरूयतेऽत्र रु-यङ्—क्विप् तेन प्राप्यं तस्येदं वा अण् । नरकभेदे लक्षणं वाचस्पत्याभिधाने । चण्डे, धूर्त्ते, घोरे च पु० ।

रौहिण पु० रुह-इनन् स्वार्थे अण् । चन्दनवृक्षे ।

रौहिणेय पु० रोहिण्यां भवः ढक् । बुधग्रहे, बलरामे च । मरकतमणौ न० । गोवृक्षे त्रि० । [रोहिषमत्स्याच्च स्त्री० ङीप् ।

रौहिष न० रुह-इषन् स्वार्थेऽण् । मत्स्यभेदे रोहितमत्स्ये च दुर्गायां,

ल

ल पु० ला–क । इन्द्रे, तन्त्रोक्ते भूमिदेवताके जन्तुभेदे न०
लक्ष आस्वादे प्राप्तौ च चु०उ०स०सेट् । लाक्षयति ते अलीलक्षत् त
लकुच पु० लक–अचन् । लिकुचवृक्षे (महादार) ।
लकुच पु० लक–उचन् । (महादार) वृक्षभेदे ।
लक्तक पु० लक–क्त नि० संज्ञायां कन् । अलक्तके (आलता)
लक्तकर्म्मन् पु० लक्तं करोति क–मनिन् । रक्तवर्णलोध्रे ।
लक्ष दर्शने, अङ्कने च चु०उभ०स०सेट् । लक्षयति ते अलीलक्षत् त
लक्ष न० लक्ष अच् । पदे, चिह्ने, व्याजे, परिमाणे च । दशायुतसंख्या-
यां स्त्री०न० [शब्दे ।
लक्षक त्रि० लक्षयति लक्षणयार्थम् लक्ष–ण्वुल् । लक्षणयार्थ बोधके
लक्षण न० लक्ष्यतेऽनेन लक्ष–करणे ल्युट् । इतरभेदानुमापके चिह्ने,
यथा पृथिव्या गन्धोलक्षणं स हि पृथिवीं परस्मात् भिन्नतया अनु-
मापयति । 'स्वरूपं तटस्थं द्विधा लक्षणं स्यात् स्वरूपे प्रविष्टं
स्वरूपाद्विभिन्न" मित्युक्ते स्वरूपलक्षणे तटस्थलक्षणे च यथा आ-
काशो विभुः सच्चिदानन्दो ब्रह्मेति । काकवत् कृष्णम्, जगज्ज-
न्मादिकर्त्तृ ब्रह्मेति । स्वरूपे, यथा घटस्वरूपं वस्तु । नाम्नि,
व्यवहारोपयोगिनि चिह्ने च । कर्त्तरि ल्युट् । स्वरूपप्रतिपादके
नोदनालक्षणार्थो धर्म्मः, इति जैमिनिसूत्रम् नोदना विधिवाक्यमेव
लक्षणं स्वरूपज्ञापिका यस्य तादृशोऽर्थः धर्मः इति तदर्थः ।
शब्दसाधुताप्रतिपादके व्याकरणादिशास्त्रे च न० 'लक्षणं स्वनभि-
ज्ञानमि'ति । कर्म्मणि ल्युट् । प्रतिपाद्ये यथा 'इत्थं द्वादश-
लक्षणेति माधवीधन्यायमाला द्वादशानां लक्षणानां प्रतिपाद्यवि-
षयाणां समाहारः इति तदर्थः । लक्ष–युच् । शब्दनिष्ठावाच्यार्थ-
संबन्धार्थबोधकतारूपे 'तुल्यार्थवाचे तद्योगे यस्यान्योऽर्थः प्रतीयते
रूढेः प्रयोजनाद्वापि लक्षणा शक्तिरर्पितेत्युक्ते" वृत्तिभेदे स्त्री० ।
यथा गङ्गायां घोषः प्रतिवसतीत्यादौ लक्षणायाः लक्षणाश्रयरूपे

स्वार्थेऽन्वयासम्भवात् तल्लक्षणतोरादिबोधकता। सा च मुख्या विस्तारो वाच्यस्यत्वे। लक्ष्मणे, सारसपक्षिणि च पु० तत्स्त्रियां स्त्री०

लक्षित त्रि० लक्ष-कर्म्मणि क्त। लक्षणया बोधितेऽर्थे, ज्ञाते, अनुमिते च कर्त्तरि क्त। लक्षणाश्रये लक्षकशब्दे च।

लक्ष्मन् न० लक्ष-मनिन्। चिह्ने, प्रधाने च। स्वार्थे अण् पु०। सारसपक्षिणि दशरथपत्न्याः सुमित्रायाः ज्येष्ठात्मजे च पु०। श्वेतकरञ्जवृक्षे स्त्रियाम्, औषधभेदे च स्त्री०

लक्ष्मी स्त्री० लक्ष-ईन् सुट् च। शोभायां कान्तौ, विष्णोः पत्न्याम्, सम्पत्तौ, बृहतीपर्णे, वृद्धदारौषधे, फलिनीवृक्षे, स्थलपद्मिन्याम्, हरिद्रायां, शच्यां, सुक्तायां, द्रव्ये च।

लक्ष्मीकान्त पु० ६त०। विष्णौ. राजनि च लक्ष्मीपत्यादयोऽप्यत्र। "विहाय लक्ष्मीपतिलक्ष्मलक्ष्मि" भारविः।

लक्ष्मीपुत्र पु० ६त०। कामदेवे, गन्धर्वदेवभेदे, अर्के, कुबेरे च।

लक्ष्मीवत् पु० लक्ष्मीः शोभास्त्यस्य मतुप् मस्य वः। धनेऽ श्रीयुक्ते त्रि० स्त्रियां ङीप्। [उल्लूकेऽपक्षिणि च

लक्ष्मीसहज पु०लक्ष्म्या सह क्षीराब्धौ जायते जन-ड। चन्द्रे,

लक्ष्य न० लक्ष-यत्। वेधार्थमुद्देश्यमाने शरव्ये। लक्षणया बोध्येऽर्थे उद्देश्ये, ज्ञेये, अनुमेये च त्रि०। [दृष्टिदृष्यस्य लक्ष्यते अलक्षीत्।

लख गतौ भा० पर० सक० सेट्। लखति। अलखीत्—अलाखीत्

लग खञ्जीभावे अक० गतौ भ्वा० सक० प० सेट्। लङ्गति अलङ्गीत्।

लग सङ्गे-भ्वा० पर० सक० सेट् एदित्। लगति अलगीत् घटा० लगयति। "लागेव तस्या लगति क्वेति नैषधम्।

लग स्वादे प्राप्तौ च सक० चु० उभ० सेट्। लागयति ते अलीलगत् त

लगित त्रि० लग-क्त। संसक्ते। [ते पदार्थे (लाठी)।

लगुड(ल)(र) पु० लग-उलच् लस्य डरौ वा। दण्डाकारे काष्ठनिर्मि-

लग्न न० लस्ज-क्त नस्य नः। मेषादिराशीनामुदये लक्ष्यते त्रि०। लग-क्त पु०। संसक्ते त्रि०। स्तुतिपाठके पु०। लग्न इव इवार्थे

कन्। प्रतिभुवि। (जामित) "खादको वित्तहीनः स्यात् लग्नको वित्तवान् यदीति स्मृतिः।

लग्निका स्त्री० नग्नेव कन् पृ०। अदृष्टरजस्कायां स्त्रियाम्।

लघ अभोजने सीमातिक्रमगतौ च भ्वा० आ० स० सेट् इदित्। लङ्घते अलङ्घिष्ट। 'कल्लोलिनीवल्लभरुल्ललङ्घे' इति नाटकम्।

लघ शोधने भ्वा०पर०सक०सेट् इदित्। लङ्घति अलङ्घीत्।

लघ प्रकाशे चु०उ०स०सेट् इदित्। लङ्घयति-ते अललङ्घत् त।

लघ आस्वादने चु०उभ०सक०सेट्। लाघयति-ते अलीलघत्-त।

लघिमन् पु० लघोर्भावः इमनिच् डिच्च। लघुत्वे लाघवे, येनोर्द्ध्वगतिसम्भवः। ऐश्वरस्य ऐश्वर्यभेदे च।

लघिष्ठ त्रि० अतिशयेन लघुः इष्ठन् डिद्वद्भावः। अतिशयलघुत्वयुक्ते। ईयसुन्। लघीयानप्यत्र स्त्रियां ङीप्।

लघु त्रि० लघि-कु नि० नलोपः। शीघ्रे क्षणागुरुणि, वीरणमूले च। एकानामौषधौ स्त्री०। निःसारे, लाघवगुणान्विते, हस्वे, मनोहरे च त्रि०। व्याकरणोक्ते हस्वसंज्ञके अकारादौ वर्णे, ज्योतिषोक्तेषु 'पुष्याश्विहस्ता लघुरित्युक्ते पुष्यादिनक्षत्रेषु च पु०। लघुतायुक्तायां स्त्रियां स्त्री० वा ङीप्।

लघुकाश्मर्य्य पु० कर्म०। कटफले वृक्षे।

लघुचिर्भटा स्त्री० कर्म०। स्तनेर्वारौ कर्कटीभेदे।

लघुदन्ती स्त्री० कर्म०। क्षुद्रदन्तीवृक्षे।

लघुद्राक्षा स्त्री० कर्म०। काकजीद्राक्षायाम्।

लघुनामन् पु० लघुवर्णयुक्तं नाम वाचकशब्दो यस्य। अगुरुचन्दने।

लघुपत्रक पु० लघूनि ह्रस्वानि एत्राण्यस्य कप्। (गुडारोचना) लतामेदे।

लघुपुष्प पु० लघु पुष्पं यस्य। भूमिकदम्बे।

लघुबदर पु० कर्म०। क्षुद्रकोलौ। भूबदर्य्याम् स्त्री० ङीप्।

लघुब्राह्मी स्त्री० कर्म०। क्षुद्रब्राह्म्याम्।

लघुमन्थ पु०। अग्निमन्थः मन्थः पूर्वपदलोपः कर्म०। क्षुद्राग्निमन्थे।

लघुलय न० लघु शीघ्रं लीयते ली-अच्। धीरणमूले।

लघुसदाफला स्त्री० सदा फलं यस्याः कर्म०। क्षुद्रोदुम्बरिकायाम् (छोट डुमर)।

लघुहेमदुग्धा स्त्री० कर्म०। क्षुद्रोडुम्बरे (छोट डुमर)।

लघुदुम्बरिका स्त्री० कर्म०। (छोट डुमर) उदुम्बरभेदे।

लङ्का स्त्री० लक-अच् हस्य ङ च। स्वनामख्यातायां पुर्याम्।

लङ्काधिप पु० ६त०। रावणे लङ्कानाथादयोऽप्यत्र।

लङ्कायि (पि) का, स्त्री० लङ्कामयते आप्नोति वा एवुल्। पृक्कायां (पिडिङ्) शाकभेदे।

लङ्कास्थायिन् पु० लङ्कायां तिष्ठति स्था-णिनि। (लङ्कासिज) हस्तभेदे। लङ्कावासिनि त्रि०। [ङ्काक)।

लङ्कोपिका स्त्री० लङ्कायामुप्यते वप-एवुल् पृ०। पृक्कायाम्। (पिडि-

लङ्घन न० लघि-ल्युट्। अभोजने, अतिक्रम्य गमने, क्रमणे, प्लवने च।

लङ्घ चिक्कारणे भ्वा० पर० सक० सेट्। लङ्घति अलङ्घीत्।

लज व्रीड़ायाम् भ्वा० आ० सक० सेट्। लजते अलजिष्ट।

लज तिरस्कारे भ्वा० पर० सक० सेट् इदित्। लञ्जति अलञ्जीत्।

लज अलङ्कारे चुरा० उ० सक० सेट्। लाजयति-ते अलीलजत् त।

लज भाषणे हिंसायां दाने च सक० सामर्थ्ये वासे च अक० चुरा० सेट् इदित्। लञ्जयति-ते अललञ्जत् त।

लज भाषणे अद० चु० उभ० सक० सेट्। लजयति-ते अललजत् त।

लजकारिका स्त्री० लजं लज्जां करोति क-एवुल् ब्रत इत्वम्। लज्जाकुलतायाम्। [निवृत्तिसाधने चित्तवृत्तिभेदे।

लज्जा स्त्री० लस्ज-क। अलभ्यप्रवृत्तौ परदर्शने दृष्टत्वधिया ततो

लज्जालु स्त्री० लस्ज-आलुच्। लतायाम्। लज्जावति त्रि०।

लज्जाशील त्रि० लज्जां शीलयति शील-अण्। लज्जाविशिष्टे।

लज्जित पु० लज्जा जातास्य तारं० इतच्। जातलज्जे व्रीड़िते।

लज्जिरी स्त्री० लज्जा अस्त्यर्थे इरच् गौ० ङीष्। लज्जालुलतायाम्।

लञ्ज भाषणे अद० चु० उभ० अक० सेट्। लञ्जयति ते अललञ्जत् त।

लट बालभावे अक०उक्तौ द्वि०भ्वा०पर०सेट्। लटति। अलाटीत् अलटीत्।

लटपर्णी न० लटं दुष्टं पर्णमस्य। त्वचे (दारचिनि)।

लट्टा स्त्री० लट-अच्। (नाटाकरमचा) करञ्जभेदे, वाद्यभेदे, थामचटके, कुलम्भे, भ्रमरके च।

लड विलासे भ्वा० पर० अक० सेट्। लडति। अलाडीत्-अलडीत्।

लड उत्क्षेपे जिह्वाचालने च भ्वा० पर० सक० सेट्। लडति अलाडीत्-अलडीत् घटा०। लडयति।

लड उपसेवे चु०उभ०सक०सेट्। लाडयति-ते अलीलडत् त।

लड आस्वादे चु०उभ०सक०सेट्। लाडयति-ते अलीलडत्।

लड भाषणे द्वि० वा चु० पक्षे भ्वा० पर० सेट् इदित्। लण्डयति ते लण्डति। अलण्डयत् त अलण्डीत्।

लड उत्क्षेपणे वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् इदित्। लण्डयति-ते लण्डति। अलण्डयत्-त अलण्डीत्।

लड क्षेपणे अद० चु० उभ०सक० सेट्। लडयति ते अललडत् त।

लड्डुक पु० लड-डु तस्य नेत्त्वम् स्वार्थे कन्। गोधूमादिचूर्णनिर्म्मिते (लाडू) मिष्टान्नभेदे "दृष्टुलड्डुकलत्वनीति" नैषधम् स्त्रीत्वमपि।

लण्डु पु० लड-डु। (लण्डन) इति ख्याते नगरभेदे।

लत आघाते भ्वा० पर० सक० सेट्। लतति अलातीत् अलतीत्।

लता स्त्री० लत-अच्। शाखारहिते वृक्षादौ।

लताकरञ्ज पु० लतारूपः करञ्जः। करञ्जभेदे।

लताकस्तूरिका स्त्री० लतायां कस्तूर्य्यां इव गन्धो यस्याः। कस्तूरीगन्धयुक्तपत्रवत्यां लतायाम्। [लताद्वादयोऽप्यत्र।

लतातरु पु० लतेव दीर्घशरुः। तालवृक्षे, शालवृक्षे नागरङ्गवृक्षे च।

लतापनस पु० लतायां पनसमिव स्थूलं फलमस्य। (तरसुज) लताभेदे।

लताप्रक्का स्त्री० लतेव विस्तीर्णा प्रक्का। (पिंडिङ्ग) शाकभेदे।

लताफल न० लतायां फलमस्य। पटोले।

लतामरुत् स्त्री० लतायां मरुत् वायुरिवास्याः। प्रक्कायां तल्लतासेवने हि वायुवद्विरिति वैद्यकम्।

लतायष्टि स्त्री० लतापि यष्टिरिव । मञ्जिष्ठायाम् ।
लतायावक न० लतायां यावकमिव । प्रवाले ।
लतार्क पु० लतयार्क इव । हरित्पलाण्डौ ।
लप कथने भ्वा० पर अक० सेट् । लपति । अलापीत्-अलपीत् । चङि न ह्रस्वः । [कथने ।
लपन न० लप्यते उच्चतेऽनेन लप-करणे ल्युट् । हसे । भावे ल्युट् ।
लपित त्रि० लप-कर्मणि-क्त । कथिते । भावे क्त । कथने न० ।
लब आलम्बने सक० शब्दे अक० भ्वा० आत्म० सेट् इदित् । लम्बते अलम्बिष्ट
लब्ध त्रि० लभ-कर्म्मणि क्त । प्राप्ते ।
लब्धवर्ण पु० लब्धो वर्णो वर्णनं प्रशंसा ज्ञानयत्नेन येन । पण्डिते ।
लभ शब्दे अक० भ्वा० आत्म० सेट् इदित् । लम्भते अलम्भिष्ट ।
लभ प्राप्तौ सक० भ्वा० आत्म० अनिट् । लभते । अलब्ध । लब्धुम् ।
लमक पु० रम वुन् रस्य लः । पिङ्गे जारे । [त्रि०
लम्पट पु० रम अठन् पुक् च रस्य लः । परस्त्रीषु लोलुपे, आसक्ते
लम्ब पु० लबि-अच् । नर्त्तके, कान्ते, उत्कोचे, अङ्कशास्त्रोक्ते त्रिभुजादिक्षेत्रे भुजकर्णयोर्मध्यस्थे लम्बमाने सूत्रे च "लम्बगुणं भूमर्द्धं स्यात्" त्रिभुजे फलं भवतीति लीलावती दीर्घे, लम्बमाने च त्रि० ।
लम्बकर्ण पु० लम्बः कर्णो यस्य । खरे, हस्तिनि, राक्षसे, शेफनपक्षिणि, अकोटदन्ते च । लम्बश्रोत्रवति त्रि० । कर्म० । लम्बमाने श्रोत्रे पु० ।
लम्बकेश त्रि० लम्बः दीर्घः केशः यस्य । दीर्घकेशाढ्ये । कुशध्वजे विष्टरे । दीर्घकेशयुक्ते त्रि० । कर्म्म० । दीर्घे केशे ।
लम्बदन्ता स्त्री० लम्बो दीर्घः दन्त इव बीजकण्टको यस्य सिंहलद्वीपसम्भवपिप्पल्याम् । दीर्घदन्तवति त्रि० कर्म्म० दीर्घे दन्ते पु० ।
लम्बन न० लम्बते ल्यु । नाभिदेशपर्य्यन्तं लम्बमाने आत्यादौ भ० के ल्युट् । आलम्बने न० ।
लम्बबीजा स्त्री० लम्बं दीर्घं बीजं यस्याः । सिंहलदेशजातपिप्पल्याम् ।
लम्बा स्त्री० लम्बते लबि-अच् । तिक्तलम्बायां (तितलाउ) ।

लम्बोदर पु० लम्बं दीर्घमुदरं यस्य । गणेशे, तारामात्रायां देव्यां स्त्री० ङीप् । दुष्पूरोदरवति त्रि० ।

लय गतौ भ्वा०आत्म०सक० सेट् । लयते । अलयिष्ट ।

लय पु०ली-अच् । सङ्गमे, विनाशे, नृत्यगीतवाद्यानामेकतानतारूपे साम्ये च । लीयतेऽत्र । सर्वभूतलयकरे प्रलयकाले, ईश्वरे च ।

लर्व गतौ भ्वा०पर०सक० सेट् । लर्वति अलर्वीत् ।

लल इच्छायां चु०उभ०सक० सेट् । लालयति ते अलीललत् त

लल इच्छायां अद०चु०उभ०सक० सेट् । ललयति ते अललत् त

ललज्जिह्व पु० ललन्तो आस्वाद्यास्वदनाय चलन्ती जिह्वा यस्य । कुक्कुरे, सर्पे, सिंहसर्पे च । चलद्रसनायुक्ते त्रि० ।

ललन न०लड वुन् डस्य लः । चालने । केलौ, ताले, सालवृक्षे, पियाल-वृक्षे च पु० । लल-ल्यु । जिह्वायां, नार्यां च स्त्री० ।

ललनाप्रिय पु० कर्म० । कदम्बे । ह्रीवेरे न० । जिह्वाप्रिये, रमणी-वल्लभे च त्रि० ।

ललन्तिका स्त्री० लड-झच् स्वार्थे कन् अत इत्त्वम् डस्य लः नासिके-शपर्य्यन्तं लम्बमाने माल्यादौ ।

ललाट न० लड-अच् डस्य लः ललमटति अट-अण् । अलकाधःस्थेऽङ्गभेदे (कपाल)

ललाटन्तप पु० ललाटं तापयति तप-णिच् खच् हुखः । स्वर्के ललाट-तापके त्रि० 'लिखिललाटन्तपनिपुरे'ति नैषधम् ।

ललाटपट्ट न० ललाटं पट्टमिव विस्तीर्णम् । प्रशस्तललाटे ललाटफ-लकादयोऽस्त्र । [चिह्ने च ।

ललाटिका स्त्री० ललाटे आबध्यते ठन् । ललाटभूषणे । ललाटस्थे

ललाम न० लल-अच् तमप्रति अन अण्, प्रधाने, ध्वजे, यूथे, बालधौ, चिह्ने, भूषायां च घोटके पु० । नान्तत्वमपि ।

ललामक न० ललाम तिलकमिव इवार्थे कन् । ललाटपर्य्यन्तं सस्मु खन्यस्ते मान्यभेदे ।

ललित न० लल-क्त । शृङ्गारानुगुणे चेष्टाभेदे, स्वरभेदे पु० । सुन्दरे,

दैर्घ्यविशिष्टे त्रि० लड-क्त लड्डु लः। भोजने न० कलभूम्यां नदीभेदे स्त्री०।
ललितासप्तमी स्त्री० भाद्रशुक्लसप्तम्याम्, तद्दिनकर्त्तव्ये व्रतभेदे च।
लव पु० लू अप्। लेशे, विनाशे, छेदने, श्रीरामपुत्रे, कालपरिमाण-भेदे, गोलार्द्धलवोन्मिते, बाले च।
लवङ्ग न० लू-अङ्गच्। लवनामख्याते वृक्षे। स्वार्थे कन् तत्रैव
लवङ्गकलिका स्त्री० लवङ्गं कलिकेव। लवङ्गे।
लवण न०लू-ल्युट् षु०णत्वम्। रसभेदे, तत्प्रधाने-सैन्धवसौवर्चकविड-दिरूपे पदार्थे च। तदुत्पत्तिस्थाने-सिन्धुदेशे, समुद्रे, मधुदैत्यसुते असुरभेदे च पु०। लवणरसयुक्ते, लावण्ययुक्ते च त्रि०। नदी-भेदे महाज्योतिष्मत्यां, दीप्तौ च स्त्री०।
लवणाकिंशुका स्त्री० लवणरसान्वितः किंशुकः तन्नामकं गन्धद्रव्यं यस्याः। महाज्योतिष्मत्याम्।
लवणक्षार पु० लवणमयः क्षारः। लवणरसयुक्ते क्षारे।
लवणखनि स्त्री० ६त०। शाम्भरिलवणोत्पत्तिस्थाने।
लवणधेनु स्त्री० दानार्थं कल्पितायां लवणनिर्म्मितायां धेनौ।
लवणाचल पु० दानार्थं कल्पिते अचलाकारे लवणस्तूपे। [योऽप्यत्र।
लवणाब्धि पु० लवणमयोऽब्धिः। लवणप्रचुरसमुद्रे। लवणरसमुद्राद-
लवणाब्धिज न० लवणाब्धेर्जायते जन-ड। साम्भरलवणे(करकचलवण)
लवणोत्तम न० लवणेषु उत्तमम्। सैन्धवलवणे।
लवणोद पु० लवणमयमुदकं यस्य उदादेशः। लवणसमुद्रे।
लवन न० लू ल्युट्। छेदने (कोना आना) वृक्षे स्त्री० ङीप्।
लवली स्त्री०लवं लेयं लाति-ला-क गौ०ङीष्। (नोयाड़) वृक्षे।
लवित्र न० लूयतेऽनेन लू-इत्र। दात्रे। [(ष)(स)त्व
लष (ष) (स) श्लिष्टौ भ्वा० चु०उ०सक०सेट्। लाष(ष)यति ते अलीलषत्
लषु (षु)न न० लष-उनन् ऊनन् वा। रघुने।
लष स्पृहायां दिवा० भ्वा० च उभ० सक० सेट्। लष्यति-ते लषति ते अलषीत्। अलाषीत् अलषिष्ट। [अलषीत्।
लस श्लेषे क्रीड्यां दीप्तौ च अक०भ्वा०पर० सेट्। लसति-ऊलासीत्

लसा स्त्री०लसति लस-अच्। हरिद्रायाम्।

लसीका स्त्री०लस-ईकक्। दुग्धरसे। [मनिट् तस्य नच्च। लग्नः।

लस्ज व्रीड़ायां भ्वा०आ०अक०सेट्। लज्जते अलज्जिष्ट। निष्ठायां-

लस्त त्रि० लस-क्त नि० दृडभावः। श्लिष्टे, क्रीड़िते, शिल्पयुक्ते च।

संज्ञायां कन्। -धनुर्मध्यभागे पु०। [वा ङीप्। मकरातरङ्गे।

लहरि (री) स्त्री० लस-इन्द्रोणेव श्लिष्यते ऊर्द्धगमनाय हृ-कर्मणि इन्

ला आदाने अदा० पर०सक०अनिट्। लाति अलासीत्।

लाक्षणिक त्रि०लक्षणया बोधयति ठक्। लक्षणया अर्थबोधके शब्दे।

अस्त्यर्थे ठन् स्वार्थे अण्। लक्षणयुक्ते।

लाक्षण्य त्रि० लक्षणं वेत्ति अत्र। शुभाशुभलक्षणज्ञे। अस्त्यर्थे अञ्

यत् वा। लक्षणयुक्ते 'ल(ला)क्षण्यं स्त्रियमुद्वहे'दिति स्मृतिः।

लाक्षा स्त्री० लक्ष्यतेऽनया लक्ष-अ पृ० दृद्धिः। (ला) ख्याते पदार्थे।

लाक्षातरु पु० लाक्षयोनिस्तरुः। (ला)द्रव्यसाधने वृ लाक्षादृक्षादवोऽण्यत्र।

लाक्षातैल न० लाक्षया पक्वं तैलम्। वैद्यकप्रसिद्धे तैलभेदे।

लाक्षाप्रसाद् पु० लाक्षायां प्रसादो यस्य। पट्टिकालोध्रे।

लाक्षाप्रसाधन न० प्रसाध्यते भूष्यतेऽनेन ल्युट् लाक्षा तद्रस एव

प्रसाधनम्। अलक्तके।

लाक्षारस पु० लाक्षानिःसृतो रसः द्रवः। अलक्तकरसे।

लाख भोषे, भूषणे, दाने वारणे च सक० सामर्थ्ये अक० भ्वा० पर०

सेट्। लाखति अलाखीत् चङि न ह्रस्वः।

लाघ सामर्थ्ये भ्वा०आ०अक०सेट्। लाघते अलाघिष्ट चङि न ह्रस्वः।

लाघव न० लघोर्भावः अण्। लघुत्वे, आरोग्ये च।

लाङ्गल न० लगि-कलच् पृ० दृद्धिः। स्वनामख्याते भूमिकर्षके पदार्थे।

लाङ्गलदण्ड पु० ६त०। लाङ्गलमध्यस्थे काष्ठमये दण्डे (ईश)

लाङ्गलपद्धति स्त्री० लाङ्गलखाता पद्धतिः रेखा। सीतायाम् लाङ्गल

खातजातस्थभूमिरेखायाम्।

लांङ्गलिकी स्त्री० लाङ्गलमिवाकारोऽस्त्यस्याः ठन् गौ० ङीष्। (विष-

लाङ्गला) वृक्षभेदे। तत्र भवः अण्। विषभेदे पु०।

लाङ्गलिन् पु० लाङ्गलं प्रहरणसाधनत्वेनास्त्यस्य इनि। बलरामे लाङ्गलदण्ड इव दीर्घः आकारोऽस्यस्य इनि। नारिकेलवृक्षे।

लाङ्गली स्त्री० लाङ्गलाकारः पुष्पमस्त्यस्याः अच् गौरा०ङीष्। (काचड़ा) शाकभेदे।

लाङ्गल न० लगि जलच् पृ०। पश्चानां पश्चाद्वर्त्तिनि रोमगुच्छे।

लाङ्गूलिका स्त्री० लाङ्गूलाकारोऽस्यस्याः ठन्। वृश्चिकपर्ण्याम्

लाङ्गूलिन् पु० लाङ्गूलमस्त्यस्य इनि। वानरे तदाकारपुष्पवति क्षुप-भौषधे च।

लाक्ष अक्षने भ्वा० पर० सक०सेट् इदित्। लाक्षति अलाक्षीत्।

लाज भर्त्सने भ्वा०पर० सक०सेट्। लाजति अलाजीत्। इदित्यपत्र-यम्। लाक्षति अलाक्षीत्।

लाज न० लाज-अच् घञ् वा। लाजीरे। आर्द्रतण्डुले पु०। भृष्टधान्ये (खइ) पु० ब० व०स्त्रीत्वमपत्र। [भावे ल्युट्। अक्षने।

लाञ्छन न० लाञ्छ्यते लाञ्छि-कर्म्मणि ल्युट्। चिह्ने, नामनि च

लाट पु०लट-संज्ञायां घञ्। देशभेदे, वस्त्रे, जीर्णालङ्कारे, विदग्धपुरुषे च

लाटानुप्रास पु० लाटस्य विदग्धस्य प्रियः कर्म०। अलङ्कारोक्ते शब्दा-लङ्कारभेदे

लाड क्षेपे अदं चु०उभ० सक०सेट्। लाडयति ते अलीलाडत् त

लाभ पु०लभ्यते लभ-कर्मणि घञ्। मूलधनादितोऽधिके लभ्यमाने धने। भावे घञ्। प्राप्तौ। [कर्त्तरि घञ्। वीरणमूले

लामज्जक न० लायते ला-किप् लाः आदीयमानः मज्जा सारोऽस्य

लालन न०चु० लल-ल्युट्। स्नेहपूर्वकपालने।

लालसा स्त्री०लस स्पृहायां यङ् अ। अतिशयेच्छायाम् गर्भिणीदोहदे च

लाला स्त्री० चु० लल-अ टाप्। मुखजजलरूपे।

लालाटिक पु० ललाटं प्रभोर्भाग्यं पश्यति ठञ्। प्रभुभाग्योपजीवि-नि-कार्य्यासामर्थे। ललाटात् ललाटस्थभाग्यात् आगतः तत्रेदं वा ठण्। भाग्याधीने त्रि० प्राप्तिस्तु लालाटिकीत्युक्तेः ललाट-लब्धिनि त्रि०।

लालाविष न० लालायां विषमस्य । लूतादौ कीटे ।
लालाद्राव लालां द्रावयति द्रु-णिच्-अण् । लूताकीटे ।
लालित्य न० ललितस्य भावः ष्यञ् । सौन्दर्य्ये, मनोहरत्वे "नैषधे पदलालित्यं, नित्युक्तेः ।
लाव पु० लू-कर्त्तरि घञ् । पक्षिभेदे । स्वार्थे कन् । तत्रैव भावे घञ् । छेदने
लावण न० लवणे संस्कृतम् अण् । लवणसंस्कृते औषधादौ ।
लावणिक न० लवणे संस्कृतम् ठण् । लवणे संस्कृतौषधादौ, लवणं पण्यमस्य ठण् । लवणविक्रयोपजीविनि वणिग्भेदे
लावण्य न० लवणस्य भावः ष्यञ् । लवणत्वे, 'मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते, इत्युक्ते देहसौन्दर्य्यभेदे च ।
लासिका स्त्री० लस-ण्वुल् । नर्त्तक्याम् पु० । लासकोऽस्यत्र ।
लास्य न० लस-ण्यत् । नृत्ते, वाद्यगीतसंगीतिभिके । 'स्त्रीनृत्तं लास्यमुच्यते, इत्युक्ते स्त्रीनृत्ते च । स्वार्थे कन् तत्रैव ।
लिकुच पु० लकुच+पृ० इत्वम् (मान्दार) वृक्षे ।
लिक्षा (क्षा) स्त्री० लक्ष-अ पृ० वा इत्वम् वा कस्य । यूकाण्डे, "जालान्तरगते भानौ यच्छानुदृश्यते रजः । तैस्यतुर्भिर्भवेल्लिक्षेत्युक्ते परिमाणभेदे ।
लिख लेखने तुदा० पर० सक० सेट् । लिखति अलेखीत् । कुटादिरयम् ।
लिख गतौ भ्वा० पर० सक० सेट् इदित् । लिङ्क्ते अलिङ्क्षीत् ।
लिखन न० कुं लिख-ल्युट् । लेखने लिपौ च,
लिखित न० लिख-भावे क्त । लेखने । आधारे क्त । लिपौ, विवादे अर्थसाधके पत्रादौ च 'प्रमाणं लिखितं मिति श्रुतिः
लिग गतौ भ्वा० पर० सक० सेट् इदित् । लिङ्क्ते अलिङ्क्षीत् ।
लिग चित्रीकरणे चुरा० उभ० सक० सेट् इदित् लिङ्गयति ते । अलिलिङ्गत् त ।
लिङ्ग पु० लिगि-अच् । चिह्ने, पुंसोऽसाधारणचिह्ने, अनुमानसाधने हेतौ, सांख्यादौ प्रधाने, शिवमूर्त्तिभेदे, व्याघ्रे, व्यक्ते, शब्दनिष्ठे

षट्पदाधुतापयोजके धर्म्मभेदे, अर्थप्रकाशनसामर्थ्ये च 'लक्षता च लिङ्गमिति' मीमांसकाः ।

लिङ्गक पु० लिङ्गेन कायति कै-क । कपित्यवृक्षे ।

लिङ्गवर्द्धिनी स्त्री० लिङ्गं पुरुषचिह्नभेदं वर्द्धयति वृध णिच् णिनि । अधामार्गे ।

लिङ्गवृत्ति पु० लिङ्गं संन्यासादिवेशधारणमेव वृत्तिः जीविका यस्य । जीविकार्थसंन्यासचिह्नादिधारिणि कपटपरिव्राजके [लताभेदे ।

लिङ्गिनी स्त्री० लिङ्गमियाकारोऽस्त्यस्याः इनि ङीप् । (पंचगुरिया)

लिङ्गिन् त्रि० लिङ्गमस्त्यस्य इनि । चिह्नयति, जीविकार्थसंन्यासादि-चिह्नयति, प्रशस्तलिङ्गयति गजे च पु० । [पत अलिप्त ।

लिप लेपने, तुदा०उभ०सुचा०सक०अनिट् । लिम्पति ते अलिपत् अलिप्त ।

लिपि (पी) स्त्री० लिप-इकु वा ङीप् । लिखिताक्षरके पत्रे, लेखने च ।

लिपिक (का) र पु० लिपिं करोति कृ-अच् अण् वा । लेखके ।

लिप्त त्रि० लिप-क्त । भुक्ते, कृतचन्दनादिलेपे, मिश्रिते, विषदिग्धे च । ज्योतिषोक्ते राशेः षष्टिभागात्मके कलारूपे भागे । 'लिप्तार्द्धहीनं यदि पूर्णमेतदि'ति ताजकम् दण्डात्मककाले पु० । स्वार्थे कन् । ऋत इत्त्वम् । तत्रैव ।

लिप्तक पु० कुत्सितं लिप्तम् कन् विषाक्तबाणे ।

लिप्सा स्त्री० लभ-सन्-अ । लाभेच्छायाम् ।

लिप्साक पु० लिप-आकन् पु० । जम्बोरभेदे (पातिलेबु) खरे च ।

लिबि (बी) स्त्री० लिप-इक् पृ० पस्य ब० वा ङीप् । लिपिशब्दार्थे० लिबिकरादयोपि लिपिकरादयर्थे ।

लिश्र श्लेषे अल्पीभावे च दि० आ० अक० अनिट् । लिश्यते अलिश्यत ।

लिश्र गतौ तु०पर०सक०अनिट् । लिश्नति अलिश्नात ।

लिह आस्वादने अदा० उभ० स० अनिट् । लेढि लीढे । अलिक्षत् त ।

ली श्लेषे दिवा०आ० अक० अनिट् । लीयते अलेष्ट । निष्ठातस्य नः । लीनः ।

ली श्लेषे क्रया०उ०पर०अक०अनिट् । लिनाति अलैषीत् ।

लो द्रावणे वा चु०उभ०सक०पक्षे भ्वा०प०अनिट्। लावयति ते लापयति ते उयति अलीलवत् त अलीलपत् त अलैषीत्।

लोढ वि० लिह-आस्वादे क्त। आस्वादिते, स्पृष्टे च।

लीला स्त्री० ली-किप् लियं लाति अच्। केलौ, विलासे, भ्रूभङ्गादि-चेष्टायाम् क्रीड़ायाञ्च।

लीलावती स्त्री० लीला+अस्त्यर्थे मतुप् मस्य वः। विलासवत्यां स्त्रियां, भास्कराचार्यस्य पुत्र्यां, तत्कृते अङ्कग्रन्थभेदे, न्याय-शास्त्रप्रसिद्धे "नाद्यः स्रजतीत्यादिके' पदार्थप्रतिपादके ग्रन्थभेदे पुराणप्रसिद्धे वेश्याभेदे च।

लीलोद्यान न० लीलार्थमुद्यानम्। क्रीड़नार्थे आरामे, देववने च।

लुक्कायित वि० लुच्यते लुन्च-अपनयने किप् लुक् कायो यस्य तादृश-मिवाचरति लुक्काय+किप्-क्त। अन्तर्हितदेहे। गुप्तदेहे।

लुञ्ज क्षपणे अष्टधातोरर्थे च चुरा०उभ०सक०सेट् इदित्। लुञ्जयति ते अलुलुञ्जत् त।

लुञ्चित वि० लुन्च घिच्-क्त। अपसारिते दूरीकृते।

लुट दीप्तौ अक० प्रतिघाते सक०भ्वा० आत्म०सेट्। लोटते लुलुटि उभ० अलुटत् अलोटिष्ट।

लुट हरणे भ्वा०पर०सक०सेट् इदित्। लुण्टति अलुण्टीत्।

लुट दीप्तौ चु०उभ०सक०सेट्। लोटयति ते अलूलुटत् त।

लुठ विलोड़ने, हरणे च सक० पर०सेट्। लुठति अलुठत्। चक्रि वा लुख्यः।

लुठ विलोड़ने, विमोटने च भ्वा०पर०सक०सेट् लोठति अलोठीत्।

लुठ गतौ चौर्य्ये च सक०सञ्जीभावे आलस्ये च अक०भ्वा०पर० सेट् इदित् लुण्ठति अलुण्ठीत्।

लुठ प्रतीघाते भ्वा०आ-लुङि उ०सक०सेट्। लोठते। अलुठत् अलोठिष्ट।

लुठ उपघाते भ्वा०पर०सक०सेट्। लोठति अलोठीत्।

लुठ लोटे तु०कु०प०अक०सेट्। लुठति अलुठीत्।

लुठ चौर्य्ये चु०उभ०सक०सेट्। लोठयति ते अलूलुठत् त।

लुठन न० चु० लुठ-ल्युट्। अम्बादेर्भूम्यादौ अमापनयनार्थं पुनः पुनरुल्लाघाते (लोटा)

लुठित त्रि०लुठ-क्त। भूरिलताकूपरावर्त्तने।

लुड मन्थने भ्वा०पर०सक०सेट्। लोडति अलोडीत्।

लुड संहतौ सक० श्लेषे अक०तु०कु०पर०सेट्। लुडति अलुडीत्।

लुण्ट अवस्रावां चौर्य्ये च वा चु०उ०पक्षे भ्वा०प०सक०सेट्। लुण्टयति ते लुण्टति अलुलुण्टत् त अलुण्टीत्।

लुण्टक पु० लुण्ट-ण्वुल्। (लटिया) शाकभेदे।

लुण्टाक त्रि० लुटि-काकन्। चौरे स्त्रियां गौ० ङीष्।

लुण्ठक त्रि० लुठि-ण्वुल्। चौरे।

लुण्ड्य चौर्य्ये चु०उ०सक० सेट्। लुण्ड्यति ते अलुलुण्ड्यत् त।

लुन्ध बधे सक०क्लेशे अक०भ्वा० पर०सेट् इदित्। लुन्धति अलुन्धीत्

लुन्च अपनयने भ्वा०पर०सक०सेट्। लुञ्चति अलुञ्चीत्।

लुप छेदने विनाशने च तु० मु० उ० स० अनिट्। लुम्पति ते अलुपत् अलुप्त। चक्षि वा क्षुखः। अलूलुपत् अलुलोपत्।

लुप आकुलीभावे दिवा० पर०अक० सेट्। लुप्यति अलुपत् अलोपीत् नित्यमत् इत्येके।

लुप्त न० लुप-क्त। अपहृतधने नष्टे। स्त्रियां त्रि०।

लुभ अर्द्दने वा चु० उ०पक्षे भ्वा० पर० सक० सेट् इदित्। लुम्भयति ते लुम्भति; अलुलुम्भत् त अलुम्भीत्।

लुभ पु० लुभ-क। व्याधे। स्वार्थे कन् तत्रैव; लम्पटे लोलुपे च त्रि०

लुभ विमोहने तु० पर० अक० सेट्। लुभति अलोभीत्।

लुभ आकाङ्क्षायां दि० प० स० सेट्। लुभ्यति। अलुभत्-अलोभीत्

लुल विलर्द्दने भौ०पर० सक० सेट्। लोलति। अलोलीत्।

लुलाप पु० लुल-घञर्थे क तमाप्नोति अण्। मत्स्ये।

लुलित त्रि०लुल-क्त। आन्दोलिते, चालिते च "अथ लुलितपतत्त्रिनाम्नि"ति भट्टिः।

लुप चौर्य्ये भ्वा॰पर॰सक॰ सेट्। लोपति अलोपीत्।
लुप छिंसायां सौ॰ पर॰सक॰सेट्। लोपति अलोपीत्।
लुह आकाङ्क्षायां भ्वा॰ पर॰सक॰ अनिट्। लोहति अलुहत्।
लू छेदने क्र्या॰ पु॰ उभ॰सक॰ सेट्। लुनाति लुनीते अलावीत्
लूता स्त्री॰ लू-तक्। कीटभेदे (माकड़सा)। स्वार्थे कन् अतइत्वम्। तत्रैव।
लून त्रि॰ लू-क्त निष्ठातस्य नः। छिन्ने।
लूम न॰ लू-मक्। लाङ्गूले।
लूष बधे स्तेये च चु॰ उभ॰ सक॰ सेट्। लूषयति ते अलूलुषत्
लेख पु॰ लिख्यते चित्रादि पटेऽसौ लिख-कर्मणि घञ्। देवे भावे घञ् लेखने। कर्म्मणि घञ्। लेख्ये त्रि॰। आधारे घञ्। पत्रे लिपौ च निर्द्धारितेऽर्थे लेखेनेति माघः।
लेखक पु॰ लिख-ण्वुल्। लिपिकरे।
लेखन न॰ लिख-ल्युट्। पत्त्रादौ वर्णादिविन्यासे, छर्दने च। आधारे ल्युट्। भूर्ज्जपत्रे लिख्यतेऽनया ल्युट्। लेखनसाधने स्त्री॰ ङीप्। मस्याधारं लेखनीञ्चेति स्मृतिः।
लेखनिक पु॰ लेखनं शिल्पमस्य ठन्। लिपिकरे।
लेखर्षभ पु॰ लेख ऋषभ इव श्रेष्ठत्वात्। इन्द्रे।
लेखहार पु॰ लेखं हरति हृ-अण्। पत्त्रवाहके। एवुल्। लेख-हारकोऽप्यत्र। [घञ् टाप्। लिपौ।
लेखा स्त्री॰ लिख-अ टाप्। रेखायां, षड्क्षौ च। आधारे संज्ञायां
लेख्य त्रि॰ लिख-ण्यत्। लेखनीये। व्यवहारे स्वत्वाद्यावेदके पत्त्रभेदे न॰।
लेखपत्त्र पु॰ लिख्यतेऽत्र यत्र लेख्यं पत्रं यस्य। तालवृक्षे।
लेप गमने भ्वा॰ आत्म॰ सक॰ सेट् चक्षि न दृश्यः। लेपते अलेपिष्ट
लेप पु॰ लिप लेप-घा घञ्। भोजने लेपने च। कर्म्मणि घञ्। सु-धायाम् (कलिङ्गे)।
लेपक पु॰ लिम्पति लिप ण्वुल्। लेपनकरे जातिभेदे। पलगण्डे।

लेपन न० लिप-ल्युट्। (लेपा) इति ख्याते व्यापारे। कर्मणि ल्युट्। तुरङ्गनामगन्धद्रव्ये।

लेलिह्यान पु० लिह्-यङ् कानच् पृ० यलोपः। सर्पे, पुनः पुनः लेहनकरे तारादिदेवतापूजाङ्गे अङ्गुल्यादिसञ्चिवेशविशेषरूपे मुद्राभेदे स्त्री०। तन्त्रशास्त्रं वाचस्पत्ये।

लेश पु० लिश-अल्पीभावे घञ्। अल्पे, लवे च।

लेष्टु पु० लेष्-तुन्। लोष्टे।

लेष्टुघ्न पु० लेष्टुं हन्ति हन क। लोष्टभेदके सुद्गरे। लेष्टुभेदनोऽप्यत्र।

लेह पु० लिह-घञ्। आहारे, आस्वादे (चाटा) व्यापारभेदे च। भावे ल्युट्। लेहनमप्यत्र न०।

लेहिन पु० लिह्-इनन्। टङ्कणे (सोहागा)।

लेह्य त्रि० लिह्-ण्यत्। जिह्वया आस्वाद्ये। अन्नते न०।

लैङ्ग न० लिङ्गमधिकृत्य कृतो ग्रन्थः अण्। अष्टादशसु, महापुराणेषु तृतीये पुराणे, लिङ्गं तदाकारः कन्दस्थां फलेषु यस्याः अण् ङीप्। लिङ्गिनीवृक्षे। तस्येदमण्। लिङ्गसम्बन्धे त्रि०।

लैङ्गिक त्रि० लिङ्गेनानुमापकचिह्नादिना आपादितस्तत आगतो वा ठण्। लिङ्गादिभिः कल्पिते।

लोक दीप्तौ च० उ० सक० सेट्। लोकयति ते अलूलुकत् त।

लोक दर्शने भ्वा० आ० सक० सेट्। लोकते अलोकिष्ट। चङि न ह्रस्वः। अलुलोकत।

लोक पु० लोक्यतेऽसौ लोक-घञ्। भुवनेषु, जने च।

लोकपाल पु० लोकान् पालयति पा-णिच् अण्। लोकपालके सूर्ये, इन्द्रादिदिक्पाले, विनायकादिषु पञ्चसु। लोकरक्षकमात्रे त्रि०। लोकनाथादयोऽप्यत्र।

लोकबान्धव पु० लोकानां बान्धवः सर्वकर्मप्रवर्त्तकत्वात्। सूर्ये।

लोकमाट् स्त्री० लोकानां मातेव रक्षिका। लक्ष्म्राम्।

लोकलोचन पु० लोकैर्लोक्यतेऽनेन लुच-ल्युट्। सूर्ये। ६त०। सूर्ये न०। लोकनेत्रादयोऽप्यत्र न०।

लोकबाह्य त्रि॰ बहिश्चरति बहिस्+अञ् टिलोपश्च तत्॰। लोकबहिर्भूते

लोकायत न॰ लोकेषु आयतम् विस्तीर्णम् अनायाससाध्यत्वात्। चार्वाकमते।

लोकायतिक पु॰ लोकायतं तन्मतम् अधीयते ठन्। चार्वाके।

लोकालोक पु॰ लोक्यतेऽसौ लोकः न लोक्यतेऽसौ कर्म्म॰ खनामख्याते सूर्य्यकिरणसम्पर्कसीमापर्वते। तस्य च पार्श्वयोरातपानातपसम्बन्धात्तथात्वम्।

लोकेश पु॰ ६त॰। ब्रह्मणि, रुद्रपतौ, पारदे च।

लोच दीप्तौ चु॰ उ॰ अ॰ सेट्। लोचयति ते अलुलोचत् त चङि न ह्रस्वः।

लोच दर्शने भ्वा॰ आ॰ स॰ सेट्। चङि न ह्रस्वः। लोचते अलोचिष्ट

लोचक न॰ लोच-ण्वुल्। मांसपिण्डे, अक्षितारके, कज्जले, स्त्रीणां ललाटाभरणे, नीलवस्त्रे, कर्णपूरे, कदल्यां, मूर्वायां सर्पकञ्चुके च।

लोचन न॰ लोच्यतेऽनेन करणे ल्युट्। नेत्रे। भावे ल्युट्। दर्शनक्रियायाम्। युच्। दर्शने आलोचने च स्त्री॰ टाप्।

लोचनहिता स्त्री॰ ६त॰। तुत्थाञ्जने। (तूं ते)।

लोचमस्तक पु॰ लोचते इति लोचं मस्तकं यस्य। मयूरशिखायाम्।

लोट(ड) उन्मादे भ्वा॰ पर॰ सक॰ सेट् चङि न ह्रस्वः। लोट(ड)ति। अलोटी(डी)त्।

लोणाम्लाधत्र स्त्री॰। [लोणा स्त्री॰ लवणमपेक्षते भक्षणसमये अण् ष्टृ॰। क्षुद्रान्त्रिकायाम्,

लोणार न॰ लवणमुच्छति कारणत्वेन मत्व-अण् उप॰। ष्टृ। लवणजे क्षारभेदे। [लवणे च पु॰।

लोत न॰ लू तन्। चौरधने, लोम्नि, (यमाल) चिह्ने च। नेत्राम्बुनि,

लोत्र न॰ लू-ष्ट्रन्। चक्षुर्जले, चोरितधने च।

लोध पु॰ रुध-अच् रस्य लः। खनामख्याते वृक्षे।

लोध्र पु॰ रुध-रन् रस्य लः। (लोध) ख्याते वृक्षे।

लोप पु॰ लुप-घञ्। विनाशे, छेदने, आकर्षाभावे, व्याकरणोक्ते अदर्शनरूपे नाशे च। लोपयति स्त्रीणां रूपगर्भम् कर्त्तृ। अगस्त्यपत्न्यां स्त्री॰।

लोपामुद्रा स्त्री० लुप्तं राति रा–क कर्म्म० । अगस्त्यमुनिपत्न्याम् ।
लोम् न० लुप–इनन् । स्तेयधने स्त्रीत्वमपीच्छति तत्पक्षे ङीष् ।
लोभ पु० लुभ–आकाङ्क्षायाम् घञ् । परद्रव्येषु अतिगर्धितायामभिलाषे ।
लोभिन् त्रि० लुभ–णिनि । परद्रव्येषु अतिगृध्नौ वर्त्तति ।
लोभ्य पु० लुभ–यत् । शुक्ले । लोभनीयपदार्थे त्रि० । [क्लीबे च ।
लोम न० लू–मन् । देहजाते केशाकारे रोमाख्ये द्रव्ये, तद्वति ला-
लोमकर्ण पु० लोमवत्कर्णः कर्णो यस्य शाक० । शशके ।
लोमकूप पु० लोम्नां कूप इव । रोमाधारे विवराकारे, गर्त्ते
लोमघ्न न० लोमानि हन्ति हन–टक् (टाक) रोगभेदे ।
लोमन् लू–मनिन् । देहस्थे केशतुल्ये (रोया) पदार्थे ।
लोमपाद् पु० लोमयुक्तौ पादावस्य । अङ्गदेशस्यन्तृपभेदे ।
लोमश पु० लोमानि बाहुल्येन सन्त्यस्य श । मुनिभेदे । लोमयुक्ते त्रि०
काकजङ्घायां, जटामांस्यां, वचायाम्, शुकशिम्ब्याम् यवक्षारभेदायां,
बलायां च स्त्री० ।
लोमशकाण्डा स्त्री० लोमश इव काण्डोऽस्याः । कर्कट्याम् ।
लोमशपर्णिका स्त्री०लोमशानीव पर्णानि सन्त्यस्याः ठन् । माषपर्ण्याम्
लोमशपुष्पक पु० लोमशमिव पुष्पमस्य । शिरीषवृक्षे ।
लोमहर्षण न० लोम्नां हर्षणं हर्षजनकव्यापारइव उद्भेद इति
यावत् । रोमाञ्चे । लोमानि हर्षयति उत्तमकथया हृष-णिच्-ल्यु
व्यासशिष्ये सूतवंश्ये स्वनामख्याते पौराणिके ।
लोमहृत् पु० लोमानि हरति हृ-क्विप् तुक् च । हरितालें
लोल त्रि० लोड अच् डस्य लः । सतृष्णे, चञ्चले च लिङ्गाद्यां
लक्ष्म्याञ्च स्त्री० । [(चुकोपालङ्क) ।
लोलिका स्त्री० लोडयति सेवने दत्तान् लोड-ण्वुल् । चाङ्गेर्य्याम्
लोलित त्रि० लुल-णिजर्थे णिच् क्त । चालिते ।
लोलुप (भ) त्रि० लुभ-यङ्-अच् पृ० भस्य वा पः । अतिलोभयुक्ते ।
लोष्ट संहतौ भ्वा०आ०स०सेट् । लोष्टते अलोष्टिष्ट ।
लोष्ट पु०न०लोट-घञ् अच् वा । मृत्पिण्डे (ढेला) लौहमले च

लोष्टघ्न पु० लोष्टं हन्ति हन्-क। लोष्टभेदने मुद्गरादौ।

लोष्टभेदन पु० लोष्टं भिनत्ति विभर्त्ति भिद् ल्यु। लोष्टभेदनसाधने मुद्गरादौ।

लोह पु० न० लू-विच् लौस्तं जहाति हा-क। धातुभेदे, धातुमात्रे सीसे च। अगुरुचन्दने न०।

लोहकण्टक पु० लोहमिव कण्टको यस्य। मदनवृक्षे।

लोहकार पु० लोहं तन्मयं शस्त्रादि करोति कृ-अण्। कर्मकारे एवुल्। लोहकारकोऽप्यत्र।

लोहकिट्ट न० ६त०। लौहमले। (लोहार मल)।

लोहचूर्ण न० ६त० (लोहाचुर) ख्याते पदार्थे। [हयजे कांस्ये च।

लोहज न० लोहात् लोहास्थां वा जायते जन-ड। लोहमले, धातु-

लोहद्राविन् पु० लोहानि धातुद्रव्याणि द्रावयति द्रु-णिच् णिनि। टङ्कणे (सोहागा)। धातुद्रावके त्रि०।

लोहपृष्ठ पु० लोहमिव कठिनं पृष्ठमस्य। कङ्कपक्षिणि। [मशाके।

लोहमारक पु० लोहं मारयति जारयति मृ-णिच्-ण्वुल्। शालि-

लोहल पु० लोहमिव लाति ला-क। अव्यक्तवचने, लोलाक्षके त्रि०

लोहवर न० लोहेषु सर्वधातुषु मध्ये वरम्। स्वर्णे।

लोहश्लेषण न० लोहानि स्वर्णादीनि श्लेषयति योजयति श्लिष्-णिच् ल्यु। टङ्कणे (सोहागा)। [रीत्यादौ।

लोहसङ्कर न० लोहानां धातुद्रव्याणां सङ्करो यत्र। मिश्रित धातौ

लोहाभिसा (हा)र पु० लोहेन अभिसि (च्छि)यतेऽत्र सृ(च्छृ)-वा घञ्। राज्ञां युद्धयात्रादौ शस्त्रनीराजनाविधौ।

लोहित न० रुह्-इतच् रस्य लः। कुङ्कुमे, रक्तचन्दने, तृणकुङ्कुमे, रुधिरे च। रक्तगोभाजने, रक्तवर्णे च पु० तद्वति त्रि०।

लोहितक न लोहितमिव कायति कै-क। पित्तले। लोहित+स्वार्थे कन्। पद्मरागमणौ, मङ्गलग्रहे च पु०।

लोहितचन्दन न० कर्म०। कुङ्कुमे रक्तचन्दने च।

लोहितपुच्छक पु० लोहितानि रक्तानि पुच्छाग्रस्य कप्। दाड़िमवृक्षे।

लोहितमृत्तिका स्त्री० कर्म० । गैरिके (गेरिमाटी) ।

लोहिता स्त्री० लोहित+अर्श आद्यच् । वराहक्रान्तायां, रक्त पुनर्नवायाञ्च । [च । रक्तनेत्रवति त्रि० ।

लोहिताक्ष पु० लोहिते अक्षिणी यस्य बच् समा० । विष्णौ, कोकिले

लोहिताङ्ग पु० लोहितमङ्गमस्य । मङ्गलग्रहे, काम्पिल्लवृक्षे च ।

लोहितायस् न० लोहितवर्णमेति इण् असुन् । ताम्रे ।

लोहितायस न० लोहितमयः अच् स० । ताम्रे, रक्तवर्णायो जातिभेदे च । [स्त्रियाम्

लोहिनी स्त्री० लोहितवर्णा स्त्री ङीप् तस्य नच । रक्तवर्णयुक्तायां

लोहोत्तम न० लोहेषु धातुषूत्तमम् । स्वर्णे ।

लौकायतिक न० लोकायतं चार्वाकशास्त्रं वेत्त्यधीते वा ठण् । चार्वाकमतानभिज्ञे । [प्रसिद्धे च ।

लौकिक त्रि० लोके विदितः प्रसिद्धो वा ठण् । लोकविदिते लोक-

लौकिकाग्नि पु० कर्म० । विधानेनासंस्कृते वह्नौ ।

लौड उन्मादे भ्वा०पर०सक० सेट् चङि न ह्रस्वः । लौडति अलौडीत् ।

लौह न० लोहमेव स्वार्थे अण् । (लोहा) धातुभेदे ।

लौहज न० लौहाच्छायते जन ड । मण्डूरे । [भवे पात्रभेदे ।

लौहभाण्ड पु० लोहस्य विकारः अण् कर्म० । (हामानदिस्ता) लौह-

लौहमल न० लोहस्य यमण् कर्म० । लोहकिट्टे ।

लौहित्य न० लौहितस्य भावः ष्यञ् स्वार्थे ष्यञ्वा । रक्तवर्णे, नदीभेदे स्त्री० । 'तीर्णलौहित्ये' इति रघुः ।

ल्ली क्षेपे क्रया०पा०पर०सक०अनिट् । ल्लिनाति अल्लैषीत् ।

ल्ली गतौ क्रया०पा०प०सक० अनिट् । ल्लिनाति अल्लेषीत् ।

व

व पु० वा-ड । वायौ, राहौ, मन्त्रणे, सान्त्वने, कल्याणे वलयति, वसतौ, समुद्रे, व्याघ्रे, वसने, शालूके, वन्दने च वरुणे पु०न० । साहश्ये कव्य० 'मणौ वोष्ठ्य लब्धेते, इति

वंश पु० वश-घ नि० नुम् । पुत्रपौत्राद्यपत्यवर्गे तृणजाति भेदे (बांस) पृष्ठावयवे, वर्गे, द्रव्ये सालवृक्षे च । वाद्यभेदे स्त्री० गौ० ङीष् । 'वंशीकलेन वडिशेने'ति वृन्दावनचम्पूः । [नायाम् ।

वंशकर्पूररोचना स्त्री० कर्पूरमिव रोचते रुच-ल्यु इत० । वंशरोच-

वंशलोरी स्त्री० वंशस्य क्षीरमिवास्यस्य अच् गौरा० ङीष् । वंशरोच-नायाम् ।

वंशज पु० वंशात् जायते जन-ड । वंशवृक्षजाते यवाकारे द्रव्ये । सत्कु-लजाते त्रि० । वंशरोचनायां स्त्री० टाप् ।

वंशतण्डुल पु० इत० । वेणुजाते तण्डुलाकारे पदार्थे ।

वंशधर त्रि० वंशं धरति । कुलाविच्छेदकारके वंशवर्द्धनोऽपत्ये ।

वंशनेत्र न० वंशस्येव नेत्रमस्य । इक्षुमूले ।

वंशपत्र पु० वंशस्य पत्रमिव पत्रमस्य । नखनामके तृणे इत० वंशदले न० । गाडीहिङ्गौ स्त्री०गौ०ङीष् । स्वार्थे कन् तत्रैव

वंशपत्रक न० । वंशपत्रमिव कन् । हरितालें ।

वंशपत्रपतित न० सप्तदशाक्षरपादके छन्दोभेदे ।

वंशपीत पु० वंशस्तत्पत्रमिव पीतः । कणगुग्गुलौ

वंशपुष्पा स्त्री० वंशस्य पुष्पमिव पुष्पमस्याः । सहदेवीलतायाम्

वंशपूरक न० वंशस्येव पूरकं यस्य । इक्षुमूले ।

वंशरो(लो)चना स्त्री० वंशेषु रोचते रुच-ल्यु वा रस्य लः । वंशपर्व-स्थिते श्वेतवर्णे कर्पूराकारे द्रव्ये । (वंशलोचन) ।

वंशशर्करा स्त्री० वंशस्य शर्करेव । (वंशलोचन) पदार्थे ।

वंशस्तनित न० । द्वादशाक्षरपादके छन्दोभेदे ।

वंशस्थविल न० । द्वादशाक्षरपादके छन्दोभेदे ।

वंशाग्र क० वंशस्य अग्रं मूलम् । वंशाङ्कुरे ।

वंशाङ्कुर पु० इत० । (कौंड़) इति ख्याते पदार्थे ।

वंशिक न० वंशोऽस्यत्र ठन् वंशत्व या कन् । अगुरुचन्दने

वंशीधर पु० वंशीं वंशजवाद्यं धरति भृ-अच् । श्रीकृष्णे ।

वंश्य त्रि० वंशे सत्कुले जातः यत् । सत्कुलजाते ।

वक्र कौटिल्ये अक० गतौ सक०भ्वा०आ०सेट् इदित्। वक्रते अवक्रिष्ट

वक्र पु० वक्रि-अच् पृ० नलोपः। खनामख्याते विहगे, खनामख्याते पुष्पवृक्षे, कुबेरे, राक्षसभेदे, यो भीमेन हतः। औषधादिपाचनयन्त्रभेदे, श्रीकृष्णेन हते दैत्यभेदे च।

वकजित् पु० वकं जितवान् जि-क्विप् उप०स०। श्रीकृष्णे भीमसेने च वकान्तकादयोऽप्यत्र।

वकध्वज पु० वक इव ध्वजो यूपः। वृकयूपे।

वकपञ्चक न०। कार्त्तिकशुक्लपक्षस्यैकादश्यादितिथिपञ्चके।

वकपुष्प पु० वक इव कुटिलं पुष्पमस्य। खनामख्याते पुष्पवृक्षे

वकवृत्ति पु० वकस्येव स्वार्थपरा वृत्तिश्चेष्टा यस्य। "अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः। शठो मिथ्याविनीतश्च वकवृत्तिरुदाहृत" इत्युक्तलक्षणे परवञ्चके जने।

वकव्रतधर पु० वक इव व्रतं धारयति धृ-अच्। "अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः। शठो मिथ्याविनीतश्च वकव्रतधरोद्विज" इत्युक्तौ स्वार्थसाधनतत्परे वञ्चके विप्रादौ।

वकव्रतिन् (क) पु०वकव्रत+अस्त्यर्थे इनि ठन् वा। वकव्रतधरे।

वकुल पु०वकि-कुलच् नलोपः खनामख्याते पुष्पवृक्षे। कटुकायां स्त्री०टाप्। काकाल्यां ङीप्। पृ०। वकूलोऽपि वकुले पु०

वक्ष गतौ भ्वा० आत्म०सक०सेट्। वक्षते अवक्षिष्ट।

वक्तव्य न० वच-तव्य। कुत्सिते, हीने, दुष्टे च 'दिवा वक्तव्यता पाले, इति स्मृतिः। कथनीये त्रि०। भावे क्त्र। कथने न०

वक्तृ त्रि० उचितं वक्तुं वक्ति यच-तृच्। उचितवक्तरि

वक्त्र न० वक्त्राऽनेन वृ०। मुखे, नगरभूते, वस्त्रभेदे, छन्दोभेदे च

वक्त्रभेदिन् पु०वक्त्रं भिनत्ति भिद णिनि। तिक्तरसे। सुखविदारके त्रि०

वक्त्रवास पु० वक्त्रं वासयति सुरभीकरोति वासि-णिच् घञ्। नागवल्ले क्ली०। सुखगन्धे।

वक्त्रशोधिन् पु० वक्त्रं शोधयति शुध-णिच् णिनि। जम्बीरे सुखशोधके ताम्बूलादौ त्रि०। स्त्रियां ङीप्।

वक्त्रासव पु० वक्त्रस्यासव इव । अधररसे ।

वक्र न० वक्रि-रन् पृ०नलोपः । नदीवक्रे । शनैश्चरे, भक्रजयुक्ते रुद्रे, त्रिपुरासुरे, पर्वते, कुटिलगतौ च पु० । तद्वति त्रि० 'राहुकेतू सदा वक्रा'विति ज्योतिषम् । [छायां कन् । खदिरवृक्षे ।

वक्रकण्टक पु० वक्रः कुटिलः कण्टकः कण्टकोऽस्य । बदरवृक्षे ततः सं-

वक्रखड्ग पु० कर्म० । करवाले ।

वक्रग्रीव पु०वक्रा ग्रीवा यस्य । उष्ट्रे । कुटिलग्रीववति त्रि०

वक्रपुच्छ पु० वक्रं पुच्छं यस्य । कुक्कुरे वक्रलाङ्गूलादयोऽप्यत्र ।

वक्रपुष्प न० वैकाणि पुष्पाण्यस्य । बकवृक्षे, पलाशवृक्षे च ।

वक्रशल्या स्त्री० वक्रं शल्यमिव पत्त्रादि यस्याः । कुटुञ्जिनीवृक्षे

वक्राङ्ग पु० वक्राण्यङ्गान्यस्य । हंसे । कुटिलावयववति त्रि० कर्म० कुटिलदेहे न० ।

वक्रिम न० वक्रस्य भावः इमनिच् । कौटिल्ये 'वक्रिमवक्रिम प्रेक्षित'मिति मालतीमाधवम् पृ० अदन्तोऽप्यत्र ।

वक्रोक्ति स्त्री० कर्म० । कुटिलोक्तौ, वक्रोक्तिः, वाक्यजीवितमिअलङ्का-रोक्ते काव्याङ्गे, काकुवचने च ।

वक्ष रोषे भ्वा०पर०सक० सेट् । वक्षति अवक्षीत् च ।

वक्षस् न० वह्+असुन् क्षुट् च । हृदये उरसि ।

वक्षः (क्ष)स्थल न०वक्षःस्थलमिव वा विसर्गलोपः । प्रशस्तवक्षसि

वक्षोज पु० वक्षसि जायते जन-ड । स्तने "वक्षोजपानजदि"त्युक्तेः ।

वक्षोरुह पु० वक्षसि रोहति रुह—क । स्तने ।

वख गतौ भ्वा०पर०सक० सेट् इदित् । वङ्खति अवङ्खीत् अनिदित्त्वम् वखति । अवखीत् अवाखीत् ।

वग गतौ भ्वा० पर० सक० सेट् इदित् । वङ्गति अवङ्गीत् ।

वग खञ्जे भ्वा० पर० सक० सेट् इदित् । वङ्गति अवङ्गीत् ।

वगाह पु० अव+गाह—घञ् अवातो लोपः । अवगाहने ।

वच गतौ, निन्दायाम् आरम्भे च सक० अवे अक० भ्वा० आ० सेट् इदित् । वङ्चते अवङ्चिष्ट ।

वङ्क पु० वङ्कि घञ्। नदीवङ्के। पल्ययने (पालान) स्त्री० टाप्।

वङ्क न० वङ्कि अच्। धातुभेदे (राङ्) 'रत्नाकरं समारभ्य ब्रह्मपुत्रा-न्तगं प्रिये! वङ्कदेश इति प्रोक्त' इत्युक्ते देशभेदे पु० ब० व०। चन्द्रवर्त्मे रूपभेदे पु०।

वङ्कज न० वङ्कात् जायते जन-ड। सिन्दूरे, वङ्कदेशजाते त्रि०

वङ्कशुक्लज न० वङ्कशुक्लाभ्यां वङ्कताभ्यां जायते जन-ड। वङ्कता-भिमिश्रितैकाम्ले धातौ।

वङ्कसेन पु० वङ्कमिव शुभ्रा सेना पुष्पमस्य। वकपुष्पे।

वङ्कारि पु० ६०। कुरिसाले तस्य वङ्कधातुजारत्वात्तथात्वम्।

वङ्कण पु० वङ्क-ल्युट् पृ० नुम्। जरुसन्धौ (कुच्की)

वच सन्देशे भ्वा० उभ०सक०सेट्। वाचयति ते अवीवचत् त।

वच कथने अदा०द्विक०पर०अनिट्। वक्ति। अवोचत्। वक्ता।

वचन न० वच-ल्युट्। कथने, वाक्ये, गुणद्रव्ये, व्याकरणोक्ते, संख्यार्थके सुप्तिङ्रूपे प्रत्यये च। [वचनेस्थिते वशीभूते।

वचनग्राहिन् त्रि० वचनं गृह्णाति तदनुसारेणाचरति ग्रह णिनि।

वचनीय त्रि० वच-अनीयर्। कथनीये, निन्द्नीये लोकापवादे च "वचनीयमिदं व्यवस्थितमिति" कुमारः।

वचनेस्थित त्रि० वचने वाक्ये तदुपदिष्टाचारे तिष्ठति स्था क अलुक्स०। वाक्यप्रतिपालके वशीभूते।

वचस् न० वच-असुन्। वाक्ये।

वचसांपति पु० ६त० अलुक्स०। बृहस्पतौ।

वचस्कर त्रि०वचः करोति कृ-अच् कस्कादि०। वाक्यप्रतिपालके वश्ये।

वचा स्त्री० वच-अच्। (वच) इति ख्याते द्रव्ये।

वज गतौ भ्वा०पर०सक०सेट्। वजति। अवाजीत्-अवजीत्।

व्रज गतिसंस्कारे गतौ च चुरा० उभ० सक० सेट्। वाजयति ते अवी-वजत् त।

वज्र पु० न० वज-रन्। हीरके, इन्द्रास्त्रभेदे च तच्च दधीचिं ह्य-स्थितो जातम्। बालके, धातुभेदे, काञ्जिके, वज्रपुष्पे, लौहभेदे

अभ्रभेदे. ज्योतिषोक्ते विष्कुम्भादिषु सप्तविंशतौ योगेषु सप्तमे योगभेदे च न० । कोकिलाच्छदवृक्षे, श्वेतकुष्ठे त्रीक्षणस्य प्रपौत्रे यदुवंशेत्र, रूपभेदे च पु० ।

वज्रवर्म्मन् वज्रमिव कठिनं वर्म्म यस्य । गण्डके खड्गिनि ।

वज्रतुण्ड पु० वज्राकारं तुण्डमस्य । गण्डके, गरुडे, भृङ्गे, मत्स्ये च ।

वज्रदन्त पु० वज्रमिव कठिनोदन्तोऽस्य । शूकरे, मूषिके च वज्रदशना-दयोऽप्यत्र

वज्रद्रु पु० वज्राकारोद्रुः । द्रुहीवृक्षे, वज्रद्रुमादयोऽप्यत्र ।

वज्रधर पु० वज्रं धरति धृ अच् । इन्द्रे वज्रभृदादयोऽप्यत्र ।

वज्रनिर्घोष पु० इव० । वज्रस्तनितशब्दादौ, वज्रनिर्घोषोऽप्यत्र ।

वज्रपाणि पु० वज्रं पाणौ यस्य । इन्द्रे, वज्रहस्तादयोऽप्यत्र ।

वज्रपुट न० वज्रमिव कठिनं पुटमस्य । औषधपाचनपात्रभेदे

वज्रपुष्प न० वज्राकारं पुष्पम् । तिलपुष्पे ।

वज्रपुष्पा स्त्री० वज्राकृति पुष्पं यस्याः । शतपुष्पायाम् ।

वज्रमय त्रि० वज्र स्वार्थे मयट् । अतिकठिने ।

वज्रमूली स्त्री० वज्रमिव कठिनं मूलमस्याः ङीष् । माषपर्ण्याम् ।

वज्रवल्ली स्त्री० वज्रमिव कठिना वल्ली । (हाड़जोड़ा) अस्थिसञ्चारलतायाम् ।

वज्रबीजक पु० वज्रमिव कठिनं बीजमस्य । लताकरञ्जे ।

वज्रवृक्ष पु० वज्रमिव कठिनो वृक्षः । सेण्डगण्डवृक्षे (सेंओड़ा)

वज्रा स्त्री० वज-रक् । गुडूच्याम्, द्रुह्याम्, द्रुहीं ङीषन्तोऽपि

वज्राङ्गा स्त्री० वज्रमिवाङ्गं यस्याः । गवेधुका (गरुमड़े) धान्यभेदे (हाड़जोड़ा) लतायां च । (कोकिलाच्छदवृक्षे) ।

वज्रास्थिशृङ्खला स्त्री० वज्रजनकमस्थीव शृङ्खला बन्धनं यस्याः ।

वज्रिन् पु० वज्रमस्त्यस्य इनि । इन्द्रे । [रके च त्रि०

वञ्चक पु० वञ्च-णिच्-ण्वुल् । शृगाले शठवञ्चौ च । खले, प्रतारके च त्रि०

वञ्चन न० वञ्च-ल्युट् । प्रतारणे अन्यथास्थितस्य वस्तुनोऽन्यथा रूपेण कथनादिनाऽन्यनोत्पादने । युच् । वञ्चनाऽत्र स्त्री०

वञ्च क त्रि० वञ्च-अच् । वञ्चनाशीले रज्जु० । अध्यर्थे ।

वञ्जुल पु० वञ्च-उलच् पृ० वञ्च जः । तिलिपक्षे, अशोकवृक्षे, वेतसवृक्षे, स्थलपद्मवृक्षे पक्षिभेदे च । वञ्जे त्रि० ।

वञ्जुलद्रुम पु० वञ्जुलाख्यः द्रुमः । अशोकवृक्षे ।

वञ्जुलप्रिय पु० वञ्जुलं वञ्जं प्रीणाति प्री-क । वेतसे ।

वट वेष्टने भासे च अद० चु० उभ० सक० सेट् । वटयति ते । अववटत् त

वट वेष्टने भ्वा० पर० सक० सेट् । वटति । अवटीत्-अवाटीत् ।

वट विभाजने वा चु० उभ० पक्षे भ्वा० पर० सक० सेट् । इदित् । वण्टयति ते वण्टति । अववण्टत् त अवण्टीत् ।

वट वरणे भ्वा० पर० द्विक० सेट् घटा० । वटयति । अवाटीत्-अवटीत्

वट स्तेये चौ० पर० सक० सेट् इदित् । वण्टति अवण्टीत् ।

वट पु० वट-अच् । स्वनामख्याते वृक्षे ग्रन्थनिर्मितवस्त्रे च । (वेटे)

वटक पु० वट-कन् । पिष्टकभेदे (वड़ा)

वटपत्र पु० वटस्येव पत्रमस्य । सितार्कजवृक्षे, पाषाणभेदौषधतायां स्त्री० ङीप् ।

वटी स्त्री० वट-अच् गौरा० ङीष् । गोलाकारे (वड़ी) पदार्थे स्वार्थे कन् ह्रस्वः । वटिकाप्यत्र स्त्री० ।

वटु पु० वट-उ माणवके, ब्रह्मचारिणि च ।

वटुक पु० वटु-कन् । बालके, भैरवभेदे च ।

वठ अस्वहायकरणे भ्वा० आत्म० सक० सेट् इदित् । वण्ठते अववण्ठिष्ट

वठ सामर्थ्ये भ्वा० पर० अक० सेट् । वठति । अवाठीत्-अवठीत् ।

वठर पु० वठ-अरन् । मूर्खे, अम्बष्ठे च । शठे, मन्दे च त्रि० ।

वड विभजने चु० उभ० सक० सेट् इदित् । वण्डयति ते । अववण्डत् त

वड वेष्टने विभागे च भ्वा० आ० सक० सेट् इदित् । वण्डते अवण्डिष्ट

वड आरोहणे चौ० पर० सक० सेट् । वर्डति । अवाडीत्-अवडीत्

वडभि(भी) स्त्री० वड्यते आरुह्यतेऽत्र वड-अभि वा ङीष् (सुदनि) गृहचूडायाम् प्रासादाग्रस्थगृहे च (चिलेघर) ।

वडा स्त्री० वड-अच् । स्वनामख्याते पिष्टकभेदे ।

वडिश न० वंड इन् वंडं श्यति शो-क । मत्स्यधारणार्थे वक्रलोह कण्टकयुक्ते पदार्थे, 'वडिशेन झषीरिवाक्षानि'ति छन्दोवनचक्षूः

वड्र त्रि० वल-रक् लस्य डः । दृढे । [वा छुखः ।

वण शब्दे भ्वा०पर०सक०सेट् । वणति अवाणीत्-अवणीत् । चडि

वण्ट विभाजने अदृ०चु०उभ०सक०सेट् । वण्टयति ते अववण्टत् त

वण्ट पु० वण्ट अच् । भागे, दायादेः धारकस्थाने (वाँड) अक्षतोद्वाहे त्रि० । (डेङ्गो) ।

वण्टक पु० वण्ट-घञ् । स्वार्थे कन् । भागे एवुल् । विभाजके ।

वण्ट त्रि० वण्ड-क तस्य नेत्वम् । खर्व्वे (बेंटे)

वण्ड त्रि० वडि-अच् । अक्षतोद्वाहे, हस्ताद्यङ्गविकले (बेंडे) च

वत अव्य० वा-डति । सादृश्ये वतिप्रत्ययान्तोऽव्ययार्थे अव्य० ।

वत अव्य० वन-क्त । खेदे. अनुकम्पायाम्, हर्षे, विस्मये, आमन्त्रणेच

वतंस पु०अव+तनस-घञ् अवाल्लोपः । कर्णभूषणभेदे, शेखरे, शिरोभूषणे, भूषणमात्रे च ।

वतण्ड पु० अव+तडि अच् अवाल्लोपः । हस्तिभेदे । [स्त्रियाम् ।

वतोका स्त्री० अवगतं तोकं यस्याः अवाल्लोपः । अपत्यहीनायां

वत्स न० वस-स । वक्षःस्थले । गवादिशिशौ द्वि० । वत्सरे पु०

वत्सक न० वत्स इव इवार्थे कन् । पुष्पकासीसे । कुटजे, इन्द्रयवे च

वत्सकबीज न० वत्सस्य कुटजस्य बीजम् । इन्द्रयवे ।

वत्सतर पु०स्त्री० क्षुद्रः वत्सः तरप् । क्षुद्रवत्से, अप्राप्तदमनकाले गवादौ । स्त्रियां ङीप् । वत्सतरी ।

वत्सनाभ पु०वत्सान् पशुशिशून् नभ्यति छिनत्ति नभ-अण् । विषभेदे ।

वत्सपत्तन न० वत्सस्य वत्सराजस्य पत्तनम् । उत्तरदेशस्थायां कौशाम्ब्यां नगर्याम् ।

वत्सपाल पु० वत्सान् पालयति पाल-अण् । श्रीकृष्णे ।

वत्सर पु० वस-सरन् । द्वादशमासात्मके काले ।

वत्सराज पु० चन्द्रवंश्ये नृपभेदे । "वत्सराजचरितमि"ति रत्नावली

वत्सरान्तक पु० वत्सरस्यान्तं करोति अन्त+णिच्-एवुल् । फाल्गुन-

मासे वत्सरस्य चैत्रादिकत्वात् फाल्गुनस्य तदन्तकालत्वम् ।

वत्सल त्रि० वत्सं लाति ला-क स्नेहयुक्ते वात्सल्ये रसे पु० । तद्वति त्रि० । [(गोमक) ।

वत्साक्षी स्त्री० वत्सप्रख्याक्षीवास्य अस्य षच्समा० । गोडुम्बायाम् ।

वत्सादनी स्त्री० वत्सैरद्यते भियत्वेन अद ल्युट् ङीष् । गुडूच्याम् ।

वद व्यक्तायां वाचि भ्वा० अक० अभिवादने सक० भ्वा० आ० सेट् इदित् ।

वन्दते अवन्दिष्ट ।

वद वाक्ये सन्देशे च भ्वा० उभ० सक० सेट् । वदति ते अवादीत् अवदिष्ट

वद वाचि भ्वा० पर० सक० सेट् यजा० । वदति अवादीत् उवाद ।

वद वाक्ये सन्देशे च सक० चुरा० उभ० सेट् । वादयति ते अवीवदत् ।

वद त्रि० वदति वद-अच् । वक्तरि ।

वदन न० उद्यतेऽनेन वद-करणे ल्युट् । मुखे । भावे ल्युट् कथने न०

वदा(द)न्य पु० वद-अन्य पृ० वा दीर्घः । भूरिदानशीले ।

वदाम न० वद-आमन् (वदाम) फलभेदे ।

वदाल पु० वद-आल । पाठीनमत्स्ये (बोयाल) स्वार्थे कन् तत्र

वदावद पु० अत्यन्तं वदति वद-अच् नि० द्वित्वञ्च वक्तरि ।

वध स्त्री० हन्यते पितृगेहात् पतिगृहं वह-ञ धुकच् । भार्य्यायाम् नवोढायां पुत्रजायायाम् शूद्रायां शठायाञ्च ।

वधूजन पु० कर्म० नारीजने । [ले''ति भाषापरि० ।

वधूटी स्त्री० अल्पा वधूः टी अल्पवयस्कायाम् भार्य्यां "गोपवधूटी इदू

वन सेवने सक० शब्दे अक० भ्वा० पर० सेट् । वनति अवानीत्-अवनीत् ।

वन व्यापारे भ्वा० पर० सक० सेट् उभ० घटा० । वनति अवानीत्-अवनीत् ।

वनः वानः । वनयति ।

वन याचने त्रिक० तना० आ० सेट् क्वा वेट् । वनुते अवनिष्ट ।

वन उपकारे उपतापे च सक० शब्दे अक० वाचु० उ० पक्षे भ्वा० प० सेट् । वानयति ते वनति । अवीवनत् त । अवनीत् अवानीत् ।

वन न० स्त्री० वन-अच् । इक्षुसमुदायात्मके अरण्ये । स्त्रीत्वे ङीष् ।

"श्वनी सुभ्रयदत् पिकापिके"ति नैषधम् जले, निवासे, आलये च ।

वनकदली स्त्री० ७त० । काष्ठकदल्याम् ।
वनकन्द पु० वनजातः कन्दः । अरण्यजाते शूरणे ।
वनकार्पासी स्त्री० वनोद्भवा कार्पासी । (वनकापास)क्षुपभेदे
वनकोलि पु० वनोद्भवः कोलिः । (वनकुल) वृक्षे ।
वनचन्दन न० वनस्थं चन्दनम् । अगुरुचन्दने ।
वनचन्द्रिका स्त्री० वने चन्द्रिकेव प्रकाशकत्वात् शुभ्रत्वाच्च । मल्लिकायाम् ।
वनचम्पक पु० ७त० (वनचांपा) चम्पकभेदे ।
वनज न०वने जले अरण्ये वा जायते जन-ड । पद्मे । सुस्तकभेदे, वन-शूरणे च पु० । अश्वगन्धायां, गन्धपत्रायां वनकार्पास्यां, सुद्र-पर्णिकायां च स्त्री० । वनजातमात्रे त्रि० ।
वनतिक्त पु० वनेषु वनजातेषु मध्ये तिक्तः । हरीतक्याम्, पाठायां (आकनादि) च स्त्री० । स्वार्थे कन् तत्रैव ।
वनदीप पु० वनस्य दीप इव । वनचम्पके ।
वनपल्लव पु० वनमिव निबिड़ः पल्लवोऽस्य । शोभाञ्जने ।
वनपुष्पा स्त्री० वनमिव संहतं पुष्पं यस्याः । शतपुष्पायाम् ।
वनपूरक पु० पूरकः बीजपूरकः पृथिवदलोपः वनोद्भवः पूरकः । वनबीजपूरे । [त्रि० । त्वचे न० ।
वनप्रिय पु० वनं वनस्थं प्रीणाति प्री-क । कोकिले, अरण्यप्रियमात्रे
वनभुज् पु० वनं भुङ्क्ते भुज-क्विप् । वह्नौ, तद्वामौषधे च ।
वनमक्षिका स्त्री० वनोद्भवा मक्षिका । दंशे, कीटभेदे (डांस)
वनमल्ली स्त्री० वनोद्भवा मल्ली । अरण्यमल्लिकायाम् ।
वनमाला स्त्री० 'आजानुलम्बिनी माला सर्वेषु कुसुमोज्वला मध्ये स्थूलदलाढ्या वनमालेति कीर्त्तिते'त्युक्तायां मालायाम् [स्त्री०ङीप् ।
वनमालिन् पु० वनमालाऽस्त्यस्य इनि । श्रीकृष्णे, वाराहीकन्दतायां
वनमुद्ग पु० वनोद्भवः मुद्गः । सुद्गभेदे (सुगानि) सुद्गपर्ण्यां स्त्री० गौरा०ङीप् । [कर्कटशृङ्ग्याम् ।
वनमृद्वीका स्त्री० वनस्थ मृद्वीकं मृद्वीकमिव वा स्वार्थे अच् कापि टाप् च)
वनमोचा स्त्री वनोद्भवा मोचा । काष्ठकदल्याम् ।

वनलक्ष्मी स्त्री० वनस्य लक्ष्मीरिव तदधिष्ठातृत्वात् । कदल्याम्
वनवर्बर पु० वनोद्भवः वर्बरः । कृष्णार्जके । (वनवाबुई) वृक्षे
वनवासिन् पु० वनं वासयति सुरभीकरोति वासि णिनि । शुष्ककवृक्षे, वारांहीकन्दे, शालमलीकन्दे, नीलसिन्धुकन्दे, क्षुपभनामौषधे च । वने वसति वस-णिनि । वनवासकर्तरि त्रि० ।
वनबीज पु० बीजो बीजपूरकः उत्तरपदलोपः ६त० । वनबीजपूरे ।
वनवृन्ताकी स्त्री० वनस्य वृन्ताकी वार्त्ताकी । वृक्षवृन्ताम् ।
वनव्रीहि पु० वनस्य व्रीहिः । नीवारे (उड़िधान) ।
वनशूकरी स्त्री० वनस्य शूकरीव रोमशत्वात् । कपिकच्छ्वाम् । ६त० । वनशूकरयोषिति । वनवराहे पु० । [कन् । तत्रैवार्थे ।
वनशृङ्गाट पु० वनस्य शृङ्गाट इव कण्टकाकृतेः । गोक्षुरे । स्वार्थे
वनशोभन न० वनं जलं शोभयति शुभ-णिच ल्यु । पद्मे ।
वनसङ्कट पु० सम्+कट-अच् ६त० । भल्लूके । [वनकार्पास्याम् ।
वनसरोजिनी स्त्री० वनस्य सरोजिनी पद्मिनीव शोभाकरत्वात् ।
वनस्पति पु० वनस्य पतिः ७त० सुट् । पुष्पं विना जायमानफले अश्वत्थादौ वृक्षे । [तत्रैव
वनहास पु० वनस्य हास इव प्रकाशकत्वात् । काशतृणे स्वार्थे कन
वनाखाक पु० अव+नख-उकञ् अवाल्लोपः । शुक्रे ।
वनामल पु० वनस्यामल इव । करमर्दे ।
वनाम्र पु० वनस्य आम्र इव । कोशाम्रे ।
वनायु पु० वन-आयुच् । प्रशस्तघोटकोद्भवदेशभेदे (आरब) ।
वनायुज पु० वनायुदेशे जायते जन-ड । प्रशस्तघोटके । (आरबि)
वनारिष्टा स्त्री० वनस्य न रिष्टं यस्याः । वनहरिद्रायाम् ।
वनालिका स्त्री० वनमलति भूषयति अल-ण्वुल् । हस्तिशुण्डीलतायाम् ।
वनिता स्त्री० वन-क्त नि-इट् । योषिति, अनुरक्तायां स्त्रियाञ्च
वनिन् पु० वनम् आश्रितयाऽस्त्यस्य इनि । वानप्रस्थाश्रमयुक्ते
वनीयक स्त्री० वन-इन् । आत्मनो वनिं याचनमिच्छति क्यच्ण्वुल् । याचके । पु० यलोपः । वनीकोऽप्यत्र ।

वनेचुद्रा स्त्री० ७त० अलुक्स० । करञ्जे ।

वनेचर पु० वने चरति चर-अच् अलुक्स० । अरण्यचारिणि व्याधादौ

वनेसर्ज्जा पु० सृजति-सृज-अच् ७त० अलुक्स० । असनवृक्षे ।

वनोद्भवा स्त्री० वन एव उद्भवति उद्+भू अच् । वनकार्पास्याम् । वनजाते त्रि० ।

वनौकस् पु० वनमेव ओकः स्थानं यस्य । वानरे । वनवासिनि त्रि०

वन्च प्रतारणे भ्वा० पर० सक० सेट् ङ्ला वेट् । वञ्चति अवञ्चीत्

वन्दन न० वदि-ल्युट् । स्तवने प्रणामे च । युच् । वन्दनाप्यत्र स्त्री०

वन्दनीय त्रि० वदि-अनीयर् । नमनीये, स्तवनीये च पीतभृङ्गराजे पु० । गोरोचनायां स्त्री० ।

वन्दा स्त्री० वदि-कर्म्मणि घञ् । (परगाछा) लताभेदे ।

वन्दाका स्त्री० वदि-आकन् वन्दायाम् । गौ० ङीप् वन्दाकीत्यपि तत्र

वन्दारु त्रि० वदि आरु । वन्दनशीले । [वन्दने च ।

वन्दि (न्दी) स्त्री० वदि-इन् वा ङीप् । कारावद्धमनुष्यादौ (कएदी)

वन्दिपाठ पु० वन्दिं स्तुतिं पठति पठ-अण् । स्तुतिपाठके ।

वन्दिन् पु० वन्दते स्तौति णिनि । राजादेः स्तुतिपाठके ।

वन्द्य त्रि० वदि-यत् । वन्दनीये । गोरोचनायाम् स्त्री० ।

वन्य न० वने भवः यत् । त्वचे (दारचिनि) । वनशूरणे वाराह्यां कन्दे, देवनले च पु० । वनजातमात्रे त्रि० । वनानां जलानां समूहः यत् । जलसमूहे स्त्री० ।

वप बीजवपने, तन्तुवपने मुण्डने च सक० भ्वा० उभ० अनिट् यजा० । वपति-ते अवापीत् अवप्त । उप्तिमः ।

वपन न० वप-ल्युट् । केशकृन्तने, तन्त्वाधाने च

वपनी स्त्री० उप्यतेऽनया अत्र वा वप ल्युट् ङीप् । नापितास्त्रे, तन्तुशालायां, (तान्तवर) वन्द्यभेदे (भाक) च । [इति स्मृतिः ।

वपा स्त्री० वप-अच् । मेदसि (चरबि) छिद्रे च । 'वपाया हविष'

वपुस् न० उप्यन्ते देहालङ्कारभोगसाधनबीजीभूतानि कर्म्माण्यत्र वप-उसि । शरीरे, प्रशस्ताकारे च ।

वपुष्टमा स्त्री० अतिशयेन वपुः प्रशस्ताकृतिः तमप् मत्वम् । पद्मचारिण्याम् लतायाम् ।

वप्र पु० वप-तृच् । जनके, क्षेत्रीयले च । बीजादिवापके त्रि० ।

वप्र पु०न० उप्यतेऽत्र रन् । दुर्गनगरादौ परिखाया उद्धृतमृत्तिकास्तूपे । क्षेत्रे, रेणौ, तटे, शीसके च न० । जनके, प्राचीरे, प्रजापतौ च पु० । मञ्जिष्ठायाम् स्त्री० ।

वभ्र गतौ भ्वा० पर० सक० सेट् । वभ्रति अवभ्रीत् ।

वम उद्गारे भ्वा० पर० सक० सेट् फणा० ज्वला० । वमति अवमीत् । ट् वमथुः । ण वामः ।

वमथु पु० वम अथुच् । वमने ।

वमन न० वम-ल्युट् । मर्दने, अर्दने, आङ्क्तौ, अधिकनिस्सारणे च 'स्वर्गाभिस्यन्दवमन'मिति कुमारः । गणे पु० । जलौकायां स्त्री० गौ० ङीष् ।

वमि स्त्री० वम-इन् अर्दने । अग्नौ पु० । धूर्त्ते त्रि० ।

वमित पु० वम-णिच् क्त । छर्दितोद्गारे ।

वय गतौ भ्वा० आ० सक० सेट् । वयते अवायिष्ट ।

वयस् न० अज-असुन् धीभावः । विरुद्धे, बाल्याद्यवस्थायाम् 'वयोतिपातोद्गतवाते'ति नैघण्टम् यौवने च ।

वय (यः) स्य पु०स्त्री० । 'वयस्था नागरासङ्गा'दिति वैद्यकम् ।

वयस्य पु० वयसा तुल्यः यत् । समानवयस्के । सख्यां स्त्री० ।

वयुन न० वय-उनन् । ज्ञाने देवतागारे पु० ।

वयोधस् पु० वयो यौवनं धत्ते धा-असुन् । तरुणे ।

वर ईप्सायां अदन्तु० उ० सक० सेट् । वरयति ते अवरयत् त ।

वर न० व्रियते इष्ट-अप् वर-वञ् वा । कुङ्कुमे, मनोभीष्टे "वरं प्राणान् परित्यज्ये' इति तन्त्रम् । भावे अप् वर-घञ् वा । इच्छायाम् याचने, आवरणे, वेष्टने च । कर्मणि अप् । अभीष्टे, श्रेष्ठे च त्रि० । जारे, श्वशुरे, जामातरि, पत्यौ च पु० ।

वरक पु० वृ-वुन् । वनवृक्षे, पर्पटे, तृणधान्यभेदे (चीना) वस्त्रभेदे च ।

वरचन्दन न० कर्म० । कालीये, देवदारुणि कुलुम्भबीजे च ।

वरट न०इ-अटन् । कुन्दपुष्पे । कीटभेदे (बोलता) हंसे च पु०स्त्री०

वरण न० इ-ल्युट् । कन्यादिदानाय जामात्रादेरभ्यर्थनानुकूले व्यापारभेदे (वेष्टन) ऋत्विगादेः क्रियासु नियोगाय पूजनादौ, उष्ट्रे, प्राकारे, वरुणवृक्षे च । आशीस्ये नदीभेदे (सांको) ख्याते पदार्थे च स्त्री० । [मध्यवेदौ च ।

वरण्ड पु० इ-अण्डच् (वयसफोड़ा) मुखरोगभेदे मातृकयुद्धार्थे

वरण्डक पु०न० इ-अण्डच् । स्वार्थे कन् । वरण्डशब्दार्थे वर्त्तुले, भित्तौ च । विशाले, कृपणे, भीते च त्रि० ।

वरण्डालु पु० वरण्ड + आलु । एवरण्डवृक्षे ।

वरतिक्त पु० वरः श्रेष्ठस्तिक्तो रसो यस्य । कटजवृक्षे । पाठायां (आकनादि) स्त्री० । स्वार्थे कन् तत्रैव ।

वरत्रा स्त्री० इ-अत्रच् । हस्ति कक्षास्थरज्जौ ।

वरत्वच पु० वरा त्वचा यस्य । निम्बवृक्षे ।

वरद त्रि० वरं ददति दा-क । अभीष्टदातरि, प्रसन्ने च । तच्चिह्नसूचके हस्तादिविन्यासरूपे मुद्राभेदे न० अभयं वरदञ्चैव दक्षिणे' इति तन्त्रम् । कन्यायाम्, अगस्त्यायाम्, आदित्यभक्तायां, दुर्गायाञ्च स्त्री० ।

वरदाचतुर्थी स्त्री०माघशुक्लचतुर्थ्याम् । तामधिकृत्य 'चतुर्थीवरदा नाम तत्रां गौरी सुपूजिते' ति स्मृतिः ।

वरफल पु० वरं फलमस्य । नारिकेले वृक्षे । कर्म० । श्रेष्ठे फले न०

वरमुखी स्त्री० वरं मुखं यस्याः ङीप् । रेणुकानामगन्धद्रव्ये ।

वरम् अव्य० इ-अम् । ईषदर्थे । [पतिम्बरायां कन्यायाञ्च

वरम्बरा स्त्री० वरं वृणोति खच् । (चाकुलिया) चक्रपर्णाम् ।

वररुचि त्रि० वरा रुचिर्यस्य । श्रेष्ठदीप्तिमति । पाणिनिसूत्र वार्त्तिककारे कात्यायनमुनौ, विक्रमादित्यसभास्थे पण्डित भेदे च,

वरलब्ध पु० वरः उत्कर्षः पुष्पेषु लब्धो येन परनि० । चम्पके प्राप्तवरे त्रि० ।

वरला स्त्री० वरटा+पृ० टस्य लः । हंस्यां (वोलना) कीटभेदे च गौरा० ङीष् । हंस्याम् । [कस्तियाम् ।

वरवर्णिनी स्त्री०वरः श्रेष्ठोवर्णः प्रशंसाऽस्त्यस्याः इनि । उत्त-

वरवाह्लीक न० कर्म० । कुङ्कुमे ।

वरा स्त्री०इ अच् । हरितक्यामलकीवयस्थारूपे फलभिदे । रेणुका-नामगन्धद्रव्ये, गुडूच्याम्, मेदायां, ब्राह्म्याम्, विडङ्गे, पाठा-यां, हरिद्रायाञ्च ।

वराक पु० वृ-घाकन् । शिवे । युद्धे न० । अवरे, शोचनीये च त्रि०

वराङ्ग न०कर्म्म० । मस्तके । वियते आव्रियते गुप्यते वृ-अप्, कर्म० । गुह्ये योनौ, गुडत्वचि च । हृष० । गजे विष्णौ कामदेवे च पु० । श्रेष्ठावयवयुक्ते त्रि० । संज्ञायां कन् । गुडत्वचि (दारचिनि) न० हरिद्रायाम् स्त्री० गौ०ङीष् ।

वराङ्गिन् पु०वराङ्गमस्त्यस्या इनि । अस्त्रवेतसे । श्रेष्ठाङ्गवति त्रि०

वराट पु० वरमल्पमटति अट-अण् । कपर्द्दे । क्षुद्रो वराटः ङीप् । क्षुद्रकपर्द्दे, स्वार्थे कन् । तत्पर्य्ये 'वराटकानां दशकद्वयं यदि' इति लीलावती अट— ण्वुल् । पद्मबीजकारे कोषे, रज्ज्वां च पु० ।

वराटकरजस् पु० वराटके इव रजोऽस्य । नागकेशरे वृक्षे

वरादन न० वरै र्न्दैरद्यते अद ल्युट् । राजादने (पयासाल)

वराम्र पु० वरः आम्र इव । करमर्द्दे ।

वरारोह पु० वर आरोहो मध्यं यस्य । हस्तिनि । प्रशस्तनितम्ब-वत्यां स्त्रियां च स्त्री० ।

वरारोहि पु० वरमावरणमस्त्यस्य अच-इन् । स्थूलवस्त्रे ।

वरासन न० वराय वरणीयायास्यते क्षिप्यते अस-ल्युट् । जवापुष्पे । कर्म० । उत्तमे आसने न० । वं पयिमस्यति अस ल्यु । शिङ्गे, जारे पु० । वरान् श्रेष्ठानपि अस्यति दूरीकरोति ल्यु । द्वारपाले पु० ।

वरासि पु० वराया वरणीयायास्यते अस-इन् । स्थूलवस्त्रे ।

वराह पु० वराय अभीष्टाय पुष्टादिलाभाय आहन्ति खनति भूमिम्

आ+हन-ड । सूकरे, यज्ञवराहाख्ये भगवतोऽवतारभेदे च ।
पर्वतभेदे, तुलसे, शिशुमारे, वाराहीकन्दे, द्वीपभेदे च ।
वराहकन्द पु० वराहस्य कं सुखं ददाति । खनामख्याते वृक्षभेदे ।
वराहक्रान्ता स्त्री० वराहाणां क्रान्ताऽभीष्टा । वराहकन्दे ।
वराहक्रान्ता स्त्री० वराहेण क्रान्तेव । लज्जालुलतायाम् ।
वराहिका स्त्री०वराहो भक्षकत्वेनास्त्यस्याः ठन् । कपिकच्छ्वाम् [याम् ।
वराही स्त्री० वराहो भक्षकत्वेनास्त्यस्या अच् गौरा०ङीष् । भद्रमुस्ता-
वरिवस् न० वृ-वसुन् नि० वृट् च । पूजने । [पूजते ।
वरिवसि (स्यि)ति त्रि० वरिवः स्तुजनं करोति क्यच्-क्त वा यलोपः ।
वरिवस्या स्त्री० वरिवस् +क्यार्थे क्यच् अ । पूजने शुश्रूषायाम्
वरिष्ठ त्रि० अतिशयेन उरुः इष्ठन् वरादेशः । उरुतमे । तित्तिरि-
विल्वे पु० । आदित्यभक्तायां स्त्री० ।
वरी स्त्री० वरी शतावरी पूर्वपदलोपः । शतावर्याम्, सूर्य्यभक्तायाञ्च
वरीयस् त्रि० अतिशयेन उरुः ईयसु वरादेशः । उरुतमे
विल्वकन्दादिषु मध्ये योगभेदे पु० ।
वरी (री)वर्द्ध पु० वृध-वड्-लूक् अच् पृ० रस्य वा लः । वृषभे ।
वरुड पु० वृ-उडन् । अन्त्यजजातिभेदे 'रजकस्यर्म्मकारस्य नटोवरुड
एव चे'ति स्मृतिः । [जले, सूर्य्ये च ।
वरुण पु० वृ-उनन् । पश्चिमाशापतौ जलेशे खनामख्याते, देवभेदे,
वरुणात्मजा स्त्री० वरुणस्य जलस्यात्मजेव जन्यत्वात् । जलभवे मद्ये ।
वरुणानी स्त्री० वरुणस्य पत्नी ङीप् आनुक् च । वरुणपत्न्याम्
वरूथ न० वृ-ऊथन् । तनुत्राणे वर्म्मणि । रथगुप्तिस्थाने परप्रहार-
रक्षार्थमाहते स्थाने पु० ।
वरूथिनी स्त्री० वरूथोऽस्त्यस्याः इनि । सेनायाम् ।
वरेण्य न० वृ-एन्य । कुङ्कुमे । प्रधाने, प्रार्थनीये च त्रि० ।
वरोट न० वराण्यटानि दलान्यस्य । मल्लिकापुष्पे ।
वर्कर पु० वृक-अरन् । तरुणपशौ, मेषशावके, छागशावे च ।
वर्ग पु०वृज-घञ् । सजातीयसमूहे यथा मनुष्यवर्गः पशुवर्गः । समान-

वर्गाभिः प्राग्वत्प्राग्भिः कृते संघे च यथा कवर्गः चवर्गः। अन्यपरिच्छेदे यथा स्वर्गवर्गः पातालवर्गः। अङ्कशास्त्रोक्ते समानाङ्कद्वयस्य परस्परगुणने, यथा द्विकस्य चत्वारि, त्रिकस्य नव, चतुष्कस्य षोडश, इत्यादि। "वर्गे मूलं पदं क्षिप्तिमिति लीलावती। त्यागे च।

वर्गमूल न० वर्गस्य समद्विघातात्मकस्य मूलम्। अङ्कशास्त्रप्रसिद्धे समाङ्कद्वयेन हतायाः कृतेः सङ्ख्यायाः यन्मूल घातात्मकं तत्। यथा षोडशानां चत्वारि, नवानां त्रयः चतुर्णां द्वौ इत्यादि।

वर्गोत्तम पु० वर्गेषु षट्सु क्षेत्रादिषु उत्तमः नवांशः। 'चराणां प्रथमे चांशे स्थिराणां पञ्चमे तथा द्व्यात्मकानाञ्च नवमे वर्गोत्तम इति स्मृत, इति ज्योतिषोक्ते त्रिंशांशकात्मकराशेर्नवांशभेदे।

वर्च दीप्तौ भा०आ०अक० सेट्। वर्चते अवर्चिष्ट। [विशायाम्।

वर्चस् न० वर्च-असुन्। रूपे, शुक्रे, तेजसि, विष्ठायाञ्च, संज्ञायां कन्

वर्चस्विन् त्रि० वर्चस्+अस्त्यर्थे विनि। तेजस्विनि।

वर्जन न० वृज-ल्युट्। त्यागे, मारणे, हिंसायां च।

वर्ण स्तुतौ विस्तारे शुक्लादिवर्णकरणे व्यक्तीकरणे दीपने च अद० चु० उभ० स० सेट्। वर्णयति ते वर्णयते ते अवर्णयत् त

वर्ण वर्णने चु०उभ०सक०सेट्। वर्णयति ते अवर्णयत् त।

वर्ण न० वर्ण-घञ्। कुङ्कुमे। ब्राह्मणादिजातौ, शुक्लादिरूपे, भेदे, अकारादिअक्षरे च पु०। करणादौ घञ्। यशसि, गुणे, अनुरागे च। स्वर्णे, व्रतभेदे, विलेपनद्रव्ये च। भावे घञ्। विलेपने, स्तुतौ, गीतक्रमे, चित्रे च।

वर्णक न० वर्णयति वर्ण-ण्वुल्। हरितालें, अनुलेपनयोग्ये पिष्टे हृदे वा चन्दनादौ द्रव्ये च। किङ्कुमादौ पु० स्त्री० मण्डने न०। एकस्यैव स्तवादेः मध्यान्तरव्याख्यानरूपे ग्रन्थभेदे न० 'लिपिसङ्ख्यानं तृतीयवर्णके, इति वितात्तरा। [कन्। मध्याधारे।

वर्णकूपिका स्त्री० वर्णानामक्षराणां लेखनाय क्षुद्रः कूपः कूपी लेव

वर्णचारक पु० वर्णं शुक्लादिरूपं चारयति चर णिच्-ण्वुल् चित्रकरे।

वर्णज्येष्ठ पु० वर्णेषु ज्येष्ठः प्रथमस्तत्प्रधानत्वात् । ब्राह्मणे, विप्रे । स्वस्रा-पेक्षया श्रेष्ठवर्णे त्रि० 'वर्णज्येष्ठा च या नारी''ति स्मृतिः

वर्णतूलि(ली) स्त्री० वर्णानां लेखनसाधनं तूलिः । लेखन्याम् स्वार्थे कन् । अत्रैव ।

वर्णद न०वर्णं ददाति दा-क । कालीयके गन्धद्रव्ये । वर्णप्रदे त्रि०

वर्णदात्री स्त्री०वर्णं रूपं ददाति दा-तृच् ङीप् । हरिद्रायाम् वर्णदातरि त्रि० ।

वर्णदूत पु० वर्णा एव दूतो यत्र । लिपौ

वर्णधर्म पु०न०ह्त० । विप्रादीनामसाधारणे धर्मे यथा विप्रस्य याजनाध्यापनप्रतिग्रहादि, क्षत्रियस्य प्रजापालनादि ।

वर्णसङ्कर पु० संकीर्यते सम्+कृ-अप् वर्णतः सङ्करः । विप्रादिभ्यो वर्णेभ्योऽनुलोमप्रतिलोमजाते मूर्द्धाभिषिक्तादौ जातिभेदे 'जायते वर्णसङ्करः, इति गीता ।

वर्णा स्त्री०प्रशस्तवर्णोऽस्त्यस्याः फलपुष्पादौ अच् । आटक्याम् ।

वर्णाङ्का स्त्री० वर्णा अक्षराणि अङ्क्यन्तेऽनया अङ्क-अच् । लेखन्याम् ।

वर्णात्मन् पु० वर्ण आत्मा स्वरूपं यस्य । ध्वन्यात्मकाविलक्षणे अकारा-दिक्षरे शब्दभेदे

वर्णार्ह पु० वर्णं स्तुतिमर्हति अर्ह- -अण् । स्तुते ।

वर्णिका स्त्री०वर्णा अक्षराणि लेख्यत्वेन सन्त्यस्याः ठन् । लेखन्याम्

वर्णित त्रि० वर्ण-क्त । स्तुते, कृतवर्णने, रूपान्तरमापादिते च

वर्णिनी स्त्री०प्रशस्तवर्णः अस्त्यस्याः इनि ङीप् । हरिद्रायाम्

वर्णिन् पु०वर्णोऽस्त्यस्य इनि । चित्रकरे, लेखके ब्रह्मचारिणि च 'अथाहं वर्णी विदितो महेश्वर' इति कुमारः विप्रादि जातौ च 'वर्णिभिं हि बधो यत्रेति स्मृतिः ।

वर्त्तक पु०वृत-ण्वुल् । (भारुइ) पक्षिभेदे । वर्त्तकाभ्यत्र अस्त्र क्षुरे च ।

वर्त्तन न०वृत-ल्युट् । स्थितौ । भिच्-भावे ल्युट । स्थापने ।

चिच्–करणे–ल्युट् । जीवनोपाये न० । तक्रपीठे स्त्री० ङीप् । ल्यु । इत्तिमति, वर्त्तिष्णौ च त्रि० । वार्त्तकी पु० ।

वर्त्तनी स्त्री० वर्त्तते पादादिक । वृत–चिच्–आधारे ल्युट् । पथि

वर्त्तमान पु० वृत–शानच् । कालभेदे यद्व्यापारोपाधारे आरब्धा परिसमाप्ते काले । तत्कालवृत्तौ त्रि० ।

वर्त्तलोह न० वर्त्तयते वृत-णिच्-अच् कर्म० । आवर्त्तनयोग्ये लौहभेदे

वर्त्ति (र्त्ती) स्त्री० वृत-इन् व ङीप् । लेखे, नयनाञ्जने, गात्रानुलेपने, दीपदशायाञ्च ।

वर्त्तिक पु० वृत-ठिकन् । (बटेर) विहगभेदे । वर्त्मनि वर्त्तते वृत, अच् वर्त्तः तत्र साधुः स्थितो वा ठन् । भारे ।

वर्त्तिन् त्रि० वृत, णिनि । वर्त्तनशीले ।

वर्त्तिष्णु त्रि० वृत-ष्णुच् । वर्त्तनशीले । [तद्वृत्तौ त्रि० ।

वर्त्तिष्यमाण पु० वृत शानच् स्युटः सन्नेति स्युट् । भविष्यत्काले ।

वर्त्तुल त्रि० वृत-उलच् । गोलकारे पदार्थे । स्पृक्षने न० । कलायभेदे पु० । तर्कुपीठाम् स्त्री० गजपिप्पल्याम् स्त्री० ङीप् ।

वर्त्मन् न० वृत-मनिन् । पथि, आचारे, 'आ मनोर्वर्त्मनः इति रघुः । नेत्रच्छदे च ।

वर्त्मनि स्त्री० वृत-अनि स्युट् च । पथि ।

वर्द्ध छेदने, पूरणे च चु०उ०स०सेट् । वर्द्धयति ते अवर्द्धत् त ।

वर्द्ध पु० हृध-अच् । ब्राह्मणाम् (बामनहाटि) घञ् । पूरणे, छेदे च ।

वर्द्धक पु० हृध-एवुल् । ब्राह्मणयष्टौ (बामनहाटी) पूरके, छेदके च ।

वर्द्धकि पु० हृध-अच् कप डि कर्म० । त्वष्टरि (छुतार) ।

वर्द्धकिन् पु० वर्द्धकः वर्द्धोऽस्यास्य इनि । त्वष्टरि (छुतार) जातिभेदे ।

वर्द्धन न० हृध-ल्युट् । छेदने, पूरणे च । हृध-णिच्-ल्यु । हृद्धिकारके त्रि० । 'करोमि श्रितिवर्द्धनं मिति भट्टिः । हृध-ल्यु । हृद्धियुक्ते त्रि० ।

वर्द्धनी स्त्री० वर्द्धयतेऽनया हृध-णिच्-ल्युट् । संमार्ज्जन्याम्, वनलतामेदे च (बदना)

वर्द्धमान पु० हृध-शानच् । शरावसम्पुटे । हृद्धियुक्ते त्रि० । शराव

(ऋत्वात्मभेदे) विष्णौ, धनिनां, गडूचीभेदे, देशभेदे, नगरभेदे च इन्द्रियुक्ते त्रि०।

वर्द्धापन न० वर्द्धं छेदं करोति वर्द्ध+णिच्-आप् च ततोभावे ल्युट्। नाडीच्छेदनकर्म्माङ्गे संस्कारभेदे।

वर्द्धित न० वृध-णिच्-क्त। छेदिते, पूरिते, प्रस्तुते, च।

वर्द्धिष्णु त्रि० वृध-इष्णुच्। वृद्धिशीले।

वर्म्म न० वृध-इन्। चर्म्मणि। चर्मरज्जौ स्त्री० ङीष्।

वर्ष्फ गतौ वधे च भ्वा०पर०सक०सेट्। वर्ष्फति अवर्ष्फीत्।

वर्म्मकण्टक पु० वर्म्म इव कण्टकोऽस्य। वर्बुरे।

वर्म्मकषा स्त्री० वर्म कषति अच्। (चामकषा) सन्नद्धायाम्

वर्म्मन् न० वृ-मनिन्। कवचे सन्नाहे। क्षत्रियोपाधौ पु०।

वर्म्महर पु० वर्म्म हरति हृ-अच्। सन्नाहधारणयोग्ये अवस्थाभेदे तरुणे।

वर्म्मित त्रि० वर्म करोति णिच्-क्त। कृतसन्नाहे, उद्युक्ते च।

वर्य्य त्रि० वृ-यत्। प्रधाने, श्रेष्ठे च। कामदेवे पु०। पीताम्बरायां कन्यायां, कन्यामात्रे च स्त्री०

वर्वणा स्त्री० वरिति वर्णति शब्दायते अच्। (भणभणे) मक्षिकाभेदे।

वर्व(र्ब)र न० वर्व(र्ब)-अरच्। हिङ्गुले, पीतचन्दने, गन्धरसे च। पामरे, मूर्खे च त्रि० 'ग्राम्यमिच्छन्ति वर्बरा' इत्युद्भटः। देशभेदे(वाउरी) देशभेदे क्षत्रियजातौ। (कालतुलसी) वृक्षे च पु०। संज्ञायां कन्। चन्दनभेदे, शाकभेदे च पु०। पुष्पभेदे, मक्षिकाभेदे च स्त्री० (बाबुइ) वृक्षे स्त्री० टाप् ङीप् वा।

वर्वा(र्बा) स्त्री० वर्व(र्ब) अच्। (बाबुइ) वृक्षभेदे।

वर्बुर पु० वर्व-उरच्। (बावला) वृक्षभेदे।

वर्ष पु० न० वृष-अच्। वृष्टौ जम्बुद्वीपांशभेदे जम्बुद्वीपे च। कर्षरि अच्। मेघे, द्वादशमासात्मके काले च। प्रभवादिषु षष्टिवत्सरेषु पु०।

वर्षकेतु पु० वर्षस्य केतुरिव। रक्तपुनर्नवायाम्।

वर्षपर्व्वत पु० वर्षाणां चिह्नभूतः सीमाभूतो वा पर्वतः। 'हिमवान्

हेमकूटश्च निषधो मेरुरेवच । चैतः कर्णी च मङ्गली च खलैते वर्ष-पर्वता' इत्युक्तेषु पर्वतेषु ।

वर्षप्राकिन् पु० वर्षेण पाकोऽस्यस्य इनि । आम्रातकवृक्षे । तस्य हि शुक्लोद्गमात् प्रायेण वत्सरानन्तरं फलपाकः ।

वर्षपुष्पा स्त्री० वर्षकाले पुष्पमस्याः । गुडूच्यौषधितायाम् ।

वर्षप्रिय पु० वर्षं प्रियोऽस्य । चातकपक्षिणि ।

वर्षवर पु० वर्षं रेतोवर्षं वृष्णोति आदत्ते वृष—अच् । 'ये त्वल्पसत्त्वा पशवस्तदात्मीयाः स्त्रीस्वभाविनः । जीत्वा न दुष्टाः कार्येषु ते वै वर्षवराः स्मृता' इत्युक्तलक्षणे राजामात्यः पुरस्कृते पशुभेदे (खोजा) 'नष्टं वर्षवरैरि'ति रत्नावली ।

वर्षवृद्धि पु० वर्षस्य वृद्धिरधिकता यस्मिन् । जन्मतिथौ, तद्दिनकर्त्तव्ये पूजादौ च । 'युगाद्या वर्षवृद्धिश्चे'ति स्मृतिः ।

वर्षा स्त्री० ब०व० । वर्षन्ति मेघा अत्र । श्रावणभाद्रात्मके मासद्वये ऋतौ 'वर्षासु च मघासु चे'ति स्मृतिः ।

वर्षाङ्गी स्त्री० वर्षासु अङ्गमस्याः । पुनर्नवायाम् ।

वर्षापगम पु० वर्षाणामपगमो यत्र । शरत्काले ६त० । वर्षाऽवसानौ

वर्षाभव पु० वर्षासु भवति भू—अच् । रक्तपुनर्नवायाम् ।

वर्षाभू पु० वर्षासु भवति भू—क्विप् । भेके, इन्द्रगोपे, गुडूचीलतायाञ्च । पुनर्नवायां, भेक्याञ्च स्त्री० । वर्षाभवमात्रे त्रि० । तस्यां पुनर्नवा-यामपि स्त्री० ङीप् ।

वर्षाभद्र पु० वर्षासु माद्यति मद—अच् । मयूरे ।

वर्षिष्ठ त्रि० अतिशयेन वृद्धः वृद्धन् वर्षादेशः । अतिशयवृद्धे

वर्षीयस् त्रि० अतिशयेन वृद्धः । वृद्ध+ईयसु वर्षादेशः । अतिवृद्धे स्त्रियां ङीप् ।

वर्षुक त्रि० वृष—उकञ् । वर्षणशीले ।

वर्षोपल पु० वर्षस्य वृष्टेरुपलः प्रस्तर इव । करकेषु । (शिल)

वर्ष्मन् न० वृष्—मनिन् । देहे ।

वर्ह वधे सक० दीप्तौ अक० चु० उभ० सेट् । वर्हयति—ते अवर्हत् त

बर्ह उत्कर्षे भ्वा० आ० सक० सेट्। वर्हते अवर्हिष्ट।

बर्ह न० वर्ह–अच्। मयूरपिच्छे, अन्यिपर्णे हत्ये, अग्नौ, दीप्तौ, यज्ञे च

बर्हि(र्हिः)कुसुम न० बर्हिरिव कुसुममस्य ष्ठ० सलोपः। अन्यिपर्णे। बर्हिः पुष्पादयोऽप्यत्र।

बर्हिपुष्प न० बर्हिः बर्हिरिव पुष्पमस्य। अन्यिपर्णे।

बर्हिशुष्मन् पु० बर्हिःकुशः शुष्म बलमस्य। वह्नौ कुशेन हि वह्निरुद्दीप्यते। [स्त्रीवेरे।

बर्हि(र्हिः)ष्ठ न० बर्हिरिव तिष्ठति स्था–क वा विसर्गलोपः षत्वम्।

बर्हिण पु० बर्हमस्त्यस्य इन। मयूरे। इनि। 'बर्हीत्यपत्र

बर्हिर्ज्योतिस् पु० बर्हिषा कुशेन ज्योतिरस्य। वह्नौ।

बर्हिर्मुख पु० बर्हिर्वर्हिर्मुखं यस्य। देवे तद्धारैव हि देवा हविरश्नन्ति।

बर्हिषद् पु० ब० व० बर्हिषि विप्रपाणिस्थेऽग्नौ अदन्ति बर्हिस् अद–क्विप् ष्ठ०। पितृगणभेदे 'अग्निष्वत्ता बर्हिषदश्चापरा आज्यपास्तथेति स्मृतिः।

बर्हिष्केश पु० बर्ह–दीप्तौ इसुन् बर्हिः दीप्तिमान् केशो यस्य। वह्नौ

बर्हिस् क्ली० बृहि इसुन् नि० नलोपश्च। वह्नौ बर्हिषि रजतं न देय' मिति स्मृतिः। अन्यिपर्णे, चित्रके च (चिते) कुशे पु० न०। 'बर्हिर्दैवसदन'मिति स्मृतिः बर्ह–इसुन्। दीप्तियुक्ते त्रि०

बल संवरणे भ्वा० आ० सक० सेट् वा घटा०। बलते अबलिष्ट

बल न० बल्यतेऽनेन बल–क सैन्ये, बलशब्दार्थे च।

बलक्ष पु० बल–क्विप अक्ष–अच् कर्म०। धवले वर्णे तद्वति त्रि०

बलभि(भी) स्त्री० बल्यते आच्छाद्यते बल–अभि वा ङीप्। बलभीशब्दार्थे गोपालस्याम्।

बलय पु० न० बल–अयन्। हस्तपादकटकादौ। उत्तरपदस्थः तदाकारवेष्टने यथा भूबलयम्। वेष्टनभूम्नोः, गोले च।

बलयित त्रि० बलयमिव आचरितम् बलय–कि–क्त। वेष्टिते।

बला स्त्री० बल–अच्। (वेड्डाला) ओषधिभेदे।

बलाक पु० स्त्री० बल–आकन्। बकपक्षिणि स्त्रियां टाप्।

वलाहक पु० वारि वहति वह० । बलाहकशब्दार्थे मेघादौ
वलिर त्रि० वल—अच् वलं संवरणमस्यास्य इरन् । वेकरे ।
वलिश न० वलिना उपकारद्रव्येण श्यति नश्यति । बडिशशब्दार्थे
वलीक न० वल्यते संव्रियतेऽनेन ईकन् । वनीकशब्दार्थे पटले
वलन त्रि० वलं देहोत्थापनमस्यास्य अनच् । बलविशिष्टे ।
वल्क भाषणे चु० उ० द्वि० सेट् । वल्कयति ते अववल्कत् त ।
वल्क न० वल-संवरणे कच् कस्य नेत्वम् । वृक्षादीनां त्वचि, वल्कले,
मत्स्यानां त्वचि शल्के (आंइस) स्वरूपे च ।
वल्कतरु पु० वल्काय तरुः । पट्टिकालोध्रे, गुवाकवृक्षे च ।
वल्कद्रुम पु० वल्कप्रधानोद्रुमः । भूर्जपत्रवृक्षे । [(छाल) पुं० न०
वल्कल न० वल-कलन् कस्य नेत्वम् । त्वचे । (दारचिनि) वृक्ष त्वचि
वल्कलीध्र पु० वल्कमयो लोध्रः । पट्टिकालोध्रे ।
वल्ग गतौ प्लुतगतौ च भ्वा० पर० सक० सेट् । वल्गति अवल्गीत्
वल्गा स्त्री० वल्ग-अ । (लागाम) अश्वमुखस्थे रज्जुभेदे ।
वल्गित न० वल्ग-क्त । अश्वस्य गतिभेदे, गमने, वल्गुभाषणे च ।
वल्गु पु० वल-संवरणे उ-गुक् च । काके । मत्कोहरे त्रि० । संज्ञायां
कन् । चन्द्रने, वने, पद्मे च न० । चारुणि सुन्दरे च त्रि० ।
वल्गुपत्र पु० वल्गूनि पत्राणि यस्य । वनमुद्गे ।
वल्भ भक्षणे भ्वा० आत्म० सक० सेट् । वल्भते अवल्भिष्ट ।
वल्मीक पु० वल-ईकि मुट् च । } कीटविशेषकृते मृत्तिका स्तूपे
वल्मीक पु० वल-ईक मुट् च । } (उयेर ढिपि,।)
वल्यु(ल्य)ल छेदने पवित्रमाकरणे च यद० चुरा० उभ० सक० सेट् ।
वल्यु(ल्य)लयति ते अववल्यु(ल्यू)लत् त ।
वल्ल संवरणे भ्वा० आ० सक० सेट् । वल्लते अवल्लिष्ट ।
वल्ल पु० वल्ल—घञ् । गुञ्जात्रयपरिमाणे 'वल्लस्त्रिगुञ्जं कृति लीला०
वल्लकी स्त्री० वल्ल—कन् गौ० ङीष् । वीणायाम् सल्लकीवृक्षे च ।
वल्लभ पु० वल्ल—अभच् । दयिते, अध्यक्षे, उत्तमार्थे च ।
वल्लभपाल पु० वल्लभं पालयति पाल—अण् । अश्वपाले ।

वल्लर न० वल्ल—अरन् । क्षणायुरुचि, गहने वृक्षे च ।

वल्लरि(री) स्त्री० वल्ल अरिन् वा ङीप् । मञ्जर्य्यां, लेखिकायां च ।

वल्लव पु० वल्ल अच् तं वाति वा-क । गोपे, पाचके, भीमसेने च ।

वल्लि(ल्ली) स्त्री० वल्ल-इन् वा ङीप् । लतायाम् पृथिव्याञ्च दीर्घनखुः अजमोदायां, कैवर्त्तिकायाम्, चव्ये च ।

वल्लीज न० वल्ल्यां जायते जन-ड । मरिचे ।

वल्लीदूर्वा स्त्री० वल्लिरूपा दूर्वा । मालादूर्वायाम् ।

वल्लीवदरी स्त्री० वल्लीरूपा वदरी । भूमिवदर्य्याम् ।

वल्लीमुङ्ग पु० वल्लीप्रधानः मुङ्गः । वनमुङ्गे (मुगानि)

वल्लीवृक्ष पु० वल्लीव दीर्घो वृक्षः । सालवृक्षे ।

वल्लुर न० वल्ल-उरन् । कुञ्जे, मञ्जर्य्यां, क्षेत्रे, निर्जनस्थाने गाढ़ले, गहने च ।

वल्लूर त्रि० वल्ल-ऊरन् । आतपादिना शुष्कमांसे, शूकरमांसे, वनक्षेत्रे, वाढ़ने, उषरभूमौ च ।

वल्लूरा स्त्री० वल्ल-यत् । धात्रीवृक्षे ।

वल्वज पु० वलते भुवं वेष्टयति वल-क्विप् तादृशः सन् यजति गच्छति यज-अच् । उलपे तृणभेदे । (वाउड़) वृक्षभेदे स्त्री० ।

वल्ह दीप्तौ चु०उ०अक०सेट् । वल्हयति ते अवल्हत्—त ।

वल्ह उत्कर्षे भ्वा० आ०अक०सेट् । वल्हते अवल्हिष्ट ।

वव पु० वा-ड पृषोदरे द्वित्वम् । ज्योतिषोक्ते तिथ्यङ्गभेदे प्रथमे करणे ।

वश स्पृहायाम् अदा०पर०सक०सेट् खपा० । वष्टि अवाशीत् अवशीत् ।

वश पु० न० वश-अच् । आयत्तत्वे, प्रभुत्वे च आयत्ते त्रि० ।

वशंवद त्रि० वशं वशकरं मधुरं, वशोऽहमिति वा वदति वद-अच् मुम् च । प्रियवाक्यवादिनि, मधुरवादिनि, 'तवाहं वशं' इति वादिनि च ।

वशक्रिया स्त्री० वशस्य क्रिया करणम् ञ-ग । वशीकरणे ।

वशग त्रि० वशं गच्छति गम—ड । वशीभूते ।

वशवर्त्तिन् त्रि० वशे वर्त्तते वृत—णिनि । वशीभूते ।

वन्ध्या(स्या) स्त्री० वन्ध्—(वस)-क्यङ्। बन्ध्यायां योषायां, कन्यायां, करिण्यां, स्त्रीगव्याञ्च।

वन्ध्रिक त्रि० वन्ध्रोऽस्यस्य ठन्। भृत्ये आयत्ते च अगुरुचन्दने स्त्री०।

वन्ध्रित्व न० वन्ध्रिनो भावः त्व। स्वातन्त्र्ये, ईश्वरस्य ऐश्वर्यभेदे च। तल्। वन्ध्रिताऽप्यत्र स्त्री०।

वन्ध्रिन् त्रि० वन्ध्रोऽस्यस्य इनि। जितेन्द्रिये, स्वाधीने, स्वतन्त्रे च।

वन्ध्रिर न० वन्ध्र—इरन्। साम्नद्रलवणे गजपिप्पल्याम्, चव्ये च। पु०

वन्ध्रि(रि)ष्ठ पु० अतिशयेन वन्ध्री इष्ठन् इनेर्लुक् पु० या० यस्य सः। अतिशयजितेन्द्रियतायुक्ते मुनिभेदे।

वन्ध्रीकरण न० अवन्ध्राः वन्ध्राः क्रियतेऽनेन वन्ध्र—च्वि—कृ—ल्युट्। तन्त्रादुक्ते वशतासम्पादके मणिमन्त्रादौ।

वन्ध्रीर पु० वन्ध्र-ईरन्। गजपिप्पल्याम्।

वन्ध्य न० वन्ध्र-यत्। लवङ्गे। आयत्ते त्रि०।

वप बप्ते भा०पर०सक०सेट्। वपति अवपीत् अवापीत्।

वषट् अव्य० वह-डषटि। देवोद्देशकहविस्त्यागे।

वषट्कार पु० वषट्+कृ घञ्। देवोद्देशकत्यागरूपे यज्ञे।

वषट्कृत त्रि० वषट् इति कृतम् कृ-क्त। हुते।

वष्क गतौ भा०आ०सक०सेट्। वष्कते। अवष्किष्ट।

वष्कय पु० वष्क-अयन्। एकहायने वत्से।

वष्कयणी स्त्री० वष्कयमेकहायनवत्सं नयति स्थानान्तरं नी-ड गौ-ङीष् णत्वम्। चिरप्रसूतायां गवि। [तायां गवि।

वष्कयिणी स्त्री० वष्कय एकहायनो वत्सोऽस्यस्या इनि। चिरप्रसू-

वस नम्रतायां अक० बप्ते सक० चु० उभ० सेट्। वासयति ते अवीवसत् त

वस स्नेहे दिवा० पर०सक० सेट्। वस्यति अवसत् अवासीत् क्वा वेट्।

वस निवासे भा० पर० सक० अनिट् यजा०। वसति अवात्सीत्

वस आच्छादने अदा० आ० सक० सेट् यजा०। वस्ते अवसिष्ट।

वस वासने अद०चु० उभ० सक० सेट्। वासयति वै अवसत् त।

वसति (ती) स्त्री० वस-अति वा ङीप्। वासे यस्मिन्नाम्, वसतौ-

वसिषे'ति रघुः, निकेतने, स्थाने च।

वसन न० वस-ल्युट्। वस्त्रे, छादने निवासे, वस्त्रभूषणे च

वसन्त पु० वस-झ। मधुमाधवाख्ये ऋतुभेदे, रागभेदे च।

वसन्तक पु० वसन्ते कायति कै-क। श्योनाकवृक्षे।

वसन्तकुसुमाकर पु० प्रमेहरोगनाशके औषधभेदे।

वसन्तजा स्त्री० वसन्ते जायते जन-ड। माधवीलतायाम्।

वसन्ततिलक न० चतुर्दशाक्षरपादके छन्दोभेदे।

वसन्तदूत पु० वसन्तस्य दूत इव। कोकिले, आम्रवृक्षे, पञ्चमस्वरे च माधवीलतायाम्, पाटलीवृक्षे, गणिकारिकायाञ्च स्त्री० ङीप्।

वसन्तद्रु पु० वसन्तस्य प्रधानः द्रुः। आम्रवृक्षे। वसन्तद्रुत्वादयोऽस्य

वसन्तसख पु० वसन्तस्य सखा अच् समा०। कामदेवे।

वसा स्त्री० वस, अङ्। मांसजाते, देहस्थे, धातुभेदे मेदसि, मांसरोहिण्यां लतायाञ्च।

वसु न० वस उ। धने, रत्ने, दृढौषधे, श्यामे, स्वर्णे, जले च। वकवृक्षे स्वर्ये, यज्ञे, रश्मौ, गणदेवताभेदे, अष्टसङ्ख्यायाञ्च पु०। मधुरे, शुक्ले च त्रि०। दीप्तौ, दृढौषधौ च स्त्री०। वसुदेवताके धनिष्ठानक्षत्रे पु०।

वसुक पु० वसु इव कायति कै-क। अर्कवृक्षे वकवृक्षे च।

वसुच्छिद्रा स्त्री-वसुसङ्ख्यानि च्छिद्राण्यस्याः। महामेदायाम्

वसुदेव पु० वसुना दीव्यति दिव-अच्। श्रीकृष्णजनके यादवे क्षत्रियभेदे।

वसुदेवभू पु० वसुदेवात् भवति भू-क्विप्। श्रीकृष्णे वसुदेवसुतादयोऽस्य

वसुधा स्त्री० वसूनि धीयन्तेऽस्यां धा-क। पृथिव्याम्

वसुधारा स्त्री० वसोश्चेदिराजस्य प्रियार्थं धारा इतादिस्रवसन्ततिः। माङ्गल्येषु चेदिराजवसुहेतुना दीयमानायां घृतादिधारायाम्।

वसुन्धरा स्त्री० वसूनि धारयति धृ-खच् मुम् च। पृथिव्याम्

वसुमती स्त्री० वसूनि सन्त्यस्यां मतुप्। पृथिव्याम्।

वसुवृक्ष पु० वसूनां वृक्ष इव। वकवृक्षे। [अथवस्तृ त

वस्त्र वधे गतौ च सक०याचने ह्वि०चु० उभ० सेट्। वस्त्रयति ते

वस्त पु० वस्त्यते बध्यते वस्त घञ्। छागे।

वस्तक न० वस्त इव कायति कै-क। लिङ्गमलवणे।

वस्तकर्ण पु० वस्तस्य कर्ण इव पत्त्रमस्य। सालवृक्षे।

वस्तगन्धा स्त्री० वस्तस्येव गन्धोऽस्याः। अजमन्धायाम्।

वस्तमोदा स्त्री० वस्तस्येव मोदो यस्याः। अजमोदायाम्।

वस्ति पु० वस्से आदत्तेति मूत्रम् वस-तिच्। नाभेरधोभागे मूत्राधारे स्थाने, वासे च बहुवचनदर्शनात् स्त्री० ब० व०।

वस्तिकर्म्माढ्य पु० वस्तिकर्मणा तच्छोधनव्यापारेणाढ्यः। अम्बष्ठवृक्षे।

वस्तिमल न० वृत०। मूत्रे

वस्तु न० वस-तुन्। द्रव्ये। पदार्थे, तत्त्वपदार्थे च।

वस्तुक न० वस्तु+स्वार्थे कन्। वास्तुके शाकभेदे, श्वेतपल्लीशाके च

वस्त्य न० वस्तौ साधु यत्। वृक्षे।

वस्त्र न० वस-ष्ट्रन्। परिधानाद्युपयुक्ते कार्पासादौ वसने।

वस्त्रकृत्रिम न० वस्त्रनिर्म्मितं कृत्रिमं यत्र। वस्त्रगृहे (तँबु)।

वस्त्रगृह न० वस्त्रनिर्म्मितं गृहम् शाक०। (तँबु) वस्त्रनिर्म्मिते गृहे।

वस्त्रग्रन्थि पु० वृत०। नीव्याम्।

वस्त्रपुत्रिका स्त्री० वस्त्रनिर्म्मिता पुत्रिका। वस्त्रनिर्म्मितपुत्तलिकायाम्।

वस्त्रभूषणा स्त्री० वस्त्रस्य भूषणं यस्याः ५ ब०। मञ्जिष्ठायाम्। साकरण्ड वृक्षे पु०।

वस्त्ररञ्जन पु० वस्त्रं रञ्जयति रञ्ज-णिच्-ल्यु। कुसुम्भे।

वस्त्र न० वस-नन्। वेतने, द्रव्ये च। धने, त्वचि स्त्रियाञ्च मूल्ये पु०

वस्त्रसा स्त्री० वस्त्रंस्यति श्रो-क। स्नायौ। [द्यां कुबेरपुर्य्यांश्च।

वस्त्रौकसारा स्त्री० वस्त्रनामौकस्य सारो यत्र। इन्द्रनगर्य्याम् इन्द्रन-

वह द्रोग्नौ चु० उ० अक० सेट् इदित्। वंहयति ते अवंहिष्ट।

वह प्रापणे भा० उ० द्विक० यजा०यनिट्। वहति ते अवाक्षीत् उवाह।

वह पु० उह्यतेऽनेन वह-अच्। वृषस्कन्धदेशे, घोटके, वाह्यौ, पथि, नदे च।

वहल पु० वह-अलच्। पोते, दृढे त्रि०।

बहलगन्ध न० बहलो दृढो गन्धो यस्य । शल्लकीवृक्षे । [डरिशल्लकी ।

बहलचक्षुस् पु० बहलानि चक्षुषीव पुष्पाण्यस्य । मेषशृङ्ग्यां (गा-

बहलत्वच पु० बहला कठिना त्वचा यस्य । श्वेतलोध्रे ।

बहला स्त्री० बहलानि पुष्पादीनि बन्यस्य अर्श आद्यच् । बहुपुष्पा-यास् स्यूलैलायाञ्च ।

बहित्र न० वह-इत्र । पोते जलयाने । स्वार्थे कन् । अत्रैवार्थे

बहिरङ्ग न० बहिः प्रकृतेर्बाह्यमङ्गं यस्य । व्याकरणोक्ते प्रत्ययादिनि-मित्तके प्रकृत्युत्तरावयवादिकार्य्ये ।

बहिरिन्द्रिय न० बहिर्देशाद्बाह्यस्य पदार्थस्य ग्राहकमिन्द्रियम् । गन्धादिबाह्यविषयग्राहकेषु श्रोत्रादिषु ।

बहिर्मुख त्रि० बहिः बाह्यविषये सुखं प्रवणता यस्य । बाह्यविषया-सक्तमनस्के विषयासक्ते जने, विमुखे च ।

बहिस् अव्य० बह-इसुन् । बाह्ये ।

बहुडक पु० बह-अच् बहः एडुक इव शब्दत् कारण्डो यस्य विभीतकवृक्षे ।

बह्नि पु० बह-नि । अग्नौ, चित्रकवृक्षे, भल्लातके, निम्बूके तन्त्रो-क्ते रकारे च । "वर्गाद्यं बह्निसंस्थमिति ध्यायाक्षोक्तम् ।

बह्निकारी स्त्री० बह्निं देहस्थबह्निं करोति डदीपयति क ट ङीष् । धातकी वृक्षे (धाइफुल) बह्नुद्दीपके त्रि० ।

बह्निवाह न० बह्नेर्दाह्यदाहानुकूलं वाहम् । दाह्यानुरूपि ।

बह्निगन्ध पु० यस्मौ दाहकाले गन्धो यस्य । यज्ञभूपे (धुना)

बह्निगर्भ पु० बह्निर्गर्भे यस्य । वंशे, शमीवृक्षे स्त्री० ।

बह्निज्वाला स्त्री० बह्नेर्ज्वालेव पीडाकारकत्वात् । धातकीवृक्षे

बह्निदीपक पु० बह्निं देहस्थबह्निं क्षेपनाद्दीपयति दीप णिच् एवुल् बह्निरिव दीप्यति दीप-ण्वुल् वा । कुलुम्भे अन्यु-द्दीपके त्रि० अजमोदायाम् स्त्री०

बह्निनी स्त्री० बह्निं नयति नी-ड गौ०ङीष् । जटामांसास्

बह्निपुष्प स्त्री० बह्निरिव तापकं पुष्पं यस्य । धातकीवृक्षे ।

बह्निभोग्य न०६त० । हृते ।

वह्निमन्थ पु० वह्नये वह्निजननाय मथ्यतेऽसौ मन्थ-घञ्। गणिकारीवृक्षे।
वह्निमित्र पु० वह्निर्मित्रं यस्य। वायौ ६त०। तत्रैव न०
वह्निरेतस् पु० वह्नौ निषिक्तं रेतो येन। शिवे। वह्नौ हि निषिक्तात् शिवबीर्य्यात् गङ्गादिसंक्रमेण कार्त्तिकेयोत्पत्तिः।
वह्निलोहक न० वह्नेः प्रियं लोहं धातुः स्वार्थे कन्। कांस्ये
वह्निवधू स्त्री० ६त०। अग्निभार्य्यायां स्वाहायाम् तदात्मके मन्त्रे च। वह्निजायादयोऽप्यत्र।
वह्निवर्ण न० वह्नेरिव वर्णोऽस्य रक्तोत्पले।
वह्निवल्लभ पु० वह्नेर्वल्लभ इवोपकरणत्वात्। सर्ज्जरसे, (धुना)
वह्निवीज न० वह्नेर्हस्तस्थवह्नेर्बीजमिव उद्दीपकत्वात्। जीरके, वह्निदेवताके तन्त्रोक्ते रकारे च। [धातक्यां स्त्री०।
वह्निशिख न० वह्नेरिव रक्ता शिखाऽस्य। कुसुम्भे। फलिन्यां,
वह्निसख पु० ६त०। वायौ। देहस्थवह्नेरुद्दीपके जीरके।
वह्न्य न० वह्नि यत्। शकटे, वाहनमात्रे च। [ते अवीवपत् त।
वा सुखाप्तौ अक० गतौ सेवने च सक० चुरा० उभ० सेट्। वापयति ते गमने हिंसने च अदा० पर० सक० अनिट् वाति अवासीत्।
वा अव्य० वा-का विकल्पे सादृश्ये, अवधारणे, समुच्चये, वितर्के, पादपूरणे च।
वांशिक पु० वंशी तद्वादनं शिल्पमस्य ठक्। वंशीवादनशीले
वांशी स्त्री० वंशे भवः अण् ङीप्। वंशरोचनायाम्।
वाक पु० वच-घञ्। वचने 'नमोवाके प्रशाखे' इत्युत्तरचरितम् ग्रन्थभेदे च "वाकोवाक्ये तिङन्तेत्यादि' छान्दोग्यम्। वकस्येदम् अण्। वकसम्बन्धिनि त्रि०। [क्राकुच) औषधिभेदे।
वाकुची स्त्री० वाति क्विप् वाः कुच-सङ्कोचे क गौ०ङीष् कर्म०।
वाकर्यति पु०६त०। इङ्गितज्ञे, वाचः पतिरिव। निर्दोषोद्धतवचनयुक्ते।
वाक्पथ पु० वाचः पन्थाः विषयः अच् समा०। वाक्यविषये
वाक्पारुष्य न० वाचा पारुष्यम्। 'देशजातिकुलादीनामाक्रोशोल्लु-

युतम् । यदुवचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते' इत्युक्तलक्षणे अष्टादशविवादान्तर्गते विवादभेदे ।

वाक्य न० वच-ण्यत् चस्य कः । वाक्यं साद्योग्यताकाङ्क्षायुक्तः पदोच्चय' इत्युक्ते स्वार्थबोधसमाप्ते पदसमुदाये ।

वाञ्छ स्पृहायां भ्वा० पर० सक० सेट् इदित् । वाञ्छति अवाञ्छीत्

वागीश पु० वाचामीशः । बृहस्पतौ "वागीशाद्याः सुमनसः इति त्र्यम्बकयमाला । सरस्वत्यां स्त्री० 'वागीशा हृदये यस्येति श्रीधरः ।

वागीश्वर पु० ६त० । बृहस्पतौ गुरौ च तत्पत्न्यां सरस्वत्यां स्त्री० ङीप् 'वागीश्वरी सतुल्लातां फुल्लेन्दीवरलोचनाम् । वागीश्वरेण संयुक्ता'मिति तन्त्रम् ।

वागुजी स्त्री० वाचा गुज्यते ध्वन्यते गुज क गौरा० ङीष् । सोमराज्याम् ।

वागुरा स्त्री० वा हिंसने उर गन् च । मृगबन्धनपाशादौ ।

वागुराबृत्ति पु० वागुरा मृगबन्धनपाशादिरेव वृत्तिर्जीविका यस्य । व्याधे ।

वागुरिक पु० वागुरा प्रहरणं यस्य वागुरयाचरति वा ठक् । व्याधे

वाग्डम्बर पु० ६त० । वाक्यस्तोमे बहुलवाक्ये च ।

वाग्दण्ड पु० वाचो वागिन्द्रियस्य दण्डः संयमनम् । मितभाषणे वाक्यसंयमे च । [यां कन्यायाम्

वाग्दत्ता स्त्री० वाचा दत्ता । विधिना वाक्प्रलापेन दातुं कृतसङ्कल्पा-

वाग्दुष्ट त्रि० वाचा दुर्वचनेन दुष्टः । शुद्धेऽपि वस्तुन्यशुद्धरूप तया कथनेन दूषिते । 'वाग्दुष्टं भावदुष्टं च वर्जयेदिति स्मृतिः

वाग्देवता स्त्री० वाचां देवता । सरस्वत्यां वाग्देवता चरितचित्रित-चित्तसद्मेति जयदेवः । वाग्देव्याद्योऽप्यत्र ।

वाग्मिन् त्रि० वाच्+अस्त्यर्थे ग्मिनि चस्य कः तस्य लोपः । प्रशस्त-वाक्यकारि । बृहस्पतौ पु० । [सदनं चरेदिति स्मृतिः

वाग्यत त्रि० वाचि वागिन्द्रियव्यापारो यतो येन । मौने 'वाग्यतश्चि-

वाङ्मय त्रि० वाक्स्वरूपम् मयट्चस्य कः । वाक्यस्वरूपे शास्त्रे ।

वाङ्मती स्त्री० 'हिमाद्रेरुत्तरात् प्रोक्ता वाङ्मती नदी'त्युक्तौ नदीभेदे । या च त्रिस्रोताद्रेरुद्भिद्यमानतया वर्त्तते ।

वाचंयम त्रि० वाचां यच्छति वाचा+यम-ख मुम् हुस्वश्च । मितभाषिणि । मौनावलम्बिनि मुनौ पु० ।

वाचक पु० वक्ति अभिधाशक्त्या बोधयति ण्वुल् । 'साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचक' इत्युक्ते शब्दभेदे । कथके त्रि० । वाचयति यच-णिच्-ण्वुल् । पुराणादिपाठके त्रि० 'वाचकः पूजितो येनेति पुराणम् । [पठने स्त्री० ।

वाचन न० वच-णिच् स्वार्थे वा णिच्-ल्युट् । पठने कथने च युच् ।

वाचनिक त्रि० वचनेन निर्वृत्तम् ठक् । वाक्य निष्पादिते पापादौ ।

वाचस्पति पु० ६त० अलुक् स० । बृहस्पतौ ।

वाच् (चा) स्त्री० उच्यतेऽसौ अनया वा वच-क्विप् नि० वा टाप् । वाक्ये, वागिन्द्रिये च ।

वाचाट त्रि० वाक्+कुत्सायां वाहुल्येऽर्थे आटच् भत्वात् न कः । कुत्सितबहुभाषिणि । चालच् । वाचालोऽप्यत्र । [पापादौ ।

वाचिक त्रि० वाचा कृतम् वाच्+ठक् भत्वात् न कः । वाक्यनिष्पादिते

वाचोयुक्ति स्त्री० ६त० अलुक् स० । वाचादर्थितयुक्तौ वाक्य नैर्मल्ये च

वाच्य न० वच-भावे ण्यत् न कः । दूषणे, प्रतिपादने, कथने च । कर्म्मणि ण्यत् । दूष्ये, प्रतिपाद्ये, अभिधया बोध्यार्थे च ।

वाछ काङ्क्षे भ्वा०पर०सक०सेट् इदित् । वाञ्छति अवाञ्छीत् ।

वाज न०वज-घञ् । अन्ने, हते, जले, यज्ञे च । शरपक्षे, वेगे च पु० ।

वाजपेय पु० न० वाजमन्नं हतं वा पेयमत्र । यागभेदे ।

वाजपेयिन् पु० वाजपेय+अस्त्यर्थे इनि । वाजपेययागकर्त्तरि उपचारात् तद्वाच्ये च ।

वाजसनेयिन् पु० वाजसनेयः अध्येतृत्वेनास्त्यस्य इनि । यजुर्वेद शाखाभेदाध्यायिनि विप्रादौ । तदुक्तरीत्या कर्म्मार्हे सूत्रे च 'सूत्रं वाजसनेयिनः इति स्मृतिः ।

वाजिदन्त पु० वाजिनां दन्त इव पुष्पमस्य । वासके । स्वार्थे कन् तत्रैव

वाजिन् पु० वाजः वेगः पक्षो वा अस्त्यस्य इनि । घोटके, बाणे, वासके च वेगवति त्रि० । स्त्रियां ङीप् । सा च अश्वगन्धायाम् ।

वाजिन न० वाजिभ्योदेयम् अण्। अग्निहोत्रानिःक्षुतजले 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति श्रुतिः।

वाजिपृष्ठ पु० वाजिन इव पृष्ठमस्य। अश्वारूढे।

वाजिभक्ष पु० भक्ष्यते भक्ष-कर्म्मणि घञ् ह्रस्व०। चणके।

वाजिभोजन पु० वाजिभिर्भुज्यते भुज-कर्म्मणि ल्युट्। शुक्ले।

वाजीकरण न० अवाजी वाजीव क्रियतेऽनेन वाजिन्+च्वि कृ-ल्युट्। 'यद्द्रव्यं पुरुषं कुर्य्यात् वाजिवत् सुरतक्षमम्। तद्वाजीकरणं ख्यातमि'त्युक्ते वीर्य्यवृद्धिकारके औषधभेदे।

वाञ्छा स्त्री० वाञ्छि-अ।। इच्छायाम् इष्टसाधनताधीजन्येऽभीष्टविषये चित्तवृत्तिभेदे।

वाट वट-घञ्। पथि, स्थाने, वृतिस्थाने च। गौ०ङीप्। वास्तुभूमौ स्त्री०।

वाटिका स्त्री० वट-एवुल्। वास्तुभूमौ (वेड़ियाला) क्षुपे, क्षिङ्ग-पत्त्रवृक्षे च।

वाट्या स्त्री० वाट्यै हिता तत्र साधुर्वा यत्। (वेड़ियाला) क्षुपभेदे।

वाट्याल पु० वाटीमलति भूषयति अल-अण्। (वेड़ियाला) क्षुपभेदे गौरा० ङीप् तत्रैव स्त्री०। एवुल्। तत्रैवार्थे पु०।

वाड आप्लावे भ्वा०आ०अ०सेट् परस्मै न ह्रस्वः। वाडते अवाडिष्ट।

वाड़वेय पु० वड़वायां भवः ढक्। सगुद्रस्थे अश्वीमुखजेऽनले।

वाढ़ न० वह-क्त निं० अतिगये, तनुके त्रि०। पृ० मान्तत्वम्। प्रतिज्ञायां, स्वीकारे च अव्य०।

वाण पु० वण-घञ्। शरे, गवांस्तने, दैत्यभेदे, केवले, वञ्चौ, कागड़ावयवे, भद्रमुञ्जे, कादम्बरीप्रन्थकारके-कविभेदे च 'पञ्च वाणस्तु वाण' इति प्रसन्नराघवम्। नीलझिण्टयां पु० स्त्री०।

वाणपुर न० ह्रस्व०। शोणितपुरे कोट्टरीपुराख्ये पुरभेदे।

वाणवार पु० वाणं परशुक्षुरं वारयति चु० ह-अण्। योधादेर्वोलाकारे सन्नाहे कवचे। [जिदादयोऽप्यत्र।

वाणहन् पु० वाणं हतवान् हन-ताड़ने भूते क्विप्। श्रीकृष्णे वाण-

वाणि स्त्री० वच–क्विप् वा ङीप् । वचने, वाक्यदण्डे, वेतनादौ, ङीप् । वाक्ये, तद्देवतायाञ्च । [तै अवबालात् त ।

वात गतौ सेवायां हिंसीकरणे च सक० अद०चु०उभ०सेट् । वातयति **वात** पु० वा–क्त । स्पर्शमात्रविशेषगुणके भूतभेदे पवने, देहस्थे धातुभेदे च । गन्धरि त्रि० । जारे, धृष्टनायके च 'प्रभातवाताकृतीति भट्टिः ।

वातक पु० वात इव चञ्चलः इवार्थे कन् । अश्वत्थवृक्षे जारे च ।

वातकिन् त्रि० वातोऽस्त्यस्य इनि कुक् च । वातरोगयुक्ते ।

वातकेतु पु० इत० । धूलौ रजसि ।

वातघ्नी स्त्री० वातं रोगभेदं हन्ति हन–टक् ङीप् । वालपर्णाम् (वालपानि) अश्वगन्धायां, शिरुड़ीलुमे च ।

वातध्वज पु० इत० । मेघे ।

वातपोथ पु० वातं रोगभेदं पुष्यति हिनस्ति पुष–अण् । पलाशवृक्षे ।

वातप्रमी स्त्री० वातं प्रमिणोति प्र+मा–ई किच्च । शीघ्रगे मृगे ।

वातमज पु० वातमनुलक्ष्य अजति अज–अच् व्यभावः । मृगभेदे ।

वातमृग पु० वातानुगो मृगः शाक० । शीघ्रगे मृगभेदे ।

वातरक्त न० वातजं दुष्टं रक्तम् रुधिरं यत्र । रोगभेदे । [रसोक्त) ।

वातरक्तघ्न पु० वातजरक्तं रोगभेदं हन्ति टक् । कुक्कुरवृक्षे (कुकु-

वातरक्तारि पु० इत० । (गुलुञ्च) ख्यातायां लतायाम् ।

वातरङ्ग पु० वातस्येव सततं रङ्गश्चलनमस्य । चलदले अश्वत्थवृक्षे ।

वातरायण पु० वा क्त ततस्तरप् वातरमयनं यस्य यत्वम् । उन्मत्ते, प्रयोजनशून्ये पुरुषे, काण्डे, करपात्रे, कुटे, सरलद्रुमे च ।

वातरूष पु० वातेन रूष्यते रूष–घञ् । वातूले, उल्लोचे, इन्द्रचापे च ।

वातल पु० वातं रोगभेदं लाति ला–क । चञ्चले । वायुकारके द्रव्ये त्रि० । [वातरोगे ।

वातव्याधि पु० वातेन कायस्थधातुभेदेन जनितो व्याधिः शाक० ।

वातादु पु० वाताय वातनिवृत्तयेऽद्यतेऽसौ अद–घञ् (वादाम) फलवृक्षे ।

वातारि पु० अगस्त्यनाशितेऽसुरभेदे । 'वातारिर्भक्षितो येन वातापिश्च

महाबलः । वस्तुतः शोषितो येन स मेऽगस्त्यः प्रसीदत्विति भोज-नान्ते पाठमन्त्रः ।

वातापिसूदन पु० वातापिं सूदयति हिनस्ति सूद-ल्यु । अगस्त्ये मुनौ

वातामोदा स्त्री० वातेनामोदो यस्याः । कस्तूर्याम् ।

वातायन न० वातस्यायनं गतिर्येन । गवाक्षे वातस्येव शीघ्रमयनं गतिरस्य । अश्वे पु० ।

वातायु पु० वातमयते अय-उण् । हरिणे ।

वातारि पु० वातस्य रोगभेदस्यारिः । एरण्डवृक्षे, शतमूल्यां, सेफालिकायां, यवान्यां, भार्ग्यां, सुरसायां, विड्डङ्गे, पूरणे, भल्लातके, जतुकायाञ्च ।

वाताश्व पु० वात इव शीघ्रगोऽश्वः । आशुगतिके अश्वोत्तमे ।

वाति पु० वा क्तिच् । वायौ ।

वातिक पु० वातादागतः ठक् । देहस्थवायुधातुजन्ये रोगभेदे ।

वातिग पु० वातिं वायुं गच्छति गम ड । वार्त्ताकौ गम-क्च् वातिगमोऽप्यत्र । [वार्त्ताकी ।

वातिङ्गण पु० वातिं देहस्थवातं सेवनात् गणयति गण खच । मुम् च

वातीय न० वाताय वातनिवृत्तये हितः छ । काङ्क्षिके ।

वातुल पु० वातानां समूहः उलच् । वातसमूहे ।

वातूल त्रि० वात+अस्त्यर्थे उलच् । वातरोगयुक्ते उन्मत्ते समूहार्थे उलच् वातसमूहे पु० । [वायुकीने त्रि० ।

वातोना स्त्री० वातमूनयति ऊन अण् । गोजिह्वायुपे वातनोनः ।

वात्या स्त्री० वातानां समूहः यत् । वातसमूहे 'वितत्य वात्यामय-चक्रे'ति नैषधम् ।

वात्सक न० वत्सानां समूहः वुञ् । वत्ससंघे ।

वात्सल्य न० वत्सलस्य भावः ष्यञ् । पुत्रादिस्नेहानुगुणे रसभेदे ।

वात्स्य पु० वत्सस्यापत्यं यञ् । गोत्रप्रवर्त्तके मुनिभेदे ।

वात्स्यायन पु० वत्सस्य गोत्रापत्यं युवा वत्स+यञ् ततोयूनि फक् । वत्सगोत्रोत्पन्ने न्यायसूत्रभाष्यकारके पक्षिलाख्ये मुनौ ।

वाद पु० वद-घञ् । तत्त्वबुभुत्सया कथने, 'प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वाद' इति गौतमोक्ते विचारात्मके वाक्यभेदे च ।

वादन न० वद-णिच्-कर्म्मणि ल्युट् । मृदङ्गादिवाद्ये । भावे ल्युट् । मृदङ्गादिताडनरूपे व्यापारे ।

वादर न० वदरायाः कार्पास्याः विकारः अण् । कार्पाससूत्रनिर्मिते वस्त्रादौ । [ङिच्च । अस्थ्यन्तरत्वे ।

वादरङ्ग पु० वादरं वदरासंबन्धिपत्त्रादिसादृश्यं गच्छति गम खच्

वादरत त्रि० वादे विवादे रतः रम-क्त । अनुदिनविवादशीले ।

वादरा स्त्री० वातं वायुं राति ददाति रा-क पृ० तस्य दः । कार्पास्याम् ।

वादरायण पु० बदरीप्रधानं स्थानं वादरं तदयनं स्थानं यस्य । नित्यं बदरिकाश्रमवासिनि वेदव्यासे । स्वार्थे दञ् । वादरायणिरप्यत्र । अपत्ये दञ् । व्यासपुत्रे शुकदेवे ।

वादल न० वातं लाति गृह्णाति ला क पृ० तस्य दः । मधुयष्टौ ।

वादाम न० वातमनति क्षिपति क्षम-अण् पृ० तस्य मः । स्वनामख्याते फलभेदे ।

वादित न० वद-णिच्-क्त । मृदङ्गादिवाद्ये ।

वादिन् त्रि० वदति वद-णिनि । वक्तरि-अर्थिनि, विवादकर्त्तरि, विचारस्थले प्रथमपक्षप्रतिपादके च ।

वाद्य न० वद-णिच्-यत् । वादनीये मृदङ्गादौ ।

वाद्यभाण्ड न० कर्म० । वादनीयपात्रे । [चर्ज्जि न ह्रस्वः ।

वा(बा)ध विधाते भ्वा०आत्म०सक०सेट् । वा(बा)धते अवा(बा)धिष्ट ।

बा(बा)ध पु० वा(बा)ध-घञ् । प्रतिरोधे, प्रतिबन्धे न्यायोक्ते स्वभावपक्षेन ज्ञाने, अवा(बा)धात्व, पीडायाञ्च स्त्री० । ल्युट् । वा(बा)धनमप्यत्रार्थे न० ।

बान न० वन-घञ् । शुष्कफले, शुष्के त्रि० । वनस्येदं समूहो वा अण् । वनसम्बन्धिनि त्रि० तत्संघे न० ।

वानप्रस्थ पु० वाने वनसमूहे प्रतिष्ठति स्था-क । मधूकवृक्षे, पलाशवृक्षे, नवप्रस्थएव स्वार्थे अण् । वृद्धस्यस्तु यदा पश्येत् वलिपलितमात्मनः । पुत्रेषु दारान् निक्षिप्य वनं गच्छेत् तदैव वै ॥ मुक्ते आश्रमभेदे । [मख्याते पशुभेदे

वानर पु० वानं वनसम्बन्धि फलादिकं राति वृक्षाति रा-क खना-

वानरप्रिय पु० ६त० । क्षीरिवृक्षे ।

वानराघात पु० वानराणामाघातो यत्र । लोध्रवृक्षे ।

वानरी स्त्री० वानरस्य प्रियम् भक्ष्यत्वात् अण् ङीप् । शूकशिम्बयाम् । वानर+स्त्रियां ङीप् । वानरयोषिति ।

वानरेन्द्र पु० वानर इन्द्र इव । सुग्रीवे । ६त० । वानरनाथादयोऽप्यत्र

वानल पु०वानं वनभावं निर्विडतां लाति ला-क । (वायुद) वृक्षभेदे ।

वानस्पत्य पु० वनस्पतेरयम् प्रतिरूपः पुष्पाज्जातफलत्वात् । पुष्पजातफलके आम्रादौ वृक्षे ।

वानायु पु० वनायुदेशे (आरब) ।

वानायुज पु० वानायुदेशे जायते जन-ड । घोटकभेदे । (आरबी)

वानीर पु० वन-ईरन् स्वार्थेऽण् । वेतसे, वञ्जुलवृक्षे च ।

वानीरक पु० वानीर इव इवार्थे कन् । सुञ्जतृणे ।

वानेय न० वने जले भवः ढक् । कैवर्तीमुस्तके ।

वान्त त्रि० वम-क्त । उद्गीर्णे, वान्ताशीत्युच्यते बुधैरित्युक्तेः

वान्तिकृत् पु० वान्तिं वमनरोगं हरति हृ-क्विप् । (मयना)ख्याते वृक्षे ।

वान्तिदा स्त्री० वान्तिं छर्दिं ददाति दा-क । कटकीवृक्षे ।

वाप पु० वप-घञ् । तन्त्वादेर्वीजादेश्च वपने सुवपने च ।

वापदण्ड पु०उप्यतेऽनेन वप-करणे घञ् कर्म० । वेमनि तन्तुवपन दण्डे

वापि (पी) स्त्री० वप-इञ् या ङीप् । 'द्रोणात् दशगुणा वापी' त्युक्तलक्षणे जलाशयभेदे, जलाशयमात्रे च 'वापीं स्नातुमितो गताः' इति काव्यप्रकाशः ।

वापीह पु० वापीं तत्स्थजलं जहाति हा-क । चातके विहगे

वाप्य न० वापां भवः यत् । कुशेशयभेदे । वापीभवे, वप-ण्यत् । वपनीये च त्रि०

वाम न० वा-मन्। धने, वास्तुके च। मनोहरे, प्रतिकूले, सव्यभागस्थे अधमे च त्रि० सव्यदेहे न०। कामदेवे, महादेवे, तन्त्रोक्ते वेदाचारविरुद्धे मद्यादिपानरूपाचारे च पु०।

वामदेव पु० कर्म०। महादेवे।

वामन त्रि० वम-णिच् ल्युट्-ल्यु वा। दक्षिणदिग्गजे, अष्टोत्तरशते, बलिबञ्चनार्थं प्रादुर्भूते हरेरवतारभेदे, पाणिनि सूत्रस्य काशिकाख्यवृत्तिकारके पण्डितभेदे च। ह्रस्वे त्रि० स्त्रियां ङीप्। वामनीं मूर्त्तिमादधे इति।

वामलूर पु० वामं लुनाति लू-रक्। वल्मीके।

वामलोचना स्त्री० वामे सुन्दरे लोचने यस्याः। स्त्रीभेदे।

वामवेध पु० वामः प्रतिकूलो वेधः। ज्योतिषोक्ते गोचरस्थ ग्रहाणां स्वस्वराश्यवधिकस्थानविशेषस्थग्रहभेदजन्ते योगभेदे 'वामवेधविधिना त्वशोभना अधमो' इति ज्योतिषम्। [सियनरूपे आचरणे।

वामाचार पु० वामः वेदादिविरुद्धं आचारः। तन्त्रोक्ते मद्यमांसादि-

वामापीडन पु० वामं यथा तथा आपीड्यते भूष्यतेऽनेन आ+पीड-ल्युट्। पीलुवृक्षे।

वामावर्त्त त्रि० वामेनावर्त्तते आ+वृत-अच्। वाममार्गेण वृत्तिमति पदार्थे। भावे घञ्। वाममार्गेणावृत्तौ।

वामी स्त्री० वाम-गौरा० ङीष्। अश्वायाम् 'अधोष्ट्रवामीप्रभृतयश्चेति' रघुः। ग्रहगाल्यां राजभ्यां करभ्याञ्च। [नार्य्याम्।

वामोरू स्त्री० वामौ सुन्दरौ ऊरू यस्याः ऊङ्। प्रशस्तोरुमत्यां

वाय पु० वे-घञ्। वपने।

वायदण्ड पु० वायतेऽनेन वे-करणे घञ् कर्म०। वेमनि वापदण्डे।

वायवी स्त्री० वायोरियं यत् स्त्रियां ङीप् यलोपः। वायुसम्बन्धिन्यां, स्त्रियां तच्छक्तौ, उत्तरपश्चिमायां दिशि च।

वायव्य त्रि० वायुर्देवताऽस्य वायु+ण्य। वायुदेवताके पश्वादौ 'वायव्यं श्वेतं छागमालभेते'ति श्रुतिः।

वायस त्रि० वयसेव अण्। काके, वायं वपनं स्तुति शो-क। अगुरुवृक्षे-

जे, श्रीवासे च

वायसाराति पु० ६त० । मेचके । [नक्षाज्योतिश्चत्याङ्ग ।

वायसादनी स्त्री० वायसैः काकैरद्यते अद्-ल्युट् ङीप् । काकतुण्ड्याम्

वायसी स्त्री० वायसश्चेवमण् प्रियत्वात् । काकोडुम्बरिकायाम् ।

वायसेक्षु पु० वायसानामिक्षुरिव प्रियः । काशतृणे ।

वायसोली स्त्री० वायसमोडते ओड उत्वं ङीप् अच् डस्य लः यक० । काकमाच्यायाम् । स्वार्थे कन् । तत्रैव ।

वायु पु० वा-उण् । स्पर्शगुणके पञ्चभूतमध्ये भूतभेदे, उत्तरपश्चिमदिग्धाधिपतौ देवभेदे" देहस्थधातुभेदे च ।

वायुपुत्र पु० ६त० । हनुमति, भीमे च वायुसुताद्योऽप्यत्र ।

वायुभक्ष पु० वायुं भक्षति भक्ष-अण् । सर्पे । ल्यु । वायुभक्षणोऽप्यत्र

वायुवर्त्मन् न० । वायोर्वर्त्म सञ्चारमार्गोयत्र । आकाशे ।

वायुवाह पु० वायुना उह्यते वह-कर्म । भूमे ।

वायुवाहिनी स्त्री० वायुं देहस्थ वायुं वाहयति सञ्चारयति वह-णिच् णिनि । वायुसञ्चारिण्यां देहस्थ शिरायाम् ।

वायुसख पु० वायोः सखा सहचरः अच् समा० । अग्नौ ।

वायुसखि पु० वायुः सखा यस्य । अग्नौ

वाय्वास्पद न० ६त० । वायुसञ्चारस्थाने आकाशे ।

वार् न० चु० इ-क्विप् । जले ।

वार पु० इ-घञ् । सङ्घे अवसरे स्वयोग्यकाले (पाला) 'वारोऽङ्गरा-जस्वसुरि'ति सा० रत्न० द्वारे, शिवे, कुञ्जरश्चे, क्षणे, सूर्य्यादिग्रहाणां अधिक्रियते दिने, यथा रविवारः रविस्वामिकं दिनम् इत्यादि । यज्ञपात्रे च । [अश्वविशे च पु० ।

वारक त्रि० वारयति इ णिच्-ल्युट् । प्रवृत्तिनिरोधके । अश्वगतिभेदे,

वारण न० इ णिच् ल्युट् । प्रवृत्तिप्रतिरोधे, निषेधे हस्त्यादिधारणे च । गजे पु० । वाणवारे कवचे पु० न० । वाणवारे कवचे पु० न० ।

वारणपुष्पा (षी) स्त्री० वारणं पुष्णाति पुष्प-क टाप् । कदल्याम्

वारणवल्लभा स्त्री० ६त० । कदल्याम् ।

वारतृषा स्त्री० वारं जलं वर्षत्यत्र तृष-क । धान्ये ।

वारमुख्या स्त्री० वारे वेश्याद्वन्देसुख्या । वहुजनसत्कृतायां वेश्यायाम्

वारंवारम् अव्य० द्व-णमुल् द्वित्वम् । पौनः पुन्ये ।

वारलोक पु० वार्जलं अलोकं यत्र । (वालुङ् तुलसी) तुलसीवृक्षे ।

वारयिट पु० चु० इ तृच् । पत्यौ । वारणकर्त्तरि त्रि० ।

वारयोषा स्त्री० वारस्य जनसमूहस्य योषा साधारणत्वात् । वेश्यायाम् । इत० । वारवध्वादयोऽप्यत्र ।

वारवाण पु० न० वार्य्यते इ-घञ् वारोवार्य्यो वाणो यस्य । कवचे

वारवाणि स्त्री० वारं समूहं वणते वण-इण् वा ङीप् । वेश्यायाम्

वारांनिधि स्त्री० वारांजलराशीनां निधिराधारः नि+धा-कि अलुक् समा० । समुद्रे ।

वाराणसी स्त्री० वरणा च असी च सीमात्वेनास्त्यस्या अण् ङीप् । काशीनगरे वाराणस्यत्र । [वराहसम्बन्धिनि त्रि० ।

वाराह पु० वराहस्येदं प्रियत्वात् अण् । मङ्गलपिण्डोतक वृक्षे

वाराहकर्णी स्त्री० वराहस्यायं वाराहइव कर्णः पत्रमस्याः ङीप् । अश्वगन्धायाम् । [गन्धायाम् ।

वाराहपत्री स्त्री० वाराहस्तात्कर्णइव पत्रमस्याः ङीप् । अश्व-

वाराहाङ्गी स्त्री० वाराहमिवाङ्गमस्याः ङीप् । दन्तीवृक्षे ।

वाराही स्त्री० वराहस्येयमण् ङीप् । अष्टमातृकामध्ये वराहशक्तौ, 'वाराही नारसिंही चेति श्यामास्तवः । वराहक्रान्तायाम् वराहस्योषिति च ।

वारि न० इ-इन् । जले, स्त्रीवेरे च । वार्य्यतेऽनया इ-णिच् इन् वा ङीप् । गजबन्धन्यास् 'वार्य्यर्गलाभङ्गइव प्रवृत्त' इति रघुः । वाचि० सरस्वत्याम् च स्त्री० ।

वारिकण्टक पु० न० वारिणः कण्टकइव । शृङ्गाटके ।

वारिकर्णी स्त्री० वारिणि कर्णइव पत्रमस्याः ङीप् । कुम्भ्याम् (पानी) स्वार्थे कन् । तत्रैव । [तत्रैव ।

वारिकुञ्ज पु० वारिणि कुञ्ज इव वक्राकृतित्वात् । शृङ्गाटके स्वार्थे कन्

वारिचत्वर पु० वार्य्यैव चत्वररूपमस्याधारत्वात् । कृम्निकायाम्
वारिचर पु० वारिणि चरति चर-अच् । मत्स्ये जलचरजन्तुमात्रे त्रि०
वारिचामर न० वारिणश्चामरमिव शोभाहेतुपुष्पालतित्वात् शैवाले
वारिज न० वारिणि जायते जन-ड । पद्मे, लवङ्गे, गौरसुवर्णे, कर्पूरभेदे च । शङ्खे, शम्बूके च पु० ।
वारितस्कर । पु० वारिणस्तस्करइवापहारकत्वात् । सूर्य्ये, मेघे च
वारित्रा स्त्री० वारिणस्त्रायते त्रै-क । छत्रे ।
वारिद न० वारि ददाति दा-क । मेघे, सुस्तके च । जलदातरि त्रि०
वारिधि पु० वारीणि धीयन्तेऽस्मिन् धा-कि इत० । समुद्रे वारिनिध्याद्योऽप्यत्र ।
वारिपर्णी स्त्री० वारिणि पर्णान्यस्याः ङीप् । कृम्निकायाम् (पानी)
वारिपालिका स्त्री० वारीणि पालयति आस्तृणाति पालण्वुल् । कृम्निकायाम् (पानी) ।
वारिपृश्नी स्त्री०वारिणि पृश्निः पर्णमस्याः ङीष् । कृम्निकायाम्(पानी)।
वारिबदरा स्त्री० वारिसमीपभवा बदरेव । प्राचीनामलके ।
वारिबालक न० वारिणो बालक इव । स्त्रीवेरे
वारिभव न० वारिणि भवति प्रभवति भू-अच् । स्रोतोञ्जने ।
वारिमसि पु० वारि जलं मसिरिव नीलतापादकं यस्य । मेघे
वारिमूली स्त्री० वारिणि मूलमस्याः ङीष् । कृम्नायाम् (पानी)
वारिरथ पु० वारिणि रथ इव गमनसाधनम् । भेलके ।
वारिराशि पु० वारीणां राशियोऽत्र । समुद्रे ।
वारिरुह न० वारिणि रोहति रुह क । पद्मे, जलजातमात्रे त्रि०
वारिवदन न० वारियुक्तं वदनं यस्मात् । प्राचीनामलके तत्सेवने हि मुखे वारिनिस्रावः ।
वारिवर न० वारि वृणोति वृ अच् । कारमर्दके ।
वारिवल्लभा स्त्री० वारि वल्लभमस्याः उत्पत्तिहेतुत्वात् । वदर्याम् ।
वारिवाह पु० वारीणि वहति वह-अण् । मेघे ।
वारिश पु० वारिणि समुद्रजले शेते शी ड । विष्णौ ।

वारीश पु० इत० । समुद्रे, वरुणे च । वारिनाथादयोऽप्यत्र ।

वारुण न० वरुणस्येदमण् । जले, वरुणसम्बन्धिनि त्रि० ।

वारुणि पु० वरुणस्यापत्यम् इञ् । अगस्त्यशुनौ कुम्भजातत्वात् सैलावरुणापत्यत्वाच्च तथात्वम् ।

वारुणी स्त्री० वरुणोदेवतास्य वरुणस्येदं वा अण् ङीप् । पश्चिमदिशि, मदिरायाम्, शतभिषानक्षत्रे, दूर्वायां, गण्डदूर्व्यामाम्, इन्द्रवारुण्यां, शतभिषानक्षत्रयुक्तचैत्रशुक्लत्रयोदश्यां, वरुणस्त्रियाञ्च ।

वारेन्द्री स्त्री० देशभेदे, (बारेन्द्रभूमि) (राजशाही) बङ्गदेशप्रदेशे

वार्त्त न० वृत्ति+अण् । आरोग्ये । निरामये, वृत्तिशीले च त्रि० । दुर्गायां, कृषिकर्म्मणि, वृत्तौ, जनश्रुतौ, वृत्तान्ते, कालकर्त्रके भूतनाशने च स्त्री० 'अस्मिन् महामोहमये कटाहे सूर्य्याग्निना रात्रिदिनेन्धनेन । मासर्तुदर्वीपरिघट्टनेन भूतानि कालः पचतीति वार्त्ता' इति भारतम् ।

वार्त्ताक पु० वार्त्तमारोग्यमाकरोति समयति अक-णिच्-अण् । वार्त्ताकौ । स्त्रियामपि तत्पक्षे ङीप् । पृ० उत्तमम् वार्त्ताकुरत्वात् स्त्री० 'वार्त्ताकुरेवा गुणसम्प्रयुक्ते'ति वैद्यकम् ।

वार्त्ताबह पु० वार्त्तावहति आ+वह अण् । कृषिवाणिज्याजीविनि वणिग्भेदे । वृत्तान्तवाहके त्रि० ।

वार्त्तिक न० वृत्तिरूपेण ज्ञातो ग्रन्थः ठक् । 'उक्तानुक्तदुरुक्तार्थव्यक्तकारि तु वार्त्तिक' मित्युक्ते सूत्रानुक्तादयर्थविचारके ग्रन्थभेदे ।

वार्द्र न० वारे जलाय दीर्य्यते द-अप् । दक्षिणावर्त्तशङ्खे, काकचिञ्चायाम् क्षणलावीजे, कृमिजे, आम्रबीजे च । वारेव दरम् । जले ।

वार्द्धक न० वृद्धानां समूहः तस्य भावः कर्म्म वा वुञ् । वृद्धसमूहे वृद्धस्य भावे कर्म्मणि च ।

वार्द्धक्य न० वृद्धस्य भावः कर्म्म वा ष्यञ् कुक् च । वृद्धत्वे ।

वार्द्धि पु० वारि जलानि धीयन्तेऽत्र धा-कि उप० । समुद्रे ।

वार्द्धिभव न० वार्द्धौ समुद्रे भवति भू-अच् । सामुद्रलवणे ।

वार्द्धुषि पु० वृद्धा जीवति वृण् वृद्धेर्वृधुषिभावः । वृद्धाजीवे । स्वार्थे कन् । तत्रैव । [जीविनि

वार्द्धुषिक् त्रि०वृद्धि+अस्त्यर्थे ठन् प्रकृतेः नि० वार्धुषि भावः । वृद्धा-

वार्द्धुषा न० वार्द्धुषेर्भावः ष्यञ् । धान्यादेर्वृद्धीपायेन (वाडिदेया)

वार्द्धीणस पु० वारि जलानि धयति धा-क्विप् वार्द्धीः नद्या नासिका यस्य णत्वम् पृ० । गण्डके । पृ० वार्द्धीणसः । 'त्रिस्रवं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम् । वार्द्धीणसः । प्रोच्यतेऽसौ" इत्युक्ते पशुभेदे 'वार्द्धीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी"ति मनुः ।

वार्मण न० वर्मणां समूहः अण् न टिलोपः । कवचसमूहे ।

वार्म्मिण न० वर्मिणां समूहः अण् न टिलोपः । कवचिसमूहे ।

वार्मुच् पु० वारि जलानि मुञ्चति मुच-क्विप् । मेघे ।

वार्षिक त्रि० वर्षे वर्षासु वा भवः ठञ् । वत्सरभवे, वर्षाकालभवे च । लायमाणालतायां न० स्त्री० स्त्रीत्वे ङीप् । वर्षकर्त्तव्यायां पूजायां स्त्री० ङीप् । 'शरत्काले महापूजा क्रियते या च वार्षिकी'ति चण्डी ।

वार्हत न० वृहत्याः फलम् अण् तस्य न लुप् । वृहतीफले ।

वार्हद्रथ (थि) पु० वृहद्रथस्यापत्यमण्, इञ् वा । वृहद्रथराजपुत्रे जरासन्धे नृपे ।

वार्हस्पत्य न० वृहस्पतिना प्रोक्तमधीते अञ् । चार्वाके । तेन प्रोक्तं तत्रेदं वा अञ् । नीतिशास्त्रे बौद्धागमे च वृहस्पति सम्बन्धिनि त्रि० ।

वालव पु० वल-अञ् वलमुलनमस्यास्ति व । तिथ्यङ्गभेदे द्वितीये करणे

वालक न० वल्केन निर्वृत्तमण् । वल्कजाते वस्त्रे ।

वाल्मिकि पु० वल्मिकौ भवः इञ् । रामायणग्रन्थकर्त्तरि मुनिभेदे

वाल्मीक (कि) पु० वल्मीके भवः अण् इञ् वा । मुनिभेदे ,

वावदूक त्रि० वद्-यङ् लुक्-ऊकञ् । वक्तृवदनशीले वक्तरि

वावय पु०वय-यङ्लुक्-अच् । (वावु इ)तुलसीभेदे ।

वाहत संभक्तौ दि० आत्म० सक० सेट् ह्यावेट् । वाह्यते अवावर्त्तिष्ट ।

'ततो वाह्यमाना से'ति भट्टिः ।

वाहित्त त्रि० वाहित-क्त । क्षतवरणे ।

वाश् तिरश्चां शब्दे अक० आह्वाने सक० दि० आत्म० सेट् चङि न ह्रस्व । वाश्यते अवाशिष्ट । 'उद्वाश्यमानः पितर'मिति भट्टिः

वाशा स्त्री० वां गतिं श्यति शो क । वासके । स्वार्थे कन् तत्रैव

वाशित न० वाश-भावे क्त । तिरश्चां शब्दे, आह्वाने च ।

वाशिता स्त्री० वाश-क्त । करिण्याम्, स्त्रीमात्रे च ।

वाशि(सि)ष्ठ न० वशि (सि)ठस्येदम् अण् तेन प्रोक्तं वा अण् । वशि-ष्ठप्रणीते उपपुराणभेदे, योगशास्त्रभेदे च । वशि (सि) ष्ठसंबन्धिनि त्रि० । गोमत्यां नद्यां स्त्री० ङीप् ।

वाश्र न० वाश-रक् । गृहे, चतुष्पथे च । दिवरी पु० ।

वाष्प (स्र) पु० वा-प षु(सु) क् च । जम्बुनि, लोहे, चक्षुर्जले च संज्ञा-यां कन् । मारिषशाके (नटिया) क्षिद्रुपत्न्यां स्त्री० वा गौ० ङीप् । वाष्पी (स्री)+कन् । वाष्प्रि(स्रि) काप्यत्र ।

वास सुरभीकरणे अ० चु० उ०सक० सेट् । वासयति ते अववासत् त

वास पु०वस-घञ् । गृहे वस्त्रे अवस्थाने, वास-अच् । वासके, सुगन्धे च ।

वासक पु० वास-एवुल् । स्वनामख्याते वृक्षे येन तेन प्रकारेण वासकः कासनाशक, इति वैद्यकम् ।

वासकसज्जा स्त्री० 'कुरुते मण्डनं या तु सज्जिते वासवेश्मनि । सा तु वासकसज्जा स्यादि,त्युक्तलक्षणे नायिकाभेदे वासस सज्जाप्यत्र ।

वासगृह न० वासयोग्यं गृहम् । सद्मगृहे ।

वासतेयी स्त्री० वसतये हिता ढक् । रात्रौ । वसतियोग्ये त्रि० 'व-नेषु वासतेयेष्विति भट्टिः ।

वासन न० वास—ल्युट् । सुरभीकरणे धूपने,वारिधान्याम्, वस्त्रे, वास-स्थाने, स्नाने च वस-णिच्-ल्युट् । निक्षेपाधारे, निक्षेपार्थे-सुद्रा-ङ्किते च । [भीकरणे च

वासना स्त्री० वास-युच् प्रत्याशायां स्नाने, स्मृतिहेतौ, संस्कारे, सुर-

वासन्त पु० वसन्तस्येदम् वसन्ते भवः वा अण् । वसन्तप्रिये वृक्षे, कोकिले

च । वसन्तभवे-मलयवायौ-त्रि० । कृष्णसुते मदनवृक्षे च । तत्-कालभवे त्रि० । यूथ्यां माधवीलतायां, पाटलायां नवमल्लिकायां, तत्काले पृथ्व्यायां-दुर्गायाञ्च स्त्री० ।

वासयोग पु० वासेन गन्धेन योगो यत्र । (आविर) चूर्णभेदे

वासर पु०न० । वस-अरन् । दिवसे । नागभेदे पु० ।

वासव पु० वसुरेव स्वार्थेऽण् वसूनि सन्त्यस्य वा अण् । इन्द्रे वसोरप्यत्यं स्त्री० अण् ङीप् । व्यासमातरि सत्यवतीगन्धायाम् स्त्री० ।

वासवदत्ता स्त्री० वासवदत्तामधिकृत्य कृतो ग्रन्थः अण् आख्यायिकायां तस्य लुक् । वासवदत्ताचरिताख्यापके ग्रन्थभेदे । ३त० इन्द्रदत्ते त्रि० ।

वासस् न० वस-असि । वस्त्रे ।

वासागार न० वासयोग्यमगारम् । वासयोग्ये गृहे गृहमध्ये

वासि(सी) स्त्री० वस-इञ् वा ङीप् । कुठारभेदे (बाइस)

वासित त्रि० वास-क्त । सुरभीकृते ।

वासिनी स्त्री० वासोऽस्त्यस्याः इनि । शुक्लभिण्टायाम् ।

वासु पु० वस उण् । विष्णौ ।

वासुकि पु० वसुना रत्नेन कायति कै-क सएव इञ् । सर्पराजे 'भगिनी वासुके स्वसे'ति मनसास्तोत्रम् ।

वासुदेव पु० वसुदेवस्यापत्यम् अण् । विष्णौ ।

वासुदेवप्रियङ्करी स्त्री० ६त० । शतावर्याम्, श्रीकृष्णप्रियकारिण्यां स्त्रियाञ्च ।

वासू स्त्री० वास-ऊ । माध्वीकौ बालायाम् ।

वास्तव न० वस्त्वेव अण् । सत्यभूते पदार्थे ।

वास्तविक त्रि० वस्तुतो निर्वृत्तम् ठक् । स्वतःसिद्धे सत्यभूते पदार्थे ।

वास्तव्य त्रि० वसति वस तव्य नि० । वासकर्त्तरि, वासयोग्ये स्थाने, वसतौ च पु० । [कन् । शाकभेदे ।

वास्तु पु० वस-तुण् । वासयोग्यभूमौ, खनमख्याते शाके च । स्वार्थे

वास्तुक न० वास्तु-कन् पृ० दीर्घः। वास्तुशाके चिल्लीशाके स्त्री० गौरा० ङीष्।

वास्तेय त्रि० वस्तेरिदम् वस्तये हितं वा ढक्। वस्तिसम्बन्धिनि वास-योग्ये च।

वास्तोष्पति पु०ई०त० अलुक्स०। इन्द्रे, वास्तुभूमिपतौ च।

वास्त्र पु० वस्त्रेणाहतो रथः अण्। वस्त्रेण सम्यगाहते रथे।

वास्त्रेय पु० वास्त्राय हितं ढक्। नागकेशरे।

वाह् यत्ने भ्वा०आ०अक०सेट् चङि न ह्रस्वः। वाहते अवाहिष्ट

वाह पु० उह्यतेऽनेन अश्वोष्ट्रा गवादिना वा वह-घञ्। अश्वे 'वाहो-भारचतुष्टयमि'त्युक्ते परिमाणभेदे च।

वाहद्विषत् पु०वाहं द्वेष्टि द्विष-शतृ ६त०। महिषे वाहरिपा-दयोऽप्यत्र

वाहन न० वाह्यतेऽनेन वह-णिच्-ल्युट्। रथादौ याने। [शाके च]

वाहस पु० वाहं गतिं स्यति यो-क। अजगरे, सुनिषण्णके (हुरुनि)

वाहित्थ न० वहतीति णिनि वाही-तक्थिन् तिष्ठति स्था-क पृ०। गज-कुम्भस्थाधोभागे।

वाहिनी स्त्री० वाहोऽस्त्यस्याः इनि ङीप्। सेनायां, वहति वह-णिनि। नद्याम् 'वाहिन्यः पार्श्वमेता न जहतीति काव्यप्रकाशः।

वाहिनीपति पु० ६त०। सेनापतौ, सप्तदे च।

वाहीक पु० वह-ईकण्। जातिभेदे (जाट)। गौर्वाहीक इति अल-ङ्कारः। देशभेदे च।

वाहु पु० वह-उण्। भुजे अवयवभेदे, अङ्कशास्त्रोक्ते क्षेत्रव्यवहारे भुजा-कारे रेखाभेदे च।

वाहुमूल न० ६त०। भुजस्यस्य मूले कक्षरूपे अङ्गे।

वाहुवार पु० वाहं वारयति ष्टृ णिच्-अण्। क्षेमाङ्कवृक्षे

वाह्य न० वाहं चालनमर्हति यत्, वह-ण्यद्वा। अश्वादौ याने, वानरे च। वहिर्भवः यञ्, टिलोपः। वहिर्भवे त्रि०।

वाह्येन्द्रिय न० बाह्यपदार्थानां शब्दादीनां ग्रहणयोग्यमिन्द्रियम्। शब्दादिग्राहके श्रोत्रादौ इन्द्रिये।

वाह्लि (ह्ली) क पु०। वह-लिण् स्वार्थे कन्। देशभेदे। तद्देशजाते-कुङ्कुमे, हिङ्गुनि न०।

वि अव्य०वा-कि। नियोगे, विशेषे-निश्चये, असहने, निग्रहे, हेतौ, अव्याप्तौ, ईषदर्थे, परिभवे, शुद्धौ, अवलम्बने, ज्ञाने, गतौ, आलस्ये, पालने, च। विहगे पु०। [तस्मिन्

विंश त्रि० विंशतेः पूरणः विंशति+डट्। येन विंशतिसङ्ख्या पूर्यते

विंशक न० विंशतेरवयवः कन्। विंशतिसंख्यायाम्। विंशतिरधिका दीयते ऽस्मिन् शते आयो लाभो वृद्धि र्वा ङन्। प्रतिशतं विंशत्यधिकलाभादौ सामुद्रा विंशकं शतमिति स्मृतिः।

विंशति स्त्री० द्वे दशती नि०हिदशकसंख्यायां, तत्समूहे च। एक व०। समूहविशेषार्थे तु सर्व्व व०। द्वे विंशती त्रिंशः विंशतय इति।

विंशतिक त्रि० विंशतेर्योग्यः। विंशतियोग्ये।

विंशतितम त्रि० विंशोः परणः तमट्। विंशशब्दार्थे स्त्रियां ङीप्।

विकङ्कट पु० वि+ककि-अटन्। गोक्षुरे।

विकङ्कत पु० वि+ककि-अतच्। (वहची) वृक्षे, अतिबलायाञ्च।

विकच पु० विगतः कचो यस्य। क्षपणे बुद्धसंन्यासिनि, विगतः कचो यत्र। ध्वजे केतौ। वि+कच-अच्। विकसिते ह्यः कोशशून्ये त्रि०। मल्लिकायाम् स्त्री०।

विकट पु० वि+कट-अच्। विस्फोटके, साकरस्फुटत्वे च। वि+कटच्। विशाले, विकृते, कुत्सिते, दन्तुरे, च त्रि०।

विकण्टक पु० विगतः कण्टकोऽस्य। बदरे। शत्रुहीने त्रि०।

विकत्थन न० वि+कत्थ-ल्युट्। आत्मश्लाघायाम्। युच्, तत्कर्त्तरि त्रि०

विकर्त्तन पु० वि+कृत-ल्यु। सूर्य्ये, अर्कवृक्षे च।

विकर्म्मस्थ पु० त्रि० विकर्म्मणि निन्दिताचारे तिष्ठति स्था क कुत्सिताचाररते।

विकल त्रि० विरुद्धा कला यस्य । विकले, स्वभावहीने, कलाहीने च ।

विकलाङ्ग त्रि० स्वभावहीनमङ्गमस्य । स्वभावतो न्यूनाधिकाङ्गे ।

विकल्प पु० विभिन्नः कल्पः । भ्रान्तिहेतौ कल्पने, विविधकल्पने, संशये आरोपणे, पक्षतः प्राप्तौ च ।

विकश(स्व)र त्रि० वि+कश(स्व)-अरच् । प्रकाशशीले रश्मिपुनर्नवायाञ्च ।

विकषा स्त्री० विशेषेण कष्यतेऽसौ कष-घञर्थे क । सङ्गिद्यायाम् ।

विक(शि)सित त्रि० वि+कश(स) क्त । प्रकाशयुक्ते ।

विकार पु० वि+कृ घञ् । प्रकृतेरन्यरूपे परिणामे ।

विकाल पु० विरुद्धः दैवपित्र्यादिकर्मानर्हः कालः । राक्षसी नामकवेलायाम्, दिवसान्त्यकाले ।

विकाश न० विरुद्धः काशः । रहसि, विशिष्टे काशे प्रकाशे च ।

विकाशिन् त्रि० वि+काश-णिनि । प्रकाशशीले विकस्वरे ।

विकिर पु० वि+कॄ-क । विक्षेपे, कुशे च । विकीर्य्यते घञर्थे क । विक्षेपणान्तरे ऊर्त्तिक्षिप्तेतस्ततःपादौ ।

विकिरण द० वि+कॄ-ल्युट् नि० इत्वन् रपरत्वम् । क्षेपणे हिंसने, ज्ञाने च । अर्कवृक्षे पु० । इव० किरणशून्ये त्रि० ।

विकीर्ण त्रि० वि-कॄ-क्त । विक्षिप्ते । [प्राप्ते च ।

विकुर्व्वाण त्रि० वि+कॄ-शानच् । हर्षहेतुना जातरोमाञ्चादौ विक्रियति-

विकुक्षि पु० सूर्य्यवंश्ये इक्ष्वाकुराजपुत्रे नृपभेदे ।

विकृत त्रि० वि+कृ-क्त । बीभत्से मलिनीकृते, रोगयुक्ते च ।

विकृति स्त्री० वि+कृ+क्तिन् । विकारशब्दार्थे ।

विकृति पु० वि+कृ-क्तिच् ङीप् । रोगे, डिम्बे च ।

विक्रम पु० विशेषेण क्रामति वि-क्रम-घञ् अच् वा । त्रिविक्रमे, विष्णौ, विक्रमादित्यभेदे "रत्नानि वै वररुचिर्नव विक्रमस्य" ज्योतिर्विदाभरणम् । भावे घञ् । क्रमणे करणे घञ् । चरणे, शौर्य्यातिशये, सामर्थ्ये च पदविन्यासभेदे लवणं मधु गव्यञ्च सर्पिर्वा विक्रमे प्रिये ! इत्युज्ज्वलदत्ते वत्सरभेदे च । [मार्कण्डेयपु०

विक्रमादित्य पु० विक्रमेणादित्य इव । स्वनामख्याते नृपभेदे विक्रम-

विक्रमिन् पु० वि+क्रम-णिनि । सिंहे, विष्णौ च विक्रमयुक्ते त्रि० ।

विक्रय पु० वि+क्री-अच् । मूल्यग्रहणेन परस्वत्वापादके व्यापारे

विक्रयानुशय पु० विक्रयस्यानुशयः पश्चात्तापः । विक्रीतपदार्थस्य परावृत्तिफलके अनुतापे ।

विक्रयिक पु० विक्रयः अस्त्यस्य ठन् । विक्रेतरि ।

विक्रयिन् त्रि० वि+क्री-णिनि विक्रयकर्त्तरि ।

विक्रान्त पु० वि+क्रम-क्त । सिंहे, शूरे च । भावे क्त । विक्रमे ।

विक्रिया स्त्री० वि+कृ-श । विकारे अन्यथास्थितस्य वस्तुनोऽन्यथापरिणामे ।

विक्रेय त्रि० वि+क्री-यत् । विक्रययोग्ये पदार्थे ।

विक्लव त्रि० वि+क्लु-अच् । व्याकुलीभावे ।

विक्लिन्न त्रि० वि+क्लिद-क्त । आर्द्रे, शीर्णे, जीर्णे च ।

विक्लाव पु० वि+क्लु-घञ् । शब्दे कासादिरोगजशब्दे च ।

विक्षीर पु० विशिष्टं क्षीरमस्य । अर्कवृक्षे विगतक्षीरे त्रि० ।

विक्षेप पु० वि+क्षिप-घञ् । त्यागे, प्रेरणे, दूरीकरणे च ।

विक्षेपशक्ति स्त्री० विक्षेपस्य दूरीकरणस्य जनिका शक्तिः । वेदान्तोक्ते अविद्याशक्तिभेदे ।

विख त्रि० विगतो नासिका यस्य खादेशः । गतनासिके । ख्यादेशः । विख्योऽप्यत्र त्रि० ।

विख्यात त्रि० विशेषेण ख्यातः प्रसिद्धः वि+ख्या-क्त । प्रसिद्धे ।

विगणन न० विशेषेण गणनम् गण-ल्युट् । अवधीरणार्थे सङ्ख्यागणने

विगत त्रि० वि+गम-क्त । प्रमादरहिते विशेषगते अपगते च ।

विगतार्त्तवा स्त्री० विगतमार्त्तवं रजो यस्याः । गतरजस्कायां स्त्रियाम् ।

विगन्धक पु० विरुद्धः गन्धोऽस्य कप् । दुरालभावृक्षे । तपुष्यायां (यवा) स्त्री० गौ० ङीष् । स्वार्थे कन् तत्रैव ।

विगम पु० वि+गम-घञ् । नाशे, अपाये च ।

विगर्हण न० वि+गर्ह ल्यु । निन्दने । [निन्दायाम् ।

विगर्हित त्रि० वि+गर्ह-क्त । निन्दिते निषिद्धे च । भावे क्त ।

विगाढ त्रि० वि+गाह-क्त । स्नाते, कृतावगाहने च ।

विगान न० वि+गै ल्युट् । निन्दायाम् ।

विगीत त्रि० वि+गै-क्त । निन्दिते ।

विगीति स्त्री० वि+गै-क्तिन् । निन्दायाम् ।

विगुण त्रि० विरुद्धो गुणोऽस्य । गुणरहिते ।

विगूढ त्रि० वि+गुह-क्त । गर्हिते, गुप्ते च ।

विगृहीत त्रि० वि+ग्रह-क्त । गृहीते, व्याकरणोक्ते विग्रहवाक्यस्थे पदे च ।

विग्र त्रि० विगता नासिकाऽस्य ग्रादेशः । विगतनासिके ।

विग्रह पु० वि+ग्रह-अच् । देहे, विभागे, युद्धे, समासादिदर्शिते समनार्थकवाक्यभेदे, विशेषज्ञाने च ।

विघटिका स्त्री० विभागः घटिकायाः । घटिकायाश्चतुर्थभागे पञ्चदशके काले

विघटित त्रि० वि+घट-क्त । वियोजिते विशेषेण रचिते च ।

विघट्टित त्रि० वि+घट्ट-क्त । चालिते, वियोजिते च ।

विघस पु० वि+अद-घञ् । भोजनशेषे आहारे च सिक्थके न० ।

विघसाशिन् त्रि० विघसं देवतादिदत्तावशेषमश्नाति अश-णिनि । दैवपैत्र्यकार्य्यानन्तरं तदशिष्टभोजिनि ।

विघात पु० वि+हन-क्त । व्याघाते, आघाते च ।

विघातिन् त्रि० वि+हन-घिनुण् । निवारके । नाशके, नष्टे च 'नित्यश्वासं वत्र निमित्तो विघातीति व्याकरणम् । एवुल । विघातकोऽप्यत्र ।

विघ्न पु० वि+हन-क्त । व्याघाते अन्तराये, कृष्णपाकफलायाञ्च ।

विघ्ननाशक पु० ६त० । गणेशे विघ्नविनाशनादयोऽप्यत्र ।

विघ्नराज पु० विघ्ने राजते अच् । गणेशे । विघ्नेशादयोऽप्यत्र ।

विघ्नहारिन् पु० विघ्नं हरति हृ-णिनि । गणेशे ।

विघ्नित त्रि० विघ्नो जातोऽस्य इतच् । जातविघ्ने ।

विश्वेशानकान्ता स्त्री० ६त० श्वेतदूर्व्वायाम् ।
विच पृथक्करणे रु०उ०च उ०अक०अनिट् । विनक्ति विङ्क्ते विङ्क्तः विविक्ते । अविचत् अवैक्षीत् ।
विचक्किल पु० विच+क किल-क कर्म्म० । मदनवृक्षे ।
विचक्षण पु० वि+चक्ष ल्यु । पक्षिणि नागदन्त्यां, स्त्री० टाप् ।
विचयन न० वि-चि-ल्युट् । अन्वेषणे, पुष्पादिचयने च ।
विचर्चिका स्त्री० वि+चर्च ण्वुल् । पामनि रोगभेदे ।
विचार पु० वि+चर-घञ् । तत्त्वनिर्णये, तदनुगुणे वाक्यस्तोमे च ।
विचारण न० वि+चर-णिच्-ल्युट् । मीमांसायाम् । युच् । तत्रैव स्त्री०
विचि (ची) पु० स्त्री० विच-इक् । तरङ्गे स्त्रीत्वपक्षे वा ङीप् ।
विचिकित्सा स्त्री० वि+कित-स्वार्थे सन् अ । सन्देहे ।
विचित्र न० विशेषेण चित्रम् । कर्व्वूरवर्णे । तद्वति, आश्चर्य्ये च । त्रि० । स्वार्थे कन् । भुर्जपत्रवृक्षे पु० ।
विचित्रवीर्य्य पु० शान्तनुनृपात्मजे नृपभेदे ।
विचित्राङ्ग पु० विचित्रमङ्गं यस्य । (चित्रे)व्याघ्रभेदे, आश्चर्य्यदेहे त्रि०
विचेतस् त्रि० विरुद्धं दुष्टं विगिष्टं वा चेतो यस्य । दुष्टचित्ते विगिष्टचित्ते च । [ष्टेष्ण चेष्टायाम् न० ।
विचेष्टित त्रि० विगतं चेष्टितमस्य । चेष्टाशून्ये,वि+चेष्ट भावे क्त । विशे-
विच्छ दीप्तौ चु० उभ० सक० सेट् । विच्छयति ते अविविच्छत् त
विच्छ गतौ तु० पर० आयपक्षे उ० सक० सेट् । विच्छायति विच्छायते विच्छति । अविच्छायीत् अविच्छायिष्ट अविच्छीत् ।
विच्छन्दक पु० विगिष्टः छन्दो यत्र कप् । ऐश्वरगृहभेदे ।
विच्छाय न० वीनां पक्षिणां छाया नपुंसकत्वम् । पक्षिसमूहछायायाम् । विगता च्छाया यस्य। छायारहिते त्रि० ।
विच्छित्ति स्त्री० वि+छिद-क्तिन् । अङ्गरागे क्षारभेदे, छेदे, विनाशे, विच्छेदे, स्त्रीणां चेष्टाभेदे च । [छेदने न०
विच्छिन्न त्रि० वि+छिद-क्त । विभक्ते, समालब्धे च भावे-क्त ।
विच्छेद पु० वि+छिद-घञ् । वियोगे, सन्ततिराहित्ये, विभागे च

विज पृथक्करणे जु० उभ० सक० अनिट् । वेवेक्ति वेविक्ते अविजत् अविक्षीत् अविक्त ।

विज भये कम्पे च रु० प० अक० सेट् । विनक्ति अविजीत् ।

विज भये कम्पे च तु० आ०अ० अनिट् । विजते अविजिष्ट । क्त विग्नः

विजन त्रि० विगतो जनो यस्मात् । निर्जने ।

विजनन न० वि+जन—ल्युट् । गर्भमोचने, प्रसवे, उद्भवे च ।

विजय पु० वि+जि—कर्त्तरि अच् । अर्জ্জुने, विमाने यमे च । भावे अच् । जये, परिभवपूर्व्वकक्षयकरणे च ।

विजयकुञ्जर पु० विजयाय कुञ्जरः । राजवाहनगजे ।

विजया स्त्री० आश्विनशुक्लपक्षीयदशम्याम्, उमायाः सखीभेदे, 'कथयतु विजये'ति सुद्राराक्षसम् । दुर्गायां, जयन्त्यां, शेफालिकायां, मञ्जिष्ठायां, शमीभेदे, अग्निमन्थे, भङ्गायाम्, (सिद्धि) अष्टादशीमध्ये, 'यदा तु शुक्लद्वादश्यां नक्षत्रं श्रवणं भवेत् । तदा सा तु महापुण्या द्वादशी विजया स्मृते'त्युक्ते द्वादशीभेदे, शुक्लपक्षस्य सप्तम्यां सूर्य्यवारो यदा भवेत् । सप्तमी विजया नामे'त्युक्ते सप्तमीभेदे च ।

विजातीय त्रि० विभिन्नां जातिं धर्ममर्हति छ । विभिन्नधर्म्मावलम्बिनि ।

विजिगीषा स्त्री० विजेतुमिच्छा वि+जि—सन् अ । स्वोदरपूरणेच्छया निन्दनीयकर्म्मादौ प्रवृत्तौ तन्निन्दाऽगणने, विजयेच्छायाञ्च । उ । विजिगीषुः । जयेच्छावति त्रि० ।

विजिन न० विज—इन किच्च । वने वृक्षसमूहे ।

विजुल पु० विज—उलच् किच्च । शाल्मलीवृक्षे ।

विजृम्भण न० वि—जृभि—ल्युट् । विकाशे, सुखविकाशहेतुभूते वायुव्यापारभेदे (हाइतोला ।

विजृम्भित त्रि० वि+जृभि—क्त । विकसिते भावे क्त । प्रकाशे

विज्जुल न० विज उलच् जुट् च । त्वचे (दारचिनि) ।

विज्ञ पु० विशेषेण जानाति ज्ञा—क । प्रवीणे, पण्डिते च ।

विज्ञात त्रि० वि+ज्ञा—क्त । ख्याते, ज्ञाते च ।

विज्ञान न० वि+ज्ञा-ल्युट्। ज्ञाने, कर्मणि, शिल्पादिज्ञाने, वेदान्तोक्ते अविद्यावृत्तिभेदे च।

विज्ञानमयकोष पु० विज्ञानात्मकः कोष इवावरकत्वात्। ज्ञानेन्द्रियसहिते बुद्धिवृत्तिभेदे।

विज्ञानिक त्रि० विज्ञानमस्त्यस्य ठन्। विज्ञानयुक्ते।

विट आक्रोशे सक० स्वने अक०भ्वा०पर०सेट्। वेटति अवेटीत्।

विट पु० विट-क। निष्ठुरे, जारे, शृङ्गारिरसनायकानुचरे धूर्त्ते, "विट! विटपक्ष"स्तुमिति माघः। पर्व्वतभेदे, लवणभेदे, खदिरभेदे, नारङ्गवृक्षे, मूषिके च।

विटङ्क न० वि-टङ्क-अच्। कपोतपालिकायां प्रासादाद्यग्रस्थे काष्ठनिर्म्मिते कपोतावासस्थाने। (पायराखोप)

विटप पु०न०। विटं विस्तारं याति पा-क। शाखायां, पल्लवविस्तारे, स्तम्बे, पल्लवे च विटपालके त्रि०"विट! विटपमसुन्दद्रुखे"ति माघः।

विटपिन् पु० विटप+अस्त्यर्थे इनि। वृक्षे, वटवृक्षे च।

विट्लवण न० विड्रूप लवणम् ष०। विड्लवणे।

विटि(टी) स्त्री० विट कि वा ङीष्। पीतचन्दने।

विट्खदिर पु० विड्रूप दुर्गन्धः खदिरः। (गुयेरावला) वृक्षे

विट्चर पु० विशि-विष्ठायां चरति चर-अच्। ग्राम्यशूकरे

विट्पति पु० विश्यते विश-क्विप् विशः कन्यायाः पतिः। जामातरि।

विट्सारिका स्त्री० विड्रूप दुर्गन्धः सारिका। (गुयेसालिक) पक्षिभेदे।

विड आक्रोशे भ्वा० परं० सक० सेट्। वेडति अवेडीत्।

विड न० विड क। लवणभेदे।

विडङ्ग पु० न० विड-अङ्गच्। स्वनामख्याते औषधभेदे। अभिज्ञे त्रि०

विडम्बन न० वि-डबि-ल्युट्। तिरस्कारणे अनुकरणे च। युच्।

विडम्बनाप्यत्र स्त्री०। 'दृश्यश्च तेऽन्या पुरतो विडम्बनेति कु०

विडाल पु० विड कालन्। स्वनामख्याते पशुभेदे, नेत्ररिपुरोगे, नयनौषधिभेदे च। विदार्य्यां स्त्री० ङीष्। संज्ञायां कन्। कुरिताक्षे त्रि०। स्वार्थे कन् विड़ाले पशौ पु०।

विडीन न० वि+डी-क्त । पक्षिणां गतिभेदे ।

विडुल पु० विड-कुलच् । वेतसवृक्षे । इन्द्रे ।

वि(डो)डौजस् पु० विष क्विप् विट् व्याप्तमोजो यस्य ष० वा औत्व ।

विड्गन्ध न० विष्ठा इव गन्धोऽस्य । विड्लवणे ।

विड्लवण न० विड्वि दुर्गन्धं लवणम् । खनामख्याते लवणभेदे ।

विड्वराह पु० विट् प्रियो वराहः शाक० । ग्राम्यशूकरे 'लशुनं विड्-वराहञ्चे'ति मनुः ।

वितंस पु० वि+तंस-अच् । पक्षिणां बन्धनसाधने रज्जुभृतौ ।

वितण्डा स्त्री० वि तडि-अ । स्वपक्षाव्यवस्थापनेन परपक्षमात्र निरा-करणे कथाभेदे, कलम्बीशाके च ।

वितथ त्रि० वि+तन-क्थन् । मिथ्याभूते पदार्थे, स्वार्थे यत् । तत्रैव

वितस्ता स्त्री० वि+तंस-क टुङ् च । पञ्चनदेशस्थे नदीभेदे ।

वितरण न० वि+तॄ ल्युट् । दाने ।

वितर्क पु० वि+तर्क-घञ् । सन्देहे, ऊहे च ।

वितर्दि स्त्री० वि+तृद क्विन् वा ङीप् । वेदिकायाम् । पु० । वितर्दि-रथन्त० स्त्री० वा ङीप् ।

वितल न० विशेषेण तलम् । पातालभेदे ।

वितस्ति पु०स्त्री वि+तंस-क्तिच् । द्वादशाङ्गुलपरिमाणे विस्तृत सक-निष्ठाध्यङ्गुष्ठाग्रपरिमाणे । [चन्द्रातपे पु०न०

वितान न० वि+तन-घञ् । वृत्तिभेदे, अवसरे, यज्ञे, विस्तारे च ।

वितानमूलक न० वितानं विस्तीर्णं मूलमस्य कप् । उष्णीरे ।

वितुद न० वि तुद-क्त । तुनिषद्यके संज्ञायां कन् । धान्ये ।

वित्त त्यागे अद०चु०उभ०स०सेट् । वित्तयति ते अविवित्तत् त

वित्त न० वित्त्यते लभ्यते वित्त-घञ् । धने । विद-क्त । ख्याते, विचा-रिते, ज्ञाते, लब्धे, च त्रि० ।

वित्ति स्त्री० विद-क्तिन् । ज्ञाने, लाभे, विचारे च ।

वित्तेश पु०६त० । कुबेरे ।

वित्थ याचने भ्वा० आ०क्रिक०सेट् चङि न ह्रस्वः । वेत्थते अवेत्थि

विद् सत्तायामुभये आख्याने, वादे च सत्तः लाभे अक० पु० उभ०सेट्।
वेदयति ते अवीविदत् त।
विद् लाभे तु०उभ०सक०अनिट्। विन्दति ते। अविदत् अवित्त।
विद् मीमांसे रुधा० आ०सक०अनिट्। विन्ते अवित्त।
विद् भावे, दिवा० आ० अक० अनिट्। विद्यते अवित्त।
विद् ज्ञाने अदा० परः सक० सेट्। वेत्ति-वेद। अवेदीत्।
विदग्ध त्रि० वि+दह-क्त। नागरे, विपुणे, पण्डिते च। नायिका-
भेदे स्त्री०। विशेषेण दग्धे त्रि०।
विद् पु० विद क्विप्। पण्डिते, बुधपक्षे च।
विद पु० विद-क। पण्डिते, बुधपक्षे च।
विदग्ध पु० विद-कथच्। योगिनि, क्षत्रिये च।
विदर न० वि+दृ अप्। (फणिमनसा) दक्षे विदलीकरणे पु०।
विदर्भ पु०स्त्री० विगताः दर्भाः कुशा यतः। कुण्डिननगरे (नागपुर)
विदल न० विशेषेण दल्यते दल-घञर्थे क। द्विधाभूते दाड़िम कलके,
अंशादिपात्रे च। कलायादौ, रक्तकाञ्चने-पिष्टके च पु० विदलि
(तेओड़ि) स्त्री०। दल-शून्ये त्रि०।
विदा स्त्री० विद-अङ्। ज्ञाने बुद्धौ च।
विदार पु० वि+दृ-घञ्। विदारणे जलोच्छ्वासे च।
विदारक पु० वि+दृ-ण्वुल्। जलमध्यस्थतरुशिलादौ विदारण कर्त्तरि
त्रि० शुष्कनदादेर्जलधारणयोग्ये गर्त्ते न०।
विदारण न० वि+दृ णिच् ल्युट्। भेदने, मारणे, विडम्बे च। युद्धे
पु० स्त्री०। कर्णिकारवृक्षे पु०।
विदारी स्त्री०। विदारोऽस्त्यस्याः अच् गौ० ङीष्। शालपर्ण्याम्।
(शालपान) भूमिकुष्माण्डे च। [पर्ण्याम् (शालपान)।
विदारीगन्धा स्त्री० विदार्याः भूमिकुष्माण्डस्येव गन्धो यस्याः। शाल-
विदाहिन् न० वि+दह-णिनि। दाहजनकद्रव्ये।
विदित त्रि० विद-क्त। [illegible] व। भावे क्त। विख्याते

उपगमे, ज्ञाने च । तदस्यास्ति अच् । ज्ञातरि । 'विदितः खलाय-वाविति भारविः ।

विदिश् स्त्री० विगता दिशम् । दिशोर्मध्ये (कोण) ।

विदु पु० विद-कु । कस्तिकुलमध्यभागे ।

विदुर त्रि० विद-कुरच् । नागरे, धीरे, ज्ञातरि च । कौरवाणां मन्त्रिणि दासीगर्भजाते धर्म्मावतारभेदे च पु० ।

विदुल पु० विद-कुलच् । वेतसे, जलवेतसे, गन्धतृणे च ।

विदूर न० विगतं दूरम् । अतिदूरे तत्स्थे पदार्थे त्रि० 'विदूरे केयूरे, कुरु, इति साहि०३परि० । वैदूर्य्यमणिसम्बन्धस्थाने पु० 'विदूरभूमिर्नवमेघशब्दा'दिति कुमारः ।

विदूरज न० विदूरे देशभेदे जायते जन-ड । वैदूर्य्यमण्यौ ।

विदूरथ पु० । सूर्य्यवंश्ये नृपभेदे ।

विदूराद्रि पु० विदूरे देशेऽद्रिः पर्व्वतः । पर्व्वतभेदे । यत्र वैदूर्य्य-मणिरुत्पद्यते । [परनिन्द्के त्रि० ।

विदूषक पु० विदूषयति वि+दूष-णिच्-ण्वुल् । शृङ्गाररसस्वरूपभेदे ।

विदेश पु० विभिन्नो देशः । देशान्तरे, 'मृत्योरभावे भवति मरणं सज्जनानां विदेशे' इत्युद्भटः ।

विदेह पु० विगतो देहः देहसम्बन्धो यस्य । जनकाख्ये नृपे, तद्वंश्ये च कैवल्यमुक्तियुते, देहसम्बन्धशून्ये च त्रि० मिथिलायां स्त्री० ।

विदेहकैवल्य न० कर्म० । 'न तस्य प्राणा उत्क्रामन्ति इहैव समवलीयन्ते, इत्यादुक्ते जीवन्मुक्तस्य देहपातनान्तरं निर्वाणमोक्षे ।

विद्ध त्रि० व्यध-क्त । छिद्रिते, क्षिप्ते, दुर्णे, बाधिते ताडिते च ।

विद्धकर्ण पु० विद्धः कर्ण इव पत्रमस्य । (आकनादि) पाठात्राम् स्त्रीत्वमपि तत्रैव ङीष् ।

विद्यमान पु० विद-शानच् । वर्त्तमानकाले, तद्वति पदार्थे त्रि० ।

विद्या स्त्री० विद-क्यप् । ज्ञाने । तत्त्वसाक्षात्कारे 'विद्यया ह्यनमन्नुते' इति श्रुतिः । दुर्गायां, गणिकारिकावृक्षे, तन्त्रोक्ते देवीमन्त्रे च । 'तस्य विद्या न सिध्यती'ति श्यामास्तवः ।

विद्याधन(ण) त्रि० विद्यया ख्याते धन(ण)विद्यया विख्याते ।
विद्याचक्षु पु० विद्यया विख्यातः चक्षु । विद्यया ख्याते ।
विद्यादल पु० विद्यायै ज्ञानाय दल्यतेऽसौ । भूर्जवृक्षे ।
विद्यादान न० ६त० । अध्यापने, पुस्तकदाने च ।
विद्याधन न० विद्यया लब्धं धनम् । विद्याया लब्धे 'उपन्यस्ते च यल्लब्धं विद्यया पणपूर्व्वकम् । विद्याधनन्तु तद्विद्यादि'ति 'शिष्यादार्त्विज्यतः प्राप्तं सन्दिग्धप्रश्ननिर्णयात् अज्ञानसंशयोच्छेदाल्लब्धं प्राध्ययनात्तु यत् । विद्याधनन्तु तत् प्राज्ञरि'ति 'शिल्पिष्वपि किञ्चधर्म्योऽभिलषुपक्रम्य परं निरस्य वादेन विद्याया द्यूतपूर्व्वकम् । विद्याधनं तु तद्विद्यादित्युक्ते धने ।
विद्याधर पु० विद्यां मन्त्रादिकं धरति भृ अच् । देवयोनिभेदे
विद्युत् स्त्री० विद्योतते वि+द्युत-क्विप् । तडिति, सन्ध्यायाञ्च
विद्युत्प्रिय न० ६त० । विद्युदाकर्षके कांस्ये, धातौ ।
विद्युन्माला स्त्री० अष्टाक्षरपादके छन्दोभेदे ।
विद्रधि पु० वेत्रग्रेण विद्र हृदयं रुणद्धि रुध-कि पृ० । हृदयरोगभेदे
विद्रधिनाशन पु० विद्रधिं नाशयति नश णिच्-ल्यु । शोभाञ्जने
विद्रु(द्रा)व पु०+द्रु-अप् घञ् वा । पलायने, क्षरणे, युद्धे च
विद्रुत त्रि० वि+द्रु-क्त । प्राप्तद्रवे, पलायिते च ।
विद्रुम पु० विगिष्टो द्रुमः । प्रवालरत्नभेदे विशिष्टो द्रुमो यतः किसञ्चये
विद्रुमलता स्त्री० विद्रुमस्य लतेव । नखीनामगन्धद्रव्ये स्वार्थे कन् तत्रैव ।
विद्वत्कल्प त्रि० ईषदसमाप्तो विद्वान् विद्वस्+कल्पप् । ईषदूने विदुषि ।
विद्वत्तम पु० अतिशयेन विद्वान् विद्वस्+तमप् । अतिपण्डिते तरप् विद्वत्तरोऽन्यत्र । [देख्य । तत्रैव ।
विद्वद्भोग्य त्रि० ईषदसमाप्तो विद्वान् विद्वस्+देशीयर् । विद्वत्कल्पे ।
विद्वस् त्रि० विद-क्वसु । प्राज्ञे, पण्डिते, आत्मज्ञानयुक्ते च ।
विद्विष् पु० विशेषेण द्वेष्टि द्विष-क्विप् । शत्रौ कविद्विषोऽयत्न ।
विद्वेष पु० वि+द्विष-घञ् । वैरिभावे शत्रुतायाम् ।

विद्वेषण न० वि+द्विष–णिच्–ल्युट् । तन्त्रोक्ते अभिचारकर्म्मभेदे येन मनूष्यां परस्परविद्वेषो भवति तस्मिन् व्यापारे । वि+द्विष–ल्युट् । विद्वेषे ।

विध विधाने, तु०पर०सक०सेट । विधति अवेधीत् ।

विध पु० स्त्री० विध-क अङ् वा । विधाने, गजभक्ष्याङ्गे, प्रकारे, वेधे, इद्धौ च । वेतने, कर्म्मणि च स्त्री० ।

विधवा स्त्री० विगतो धवो यस्याः । मृतपतिकायां स्त्रियाम् ।

विधातृ पु० वि+धा-तृच् । प्रजापतौ, ब्रह्मणि, कामदेवे, मदिरायां, अगुप्तनिपुत्रभेदे । विधानकर्त्तरि त्रि० । स्त्रियां ङीप् स्या च पित्स्यात्त्व ।

विधान न० वि+धा-ल्युट् । करणे, विधौ, गजभक्ष्याङ्गे च ।

विधानज्ञ पु० विधानं जानाति ज्ञा-क । पण्डिते । विधिज्ञे त्रि० ।

विधायक त्रि० वि+धा-ण्वुल् । विधानकर्त्तरि ।

विधि पु० वि+धा-कि । जगत्स्रष्टरि ब्रह्मणि, भाग्ये, क्रमे, 'चिकीर्षा-ज्ञातिसाध्यत्वहेतुधीविषयो विधिरि'त्युक्ते प्रवर्त्तनारूपे नियोगे, तज्ज्ञानके वाक्ये, विष्णौ, कर्म्मणि, गजभक्ष्याङ्गे, वैद्ये, अप्राप्त-प्रापकरूपे वाक्यभेदे, संज्ञा च परिभाषा च विधिर्नियम एव च 'अतिदेशोऽधिकारश्चे'ति व्याकरणोक्ते सूत्रभेदे ।

विधिज्ञ त्रि० विधिं क्रमं जानाति ज्ञा-क । विधानक्रमज्ञे ।

विधित्सा स्त्री० विधातुमिच्छा वि+धा-सन् अ । विधानेच्छायाम् ।

विधिदेशक पु० विधिं विधानं दिशति दिश+ण्वुल् । विधिदर्शिनि सदस्ये, गुरौ च ।

विधिवत् अव्य० विधिमर्हति विधि+वति । विध्यनुसारे ।

विधु पु० व्यध-कु । चन्द्रे, कर्पूरे, विष्णौ, ब्रह्मणि, शङ्करे, वायौ च ।

विधुत त्रि० वि+धु-क्त । कम्पिते, त्यक्ते च ।

विधुनन न० वि+धु-णिच्-ल्युक्च । चालने ।

विधुन्तुद पु० विधुं तुदति तुद-खश् मुम्च् । राहौ ।

विधुर त्रि० वि+धृ-उरच् । विश्लिष्टे, विकले च विसर्गस्य धूः । वैकल्ये, विश्लेषे च न० ।

विधुवन न० वि+धु-ल्युट् । कम्पने । [स्तुतिः ।

विधूत त्रि० वि+धू क्त । कम्पिते त्यक्ते च । 'विधूतपाणास्तेभ्यान्ती'ति

विधेय त्रि० वि+धा-यत् । विधातुं योग्ये, वचनस्थे आयत्ते विधिना बोधिते च ।

विध्वंस पु० वि+ध्वंस-घञ् । नाशे ।

विनत त्रि० वि+नम-क्त । प्रणते, भुग्ने, शिक्षिते च । गरुडमातरि कश्यपपत्नीभेदे, पिठरीभेदे च स्त्री० ।

विनतासूनु पु० ६त० । अरुणे, गरुडे च । विनतात्मजादयोऽप्युभयत्र ।

विनद् पु० विशेषेण नदति नद अच । (छात्रियान) दृक्षे ।

विनस्यक न० विशेषेण नस्यमिव दृश्यार्थे कन् । तगरपुष्पे ।

विनय पु० वि+नी-अच् । शिक्षायां, प्रणामे, अनुनये च । वि+नी-कर्त्तरि अच् । विनययुक्ते, जने, निष्टते, शिष्टे, जितेन्द्रिये च ।

विनयग्राहिन् त्रि० विनयं शिक्षां गृह्णाति ग्रह-णिनि । वचनस्थिते आयत्ते ।

विनयस्थ त्रि० विनये तिष्ठति स्था-क । वचनग्राहिणि आयत्ते ।

विनयन न० वि+नश-ल्युट् । विनाशे, कुरुक्षेत्रस्थे तीर्थभेदे ।

विना अव्य० वि+ना । वर्জ্জने, अन्तरेयोगार्थे ।

विनाकृत त्रि० विनेति कृतम् विना+कृ-क्त । त्यक्ते, रहिते च ।

विनायक पु० वि+नी-ण्वुल् । गणेशे, गरुडे, विघ्ने, गुरौ च विनययुक्ते त्रि० ।

विनाश पु० वि+नश-घञ् । ध्वंसे, अदर्शने च ।

विनाशोन्मुख त्रि० विनाशाय उन्मुख उद्यतः । नष्टप्राये ।

वि(वी)नाह पु० वि+नह-घञ् वा उपसर्गदीर्घः । कूपमुखपिधाने ।

विनिद्र त्रि० विगता निद्रा यस्य । प्रकाशिते, निद्राहीने च ।

विनिपात पु० वि+नि+पत-घञ् । निपाते दैवादिकृते व्यसने, अपमाने च

विनिमय पु० वि+नि+मि-अच् । परिवर्त्ते तुल्यद्रव्यदानेन द्रव्यान्तरग्रहणे, बन्धके च ।

विनियोग पु० वि+नि+युज-घञ् । क्रियासु प्रवर्त्तने 'अनेनेदन्तु कर्त्तव्यं विनियोगः प्रकीर्त्तितः' इत्युक्ते अनुष्ठानक्रमविधाने च 'आर्षं छन्दस दैवत्यं विनियोगस्तथैव चे'ति स्मृतिः ।

विनीत त्रि० वि+नी-क्त । विनययुक्ते, शान्त-दान्ते, शिष्टे, अपनीते, निभृते च । सुशिक्षिताश्वे, दमनदण्डे च पु० ।

विनीय पु० वि+नी कर्म्म० । कल्के, पापे च ।

विनेतृ त्रि० वि+नी-तृच् । शिक्षके । नृपे पु० ।

विनेय त्रि० वि+नी यत् । शिक्षणीये, प्राप्ये च ।

विनोक्ति स्त्री० अलङ्कारोक्तौ अर्थालङ्कारभेदे ।

विनोद पु० वि+नुद-घञ् । कौतुकले, क्रीड़ायां, खण्डने च ।

बिन्दु पु० विद-उ नि० । ललाटगते भ्रुवोर्मध्ये, रेखागणितोक्ते विभागानर्हे चिह्नभेदे, अनुस्वारे च । ज्ञातरि, दातरि, वेदितव्ये च त्रि० ।

बिन्दुजाल न० ६त० । हस्तिगण्डस्थिते बिन्दुसदृशे चिह्नभेदे स्वार्थे कन् । तत्रैव ।

बिन्दुपत्र पु० बिन्दवः पत्रे यस्य । भूर्ज्जपत्रे ।

बिन्दुसरस् न० बिन्दुभिः कृतं सरः । सरोवरभेदे ।

बिन्धपत्री स्त्री० विध-क पृ० नुम् च । बिन्धं पत्रमस्याः ङीप् । (बेलगुठ) क्षुपभेदे । [जीवृक्षे च (गोयाड़) स्त्री०

बिन्ध्य पु० विध-यत् पृ० नुम् च । पर्व्वतभेदे, व्याधे च । एलायां लव-

बिन्ध्यवासिनी स्त्री० बिन्ध्येऽचले वसति वस-णिनि ङीप् । यशोदागर्भजातायां दुर्गायाम् ।

बिन्ध्याचल पु० कर्म० । बिन्ध्यपर्व्वते ।

बिन्ध्याटवी स्त्री० बिन्ध्यस्या अटवी । बिन्ध्यपर्व्वतस्थे वनभेदे ।

बिन्न त्रि० विद-क्त । विचारिते, प्राप्ते, ज्ञाते, स्थिते च ।

बिन्याक पु० वि+नि+अक-वञ् । (अतियान) वृक्षे ।

विन्यास पु० वि+नि+अस घञ्। स्थापने, रचने, तन्त्रोक्ते मन्त्रादौ न्यारणपूर्वकं हृदयादिषु अङ्गुल्यादीनामर्पणे च।

विप क्षेपे चु० उभ०सक०सेट्। वेपयति-ते अवीविपत् त।

विपक्किम त्रि० विपाकेन निर्वृत्तः। वि+पच-क्त समच्। विपाकाधीनजाते 'विपक्किमन्नानगतिरिति' भट्टिः।

विपक्ष त्रि० विरुद्धः पक्षो यस्य। बली, प्रतिकूलपक्षावलम्बिनि च। विरुद्धः पक्षः कुग०स०। प्रतिकूले पक्षे। [ऋत इत्त्वम्। तत्रैव।

विपक्षी स्त्री० वि+पक्षि-अच् गौरा० ङीष्। वीणायाम् स्वार्थे कन्।

विपण पु० वि+पण-घञर्थे क। विक्रये।

विपणि पु० स्त्री० वि+पण-इन् स्त्रीत्वपक्षे वा ङीष्। पण्यविक्रयशालायाम् (हाटचाला) हट्टे च।

विपत्ति स्त्री० वि+पद-क्तिन्। आपदि, नाशे, यातनायाञ्च।

विपथ पु० विरुद्धः पन्थाः अच् समा०। निन्दितमार्गे।

विपद्(दा) स्त्री० वि+पद-सम्प० क्विप् वा टाप्। विपत्तौ।

विपन्न त्रि० वि+पद-क्त। विपद्युक्ते, नष्टे च। सर्पे पु०।

विपरीत त्रि० वि+परि+इण्-क्त। प्रतिकूले।

विपर्णक पु० विगतानि पर्णान्यस्य कप्। पलाशवृक्षे।

विपर्य्यय पु० वि+परि+इण्-अच्। व्यतिक्रमे।

विपर्य्यस्त त्रि० वि+परि+अस-क्त। व्यतिक्रान्ते पराहते च।

विपर्य्यास पु० वि+परि+अस-घञ्। विपरीते, व्यतिक्रमे उत्क्षेपे च।

विपल पु० विभागः पलस्य। पलषष्टिभागे कालभेदे।

विपश्चित् पु० विप्रकृष्टं चेतति वि+प्र+चित-क्विप् तुट्।

विपाक पु० वि+पच-भावे घञ्। पाके, स्वेदे च। कर्म्मणि घञ्। कर्म्मफलपरिणामे जात्यायुर्भोगरूपे पदार्थे।

विपाश्(शा) स्त्री० विगताः पाशो यस्याः। स्वनामख्याते नदीभेदे।

विपिन न० वप इनन् तुट्। वने।

विपुल त्रि० वि+पुल-विस्तारे क। विस्तीर्णे, अगाधे, मेरुपश्चिमस्थे भूधरे, मेरौ, हिमाचले च। आर्य्याच्छन्दोभेदे स्त्री०।

विपुलास्त्रिय स्त्री० विपुलं रत्नं स्रवति अण्। घृतकुमारी क्षे।
विप्र पु० वप-रन् पृ० अत इत्वम् वि + प्रा-क वा। ब्राह्मणे।
विप्रकार पु० वि + प्र + कृ-घञ्। अपकारे, तिरस्कारे।
विप्रकाष्ठ न० विशेषेण प्राप्ति प्रा-क विप्रं काष्ठं यस्य। तूलवृक्षे।
विप्रकर्ष पु० वि + प्र + कृष घञ्। दूरत्वे।
विप्रकृत त्रि० वि + प्र + कृ-क्त। उपद्रुते, तिरस्कृते च 'तस्मिन् विप्रकृताः काले' इति कुमारः।
विप्रकृष्ट त्रि० वि + प्र + कृष-क्त। दूरस्थे। स्वार्थे कन् तत्रैवार्थे।
विप्रचित्ति पु० वि + प्र + चित क्तिच्। दानवभेदे।
विप्रतिपत्ति स्त्री० वि + प्रति + पद-क्तिन्। विरोधे, 'परस्परं मतव्याघातं स्वार्थे विप्रतिपत्तिश्चिति' स्मृतिः संशये, विकारे च।
विप्रतिपन्न त्रि० वि + प्रति + पद-क्त। सन्देहयुक्ते कृतविरोधे च।
विप्रति(ती)सार पु० वि + प्रति + सृ घञ् वा दीर्घः। अनुतापे, अनुशये, रोषे च।
विप्रयुक्त त्रि० विप्र + युज-क्त। वियुक्ते, विरक्ते च।
विप्रयोग पु० वि + प्र + युज घञ्। विप्रलम्भे, विरोधे विसंवादे वियोगे च।
विप्रलब्ध त्रि० वि + प्र + लभ क्त। वञ्चिते, 'प्रियः कृत्वा तु सङ्केतं यस्या नायाति सन्निधिम् विप्रलब्धेति सा ज्ञेये'त्युक्तलक्षणे नायिकाभेदे स्त्री०।
विप्रलम्भ पु० वि + प्र + लभ-घञ् मुम् च। विसंवादे, वञ्चने, विरहे च 'युक्तायुक्तयोर्भावो युक्तयोर्वाथवा मिथः अभीष्टालिङ्गनादीनामनवाप्तौ प्रकृष्यते। स विप्रलम्भो विज्ञेय' इत्युक्ते शृङ्गारावस्थाभेदे।
विप्रलाप पु० वि+प्र + लप-घञ्। विरोधोक्तौ परस्परविरुद्धार्थकथने
विप्रलोभिन् पु० विप्रलोभयति लुभ + णिच्-णिनि। किरातवृक्षे, अशोकवृक्षे। [स्त्रायां स्त्रियाम्।
विप्रश्निका स्त्री० विशेषेण प्रश्नो यस्याः ५ब० कर् अत इत्वम्। दैव

विप्रसात् अव्य० विप्रस्वाधीनं करोति विप्र + सात्। विप्रस्वाधीनकर्तरि याच्ञा।

विप्रस्व न० द्वत०। विप्रस्वाम्यके धने।

विप्रिय पु० विरुद्धं प्रियं प्री—क। अपराधे, अप्रिये च 'ब्रूतवानस्मि विप्रियं न मे' इति कुमारः ब्व० विगतप्रिये त्रि०।

विप्रुष् स्त्री० वि + प्रुष—क्विप्। बिन्दौ, वेदपाठकाले मुखनिर्गतजलबिन्दौ च।

विप्रोषित त्रि० वि + प्र + वस—क्त। गतप्रवासे।

विप्लव पु० वि + प्लु—अप्। परचक्रपतिराष्ट्रादितो भये राष्ट्रोपद्रवे च।

विप्लाव पु० वि + प्लु घञ्। अश्वस्य गतिभेदे क्रमनात् जलप्लावे च।

विप्लुत त्रि० वि + प्लु—क्त। व्यसनयुक्ते, उपद्रुते च 'अविप्लुतब्रह्मचर्य्यः' इति स्मृतिः।

विफल त्रि० विगतं फलमस्य। निरर्थके। वेतक्यां स्त्री०।

विबध पु० विगतो बधो हननं गतिर्यस्मात्। संग्रहीतधान्यतण्डुलादौ 'निरुद्धविबधासारे'ति माघः पु० दीर्घः भारे च।

विबन्ध पु० विबध्नाति मलम् वि + बन्ध-घञ्। रोगभेदे। [चन्द्रे च।

विबुध पु० वि+बुध-क। पण्डिते, देवे, 'विबुधसख' इति भट्टिः।

विभक्त क्लि० वि+भज-क्त। पृथक्कृते, विभिन्ने, कृतविभागे च 'अविभक्ता विभक्ता वा सपिण्डाः स्यावरे समा, इति स्मृतिः। भावे क्त। विभागे न०।

विभक्ति स्त्री० वि+भज क्तिन्। विभागे 'संख्यात्वव्याप्यसामान्ये यक्तिमान् प्रत्ययस्तु यः। सा विभक्तिर्द्विधा प्रोक्ते'त्युक्तलक्षणे प्रत्ययभेदे च।

विभव पु० वि+भू—अच्। धने, मोक्षे, सर्वमूर्त्तसंयोगरूपे, ऐश्वर्य्ये षष्टिसंवत्सरमध्ये 'हृष्टाः पुष्टाः जनाः सर्वे विभवेऽस्मिन् वरानने!' इत्युक्ते वर्षभेदे च।

विभा स्त्री० वि+भा-अच्। किरणे, शोभायां, प्रकाशे च।

विभाकर पु० विभां प्रकाशं करोति क अच्। सूर्य्ये, अर्कवृक्षे च।

विभाग पु० वि+भज-भावे घञ्। भागे। कर्मणि घञ्। अंशे, स्वत्वे पूर्वस्वामिस्वत्वनाशोत्तरं तत्सम्बन्धाधीनज्ञातस्वत्वव्यञ्जकव्यापारभेदे।

विभाज्य त्रि० विभक्तुमर्हति वि+भज-ऋहार्थे ण्यत्। विभागयोग्ये, भजनीये धनादौ।

विभाण्डक पु० मुनिभेदे।

विभात न० वि+भा-क्त। प्रभाते।

विभाव पु० वि+भू घञ्। परिचये, अलङ्कारोक्ते रसस्योद्दीपके आलम्बनादौ 'विभावेनाऽभिव्यक्तः सञ्चारिणा तथेति सा०द०।

विभावना स्त्री० 'प्रसिद्धकारणाभावात् कार्योत्पत्तिर्विभावने' त्युक्तलक्षणे अलङ्कारभेदे।

विभावरी स्त्री० वि+भा-कनिप् ङीप् वभोर च। रात्रौ, हरिद्रायां, कुट्टिन्याम्, अनुरक्तयोषिति, मुखरस्त्रियाम्, मेदीवृक्षे च।

विभावसु पु० विभायुक्ता वसवोऽस्य। सूर्ये, अर्कवृक्षे, वह्नौ, चित्रकवृक्षे, क्षारभेदे च।

विभाषा स्त्री० विरुद्धा भाषा वि+भाष अ। व्याकरणोक्ते पाक्षिकप्राप्तिकत्वके 'नवेति विभाषे'त्युक्तलक्षणे विकल्पविधाने।

विभिन्न त्रि० वि+भिद-क्त। प्रकाशिते, विदलिते, विभक्ते च।

विभीतक पु० विशेषेण भीत इव दृश्यार्थे कन्। (बयड़ा) वृक्षे।

विभीषण पु० विशेषेण भीषयते भीष्+ल्यु भी णिच् सुक् च ल्यु। रावणभ्रातरि राक्षसे, नलवृक्षे च। [प्रदर्शने।

विभीषिका स्त्री० वि+भी णिच् सुक् च धात्वर्थनिर्देशे ण्वुल्।

विभु पु० वि+भू डु। सर्वमूर्त्तसंयुक्ते, प्रभौ, महादेवे ब्रह्मणि च।

विभूति स्त्री० वि+भू क्तिन्। भस्मनि 'अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा। ईशित्वं च वशित्वञ्च तथा कामावसायितेत्युक्ते ऐश्वर्ये च।

विभूषा स्त्री० वि+भूष अ। शोभायां, भूषणे च।

विभ्रम पु० वि+भ्रम-घञ्। स्त्रीणां भ्रूभङ्गराङ्गे चेष्टभेदे 'विभ्रमस्त्वरयाऽकाले भूषास्थानविपर्ययः' इत्युक्तौ त्वरया भूषास्थानवैपरीत्ये च

'यथाप्यारो विभ्रममण्डनानामिति कुमारः । विशेषे च, भ्रान्तौ, शोभायां, सन्देहे, भ्रमणे च ।

विभ्राज् त्रि० वि+भ्राज-क्विप् । भूषणादिना दीप्ते ।

विमत त्रि० वि+मन-क्त । विरुद्धमतियुक्ते । [वञ्चिते ।

विमनस् (स्क) त्रि० विक्षिप्तं मनो यस्य वा कप् । चिन्तादिना व्याकु-

विमर्द पु० विमृद्यतेऽसौ वि+मृद-घञ् । (कासकासुन्दिया) वृक्षे ।

चक्रमर्दके च । भावे घञ् । मर्दने ।

विमर्शन न० वि+मृश ल्युट् । परामर्शे, न्यायोक्ते साध्यव्याप्यहेतम-

त्वेन पक्षनिश्चये वितर्के च । घञ् तत्रैव पु० ।

विमर्ष पु० वि+मृष-घञ् । विचारे, नाटकाङ्गभेदे च ।

विमल त्रि० विगतो मलो यस्मात् । स्वच्छे, निर्मले, विगतो मलो यस्याः

ऋक्ष० । (चामारकषा) सप्तलायाम् जगन्नाथचेत्रस्थे देवीभेदे च स्त्री० ।

विमातृ स्त्री० विरुद्धा माता । माहसपत्न्याम् ।

विमातृज पु० विमातुर्जायते जन-ड । सापत्ने भ्रातरि ।

विमान पु० न० वि+मन-घञ् वि+मा ल्युट् वा । देवयाने, रथे, सार्व-

भौमगजभेदे च । अम्बे पु० यानमात्रे परिमाणे च न० ।

विमार्ग पु० विरुद्धो मार्गः । कुपथे, निन्दिताचारे ।

विमुख त्रि० विरुद्धमनुकूलं मुखमस्य । वक्रितुण्डे, निहते च ।

विमुद्र त्रि० विगता मुद्रा मुकुलीभावो यस्य । विकशिते, मुद्रारहिते च ।

बिम्ब पु० न० । वी+चन्-मुम्हुस्वौ । दर्पणादौ भासमानप्रतिबिम्बा-

श्रये, कमण्डलौ च । सूर्यादिमण्डले च क्लीबे पु० । बिम्बायाः

फलम् अण् तस्य लुप् । बिम्बिकाफले । [(तेलाकुचा) ।

बिम्बजा स्त्री० बिम्बं फलं जायतेऽस्याः जन-ड । बिम्बिकावृक्षे

बिम्बट पु० बिम्बमटति घट- अच् मुक० । सर्पे ।

बिम्बा (म्बी) स्त्री० बिम्बमस्त्यस्याः अच् वा गौ० ङीष् । (तेलाकुचा)

लतामेदे स्वार्थे कन् । तत्र, सूर्यादिमण्डले च ।

बियत् न० वि+यम-क्विप् मलोपे तुक् । आकाशे ।

बियद्गङ्गा स्त्री० बियत्स्था गङ्गा । स्वर्गङ्गायां मन्दाकिन्याम् ।

वियात त्रि० वि+या क्त । दृष्टे, निर्लज्जे च ।

वियोग पु० वि+युज-घञ् । विच्छेदे । हृत० । पक्षिरोगे ।

वियोगिन् पु० वि+युज-घिनुण् । चक्रवाके, पक्षिरोगे, विच्छेदवति त्रि०

विरक्त त्रि० वि+रञ्ज-क्त । विच्छिन्ने, विरते च ।

विरङ्ग पु० वि+रञ्ज घञ् । कङ्कुष्ठे ।

विरचित त्रि० वि + रच-क्त । कृते, निर्म्मिते च ।

विरजस्तमस् त्रि० विगते रजस्तमसी यतः । सत्वगुणप्रधाने ।

विरजस् विगतं रजो यस्याः । ऋतार्त्तवायां स्त्रियाम् । रजोगुण-हीने त्रि० ।

विरजा स्त्री० विशेषेण रज्यते रञ्ज-अ । दूर्व्वायां, गोलोकस्थे राधा-सखीभेदे तच्छापाज्जायमाने नदीभेदे च ।

विर(ञ्)ञि पु० वि + रच अच् इन् वा ञुम् च । जगत्स्रष्टरि ।

विरण न० विशिष्टो रणो मूलमस्य । उशीरे (वेणारमूल) ।

विरत त्रि० वि+रम क्त । निवृत्ते । [स्त्रिया च ।

विरति स्त्री० वि + रम-क्तिन् । निवृत्तौ, विषयसेवायां-व्यापारात्-

विरल त्रि० वि + रा-कलन् । अवकाशे, विच्छिन्ने, अनिबिड़े च ।

विरह पु० वि + रह-घञ् । विच्छेदे, अभावे, शृङ्गाररसस्य विप्रलम्भाख्ये अवस्थाभेदे च ।

विरहित त्रि० वि + रह-क्त । त्यक्ते, हीने च । [शून्ये त्रि० ।

विराग पु० वि + रञ्ज-घञ् । रागाभावे, विगतो रागो यस्य । राग-

विराज् पु० विशेषेण राजते क्विप् । क्षत्रिये ब्रह्माण्डात्मकस्थूलदेहा-भिमानिनि आदिपुरुषे, छन्दोभेदे च ।

विराट पु० विशेषो राटो यत्र । देशभेदे, तद्देशाधिपे नृपे च ।

विराध पु० राक्षसभेदे ।

विराधन न० वि + राध ल्युट् । पीड़ायाम् ।

विराम पु० वि + रम-घञ् । अवसाने, विरतौ, निवृत्तौ च ।

विराल पु० वि + डल-घञ् लस्य रः । बिड़ाले पशुभेदे ।

विराव पु० वि + रु-घञ् । शब्दे ६त० । विगतरवे त्रि० ।

विरिञ्च पु० वि + रिच-अच् उस् च । विष्णौ जगत्स्रष्टरि वेधसि, शिवे च । इत्यमरः । तत्पर्यायौ ।

विरुढ़ त्रि० विशेषेण रोहति वि + रुह-क्त । जाते, अङ्कुरिते च ।

विरूप त्रि० विगतं रूपमवयवः । दुष्टरूपयुक्ते, विनिन्दिते च विरूपकोमूले न० । अतिविषायां दुरालभायाञ्च स्त्री० । [विरूढमेले त्रि० ।

विरूपाक्ष पु० विरूपे विरूढे अक्षिणी यस्य अच् समा० । महादेवे ।

विरेक पु० वि + रिच-घञ् । महादेवेधोनिःसारणे, अतिरेके च ।

विरेचन वि+रिच-णिच् ल्युट् । महादेर्निःसारणे, उदरमध्ये विरेचनौषधं पिबेति वैद्यकम् । विरेचयति वि+रिच-णिच्-ल्यु । पीलुवृक्षे पु० । भेदकमात्रे त्रि० ।

विरोक पु० न० वि + रुच-घञ् यस्य कः । क्षिप्ते, सूर्यकिरणे पु० ।

विरोचन पु० वि+रुच-युच् । सूर्ये अर्कवृक्षे, बलिपितरि प्रह्लादतनये असुरभेदे, चन्द्रे च रोचयति रुच-णिच-ल्यु । रोहितकवृक्षे, श्लोमाकवृक्षे, वृक्षकरञ्जे च पु० । दीप्तिकरे त्रि० ।

विरोध पु० वि+रुध-घञ् । वैरे, विरुद्धतायाम् न्यायोक्ते साध्येनासामानाधिकरण्यरूपे हेत्वदोषे, यथा वह्निमान् जलादित्वात् जलत्वरूपहेतोर्वह्निना सामानाधिकरण्यं नास्ति ।

विरोधन न० वि+रुध-ल्युट् । वैरे ।

विरोधिन् पु० वि+रुध-णिनि । रिपौ, षष्टिसंवत्सरमध्ये "जायते मानुषे कष्टं विरोधिनि न संशयं" इत्युक्तलक्षणे वत्सरभेदे च ।

विरोधोक्ति स्त्री० अर्थालङ्कारभेदे, परवचनविरोधिवचने च ।

विल्ल स्तृतौ तु० प० सक० सेट् । विल्लति अवेल्लीत् ।

विल न० विल-क । छिद्रे, गुहायाञ्च । विलस्येत्यत्रिकारश्लेनाकारश्च अच् । 'घोटवोत्तमे, वाजिनो विलयोनय' इति कुमारः । वेतसे च पु० ।

विलक्ष पु० विलक्ष-अच् विस्मययुक्ते ।

विलक्षण त्रि० विगिष्टं लक्षणमस्य । विभिन्ने, विशेषयुक्ते च ।

निष्प्रयोजनस्थितौ च न०। दानार्थं काञ्चनपुरुषमूर्त्तिकुसुमशय्याभेदे स्त्री०। 'अथौचात्यात् द्वितीयेऽह्नि शय्यां दद्यात् विलम्बयामिति स्मृतिः।

विलम्ब त्रि० विशेषेण लम्बं लम्ब्-क्त नञ् बः अस्य मः। संलग्ने। मध्यभागे, कटौ, खदितखेमादिरायौ च न०। 'गोचरे वा विलम्बनेवे'ति ज्योतिषम्।

विलम्ब पु० वि + लबि-घञ्। विलम्बने अधीप्सिते प्रतीक्षणीयकाले।

विलम्बित त्रि० वि + लबि-क्त। अधीप्सिते, मन्दे च मध्यलये न०

विलय पु० वि+ली-अच् प्रलये, नाशे च।

विलला स्त्री० वि+लस-अच्। श्वेतवलायाम्। [गोधायां च।

विल(ले)शय पु० विले शेते-शी अच् वा अलुक्स०। सर्पे, मूषिके,

विलाप पु० वि+लप-घञ् परिदेवनोक्तौ।

विलास पु० वि+लस-घञ्। 'तात्कालिको विशेषस्तु विलासोऽङ्गक्रियादिषु' इत्युक्ते स्त्रीणां हस्तारचेष्टाभेदे, चेष्टाविशेषे, दीप्तौ च।

विलासिनी स्त्री० विलासोऽस्यास्ति इनि ङीप्। नार्य्यां, वेश्यायाञ्च।

भोगवति त्रि० सर्पे, कृष्णे, वञ्चके, खरे, महादेवे चन्द्रे च पु०।

विलीन त्रि० वि-ली-क्त। प्राप्तद्रवीभावे द्रुतादौ, विरते, नष्टे च 'विलीनाशेषपातके'ति भागवतम्।

विलेपन न० विलिप्यतेऽनेन करणे ल्युट्। गात्रानुलेपनद्रव्ये पिष्टे दृष्टे वा चन्दनकुङ्कुमादौ। कर्म्मणि ल्युट् ङीप्। यवान्यां, सुवेधाटां स्त्रियाञ्च स्त्री०।

विलेप्य पु० वि+लिप-ण्यत्। यवान्याम् विलेपनीये त्रि०।

विलोचन न० वि+लुच-करणे ल्युट्। नेत्रे, भावे ल्युट्। दर्शने

विलोडित न० वि+लोड-क्त। नक्रे। व्याकोडिते त्रि०।

विलोम त्रि० विगतं लोम यस्य अच् समा०। विपरीते, अरघट्टके न० सर्पे, क्रकुरे वरुणे च पु०।

विलोमजिह्व पु० विलोमा विपरीता जिह्वा यस्य। गजे।

विलोमवर्ण पु० विलोमजः स्वयोनितया व्युत्क्रमजो वर्णः। उत्त-

मल्लिकायामधमवर्णेन जनिते सङ्कीर्णे वर्णे । [आमलक्याम् ।

विलोमी स्त्री० विगिष्टं लोम केशो यस्याः पृ० अच् गौरा० ङीष् ।

विलोल त्रि० वि+लुल-अच् । चञ्चले, विशेषतृष्णे च ।

विल्ल न० विल-ल किच्च तस्य नेत्वम् । आलवाले ।

विल्लमूला स्त्री० विल्लमालविलमिव वेष्टितं मूलमस्याः वारा० कन्डे ।

विल्व पु० विल्ल-वनु किच्च । श्रीफलवृक्षे, तत्फलादौ, परिमाणे च न० ।

विल्वपेषिका स्त्री० विल्वस्य पेषोऽस्यस्य ठन् । (बेलगुठा) पदार्थे गुल्म-विल्वीत्यत्र

वि (वी)वध पु० वि+यध-अच् या दीर्घः । धान्यतण्डुलादेराहरणे भारे स्कन्धवहनयोग्ये (बाँक) काष्ठभेदे च ।

विवर न० वि+वृ-अप् । छिद्रे, दोषे च ।

विवरण न० वि+वृ-ल्युट् । व्याख्याने, तत्कारके ग्रन्थभेदे च ।

विवरनालिका स्त्री० विवरयुक्तं नालमस्त्यस्याः ठन् । वेणौ (वांश)

विवर्ण त्रि० विरुद्धो वर्णोऽस्य । अधमे, नीचे च ।

विवर्त्त पु० वि+वृत-घञ् । हर्षे, समुदाये, अपवर्त्तने वेदान्तोक्ते कारणात् विषमसत्ताकतया उत्पद्यमाने कार्य्ये च । यथा रज्जुरज्जुतम् ब्रह्मणो जगत् ।

विवश त्रि० विगतो वशं आयत्तता यस्य । अस्वतन्त्रे, व्याकुले च विवशा कामवधूरिति कुमारः क्षतरोषे च ।

विवस्वत् पु० वि+वस-क्विप् अस्त्यर्थे मतुप् मस्य वः । सूर्य्ये, अर्कवृक्षे अरुणे, देवे च ।

विवाद पु० विरुद्धोवादः । 'ऋणादिदायकलहे द्यूते वैकृतरस्य वा । विवादो व्यवहारेऽर्थे' त्युक्तलक्षणे व्यवहारे, कलहे, च ।

विवाह पु० वि+वह-घञ् दारपरिग्रहे, तज्जनके व्यापारे च ।

विवाहित पु० विवाहो जातोऽस्य तारा० इतच् । जातविवाहे ।

विवाह्य त्रि० वि+वह-ण्यत् । विवाहयोग्ये, विशेषेण वाह्ये च

विविक्त त्रि० वि+विच-क्त । निर्जने पवित्रे, असंयुक्ते च । कर्त्तरि-क्त । विवेकिनि त्रि० । दुर्भगायां स्त्रियां स्त्री० ।

विविध त्रि० विभिन्ना विभिन्ना विधा यस्य । नानाप्रकारे । [युक्ते देये ।
विवीत पु० विविष्टं वीतं गवादिप्रचारस्थानं यत्र । प्रचुरतृणजलादि-
विवृत त्रि० वि+वृ-क्त । विस्तृते व्याख्याते च ।
विवृति स्त्री० वि+वृ-क्तिन् । विस्तारे व्याख्याने च ।
विवेक पु० वि+विच-घञ् । याथार्थ्येन वस्तुस्वरूपावधारणे, प्रकृति-
पुरुषयोर्भेदज्ञाने च ।
विवोढृ पु० वि+वह-तृच् जामातरि ।
विव्योक पु० वि+वा-कु तस्य ओकः स्थानम् । 'गर्वाभिमानादिष्टेऽपि वि-
व्योकोऽनादरस्त्रियै'त्युज्ज्वलदत्ते स्त्रीणां भ्रूकटारचेष्टाभेदे ।
विश् प्रवेशे तु० परo सकo अनिट् । विशति अविक्षत् ।
विश पु० विश-क्विप् । मनुजे, वैश्ये च ।
विशङ्कट त्रि० वि+शङ्कट-अच् । विशाले ।
विशद पु० वि+शद-अच् । शुभ्रवर्णे । शदति विशदे, शुक्ले च त्रि०
विशय पु० वि+शी-अच् । संशये 'विषयोविशयश्चे'ति मीमांसा
विशर पु० वि+शॄ-अच् । वधे । [(क्षारपर्पटी) टङ्के ।
विशल्यकरणी स्त्री० विगतं शल्यं तत्प्रहारवेदनानिवृत्तिं करोति क-ङीप् ।
विशल्या स्त्री० विगतं शल्यं तत्प्रहारवेदना यस्याः ५ब० । अग्निशि-
खवृक्षे, दन्तीवृक्षे, गुडूच्याम्, स्त्रिप्रसवायां अजमोदायाञ्च । विग-
तशल्ये त्रि० ।
विशसन न० वि+शस-ल्युट् । मारणे । [खड्गलोलम् ।
विशसन पु० विशस्यतेऽनेन ल्युट् । खड्गे, 'असिर्विशसनः खड्ग' इति
विशस्त त्रि० वि+शस-क्त । नाशिते अतीते च । वा इट् । तल, मारिते
विशाख पु० विशाखानक्षत्रे भवः अण् । कार्त्तिकेये धन्विनां वित-
स्तिमन्तरालप्रदावस्थाने, पुनर्नवायां, याचने च ।
विशाखज पु० विशिष्टा शाखा यस्य तथा सन् जायते जन-क । मारङ्गे
विशाखानक्षत्रजाते त्रि० ।
विशाखा स्त्री० विशिष्टा शाखा प्रकारो यस्याः । वङ्कनक्षत्राक्रमेऽ-
श्विन्यवधिके क्रोडमे नक्षत्रे कठिल्लके च ।

विशारण न० वि+शॄ-स्वार्थे णिच्-ल्युट्। मारणे।

विशारद पु० विशालं ददाति दा-क लस्य रः। वकुलवृक्षे चुद्दुराल-भाषां स्त्री० पण्डिते, प्रगल्भे, श्रेष्ठे च त्रि०।

विशाल त्रि० वि+शालच्। विस्तीर्णे, दृढे च। नगभेदे, नदभेदे च पु०। इन्द्रवारुण्याम् माहेन्द्रवारुण्यां नदीभेदे च स्त्री० 'विशाला विरजा तथेति पुराणम्।

विशालता स्त्री० विशालस्य भावः तल्। पार्श्वविस्तारे। [दृढत्वे

विशालतलगर्भ पु० विशालं विस्तीर्णं तैलं गर्भे फलमध्ये यस्य वृक्षो

विशालत्वच् पु० विशाला त्वक् यस्य। सप्तच्छदे वृक्षे।

विशालपत्र पु० विशालं पत्रमस्य। कासालौ, तालवृक्षे च।

विशालाक्ष पु० विशाले अक्षिणी इव यस्य षच्समा०। महादेवे, गरुडे, विष्णौ च ह्रस्वनेत्रे, त्रि० पार्वत्यां नागदन्त्यां च स्त्री० ङीष्

विशाली स्त्री० वि+शालच् गौरा० ङीष्। अजमोदायाम्।

विशिख पु० विशिष्टा विगता वा शिखा यस्य। शरवृक्षे, बाणे, तोमरे च ह्रस्व० शिखारहिते त्रि०। नालिकायाम् रथ्यायाञ्च स्त्री०।

विशिष्ट त्रि० वि+शिष-क्त। युक्ते, विलक्षणे, विशेषयुक्ते च।

विशिष्टाद्वैत न० रामानुजाचार्यके प्रकृतिविशिष्टस्य ब्रह्मणोऽद्वयत्वे

विशीर्ण त्रि० वि+शॄ-क्त। शुष्के, जरायस्यापन्ने च।

विशीर्णपर्ण पु० विशीर्णं पर्णमस्य। निम्बवृक्षे।

विशुद्ध त्रि० वि+शुध-क्त। दोषरहिते, विशदे च।

विशुद्धि स्त्री० वि-शुध-क्तिन्। शोधने, दोषराहित्ये च।

विशृङ्खल त्रि० विगता शृङ्खला पङ्क्तिर्यस्याः। परिपाटीशून्ये

विशेष पु० वि+शिष-घञ्। प्रभेदे, प्रकारे, व्यक्तौ, तिलके, 'अन्त्ये नित्यद्रव्यवृत्तिर्विशेषः परिकीर्त्तित इति वैशेषिकोक्ते पदार्थभेदे, अर्थालङ्कारभेदे च।

विशेषक पु० न० विशेषयति वि+शिष-णिच्-ण्वुल्। ललाटस्थे तिलके। विशेषकर्त्तरि त्रि० "त्रिभिर्न्यूनं विशेषकमि"त्युक्ते एकवाक्यतापन्ने श्लोकत्रये न०।

विशेषगुण पुं॰कर्म॰। वैशेषिकोक्ते 'द्रव्यादिषट्कं रूपादिचतुष्कं' चेत्यु-
भयत्रे। स्वाभाविकद्रवत्वञ्च अद्रवे यज्ञ्यय चेत्युक्तेषु गुणभेदेषु।
विशेषण न॰ विशिष्यतेऽनेन वि+शिष-ल्युट्। भेदकधर्म्मे गुणक्रियादौ
यथा नीलम् उत्पलं चलो गौरित्यादौ गुण क्रियादिभेदकधर्म्मः।
विशेषविधि पुं॰ विशेषे विधिः। सामान्यविशेषयोर्मध्ये विशेषगोचरे
विधाने यथा ब्राह्मणेभ्यो दधि दीयतां शाण्डिल्याय तक्रमित्यत्र
शाण्डिल्यश्च ब्राह्मणविशेषत्वेन तद्विषये दधिदानापवादेन तक्रदा-
नविधिः।
विशेषित त्रि॰ वि+शिष-णिच्-क्त भेदिते विशेषणयुक्तीकृते च।
विशेषोक्ति स्त्री॰ अर्थालङ्कारभेदे।
विशेष्य त्रि॰ विशिष्यते भेद्यते गुणादिभिरसौ वि+शिष ण्यत्। गुणा-
दिभिर्भेद्ये, व्यवच्छेद्ये, पदार्थे धर्म्मिणि च।
विशोक पुं॰ विगतः शोकः यस्मात् यस्य वा। अशोकवृक्षे शोकरहिते
त्रि॰ योगशास्त्रोक्ते चित्तवृत्तिभेदे स्त्री॰
विशोधनी स्त्री॰ विशुध्यतेऽनया शुध-ल्युट् ङीप्। दन्तीवृक्षे
भावे ल्युट्। शोधने न॰ वि+शुध-ल्यु। शोधनकारके त्रि॰।
विशोधिन् त्रि॰ वि+शुध-णिच् णिनि। शोधनकारके त्रि॰। नाग-
दन्त्यां स्त्री॰ ङीप्।
विश्र(स्रा)ण न॰ वि+श्रण-णिच्-ल्युट् वा दृद्धिः। दाने।
विश्रब्ध त्रि॰ वि+श्रम्भ-क्त। विश्वस्ते 'विश्रब्धं परिचुम्बेत्रिति सा॰।
शान्ते, अनुद्विग्ने, गाढे च। [स्राबस्रजे च।
विश्र(स्रा)म पुं॰ वि+श्रम-घञ् वा दृद्धिः। विरामे प्रवृत्त व्यापार-
विश्रम्भ पुं॰ वि+श्रम्भ-घञ्। विश्वासे, प्रत्यये, केलिकलहे वधे च।
विश्राव पुं॰ वि+स्रु-घञ्। प्रसिद्धौ ख्यातौ च।
विश्रुत पुं॰ वि+स्रु-क्त। विख्याते।
विश्लिष्ट त्रि॰ वि+श्लिष-क्त। वियुक्ते शिथिले च।
विश्लेष पुं॰ वि+श्लिष-घञ्। वियोगे शैथिल्ये च।

विश्व न० विश-य । जगति संसारे । तदभिमानिनि जीवे पु० । आद्ये देवविशेषे पु० ब०व० । सकले त्रि० तदर्थोऽस्य सर्व्व नामता ।

विश्वकर्म्मन् पु० विश्वेषु कर्म्म व्यापारो यस्य । सूर्य्ये, देवशिल्पिनि, मुनिभेदे, परमेश्वरे च ।

विश्वकृत् पु० विश्वं करोति कृ-क्विप् । विश्वकर्म्मणि, परमेश्वरे च ।

विश्वकेतु पु० विश्वे केतवोऽस्य । अग्निरुद्रे ।

विश्व(ष्व)क्सेन विष्णु(पु)ची सेनाऽस्य । विष्णौ, प्रियङ्गुवृक्षे स्त्री० ।

विश्वगन्ध पु० विश्वतो गन्धोऽस्य । बेले गन्धरसे, पलाण्डौ च ।

विश्वगन्धा स्त्री० विश्वे सकला गन्धा यस्याः । पृथिव्याम् ।

विश्वग्रन्थि स्त्री० विश्वतो ग्रन्थिर्यस्याः । हंसपदीलतायाम् ।

विश्व(ष्व)च् अव्य० विश्वमञ्चति क्विप् विशु(षु) आदेशः । सर्व्वत इत्यर्थे विश्वगामिनि त्रि० अद्रयागमे विश्व(ष्व)द्रङ्प्यत्व ।

विश्वधारिणी स्त्री० विश्वं धारयति धृ-णिनि । पृथिव्याम् ।

विश्वपर्णी स्त्री० विश्वतः पर्णान्यस्याः । भूम्यामलक्याम् ।

विश्वपस् पु० विश्वं पुनाति भक्षति पुसा-कनिन् । अग्नौ, चन्द्रे देवे, विश्वकर्म्मणि, भूमौ च ।

विश्वभेषज न० विश्वेषां भेषजम् । शुण्ठ्याम् । [पृथिव्यां स्त्री०]

विश्वम्भर पु० विश्वं बिभर्त्ति भृ-अच् मुम् च । इन्द्रे, विष्णौ च ।

विश्वरूपक न० विश्वं रूपमस्य कप् । अभ्राभ्रवृक्षे ।

विश्वरेतस पु० विश्वं रेतोजन्म यस्य । चतुर्मुखे ब्रह्मणि ।

विश्वरोचन पु० विश्वान् रोचयति रुच-णिच्-ल्यु । नाडीचक्रे ।

विश्ववेदस् पु० विश्वं वेत्ति विद असुन् । इन्द्रादौ देवे, सर्व्वज्ञे च ।

विश्वसार न० विश्वेषां सारम् । तन्त्रभेदे । संज्ञायां कन् । (फणिजनसा) वृक्षे पु० ।

विश्वसृज् पु० विश्वं सृजति सृज-क्विप् । चतुर्मुखे ब्रह्मणि ।

विश्वस्त त्रि० वि+श्वस-क्त । जातविश्वासे, विश्वसितोऽस्यत्र त्रि० वा ट्ट । विधवायां स्त्रियां स्त्री० ।

विश्वस्था स्त्री० विश्वतः तिष्ठति स्था-क । शतावर्य्याम्

विश्वाची स्त्री० विश्वमञ्चति अञ्च क्विप् । अप्सरोभेदे ।
विश्वात्मन् पु० विश्वमात्मा यस्य । विष्णौ । [रूपे ।
विश्वामित्र पु० विश्वं मित्रमस्य पूर्व्वपददीर्घः । ब्रह्मर्षिभेदे गाधिसुते
विश्वामित्रप्रिय पु० ६त० । नारिकेले श्रीराजे च ।
विश्वाराज् पु०विश्वेषु राजते राज-क्विन् । विश्वेषां राजनि, परमेश्वरे च
विश्वावसु पु०विश्वेषां वसु यस्मात् पृ० दीर्घः । गन्धर्वभेदे । राज्ञी स्त्री०
विश्वास पु० वि+श्वस-घञ् । इदमित्थमेवेत्याकारे चित्तवृत्तिभेदे, प्रत्यये,
श्रद्धायाञ्च ।
विश्वेदेव पु० ब०, व० कर्म्म० अलुक्स० । 'क्रतुर्दक्षो वसुः सत्यः कालः
कामस्तथा ध्वनिः । रोचकस्तद्वयश्चैव तथा चान्यः पुरूरवाः ।
विश्वे देवा भवन्त्येते दश श्राद्धेषु पूजिता' इत्युक्ते श्राद्धदेयभेदे ।
विश्वदेवस्तु वह्नौ पु० ।
विश्वेश पु० ६त० । शिवे, विश्वेश्वरादोऽयत्र ।
विश्वौषध न० विश्वेषु रोगेषु औषधम् । शुण्ठ्याम् ।
विष व्याप्तौ जु०उभ०सक०अनिट् । वेवेटि वेविष्टे । अविषत् अविष्ट त ।
विष विप्रयोगे क्र्या०पर०अक०अनिट् । विष्णाति अविक्षत्
विष सेचने भ्वा०पर०सक० अनिट् । वेषति अविक्षत् ।
विष् स्त्री० विष-क्विप् । विष्ठायाम् ।
विष न० विष-क । जले, पद्मकेशरे, मृणाले, गन्धरसे, वत्सनाभे-विषे
च गरलमात्रे पु०न० । [ख्याम् ।
विषकण्टकिनी स्त्री० विषयुक्तं कण्टकमस्या अस्ति इनि । वन्ध्याकर्कौ-
विषकण्ठ पु० विषं कण्ठे यस्य । शिवे ।
विषघा स्त्री० विषं हन्ति हन-ड नि० । कृत्यघ्न । गुडूच्याम् ।
विषघातिन् पु०विषं हन्ति हन-णिनि । शिरीषवृक्षे । विषनाशके त्रि०
विषघ्न पु० विषं हन्ति हन-क । शिरीषवृक्षे, वयसे, विभीतके, चक्र०
कदम्बे च स्त्रियां मोचिकायां (हैलेञ्चा) इन्द्रवारुणयाम्, वर्षराभायाम्,
भूम्यामलक्याम्, रक्तपुनर्नवायाम् हरिद्रायाम्, दन्तिकाल्याम्,
अर्कवृक्षे च स्त्री० ङीप् । विषनाशके त्रि० ।

विषजिह्व पु० विषयुक्ता जिह्वेव पत्रमस्याः । देवताडवृक्षे ।

विषज्वर पु० विषमिव प्राणहरो ज्वरो यस्य । सन्निपाते ।

विषण्ड न० विशेषेण षण्डम् । नपुंसके ।

विषतिन्दु पु० विषयुक्तस्तिन्दुः । कुपीलौ ।

विषद न० वि+षद–अच् । पुष्पकाशीसे शुक्लवर्णे पु० । तद्वति त्रि० ।

विषघ्नान्तक पु० विषं हन्ति यस्य कप् । सर्पे ।

विषधर पु० विषं धरति भृ-अच् । सर्पे, 'विषधरविषमलिं'त्युक्तेः ।

विषधर्म्मन् पु० विषस्येव धर्म्मोऽस्य अलिच् समा० । (आलकुशी) लतायाम् ।

विषनाशन पु० विषं नाशयति नश-णिच्-ल्यु । गिरीषवृक्षे

विषनुद् पु० विषं नुदति नुद क्विप् । श्योनाकवृक्षे ।

विषपुष्प न० विषमिव नीलं पुष्पमस्य । नीलवृक्षे । कप् । मदनवृक्षे । कर्म्म० । नीलपुष्पे न० ।

विषम त्रि० विगतो विरुद्धो वा समः । असमे, अयुग्मे उन्नतानते, दारुणे, सङ्कटे च 'भिन्नचित्रचतुष्पादं विषमं परिकीर्त्तितमि'त्युक्ते पद्यभेदे न० ।

विषमच्छद पु० विषमाः अयुग्मानि सप्त छदाः यस्य । सप्तच्छदे ।

विषमज्वर पु० विषम उग्रो ज्वरः । ज्वरभेदे ।

विषमनयन पु० विषमाणि अयुग्मानि त्रीणि नयनान्यस्य । शिवे । विषमनेत्रादयोऽप्यत्र । [त्राम् । स्वार्थे कन् । तत्रैव ।

विषमर्द्दनी स्त्री० विषं मर्द्यतेऽनया मृद-ल्युट् ङीप् । मञ्जनाक्ष-

विषमस्थ त्रि० विषमे उन्नतानते सङ्कटे वा तिष्ठति स्था-क । उपद्रव-प्राप्ते, सङ्कटस्थे, उन्नताननदेशस्थे च ।

विषमशिष्ट न० विषमं शिष्टं शासनम् । अनुचितशासने ।

विषमायुध पु० विषमाण्यि अयुग्मानि पञ्च कायुधानि बाणा यस्य । कामे । विषमेषवादयोऽप्यत्र ।

विषय पु० विशिष्यन्ति स्वात्मकतया विषयिणं निरूपयन्ति सम्बध्नन्ति वा वि+षि-अच् । इन्द्रियगोचरे-शब्दादौ, देशे च ।

विषयिन् न० विषयोऽस्यास्य इनि । घ्राणे, इन्द्रिये च । विषयासक्ते त्रि० । रात्रि, कामदेवे, ध्वनौ च पु० । [विषायाम् (औषधे च) ।

विषरूपा स्त्री० विषं मूर्छाकरविषं रूपयति अतिक्रामति रूप-क । अति-

विषलता स्त्री० विष-व्याप्तेव लता । इन्द्रवारुणाम् ।

विषविद्या स्त्री० विषाय तच्चिकित्सये विद्या । विषघ्नमन्त्रज्ञाने ।

विषवैद्य पु० विषे विषापहारे वैद्यश्चिकित्सकः । विषमन्त्रविद्यावति

विषशालूक पु० विषस्य शूकस्य शालूकः । पद्मकन्दे ।

विषहन्त्री स्त्री० विषं हन्ति हन-तच् ङीप् । अपराजितायाम् । विषहारके त्रि० । [हारके त्रि० ।

विषहरी स्त्री० विषं हरति हृ-अच् गौ० ङीष् । मनसादेव्याम् विष-

विषहा स्त्री० विषं हन्ति हन-ड । देवदालीलतायाम् ।

विषा स्त्री० विषं नाशयत्येनास्यस्याः अच् । (आतइच) अतिविषाया-याम्, बुद्धौ च । [क्षीरकाकोल्याञ्च ।

विषाण न० विष+कानच् । पशुशृङ्गे, हस्तिदन्ते वराहदन्ते, कुलीपशे

विषाणिका स्त्री० विषाणमस्त्रस्त्र्याः ठन् । शृङ्गाम् (गाडरसिङ्गी) कर्कटशृङ्गाम्, आमलक्याञ्च । [टके, क्षयरोगेषु च पु० ।

विषाणिन् पु० विषाणमस्त्रस्त्र्य इनि । शृङ्गिणि, हस्तिनि च । शृङ्गा-

विषाद पु० वि+सद-घञ् । अवसादे, जडतायाञ्च । [तायाम् ।

विषादनी स्त्री० विषाय तच्चिकित्सये अद्यतेऽसौ अद-ल्युट् । पराशीव-

विषान्तक पु० विषस्यान्तक इव । शिवे, विषहरे त्रि० ।

विषापह स्त्री० विषमपहन्ति अप+हन-ड । इन्द्रवारुणाम्, नागद-न्याम्, अर्कमूलायाञ्च (श्वेतमूल) ।

विषाराति पु० ६त० । क्षीरशुक्लूरे ।

विषारि पु० ६त० । शतकरञ्जे, महाचञ्चुशाके च ।

विषास्य पु० विषमास्ये यस्य । सर्पे विषास्त्रमिवास्यमस्य । भल्लातके ।

विषु अव्य० विष-कु । साम्ये, नानारूपे च ।

विषुव न० विषु दिनरात्रयोः साम्यं वर्त्तते वा-क । समरात्रि दिन-कालके अयनांशक्रमेण रवेः तुलामेषराशिसंक्रान्तिभेदे ।

विष्णुकन्द न० विष्णु वासनस्यात्ति भक्ष्य यवादि० मध्य प० । विष्णुवल्लभे ।
विष्णौषधी स्त्री० ६त० । नागदन्त्याम् ।
विष्क हिंसायां कु० आ० सक० सेट् । विष्कयते अविविष्कत । दर्शने कभ० विष्कयति ते अविविष्कत् ।
विष्कम्भ पु० वि+स्कभ्–घञ् । सूर्य्यचन्द्रयोर्नवजातयोगमध्ये प्रथमे योगे, विस्तारे, प्रतिबन्धे, रूपकभाषाङ्गभेदे, योगिनां वज्रभेदे, वृक्षे, अवष्टम्भके-कीलकादौ च ।
विष्किर पु० विकिरति वि+कृ–क षुट्च । विहगे ।
विष्टप न० विश–क्विप् तुट् च । भुवने ।
विष्टब्ध त्रि० वि+स्तभ्–क्त । प्रतिरुद्धे अवरुद्धे ।
विष्टम्भ पु० वि+स्तभ्–घञ् । प्रतिबन्धे रोगभेदे च ।
विष्टम्भिन् त्रि० वि+स्तभ्–णिनि । प्रतिबन्धके रोगविशेषजनके च ।
विष्टर पु० वि+स्तृ–अप् षत्वम् । "उच्चैर्नीचो भवेद्ब्रह्मा सम्बन्धेऽस्तु विष्टर" इति 'मायावर्त्तस्तु विष्टर' इति च कृत्यकल्पे दर्भजाते आसनभेदे, आसनमात्रे, वृक्षे च ।
विष्टरश्रवस् पु० विष्टरः कुशगुच्छ इव श्रवसी कर्णौ यस्य । विष्णौ ।
विष्टरुहा स्त्री० विष्टा भूमौ प्रविष्टा सती रोहति रुह–क । स्वर्णक्षीरिकायाम् ।
विष्टार पु० वि+स्तृ–घञ् षत्वम् । षड्क्रियाच्छन्दोभेदे ।
विष्टि स्त्री० विश क्तिन् क्तिच् वा । वेतनं विना भारादिवहनरूपे कर्म्मणि, वेतने, कर्म्मणि, वर्षणे, प्रेषणे, तिथ्यर्द्धात्मककरणमध्ये सप्तमे करणे कर्म्मकरे-भृत्ये, वेतनं विना कर्म्मकरे च पु० ।
विष्ठा स्त्री० विविधं तिष्ठति स्था–क षत्वम् । पुरीषे
विष्णु पु० विष–व्यापने नुक् । व्यापके, परमेश्वरे, वङ्गे युद्धे, धर्म्मशास्त्रकारके मुनिभेदे च 'मन्वत्रिविष्णुहारीतेति स्मृतिः । 'यस्मात् विश्वमिदं सर्व्वं तस्य शक्त्या महात्मनः । तस्मादेवोच्यते विष्णुर्विशधातोः प्रवेशनादि'त्युक्तौ, वासुदेवेऽपि । [त्वात्षत्वम् ।
विष्णुकान्ता स्त्री० ६त० । अपराजितायाम् तस्याः विष्णुपरित्वात्

विष्णुगुप्त पु० आचार्ये पक्षिस्वामिनि अमात्ये च चातुर्व्राह्मणत्वेन ख्यातः न्यायभाष्यकर्त्ता ।

विष्णुतल न० वैद्यकप्रसिद्धे तैलभेदे ।

विष्णुधर्म्म पु० विष्णुपालनाद्योग्यो धर्म्मः ६त० । विष्णुपालनोचिते नियमभेदे उपचारात् तत्प्रतिपादके ग्रन्थे च । [चक्रिलाञ्छनभेदे ।

विष्णुधर्म्मोत्तर न० विष्णु धर्म उत्तरः प्रधानः यस्मिन्नेव तत् ब० ।

विष्णुपद न० विष्णोः पदमिव व्यापकत्वात् । आकाशे ।

विष्णुपदी स्त्री० विष्णुपदं कारणत्वेनास्त्यस्याः अच् गौरा० ङीष् । गङ्गायाम् तस्याः विष्णुपदविशेषसम्बन्धात् तथात्वं रवेः संक्रान्तौ च ।

विष्णुमाया स्त्री० ६त० । विष्णोः परमेश्वरस्य माया । अघटनघटन-पटीयस्याम् अविद्यायाम्, तदधिष्ठात्र्यां दुर्गायाञ्च ।

विष्णुरथ पु० विष्णोः रथ इव गतिहेतुत्वात् । गरुडे ।

विष्णुरात पु० विष्णुना रातः विष्णुं वा रायाज्जीवनस्य रा-क्त त वा । परीक्षिदाख्ये नृपे यद्धि गर्भस्थेन अश्वत्थाम्नास्त्रेण दग्धः सन् ततः प्रसवानन्तरञ्च विष्णुना पुनर्जीवित इति भारतम् ।

विष्णुवल्लभा स्त्री० ६त० । तुलसाम्, अग्निशिखाद्रुमे च ।

विष्णुवाहन पु० विष्णुं वाहयति स्थानान्तरं नयति वह-णिच् ल्यु । गरुडे ।

विष्णुवाह्य पु० विष्णुर्वाह्योऽस्य । गरुडे । [गरुडे टङ्कारे ।

विष्फार पु० वि+स्फुर णिच् अच आतु अत्वम् । धनुर्गुणाकर्षण-

विष्य त्रि० विशेषेण वध्यः विष+यत् । विशेषेण वध्ये ।

विष्वक्सेन पु० विष्वची सेना यस्य । विष्णौ विष्णु निर्माल्य भक्षके, तद्गणभेदे च । स्त्रियाङ्की स्त्री० ।

विष्वक्सेनप्रिया स्त्री० ६त० । लक्ष्म्याम् (चामर आलु) भेदे च

विष्वग्वन न० वि+अञ्च+ल्युट् वनादेशः । भोजने ।

विष्वाण पु० वि+अञ्च-क्वन् वनादेशः । भोजने ।

विसं न० वि+सो-क । मृणाले ।

विसकण्ठिका स्त्री० विसं मृणालमिव कण्ठोऽस्यस्याः ठन् वा कापि वा

विस्र उत्सर्गे दि० परः सक० सेट्। विस्रति अवसीत्।

विसंवाद पु० वि+सम्+वद घञ्। विप्रलम्भे, वञ्चने, अन्यथा स्थितस्य वस्तुनोऽन्यथा कथनादौ च।

विसकुसुम न० विषयुक्तं कुसुमम्। पद्मे।

विसङ्कट पु० विशिष्टो सङ्कटो यस्मात्। सिंहे इक्षुदीक्षे च।

विसनाभि स्त्री० विसं नाभौ यस्य। पक्षिण्याम् पद्मसमूहे च

विसर पु० वि+सृ अप्। समूहे, विस्तारे च।

विसर्ग पु० वि+सृज घञ्। दाने, त्यागे, जलत्यागे, विसर्जनीयाख्ये वर्णभेदे, मोक्षे, प्रलये च भूतसर्गविसर्गादि नवलक्षणलक्षितमिति श्रीधरः। [लुप्रट्। प्रेरणे।

विसर्जन न० वि+सृज-ल्युट्। दाने, त्यागे च। वि+सृज णिच्

विसर्प पु० वि+सृप-घञ्। रोगभेदे।

विसर्पण न० वि+सृप-ल्युट्। प्रसारे।

विसार पु० विसरति सर्पति वि+सृ-घञ्। मत्स्ये।

विसारिन् त्रि० वि+सृ णिनि। प्रसरणशीले। मत्स्ये पु० मापप्रमाणे स्त्री० ङीप्। [पद्मलतायाञ्च।

विसिनी स्त्री० विसानां समूहः तद्युक्तो देशो वा इनि। पद्मसमूहे

विसूचिका स्त्री० विशिष्टा सूचीव इवार्थे कन्। रोगभेदे।

विसृत त्रि० वि+सृ क्त। विस्तीर्णे।

विसृत्वर त्रि० वि+सृ क्वरप्। प्रसरणशीले। स्त्रियां ङीष्।

विसृमर त्रि० वि+सृ क्मरच्। विसरणशीले।

विसृष्ट त्रि० वि+सृज-क्त। प्रेरिते रघवे विसृष्ट, इति रघुः क्षिप्ते त्यक्ते च। [कापरिमाणे च।

विस्त पु० न० विस-उत्सर्गे क्त नि० नदट्। स्वर्णकर्षे, अशीति रक्ति-

विस्तर पु० वि+स्तृ अप्। शब्दसमूहे वाक्यसङ्के, विस्तारे, प्रसरे, समूहे च। आधारे अप्। पीठे।

विस्तार पु० वि+स्तृ-संज्ञायां कर्त्तरि घञ्। विटपे भावे घञ्। विस्तीर्यतायाम् समासवाक्यस्थे पदसमूहे च।

विस्तीर्ण त्रि० वि+स्तृ-क्त। विपुले विस्तारयुक्ते विशाले च।

विस्तीर्णपर्ण न० विस्तीर्णानि पर्णान्यस्य। मालतीवृक्षे।

विस्तृत त्रि० वि+स्तृ-क्त। विस्तारयुक्ते। [क्षेत्रे विषभेदे च।

विस्फुलिङ्ग पु० विस्फुरति वि+स्फुर-डु वाप: तद् लिङ्गमस्य। वह्नि-

विस्फोट पु० विस्फुटति वि+स्फुट-अच्। (विषफोड़ा) पदार्थे, स्वार्थे कन्। स्फोटकभेदे विस्फोटकभया भेषपदेति शीतला स्तोत्रम्।

विस्मय पु० वि+स्मि अच्। आश्चर्य्ये, अद्भुते, रसभेदे च।

विस्मयान्वित त्रि० ६त०। विस्मययुक्ते, आश्चर्य्ययुक्ते च।

विस्मापन पु० विस्मि-णिच् अच-आत् लुप्। कुहके, कामदेवे च। गन्धर्व्वपुरे न०। विस्मापनमस्त्र।

विस्मित पु० वि+स्मि-क्त। विस्मययुक्ते।

विस्मृत त्रि० विस्मृ-क्त। स्मरणाविषये।

विस्मृति स्त्री० वि+स्मृ-क्तिन्। स्मरणाभावे।

विस्र न० विस्र-रक्। आमगन्धौ।

विस्रंस पु० वि+स्रन्स-घञ्। पतने, स्खलने च।

विस्रगन्धा स्त्री० विस्रो गन्धोऽस्याः। । त्रपुषायाम्।

विस्रगन्धि पु० विस्रस्येव गन्धोऽस्य इत्समा०। हरितालै।

विस्रम्भ पु० वि+स्रन्भ घञ्। विश्वासे, प्रत्यये, परिचये च।

विस्रम्भिन् त्रि० वि+स्रन्भ-णिनि। विश्वासयुक्ते, प्रत्ययिनि च

विस्रसा स्त्री० वि+स्रन्स-क। जरायाम्।

विस्रसा स्त्री० वि+स्रसः आमगन्धोऽस्त्यस्याः अच्। त्रपुषायाम्।

विहग पु० विहायसा गच्छति गम-ड नि०। पक्षिणि पु० विहङ्गोऽप्यत्र

विहङ्गम पु० विहायसा गच्छति गम-खच नि० पक्षिणि।

विहङ्गराज पु० ६त० अच समा०। गरुडे "विहङ्गराजाङ्करुहै"रिति माघः। [याज्ञ।

विहनन न० विहन्यते वि+हन-लुट्। तुलपिञ्जुले, विघ्ने, हिंसा०

विहर पु० वि+हृ-अप् । वियोगे । लुप्ट् । तत्रैव न० ।

विहसित न० वि + हस क्त । मध्यमहास्ये ।

विहस्त त्रि० विगतो हस्तो हस्तावलम्बनं यस्य । व्याकुले । पक्षिणि, पशौ च पु० ।

विहापित न० वि + हा-णिच् क्त । दाने ।

विहायस् पु० न० वि+हय असुन् निं० डुद्धिः । आकाशे पक्षिणि च स्वार्थे अच् । विहायसमप्याकाशे न० ।

विहार पु० वि + हृ-घञ् । क्रीडार्थं पादाभ्यां गमने, भ्रमणे, स्कन्धे, लीलायां, बौद्धदेवालये, वैजयन्ते च ।

विहित त्रि० वि+धा-क्त । कृते, विधिना बोधिते च ।

विहीन त्रि० वि + हा-क्त । त्यक्ते, वर्জ্জিते च ।

विहृत न० वि + हृ-भावे क्त । विहारे, स्त्रीणां चेष्टाभेदे च ।

विह्वल त्रि० वि + ह्वल-अच् । भयादिना व्याकुले, विलीने च ।

वी कान्तौ जनने च अक० गतौ-व्याप्तौ क्षेपे भोजने च सक० अदा० उभ० अनिट् । वेति अवैषीत् ।

वी (वि)काश पु० वि+काश-घञ् वा दीर्घः । रहसि, प्रकाशे च ।

वीक्षण न० वि + ईक्ष-करणे ल्युट् । नेत्रे । भावे ल्युट् । दर्शने ।

वीक्षा स्त्री० वि+ईक्ष अच् । सूक्ष्मशिम्बाम् । अ । गतिभेदे, हत्यै, अश्वगतिभेदे, सन्धौ च । [सुखे अल्पे, किरणे च ।

वीचि (ची) पु०स्त्री० वे-डीचि स्त्रीत्वे वा ङीप् । तरङ्गे, अवकाशे,

वीचितरङ्ग पु० वीचेरिव तरङ्गो यत्र । वीचितो यथा उत्तरोत्तरं तरङ्गजननमेवं खञ्जन्यञ्जन्यादिरूपे न्यायभेदे यथा शब्दस्य ढक्कादिदेशे उद्भवस्तज्जन्यशब्दपरम्परया श्रोत्रेण सह सम्बन्धात् श्रवणम् ।

वीचिमालिन् पु० वीचिनां मालाऽस्त्यस्य इनि । समुद्रे ।

वीज व्यजने अद० चुरा० उभय० सक० सेट् । वीजयति ते अविवीजत् न । "वीज्यते स हि सन्नप्" इति कुमारः ।

वीज न० वी-किप् जन ड कर्म० । कारणे, शुक्रे, अङ्कुरे, तत्त्वावधाने, मज्जनि, अव्यक्तगणितभेदे, मन्त्रभेदे, धान्यादेः फलादौ च ।

वीजक पु० वीजेन कायति कै-क । मातुलुङ्गवृक्षे ।
वीजकोश पु० वीजानां कोश इवाधारः । पद्मवीजाधारे वराटके ।
वीजगर्भ पु० वीजानि गर्भे यस्य । पटोले ।
वीजगुप्ति स्त्री० वीजानां गुप्तिर्यस्याम् । शिग्रुवृक्षे ।
वीजन न० वीज-लुट् । व्यजने । करणे लुट् । चामरादौ । वस्तुनि, चक्रवाके, जीवञ्जीवविहगे च पु० ।
वीजपादप पु० वीजप्रधानः पादपः । भल्लातकवृक्षे ।
वीजपुष्प न० वीजात् पुष्पं यस्य । मरुवके । [वीजपूर्णोऽण्यत्र
वीजपूर पु० पूर्यते पूर-घञ् इत० । (टाबा लेबु) जम्बीरभेदे ।
वीजफलक पु० वीजानि फले यस्य कप् । वीजपूरे जम्बीरे ।
वीजमातृक स्त्री० वीजानां मातेव इवार्थे कन् । पद्मवीजे ।
वीजरुह पु० वीजेन रोहति रुह-क । वीजमात्रजाते धान्यादौ ।
वीजरेचन न० वीजं रेचयति रिच-लुट् । वीजेषु मध्ये रेचके जल-पालवीजे । [नृपादनार्थं स्त्रीत्वे ।
वीजवपन न० वीजानि उप्यन्तेऽत्र वप-आधारे लुट् । वीजस्य उ-
वीजरत्न न० वीजं रत्नमिवास्य । माषकलाये ।
वीजवृक्ष पु० वीजमात्राज्जातो वृक्षः । असनवृक्षे ।
वीजसञ्चय पु० वीजानां वपनयोग्यधान्यादीनां सञ्चयः संग्रहः सम्+चि-अच् । वपनयोग्यधान्यादिसंग्रहे ।
वीजभू पु० वीजं भूते भू-किप् । पृथिव्याम् । [क्षेत्रे ।
वीजाक्षत त्रि० वीजेन सह क्षतम् डाच् क-क्त । वीजेन सह क्षते
वीजाम्ल न० वीजेनाम्लमिव । वृक्षाम्ले ।
वीजिन् पु० वीजमस्त्यस्य इनि । उत्पादके पितरि । वीजविशिष्टे त्रि० ।
वीज्य त्रि० विशेषेण इज्यः वि+यज-क्यप् । कुलीने ।
वीटि (टी) स्त्री० वि + वट-इन् वा ङीप् । (पानेर बीड़ा) सज्जित-ताम्बूले । स्वार्थे कन् । तत्रैव ।
वीणा स्त्री० अज-न वीभावः पृ० णत्वम् । स्वनामख्याते वाद्यभेदे ।
वीणादण्ड पु० इत० । वीणावाद्यस्थितालाबूपरिस्थे काष्ठदण्डे ।

वीणावाद् त्रि० वीणां वादयति वद णिच् ण्। वीणावादके।

वीत न० वि-इण्-क्त। युद्धासमर्थे हस्त्यश्वादिसैन्ये, अङ्गशकर्मणि न्यायाद्युक्ते अनुमानभेदे च। शान्ते, गते च त्रि०।

वीतंस पु० वि-तनुस-घञ् वा दीर्घः। मृगपक्षिणां बन्धनोपकरणे दाम-प्रभृतौ, विश्वासहेतुप्रावरणे च। [शोकहीने त्रि०।

वीतशोक पु० वीतः विगतः शोको यस्मात् यस्य वा। अशोकवृक्षे

वीति स्त्री० वी क्तिन्। गतौ, दीप्तौ, भोजने, याचने च। क्तिच्। वोटके पु०। [वल्ली।

वीतिहोत्र पु० वीतये पुरोडाशादिभक्षणाय ह्वयन्ते देवा अत्र ह्वे त्रन्। वीथि(थी) स्त्री० विथ इन् पृ० वा ङीप्। पङ्क्तौ, श्रेण्यौ, रङ्गाङ्गे, वर्त्मनि, दृश्यकाव्यनाटकाङ्गभेदे च।

वीथ्यङ्ग पु० वीथेरङ्गस्य। दृश्यकाव्यभेदे।

वीध्र त्रि० वि-हन्भ-रक्। निर्मले। नभसि, वायौ च पु०।

वीनाह पु० वि नह-घञ्। कूटादिरुखबन्धनसाधने (पाट) ख्याते पदार्थे।

वीप्सा स्त्री० विशेष प-सन् अच इत्वं अ अभ्यासलोपश्च। व्याप्तौ।

वीव व्यद०चु०आ०अक० सेट्। वीव्यते अविवीवत्।

वीभ भौर्य्यहेतौ उद्यो विकत्थने च भ्वा०अक०सेट्। चङि न ह्रस्वः वीभते अवीभिट।

वीर न० अज-रक् वीभावः वीर-अच् वा। अरिचे, पद्मचन्दने, काश्मिके, उशीरे च। संज्ञायां कन्। करवीरे, वेगवति भौर्य्ययुक्ते च त्रि० तन्त्रोक्ते कुलाचारे नृ० तद्धति त्रि० ङीङ्प्रां स्त्री०।

वीरक पु० वि+ईर-ण्वुल्। करवीरे।

वीरण न० वि+ईर-ल्यु। उशीरे (वेणारमूल)।

वीरतर न० वि+ईर-अच् तरप्। वीरणे, शूरतरे त्रि०।

वीरतरु पु० वि+ईर-अच् कर्म०। अर्জ্জুনवृक्षे कोकिलाक्षे, भल्लातके, (भेला) बिल्वभेदे च वीरवृक्षादयोऽप्यत्र।

वीरपत्नी स्त्री० वीरः पतिर्यस्याः नुक् ङीप् च। वीरभार्य्यायाम्।

वीरपत्नी स्त्री० वीरयति वीर-अच् तथाभूतं पत्नं यस्याः । विजया यास् भङ्गे । [या सुरापानादौ ।

वीरपान(ण) न० वीराणां पानम् वा पानम् । युद्धाय युद्धखेदापनुत्तये

वीरभद्र पु० वीरो भद्रोऽस्य । अश्वमेधीयेऽश्वे वीरेषु भद्रम् । वीरेषु न० ।

वीररजस् न० वीर इव रजः रक्तत्वात् । सिन्दूरे ।

वीरसू स्त्री० वीरं सूते सू+क्विप् । वीरमातरि ।

वीरसेन पु० वीरा सेना यस्य । नलराजजनके नृपभेदे ।

वीरहन् पु० वीरयति शौर्यान्वितं करोति वीर-णिच् अच् । वीरो यज्ञाग्निस्तं हतवान् हन-क्विप् । नष्टाग्नौ विप्रे ।

वीरा स्त्री० वि+ईर-अच्, वीर+अच् वा । सुरानामगन्धद्रव्ये, क्षीर-काकोल्याम्, आमलक्याम्, एलवालुकायां, पतिपुत्रवत्यां स्त्रियां, रम्भायां, विदार्याम्, दुग्धिकायाम्, क्षीरविदार्यां, काकोल्यां, महाशतावर्यां, घृतकुमार्याम्, अतिविषायां, द्राक्षायाम्, शिंशपा-वृक्षे च (शिशु) । [अस्खलंतसे ।

वीराद्य पु० वीरयति शौर्यान्वितं करोति वीर-णिच्-अच् कर्म० ।

वीराशंसन न० वीरैराशस्यतेऽत्र आ+शंस-ल्युट् । भयङ्करे युद्धक्षेत्रे ।

वीरासन न० वीरस्येवासनम् । 'एकपादमधैकस्मिन् विन्यसेदुरुसंस्थितम् इतरस्मिन् तथा पश्चात् वीरासनमिति स्मृतं' मित्युक्ते आसनभेदे ।

वीरुध्(धा) स्त्री० वि+रुध-क्विप् दीर्घः वा टाप् । विस्तृतायां लतायाम् ।

वीरेश्वर त्रि०ई तत्० । वीरपतौ । काशीस्थे शिवलिङ्गभेदे पु० ।

वीर्य्य न० वीर-यत्, वीरस्य भावोयत् वा । देहस्थे चरमधातौ शुक्रे, पराक्रमे, बले, प्रभावे, तेजसि, दीप्तौ च ।

वीर्य्यवत् त्रि० वीर्यमस्त्यस्य मतुप् मस्य वः । बलवति, वीर्य्ययुक्ते च ।

वीवध पु० विशेषेण वध्यतेऽत्र वध-घञ् न ह्रस्वः । तण्डुलादिसंग्रहे, मार्गे, भारे च ।

वीवधिक पु० वीवधः भारवहनं शिल्पमस्य ठन् । भारवाहके ।

वीहार पु० विहियतेऽत्र वि+हृ–घञ् दीर्घः । बुद्धमन्दिरभेदे । भावे घञ् । विहारे ।

वुग योगे भ्वा०पर०सक०सेट् इदित् । वुङ्गति अवुङ्गीत् ।

वुट हिंसायां चुरा०उभ०सक०सेट् । वोटयति ते अवूवुटत् त इदित्वेऽपि वुण्टयति ते अवुण्टत् त ।

वुध हिंसायां चुरा० उभ०सक०सेट् इदित् । वुन्धयति ते अवुवुन्धत् त ।

वृ(स) विभागे, पृथक्करणे च दि०पर०सक०सेट् । वृश्(स्र)ति अवोघी(स्री)त् । [(व्र)यत् त ।

व्र(व्र) हिंसायां चुरा० उभ० सक० सेट् । व्र(व्र)यति ते अव्र(व्र)यत्

व्रु आरणे चु० उ० सक० सेट् । वारयति ते अवीवरत् त ।

व्रु सेवायां क्र्या०आ०सक०सेट् । व्रुणीते 'व्रुणते हि विस्तृतकारिण'-मिति भारविः । अवरीष्ट-अवरिष्ट-अव्रुत । [अव्रुत ।

व्रु वरणे भ्वा० उभ० सक० सेट् । वरति ते अवारीत् अवरिष्ट अवरीष्ट

व्रु वरणे स्वादि० क्र्या० च उभ० सक० सेट् । व्रुणोति व्रुणुते व्रुणाति व्रुणीते अवारीत् अवरिष्ट अवरीष्ट अव्रुत ।

व्रुंहित न० व्रुंह्-क्त । करिगर्जने ।

व्रुक आदाने भ्वा०आत्म०सक० सेट् । वर्कते अवर्किष्ट ।

व्रुक पु० व्रुक-क । क्रुकुराकारे हरिणघातके व्याघ्रभेदे । काके, वकव्रुक्षे, क्षत्रिये, अनेकद्रव्यजन्ये धूपे, सरलद्रुमे, उदरस्थे वह्निभेदे च अम्बष्ठायां स्त्री० वा गौरा० ङीष् । व्रुकस्त्रियां स्त्री० ङीप् ।

व्रुकदंश पु० व्रुकं दशति दन्श-अच् । क्रुकुरे । [धूपे ।

व्रुकधूप पु० व्रुक्यते व्रुक-घञर्थे क कर्म० । नानाद्रव्यमिश्रिते दशाङ्गादौ

व्रुकधूर्त्त पु० व्रुक इव धूर्त्तः । गृध्रगाले ।

व्रुकाक्षी पु०व्रुकस्येवाक्षि पुष्पमस्य पच् समा० ङीष् । तिन्दुके (तेओड़ि)

व्रुकारांति पु० ६त० । क्रुकुरे व्रुकरिष्टादयोऽप्यत्र ।

व्रुकोदर पु० व्रुकनामाग्निरुदरे यस्य । 'यस्य तीक्ष्णो व्रुको नाम जठरे हव्यवाहनः । मया दत्तः स धर्मात्मा तेन चासौ व्रुकोदर' इत्युक्तौ भीमे 'न्यूनमूचे वचनं व्रुकोदर' इति भारविः ।

वृक्षकर्ण त्रि० ब्रह्म क० । छिन्ने ।

वृक्ष वरणे भ्वा०आ०सक०सेट् । वृक्षते अवृक्षिष्ट ।

वृक्ष पु० वृक्ष क्स । वृक्षनेऽपि जायमाने द्रुमे । स्वार्थे कन् वृक्षजकेऽपि ।

वृक्षचर पु० वृक्षे चरति चर-अच् । वानरे ।

वृक्षच्छाय न० ६त० । बहूनां वृक्षाणां छायायाम् ।

वृक्षधूप पु० वृक्षोऽपि धूपस्तत् साधनम् । सरलद्रुमे ।

वृक्षनाथ पु० ६त० । वटवृक्षे ।

वृक्षपाक पु० वृक्षस्य पाकः निष्पत्तिरिव जटिलत्वात् । वटवृक्षे ।

वृक्षभवन न० ७त० । वृक्षस्थे कोटरे । [(परगाछा) ।

वृक्षभक्षा स्त्री० वृक्षो भक्ष्यो वेटकत्वात् भोजनीय इव यस्याः वन्द्यायाम्

वृक्षभेदिन् पु० वृक्षं भिनत्ति भिद-णिनि । वृक्षभेदके अजभेदे ।

वृक्षमृङ् पु० वृक्षस्य मृदि भूमौ भवति मृ-क्विप् । जलवेतसे ।

वृक्षरुहा स्त्री० वृक्षे रोहति रुह-क । वन्द्यायाम्, अरुहवृक्षायाञ्च ।

वृक्षवाटिका स्त्री० वृक्षैर्वाटीव संवृतत्वात् वृवार्थे कन् । ग्रामात्बहिः कोपसेव्ये गृहसमीपस्थे उपवने ।

वृक्षादन पु० वृक्षमत्ति-भिनत्ति अद ल्यु । कठाराख्ये (नेकाल) वृक्षा-न्तरमत्ति भिनत्ति । अव्ययवृक्षे, मधुवृक्षे, पियाले विदारके च । वन्द्यायां स्त्री० गौरा० ङीष । [वृक्षाम्ले च ।

वृक्षाम्ल न० वृक्षजातमम्लम् । (तेतुल) वृक्षदाडिम्बाम्लप्रधाने वृक्षे,

वृक्षोत्पल पु० वृक्षमाटीयमानमुत्पलं येन । कपिकच्छ वृक्षे ।

वृक्ष वृतौ रु०पर०सक०सेट् । वृक्षति । अवर्क्षीत् । निष्ठा अनिट् ।

वृज त्यागे अदा०आत्म० सक० सेट् वृदित् । वृङ्क्ते अवृङ्क्षाताम् नेदिदम्य-यम् । वृक्ते अवर्जिष्ट । निष्ठा अनिट् ।

वृज त्यागे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट् । वर्जयति ते वर्जति । अववर्जत्-अवीवृजत् । अवर्ज्जीत् । निष्ठा अनिट् ।

वृज वृतौ, त्यागे च रु०पर०सक०सेट् । वृणक्ति अवर्ज्जीत् । निष्ठा अनिट् । वृक्तः । [वि० ।

वृजन न० वृज्यतेऽत्र वृज ल्यु । याने, आकाशे च कोशे पु० कुटिले

हृजिन न० हृज हृनच् किच्च । पापे, धुन्ने त्रि० । देशे पु० ।

हृण प्रीणने, तृ०पर०सक०सेट् । हृणति अवर्णीत् ।

हृण भक्षणे तना०उभ०सक०सेट् । हृणोति यर्णोति हृणुते अवर्णीत् अवर्णिष्ट । क्त्वा वेट् ।

हृत दीप्तौ चु०उ०सक०सेट् । वर्त्तयति ते अवीहृतत् त अवर्त्तत् त ।

हृत वर्त्तने भ्वा० आ० लुङि लृटि लडि च उभ०अक०सेट् । वर्त्तते । अहृतत् अवर्त्तिष्ट हृत्स्यति वर्त्तिष्यते । क्त्वा वेट् ।

हृत संभक्तौ, वरणे च दि०आ०सक०सेट् । हृत्यते अवर्त्तिष्ट । क्त्वा वेट् ।

हृत त्रि० हृ-क्त । प्राप्तिते, कर्मादौ प्रार्थनादिना कृतनियोगे च ।

हृति स्त्री० हृ-क्तिन् । वेष्टने (वेड़ा) 'हृत्तिञ्च तत्र कुर्व्वीत'ति स्मृ० ।

हृतिङ्कर पु० हृतिङ्करोति कृ-खच् । विकङ्कते (पक्षिचि) ।

हृत्त न० हृत-भावे क्त । 'गुरुपूजाहृणा शौचं सत्यमिन्द्रियनिग्रहः प्रवर्त्तनं हितानाञ्च तत्सर्व्वं हृत्तमुच्यते' इत्युक्ते चरित्रे, पद्यभेदे, हृत्तौ च । हृत-कर्त्तरि क्त । अतीते हृटे, वर्त्तुले अधीते हृते जाते च त्रि० कूर्म्मे पु० ।

हृत्तगन्धि न० हृत्तस्य पद्यभेदस्य एव गन्धो लेशोऽत्र हृत् समा० । 'भवत्युत्कलिकाप्रायं समासाद्यं हृदाक्षरम् । हृत्तैकदेशसम्बन्धात् हृत्तगन्धि पुनः स्मृत'मित्युक्ते गद्यभेदे ।

हृत्ततण्डुल पु० हृत्तो वर्त्तुलस्तण्डुलोऽस्य । यावनाले ।

हृत्तनिष्पाविका स्त्री० हृत्ता वर्त्तुला निष्पाविका नखनिष्पाव्याम् ।

हृत्तपर्णी स्त्री० हृत्तानि पर्णान्यस्याः ङीप् । मक्षाश्रवणपुष्पिकायाम्, पाठायाञ्च (आकनादि) ।

हृत्तपुष्प पु० हृत्तानि वर्त्तुलानि पुष्पाण्यस्य । शिरीषहृक्षे ।

हृत्तफल न० हृत्तं फलमस्य । मरीचे, दाड़िमे, बदरे च । वार्त्ताक्याम्, आमलक्याञ्च स्त्री० टाप् ।

हृत्तमल्लिका स्त्री० हृत्ता मल्लिकेव । श्वेतार्कै ।

हृत्तबीज पु० हृत्तानि बीजान्यस्य । विल्वायाम् । आढक्याम् स्त्री० ।

वृत्तस्थ पु० त्रि० वृत्ते गुरुपूजादौ चरित्रे तिष्ठति स्था-क। गुरुपूजादिचरित्ररते।

वृत्तान्त पु० वृत्तो ज्ञातोऽन्तोनिर्णयो यस्मात्। संवादे, वार्त्तिक शब्दे च

वृत्ति स्त्री० वृत्त-क्तिन्। वर्त्तने, स्थितौ, विवरणे च करणे क्तिन् जीविकायाम्। कौशिकीसात्वतीभारत्यारभट्याख्ये रचनाभेदे, वेदस्तोक्ते अन्तःकरणादेः परिणामभेदे च। 'बुद्धिवृत्तिचिद्भासाविति ब्रह्मणश्चननाशाय वृत्तिव्य मिरिति च वै०।

वृत्तिकर्षित त्रि० वृत्त्या कर्षितः। विपन्नस्थे, अल्पमात्रवृत्तिके च।

वृत्र पु० वृत-रक्। अन्धकारे, रिपौ, त्वष्टृपुत्रे दानवभेदे, मेघे पर्व्वतभेदे, मन्त्रे शब्दे च।

वृत्रद्विष् पु० वृत्र० । इन्द्रे । वृत्ररिपुादयोऽप्यत्र।

वृत्रहन् पु० वृत्तं हतवान् हन-क्विप्। इन्द्रे।

वृथा अव्य० वृ-थाल् किच्च। निरर्थके। [कार्य्ये—दानभेदे।

वृथादान न० कर्म०। विष्कृदाने स्मृतिप्रदर्शिते देवपित्राद्यर्थभिन्ने

वृथामांस न० वृथा भूतं मांसम्। देवाद्यनुद्देशेन हतपशूनां मांसे।

वृद्ध न० वृध-क्त। शैलजनामगन्धद्रव्ये। वृद्धदारके वृक्षे पु०। वृद्धियुक्ते पण्डिते च त्रि०।

वृद्धकाक पु० कर्म०। द्रोणकाके।

वृद्धगङ्गा स्त्री० कर्म०। नदीभेदे।

वृद्धदारक पु० वृद्धं दारयति वृ-णिच्-ण्वुल्। वीरतालवृक्षे।

वृद्धफल्ल पु० वृद्धं फल्लमस्य। वृद्धदारके वृक्षे।

वृद्धनाभि त्रि० वृद्धा नाभिरस्य। (गोड) वृद्धनृनाभियुक्ते।

वृद्धप्रपितामह पु० वृद्धः प्रपितामहात् राज०। प्रपितामहजनके।

वृद्धप्रमातामह पु० वृद्धः प्रमातामहात् राज०। प्रमातामहस्य पितरि।

वृद्धबल स्त्री० कर्म०। महासमङ्गायाम् वृद्धबलकरत्वात्तथात्वम्।

वृद्धराज पु० वृद्धेषु राजते राज-अच्। अम्ल वेतसे।

वृद्धविभीतक पु० वृद्धः विभीतक इव। आक्षतके।

बृहत्श्रवस् पु० बृहद्भ्यः श्रवोऽन्नमस्येति बहु-अस्-अन्, बृहत्सु श्रवो यशो यस्येति वा । इन्द्रे ।

बृद्धा स्त्री० वृध-क्त । गतयौवनायां स्त्रियाम् ।

बृद्धि स्त्री० वृध-क्तिन् । समृद्धौ अभ्युदये, सम्पत्तौ, समूहे च । इध-कर्त्तरि क्तिच् । औषधिविशेषे, कलान्तरे, (सुद) 'इद्धेरपि पुनर्वृद्धिरिति स्मृतिः । गैलेयगन्धद्रव्ये पु० ।

बृद्धिका स्त्री० बृद्धि+स्वार्थे कन् । वृद्धिनामकौषधे ।

बृद्धिजीविका स्त्री० वृद्धिरूपा जीविका । ऋणदानादिषु प्रयुक्तधनेभ्यो लाभरूपजीविकायाम् । [विधिके नान्दीश्राद्धे ।

बृद्धिश्राद्ध वृद्धौ अभ्युदयाय श्राद्धम् । पुत्रादीनां संस्काराङ्गे पार्वण-

बृद्ध्याजीव त्रि० वृद्धिम् अधमर्णतः प्रयुक्तद्रव्याधिकलाभमाजीवति आ+जीव-अण् । वार्द्धुषिके ।

बृध दीप्तौ चु०उभ०अक०सेट् । वर्द्धयति ते अवीवृधत् त अववर्द्धत् त ।

बृध वृद्धौ भ्वा०आत्म० लुङि लृटि लृङि च उभ०अक० तासेट् । वर्द्धते अवृधत् अवर्द्धिष्ट वर्त्स्यति वर्द्धिष्यते । क्त्वा वेट् ।

बृन्त न० बृ क्त नि० सुम् च । (बोंटा) फलपत्त्रादिबन्धने ।

बृन्ताक पु० स्त्री० वृन्तमकति अक-अण् । वार्त्ताकौ स्त्रीत्वे गौ० ङीष् ।

बृन्तिता स्त्री० वृन्तं जातमस्याः तारं० इतच् । कटुकायाम् ।

बृन्द न० बृन्यते वृणुते वा वृण-वृत वा दन् नि० । समूहे दशार्बुदसंख्यायाञ्च, तुलस्यां, राधिकायां स्त्री० ।

बृन्दार त्रि० वृन्दमस्त्यति अ-अण् । मनोहरे ।

बृन्दारक पु० वृन्द+आर कन् । देवे । श्रेष्ठे, मनोहरे च त्रि० ।

बृन्दावन स्त्री० वृन्दाया विहारस्थानम् वनम् । मथुरासन्निहिते वैष्णवे तीर्थभेदे । 'वृन्दावनं परित्यज्य पादमेकं न गच्छती'ति पुराणम् ।

बृन्दिष्ठ त्रि० अतिशयेन वृन्दारको श्रेष्ठः इष्ठन् वृन्दादेशः । अतिशयश्रेष्ठे 'बृन्दिष्ठमाङ्गीत्' वसुधाधिपालामिति भट्टिः ईयसुनि वृन्दीयस् तत्र त्रि० स्त्रियां ङीप् । [मित्यके तेन अवृणदित्येव ।

बृण वृतौ दिवा०पर०सक०सेट् । वृणद्यति अवृणत् अवर्णीत् पुषादित्वय-

वृंगा पु० वृश-क । वासकवृक्षे, उन्दूरे च ओषधिभेदे स्त्री० ।

वृश्चिक पु० व्रश्च-किकन् । (बिछा) कीटभेदे, शुक्रकीटे, (धुयापोका) मेषादितः अष्टमे राशौ, ओषधिभेदे, मदनवृक्षे, कर्कटे, शोभाञ्जनकीटे च ।

वृश्चिकप्रिया स्त्री० वृश्चिकस्य शुक्रकीटस्य प्रिया । पूतिकायाम् ।

वृश्चिककर्णी स्त्री० वृश्चिक इव कर्णौ यस्याः । आखुकर्ण्याम् ।

वृश्चिका स्त्री० वृश्चिकः तद्विषमस्त्यस्य अच् । (बिछाती) क्षुपभेदे ।

वृश्चिकाली स्त्री० वृश्चिक इवालति पर्य्याप्नोति वेदनायै अच् गौरा० ङीष् । (बिछाती) क्षुपभेदे । [वृश्चिकाख्याम् ।

वृश्चिपत्री स्त्री० वृश्चिक इव पत्रं विषाक्तमस्य पृ० कलोपः ङीष् ।

वृश्नोर पु० व्रश्च-कीरच् । श्वेतपुनर्नवायाम् ।

वृष सेचने सक०-वा०-पर० प्रजननसामर्थ्ये अक० सेट् । वर्षति अवर्षीत् । ह्वा वेट् ।

वृष प्रजननसामर्थ्ये क्षुरा०-आत्म०-अक०-सेट् । वर्षयते- अवीवृषत-अववर्षत

वृष पु० वृष-क । वृषभे पुङ्खे, मेषादितो द्वितीये राशौ, पुरुषभेदे, एकादशमनुजातिके इन्द्रे, धर्मे, शङ्खिमात्रे, मूषिके, शुक्रयुक्ते, वासकवृक्षे, वास्तुस्थानभेदे, शतौ, कामे, बलयुक्ते ऋषभनामौषधे, मयूरपिच्छे च ।

वृषण पु० वृष क्यु । अण्डकोषे ।

वृषदंशक पु० वृषान् मूषिकान् दशति दन्श-एवुल् । बिड़ाले

वृषध्वज पु० वृषो ध्वजो यस्य । शिवे वृषकेतनादयोऽप्यत्र ।

वृषध्वाङ्क्षी स्त्री० वृषो बलवान् ध्वाङ्क्षः काको यस्याः ५ब० । गौरा० ङीष् । नामरज्जुस्तायाम् ।

वृषन् पु० वृष-कनिन् । इन्द्रे, कर्णे, वृषे, अक्षे, दुःखे च ।

वृषनाशन पु०वृषान् मूषिकान् नाशयति नश-णिच्+ल्यु । बिड़ाले ।

वृषपर्णी स्त्री० वृषस्य मूषिकस्य कर्ण इव पर्णमस्याः । (उन्दूरकर्णी) आखुकर्ण्याम् । [पर्व यस्य । भृङ्गारवृक्षे, कञ्चेरी च ।

वृषपर्व्वन् पु०वृषे पर्व उत्सवो यस्य । शिवे, दैत्यभेदे च । वृषं वलयुक्तं

वृषभ पु० वृष–अभच् किच्च । वृषे, श्रेष्ठे, जिनभेदे, वर्णच्छिदि, वृष-भगणीयभेदे च ।

वृषभगति पु० वृषभेव गतिरस्य । शिवे वृषभयानादयोऽप्यत्र ।

वृषभध्वज पु० वृषभो ध्वजोऽस्य । शिवे वृषभकेतनादयोऽप्यत्र ।

वृषभाक्षी स्त्री० वृषभस्य अक्षीव पुष्पाण्यस्याः । इन्द्रवारुण्याम् ।

वृषभानु पु० । राधिकायाः पितरि ।

वृषभानुसुता स्त्री० वृत० । राधिकायाम् । [रूपे च

वृषल पु० वृष–कलच् । शूद्रे, म्लेच्छे, घोटके, अधार्म्मिके, चन्द्रगुप्ते

वृषली स्त्री० 'पितृगेहे च यानारी रजः पश्यत्यसंस्कृता । भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृते'त्युक्तायां पितृगृहे वृषरजस्वलायामनूढायां कन्यायाम् । वृषल+भार्य्यायां जातौ वा ङीप् । वृषलजातिस्त्रियां, तद्भार्य्यायाञ्च, 'ब्रह्महा वृषलीपति'रिति 'वृषली-फेनपीतस्ये'ति च स्मृतिः ॥ [वृ० । वृषलस्त्रीनेतरि त्रि० ।

वृषलोचन पु० वृषस्येव लोचनं यस्य । मूषिके । वृत० । वृषनेत्रे न० ।

वृषवाहन पु० वृषो वाहनमस्य । शिवे वृषभवाहनादयोऽप्यत्र

वृषस्यन्ती स्त्री० वृषेण आत्मानमिच्छति वृष+आचारे क्यच् शतृ ङीप् च । कामुक्यां 'लक्ष्मणां सा वृषस्यन्ती'ति भट्टिः ।

वृषा स्त्री० वृषः मूषिकस्तदाकाराः पर्णमस्याः । मूषिकपर्णाम् ।

वृषाकपायी स्त्री० वृषाकपेः पत्नी ङीप् ऐङ् च । लक्ष्म्याम्, गौर्याम्, स्वाहायां, भार्य्यां, जीवन्त्याञ्च । [विष्णौ, अग्नौ, इन्द्रे च ।

वृषाकपि पु० वृषं धर्म्मं न कम्पयति न+कपि–इन् नलोपः । महादेवे,

वृषाकर पु० वृषस्य सामर्थ्यस्य करः ज–अच् । माषे ।

वृषाङ्क पु० वृषः अङ्कोऽस्य । शिवे, भल्लातके, पर्वते च

वृषि(षी) स्त्री० वृष–कि या ङीप् । व्रतिनां कुशमयासनभेदे ।

वृषोत्सर्ग पु० उत्+सृज–घञ् वृत० । वृताद्युद्देशेन तत्तुलादिभिः क्रियमाणे विधानेन वृषस्य त्यागे 'वृषोत्सर्गश्च कर्त्तव्य' इति स्मृतिः

वृष्टि स्त्री० वृष–क्तिन् । वर्षणे । कर्म्मणि क्तिन् । मेघादिभिः वृष्य-

माणे जले । [ष्ट्यौ आराम् ।

वृष्टिघ्नी स्त्री० वृष्टिं हन्ति कारणत्वेन अपहरति हन्-क ङीप् । सू-

वृष्टिजीवन त्रि० वृष्टिः वृष्टिजलमेव जीवनं प्राणनोपायो यस्य । वृष्टि-

जलमात्राजीविनि चातके ।

वृष्टिभू पु० वृष्टौ तदुपलक्षिते काले भवति-भू-किप् । मेघे । वृष्टिभवे त्रि० ।

वृषिण पु० वृष-नि किच्च । यादवे वंशे, श्रीकृष्णे, मेघे च ।

वृषिणगर्भ पु० वृषिणः यादवकुलं गर्भे यस्य । श्रीकृष्णे ।

वृष्य पु० वृषाय हितो यत्, वृष-क्यप् वा । माषे । शुक्रवर्द्धिकारके त्रि० वाजीकरणे न० आमलक्यां घृतावयवौ, कृष्णनामौषधे च स्त्री० ।

वृष्यकन्दा स्त्री० वृष्यः शुक्रवर्द्धकः कन्दो यस्याः । विदार्य्याम् ।

वृष्यगन्धिका स्त्री० वृष्यः शुक्रवर्द्धको गन्धो यस्याः कप् अत इत्वम् । अतिबलायाम् ।

वृष्यवल्ली स्त्री० कर्म्म० । विदार्य्याम् । कन् अत इत्वम् । तत्रैव ।

वृह दीप्तौ वा चु० उभ० सक० पक्षे भा० पर० इदित् । हंहयति ते अवहंहत् त । हंहति अहंहीत् ।

वृह वृद्धौ शब्दे च अक० भा० पर० सेट् । वर्हति अवृहत् अवर्हीत्

वृह भ्वनौ वृद्धौ च भ्वा० पर० सक० सेट् इदित् । हंहति अहंहीत्

वृह वृद्धौ भ्वा० पर० सक० सेट् । वर्हति अवर्हीत् ।

वृह उद्यमे तु० पर० अक० वेट् । बृहति । अवर्हीत्-अबृहत् ।

वृह वृद्धौ भ्वा० आत्म० सक० सेट् इदित् । हंहते अहंहिष्ट

वृहच्चक्षु पु० बृहती चक्षुरिव मञ्जरी यस्य । महाचक्षुर्याके ।

वृहच्चित्त पु० बृहत् उदारं चित्तं यस्मात् ५ब० । फल्गुपूरे

बृहत् त्रि० तु० बृह-अति । महति । स्त्रियां ङीप् ।

बृहती स्त्री० बृहत्+ङी० ङीप् । महत्यां स्त्रियां, क्षुद्रवार्त्ताक्याम् । वारिधान्यां, वाचि, कण्टकारिकायाम्, नवाक्षरपादके छन्दोभेदे, उत्तरीयवस्त्रे च । स्वार्थे कन् । उत्तरीयवस्त्रे स्त्री०

बृहतीपति पु० बृहतीनां वाचां पतिः बृहस्पतौ ।

बृहत्कन्द पु० बृहत् कन्दो यस्य । महाकन्दे, विष्णुकन्दे च ।

बृहत्कन्द पु० कर्म० । (खागड़ा) वृक्षभेदे ।
बृहत्कालशाका पु० कर्म० । (बड़ काजकाहुन्दे) शाकभेदे ।
बृहत्कुक्षि पु० बृहत् कुक्षिर्यस्य । हस्तिनि ।
बृहत्काल पु० कर्म० । चिल्लाले ।
बृहत्तिक्ता स्त्री० कर्म० । पाठायाम् (आकनादि) ।
बृहत्तृण पु० बृहत्तृणं यस्य । वंशे ।
बृहत्त्वच् पु० बृहती त्वक् यस्य । (छातियान) वृक्षे ।
बृहत्पञ्च पु० बृहत् पञ्चमस्य । हस्तिकन्दे । (छातिकान्दा)
बृहत्पाटलि पु० च० पट-अलि कर्म० । धुस्तूरवृक्षे ।
बृहत्पाद पु० बृहत् पादोमूलमस्य । वटवृक्षे ।
बृहत्पालिन् पु० बृहतः पालयति पाल-णिनि । वनजीरके
बृहत्पीलु पु० कर्म० । महापीलौ ।
बृहत्फला स्त्री० बृहत् फलं यस्याः । कटुतुम्ब्याम् ।
बृहत्साम न० कर्म० । "त्वामिद्धि हवामहे" इत्यस्यामृचि गीय-
माने साम्नि ।
बृहद्रथ पु० कर्म० । (कामराङ्गा) वृक्षे ।
बृहद्विला स्त्री० कर्म० । स्थूलैलायाम् ।
बृहद्वेल न० कर्म० । (तरमुज) लतावृक्षे ।
बृहद्वल न० बृहत् दलमस्य । पट्टिकालोध्रे, चिल्लाले च ।
बृहद्वल्ल न० कर्म० । महालाङ्गले ।
बृहद्भानु पु० बृहद्भानुः किरणो यस्य । सूर्य्ये, चित्रकवृक्षे च
बृहद्रथ पु० बृहत् रथोऽस्य । इन्द्रे, यज्ञपात्रभेदे, सामा वयवभेदे च
बृहद्वल्क पु० बृहत् वल्कमस्य । पट्टिकालोध्रे ।
बृहद्धातु पु० बृहत् धातो धातुभेदो यस्मात् ५ब० । (देधान) वृक्षे
बृहद्धारणी स्त्री० कर्म० । महेन्द्रधारणायाम् ।
बृहद्बीज पु० बृहत् बीजमस्य । आम्रातके ।
बृहन्नल पु० बृहत् नलो यस्य । महापोटगले ।
बृहन्नला(डा) पु० स्त्री० बृहत् नलो यस्य वा यस्य डः । अर्ज्जुने

बृहस्पति पु० बृहत्याः वाचः पतिः ष० त० । जीवे देवाचार्य्ये
वृ वरणे क्र्या० पर० उभ० सक० सेट् । वृणाति वृणीते अवारीत् अवरिष्ट-अवरीष्ट-अवर्त्त ।
वे स्तौ भ्वा० उभ० अजा० सक० अनिट् । वयति ते अवासीत् अवाताम्
वेग पु० विज घञ् । प्रवाहे, जवे, रेतसि, मूत्रविण्मादिनिःसारणजन्ये न्यायोक्ते संस्कारभेदे, मङ्गाकाशे च । [ङीप्
वेगिन् पु० वेग+अस्त्यर्थे इनि । श्येनविहगे, वेगवति त्रि० । स्त्रियां
वेजाना स्त्री० विज-अच् तमाबद्यति आ-नी-ड । सोमरसाख्याम्
वेण वादाहाने, गतौ, ज्ञाने चिन्तायाञ्च भ्वा० उभ० सक० सेट् । वेणति ते । अवेणीत् अवेणिष्ट । चङि न ह्रस्वः । [ऋषभेदे च ।
वेण पु० वेण-अच् । वर्णसङ्करजातिभेदे, वर्णसङ्करकारके मथुराजयिनरे
वेणि(णी) स्त्री० वेण-इन् वा ङीप् । केशरचनाभेदे, जलसमूहे, तत्-प्रवाहे देवदारुवृक्षे, नदीभेदे, गङ्गायमुनासरस्वतीसङ्गमस्थाने च ।
वेणीर पु० वेण-ईरन् । करिपृष्ठे (निम) ।
वेणु पु०वेण-उण् । वंशे तद्विकारे वंशीवाद्ये च 'मा पूरय वेणु मित्युक्तेः
वेणुक न० वेणुरिव वेणोर्विकारः वा कन् । तोक्ते (माँचनवाडि)
वेणुकर्कर पु० वेणुरिव कर्करः । करवीरवृक्षे ।
वेणुज पु० वेणुतो जायते जन-ड । वेणुजाते यवाकारे तण्डुले
वेणुध्म पु० वेणुं वंशीं धमति धमा-क । वेणुवादके ।
वेणुन न० वेण-उनन् । करिचे ।
वेणुपक्वी स्त्री० वेणोरिव पक्वमस्याः । वंशपक्वीवृक्षे ।
वेणुयव पु० वेणुजातोयव इव । वंशजाते तण्डुलाकारे पदार्थे ।
वेणुवाद त्रि० वेणुं वादयति वद-णिच्-अण् । वेणुवादके णुक् । तत्रैव त्रि० ।
वेणुबीज न० ६त० । वेणुजाते यवाकारे पदार्थे ।
वेतन न० अज-तनन् बीभावः । कृतकर्म्मणोऽल्पतौ ।
वेतनादान न० ६त० । व्यवहारभेदे । [तत्र ङीप् ।
वेतस पु० अज-असुन् तुक् च बीभावः । (वेत) वृक्षभेदे स्त्रीत्वमपि

वेतसाक्ष पु० वेतस एव अक्षः । अक्ष वेतसे ।

वेतसवत् त्रि० वेतसोऽस्यास्य इति मतुप् । बहुवेतसयुक्ते देशे ।

वेताल पु० अज-विच् वीभावः तक्ष-घञ् कर्म० । भूतविशेषे, भूताधिष्ठित-शवभेदे, शिवानुचरभेदे, द्वारपाले च ।

वेत्तृ त्रि० विद्-तृच् । ज्ञातरि, बोद्धरि, लब्धरि च ।

वेत्र पु० अज-त्रक् वीभावः । (बेत) वेतसवृक्षे ।

वेत्रधर पु० वेत्रं धरति धृ-अच् । द्वारपाले । वेत्रयष्टिधारके त्रि०

वेत्र (त्रा) वती स्त्री० वेत्रो बाहुल्येनास्त्यस्याः मतुप् मस्य वः वा दीर्घः । मालवदेशस्थे नदीभेदे 'शरावती वेत्रवती'ति पुराणम् ।

वेत्रासन न० वेत्रनिर्मितमासनम् । वेत्रनिर्म्मिते आसने (मोढा)

वेथ याचने भ्वा० आ० द्वि० सेट् चङि न ह्रस्वः । वेथते अवेथिष्ट

वेद पु० विद् अच् घञ् वा विष्णौ, ज्ञाने शास्त्रज्ञाने तत्साधने धर्म्म-ब्रह्मप्रतिपादके संहिताब्राह्मणात्मके ग्रन्थभेदे, शास्त्रोक्ते चरित्रे च ।

वेदगर्भ पु० वेदोगर्भे यस्य । सर्ववेदज्ञत्वेन हिरण्यगर्भे ।

वेदन न० विद-ल्युट् ज्ञाने सुखदुःखाद्यनुभवे, विवाहे च 'वसनस्य दशा प्राज्ञा मूढयोत्पत्तवेदने इति मनुः । युच् वेदनापि उक्तार्थेषु स्त्री० ।

वेदपारग पु० वेदानां पारमन्तं सीमां गच्छति गम-ड । समस्तवेदाभिज्ञे ।

वेदमात्र स्त्री० ६त० । गायत्र्यां मन्त्रभेदे तस्या वेदरक्षकत्वात्तथात्वम् ।

वेदवास पु० ६त० । ब्राह्मणे तस्य तत्पाठतदुक्ताचाराश्रयत्वात् तथात्वम् वेदावासादयोऽप्यत्र ।

वेदविद् पु० वेदं वेत्ति विद-क्विप् । विष्णौ । वेदज्ञे त्रि० ।

वेदव्यास पु० वेदान् व्यस्यति विभिन्नशाखात्वेन पृथक् करोति वि+अस-अण् । पराशरपुत्रे सत्यवतीगर्भजे कृष्णभेदे ।

वेदस् पु० विद-असुन् । वेत्तरि ।

वेदाङ्ग न० वेदस्याङ्गमिव । 'शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः । ज्योतिषामयनञ्चैव वेदाङ्गानि षडेव तु' इत्युक्तेषु शिक्षादिषु षट्सु शास्त्रेषु । [ओङ्कारे ।

वेदादि पु० वेदस्यादिरिव तत्पाठे प्रथमोच्चार्य्यमाणत्वात् । ॐकारे

वेदान्त पु० ६त० । वेदशिरोभागे ब्रह्मप्रतिपादके उपनिषद्रूपे ग्रन्थभेदे तदुपकारके शारीरकसूत्रभाष्यादौ च ।

वेदाधिप पु० ६त० । 'ऋग्वेदाधिपतिर्जीवो यजुर्वेदाधिपो भवुः । सामवेदाधिपो जीवः प्रश्निजोऽथर्ववेदप' इत्युक्तेषु ब्रह्मरुद्रादिषु, विष्णौ च ।

वेदान्तिन् त्रि० वेदान्तो ज्ञेयत्वेनास्त्यस्य इनि । वेदान्तशास्त्रज्ञे

वेदाभ्यास पु० ६त० । 'वेदस्वीकरणं पूर्वं विचारोऽध्ययनं जपः । तद्ज्ञानञ्चैव शिष्येभ्यो वेदाभ्यासोहि पञ्चधे'त्युक्तेषु वेदपाठविचारानुशीलनतदुभयजपपाठनेषु ।

वेदि न० विद्-इन् । अग्न्यधायाम् (आकनादि) परिष्कृतायां भूमौ स्त्री० वा ङीप् । 'मध्येन सा वेदिविलग्नमध्ये'ति कुमारः । वेदिश्च इमं श्लोकाकारपिण्डिकावती पशुबन्धनार्थं होमीयद्रव्यासादनार्थं वा कृतसंस्कारा परिष्कृता चतुरस्रादिरूपा भूमिः । परिष्कृते पु० ।

वेदिका स्त्री० वेदिरिव स्वार्थे कन् । अत्रालकस्वार्थे ब्रह्मद्वारादौ कृतरत्नादिनिक्षिप्तालूपाकारेण निर्म्मिते भूखण्डे ।

वेदिजा स्त्री० वेद्या होमवेदितो जायते जन-ड । द्रौपद्याम् ।

वेदिद त्रि० विद-क्त्रु दृट् च । ज्ञातरि ।

वेदिन् पु० विद-णिनि । परिष्कृते, क्षिरण्यगर्भे च ज्ञातरि त्रि०

वेध पु० विध-घञ् । (बेँदा) वेधने, उत्काने (चाडा) 'परिधिनवमभागः शूलधान्येषु वेध' इति लीलावती । विवाहादौ वर्ज्ये नक्षत्रविशेषस्थितपञ्चभेदकृतसंसर्गे च 'वेध सर्वत्र वर्ज्य'इति ज्योतिषम् ।

वेधक न० विध ण्वुल् । कर्पूरे, अस्त्रभेदे, धन्याके न० । वेधकर्त्तरि त्रि० ।

वेधनी स्त्री० विध्यतेऽनया विध-ल्युट् ङीप् । (भोमरी) मणिरत्नादिवेधकारणे अस्त्रभेदे । स्वार्थे कन् । तत्रार्थे कन् । तत्रार्थे, वेधिकायां, कर्त्तर्य्यां च ।

वेधसुख्य पु० ७त० । कर्पूरे । धन्यायां कन् । हरिद्रायां ।

वेधस् पु० वि+धा-असुन् गुणः । हिरण्यगर्भे जगत्स्रष्टरि, विधौ, सूर्ये च तार्क्षदृष्टे, पक्षिणि च ।

वेधित पु० वेधोजातोऽस्य तारं० इतच् । विद्धे छिद्रिते ।

वेधिनी स्त्री० विध-णिनि । जलौकायाम् (जोंक)

वेन्या स्त्री० वन ध पृ० । नदीभेदे ।

वेप कम्पने भ्वा० आ० अक० सेट् । वेपते अवेपिष्ट । चङि न ह्रस्वः ।

वेपथु पु० वेप–कथुच् । कम्पे ।

वेपन पु० वेप-ल्युट् । कम्पने ।

वेम पु० वे मन् न । आतपम् । वातदण्डे । अनिन् । अर्द्धार्थे पु० न० ।

वेर न० अज-रन् धीभावः । देहे, वार्त्ताकौ, कुङ्कुमे च । संज्ञायां कन् । कर्पूरे ।

वेल चालने भ्वा० प० सक० सेट् । वेलति अवेलीत् । चङि न ह्रस्वः ।

वेल कालोपदेशे, अ० चु०उ० अक० सेट् । वेलयति ते अविवेलत न

वेल न० वेल-अच् । उपवने । काले समये, मर्य्यादायां समुद्रकूले च स्त्री० 'वेलामूले विभावरी परिहीने'ति भट्टिः ।

वेल्ल चालने भ्वा० पर० सक० सेट् चङि न ह्रस्वः । वेल्लति अवेल्लीत्

वेल्ल पु० न० वेल्ल-अच् । विडङ्गे । घञ् । चलने पु० ।

वेल्लज पु० वेल्ल-अच् तथाभूतः सन् जायते जन-ड । अग्नौ ।

वेल्लन न० वेल्ल-ल्युट् । अश्वादेर्भूमौ लुण्ठने काष्ठनिर्म्मिते पदार्थे (बेलुन) च मालादूर्वायां स्त्री० ङीष् ।

वेल्लित न० वेल्ल भावे क्त । गतौ । कर्त्तरि-क्त । कम्पिते, कुटिले च त्रि० ।

वेल्लि (ल्ली) स्त्री० वेल्ल-इन् पृषो० ङीष् । लतायाम् । संज्ञायां कन् । (बेलसुठ) वृक्षे ।

वेवी कान्तौ गतौ व्याप्तौ क्षेपे भोजने च सक० प्रजनने अक०अदा० आत्म० सेट् जक्षादि० वैदिक एवायम् । वेवीते अवेविष्ट

वेश्म पु० विश-घञ् । अलङ्कारादिना कृतरूपान्तरे, नेपथ्य कर्म्मणि, वेश्माटरूपे, गृहमात्रे, प्रवेशे च । [ह्रस्वतपक्षिप्रभृतौ ।

वेशधारिन् पु० वेशं धरति चु० ध-णिनि । छलेन रूपान्तरधारिणि,

वेश्मन् पु० विश-भावे । क्षुद्रसरोवरे, अग्नौ च ।
वेशर पु० वेशं राति रा-क । अश्वतरे ।
वेश्मन् न० विश मनिन् । गृहे ।
वेश्मभू स्त्री० ६त० । गृहकरणयोग्ये स्थाने ।
वेश्य न० विश-ण्यत् वेशाय हितं वा यत् । वेशग्राजये पाठायाम्
(आकनादि) वारयोषितिं च स्त्री० । [लये च ।
वेष पु० विश-अच् घञ् वा । भूषणादिना रूपान्तरकरणे, वेशग्र जना-
वेषण पु० विश-ल्युट् । कालमहे (कालकाहुन्दे (घण्टा) वृक्षे च
ट वेष्टने भ्वा० आत्म० सक० सेट् । वेष्टते अवेष्टिष्ट ।
वेष्ट पु० वेष्ट-घञ् अच् वा । वेष्टने, श्रीवेष्टे, वृक्षनिर्यासे च ।
वेष्टक न० वेष्ट-ण्वुल् । (पागडी) उष्णीषे । कक्षाबन्धे,प्राचीरे च पु०
वेष्टन न० वेष्ट-ल्युट् । कर्णभूषणकुण्डलाम्, उष्णीषे, मुकुटे च ।
वेष्टवंग पु० वेष्ट-अच् कर्म० । (वेडवांश) वंशभेदे ।
वेष्टसार पु० वेष्टस्य सारः । श्रीवेष्टे ।
वेष्टित त्रि० वेष्ट-क्त । प्राचीरादिना आवृते, वृत्ते च ।
वेस गतौ भ्वा०प०सक० सेट् चङि न ह्रस्वः । वेसति अवेसीत् ।
वेसन न० वेस ल्युट् । द्विदले, दालयसणकानान्तु निस्तुषा यन्त्रपेषितम् ।
तच्चूर्णं वेसनमित्युक्ते चणकादिद्विदलचूर्णे च
वेसर पु० वेस-अरन् । अश्वतरे ।
वैसवर पु० वेसं वारयति वृ-अच् । (वाटना) पिष्टधान्याकसर्षपादौ
वेह्न यत्ने भ्वा०आ०अक०सेट् चङि न ह्रस्वः । वेहते अवेहिष्ट ।
वेहत् स्त्री० वि+हन अति नलोपः । गर्भोपघातिन्यां स्त्रियाम् ।
वेहार पु० वि+हृ-घञ् पृ० । स्वनामख्याते देशभेदे ।
वेह्ल गतौ भ्वा०पर० सक० सेट् । वेह्लति अवेह्लीत् चङि न ह्रस्वः
वै शोषे भ्वा० प०सक० सेट् अनिट् । वायति अवासीत् । निष्ठा तस्य नः ।
यानः निर्वाणः ।
वै अव्य० वा-डै । पादपूरणे, अनुनये, संबोधने च ।
वैकक्ष न० विशेषेण कक्षति व्याप्नोति अण् । तिर्यक्कक्षाव लम्बिनि

कारभेदे । वुन् । उरसि उपवीताकारेण धृते मालाभेदे ।

वैकङ्कत पु० विकङ्कत+स्वार्थेऽण् । (वैचि) द्रुमभेदे । तस्येदमण् । विकङ्कतसम्बन्धिनि त्रि०

वैकल्पिक त्रि० विकल्पेन प्राप्तः भवो वा ठक् । पक्षप्राप्ते ।

वैकल्य न० विकलस्य भावः ष्यञ् । विकलत्वे ।

वैकुण्ठ पु० विकुण्ठे भवः अण् विविधा कुण्ठा माया यस्य स्वार्थेऽण् वा । विष्णौ, गरुडे, इन्द्रे, सितार्जके च ।

वैकृत न० विकृतस्य भावः अण् । विकारे ।

वैखरी स्त्री० विशेषेण खं राति रा-क स्वार्थेऽण् । अर्थबोधके कण्ठस्थानादिषु उच्चार्यमाणे वर्णात्मके शब्दविशेषे ।

वैखानस पु० वि+खन-ड अन-अस्य कर्म० स्वार्थेऽण् वानप्रस्थे तापसभेदे 'वैखानसेभ्यः श्रुतरामवार्त्ता' इति भट्टिः ।

वैगुण्य न० विगतो विरुद्धो वा गुणोऽस्य तस्य भावः ष्यञ् । यत्र यदुचितं तस्य रूपान्तरतापादने, अन्यायत्वे, असम्यक्त्वे च

वैचित्र्य न० विचित्रस्य भावः ष्यञ् । नानारूपत्वे विलक्षणत्वे ।

वैजयन्त पु० विजयते वि+जि-अच् स्वार्थेऽण् । इन्द्रप्रासादे, अग्निनक्षत्रे, दानवभेदे च पताकायां, जयन्तीवृक्षे च स्त्री० ङीप् ।

वैजिक न० वीजेन निर्वृत्तं ठक् गिष्वुतैले । वीजाय हितम् ठक् । आत्मनि । स्वार्थे ठक् । कारणे । तस्येदं ठञ् । वीजसम्बन्धिनि त्रि०

वैज्ञानिक पु० विज्ञानाय साधु ठक् । निपुणे, विज्ञानमधिकृत्य कृतो ग्रन्थः ठक् । बौद्धागमे । तदध्येतरि, तत्सम्बन्धिनि च त्रि०

वैडालव्रत न० विडालस्येदम् अण् तदिव व्रतम् । 'यस्य धर्म्मध्वजो नित्यं बकध्वज इवोच्छ्रितः । प्रच्छन्नानि च पापानि वैडालं नाम तद्व्रतमिति' स्मृतौ प्रकाशेन धर्म्माचरणेन गुप्तपापाचारे ।

वैडालव्रतिक पु० वैडालव्रतमस्त्यस्य ठन् । छद्मेन धर्म्मचारिणि छद्मतापसे । इनि । वैडालव्रतीत्यपत्ये ।

वैणव न० वेणूनां फलम् अण्, तस्य न लुप् । वेणुफले । वेणुसम्बन्धिनि त्रि० ।

वैणविक त्रि० वेणोर्विकारः अण् वैणवं वेणुवाद्यं शिल्पमस्यास्य ठन् ।
वैणिक त्रि० वीणा तद्वादनं शिल्पमस्य ठक् । वीणावादके
वैणुक न० वेणोर्विकारः ठक् । गजचालनार्थे लौहदण्डे वंशदण्डे ।
वेणुतद्वादनं शिल्पमस्य ठक् । वेणुवादके त्रि० ।
वैण्य (न्य) पु० वेण (न)स्यापत्यम् यञ् । वेणसुते पृथुनामके ऋषभेदे ।
वैतंसिक त्रि० वितंसेन मृगपक्ष्यादिबन्धनोपायेन चरति ठक् । मांसविक्रयेणजीवके व्याधे ।
वैतनिक त्रि० वेतनेन जीवति ठक् । वेतनोपजीवके कर्म्मकरे भृत्यादौ ।
वैतरणी (णि) स्त्री० वितरणेन दानेन लङ्घ्यते अण् ङीप् वा पृ० सुखः । यमद्वारस्थे नदीभेदे, यमद्वारे लङ्घनीये तस्या वैतरणी नदी'ति पुराणम् ।
वैतस पु० वेतसएव स्वार्थेऽण् । अम्लवेतसे ।
वैतानिक पु० वितानस्यायम् । ठक् । श्रौतविधिनाऽग्निस्थापने दाक्षादुर्ब्रह्मणीये स्यात् 'यस्य वैतानिको विधिरि'ति स्मृतिः
वैतालिक त्रि० विविधस्तालः मङ्गलगीत्यादिशब्देन व्यवहरति ठक् । मङ्गलस्तुत्यादिभिः राज्ञां प्रबोधकारके मागधादौ ।
वैतालीय पु० मात्रावृत्तभेदे ।
वैदग्ध न० स्त्री० विदग्धस्य चतुरस्य भावः अण् स्त्रीत्वपक्षे ङीप् । चातुर्य्ये, भङ्गौ च । ष्यञ् । वैदग्ध्यमप्यत्र न० ।
वैदर्भ पु० विदर्भाणां जनपदानां राजा अण् । विदर्भदेशे धिये । वाक्यस्य कौटिल्ये न० । 'अवृत्तिरल्पवृत्तिर्वा वैदर्भीरीतिरुच्यते' दण्डिनो काव्यरचनाभेदे स्त्री० ङीप् । विदर्भे भवा अण् । भीमराजपत्न्यां दमयन्त्याम् स्त्री० ङीप् । [कभेदे पु० ।
वैदल न० विदलस्य विकारः अण् । भिक्षुकस्य भिक्षापात्रभेदे । पिटे
वैदिक पु० वेदं वेत्त्यधीते वा ठञ् । वेदज्ञे ब्राह्मणे वेदेषु विहितः ठक् । वेदोक्ते त्रि० । स्त्रियां ङीप् 'वैदिकी तान्त्रिकी सन्ध्या यथाशास्त्रमनोगत' इति तन्त्रम् ।
वैदुष्य न० विदुषो भावः विद्वस्+ष्यञ् । पाण्डित्ये ।

वैदूर्य्य न० विदूरे भवः ष्यञ् । ज्ञाखधीतवर्थे विद्यावनेलक्षके मणिभेदे ।
वैदेह पु०विदेहे भवः अण् । वणिग्जने । विदेहे भवः अण् ततः कन् । वणिग्जने स्त्रियां ङीप् वैद्यजाते जातिभेदे च । ठक् । वैदेहिकोऽपि । वणिजि । विदेहानां राजा अण् । विदेहराजे जनके ऋषौ ।
वैदेही स्त्री० विदेहेषु मिथिलादेशेषु भवा अण् । सीतायाम् जनकात्मजायाम् हरिद्रायाम् पिप्पल्याम्, वणिक्स्त्रियाञ्च
वैद्य पु०विद्याऽस्त्यस्य अण् । पण्डिते 'नाविद्यानान्तु वैद्येने'ति स्मृतिः भिषजि, तदुपकारके-वासकवृक्षे च ।
वैद्यक न० वैद्यं चिकित्सकमधिकृत्य कृतो ग्रन्थः कन् । आयुर्वेदे
वैद्यबन्धु पु० कृत० । आरग्वधवृक्षे ।
वैद्यमातृ स्त्री० वैद्यस्य मातेव । वासके तस्य वैद्यजीविकाङ्ग रोगघात्निकरत्वेन तत्पोषकत्वात् तन्मातृतुल्यत्वम् ।
वैद्यसिंही स्त्री० वैद्यस्य सिंहीव । वासकवृक्षे ।
वैद्या स्त्री० वैद्यस्येयं प्रियत्वात् अण् काकोल्याम् ।
वैध त्रि० विधिना आगतः अण् । विधिप्रतिपादेऽर्थे ।
वैधातृ पु० विधातुरपत्यम् अण् । सनत्कुमारादौ मुनिभेदे ।
वैधृति पु० विगता धृतिर्यस्मात् पृ० इञ्जिः । विष्कम्भादिषु मध्ये अन्तिमे योगे ।
वैधेय त्रि० विधीयतेऽसौ वि+धा यत् ततः स्वार्थे अण् मूर्खे
वैधर्म्य न० विरुद्धो धर्म्मो यस्य तस्य भावः ष्यञ् । विरुद्धधर्म्मत्वे अन्यलक्षणे च । [कुमारः ।
वैधव्य न० विधवाया भावः ष्यञ् । पतिविरहे नवैधव्यमसह्यवेदनमिति
वैनतेय पु० विनतायाः अपत्यं ढक् । गरुडे, अरुणे च ।
वैनयिक त्रि० विनये रतः ठक् । शास्त्राभ्यासादिना विनयरते
वैनायिक पु० विनायं गणेशमधिकृत्य कृतो ग्रन्थः ठक् । बौद्धागमे । उपचारात् तदभिज्ञे त्रि० ।
वैनाशिक पु० विनाशमधिकृत्य कृतो ग्रन्थः ठक् । सर्व्वेषां क्षणभङ्गुर-

तापत्रितयाहर्के वैशाखमासे वह्निस्थे तिथौ विनायकाय दीयतम् ठक् ।
ज्योतिषोक्ते यज्ञभाण्डीयपात्रभेदे आश्वलायनश्रौतसूत्रोक्ते यज्ञभेदे च ।
वार्षिके, यज्ञभेदे च त्रि० । उर्ध्वनाभे पु०

वैनीतक पु० न० । विनयेन चरति वैनीतेऽनेन करणे वा वुञ् । शीलार्थे ।
कन् । प्रत्ययार्थयाचके भिक्षाजीवी ।

वैपरीत्य न० विपरीतस्य भावः ष्यञ् । विपर्य्यये ।

वैभव न० विभोर्भावः अण् । विभुत्वे विभूतौ ।

वैभ्राज न० विभ्राज इदम् अण् । देवोद्यानभेदे ।

वैमुख्य न० विमुखस्य भावः ष्यञ् । विमुखत्वे ।

वैमात्र पु० विमातुरपत्यम् अण् । सापत्ने भ्रातरि तथाभूत भगिन्यां
स्त्री० ङीप् । [स्त्री० ङीप् ।

वैमात्रेय पु० विमातुरपत्यं ढक् । सापत्ने भ्रातरि तथाभूत भगिन्यां

वैयाकरण त्रि० व्याकरणं वेत्त्यधीते वा अण् । व्याकरणाभिज्ञे

वैयाघ्र पु० व्याघ्रचर्म्मणा परिहितो रथः अण् । व्याघ्रचर्मपरिहते रथे ।

वैयाघ्रपद्य पु० व्याघ्रपदस्यापत्यं यञ् । गोत्रकारके मुनिभेदे: 'वैयाघ्र-
पद्यगोत्रामेलि, भीष्मतर्पणमन्त्रः । [ति, भावः

वैयात्य न० वियातस्य भावः ष्यञ् । निर्लज्जत्वे 'वैयात्यं सुरतेष्वपी'

वैयासकि पु० व्यासस्यापत्यम् इञ् । व्यासस्यापत्ये शुकदेवे ।

वैयासिकी स्त्री० व्यासेन प्रोक्ता ठञ् ङीप् । व्यासप्रणीतायां संहि-
तायाम् ।

वैर न० वीरस्य भावः अण् । विरोधे विद्वेषे ।

वैरकार त्रि० वैरं करोति ण्ट । विरोधकारके ।

वैरक्त्य न० विरक्तस्य भावः ष्यञ् । विरागे ।

वैरनिर्यातन न० वैरस्य वैरकृतापकारस्य निर्यातनम् त्रि० यत-खिक्
ल्युट् । वैरकृतापकारप्रतीकारे । [तस्य शोधने ।

वैरप्रतीकार पु० ६त० । वैरकृतापकारस्य तुल्यरूपापकारकरणेन

वैरशुद्धि स्त्री० ६त० । वैरप्रतीकारे । [शिक्षविषयरागराहित्ये च ।

वैराग्य न० विरागस्य भावः ष्यञ् । विषयवासनाराहित्ये ऐहिकामु-

वैरवृक्ष पु० वीरस्यायं तस्यागमकत्वात् वर्ग० । अञ्जनवृक्षे ।

वैरानुबन्धिन् त्रि० वैरं विद्वेषमनुबध्नातीति णिनि । विद्वेषानुरूपकारके, वैरानुगते च ।

वैरिन् त्रि० वैरमस्यास्ति इनि । शत्रौ । [वस्तुनो विकारे च ।

वैरूप्य न० विरूपस्य भावः ष्यञ् । विरूपत्वे; अनेकरूपत्वे, अयथाभावे,

वैरोचन (न) नि पु० विरोचनस्यापत्यम् शिवादित्वात् ष्ठञ् वा । अग्निपुत्रे सूर्यपुत्रे, बलिराजनामनि दानवे च ।

वैलक्षण्य न० विलक्षणस्य भावः ष्यञ् । विलक्षणत्वे वैशिष्ट्ये ।

वैलक्ष्य न० विलक्षस्य भावः ष्यञ् । लज्जायां, स्वभाववैलक्षण्ये च वैलक्ष्यहेतोर्गतिरिति नैषधम् ।

वैल्व न० विल्वस्य फलम् अण् तस्य न लुप् । विल्वफले तत्सम्बन्धिनि त्रि० । [नैगमे (दोकानी) ।

वैवधिक त्रि० विवधेन धान्यादिसंग्रहेण व्यवहरति ठक् । वार्त्ताजीवे

वैवर्ण्य न० विवर्णस्य भावः ष्यञ् । विवर्णत्वे मालिन्ये ।

वैवस्वत पु० विवस्वतोऽपत्यम् तस्येदं वा अण् । यमे मनौ, रुद्रभेदे च तत्सम्बन्धिनि त्रि० 'वैवस्वतकरक्रियेत्युद्भटः दक्षिणदिशि स्त्री० ङीप् ।

वैवाहिक त्रि० विवाहाय हितं साधु वा ठक् । विवाहयोग्ये 'वैवाहिकीं तिथिं पृष्टा' इति कुमारः विवाहेन संबद्धे कन्यापुत्रयोः श्वशुरे, विवाहसम्बन्धिनि च त्रि० । पञ्चमे सप्तमे वापि येषां वैवाहिकी क्रियेति स्मृतिः ।

वैशम्पायन पु० व्यासशिष्ये भारतवक्तरि मुनिभेदे ।

वैशस न० विशसस्य भावः स्वार्थे वा अण् । हिंसने हिंसने वा

वैशाख पु० विशाखानक्षत्रयुक्ता पौर्णमासी वैशाखी सा यत्र मासे पुनः अण् । खनामख्याते वर्षमध्ये द्वितीये चान्द्रे मासे तत्सम्बन्धस्य पौर्णमास्यां स्त्री० ङीप् । विशाखा प्रयोजनमस्य अञ् । मन्थनदण्डे । अनुराधायास्तारकाभेदे न० ।

वैशिष्ट्य न० विशिष्टस्य भावः ष्यञ् । विशेषविशेषवत्सम्बन्धे, विशिष्टवुद्धिनियामके सम्बन्धे, भेदे च ।

वैशेषिक न० विशेषं पदार्थभेदमधिकृत्य कृतो ग्रन्थः ठक् । कणादप्रणीते शास्त्रभेदे । तदधीते अण् । कणादशास्त्राभिज्ञे त्रि० । तस्येदम् अण् । कणादशास्त्रसम्बन्धिनि त्रि० ।

वैशेष्य न० विशेषस्य भावः ष्यञ् । वैशिष्ट्ये भेदे च 'वैशेष्यात्तद्वादः' इति सांख्यसूत्रम् । [जरद्जाते जातिभेदे

वैश्य पु० विशति उपभुङ्क्ते विश-क्विप् स्वार्थे ष्यञ् । वर्णभेदे ब्रह्मण

वैश्यवृत्ति स्त्री० ६त० । कृषिवाणिज्यादौ ।

वैश्रवण पु० विश्रवसोऽपत्यम् अण् विश्रवणादेशः । कुबेरे ।

वैश्रवणालय पु० ६त० । वटवृक्षे कुबेरपुर्य्यां च । वैश्रवणावासादयोऽप्यत्र ।

वैश्वदेव पु० विश्वेभ्यो देवेभ्यो देयो बलिः अण् । वैश्वदेवोऽहेयेन दीयमाने बलौ ।

वैश्वानर पु० विश्वेषां नराणामयम् कुक्षिस्थत्वात् अण् पूर्वदीर्घः । वह्नौ, चित्रकवृक्षे, सामवेदावयवभेदे च ।

वैषम्य न० विषमस्य भावः ष्यञ् । विषमत्वे वैलक्षण्ये ।

वैषयिक त्रि० विषयेण निर्वृत्तः ठक् । विषयनिर्वृत्ते सुखादौ

वैष्णव त्रि० विष्णुर्देवताऽस्य तस्येदं वा अण् । विष्णूपासके विष्णुसम्बन्धिनि च स्त्रियां ङीप् । वैष्णव्यां शक्तौ 'वैष्णवी समरे वैनतेयि चण्डी । विष्णुसम्बन्धिनि त्रि० स्त्रियां ङीप् 'गायत्री वैष्णवी सूक्तेति स्मृतिः विष्णुधामनि न० ।

वैसारिण पु० विसरति वि + सृ-णिनि स्वार्थे अण् । मत्स्ये ।

वैहासिक पु० विहासेऽभिरतस्तं करोति वा ठक् । नाटकादौ प्रसिद्धे मङ्कारररसनायकसङ्कङ्करे विदूषके ।

वोढृ पु० वह-तृन् । ऋत्विग्भेदे "वोढुः पञ्चग्रिणस्तस्येति स्मृतिः

वोढृ त्रि० वह-तृच् । वाहके स्थानान्तरप्रापके 'भागीरथी निर्झरभीकराणां वोढेति" कुमारः । पाणिग्राहके पु० पितृदत्ता वोढुरेव ते इति स्मृतिः । भारवाहके मूढे च त्रि० हरिवंशे पु० ।

वोष्ट पु० वा उष्ट । (वोंटा) इति ख्याते वृक्षे ।

वोरव पु० वा-उर वोरं वाति वा-क । (वोरो) धान्यभेदे ।

वोल पु० वा-उलच् । गन्धरसे गन्धद्रव्यभेदे ।

वौषट् अव्य० वह-औषट् । देवोद्देशेन हविस्त्यागे ।

व्यंसक पु० विगतोऽंसो यस्य कप् । धूर्ते 'मयूरव्यंसकादयश्चेति पाणिनिसूत्रम् ।

व्यंसित त्रि० वि + अंस-क्त । वञ्चिते ।

व्यक्त त्रि० वि-अनज-क्त । स्फुटे प्रकाशिते, दृश्ये, प्राप्ते, स्थूले, च । विष्णौ पु० [विशेषे च ।

व्यक्ति स्त्री० वि+अनज-क्तिन् । प्रकाशे क्लिच् । जने पृथगात्मके, एकैकव्यय त्रि० विगतमव्ययं यस्य । व्याकुले, व्यासक्ते च । विशिष्टमव्ययं यस्य । विष्णौ पु० । [कलङ्कहीने त्रि० ।

व्यङ्ग न० विगतं विकलं वाङ्गं कर्म० । विकलाङ्गे, विगतमङ्गं यस्य ।

व्यङ्ग्य त्रि० वि+अनज-यत् । व्यञ्जनया वृत्त्या बोध्येऽर्थे, प्रकाश्ये

व्यच व्याजे अक० सम्बन्धे सक० तु० उ० प० सेट् । विचति अविचीत् विव्याच ।

व्यजन न० वि + अज-ल्युट् । तालवृन्ते ।

व्यञ्जक पु० वि+अनज-णिच्-ण्वुल् । कृत्रिमभावादिप्रकाशके अभिनये, व्यञ्जनयार्थबोधके शब्दे च । प्रकाशकमात्रे त्रि०

व्यञ्जन न० विशेषेणाज्यते वि+अनज-ल्युट् । सूपशाकादौ ओदनभोजनोपकरणे । वि+अनज-णिच् ल्युट् । अलङ्कारप्रसिद्धे वृत्तिभेदे । मुच् । 'विरताक्षभिधाद्यासु यथार्थो बोध्यतेऽपरः । सा वृत्तिर्व्यञ्जना नामेत्युक्तौ शब्दशक्तिभेदे ।

व्यञ्जित त्रि० वि+अनज-णिच्-क्त । प्रकाशिते 'अव्यञ्जितकुर्मलत्वमिति कुमारः । व्यञ्जनावृत्त्या बोधितेऽर्थे च ।

व्याडम्बक पु० वि+अड-अच् डवि-ण्वुल् कर्म० शक० । एरण्डवृक्षे

व्यतिकर पु० वि+अति-कृ-अप् । सम्बन्धे, असने च ।

व्यतिक्रम पु० वि+अति+क्रम-घञ् न वृद्धिः। विपर्य्यये 'विवाहे च व्यतिक्रम' इति स्मृतिः। [मिति कुमारः।

व्यतिरिक्त त्रि० वि+अति+रिच्-क्त। भिन्ने 'इत्यवृत्तिव्यति रिक्तवादन-

व्यतिरेक पु० वि+अति+रिच-घञ्। विशेषे, अतिक्रमे, अभावे, विनेत्यर्थे, अर्थालङ्कारभेदे च।

व्यतिषक्त त्रि० वि+अति+षञ्ज-क्त। मिलिते, ग्रथिते च।

व्यतिषङ्ग पु० वि+अति+षञ्ज-घञ्। परस्परमेलने।

व्यती (ति)हार पु० वि+अति+हृ-घञ् वा दीर्घः। परीवर्त्ते परस्परैकजातीयक्रियाकरणे। [इति रघुः।

व्यतीत त्रि० वि+अति-इण्-क्त। अतीते 'व्यतीतकालस्त्वहमभ्युपेत'

व्यतीपात पु० वि+अति+पत-घञ् दीर्घः। महोत्पातभेदे,। विष्कम्भादिषु मध्ये योगभेदे 'अवणा च धनिष्ठार्द्धा नागदैवमलञ्च। यद्यमा वरिवारेण व्यतीपातः स उच्यते" इत्युक्ते योगभेदे च।

व्यत्यय पु० वि+अति+इण्-अच्। व्यतिक्रमे, विपर्य्यये च।

व्यत्यास पु० वि+अति-अस-घञ्। विपर्य्यये।

व्यथ भये चलने दुःखानुभवे च भ्वा० आ० अक० सेट् घटा०। व्यथते व्यथयिष्ट। अङ् व्य था।

व्यथा स्त्री० व्यथ-अङ्। पीड़ायाम्, दुःखे च।

व्यध ताड़ने दि०प सक० अनिट्। विध्यति अव्याक्षीत्।

व्यध पु० व्यध अच्। वेधे, छिद्रीकरणे, भेदने च।

व्यध्व पु० विरुद्धः कृष्णा अध्वसमा०। कुपथे।

व्यप क्षये चुरा० उभ० सक० सेट्। व्यापयति ते अविव्यपत् त।

व्यपदेश पु० वि + अप + दिश-घञ्। कथने। संज्ञायां, कापथ्ये च

व्यपरोपण न० वि+अप+रुह णिच्-ल्युट्। छेदने।

व्यपरोपित त्रि० वि+अप+रुह-णिच्-क्त। छिन्ने। [निष्कृते च।

व्यपाकृति स्त्री० वि+अप+आ+कृ-क्तिन्। निराकरणे, अस्वीकारे,

व्यपाश्रय पु० वि+अप+आ+श्रि अच्। आश्रये। [वाधर्मेलक्षणे च।

व्यपेक्षा स्त्री० वि+अप + ईक्ष-अ। अपेक्षायां व्याख्योक्ते अवय-

व्यभिचार पु० वि + अभि-चर घञ् । निन्दिताचारे स्त्रियाः परपुरुषसंगमे, पुंसश्च परस्त्रीसंगमे, न्यायादिप्रसिद्धे हेत्वादिदोषभेदे च

व्यभिचारिन् पु० वि+अभि + चर-णिनि । अलङ्कारोक्ते रसाङ्गभेदे निर्वेदादौ, न्यायोक्ते व्यभिचारकरूपहेत्वादिदोषवति पदार्थे च । परपुरुषगामिन्यां स्त्रियां स्त्री० ङीप् ।

व्यय गतौ त्यागे अद० चु० उभ० सक० सेट् । व्यययति ते अव्ययत् त

व्यय गतौ भ्वा० उभ० सक० सेट् । व्ययति ते अव्ययीत् अव्ययिष्ट ।

व्यय क्षोदे चु० उभ० सक० सेट् । व्ययायति ते अविव्ययत् त ।

व्यय पु० वि+इण-अच् । विक्रमे, धनादेस्त्यागे, ज्योतिषोक्ते लग्नात् द्वादशस्थाने च । [शून्ये च ।

व्यर्थ त्रि० विगतोऽर्थः प्रयोजनं यस्य । निष्प्रयोजने, विफले, अर्थ-

व्यलीक न० वि+अल-ईकक् । अकार्य्ये, कामजे, अपराधे अप्रिये, अन्यते च तद्वति त्रि० ।

व्यवकलन न० वि+अव-कल-ल्युट् । वियोजने, विगमने, हीनतोद्धरणे च । 'व्यवकलनमार्गेऽसी'ति लीलावती ।

व्यवकलित त्रि० वि+अव+कल-क्त । वियोजिते ।

व्यवच्छिन्न त्रि० वि+अव+छिद-क्त । छिन्ने, विशेषिते च । [चने च ।

व्यवच्छेद पु० वि+अव+छिद घञ् । पृथक्करणे, विशेषकरणे, मो-

व्यवधा स्त्री० वि+अव+धा-अ । व्यवधाने । [स्याच्छादने च ।

व्यवधान न० वि+अव+धा-ल्युट् । तिरोधाने द्रव्यान्तरेण द्रव्यान्तर-

व्यवधायक त्रि० वि+अव+धा-ण्वुल् । व्यवधानकर्त्तरि, आच्छादके च ।

व्यवधि पु० वि+अव + धा-कि । व्यवधाने ।

व्यवसाय पु० वि + अव + सो-घञ् । उद्यमे 'मरणव्यवसायबुद्धि'मिति कुमारः उपजीविकायाम् अनुष्ठाने, अवधारणे च 'व्यवसायात्मिका बुद्धि'रिति गीता ।

व्यवस्था स्त्री० वि+अव+स्था-अ । शास्त्रविहितस्य विषयान्तरपरिहारेण विषयविशेषे स्थापने, शास्त्रमर्य्यादायाञ्च ।

व्यवस्थित त्रि० वि + अव+स्था-क्त । विषयान्तरपरिहारेण विषयविशेषे अवस्थिते-शास्त्रविहिते पदार्थे ।

व्यवस्थितविभाषा स्त्री० कर्म० । व्याकरणोक्ते विषयान्तरपरिहारेण विषयविशेषेऽवस्थितरूपे विकल्पे ।

व्यवहर्त्तृ त्रि० वि + अव+हृ-तृच् । व्यवहारकर्त्तरि ।

व्यवहार पु० वि+अव + हृ-घञ् । अर्थविशेषबोधनाय शब्दविशेषप्रयोगे ऋणादानादिविषयादयश्च विवादेषु । 'स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः । आवेदयति चेद्राज्ञे व्यवहारपदं हि तद्' इति स्मृतिः । 'परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु वाक्यात् न्यायाद्व्यवस्थानं व्यवहार उदाहृत' इत्युक्ते विवादनिर्णये, सहासनभोजनादौ च ।

व्यवहारपद न० ६त० । व्यवहारविषये ।

व्यवहारमातृका स्त्री० व्यवहारस्य विवादनिर्णयस्य मातेव प्रापकत्वात् परिच्छेदकत्वाद्वा इवार्थेकन् । व्यवहारनिर्णयार्थं प्राड्विवाकादिकार्य्ये क्रियासमुदाये, विस्तरोवाचस्पत्ये

व्यवहारिक त्रि० व्यवहारः प्रयोजनमस्य ठक् । व्यवहारयोग्ये लोकप्रसिद्धे घटपटादौ, स्त्रियां ङीप् । इक्षुदण्डे पु० ।

व्यवहारिकसत्ता स्त्री० कर्म० व्यवहारोपयिके सत्त्वे वेदान्त कल्पिते ब्रह्माभिन्नपदार्थमात्रस्य वस्तुतोऽसत्त्वेऽपि व्यवहारयोग्ये सत्त्वे येन घटादि व्यवह्रियते । तत्कार्य्यकरणोपयोगित्वेन कल्पिते घटादेरर्थक्रियाकारित्वलक्षणे सत्त्वे च ।

व्यवहार्य्य त्रि० वि—अव+हृ ण्यत् । इदमित्थमेवेत्येवंरूपेण व्यवहारविषये येन सह भोजनादि क्रियते तस्मिंश्च ।

व्यवहित त्रि० वि+अव + धा-क्त । व्यवधानवति पदार्थे ।

व्यवाय पु० वि+अव+इण-घञ् । मैथुने, अन्तर्धाने शुद्धौ च तेजसि न० ।

व्यवायिन् पु० वि+अव+इण्-णिनि । मैथुनकारके स्त्रियां ङीप् ।

व्यसन न० वि+अस-ल्युट् । विपत्तौ, भ्रंशे, कामजाते, क्रोधजाते च, स्त्रीभोगमद्यपानादौ दोषे, दैवादिकृते उपद्रवे च ।

व्यसनात्त त्रि० व्यसनेनार्त्तः दैवाद्युपद्रवयुक्ते ।

व्यसनिन् त्रि० व्यसनमस्यास्ति इनि । व्यसनयुक्ते कामजादि मद्यपानादिरूपव्यसनेषयुक्ते, दैवाद्युपद्रुते च । [तिलम् ।

व्यसु त्रि० विगताः असवो यस्य सूते, 'शंसे ज्ञाते भवेद्व्यसुरिति ज्यो-

व्यस्त त्रि० वि+अस-क्त । व्याकुले, व्याप्ते, विभक्ते च 'व्यस्त,रात्रिं-दिवस्ये'ति कुमारः विपरीते, 'व्यस्तविधिर्विलोम" इति लीलावती । समुदितपदार्थमध्ये एकैकस्मिन् । 'एते व्यस्ता समस्ता वे'ति स्मृतिः । समस्तभिन्ने च भावे-क्त । व्यतिक्रमे न० ।

व्याकरण पु० व्याक्रियन्ते व्युत्पाद्यन्ते अर्थवत्तया प्रतिपाद्यन्ते शब्दा येन वि+आ+कृ-ल्युट् । वेदाङ्गे शब्दसाधुताबोधके शास्त्रभेदे, वेदान्तोक्ते नामरूपाभ्यां जगतोविकाशने च ।

व्याकुल त्रि० वि+आ+कुल-क । रोगादिना इतकर्त्तव्यतानिश्चयविहीने ।

व्याकृति स्त्री० वि+आ+कृ-क्तिन् । भङ्गौ प्रकाशने, व्याकरणे च ।

व्याकृत त्रि० वि+आ+कृ-क्त । प्रकाशिते ।

व्याकोश (ष) त्रि० वि+आ+कुश(ष) अच् व्याकृतः कोशा (षा)दू प्रा० स० वा । प्रफुल्ले 'व्याकोशे (षे)न्दीवराक्ष इति तन्त्रम् । [कथने च,

व्याख्या स्त्री० वि+आ+ख्या-अच् । विवरणात्मके शब्दसमूहरूपे ग्रन्थभेदे

व्याख्यात त्रि० वि+आ+ख्या-क्त । कथिते, विदिते च ।

व्याघात त्रि० वि+आ+हन-घञ् । अन्तराये, प्रहारे, अर्थालङ्कारभेदे, सप्रतिबन्धे कथने, प्रतिबन्धभेदे 'व्याघातावधिराशङ्केति खण्डनखण्डखाद्यम् । विष्कम्भादिषु योगेषु योगभेदे च ।

व्याघ्र पु० वि+आ+घ्रा-क । जन्तुभेदे, रक्तैरण्डे, करञ्जे च ।

व्याघ्रदल पु० व्याघ्रपाद इव दलमस्य ग० । एरण्डवृक्षे ।

व्याघ्रनख न० व्याघ्रस्य नखमिव । नखीनामगन्धद्रव्ये व्याघ्रस्य नख इव दलान्यस्य । । क्षुद्रोदृक्षे । ङीप् । व्याघ्रनखी ।

व्याघ्रपाद(द्) पु० व्याघ्रस्य पाद इव मूलमस्य वा अन्त्यलोपः । विकङ्कतवृक्षे । मुनिभेदे च । [ङीप् ।

व्याघ्रपुच्छ पु० व्याघ्रस्य पुच्छमिव दलमस्य । एरण्डवृक्षे ङीप् व्याघ्रपु-

व्याघ्रादनी स्त्री० व्याघ्रेणाद्यते अद-ल्युट् ङीप्। लिङ्गतायाम्।
व्याघ्रास्य स्त्री० व्याघ्रस्येवास्यं यस्य। विड़ाले।
व्याघ्री स्त्री० व्याघ्रस्तन्नखाकारः कण्टकोऽस्त्यस्याः अच् गौ० ङीष्। कण्टकारिकायाम्। जातौ ङीष् व्याघ्र्योषिति।
व्याज पु० वि+अज-घञ् वीभावाभावः। कपटे, वञ्चनाफले असत्यव्यवहारे कारणान्तरेण प्रवृत्तस्य कारणान्तरत्वे नोद्भावनरूपे अपदेशे च।
व्याजनिन्दा स्त्री० ३त०। कपटनिन्दायाम्, अर्थालङ्कारभेदे च।
व्याजस्तुति स्त्री० ३त०। कपटस्तुतौ, अर्थालङ्कारभेदे च।
व्याजोक्ति स्त्री० ३त० छलेनोक्तौ, अर्थालङ्कारभेदे च।
व्याड पु० वि+अड-अच्। मांसभक्षके व्याघ्रादौ पशौ, सर्पे, इन्द्रे च वङ्गके त्रि०। [खाख्ये गन्धद्रव्ये।
व्याडायुध न० व्याडस्य व्याघ्रस्यायुधं नख इवास्यस्य अच्। व्याघ्रनख-
व्याडि पु० व्याकरणस्य संग्रहकारके कोषकारके च मुनिभेदे।
व्याध पु० व्यध-घञ्। मृगहिंसके जातिभेदे।
व्याधभीत पु० व्याधाद्भीतः भी क्त। मृगे।
व्याधि पु० वि+आ+धा-कि। रोगे कुष्ठरोगे च।
व्याधिघात पु० व्याधिं हन्ति-हन-अण्। धारगवके (सोन्दाल)
व्याधिहन्तृ त्रि० व्याधिं हन्ति हन-तृच्। वाराहीकन्दे।
व्याधित त्रि० व्याधिर्जातोऽस्य तारं० इतच्। व्याधियुक्ते।
व्याधु(धू)त त्रि० वि+आ+धु-धू-या-क्त। कम्पिते।
व्यान पु० वि+अन-घञ्। देहस्थे सर्वशरीरव्यापके प्राणादिमध्ये वायुभेदे।
व्यापक त्रि० विशेषेणाप्नोति वि+आप-ण्वुल्। अधिकदेशवृत्तौ, न्यायोक्ते स्वाधिकरणवृत्त्यभावप्रतियोगिनि च पदार्थे। तन्त्रोक्ते सर्वाङ्गसम्बन्धिनि न्यासभेदे च।
व्यापन्न त्रि० वि+आ+पद-क्त। हते, विपद्युक्ते च।
व्यापाद पु० वि+आ+पद-घञ् द्रोहचिन्तने। [चिन्तने च।
व्यापादन न० वि+आ+पद-णिच् ल्युट्। मारणे, परानिष्ट

व्यापार पु० वि+आ+पृ-घञ् । 'व्यापारोभावना सैवोत्पादना सैव च क्रियेत्युक्तावां भावयितुः उत्पादनक्रियायाम् ।

व्यापारिन् त्रि० व्यापारोऽस्त्यस्य इनि । व्यापारवति भरणादौ व्यवसायवति वणिग्जने पु० ।

व्यापिन् त्रि० वि+आप-णिनि । व्यापके । विष्णौ पु० ।

व्यापृत त्रि० वि+आ+ऋ-क्त । व्यापारयुक्ते । [व्याप्तो धूमः ।

व्याप्त त्रि० वि+आप-क्त । पूर्णे, न्यायोक्ते व्याप्तिमति पदार्थे यथा वह्नौ

व्याप्ति स्त्री० वि+आप-क्तिन् । ऐश्वरस्य ऐश्वर्य्यभेदे, न्यायमते तदभाववति अविद्यमानत्वरूपे पदार्थे यथा वह्नेर भाववति जलादौ धूमो नास्तीति धूमादौ वह्नौ व्याप्तिः ।

व्याप्य त्रि० वि-आप-ण्यत् । व्याप्ते । अल्पदेशवृत्तौ पदार्थे अनुमितिसाधने न० । [परिमाणे ।

व्याम पु० वि+अम-घञ् । तिर्य्यक्पार्श्वतोविस्तृतयो र्बाह्वोरन्तराल-

व्यायत त्रि० वि+आ+यम-क्त । दीर्घे, आयते, दूरे अतिशये च । भावे-क्त । दैर्घ्ये, आयामे च न० ।

व्यायाम पु० वि+आ+यम-घञ् । श्रमे, श्रमसाधने व्यापारे, मल्लानां श्रमकारके व्यापारे, पौरुषे, दुर्गसंस्कारे, विधये, व्यासपरिमाणे च ।

व्यायोग पु० वि+आ+युज-घञ् । दृश्यकाव्यभेदे ।

व्याल पु० वि+अड-घञ् डस्य लः । सर्पे । हिंसकपशौ, दुष्टगजे च

व्यालगन्धा स्त्री० व्यालस्य गन्धो लेशोऽस्याः । काकोल्याम्

व्यालग्राह पु० व्यालान् सर्पान् गृह्णाति ग्रह-अण् । (सापुडे) सर्पधारिणि । णिनि । अत्रैव ।

व्यालजिह्वा स्त्री० व्यालस्य सर्पस्य जिह्वेव पत्रमस्याः । महाशमक्षायाम्

व्यालदंष्ट्र पु० व्यालस्य व्याघ्रस्य दंष्ट्रेव कण्टकमस्य । गोक्षुरे

व्यालनख पु० व्यालस्य व्याघ्रस्य नखइव । गन्धद्रव्यभेदे व्यालदलोऽप्यत्र ।

व्यालपत्रा स्त्री० व्यालस्य पादइव पत्रमस्याः । दुर्वारौ कर्कटीभेदे

व्यालम्ब पु० विशेषेण आलम्बते वि+आ+लबि+अच् । दक्षैरक्षके ।

व्याघ्रनायुध न० व्याघ्रस्य व्याघ्रस्यायुधं नखइव । नखीनामग्रभूतेऽस्त्रे ।
व्याघ्रनखाख्ये गन्धद्रव्ये पु०

व्याक्रोशी स्त्री० वि + अव+क्रुश-घञ् । स्वार्थेऽण् । परस्पराक्रोशे ।

व्याक्षेपी स्त्री० वि+अव+क्षिप-घञ् स्वार्थे अण् ङीप् । परस्परक्षेपणे

व्याहासी स्त्री० वि+अव+हस-घञ् स्वार्थेऽण् । परस्परहसने

व्याक्षिप्त त्रि० वि+आ+क्षिप-क्त । क्षिप्ते, निक्षिप्ते च 'व्याक्षिप्तगतिरुद्याने, इति । कुमारः ।

व्याक्षिप्ति स्त्री० वि + आ+क्षिप-क्तिन् । निवारणे ।

व्याख्यान पु० व्याख्यन्ति वेदान् वि+अस-घञ् । पराशरसुते मुनिभेदे, समानादिसमानार्थके विग्रहवाक्ये, विस्तारे, गोलक्षणज्ञानस्य मध्यस्थरेखायाम् "अथवं वाचयेद्विप्रो स ब्रह्मन् ! व्याख्य उच्यते" इत्युक्ते पुराणपाठके विप्रे च ।

व्यासक्त त्रि० वि+आ + षञ्ज-क्त आसक्ते तत्परे, संलग्ने च

व्यासङ्ग पु० वि + आ+षञ्ज-घञ् । कार्य्यान्तरत्यागेनैकपरत्वे आसक्तौ च।

व्याषिद्ध त्रि० वि+आ+षिध-क्त । राजज्ञादिना रुद्धे निषिद्धे च

व्याहत त्रि० वि+आ+हन-क्त । व्याघातयुक्ते ।

व्याहार पु० वि+आ+हृ घञ् । वाक्ये उक्तौ । [भेदेषु च ।

व्याहृति स्त्री० वि+आ+हृ-क्तिन् । उक्तौ, भूर्भुवःस्वरादिषु सप्तसु मन्त्र-

व्युत्क्रम पु० वि+उद्+क्रम-घञ् । क्रमवैपरीत्ये, व्यतिक्रमे च

व्युत्थान न० वि+उद्+स्था-ल्युट् । विरोधकरणे, स्वातन्त्र्यकरणे, प्रतिरोधने, स्वत्वभेदे विशेषेण उत्थाने च । वि+उद्+स्था-क्तिन् । व्युत्थितिरप्यत्र स्त्री० ।

व्युत्पत्ति स्त्री० वि०+उद्+पद-क्तिन् । विशेषेण उत्पत्तौ, शास्त्र जन्ये शब्दार्थज्ञानादिसम्पाद्ये संस्कारभेदे, शब्दानामर्थावबोधकशक्तौ च ।

व्युत्पन्न त्रि० वि+उद्+पद-क्त । व्युत्पत्तियुक्ते शब्दे, तत्संस्काररयुक्ते पुरुषे च

व्युदस्त त्रि० वि+उद्+अस-क्त निराकृते ।

व्युदास पु० उद्+अस घञ् । निराकरणे ।

व्रश्च त्यागे ऋद० चु० उभ० सक० सेट् । व्रश्चयति ते अवव्रश्चत् त

व्रश्च त्रि० वि+उभ-क्त । दग्धे, वि+व्रस्ज-क्त दृढभावः । पर्य्युषिते, प्रभाते च । फले, दिवसे च न० ।

व्रश्चि स्त्री० वि+व्रस्ज-क्तिन् । सन्ध्यायां, खुतौ, फले च ।

व्रश्च त्यागे दिवा० पर० सक० सेट् । व्रश्चति अवव्रश्चत् अवव्रश्चीत्

व्रूढ़ त्रि० वि+वह-क्त । निवेशनविशेषेण स्थिते सैन्यादौ व्रूढां द्रुपदसुतेनेति गीता । संहते 'व्रूढोरस्को वृषस्कन्ध इति रघुः । प्रथुले, परिच्छिते विवाहिते च त्रि० व्रूढा काचन कन्यकेति प्रबोधचन्द्रोदयः ।

व्रूढकङ्कट त्रि० व्रूढःपरिच्छितः कङ्कटःवर्म येन । सन्नद्धकवचे

व्रूत त्रि० वि+वे-क्त । तन्तुभिर्ग्रथिते ।

व्रूति स्त्री० वि+वे-क्तिन् । वस्त्रादिवयनकर्मणि ।

व्रूह पु० वि+ऊह-घञ् । समूहे निर्म्माणे च । सम्यक्तर्के, देहे सैन्ये युद्धार्थं सैन्यसन्निवेशनविशेषे च ।

व्रूहपार्ष्णि पु०ष्ठ० । युद्धार्थमवस्थानविशेषेण स्थितसैन्यानां पश्चाद्भागे ।

व्रूञ् स्तुतौ इतौ च भ्वा० उभ० सक० अनिट् यजा० । व्रूयति ते अवव्रावीत् अवव्रात विव्राय विव्रतुः ।

व्रो अवव्र० व्रेञ्-डो । लौहे, बीजे च ।

व्रोकार पु० व्रो+क अण् । लौहकारके ।

व्रोमकेश पु० व्योम्नि केशो यस्य । शिवे महादेवे ।

व्रोमकेशिन् पु० व्रोमाकारः केशोऽस्यस्य इनि । महादेवे ।

व्रोमचारिन् पु० व्रोम्नि चरति चर-णिनि । विहगे, देवे, यक्षनक्षत्रादौ च ।

व्रोमधूम पु० व्रोम्नः धूमइव नीलत्वात् । मेघे ।

व्रोमन् न० व्रे-मनिन् पृ० । आकाशे, (आप) अभ्रके, जले च

व्रोममण्डल न० व्रोमं मण्डलमिव । मण्डलाकारे आकाशे [दृश्यते वायौनिधाते च । पताकायाम् ।

व्रोमसुन्दर पु० व्योम्नोसुन्दर इव आघातहेतुत्वात् । गगनात् अकस्मा

व्योमयान न० ७त० । आकाशगमनयोग्ये वाहने विमाने ।
व्योष न० वि + उष-अच् । शुण्ठीमरिचपिप्पलीरूपे त्रिकटुनि
व्रज गतौ भ्वा० पर० सक० सेट् । व्रजति अव्राजीत् ।
व्रज संस्कारे गतौ च चु० उ०सक०सेट् । 'व्राजयति ते अविव्रजत् त
व्रज पु० व्रज-घञर्थे क । समूहे, गोष्ठे, पथि, मथुरासमीपस्थे देश-
भेदे च ।
व्रजनाथ पु० ६त० । श्रीकृष्णे व्रजपालादयोऽप्यत्र ।
व्रजमोहन पु० व्रजान् व्रजस्थान् मोहयति मुह-णिच्-ल्यु । श्रीकृष्णे ।
व्रजवर पु० व्रजानां वरः प्रार्थनीयः । श्रीकृष्णे ।
व्रजवल्लभ पु० ६त० । श्रीकृष्णे ।
व्रजाङ्गना स्त्री० ६त० । व्रजस्थ स्त्रियां गोप्याम् ।
व्रज्या स्त्री० व्रज-क्यप् । पर्य्यटने, गमने, जिगीर्षोर्युद्धार्थप्रयाणे च
व्रण अङ्क्ष्टे भ्वा० पर० अक०सेट् । व्रणति अव्राणीत् अव्रणीत्
व्रण अङ्क्षतौ अद० चु०उ०सक०सेट् । व्रणयति ते अवव्रणत् त
व्रण पु०न० चु०व्रण-अच् । क्षते ।
व्रणकृत् पु० व्रणं करोति कृ-क्विप् । भल्लातके, व्रणकारके त्रि०
व्रणद्विष् पु० व्रणं द्वेष्टि द्विष-क्विप् । आरग्वधवृक्षायाम् । व्रणघा-
तके त्रि० ।
व्रणारुह पु० व्रणं रुणद्धि रुध-ड । एरण्डवृक्षे । गुडूच्याम् स्त्री० ।
व्रणाग्र पु० व्रणमग्रातीति अग्र-अण् । घोले, गम्भरके वटवृक्षे च
व्रत न० व्रज-घ जस्य तः । भक्ष्यभेदे, पुण्यसाधने उपवासादि नियम-
भेदे च ।
व्रतति(ती) स्त्री० व्रत-अति पृ० वा ङीप् । लतायां विस्तारे च
व्रतसंग्रह ङ० ६त० । व्रतग्रहणार्थं क्रतदीक्षायाम् ।
व्रतादेश पु० ६त० । उपवासादिव्रतोपदेशे ।
व्रतिन् पु० व्रतमस्त्यस्य इनि । व्रतधारके, यजमाने च ।
व्रश्च छेदे तु०प सक० सेट् । व्रश्चति अव्रश्चीत् अव्राक्षीत् ।

व्रश्चन पु० व्रश्च्यतेऽनेन व्रश्च-ल्युट् । (छेत्रि) स्वार्थादिच्छेदनार्थे भावार्थे । भावे ल्युट् । छेदने न० ।

व्रात पु० व्रा-अतच् पृ० । समूहे ।

व्रातीन त्रि० व्रातेन संघेन जीवति । संघजीविनि ।

व्रात्य न० व्रातात् समूहात् चरति यत् । अव्यवस्थायां, संस्कारहीने, जातिमात्रोपजीविनि, 'व्रत जर्ज्ञः त्रयोऽप्येते यथाकालमसंस्कृता । सावित्रीपतिता व्रात्या' इति मनुः ।

व्रात्यस्तोम पु० व्रात्ययोग्यः स्तोमः । यज्ञभेदे ।

व्री वृतौ क्या० पा० पर० सक० अनिट् । विव्रीणाति-व्रीणाति अव्रैषीत् वी गतौ दिवा० आत्म० सक० अनिट् । वीयते अवेष्ट-निष्ठा तस्य नः । वीर्णः ।

व्रीड त्रपे सक० लज्जायाम् अक० दि० आ० सेट् । व्रीडते अव्रीडिष्ट व्रीड पु० व्रीड-घञ् । लज्जायाम् । अ । तत्रैव स्त्री० ।

व्रीण वधे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट् । व्रीणयति ते व्रीणति अविव्रिणत् त अव्रीणीत् ।

व्रीहि पु० व्री-हि किच्च । धान्यभेदे, आशुधान्ये च ।

व्रीहिक त्रि० व्रीहिरस्यस्य ठक् । धान्यवति । इनि व्रीहीत्यप्यत्र

व्रीहिकाञ्चन पु० व्रीहिषु काञ्चनं तद्रूपमस्यस्य अच् । मक्षूरे

व्रीहिपर्णी स्त्री० व्रीहीणामिव पर्णान्यस्याः ङीप् । (शालपान) क्षुपभेदे ।

व्रीहिमय पु० व्रीहिप्रचुरः मयट् । व्रीहिनिर्मिते हविर्द्रव्ये चर्वादौ ।

व्रीहिराजिक पु० व्रीहिषु राजते राज-अच् ततः स्वार्थे ठ । (काङ्गनि) धान्यभेदे ।

व्रुड संवरणे सक० संघाते अक० तु० उ० पर० सेट् । व्रुडति अव्रुडीत् ।

व्रूग्र वधे वा चु० उभ० पक्षे भ्वा० पर० स० सेट् । व्रूग्रयते अवुव्रूग्रत् त व्रूग्रति अव्रूग्रीत् ।

व्रैहेय त्रि० व्रीहीणां भवनं क्षेत्रं ढक् । व्रीहिभवनयोग्ये क्षेत्रे

क्ष्मी शतौ वरणे च क्र्या० पर० सक० अनिट् । क्ष्मीनाति क्ष्मिनाति अक्ष्मीत्सीत् ।

अ

अ न० श्री-ड । अङ्गणे । अङ्गादेवे, अङ्गे च पु० ।
अंयु त्रि० अनक्त्यस्य अस्+युस् । सुभान्विते ।
अंव त्रि० अनक्त्यस्य अस्+व । सुभयुक्ते, सूनृताप्रियौढे वक्ते च पु०
अंवर न० अंहत्योति अस्+ड-अच् । जले ।
अंसा स्त्री० अनस्-अ । वाक्ये, वाक्छाया, प्रशंसायाञ्च ।
अंसित त्रि० अनस-क्त । निन्दिते, क्षिप्ते, कथिते स्तुते च ।
अंस्य त्रि० अनस-ण्यत् । क्षिप्ते, स्तुत्ये वाच्ये, च ।
अक लाभे अक० संग्रवे सक० भ्वा० आ० सेट् कदित् । अकते अकिष्ट ।
अक सामर्थ्ये अक० द्वि० उभ० सेट् । अकयति ते अचाकीत्-अकीत् अकिष्ट । [आदिरित्त्वे तेन अचकदित्येव ।
अक सामर्थ्ये स्वा० प० अक० अनिट् । अक्नोति अचकत्-अकात्सीत् पु-
अक पु० अक-अच् । जातिभेदे, देशभेदे, स्वराज्यावधि वत्सरादारभ्य प्रवर्त्तके नृपभेदे तदीये वत्सरे च । कलियुगे अकवत्सरे युधिष्ठिरः विक्रमादित्यः शालिवाहनश्चेति त्रयोमताः ।
अकट पु० न० अक-अटन् । यानभेदे, असुरविशेषे, स्वल्पार्थे ङीप् । क्षुद्रशकटे स्वार्थे कन् । अकटिका तत्रैव ।
अकटहन् पु० अकटमसुरभेदं हतवान् हन भूते क्विप् श्रीकृष्णे
अकटाक्षा स्त्री० अकटाकारत्वात् तदाक्षा यस्याः । रोहिण्यां नक्षत्रे तस्याः अकटाकारचतुष्कारात्मकत्वेन तथात्वम् । [(आंस) च न० ।
अकल पु० न० अक-कलच् । खण्डे एकभागे, त्वचि वल्कले, अल्पे
अकलिन् पु० अकलं अल्पकलाभिः इनि । अल्पे त्र ।
अकाब्द पु० अकवर्त्तृरूपस्य ब्रह्मणो अब्दः । अकप्रवर्त्तकाब्दपरार्द्धावधि वत्सरे तत्संख्यायाञ्च ।
अकार पु० अक्षरमुख्यताभिमानी देवः तस्य तीर्थं संयुक्तः । योऽयमनुबन्धः

भ्राता राज्ञः श्यालः अकार, इत्वुत्वयोश्चे राज्ञोऽमूढभार्य्याभ्रातरि।
अकारि पु० अकाराणां म्लेच्छजातिभेदानामरिः। विक्रमादित्ये।
अकुन न० अक-उनन्। शुभाशुभसूचकविनिमित्ते-वाक्यस्पन्दनकाकादिदर्शनादौ पक्षिमात्रे, पक्षिभेदे, शब्दे च पु०।
अकुनज्ञ त्रि० अकुनं जानाति ज्ञा-क। निमित्ताभिज्ञे, अज्ञे च स्त्री०।
अकुनि पु० अक-उनि। पक्षिमात्रे, चिल्लपक्षिणि, सुबलराजपुत्रे दुर्य्योधनमातुले च। अत्रामापक्षिणि स्त्री० ङीप्।
अकुनिप्रपा स्त्री० ६त०। पक्षिणां पानीयशालायाम्।
अकुन्त पु० अक-उन्त। पक्षिमात्रे, भाषपक्षिणि, कीटभेदेच।
अकुन्तला स्त्री० अकुन्तैः लायते ला अजर्थे-क। मेनकागर्भजातायां विश्वामित्रसुतायाम् सा च जातमात्रा मातृहृता अकुन्तलाखिता यस्मात् कण्वमुनिना प्रतिपालिता दुष्मन्तश्चेष गान्धर्वविधिना वूढेति भारतम्।
अकुन्तलाङ्गज पु०६त०। भरतनृपे।
अकुन्लि पु० अक-उन्लि। पक्षिमात्रे, भाषपक्षिणि च।
अकुल पु० अक-उलच्। मत्स्यभेदे (शउल)।
अकुलाक्षी पु० अकुलस्याक्षीव अच् समा० ङीप्। गण्डदूर्व्यांम्।
अकुलादनी स्त्री० अकुलैरदाते अद-ल्युट्। (कट्की) शाकभेदे जटामांस्यां, जलपिप्पल्यां,कट फले च। [मत्स्ये।
अकुलार्भक पु० अकुलस्यार्भक इव ह्रस्वत्वात्तदाकारत्वाच्च। (गड्डर)
अकृत स्त्री० अक-ऋतन्। विष्ठायाम्। [ङीप्।
अकृत्करि पु० अकृतं किरति कृ-इन्। गयादीनां वल्ले वल्लायां स्त्री०
अकृद्दार न० ६त०। मलद्वारे अपानस्थाने।
अक्ष(क्ष)र पु०अक-क्षिप् क्ष-अच् कर्म० अक-क्षरप् वा। ह्रस्वे। चतुर्हयाक्षरपादके छन्दोभेदे, नदीभेदे मेखलायां च स्त्री० ङीप्। शर्करीत्यपि चतुर्हयाक्षरपादके छन्दसि।
अक्ष त्रि० अक-क्त। समर्थे।
अक्षति स्त्री० अक-क्तिन्। सामर्थ्ये स्त्रीदेवतायाञ्च। न्यायाद्ह्रस्वत्वम्

जिते शार्यौत्पादनयोगेऽपि धर्म्मभेदे, शब्दनिष्ठे अर्थबोधकताख्ये वृत्तिभेदे अस्त्रभेदे च ।

शक्तिग्रह पु० ६त० । शक्तेः अर्थबोधकताख्यपदत्वज्ञाने ।

शक्तिग्राहक पु० शक्तिं गृह्णाति ग्रह-ण्वुल् । कार्त्तिकेये शक्तिं याचयति बोधयति याच-णिच् ण्वुल् । 'शक्तिग्रहं व्याकरणोपमानात् कोषाप्तवाक्यात् व्यवहारतश्च वाक्यस्य शेषाद्विवृतेर्वदन्ती'त्यादयुक्ते शक्तिबोधके हेतौ ।

शक्तिधर पु० शक्तिं धरति धृ-अच् । कार्त्तिकेये सामधर्म्मधरे त्रि० 'शक्तिधरः कुमारः' इति रघुः शक्तिशब्दादयोऽप्यत्र ।

शक्तिपर्ण पु० शक्तिरिव पर्णं यस्य । सप्तपर्णे ।

शक्तिपाणि पु० शक्तिः पाणौ यस्य । कार्त्तिकेये शक्तिहस्तादयोऽप्यत्र ।

शक्तिहेतिक पु० शक्तिर्हेतिः प्रहरणास्त्रं यस्य कप् । शक्त्या योद्धरि ।

शक्नु पु० श(स)क-नु । (ऋतु) भक्ष्यवादिचूर्णे ।

शक्नुफला(ली) स्त्री० शक्नव इव सक्तूनि फलान्यस्याः वा ङीप् । शमीवृक्षे ।

शक्ति(क्तृ) पु० वशिष्ठसुनेः पुत्रे पराशरस्य पितरि मुनौ ।

शक्नु त्रि० शक-नु । प्रियभाषिणि । [यितुं योग्ये, वाक्ये च ।

शक्य त्रि० शक-यत् । शक्तियुक्ते शक्त्या बोध्येऽर्थे, समर्थनीये, साध-

शक्यतावच्छेदक त्रि० ६त० । शक्यपदार्थस्य धर्म्मो येन धर्म्मेण अर्थस्य शब्दसङ्केतविषयता तस्मिन् धर्म्मे । यया घटशब्दः घटत्ववन्तं पदार्थं बोधयति अतस्तद्धर्म्मो घटत्वं घटशब्दस्य शक्यतावच्छेदकम् ।

शक्र पु० शक-रक् । इन्द्रे, कुटजवृक्षे, अर्जुनवृक्षे, जेष्ठानक्षत्रे, श्येनके च ।

शक्रगोप पु० शक्रं शक्रधनुर्गोपायति समवर्णत्वात् । इन्द्रगोपे ।

शक्रज पु० शक्रात् जायते जन-ड । काके । इन्द्रजन्ये त्रि० शक्रजातादयोऽप्यत्र । [राक्षसे, इन्द्रजेतरि त्रि० ।

शक्रजित् पु० शक्रं जितवान् जि-क्विप् तुक् च । रावणात्मजे मेघनादे

शक्रधनुस् न० ६त० । मेघलाञ्छने शक्रधनुराकारे सूर्य्यकिरणसम्पर्कजे पदार्थभेदे (रामधनुक) ।

शक्रध्वज पु०६त०। भाद्रशुक्लद्वादश्यां पूज्ये इन्द्रदैवते ध्वजाकारे पदार्थे ।

शक्रनन्दन पु० ६त० । अर्জ্জুने । इन्द्रानन्दके त्रि० ।

शक्रपर्य्याय पु० शक्रस्य पर्य्यायो नाम नाम यस्य शाक० । कुटजवृक्षे ६त० । इन्द्रस्य वाचकशब्दे ।

शक्रपादप पु० ६त० । देवदारुवृक्षे । [तरौ ।

शक्रपुष्पी स्त्री० शक्रस्येव पुष्पमस्याः ङीप् । अग्निशिखावृक्षे स्वार्थे कन् ।

शक्रभवन न०६त० । स्वर्गे । शक्राद्यावासादयोऽस्यत्व ।

शक्रभूभवा स्त्री० शक्रस्वरूपभुवि भवति भू-अच् । इन्द्रवारुण्याम् ।

शक्रमात्र स्त्री० शक्रस्य मातेव । भार्य्यायाम् । ६त० । इन्द्रजनन्याम् ।

शक्रमूर्द्धन् पु० शक्रस्येव शिखावान् मूर्द्धा यस्य । वल्मीके । ६त० । इन्द्रमस्तके शक्रशिर आद्यर्थोऽस्यत्व ।

शक्रवल्ली स्त्री० शक्रप्रिया वल्ली । इन्द्रवारुण्याम् । [योऽस्यत्व

शक्रवाहन पु० शक्रं वाहयति वह णिच्-ल्यु । मेघे इन्द्रवाहनाद-

शक्रवीज न० शक्रस्य कुटजस्य वीजम् । इन्द्रयवे ।

शक्रशाखिन् पु० शक्रनामकः शाखी । कुटजवृक्षे ।

शक्रसारथि पु० ६त० । इन्द्रसारथौ मातलौ ।

शक्रसुत पु० शक्रस्य सुतः । वालिनामके वानरराजे ।

शक्रसुधा स्त्री० शक्रस्य सुधेव । पालङ्क्याम् ।

शक्रसृष्टा स्त्री० ६त० । हरीतक्याम् ।

शक्राख्य पु० शक्रस्येवाख्या यस्य । मेचके । [त्याम्

शक्राणी स्त्री० शक्रस्य पत्नी ङीप आनुक् च । पुलोमजायामिन्द्रप-

शक्राशन न० शक्रेणाश्यते अश-ल्युट् । भङ्गायाम् ।

शक्राशन पु० शक्रं तन्नामाश्नुते अश-ल्यु । कुटजवृक्षे ।

शक्रोत्थान न० शक्रस्य तद्ध्वजस्य उत्थानम् । शक्रध्वजस्योत्थाने, तदुपलक्षिते उत्सवे च । ६त० शक्रोत्सवोऽस्यत्व ।

शङ्कर पु० शं करोति कृ-अच्। महादेवे कल्याणकरे त्रि०। शिवपत्न्यां स्त्री० ङीप्। [कर्पूरे।

शङ्करावास पु० ६त०। कैलासाचले शङ्करस्यावास इव शुभ्रत्वात्।

शङ्का स्त्री० शकि-अ। त्रासे, वितर्के, संशये च।

शङ्कित त्रि० शङ्का जातास्य तारं० इतच्। भीते संदिग्धे वितर्किते च।

शङ्कु पु० शकि-उण्। स्थाणौ, मत्स्यभेदे, शल्यास्त्रे, कीलके, दश-कोटिसंख्यायां, तत्संख्याते, महादेवे, कलुषे, पक्षिराजाले, मेढ्रे, नखीनामद्रव्ये, छायापरिमाणार्थे काष्ठादिनिर्मिते, 'अर्का-ङ्गुला तु खड्यपा काष्ठाद्यङ्गुलमूलिका। शङ्कुसंज्ञा भवेदित्युक्ते कीलभेदे च।

शङ्कुकर्ण पु० शङ्कुरिव कर्णोऽस्य। गर्दभे।

शङ्कुतरु पु० शङ्कुयोग्यस्तरुः। सालवृक्षे शङ्कुवृक्षादयोऽप्यत्र।

शङ्कुला स्त्री० शकि-उलच्। उत्पलपत्रिकायाम् पुनर्भवदेशास्त्रभेदे (जांति) शङ्कुलाखण्ड इति सिद्धान्तकौमुदी।

शङ्ख पु० न० शम-ख। खनामख्याते समुद्रजाते पदार्थे, ललाटास्थ्नि, निधिभेदे, नखीनामगन्धद्रव्ये, कर्णसमीपस्थे-अस्थ्नागभेदे, कृ-त्रिदन्तमध्ये, दशनिखर्वसंख्यायां, तत्संख्याते च।

शङ्खक न० शङ्खस्य विकारः वुन्। शङ्खजाते वलयाकारे पदार्थे।

शङ्खकार पु० शङ्खं तद्विकारं वलयाकारं पदार्थं करोति कृ-अण्। वर्णसङ्करजातिभेदे (शाँखारी)

शङ्खचूर्ण न० ६त०। शङ्खजाते चूर्णे।

शङ्खद्राविन् पु० शङ्खं द्रावयति द्रु-णिच्-णिनि। अम्लवेतसे।

शङ्खधरा स्त्री० ष्ट-अच् ६त०। छिल्लमोचिकायाम्।

शङ्खध्मा पु० शङ्खं धमति ध्मा-क। शङ्खवादके। किप्। शङ्खाध्मा इत्यपि। [तत्र ङीप्

शङ्खनख पु० शङ्खस्य नख इव। क्षुद्रशङ्खे (जोङ्ड़ा) स्त्रीत्वमपि शङ्खपुष्पी स्त्री० शङ्ख इव पुष्पमस्याः ङीप्। (शङ्खाली) वृक्षे।

अङ्गभृत् पु० अङ्गं बिभर्त्ति भृ-क्विप् तुक् च । विष्णौ ।
अङ्गमुख पु० अङ्ग इव मुखमस्य । कुम्भीरे ।
अङ्गिका स्त्री० अङ्गोऽस्त्यस्याः ठन् । (चोरकाचका) क्षुपभेदे ।
अङ्गिन् पु० अङ्ग+अस्त्यर्थे इनि । विष्णौ, सप्तदे च ।
अङ्गिनी स्त्री० अङ्गोऽस्त्यस्याः इनि । चोरपुष्पाम्, श्वेतचुकायां, यवतिक्तायां, स्त्रीभेदे, उपदेवताभेदे, (शाकचिञ्ची) अङ्गवत्यां स्त्रियाञ्च ।
अङ्गिनीफल पु० अङ्गिन्या इव फलमस्य । शिरीषवृक्षे ।
अङ्गिनीवास पु० ६त० । शाखोटकवृक्षे ।
अच मतौ भ्वा० आ०स०सेट् इदित् । अञ्चते, अञ्चिष्ट ।
अच वाचि भ्वा० आ० सक० सेट् । अचते अञ्चिष्ट ।
अचि (ची) स्त्री० अच-इन् वा ङीप् । इन्द्रपत्न्याम् ।
अचीपति पु० ६त० । इन्द्रे । अचीभर्त्रादयोऽप्यत्र ।
अट (ठ) स्वाधायां चु० आ० अक० सेट् । अटाट(ठ)यते अजीघटत(ठ)त ।
अट आदे गतौ भेदे च भ्वा० पर० सक० रोगे अक० सेट् । अटति । अटाटीत्-अटीत् ।
अट पु० अटति रुजति अट-अच् । अश्वे, सिंहकेशरे, जटायाञ्च स्त्री० ।
अटि (टी) स्त्री० अट-इन् वा ङीप् । (वन आदा) खनामख्याते ओषधिभेदे । [अशठीत्
अठ बधे सक० कैतवे क्लेशे च अक० भ्वा० पर० सेट् । अठति अशाठीत्
अठ आलस्ये चु० पर० अक० सेट् । आठठति ते अजीघठत् त
अठ दुष्टवचने अद० चु० उभ० सक० सेट् । अठयति ते अजघठत् त
अठ न० अठ-अच् । तगरे, कुङ्कुमे, लौहे च । धूलूरे, मध्यस्थपुरुषे च पु० । धूर्त्ते त्रि० ।
अठता स्त्री० अठस्य भावः तल् । शाठ्ये वञ्चनायाञ्च ।
अम्बा स्त्री०अठ-अच् अबि-अच् कर्म्म० सक० । अम्बष्ठायाम् ।
अड संघाते रोगे च अक० भ्वा० प०सेट् इदित् । अण्डति अडिण्डीत् ।
अण दाने भ्वा० पर० सक० सेट् । अणति अणीत् अणीत्

शण पु० शण अच् । खनामख्याते क्षुपभेदे । [रज्जवादि फले ।
शणवल्लिका स्त्री० शणस्य वल्लिरिव वल्लिरस्याः कन् । शणपुष्पजाते वल्ली
शणपर्णी स्त्री० शणस्येव पर्णान्यस्याः ङीप् । अजमोदायाम् ।
शणपुष्पी स्त्री० शणस्येव पुष्पमस्याः ङीप् (झनझने) वनशणे स्वार्थे कन् । तत्रैव ।
शणसूत्र न० शणाज्जातं सूत्रम् । शणजाते जाले ।
शणालुक पु० शण इव दलमस्य कः । आरेवतवृक्षे (शोणालु)
शणिका स्त्री० शणस्तृणपुष्पमस्त्यस्याः ठन् । शणपुष्पायाम् ।
शण्ड न० शडि अच् । पद्मादिसमूहे, नपुंसके, दृष्टे च ।
शण्डिल पु० शडि इलच् । शाण्डिल्यस्य पितरि मुनिभेदे ।
शण्ढ पु० शण-ढ तस्य नेत्वम् । अन्तःपुररक्षके क्लीवे ।
शत न० शो-डतच् । खनामख्यातसंख्यायाम्, तत्संख्याते वस्तुसंख्यायां च । स्वार्थे कन् । तत्रैव न० ।
शतक त्रि० शतं परिमाणमस्य कन् । शतसंख्यायुक्ते ।
शतकुम्भ पु० शतं कुम्भा यत्र । स्वर्णखनिपर्व्वतभेदे ।
शतकोटि पु० शतं कोटयोऽग्राणि यस्य । वज्रे शतगुणिता कोटिः शाक० । शतगुणितकोटिसंख्यायां स्त्री० ।
शतक्रतु पु० शतं क्रतवोऽस्य । इन्द्रे ।
शतग्रन्थि स्त्री० शतं ग्रन्थयोऽस्य । दूर्व्वायाम् ।
शतघ्नी स्त्री० शतं हन्ति हन-टक् । अस्त्रभेदे, दृष्टिकाख्यां, करञ्जे च
शततम त्रि० शतस्य पूरणः तमप् । शतसंख्यापूरणे ।
शततारा स्त्री० शतभिषक् तारा शाक० । शतभिषानक्षत्रे ।
शतदन्तिका स्त्री० शतं दन्ता इव दन्त्यस्य ठन् । नागदन्त्याम् ।
शतद्रु पु० शतधा द्रवति कु-द्रु-नि० । नदीभेदे । [तप्रकारे अव्य० ।
शतधा स्त्री० शतं ग्रन्थीन् धत्ते धा-क । दूर्व्वायाम् । शत+धाच् । अ०
शतधामन् पु० शतं धामानि यस्य । विष्णौ ।
शतधार पु० शतं धारा अग्राणि यस्य । वज्रे शतधारायुक्ते त्रि० ।
'यस्योः पवित्रमसि शतधारमि'ति श्रुतिः ।

शतधृति पु० शतं धृतयोऽस्य । इन्द्रे, ब्रह्मणि स्वर्गे च ।
शतपत्र न० शतं पत्राणि पत्राकारोऽस्य । पद्मे ।
शतपत्री स्त्री० शतं पत्राणि दलान्यस्याः ङीप् । (सेओती) पुष्पदन्त-भेदे स्वार्थे कन् । तत्रैव । [कल्पान्यभेदे ।
शतपथ पु० शतं पन्थानो यत्र अच् समा० । यजुर्वेदीयब्राह्मणात्मक-
शतपथिक त्रि० शतपथं वेत्त्यधीते वा ठक् । शतपथब्राह्मणात्मकग्रन्था-ध्यायिनि ।
शतपद न० शतं पदानि यत्र । ज्योतिषोक्ते नक्षत्रपादानुसारेण नाम-करणोपयोगिप्रथमवर्णसूचके चक्रभेदे । शतं पादाः यस्याः प्रा-दुर्भावः समा० ङीपि पद्भावः । कीटभेदे (काण्डार) स्त्री० ।
शतपद्म न० शतदलयुक्तं पद्मम् । शतदलकमले, श्वेतपद्मे च ।
शतपर्व्वन् पु० शतं पर्वाणि ग्रन्थयोऽस्य । वंशे, इक्षुभेदे च कटुकायां वचायां दूर्वायां च स्त्री० । कन् । तालु, यवे च ।
शतपाद् स्त्री० शतं पादा अस्याः पद्भावः । कीटभेदे (काण्डार)
शतपादिका स्त्री० शतं पादा मूलानयस्याः । काकोल्याम् ।
शतपुष्पा स्त्री० शतं पुष्पाणि यस्याः । (सुल्फा) शाकभेदे (सौरी) क्षुपभेदे च । कन् । तत्रैव ।
शतप्रसूना स्त्री० शतं प्रसूनानि यस्याः । (सुल्फा) शाके ।
शतप्रास पु० शतं प्रासा इव फलानि यस्य । करवीरवृक्षे ।
शतभिषज् स्त्री० शतं भिषज इव तारकाः यत्र । शततारात्मके अश्वि-न्यादिषु चतुर्विंशे नक्षत्रे । शतभिषाप्यत्र स्त्री० ।
शतभीरु स्त्री० शतं बहवो वियोगिनो भीरवो यस्याः पृ० । मल्लिकाया-म् तद्दर्शने हि वियोगिनां कामोद्दीपनात् ततो भीरुत्वम् ।
शतमख पु० शतं मखा यज्ञा यस्य । इन्द्रे ।
शतमन्यु पु० शतं मन्यवो यज्ञा यस्य, यते दैत्येषु मन्युः क्रोधो वा यस्य । इन्द्रे ।
शतमान पु० न० शतेन मीयते मि-ल्युट् । पले, तत्परिमिते च ।
शतमारिन् पु० शतं मारयति मृ-णिच् णिनि । वैद्ये, वशिष्ठचिकित्सके ।

शतमुखी पु० शतं मुखानि यस्याः ङीप् । संमार्जन्याम् । शतमुख-वृक्षे त्रि० । [शतायाञ्च ।

शतमूली । स्त्री० शतं मूलान्यस्याः ङीप् । दूर्वायां, खनामख्यातायां

शतयष्टिका पु० शतं यष्टयो गुच्छा यस्य । शतगुच्छके हारभेदे ।

शतरुद्रीय न० शतं रुद्रा देवता यस्य । यजुर्वेदोक्ते रुद्राध्याये ।

शतरूपा स्त्री० शतं रूपाण्यस्याः । ब्रह्मणः पत्न्याम् ।

शतवीर्य्या स्त्री० शतं वीर्य्याणि यस्याः ५ब० । श्वेतदूर्वायाम् ।

शतवेधिन् पु० शतं विध्यति विध-णिनि । अस्त्रभेदे ।

शतसहस्र न० शतगुणितं सहस्रम् । मध्य० । लक्षसङ्ख्यायाम् ।

शतसाहस्र त्रि० शतं सहस्राणि परिमाणमस्य अण् उत्तरपदवृद्धिः । लक्षसंख्याते ।

शतह्रदा स्त्री० शतं ह्रादाः शब्दा यस्याः पृ० ह्रस्वः । विद्युति ।

शताक्षी स्त्री० शतमक्षीणीव पुष्पाण्यस्याः अच् समा० ङीष् । शतपुष्पायाम् दूर्वायाञ्च ।

शताङ्ग पु० शतमङ्गान्यवयवा यस्य । रथे, तिनिशवृक्षे च ।

शतानन्द पु० शतमानन्दयति अण् । गोतमपुत्रे अहल्यागर्भजे मुनिभेदे । शतजनानन्दके त्रि० ।

शतानीक पु०शतमनीकानि यस्य । व्यासशिष्ये मुनिभेदे । शतमेव शतिकं स्वार्थे कन् । शतसंख्यके त्रि० ।

शतार न०शतमाराग्रमस्य । वज्रे । [पुरुष" इति स्मृतेः ।

शतायुस् त्रि० शतमायुर्वर्षकालोऽस्य । शतवर्षमितवयस्के 'शतायुर्वै

शतावरी स्त्री० शतमाढ्यति आ+ढ अच् गौ० ङीष् । शतमूल्याम् इन्द्रभार्य्यायाम् ।

शतावर्त्त पु० शतमावर्त्ता यस्य । विष्णौ शतधा वर्त्तते णिनि । तत्रैव ।

शताह्वा स्त्री० शतं शतमूली शतपुष्पा वेति आह्वा यस्याः उत्तरलोपः । शतमूल्यां, शतपुष्पायाञ्च ।

शतिक त्रि० शतेन क्रीतः ठन् । शतेन क्रीते पदार्थे ।

शत्य त्रि० शतेन क्रीतः यत् । शतसंख्यातद्रव्येण क्रीते ।

अक्षु पु० अद-क्षुन्। दिवौ, राज्ञां विषयानन्तरस्थे नृपे, ज्योति षोक्तौ लग्नावधि षष्ठस्थाने, कामादिषु च। ज्ञातवे त्रि०

अक्षुण्ण पु० अक्षून् हन्ति हन-क। दशरथात्मजे सुमित्रागर्भजे लक्ष्मणभ्रातृजे।

अद्द याचने भ्वा० परः सक० अनिट्। याचते अयाचत्। यत्स्यति

अद्द गतौ भ्वा० परः सक० अनिट् याचते अयात्सीत्।

अनकावलि (ली) स्त्री० अनैः कावति कै-क पृ० तेषामावलिर्यत्र वा ङीप् गजपिप्पल्याम्।

अनपर्णी स्त्री० अणस्येव पर्णान्यस्याः पृ० बहु० नः। कटुक्याम्

अनि पु० शो-अनि किच्च। सूर्यपुत्रे छायागर्भजाते षष्ठभेदे, तत्स्वामिकदिने च।

अनिवार पु० अनिस्वामिको वारः। सूर्यादिवारमध्ये सप्तमे वारे

अनैश्चर पु० अनैश्चरति चर अच्। अनिषष्ठे तस्य षष्ठाणां मध्ये सर्वोपरिकक्षास्थितत्वात् वक्रकालेनैकैकराशिभोगात् क्षुद्रगतित्वम्।

अनैस् अव्य० अण डैसि पृ० नुक् च। मन्दे, अशैघ्र्ये च।

अन्स हिंसायां स्तुतौ कथने च भ्वा० परः सक० सेट्। ङा वेट्। अंसति अंसीत्।

अप आक्रोशे वा भ्वा० पक्षे दिवा० उभः सक० अनिट्। अपति ते अप्यति ते अपाप्सीत्।

अपथ पु० अप-अथन्। सत्यताकरणाय दिव्यभेद करणे यथा। एतत् यदि मिथ्या स्यात् तदा मे एतदनिष्टं स्यादित्यादि

अपन पु० अप-ल्युट्। अपथे।

अप्त त्रि० अप-क्त। अभिशापयुक्ते। उलपाक्षे वृक्षभेदे पु०।

अफ न० अम-अच् पृ० बहु० फः। गयादीनां खुरे, इक्षुमूले च।

अफर पु० स्त्री० अफं राति रा-क।(घुंटी)मत्स्यभेदे स्त्रीत्व पक्षे ङीप्।

अब्द शब्दकरणे अ०चु० उभ० सक० सेट्। अब्दयति ते अयअब्दत् त

अब्द पु०अब्द-घञ्। ध्वन्यात्मके, वर्णात्मके च श्रोत्रेन्द्रियग्राह्ये आकाशादिस्थे गुणभेदे।

शब्दग्रह पु० शब्दं गृह्णाति ग्रह–अच्। श्रोत्रेन्द्रिये अजर्थे च ६त०। शब्दज्ञाने। [शब्दब्रह्मे ब्रह्मणि।

शब्दब्रह्मन् न० शब्दात्मकं ब्रह्म। वेदात्मके, स्फोटात्मके च लिङ्गे

शब्दभेदिन् पु० शब्दानुसारेण भिनत्ति लक्ष्यम् भिद–णिनि। बाणभेदे।

शब्दवेधिन् पु० शब्दानुसारेण विध्यति लक्ष्यं विध–णिनि। बाणभेदे, अर्জ্জুने च। [दक्षिस्कन्धे शाकपर्णे।

शब्दशक्ति स्त्री० ६त०। शब्दानामर्थाबोधकतारूपे अभिधालक्षणादौ

शब्दानुशासन न० अनुशिष्यतेऽनेन अनु+शास–ल्युट् ६त०। शब्द-साधुताज्ञापके व्याकरणे। [शादौ अलङ्कारे।

शब्दालङ्कार पु० शब्दमात्रलक्षोऽलङ्कारः। अलङ्कारशास्त्रप्रसिद्धेऽनुप्रा-

शब्दित त्रि० शब्द–क्त। आहूते।

शम शान्तौ अक० शान्तीकरणे सक० दि० शमा० पर० सेट्। शाम्यति अशमत्–अशमीत्। ङ्ला वेट्।

शम आलोचने चु०उ०सक० सेट्। शामयति–शमयति ते अशीशमत्–त

शम पु० शम–घञ्। शान्तौ अन्तरिन्द्रियदमने।

शमथ पु० शम–अथन्। शान्तौ।

शमन पु० शमयति शम–णिच्–ल्यु। लोकानां पुण्यापुण्यफलदाष्ट-त्वेन दण्डकारके यमे। शम–णिच्–भावे ल्युट्। शान्तीकरणे न०।

शमनस्वसृ स्त्री० ६त०। यमुनायाम्।

शमल न० शम–कलच्। विष्ठायाम्।

शमि(मी)स्त्री० शम–इन् वा ङीप्। (शांइ)वृक्षभेदे (शुंटि)शिम्बायाञ्च।

शमिन् त्रि० शाम्यति शम–णिनि। शान्ते।

शमीक पु० शम–ईकक्। मुनिभेदे।

शमीगर्भ पु० शमीगर्भ आधारत्वेनास्त्यस्य अच्। वह्नौ, विप्रे च

शमीधान्य न०शमी शिम्बैव धान्यम्। शिम्बात्मके मासकुलादौ धान्ये।

शमीपत्री स्त्री० शम्या इव पत्राण्यस्याः ङीप्। कण्डालुवृक्षे

शमीर पु० अल्पा शमी अल्पे र'कश्चित् स्वार्थिको अपि प्रत्ययाः प्र-कृतितो विलक्षणवचनान्यतिवर्त्तन्ते' इति भाष्योक्तेः पु०क्लम्। क्षुद्रायां स्त्र्यम्।

अम्बा स्त्री० अं पाति पा+क। विद्युति।

अम्बाक पु० अं शिवं बाकं यस्मै यस्य। आरग्वधे।

अम्ब गतौ भ्वा० सक० सेट्। अम्बति अजम्बीत्।

अम्ब पु० अम्ब अच्। यज्ञे सूपलाघस्थितलौहे लौहकाञ्चाम्।
अनुलोमकर्षणे, हरिद्रे च।

अम्बर न० अम्ब-अरन्। जले धने, व्रते, चिते च। रक्षभेदे दैत्य-
भेदे, मत्स्यभेदे, पर्व्वतभेदे, युद्धे, चित्रकद्दचे, लोध्रे, अर्ज्जुनवृक्षे
च पु०। श्रेष्ठे त्रि०

अम्बरकन्द पु० अम्बरः श्रेष्ठः कन्दो यस्य। वाराहीकन्दे।

अम्बरचन्दन न० ६त०। अम्बरपर्व्वतजाते चन्दनभेदे।

अम्बरमूदन पु० अम्बरमसुरं स्रदयति छिनत्ति चु०स्रद-ल्यु। कामदेवे।

अम्बरारि पु० ६त०। कामदेवे अम्बररिपादयोऽप्यत्र।

अम्बरी स्त्री० अम्बरं जलं बाह्लल्येनास्त्यस्य अच् गौरा० ङीष्। आखु-
पर्ण्यां।

अम्बल पु०न० अम्ब-कलच्। कूले, पाथेये, मत्स्यरे च।

अम्बाक्रत त्रि० अम्बं क्रतमनुलोममालभ्यते अम्ब+कर्षणार्थे डाच्+क्र-
क्त। अनुलोमेन हिरादृते क्रष्टे क्षेत्रे।

अम्बु (म्बू) पु०स्त्री० अम्ब-उन् बू वा। जलमुस्तौ (शासुक) गजकु-
म्भान्तभागे च। रामायणप्रसिद्धे शूद्रतापसे, यज्ञे दैत्यभेदे च पु०।

अम्भ त्रि० अम्भस्त्रस्य अम्+भ। कलप्राणयुक्ते।

अम्भल पु० अम्भं कलप्राणदायकं तीर्थं लाति-ला क। ग्रामभेदे यत्र
कल्की भविष्यति तस्मिन्। कुट्टिन्यां स्त्री० गौरा० ङीष्

अम्भु पु० अम्+भू-डु। महादेवे।

अम्भुतनय पु० ६त०। गणेशे, कार्त्तिकेये च अम्भुसुतादयोऽप्यत्र

अम्भुप्रिया स्त्री० ६त०। आमलक्यां दुर्गायाञ्च।

अम्भुवल्लभ न० ६त०। श्वेतपद्मे। महादेवप्रिये त्रि०।

अम्या स्त्री० अम-यत् टाप्। युगकीलके।

शय पु॰ शी-अच्। कृष्णे, सर्पे, निद्रायां, शय्यायां, पर्णे च।
शयथ पु॰ शी-अथच्। अजगरसर्पे, क्लीबे, वराहे, वृक्षे च निद्रालौल्ये त्रि॰।
शयनी न॰ शी-ल्युट्। निद्रायाम् शय्यायां, मैथुने च।
शयनीय न॰ शी-अनीयर्। शय्यायाम् स्वार्थे कन्। तत्रैव।
शयनैकादशी स्त्री॰ ६त॰। आषाढशुक्लैकादश्याम्।
शयालु त्रि॰ शी-आलुच्। निद्रालौल्ये। अजगरे, कुक्कुरे च पु॰।
शयित त्रि॰ शी कर्त्तरि क्त। निद्रिते। भावे-क्त। निद्रायां न॰
शयु पु॰ शी-उ। अजगरे सर्पे। उनन्। शयुनोऽप्यत्र।
शय्या स्त्री॰ शी-क्यप्। खट्टायाम्। [च पु॰।
शर न॰ शृ-अच्। जले। बाणे दधिदुग्धाद्यसारे, दृढसाधने तृणभेदे
शरकाण्ड पु॰ ६त॰। शरसमूहे, तन्निर्मितकबाणे च।
शरज न॰ शरात् दधिदुग्धसारात् जायते जन-ड। नैयङ्घृते। शरवणे-जाते कार्त्तिकेये पु॰।
शरजन्मन् पु॰ शरवणे जन्म यस्य। कार्त्तिकेये।
शरट पु॰ शृ-अटन्। कर्कलासे, कुलुम्भाके च।
शरण न॰ शृ-ल्युट्। गृहे, रक्षके, रक्षणे, बधे, घातके च प्रसारण्या स्त्री॰ टाप्।
शरणागत त्रि॰ शरणमागतः आ+गम-क्त। शरणापन्ने।
शरणापन्न त्रि॰ शरणमापन्नः आ+पद-क्त। शरणमागते।
शरणार्थिन् त्रि॰ शरणमर्थयते अर्थ-णिनि। शरणकामे।
शृ(स)रणि(णी) स्त्री॰ शृ(सृ)-अनि वा ङीप्। पथि, ङीबन्तस्तु जयन्त्याञ्च।
शरण्य त्रि॰ शरणाय साधुः यत्। शरणागतत्राणकरणयोग्ये।
शरत्काशिन् पु॰ शरदि काशयते कस णिनि। कुक्कुरे।
शरत्पद्म न॰ शरदिव शुभ्रं पद्मम्। श्वेतपद्मे।
शरत्पर्व्वन् न॰ ७त॰। कोजागरपूर्णिमानिमित्तोत्सवे।
शरद् स्त्री॰ शृ-अदि। वत्सरे, आश्विनकार्त्तिकमासात्मके ऋतौ च

अरधि पु० अरा धीयन्तेऽत्र धा-कि । तूणे ।
अरपुङ्खा स्त्री० अरस्येव पुङ्खा यस्य । नीलीवृक्षाकृतौ कार्पासपुष्पवृक्षे ।
अरभ पु० ऋ-अभच् । 'अष्टपादोर्ध्वनयन अर्द्धपादचतुष्टय' इत्युक्तलक्षणे मृगभेदे, करभे, वानरभेदे, उष्ट्रे च ।
अरभू पु० अर अरवणे भवति भू-क्विप् । कार्त्तिकेये ।
अरमय त्रि० अरस्य विकारः मयट् । अरजाते पदार्थे ।
अ(स)रयु(यू) स्त्री० ऋ(सृ)-अयु वा ऊङ् । अयोध्यानिम्नवाहिन्यां नद्याम् । [वृक्षभेदे च ।
अ(स)रल त्रि० ऋ(सृ)-अलच् । ऋजौ, अकुटिलचित्ते (अरल)
अरवणोद्भव पु० अरवणे उद्भवः उत्पत्तिस्थानमस्य । कार्त्तिकेये
अरत्र न० अरवे वाणशिक्षायै हितं अर+यत् । लक्ष्ये, अरेण वेधनायोद्देश्ये ।
अराटि(डि)(लि) स्त्री० अरमनुलक्ष्य अटति अट-इन् पृ० टस्य ड ल वा । (अराल) पक्षिभेदे ।
अराभ्यास पु० ६त० । बाणमोचनशिक्षायाम् ।
अरारु त्रि० ऋ-आरु । क्षिप्ते । [धनुषि ।
अरारोप पु० अराः आरोप्यन्तेऽत्र आ+रुह-णिच घञ् च अच् ।
अराव पु० अरं दध्यादिसारमवति अव-अण् । मण्डमये पात्रभेदे, (अरा) कुडवद्वयपरिमाणे च ।
अरावती स्त्री० अराः सन्त्यस्याम् मतुप् मस्य वः पूर्व्वो दीर्घश्च । नदीभेदे
अराश्रय पु० ६त० । तूणे ।
अरासन पु० अराः अस्यन्तेऽनेन अस ल्युट् । धनुषि अराणामासनम् । तूणे ।
अरी स्त्री० ऋ्यते ऋ-ई । एरकातृणे ।
अरीर न० ऋ-ईरन् । प्रतिकर्षं क्रोधमाधे देहे ।
अरीरक पु० अरीरं कायति आत्मत्वेनाभिमन्यते कै-क । जीवे । स्वार्थे वुन् । अरीरकोऽप्यत्र ।
अरीरज पु० अरीरात् जायते जन-ड । रोगे देहजातमात्रे त्रि०

शरीरावरण न० शरीरमावृणोति आ+वृ-युच्। देहव्यापिनि चर्मणे। देहावरके त्रि० ल्युट्। देहाच्छादने न०

शरीरिन् पु० शरीरमात्माभिमानास्पदत्वेनास्त्यस्य इनि। जीवे

शरु पु० शॄ-उन्। क्रोधे, वज्रे, बाणे, आयुधे च।

शरेष्ट पु० शृणाति कामिनं शॄ-अच् शरः कामः तस्य इष्टइव-क्त। आम्रे।

शर्करक पु० शर्करायाः रसः इव इदृग्भावः शर्करः रस इव दायति मधुरत्वात् कै-क। मधुरजम्बीरे।

शर्करजा स्त्री० शर्करात् जायते जन-ड। सितायां खण्डे।

शर्करा स्त्री० शॄ करन् कस्य नेत्त्वम्। खण्डविकारे (चिनि) उपलखण्डे, कर्परखण्डे च। शर्करा अस्त्यस्य मतुप् तस्य लुक्। शर्करावति देशे, रोगभेदे, शकले च।

शर्करांचल पु० दानार्थं कल्पिते शर्करामये पर्व्वते।

शर्कराधनु स्त्री० दानार्थं कल्पिते शर्करामये धेन्वाकारे स्तूपे

शर्करावत् त्रि० शर्कराः सन्त्यस्मिन् मतुप् मस्य वः। शर्करायुक्तदेशे

शर्करिक त्रि० शर्कराः सन्त्यस्य ठक्। शर्करायुक्तदेशे इलच्। तत्रैव

शर्द्ध पु० शृद्ध-घञ्। अपानवायूत्सर्गे। लुट्। तत्रैव न०।

शर्द्धस्रहा पु० शर्द्धमपानवायूत्सर्गं जहाति हा-ख सुट्मुच्। माषे

शर्व हिंसायां गतौ च भ्वा०प०स०सेट्। शर्वति अशर्वीत्।

शर्मद त्रि० शर्म ददाति दा-क। सुखदायके। विष्णौ पु०।

शर्मन् शॄ-मनिन्। सुखे, तद्वति त्रि० ब्राह्मणोपाधौ पु०।

शर्मरा स्त्री० शर्म-राति रा-क। दारुहरिद्रायाम्। सुखदायके त्रि०

शर्य्याति पु० वैवस्वतमनोः पुत्रभेदे।

शर्व्व हिंसे भ्वा० पर० सक० सेट्। शर्वति अशर्वीत्।

शर्व्व पु० शर्व-अच्। महादेवे।

शर्व्वर पु० शर्व-अरन्। कामदेवे तमसि न०। सन्ध्यायां च

शर्व्वरी स्त्री० श-वनिप् ङीप् वनो र च। रात्रौ हरिद्रायां,

शर्व्वाला स्त्री० शर्व-घञ् तं शर्वं लाति ला-क। तोमरास्त्रे

शल्यांगी स्त्री० शल्यस्य पत्नी ङीप् आनुक् च । भवान्याम्
शल चालने भ्वा०आ०सक०सेट् । शलते अशलिष्ट ।
शल गतौ भ्वा० पर० सक० सेट् उवलादि० । शलति अशालीत्
शल श्लाघायां चु० आ०सक०सेट् । शालयते अशीशलत ।
शल क्षेपे भ्वा० पर० सक० सेट् । शलति अशालीत् ।
शल न० शल-अच् । शल्लकीलोम्नि (साजारुकांटा)
शलभ पु० शल अभच् । कीटभेदे पतङ्गे ।
शलल न० स्त्री० शल-कलच् । शल्लकीलोम्नि (साजारुकांटा) स्त्रीत्वे गौ० ङीष् ।
शलाका स्त्री० शल-आकन् । शल्ये, मदनवृक्षे (मयना) शारिकायां, शल्लक्याम्, शरे, आलेख्यतूलिकायां, अस्थि च ।
शलाकापरि अव्य० अव्ययी० शलाकासाधनक्रीड़ायां पराजये
शलाटु त्रि० शल-आटु । अपक्वफले मूलभेदे । बिल्वे च पु० ।
शलालु पु० शल आलुच् । सुगन्धिद्रव्यभेदे ।
शलालुक त्रि० शलालुना क्रीतं कन् । शलालुद्रव्येण क्रीते पदार्थे
शल्क न० शल क कस्य नेत्वम् । खण्डे, वृक्षवल्कले, मत्स्यत्वचि च (आंस) ।
शल्कल न० शल कलन् कस्य नेत्वम् । मत्स्यत्वल्कले, वृक्ष त्वचि च
शल्कलिन् पु० शल्कलमस्त्यस्य इनि । मत्स्ये ।
शल्किन् पु० शल्कमस्त्यस्य इनि । मत्स्ये ।
शल्भ प्रशंसायां भ्वा०आ०सक०सेट् । शल्भते अशल्भिष्ट ।
शा(शा)ल्मलि पु० शल-मलच् स्वार्थे इञ् इञ्या । शाल्मलिवृक्षे (शिमूल) ।
शाल्मलि स्त्री० शल-मलिन् स्वार्थे इञ् वा ङीप् । (शिमूल) वृक्षे
शलाट्र न० शल-यत् । बाणे, तोमरे, क्षेडे, वंशकविकायां कीलके च
शलाक पु० शल्यवृक्ष कायति कै-क । मदनवृक्षे (मयना)
शल्यलोमन् न० शल्यमिव लोम । शल्लकीलोम्नि ।
शल्ल गतौ भ्वा० पर०सक०सेट् । शल्लति अशल्लीत् ।

अश्व न० अश्व-अच्। त्वचि, भेके पु०। स्वार्थे कन् त्वचि न० अश्वटत्वे पु०। (सजारु) पक्षिभेदे स्त्री० गौ० ङीष्।

अश्वकद्रव पु० अश्वकोद्रव इव स्वादुः। चिक्कणे।

अश्वत्थ अश्व-थ। शालूदेशे।

अश्व विकारे गतौ च भ्वा०पर० सक०सेट्। अश्वति-अश्वीत्-अश्वीत्

अश्व पु० न०। अश्व-अच्। मृतदेहे गतप्राणे देहे। जले न०।

अश्वकाम्य पु० अयं काम्यति अश्व+काम्यच्। कुक्कुरे।

अश्वयान न० अश्ववाह्यं यानम्। मृतदेहवाहनार्थे तल्पे।

अश्वर न० अश्व-अरन्। म्लेच्छजातिभेदे। पानीये, शिवे च पु० तत्-मत्यां स्त्री० ङीष्।

अश्वरथ पु० अश्ववाहनार्थं रथः। अश्ववाहनार्थे याने।

अश्वरलोध्र पु० अश्वरप्रियः लोध्रः। श्वेतलोध्रे।

अश्वरालय पु० ६त०। अश्वरावासस्थाने।

अश्वल पु० अश्व-अलन्। कर्बूरवर्णे तद्वति त्रि०। तद्वर्णवत्यां धेनौ स्त्री०।

अश्व्र गतौ भ्वा०पर० सक० सेट्। अश्वति। अश्वीत्-अश्वीत्।

अश्व पु० अश्व-अच्। मृगभेदे (खरगोश) स्वार्थे कन्। तत्रैव।

अश्वधर पु० अश्वं मृगभेदं धरति धृ-अच्। चन्द्रे, कर्पूरे च अश्व-मृदादयोऽप्यत्र। [योऽप्यत्र

अश्वलाञ्छन पु० अश्वः मृगभेदो लाञ्छनं यस्य चन्द्रे, अश्वाद्-

अश्वविन्दु पु० राजभेदे, विष्णौ च।

अश्वशिम्बिका स्त्री० अश्व शिम्बीतया कायति कै-क। जीवन्त्राम्

अश्वस्थली स्त्री० अश्ववासयोग्या स्थली। अन्तर्वेद्याम् देशभेदे

अश्वाण्डुलि पु० अडि-उलि ६त०। कर्कटीभेदे।

अश्वाद पु० अश्वमत्ति अद-अण्। श्येनविहगे, ख्यु। तत्रैव।

अश्विकला स्त्री० ६त०। चन्द्रस्य षोड़शभागे।

अश्विकान्त न० अश्वी कान्तो यस्य। कुसुदे। चन्द्रकान्तमण्यौ पु०

अश्विन् पु० अश्वोऽस्त्यस्य इनि। चन्द्रे।

अश्विप्रभ न० अश्विना प्रभा इव। कुसुदे ६त०। ज्योत्स्नायाम्।

अग्निभूषण पु० अग्नी भूषणं यस्य । महादेवे, अग्निमण्डनादयोऽस्यत्व
अग्निलेखा स्त्री० अग्नेर्लेखा रेखा यस्य सः । चन्द्रकलायाम् । अग्नेर्लेखेव अरुणताम्रदत्वात् । गुडूच्याम् ।
अग्निवाटिका स्त्री० अग्नेर्वाटीव इवार्थे । पुनर्नवायाम् ।
अग्निशेखर पु० अग्नी शेखरं यस्य । महादेवे अग्निमूर्द्धादयोऽस्यत्व
अग्नीध्र न० इत० । अग्नेरस्य नोन्नि ।
अग्रत् अव्य० अग्र—वति । नैरन्तर्ये पुनः पुनरित्यर्थे च ।
अघ वधे भ्वा० प० सक० सेट् । अघति अघाषीत् अघीत् ।
अघ्कुल पु० अघ—कुलच् कश्च नेत्त्वम् । (डहरकरभचा) हस्ते अपूप-भेदे, कर्णरन्ध्रे, 'अवलम्बितकर्णाघ्कुलीं'ति नैषधम् मत्स्यभेदे च दन्त्यमध्योऽयमनार्षे ।
अघ न० अघ—घञ् । बालहत्ये पापे । प्रतिभाक्षये पु० ।
अघस वधे भ्वा० प० स० सेट् छा वेट् । अघसति अघासीत् अघसीत्
अघस आघिघि भ्वा० आ० सक० इदित् सेट् । प्रायेणाङ्पूर्वः । आघंसते आघंसिष्ट ।
अघस खादे अदा० खपा प० अक० सेट् इदित् । घंस्ति अघंसत्
अघसन न० अघस वधे ल्युट् । यज्ञार्थं पशुहनने ।
अघस्त न० अघस्व क्त । कल्याणे तद्वति, स्तुते, प्रशस्ते च त्रि० ।
अघस्र न० अघस—ष्ट्रन् । लौहे, खड्गादौ अस्त्रे च स्वार्थे कन् । तत्रैव
अघस्रकोषतरु पु० अघस्रकोषस्य हितस्तरुः । महाधिखण्डीवृक्षे
अघस्रजीविन् पु० अघस्रेण जीवति णिनि । अघस्राजीविनि ।
अघस्रपाणि पु० अघस्रं पाणौ यस्य । अघस्रधारके आततायिभेदे 'अघस्र पाणिर्घनापहृ' इति स्मृतिः । [नकरे शिल्पिभेदे
अघस्रमाज्ज पु० अघस्रं मार्ष्टि मृज अण् । (शिकलकर) अघस्राज्जे
अघस्राभ्यास पु० इत० । अघस्रप्रयोगशिक्षायाम् ।
अघस्रायस अघस्रयोग्रमयः अच्समा० । लौहभेदे (इस्पात) ।
अघस्रिन् त्रि० अघस्रमस्त्रास्य इनि । अघस्रविशिष्टे ।
अघस्री स्त्री० खल्पं अघस्रं ङीप । क्षुरिकायाम् ।

शस्य न० शस–प । बालतृणे धान्ये ।

शस्य न० शस–यत् । वृक्षादीनां फले । 'शस्यं क्षेत्रगतं प्रोक्तं मिश्रमुप्ते क्षेत्रस्थे धान्यादौ च । [शस्यनाशके त्रि० ।

शस्यध्वंसिन् पु० शस्यं ध्वंसयति ध्वंस–णिच् णिनि । तृणवृक्षे

शस्यमञ्जरी स्त्री० ६त० । अभिनवधान्यादिशीर्षे ।

शस्यशूक न० । धान्यादेः शीर्षे ।

शस्यसम्बर पु० शस्यं संवृणोति सम्+वृ–अच् । बालवृक्षे ।

शस्याद पु० शस्यवृक्षं अद–ण । क्षुद्रमूषिकवृक्षे (सेगुन) वृक्षे च

शाक पु०न० शक–घञ् । पत्रपुष्पादौ वृक्षभेदे पु० शक्तौ शिरीष वृक्षे, स्वराज्यावधि वत्सरप्रवर्त्तके राजभेदे, तदीये वत्सरे, च पु० हरितक्यां न० । शक्ति सामर्थ्यं शोक मस्य नेत्त्वम् । मूल पत्रकरीराद्ये फलकाण्डादिरूढकम् । त्वक् पुष्पं कवकञ्चैव शाकं दशविधं स्मृतं मिश्रमुप्तेषु वृक्षादीनां पत्रादिषु नः 'अशाकभुक् सोऽहर्गण्युच्यते ।

शाकचक्रिका स्त्री० शाकेषु मध्ये चक्रिका । चिञ्चायाम् ।

शाकट न० शकटाय हितम् अण् । शकटसम्बन्धियुगादौ । स्त्रियां बालबृक्षे, धववृक्षे च पु० ।

शाकटायन पु० व्याकरणकारके मुनिभेदे ।

शाकटिक पु० शकटेन चरति ठञ् । शकटेन गन्तरि ।

शाकटीन पु० शकटः परिमाणमस्य खञ् । विंशतितुलापरिमाणे

शाकतरु पु० शाकाख्यः तरुः । (सेगुण) वृक्षे । शाकवृक्षादयोऽप्यत्र

शाकपत्र पु० शाकः पत्रमस्य । शिग्रुवृक्षे ।

शाकबालेय पु० बलये हितम् ढक् शाकप्रधानो बालेयः । ब्रह्मयष्टिकायाम् ।

शाकम्भरी स्त्री० शाकैर्बिभर्त्ति भृ–खच् मुम् च । "भरिष्यामि सुराः ! शाकैराहृतैः प्राणधारकैः । शाकम्भरीति विख्यातिमि"ति चण्डी निरुक्तायाम् दुर्गायाम् ।

शाकयोग्य पु० शाके तद्वृक्षे योग्यः । धव्याके ।

शाकराज पु० शाकेषु राजते अच्, । शाकानां वा राजा टच् । वास्तूकशाके

शाकविल्व पु० शाकोऽपि विल्व इव । वास्तूकौ स्वार्थे कन् तत्रैव

शाकवीर पु० शाकेषु वीरः वीर्यावायकत्वात् । वास्तूकशाके ।

शाकशाकट न० शाकस्य शेलं शाकटच् । शाकशैले । शाकटिनच् । कलार्थे ।

शाकश्रेष्ठ पु० शाकेषु श्रेष्ठः । वास्तूकशाके जीवन्त्यां वास्तूकौ स्त्री० ङीष् ।

शाकाङ्ग न० शाकस्य तङ्गत्वेनाङ्गत्वात्तदुपयोगि । मरिचे ।

शाकान्न न० शाकमेवान्नम् । कर्म्म० । शाकरूपे अन्ने ।

शाकान्नभेदन न० शाकरूपम् अन्नं भिनत्ति भिद् ल्यु । चुक्रे (चुकौपालङ्क) ।

शाकालाबु स्त्री० शाकप्रधानालाबुः । अलाबुभेदे ।

शाकिनी स्त्री० शाकोऽस्त्यस्याः इनि । शाकभक्षणयोग्यायां भूमौ, देवीसहचरीभेदे च ।

शाकुन पु० शकुनं शुभाशुभसूचकं निमित्तमधिकृत्य कृतो ग्रन्थः अण् । शकुनज्ञानसाधने ग्रन्थे (काकचरित) ।

शाकुनिक पु० शकुनेन पक्षिबधादिना जीवति ठक् । पक्षिघातके ।

शाकुन्तलेय पु० शकुन्तलाया अपत्यं ढक् । दुष्मन्तात्मजे शकुन्तलागर्भजे भरते नृपे ।

शाक्त त्रि० शक्तिर्देवताऽस्य अण् । तन्त्रोक्ते शक्तिदेवतोपासके

शाक्तीक पु० शक्तिः प्रहरणमस्य ठक्क । शक्त्या योद्धरि ।

शाक्य पु० शक-घञ् तत्र साधुः यत् । बुद्धे ।

शाक्यमुनि पु० शाक्यो मुनिः । बुद्धभेदे ।

शाक्यसिंह पु० शाक्ये वंशे सिंह इव । बुद्धभेदे ।

शाख व्याप्तौ भ्वा० पर० सक०सेट् चङि न ह्रस्वः । शाखति अशाखीत् ।

शाख पु० शाख-अच् । हस्तिकाण्डे स्कन्धानुजे गणभेदे, ग्रन्थपरिच्छेदे, सर्गस्थानीये ग्रन्थांशभेदे, वृक्षस्यावयवभेदे च (डाल) पक्षान्तरे, राहौ, लतायाम्, क्लान्तिके वेदैकदेशे च स्त्री०

शाखाकण्ट पु० शाखाव्यापी कण्टः कण्टको यस्य । क्षुद्रवृक्षे
शाखानगर न० शाखेव नगरम् । मूलनगरसमीपस्थे क्षुद्रपुरे शाखा-
पुरादयोऽप्यत्र ।
शाखामृग पु० शाखास्थो मृगः पशुः वानरे ।
शाखाल्ला स्त्री० शाखाप्राया । इक्षावृ ।
शाखावरण्ड पु० शाखायां वेदशाखायां रण्डः तद्विहित कर्म्मानाचर-
णात् । स्वशाखात्यागेन कर्मकर्त्तरि ।
शाखाल पु० शाखाः वाहुत्वेन सन्त्यस्य अच् । वानीरवृक्षे ।
शाखाशिफा स्त्री० शाखारूढा शिफा मूलम् शाक० । वटादीनां शा-
खाजाते मूले । शिफाप्रारभ्य शाखा । गुडूच्यादि लतायाम् ।
शाखिन् पु० शाखाऽस्त्यस्य इनि । वृक्षे । वेदैकदेशवति, त्रयभेदे,
म्लेच्छभेदे च ।
शाखोट पु शाखा-व्याप्तौ ओटन् (शाओड़ा) वृक्षे स्वार्थेकन् ।
शाङ्किक पु० शङ्कुस्तद्विकारवलयनिर्म्माणं शिल्पमस्य ठञ् । जाति-
भेदे (शांखारी) ।
शाङ्कुष्ठा स्त्री० शङ्कुरिव शोभते यः अङ्कुष्ठ इव यस्याः । गुञ्जायाम् ।
शाट पु० शट-घञ् । वस्त्रे । स्त्रीत्वमपि गौ० ङीष् ।
शाटक पु० न० शट-ण्वुल् । वस्त्रे स्त्रीत्वमपि टाप् ।
शाटायन पु० ऋषिभेदे, तेन प्रोक्तम् अण् । प्रकृतहोमकर्म्मणि वैगु-
ण्यसमाधानार्थं विहिते होमभेदे न० ।
शाठ्य न० शठस्य भावः ष्यञ् । शठतायाम् ।
शाड स्नाघायां भ्वा०आत्म० सक० सेट् । शाडते अशाडिष्ट
शाण न० शणेन निर्वृत्तम् अण् । शणसूत्रनिर्म्मिते वस्त्रादौ । शण-
घञ् । (कष्टिपाथर) कषपाषाणे शस्त्रादीनां निकर्षणेन तीक्ष्णी-
करणयन्त्रभेदे । [शिल्पिनि ।
शाणावीव पु० शाणमाजीवति आ+जीव-अण् । अस्त्रतीक्ष्णताकारके
शाणि पु० शण-इण् । षड्वृत्ते शणेन निर्वृत्ता वृञ् वा ङीप् । श-
णनिर्म्मिते षट्किकावस्त्रे छिद्रवस्त्रे च ।

श्रीणित त्रि॰ श्रय-णिच्-क्त । क्षीणीकृते ।

श्रीण्डिल्य पु॰ श्रण्डिलस्यापत्यम् यञ् । गोत्रप्रवर्त्तके भक्षिकाख्यकारके मुनिभेदे, तत्प्रियत्वात् विल्वे यक्षिभेदे च । [भुल्लूरे पु॰ ।

श्रीत न॰ श्री-क्त । सुखे, तद्वति, स्निग्धे, लग्ने, दृब्धे, निश्चिते च त्रि॰

श्रीतकुम्भ न॰ श्रीतकुम्भे भवः श्रण् । स्थिरखे । भुल्लूरे करवीरे च पु॰ । [लूरे पु॰ ।

श्रीतकौम्भ न॰ श्रीतकुम्भे भवम् श्रण् द्विपदवृद्धिः । स्थिरखे भु-

श्रीतन न॰ श्री-णिच्-तङ्च् ल्युट् । तनूकरखे, विनायने च 'जायते यत्नश्रीतनमिति मीमांसा ।

श्रीतभीरु पु॰ श्रीता दुर्बलाः श्रात्मा भीरवो यस्याः । मक्षिकाभेदे

श्रीतनी स्त्री॰ श्रीतं कार्श्यं नाति ना-क । (चालकुषा) क्षुपे ।

श्रीत्रव पु॰ श्रत्रुरेव स्वार्थेऽण् । रिपौ । तस्य भावः संघोवा श्रण् । वैरे, रिपुसमूहे च न॰ ।

श्रीद् पु॰ श्रद-घञ् । कर्दमे, बालतृणे च ।

श्रीद्हरित पु॰ श्रीदेन हरितलक्षणयुक्तः । श्रार्द्रके देशे ।

श्रीद्रल पु॰ श्रीदाः सन्त्यत्र ड्रलच् । बद्धलक्षणयुक्ते देशे ।

श्रीन भेदने भ्वा॰ उभ॰ सक॰ सेट् स्वार्थे सन् । श्रीश्रांसति ते श्रशीश्रांसीत् श्रशीश्रांसिष्ट ।

श्रीन पु॰ श्रान-श्रच् । श्रस्त्रादीनां तीक्ष्णताकारके यन्त्रभेदे ।

श्रीनी स्त्री॰ श्रान-ङीप् । इन्द्रवारुणयाम् ।

श्रीन्त त्रि॰ श्रम-क्त । श्रमयुक्ते, श्रभियुक्ते च श्रम-णिच्-क्त त्रि॰ श्रान्तिं गमिते त्रि॰ । निर्वेदस्थायिभावके रसभेदे पु॰ । लोमशादराजकन्यायां, श्रध्यष्टकृपत्न्यां, मक्षीभेदे च स्त्री॰ ।

श्रीन्तनव पु॰ श्रान्तनोरपत्यम् श्रण् । भीष्मे 'भीष्मः श्रान्तनव इति तत्तर्पणमन्त्रः ।

श्रीन्तनु पु॰ द्वापरयुगभवे चन्द्रवंश्ये प्रतीपराजपुत्रे नृपभेदे ।

श्रीन्ति स्त्री॰ श्रम-क्तिन् । कामक्रोधादिजये, विषयेभ्योमनसो निवारखे, उपद्रवनिवारखे, निवारखे च ।

शाल्मलिक त्रि० शाल्मले भवम् ठक्। शाल्मलिकारके होमादौ।
शाप पु० शप–घञ्। 'अनिष्टं भूयादित्येवम् आक्रोशे, शपथे च
शापाङ्क पु० शाप एवाङ्कं यस्य। शुनौ।
शाब्दबोध पु० शब्देन निर्वृत्तः अण्। अन्वयबोधे शब्दज्ञानजन्ये
पदार्थस्मृतिद्वारके ज्ञानभेदे। [व्याकरणशास्त्राभिज्ञे।
शाब्दिक पु० शब्दं शब्दसाधुतासाधकं शास्त्रं वेत्त्यधीते वा ठक्।
शामित्र न० शम–णिच् इत्रच्। पशुबन्धनस्थाने। [आलादौ।
शाम्बरी स्त्री० शम्बरेण निर्वृत्ता अण् ङीप्। मायायाम् इन्द्र
शाम्बविक त्रि० शम्बुः पण्यमस्य ठक्। शाम्बुके। (शांखारी)
शा(वम्बु)म्बुक पु० शं(म्बु)म्बूक+स्वार्थेऽण्। शम्बुके (शामुक)
शाम्भव पु० शम्भोरयम् अण्। गुग्गुलौ, कर्पूरे, शिवभेदे, शम्भुपुत्रे,
मल्लिकाभेदे, देवदारुणि च। शिवसम्बन्धिनि, तदुपासके च त्रि०।
दुर्गायां स्त्री० 'शाम्भवी कुरुता तस्ये'ति तन्त्रम्।
शा(सा)यक पु० शो(षो)–ण्वुल्। बाणे, खड्गे च।
शार दौर्बल्ये अदं० चुरुभ० सेट्। शारयति–ते अशशारत्
शार न० शार–अच्, शॄ–घञ् वा। कर्पूरवर्णे। तद्वति त्रि०।
शारङ्ग पु० शारं कर्पूरमङ्गं यस्य शक०। चातकपक्षिणि, हरिणे, गजे,
भृङ्गे, मयूरे च
शारद न० शरदि भवम्–अण्। श्वेतपद्मे। कासे, वकुले, हरिन्मुद्गे
च पु० शरङ्गमाले त्रि० शारं श्वेतपद्ममस्त्यस्याः अच्। सरस्वत्या-
म् स्त्री०। [तत्काजजे रोगे पु०।
शारदिक न० शरदि भवं श्राद्धं दोगो वा ठञ्। शरत्काले भवे श्राद्धे
शारदीया स्त्री० शरदि भवा छण्। शरत्काले कर्त्तव्यायां दुर्गापूजायाम्
शारि(री) स्त्री० शॄ–इञ् वा ङीप्। पाशकादिगुटिकायां, पक्षिभेदे च
'शारीं चरन्तीं सखि! शारयेति नैषधम्। युद्धार्थं गजपर्याणे,
व्यवहारभेदे, कपटे च। स्वार्थे कन् पक्षिभेदे।
शारिफल पु०न० शारेः फलमाधारः। शारिपट्टके पाशक–क्रीड़ाधने द्रव्ये (अक) स्वार्थे कन्। तत्रैव।

आरिवा स्त्री० आरिरिव वनति वन–ड । शाकभेदे । तत्पर्य्यायः ।

आरीर त्रि० शरीरस्येदं अण् । देहसम्बन्धे सुखदुःखादौ तल्लोहमस्य पुनः अण् । दृढे पु० । शरीरमात्मत्वेनाभिमन्यते अण् । जीवे । स्वार्थे क । जीवे । आरीरं दुःखं जीवं वा अधिकृत्य कृतो ग्रन्थः अण् व्याख्याते वेदान्तशास्त्रे चिकित्साशास्त्रे सुश्रुतग्रन्थाधीतेऽर्थे च ।

आरीरिक त्रि० शरीरे भवः ठक् । देहजाते दुःखादौ ।

आरुक त्रि० रुज–उकञ् । हिंसके ।

आर्करि त्रि० शर्करा अस्त्यस्य अण् । शर्करायुक्ते देशे शर्कराया विकारः अण् । फाणिते, दुग्धफेणे च पु० ।

आर्ङ्ग त्रि० शृङ्गस्य विकारः अण् । शृङ्गजाते पदार्थे । विष्णु धनुषि, धनुर्मात्रे च पु० आर्ङ्गे न० ।

आर्ङ्गिन् पु० शार्ङ्गः अस्त्यस्य इनि । विष्णौ धनुर्मात्रे त्रि० ।

आर्टील पु० रट–अलच् टुक् च । आम्रभेदे, पक्षिभेदे, राजन्यभेदे, च उत्तरपदस्थः । श्रेष्ठार्थे ।

आर्टीललालित न० अष्टादशाक्षरपादके छन्दोभेदे ।

आर्टीलविक्रीडित न० अनविंशत्यक्षरपादके छन्दोभेदे ।

आर्व्वर न० अर्व्वर्यां इदम् अण् । अत्यन्ततमसि । रात्रिसम्बन्धिनि, धातवे च त्रि० । [अयालिष्ट ।

आल कथने भ्वा० आ० सक० सेट् चङि न ह्रस्वः । आलते

आल पु० अल–घञ् । मत्स्यभेदे, प्राकारे, स्वनामख्याते, वृक्षभेदे वृक्षमात्रे, दन्त्यादिस्तु वृक्षमात्रे 'रसालः साखः समहयूतालुने'ति नैषधम् । [जातः अण् । तत्र जाते विष्णोर्मूर्त्तिभेदे ।

आलग्राम पु० आलानां वृक्षाणां ग्रामः समूहो यत्र । पर्व्वतभेदे तत्र

आ(सा)लज न० आ(सा)लात् जायते जन–ड । सर्जरसे (धुना)

आलनिर्य्यास पु० निर्यासः । सर्जरसे (धुना) ।

आलपर्णी स्त्री० आलस्येव पर्णान्यस्याः ङीप् । (शालपानी) वृक्षभेदे ।

आलभञ्जिका स्त्री० आलेन भज्यते निर्मीयते भञ्ज-ण्वुल्। काष्ठनिर्म्मितपुत्तलिकायां, वेश्यायाञ्च।

आलव पु० आलः तन्नियंास इव वलति वर्द्धते वल-ड। लोध्रे।

आलवेष्ट पु० आलस्य वेष्ट इव। सर्ज्जरसे (धुना)।

आलसार पु० आलस्य सारः। हिङ्गुनि आलेषु सारः। क्षत्रभेदे।

आला स्त्री० आल-अच्। गृहे, दृक्षस्य स्कन्धशाखायाञ्च।

आलाञ्चि पु० आल इवाञ्चति अञ्च-क्विन्। शाकभेदे (शाञ्चा)

आलातुरीय पु० आलातुरे भवः। तद्ग्रामवासिनि मुनौ।

आलानी स्त्री० आलमानयति आ+नी-ड गौ० ङीष्। विद्यायाम्।

आलामृग पु० आलायां गृहे मृग इव। मृगाले।

आलारुक पु० आलायां गृहे, शालायां रुक इव वा। कुक्कुरे, मृगाले, विड़ाले, मृगे, वानरे च। [मार्জ্জারे च।

आलि पु० अल+इञ्। कलमादिधान्ये, षष्टिकादिधान्ये, गन्ध-

आलिका स्त्री० आलिरिव कायति के-क। विदार्याम्।

आलिङ्ग पु० आलिं चर्म्मति चर्म-ड पृ० कुम्। शाकभेदे।

आलिपर्णी स्त्री० आलेरिव पर्णान्यस्याः ङीष्। माषपर्ण्याम्

आलिवाहन पु०। विक्रमादित्यं हत्वा शकाब्दप्रवर्त्तके नृपभेदे

आलिहोत्र पु० आलयो हूयन्तेऽत्र हु-ष्ट्रन्। घोटके।

आली स्त्री० आल-अच् गौ० ङीष्। कृष्णजीरके।

आलीन त्रि० आलामर्हति ख। गृहे सलज्जे, मिश्रेयाञ्च।

आलु न० आल-उण्। आलूके, कषायद्रव्ये, चौरनामगन्धद्रव्ये च भेके पु०।

आलूक न० आल उकञ्। कुसुदादिमूले उकञ्। तत्र जातीफले।

आलूर पु० आल-ऊरच्। भेके।

आलेय पु० आलायां भवं ढक्। मधुरिकायाम्।

आलोडार पु० आम्रभेदे।

आलोत्तरीय पु० आलोत्तरे भवः। पाणिनिमुनौ।

आल्मल पु० आल-मलच्। (शिमूल) वृक्षे तच्छिखिद्वीपभेदे च

शाल्मलि(ली) पु० स्त्री० शाल-मलिच् वा ङीप् (शिमुल) वृक्षे
शाल्मलिक पु० शाल्मलिरिव कायति कै-क। रोहितकवृक्षे
शाल्मलीफल पु० शाल्मल्या इव फलमस्य। तेजःफलवृक्षे।
शाल्मलीवेष्ट पु० शाल्मलीं वेष्टयति वेष्ट अच्। शाल्मलीनिर्यासे राजनि। तत्रैव।
शालु पु० शाल-व। देशभेदे।
शाव पु० शव-घञ्। शिशौ स्वार्थेकन्। तत्रैव शवस्येदम् अण्। शवसम्बन्धे 'त्रिरात्रं शावमाशौच'मिति स्मृतिः।
शावर पु० शावयति विकारयति शव-णिच् अरन्। पापे, अपराधे, लोभद्रुमे च शवरेण प्रोक्तमण्। शवरस्वते मीमांसाभाष्ये। शवरस्येदम् अण्। शवर सम्बन्धिनि त्रि०।
शावरी स्त्री० शवरस्य प्रिया अण्। भूकदम्बवृक्षे, विद्याभेदे च
शाश्वत त्रि० शश्वद् भवः अण्। सतते नित्ये।
शाष्कुलिक न० शष्कुलीनां समूहः ठञ्। शष्कुलीसमूहे।
शास आशंसायां भ्वा०आ०सक० सेट् क्ङा वेट्। प्रायेणाङ् पूर्वकः आशंसते आशंसिष्ट। [आशास्ते आशासिष्ट
शास आशीर्वादे अदा० आ० सक० सेट् क्ङा वेट्। प्रायेणाङ् पूर्वः।
शास शासने अदा०प०द्विक०सेट् क्ङा वेट्। शास्ति अशासत्।
शासन न० शास ल्युट्। निग्रहस्य हितसाधनादौ प्रवर्त्तने।
शासनहर पु० शासनं हरति हृ-अच्। आज्ञाहारके दूते।
शासितृ त्रि० शास-तृच् इट्। शासनकर्त्तरि।
शास्तृ त्रि० शास-तृच् इडभावः। शासन कर्त्तरि।
शास्त्र न० शिष्यतेऽनेन शास-ष्ट्रन्। हितानुशासने ग्रन्थे।
शास्त्रदर्शिन् त्रि० दृश णिनि ह्रस्व०। शास्त्रज्ञे शास्त्रविदादयोऽप्यत्र
शास्त्रिन् त्रि० शास्त्रं वेत्त्यधीते वा इनि। शास्त्रज्ञे।
शास्त्रीय त्रि० शास्त्रेण विहितः छ। शास्त्रोक्ते धर्म्मादौ।
शास्य त्रि० शास-यत्। अनुशासनीये शिष्यादौ।
शि छेदने भ्वा० उभ० सक० अनिट्। शिनोति शिनुते अशैषीत् अशेष्ट।

शिंशपा स्त्री० शिवं पाति पा-क पृ०। (शिशु) वृक्षे।

शि(सि)क्य न० शिच-यक् कुक् च पृ० सस्य शोवा। (सीम) मधुच्छिदे। स्वार्थे कन्। तत्रैव।

शिक्य न०स्त्री०शिक्-यत्, शि-यत् कुक् च। (सिका) रज्जुजाते पदार्थे

शिक्यित त्रि० शिक्यंशिक्यस्थं करोति शिक्य+शिच्-कर्मणि क्त शिक्याधारे स्थापिते पदार्थे।

शिक्ष स्त्री० अभ्यासे भ्वा० आ० सक० सेट्। शिक्षते अशिक्षिष्ट

शिक्षा स्त्री० शिक्ष-अप्रत्य। अभ्यासे वर्णोच्चारण प्रदर्शके वेदाङ्गे षड्भेदे 'शिक्षा कल्पो व्याकरणमि'ति पु०।

शिक्षागुरु पु० ७त०। विद्यादातरि।

शिक्षित त्रि० शिक्षा जाताऽस्य तारं० इतच् शिक्ष-क्त वा। ज्ञताभ्यासे निपुणे विज्ञे च।

शिक्ष गतौ भ्वा० पर० सक० सेट् इदित्। शिक्षति अशिक्षीत्

शिख(खा)ण्ड पु० शिखामस्यति अस्य ड तस्य नेत्वम् ह्रस्वः वा शक०। मयूरपिच्छे, चूड़ायाञ्च। [तत्र, सा च चूड़ायाञ्च]

शिखण्डक पु० शिखण्ड इव कन्। काकपक्षे (काकजुल्फी) स्त्रीत्वमपि

शिखण्डिक पु० शिखण्डोऽस्त्यस्य ठन्। कुक्कुटे।

शिखण्डिन् पु० शिखण्डोऽस्त्यस्य इनि। मयूरे द्रुपदराजस्य पुत्रभेदे, विष्णौ च। यूथिकायां, गुञ्जायां च स्त्री०

शिखर न० शिखा अस्त्यस्य अरच् आकोपः। पर्व्वताग्रे अल्पमात्रे च। वृक्षाग्रे पु० न०। पुलके, गुल्मवृक्षादौ, रत्नभेदे च मूर्वायां स्त्री०

शिखरिन् पु० शिखरोऽस्त्यस्य इनि। पर्व्वते, कोयष्टौ' वल्हाके, वृक्षे, अपामार्गे, कुन्दवृक्षे, यावनाले च। रक्तालायां खाद्यभेदे, सप्तदशाक्षरपादके छन्दोभेदे, मल्लिकायां रोमावल्यां च स्त्री०ङीप्।

शिखलोहित पु० शिखास्त्यस्य अच् तथाभूतः सन् लोहितः (कुकुरछड़ा) तृणभेदे।

शिखा स्त्री० शी-खक् तस्य नेत्वम् पृ०। अग्निज्वालायां, मस्तकमध्यस्थकेशगुच्छे च 'कच्छे परस्यशिखां विहि'रिति स्मृतिः

शिखाकन्द न० शिखेव कन्दोऽस्य । रङ्गने ।
शिखातरु पु० शिखायादीपशिखावत्तरुरिव । दीपवृक्षे । (देवकी)
शिखाधर पु० शिखां चूड़ां धरति धृ-अच् । मयूरे, शिखाधारके त्रि० ।
शिखामूल न० शिखेव मूलमस्य । रङ्गने, (गाजर) ।
शिखालु पु० शिखास्त्रस्य आलुच् । मयूरशिखावृक्षे ।
शिखावत् पु० शिखा ज्वालाऽस्त्यस्य मतुप् मस्य वः । वह्नौ, केतुवृक्षे चित्रकवृक्षे च । शिखावति त्रि० मूर्ध्नां स्त्री० ङीप् ।
शिखावर पु० शिखां वृणोति वृ-अच् । धनसवृक्षे ।
शिखावल पु० शिखास्त्रस्य बलच् । मयूरे मयूरशिखावृक्षे च
शिखिकाष्ठ न० शिखिनो मयूरस्य कण्ठस्तद्वद्वर्णोऽस्त्रस्य अर्शआद्यच् । तत्ये (तूते) शिखिग्रीवादयोऽप्यत्र ।
शिखिध्वज शिखिनो वह्नेर्ध्वज इव । धूमे ।
शिखिन् पु० शिखा अस्त्रस्य इनि । मयूरे, वह्नौ, चित्रक वृक्षे, केतुवृक्षे, कुक्कुटे, वृक्षे, अश्वे, अजलोमि पर्वते, ब्राह्मणे, मेथिकायां, मयूरशिखावृक्षे च । शिखायुक्ते त्रि० ।
शिखिप्रिय पु० शिखिनं प्रीणयति प्री-क । लघुबदरे ।
शिखिमण्डल न० शिखिनां मण्डलमिव यत्र । वरुणवृक्षे ।
शिखिमोदा स्त्री० शिखिनं मोदयति मुद णिच्-अच् । अजमोदायाम्
शिखिवर्द्धक पु० शिखिनं वर्द्धयति वृध णिच् ण्वुल् । कृष्णाख्ये ।
शिखिवाहन पु० शिखी मयूरो वाहनं यस्य । कार्त्तिकेये ।
शिखु पु० शि रुक् खुक् च । (सजिना) वृक्षे शाकभाते च ।
शिघ आघ्राणे भ्वा० पर० सक० सेट् इदित् । शिङ्घयति अशिङ्घीत्
शिङ्घाण न० शिघि-आनच् षृ० णत्वम् । काचपात्रे लौहमले, नासिकामले, श्लेष्मणि च । स्वार्थे कन् । नासिकामले न० ।
शिञ्ज अस्फुटध्वनौ इदित् वा चु० उभ० पक्षे अदा० आ० सक० सेट् । शिञ्जयति ते शिञ्जके अशिशिञ्जत् त अशिञ्जिष्ट भ्वादिरपत्र्यं पर० इत्येके तेन शिञ्जति अशिञ्जीत्

शिञ्जा स्त्री० शिञ्ज-अ भूषणशब्दे । शिञ्ज-अच् । धनुर्गुणे
शिञ्जिनी स्त्री० शिञ्जति शिञ्ज णिनि । धनुर्गुणे ।
शिट अनादरे भा० पर० सक० सेट् । शेटति अशेटीत् ।
शित त्रि० शो-क्त । दुर्बले, शाणिते च ।
शितद्रु पु० शितं द्रवति द्रु-कु-नि० । (शतलुज) नदीभेदे ।
शितशूक पु० शितस्तीक्ष्णः शूको यस्य । यवे ।
शिति पु० शि-क्तिच् । भूर्जपत्रवृक्षे, शुक्लवर्णे कृष्णवर्णे, च । तद्वर्ण
वति त्रि०
शितिकण्ठ पु० । शितिः कण्ठो यस्य । शिवे, दात्यूहविहगे च
शितिचार पु० शितिः सन् चरति चर-घञ् । (शुर्षनि) शाके
शितिसारक पु० शितिः शुभ्रः सारो यस्य कप् । तिन्दुकवृक्षे
शिथिल त्रि० श्लथ-किलच् पृ० श्लथे, अदृढे संयोगभेदे, मन्दे च
शिनि पु० शि-निक् । यदुवंश्ये, क्षत्रियभेदे यस्य सात्यकिर्नप्ता
शिप्र पु० शि रक् पुक् च । सरोवरभेदे, नदीभेदे स्त्री० ।
शिफ पु० स्त्री० शि फक् । वृक्षाणां जटाकारे मूले ।
शिफाक पु० शिफेव स्वार्थे कन् । पद्ममूले ।
शिफाकन्द पु० शिफेव कन्दः । पद्ममूले ।
शिफाधर पु० शिफां धरति भृ-अच् । शाखायाम् ।
शिफारुह पु० शिफायां रोहति रुह-क । वटवृक्षे ।
शि(शि)म्बा स्त्री० शाम्यति समति वा शम (सम) डम्बच् पृ० (छिमी)
ख्याते पदार्थे चक्रमर्दे च ।
शिम्बि (म्बी) स्त्री० शम-बि नि० वा ङीप् । शिम्बायाम्, (शिम्) ल-
तायां एरकायाञ्च, स्वार्थे कन् तत्रैव ।
शिम्बिपर्णी स्त्री० शिम्बिरिव पर्णमस्याः । सुवर्चलाम् स्वार्थे कन् तत्रैव ।
शिर न० शॄ-क । मस्तके, पिप्पलीमूले, मद्यायाम् अजगरे च ।
शिरःफल पु० शिर इव फलमस्य । नारिकेले ।
शिरःशूल न० शिरसः शूलमिव तापकत्वात् । रोगभेदे ।
शिरज प० शिरे जायते जन-ड । केशे ।

शिरस् न० शॄ-असुन् नि० । मस्तके, अग्रे च ।
शिरसिरुह पु० शिरसि रोहति रुह-क अलुक् स० । केशे ।
शिरस्क न० शिरसि कायति प्रकाशते कै-क । शिरस्त्राणे ।
शिरस्त्र न० शिरस्त्रायते त्रै-क । शिरोरक्षके उष्णीषे ।
शिरस्य पु० शिरसि भवः यत् । निर्मलकेशे शिरोजातमात्रे त्रि०
शिरा स्त्री० शॄ-क । नाड्याम् (शिर)
शिरापत्र पु० शिरेव पत्रं यस्य । हिन्तालवृक्षे ।
शिराल न० शिराऽस्त्यस्य लच् । कर्म्मरङ्गे शिरायुक्ते त्रि० ।
शिरावृत्त न० शिरसे वर्त्तते वृत-क । सीसके ।
शिरीष पु० शॄ-ईषन् । स्वनामख्याते वृक्षे । [शालायाम् ।
शिरोगृह न० शिरःस्थं सुपरिस्थं गृहम् । (चिलेघर) चन्द्र-
शिरोधरा स्त्री० शिरोमस्तकं धरति धृ अच् । ग्रीवायाम् ।
शिरोधि स्त्री० शिरो धियतेऽत्र धा-कि । ग्रीवायाम् ।
शिरोमणि पु स्त्री० शिरसि धार्य्योमणिः । शिरोधार्य्ये रत्ने चूड़ामणौ
स्त्रीपक्षे वा ङीष् । शिरोरत्नादयोऽप्यत्र । [मस्तकरोगे
शिरोरुजा स्त्री०शिरो रुजति व्यथयति रुज-क । समुच्छ्रदवृक्षे । ह्रस्व० ।
शिरोरुह पु० शिरसि रोहति रुह-क । केशे ।
शिरोवल्ली स्त्री० शिरसः वल्लीव । मयूरचूड़ायाम् ।
शिरोवृत्त न० शिर इव वृत्तं वर्त्तुलम् । दरिद्रे । पामार्गे
शिरोवृत्तफल पु० शिरो वृत्तं मरिचमिव फलमस्यः । रक्त-
शिरोवेष्ट पु० वेष्ट-घञ् शिरसो वेष्टः । उष्णीषे ख्युट् । तत्रैव न० ।
शिल्ल उञ्छे कणश आदाने तु० पर० सक० सेट् । शिलति अशैलीत्
शिल्ल न० शिल-क । गृहीतशस्यात् क्षेत्रात्कणश आदानरूपायां वृत्तौ,
पाषाणे, द्वाराधःस्थितकाष्ठखण्डे च स्त्री० ।
शिल्लाकर्णी स्त्री० शिलेव कर्णमस्य ङीप् । शङ्खकीवृक्षे ।
शिल्लाकुट्टक पु० शिलां कुट्टयति कुट्ट-ण्वुल् । पाषाणभेदके अस्त्र-
भेदे । शिलया कुट्टति विचूर्णीकरोति । तापनभेदे ।
शिल्लाज न० शिलातो जायते जन-ड । शैलेये गन्धद्रव्ये ।

शिलाजतु न० शिलाजातं जतु । पर्वतजाते उपधातुभेदे ।
शिलाञ्जनी स्त्री० शिला अञ्जतेऽनया अञ्ज-ल्युट् । कालाञ्जनीवृक्षे ।
शिलात्मज न० शिलाया आत्मज इव । लोहे ।
शिलादृढु पु० शिलायां दृढुरिव । शैलेये गन्धद्रव्ये ।
शिलाधातु पु० शिलाया धातुस्वरूपधातुरिव शुभ्रत्वात् । श्वेतोपले, (खड़ी) पीतवर्णे-गैरिकभेदे च ।
शिलापुत्र पु० शिलायाः पुत्र इव । (लोड़ा) । प्रस्तरखण्डे ।
शिलापुष्प न० शिलायाः पुष्पम् । शैलेये गन्धद्रव्ये ।
शिलाभेद पु० शिलामपि भिनत्ति भिद-अण् । पाषाणभेदि वृक्षे, पाषाणभेदकास्त्रे च ।
शिलाव्याधि पु० शिलाया व्याधिरिव । शैलेये गन्धद्रव्ये ।
शिलासन न० शिलाया आसनम् । शैलेये गन्धद्रव्ये ।
शिलासार न० शिलायाः सार इव । लोहे ।
शिलि पु० शिल-कि भूर्जपत्रवृक्षे द्वारस्थे काष्ठे (गोबराट) भेकयाञ्च छत्राकपुष्पे च स्त्री० ङीप् ।
शिलीन्ध्र न० शिलीं धरति धृ-क पृ० सुम् । कदलीपुष्पे ।
शिलीन्ध्रक न० शिलीन्ध्र इव कै-कन् । गोमयच्छत्राके ।
शिलीपद पु० शिलीव पदमस्य । रोगभेदे (गोद) । [भूते च ।
शिलीमुख पु० शिली शल्यं मुखमस्य । भ्रमरे, बाणे, युद्धे, जटी-
शिलोच्चय पु० शिलानामुच्चयो यत्र । पर्वते ।
शिलोञ्छ पु० शिलेनोञ्छः उञ्छि-घञ् उपात्तशस्यात् क्षेत्रात् शेषावचयने ।
शिलोद्भव शिलाया उत्तिष्ठति उद्+स्था-क । शैलेये गन्धद्रव्ये शिलोद्भवादयोऽप्यत्र ।
शिल्प न० शिल-पक् । चित्रकलादिकर्मणि । [दिकर्त्तरि ।
शिल्पकारिन् त्रि० शिल्पं चित्रादिकलां करोति कृ- णिनि । चित्रा-
शिल्पशाला स्त्री० ६त० । चित्रकरादीनां चित्रकारस्थानेऽत्र ।
शिल्पशास्त्र न० शिल्पशासनं शास्त्रम् । वास्तुविद्यादि शासके शास्त्रे ।
शिल्पिन् त्रि० शिल्पं वेत्त्यधीते वा इनि । चित्रादिकर्मकरे ।

शिव न० शी-वन् पृ०। मङ्गले, सुखे, जले। सैन्धवे, सासुद्रे, च लवणे, श्वेतदूर्व्वे च। मङ्गलवति त्रि०। महादेवे, मोथे बालभद्रे, बालके, गुग्गुलौ, वेदे, पुष्करीवृक्षे, कृष्णधुस्तूरे, पारदे, देवे, लिङ्गे, विष्ण्वादिषु मध्ये विंशतितमे योगे च पु०।

शिवक पु० शिव-कृव कृवार्थे कन्। कीलके नवां गालकखण्डनार्थं गोष्ठे निखाते काष्ठे।

शिवकाञ्ची स्त्री० ६त०। पुरीभेदे।

शिवघर्मज शिवघर्मादुत्पद्यते जन-ड। मङ्गलपद्मे।

शिवचतुर्द्दशी स्त्री० शिवप्रिया चतुर्द्दशी। फाल्गुनकृष्णचतुर्द्दश्याम्।

शिवदारु न० शिवो देवस्तदादिकं दारु। देवदारुवृक्षे।

शिवदूती स्त्री० शिवो दूतो यस्याः। दुर्गामूर्त्तिभेदे।

शिवद्रुम पु० शिवप्रियः द्रुमः। विल्ववृक्षे।

शिवदृष्टा स्त्री० ३त०। केतक्याम्।

शिवधातु पु० ६त०। पारदे।

शिवपुरी स्त्री० ६त०। काश्याम्।

शिवप्रिय न० ६त०। रुद्राक्षे, महादेवयल्लभे त्रि०। वकवृक्षे, धुस्तूरे, स्फटिके च पु०। दुर्गायां स्त्री०।

शिवमल्लक पु० शिवः कल्याणकरः मल्लवृक्ष कायति कै-क। अर्জ্জुनवृक्षे

शिवमल्ली स्त्री० शिवस्य मल्लीव प्रिया। वकवृक्षे।

शिवरात्रि स्त्री० शिवप्रिया तदुपासनार्था रात्रिः। शिवचतुर्द्दश्याम् माघीतः परस्यां कृष्णचतुर्द्दश्याम्। तद्रात्रौ हि शिवपूजनव्रतादिकं क्रियते इति तस्या रात्रेस्तत्प्रियत्वम् तद्दिवसकर्त्तव्ये व्रते च।

शिवलिङ्ग न० ६त०। शिवस्य लिङ्गाकारे प्रस्तरादिमये पदार्थे।

शिवलोक पु० ६त० कैलासनामके स्थाने।

शिववल्लभ त्रि० ६त०। महादेवप्रिये। शतपत्र्यां स्त्री०।

शिववल्ली स्त्री० शिवप्रिया वल्ली। त्रिकण्टकलतायां, श्रीवल्लयाञ्च।

शिववाहन न० शिवं वाहयति वह-णिच्-ल्यु। वृषभे।

शिववीज न० ६त०। पारदे शिववीर्य्यादयोऽस्य।

शिवशेखर पु० शिवस्य शेखर इव । धुस्तूरे, वकपुष्पे च ।
शिवसुन्दरी स्त्री० ई० त० । दुर्गायाम् ।
शिवा स्त्री० शी-वन् नि० । मङ्गलवत्यां स्त्रियां, दुर्गायां, सुक्कौ, शृगाले, हरीतक्याम्, शमीवृक्षे, आमलक्यां, दूर्व्वायां, गौरी-चनायाञ्च ।
शिवानी स्त्री० शिवं कल्याणमानयति आ+नी-ड गौ० ङीष् । जयन्तीवृक्षे । शिवस्य पत्नी ङीप् आनुक् च । दुर्गायाम् ।
शिवापीड़ पु० ई० त० । वकवृक्षे ।
शिवाफला स्त्री० शिवाया इव फलं यस्याः । शमीवृक्षे ।
शिवालय न० शिव आलीयतेऽत्र ली-अच् । श्मशाने ई० त० । रक्त-तुलस्यां महादेवगृहे च पु० ।
शिवास्मृति स्त्री० शिवायाः स्मृतिर्यस्याः । जयन्तीवृक्षे तन्नामोच्चारणे हि जयन्तीनामकदुर्गायाः स्मरणम् ।
शिवाह्लाद पु० शिवमाह्लादयति आ+ह्लद-णिच्-अण् । वकवृक्षे
शिवाह्वा स्त्री० शिवस्येवाह्वा यस्याः । रुद्रजटावृक्षे ।
शिवि पु० शि-वि नि० न गुणः । हिंस्रपशौ, भूर्जवृक्षे उशीनरराज-सुते नृपभेदे च ।
शिविका स्त्री० शिवं करोति शिव+णिच्-खुल् । यानभेदे (डुली) ।
शिविर न० शी+किरच् वुग्न च । कटके सैन्यनिवासस्थाने ।
शिविष्ट पु० ई० त० । वकवृक्षे दूर्व्वायां स्त्री० । महादेवप्रिये त्रि० ।
शिशिर न० शश-किरच् नि० । हिमे, माघफाल्गुनमासद्वयात्मके ऋतुभेदे शीतले स्पर्शे च तद्वति त्रि० ।
शिशु पु० शी-कु सम्प्रसारणं हित्वम् । बालके स्वल्पे च ।
शिशुक पु० शिशुरिव स्वार्थे कन् । जलजन्तुभेदे (शुशुक) ।
शिशुगन्धा स्त्री० शिशुः स्वल्पो गन्धो यस्याः । मल्लिकाभेदे ।
शिशुचान्द्रायण न० चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः चतुरोऽस्मिंते स्वर्यं शिशुचान्द्रायणं स्मृतं'मित्यु क्ते व्रते ।
शिशुत्व न० ई० त० । शिशोर्भावः त्व । बाल्ये तत् शिशुतायत्र स्त्री० ।

शिशुपाल पु० चैद्यदेशीयराजभेदे दमघोषात्मजे ।

शिशुपालहन् पु० शिशुपालं हतवान् हन-भूते क्विप् श्रीकृष्णे ।

शिशुमार पु० शिशु मारयति मृ-णिच् । जलजन्तुभेदे गगनस्थे तारा-चक्रभेदे च ।

शिश्न पु० शश नक् नि० । मेढ्रे पुंचिह्नभेदे ।

शिश्निदान त्रि० शिश्न-कानच् द्वित्वम् । मैथुनकारके ।

शिष बधे भ्वा०पर०सक०सेट् । शेषति अशेषीत् ।

शिष परिशेषीकरणे वा चु०उ०पक्षे भ्वा०प०सक०सेट् । शेषयति ते शेषति अशीशिषत् त अशेषीत् ।

शिष विशेषे रुधा०प०सक०अनिट् । शिनष्टि अशिषत् ।

शिष्ट त्रि० शास-क्त । शास्त्रे, वेदवाक्ये विश्वासकरे, सुबोधे धीरे च ।

शिष्टाचार पु० शिष्टानामाचारः सद्व्यवहारे ।

शिष्टि स्त्री० शास-क्तिन् । आज्ञायां, शासने, ताडने च 'शिष्यशिष्टिरव-धेर्नेति स्मृतिः ।

शिष्य त्रि० शास-क्यप् । शिक्षणीये, छात्रे, उपदेश्ये च ।

शि(सि)क्थ पु० सिच्-थक् नि० सस्य शो वा । गन्धद्रव्यभेदे स्वार्थे कन् । तत्रैव ।

शी शयने अदा०आ०अक०सेट् । शेते अशयिष्ट । [अशीकिष्ट ।

शीक सेके सर्पणे च भ्वा०आ०सक०सेट् चङि न ह्रस्वः । शीकते शीक आमर्षे सेके च चु० उभ० पक्षे भ्वा०प०सक०सेट् । शीकयति ते शीकते अशीशिकत् त अशीकीत् ।

शीकर न० शीक अरन् । सरलद्रुवे, जलकणे, वायौ च ।

शीघ्र न० शिघि रक् षुट् । विलम्बाभावे त्वरिते च तद्वति त्रि० ।

शीघ्रजन्मन् पु० शीघ्रं जन्म यस्य । कदलीवृक्षे ।

शीघ्रपुष्प पु० शीघ्रं पुष्पं यस्य । वकवृक्षे ।

शीघ्रवेधिन् पु० शीघ्रं विधति विध-णिनि । शीघ्रलक्ष्यवेधनकर्त्तरि ।

शीत न० शी-क्त । शीतले, जले, हिमे च । वरुणवारवृक्षे असनवृक्षे शेलुवृक्षे च पु० । शीतस्पर्शवति त्रि० ।

शीतक पु० शीतमिव करोति । दीर्घकृत्यपि आलस्यहेतुत्वात् आर्द्रकरञ्जाय शीतत्वाभावाभिनीय कुत्सिते शी+स्वार्थे कन् । शीतपदार्थे, शीतकाले, दधिके च ।

शीतकर पु० शीतः शीतलः करो यस्य । चन्द्रे । कर्पूरे च । शीतकिरणाद्योऽप्यत्र त्रि० शीतकारके ।

शीतकाल पु० ६त० हिमऋतौ माघपौषमासद्वयात्मके काले ।

शीतकुम्भ पु० शीतं स्कुम्भाति स्कुभ-अच् नि० । करवीरे ।

शीतकृच्छ्र पु० 'त्रिरहं शीतं पिबेत् तोयं त्रिरहं शीतं पयः पिबेत् । त्रिरहं शीतं हृतं पीत्वा वायुभक्षपरस्त्यहमि'त्युक्ते व्रते ।

शीतक्षार न० कर्म० । श्वेतटङ्कणे ।

शीतगन्ध न० शीतः शीतलः गन्धो यस्य । श्वेतचन्दने ।

शीतगु पु० शीता गावः किरणाः यस्य । चन्द्रे, कर्पूरे च ।

शीतपर्णी स्त्री० शीतं पर्णं यस्याः ङीप् । अर्कपुष्पिकायाम् ।

शीतपल्लवा स्त्री० शीतः पल्लवो यस्याः । भूमिलम्ब्वाम् ।

शीतपाकिनी स्त्री० शीते पाकोऽस्यस्याः इनि । काकोल्याम् ।

शीतपाकी स्त्री० शीतेन पाको यस्याः ङीप् । द्राक्षालते, काकोल्यां च

शीतपुष्प पु० शीतं शीतवीर्यकरं पुष्पं यस्याः । शिरीषवृक्षे स्वार्थे कन् । श्वेतेये । अर्कवृक्षे च ।

शीतप्रभ पु० शीतस्य हिमस्येव प्रभा यस्य । कर्पूरे ।

शीतप्रिय पु० ६त० । पर्पटे ।

शीतफल पु० शीतं शीतवीर्यकरं फलमस्य । उदुम्बरे, श्रेष्ठे च ।

शीतबला स्त्री० शीतं बलं च यस्याः । महाबलायाम् ।

शीतभानु पु० शीताः शीतला भानवोऽस्य । चन्द्रे, कर्पूरे च ।

शीतभीरु स्त्री० ६त० । मल्लिकायाम् शीतभीते त्रि० ।

शीतमञ्जरी स्त्री० शीतकाले मञ्जरी यस्याः न कप् । शेफालिकायाम्,

शीतमूलक न० शीतं शीतवीर्यकरं मूलमस्य कप् । उशीरे ।

शीतरश्मि पु० शीतारश्मयोऽस्य । चन्द्रे, कर्पूरे च ।

शीतल पु० शीतं लाति ला-क शीतमूल्यस्य लच् वा । शीतस्पर्शे त्रि०

ति त्रि० । जलयोद्भवे-चन्द्रे, शैवेये, पद्मके, मौक्तिके वीरचन्दने, शैवेये च न० । अशनपर्ण्यां वकुलवारद्रुवे, चम्पके, चन्द्रे, कर्पूरे, राजे च पु० ।

शीतलक न० शीतलमिव दृश्यार्थे कन् । श्वेतोत्पले मरुवके पु० ।

शीतलच्छद पु० शीतलः शीतलस्पर्शवान् छदोऽस्य । चम्पके कर्म० । शीतलपत्रे पु० । [न० ।

शीतलजल न० शीतलं जलं यस्मात् । उत्पले कर्म० । शीतलवारिणि

शीतलवातक पु० शीतलो वातो धातुभेदो यस्मात् । अशनपर्ण्याम् । तत्सेवने हि वायोः शीतलता ।

शीतला स्त्री० देवीभेदे जलजदृक्षभेदे च । तत्र ङीप् च ।

शीतवल्क पु० शीतः शीतकरः वल्कोऽस्य । उडुम्बरे ।

शीतवीर्यक पु० शीतं शीतलकरं वीर्यं यस्मात् । प्लक्षवृक्षे ।

शीतशिव न० शीतं शीतलमपि शिवम् । सैन्धवलवणे । मिश्रेकायां शमीवृक्षे च स्त्री० । मधुरिकायाम् पु० ।

शीतसह पु० शीतं सहते सह-अच् । नीलुवृक्षे, नीलसिन्धुवारे च वासन्त्याम् स्त्री० । [म्बिन्यां, दूर्व्वायाञ्च ।

शीता स्त्री० शी-क्त । लाङ्गलपद्धतौ, रामपत्न्याम्, अतिबलायां वृद्धु-

शीतांशु पु० शीताः अंशवो यस्य । चन्द्रे, कर्पूरे च ।

शीताङ्गी स्त्री० शीतमङ्गमस्याः ङीप् । हंसपदीवृक्षे । शीतलदेहे त्रि०

शीतार्त्त त्रि० शीतेन आर्त्तः । शीतालौ ।

शीतालु त्रि० शीत+अस्त्यर्थे आलुच् । शीतबाधायुक्ते । [याम् ।

शीतावला स्त्री० शीतमावलयति आ+वल-णिच्-अण् । महाशमङ्गा-

शीत्कार पु० शीदित्यस्य कारः शीत्+कृ-घञ् । स्त्रीणां रतिकाले ध्वनिभेदे ।

शी(सी)त्य त्रि० शी(सी)तां अर्हति यत् । हलङ्कृष्टे क्षेत्रादौ ।

शीधु पु० न० । शी-धुक् । इक्षुरसजाते मद्यभेदे ।

शीधुगन्ध पु० शीधोरिव गन्धोऽस्य । बकुलवृक्षे ।

शीन त्रि० शो-क्त । घनीभूते दृढादौ । मूर्खे, अजगरे च पु० ।
शोभ कथने भ्वा०आ०स०सेट् चङि न ह्रस्वः । शोभते अशोभिष्ट ।
शोर पु० शी-रक् । अजगरसर्पे ।
शीर्ण त्रि० शॄ-क्त । क्षये, शुष्कतापाप्ते च ।
शीर्णपत्र पु० शीर्णं पत्रमस्य । कर्णिकारवृक्षे, निम्बे, पर्पटिका लोध्रे च । विशीर्णपत्रयुक्ते त्रि० । कर्म० विशीर्णे पर्णे न०
शीर्णपर्ण पु० शीर्णं पर्णमस्य । निम्बे, विशीर्णपत्रयुक्ते त्रि० कर्म० । विशीर्णे पर्णे न० । [कन् । तत्रैव ।
शीर्णपुष्पी स्त्री० शीर्णं पुष्पमस्याः ङीप् । अवाक्पुष्पाम् स्वार्थे
शीर्णमाला स्त्री० शीर्णानां माला इव । वृश्चिकपर्णाम् । कर्म० । विशीर्णे माल्ये ।
शीर्णवृन्त न० शीर्णं वृन्तमस्य । (नरसुज) फलवृन्ते ।
शीर्ष न० शिरस् वा शीर्षादेशः । मस्तके । शसादौ शीर्ष्णः इत्यादि ।
शीर्षक न० शीर्षे कायति कै-क । शिरस्त्राणे (टोपर) शिरोस्थि, जयपराजयपत्रस्नाय्वदण्डभेदे 'शीर्षकस्थेऽभियोक्तारो'ति स्मृतिः । स्वार्थे कन् । मस्तके न० । तेने कायति कै-क । राङ्यवृक्षे ।
शीर्षच्छेद्य त्रि० शीर्षच्छेदमर्हति यत् । वध्ये 'शीर्षच्छेद्यमतोऽहं-त्वा'मिति भट्टिः ।
शीर्षण्य पु० शीर्षे बध्यते शीर्ष यत् शीर्षन्नादेशः । शिरस्त्राणे । शीर्षे भवः यत् । विष्वदकेशे पु० केशजाते त्रि० ।
शीर्षरक्त न० शीर्षं रक्तति रक्त-अण् । शिरस्त्राणे ।
शील समाधौ भ्वा० पर० अक० सेट् । शीलति अशीलीत् । "सरसीः परिशीलितु"मित्यत्र नैषधम् । [ति अशिशीलत् त ।
शील अभ्यासे अतिशयने च अदं०चु० उभ० सक० सेट् । शीलयति
शील न० शील-अच् । स्वभावे, सद्वृत्ते, चरित्रे च । अजगरसर्पे पु० ।
शीलन न० शील-ल्युट् । अभ्यासे, अतिशयने, प्रवर्त्तने च ।
शीलित त्रि० शील-क्त । अभ्यस्ते, चीर्णे च ।
शुक गतौ भ्वा० पर० सक० सेट् । शोकति अशोकीत् ।

शुक्ति न० शुक क । ग्रन्थिपर्णे, वल्के, वल्काङ्गे च । व्यासशुक्ते, पक्षिभेदे शोनकवृक्षे च पु० ।

शुकच्छद न० शुकस्य छद इव छदो दलमस्य । ग्रन्थिपर्णे ।

शुकजिह्वा स्त्री० शुकस्येव जिह्वा पर्णमस्याः । (गुयाठोवा) वृक्षे ।

शुकतरु पु० शुकप्रियस्तरुः । शिरीषवृक्षे शुकद्रुमादयोऽस्यत्र ।

शुकदेव पु० व्यासपुत्रे ।

शुकनाशन पु० शुकं नाशयति नश-णिच्-ल्यु । द्रव्यभेदे ।

शुकनास पु० शुकस्य नासेव पत्त्रमस्याः । श्योनाकवृक्षे शुकतुल्यनासायुक्ते त्रि० । कादम्बरीग्रन्थप्रसिद्धे तारापीडन्यपमन्त्रिभेदे पु० ।

शुकपिण्डी पु० शुकानां प्रिया पिण्डीव । शुकशिम्बाम् ।

शुकपुच्छ पु० शुकस्य पुच्छ इव । गन्धके क्लीं० । शुकस्य पुच्छे पु० ।

शुकपुष्प शुक इव हरित् पुष्पमस्य । शिरीषवृक्षे ।

शुकप्रिय पु० क्लीं० । शिरीषवृक्षे, जम्बूं स्त्री० ।

शुकफल्ल पु० शुकइव फलमस्य । अर्कवृक्षे ।

शुकवल्लभ पु० क्लीं० । दाडिमवृक्षे क्लीं० । तस्य प्रिये त्रि० ।

शुकशि(सि)म्बा स्त्री० शुक इव शि(सि)म्बा । कपिकच्छूम् ।

शुकादन पु० शुकैरद्यते अद ल्युट् । दाडिमे ।

शुकानना स्त्री० शुकस्यानन मिव पत्त्रमस्याः । (गुयाठोठी) वृक्षे ।

शुकोदर न० शुकस्योदरमिव । तालीशपत्त्रे क्लीं० । शुकस्योदरे ।

शुक्त न० शुच-क्त । मांसे, काञ्जिके, द्रवद्रव्यभेदे, 'शुक्तं यन्मधुरं कालवशादम्लत्वमागत' मित्युक्ते पदार्थे च 'दधि शुक्तेषु भोक्तव्य' मिति मनुः । निष्ठुरे पूते, श्लिष्टे, दुर्ज्जने, अम्ले, च त्रि० चुक्रिकायां स्त्री० ।

शुक्ति स्त्री० शुच-क्तिन् । जलजन्तुभेदे (झिनुक) कपालखण्डे, शङ्खे, शङ्खनखे, नखाम् अर्शोरोगे, अम्लावर्त्तके, चक्षुरोगभेदे च ।

शुक्तिका स्त्री० शुक्तिरेव कन् । (झिनुक) शुक्तास्फोटे, चुक्रिकायाञ्च ।

शुक्तिज न० शुक्तौ जायते जन-ड । शुक्तायाम् ।

शुक्तिमत् पु० शुक्तिरस्यास्ति मतुप् । पर्वतभेदे । नदीभेदे स्त्री० ङीप् ।

शुक्र न० शुच रक् नि० कुत्वम् । मज्जजाते धातौ, नेत्ररोगभेदे च । यहभेदे, दैत्यगुरौ, अग्नौ, चित्रकवृक्षे, ज्यैष्ठमासे, विष्कम्भादिषु योगेषु मध्ये चतुर्विंशे योगे च पु० । [त्रि० ।

शुक्रकर पु० शुक्रं वीर्य्यं करोति कृ-अच् । मज्जधातौ । वीर्य्यकारके

शुक्रभुज् स्त्री० शुक्रं भुङ्क्ते भुज-क्विप् । मयूरजातिस्त्रियाम् ।

शुक्रला स्त्री० शुक्रं लाति ला-क । उच्चटावृक्षे ।

शुक्रशिष्य पु० ६त० । दैत्ये अङ्गिरे ।

शुक्रिय त्रि० शुक्रो देवताऽस्य तस्येदम् वा घ । शुक्रसम्बन्धिनि तद्देवते, यजुर्वेदीये 'शुक्रं वाचमि'त्यादिके षट्त्रिंशत्तमे शान्त्यध्याये न० ।

शुक्ल न० शुच-लक् कुत्वम् । रजते, नवनीते, अक्षिरोगभेदे च । श्वेतवर्णे पु० । श्वेतवर्णवति शुद्धे च त्रि० ।

शुक्लकन्द पु० शुक्लः कन्दो यस्य । महिषकन्दे । अतिविषायां स्त्री० । कर्म० । श्वेते कन्दे ।

शुक्लकर्म्मन् त्रि० शुक्लं शुद्धं कर्म यस्य । पवित्रे शुभचरित्रे ।

शुक्लकुष्ठ न० कर्म० । श्वेतकुष्ठे (धवल) ।

शुक्लदुग्ध पु० शुक्लं दुग्धमस्य । इक्ष्वाकौ । श्वेतनिर्य्यासवति त्रि० ।

शुक्लधातु पु० कर्म० । कटिन्याम् (खड़ि)

शुक्लपक्ष पु० कर्म० । कृष्णानुगुणचन्द्रकलाकियायुक्तदर्शकालके चान्द्रमासार्द्धे काले, श्वेतपक्षे, काके, बके च ।

शुक्लपुष्प पु० शुक्लं पुष्पमस्य । कुटजवृक्षे, कुन्दवृक्षे, मरुवके च । श्वेतपुष्पवति त्रि० नागदन्त्यां स्त्री० ङीप् । कर्म० शुभ्रे पुष्पे न० ।

शुक्लपृष्ठक पु० शुक्लं पृष्ठमस्य कप् । सिन्धुकवृक्षे ।

शुक्लरोहित पु० वर्णौ वर्णेनेति कर्म० । श्वेतरक्ते वर्णे, तद्वति त्रि० ।

शुक्लला स्त्री० शुक्लं लाति ला-क । उच्चटायाम् ।

शुक्लवायस पु० कर्म० । बके, श्वेतकाके च ।

शुक्लशाल पु० कर्म० । गिरिनिम्बे श्वेतवर्णवृक्षे च ।

शुक्ला स्त्री० शुक्ल+अर्श आद्यच् टाप् । सरस्वत्यां, शर्करायां, काकोलव्यां, विदार्य्यां, द्रुतायां, श्वेतवर्णवत्यां, स्त्रियाञ्च ।

शुक्लाङ्गी स्त्री०शुक्लमङ्गमस्याः ङीप् । श्वेतकण्टिकायाम्, श्वेताङ्गयुक्ते त्रि० ।
शुक्लापाङ्ग पु० शुक्लः अपाङ्गो यस्य । मयूरे ।
शुक्लाम्ल न० कर्म० । अम्लशाके ।
शुक्लिमन् पु० शुक्लस्य भावः इमनिच् । श्वेतवर्णे ।
शुक्लोपला स्त्री० कर्म० स अस्त्यस्याः अच् । शर्करायाम् ।
शुङ्ग पु० शम ग तस्य नेत्वं नि० अत उत्वञ्च । वटवृक्षे, आम्रातके, शूके च । पर्पटीवृक्षे धान्यादिशूके च स्त्री० ।
शुङ्गाकर्म्मन् न० शुङ्गैः वटपल्लवैः आ सम्यक् कर्म यत्र । पुंसवनसंस्कारभेदे ।
शुङ्गिन् पु० शुङ्गोऽस्त्यस्य इनि । वटवृक्षे । शुङ्गवति त्रि० ।
शुच् स्त्री० शुच-क्विप् । शोके । वा टाप् । तत्रैव ।
शुच शोचे क्लेदे च दिवा० उभ० अक० सेट् । शुच्यति ते अशुचत् अशोचीत् अशोचिष्ट ।
शुच शोके भ्वा० पर० सक० सेट् । शोचति अशोचीत् ।
शुचि पु० शुच-किन् । यक्षौ, चित्रकवृक्षे, ज्यैष्ठमासे, आषाढमासे शुक्लाचरणे, ग्रीष्मे, ऋतौ, शुक्लमन्त्रिणि, अग्निभेदे श्वेतवर्णे च । तद्वति त्रि० ।
शुचिद्रुम पु० कर्म० । अश्वत्थवृक्षे ।
शुचिमल्लिका स्त्री० कर्म० । नवमल्लिकायाम् ।
शुच्य अभिषवे भ्वा०पर० सक० सेट् निष्ठा अनिट् । शुच्यति अशुच्यीत् ।
शुठ गतिविघाते भ्वा० पर० सक० सेट् । शोठति अशोठीत् ।
शुठ आलस्ये चु० उभ० सक० सेट् । शोठयति ते अशूशुठत् ।
शुठ शोधने वा० चु० उभ०पक्षे भ्वा० पर० सक० सेट् इदित् । शुण्ठयति ते शुण्ठति अशुशुण्ठत् त अशुण्ठीत् ।
शुण्ठि(ण्ठी) स्त्री० शुठि-इन् वा ङीष् । (शुंठ) । वृक्षे ।
शुण्ठ गतौ तु० पर०सक० सेट् । शुण्णति अशोण्णीत् ।
शुण्ड पु० शुण्ड-ड तस्य नेत्वम् । मदनिर्झरे, गजहस्ते पु० स्त्री० ।

स्त्रीपक्षे टाप् मद्यपानगृहे वेश्यायाम् सुरायां मलिन्यां कुट्टिन्याम् जलहस्तिन्याञ्च स्त्री० ।

शुण्डार पु० शुण्डा अस्त्यर्थे र । शौण्डिके, हस्तिनि च । अपकर्षे र । अपकृष्टशुण्डायाम् । अच् । हस्तिनि । [इक्षे ।

शुण्डी स्त्री० शुण्डाकारोऽस्त्यस्याः अच् गौ० ङीष् । (क्षतिशुण्डा)

शुद्ध न० शुध-क्त । सैन्धवलवणे, मरिचे च । केवले, निर्दोषे, पवित्रे, शुभ्रे च त्रि० ।

शुद्धवल्ली स्त्री० कर्म० । गुडूच्याम् पवित्रायां-लतायाञ्च ।

शुद्धान्त पु० शुद्धः अन्तः पर्य्यन्तो यस्य । अन्तःपुरे, उपचारात् तत्स्थितायां राजयोषिति पु० स्त्री० । 'शुद्धान्तसंयोगनिताम्तुष्टे इति नैषधम् ।

शुद्धापह्नुति स्त्री० कर्म० । अर्थालङ्कारभेदे ।

शुद्धि स्त्री० शुध-क्तिन् । मार्জ্জने नैर्मल्यसंपादने वैदिककर्मयोग्यतासम्पादकसंस्कारभेदे च ।

शुनीहनि पु० मौद्गभेदे ।

शुध शौचे शोधने, निःशेषभवने च दि० पर० सक०अनिट् । शुध्यति अशुधत् । 'भक्तो हरः शुध्यति यद्गुणः स्यादिति स्त्री० ।

शुन गतौ तु० पर० सक० सेट् । शुनति अशोनीत् ।

शुन पु० शुन-क । कुक्कुरे । इक् । तत्रैव । [भेदे ।

शुनःशेफ पु० शुन इव शेफोऽस्य अलुक्स० । विश्वामित्रशिष्ये मुनि-

शुनक्क पु० शुन इव कन् । मुनिभेदे स्वार्थे कन् । कुक्कुरे ।

शुनी स्त्री० श्वन्+स्त्रियां ङीष् । कुक्कुरयोषिति, कुम्भाण्ड्यां च ।

शुन्ध शुद्धौ चु० उ०सक० सेट् । शुन्धयति ते अशुशुन्धत् त ।

शुन्ध शुद्धौ अक० शुद्धीकरणे सक० भ्वा० उभ० सेट् । शुन्धति ते 'आपः शुन्धन्तुमैनसः' इति वेदमन्त्रः । अशुन्धीत् । अशुन्धिष्ट ।

शुन्भ दीप्तौ अक० मर्दने च सक० तु० पर० सेट् । शुम्भति अशुम्भीत् 'प्रागप्राप्तनिशुम्भशुम्भवधनु'रिति वीरचरितम् ।

शुम्भ दीप्तौ अक० हिंसने च० तु० तुदा०प० सेट् । शुम्भति अशोभीत्

शुभ दीप्तौ भ्वा० आ० अक० सेट्। शोभते अशुभत्।

शुभ न० शुभ-क। मङ्गले, पद्मकाष्ठे च। शुभयुक्ते त्रि०। विष्कम्भादिषु मध्ये त्रयोविंशयोगे पु०। [भट्टिः।

शुभंयु त्रि० शुभम्+अस्त्यर्थे युस्। शुभान्विते "क्षितिपः शुभंयु"रिति

शुभगन्धक न० शुभो गन्धोऽस्य। बोले।

शुभग्रह पु० शुभः शुभदायकः ग्रहः। सौम्यग्रहे गुरौ शुक्रे अर्द्धाधिकचन्द्रे, पापग्रहायुक्ते बुधे च। [दुर्गायां स्त्री०।

शुभङ्कर त्रि० शुभं करोति कृ-अच् मुम् च। मङ्गलकारके।

शुभद पु० शुभं ददाति दा-क। अश्वत्थवृक्षे मङ्गलदातरि त्रि०।

शुभपत्रो स्त्री० शुभानि पत्राण्यस्याः ङीप्। (शालपान) क्षुपे।

शुभा स्त्री० शुभ-क। शोभायां, कान्तौ रोचनायां, गोरोचनायां, शम्यां, प्रियङ्गौ, श्वेतदूर्व्वायां, देवसभायाञ्च।

शुभाञ्जन पु० शुभ-क शुभम् अञ्जनं यस्मात्। शोभाञ्जनवृक्षे।

शुभ्र न० शुभ-रक्। अभ्रके, रौप्ये, कांसीसे च। चन्द्रे, श्वेतवर्णे च पु०। तद्वति त्रि०। [शुभ्रतयोऽयत्र।

शुभ्रकर पु० शुभ्राः करोऽस्य। चन्द्रे, कर्पूरे च। शुभ्रकिरणशुभ्रांशुप्रभृतयोऽत्र।

शुभ्रदन्ती स्त्री० शुभ्रो दन्तो यस्याः ङीप्। पुष्पदन्तिगजदोषिति।

शुभ्रालु पु० कर्म०। महिषकन्दे।

शुम्भ पु० शुभ-अच्। दानवभेदे।

शुम्भमर्दिनी स्त्री० शुम्भं मर्दयति मृद-णिनि। दुर्गायाम्।

शुर भारणे स्तम्भने च दि०आ०सक०सेट्। शूर्य्यते अशोरिष्ट।

शुल्क कथने, सर्जने, वर्जने च चु०उभ०सक०सेट्। शुल्कयति ते अशुशुल्कत् त।

शुल्क पु० न० शुल्क्यते अतिसृज्यते कर्मणि घञ्। घट्टादिदेये राजग्राह्यकरभेदे, वरपक्षात्, कन्यापक्षीयैः ग्राह्ये धने स्त्रीधनभेदे, 'भगिनीशुल्कं सोदर्य्याणा'मिति स्मृतिः स्त्रीभ्यः सम्भोगार्थं देये धने, 'अशुल्कोपहृतायान्तु पितृदायोद्भवेव ते' स्मृतिः पणे च।

शुल्कस्थान न० ६त० । (घाटि) घट्टे, भूपानां क्रयविक्रययोग्य-द्रव्यकरादानस्थाने ।

शुल्ल न० शुल्व-अच् पृ० । ताम्रे, रज्जौ च ।

शुल्व माने दाने च चु०उभ०सक०सेट् । शुल्वयति ते अशुशुल्वत् त ।

शुल्व न० शुल्व-अच् । ताम्रे, रज्जौ च । जलसमीपे, आचारे, यज्ञकार्य्ये च ।

शुल्वारि पु० ६त० । गन्धके तस्य ताम्रादिजारकत्वात् तथात्वम् ।

शुश्रूषण न० शु-सन्-ल्युट् । सेवायाम् । युच् । तत्रैव स्त्री० ।

शुश्रूषा स्त्री० शु-सन्-अ । श्रवणेच्छायाम्, उपासनायाञ्च ।

शुष शोषे दि०प०सक०अनिट् । शुष्यति अशुषत् ।

शुष पु० शुष-क । मत्स्ये, विले च ।

शुषि स्त्री० शुष-इक् । शोषणे, विले च ।

शुषिर न० शुष-किरच् । छिद्रे, वंशादिवाद्ये च । सच्छिद्रे त्रि० मूषिके, अग्नौ च पु० । नद्यां, नलीनामगन्धद्रव्ये च स्त्री० ।

शुष्क त्रि० शुष-क्त । आतपादिना कृतशोषणे । [पर्णे न० ।

शुष्कपत्र न० शुष्कं पत्रमस्य । (नालता) शाकभेदे । कर्म० । शुष्के

शुष्कल न० शुष्कं शोषणं लाति ला-क । शुष्कमांसे ।

शुष्कवृक्ष पु० कर्म० । यवतृक्षे ।

शुष्कवैर न० शुष्कं फलशून्यं वैरम् । उद्देश्यशून्ये कलहे ।

शुष्कव्रण पु० कर्म० । (घेटा) क्रिमिरूपे व्रणे ।

शुष्काङ्ग पु० शुष्कमङ्गमस्य । भवतृक्षे (भगाछ) शुष्काययवे त्रि० स्त्रियां ङीप् । सा च गैरिकायाञ्च ।

शुष्कार्द्रक न० शुष्कमार्द्रकम् । शुण्ठ्याम् (शुँठ) ।

शुष्म न० शुष-मन् किच्च । तेजसि, पराक्रमे च । सूर्य्ये, अग्नौ, चित्रकवृक्षे, वायौ, [च पु० ।

शुष्मन् न० शुष-ङ्मनिप् । तेजसि, शौर्य्ये च । अग्नौ, चित्रकवृक्षे

शूक पु० न० शो-ऊकक् । (शुक्ना) तीक्ष्णाग्रे, शिखायाञ्च ।

शूकशिम्बिट पु० शूकाकाररोमयुक्तः कोटः । (शुयापोका) कीटभेदे ।

शूकधान्य न० शूकयुक्तं धान्यम् शाक० । यवादौ धान्ये ।

शूकपिण्ड(ण्डी) स्त्री० शूकस्य पिण्डीव । शूकशिम्बाम् ।

शूकर पु० शूद्रत्वव्यक्तं शब्दं करोति क-अच् शूक+अस्त्यर्थे र वा । स्वनामख्याते पशौ ।

शूकरकन्द पु० शूकर इव रोमशः कन्दोऽस्य । वाराहीकन्दे ।

शूकरपादिका स्त्री० शूकरस्येव पादाः मूलान्यस्याः ङीप् संज्ञायां कन् । कोलशिम्बाम् । [क्रान्तायाम् ।

शूकराक्रान्ता स्त्री० शूकरेणाक्रम्यते स्म आ+क्रम-क्त ३त० । वराह-

शूकरी स्त्री० शूकर आक्रामकत्वेनास्त्यस्याः अच् गौ०ङीष् । वराहक्रान्तायाम् । शूकर+पुंयोगे ङीप् तज्जातिस्त्रियाम् ।

शूकरेष्ट पु० ६त० । कसेरुनामकन्दे । वराहप्रियद्रव्ये त्रि० ।

शूकवती स्त्री० शूकस्तीक्ष्णाग्रकस्त्यस्याः मतुप् मस्य वः । कपिकच्छ्वाम् ।

शूकशिम्बा स्त्री० शूकयुक्ता शिम्बा । कपिकच्छ्वाम् ।

शूकशिम्बि (म्बी) स्त्री० शूकयुक्ता शिम्बिः वा ङीप् । कपिकच्छ्वाम् ।

शूका स्त्री० शूकोऽस्त्रग्रस्याः अच् । कपिकच्छ्वाम् ।

शूद्र पु० शुच-रक् पृ० चस्य दः दीर्घश्च । चतुर्थे वर्णे । शुचाद्रवति पृ० । शोकहेतुकगतियुक्ते 'अह हारे त्वा शूद्रे'ति श्रुतिः शुचा द्रवणात् तत्रियस्यापि शूद्रत्वमिति शारीरकभाष्यम् । टाप् शूद्रा शूद्रजाति-स्त्रियाम् । पुंयोगे ङीप् । शूद्रभार्यायाम् ।

शूद्रकर्मन् न० शूद्रस्य शास्त्रविहितं कर्म । शूद्रकर्त्तव्ये द्विजसेवादौ शूद्रवत्त्वादयोऽप्यत्र ।

शूद्रप्रिय पु० ६त० । पलाण्डौ ।

शूद्रार्त्ता स्त्री० शूद्रेणार्त्ता पीड़िता । प्रियङ्गौ ।

शूद्रावेदिन् स्त्री० शूद्रां विन्दति विद-णिनि उप० । शूद्रजातिस्त्रिया विवाहकर्त्तरि । 'शूद्रावेदी पतत्यत्रेरिति स्मृ० ।

शूद्रासुत पु० शूद्रायाः द्विजातिभिः जढायाः सुतः । द्विजातिजाते शूद्रजातिस्त्रिया सुते पुत्रभेदे ।

शूना स्त्री॰ शि-अधिकरणे-क्त । प्राणिवधस्थाने 'पञ्च शूनाऽऽदृस्थस्थे'ति स्मृतिः (आलजिभ) अधोजिह्वायाञ्च ।

शून्य त्रि॰ शूनाय प्राणिवधाय हितम् रहस्यस्थानत्वात् यत् । निर्ज्जनस्थाने, आकाशे, विन्दुमात्रे, अभावे च । असम्पूर्णे, जने, तुच्छे च त्रि॰ ।

शून्यमध्य पु॰ शून्यमाकाशो मध्ये यस्य । नले । शून्यमध्ययुक्ते त्रि॰।

शून्यवादिन् पु॰ शून्यमभावमात्रं सर्वकारणतया वदंति वद्-णिनि । बौद्धभेदे । [(फाणिमनसा) ।

शून्या स्त्री॰ शून्यमस्त्रस्याः अच् । नल्याम् महाकरञ्जवृक्षे च ।

शूर हिंसे स्तम्भे च दि॰ आत्म॰ सक॰ सेट् । शूर्य्यते अशूरिष्ट ।

शूर विक्रमे अ॰ चु॰ उभ॰ सक॰ सेट् । शूरयति ते अशुशूरत् त ।

शूर पु॰ शूर-अच् । वीरे, विक्रमवति, यदुदेवनामनि, यादवे, सूर्य्ये, सिंहे, शूकरे, चित्रकवृक्षे, बाले, निकुचे, मत्स्यभेदे च ।

शूरण पु॰ शूर-ल्यु (ओल) मूलभेदे, श्लोनाकवृक्षे च ।

शूरसेन पु॰ शूरा सेना यस्य, यस्य वा । देशभेदे, नृपभेदे च ।

शूर्प माने चु॰ उ॰ सक॰ सेट् । शूर्पयति ते अशुशूर्पत् त ।

शूर्प पु॰ शूर्प्यते धान्यादिकमनेन शूर्प-घञ् । (कुलो) धान्यस्फोटके, वंशमयपात्रे, द्रोणद्वयपरिमाणे च ।

शूर्पकर्ण पु॰ शूर्प इव कर्णौ यस्य । गजे ।

शूर्पणखा (खी) स्त्री॰ शूर्प एव नखा अस्याः णत्वम् वा ङीप् । रावणभगिन्याम् ।

शूर्पपर्णी स्त्री॰ शूर्प इव पर्णान्यस्याः ङीप् । शिम्बीभेदे ।

शूर्म्म प॰ सुष्ठु ऊर्म्मिरस्यस्याः पृ॰ । लौहप्रतिमायाम् ।

शूर्म्मि(ल्ल)र्म्मि(र्मी) स्त्री॰ सुष्ठु ऊर्म्मिः यस्याः वा णत्वम् वा ङीप् । लौहादिप्रतिमायाम् ।

शूल रुजायां भ्वा॰ प॰ अक॰ सेट् । शूलति अशूलीत् ।

शूल पु॰ न॰ शूल-क । रोगभेदे, व्ययायां, सुतीक्ष्णे अयःफाले, त्रिशूले च । चिह्ने, सुनिभेदे, विष्कम्भादिषु नवमयोगे च पु॰ ।

शूलग्रन्थि पु० शूलाकारः ग्रन्थिरस्य । मालादूर्वायाम् ।
शूलघातन न० शूलं रोगभेदं घातयति हन-णिच्-ल्यु । मरडूरे ।
शूलघ्न पु० शूलं हन्ति हन-क । तम्बूरटक्षे ।
शूलद्विष् पु० इत० । हिङ्गौ ।
शूलधन्वन् पु० शूलं धनुरायुधमस्य अनङ् समा० । शिवे ।
शूलधर पु० शूलं धारयति धारि-अच् । शिवे । शूलश्चादयोऽप्यत्र ।
शूलधारिन् पु० शूलं धरति धृ-णिनि । शिवे दुर्गायां स्त्री० ।
शूलधृष् पु० शूलेन धर्षति धृष-क्विप् । शिवे । दुर्गायां स्त्री० ।
शूलनाशन न० शूलं नाशयति नश-णिच्-ल्यु । सौवर्चलवणे ।
शूलपाणि पु० शूलं पाणौ यस्य । शिवे । शूलहस्तादयोऽप्यत्र ।
शूलभञ्ज, पु० शूलस्य भञ्जः । एरण्डवृक्षे ।
शूलहल्ली स्त्री० शूलं हन्ति हन-टच् ङीप् । यवान्याम् ।
शूलहृत् पु० शूलं-हरति हृ-क्विप् । हिङ्गौ ।
शूलाक्रान्त त्रि० शूलेन विद्धा क्रान्तं पक्वमस्य शूल+डाच्+क्र-क्त । लौहादिकीलकेन विद्धा पक्वे मांसे । (क्राबाब) ।
शूलिक त्रि० शूलं पाकसाधनत्वेनास्त्रमस्य ठन् । शूलाक्रान्ते ।
शूलिन् पु० शूलमस्त्रमस्य इनि । शूलरोगयुक्ते, शूलास्त्रधारके त्रि०
शूलिन पु० शूलकारं फलमस्त्रमस्य इनन् । भाण्डीरवृक्षे ।
शूलोत्खा स्त्री० शूलेन उत्खन्यते उद्+खन-ड । सीमराज्याम् ।
शूल्य त्रि० शूले संस्कृतं यत् । शूलाक्रान्ते मांसे ।
शूष प्रसवे भा० प० सक० सेट् । शूषति अशूषीत् ।
शृ(स्नृ)गाल पु० अस्नृजं लाति ला-क पृ० (शेयाल) पशौ दैत्यभेदे, वासुदेवे, निष्ठुरे, खले च । [नृपभेदे ।
शृगालकण्टक पु० शृगालस्येव कण्टको यस्य । (शेयालकाँटा)
शृगालकोलि पु० शृगाल इव कण्टकितः कोलिः । (शेयालकुल) नृपभेदे । [पभेदे ।
शृगालघण्टी स्त्री० शृगाल इव कण्टकिनी घण्टी । कोकिलाक्षे वृ-
शृगालजम्बु स्त्री० शृगालप्रिया जम्बुः । गोडुम्बे (गोलुक) ।

शृगालविन्ना स्त्री० शृगालैर्विद्यते विद्-क्त । पृश्निपर्ण्याम् ।

शृगालिका स्त्री० शृगालस्य भार्य्या ङीप् स्वार्थे कन् । शृगालयोषिति शृगालीव स्वार्थे कन् । भयात् पलायने ।

शृगाली स्त्री० शृगालस्तत्पलायनं शीलमस्या नाडीत्वात् अच् ङीप् । पलायने । [पादबन्धने च ।

शृङ्खल पु० शृङ्खात् प्राधान्यात् खलत्यनेन पृ० । निगडे, लौहमये

शृङ्खली स्त्री० शृङ्खलः तदाकारोऽस्त्यस्याः अच् गौ०ङीष् । कोकिलाक्षे वृक्षे पुंस्कटीवस्त्रबन्धने च । रीतौ स्त्री० टाप् ।

शृङ्ग न० शृ-गन् पृ० ह्रस्वः । पर्वतोपरिभागे, प्राधान्ये, कामोद्रेके, पश्वादेर्विषाणे, वाद्यभेदे च । (शिङा) मद्गुरस्त्रियां स्त्री० ङीप् ।

शृङ्गक पु० शृङ्ग मत्र स्वार्थे कन् । जीरकवृक्षे ।

शृङ्गकन्द पु० शृङ्गमिव कन्दोऽस्य । शृङ्गाटके (पानीफल) ।

शृङ्गज न० शृङ्गे पर्वताग्रे जायते जन-ड । अगुरुचन्दने सरलवृक्षे पु० । शृङ्गजातमात्रे त्रि० ।

शृङ्गमूल पु० शृङ्गमिव मूलमस्य । शृङ्गाटके । [चम्पके ।

शृङ्गमोहिन् पु० शृङ्गाय कामोद्रेकाय मोहयति मुह-णिच् णिनि

शृङ्गला स्त्री० शृङ्गं तदाकारकलं लाति ला-क । अजशृङ्ग्राम् (गाङ्गरशिङा) ।

शृङ्गवत् पु० शृङ्गं प्राशस्त्येनास्त्यस्य मतुप् मस्य वः । भरतवर्षस्थ 'नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वता' इत्युक्ते सीमापर्वतभेदे । शृङ्गयुक्ते त्रि० ।

शृङ्गवेर न० शृङ्गमिव वेरमवयवो यस्य । आर्द्रके, शुण्ठ्याम्, रामभिल्लगुहचण्डालस्य पुरे च । स्वार्थे कन् । आर्द्रके ।

शृङ्गवेराभमूलक पु० शृङ्गवेरेण तुल्यं मूलमस्य कप् । एरकावृक्षे ।

शृङ्गाट पु० शृङ्गं प्राधान्यमटति अट-अण् । उत्तरस्थपर्वतभेदे चतुष्पथे, जलकण्टकिवृक्षे च तत्फले न० । (पानीफल) स्वार्थे कन् । तत्र, चतुष्पथे, अलङ्कारोक्तविन्ध्यभेदरूपे शब्दालङ्कारे च ।

शृङ्गार पु० शृङ्गं कामोद्रेकमृच्छत्यनेन ऋ-अण् । नाट्योक्ते रसभेदे

लवङ्गे सिन्दूरे। चूर्णे च ष्टङ्गं कारत्वेन अच्यति अण्। कालागुरुणि आर्द्रके च। ष्टङ्गं प्राधान्यलक्षणत्वेन अण्। भूषणे, गजभूषणे च स्वार्थे कन्। सिन्दूरे।

शृङ्गारिन् पु० ष्टङ्गारः जन्यत्वेनास्त्यस्य इनि। पूगे। तत्फलभक्षणे हि कामोद्रेकइति तथात्वम् गजे च। ज्ञवेगे त्रि०।

शृङ्गिक न० ष्टङ्गाकारोऽस्त्यस्य ठन्। विषभेदे। प्रतिष्ठायां स्त्री०।

शृङ्गिण पु० ष्टङ्गं प्राधान्येनास्त्यस्य इनन्। मेघे।

शृङ्गिन् पु० ष्टङ्गमस्त्यस्य इनि। मेघे, भारतवर्षस्य सीमापर्वतभेदे, पर्वतमात्रे, मुनिभेदे, वृक्षे च। ष्टङ्गयुक्ते त्रि० धेन्वां स्त्री० ङीप्।

शृत त्रि० ष्टृ—क्त। पक्वे।

शृध ऋषानशब्दे भ्वा० आ० लुङि लटि लङि च उ० अक० सेट् क्षावेट् वृता०। शर्द्धते अशृधत शर्त्तेति शर्द्धिष्यते।

शृध क्लेदने भ्वा० उ० स० सेट् क्षावेट्। शर्द्धति ते अशर्द्धीत् अशर्द्धिष्ट

शृ छिंसने क्र्या० प० प० अक० सेट्। शृणाति अशारीत्। शीर्यः

शेखर पु० शिखि—गतौ अरण् पु०। शिखायां, मूर्द्धस्थितमाल्ये च। ध—दायां स्त्री०।

° शी—पन्। शेफे शिश्ने। शयनकर्त्तरि त्रि०।

° पु० न०। शी—फन्। शिश्ने शी—असि कुक् च शेफोऽस्यत्र न० ...लिका स्त्री० शेरते इति शेफाः अलयो यत्र कप्। (शिउलि) सुमद्यके। [लिकायाम्।

शेफालो स्त्री० शेफाः शयनशालिनः अलयो यत्र ङीप्। शेफा-

शेमुषी स्त्री० शी—विच् शेः मोक्षस्तं सुषणाति सुष-क। बुद्धौ।

शेल गतौ चालने च भ्वा० पर० सक० सेट्। शेलति अशेलीत् चङि न ह्रस्वः।

शेलु पु० शेल-उण्। वङ्गवारवृक्षे।

शेव पु० शी-वन्। पुंश्चिह्ने शिश्ने।

शेवधि पु० शेः धनादिमोक्षस्य अवधिः। 'पद्मोऽस्त्रियां महापद्मः

शङ्खो मकरकच्छपौ । सुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नवेत्युक्ते नवविधे निधौ ।

शैवल न० शी-विच् तथाभूतः सन् वलते अच् । शैवाले । (सेओला)

शैवाल न० शेते विच् शेः सन् वलते घञ् । शैवाले ।

शैष पु० शिष-अच् । अनन्ते सर्पराजे सर्पभेदे, अवशेषे च ।

शैषा स्त्री० शिष-घञ् । निर्माल्यमात्रग्राही 'शेषामिव भर्तुराज्ञा'मिति कुमारः ।

शैक्ष पु० शिक्षां तन्नामग्रन्थमधीते वेत्ति वा अण् । शिक्षाग्रन्थाध्यायिनि, तद्वेत्तरि च । कन् । शिक्षकोऽप्यत्र ।

शैखरिक पु० शिखरे प्राचीराद्ये भवः ठक् । अपामार्गे ।

शैखरेय पु० शिखरे भवः ढक् । अपामार्गे ।

शैत्य न० शीतस्य भावः ष्यञ् । शीतलत्वे ।

शैथिल्य न० शिथिलस्य भावः ष्यञ् । अदृढ़संयोगभेदे ।

शैनेय पु० शिनेर्गोत्रापत्यम् ढक् । सात्यकिनाम्नि यादवे ।

शैल न० शिलायां भवः अण् । शैलेये गन्धद्रव्यभेदे । स्वार्थे कन् । तत्र, शिलाजतुनि च । शिलाः सन्त्यस्य प्रभा० अण् । पर्वते पु० ।

शैलगन्ध न० शैलस्य शैलजस्येव गन्धोऽस्य । शाबरचन्दने ।

शैलज न० शैले पर्व्वते जायते जन-ड । खनामख्याते गन्धद्रव्यभेदे । गजपिप्पल्याम् दुर्गायाञ्च स्त्री० ।

शैलधर पु० शैलं गोवर्द्धनपर्वतं धरति भृ-अच् । श्रीकृष्णे ।

शैलपत्र पु० शैलमिव सुगन्धि पत्रमस्य । विल्ववृक्षे ।

शैलभित्ति पु० शैलं भिनत्ति भिद-क्विच् । टङ्के पाषाणदारणास्त्रे ।

शैलराज पु० शैलानां नगानां राजा टच् समा० । हिमाचले

शैलवीज पु० शैलं तन्मर्ज्जनं दूरं धावति अण् शैलं बीजं यस्य । भल्लातके ।

शैलशिविर न० शैलानां नगानां शिविरमिव । सद्मनि

शैलसार पु० न० शैलस्य सारत्व । शिलाजतुनि ।

शैलसुता स्त्री० ६त० । पार्व्वत्याम् ।

शैलाग्र न० शैलस्याग्रम्। पर्वतशृङ्गे।

शैलाज न० शिलायां जायते जन–ड स्वार्थेऽण्। शैलजे।

शैलाट पु० शैलं पर्वतमटति अट–अण्। सिंहे, किराते, शुक्लवर्णकाके, देवले च।

शैलादि पु० शिलादस्यापत्यम् इञ्। शिवपार्श्वचरे नन्दिनि।

शैलालिन् पु० शिलालिना प्रोक्तं नटसूत्रमधीयते णिनि। नटे शैलूषे।

शैली स्त्री० शीलमेव स्वार्थे अण् ङीप्। चारित्रे, 'आचार्याणां नियं शैली यत्सामान्येनाभिधाय विशेषेण विवृणोतीति प्राञ्चः।

शैलूष पु० शिलूषस्यापत्यम् अण्। नटे, विल्ववृक्षे, धूर्त्ते, तालधारके च

शैलूषिक पु० शैलूषं तदुपजीव्यत्वेऽस्य ठक। 'इत्यन्वेषी नटानान्तु स तु शैलूषिकः स्मृत" इत्युक्ते नटवृत्त्यन्वेषिणि नट प्रधाने, तत्पत्न्यां स्त्री० ङीप् 'नटीं शैलूषिकीं चैव रजकीं वेणु जीविनीम्। गत्वा चाद्रायणं कुर्यादिति स्मृतिः।

शैलेन्द्र पु० शैलः इन्द्र इव। हिमालये। ६त०। शैलेशादयोऽप्यत्र

शैलेन्द्रज पु० शैलेन्द्रे हिमालये जायते जन–ड। भूर्जवृक्षे।

शैलेय न० शिलायां भवः ढक्। शैलजाख्ये गन्धद्रव्यभेदे पर्वतजातमात्रे त्रि०। सिंहे, भ्रमरे च पु०।

शैलोद्भवा स्त्री० शैलं पर्वतमुद्भिद्य भवति भू–अच्। क्षुद्रपाषाणभेदिनि वृक्षे पार्वत्याञ्च।

शैव न० शिवमर्हति शिवो देवतास्य अण्। वेदव्यासप्रणीते शिवप्रभाववर्णनात्मके महापुराणभेदे। शिवो देवताऽस्य अण्। शिवभक्ते त्रि०। तस्येदमण्। शिवसम्बन्धिनि त्रि०] शैवले न०।

शैवल न० शी+वलच्। पद्मकाष्ठे, शैवाले च 'बहतो बङ्गशैवलच्छन्नतामिति नैषधम्।

शैवलिनी स्त्री० शैवलानि सन्त्यस्याः इनि। नद्याम्। [शैभेदे।

शैवाल न० शी–वालच् स्वार्थे अण्। (शेओयाला) जलजाते पदा-

शैव्य पु० शिवेर्गोत्रापत्यम् ञ्य। शिविगोत्रजे राजभेदे 'शैव्यश्च नरपु-

ध्रुवं इति गीता। शिविनोऽधिगतः अत्र। वोटकजाते, शौण्डीयाख्य वोटके च।

शैशव न० शिशोर्भावः अण्। शिशुकाले अवस्थाभेदे।

शैशिर पु० शिशिरं प्रियं यस्य अण्। श्यामचटके। शिशिरे भवः। छत्वण्। शिशिरजाते त्रि०।

शो तीक्ष्णीकरणे दिवा०प०सक०अनिट्। श्यति अशात्—अशीत्।

शोक पु० शुच—घञ्। इष्टवियोगजाते दुःखानुगुणे चित्तवृत्तिभेदे।

शोकनाश पु० शोकं नाशयति नश—णिच्—अण्। अशोकवृक्षे। ६त०। शोकध्वंसे।

शोकहारी स्त्री०शोकं हरति हृ—अण् ङीप्। वनवर्वरिकायाम्

शोकारि पु०६त०। कदम्बवृक्षे।

शोचिष्केश पु० शोचिः केशइव यस्य। वह्नौ, चित्रकवृक्षे च।

शोचिस् न० शुच—इसि। प्रभायाम्, रोचिषि च। [तत्रैव।

शोच्य त्रि० शुच—यत्। क्षुद्रे, अवरे अनुकम्पनीये च। स्वार्थे, कन्।

शोण गतौ सक०वर्णे अक० भ्वा० पर० सेट्। शोणति अशोणीत्। चङि न ह्रस्वः।

शोण न० शोण-अच्। सिन्दूरे, रुधिरे च। रक्तशौ, सङ्गते, अग्नौ, चित्रके, श्योनाके वृक्षे, नदभेदे, रक्तवर्णे, च पु० तद्वति त्रि०। वनहरिद्रायां स्त्री०।

शोणक पु० शोणइव कन् श्योनाकवृक्षे।

शोणभिण्टिका स्त्री० कर्म्म०। शोणभिण्ट्याम्, रक्तसैवेये च।

शोणभिण्टी स्त्री० शोणा भिण्टीव। कुरुवके, कण्टकिन्याञ्च।

शोणपत्र पु० शोणं पत्रमस्य। रक्तपुनर्णवायाम्।

शोणपुष्पक पु० शोणं पुष्पमस्य कप्। कोविदारे।

शोणपुष्पी स्त्री० शोणं पुष्पमस्याः ङीप्। सिन्दूरपुष्पद्रुमे।

शोणरत्न न० कर्म०। पद्मरागमणौ।

शोणाक न० रक्तवर्णमकति अच् (शोना)। जपुभेदे

शोणित न० शोण इतच्। रुधिरे।

शोणितचन्दन न० शोणितं रुधिरमिव चन्दनम् । रक्तचन्दने
शोणितपुर न० शोणितमिव रक्तं पुरम् । बाणासुरनगरे ।
शोणोपल पु० कर्म० माणिक्ये मणौ । [तत्पुरु० ।
शोथ पु० शु-घञ् । कफपादादेः स्फीततारकारके रोगभेदे । स्वार्थे कन् ।
शोथघ्नी स्त्री० शोथं हन्ति हन-क । पुनर्नवायाम् शालपर्ण्याञ्च ।
शोधनाग्रके औषधमात्रे त्रि० ।
शोथजि(ह्व)त् पु० शोथं जयति हरति वा जि-हृ-क्विप् भल्लातके
शोथजिह्म पु० शोथे जिह्मः विपरीताचरणशाली । पुनर्नवायाम्
शोधन न० शुध-णिच्-ल्युट् । शौचे, विडायाम् मलादेर्विरेचने दोष-
निवारणे, व्रणादिनिर्यातने च । शुध-णिच्-ल्युट् । निम्बुके,
पु० । शुद्धिकारके त्रि० । शुध्यत्यनया करणे ल्युट् ङीप् ।
सम्मार्जन्याम्, ताम्बूलवल्ल्यां, नील्याञ्च स्त्री० ङीप् ।
शोधनाधीश न० ६त० । जयपाले ।
शोधित त्रि० शुध-णिच्-क्त । मलाद्यपहारेण कृतसंस्कारे, मार्जिते ।
शोफ पु० शु-फन् । शोथे ।
शोफघ्नी स्त्री० शोफं हन्ति हन-क । शालपर्ण्याम्, रक्तपुनर्नवायाञ्च
शोफनाशन पु० शोफं नाशयति नश-णिच्-ल्यु । नीलवृक्षे ।
शोफहृत् पु० शोफं हरति हृन-क्विप् । भल्लातके ।
शोभन न० शोभते शुभ-ल्यु । पद्मे, विष्कम्भादिषु पञ्चमे योगे पु० । शो-
भायुक्ते त्रि० ।
शोभनक पु० शोभनाय कायति कै-क । शोभाञ्जनवृक्षे ।
शोभना स्त्री० शोभयति लेपनात् शुभ-णिच्-ल्यु । हरिद्रायां, गोरो-
चनायाञ्च ।
शोभा स्त्री० शुभ-अ । दीप्तौ ।
शोभाञ्जन पु० शोभायै अञ्जते अनृज-ल्युट् । (सजना)वृक्षे
शोष पु० शुष-घञ् वातादिना जलाद्यपहारेण कठिनकरणे शोषयति
शुष-णिच्-अच् । यक्ष्मरोगे ।
शोषण न० शुष-ल्युट् । शोषणेन, रसास्वादने, शोषे च शोषयति शुष-

णिच्-ल्यु । उन्मादनः धोषणश्चेत्युक्ते अरणरभेदे, ग्रीनाकश्चर्चे च पु० ।

शौषसम्भव न० सम्भवत्यस्मात् सं-भू-अप् ६त० । पिप्पलीमूले

शौक न० शुकानां समूहः अण् शुकसमुदाये ।

शौकर न० शूकरस्य वराहस्येदम् अण् । तीर्थभेदे ।

शौक्तिकेय न० शुक्तिकायां भवम् । ढक् । शुक्तायाम् ।

शौक्तेय न० शुक्तौ भवम् ढक् । शुक्तायाम् ।

शौक्ल्य पु० शुक्लस्य भावः ष्यञ् । श्वेततायाम् श्वेतवर्णे ।

शौच न०शुचेर्भावः अण् । शुद्धौ, पवित्रतायाम् 'अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिन्दितैः स्वधर्म्मे च व्यवस्थानं शौचमित्यभिधीयते इति स्मृत्युक्ते धर्म्मविशेषे च ।

शौट गर्व्वे भ्वा० पर०सक० सेट् । शौटति अशौटीत् । चङि न ह्रस्वः

शौटीर पु० शौट-ईरन् । त्यागिनि-वीरे च । गर्व्वान्विते त्रि०

शौटीर्य्य न० शौटीरस्य वीरस्य भावः ष्यञ् । वीर्य्ये, पराक्रमे, गर्व्वे च।

शौड गर्व्वे भ्वा० पर० सक० सेट् चङि न ह्रस्वः । शौडति अशौडीत् ।

शौण्ड त्रि० शुण्डायां सुरायामभिरतः अण् । मत्ते, दक्षे च ।

शौण्डिक पु० शुण्डा सुरा पण्यमस्य ठक् । मद्यविक्रेतरि जातिभेदे।

शौण्डी स्त्री० शुण्डा करिकरस्तदाकारः अस्त्रास्य अण् गौ० ङीष् । चक्रे, गजशिक्षास्त्रे च।

शौण्डीर पु० शुण्डा गर्वोऽस्त्रास्य ईरन् स्वार्थेऽण् । गर्व्वान्विते त्रि० ।

शौद्र पु० शूद्रायां द्विजातिभिरूढायां भवः अण् । द्वादशपुत्रमध्ये शूद्राजाते द्विजातिपुत्रभेदे ।

शौद्धोदनि पु० शुद्धोदनस्यापत्यम् इञ् । बौद्धमुनिभेदे ।

शौधिका स्त्री० शोधः शोधनं मलविरेकस्तत्र हितः ठक् । रक्तकट्फौ।

शौनक पु० शुनकस्यापत्यमण् । मुनिभेदे 'नैमिषे निमिषक्षेत्रे ऋषयः शौनकादय' इति भागवतम् ।

शौनिक पु० शूना प्राणिवधस्थानं प्रयोजनमस्य ठक् । मांसविक्रेतरि (कसाइ) मृगयायां मृगयाशीले च ।

शौभ न०शोभायै हितम् अण्। व्योमगामिनि पुरभेदे। देवे पु०

शौभाञ्जन पु० शोभाञ्जनएव स्वार्थेऽण्। (सजना) वृक्षभेदे

शौभिक त्रि० शोभा शिल्पमस्य ठक्। इन्द्रजालिके।

शौरि पु० शूरस्य यादवभेदस्य वसुदेवस्य सूर्य्यस्य वा गोत्रापत्यम् इञ्। विष्णौ, शनैश्चरे च।

शौर्य्य नः शूरस्य भावः ष्यञ्। वीर्य्ये शक्तौ च।

शौल्किक पु० शुल्के राजादिदेये करे तदादाने अधिकृतः ठक्। शुल्कादानाधिकृते।

शौल्किशेय पु० शुल्किकाः देशभेदः तत्रः भवः ढक्। विषभेदे।

शौल्विक पु०शुल्वः कांस्यस्तन्मयपात्रादि पण्यमस्य ठक्। कांस्यकारे (काँसारी) जातिभेदे।

शौवस्तिक त्रि० श्वः परदिने भवः श्वस्+ठक् तुट् च। भाविदिनस्थायिनि पदार्थे।

शौष्कल पु० शुष्कलं शुष्कमांसं पण्यमस्य अण्। शुष्कमांसविक्रेतरि। तद्भक्ष्यमस्य अण्। शुष्कमांसभक्षके त्रि०।

श्रुत क्षरणे भा० पर० अक० सेट्। श्रोतति अश्रुतत् अश्रोतीत्

श्रुत्र क्षरणे भ्वा० पर० अक० सेचने सक० सेट्। स्रोतति अस्रुत्रत् अस्रोतीत्।

स्रोत पु० स्रुत्र-घञ्। समन्तात् सेचने।

श्मन् न० श्मेते शी-मनिन् डिच्च। सुखे, शवे अदन्तोऽप्यत्र।

श्मशान न० श्मानः शवाः शेरतेऽत्र शी-आनच् डिच्च। श्मन् शब्देन शवः प्रोक्तः शानं तत्स्थानमुच्यते' इति निरुक्ते। शवदाहस्थाने

श्मशानकाली स्त्री० श्मशानस्था काली। कालिकाभेदे।

श्मशानवासिन् पु० श्मशाने वसति वसे-णिनि। महादेवे वटुकभैरवे च। श्मशानवासकर्त्तरि चण्डालादौ त्रि०

श्मश्रु न० श्म पुंसुखं श्रूयते लक्ष्यतेऽनेन श्रु-डु। पुरुषमुखस्थे लोमसङ्घे। [घोटाख्यायां स्त्रियाम्।

श्मश्रुमुखी स्त्री० श्मश्रु मुखे यस्याः ङीप्। पुरुषलक्षणयुक्तायां

श्मश्रुल पु० श्मश्रु विद्यतेऽस्य लच्। श्मश्रुयुक्ते 'श्मश्रुलैर्मुखे रिपिरुः'।

श्मश्रुवर्द्धक पु० श्मश्रु वर्द्धयति छिनत्ति छध-ण्वुल्। नापिते क्षुरकर्म-कारके।

श्मील निमेषे भा० पर० अक० सेट्। श्मीलति अश्मीलीत्।

श्यान त्रि० श्यै-क्त सङ्कोचविशेषप्राप्ते घनीभूते 'पयश्चाश्यानकर्दमा-नितिरघुः।

श्याम पु० श्यै-मक्। इन्द्रदारकवृक्षे प्रयागतीर्थस्थे वटे, कोकिले, धु-स्तूरे, पीलुवृक्षे, श्यामाके, गन्धद्रव्ये, कृष्णवर्णे, हरिद्वर्णे च। तद्वति त्रि० सरिचे, सिन्धुलवणे च न०।

श्यामक न० श्याम+संज्ञायां कन्। रोहिषतृणे श्यामाके (शामा) धान्यभेदे पु०।

श्यामकण्ठ पु० श्यामः कण्ठोऽस्य। मयूरे, शिवे, नीलकण्ठ विहगे च

श्यामकन्दा स्त्री० श्यामः कन्दोऽस्याः अतिविषायाम्।

श्यामकाण्डा स्त्री० श्यामः काण्डोऽस्याः। गण्डदूर्वायाम्।

श्यामग्रन्थि स्त्री० श्यामो ग्रन्थिरस्याः। गण्डदूर्वायाम्।

श्यामपत्र पु० श्यामानि पत्राणि यस्य। तमालवृक्षे।

श्यामल पु० श्यामवर्णं लाति ला-क। पिप्पले कृष्णवर्णयुक्ते त्रि०। अश्वगन्धायां, कटभ्यां जम्ब्वां, कस्तूर्य्यांच स्त्री०।

श्यामलचूडा स्त्री० श्यामला चूडाऽस्याः। गुञ्जायाम्।

श्यामलता स्त्री० कर्म०। खनामख्याते लताभेदे। श्यामलस्य भावः तल्। कृष्णवर्णे, हरिद्वर्णे च।

श्यामलिका स्त्री० श्यामलोवर्णोऽस्त्रस्याः ठन्। नीलीवृक्षौषधौ

श्यामलेक्षु पु० कर्म० (काजला) इक्षुभेदे।

श्यामसुन्दर पु० श्यामोऽपि सुन्दरः। श्रीकृष्णे 'श्यामसुन्दर! ते दास्य इति भागवतम्।

श्यामा स्त्री० श्यै-मन्। शारिवौषधौ, प्रियङ्गौ, यमुनायां, रात्रौ, कृष्णत्रिवृति, नीलीवृक्षे, गुग्गुलौ, सोमलतायां, गुन्द्रायाम् कृष्णायाम्, अम्बिकायां गुडूच्यां, कस्तूर्य्याम्, वटपत्र्यां वन्द्रायां, नीलपुन-

र्णवायां, प्रिय्यङ्गवां, हरिद्रायां, नीलदूर्वायां, दुरालभायां, पद्मबीजे गवि, छायायां, शिंशपायां पक्षिभेदे (शामा) स्त्रीमात्रे "शीतकाले भवेदुष्णा ग्रीष्मे च सुखशीतला। तप्तकाञ्चनवर्णाभा या स्त्री श्यामेति कीर्त्तिते" त्यु॰ लक्षणे स्त्रीविशेषे च।

श्यामाक पु॰ श्यामेव स्वार्थे कन्। (श्यामा) धान्यभेदे।

श्यामाङ्ग पु॰ श्यामं हरिद्वर्णमङ्गमस्य। बुधग्रहे, कृष्णदेहे त्रि॰ स्त्रियां ङीप्, "श्यामाङ्गी विगताम्बरा" मिति तन्त्रम्।

श्यामाम्बी स्त्री॰ कर्म॰। नीलाम्बीशुमे।

श्याल पु॰ श्यै कालन्। पत्नीभ्रातरि स्वार्थे ठक् श्यालिकोऽप्यत्र।

श्यालिका स्त्री॰ श्यै-कालन् संज्ञायां कन्। अत इत्त्वम्। पत्नीभगिन्याम्।

श्याव पु॰ श्यै-वन्। कृष्णपीतमिश्रवर्णे। तद्वति त्रि॰।

श्यावदत् त्रि॰ श्यावो दन्तो यस्य दन्तादेशः श्यामवर्णदन्तयुक्ते

श्यावदन्त पु॰ कर्म॰। स्वभावतः कृष्णवर्णयुक्ते दन्ते, इत॰ कप्। तद्युक्ते त्रि॰ 'सुरापः श्यावदन्तक' इति स्मृतिः।

श्येत पु॰ श्यै-इतच्। शुक्लवर्णे तद्वति त्रि॰ स्त्रियां ङीप् तस्य नच। श्येत्नी।

श्येन पु॰ श्यै-इनन्। पक्षिभेदे (बाज) पाण्डुरवर्णे च तद्वति त्रि॰।

श्येनघण्टा स्त्री॰ श्येनस्य घण्टेव। दन्तीवृक्षे।

श्यै गतौ भ्वा॰ आ॰ सक॰ अनिट्। श्यायते अश्यास्त।

श्यैनम्माता स्त्री॰ श्येनस्य माता यत्र अण् तुम् च। शकुनायाम्।

श्यो(श्या)नाक पु॰ श्यै-ना(श्या)क। (शोणा) वृक्षभेदे।

श्रक्ष सर्पणे भ्वा॰ आ॰ सक॰ सेट् इदित्। श्रक्षते अश्रक्षिष्ट।

श्रग गतौ भ्वा॰ पर॰ सक॰ सेट् इदित्। श्रङ्कति अश्रङ्कीत्।

श्रण दाने भ्वा॰ पर॰ सक॰ सेट्। श्रणति अश्राणीत् अश्रणीत् घटादि॰ श्रणयति।

श्रण दाने चु॰ उ॰ सक॰ सेट्। श्राणयति ते अशिश्रणत् त।

अश्रैत् अव्य० श्री-डति । श्रद्धायाम् ।

अश्रथ यत्ने अक० प्रतिहर्षे सक० चु० उभ० सेट् । आश्रथयति ते अशि-

अश्रथ दौर्बल्ये अ० चु० उभ० अक० सेट् । अश्रथयति ते अशश्रथत् त ।

अश्रथ बधे भ्वा० पर० सक० सेट् । अश्रथति अश्रथीत् अश्राथीत् ।

अश्रथ बन्धे मोक्षे बधे च वा चु० उभ० पक्षे भ्वा० पर० सक० सेट् । आश्रथयति ते अश्रथति अशिश्रथत् त अश्रथीत् अश्राथीत् ।

अश्रथ शैथिल्ये अक० तत्कारणे सक० भ्वा० आ० सेट् इदित् । अश्रन्थते अशश्रन्थिष्ट ।

अश्रथन न० अश्रथ-ल्युट् । बधे यत्ने प्रतिहर्षे च ।

अश्रद्धा स्त्री० अत्-धा अङ् । आदरे, गुरुवेदान्तवाक्यादिषु विश्वासे, सृ-हायां, भृङ्वौ, चित्तप्रसादे प्रत्ययो 'धर्म्मकार्य्येषु सा श्रद्धेत्य भिधी-यते' इति स्मृत्युक्ते धर्म्मकार्य्येषु प्रत्यये च ।

अश्रद्धालु स्त्री० अश्रद्धा + आलुच् । सृहायत्यां स्त्रियाम् अश्रद्धायुक्ते त्रि०

अश्रन्थ ग्रन्थने बधे च वा चु० उ० पक्षे भ्वा० पर० सक० सेट् । अश्रन्थयति-ते अश्रन्थति अशश्रन्थत् त । अश्रन्थीत् ।

अश्रन्थ मोचने प्रतिहर्षे च क्र्या० पर० सक० सेट् । अश्रन्थाति अश्रन्थीत्

अश्रन्थन न० अश्रन्थ-ल्युट् ग्रन्थने ।

अश्रपित त्रि० पु० आ ऋत-णिच् पृक् क्त अत्र । पक्के ।

अश्रम तपसि, आयासे खेदे च अक० भ्वा० श्यमादि० प० सेट् क्त्वेट् । आश्राम्यति अशश्रमत् अश्रमीत् । आश्रान्त्वा अश्रमित्वा ।

अश्रम पु० अश्रम-घञ् न दृद्धिः । तपसि, खेदे, आयासे, श्रमाभ्यासे च ।

अश्रमण पु० अश्रम-युच् । यतिभेदे । भिक्षाजीविनि त्रि० । जटामांस्यां, शुण्ठ्यौषध्यां, शरीरभेदे, सुदर्शनायां स्त्रियां च स्त्री० ।

अश्रमिन् त्रि० अश्रम-इनि । श्रमयुक्ते ।

अश्रम प्रमादे भ्वा० आ० अक० सेट् । अश्रमते अशश्रमिष्ट ।

अश्रय पु० श्रि-अच् । आश्रये । ल्युट् । तत्रैव न० ।

अश्रव पु० श्रवणोत्पत्तेन सु-अप् । कर्णे, ख्यातौ च ।

अश्रवण न० श्रवणोत्पत्तेन सु-ल्युट् । कर्णे शब्दग्राहकेन्द्रियभेदे भावे

स्नुट्। स्नुती। अश्विन्यादिषु द्वाविंशे नक्षत्रे पु० स्त्री० जीवत्वमपि 'अमार्कपाते श्रवणं यदि स्यादिति' स्मृतिः तण्डरिकाङ्के स्त्री०

श्रवणद्वादशी स्त्री० श्रवणेन युक्ता द्वादशी शाक०। 'भाद्रे भाद्रपदे शुक्ले द्वादशी श्रवणान्विते'त्युक्तायां भाद्रशुक्लद्वादश्याम्।

श्रवणशीर्षिका स्त्री० श्रवणमिव शीर्षमस्याः कप् अत इत्त्वम्। श्रावणीदत्ते।

श्रविष्ठा स्त्री० श्रूयते स्तु—अप् श्रयः प्रशस्तिरस्त्यस्याः मतुप् अतिशयेन श्रवयती इष्टन् मतुपो लुक्। धनिष्ठानक्षत्रे।

श्रविष्ठाज पु० श्रविष्ठानक्षत्रे जायते जन—ड। बुधग्रहे।

श्रवस् न० श्रूयतेऽनेन स्तु—असि। कर्णे। कर्म्मणि असि। कीर्त्तौ।

श्रा विक्लृत्तौ अदा०प०अनिट्। श्राति अश्रासीत्।

श्रा पाके अदा०प०सक० अनिट् घटा०। श्राति अश्रासीत् श्रपयति।

श्राण त्रि० श्रा—क्त। पक्के। यवागूवां स्त्री०।

श्राद्ध न० श्रद्धा—हेतुत्वेनास्त्यस्य अण्। 'श्रद्धया दीयते यस्मात् श्राद्धं तेन निगद्यते' इत्युक्ते पित्रादिभ्यः श्रद्धया देये द्रव्ये अस्त्यर्थे अण्। श्रद्धायुक्ते त्रि०।

श्राद्धदेव पु० श्राद्धोद्देश्यानां पितॄणां देवः शाक०। यमे, मनुभेदे च।

श्राद्धदेवता स्त्री० श्राद्धे देवता श्रद्धाद्रव्यस्योद्देश्या। 'पितरः श्राद्ध देवता' इति स्मृत्युक्तेषु पितृषु।

श्राद्धशाक न० श्राद्धयोग्यं शाकम्। कालशाके।

श्राद्धिक त्रि० श्राद्धे देयं श्राद्धं तद्द्रव्यं भक्ष्यत्वेनास्त्यस्य वा ठन्। श्राद्धदेये भक्ष्ये, श्राद्धदेयद्रव्यभोक्तरि च।

श्राद्धिन् त्रि० श्राद्धं तद्द्रव्यं भक्ष्यत्वेनास्त्यस्य इनि। श्राद्धदेयान्नभोक्तरि

श्रान्त त्रि० श्रम—क्त। श्रमयुक्ते, शान्ते, जितेन्द्रिये च।

श्रान्तसंवाह न० श्रान्तस्य श्रमस्य संवाहः दूरीकरणम्। पादाद्यवनादिना। श्रमनिवारणे।

श्राम मन्त्रणे अ०चु०उभ०सक०सेट्। श्रामयति ते अशश्रामत् त।

श्रावण पु० श्रवणेन युक्ता पौर्णमासी श्रावणी सास्मिन् मासे अण्।

वैशाखादिषु चतुर्षे चान्द्रे मासे उपचारात् कर्कटस्थरविके सौरमासे, पाणिग्रहे च अवश्येन कर्त्तव्ये निर्दिष्टः अण्। कर्त्तव्याध्ये प्रत्यक्षभेदे। अवश्यलक्षणेन युक्ता पौर्णमासी अण्। चान्द्रश्रावणमासीयपौर्णमास्यां स्त्री० ङीप्। (शुक्लकुड़ि) वृक्षभेदे च।

श्रावणिक पु० श्रावणी श्रवणनक्षत्रयुक्ता पूर्णिमाऽस्यस्मिन् मासे ठन्। चान्द्रश्रावणमासे।

श्रावन्ती स्त्री० श्रु-झिच् पृ० ङीप्। धर्म्मपत्तनाख्ये नगरीभेदे।

श्रि सेवने भ्वा० उ०सक०सेट्। श्रयति ते अश्रिश्रियत् त।

श्रित त्रि० श्रि-क्त। सेविते, आश्रिते च।

श्रिय दाहे भ्वा०पर०सक०सेट् क्ता येट्। श्रेयति अश्रेयीत्।

श्री पाके क्या०उ०सक० अनिट्। श्रीणाति श्रीणीते अश्रैषीत्।

श्री स्त्री० श्रि किप् नि०। लक्ष्म्यां, लवङ्गे, शोभायां, दीप्तौ, वेषरचनायां, सरलद्रुमे, धर्म्मार्थकामेषु सम्पत्तौ, प्रकारे, उपकरणे, द्रुद्यौ, विभूतौ, अधिकारे प्रभायां कीर्त्तौ, वृद्धौ, सिद्धौ, कमले, पिल्लद्रुमे हरिद्रानामौषधौ, 'देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम्। सिद्धं सिद्धाधिकारांश्च श्रीपूर्वं सप्तदीरयेदित्युक्तेषु देवादीनां नामोच्चारणायोपाधिभेदे च। रागभेदे पु०।

श्रीकण्ठ पु० श्रीः शोभा कण्ठेऽस्य शिवे, श्रेतस्य लक्षणसन्निकर्षे शोभाधिक्यात्तत्त्वं। हस्तिनापुरस्य उत्तरपश्चिमस्थे कुरुजाङ्गलाख्ये देशे च।

श्रीकन्दा स्त्री० श्रीः शोभा तया युक्ताः कन्दोऽस्याः। बन्ध्याकर्कट्याम्।

श्रीकर न० श्रियं शोभां करोति क-अच्। रत्नोत्पले, विष्णौ, दायनिबन्धकारके पण्डितभेदे च। शोभाकारके त्रि०।

श्रीकान्त पु० श्रीतः विष्णौ। श्रीनाथश्रीपत्यादयोऽत्र।

श्रीखण्ड न० श्रियः शोभायाः खण्ड इव यत्र। चन्दने।

श्रीगर्भ पु० श्रीर्गर्भेऽस्य। विष्णौ, खड्गे च 'श्रीगर्भो विजयश्चेति खड्गनामाष्टकम्।

श्रीगृह पु० श्रियः गृह इव यत्र। पक्षिणां मानीयशालायाम्।

श्रीघन पु० श्रियो घनः । बुद्धभेदे । दश्रि स० ।

श्रीचक्र न० श्रियाः चक्रं यन्त्रभेदः । 'बिन्दुत्रिकोणवसुकोणदशार-युग्मं मन्वस्रनागदलसप्तसमोऽष्टारम् । वृत्तत्रयञ्च धरणीसदनत्रयञ्च श्रीचक्रमेतदुदितं परदेवतायाः' इति तन्त्रोक्ते त्रिपुरासुन्दरी-पूजाङ्गे यन्त्रभेदे ।

श्रीज पु० श्रियो जायते जन–ड । कामदेवे । श्रीनन्दनादयोऽप्यत्र ।

श्रीताल पु० श्रीयुक्तस्तालः । तालवृक्षतुल्ये वृक्षभेदे ।

श्रीद पु० श्रियं धनं ददाति दा–क । कुबेरे । धनदा तरि स्त्रि० ।

श्रीधर पु० श्रियं धरति धृ अच् । विष्णौ, 'अतिचारुं द्विचक्रञ्च वन-मालाविभूषितम् । श्रीधरं देवि ! विष्णोर्य'मित्युक्ते शालग्राम-मूर्त्तिभेदे न० ।

श्रीनिकेतन पु० श्रियं निकेतयति नितरां वासयति नि+कित–णिच् ल्यु । विष्णौ । ६त० । श्रीवासे न० ।

श्रीनिवास पु० निवसत्यस्मिन् नि+वस घञ् ६त० । विष्णौ ।

श्रीपथ पु० श्रीयुक्ताः पन्थाः । राजपथे ।

श्रीपर्ण न० श्रीर्लक्ष्मीः पर्णे दलेऽस्य । पद्मे । श्रीयुक्तं पर्णमस्य अग्निमन्थवृक्षे पु० । [वृक्षे ।

श्रीपर्णिका स्त्री० श्रीयुक्तं पर्णमस्याः संज्ञायां कन् अत इत्वम् ।

श्रीपर्णी स्त्री० श्रीयुक्तानि पर्णान्यस्याः ङीष् । गाम्भारीवृक्षे, कट-फलवृक्षे, शालमलीवृक्षे अग्निमन्थवृक्षे च ।

श्रीपिष्ट पु० श्रियै शोभायै पिष्यते पिष–क्त । सरलवृक्षरसे ।

श्रीपुत्र पु० ६त० कामदेवे श्रियः पुत्रो भ्राता सहजत्वात् । अश्वे, उत्तैःश्रवसि च ।

श्रीपुष्प न० श्रीयुक्तं पुष्पम् । बकुले । पद्मकाष्ठे च ।

श्रीफल पु० श्रीयुक्तं फलमस्य । बिल्ववृक्षे राजादन्त्वात् ।

श्रीभद्रा स्त्री० श्रीयुक्तं भद्रमस्याः । भद्रमुस्तके ।

श्रीभागवत न० श्रीयुक्तं भागवतम् । अष्टादशपुराणेषु मध्ये द्वादश-स्कन्धयुक्ते अष्टादशसाहस्रे व्यासप्रणीते पुराणे ।

श्रीभ्राट पु० श्रियः लक्ष्म्या भ्राता अनुजत्वात् । अग्नौ, चन्द्रे च ।

श्रीमत् पु० श्रीरस्त्यस्य मतुप् । तिलकवृक्षे, अश्वत्थवृक्षे, विष्णौ, शिवे, कुक्कुरे च । शोभायुक्ते त्रि० स्त्रियां ङीप् सा च राधि-कायाञ्च । [पत्न्यां लक्ष्म्यां ।

श्रीमलापहा स्त्री० श्रिया शोभया मलमपहन्ति अप+हन-ड । भूम-

श्रीमूर्त्ति स्त्री० श्रीपूर्वककथनयोग्यामूर्त्तिः । देवतापतिमायाम् ।

श्रीरङ्गपत्तन न० श्रिया रङ्गस्य पत्तनमिव । दक्षिणस्थे देशभेदे ।

श्रीरस पु० श्रिये रसोऽस्य । श्रीवेष्टे गन्धद्रव्ये ।

श्रीराम पु० श्रीशब्दयुक्तो रामः । दशरथात्मजे नृपभेदे ।

श्रील त्रि० श्री+अस्त्यर्थे लच् । शोभायुक्ते सम्पदादियुक्ते च ।

श्रीलता स्त्री० श्रीर्युक्ता लता । महाज्योतिष्मत्यां लतायाम् ।

श्रीवत्स पु० वदति महत्त्वं वद-स श्रीयुक्तो वत्सः । महत्त्वलक्षणश्वेत-रोमावर्त्तविशेषे । स अस्त्यस्य अच् । विष्णौ ।

श्रीवत्सक पु० श्रीवत्सः चिह्नभेदः तेन कायति कै—क । हृदयस्थ-श्वेतरक्ताकारलोमयुक्ते अश्वभेदे ।

श्रीवत्सभृत् पु० श्रीवत्सं बिभर्त्ति भृ-क्विप् । विष्णौ ।

श्रीवत्सलाञ्छन पु० श्रीवत्सोलाञ्छनं यस्य । विष्णौ । श्रीवत्साङ्का-दयोऽप्यत्र ।

श्रीवराह पु० श्रिया युक्तो वराहः विष्णोर्दशावतारेषु वराहावतारे ।

श्रीवाटी स्त्री० श्रिया वाटीव । गन्धद्रव्यभेदे ।

श्रीवारक पु० श्रियं वारयति कामयते ण्वुल् । खिनावरके ।

श्रीवास पु० श्रियै वासः सौरभमस्य । सरलद्रुसरले (धूपविशे) ।

श्रीवासस् न० श्रियै वासयति वस—णिच् असि । सरलद्रुसरले ।

श्रीविद्या स्त्री० श्रियै त्रिवर्गाय विद्या । त्रिपुराषोडश्यां ।

श्रीवृक्ष पु० त्रियः शोभायाः वृक्ष इव । अश्वस्य हृदयस्थे श्वेतरोमा-वर्त्तभेदे ।

श्रोत्रेष्ट पु० श्रियै श्रेष्ठतेऽत्रौ वेष्ट-घञ्। सरलद्रुनिर्य्यासे (तारपिन)।
श्रौश पु० ह्रत०। विष्णौ।
श्रौसहोदर पु० ह्रत०। चन्द्रे, उच्चैःश्रवसि अश्वे च।
श्रौहस्तिनो स्त्री० श्रीयुक्ता हस्तिनी। (हातिशुडा)। वृक्षभेदे।
श्रु गतौ भ्वा० पर० सक० अनिट्। श्रवति अश्रौषीत्।
श्रु श्रवणे स्वा० पर० सक० अनिट्। शृणोति अश्रौषीत्।
श्रु(क्षु)घ्निका स्त्री० श्रु(क्षु)घ्नः देशभेदः कारणत्वेनास्त्यस्य ठन्। सर्জ্জিকाक्षारे।
श्रुत न० श्रूयते श्रु-क्त। शास्त्रे, तज्ज्ञाने च 'श्रुतान्वित' इति भट्टिः। श्रवणेन गृहीते, अवधृते च त्रि०।
श्रुतकीर्त्ति स्त्री०। कृष्णभ्रातृजकन्यायां यदुनन्दनपत्न्याम्। श्रुता विख्याता कीर्त्तिरस्य। विख्यातयशसि त्रि०।
श्रुतदेवी स्त्री० श्रुतस्य शास्त्रस्य देवी। सरस्वत्याम्।
श्रुतबोध पु० श्रुत मात्रं बोधयति बुध-णिच्-अच्। कालिदासकृते छन्दोग्रन्थभेदे।
श्रुतश्रवस् पु० श्रुतं श्रवो यशोऽस्य। शिशुपालपितरि 'निर्वर्त्तितेऽरिष्ट क्रियया स श्रुतश्रवसः सुत' इति माघः।
श्रुति स्त्री० श्रु-क्तिन्। कर्णे, श्रवणेन्द्रियजन्ये, ज्ञाने, वेदे च। अङ्क-शास्त्रोक्ते त्रिभुजक्षेत्रादौ भुजकोट्योः संयुज्यमानरेखाभेदे च।
श्रुतिकटु पु० श्रुतौ श्रवणे कटुः कठोरः। अलङ्कारोक्ते कठोरशब्द-विशेषरूपे काव्यदोषभेदे।
श्रुतिजीविका स्त्री० श्रुतिं जीवयति मूलतयानुसरति जीव ण्वुल्। स्मृतिशास्त्रे। [मालेव धारणायुक्ते।
श्रुतिधर त्रि० श्रुत्या श्रवणमालेव धरति धारयति धृ-अच्। श्रवण-
श्रुतिमूल न० श्रुतिरेव मूलं धर्म्मप्रामाण्ये कारणम्। वेदरूपे धर्म्म-बोधनप्रमाणे ह्रत०। यज्ञादौ, वेदशास्त्रबोधिते धर्मादौ च ह्रत०। कर्णमूले। [वेदपाठहीने बधिरे च।
श्रुतिवर्জ্জित त्रि० श्रुत्या वेदाध्ययनेन कर्णेन वा वर्জ্জितः तृज-क्त।

श्रुतिवेध पु० श्रुतेः कर्णस्य वेधो यत्र । कर्णवेधाख्ये संस्कारभेदे ।
श्रुतिस्फोटा स्त्री० श्रुताविव फलके स्फोटो यस्याः । कर्णस्फोटाख्य-
तायाम् । [शब्दालङ्कारभेदे ।
श्रुत्यनुप्रास पु० श्रूयते इति श्रुतिः यद्वर्णसाम्यानुप्रासः । अनुप्रासालङ्कारे
श्रुत्युक्त त्रि० श्रुतौ वेदे उक्त विहितः । वेदविहिते धर्मादौ ।
श्रु(स्रु)वा स्त्री० श्रु(स्रु) क स्रुचायां यज्ञपात्रभेदे ।
श्रु(स्रु)वाहस्त पु०श्रु(स्रु)वार्थो हस्तः । (यदच्चि) विकङ्कत वृक्षे ।
श्रेढी स्त्री० श्रेण्यै राशीकरणाय ढौकते ढौक ड पृ० गौ० ङीष् ।
भिन्नजातीयद्रव्याणां मिश्रीकरणाय अङ्कपाशाख्ये गणनाप्रकारभेदे
श्रेढीव्यवहार पु० श्रेढ्या व्यवहारः । श्रेढीगणनार्थे लीलावत्युक्ते
उपायभेदे ।
श्रेणि(णी) स्त्री० श्रि-नि वा ङीप् । क्षिप्ररहितायां षड्जौ ।
श्रेयस् न० अतिशयेन प्रशस्यम् श्रेयसः आदेशः । धर्म्मे, मोक्षे, शुभे
च । अतिप्रशस्ते त्रि० स्त्रियां ङीप् । सा च हरीतक्यां, पाठायां,
गजपिप्पल्यां, बालायाञ्च ।
श्रेष्ठ पु० अतिशयेन प्रशस्यः इष्ठन् आदेशः । कुबेरे, रूपे, विप्रे, विष्णौ
च । गोदुग्धे न० अत्यन्तप्रशस्ते त्रि० । स्थलपद्मिन्यां, भेदायाञ्च स्त्री०
श्रेष्ठकाष्ठ पु० श्रेष्ठं काष्ठमस्य । शाकवृक्षे (गेगुन) ।
श्रेष्ठान्न न० श्रेष्ठमन्नमस्य । दध्यन्ने ।
श्रेष्ठिन् पु० श्रेष्ठं धनादिकमस्य इनि । मिल्लिवणिजां श्रेष्ठे 'वहि
श्रेष्ठिचत्वरे प्रतिवसतीति' वृक्षकटिकटीका ।
श्रै खेदे भ्वा० प० अक० अनिट् । आयति अश्रासीत् । विक्लृप्तौ घ-
टादि० अपवर्ति ।
श्रोण पु० श्रोण-अच् । षड्जौ । काञ्चिके स्त्री० ।
श्रोण्य संघाते भ्वा० प०अक० सेट् । चङि न ह्रस्वः । श्रोणति अश्रोणीत्
श्रोणि(णी) स्त्री० श्रोण-इन् वा ङीप् । कट्याम् पथि च ।
श्रोणिफलक न० श्रोणिः फलकमिव । प्रशस्तकटौ ह्रस्व० । कटिपार्श्वे ।
श्रोणिसूत्र न० श्रोणौ स्थितं सूत्रं श्रोणिस्थे खड्गादि बन्धनसूत्रे ।

श्रोतस् न० श्रु-असुन् दुट् च । कर्णे, नदीवेगे, इन्द्रिये च ।
श्रोत्र न० श्रूयतेऽनेन श्रु-ष्ट्रन् । शब्दज्ञानसाधने कर्णरूपे इन्द्रिये
श्रोत्रिय पु० छन्दो वेदमधीते वेत्ति वा छन्दस्+घञ् । वेदाध्ययनानु-
रते, 'एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च । षट्कर्मनि-
रतो विप्रः श्रोत्रियो नाम धर्मविदित्युक्ते विप्रे च ।
श्रौत त्रि० श्रुतौ विहितमण् । वेदविहिते धर्मादौ 'श्रौतं कर्म स्वयं
कुर्यादिति स्मृतिः । गार्हपत्याहवनीयदक्षिणाग्निषु पु० ।
श्रौत्र न० श्रोत्र-स्वार्थे अण् । कर्णे । श्रोत्रियस्य भावः कर्म वा अण् ।
वैदिकस्य भावे 'श्रौत्राच्छ्नीचणैरिति' सिद्धान्त कौ० ।
श्रौषट् अव्य० श्रु-डौषटि यज्ञादौ हविर्दाने ।
श्लक्ष्ण त्रि० श्लिष-क्रन्न नि० । श्लक्ष्णे, चिक्कणे, लौहे च ।
श्लक्ष्णत्वच् पु० श्लक्ष्णा त्वगस्याः । अम्लमल्लकट्वृक्षे ।
श्लग गतौ भ्वा० प० सक० सेट् इदित् । श्लङ्गति अश्लङ्गीत् ।
श्लथ दौर्बल्ये अद० चु० उभ० सक० सेट् । श्लथयति ते अशश्लथत् त
श्लथ पु० श्लथ-अच् । विरलसंयोगे, शिथिले, दुर्बले च ।
श्लाघ व्याप्तौ भ्वा० प० सक० सेट् । चङि न ह्रस्वः । श्लाघति
अश्लाघीत् । [अश्लाघिष्ट ।
श्लाघ आत्मगुणाविष्करणे भ्वा० आ० सक० सेट् चङि न ह्रस्वः । श्लाघते
श्लाघा स्त्री० श्लाघ-अ । प्रशंसायां, निजगुणाविष्करणे परिचर्यायाम्,
अभिलाषे च ।
श्लाघ्य त्रि० श्लाघ-ण्यत् । प्रशस्ये 'श्लाघ्यत्वनृहृत्युरावद्यो"रिति चकारः
श्लिष दाहे भ्वा० प० सक० सेट् क्ङा वेट् । श्लेषति अश्लेषीत् ।
श्लिष आलिङ्गने संसर्गे च सक० दि० अनिट् । श्लिष्यति अश्लिषत् आ-
लिङ्गने तु अश्लिक्षत् ।
श्लिष श्लेषे चु० उ० सक० सेट् । श्लेषयति ते अशिश्लेषत् त । भिन्नार्-
थकोऽभिन्नशब्दे 'आश्लेषि न श्लेषकवेरिति, नैषधम् ।

श्लिष्ट त्रि० श्लिष-क्त । आलिङ्गिते, संसक्ते, श्लेषरूपशब्दालङ्कार युक्ते शब्दे च । [युक्ते त्रि० ।

श्लीपद न०श्लीयुक्तं दृढियुक्तं पदमस्मात् पृ० । (गोद) रोगभेदे तद्रोग-

श्लीपदप्रभव पु० श्लीपदाय रोगाय प्रभवति प्र+भू-अच् । आढ्यवृक्षे ।

श्लीपदापह पु० श्लीपदं रोगमपहन्ति अप+हन-ड । पुत्र जीववृक्षे ।

श्लील त्रि० श्रीरस्त्यस्य लच् पृ० रस्य लः । शोभायुक्ते नह्यिपरीतोऽहि अश्लीलः ।

श्लेष पु० श्लिष-घञ् । संसर्गे, दाहे, आलिङ्गने, शब्दालङ्कारभेदे च

श्लेष्मन्ना स्त्री० श्लेष्माणं हन्ति हन-क टाप् । मल्लिकायां, केतक्याञ्च । ज्योतिष्मत्यां ङीप् ।

श्लेष्मण पु० श्लेष्मोऽस्त्यस्य न । कफविशिष्टे ।

श्लेष्मन् पु० श्लिष्-मनिन् । कफे ।

श्लेष्मल त्रि० श्लेष्म+अस्त्यर्थे लच् । कफयुक्ते (बड्डयार) वृक्षे पु० ।

श्लेष्महृ पु० श्लेष्माणं हन्ति । कट्फलवृक्षे ।

श्लेष्मात पु० श्लेष्मणे अतति अत-अच् । श्लेष्मातकवृक्षे । [वृक्षभेदे ।

श्लेष्मातक पु० श्लेष्मणा सेवनजनितकफेन अतति अत एवुल् (बड्डयार)

श्लेष्मान्तक पु०श्लेष्मणा सेवनजकफेन अन्तक इव नाशकत्वात् (बड्डयार) वृक्षभेदे । [अश्लोकिष्ट ।

श्लोक वर्ज्जने संघाते च भ्वा० आ० सक० सेट् चङि न ह्रस्वः । श्लोकते

श्लोक पु० श्लोक-अच् । चतुःपद्यात्मके कविकृते वाक्यभेदे, यशसि च ।

श्लोण संघाते भ्वा०प०सक०सेट् चङि न ह्रस्वः । श्लोणति अशुश्लोणीत् ।

श्वःश्रेयस न० श्वः परदिने भाविकाले श्रेया यस्मात् अच् समा० । मङ्गले, सुखे परमात्मनि च । कल्याणयुक्ते त्रि० ।

श्वक्क सर्पणे भ्वा० आ० सक० सेट् इदित् । श्वक्कते अश्वक्किष्ट ।

श्वच गतौ भ्वा० आ० सक० सेट् । श्वचते अश्वचिष्ट इदिदयम् ।

श्वठ गतौ संस्कारे च चु० उ० सक० सेट् । श्वठयति-ते अशिश्वठत् त । इदिदयम् श्वण्ठयति ।

श्वठ दुर्वचने अद० चु० उभ० सक० सेट् । श्वठयति ते अशश्वठत् त
श्वदंष्ट्रक पु० शुनो दंष्ट्रेव कण्टकोऽस्य कन् । गोक्षुरे क्षुपे ।
श्वदंष्ट्रा स्त्री० शुनोदंष्ट्रेव कण्टकाढ्यत्वात् । गोक्षुरे क्षुपे ।
श्वधूर्त्त पु० श्वेव शुनां वञ्चनार्थं वा धूर्त्तः । शृगाले ।
श्वन् पु० श्वि-कनिन् नि० । कुक्कुरे तज्जातिस्त्रियां ङीप् । शुनी ।
श्वनिश न०स्त्री०शुनां कुक्कुराणां निशा वा हस्वः । कार्त्तिकमासकरात्रौ ।
श्वपच पु० श्वानः पक्ष्यन्ते यैः भोजनाय पच घञर्थे क । चण्डाले ।
श्वपाक पु० श्वानं पचति कर्त्तरि घञ् । चण्डाले ।
श्वफल पु० शुनः प्रियं फलमस्य । बीजपूरवृक्षे ।
श्वफल्क पु० । दृष्णिवंश्ये अक्रूरपितरि नृपभेदे ।
श्वभीरु पु० श्वभ्यो भीरुः । शृगाले । [ते अशुश्वभत् त ।
श्वभ्र गतौ क्षिप्रकरणे सक० दौःस्थ्ये अक० चु० उ० सेट् । श्वभ्रयति
श्वभ्र न० श्वभ्र-घञ् । छिद्रे ।
श्वयथु पु० श्वि-अथुच् । शोथे ।
श्वल वेगे भा० पर० अक० सेट् । श्वलति अश्वालीत् ।
श्वल्क भाषणे चु० उ० सक० सेट् । श्वल्कयति ते अशश्वल्कत् त ।
श्वल्ल वेगे भ्वा० प० अक० सेट् । श्वल्लति अश्वल्लीत् ।
श्ववृत्ति पु० शुन इव पराधीना वृत्तिः । दास्यं न श्ववृत्त्या कदाचनेति स्मृतिः । [भार्य्यायाः पितरि च ।
श्वशुर पु० शु आशु अश्नुते आशु+अश-उरच् पृ० । पत्नुः पितरि,
श्वशुर्य्य पु० श्वशुरस्यापत्यम् यत् । देवरे, श्यालके च ।
श्वश्रू स्त्री०श्वशुरस्य पत्नी ऊङ् उकाराकारलोपश्च । श्वशुरभार्य्यायाम् ।
श्वस् अव्य० आगामि अहः पृ० नि० । आगामिनि दिवसे ।
श्वस जीवने अदा० जक्षा० प० सक० सेट् । श्वसिति अश्वसीत् ।
श्वस स्वप्ने अदा० प० अक० वैदिकयोऽयम् । श्वसिति अश्वसीत् ।
श्वसन पु० श्वसित्यनेन श्वस-ल्युट् । वायौ, मदनवृक्षे च । भावे ल्युट् । निश्वासे न० ।
श्वसनेश्वर पु० श्वसनो वायुरीश्वरोऽस्य । अर्ज्जुनवृक्षे ।

श्वसित न० श्वस-क्त निःश्वासे, छर्दननिःश्वासयोः वहिर्गमनशीले हृदय-स्थप्राणवायौ ।

श्वसुन पु० श्वस-उनन् । (कुक्कुरशब्दे) इत्ये ।

श्वस्तन त्रि० श्वोभवः श्वस्+ट्युल् तुट् च । भाविदिनस्थायिवस्तुनि ।

श्वस्त्य त्रि० श्वोभवः श्वस्+त्यप् । भाविदिनस्थायिवस्तुनि ।

श्वागणिक पु० श्वगणेन चरति ठक् नि० दी० । कुक्कुरादिना मृगया-कर्त्तरि व्याधे ।

श्वादन्त त्रि० शुन इव दन्तोऽस्य दी० । कुक्कुरतुल्यदशने ।

श्वान पु० श्वेव अण् । कुक्कुरे तज्जातिस्त्रियां ङीप् ।

श्वापद पु० शुन इवापदस्यात् अच् । हिंस्रपशौ, व्याघ्रे च ।

श्वाविध् पु० शुना आविध्यते आ-व्यध् क्विप् ह्रस्व० । शल्यके । (शु-जारु) क । श्वाविधोऽप्यत्र पु० ।

श्वास पु० श्वस-घञ् । वायौ, कासरोगभेदे, शिखोक्ते वर्णोच्चारणार्थे वाह्यप्रयत्नभेदे च ।

श्वासधारण न० श्वासः प्राणवायुः ध्रियतेऽनेन । प्राणायामव्यापारे ।

श्वासारि पु० श्वासस्य रोगभेदस्यारिः नाशकत्वात् । पुष्करमूले

श्वि गतौ सक० वृद्धौ अक० भ्वा० प० वजा० सेट् । श्वयति अश्विश्वत्-अश्वयीत्-अश्वत् । [तत् अश्वेतिष्ट ।

श्वित शुक्लतापादने भ्वा० आ० लुङि उ० सक० सेट् । श्वेतते अश्वि-श्वित न० श्वित-रक् । श्वेतकुष्ठभेदे (धवल) ।

श्वित्रघ्नी स्त्री० श्वित्रं हन्ति हन-ट ङीप् । पीतपर्ण्याम् (विष्णुक्रान्ता) ।

श्वित्रिन् त्रि० श्वित्रमस्त्यस्य इनि । श्वेतकुष्ठयुक्ते ।

श्विद् शुक्लतापादने भ्वा० आ० सक० सेट् इदित् । श्विन्दते अश्विन्दीत् ।

श्वेत पु० श्वित-अच् घञ् वा । द्वीपभेदे, पर्व्वतभेदे, कपर्दके, शुक्लपक्षे, शङ्खे, शुभ्राभ्रे, क्षीरके, शुक्लवर्णे च । तद्वति त्रि० । रौप्ये न० । स्वार्थे कन् । रौप्ये न० । वराटके पु० ।

श्वेतकराटकारी स्त्री० कर्म० । शुभ्रवर्णकराटकारिकायाम् ।

श्वेतकन्दा स्त्री० श्वेतः कन्दोऽस्याः । अतिविषायाम् (आतइचु)

श्वेतकुञ्जर पु० कर्म०। ऐरावतगजे, श्वेतगजमात्रे च श्वेतगजादयोऽप्यत्र।

श्वेतकृष्ण पु० कर्म०। शुक्लवर्णे कृष्णभेदे।

श्वेतकेतु पु० कर्म०। केतुपुत्रभेदे, सामवेदप्रसिद्धे ऋषिभेदे च।

श्वेतकेश पु० श्वेतः केश इव यस्य। रक्तशिग्रौ। शुक्लवर्णकेशयति इत्वे त्रि०। कर्म०। शुक्ले केशे पु०।

श्वेतखदिर पु० कर्म०। शुक्ले खदिरभेदे।

श्वेतगरुत् पु० श्वेतोगरुदस्य। हंसे। शुक्लपक्षयुक्ते त्रि०।

श्वेतगुञ्जा स्त्री० कर्म०। शुभ्रगुञ्जायां पु० अदन्तोऽप्यत्र।

श्वेतचिल्ली स्त्री० कर्म०। शाकभेदे, (शादाचिल्ल)।

श्वेतच्छद पु० श्वेतः छदः पक्षोऽस्य। हंसे। शुक्लपक्षयुक्ते त्रि०।

श्वेतजीरक पु० कर्म०। शुक्लजीरके।

श्वेतटङ्कण न० कर्म०। शुक्लटङ्कणे आलतीनदीतीरसम्भवे क्षारभेदे।

श्वेतदूर्व्वा स्त्री० कर्म०। शुक्लदूर्व्वायाम्।

श्वेतद्वीप पु० कर्म०। वैकुण्ठाख्यविष्णुधाम्नि, द्वीपभेदे च।

श्वेतधातु पु० कर्म०। खटिकायाम्, शुक्लवर्णधातुद्रव्ये च।

श्वेतधामन् पु० श्वेतं धाम यस्य। चन्द्रे, कर्पूरे, वस्तुद्रव्ये च श्वेतकरादयोऽप्यत्र।

श्वेतपक्ष पु० श्वेतं पक्षं पक्षोऽस्य। हंसे। शुक्लपक्षयुक्ते त्रि०

श्वेतपद्म न० कर्म०। सितकमले।

श्वेतपर्णास पु०कर्म०। शुभ्रतुलसाम्।

श्वेतपाटला स्त्री०कर्म०। शुक्लपाटलावृक्षे (शादापाडल)

श्वेतपिङ्गल पु०देहेन श्वेतः जटया पिङ्गलः वर्णौवर्णेनेति स० सिंहे

श्वेतपिण्डीतक पु० कर्म०। महापिण्डीतकवृक्षे।

श्वेतपुष्प पु० श्वेतं पुष्पमस्य। सिन्दुवारवृक्षे। शुक्लवर्णपुष्पयुक्ते त्रि०। कर्म०। शुभ्रे पुष्पे न०। संज्ञायां कन्। शुक्लकरवीरे पु० नागदन्त्यां, कोषातक्यां झण्टेश्वरीवृक्षे च स्त्री०।

श्वेतपुष्पिका स्त्री० श्वेतं पुष्पमस्याः कप् अत इत्वम्। महाश्यामवृक्षे।

श्वेतभण्डा स्त्री० कर्म० श्वेतापराजितायाम् ।
श्वेतमन्दार पु० कर्म० । शुक्लमन्दारे ।
श्वेतमरिच कर्म० । शोभाञ्जनबीजे शुक्लमरिचे च ।
श्वेतरक्त पु० श्वेतो रक्तः वर्णो वर्णेनेति स० । पाटलवर्णे । तद्वति त्रि०
श्वेतरञ्जन न० श्वेतं रौप्यं रज्यतेऽनेन रञ्ज–ल्युट् । सीसके
श्वेतरथ पु० श्वेतो रथो यस्य । शुक्लपक्षे कर्म्म० । शुभ्रे रथे ।
श्वेतलोध्र पु० कर्म० । पट्टिकालोध्रे ।
श्वेतवचा स्त्री० श्वेता वचेव । अतिविषायाम् (आतइच) ।
श्वेतवल्कल पु० श्वेतं वल्कलमस्य । उडुम्बरवृक्षे ।
श्वेतवाजिन् पु० श्वेतो वाजी यस्य । चन्द्रे, अर्ज्जुने च । श्वेताश्वादयोऽप्यत्र ।
श्वेतवासस् पु० श्वेतं वासोऽस्य । संन्यासिभेदे । शुक्लवस्त्रयुक्ते त्रि० ।
श्वेतवाह् पु० श्वेतेन श्वेताश्वेन उह्यते वह–खिच् । इन्द्रे, अर्ज्जुने, चन्द्रे च ।
श्वेतवाहन पु० श्वेतं वाहनमस्य । चन्द्रे, इन्द्रे, अर्ज्जुने च ।
श्वेतवुक्का स्त्री० कर्म० । वनतिक्तायाम् ।
श्वेतवृक्ष पु० कर्म० । वरुणवृक्षे ।
श्वेतवृहती स्त्री० कर्म० । शुक्लवर्णक्षुद्रवृहत्याम् ।
श्वेतशिंशपा स्त्री० कर्म० । शुक्लशिंशपायाम् ।
श्वेतशिग्रु पु० कर्म० । सितशोभाञ्जने ।
श्वेतशुङ्ग पु० श्वेता शुङ्गाऽस्य । यवे । शुक्लवर्णशुङ्गायुक्ते त्रि०
श्वेतशूरण पु० कर्म० । वनशूरणे । [शुक्लभुजगे ।
श्वेतसर्प पु० श्वेतः सन् सर्पति रूप–अच् । वरुणवृक्षे । कर्म्म०
श्वेतसर्षप पु० कर्म० । गौरसर्षपे ।
श्वेतसार पु० श्वेतः सारोऽस्य । शुक्लखदिरे ।
श्वेतसुरसा स्त्री० कर्म० । शुक्लशेफालिकायाम्
श्वेतस्यन्दा स्त्री० श्वेता सती स्यन्दते स्यन्द अच् । सितापराजितायाम्
श्वेतहय पु० कर्म० उच्चैः श्रवसि, सितवर्णयुक्ते हये च ।

श्वेता स्त्री॰ श्वित-अच्। वराटिकायाम्, काश्यपाटलायां शङ्खिन्याम्, अतिविषायाम् सितापराजितायाम्, शुक्लकण्टकार्य्यां, पाषाणभेद्याम्, शुक्लदूर्वायां वंशरोचनायां, शर्करायां, शिलावल्कलतायाञ्च।

श्वेतार्क पु॰ कर्म॰। शुक्लपर्णपुष्पे अर्कवृक्षे।

श्वेतावर पु॰ श्वेतं श्वेतवर्णमाद्योति आ+इ अच्। सितावरभावे

श्वेतशु पु॰ कर्म॰ शुक्ले इक्षौ।

श्वेतोही स्त्री॰ श्वेतोहः पत्नी ङीप्। इन्द्राण्याम् शच्याम्।

श्वैत्य श्वेतस्य भावः ष्यञ्। शुक्लवर्णे।

श्वेतसीयस न॰ अतिशयेन वसुः प्रशस्तम् वसीयस् नि॰ परदिने भाविकाले प्रशस्ते मङ्गले। तद्वति त्रि॰।

ष

ष पु॰ षो-क पृ॰ षत्वम्। केशे। गर्भविमोचने, मानवे च सर्वे, शूद्रे, विघ्ने च त्रि॰। [असर्गीत्। सगयति।

षग संवरणे भ्वा॰ पर॰ सक॰ सेट् घटा॰ सिचि न वृद्धिः। सगति

षघ हिंसायां स्वा॰ पर॰सक॰सेट् सिचि न वृद्धिः। सघ्नोति असघीत्।

षच सेचने भ्वा॰ आ॰ सक॰ सेट्। सचते असचिष्ट।

षच सम्बन्धे भ्वा॰ पर॰सक॰ सेट्। सचति। असचीत्-असाचीत्

षट विभाजने भ्वा॰ पर॰ सक॰ सेट्। षटति असटीत् असाटीत्

षट्कर्मन् न॰ षट् प्रकारं कर्म। तन्त्रोक्तेषु शान्तिवशीकरणस्तम्भनविद्वेषोच्चाटनमारणरूपेषु षट्सु प्रयोगभेदेषु यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहरूपेषु षट्सु विप्रकर्मसु च। षट् कर्माणि यस्य यागादियुक्ते विप्रे पु॰।

षट्कोण न॰ षट् कोणा यस्य। यन्त्रे, तन्त्रोक्ते ऊर्द्धाधःस्थे त्रिकोणद्वयरूपे यन्त्रभेदे, ज्योतिषोक्ते लग्नतः षष्ठस्थाने च।

षट्चक्र न॰ षण्णां चक्राणां समाहारः द्वन्द्वादि॰। तन्त्रोक्तेषु देहस्थेषु सुषुम्नानाड्यभ्यवर्त्तिषु हृदब्जचतुर्दलादिषु षट्सु षट्सु भेषु। दुर्विज्ञेय ततोऽन्यः अण् तस्य लुक्। षट्चक्रप्रतिपादकग्रन्थभेदे।

षट्चत्वारिंशत् स्त्री० षड्धिका चत्वारिंशत्। (छेदादिषु) सङ्ख्याभेदे तत्सङ्ख्यान्विते च।

षट्चरण पु० षट् चरणा यस्य। भ्रमरे षट्पदादयोऽप्यत्र।

षट्ट निवासे बले च अक० हिंसायां दाने च सक० चुरा० उभ० सेट्। षट्टयति ते अषट्टत् त।

षट्तिलिन् पु० षट् तिलाः तिलोदर्त्तनाद्यः कर्मीण्यस्य। 'तिलोदर्त्ती तिलस्नायी तिलोल्लोली तिलप्रदः। तिलभुक् तिलवापी च षट्तिली नामसीदतीत्युक्ते तिलोदर्त्तनादिकारिणि।

षट्त्रिंशत् स्त्री० षडधिका त्रिंशत् षाक०। (छेदादिषु) सङ्ख्याभेदे तत्सङ्ख्यान्विते च।

षट्पञ्चाशत् स्त्री० षड्धिका पञ्चाशत् षाक०। (छेदादिषु) सङ्ख्याभेदे, तत्सङ्ख्यान्विते च। [प्रियत्वम्

षट्पदप्रिय पु० ६त०। नागकेशरे तस्य हि प्रचुरमधुत्वात् भ्रमर-

षट्पदातिथि पु० षट्पदः अतिथिरिव यस्य। आम्रवृक्षे।

षट्पदानन्दवर्द्धन पु० षट्पदस्यानन्दं वर्द्धयति दृध णिच्-ल्यु उप०। अशोकवृक्षे।

षट्पदी स्त्री० षट् पादा अस्याः पादस्य पाङ्क्तावः ङीषि पङ्क्तावः। यूकायां भ्रमरयोषिति च हिमुः। षट्चरणयुक्ते छन्दोभेदे च। षट् श्लोकात्मकपद्यसंघाते।

षट्प्रश्न पु० षट्सु प्रश्ना यस्य। 'धर्मार्थकाममोक्षेषु लोकतन्त्रार्थयोरपि। षट्सु प्रश्ना तु यस्यासौ षट्प्रश्नः परिकीर्त्तितः' इत्युक्ते धर्मार्थाद्यभिज्ञे बौद्धे।

षड्ङ्ग न० षण्णामङ्गानां समाहारः षात्वा०। 'जङ्घे बाहू शिरो मध्यं षडङ्गमिदमुच्यते' इत्युक्ते देहावयवभेदे तन्त्रोक्ते हृदयाद्यवयवभेदे यत्र हृदयादिषु षट्सु अङ्गेषु मन्त्रविशेषोन्यस्य ते तेषु। षट् अङ्गानीव यस्य। 'शिक्षाकल्पोव्याकरणं निरुक्तं छन्दसां चितिः। ज्योतिषामयनञ्चैव षडङ्गो वेद उच्यते' इत्युक्ते वेदे, त्रुटनोक्तुरङ्गे च पु०।

षड़भिज्ञ पु० षट् अभिज्ञा 'दिव्यं चक्षुः श्रोत्रं, परचित्तज्ञानं पूर्वनिवासानुस्मृतिः, आत्मज्ञानम्, विषयवृत्तिः कायव्यूहसिद्धिश्चेत्येतानि अभिज्ञा अभिज्ञायमानानि यस्य । बौद्धभेदे ।

षड़शीति स्त्री० षड़धिका अशीतिः शाक० । (अंशादि) सङ्ख्याभेदे, तत्सङ्ख्यान्विते च । षड़शीतिमुखवत्तु मिथुनकन्या धनुर्मीनेषु रवेः संक्रान्तौ च 'अयनविषु पदी षड़शीतयो विषुवविषु पदीषडशीतय इति ज्योतिषम् ।

षड़शीतिमुख न० षड़शीतेः तत्संख्यासंक्रान्तेर्मुखम् । 'तुलादिषडशीत्यङ्गां षड़शीतिमुखम् क्रमात्। तत्तुल्यमेव स्यात् द्विस्वभावेषु राशिषु' इति षड्विंशे धनुषो भागे, द्वाविंशेऽनिमिषस्य च मिथुनाष्टादशे भागे कन्यायास्तु चतुर्दशे, इति सूर्यसिद्धान्तोक्ते तुलादितः षड़शीतिदिनान्तरितकाले ।

षडानन पु० षट् आननानि यस्य । कार्त्तिकेये षड्वदनादयोऽप्यत्र

षड़ूर्म्मि पु०षट् ऊर्म्मय ऐश्वर्याणि यस्य । षडैश्वर्ये परमेश्वरे

षड़गव त्रि० षड्भिर्गोभिरावृक्तः शकटः हलो वा शाक० अच् समा० । षड्भिर्गोभिराकृष्टे हलादौ 'अष्टागवं धर्म्यं हलं षड्गवं जीविकार्थिनामिति स्मृतिः । षण्णां गवां समाहारः द्विगुः । षट्सु गोषु न० । [गुप्येषु ।

षड्गुण पु०षड्भिः गुणिता गुणाः शाक० । राज्ञां सन्ध्यादिषु षट्सु

षड्ग्रन्था स्त्री० ग्रन्थः ग्रन्थिः षट् ग्रन्था अस्याः । वचायां शठ्याम्, महाकरञ्जे च ।

षड्ग्रन्थि न० षट् ग्रन्थयोऽस्य । विल्वमूले, षट्पर्वयुक्ते त्रि० संज्ञायां कन् । पक्षे स्त्री० टाप् । अत इत्त्वम् वा ङीप् वचायां स्त्री० ।

षड्ज पु० षड्भ्यो नासादिस्थानेभ्यो जायते जन–ड । 'नासाकण्ठउरःस्तालु जिह्वां दन्तांश्च संश्रितः । षड्भ्यः संजायते यस्मात् तस्मात् षड्ज इति स्मृत' इत्युक्ते स्वरभेदे 'षड्जर्षभादिनी: क्रमा' दिति रघुः

षड्दीर्घ पु० षड्भिर्गुणिता दीर्घाः । तच्छोक्तेषु आ, ई, ऊ, ऐ, औ ऋ इत्येवं रूपेषु षट्सु दीर्घेषु ।

षड्धा अव्य० षष्+प्रकारे धाच् । षट्प्रकारे । [सत्वमुक्ते त्रि० ।

षड्भुजा स्त्री० षट् भुजा इव यस्याः (खरसज) फललतामेदे षड्रू-

षड्रस न०षण्णां रसानां समाहारः पा० । 'मधुरो लवणस्तिक्तः कषायोऽम्लः कटुस्तथा' इत्युक्तेषु 'मधुरं गौल्यमित्याहुरिक्षादौ स च लक्ष्यते । लवणस्तु षटुः प्रोक्तः सैन्धवादौ स दृश्यते । तिक्तस्तु पिचुमर्दादौ व्यक्तमास्वाद्यते रसः । कषायस्तुवरस्तूक्तः स च पृथ्वीमलादिषु । कटुस्तु तीक्ष्ण संप्रोक्तः स्यात् मरीचादौ स चेष्यते' इत्युक्तस्थानेषु लक्ष्येषु षट्सु रसेषु ।

षड्वर्ग पु० द्वन्द० । 'कामक्रोधलोभमोहमद मात्सर्येषु 'त्याजेष्ट षड्वर्गमिति भट्टिः । 'क्षेत्रं होरा च तद्रेक्काणं नवांशद्वादशके त्रिंशांशकश्चेति विद्वैः षड्वर्गः समुदाहृतः' इति ज्योतिषोक्तेषु क्षेत्रादिषु षट्सु विस्तरो वाचस्पत्ये । [क्षसनीत् असानीत् ।

षण संभक्तौ भ्वा० पर० सक० सेट् । पक्ष सत्वे णस्य नत्वम् । सनति

षण दाने तना० उभ० सक० सेट् पक्ष सत्वे णस्य नत्वम् । सनोति असनीत्—असानीत् असनिष्ट असत ।

ष(ण्ड पु० षण-ड डस्य नेत्यम् पृ० षत्वं णत्वं वा । क्लीबे, नपुंसके, पद्माद्यिसमूहे पु० न० ।

षण्ढ पु० षण-ढ तस्य नैत्यम् पृ० षः । नपुंसके ।

षण्मुख पु० षट् मुखानि यस्य । कार्त्तिकेये ।

षद गतौ चु० उ० सक० सेट् । सादयति ते असीषदत् ।

षद विषादे अक० हिंसायां गतौ च सक० तु पर० अनिट् वेला० । सीदति, असदत् । सदः सादः ।

षन्च गतौ भ्वा० पर० सक० सेट् । सञ्चति असञ्चीत् ।

षन्ज सङ्गे, संबन्धे च भ्वा० पर० सक० अनिट् । सजति असाङ्क्षीत्

षप सम्बन्धे भ्वा० पर० सक० सेट् । सपति असापीत् असपीत् ।

षम वैकृत्ये अ० भ्वा० उभ० आ० सेट् । समते ते असमत् त

षर्व सर्पणे भ्वा० पर० सक० सेट्। सर्वति असर्वीत्।
षर्ज्ज अर्जने भ्वा० पर० सक० सेट्। सर्ज्जति असर्ज्जीत्।
षर्ड अपानशब्दे भ्वा० पर० सक० सेट्। सर्डति असर्डीत्।
षर्व (र्व) गतौ भ्वा० सक० सेट्। सर्व (र्व)ति असर्वी (र्वी)त्।
षल गतौ भ्वा० पर० सक० सेट्। सलति असालीत्।
षष् त्रि० ब० व०। षो क्विप् षट्। (छय) सङ्ख्याभेदे व्याकरणोक्ते सङ्ख्याबाचके धान्ये नाम्नि च शब्दे च। [न्विते च।
षष्टि स्त्री० षड्गुणिता दशतिः नि०। (साठ) सङ्ख्याभेदे, तत्सङ्ख्या-
षष्टिक पु० षष्ट्या अहोभिः पच्यते कन्। (साठिया) धान्यभेदे
षष्टिक्य न० षष्टिकधान्यस्य भवनं क्षेत्रम् यत्। षष्टिकधान्योत्पत्तियोग्ये क्षेत्रे। [ङीप्
षष्टितम त्रि० षष्टेः पूरणः तमट्। येन षष्टिसङ्ख्या पूर्य्यते तस्मिन् स्त्रियां
षष्टिमत्त पु० षष्टिवर्षैर्मत्तः। अर्द्धवयस्के गजे तदुत्तरं हि तस्य मत्तता-योग्यत्वात् तथात्वम्।
षष्टिसंवत्सर पु० ब०स० षष्टिगुणिता संवत्सराः। ज्योतिषप्रसिद्धेषु प्रभवादिषु षष्टो वत्सरेषु तद्विशेषो वाचस्पत्ये।
षष्टिहायन पु० षष्टिर्हायना वयोऽस्य। षष्टिवर्षवयस्के गजे षष्टिदिनपच्योहायनी व्रीहिः शाक०। षष्टिकधान्ये।
षष्ठ त्रि० षष्ण्यां पूरणः षष्+डट् षुक् च। येन षट्संख्या पूर्य्यते तस्मिन्। स्त्रियां ङीप्।
षष्ठक त्रि० षष्ठो भागः कन्। षष्ठे भागे। [षष्ठांशरूपे कृषकरे।
षष्ठांश पु० कर्म्म०। रक्षणप्रतिरूपतया प्रजाभ्यो राज्ञे उत्पन्नस्यांशस्य
षष्ठान्न त्रि० षष्ठो दिवसस्य षष्ठकालः अन्नस्य तद्भोजनस्य वा कालो यस्य। दिवसस्य षष्ठभागे अन्नभोजनकालवर्त्ति पुरुषे।
षष्ठान्नकाल पु० षष्ठे दिवसे भक्ष्यान्नकालो यत्र। व्रतभेदे।
षष्ठी स्त्री० षष्ण्यां पूरणी डट् षुट् ङीप्। चन्द्रमसः षष्ठकलावा छाया-दृष्टिरूपक्रियारूपे तिथिभेदे" स्कन्दभार्य्यारूपे मातृकाभेदे, मातृकाणां पूज्यतमा सा च षष्ठी प्रकीर्त्तिता। विष्णूनां प्रतिविम्बेषु

प्रतिपालनकारिणी तपस्विनी विष्णुभक्ता मार्त्तिकेयस्य कामिनी'ति पुराणम् ।

षस स्वप्ने अदा० पर० अक० सेट् वैदिकः । सस्ति अस्वाक्षीत् असस्तीत्

षस्ज सर्गे भ्वा० पर० सक० सेट् । सज्जति असज्जीत् । अयमात्मनेपदीत्यन्ये "वचोऽपि परुषाक्षरं न च प्रदेषु संसज्जते इति शकुन्तला ।

षस्त स्वप्ने अदा० स्वपा० पर० अक० सेट् वैदिकः । सस्तिं । संस्ते असंस्तीत् । [सहति असीसहत् असहीत्

षह क्षमायां वा चु० उभ० पक्षे दि० पर० सक० सेट् । साह्यति ते

षह क्षमायां भ्वा० आ० सक० सेट् श्लसा० । सहते असहीत् ।

षाड्गुण्य न० षट्गुणा एव स्वार्थे ष्यञ् । राज्ञां सन्धिविग्रहादिषु षट्सूपायेषु 'षाड्गुण्यमुपभुञ्जते' इति माघः ।

षाण्मातुर पु० षण्णां मातृणामपत्यम् अण् उदादेशे रपरः । कार्त्तिकेये तस्य कृत्तिकात्मिकं, गङ्गा, पृथिवी, पार्वती चेति षट् मातरः पुराणेषु प्रसिद्धाः । [पादके अन्ये ।

षाण्मासिक त्रि० षण्मासे अधिकृत्य कृतो ग्रन्थः ठक् । षण्मासाध्ययनेति-

षाण्मासिक न० षष्ठे मासे भवः ठञ् । वत्सस्य एकाहोन षण्मासे कर्त्तव्ये श्राद्धभेदे 'आद्यं षाण्मासिके तथेति' स्मृतिः "एकाहूनषण्मासे तस्य विधानमि'ति मार्त्तिकेयः

षाध सिद्धौ स्वा० दि० च पर० अक० अनिट् । साध्नोति साध्नुति । असाधीत् । [असस्वान्नात् त ।

षास्व षासयुक्तसम्भाषणे अद० चु० उभ० सक० सेट् । सास्वयति ते

षि बन्धे स्वा० क्र्या० उभ० सक० अनिट् । सिनोति सिनुते सिनाति सिनीते असैषीत् । असेष्ट । [त । सेक्ता

षिच आर्द्रीकरणे भ्वा० उ० उभ० सक० अनिट् । सिञ्चति ते असिषेचत्

षिट अनादरे भ्वा० प० सक० सेट् । सेटति असेटीत् ।

षिड पु० षिट-अच् पृ० षिटे (उत्कटे) साधौ । [त्तीत् ।

षिध शास्त्रे अक० शासने सक० सेट् । सेधति असेधीत् असै-

षिध गतौ भ्वा० पर० सक० सेट् । सेधति असेधीत् क्त्वावेट् ।
षिध सिद्धौ दिवा० पर० अक० अनिट् क्त्वावेट् । सिध्यति असैत्सीत् ।
षिन्भ हिंसने सक० दीप्तौ अक० भ्वा० पर० सेट् क्त्वावेट् । सिम्भति असिम्भीत् ।
षिम हिंसने भ्वा प० सक० सेट् । सेमति असेमीत् । [असेलीत् ।
षिल उञ्छे तप्तस्यच्चेलात् कणश आदाने तुदा० पर०सक०सेट् । सिलति
षिव तन्तुसन्तानरे दि०पर० सक० सेट् क्त्वा वेट् । सीव्यति असेवीत् ।
षु (सुराद्यावनरूपे सन्धाने सोमादेः पीडने मन्थने च स्वा० उ० सक० स्नाने अक० अनिट् लुङि पर० सेट् । सुनोति सुनुते असावीत् असोष्ट । [असोष्ट ।
षु गतौ भ्वा० आ० सक० अनिट् लुङि प० वेट् । सवति असावीत्
षु प्रसवे ऐश्वर्ये च भ्वा० पर० सक० अनिट् सवति असौषीत् ।
षु ऐश्वर्ये प्रसवे च अदा० पर० सक० वेट् लिटि सेट् । सौति असावीत् असौषीत् । सुस्वाप ।
षुटट् अनादरे भ्वा० चु० उ० सक० सेट् । सुट्टयति ते असुष्फुट्त त ।
षुन्भ दीपने अ० हिंसने स० भ्वा० पर० सेट् सुम्भति असुम्भीत् ।
षुर दीप्तौ अक० ऐश्वर्ये सक० तु० प० सेट् । सुरति असोरीत् ।
षुह्ष्णुह् उद्गिरणे भ्वा० दि० प० सेट् । सुह्यति असुक्षत् ।
षू प्रसवे अदा० आ० सक० सेट् । सूते असविष्ट ।
षू प्रसवे दि० आ० सक० सेट् । सूयते असविष्ट-असोष्ट ।
षू क्षेपे तु० प० सक० वेट् । सुवति असावीत् ।
षूद् निवारणे भ्वा० आ० सक० सेट् । सूदते असूदिष्ट ।
षूद् क्षरणे भ्वा० प० सक० सेट् । सूदति असूदीत् ।
षूद् क्षरणे अक० प्रतिज्ञायां निरासे च सक० चु० उ० सक० सेट् । सूदयति ते असूषुदत् ।
षॄ स्तम्भे अक० हिंसने सक० दि० आ० सक० सेट् । सीर्यते असीरिष्ट
षूर्ङ् अनादरे भ्वा० प० सक० सेट् । सूर्छति असूर्छीत् ।
षूर्ङ् देषायां भ्वा० प० सक० सेट् । सूर्क्षति असूर्क्षीत् ।

षूङ् प्रसवे भ्वा० प० सक० सेट् । सूयति असूषीत् ।

षृनृभ हिंसने भ्वा०प०सक० सेट् । सृभति असर्भीत् ।

षृभ हिंसने भ्वा०प०सक०सेट् । सर्भति असर्भीत् ।

षेक सर्पणे भ्वा०आ०सक०सेट् चङि न ह्रस्वः । सेकति असेकीत् ।

षेल चालने गतौ च भ्वा०पर०सक०सेट् चङि न ह्रस्वः । सेलति असेलीत् ।

षेव आराधने उपभोगे आश्रये च भ्वा०उ०सक०सेट् चङि न ह्रस्वः । सेवति सेवते असेवीत् असेविष्ट ।

षै क्षये भ्वा०प०अक०अनिट् । सायति असासीत् ।

षो नाशने अक०दि०प०अनिट् । स्यति असात्-असासीत् ।

षोडत् पु० षट्दन्ता यस्य दन्तस्य दत्व नि० । षड्दन्तयोग्यवयस्के हस्यादौ । [ह्रस्वान्विते च ।

षोडशन् त्रि० ब० व० षडधिका दश नि० । (षोल) संख्याभेदे तत्-

षोडश पु० षोडशानां पूरणः डट् । येन षोडशसंख्या पूर्यते तस्मिन् । चन्द्रमण्डलस्य कलात्मके षोडशभागरूपकलायां, त्रिपुराऽऽदेव्यां च स्त्री० ङीप् ।

षोडशक न० षोडश परिमाणमस्य कन् । षोड़शसंख्याते वस्तुनि 'भूम्या-सनं जलं वस्त्रं प्रदीपोऽन्नं ततः परम् । ताम्बूलं फलगन्धाश्च माल्यं फलमतः परम् । शय्या च पादुका गावः काञ्चनं रजतं तथा । दानमेतत् षोडशकं प्रेतमुद्दिश्य दीयते' इति स्मृत्युक्तेषु भूम्यादिषु प्रेतोद्देशेन दीयमानेषु षोडशसु । 'स्वर्णं रौप्यं तथा ताम्रं कांस्यं गावो गजा हयाः । गृहं भूमिर्घृतो वस्त्रं शय्या क्षीरसुपानकौ । दासश्च पितृयज्ञेषु दानं षोडशकं मतमिति वायुपुराणोक्तेषु पितृकृत्ये देयेषु स्वर्णादिषु षोडशसु च ।

षोडशमातृका स्त्री० ब०व० षोडशसंख्या मातरः । 'गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः । शान्तिः पुष्टिर्धृतिस्तुष्टिः कुल देवातदेवता' इत्युक्तासु गौर्यादिषु षोड़शसु मातृकासु ।

षोडशाङ्ग पु० षोडश अङ्गान्यस्य । 'गुग्गुलुं सरलं दारु पद्मं बलयसम्भवम् । ह्रीबेरमगुरुं कुष्ठं सर्ज्जरसं वनम् । हरीतकीं नखीं लाक्षां जटामांसीञ्च शैलजम् षोडशाङ्गं विदुर्धूपं देवे पैत्रे च कर्म्मणी'त्युक्ते गुग्गुल्वादिषोडशद्रव्यरचिते धूपे ।

षोडशाङ्घ्रि पु० षोडश अङ्घ्रयश्चरणा यस्य । कुर्कटे ।

षोडशार न० षोडश आराणि कोणा अस्य । षोडशदलयुक्ते कमले, तन्त्रोक्ते यन्त्रभेदे च ।

षोडशिन् पु० षोडशकला विद्यन्तेऽस्य इनि । सोमे । यज्ञाङ्गे तन्नामसोमरसस्थापनपात्रे च 'अतिरात्रे षोडशिनं गृह्णातीति श्रुतिः ।

षोड़शोपचार पु० ष० त० षोड़शसंख्याता उपचाराः । 'आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् । मधुपर्कोऽचमस्नानं वसनाभरणानि च गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथेत्युक्तेषु षोडशसु पूजाद्रव्येषु ।

षोढ़ा अव्य० षट् प्रकारम् धाच् नि० । षट्सु प्रकारेषु ।

षोढ़ान्यास पु० षोढ़ा षट्प्रकारो न्यासः । तन्त्रोक्ते षट्प्रकारन्यासभेदे विस्तरो वाचस्पत्ये ।

ष्टक्क प्रतीघाते भ्वा०प०सक०सेट् घटा० स्तक्नति अस्ताक्नीत् ।

ष्टग संवरणे भ्वा०प०सक०सेट् सिचि न दृद्धिः घटा० । स्तगति अस्तगीत्

ष्टन शब्दे भ्वा०पर०सक० सेट् वा घटा० । स्तनति अस्तानीत्-अस्तनीत्

ष्टभ स्तम्भे स०खने अ०भ्वा०आ०सेट् इदित् । स्तम्भते अस्तम्भिष्ट ।

ष्टम वैकल्ये अद०चु०उभ०सक०सेट् । स्तमयति ते अतस्तमत् त ।

ष्टम वैकल्ये अक०भ्वा०प०सेट् । स्तमति अस्तमीत् ।

ष्टिध अभियोगे स्वा०आ०सक०सेट् । स्तिङ्क्ते अस्तेधिष्ट ।

ष्टिप क्षरणे भ्वा०आ०अक०सेट् चङि न ह्रस्वः स्तेपते अस्तेपिष्ट ।

ष्टिम क्लेदे दि०प०अक०सेट् । स्तिम्यति अस्तेमीत् ।

ष्टीम क्लेदे दि०प०अक०सेट् । स्तीम्यति । अस्तीमीत् ।

ष्टु स्तुतौ अदा०उ०सक० अनिट् सिचि सेट् लुङि प० वेट् स्तौति स्तवीति स्तुते स्तुत्यन्ये अस्तावीत् अस्तोष्ट ।

ष्टुच प्रसादे अक०भ्वा०आ०सेट्। स्तोचते अस्तोचिष्ट।
ष्टुप उच्छ्राये अद०चु०उ०सक०सेट्। स्तूपयति ते अतुष्टपत् त।
ष्टुप उच्छ्राये दि०प०सक०सेट्। स्तूप्यति अस्तूपत्। [भिद्
ष्टुभ रमे अक० स्तम्भे सक०भ्वा०आ०सेट् क्त्वा वेट्। स्तोभते अस्तो-
ष्टृच गतौ भ्वा०प०सक०सेट्। स्तृचति अस्तृचीत्।
ष्टृह बधे तु०प०सक०वेट्। स्तृहति अस्तर्हीत् अस्तृहत्।
ष्टृह बधे तु०आ०सक०वेट्। स्तृहति अस्तृहीत् अस्तृहत्।
ष्टेप चरणे भ्वा०आ०अक०सेट् चङि न ह्रस्वः। स्तेपते। अस्तेपिष्ट।
ष्टै संघाते सक० ध्वनौ अक०भ्वा०प०अनिट् स्तायति। अस्तासीत्।
ष्ट्यै वेटने सक० दीप्तौ अक०भ्वा०प०अनिट्। स्त्यायति अस्त्यासीत्।
मतान्तरे घ्नत्यायति। [गीत्।
ष्ठग सम्वरणे भ्वा०प०सक०सेट् घटा० सिचि न वृद्धिः। स्थगति अस्थ-
ष्ठगा स्थितौ भ्वा०प०अक०सेट् ज्वला०। स्थगति अस्थागीत्।
ष्ठस निरासे दि०प०सक०सेट्। स्थस्यति अस्थासीत्—अस्थसीत्।
ष्ठा गतिनिवृत्तौ भ्वा०प०अक०अनिट्। तिष्ठति अस्थात्।
ष्ठिव निरासे (मुखेन श्लेष्मादेर्वमने) भ्वा०प०सक०सेट् ष्ठीवति अष्ठेवीत्।
ष्ठेवनम्। [वीत् ष्ठीवनम्।
ष्ठीव निरासे (श्लेष्मादेर्मुखेन वमने) भ्वा०प०अक० सेट्। ष्ठीवति अष्ठी-
ष्ठ्यूत त्रि० ष्ठिव-क्त। निरस्ते, वान्ते च। [वत्।
ष्णस निरासे दि०प०सक०सेट् क्त्वा वेट् वा घटा०। स्नस्यति अस्न-
ष्णा शौचने अदा०प०अक०अनिट्। स्नाति अस्नासीत्। [स्नेधा।
ष्णिह प्रीतौ दि०प०सक०वेट्। स्निह्यति अस्नेहत्। स्नेहिता-स्नेढा—
ष्णिह स्नेहयुक्त भवने चु०उ०अक०सेट्। स्नेहयति ते असिष्णिहत् त
ष्णु स्राने आ०उ०अक०सेट्। स्नौति अस्नावीत् अस्नोट्।
ष्णुच सेचने भ्वा०आ०सक०सेट्। स्नोचते अस्नोचिष्ट।
ष्णुस भक्षे दि०प०सक०सेट्। स्नुस्यति अस्नोसीत्।
ष्णुह उद्गारे दि०प०सक०सेट्। स्नुह्यति अस्नुहत्।

ष्णै शैचे भ्वा॰प॰सक॰ अनिट्। स्नायति अस्नासीत्। ष्णै इत्येके ष्णायति अष्णायीत्।

ष्मि ईषद्धासे भ्वा॰आ॰अक॰अनिट्। स्मयते अस्मेष्ट।

ष्वक्क सर्पणे भ्वा॰आ॰सक॰सेट्। ष्वक्कते अष्वक्किष्ट।

ष्वद् स्वादे क्षेदने च चु॰उ॰सक॰सेट्। स्वादयति ते असिष्वदत् त।

ष्वद् प्रीतौ क्षेदने च भ्वा॰ आ॰सक॰सेट्। स्वदते अस्वदिष्ट।

ष्वन्ज आलिङ्गने भ्वा॰आ॰सक॰अनिट्। स्वजते। अस्वङ्क्त।

ष्वप शयने निद्रायाञ्च अदा॰ खपा॰ जक्षा॰ प॰ अक॰ अनिट्। स्वपति अस्वाप्सीत्। [अषष्वर्त्तत त।

ष्वर्त्त गतौ सक॰ दुःखेन जीवने अक॰ चु॰ उ॰ सेट्। स्वर्त्तयति ते।

ष्वष्क गतौ भ्वा॰ आ॰ सक॰ सेट्। स्वष्कते अस्वष्किष्ट।

ष्विद् मोहे स्नेहे, च अक॰ मोचने सक॰ भ्वा॰ आ॰ वुडि॰ उ॰ सेट्। स्वेदते अस्विदत् अस्वेदिष्ट।

ष्विद गात्रप्रक्षरणे अक॰ दि॰ प॰ अनिट्। स्विद्यति अस्विदत्।

स

स पु॰ सो–ड विष्णौ, सर्पे, ईश्वरे, विहगे च।

संक्षेप पु॰ सम्+क्षिप–घञ्। भूयसोऽर्थस्याल्पवाक्यादिना प्रकाशने।

संक्षोभ पु॰ सम्+क्षुभ–घञ्। चाञ्चल्ये, क्षोभे च।

संग्राहिन् पु॰ सम्+ग्रह–णिनि। कृटजवृक्षे। सङ्ग्रहकारके त्रि॰

संघ पु॰ सम्+हन–ड नि॰ समूहे, जन्तुसमूहे च। घञ्। संघातोऽपि समूहे दृढ़संयोगे च पु॰।

संघर्ष पु॰ सम्+हृष घञ्। अन्योन्यदृढ़संयोगे।

संज्ञ न॰ सम्+ज्ञा–क। पीतकाष्ठे कालीयके गन्धद्रव्ये। सम्+ज्ञा–अङ्। चेतनायाम् बुद्धौ, आख्यायाम्, हस्ताद्यैरर्थसूचने, गायत्र्यां, सूर्यपत्न्याञ्च स्त्री॰।

संज्ञ(ज्ञा)पन सम्+ज्ञा–णिच–ल्युट् भावे ह्रस्वः ल्युट्। भावे। अन्यार्थे न ह्रस्वः। ज्ञाने। क्लिन्। संज्ञप्तिरप्यत्र स्त्री॰

संज्ञासुत पु॰ संज्ञायाः सूर्यपत्न्याः सुतः। यमेश्वरे।

संजु त्रि० संहते जानुनी यस्य जानुस्थाने भुः । संहतजानुके ।
संज्वर पु० सम् + ज्वर–अप् । अग्निजाते तापे ।
संमर्द पु० सम्+मृद–घञ् । अन्योन्यदृढ़संयोगरूपे सङ्घर्षे ।
संयत त्रि० सम्+यम–क्त । बद्धे कृतशास्त्रोक्तनियमे च ।
संयत् स्त्री० संयम्यतेऽत्र सम्+यम–क्विप् तुक् च। युद्धे ।
संयन्तृ त्रि० संयच्छति सम् + यम–तृच् । नियन्तरि ।
संय(या)म पु० सम् यम–घञ् वा दृद्धिः । व्रतकृतया पूर्वदिन कर्त्तव्ये नियमभेदे, इन्द्रियनिग्रहे, बन्धने च ।
संयमन न० सम्+यम–ल्युट् । बन्धने; व्रते, चतुःशाले गृहे च
संयमनी स्त्री० संयम्यते बध्यतेऽत्र सम् + यम–ल्युट् । यमाधिष्ठितपुर्य्याम् । [वति त्रि० ।
संयमिन् पु० सम्+यम–णिनि न दृद्धिः मुनिभेदे इन्द्रियसंयम-
संयाव पु० सम्यक् घृतादिभिर्यूयते मिश्र्यते गोधूमचूर्णोऽत्र सम् + यु-घञ् । 'संयावस्तु घृतक्षीरगुडगोधूमपाकज' इत्युक्ते घृतादिना पक्वगोधूमचूर्णे ।
संयुज् त्रि० सम्यक् युनक्ति सम् + युज–क्विन् । गुणार्थे, संयुक्ते च ।
संयुक्त त्रि० सम् + युज–क्त । संयोगवति पदार्थे ।
संयुग न० संयुज्यतेऽत्र सम् + युज–क पृ० जस्य गः । युद्धे ।
संयुत त्रि० सम् + यु-क्त । संयुक्ते ।
संयोग पु० सम्+युज-घञ् । मेलने क्रियाजन्ये द्रव्यगुणे गुणभेदे, सम्बन्धमात्रे च ।
संयोगपृथक्त्व न० संयोगेन फलसंबन्धभेदेन पृथक्त्वं नानारूपत्वं यत्र । एकस्यैव कर्म्मणो नित्यानित्यत्वप्रतिपादके मीमांसकोक्ते न्यायभेदे । [योजने पदार्थे ।
संयोजित त्रि० सम्+युज-णिच्-क्त । कृतमेलने पदार्थान्तरेण कृत-
संरम्भ पु० सम्+रभ घञ् मुम् च । कोपे, आक्रोशे, उत्साहे· वेगे च "अदृष्टिसंरम्भमिवाम्बुवाहिनि"ति कुमारः ।
संराधन न० सम्+राध-ल्युट् । सम्यक् तोषणे, सम्यक् चिन्तने च

संराव पु० सम्+रु-घञ् । शब्दे ।
संरूढ त्रि० सम् + रुह-क्त । प्रौढे, जाताङ्कुरे च ।
संरोध पु० सम् + रुध-घञ् रोधने, क्लेशे च ।
संलग्न त्रि० सम् + लग-क्त । मिलिते ।
संलय पु० संलीयते इन्द्रियव्यापारोऽत्र सम् + ली-अच् । निद्रायाम्, प्रलये च ।
संलाप पु० सम् + लप घञ् । परस्परकथने प्रीत्या अन्योन्योक्तिप्रत्युक्तिभ्यां भाषणे, रहसि कथने च ।
संवत्सर पु० संवसन्ति ऋतवोऽत्र सम्+वस+सरन् । वत्सरे, ज्योतिषोक्ते सप्तादिषष्ट्यब्दान्तर्गते वत्सरभेदे च ।
संवत् अव्य० सम्+वय-क्विप् यलोपे तुक् । विक्रमादित्यराज्यावधिके तत्प्रवर्तकवत्सरे ।
संवदन सम् + वद-ल्युट् । आलोचने, वधोद्योगे, च । सम् + वन-ल्युट् । संवननमत्र ।
संवर न० सम् । वृ-अप् । जले, दैत्यभेदे, मत्स्यभेदे, मृगभेदे च ।
संवर्त्त पु० सम्यक् वर्त्तयति प्रलयवर्त्ततेऽत्र सम् + वृत-णिच्-घञ् । प्रलयकाले, स्मृतिकारकमुनिभेदे, कर्म्मफलदत्ते, मेघे, 'संवर्त्तश्च बलाहकः' इत्युक्ते मेघनामकभेदे च ।
संवर्त्तक न० सम् + वृत-णिच्-ण्वुल् । बलदेवलाङ्गले । ततः अस्त्यर्थे अच् । बलदेवे, वाड़वानले च पु० ।
संवर्त्तिका स्त्री० सम् + वृत-ण्वुल् टाप् अतइत्वम् । दीपादेः शिखायाम्, पद्मादेः केशरसमीपस्थे दले, नवपत्रे च [रके च
संवर्द्धक त्रि० सम् + वृध-णिच्-ण्वुल् । सम्माननाकारिणि वर्द्धिका-
संवलित त्रि० सम् + वल-क्त । मिलिते । [स्थाने
संवसथ पु० संवसन्त्यस्मिन् सम्+वस-अथच् । ग्रामे जन-समूहनिवा-
संवह पु० सम्यक् वहति सम्+वह-अच् । सप्तवायुसध्यवर्त्तिवायौ ।
संवार पु० सम्+वृ-घञ् । शिक्षाग्रन्थोक्ते वर्णोच्चारणार्थे बाह्य प्रयत्नभेदे, वस्त्रोपधने च ।

संवास पु० संवसत्यत्र सम्+वस घञ्। गृहे, एकत्रवसिनां पुरादिहि-
तसंयोग्ये जनपदे स्थाने च। [तत्रैव।

संवाह पु० संवाहयति सम्+वह-घञ्। अङ्गसंमर्दके। ण्वुल्।

संवाहन न० सम्+वह-णिच् ल्युट्। भारादेर्वहने, अङ्गसंमर्दने च

संविग्न त्रि० सम्+विज-क्त। उद्विग्ने दृष्टवस्तुलाभाय तद प्राप्ति-
हेतुना भयादिना वा जातौत्सुक्ये। [क्लीबे च।

संवित्ति स्त्री० सम्+विद-क्तिन्। ज्ञाने, प्रतिपत्तौ, बुद्धौ, अ-

संविद् स्त्री० सम्+विद सम्प० क्विप्। ज्ञाने, प्रतिपत्तौ, बुद्धौ अङ्गी-
कारे, समाधौ, नाम्नि, आचारे, सङ्केते, युद्धे, तोषे च।

संविदा स्त्री० संविद्यतेऽनया सम्+विद क्विप् टाप्। भङ्गायाम्
(क्षिप्तिः) 'संविदाखण्डयो र्मध्ये संविदैव गरीयसीति' तन्त्रम्

संविद्यातिक्रम पु० संविदोऽङ्गीकारस्य व्यतिक्रमो यत्र। कृताङ्गीका-
रस्योल्लङ्घनहेतुके विवादभेदे।

संविहित त्रि० सम्+वि+धा-क्त। अङ्गीकृते, सम्यग्ज्ञाते च।

संविधान न० सम्+वि+धा-ल्युट्। उपाये, आयोजने रचनायाञ्च।

संविषा स्त्री० संविहितं विषं यया धातुजश्च उत्तरपदलोपः। अति-
विषायाम् (आतइच्)।

संवीक्षण न० सम्यग्वीक्ष्यते अन्विष्यते वा सम्-वि+ईक्ष ल्युट्। दृष्ट-
वस्तुनो लाभाय अन्वेषणे सम्यग्दर्शने च।

संवीत त्रि० सम्+व्ये-क्त। आवृते, रुद्धे, च-सम्+वि+वृञ्-क्त।
सङ्कृते। [स्रोति" रघुः।

संवृत त्रि० सम्+वृ-क्त। आवृते, कृतगोपने च 'तस्य संवृतमन्त्र-

संवेग पु० सम्+विज-घञ्। भयादिना त्वरायाम्, सम्यग् वेगे च।

संवेद्य पु० सम्+विद-घञ्। ज्ञाने। युच्। संवेदनाप्यत्र स्त्री०।

संवेश पु० सम्यक्विशत्यत्र सम्+विश घञ्। निद्रायाम् संपूर्वकस्य तस्य
निद्रार्थकत्वात्तथात्वम्। तथाच संविष्टः कुश शयने निशां निनायेति रघुः पीठे च।

संवेशन न० सम्+विश-णिच्-ल्युट्। रतिक्रियायाम्। तदुत्तरं हि निद्राधिक्येन तस्या निद्राहेतुत्वात् तथात्वम्।

संव्यान न० संवीयते सम्+व्ये-कर्मणि ल्युट्। उत्तरीय वस्त्रे, वस्त्रमात्रे च।

संशप्तक पु० सम्यक् शपथमङ्गीकारो यस्य कप्। प्रतिज्ञाय संग्रामाद्-निवर्त्तिनि सैन्ये 'संशप्तकगणैरभूदिति' रघुः।

संशय पु० सम्+शी-अच्। सन्देहे एकस्मिन् धर्म्मिणि भावाभावयोः, विरुद्धधर्म्मद्वयस्य वा सन्देहे। यथा पर्वतो वह्निमान् वा, अयं स्थाणुर्वा पुरुषोवेति। 'संशयो भवेद्याधीरेकस्मिन्भावयोरिति" भाषापरिच्छेदः।

संशयस्थ त्रि० संशये तिष्ठति स्था-क। संशययुक्ते।

संशयात्मन् पु० संशय आत्मनि यस्य। संदिग्धान्तःकरणे "संशयात्मा विनश्यतीति,, पुराणम्।

संशयालु त्रि० संशय+अस्त्यर्थे आलुच्। संशययुक्ते।

संशयित्र त्रि० सम्+शी-इत्र। संशयकर्त्तरि।

संशरण न० संशीर्य्यते ऽनेन सम्+शॄ-ल्युट्। रथारम्भे

संशित त्रि० सम्+शा-क्त। सम्पादितव्रतविषयकयत्ने।

संशितव्रत त्रि० संशितं सम्यक् सम्पादितं व्रतमनेन। सम्यक्सम्पादितव्रते।

संशुद्धि स्त्री० सम्+शुध-क्तिन्। सम्यक् शोधने' देहादिमार्ज्जने च।

संश्यान त्रि० सम्+श्यै-क्त। शीतादिना सङ्कुचिते।

संश्रय पु० सम्+श्रि-अच्। आश्रये

संश्रव पु० सम्+श्रु-अप्। अङ्गीकारे। घञ्। संश्रावोऽभ्युपगम। पु०।

संश्रुत त्रि० सम्+श्रु-क्त। अङ्गीकृते।

संश्लिष्ट त्रि० सम+श्लिष-क्त। आलिङ्गिते, संबद्धे च।

संश्लेष पु० सम्+श्लिष-घञ्। आलिङ्गने, संबन्धमात्रे च।

संसक्त त्रि० सम्+सृज्-क्त । मिश्रिते, संबद्धे, सक्तवादृ. ङीषि च "प्राप्तेषु संसक्तमेदशास्त्रमिति" कुमारः ।

संसद् स्त्री० संसीदत्यस्याम् सम्+सद्-क्विप् । सभायाम् ।

संसरण न० सम्+सृ-ल्युट् । खाद्यदनिबद्धदेहस्वीकाररूपे संसारे, असंबाधसेवागमने, रथचक्रे, प्रवाहपाते, संगतौ च ।

संसर्ग पु० सम+सृज-घञ् । सम्बन्धे, विभागानन्तरं "यत्तव धनं तन्ममेति" कृतसमयेन एकत्रावस्थानरूपे सम्बन्धे च ।

संसर्गाभाव पु० संसर्गस्य सम्बन्धस्याभावः । ध्वंसप्रागभावात्यन्ताभावरूपे—भेदभेदे अभावे सम्बन्धाभावे च ।

संसर्गिन् त्रि० सम्+सृज-घिणुन् । संसर्गयुक्ते विभागानन्तरं "यत् तव धनं तन्ममेति, कृतसमयेन एकत्रावस्थानरूपसंसर्गयुक्ते भ्रातृादौ, सम्बन्धे च ।

संसार पु० संसरत्यस्मात् सम+सृ-घञ् । मिथ्याज्ञानजन्य संस्काररूपवासनायां, देहारम्भकाद्यदृष्टभेदे, "खाद्योपनिबद्ध देहपरिग्रहे च । आधारे घञ् । विश्वे । भावे घञ् । सङ्गतौ ।

संसारमार्ग पु० ६त० । योनिद्वारे तत एव हि बहिर्निर्गमने मायासम्बन्धेति तस्य तथात्वम् ।

संसारिन् त्रि० संसरति अदृष्टभेदेन देहेन संयुज्यते सम्-सृ-णिनि । शरीराभिमानिनि जीवे ।

संसिद्ध त्रि० सम्यक् स्वभावेन वा सिद्धः सम्+सिध-क्त । स्वभावसिद्धे, सम्यग्निष्पन्ने च । [अन्तौ च ।

संसिद्धि स्त्री० सम्+सिध-क्तिन् । स्वभावे, प्रकृतौ, सम्यग् नि.

संसृति स्त्री० सम्+सृ-क्तिन् । संसारप्रवाहे, सङ्गतौ च ।

संसृष्ट पु० सम्+सृज-क्त । विभागानन्तरं मैत्र्यात् पुनः स्वस्वधनेषु कृतसंसर्गयति भ्रातृादौ "संसृष्टस्तु संसृष्टीति" स्मृतिः वचनादिना संयुक्ते, संयुक्ते च । भावे क्त । संबन्धे

संसृष्टिन् पु० संसृष्टसमयेन इनि । संसृष्टभ्रातृादौ । 'अन्योदर्यस्तु संसृष्टीति' स्मृतिः ।

संस्कृ पु० सम्+कृ-क्त्व-क्विप् च । संस्कारकारके, पाचके च ।

संस्कार पु० सम्+कृ-घञ् सुट् च यतोगुणान्तराधानरूपे प्रतियत्ने, -यथा अलङ्कारादेरलङ्कार्यादेश्च उद्दीपननिधानमार्जनादयः, व्रीह्यादेश्च यज्ञाङ्गतासम्पादनाय वैदिकमार्गेण प्रोक्षणादिः दर्पणादेर्निर्मलीकरणादिः । स्मृतिहेतौ अनुभवजन्ये आत्मवृत्तिगुणभेदे, पृथिव्यादिचतुष्टयस्थे वेगाख्ये गुणे, यथास्थितततयास्थापनप्रयोजके स्थितिस्थापनाख्ये गुणभेदे, शास्त्राभ्यासजन्यव्युत्पत्तौ, व्याकरणोक्तादिशा शब्दानां साधनप्रकारे, विप्रादीनां वैदिककर्म्मार्हत्वसाधने गर्भाधानादौ क्रियाकलापे, पाके च ।

संस्कारवर्जित त्रि० ३त० । गर्भाधानादिसंस्कारहीने शास्त्रे व्युत्पत्तिहीने च संस्कारहीनादयोऽत्यत्र ।

संस्कृत त्रि० सम्+कृ-क्त सुट् च । कृतसंस्कारे पदार्थे, व्याकरणादिलक्षणाधीनसाधनयुक्ते शब्दे, पक्के, भूषिते, शोधिते च ।

संस्तर पु० सम्+स्तृ-अप् । यज्ञे शय्यायाम् पल्लवादिरचित-शय्यायां च 'नवपल्लवसंस्तरे यथेति' कुमारः ।

संस्तव पु० सम्+स्तु-अप् । परिचये, सम्यक् स्तुतौ च ।

संस्ताव पु० संस्तूयतेऽत्र- सम्-स्तु घञ् । यज्ञार्थं संस्तावकविप्राणां वासभूमौ ।

संस्तुत त्रि० सम्+स्तु क्त । परिचिते, सम्यक्स्तुते च ।

संस्त्राय पु० सम्+स्त्यै-घञ् । संघाते, निविड़संयोगरूपे सन्निवेशे, विस्तृतौ, गृहे, संस्थाने च ।

संस्था त्रि० सम्+स्था-क । अवस्थिते, मृते च ।

संस्था स्त्री० सम्+स्था-अङ् । न्याय्यपथावस्थितौ, स्थितौ, नाशे, यज्ञभेदे, व्यवस्थायां, व्यक्तौ, साहश्ये, प्रान्ते च ।

संस्थान न० सम्+स्था ल्युट् । चतुष्पथे, आकारे, अवयवारम्भकसंयोगभेदे, चिह्ने, सन्निवेशे, सम्यक्स्थितौ च ।

संस्थित त्रि० सम्+स्था-क्त । मृते, सम्यक्स्थिते च ।

संस्मर्या स्त्री० संस्मृ्यते सम्+स्मृ-यत् टाप् । रजनीबन्धाहश्चे

संस्फुट त्रि० सम्+स्फुट-क । विकसिते ।
संस्फेट न० सम्+स्फिट-घञ् । युद्धे ।
संस्फोट पु० सम्+स्फुट घञ् । युद्धे ।
संहत त्रि० सम्+हन-क्त । दृढे, मिलिते, परार्थे मिलिते "संहनपरार्थत्वादिति, साङ्ख्यम् दृढसंयोगयुक्ते सम्यग्हते च । [हते ।
संहतल पु० संहतं संहननं संघातं लाति-ला-क । मिलितमात्रे-
संहतपुष्पिका स्त्री० संहतानि दृढं संयुक्तानि पुष्पाण्यस्याः कप् अत इत्त्वम् । मिश्रेयायाम् ।
संहति स्त्री सम्+हन-क्तिन् । सम्यूहे, सम्यग्हनने च ।
संहनन न० संहन्यते परार्थं संहृत्यते सम्+-हन-ल्युट् । देहे, संघाते, बले च ।
संहर्ष पु० सम्यक् हर्षः सम्+हृष-घञ् आनन्दे, स्वार्थायाञ्च संहृष्यत्यनेन घञ् । वायौ ।
संहार पु० सम्+हृ-घञ् । प्रलये, नाशे, संक्षेपे, नरकभेदे, विसर्ज्जने, भैरवभेदे च ।
संहारमुद्रा स्त्री० संहाराय स्थानान्तरनयनाय मुद्रा । तन्त्रोक्ते मुद्राभेदे तल्लक्षणं वाचस्पत्ये ।
संहिता स्त्री० सम्यक् हितं प्रतिपाद्यं यस्याः । मन्वादिप्रणीते, धर्म्मशास्त्रे, पुराणे, इतिहासादौ, कर्म्मकाण्ड-प्रतिपादके वेदभागे च ।
संहूति स्त्री० सम्+हूञ् क्तिन् बहुभिः कृते आह्वाने ।
संहृत त्रि० सम्+हृ-क्त । कृतसंहारे, सङ्कुचिते च ।
संहृति स्त्री० सम्+हृ-क्तिन् । संहारे
संह्लाद पु० सम्+ह्लद-घञ् । शब्दभेदे ।
संह्लादिन् त्रि० सम्+ह्लद-णिनि । शब्दायमाने ।
संह्लाद पु० सम्+ह्लद-घञ् । आनन्दभेदे ।
सकण्टक पु० शेषः कण्टकेन सहस्य सः । करञ्जभेदे, (काटाकरञ्जा) शैवाले च । कण्टकयुक्ते त्रि० । [युक्ते च ।
सकर्ण त्रि० सह कर्णेन श्रवणेन तदुपचारेण वा । श्रुतिशीले, कर्ण-

सकर्मक त्रि० सह कर्मणा कप् । व्याकरणोक्ते कर्मयुक्त क्रियाबोधके धातौ 'फलव्यापारयोरेकनिष्ठतायामकर्मकः । धातुत्वयोर्धर्मिभेदे सकर्मक उदाहृत' इत्युक्तादिशा धातोः सकर्मकत्वमवसेयम् ।

सकल त्रि० सह कलया, अवयवमात्रया, चतुःषष्ट्या कलाभि र्वा सहस्य सः । संपूर्णे समग्रे, कलासहिते च ।

सकारण त्रि० सह कारणेन । कार्य्ये । [समीपे ।

सकाश पु० कथनं पीडनं काशः कश-घञ् सह काशेन । अन्तिके

सकुरुण्ड पु० सह समानः कुरुण्डेन । साकरुण्डवृक्षे ।

सकुल पु० सह समानं कुलमस्य । मातृसमानसूत्रे (धव) स्त्रीत्वमपि । समानवंशे त्रि० ।

सकुल्य त्रि० समाने कुले भवः यत् । अशौचे विषये स्वावध्यूर्द्धसप्तमपुरुषावधिदायमपर्य्यन्ते पुरुषवर्गे, दायग्रहणे स्वावधिसप्तमोर्द्धोत्पन्नपुरुषमात्रे "विभक्तदायादान् सकुल्यानाचक्षते" इति स्मृतिः ।

सकृत् अव्य० एक+निः । एकवारे विधायाञ्च तस्य स्त्रीत्वमिति केचित् ।

सकृत्प्रज पु० सकृत् एकवारं प्रजायते प्र+जन-ड । यस्मिन् एकवारं तापत्ये त्रि० ।

सकृत्फला स्त्री० सकृत् फलति फल-अच् । कदलीवृक्षे

सक्त त्रि० सृज-क्त । आसक्ते, अविरते च ।

सक्तु पु० सच-तुन् । भ्रष्टयवादिचूर्णे (छातु) "भेषादौ सक्तवो देया" इति स्मृतिः । [विशेषे ।

सक्तफला(ली) स्त्री० सक्तवइव क्षुद्राणि फलान्यस्याः [illegible]

सक्थि न० सृज-क्थिन् । ऊरौ, शकटावयवभेदे च ।

सखि त्रि० सह समानं ख्यायते ख्या-दृन् निः । सौहार्दयुक्ते

सखी स्त्री० सखि+ङीप् । सहचर्य्यां, वयस्यायाञ्च ।

सख्य न० सख्युर्भावः यत् । मित्रतायाम् सौहार्दे ।

सगर पु० सह गरेण विषेण जातः । सूर्य्यवंश्ये नृपभेदे "असमञ्जस सागरो जात" इति पुराणम् । विषयुक्ते त्रि० ।

सगभ पु० सह समानो गर्भोऽस्य । सहोदरे भ्रातरि । सह गर्भे गर्भयुक्ते, मध्यवर्त्तिक्षुद्रशस्यपत्रयुक्ते कुशदूर्वादौ च त्रि० ।

सगर्भ्य पु० समाने गर्भे भवः यत् । सहोदरे भ्रातरि ।

सगोत्र न० सह समानं गोत्रम् । कुले । सह समं गोत्रमस्य । भ्रातरि त्रि०

सग्धि स्त्री० अद्–क्तिन् नि० सह ग्धिः । सहभोजने ।

सङ्कट त्रि० सम् + कटच् । अल्पायकाशे स्थाने, संबाधे । सम्+कट-अच् । दुःखे "नरो सुचेव्रत सङ्कटादिति" चण्डी । देवीभेदे, ज्योतिषोक्ते दशाभेदे च स्त्री० टाप् ।

सङ्कटाक्ष पु० सङ्कटं संबाधमक्षति अक्ष–अण् । धववृक्षे ।

सङ्कर पु० सम्+कृ-अप् । सम्मार्जन्यादिभिः क्षिप्ते रजसि । मेलने, इतरजातिपुरुषेण इतरजातिस्त्रियां जाते जातिभेदे "सङ्करस्य च कर्त्ता स्यामुपहन्यामिमाः प्रजा" इति गीता न्यायोक्ते जातिबाधके परस्परासमानाधिकरणयोरेकाधिकरणवृत्तित्वरूपे धर्म्मविशेषे च । तदुदाहरणादि वाचस्पत्ये ।

सङ्करीकरण न० संकरः क्रियतेऽनेन च्वि+कृ–ल्युट् । "खराश्वोष्ट्रमृगे-भानामजाविकवधस्तथा । सङ्करीकरणं ज्ञेयं मीनाहिमहिषस्य च" इत्युक्ते खरादिवधजन्ये पापे ।

सङ्कर्षण पु० संकृष्यते गर्भात् गर्भान्तरं नीयतेऽसौ सम्+कृष युच् । बल-देवे । भावे ल्युट् । आकर्षणे, स्थानान्तरनयने च न० ।

सङ्कलन न० सम्+कल–ल्युट् । एकत्रस्थीकरणे, योजने, (ठिक देओया) संग्रहे च ।

सङ्कलित त्रि० सम्+कल–क्त । योजिते, रेखादिना संदृते, संगृहीते च

सङ्कल्प पु० सम्+कृप–घञ् । अभीष्टसिद्धये "इदमित्थमेव कार्य्यं" मि-त्येवंरूपे मनसो व्यापारभेदे, कर्म्मसाधनाय चाभिलाषवाक्ये, "सङ्क-ल्पेन विना राजन् ! यत् किञ्चित् कुरुते नर" इति पुराणम् तत्र विशेषो वाचस्पत्ये । [ऽप्यत्र ।

सङ्कल्पजन्मन् पु० सङ्कल्पात् जन्म यस्य । कामदेवे । सङ्कल्पभवादयो-

सङ्कल्पयोनि पु० सङ्कल्पो योनिरुत्पत्तिकारणं यस्य । कामदेवे "सङ्कल्पयोनेरभिमानभूतमिति" कुमारः । [वादशीले च ।

सङ्कसुक त्रि० सम्+कस-उकन् । अस्थिरे, मन्दे, दुर्जने, सङ्कीर्णे, अप-

सङ्काय त्रि० सम्यक् काशते काश-अच् । सदृशे "तरुणादित्यसङ्काशमिति" तन्त्रम् । निभादिवदस्य नित्यसमासता ।

सङ्किल पु० सम्+किल-क । वङ्गेरुल्कायाम् ।

सङ्कीर्ण त्रि० सम्+कृ-क्त । बहुजनसंघर्षेण निरवकाशे स्थाने, मिलितनानाजातौ, व्याप्ते, मिश्रिते, सङ्कटे, एकत्र मिलितयोः परस्परविजातीययोश्च । इतरवर्णेन इतरवर्णस्त्रियां जाते जातिभेदे प० ।

सङ्कुचित त्रि० सम्+कुच-क्त । कृतसङ्कोचे, संक्षिप्ते, अप्रफुल्ले च ।

सङ्कुल न० सम्+कुल-क । परस्परपराहते, "यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता । माता तु मम बन्ध्यैव पुत्रहीनः पितामहः" इत्येवं वाक्ये, परस्परहननरूपे युद्धे बहुजनादिभिः संबाधेन निरवकाशे स्थाने च सङ्कीर्णे त्रि० ।

सङ्केत पु० सम्+कित घञ् । मनोगतभावव्यञ्जनाय कृते हस्तादिचालनरूपे व्यापारे (इसारा) "अस्माच्छब्दादयमर्थो बोध्यः, अयं शब्दः अमुमर्थं बोधयतु वा" इत्येवं शब्दनिष्ठे अर्थबोधनाशक्तिविशेषे, प्रियसङ्गमार्थे गुप्तस्थाने च ।

सङ्केतित त्रि० सङ्केतो जातोऽस्य तारं० इतच् । सङ्केतवति वाच्ये अर्थे "साक्षात् सङ्केतितं योऽर्थमभिधत्ते" इति काव्यप्र० ।

सङ्कोच पु० सम्+कुच-घञ् । बहुविषयकवाक्यस्याल्पविषयकतया व्यवस्थापने, सामान्यशब्दस्य विशेषपरतायाम्, जडीभावे, बोधे, बन्धे च । सम् + कुच-अच् । मत्स्यभेदे पु० कुङ्कुमे न० ।

सङ्कोचनी स्त्री० सम्+कुच ल्यु-गौ० ङीष् । लज्जालुलतायाम् ।

सङ्क्रन्दन पु० सङ्क्रन्दयत्यसुरान् सम् + क्रन्द-णिच्-ल्यु । इन्द्रे । भावे लुट् । सम्यक्क्रन्दने न० ।

सङ्क्रा(क्रा)म पु० सङ्क्रामत्यनेन सम् + क्रम घञ् या वृद्धिः जलबन्ध-

ख्याने(सांकी) "आत्मानं सङ्क्रमं ज्ञात्वेति" क्तिः भावे घञ्। व्याहेः राश्यन्तरसञ्चारे च। [न्तरगमने च।

सङ्क्रमण न० सम् + क्रम ल्युट्। सङ्क्रान्तौ, रव्यादीनां राशि-

सङ्क्रान्त त्रि० सङ्क्रान्तिरस्यास्ति अच्, सम् + क्रम क्त वा। सङ्क्रान्तियुक्ते सङ्क्रमणकर्त्तरि, प्राप्ते, दायरूपेण पितृभक्तादितः आगते स्त्रिया प्राप्तधने च।

सङ्क्रान्ति स्त्री० सम् + क्रम क्तिन्। सम्यक्क्रमणे, रव्यादीनां राशि-न्तरसञ्चारे च। तत्र विशेषो वाचस्पत्ये वक्ष्यते।

सङ्ख्या न० संख्यायते परस्परनामोच्चारणं क्रियतेऽत्र सम्+ख्या घञर्थे क। युद्धे। अङ्क। विचारे, बुद्धौ, द्रव्यादिगते एकत्वद्वित्वादौ गुण-भेदे, च स्त्री० टाप्।

सङ्ख्यात त्रि० सम्+ख्या-क्त। ज्ञातसङ्ख्ये, गुणिते-सम्यक्ख्याते च।

सङ्ख्यावत् पु० सङ्ख्या विचारणा सास्त्यस्य मतुप् मस्य वः। पण्डिते सङ्ख्यायुक्ते त्रि०। [योग्ये।

सङ्ख्येय त्रि० सङ्ख्यायतेऽसौ सम् + ख्या-यत्। गुण्ये सङ्ख्याकरण-

सङ्ग पु० सञ्ज-घञ्। मेलने, सम्बन्धे, विषयादिरागे च "ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते" इति गीता।

सङ्गत न० सम् + गम-भावे क्त। सौहार्दे सङ्गतौ च कर्त्तरि क्त। मिलिते त्रि०।

सङ्गति स्त्री० सम् + गम-क्तिन्। सङ्गमे, मेलने, न्यायोक्ते अनन्तरा-भिधानप्रयोजकजिज्ञासाजनकज्ञानविषये, "सप्रसङ्गः उपोद्घातो हेतु-तावसरस्तया। निर्वाहकैककार्यत्वे षोढा सङ्गतिरिष्यते" इत्यमरे प्रसङ्गादौ पदार्थे च।

सङ्गम पु० सम्+गम-घञ् न वृद्धिः। सङ्गतौ स्त्रीपुंसयोः संभोगे, नद्या-देर्नदादियोगस्थाने च "गङ्गासागरसङ्गम" इति पुराणम्।

सङ्गर पु० संगीर्यते सम्+गृ अप्। आपदि, प्रतिज्ञायां, क्रियाकारके, विघ्ने, भ्रमीदृक्षे च।

सङ्गव पु० सङ्गता गावोदोहनायात्र काले नि०। "प्रातःकालो सङ्ग-

सौख्योत् सङ्गवस्तावदेव तु" इति कालमुक्ते प्रातःकालानन्तरं मुहूर्त्तत्रयात्मके कालभेदे ।

सङ्गिन् त्रि० सङ्ग इनि । सङ्गयुक्ते । स्त्रियां ङीप् ।

सङ्गीत न० सम् + गै-क्त । दर्शनार्थं नाट्यगीतवाद्यत्रिके, तत्प्रतिपादकग्रन्थे च । कर्म्मणि क्त । सम्यग्गीते त्रि० ।

सङ्गीर्ण त्रि० सम् + गॄ-क्त । स्वीकृते । [सङ्गलने च ।

सङ्ग्रह पु० सम् + ग्रह-अप् । सञ्चये, संक्षेपे, बहुर्थकवाक्यानामेकत्र

सङ्ग्रहणी स्त्री० सङ्गृहीता ग्रहणी । ग्रहणीरोगभेदे । [ङ्याम्मत् त ।

सङ्ग्राम युद्धे अद० च० उभ० सक० सेट् । सङ्ग्रामयति ते अस ।

सङ्ग्राम पु० सङ्ग्राम-घञ् । युद्धे ।

सङ्ग्रामपटहः पु० ६त० । रणवाद्यभेदे ।

सङ्ग्राहिन् पु० सम्यक् गृह्णाति मलम् सम्+ग्रह-णिनि । कुटजवृक्षे । मलावष्टम्भके संग्रहकारके, च त्रि० ।

सङ्घ पु० संहत्य सर्वम् । सजातीयसमूहे, समूहे च ।

सङ्घचारिन् पु० सङ्घीभूय चरति चर-णिनि । मत्स्ये । सङ्घीभूयचारिणि जन्तुमात्रे त्रि० ।

सङ्घजीविन् पु० सङ्घेन जीवति जीव-णिनि । सङ्घोपजीविनि यतीने

सङ्घट्ट पु० सम्+घट्ट-घञ् । परस्परसङ्घर्षणे गठने च ।

सङ्घट्टन न० सम्+घट्ट-ल्युट् । मेलने, गठने, रचनायाञ्च । युच् । तत्रैव स्त्री० । [(योडहात) ।

सङ्घतल पु० सङ्घौ संहते मिलिते तले यत्र । संयोजितप्रतलद्वये

सङ्घपुष्पी स्त्री० सङ्घीभूतानि पुष्पाण्यस्याः ङीप् । धातकी पुष्पवृक्षे । (धाइ फूल) ।

सङ्घर्ष पु० सम्+घृष्-घञ् । परस्परघर्षणे, स्पर्द्धायाञ्च ।

सङ्घशम् अव्य० सङ्घ+वीप्सार्थे शस् । भूरिशः वृत्यर्थे ।

सङ्घाटिका स्त्री० सङ्घटयति-सम् +घट-णिच् ण्वुल् । युग्मे, जलकगटके, घ्राणे च । [संयोगे कर्के च ।

सङ्घात पु० सम्+हन-घञ् । समूहे, नरकभेदे, सम्यग्हननने, दृढ-

सङ्घातपत्रिका स्त्री० सङ्घातयुक्तं पत्रमस्याः कप् कत इत्वम् । शे-
तपुष्पायाम् ।

सचि(ची) स्त्री० सच-इन् वा ङीष् । इन्द्राण्याम् ।

सचिल्लक पु० सह चिल्लकेन । स्निग्धनेत्रे (पिँचुटियुक्तनेत्रे) ।

सचिव पु० सच-इन् तथा सन् याति या-क । सहाये, मन्त्रिणि, ल-
शुनतूरे च ।

सचेतन त्रि० सह चेतनया । विशिष्टज्ञानयुक्ते ।

सचेष्ट पु० सचते सच अच् तथाभूतः सन् इष्टः । आम्रे । सह चे-
ष्टया । चेष्टान्विते त्रि० ।

सञ्चारा स्त्री० सन् चारो गात्रानुलेपने विप्रगतिरस्याः । हरिद्रायाम्

सच्चिदानन्द पु० सन् नित्यः चित् चैतन्यमानन्दः त्रिपदकर्म्म० । नि-
त्यज्ञानसुखमये ब्रह्मणि । [पितामिति" स्मृतिः ।

सच्छूद्र पु० कर्म्म० । सद्गोपनापितादौ शूद्रभेदे । "सच्छूद्रो गोपना-

सजम्बाल त्रि० सह जम्बालेन । पङ्कयुक्ते देशे ।

सजाति पु० समाना जातिरस्य । समानवर्णेन समानवर्णायामूढायाम्
उत्पादिते पुत्रे । तुल्यजातौ त्रि० ।

सजातीय त्रि० समानां जातिमर्हति छ । समानधर्म्मयुक्ते ।

सजु(जू)स् अव्य० सह जुषते क्विप् पृ० वा दीर्घः । सहार्थे "सजुः-
सत्य रतिं वसेदिति" । भट्टिः ।

सज्ज त्रि० सस्ज-अच् । उद्युक्ते, संनद्धे, सम्भृते, निश्चिते च । अ ।
आयोजने, वेशे, च स्त्री० । सतो जायते जन-ड । साधुजाते त्रि० ।

सज्जन त्रि० सस्ज णिच् ल्युट् । रक्षार्थं सैन्यस्थापने, घट्टे च ।
सस्ज-ल्युट् । आयोजने । सन् जनः । सौजन्यवति जने, "कृत्
सज्जनरञ्जनमिति" सत्कुलोद्भवे च पु० । सस्ज-णिच् ल्युट् ।
रूपादीनामारोहणार्थं गजभूषाकरणादौ ।

सज्जित त्रि० सज्जा जातास्य तारं० इतच् । कृतवेशे, भूषिते संनद्धे च

सञ्च सञ्चीयतेऽत्र सम्+चि-ड । लेखनार्थे पत्रभेदे (सांच)

सञ्चय पु० सम्+चि-अच्। समूहे, संग्रहे च। ल्युट्। सञ्चयनम्। सङ्ग्रहे न०। [पुराणम्।

सञ्चयिन् पु० सम्+चि-इनि। संग्रहकारके, "सञ्चयी नावसीदतीति"

सञ्च(ञ्चा)र पु० सञ्चरत्यनेन सम्+चर बजर्थे क वञ्ज् वा। सेतौ, देहे, अङ्गादेः राज्यन्तरगमने च। भावे-क। सम्यग्गतौ

सञ्चाय्य पु० सञ्चीयतेऽग्निरत्र सम् चि-ण्यत्। यज्ञभेदे।

सञ्चारिका स्त्री० सञ्चारयति नायकयोर्वार्त्तां सम्+चर-णिच् ण्वुल्। दूत्यां कुट्टिन्याम्, युक्ते, ग्राह्ये च।

सञ्चारिन् पु० सम्+चर-णिनि। धूपे, वायौ, अलङ्कारोक्ते ग्रहङ्कारादिरसादानुगुणे भावभेदे च। "व्यक्तः सञ्चारिणा तथेति, साहित्य० सञ्चारकारके त्रि० स्त्रियां ङीप्। "सञ्चारिणी दीपशिखेवेति" रघुः। सा च हंसपद्यास्तु।

सञ्चाली स्त्री० सञ्चलति सम्+चल-ण गौ०ङीष्। गुल्फायाम्।

सञ्चित त्रि० सम्+चि-क्त। संगृहीते।

सञ्जीवन न०सम्+जु-युच्। परस्पराभिसुखतया स्थिते चतुःशालेगृहे।

सञ्जीवन न० सम्+जीव-ल्युट्। चतुःशालगृहे सम्यक्प्राणधारणे च। संजीवयति णिच्-ल्युट्। औषधिभेदे स्त्री० ङीप्।

सट न० स्त्री० सट-अच्। व्रतिनां केशसङ्घाते, जटायाम्, शिखायां, सिंहादेः केशरे च "सटाच्छटाभिश्चमनेनेति" माघः।

सटि(टी) स्त्री० सट-इन् वा ङीष्। यष्ट्याम्। कन्। गन्धपत्रवृक्षे। सट-इन् ङीष्। सठीत्यत्र।

सण्डीन न० सम्+डी-क्त। प्रक्रियां सङ्कल्प्य गमनरूपे गतिभेदे।

सत् त्रि० अस-शतृ। सत्ये, साधौ, पूजिते, धीरे, प्रशस्ते, विद्यमाने च। स्त्रियां ङीप् सा च पतिव्रतायां, स्त्रियां, दक्षकन्यायाञ्च। "सती सतीयोगविसृष्टदेहेति" कुमारः। ब्रह्मणि न०"ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत" इति गीता। आदरे अव्य० "सद्-सती आदरानादरयोरिति" पाणिनिः।

सतत न० सम्+तन-क पृ० समोऽन्त्यलोपः। निरन्तरे व्रह्मणि त्रि०।

सतच्च न० सच्च सदृशं तच्चेन । स्वभावे ।

सतानन्द पु० गौतमपुत्रे अहल्यागर्भजे मुनिभेदे ।

सतीन पु० सतीं नयति नी-ड । वंशभेदे, (क्षुद्रमटर) कलायभेदे च । स्वार्थे कन् तत्रैव ।

सतीर्थ्य पु० समाने तीर्थे गुरौ वसति यत् समानस्य सः । परस्परैकगुरुके छात्रे, नियंकारोऽयमित्यन्ये ।

सतील पु० सतीं लक्षयति ड । (क्षुद्रमटर) कलाये ।

सतीलक पु० सतील इव कायति कै-क, सह तिलेन तिलचिह्नेन कप् पृ० दीर्घः । वंशे, (क्षुद्रमटर) कलायभेदे च ।

सतीला स्त्री० सह तिलेन तिलचिह्नेन पृ० दीर्घः । कलायभेदे ।

सत्कर्त्तृ पु० सत्+कृ-तृच् । विष्णौ । सत्कारके त्रि० ।

सत्कर्म्मन् न० कर्म्म० । वेदादिविहिते यागादौ कर्म्मणि ।

सत्काञ्चनार पु० कर्म्म० । रक्तकाञ्चने ।

सत्कार पु० सत्+कृ-घञ् । सम्माननें, पूजने च ।

सत्कृत त्रि० सत्+कृ-क्त । पूजिते, कृतसम्माने च ।

सत्क्रिया स्त्री० सत्+कृ-य । सत्कारे, सम्माननें, पूजने च ।

सत्तम त्रि० अतिशयेन सत् तमप् । अतिशयसाधौ । [तायाञ्च ।

सत्ता स्त्री० सतो भावः तल । द्रव्यगुणकर्म्मवृत्तौ जातिभेदे, विद्यमान-

सत्त्व न० सद तत्त्व । स्थाने, यत्ने, सदादाने, आच्छादने, अरण्ये कैतवे, धने, गृहे, दाने, सर्पसि च ।

सत्त्वम् अव्य० सद-तसुन् । सत्यार्थे । न । सत्त्वाप्यर्थे अव्य०

सत्त्वशाला स्त्री०ङीप् । अन्नजलादेर्दानार्थे कल्पिते गृहे ।

सत्त्वाजित् पु० सत्त्वेनाजयति लोकान् आ+जि-क्विप् । श्रीकृष्णश्वशुरे सत्यभामाजनके राजभेदे ।

सत्त्विन् पु०सत्त्वं गृहं यज्ञो वा विद्यतेऽस्य इनि । गृहपतौ गृहस्थे च ।

सत्त्व न० सतोभावः त्व । सांख्यसिद्धे प्रकृत्यादिसाधने प्रकृत्यवयवे पदार्थे, "तत्र सत्त्वं निर्म्मलत्वात् प्रकाशकमनामयमिति" गीता । अयं हितकारः । पु० एकतकारः स्वभावे द्रव्ये, प्राणेषु, व्यवसाये, रणे,

आत्मनि, चित्ते, आयुषि, धने च । न्यायोक्ते यत्नाङ्गभे जातिभेदे, विद्यमानतायाञ्च हितकारः । अन्तुन् पु० न० ।

सत्यक्ष न० सत् शोभनं पक्षम् । पद्मस्य नवदले ह्रदे । सदले त्रि०

सत्पथ पु० कर्म्म० । शोभनमार्गे, वेदादिविहिताचारे च ।

सत्प्रतिग्रह पु० सद्भ्यः प्रतिग्रहः । साधुदत्तधनस्य प्रतिग्रहे "सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः । विभागः संप्रयोगश्च सत्प्रतिग्रह एव चेति" स्मृतिः ।

सत्प्रतिपक्ष पु० कर्म० । तुल्यविरोधिनि, न्यायोक्ते हेत्वदोषभेदे च ।

सत्फल पु० शोभनानि फलान्यस्य । दाड़िमवृक्षे सुफलवति त्रि०

सत्य न० सते हितं यत् । सत्ययुगे, शपथे, सिद्धान्ते, याथार्थ्ये च वर्त्तते त्रि० । अस्मत्पदस्य नान्दीमुखश्राद्धदेवे च पु० ।

सत्यङ्कार पु० सत्य+कृ-घञ् नि० सुम् । मयैतत् अवश्यं क्रेयमित्येवं सत्यकरणे, सत्यापने (वायनादेर्व्योया) ।

सत्यपुर न० सत्ययुक्तं पुरम् । विष्णुलोके ।

सत्यफल पु० सत्यं फलमस्य । विल्ववृक्षे ।

सत्यभामा स्त्री० सत्राजितोऽपत्यतायां श्रीकृष्णस्य भार्य्यायाम् ।

सत्यम् अव्य० सत्+यञ् । स्वीकारे ।

सत्ययुग न० सत्यप्रधानं युगम् शाक० । सत्यप्रचुरे प्रथमे युगे ।

सत्यलोक पु० सत्यप्रचुरो लोकः । ब्रह्मस्थसप्तलोकमध्ये, सर्व्वोपरिस्थे लोके । [दयोऽपत्रत्व ।

सत्यवचस् पु० सत्यं वचोऽस्य । मुनौ । सत्यवचनयुक्ते त्रि० सत्यवचना-

सत्यवत् पु० सत्यं विद्यते ऽस्य मतुप् मस्य वः । सावित्रीपतौ नृपभेदे मुनिभेदे च । सत्ययुक्ते त्रि० स्त्रियां ङीप् सा च व्यासस्य मातरि च ।

सत्यवतीसुत पु० ६त० । सत्यगन्धापुत्रे व्यासे मुनिभेदे ।

सत्यवाच् पु० सत्या वाक् यस्य । ऋषौ, काके च तस्य यद्वचनहि शुभाशुभनिश्चयेन तस्य तथात्वम् । सत्यवदनशीले त्रि० ।

सत्यवादिन् त्रि० सत्यं वदति वद-णिनि । यथार्थवाक्ये वक्तरि ।
सत्यव्रत पु० सत्यं व्रतमस्य । त्रिशङ्कु नामके राजभेदे । सत्यतत् परे त्रि०
सत्यसङ्कर सत्यः सङ्करः प्रतिज्ञा यस्य । कुबेरे सत्यप्रतिज्ञे त्रि०
सत्यसन्ध त्रि० सत्या सन्धा सन्धानं यस्य । 'सत्यात्मिसन्धौ ।
सत्याञ्जलि स्त्री० सत्य+आङ्+अञ्ज-क्विन् । सत्यमेतन्मयाऽऽख्येय मित्येवं प्रतिज्ञारूपे सत्यकरणे (वाक्यारम्भेऽव्ययो वा) ।
सत्यानृत न० सत्यसहितमनृतं यत्र । वणिग्वृत्तौ वाणिज्ये ।
सत्यापन न० सत्य+णिच्-युक्त ल्युट् । सत्याजतौ । सुच् । सत्यापनाप्यत्र स्त्री० । [वाक्ये न० ।
सत्योद्य त्रि० सत्यमुद्यं यस्य वद-क्यप् । सत्यवादिनि । कर्म्म० सत्य-
सद सद्भावे सन्तौ च अद० चु० आ० सक० सेट् । सादयते असदत् सत्त । सत्तापयते इत्यन्ये ।
सद न० सीदत्यस्मिन् सद-क्विप् । सद्यते, जले च ।
सदय पु० सद् अयः साधुशुभावहविधौ । सह दयया । दयान्विते त्रि०
सदस् स्त्री० न० । सीदत्यस्मिन् सद-असि । सभायाम् ।
सदस्य पु० सदसि साधुर्भवति वा यत् । न्यूनातिरिक्तताविपर्य्ययपरिहारार्थं विधावदर्शिनि । सभासदि त्रि० ।
सदा अव्य० सर्वस्मिन् काले दाच् सादेशः । सर्वस्मिन् काले इत्यर्थे ।
सदागति पु० सदा गतिरस्य । वायौ सदागतियुक्ते त्रि० ।
सदाचार पु० कर्म्म० इत० वा "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् । तं देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते । तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः । वर्णानां सान्तरालानां स सदाचार उच्यते"

इति मनूक्तदेशप्रचलिताचारे "साधवः क्षीणदोषाः सच्छब्दः साधुवाचकः। तेषामाचरणं यत्तु सदाचारः स उच्यते" इत्युक्ते साधूनामाचरणे च।

सदातन पु० सदा भवः सदा+भुव्+डट्च्। विष्णौ। नित्ये त्रि०। स्त्रियां ङीप्। [त्यांङ्ग।

सदातोया स्त्री० सदा तोयानि यस्याम्। करतोयानद्याम्, एलाप-

सदात्मन् त्रि० सन् साधुरात्मा चित्तं यस्य। साधुचित्ते।

सदादान पु० सदा दानं मदजलं त्यागो वा यस्य। ऐरावते गजे+सदात्यागिनि त्रि०।

सदानन्द पु० सदा आनन्दो यस्य सदाशिवे। अनवरतानन्दयुक्ते त्रि०

सदानर्त्त पु० सदा नृत्यति नृत—अच्। खञ्जनविहगे सदा नृत्यवति त्रि०।

सदानीरा स्त्री० सदा नीरमस्याम्। करतोयानद्याम्।

सदापुष्प पु० सदा पुष्पं यस्य। नारिकेलवृक्षे। रक्तार्के स्त्री० ङीप्। सदापुष्पयुक्ते त्रि०।

सदाप्रसून पु० सदा प्रसूनमस्य। रोहितकवृक्षे, अर्कवृक्षे, कुन्दे च।

सदाफल पु० सदा फलमस्य। नारिकेलवृक्षे, उडुम्बरवृक्षे च वार्त्ताकुभेदे त्रि० स्त्रियां टाप्।

सदाभद्रा स्त्री० सदा भद्रमस्याः गाम्भारीवृक्षे।

सदाशिव पु० सदा शिवमस्मात्। महादेवे।

सदुत्तर न० कर्म्म० व्यवहारे, प्रतिज्ञापत्त्रानुसारिण्युत्तरे पूर्वस्य सम्यगुत्तरे च हृत० तद्वति त्रि०।

सदृक्ष त्रि० समानं दर्शनमस्य दृश+क्स समानस्य सादेशः। तुल्यरूपे।

सदृश् त्रि० समानं दर्शनमस्य समान+दृश—क्विप् सादेशः। तुल्यरूपे।

सदृश त्रि० समानं दर्शनमस्य समान+दृश—टक्। तुल्यरूपे स्त्रियां ङीप्

सदेश पु० सह देशेन। निकटे। देशान्विते त्रि०।

सद्धेतु पु० कर्म्म० न्यायोक्ते हेत्वाभासदोषरहिते हेतौ।

सद्भाव पु॰ सतोभावः, सत् वा भावः। विद्यमानत्वे साधुभावे च। सद्भावमागत" इति भट्टिः।

सद्भूत न॰ असत् सत् भूतम्। सत्+च्वि—भू-क्त। यथार्थे। तद्वति त्रि॰

सद्मन् न॰ सीदत्यस्मिन् सद्—मनिन्। गृहे, जले च।

सद्यःजात त्रि॰ सद्यस्तत्क्षणात् जातः ज-क्त। तत्क्षणजाते।

सद्यःप्राणकर त्रि॰ सद्योहठात् प्राणं बलम् आयुर्वा करोति कृ-अच्। "सद्योमांसं नवान्नं च बाला स्त्री क्षीरभोजनम् हत-शुष्कोदकञ्चैव सद्यःप्राणकराणि षडित्युक्ते" द्रव्यसमूहे।

सद्यःप्राणहर त्रि॰ सद्यः प्राणमायुर्बलं वा हरति हृ-अच्। शुष्कं मांसं स्त्रियो हत्वा बालार्कस्तरुणं दधि। प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षडित्युक्ते" शुष्कमांसादिद्रव्यसमूहे।

सद्यःशोथा स्त्री॰ सद्यः शोथोयस्याः। कर्पिकच्छाम्।

सद्यःशौच न॰ सद्यः शीघ्रमपनेयमशौचम्। स्मृत्युक्ते शीघ्रनाश्ये अशौचे ह्रस्व॰। तद्वति शिल्पन्दशनोक्तियादौ त्रि॰।

सद्यस् अव्य॰ समेऽह्नि नि॰। तत्क्षणे, समानदिवसे इत्यर्थे च।

सद्यस्क त्रि॰ सद्योभवः कन्। सद्योजाते।

सद्योजात पु॰ सद्योजायते जन—कर्त्तरि क्त। वत्से, शिवमूर्त्तिभेदे च आशुजाते त्रि॰।

सद्योभाविन् पु॰ सद्योभवति भू-णिनि। वत्से।

सद्वृत्त न॰ वृत्त-क्त-कर्म्म॰। साधुस्वभावे साधुवर्त्तने। ह्रस्व॰ सच्चरित्रवति त्रि॰। 'सद्वृत्तसन्निकर्षोहि नृणामर्थमपि यच्छति' इति पुराणम्।

सद्वृत्ति स्त्री॰ कर्म्म॰। उत्तमचरित्रे उत्तमव्याख्यानरूपे ग्रन्थे च सती वृत्तिः यस्य। सद्वृत्तिमति त्रि॰ 'सद्वृत्तिः सन्निबन्धनेति' माघः। [वा ङीप्।

सधर्म्मन् त्रि॰ समानोधर्मोऽस्यअनिच् समानस्य सः। सदृशे। स्त्रियां

सधर्म्मचारिणी स्त्री॰ सह धर्म्मं चरति चर-णिनि। सह धर्म्म-चारिण्यां भार्य्यायाम्। [ङीप्। सा च पतिव्राह्म।

सधर्मिन् त्रि॰ समानं धर्मं चरति। तुल्यधर्मचरणकर्त्तरि। स्त्रियां

सधवा स्त्री० सह धवेन । जीवत्पतिकायां स्त्रियाम् ।

सधर्म्यच् त्रि० सह-अञ्चति अनुच-क्विप् सहस्य सधिः । सहचरे स्त्रियां ङीप् सधर्मीची सा च भार्य्यायाञ्च ।

सन पु० सन-अच् । घण्टापाटलिवृक्षे ।

सनक पु० सन वुन् । मुनिभेदे 'सनकश्च सनन्दश्चेति' तर्पणमन्त्रम् ।

सनत् पु० सन-अति । चतुर्मुखे ब्रह्मणि, सदेत्यर्थे अव्य० ।

सनत्कुमार पु० ६त० । ब्रह्मणः पुत्रे मुनिभेदे ।

सनन्द पु० सह नन्देन । मुनिभेदे । आनन्दयुक्ते त्रि० ।

सनपर्णी स्त्री० सनस्येव पर्णान्यस्याः ङीप् । असनपर्ण्याम् ।

सनसूच न० सनस्य सूतमस्त्यस्य अच् पृ० । सूतस्थधारणार्थं सूतकृते जाले

सना अव्य० सदा-नि दस्य नः । सदेत्यर्थे ।

सनातन त्रि० सदा टुयुल् तुट् च नि० । सदाभवे वस्तुनि नित्ये च स्त्रियां ङीप् साच सरस्वत्यां, लक्ष्म्याञ्च । शिवे ब्रह्मणि, दिव्य-मनुष्ये च पु० ।

सनाभि पु० समानः नाभिर्यस्य । ज्ञातौ तस्य एकदेहोत्पन्नत्वेन तुल्य-नाभिता इति तथात्वम् । मध्ययुक्ते, स्नेहयुक्ते च त्रि० ।

सनामक पु० सना सदा अमयति अम-ण्वुल् । शोभाञ्जनवृक्षे तस्य पत्त्रादिभोजनस्य रोगहेतुत्वात्तथात्वम् । सह नाम्ना कप् । नाम-युक्ते त्रि० । [ङीप् ।

सनि पु० सन इन् । पूजायां, दाने च । सत्कारपूर्वकनियोगे स्त्री० वा

सनिष्ठो(ष्ठे)व न० सह निष्ठी(ष्ठे)वेन । मुखच्युतवारिकणे (सशब्दत्कारे)

सनीड त्रि० समानं नीडं सह नीडेन वा । निकटस्थे, नीड़युक्ते च ।

सन्तत न० सम्+तन-क्त । सतते निरन्तरे । नैरन्तर्य्यवति विस्तीर्णे च त्रि० ।

सन्तति स्त्री० सन्तन्यते सम्+तन-क्तिच् । गोत्रे, पुत्रे, कन्यायाञ्च । भावे-क्तिन् । विस्तारे, षड्भौ, अविच्छिन्न धारायाञ्च ।

सन्तप्त त्रि० सम्+तप-क्त । अध्वगत्यादिना परिश्रान्ते, अग्नितप्ते, तेन विशुद्धे च 'सन्तप्तचामीकरवल्लुरुवर्ज्जमिति भट्टिः ।

सन्तमस न० सन्तं तमः अच् समा०। गाढान्धकारे, मोहे च

सन्तान पु० सम्+तन-घञ्। वंशे, अपत्ये, विस्तारे, कल्पवृक्षे च।

सन्तानिका स्त्री० सम्—तन-ण्वुल् टाप् अत इत्वम्। क्षीरसरे, कर्कटङ्गे, फेने, छुरिकाफले च।

सन्ताप पु० सम्यक् तापः प्रा०। वह्निजाते तापे।

सन्तापन पु० सन्तापयति सम्+तप-णिच्-ल्यु। कामदेवस्य पञ्चशरान्तर्गते शरभेदे। सन्तापकारके त्रि०।

सन्तोष पु० सम्+तुष-घञ्। धैर्ये, स्वाप्ये च 'सन्तोषमूलं हि सुखमिति मनुः। [त्रिकाण्डशे स्त्री०।

सन्दंश पु० सम्+दन्श-अच्। (सांडाशी) यन्त्रभेदे। ण्वुल्। सन्दंशापतित पु० सन्दंशे तन्मध्ये पतित इव। भीमांसोक्ते न्यायभेदे

सन्दर्भ पु० सम्+दृभ-घञ्। रचनायां, ग्रन्थने, प्रबन्धे "गूढार्थस्य प्रकाशश्च सारोक्तिः श्लेष्टता तथा। नानार्थवक्त्वं वैद्यत्वं सन्दर्भः कथ्यते बुधैरित्युक्ते कथनभेदे, वक्तृतात्पर्यविशेषे च।

सन्दान न० सम्+दो-ल्युट्। बन्धने, दाम्नि, सम्यक्खण्डने च दा-ल्युट्। सम्यग्दाने न० गजस्याष्टावंशोरक्षोभागे पु०।

सन्दानिका स्त्री० सन्दानं संखण्डनमस्त्यस्य ठन्। विट्खदिरे

सन्दानित त्रि० सन्दानं जातमस्य तारं०इतच्। बद्धे 'रसनासन्दानितचरणे'ति मालविकाग्निमित्रम्।

सन्दानिनी स्त्री० सन्दानं बन्धनं गवामत्र इनि ङीप्। गोष्ठे

सन्दाव पु० सम्+दु-घञ्। पलायने।

सन्दाह पु० सम्+दह घञ्। सुखादिशोषे, सम्यग्दाहे च।

सन्दिग्ध त्रि० सम्+दिह-कर्त्तरि क्त। सन्देहयुक्ते। कर्मणि क्त। सन्देहविषये।

सन्दित त्रि० सम्+दो-क्त। बद्धे।

सन्दिष्ट न० सम्+दिश—भावे—क्त। वाचिकार्थकथने वार्त्तायाम् कर्मणि-क्त। उपदिष्टे त्रि०।

सन्दिहान त्रि० सम्+दिह-शानच्। सन्देहयुक्ते।

सन्दी स्त्री० सम्+दो-क गौ०-ङीष्। खट्टायाम्।

सन्दीप्य पु० सन्दीप्यतेऽसौ सम्+दीप-कर्त्तरि यत्। मयूर शिखाद्रुमे।

सन्देश पु० सम्+दिश-घञ्। वाचिकार्थकथने वार्त्तायाम्।

सन्देशहर पु० सन्देशं हरति अभीष्टस्थानं कथनाय नयति हृ-अच्। दूते 'तवैव सन्देशहरादिति' रघुः। एवुल्। सन्देशहारकोऽप्यत्र।

सन्देह पु० सम्+दिह-घञ्। संशयशब्दार्थे।

सन्दोह पु० सम्+दुह-घञ्। समूहे। सम्यगदोहे च

सन्द्राव पु० सम्+द्रु-घञ्। पलायने।

सन्धा स्त्री० सम्+धा-अङ्। स्थितौ, प्रतिज्ञायाम्, सन्धाने, सुरोत्पादनानुगुणे व्यापारभेदे, अनुसन्धाने च।

सन्धान न० सम्-धा-ल्युट्। सुरादिसम्पादनानुगुणे व्यापारे सोमरसकण्डनात्मके अभिषवे, अनुसन्धाने सङ्गतौ च सन्धाने स्त्रीत्वमपि तत्र ङीप्। सा च कृत्यशालायाञ्च

सन्धि पु० सम्+धा-कि। नृपाणां षड्गुणान्तर्गते मेलनार्थे सैलीकरणरूपे व्यापारे, संयोगे, अस्थिद्वयसंयोगस्थाने, चौरादिहृतसुरङ्गायां 'सन्धिं कृत्वा तु चौर्यमिति स्मृतिः भेदे, सङ्गतौ, नाटकाङ्गविशेषे, व्याकरणोक्ते वर्णद्वयजाते वर्णविकारभेदे।

सन्धिचौर पु० सन्धिना कृतसुरङ्गया चौरः। सन्धिं कृत्वा चौर्यकारके (सिन्धेल)।

सन्धिजीवक पु० सन्धिं जीवति जीव-ण्वुल्। शाठ्येन परार्थहारके

सन्धित त्रि० सन्धा जातार्थ तारकादित्वात्। कृतसन्धे, मिलिते च

सन्धिनी स्त्री० सन्धा वृषभसंयोगस्तज्जगर्भोऽस्त्यस्याः इनि ङीप्। वृषभसंयोगेन धृतगर्भायां गवि।

सन्धिपूजा स्त्री० सन्धौ अष्टम्याः शेषे नवम्याश्च आद्ये दण्डे पूजा। आश्विनशुक्लाष्टमीनवमीसन्धिकाले विहितपूजायाम्।

सन्धिबन्ध पु० सन्धिं बध्नाति संयुनक्ति सम्+बन्ध-अच्। भूमिबन्धके। तल्लेखने हि भग्नसन्धियोजनं वैद्यके प्रसिद्धम्।

सन्धिला स्त्री० सन्धिं लाति ला-क। नद्यां, मदिरायाञ्च। स्वार्थे कन्। तत्रैव।

सन्धिविग्रहाधिकारिन् पु० सन्धिविग्रहेषु अधिकरोति अधि+कृ-णिनि। राज्ञां सन्धिविग्रहाद्यधिकारिमन्त्रिभेदे

सन्धिवेला स्त्री० सन्धियुक्ता वेला समयः। अहोरात्रसन्धिसमये

सन्धिहारक पु० सन्धिना सुरङ्गया हरति परद्रव्यम् हृ-ण्वुल् सन्धिचौरे। (सिन्धेल)

सन्धुक्षित त्रि० सम्+धुक्ष क्त। उद्दीपिते।

सन्धेय त्रि० सम्+धा-यत्। संयोज्ये मेलनीये।

सन्ध्या स्त्री० सम्-ध्यै-क्विप् टाप्। एक रूपकालोत्तरभाविपररूपकालस्थावकाशे, दिवारात्रस्य मध्यवर्त्तिकाले, स च दिवाभेदखण्डसन्धितरात्रिप्रथमखण्डात्मकः कालः तयोश्चतुर्दण्डात्मककालस्य "त्रियामां रजनीं प्राहुस्तस्यां सन्ध्याद्वयन्तु चतुष्टये। नाड़ीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते इति स्मृतिः। अहोरात्रस्य यः सन्धिः सूर्य्यनक्षत्रवर्जितः। सा च सन्ध्या समाख्यातेति स्मृतिः। सायाह्ने, सन्ध्याकाले उषास्यदेवताभेदे च। सन्ध्यामुपासते ये तु नियतं संशितव्रता इति स्मृतिः। 'प्रातः सन्ध्यां ततः कृत्वा सङ्कल्पं बुध आचरेद्दिनं इति स्मृतिः। एतद्विशेषो वाचस्पत्ये। 'चत्वार्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्। तस्य तावच्छती सन्ध्या सन्ध्यांशश्च प्रकीर्त्तित 'इत्युक्ते युगसन्धिकाले, नदीभेदे, ब्रह्मपत्नीभेदे च।

सन्ध्यांश पु० सन्ध्यायाः सत्ययुगादेरंशः। सत्ययुगादेरंशभेदे तत्प्रमाणम् सन्ध्यार्थे द्रष्टव्यम्। 'सन्ध्यासन्ध्यांशसहितं विज्ञेयं चतुर्युगमिति मनुः।

सन्ध्याचल पु० 'सन्ध्यां वशिष्ठः कृतवान् तत्र यस्माद्विधेः सुतः। ततः सन्ध्याचलं नाम तस्य गायन्ति देवता' इत्युक्ते पर्व्वतभेदे।

सन्ध्यानटिन् सन्ध्यायां नटति नट-णिनि। शिवे।

सन्ध्यापुष्पी स्त्री० सन्ध्यायां पुष्पमस्याः। जातिवृक्षे।

सन्ध्याबल पु० सन्ध्यायां सन्ध्योपलक्षिते रात्रिकाले बलं यस्य । रात्रौ बलयुक्ते राक्षसे । [कमेघे च ।

सन्ध्याभ्र न० सन्ध्याकालिकमभ्रमिव । सुवर्णगैरिके । सन्ध्याकालि-

सन्ध्याराग न० सन्ध्याया इव रागोऽस्या सिन्दूरे । [अस्मिन् ।

सन्ध्याराम पु० सन्ध्यायां तदाख्यभार्यायां रमते रम-घञ् । चतुर्मुखे

सन्न पु० सीदति सद क्त । पियालवृक्षे अवसन्ने त्रि० स्वार्थे कन् । खर्जे

सन्नकद्रु पु० सन्न एव सन्नकः कर्म्म० । पियालवृक्षे खर्जवृक्षे च

सन्नत त्रि० सम्+नम क्त । प्रणते, शब्दायमाने च ।

सन्नति स्त्री० सम् + नम-क्तिन् । प्रणामे, ध्वनौ, नम्रतायाञ्च ।

सन्नद्ध त्रि० सम्+नह-क्त । कृतसन्नाहे धृतवर्म्मणि, व्यूह रचनयावस्थिते सैन्यादौ, आततायिनि, सन्नद्धियुक्ते च ।

सन्नय पु० सम्+नी-अच् । सम्हे, धृतस्थिते बले च ।

सन्नहन न० सम्+नह-ल्युट् । वर्म्मधारणे, उद्योगे, सम्यग् बन्धने च ।

सन्नाह पु० सन्नह्यते सम् + नह-घञ् । (सांजोया) वर्म्मणि ।

सन्निकर्ष पु०सम्+नि-कृष-घञ् । सान्निध्ये 'सद्वृत्तसन्निकर्षो हि क्षणार्द्धमपि श्लाघ्यते" इति पुराणम् । विषयेन्द्रियसम्बन्धे, न्यायमते ज्ञानलक्षणा सामान्यलक्षणायोगजधर्म्मविशेषात्मके अलौकिकप्रत्यक्षसाधने उपायभेदेच ।

सन्निकर्षण न० सम्+नि+कृष-ल्युट् । सन्निधाने ।

सन्निकृष्ट त्रि०सम्+नि+कृष-क्त । निकटस्थे]

सन्निध न० सम्+नि+धा-क । नैकट्ये ।समीपस्थिते त्रि० ।

सन्निधान न० सम्+नि + धा-ल्युट् । नैकट्ये, सामीप्ये ।

सन्निधि पु० सम्+नि+धा-कि । सामीप्ये । कर्म्मणि कि । इन्द्रियविषये । कर्म० । साधु निधौ ।

सन्निपतित त्रि० सम् + नि—पत—क्त । मिलिते, उपस्थिते, मृते च

सन्निपात पु० सम्+नि—पत-घञ् । मेलने 'सन्निपात लक्षणोविधिर्निमित्तं तद्विघातस्येति" व्या० परि० । कफादिधातुत्रयस्य विजातीयवैषम्यरूपत्रिदोषजे विकारे, नाशे, उपस्थितौ च ।

सन्निपातज्वर पु० सन्निपातस्य तदर्थो ज्वरः। वैद्यकोक्ते। त्रिदोषज-विकारसाधने ज्वरे। [पाणिनिग्रे।

सन्निपातनुद् पु० सन्निपातं त्रिदोषजविकारं नुदति नुद-क्विप्। ने-

सन्निबन्धन न० सम्यक् निबन्धनं प्रा०। नानाख्यानस्यवाक्यानामेकत्र सङ्कलने, तदुपयोगिग्रन्थभेदे च। ७त०। सम्यग्निबन्धवति त्रि० 'स-दृक्तिः सन्निबन्धनेति" माघः।

सन्निभ त्रि० सम्+नि+भा-क। सदृशे। निभादिवदस्य नित्यसमासता।

सन्निवेश पु० सम्+नि+विश-आधारे घञ्। पुरादेर्वाह्यस्थदेशे। भावे घञ्। सम्यक् स्थितौ।

सन्निहित त्रि० सम्+नि+धा-क्त। निकटस्थे "कर्म्मासन्निहितं नैवेति" मीमांसा। सम्यक् स्थापिते च। भावे क्त। नैकट्ये न०

सन्न्यस्त त्रि० सम्+नि+अस-क्त। निक्षिप्ते, कृतसम्यक्त्यागे, युक्ते, अ-र्पिते च।

सन्न्यास पु० सम्+नि+अस-घञ्। "काम्यानां कर्म्मणां त्यागं सन्न्यासं कवयोविदु" रित्युक्ते विहितकर्म्मणां विधानेन सम्यक्त्यागे, तदु-पयोगिचतुर्थाश्रमे, चैत्रे-कर्त्तव्ये पुराणप्रसिद्धशिवव्रतभेदे च।

सन्न्यासिन् पु० सम्+नि+अस-णिनि। सन्न्यासवति, चतुर्थाश्रमवति, चैत्रे कर्त्तव्यशिवव्रत कर्त्तरि च।

सपक्ष पु० समानः पक्षः। तुल्यरूपे साध्यसाधनाश्रये पक्षे च।

सपक्षाकरण न०सह पक्षेण पक्षेण सपक्षः तथा क्रियते सपक्ष+डाच् ञ-ल्युट्। पक्षेण सह शरवेधनरूपे अत्यल्पव्यधने। कर्म्मणि-क्त। सपक्षाकृतः। तथा पीड़िते त्रि०।

सपत्न पु० सह एकार्थे पतति यतते पत-न सहस्य सः। शत्रौ।

सपत्नारि पु० सपत्नः अरिरिव। (वेडवाँश) वंशभेदे।

सपत्नी स्त्री०समानः पतिर्यस्याः ङीप् न च। एकभर्त्तृकायां स्त्रियाम्, समस्वामिकायां भूम्यादौ तु सपतिरित्यपि।

सपदि अव्य० सह पद्यते पद-इन् सहस्य सः तत्क्षणदृत्यर्थे 'सपदि शङ्कितताज्ञीमिति" कुमारः।

सपर्य पूजायां चुरा॰ उभ॰ सक॰ सेट्। सपर्यति ते असपर्यीत्।

सपर्या स्त्री॰ सपर—यक्—अ टाप्। पूजायाम् "सोऽहं सपर्यार्विधिभाजनेनेति" रघुः। [शरविशिष्टे च।

सपाद स्त्री॰ सह पादेन चरणेन चतुर्थांशेन वा। पादसहिते, चतुर्थांशसहिते च।

सपिण्ड त्रि॰ समानः पिण्डः स्वदेहारम्भकदेहोयस्य। एकदेहारम्भदेहे ज्ञातिभेदे "असपिण्डा च या मातुरिति" स्मृतिः ज्ञातीनाञ्च व्याख्यात् परम्परया अतिपरम्परया वा एकदेहारम्भकत्वात्तथात्वम्। तत्व च दाये अशौचे च सापिण्ड्यविशेषो वाचस्पत्ये वक्ष्यते। "दातृत्वभोक्तृत्वे नैकपिण्डवति दायव्यवहणोपयोगि सापिण्ड्य" मिति दायभागः।

सपिण्डीकरण न॰ सह पिण्डेन ततः अभूततद्भावे च्वि+कृ-ल्युट्। प्रेतत्वविमोचनाय प्रेतोद्देशेन कर्त्तव्ये पित्रादिपिण्डसमन्वयकरणे श्राद्धभेदे "सपिण्डीकरणादूर्द्धं न दद्यात् प्रतिमासिक" मिति स्मृतिः।

सपिण्डीकृत त्रि॰ सह पिण्डैः पित्रादिपिण्डैः सपिण्डः ततः च्वि-कृ कर्म्मणि क्त। यदुद्देशेन सपिण्डीकरणं श्राद्धं कृतं तस्मिन् मृते जने "ये सपिण्डीकृताः प्रेता" इति स्मृतिः।

सपीतक पु॰ सह समानः पीतकेन। राजघोषातकीवृक्षे।

सपीति स्त्री॰ पा॰क्तिन् पीतिः पानम् सह एकत्र पीतिः। स्नात्रादीनां सह भोजने।।

सपीतिका स्त्री॰ सह पीतेन कप् अतइत्वम्। हस्तिघोषातकीवृक्षे।

सप्तक न॰ सप्तानामवयवः कन्। सप्तसङ्ख्यायाम्। सप्त प्रमाणमस्य कन् सप्तसङ्ख्यान्विते त्रि॰।

सप्तकी सप्तभिः स्वरैरिव कायति शब्दायते कै-क ङीष्। मेखलायाम्

सप्तचत्वारिंशत् स्त्री॰ सप्ताधिका चत्वारिंशत् शाक॰ (सातचल्लिश) सङ्ख्यायां, तत्सङ्ख्यान्विते च। एवं सप्तदशादयः सप्ताधिकतत्तत्सङ्ख्यायां तत्सङ्ख्यान्विते च।

सप्तच्छद पु॰ सप्त सप्त छदाः प्रतिपत्रम् यस्य इत्वे सङ्ख्याशब्दस्य पूर्वनिपातार्थता भाष्योक्ता। (छातिम) वृक्षे।

सप्तजिह्व पु० सप्त जिह्वा इव आस्वादसाधनानि अर्चींषि यस्य । वह्नौ "काली कराली च मनोजवा च सुलोहिता चैव सुधूम्रवर्णा । स्फुलिङ्गिनी विश्वरुची च देव्यः सप्तैव जिह्वाः कथितास्तु जिह्वा" इत्युक्तानां सप्तानामग्निज्वालानामेव तज्जिह्वात्वमुक्तम् । [योऽध्यत्र।

सप्तज्वाल पु० सप्त कालीत्यादयः ज्वाला यस्य । वह्नौ सप्तार्चिरादि-

सप्ततन्तु सप्तभिः भूरादिभिर्व्याहृतिभिस्तन्यते तत् तनु । यज्ञे ।

सप्तति स्त्री० सप्तगुणिता दशतिः गि० । (सत्तर)सङ्ख्यायां तत्सङ्ख्यान्विते च ।

सप्ततितम त्रि० सप्ततेः पूरणः तमप् । येन सप्ततिसङ्ख्यापूर्व्यते तस्मिन् त्यर्थे । [स्मिन्नर्थे।

सप्तदश त्रि० सप्तदशानां पूरणः डट् । येन सप्तदशसङ्ख्या पूर्य्यते

सप्तद्वीपा स्त्री० सप्त जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करद्वीपाः यस्याः । जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करद्वीपवत्यां पृथिव्याम् ।

सप्तधा[3]अव्य० सप्तन्+प्रकारे धाच् । सप्तप्रकारे ।

सप्तधातु पु० ब० व० । सप्तगुणिता धातवः । देहस्थेषु 'रसाश्च मांसमेदोऽस्थिमज्जानः शुक्रसंयुताः । शरीरस्था इमे ज्ञेयाः सप्तैते सप्त धातव" इत्युक्तेषु रसादिषु धातुषु ।

सप्तन् पु०त्रि० । सप्त-तनिन् । (सात) सङ्ख्यान्विते ।

सप्तनामा स्त्री० सप्त नामानि यस्याः डाप् । आदित्यभक्तायाम्

सप्तपत्र पु० सप्त सप्त पत्त्राणि प्रतिपत्त्रं यस्य । छदरक्षे, सप्तच्छद-वृक्षे च ।

सप्तपदी स्त्री० सप्तानां पदानां समाहारः ङीप् । विवाहकाले मन्त्र-लिकासु गन्तव्येषु सप्तसु पदेषु ।

सप्तपर्ण पु० सप्त सप्त पर्णान्यस्य प्रतिपर्णम् । (छातिम) वृक्षे । सप्ता-नुलनायां स्त्री० ।

सप्तपाताल न० समाहारद्विगुः पात्रादि । अतलं वितलञ्चैव नितलञ्च क्रमादधः । महातलञ्च सुतलं पातालं सप्त कीर्त्तित' मित्युक्ते सप्तसु भूमेरधःस्थलोकेषु ।

सप्तसप्तति स्त्री० ब० व० सप्तसंख्याताः सप्तयः । ब्राह्मणजिने मन्त्रदृक्

प्रकारकचिन्तरूपप्रकृतिभूतहेतुशब्दादितत्कालालके पदार्थे सप्तके "महदाद्याः प्रकृतिर्विकृतयः सप्त" इति सांख्यकारिका प्रोक्तपदार्थे हेतुत्वात्प्रकृतित्वम् प्रकृतिकार्य्यत्वाच्च विकृतित्वमाख्यम् ।

सप्तभद्र पु० सप्तसु स्थानेषु भद्रमस्य । गिरीशवृक्षे ।

सप्तम त्रि० सप्तानां पूरणः मट् । येन सप्तसंख्या पूर्य्यते तत्त्रिलिङ्गे स्त्रियां ङीप् । सा च चन्द्रस्य सप्तमकलायां स्त्रियां तिथौ च ।

सप्तरक्त पु० सप्त रक्तानि प्रशस्तान्यस्य । "माणिक्यादतले रक्ते नेत्रान्तरनखानि च । तालुकाधरजिह्वाश्च प्रशस्ता सप्तरक्तता" इत्युक्तस्थानेषु रक्ततावति जने ।

सप्तर्षि पु० ब० व० । सप्त ऋषयः कर्म्म० । "मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरङ्गिराः वशिष्ठश्चेत्युक्तेषु सप्तसु ऋषिषु ।

सप्तर्षिमण्डल त्रि० ६त० । आकाशे नित्यं ध्रुवनक्षत्रपरिभ्रामके नक्षत्रसप्तकात्मके नक्षत्रमण्डलभेदे "सप्तर्षिमण्डलं तस्माद्दृश्यते सर्व्वकेपरीति" पुराणम् । [गुञ्जायां, पाटलायाञ्च ।

सप्तला स्त्री० सप्तवा लाति ला-क । नवमालिकायां चर्म्मकषायां,

सप्तशती स्त्री० सप्तानां शतानां समाहारः । मार्कण्डेय पुराणान्तर्गते सप्तशतमन्त्रसमुदायात्मके देवीमाहात्म्यबोधके ग्रन्थभेदे । "मध्ये सप्तशतीं जपेदिति" पुराणं तद्विभागो वाचस्पत्ये वक्ष्यते । [यज्ञदोषसूचके सप्तशलाकाकारितचक्रभेदे ।

सप्तशलाक पु० सप्त शलाकाकारा रेखा यत्र । ज्योतिषोक्ते त्रिभाङ्के-

सप्तशिरा स्त्री० सप्त शिरा अस्याः । ताम्बूलवल्ल्याम् । [दयोऽप्यत्र

सप्तसप्ति पु० सप्त सप्तयोऽश्वा यस्य । सूर्य्ये, अर्कवृक्षे च । सप्तार्णा-

सप्तसागर पु० ब० व० सप्तसंख्याताः सागराः । "नवनीतसुरासर्पिर्दधिदुग्धजलान्तका" इत्युक्तेषु सप्तसु सागरेषु । सप्त एतादिकल्पिताः सागराइव देयपदार्था यत्र । पुराणोक्ते स्वनामख्याते महादानभेदे तत्त्वं वाचस्पत्ये ।

सप्तांशु पु० सप्त अंशवोऽस्याः यस्य । "कालीकरालीचेत्याद्युक्ते" सप्त-ज्वालावति वह्नौ ।

सप्ताश्ववाहन पु० सप्त अश्वाः वाहनान्यस्य । सूर्ये, अर्कवृक्षे च ।

सप्ति पु० सप-क्ति । अश्वे । [सफरीविघट्टितोर्वित" माघः ।

सफर पु० सप-अरन् पृ० यस्य फः । (पुँटी) मत्स्ये स्त्रीत्वमप्यत्र "चल-[च ।

सफल त्रि० सह फलेन सस्य सः । अव्यर्थे, फलयुक्ते च ।

सबल त्रि० सह बलेन सामर्थ्येन सैन्येन वा । सामर्थ्यान्विते सैन्ययुक्ते

सब्रह्मचारिन् पु० समानं ब्रह्म वेदग्रहणकालिकं व्रतं चरति चर-णिनि । एकगुरुसकाशात् वेदाध्ययनकाले तच्चिबन्धु-समानव्रता-चारवति ।

सभर्तृका स्त्री० सह भर्त्रा पत्या । विद्यमानपतिकायां स्त्रियाम् ।

सभा स्त्री० सह भान्ति अभीष्टनिश्चयार्थमेकत्र यत्र । बहूनां स-मावेशनस्थाने, तदधिष्ठायिजनसमूहे च ।

सभाज सेवने दर्शने च सक० प्रीतौ अ० अद० चु० उभ० सेट् । स-भाजयति ते असिसभाजत्-त ।

सभाजन न० सभाज-ल्युट् । गमनागमनादिकाले सुखानन्दप्रीतिसाधने सम्भाषणे, पूजने च ।

सभासद् पु० सभायां सीदति-क्विप् । सामाजिके सभ्ये ।

सभास्तार पु० सभां स्तृणाति कृ-अण् । सभ्ये ।

सभिक पु० सभा द्यूतसभास्त्यस्य ठन् । द्यूतकारके

सभीक पु० सभा द्यूतं प्रयोजनमस्य ईक । द्यूतकारे ।

सभोचित पु० सभा उचिता परिचिता यस्य । परिचिते । सभायोग्ये त्रि०

सभ्य पु० सभायां साधुः यत् । सामाजिके, द्यूतकारे च विश्वस्ये त्रि० ।

सम अव्य० सो-कनु । सम्यगर्थे, प्रकर्षे सङ्गतौ शोभने, सदृशत्वे च ।

सम त्रि० सम-अच् । समाने, तुल्ये, सदृशे, साधौ च (योड़ा)युग्मे, "समेऽर्द्धिते वर्गे" इति लीलावती । समतयाख्यातेषु द्वितीयचतुर्थ-षष्ठादिषु राशिषु च । अतुल्येऽस्य सर्व्वनामता । गीतवाद्ययो-रैक्यावस्थाभवे गायकवादकादिचालकरूपे ताले न० ।

समञ्ज अव्य० अञ्चेः समोपम् अव्ययी० अच्। अनुःसदृशवर्णे तदस्यास्ति अच्। प्रशस्तसदृशवर्णे त्रि०।

समगन्धक पु० समाःतुल्यभागेन निवेशितागन्धाः गन्धद्रव्यद्रव्याण्यत्र कप्। क्रीतिमधुपभेदे। [(वेनारमूड)

समगन्धिक पु० समः सर्व्वदा तुल्यरूपः गन्धोऽस्यास्ति ठन् ङीप्। सकले

समग्र त्रि० समं सकलं यथा स्यात्तथा गृह्यते पचा-ड। सकले।

समङ्गा स्त्री० समञ्चतेऽनया सम्+अनुज-घञ्। सङ्गिडायाम्

समचित्त त्रि० समं सर्व्वत्र समभावं चित्तं यस्य। सर्व्वत्र तुल्यदर्शके तत्त्वज्ञानिनि।

समज न० समजत्यत्र सम्+अज-अप् व्यभावः। वने, समूहे पशूनां संघे, मूर्खदुन्दुरे च।

समज्ञा स्त्री० समज्ञिन् सर्व्वत्र ज्ञायते ऽनया ज्ञा-कप्। कीर्त्तौ

समज्या स्त्री० सम्+अज-क्यप् न वीभावः। सभायाम्, कीर्त्तौ च।

समञ्जस त्रि० सम्यक् अञ्ज औचित्यं यत्र। उचिते, युक्ते च प्रा०। औचित्ये न०।

समदर्शिन् त्रि० समञ्जिन् सर्व्वत्र ब्रह्मभावेनाऽभिन्नतया पश्यति दृश-णिनि। सर्व्वत्र समदर्शके तत्त्वज्ञानिनि। "विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पण्डिताः समदर्शिनः" इति गीता।

समदृष्टि स्त्री० कर्म्म०। सर्व्वत्र तुल्यदर्शने। ६ ब०। समदर्शिनि त्रि०

समधिक त्रि० सम्यक् अधिकःप्रा०। अत्यन्ताधिके।

समन्त पु० सम्यक् अन्तः स यत्र वा। सम्यगन्ते, सीमायाम् च।

समन्ततस् अव्य० समन्त+तसिल्। सर्व्वत्र विस्तारे।

समन्तदुग्धा स्त्री० समन्ततो दुग्धमस्याः। स्नुहीवृक्षे।

समन्तपञ्चक न० समन्तात् पञ्चकं नदपञ्चकं यत्र। तीर्थभेदे।

समन्तभद्र पु० समन्तात्भद्रमस्य। बुद्धे।

समन्तभुज् पु० समन्तात् भुङ्क्ते भुज-क्विप्। वह्नौ।

समन्तात् अव्य० समन्त+आति। समन्तत इत्यर्थे सर्व्वत्र विस्तारे च।

समन्वित त्रि॰ सम्+अनु+इण्-क्त। सङ्गते।

समपद न॰ समं पदं यस्मिन्। धन्विनां स्थानपदनिवेशनपूर्वके "स्थानानि धन्विनां पञ्च" त्युपक्रम्य "अन्यथं स्यात् समपद मित्युक्ते" अवस्थानभेदे।

समभिव्याहार पु॰ सम्+अभि+वि+आ+हृ-घञ्। साकाङ्क्षत्वे।

समभिव्याहृत त्रि॰ सम्+अभि+वि+आ+हृ-क्त। साकाङ्क्षे।

समभिहार पु॰ सम्+अभि+हृ-घञ्। पौनःपुन्ये "क्रियासमभिहारेण विराध्यन्ते" मिति माघः।

समम् अव्य॰ सम-अम्। साकाङ्क्षत्वे, एकदेत्यर्थे, "समभेव समाक्रान्तं हयमिति" रघुः

समय पु॰ सम्+इण्-अच्। काले, शपथे, आचारे सिद्धान्ते निर्देशे सङ्केते, भाषायां, अङ्गीकारे च।

समया अव्य॰ सम+इण्-आ। नैकट्ये, मध्ये, च।

समयाध्युषित पु॰ समयः अध्युषितो यत्र। सूर्य्यतारारहितकाले "उदितेऽनुदिते चैव समयाध्युषिते तथे"ति मनुः।

समर पु॰ न॰ सम्+ऋ-अप्। युद्धे।

समरमूर्द्धन् पु॰ ६त॰। समरस्याग्रे।

समर्च्चन न॰ सम्यक् अर्च्चनं प्रा॰। सम्यक्पूजने।

समर्ण त्रि॰ सम्+अर्द्-क्त। सम्यक्पीडिते।

समर्थ त्रि॰ सम्+अर्थ अच्। शक्ते, स्थिते च। सम्यगर्थः प्रा॰। प्रयत्नाभीष्टे पु॰।

समर्थन न॰ सम्+अर्थ-ल्युट्। इदमित्थमेवेति निश्चयहेत्वपन्यासेन निश्चायकव्यापारभेदे युच्। अध्यवसाये स्त्री॰

समर्द्धक त्रि॰ समर्द्धयति सम्-ऋध-णिच्-ण्वुल्। इष्ट फल दातरि, देवादौ।

समर्य्याद त्रि॰ सह मर्य्यादया। सीमायाम्। समीपे पु॰।

समल न॰ सम्यक् मलम्। विष्ठायाम्। सह मलेन। कलुषे त्रि॰

समवतार पु० समवतीर्य्यते ऽनेन सम्+ अव+तृ-घञ्। जङ्घावतरणसोपाने।

समवर्त्तिन् पु० सर्वं वर्त्तते इत-णिनि। यमे धर्मराजे।

समवस्कार पु० सम्+अव+स्कृ-घञ्। नाटकभेदे।

समवाय पु० सम्+अव-इण-अच्। समूहे, मेलने, न्यायोक्ते नित्यद्रव्यादिषु जात्यादीनां संबन्धभेदे च।

समवेत त्रि० सम्+अव-इण-क्त। मिलिते, समूहान्विते न्यायोक्ते समवायसम्बन्धेन स्थिते च।

समष्टि स्त्री० सम्+अश-क्तिन्। सम्यगव्याप्तौ, समस्ततायाञ्च। कर्त्तरि क्तिच्। संघीभूते समस्ते पदार्थे। [याञ्चे।

समष्ठि(ष्ठी)ल पु० समं तिष्ठति स्था-डलच् षु० वा दीर्घः। (गुड़िया)

समसन न० सम्+अस-ल्युट्। समासे, संक्षेपे।

समस्त त्रि० सम्+अस-क्त। संक्षिप्ते, सकले, व्याकरणोक्ते कृतसमासे शब्दभेदे च।

समस्थ त्रि० समंतिष्ठति स्था-क। समभावेन तुल्यतया स्थिते

समस्थली स्त्री० कर्म्म०। गङ्गायमुनयोर्मध्यस्थे अन्तर्वेदिदेशे।

समस्या स्त्री० समस्यते संक्षिप्यतेऽनया सम्+अस-क्यप्। संक्षेपेण उक्तस्य श्लोकपदादेः परकृतेन स्वकृतेन वा अवशेषेण भागान्तरेण संघटनार्थं कृते प्रश्ने।

समा स्त्री० समयति विकलयति भावान् सम-अच्-टाप्। वत्सरे अमरकृतास्य नित्यबहुवचनान्तताङ्गीकृता पाणिनिना तु समांसमां विजायतेऽति स्थले एकवचनान्तता निर्दिष्टा।

समांसमीना स्त्री० समांसमां विजायते प्रसूते स नि० अत्र समांसमामित्यत्र कालाधारे द्वितीया। प्रतिवर्षं प्रसूतायां गवि।

समाकर्षिन् पु० सम्+आ+कृष-णिनि। अतिदूरगामिनि गन्धे। सम्यगाकर्षणकर्त्तरि त्रि०। [याञ्चे।

समाख्या स्त्री० समाख्यायतेऽनया सम्+आ+ख्या अङ्। कीर्त्तौ, संज्ञायाञ्च।

समाघात पु० समाहन्यतेऽत्र सम्-आ+हन-घञ्। युद्धे।

समाज पु० सम्+अज-घञ् अभावः। पशुभिन्नानां समूहे, सभायाम्, धनिनि च।

समाधा स्त्री० सम्+आ+धा-अङ्। निश्चयौ, विवादभञ्जने, पूर्व्वपक्षस्य सम्यगुत्तरानुसुषिद्धान्तानुकूलतर्कादिना सम्यगर्थावधारणे च। ल्युट्। समाधानमप्यत्र न०। तत्र चित्तैकाग्र्ये, ध्येयवस्तुनि निश्चलस्थापनरूपे समाधौ च।

समाधि पु०सम्+आ+धा-कि। समाधायां, ध्येयवस्तुनि एकाग्रतया मनसःस्थापनरूपे ध्यानभेदे, वचनाभावे, नियमे च।

समाधात त्रि० सम्+आ+धा क्त। सम्यग्गर्व्विते, सम्यक्शङ्किते च।

समान त्रि० समानयति अन-अण्। तुल्ये, साधौ, एकस्मिन्नित्यर्थे यत्समानाधिकरणमितिचिन्तामणिः।

समानोदक पु० समानमेकं तर्पणादौ देयमुदकं यस्य। "समानोदकभावस्तु निवर्त्तेताचतुर्थादित्युक्ते" एकादशाद्यधिकचतुर्थपुरुषपर्य्यन्ते ज्ञातिभेदे।

समानोदर्य्य पु० समाने उदरे भवः यत् वा न सादेशः। एकोदर भ्रातादौ। भगिन्यां स्त्री०।

समाप पु० सम्यक् आपोयत्र अच् समा० नि०। देवयजनस्थाने।

समापन न० सम्+आप-ल्युट्। समाप्तौ, परिच्छेदे, होमे च।

समापन्न त्रि० सम्+आ-पद-क्त। समाप्ते, प्राप्ते, क्लिष्टे च। भावे क्त। समापत्तौ न०।

समाप्त त्रि० सम्+आप-क्त। अवसानप्राप्ते, सम्यक्प्राप्ते च।

समाप्ति स्त्री० सम्+आप-क्तिन्। अवसाने, समर्थने, प्राप्तौ च

समायोग पु० सम्+आ+युज-घञ्। संयोगसमवायरूपादि सम्बन्धे "क्षत्रेष्टिसमायोगादिति" पुराणम् प्रयोजने च।

समालम्बिन् पु० समालम्बते सम्+आ+लबि-णिनि। भूचम्मके। समालम्बनकर्त्तरि त्रि०।

समालभ पु० सम्+आ+लभ-घञ् सुम् च। कुङ्कुमादिना गात्रलेपने। ल्युट्। तत्रैवार्थे न०।

समावर्त्तन न० समावर्त्तते गुरुकुलादनेन सम्+आ+वृत-ल्युट्। वेदाध्ययनानन्तरं गार्हस्थ्याय गुरुकुलादागमन हेतुके संस्कारभेदे।

समाविष्ट त्रि० सम् आ+विश-क्त युक्ते, मनोभिनिवेशवति, अभीष्टकर्त्तव्यकर्म्मणि चित्तैकाग्र्यविशेषयुक्ते च।

समाहृत पु० सम्+आ+हृत क्त। कृतसमावर्त्तनसंस्कारे।

समाविश पु० सम्+आ+विश-घञ् बहूनामर्थानामेकत्र वाक्यादौ अवस्थापने, कर्त्तव्येऽभिनिवेशे च।

समावेशित त्रि०सम्+आ+विश-णिच्-क्त। कृतसमावेशने।

समास पु० सम्+अस-घञ्। संक्षेपे, समर्थने, समाहारे, व्याकरणोक्ते द्वयादिपदानामेकपदतासम्पादके पदसाधुतार्थके संस्कारभेदे च।

समासक्त त्रि० सम्+आ—सञ्ज-घञ्। संयुक्ते, अत्यन्तासक्ते, अभिनिविष्टे च।

समासङ्ग पु० सम्+सञ्ज-घञ्। संयोगे, सम्यगभिनिवेशे च

समासवत् पु० समास+अमस्यर्थे। तुप् मंस्य वः। व्याकरणोक्ते समासयुक्तेशब्दे संक्षेपयुक्ते च समासेन तुल्यं वति। समासतुल्ये।

समासादित त्रि० सम्+आ+सद+णिच्-क्त। आरभाणके, निकटस्थिते त्रि०।

समासार्था स्त्री० समासेन संक्षेपेणार्थोऽभिहितोयस्याः। समख्यायाम्।

समाहित त्रि० सम्+आ+धा-क्त। धृतसमाधौ, आहिते, प्रतिज्ञाते, निष्पन्ने, शुद्धे च।

समाहृत त्रि० सम्+आ+हृ-क्त। संगृहीते, एकत्रस्थीकृते।

समाहृति स्त्री० सम्+आ+हृ-क्तिन्। संक्षेपे, संग्रहे, संहरणे च

समाह्वय पु० समाह्वयते सम्+आ+ह्वे-अच् आत्वाभावः। युद्धे आह्वाने प्राणिकरणकद्यूते च, 'प्राणिभिः क्रियमाणस्तु स विज्ञेयः समाह्वय' इति स्मृतिः।

समाह्वा स्त्री० समा-आह्वा यस्याः। गोजिह्वायाम्।

समित् स्त्री० समीयतेऽत्र सम्+इण् क्विप्। युद्धे।

समिता स्त्री० सम्+इण्-क्त। गोभूमचूर्णे सङ्कृते त्रि०।

समिति स्त्री० सम् + इण-क्तिन् । सभायां, युद्धे च ।

समिध् स्त्री० समिध्यतेऽनया सम् + इन्ध-क्विप् । काष्ठे, स्त्रीत्वे काष्ठभेदे च विस्तरो वाचस्पत्ये

समिध पु० समिध्यते सम्+इन्ध-क । काष्ठे यज्ञे च ।

समिन्धन न० सम् + इन्ध-ल्युट् । काष्ठे सम्यग्दीप्तौ च ।

समीक न० सम् + ईक्क् । युद्धे ।

समीकरण न० असमःसमः क्रियतेऽनेन सम+च्वि + कृ-ल्युट् । बीजगणितप्रसिद्धे अज्ञातसंख्यानां यावत्तावतां सङ्क्रामणार्थं प्रक्रियाभेदे, तुल्यरूपतापादने च ।

समीक्ष न० सम्यगीक्षतेऽनेन घञ् । साङ्ख्यदर्शने । भावे घञ् । पर्य्यालोचने, सम्यग्ज्ञाने च । अ । समीक्षाध्यत्र सत्त्वे बुद्धौ, मीमांसाशास्त्रे, यत्ने च स्त्री० टाप् ।

समीक्ष्यकारिन् त्रि० समीक्ष्य पर्य्यालोच्य करोति कृ-णिनि उप० । वस्तुस्वरूपपर्य्यालोचनपूर्व्वककार्य्यकारके ।

समीचीन त्रि० सम्यगञ्चतीति सम् + अञ्च+क्विप् ततः ख समः समिः अञ्चेरकारलोपे पूर्वपददीर्घः । यथार्थे, साधौ च सत्त्वे न० सत्यवति त्रि० ।

समीप त्रि० सङ्कुता आपोऽत्र अच् समा० अत इत्वम् । निकटे

समीर पु० सम्यक् ईरयति मोदयति सम्+ईर-अच् । वायौ पृ० समिरोऽप्यत्र ।

समीरण पु० सम् + ईर-ल्यु । वायौ, मरुत्यकृक्षे, पथिके च

समीरिता त्रि० सम्+ईर-क्त । कथिते, उच्चारिते 'चतुर्मुख समीरिते'-ति कुमारः । [वाग्मिनि च ।

समीहित त्रि० सम्+ईह-क्त । अभीष्टे । [दूके ।

समुख त्रि० सह मुखेन मुखव्यापारेण या सदृश्य सादेशः । वाव-

समुचित त्रि० सम् + उच-क्त । सम्यक्उपयुक्ते समञ्जसे ।

समुच्चय पु० सम् + उद् + चि-अच् । द्वित्वादीनां राशौ, परस्परनिरपेक्षाणामनेकेषामेककरिन् क्रियादावन्वये च । यथा देवदत्तो यज्ञ-

दत्तश्च गच्छतीत्यत्र देयदत्तयज्ञदत्तयोः परस्परसामेक्षतामावेऽपि एक-स्मिन् गमने अन्वयः । तद्वाचकस्य प्रायेण चकारः क्वचित् तथादिग-ब्दोऽपि ।

समुचित त्रि० सम्+उद्+चि क्त । उत्तसमुद्भवे "समुचितफल काम-नाना"मिति विधिस्वरूपे गदाधरः ।

समुच्च(च्चा)र पु० सम्+उद्+चर-अप् घञ् वा । सम्यगुच्चारणे, सम्य-क्त्यागे च ।

समुच्छेद पु० सम्+उद्+छिद घञ् । विनाशे । [ऊर्ध्वे च ।

समुच्छ्र(च्छ्रा)य पु०सम्+उद्+श्रि अच् घञ् वा । अत्युच्चतौ, विरोधे

समुच्छ्रित त्रि० सम्+उद्+श्रि क्त । अत्युच्चते ।

समुच्छ्वलित त्रि० सम्यक्+उच्छ्वलितम् सम्+उद्+श्वल-क्त । समन्तात् विस्तीर्णे (ऊर्यलापि) 'समुच्छ्वलितविभ्रमाभ्यतिरि"ति काव्य प्र० ।[च।

समुच्छ्वसित त्रि०सम्+उद्+श्वस क्त । समग्रयुच्छ्वासयुक्ते प्रत्युज्जीविते

समुच्छ्वास पु० सम्+उद्+श्वस-घञ् । सुखनासिकाभ्यां प्राण वायो व्यापारे ।

समुज्झित त्रि० सम्+उज्झ-क्त त्यक्ते । [समग्रयुद्गमने च ।

समुत्क्रम पु० सम्+उद्+क्रम-घञ् न ह्रस्वः । ऊर्द्धगमने,

समुत्क्रोश पु०समग्रम् उत्क्रोशति उच्चैः शब्दायते सम्+उद्+क्रुश-अच् । कुररीविहगे । भावे घञ् । अत्युच्चैः शब्दे ।

समुत्थ त्रि० समग्रमुत्तिष्ठति सम्+उद्+स्था क सस्य थः । समग्रमुत्थाने ।

समुत्थान न० सम्+उद्+स्था करणे ल्युट् सस्य थः । समुद्योगे, उ-त्तोलने च ।

समुत्पत्ति स्त्री० सम्+उद् पद-क्तिन् । समुद्भवे ।

समुत्पन्न त्रि०सम्+उद्+पद-क्त समुद्भूते ।

समुत्पाट पु० सम्+उद्+पट घञ् । उन्मूलीकरणे ।

समुत्पाटित त्रि० सम्+उद्-चु-पट-क्त । उन्मूलीकृते ।

समुत्पिञ्ज त्रि० सम्+उद्+पिञ्ज-अच् । अत्याकुले । आकुलसैन्ये पु०

समुत्सर्ग पु० समग्रमुत्सर्गः । कृ+उद्+सृज-घञ् । समग्रत्यागे

समुत्सुक त्रि० सम्यगुत्सुकः प्रा० । अत्यन्तोत्सुके इष्टवस्तुलाभाद्यत्सरान्विते ।

समुत्सृष्ट त्रि० सम्+उद्+सृज-क्त । सम्यक् त्यक्ते ।

समुत्सेध पु० सम्+उद्+सिध-घञ् । अत्युन्नतौ, अतिस्फीततायाञ्च

समुदक्त त्रि० सम्+उद्+अञ्च-क्त । कूपादेरुद्धृतजलादौ ।

समुदय पु० सम्+उद्+इण-अच् । समूहे, युद्धे, सस्यनिष्पत्तौ, दिवसे च ज्योतिषोक्ते लग्ने न० । वज्रलताः समूहे पु० ।

समुदाचार पु० सम्+उद्+आ+चर-घञ् । अभिप्राये, सम्यगाचारे च

समुदित त्रि० सम्+उद्+इण-क्त । प्राप्तसंहतौ पदार्थे, सम्+वद-कर्मणि क्त । सम्यक् कथिते ।

समुदीरण न० सम्+उद्+ईर-ल्युट् । सम्यक् कथने ।

समुदीरित त्रि० सम्+उद्+ईर क्त । सम्यक् कथिते ।

समुद्ग पु० सम्+उद्+गम-ड । सम्पुटके सम्पुटाकारेण संश्लेषकारके पदार्थे । स्वार्थे कन् तत्रैव ।

समुद्गम पु० सम्+उद्+गम घञ् न दीर्घः । ऊर्द्ध गतौ, समुद्भवे च

समुद्गीत त्रि० सम्+उद्+गै-क्त । उच्चैर्गीते

समुद्गीर्ण त्रि० सम्+उद्+गॄ-क्त । वमिते, उत्तोलिते, कथिते च

समुद्दिष्ट त्रि० सम्यक् उद्दिश्य उद्+दिश-क्त । सम्यगुद्देश्यवति पदार्थे 'तत्समुद्दिष्टं कर्म्मेति संक्षिप्तसारः ।

समुद्देश्य सम्यक् उद्देश्यः उद्+दिश-घञ् । सम्यगभिसन्धौ ।

समुद्धत त्रि० सम्+उद्+हन क्त । अत्यन्तप्रगल्भे, अत्यन्ताविनीते, समुद्गीर्णे च ।

समुद्धरण न० सम्+उद्+हृ-ल्युट् । उत्तोलने कूपादेर्जलोद्धरणे, भुक्तान्नस्य वमने, उन्मूलने च । कर्म्मणि ल्युट् । वान्ते-अन्नादौ, उन्मूलिते च । [उन्मूलिते च ।

समुद्धृत त्रि० सम्+उद्+हृ-क्त । अपनीते, वान्ते, उत्तोलिते

समुद्धर्त्तृ त्रि० सम्+उद्+हृ-तृच् । वमनकारिणि, उन्मूलयितरि, उत्थापके, हृतद्रव्यस्य पुनरादानकर्त्तरि च ।

समुद्भव पुं० सम्+उद्+भू अप्। समुत्पत्तौ।

समुद्भूत त्रि० सम्+उद्+भू-क्त। समुत्पन्ने।

समुद्यत त्रि० सम्+उद्+यम-क्त। समग्रमुद्यमवति।

समुद्यम त्रि० सम्+उद्+यम-घञ् न ङित्वः। समग्रमुद्यमे।

समुद्र पु० सम्+उन्द्-क्लेदने र, सम्+उद्+रा-क वा। रत्नाकरख्याते प्रचुरजले पदार्थे। अस्य सुद्रया सुद्रासङ्गिने त्रि० 'बभौ मरुत्वान् विजितः समुद्रः बभौ मरुत्वान् विजितः समुद्रः इति भट्टिः। ङीप्, ङीषन्त्वञ्च स्त्री० टाप्।

समुद्रकफ पु० समुद्रस्य कफ इव। जलधिफेने।

समुद्रकान्ता स्त्री० ६त०। भूकायां, नद्यान्च। समुद्रप्रियादयोनद्याम्।

समुद्रगा स्त्री० समुद्रं गच्छति गम-ड। नद्याम्। 'सर्वा नद्यः समुद्रगा' इति पुराणम्।

समुद्रगृह न० समुद्र इव प्रचुरजलं गृहम्। जलयन्त्रभेदे।

समुद्रचुलुक पु० समुद्र इव चुलुकः गण्डूषमितजलमिव अनायासेन पीतत्वाद्यस्य। अगस्त्ये मुनौ। [चन्द्रे च।

समुद्रनवनीत न० समुद्रस्य नवनीतमिव। समुद्रमन्थनोद्भूतसारांशे अमृते

समुद्रफेन पु० ६त०। समुद्रस्य फेने।

समुद्रमेखला स्त्री० समुद्रः मेखलेव वेष्टनाकारत्वात् यस्याः। पृथिव्याम्। समुद्रस्य मेखलादयोऽप्यत्र। [नौकाभेदे।

समुद्रयान न० यायतेऽनेन या-ल्युट् ६त०। पोते समुद्रतरण साधने

समुद्रलवण न० समुद्रजलजातं लवणम्। (करकच) लवणे

समुद्रवह्नि पु० ६त०। समुद्रस्थे अग्नौ वाड़वानले।

समुद्रवेला स्त्री० ६त०। समुद्रस्य कूले।

समुद्रान्त न० समुद्रस्यान्तः पर्य्यन्तदेशः साधनत्वेनाऽस्त्यस्य अच् समुद्रः अन्तो यस्य वा। जातीफले। इरालभायाम्, कार्पासां, भूकायां, यवासे च स्त्री०। समुद्रपर्य्यन्ते त्रि०।

समुद्राम्बरा स्त्री० समुद्रः अम्बरमिव वेष्टनाकारः यस्याः। पृथिव्याम्। सागराम्बरादयोऽप्यत्र।

समृ(द्धि)द्धौ त्रि॰ सम्+ऋद्ध+भावे क्त क्त्वा । सम्यगृद्धभावे महाधने
समुद्गर पुं॰ सम्+उद्+गॄ+अच् । श्येने, सम्यगुद्गरणकर्त्तरि च
समुद्गल न॰ सम्+उद्+गल-घञ् । सम्यगाहरणभावे (भिक्षा) ।
समुद्ग न॰ सम्+उन्द्-क्त । क्लिन्ने आर्द्रे ।
समुन्नत त्रि॰ सम्+उद्+नम-क्त । अत्युच्चे । शरभभेदे पुं॰ ।
समुन्नति स्त्री॰ सम्+उद्+नम-क्तिन् । उच्चतायाम् 'प्रायः पयोधरस्य-
सदृशतिरत्न केतुरि'त्युद्भटः ।
समुन्मद त्रि॰ सम्+उद्+मद क्त । गर्विते पण्डितमन्ये, प्रभौ समु-
द्भूते च । कर्म्मणि क्त । उत्कोच बद्धे । [समुद्भावने च ।
समुन्नय पुं॰ सम्+उद्+नी-अच् । ऊर्द्धनयने, सम्यग्नीतौ, उत्क्षेपणे,
समुपचित त्रि॰ सम्यक् उपचितम् उप+चि-क्त । सम्यक्छन्नो क्षते
संवर्द्धिते च ।
समुपजोषम् अव्य॰ सम्+उप+जुष-असुन् । अत्यन्तानन्दे ।
समुपेयिवस् त्रि॰ सम्+उप+इण-क्वसु । समीपगते ।
समुपोढ़ त्रि॰ सम्+उप+वह क्त । सङ्गते संजाते च ।
समुल्लेख पुं॰ सम्+उद्+लिख-घञ् । पादादिना भूम्यादेः खनने
समूढ त्रि॰ सम्+ऊह-वा वह-क्त । राशीकृते, व्यनयप्राप्ते 'समूढमस्य
पांसुरे इति' ऋग्वेदः भग्ने, दमिते, कृतविवाहे, शोधिते च ।
सह मूढेन मूढसहिते त्रि॰ ।
समूरु पुं॰ सङ्गतौ सन्धिहीनौ ऊरू यस्य । ऋक्षभेदे ।
समूल त्रि॰ सह मूलेन । मूलसहिते 'समूलघातं न्यवधीदिति भट्टिः
समूह पुं॰ सम्+ऊह-घञ् । समुदये ।
समूहनी स्त्री॰ समूह्यतेऽनया ल्युट् । सम्मार्ज्जन्याम् भावे-ल्युट् ।
संमार्ज्जने सम्यगूहकरणे च न॰ ।
समृद्ध पुं॰ सम्+ऋद्ध-क्त्वत् । यज्ञियाग्नौ ।
समृद्ध त्रि॰ सम्यक् ऋद्धः ऋध क्त । अधिकसम्पत्तियुक्ते, अति हृष्टे च
समृद्धि स्त्री॰ समृक् ऋद्धिः सम्+ऋध-क्तिन् । अतिसम्पत्तौ, हृष्टौ
'समृद्धबन्धुविभवमेधिते'ति माघः ।

समित त्रि० सम्+आ-इण-क्त। समागते, सङ्गते च।

समिधित त्रि० सम्+एध-णिच्+क्त। 'संवर्द्धिते मधुसर्पिःसमेधित-मेधये"ति भाषः।

समोदक न० समम् अर्द्धभागेन तुल्यमुदकं यत्र। अर्द्धाम्बुसंयोगेन मथि-तदधिजाते तक्रभेदे। सह मोदकेन, मोदकसहिते त्रि०।

सम्पत्ति स्त्री० सम्+पद-क्तिन्। अतिविभवे, अनुरूपात्मभावे यस्य यद्-रूपता उचिता तस्य तथाभवने च।

सम्पद् स्त्री० सम्+पद सम्पं+क्विप्। विभवे, सम्पत्तौ च।

सम्पन्न त्रि० सम्+पद-क्त। साधिते, सम्पद्युक्ते च।

सम्पराय पु० सम्+परा+इण-अच्। युद्धे, आपदि उत्तरकाले च।

साम्परायिक न० सम्परायाय आपदे हितम् ठन्। युद्धे। ठण्। साम्परायिकमप्यत्र।

सम्पर्क पु० सम्+पृच-घञ्। सम्बन्धे।

सम्पर्किन् त्रि० सम्+पृच-घिणुन्। सम्बन्धयुक्ते।

सम्पा स्त्री० सम्यक् अतर्कितं पतति पत ड। विद्युति।

सम्पाक पु० सम्यक् पाको यस्मात् पृष०। आरग्वधवृक्षे तद्भोजने स्निग्ध भुक्ताजादेः सम्यक्पाको भवतीति वैद्यके प्रसिद्धम् पुष्टे, अन्ने, अभक्ते, लब्धे च त्रि०।

सम्पात पु० सम्+पत-घञ्। पक्षिगतिभेदे सम्यक्पतने च।

सम्पाति पु० सम्+पत-णिच्-इन्। जटायुषो ज्येष्ठभ्रातरि, पक्षि-भेदे। स्वार्थे कन्। तत्रैव।

सम्पुट पु० सम्+पुट-क। कुरुयकट्टले सम्यक् पुटमिव उभयपार्श्व-वर्त्ति यत्र। एकजातीयपदार्थे भिन्नजातीयस्य उभयतो व्याप्त्या स्थिते त्रि० 'सकामैः सम्पुटोजाद्य' इति तन्त्रम्।

सम्पुटक पु० सम्पुटयति सम्+पुट-अच् स्वार्थे कन्। समुद्गके मञ्जु-षाख्ये (पेटरा) पदार्थविशेषे।

सम्पूर्ण त्रि० सम्+पूर-क्त । परिपूर्णे, समग्रे च 'आदित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता एकादशीहि सम्पूर्णेति स्मृत्युक्ते एकादशीभेदे

सम्पृक्त त्रि० सम्+पृच-क्त । मिश्रिते, सम्बद्धे च ।

सम्मार्जन न० सम्+प्र+मृज-ल्युट् । सम्यग्वर्द्धितादेः शोधनाय संस्कारविशेषे, विधाने च ।

सम्मति अव्य० सम्+मति+समासाद्वद्भावः । इदानीमित्यर्थे ।

सम्मतिपत्ति स्त्री० सम्+प्रतिपद्यते क्तिन् । वाद्युक्तार्थविषयस्वीकरणे 'त्वत्राभियोगं प्रत्यर्थी यदि तं प्रतिपद्यते सा तु सम्मतिपत्तिः स्यादिति स्मृत्युक्ते व्यवहारे उत्तरभेदे च ।

सम्मादृ त्रि० सम्+प्र+दा-तृच् । दानकर्त्तरि ।

सम्मदान न० सम्+प्र+दा-भावे ल्युट् । सम्यक् प्रदाने । सम्प्रदीयते ऽस्मै ल्युट् । 'कर्मणा यमभिप्रैति स सम्प्रदान"मिति पाणिन्युक्ते दानकर्म्मोद्देश्ये तच्च त्रिविधम् । 'अनिराकरणात्कर्त्तुस्त्यागाङ्गं कर्म्मणेप्सितम् प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानताम्' इति । तत्र विष्णवे वस्त्रं ददातीत्यादौ अनिराकर्तृ सम्प्रदानम्, याचकाय धनं ददातीत्यादौ प्रेरयितृ सम्प्रदानम्, गुरवे धनं ददातीत्यादौ अनुमन्तृ सम्प्रदानम् । [नार्थसमर्थने ।

सम्प्रधारणा स्त्री० सम्+प्र+धृ-णिच्-युच् । युक्तायुक्तत्वविवेचने-

सम्प्रयोग पु० सम्+प्र+युज्-घञ् । इच्छादिलाभेच्छया धनादिविनियोगे । 'विभागः सम्प्रयोगश्चे'ति स्मृतिः रमणे, सम्बन्धे च ।

सम्प्रयोगिन् त्रि० सम्+प्र+युज-घिणुन् । कामुके कलाकेलिकारके, सम्यग्लाभार्थं धनादिविनियोजके च ।

सम्प्रसाद पु० सम्+प्र+सद्-घञ् । योगादिशास्त्रोक्ते चित्तस्य नैर्मल्यसम्पादके प्रयत्नभेदे । भावे घञ् । सम्यक्प्रसन्नतायाम् ।

सम्प्रसाधन न० सम्+प्र+साध-णिच्-करणे ल्युट् । कटकादौ भूषणे । भावे ल्युट् । भूषणक्रियायाम् ।

सम्प्रसारण न० सम्+प्र+सृ-णिच्-ल्युट् । सम्यग्विस्तारणे सम्पादने, व्याकरणोक्ते यणः स्थाने जायमाने इक्संज्ञवर्णे च

सम्प्रहार पु० सम्यक्प्रहियतेऽत्र सम्+प्र+हृ-घञ्। युद्धे भावे घञ्। सम्यक्प्रहरणे, गमने च। [वध्याभेदे च।

सम्प्राप्ति स्त्री० सम्+प्र+आप-क्तिन्। सम्यक् प्राप्तौ वैद्यकोक्ते रोगा-

सम्प्रैष पु० सम्+प्र+इष-घञ् यद्वा इष्टिः। नियोगे।

सम्प्रोक्षण न० सम्+प्र+उक्ष ल्युट् जलादिसेचनेन संस्कार भेदे

सम्प्रोक्षित त्रि० सम्+प्र+उक्ष-क्त। जलादिसेचनेन कृतसंस्कारे पदार्थे।

सम्फाल पु० सम्+फल+घञ्। मेघे।

सम्फुल्ल त्रि० सम्+फुल्ल-अच्। विकसिते। सम्+फल-क्त अत इत्वम्। सम्फुल्लत इति तकारमध्योऽपि तत्रैव।

सम्ब सर्पणे भ्वा०प०सक०सेट्। सम्बति असम्बीत्।

सम्ब बन्धने चु०उभ०सक०सेट्। सम्बयति ते असम्बयत् त

सम्ब न० सम्ब अच्। लटचोत्रस्य प्रतिलोमकर्षणे।

सम्बद्ध त्रि० सम्+बन्ध-क्त। संबन्धिनि। भावे क्त। सम्यग्बन्धने न०

सम्बन्ध पु० सम्+बन्ध-घञ्। संसर्गे, संयोगादौ, न्याये, सम्बद्धौ, सम्यग्बन्धने च सम्यग्बन्धो यस्मात्। समर्थे, हिते च त्रि०

सम्बर न० सम्ब अरन्। जले, बौद्धव्रतभेदे च। सेतौ, दैत्यभेदे, मृगभेदे, मीनभेदे, पर्वतभेदे च पु०।

सम्बरारि पु० सम्बरस्य दैत्यविशेषस्य अरिः। कामदेवे।

सम्बरी स्त्री०सम्ब-अरन् ङीप्। मूषिकपर्ण्याम्, शतावर्य्यां च।

सम्बल न० ब्व-कलच्। जले। पाथेये पु०न०।

स(ग्र)म्याक्रत त्रि०स(ग्र)म्बेन प्रतिलोमेन क्रष्टं क्षेत्रं स(ग्र)म्ब. डाच्+ल-क्त। प्रतिलोमकृष्टे क्षेत्रादौ। भावे घञ्। प्रतिलोमकर्षणे

सम्बाध न० सम्यक् बाधा यत्र। नरकवर्त्मनि सम+बाध-भावे घञ्। अन्योन्यसंघर्षे पु०।

सम्बुद्धि स्त्री० सम्+बुध-क्तिन्। सम्बोधनार्थे।

सम्बोध पु० सम्+बुध-घञ्। क्षोभे, नाशे, सम्यक्ज्ञाने च।

सम्बोधन न०सम्+बुध-ल्युट्। सम्यक्ज्ञाने। बुध-णिच्-ल्युट्।

सम्यगवापने 'स्थितस्याभिमुखीभावमात्रं सम्बोधनं विदुः। प्राप्तौ-भिमुख्यः पुरुषः क्रियासु विनियुज्यते' इति व्याकरणोक्ते कर्म्म-प्रवचनीयसंज्ञाभिमुख्यकरणाय अभीक्ष्ण्यक्रियासु विनियोगाय प्रापणा-दिरूपे व्यापारे च।

सम्भली स्त्री० सम्यक् भलते सम्+भल—कच् गौ०ङीष्। कुट्टिन्याम् परपुरुषेण सह अन्यस्त्रिया योजयित्र्याम्।

सम्भव पु० सम्+भू—अप्। उत्पत्तौ, आधेयस्याधारे समावेशनयोग्यत्व-रूपे व्यापारे, उत्कटसन्देहे च अपादाने अप्। हेतौ। कर्त्तरि अच्। मेलके त्रि०।

सम्भव्य पु० सम्+भू—कर्त्तरि यत्। कपित्थे, सम्यग्भाविनि त्रि०

सम्भाव पु०सम्+भू—घञ्। परिपूर्णतायाम्, समूहे, सामस्त्याच्च

सम्भावन न० सम्+भू—णिच्—ल्युट्। अर्थालङ्कारभेदे, व्याकरणोक्ते क्रियासु योग्यताध्यवसाये लिङर्थभेदे, उत्कटकोटिक संशयरूपे ज्ञा-नभेदे च युच् सम्भावनापि उक्तार्थे स्त्री०।

सम्भावित त्रि० सम्+भू—णिच्—क्त। सम्भवयुक्ते पदार्थे।

सम्भाषण न० सम्+भाष—ल्युट्। सम्यक्कथने च परस्पर कथने च

सम्भिन्न त्रि० सम्+भिद—क्त। विदलिते भेदान्विते सम्यग् विकसिते च 'सम्भिन्नसुकुल' इति वेणीसंहारः।

सम्भूति स्त्री० सम्+भू—क्ति। विभवे ईश्वरस्यैश्वर्य्यभेदे च। 'सम्भूतिं य उपासते' इति श्रुतिः।

सम्भूयसमुत्थान न० सम्भूय+मिलित्वा समुत्तिष्ठत्यनेन। मिलित्वा वणिजां वाणिज्यादिकर्मकरणे विवादभेदे

सम्भृति स्त्री० सम्—भृ—क्तिन्। सम्यक्पोषणे।

सम्भेद पु० संभिद्यते संश्लिष्यतेऽत्र सम्+भिद—आधारे घञ्। सङ्गे सङ्गस्थाने। भावे घञ्। तत्सङ्गमे, सम्यग्भेदने, स्फुटने मिश्रणे ऐकरूप्ये च। 'सम्भेदे नान्यतरवैयर्थ्यमिति मीमांसा।

सम्भोग पु० सम्+भुज—घञ्। सम्यग्भोगे, सुरते, हर्षे, कोविदागरे, 'दर्शनस्पर्शनादीनि निषेवेते विलासिनौ। यत्तयोरुच्यावच्यं स-

योगः समुदाहृतः इक्षुक्षत्रणे इक्षुरसाद्यर्थभेदे ।

सम्भ्रम पु० सम्+भ्रम-घञ् न इट्वृद्धिः । भयादिजनिते वेगे, त्वरायां, नैसर्गिके भये, आदरे, अतिशयश्रमे, क्षते च ।

सम्मति स्त्री० सम्-मन-क्तिन् । अनुमतौ, आत्माभीष्टे अभिलाषे च ।

सम्मद पु० सम्-मद-घञर्थे क । हर्षे । अच् । हर्षयुक्ते त्रि० ।

सम्मर्द पु० संमृद्यतेऽत्र सम्+मृद-घञ् । युद्धे । भावे घञ् । अन्योन्यसंघर्षे च ।

सम्मान पु० सम्+मन-घञ् । आदरे ।

सम्मानित स्त्री० सम्+मन-णिच्-क्त । कृतगौरवे, सत्कृते च

सम्मार्जन न० सम्+मृज-ल्युट् । संशोधने ।

सम्मार्जनी स्त्री० संमृज्यतेऽनया सम्+मृज-करणे ल्युट् ङीप् । धूल्याद्यपसारणार्थे पदार्थे (झाटा)

सम्मित त्रि० सम्+मा-क्त । सदृशे, तुल्यपरिमाणे च ।

सम्मुख त्रि० सङ्गतं सुखम् मा० । अभिमुखांगते ।

सम्मुखीन त्रि० सम्मुखं पतति ख । अभिमुखे पातिनि ।

सम्मूर्च्छज न० सम्मूर्च्छति जायते जन-ड । खरभेदे ।

सम्मूर्च्छन न० सम्+मूर्च्छ ल्युट् । सम्यग्विस्तारे, उन्नतौ, मोहे च ।

सम्मृष्ट त्रि० सम्+मृज-क्त । मार्ज्जनयुक्ते । सम्मार्जनाद्यपसारणेन शोधितेऽन्नादौ च ।

सम्मोद पु० सम्+मुद-घञ् । हर्षे, प्रीतौ च ।

सम्यच् अव्य० सम्-अञ्चु-क्विप् सम्भावेशः । शोभने, सङ्गते मनोज्ञे च त्रि० । सम्यग्वाचि न० । तद्वति त्रि० ।

सम्राज् पु० सम्यक् राजते राज-क्विप् नानुस्वारः । कृतराजसूयमन्त्रे सर्वभूमीश्वरे नृपतौ ।

सर न० सरति सृ-अच् । सरोवरे, जले च । लवणे, दध्यम्ले, दधिमस्तौ, तज्जाते नवनीते, बाणे च निर्झरे स्त्री० भावे अप् । भेदने गमने च । [त्यागे, अविरलपथिकपङ्क्तौ च ।

सुरक्त पु० न० कृ क्त । मद्यपानमात्रे, मद्यपरिवेशने, इक्षुजमद्ये, त-

सरघा स्त्री० सरं मद्यभेदं हन्ति हन-ड तनि० । मधुमक्षिकायाम्
सरज न० सरात् जायते जन-ड । नवनीते ।
सरजस् स्त्री० सह रजसा । ऋतुमत्यां स्त्रियाम् अव्ययी० रजोयुक्ते त्रि० अच् समा० । रजःसाहित्ये ।
सरट पु० सृ-अटन् । लकलासे (काकलास) ।
सरण न० सृ-ल्युट् । गमने, लोहमले च (गन्धभादाल) लतायाञ्च
सरणि(णी) स्त्री० सृ-अनि । पथि पङ्क्तौ प्रसारिगटाम् ।
सरपत्निका स्त्री० सरे जले पत्रमस्त्यस्याः ठन् । पद्मे ।
सरमा स्त्री० सह रमते । कुक्कुरयोषिति, विभीषणपत्न्याञ्च ।
सरयु पु० सृ-अयु । वायौ । जञ् । अयोध्यानिकवाहिनदीभेदे स्त्री० ।
सरल पु० सृ-अलच् । पीतदारुणि धूपकाष्ठभेदे । उदारे, ऋजौ च त्रि० । त्रिष्टायां स्त्री० । [टायाङ्ग ।
सरलद्रव पु० इत० । सरलवृक्षनिर्यासे, (टारपीन) नदीभेदे, त्रिषु-
सरलाङ्ग पु० सरलो वृक्षोऽङ्गं साधनं यस्य । श्योनाके गन्धद्रव्ये ।
सरस् न० सृ-असि । जले, सरोवरे च । गौरा० ङीष् । सरसीयथ्यत्र स्त्री० 'सरसीः परिधीन्निमिति नैषधम् ।
सरस न० सह रसेन जलेन आस्वादेन च । सरोवरे, रसान्विते, सार्द्रे च त्रि० । 'सरसां सरसां परिसुच्चेति भट्टिः । श्वेतत्रिवृतायां स्त्री० ।
सरसम्मत न० सरमिव निर्यासं सम्मतनोति सम्+प्र+तन-ड । त्रिकण्टकवृक्षे (तेकाँटासिजु) । [विद्धमिति शकुन्तला ।
सरसिज न० सरसि जायते जन-ड अलुक् स० । पद्मे ,सरसिजमनु-
सरसीरुह न सरस्यां सरोवरे रोहति रुह-क । पद्मे ।
सरस्वत् पु० सरांसि जलानि सन्त्यस्य मतुप् मस्य वः । सरोवरे सागरे च नद्याम्, नदीभेदे, वाग्यां गवि, ज्योतिष्मत्यां ब्राह्मयाम्, यज्ञौ, देवीभेदे, सोमलतायाञ्च स्त्री० ङीप् ।
सरा स्त्री० सृ-अच् । निर्झरे ।
सराव पु० सरं जलमवति अव-अण् । जलाधारे मृण्मये पात्रभेदे (सरा) । सह रावेण, सशब्दे त्रि० ।

सरि पु० स्त्री० सृ-इन्। स्त्रीत्वपक्षे वा ङीप्। निर्झरे।
सरिका स्त्री० सरोऽल्पस्याः कन् वुन् वा। क्षिकुरक्षिकायाम्।
सरित् स्त्री० सृ-इति। नद्याम्, स्त्रीत्वे च।
सरित्पति पु० ६त०। समुद्रे। [न तस्य दः समुद्रे
सरित्वत् पु० सरित् स्वामित्वेनास्त्यस्य मतुप् मस्य वः पदत्वाभावात्
सरित्सुत पु० ६त०। गङ्गापुत्रे भीष्मे।
सरिताम्पति पु० ६त० अलुक् स०। समुद्रे सरितां नाथादयोऽस्य।
सरिद्वरा स्त्री० सरित्सु वरा श्रेष्ठा। गङ्गायाम्।
सरिल न० सृ-इलच्। जले।
सरीसृप पु० वक्रं सर्पति। सृप-यङ् तस्य लुक्, कच्। सर्पे वृश्चिकादौ, ज्योतिषोक्ते वृश्चिकादिराशौ च।
सरु पु० सृ-उन्। खड्गादिमुष्टौ।
सरूप त्रि० समानं रूपमस्य समानस्य सः। तुल्यरूपे सदृशे।
सरोज न० सरसि जायते जन-ड। पद्मे सरोजातमात्रे त्रि०।
सरोजन्मन् न०सरसि जन्म यस्य। पद्मे। तडागजातमात्रे त्रि०।
सरोजिनी स्त्री० सरोजानां समूहः सङ्घातदेशो वा इनि। पद्मसमूहे तद्युक्तदेशरूपायां पद्मलतायाम्, पद्मा धारदोर्विकायाञ्च।
सरोरुह् (ह) सरसि रोहति रुह-क्विप् क वा। पद्मे।
सरोवर पु० सरोभिर्जलैर्व्रियतेऽसौ वृ-अप्। तडागे।
सर्ग पु० सृज-घञ्। स्वभावे, सृष्टौ, निर्माणे काव्यादेः परिच्छेदे 'सर्गोऽयमादिर्गत' इति नैषधम्। निश्चये, "यदि सर्ग एष ते" इति रघुः। भोगे, उत्साहे, अनुमतौ च। [त्यागे।
सर्गबन्ध पु० सर्गैर्बध्यतेऽसौ बध-घञ्। महाकाव्ये। लक्षणं यस्य।
सर्ज्ज अर्ज्जने भ्वा०पर०सक०सेट्। सर्ज्जति असर्ज्जीत् षोप देशत्वाभावान्न षत्वम्।
सर्ज्ज पु० सृ-अच्। शालवृक्षे, तद्रसे, (धुना) यक्षधूपे च।
सर्ज्जक पु० सृज-ण्वुल्। यक्षधूपे, शालवृक्षे च।
सर्ज्जगन्धा स्त्री० सर्ज्जस्येव गन्धो यस्याः। राज्ञायाम्।

सर्ज्जन न० सृज–ल्युट् । सैन्यपश्चाद्भागे, सृष्टौ च ।
सर्ज्जनिर्य्यासक पु० सर्ज्जस्य निर्य्यास इव कायति कै–क । राले ।
सर्ज्जमणि पु० सर्जस्य शालवृक्षस्य मणिरिव । (धुना) सर्जरसे ।
सर्ज्जरस पु० ६त० । शालवृक्षरसे (धुना) ।
सर्ज्जि (र्ज्जी) स्त्री० सृज–इन् वा ङीप् । नदीभेदे, तद्भूजले सर्जिका खारे (साजिमाटि) । [भेदे च ।
सर्जिका स्त्री० सृज–एबुल् टाप । अत इत्त्वम् । सर्जिकाक्षारे, नदी-
सर्जिकाक्षार स्त्री० सर्जिकायाः क्षारः । स्वनामख्याते क्षारभेदे, (साजिमाटि) ।
सर्जिक्षार पु० ६त० । (साजिमाटि) सर्जिकाक्षारे ।
सर्ज्य पु० सर्जस्येदं यत् । सर्जरसे । सर्ज्ज-गण्यत् । सर्जनीरे त्रि० ।
सर्प पु० सृप-अच् । नागभेदे, भुजङ्गमे च 'सर्पापसर्प भद्रम् इति भारतम् तज्जातिस्त्रियां ङीप् । भावे घञ् । गमने ।
सर्पकङ्कालो स्त्री० सर्पस्येव कङ्कालमङ्गविशेषो यस्याः गौ० ङीप् । सर्पविषघातिन्यां लतायाम् ।
सर्पगन्धा स्त्री० सर्पाणां विषस्य गन्धो गन्धनं हिंसनं यस्याः ५ब० । विषहारिण्यां लतायाम् । [लतायाम् ।
सर्पघातिनी स्त्री० सर्पं सर्पविषं हन्ति हन-णिनि । सर्पविष हरी-
सर्पतृणा पु० सर्पस्तृणमिवानायासच्छेद्यो यस्य । नकुले ।
सर्पदंष्ट्र ष० सर्पस्य दंष्ट्रेव पुष्पमस्य । नागदन्तीवृक्षे । सर्पस्य दंष्ट्रेव स्वर्गनात् दुःखदत्वात् । दुःखकालीलतायां स्त्री० ।
सर्पदंष्ट्रिका स्त्री० सर्पदंष्ट्राकारोऽस्त्यस्याः टन् । अजशृङ्ग्याम् ।
सर्पदण्डी स्त्री० सर्पं दण्डयति दण्ड-अण् । गोरचीवृक्षे । [क्षे ।
सर्पदन्ती स्त्री० सर्पस्य दन्त इव पुष्पाग्रमस्याः गौ० ङीष् । नागद-
सर्पदमना स्त्री० सर्पान् दमयति दम-णिच् ल्युट् । बन्ध्याकर्कोटकाम् ।
सर्पपुष्पी स्त्री० सर्पस्य सर्पदन्त इव पुष्पाग्रमस्याः ङीप् । नागदन्त्याम्
सर्पभुज् पु० सर्पं भुङ्क्ते भुज-क्विप् । मयूरे ।
सर्पराज पु० सर्पाणां राजा टच् स० । वासुकौ नागभेदे ।

सर्पलता स्त्री० सर्पाख्या लता । ताम्बूलीलतायाम् ।
सर्पसत्र न० सर्पेण होमद्रव्येण तत्साध्यमर्थं वा सत्रम् । जनमेजया-नुष्ठिते महाभारतप्रसिद्धे सर्पनाशनार्थे यज्ञभेदे ।
सर्पसहा स्त्री० सर्पं सहते सह-अच् । सर्पकन्दलीलतायाम् ।
सर्पहन् पु० सर्पं हन्ति हन क्विप् । नकुले ।
सर्पाक्षी स्त्री० सर्पस्येवाक्षि यस्याः ङीप् समा० । गन्धनाकुल्याम् ।
सर्पाख्य पु० सर्पाख्या यस्य । नागकेशरे, महिषकन्दभेदे च ।
सर्पाङ्गी स्त्री० सर्पस्येवाङ्गं यस्याः ङीप् । सर्पकन्दलीलतायाम् ।
सर्पादनी स्त्री० सर्पः सर्पविषमद्यतेऽनया अद ल्युट् ङीप् । नाकुल्याम्
सर्पारति पु० ६त० । गरुडे, नकुले च सर्पारिप्रभृतयोऽत्र ।
सर्पावास न० सर्पाणामावासो यत्र । चन्दनवृक्षे । ६त० । सर्पवासे पु०
सर्पाशन पु० सर्पमश्नाति अश ल्युट् । मयूरे, गरुडे च ।
सर्पिस् न० रूप इसि । घृते ।
सर्पिणी स्त्री० रूप-णिनि । सर्पयोषिति, क्षुपभेदे च । गमनकारके त्रि०
सर्पीष्ट न० सर्पीणां भुजगीनामिष्टम् । । चन्दनवृक्षे ।
सर्पेष्ट न० सर्पाणामिष्टम् । चन्दने ।
सर्ब सर्पे भ्वा०प०सक०सेट् । सर्बति असर्बीत् अयोपदेशत्वात् षत्वम् ।
सर्ब्ब पु० सर्ब-अच् । शिवे, विष्णौ च । सम्पूर्णे, सकले च त्रि० ।
अर्शआयामस्य सर्वनामता । [त्रि० ।
सर्ब्बंसहा स्त्री० सर्ब्बं सहते खच् मुम् च । पृथिव्याम् । सर्बरोढर
सर्ब्बकर्त्तृ पु० सर्ब्बं करोति कृ तृच् । चतुर्मुखे ब्रह्मणि, परमेश्वरे च
सर्ब्बकर्म्मीण त्रि० सर्ब्बकर्मभ्योऽलं खञ् । सर्बकरणसमर्थे पदार्थे 'संग्रामे सर्ब्बकर्मीणाबि'ति भट्टिः ।
सर्ब्बङ्कार पु० सर्बः ङारमयः (सावान) । ख्याते पदार्थे ।
सर्ब्बग न० सर्बं गच्छति गम-ड । जले । शिवे, परमेश्वरे, वायौ, आत्मनि च पु० सर्ब्बगामिनि त्रि० । प्रियङ्गुवृक्षे स्त्री० टाप् ।
सर्ब्बगन्ध न० सर्बं गन्धा अत्र । "चातुर्जातककर्पूरकक्कोलागुरुकुङ्कुमम् सवल्गुसर्जरसैव सर्बगन्धं प्रकीर्त्तितं"मित्युक्ते गन्धद्रव्यसमूहे ।

सर्वग्रन्थि पुं० सर्वत्र ग्रन्थिरिवास्य । विष्वक्सेनवृक्षे ।
सर्वघ्न पु० सर्वं हन्ति हन-क्विप् तुगागमश्च । यमे । सर्वातिरेकिणि वि०
सर्वजनीन त्रि० सर्वजनेषु विदितः ख । सर्वत्र विख्याते ।
सर्वज्ञ पु० सर्वं जानाति ज्ञा-क शिवे, बुद्धे, परमेश्वरे च । सर्वज्ञान-
कर्त्तरि त्रि० । दुर्गायां स्त्री० ।
सर्वतस् अव्य० सर्व+तसिल् । समन्तत इत्यर्थे ।
सर्वतिक्ता स्त्री० सर्वतः तिक्ता । काकमाच्याम् ।
सर्वतोभद्र पुंन० सर्वतो भद्राणि सुखानि यस्य । चतुर्द्वारयुक्ते गृह-
भेदे, प्रतिष्ठादौ पूज्यदेवतानां मण्डलभेदे ज्योतिषोक्ते शुभाशु-
भज्ञानार्थे चक्रभेदे, अलङ्कारोक्ते बन्धभेदालङ्के चित्रकाव्ये च ।
सर्वतोभद्रमस्य । निम्बवृक्षे पु० । गान्धार्य्यां, नटयोषिति च स्त्री० ।
सर्वतोभद्रचक्र न० सर्वतो भद्रं यत्र तादृशं चक्रम् । ज्योतिषोक्ते
शुभाशुभज्ञानार्थे चक्रभेदे ।
सर्वतोभद्रबन्ध पु० सर्वतोभद्राकारेण बन्धः । चित्रकाव्यभेदे ।
सर्वतोभद्रमण्डल न० सर्वतो भद्रनामकं मण्डलम् । शारदातिल-
काद्युक्ते प्रतिष्ठादौ--पूज्यदेवतामण्डलभेदे ।
सर्वतोमुख न० सर्वतोमुखमस्य । जले । आकाशे, शिवे, ब्रह्मणि, पर-
मेश्वरे, आत्मनि ब्राह्मणे अग्नौ च पु० ।
सर्वत्र अव्य० सर्व-त्रल् सर्वस्मिन् काले, देशे, दिशि वेत्यर्थे ।
सर्वत्रग पु० सर्वत्र गच्छति गम-ड । वायौ । सर्वत्र गामिनि त्रि०
सर्वत्रगामिन् पु०सर्वत्र गच्छति गम णिनि । वायौ सर्वत्र गन्तरि त्रि०
सर्वथा अव्य० सर्वप्रकारम् थाच् । सर्वप्रकारे, भृशे प्रतिज्ञायां, हेतौ च ।
सर्वदमन पु० सर्वान् दमयति दम णिच्-ल्युट् । दुष्मन्तपुत्रे भरतनृपे ।
सर्वदमनकर्त्तरि त्रि० ।
सर्वदर्शिन् पु० सर्वं समभावेन पश्यति दृश-णिनि । बुद्धे, परमेश्व-
रे च । सकलदृष्टरि त्रि० । दाक्षिण्यार्थे ।
सर्वदा अव्य० सर्वस्मिन् काले देशे दिशि वा दाच् । सर्वस्मिन् काला-
सर्वधुरीण त्रि०सर्वां धुरं वहति ख । सकलभारवाहके वृषादौ ।

सर्वनाम पु० सर्वेषां नाम । व्याकरणोक्ते कार्य्यविशेषार्थं जातसंज्ञावचि सर्वादिशब्दभेदे ।

सर्वभक्ष स्त्री० भक्ष-अण् उप० । अजायाम् सर्वभक्षके त्रि० ।

सर्वमङ्गला स्त्री० सर्वाणि मङ्गलान्यस्याः ५ब० । दुर्गायाम् ।

सर्वमय त्रि० सर्वात्मकः मयट् । सर्वात्मके । परमेश्वरे पु० ।

सर्वमृषक पु० सर्वं मृषाणि मृष-उकन् पृ० । काले ।

सर्वरस पु० सर्वोरसमयः । (धुना) शालरसे वीणादेर्वाद्ये, पण्यिते च । कर्म० । लवणे रसे ।

सर्वरसोत्तम पु० सर्वेषु रसेषु उत्तमः । लवणे रसे ।

सर्वरात्र पु० सर्वा रात्रिः अच् समा० । रात्राङ्गानाः पुंसीति पुंस्त्वम् सकलरात्रौ ।

सर्वरी स्त्री० सृ-वनिप् ङीष् र च । रात्रौ ।

सर्वर्त्तुपरिवर्त्त पु० सर्वर्तूनां परिवर्त्तो यत्र । वत्सरे ।

सर्वला(ली) स्त्री० सर्वं लाति ला क वा गौरा० ङीष् । तोमरास्त्रे

सर्वलिङ्गिन् पु० सर्वेषां लिङ्गानि सन्त्यस्य इनि । वेदविरुद्धाचारिणां बौद्धादीनां लिङ्गवत्सु पाषण्डेषु ।

सर्वलोह पु० सर्वः लोहमयोऽवयवो यस्य । लौहमये याने ।

सर्ववर्णिका स्त्री० सर्वं वर्णयति वर्ण-ण्वुल् अत इत्त्वम् । गान्धारी-वृक्षे ।

सर्वविद् पु० सर्वं वेत्ति विद-क्विप् । परमेश्वरे । सर्वज्ञावरि त्रि०

सर्ववेद पु० सर्वे वेदा अधीतत्वेन सन्त्यस्य अच् । सर्ववेदाध्ययनकर्त्तरि । विद-अण् उप० । सर्वज्ञे त्रि० ।

सर्ववेदस् पु० सर्वाणि धनानि वेद्यते लाभायते यागाय ददाति विद-लाभे णिच्-असि । सर्वस्वदक्षिणकविश्वजिल्लामक यागकर्त्तरि ।

सर्ववेशिन् पु० सर्वेषां वेशो भार्य्यत्वेनास्त्यस्य इनि । नटे ।

सर्वसङ्गत पु० सर्वं सङ्गतमुचितं यस्य । षष्टिधान्ये । सर्वत्रोचिते त्रि० । [सैन्यसज्जीकरणेन युद्धयात्रायाम् ।

सर्वसन्नहन न० सर्वेषां सन्नहनं युद्धार्थं सज्जीकरणं यत्र । सर्व-

सर्वंसह पु० सर्वं सहते अच्। युग्मुनौ। सर्वंसहिष्णौ त्रि०।
सर्वसिद्धि पु० सर्वेषां सिद्धिरत्र। श्रीकृष्णे। सकलसाधने त्रि०।
सर्वस्व न० कर्म्म०। सकलधने।
सर्वस्वदक्षिणा पु० सर्वस्वं दक्षिणा यत्र। विश्वजिन्नामकयज्ञभेदे
सर्वहित न० सर्वेषां हितम्। सदिष्टे ६त०। सकलहितहेतौ त्रि०।
सर्वाङ्गीण त्रि० सर्वाङ्गाणि व्याप्नोति ख। सर्वावयवव्यापके "सर्वाङ्गीणे
तरुत्यजे"इति भरतिः। [दुर्गायाम्।
सर्वाणी स्त्री० सर्वेभ्य आनयति मोक्षं आ-नी-ड पृषोदरादित्वात् णत्वम्।
सर्वानुकारिणी स्त्री० सर्वमनुकरोति अनु+कृ णिनि। शालपर्णाम्।
सर्वानुभूति स्त्री० सर्वैरनुभूतिर्यत्र। श्वेतविष्टतायाम् तत्त्वज्ञानिनि त्रि०
सर्वान्नभोजिन् त्रि० सर्वेषामन्नं सर्वाण्यन्नानि वा भुङ्क्ते भुज-णिनि।
सर्वान्नभक्षके।
सर्वान्नीन त्रि० सर्वेषामन्नं सर्वमन्नं वा भुङ्क्ते ख। सर्वान्न भक्षके।
सर्वाभिसन्धिन् पु० सर्वत्र आचरणे अभिसन्धास्त्रस्य इनि। सर्वत्रा-
भिसन्धिमति जने। [सैन्यसन्नाहेन युद्धयात्रायामेदे।
सर्वाभिसार पु० अभिसियते अत्र अभि+सृ वञ् ६त०। चतुरङ्ग-
सर्वार्थसिद्ध पु० सर्वेषु अर्थेषु सिद्धः। बुद्धे सकलाभीष्टसिद्धिमति त्रि०
सर्वार्द्ध पु० सर्वमर्हः टच् समा० ऋदेशः णत्वम्। सकलदिने
सर्व्वौघ पु० सर्वेषां चतुरङ्गसैन्यानामोघो वृन्दमभिसारो यत्र
ओघीभूतसर्वसैन्याभिसारे कर्म०। सर्व्वजलवेगे।
सर्वौषधि स्त्री० कर्म०। "कुष्ठमांसीहरिद्राभिर्वचाशैलेयचन्दनैः। सुरा-
चन्दनकर्पूरैर्मुस्तैः सर्वौषधिः स्मृतः, इत्युक्ते कुष्ठादिद्रव्यवर्गे।
सर्वौषधिगण पु० सर्वासामोषधीनां गणः। सुरामांसी वचाकुष्ठं शै-
लेयं रजनीद्वयम्। षष्ठीचन्द्रकसंयुक्तं सर्वौषधि गणः स्मृतः, इ-
त्युक्ते द्रव्यगणे।
सर्षप पु०स्त्र-अप सुक् च। (सरिषा) सस्यभेदे। [तैलभेदे
सर्षपतैल न० सर्षपस्य स्नेहे सर्षपं स्नेहार्थे-तैलच। सर्षपस्नेहयुक्ते
सल न० सल-अच्। जले।

सलिल न० सल-इलच्। जले

सलिलकुन्तल पु० सलिलस्य कुन्तल इव। शैवाले।

सलिलराशि पु०ष्ठ०। समुद्रे सलिलनिध्यादयोऽप्यत्र।

सलिलेन्धन पु० सलिलमिन्धनमिव दाह्यं यस्य। वाडवानले।

सल्लकी स्त्री० सल-वुन् लुक्च पृ० गौरा० ङीष्। शल्लक्याम्।

सव पु० सूयते सू-अप्। यज्ञे, सन्ताने च। अच्। सूर्य्ये, अर्कवृक्षे च

सवन न० सु ल्युट्। यज्ञार्द्धे स्नाने, सोमनिष्पादनव्यापारे, सोमपाने, यज्ञे, सोमनिष्पीडने, प्रसवे च। [इति रघुः।

सवयस् त्रि०समानं वयो यस्य समानस्य सः। वयसेत्"सवयोभिरन्वित"

सवर्ण पु० समानोवर्णो यस्य। तुल्यरूपे, एकजात्याश्रये यथाविप्रस्य विप्रजातिः क्षत्रियस्य क्षत्रियजातिः। "तुल्यास्यप्रयत्नं सवर्णमि"ति व्याकरणोक्ते स्थानप्रयत्नाभ्यां तुल्यवर्णे च यथा ककारस्य स्थानेन तुल्यो गकारादिः, प्रयत्नसाम्येन चकारस्य ककारादिः जकारस्य शकारः सकारस्य षकारः हकारस्य वर्गीयचतुर्था वर्णाः। सह वर्णेन वर्णसहिते त्रि०

सवल्गा स्त्री० सह वल्गेन। लितायाम्।

सवासस् त्रि० सह वाससा। वस्त्रत्यागविलम्बस्यात्रमे वेगवति

सविकल्पक न० सह-विकल्पेन कप्। वेदान्तोक्ते ज्ञातृज्ञेयभेदादिकल्पनासहिते ध्यानभेदे, न्यायोक्ते एकस्मिन् धर्म्मिण्यपरसंसर्गावगाहिनि ज्ञानभेदे च।

सविकाश त्रि०सह विकाशेन। प्रफुल्ले, विकसिते, असङ्कोचे च

सवितृ पु० सू-तृच्। जगत्प्रसवितरि परमेश्वरे 'तत् सवितुर्वरेण्य, मिति श्रुतिः सूर्य्ये च। [सूच्यसाक्षिणी,इति नैषधम्।

सविध त्रि० सह विध्यति विध-क सहस्य सः। निकटे 'सविध्येऽपि न'

सविस्मय त्रि० सह विस्मयेन। विस्मयापन्ने।

सवेश्म त्रि० विगतं वेश्मोद्देशः सह वेश्मना। निकटे, वेश्मान्विते च

सव्य त्रि० सू+अचि ण्यत्। वामे दक्षिणे, प्रतिकूले च विष्णौ पु०

सव्यसाचिन् पु० सव्येन वामेन सचति सच णिनि । अर्जुने
सव्येष्ठ पु० सव्ये तिष्ठति स्था-क अलुक् स अव्यादि० भत्वम् । सारथौ
सव्येष्ठृ पु० सव्ये तिष्ठति स्था ऋन् किच्च अलुक् स० षत्वम् । सारथौ ।
ससस्या स्त्री० सह सस्येन । नागदन्त्याम् । सस्ययुक्ते त्रि० ।
ससत्वा स्त्री० सह सत्वेन । गर्भवत्यां स्त्रियाम्, प्राप्तयुक्ते त्रि० 'न
ससत्वेषु गर्ते ष्ठिति महः ।
ससन न० सस-हिंसने ल्युट् । अन्नार्थं पशुहनने ।
सस्य न० सस-यत् । दृक्षादीनां फले क्षेत्रगते धान्ये च ।
सस्यसंवर पु० सस्यं संवृणोति सम्+वृ-अच् । शालवृक्षे ।
सस्यसंवरण पु० सस्यं संवृणोति स+वृ-ल्यु । अश्वकर्णवृक्षे
सह अव्य० सह-अच् । साहित्ये, साकल्ये, साहसेऽपि, यौगपद्ये, विद्य-
मानत्वे, समृद्धौ, सम्बन्धे, सामर्थ्ये च ।
सह पु० सहते सह अच् । अयश्शायसमासे भारादिसूचिण्यौ त्रि०
सहकार पु० सह युगपत् किरति सौरभम् दूरादौ कृ-अण् । अतिदू-
रगामिसौरभान्विते आम्रे । भावे घञ् सहकरण पु०
सहकारिन् त्रि० सह सम्भूय करोति कार्यं ह णिनि । हेतु भेदे स्व-
निष्ठे स्वकार्यकारके हेतौ ।
सहगमन न० सह+गम ल्युट् । सहमरणे, सह गमने च ।
सहचर पु० सह चरति चर-अच् । पीतभिण्टायां नीलभिण्टायाञ्च । वयस्ये, प्रतिबन्धके, सहाये, अनुचरे च त्रि० 'सहचर-
मधुहस्तेति, कुमारः स्त्रियां ङीप् ।
सहचरी स्त्री० सह चरति चर ट । पीतभिण्टायां सह चरति धर्मम्
चर-ट । धर्मपत्न्याम् ।
सहज पु० सह जायते जन-ड । सहोदरे, निसर्गे च स्वभावसिद्धे 'स-
हजप्राकृतावपी'ति माधः सहोत्पन्ने च त्रि० ज्योतिषोक्ते जन्मल-
ग्नात् तृतीयस्थाने न० ।
सहजमित्र न० सहजं स्वभावसिद्धम् प्राकृतं मित्रम् । भागिनेयादौ
सहजारि पु० सहजः स्वभावसिद्धः अरिः । सापत्नभ्रात्रादिव्यपुत्रादौ ।

सहदेव पु० सह दीव्यति दिव-अच् । माद्रीसुते पाण्डवभेदे । बलाबाम् दण्डोत्पले, धारिरोधधौ च स्त्री० गौ० ङीष् । सर्षाख्यासु क्षीतदण्डोत्पलायाञ्च स्त्री० टाप् ।

सहधर्मिणी स्त्री० सह समानो धर्मोऽस्त्यस्या इनि । पत्न्याम्

सहन न० सह-ल्युट् । क्षमायां, तितिक्षायाम् शीतोष्णादिद्वन्द्वधर्मसहने । सह-वुच् । सहिष्णौ, क्षमाशीले च त्रि० ।

सहपान न० सह पानम् । एकत्र मद्यादिपाने ।

सहभाविन् त्रि० सह भवति भू-णिनि । सहाये ।

सहभोजन न० सह एकत्र भोजनम् । एकत्रस्थानाशनादौ ।

सहमरण न० सह मृतेन पत्या सह एकचितारोहणेन मरणम् । मृतपतिचितारोहणेन तत्सहितमरणे ।

सहरसा स्त्री० सह रसेन । सुप्रपद्यादिषु । रसान्विते त्रि० ।

सहस् न० सह-असि । बले, ज्योतिषि च मार्गशीर्षे मासे पु० । 'सहसा सहसा लावेषपुरिति' माघः ।

सहसा अव्य० सह-सो-डा । हठादित्यर्थे, अकस्मादित्यर्थे च ।

सहस्य पु० सहसे बलाय हितः यत् । पौषमासे ।

सहस्र न० सनानं हसति हस-र । दशशतसङ्ख्यायां, बहुसङ्ख्यायां, तत्सङ्ख्यान्विते च । [दयोऽप्यत्र ।

सहस्रकर पु० सहस्रं कराः किरणा अस्य । सूर्ये सहस्रकिरणादयोऽप्यत्र ।

सहस्रकाण्डा स्त्री० सहस्रं काण्डा यस्याः । श्वेतदूर्वायाम् ।

सहस्रदंष्ट्र पु० सहस्रं बहुसङ्ख्या दंष्ट्रा अस्य । पाठीनमत्स्ये (बोयाल)

सहस्रदंष्ट्रिन् पु० सहस्रं दंष्ट्राः सन्त्रस्य इनि । पाठीनमत्स्ये

सहस्रधारा स्त्री० सहस्रधुणिता धारा । देवतास्नानार्थं बहुच्छिद्रयन्त्र नक्षतबहुजलादिधारायाम् ।

सहस्रनयन पु० सहस्रं नयनान्यस्य । इन्द्रे । सहस्रनेत्रादयोऽप्यत्र ।

सहस्रपत्र न० सहस्रं बहुसङ्ख्यकानि पत्राण्यि यस्य । पद्मे सहस्रपर्णादयोऽप्यत्र ।

सहस्रपाद् पु० सहस्रं बहवः पादा अस्य पाद्भावः । विष्णौ, परमे-

स्वरे च । 'सहस्राक्षः सहस्रपादि'ति पुरुषसूक्तम् ।

सहस्रपाद पु० सहस्रं पादाः किरणाश्चरणा वा सन्त्यस्य अच् । विष्णौ, सूर्ये अर्कवृक्षे च । [र्जुने च ।

सहस्रभुज पु० सहस्रं बहवो भुजा अस्य । विष्णौ, कार्त्तवीर्या-

सहस्रमूर्द्धन् पु० सहस्रं बहवो मूर्द्धानोऽस्य । विष्णौ, सहस्रं शीर्षा-दयोऽत्र । [विष्णौ च ।

सहस्रबाहु पु० सहस्रं बाहवोऽस्य । बाणासुरे, कार्त्तवीर्यार्जुने,

सहस्रवीर्य्या स्त्री०सहस्रं बह्वि वीर्याण्यस्याः । दूर्वायाम् महाश-तावर्य्याञ्च ।

सहस्रवेध न० सहस्रं बहवो वेधा अस्य । चुक्रे ।

सहस्रवेधिन् न० सहस्रं विध्यति विध–णिनि । हिङ्गौ । अम्बु-वेतसे, कस्तूर्य्याञ्च पु० । सहस्रवेधकर्त्तरि त्रि० ।

सहस्रशिखर पु० सहस्रं बह्वि शिखराण्यस्य । विन्ध्यपर्वते

सहस्रा स्त्री०सहस्रं बलानि सन्त्यस्याः अच् । अम्बष्ठायाम् ।

सहस्रांशु पु० सहस्रमंशवो यस्य । सूर्ये, अर्कवृक्षे च ।

सहस्राक्ष पु०सहस्रमक्षीणि यस्य षच् समा० । इन्द्रे, विष्णौ, ईश्वरे च

सहस्रार न०सहस्रमाराः कोणा अस्य । शिरःस्थिते सुषुम्ना नाडीमध्यस्थे सहस्रदलकमले । [पाठीने च ।

सहस्रिन् पु० सहस्रं सैन्यानि सन्त्यस्य इनि । सहस्रसैन्ययुक्ते नृपादौ

सहा स्त्री० सहते सह–अच् । सुवर्णमार्य्यां, धृतकुमार्य्यां, दग्धोत्पलायां, पृथिव्यां, शुक्लभिण्टायाम्, रात्र्यां, स्वर्णजीर्य्यां, सर्पकङ्कालयां, नारीपुष्पे च ।

सहाचर पु० सह आचरति आ+चर–अच् । पीतझिण्टायाम् ।

सहाय पु० सह एति इण-अच् । सहचरे, अनुकूले, 'असावनुकूलोऽपि सहाय एवेति' कुमारः । [यरुद्दाये च ।

सहायता स्त्री० सहायानां समूहः भावो वा तल् । साहाय्ये सह-

सहार पु० सह एकदैव हरति दूरं गच्छति सौरभेण घञ् अच् । आम्रे । हारोहरणं सह हारेण । महाप्रलये ।

सहारोग्य त्रि० सह आरोग्येण रोगशून्ये ।

सहासन न० सह आसतेऽत्र आस-ल्युट् । एकासने ।

सहित त्रि० सम्यक् हितः पृ० समोऽन्त्यलोपः । सम्यग्हिते सह-क्त वा इट्, सह-इतच् वा । समभिव्याहृते । [स्त्रियां ङीप् ।

सहित्र त्रि० सह-इत्र वा इट् । सहनशीले । इडभावे । सोढायत्र

सहित्र न० सहतेऽनेन सह-इत्र । सहनसाधने धर्म्मभेदे ।

सहिष्णु त्रि० सह-ष्णुच् । सहनशीले । [विरुद्धधर्मेहयसहने ।

सहिष्णुता स्त्री० सहिष्णोर्भावः तल् । क्षमायाम् शीतोष्णादि-

सहृदय त्रि० सह हृदयेन । प्रशस्तचित्ते, काव्यार्थभावनाधीनपरिपक्व-बुद्धौ 'सहृदयधुरीणाः कवितत्त्वे' इति रसगङ्गाधरः ।

सहृल्लेख पु० हृदयस्य लेखः कालुष्यकरणं हृद्भावः सह हृल्लेखेन । 'चिरंकृत्वा तु हृदये यस्ते यस्मिन् प्रजायते । सहृल्लेखन्तु विज्ञेयमित्युक्ता दूषितास्त्रे ।

सहोक्ति स्त्री० सह उक्तिः । सहकथने, एकोक्तौ, सह शब्दस्योक्तिर्यत्र । अर्थालङ्कारभेदे । [शालायाम् ।

सहोटज पु० न० सहते आतपादिकं सह-अच् कर्म० । मुनीनां पर्ण-

सहोढ़ पु० सह ऊढा येन । 'या गर्भिणीं संस्क्रियते जाता जातापि वा सती । वोढुः स गर्भो भवति सहोढ इति चोच्यते' इति मनूक्ते अज्ञातगर्भायां परिणीतायां स्त्रियां जाते पुत्रभेदे, सहोढः सन् जायते जन-ड । सहोढजोऽप्युक्तार्थे । [स्त्री० ।

सहोदर न० सह समानमुदरं यस्य । एकगर्भजाते भ्रातरि । भगिन्यां

सह्य न० सहायस्य भावः यत् नि० । साहाय्ये, 'तत्रार्थे सहामकरो-दिति' पुराणम् सह भावे यत् । आरोग्ये, साम्ये साधुत्वे च । कर्म्मणि यत् । सोढव्ये त्रि० पुनाख्यदेशसमीपस्थे पर्वतभेदे पु० ॥

सा स्त्री० सो-ड । गौर्य्यां, लक्ष्म्याञ्च ।

सांख्य न० संख्यायतेऽत्र संख्या सम्यग्ज्ञानं साधुत्वे अण् । सम्यग्दर्शने 'एवा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु' इति गीता संख्यां मूलप्रकृत्यादिपदार्थानां

गणनमत्र प्रस्तावात्। कपिलप्रणीते दर्शनशास्त्रे, परस्मपदे सांख्य-मप्युभयत्र सांख्यप्रोक्तयोगे पु०।

सांघातिक त्रि० संघाताय हितम् ठण्। सङ्घातकारके। ज्यो तिषोक्ते जन्मनक्षत्रावधिषोड़शनक्षत्रे च 'देहदुरिष्ट जन्मर्क्षात् सांघातिके तथेति ज्योतिषम् परस्मपदे सांघातिकमपि त्रिभयत्र।

सांदृष्टिक न० संदृष्टं प्रत्यक्षदृष्टमनुसरति ठण्। दृष्टानुसारि व्यायभेदे संदृष्टो दृष्टमात्रः फलति ठण्। सद्य फले। परस्मपदे सान्दृष्टिकम-प्युभयत्र।

सांयात्रिक पु० सम्यक् यात्रायै अलम् ठण्। पोतेन वाणिज्य कारके।

सांयुगीन त्रि० संयुगे युद्धे साधुः खञ्। रणकुशले।

सांरावणि न० सम्+रु-भावे णिनि ततः स्वार्थेऽण् व्याप्ते हृदादिको-लाहले। [ज्योतिर्वेत्तरि, गणके।

सांवत्सर पु० संवत्सरं तज्ज्ञानोपयोगिशास्त्रं वेत्ति अधीते वा अण्।

सांवत्सरिक त्रि० संवत्सरे भवः ठञ्। प्रतिवर्षकर्त्तव्ये श्राद्धे।

सांवादिक पु० सम्यग्वादायालं ठण्। नैयायिके। [च।

सांशयिक त्रि० संशयमापन्नः ठण्। सन्दिग्धे, संशययुक्ते, संशयविषये

सांसारिक त्रि० संसाराय हितम् तत्र भवो वा ठण्। संसारभवे, संसारोपयोगिनि वा पदार्थे।

सांसिद्धिक त्रि० संसिद्धिः स्वभावसिद्धिः तया निर्वृत्तं ठण्। स्वभाव-सिद्धे। सांसिद्धिकरागादिमत्तमिति भाषापरिच्छेदः।

साकम् अव्य० सह अकति अक-अम् सादेशः। साहित्ये।

साकाय न० सकस्य भावः ष्यञ् सकुदादे। स्वार्थे अञ्। सकले, होमार्थं मिश्रितेषु तिलादिद्रव्येषु च।

साकाङ्क्ष त्रि० सहाकाङ्क्षया। साभिलाषे, शाब्दबोधोपयोग्याकाङ्क्षायुक्ते पदभेदे च।

साकार त्रि० सह आकारेण मूर्त्या। मूर्त्तिविशिष्टे, सावयवे च।

साकुरुण्ड पु० सकुरुण्ड एव स्वार्थेऽण्। सकुरण्डवृक्षे।

साकेत न० आक्रियते आकेतः सहाकेतेन। अयोध्याडुरे 'जनस्य साके-

नियामिनः' इति रघुः ।

सांयुगीन पु० सयुगे भवः खञ् । युद्धे । सयुगानां समाहारः तस्येदम् वा ठक् । सयुगमुद्धे न० । तत्सम्बन्धिनि त्रि० ।

साक्षात् अव्य० सह अक्षति अक्ष-व्याप्तौ क्विप्, सह अक्षमक्षति अत-क्विप् वा । प्रत्यक्षे तद्विषये च 'यत्साक्षात् अपरोक्षाद्ब्रह्मे'ति श्रुतिः ।

साक्षात्कार पु० साक्षात्+कृ-घञ् । प्रत्यक्षे ।

साक्षिन् त्रि० सह-अक्षि अस्य इनि साक्षात्द्रष्टा इति वा नि० । साक्षात्द्रष्टरि । स्त्रियां ङीप् । परमेश्वरे पु० 'साक्षी चेताः केवलोनिर्गुणश्चे'ति श्रुतिः । अयमेव साक्षिचैतन्यत्वेन वेदान्तपरिभाषादौ स्वीकृतः ।

साक्ष्य न० साक्षिणो भावः कर्म वा ष्यञ् । साक्षिकर्मणि, व्यवहारविषयदृष्टश्रुतात्मकघनरूपे तद्भावे च । 'यः साक्ष्यमब्रूत वदेदि'ति स्मृतिः ।

सागर पु० सगरेण निर्वृत्तः अण् । समुद्रे, मद्यभेदे, रुद्राक्षभेदे च ।

सागरगामिनी स्त्री० सागरं गच्छति गम+णिनि न ह्रस्वम् । नद्यां, स्वल्पैलायाञ्च ।

सागरनेमि स्त्री० सागरः नेमिरिव वेष्टनाकारो यस्याः । पृथिव्याम् ।

सागरमेखला स्त्री० सागरो मेखलेव यस्याः । पृथिव्याम् ।

सागरालय पु० सागर आलयो यस्य । वरुणे ।

सागरोत्थ न० सागरात् उत्तिष्ठति उद्+स्था क । सामुद्रलवणे ।

साग्निक पु० सहाग्निना अग्निहोत्रेण वा कप् । श्रौतस्मार्ताग्नियुक्ते, अग्निहोत्रिणि द्विजे च ।

साङ्कर्य्य न० सङ्करस्य भावः ष्यञ् । परस्पराभावसमानाधिकरणइतित्वरूपे न्यायोक्ते जातिबाधके दोषभेदे, पूर्वोक्तसङ्करस्य धर्मे च ।

साङ्ग त्रि० सहाङ्गेन । अङ्गयुक्ते 'साङ्गं तत् क्रियते पुनरिति स्मृ० ।

साङ्गतिक त्रि० सङ्गत्या निर्वृत्तः ठण् । सङ्गते ।

साङ्ग्रामिक त्रि० संग्रामाय प्रभवति ठक्। सेनापतौ, युद्धोपयोगि-रथादौ च।

साचि अव्य० सच–इण्। वक्रे, तिर्यगर्थे च। [ग्राम्।

साचिवाटिका स्त्री० साचि यथा तथा वटति एव्वुल्। श्वेतपुनर्नवा-

साचीकृत त्रि० असाचि साचि क्रियते सा चि–नि० दीर्घः। वक्रीकृते 'साचीकृता चारुतरेण तस्थौ' इति कुमारः।

साट प्रकाशने अद०चु०उ०म०सेट्। साटयति ते असिसाटत् त।

साटोप त्रि० सहाटोपेन। सगर्वे, विकटे च।

सात सुखे अ०चु०उभ०अक०सेट्। सातयति ते असिसातत् त।

सात न० सात अच्। सुखे। खन क। दाने, नष्टे च।

सातला स्त्री० सातं सुखं लाति ला-क। चर्मकषायाम्।

साति स्त्री० सन क्तिन्। अवसाने। दाने, तीव्रपीड़ायाञ्च।

सातीनञ् पु० सतीनएव स्वार्थे अण्। सतीनकाइच्चे (क्षुद्रमटर)।

सात्यकि पु० सत्यकस्य दृष्णिवंश्यस्यापत्यम् अण्। शिनेर्नप्तरि स्वना-मख्याते दृष्णिवंश्ये क्षत्रियभेदे।

सात्वत् पु० सत्वमेव सात्वनयति अत क्विप् मक०। यादवाधिकृतदेशभेदे

सात्वत पु० सत्वमेव सात्वमस्त्यस्य त सत्वगुणोपाधिके विष्णौ। सात्वतो देशस्य राजा अण्। विष्णौ, सात्त्वद्देशाधिपे नृपे बहुषु तस्य लुक् 'भगवान् सात्वतां पतिरिति पुराणम्। 'सत्वं सत्वाश्रयं सत्वगुणं सेवत केशवम्। योऽनन्यत्वेन मनसा सात्वतः सकृदुच्यते' इत्युक्तौ वैष्णो यदुवंश्ये अंशुपुत्रे नृपभेदे च। यदुवंश्योत्पन्नत्वेन श्रिशु पाल-मातरि स्त्री० ङीप्। सा च नाटकस्य वृत्तिभेदे च।

सात्विक पु० सत्वात् सत्वगुणप्रधानात् विष्णोर्भवति ठण्। चतुर्मुखे ब्रह्मणि तस्य विष्णुनाभिकमलजत्वात् तथात्वम्। सत्वमेव सात्वम-स्त्यस्य ठन् विष्णौ। सत्वगुणेन तत्कार्य्येण मनसा वा निर्वृत्तः ठण्। सत्वगुणजाते, सत्वप्रधान मनोविशेषजाते च अहङ्कारादिर-सानुगुणे भावभेदे च। सत्वप्रधाने जने त्रि०। 'आहाराः सात्विक-प्रियाः' इति गीता। दुर्गायां स्त्री० ङीप्।

सादनी स्त्री० सादयन्ति रोगा अनया सद-णिच् ल्युट् । कटुक्यां ।

सादि पु० सद-इण् । सारथौ, योद्धरि च । अवसन्ने त्रि० ।

सादिन् पु० सद-णिनि । अश्वारोहणकर्त्तरि, गजारोहिणि, रथारोहिणि च । अवसन्ने त्रि० ।

सादृश्य न० सदृशस्य भावः ष्यञ् । तद्भिन्नत्वे सति तद्गतभूयोधर्मरूपे समानधर्मे, येन सह यस्य सादृश्यं प्रसिद्धं तत् वाचस्पत्ये वक्ष्यते ।

साधक त्रि० सध-ण्वुल्, सिध—णिच्-ण्वुल् साधादेशः वा । साधनकर्त्तरि, तन्त्रोक्ते मन्त्रादिसिद्धिकारके शिष्ये च । साधकः सिद्धिमाप्नुयादिति तन्त्रम् ।

साधन न० साध्यतेऽनेन सिध—णिच्-ल्युट् साधादेशः । करणे, क्रियोत्पादके हेतुभेदे 'क्रियायाः परिनिष्पत्तिर्व्यापाराद्ननन्तरम् । विवक्ष्यते यदा यत्र करणं तत्तदा,स्मृतमित्युक्ते क्रियासाधकव्यापारवतिकरणे, सैन्ये, युद्धोपकरणे पुंचिह्ने, कारकभेदे, प्रमाणे, अनुमापके हेतौ च । भावे ल्युट् । मारणे, मृतसंस्कारे, अग्निदाने, गतौ, निष्पादने, अनुमनने, सिद्धौ च । कर्मणि ल्युट् । द्रव्ये, धने, मैत्रे च ।

साधर्म्य न० सधर्मस्य समानधर्मस्य भावः ष्यञ् । स्वकीयासाधारणधर्मरूपे लक्षणे 'यदुक्तं यस्य साधर्म्यमिति' भाषापरिच्छेदः । समानो धर्मोयस्य तस्य भावः ष्यञ् । समान धर्मे यथा पद्ममिव सुन्दरं मुखमित्यादौ सौन्दर्य्यम् ।

साधारण त्रि० सह धारणया खार्थेऽण् । सदृशे, अनेकस्वत्ववत्येकस्मिन् धने 'साधारणं समाश्रित्य यत्किञ्चिद्धारणादिकमिति' स्मृतिः । स्त्रियां गौरा० ङीष् । सा च कुञ्चिकायां, वेश्यादिनायिकायाञ्च न्यायोक्ते 'यः सपक्षे विपक्षे च । भवेत् साधारणस्तु सं' इत्युक्ते हेत्वाभासभेदे पु० । यथा वह्निमान् द्रव्यत्वादित्यादौ द्रव्यत्वहेतुः सपक्षे पर्व्वते, विपक्षे ह्रदादौ च । स्थित इति साधारणः ।

साधारणधर्म्म पु० कर्म० । 'अहिंसा सत्यमस्तेयं शौचमिन्द्रिय निग्रहः ।

देवब्राह्मणार्च्चनं दानं धर्म्मं साधारणं विदुरित्युक्तेः अहिंसादौ सर्ववर्णानामतुल्ये धर्म्मे। न्यायादुक्ते संशयहेतौ समानधर्म्मे च रङ्कं रजतं नवेति संशये रङ्करजतयोः सामान्यधर्मेणाकचिक्यत्वशुभ्रत्वादिः।

साधित त्रि० सिध णिच्-क्त। दापिते,प्रमाणादिना उद्भाविते च 'साधितात् दशकं धतमिति सूतिः निष्पादिते' शोधिते च।

साधिदेव त्रि० सह अधिदेवेन स्वार्थेऽण् द्विपदवृद्धिः। अधिदेवतासंज्ञिते साधिभूतसाधियज्ञावपि परमेश्वरे।

साधिष्ठ त्रि० अतिशयेन साधुः साढो वा दृढन् साधादेशः ठि लोपो वा अत्यन्तदृढे, अतिसाधौ, अतिशोभने च।

साधिष्ठान त्रि० सह अधिष्ठानेन। सन्निहिते तन्त्रोक्ते षट्चक्रमध्ये सुषुम्नामध्यस्थे चक्रभेदे न०।

साधीयस् त्रि० अतिशयेन साधुः साढो वा साधादेशः ठि लोपोवा। अत्यन्तदृढे, न्याये, साधुतरे च। स्त्रियां ङीप्।

साधु त्रि० साध उन्। उत्तमकुलजाते, सुन्दरे,मनोहरे, उचिते च। स्त्रियां वा ङीप्। सुनौ,जिने च 'न प्रहृष्यति सम्माने नावमाने न कुप्यति। न क्रूद्धः परुषं ब्रूयादेतद्धि साधुलक्षणं'मित्यादयुक्तधर्म्मवति जने वार्द्धुषिके च पु०।

साधुपुष्प न० साधु पुष्पं यस्य। स्थलपद्मे। कर्म्म०। उत्तमकुसुमे।

साधुवाच् पु० कर्म्म०। विनीते सुशिक्षिते घोटके।

साधुवाहिन् पु० साधु यथा तथा वहति णिनि। विनीतेऽश्वे सुन्दरवाहनकर्त्तरि त्रि०।

साधुवृत्त पु०कर्म्म०। कदन्नवृत्ते, परुषवृत्ते भोजनवृत्तमात्रे च।

साध्य पु० सिध-णिच्-यत्। मनोमना तथा प्राज्ञो नरोऽप्तानश्च वीर्य्यवान्। निर्भयोनदकश्चैव दंशो नारायणो हयग्रभुश्चेति समाख्याताः साध्या द्वादश देवना'इत्युक्ते द्वादशसंख्यके मनुदेवताभेदे, विष्कम्भादिषु योगेषु एकविंशे योगे च। साधनीये त्रि०। अष्टादशविधादेः प्रमाणादिना उद्भाव्ये पदार्थे। 'प्रतिज्ञादोषनिर्मुक्तं साध्यं

सत्कारप्रान्वितम्। निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो"रित्युक्तौ व्यवहारे साधनाङ्गे प्रतिज्ञेये पक्षे पु०। अनुमित्या साधनीये वह्न्यादौ च यथा वह्निमान् धूमादित्यादौ विषयाधिकितः वह्निः साध्यः। साध्यमस्यास्ति अर्थ आदाच्च्। साध्यवति पक्षे पु० 'साध्यनिर्देशः प्रतिज्ञे'ति न्यायसूत्रम् साध्यवत्तया पक्षनिर्देश इति दीधितिकारः संस्कार्यै, तन्त्रोक्ते मन्त्रमात्रे, आत्मसम्बन्धस्य स्वानुकूलताप्रयोजकचक्रस्थे द्वितीयपञ्चमादिके 'सिद्धः साध्यः सुसिद्धोऽरिः क्रमात् शैवा मनीषिभिरि'त्युक्ते मन्त्रभेदे च त्रिलोचनो वाचस्पत्ये।

साध्यता स्त्री० साध्यस्यानुमितिविषेयस्य भावः तल्। अनुमितिविषेयतारूपे न्यायोक्ते विषयताभेदे।

साध्यतावच्छेदक पु० साध्यतामवच्छिनत्ति विशेषयति 'अवच्छिद्यण्वुल्। येन रूपेण यस्य साध्यताख्या विषयता तस्मिन् धर्मे। यथा वह्निमान् धूमादित्यत्र वह्निः साध्यः तस्य साध्यतां वह्नित्वमवच्छिनत्तीति वह्नित्वं साध्यतावच्छेदकम्।

साध्यसिद्धि स्त्री० साध्यस्य सिद्धिः विनिर्णयः सिध-क्तिन्। साध्यस्य वह्न्यादेः अनुमित्यादिना साधनाधीने निर्णये, निष्पत्तौ, साध्यस्य प्रतिज्ञेयार्थस्य सिद्धिर्निर्णयो यत्र। व्यवहारे प्रतिज्ञानार्थस्य प्राड्विवाकादिभिः विनिर्णयरूपे व्यवहारपादे च।

साध्वस न० साधु+असति अस अच्। भये।

साध्वी स्त्री० साध-ङीप्। भेदायां, 'आर्त्ताँ सदिवा कृते प्रोषिते मलिना कृशा। मृते म्रियते या पत्यौ साध्वी ज्ञेया पतिव्रते'त्युक्तलक्षणायां स्त्रियाञ्च। [मालती माधवम्।

सानन्द त्रि० सह आनन्देन। आनन्दसहिते 'सानन्दं नन्दि कुले'ति

सानु पु० न० सन् उणु। पर्वतस्य समभूमिदेशे प्रस्थे, वने, वातरुभूमे, पथि, अग्रे, कोविदे, अर्के, प्रस्तवे च।

सानुज न० सानौ जायते जन-ड। प्रपौण्डरीके। तुम्बुरुवृक्षे पु०। सहानुजेन अनुजसहिते त्रि०।

सानुमत् पु० सानुरस्यास्त्यस्य मतुप्। पर्वते।

सान्तपन न० सन्तापयति सम्+तप०णिच् ल्युट् स्वार्थेऽण् । 'गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । एकरात्रोपवासश्च कृच्छ्रं सान्तपनं विदुः'इत्युक्ते द्वादशाहसाध्ये व्रतभेदे ।

सान्तर न० सह अन्तरेण बादेशः । विरले व्यवधानसहिते च ।

सान्तानिक त्रि० सन्तानः प्रयोजनमस्य ठक् । सन्तानसाधने विधानभेदे । [न्त्रम् सान्त्वापयतीत्यन्ये ।

सान्त्व आनुकूल्यकरणे अद०चु०उभ०सक०सेट् । सान्त्वयति ते अससान्त्व न० सान्त्व-अच् । अत्यर्थमधुरे, आनुकूल्ये, श्रोतमनः प्रीतिदवाक्ये प्रियवाक्यादिना क्रोधोपशमनरूपे, सान्त्वने च ।

सान्त्वन न० सान्त्व ल्युट् । आनुकूल्यकरणे प्रियवादादिना क्रोधाद्युपशमने च । युच् । अतएव स्त्री० ।

सान्दीपनि पु० सन्दीपनस्यापत्यम् इञ् । रामकृष्णयोराचार्ये अवन्तिपुरवासिनि मुनिभेदे । [च यने न० ।

सान्द्र त्रि० अदि-रक् सह अन्द्रेण । निबिडे, घने, स्निग्धे, मनोज्ञे

सान्द्रपुष्प पु० सान्द्रं पुष्पमस्य । विभीतकवृक्षे ।

सान्द्रस्निग्ध त्रि० सान्द्रं स्निग्धः अतिस्निग्धे अतिमनोहरे च

सान्धिक पु० सन्धा सुराव्यावर्तनं शिल्पं वेत्ति ठक् । शौण्डिके सन्धिः प्रयोजनमस्य ठण् । सन्धिकर्त्तरि त्रि० ।

सान्ध्य त्रि० सन्ध्यायां भवः अण् । सन्ध्याकालिके ।

सान्नाय्य न० सन्नीयते सम्+नी-घञ् नि० । मन्त्रादिना संस्कार्ये घृतादौ । [दुर्गाशब्दनमन्त्रः ।

सान्निध्य न० सन्निधिरेव ष्यञ् । नैकट्ये, सान्निध्यमिह कल्पयेति,

सान्निपातिक त्रि० सन्निपातात् त्रिदोषविकारात् आगतः तेन निर्वृत्तो वा ठक् । सन्निपाताज्जाते रोगे 'विकारे सन्निपातिके' इत्यमरः ।

सान्नायिक पु० सन्यासः प्रयोजनमस्य ठक् । सन्न्यासिनि ।

सापत्न पु० सपत्न एव स्वार्थे ष्यञ् । यतौ, सपत्न्याः भवः सपत्नस्यापत्यं वा दृज् । सपत्नीपुत्रे । अण् । सापत्नोऽप्युभयत्र

सापिण्ड्य न० सपिण्डस्य भावः ष्यञ् । दायाशौचसपिण्डत्वादौ पु० यो-
निनि ज्ञातिधर्मे सापिण्ड्यं सप्तमीकमनिति स्मृतिः [हाई
सामपदीन न० सप्तभिः पदैः उच्चारितैर्निर्वृत्तम् खञ् । यज्ञे सो-
सामपौरुष त्रि० सप्त पुरुषान् व्याप्नोति अण् । सप्त पुरुषव्यापके ।
साफल्य न० सफलस्य भावः ष्यञ् । कार्यक्षमे, सम्पूर्णतायाञ्च ।
साम सान्त्वने अद० चु० उ० स० सेट् । सामयति ते असमसानत् त ।
सामग पु० साम तद्वेदं गायति । सामवेदाध्यायिनि ।
सामगर्भ पु० साम गर्भे यस्य । विष्णौ ।
सामयी स्त्री० न० समयस्य भावः ष्यञ् स्त्रीत्वपक्षे ङीष् ङीषि यलो-
पः । समस्ततायाम् 'प्रायेण सामग्र्यविधा'वितिकुमारः स्वार्थे
ष्यञ् । कारणसमूहे, द्रव्ये च स्त्री० ।
सामञ्जस्य न० समञ्जसस्य भावः ष्यञ् । औचित्ये ।
सामन् न० सो-मनिन् । "अग्निं दूतं वृणीमहे, इत्यादिके वेदभेदे, तत्रो-
क्तासु ऋक्षु गानभेदे 'ऋच्यध्यूढं साम गीयते इति' छान्दोग्यम् ।
राज्ञां "साम भेदस्तथा दानं दण्डश्चे"त्युक्ते शत्रुवशीकरणोपायभेदे,
प्रियवाक्यादिना सान्त्वने च । पशुबन्धनरज्जौ स्त्री० ङीप् ।
सामन्त पु० सं-श्लिष्टोऽन्तः एकदेशो यस्य समन्तशब्देश्वरः अण् । स्वविष-
यानन्तरवर्त्तिदेशाधिपे नृपे । समन्ताद्भवः अण् ढिलोपः ।
श्वेतप्रजासु (मडल)यं परम्परया सौवाः सामन्ता'वेति स्मृतिः ।
सामयिक त्रि० समये भवः ठञ् । समयभवे, कालोचिते च ।
सामयोनि पु० साम योनिरुत्पत्तिस्थानं यस्य । हरिणे, तेषाञ्च सा-
मयोनित्वमुक्तं पालकाव्ये 'स्वर्यं क्षाणुकपाले हे समानीय प्रजा-
पतिः । हरिणाभ्यां परिष्टभ्याथ सप्त सामान्य गायत । गायतो
ब्रह्मणस्तस्मात् सप्तस्वेतेषु जज्ञिरे' इति । चतुर्मुखे ब्रह्मणि च ।
सामर्थ्य न० समर्थस्य भावः ष्यञ् । देहजे बले यत्नौ योग्यतायां, स-
फलतार्थतायाञ्च । [समवायसम्बन्धिनि त्रि० ।
सामवायिक पु० समवाये प्रकृतः ठञ् । सन्निधि । तत्रेदम् ठञ् ।

सामाजिक पु० समाजः सभावेशनं प्रयोजनमस्य । सभ्ये ।

सामान्य न० समानस्य भावः ष्यञ् । सादृश्यप्रयोजकधर्मे यथा कृष्णं पद्ममिव सुन्दरमित्यादौ सौन्दर्य्यादि । समानमेव स्वार्थे ष्यञ् । द्रव्यगुणकर्मसु तुल्यतया स्थितायां जातौ ।

सामान्यलक्षणा स्त्री० सामान्यं साधारणधर्मः लक्षणं यस्याः । न्यायोक्ते अलौकिकप्रत्यक्षसाधने उपायभेदे । यथा एकघटज्ञाने घटत्वरूपसामान्यधर्मज्ञानात् सकलस्य घटवतो ज्ञानम् ।

सामान्या स्त्री० समान्येव स्वार्थे ष्यञ् अजा० टाप् । साधारणस्त्रियां वेश्यायाम् ।

सामि अव्य० साम-दृन् । अर्द्धे "सामिधटिते"ति नैषधम् ।

सामिधेनी स्त्री० सम्-इन्ध करणे ल्युट् नि० । अग्निसमिन्धनसाधने ऋगभेदे, समित्काष्ठे च ।

सामीप्य न० समीपस्य भावः स्वार्थे वा ष्यञ् । नैकट्ये निकटे च 'सामीप्यात्ते धविष्यैर्यां ग्राधारश्चतुर्विध' इति व्याकरणम् ।

सामुद्र न० समुद्रे भवः अण् । (करकच्) लवणे ।

सामुद्रक न० समुद्रेण प्रोक्तम् वुञ् । हस्तादिरेखादिना स्त्रीपुंसशुभाशुभलक्षणज्ञापके ग्रन्थभेदे, 'वामभागे तु नारीणां दक्षिणे पुरुषस्य च निर्दिष्टं लक्षणं तेषां समुद्रेण यथोदितमिति, 'स.मुद्रकसारसमुद्रे'ति नैषधम् ।

सामुद्रिक त्रि० समुद्रेण प्रोक्तम् ठञ् । स्त्रीपुंसशुभाशुभलक्षणज्ञापके ग्रन्थे । [युद्धे परलोकसाधने त्रि० ।

साम्परायिक न० सम्परायाय आपदे परलोकाय वा हितम् । ठञ् ।

साम्प्रतम् अव्य० सम्+प्र+तन-असुयुक्ते । उचिते ।

साम्बर न० सम्बरदेशे भवम् अण् । सम्बरदेशोद्भवे लवणे

साम्बवी स्त्री० सम्बवः अस्यस्य प्रज्ञाद्यण् ङीष् । रक्तलोध्रे ।

साम्य न० समस्य भावः ष्यञ् । तुल्यत्वप्रयोजके साधारणधर्मे

साम्राज्य न० सम्राजः भावः ष्यञ् । सार्व्वभौमत्वे 'भेजे साम्राज्य-

दीक्षितमिति रघुः 'सप्ताधिपत्यं राजंश्च स्यात् सार्वाभौमं दशसप्तके' इत्युक्ते दशसप्तयोजनाधिराज्ये च ।

साय पु० सो–घञ् । दिनान्ते, बाणे च ।

सायंसन्ध्या स्त्री० सायम् दिनान्ते सन्ध्या, तत्र सन्ध्यायते सम्+ध्यै–घञर्थे क वा । दिनान्तसन्ध्यायाम् दिनान्ते–उपास्यदेवताभेदे च । भावे अङ् । तत्रोप सनायाम् ।

सायक पु० सो–ण्वुल् । बाणे-खड्गे च ।

सायन्तन त्रि० सायमस्याः ब्युट् तुट् च । दिनान्तभवे । स्त्रियां ङीप् । "सायन्तनीं तिथिप्रथम" इति भट्टिः ।

सायपूजा स्त्री० सायकस्य पूजोपलक्षः ६ब० । शरपूजाद्यर्थे ।

सायम् अव्य० सो–अम । दिनान्ते "सायं सप्तमि वर्त्तते" इत्युक्टः ।

सायाह्न पु० सायोऽह्नः एक० त० टच् तुदेशः । दिनान्ते, "सायाह्न-स्त्रिमुहूर्त्तः स्यात् आह्नं तत्र न कारये दिति" कृत्युक्ते पञ्चधा वि-भक्तदिनस्य तृतीयमुहूर्त्तात्मके पञ्चमे भेदेऽंशे च ।

सायुज्य न० सह युनक्ति-युज क्विप् सादेशः सयुङ् तस्य भावः ष्यञ् । सहयोगे, पञ्चविधमुक्तिमध्ये एकस्य समवस्थानरूपे मुक्तिभेदे च ।

सार दौर्बल्ये अद० पु० उभ० सक० सेट् । सारयति ते ऊष सारत् त

सार न० सृ-घञ्, .सार-अच् वा । जले, धने, न्याये, नवनीते, लौहे, वने च । बले, स्थिरांशे, मज्जनि, सर्जक्षारे, वायौ, रोगे, अतिदृढे दृढ्ये च पु० न० । श्रेष्ठे, वरे च त्रि० । [त्रि०

सारक पु० सारयति रेचयति सृ-णिच्-ण्वुल् । जयपाले । रेचकद्रव्ये ।

सारखदिर पु० कर्म० । विट्खदिरे ।

सारगन्ध पु० सारः श्रेष्ठोगन्धोऽस्य । चन्दने ।

सारघ न० सरघाभिर्निर्वृत्तम् अण् । मधुनि क्षौद्रे ।

सारङ्ग पु० सृ-अङ्गच् । चातकखगे, हरिणे, गजे, भृङ्गे जले, राज-हंसे, चित्रकाये, वाद्यभेदे, वह्नौ, नानावर्णे, मयूरे कामदेवे, चामे, क्षेत्रे, आभरणे, पद्मे, यज्ञे, चन्दने, कर्पूरे, पुष्पे, कोकिले, मेघे,

सिंहे, रात्रौ, भूम्नि, दीप्तौ च । शारमङ्गमस्य ठक० । शारङ्गोऽपि चित्रमृगादौ ।

सारङ्गिक पु० सारङ्गं मृगं हन्ति ठक् । व्याधे ।

सारज न० सारात् दध्यादात् जायते जन-ड । नवनीते ।

सारण न० सृ-णिच्-ल्यु । गन्धभेदे, अतीसाररोगे, रावणसचिवे च । भद्रबलायाम्, आम्रातके च पु० ।

सारणि(णी) स्त्री० सृ-णिच् अनि वा ङीप् । क्षुद्रनद्यां, प्रसारिण्याम्, सङ्केतेन मत्स्यगत्यादिबोधके ज्योतिषग्रन्थभेदे च ।

सारतरु पु० सारप्रधानः जलप्रधानस्तरुः । कदलीवृक्षे ।

सारथि पु० सृ-अथिण्, सह रथेन सरथः घोटकः तत्र नियुक्तः इञ् वा । रथादिवाहनप्रेरके नियन्तरि ।

सारदा स्त्री० सारं ददाति दा-क । सरस्वत्याम् "लिखति यदि गृहीत्वा सारदेति" शिवस्तवः । सारदातरि त्रि० ।

सारद्रुम पु० सारप्रधानो द्रुमः खदिरवृक्षे ।

सारभाण्ड न० कर्म० । अन्नस्निग्धपात्रे, श्रेष्ठपात्रे च ।

सारमूषिका स्त्री० सारे मूषिके वापहारकत्वात् । देवदाली वृक्षे ।

सारमेय पु० स्त्री० सरमायाः कश्यप्रपत्न्याः अपत्यम् ढक् । कुक्कुरे । तद्योषिति स्त्री० ।

सारलोह न० लौहेषु सारः राज० । लौहसारे (इस्पात) ।

सारव त्रि० सरय्वां भवः अण् त्रि० । सरयूनदीभवे ।

सारस न० सरोऽभिजनो नियतमस्त्यस्य अण् । पद्मे, कह्लाभरणे च । सह रसेन स्वार्थे अण् । चन्द्रे, खनामख्याते पक्षिणि च पु० । तद्योषिति स्त्री० । सरस इदम् अण् । सरोवरसम्बन्धिनि त्रि०

सारसन न० सारं सनोति सन-अच् । स्त्रीकट्याभरणे, काञ्च्याम्, कञ्चुकादार्यां मध्यकाये निबद्धे, पट्टिकादौ च ।

सारस्वत पु० सरस्वती देवताऽस्य, सरस्वत्याऽदं वा अण् । विल्वदण्डे देशभेदे, पञ्चगौडमध्ये ब्राह्मणभेदे सरस्वती प्रतिपालितमुनिभेदे, ब्राह्मदिनरूपे कल्पभेदे च "सारस्वतस्य कल्पस्येति" पुराणम् । सरस्वती-

सम्बन्धिनि "तस्यां पूर्वाह्णसमये जुह्वात् सारस्वतीष्टवनिति" पुरो-
क्षम् । सरस्वतीदेवताके च त्रि० "तत्प्रावणाय निर्वाप्यस्वः सार-
स्वतोऽजैरिति" स्मृतिः । [भेदे, तन्त्रोक्ते सरस्वत्या उपासनार्थके विधान-
सारा स्त्री० सारयति सृ-णिच्-अच् । कृष्णसिततायाम्, दूर्व्वायाञ्च ।
सारास्त्र पु० सारमास्त्रमति आ+स्त्र-क । तिलवृक्षे ।
सारि(री) पु० स्त्री० सृ-इण् स्त्रीत्वपक्षे वा ङीष् । पाशके "सारौ
चरन्तौ सखि ! सारयेति" नैषधम् पक्षिभेदे च ।
सारिका स्त्री० सरति गच्छति सृ-ण्वुल् । पक्षिभेदे (शालिक) ।
सारिणी स्त्री० सृ णिनि । सरहदेशीलतायाम्, कार्षीषां, दुरालभायां,
कर्दमलिंगपाद्यां, प्रसारिण्यां, रक्तपुनर्णवायाञ्च ।
सारिवा स्त्री० सारिरिव यति वा-क । (अनन्तमूल) लताभेदे ।
सार्दोष्ट्रिका पु० सारः श्रेष्ठ उष्ट्रोयत्र सारोष्ट्रः देशभेदस्तत्रभवः ठक् ।
विषभेदे ।
सार्थ पु० सृ-घञ् स्वार्थेऽण् । समूहे, जन्तुसमूहे "स जयत्यरिसार्थ-
सार्थकीर्ति" नैषधम् सह अर्थेन वाच्येन वा । वणिक्समूहे ।
णिनि त्रि० । कन् । सार्थकः । अर्थसहिते जने त्रि० अव्ये । पु०
"सार्थाः स्वार्थबोधकादिति" शब्दशक्तिप्रकाशिका" ।
सार्थवाह पु० सार्थं वहति वह-अण् । वणिग्जने ।
सार्द्र त्रि० सह आर्द्रेण । आर्द्रतायुक्ते । [अश्रुयुक्ते त्रि० ।
सार्द्धम् अव्य० सह+अर्द्ध-अच् । साकल्ये । सह अर्द्धेन । सार्द्धः ।
सार्ष न० सर्षपेदंतावय अण् । अल्पधान्यभेदे ।
सार्षिष्क त्रि० सर्षिषा संस्कृतम् ठण् । घृतसंस्कृते व्यञ्जनादौ । [विदिते ।
सार्व्वजनीन त्रि० सर्वेषु जनेषु विदितः खञ् हिपदवृद्धिः । सर्वलोक-
सार्व्वत्रिक त्रि० सर्व्वत्र भवम् ठक् । सर्वकालादौ भवे ।
सार्व्वधातुक न० सर्वधातून् व्याप्नोति ठक् । व्याकरणोक्ते सर्वधातु-
प्रकृतिके तिङादौ प्रत्यये । [भूतव्यापके ।
सार्व्वभौतिक त्रि० सर्वाणि-भूतानि व्याप्नोति ठञ् हिपदवृद्धिः । सर्व-

सार्व्वभौम पु० सर्व्वस्या भूमेरीश्वरः सर्व्वासु भूमिषु विदितो वा अण् चक्रवर्त्तिनि नृपे, उत्तरदिक्स्थे गजे च ।

सार्व्वलौकिक त्रि० सर्व्वेषु लोकेषु विदितः ठञ् द्विपदछन्दिः । सर्व्वलोकेषु विदिते "स रामः सार्व्वलौकिक" इति भट्टिः ।

सार्व्वविभक्तिक त्रि० सर्व्वासु विभक्तिषु तदर्थे भवः—ठञ् । सर्व्वविभक्त्यर्थे विहिते तसिलादौ प्रत्यये ।

सार्षप त्रि० सर्षपस्य विकारः अण् । सर्षपविकारतैलादौ 'अदुष्टं सार्षपं [तैलमिति, स्मृतिः" ।

साल पु० सल—घञ् । वृक्षभाते, "रसालः सालः सनदप्यतेति" नैषधम् स्वनामख्याते वृक्षभेदे, प्राकारे च । [(धुना) ।

सालन पु० सालः कारणत्वेनास्त्यस्य मादित्वात् न । सालनिर्य्यासे

सालनिर्य्यास पु० इत० । (धुना) सर्ज्जरसे ।

सालपर्णी स्त्री० सालस्येव पर्णान्यस्याः ङीष् । (सालपानि) वृक्षे ।

सालपुष्प न० सालस्येव पुष्पं यस्य । स्थलपद्मे ।

सालभञ्जिका स्त्री० सालं भनक्ति भनज—ण्वुल् । काष्ठादिनिर्म्मिते क्रीडासाधने पुत्तलिकायाम्, स्त्रियां टाप् च ।

सालरस पु० इत० (धुना) राले ।

सालवेष्ट पु० सालं वेष्टयति वेष्ट अण् । राले (धुना) ।

सालशा स्त्री० सालः प्राकारोऽस्त्यस्याः अच् । वृक्षे ।

सालावृक पु० सालायां वृकवत् । कुक्कुरे ।

सालूर पु० सल ऊरच् णिच् । मेघे रक्तबुके ।

सालेय पु० सालायां भवः ढक् । मधुरिकायाम् ।

सालोक्य न० समानोलोकोऽस्य तस्य भावः ष्यञ् । पञ्चविधमुक्ति मध्ये एकलोकत्वावरूपे मुक्तिभेदे ।

साल्व पु० ब०व० सौराष्ट्रदेशे । तेषां राजा अण् । तद्देशाधिपे नृपे ।

साल्वहन् पु० साल्वं नृपं हतवान् हन-क्विप् । विष्णौ ।

सावधान त्रि० सह अवधानेन । सचेतने, सतर्के, मनोऽभिनिवेशयुक्ते च

सावन न० सवन । सोमयागाङ्गं स्नानं तत्रेदम् अण् । "अहोरात्रेण चैकेन सावनो दिवसः स्मृत" इति ज्योतिषोक्ते अहोरात्रात्मके दिवसे, सवनत्वस्य अहोरात्रसाध्यत्वादङ्गत्वसम्बन्धित्वम् । तच्चिन्मासात्मके मासभेदे च पु० "विवाहादौ स्मृतः सौरः यज्ञेषु सावनोमत इति" स्मृतिः । "स्मृतकार्य्यपरिच्छेदो दिनमासाब्दपा-स्तथा । मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तितः" इति सूर्य्य-सिद्धान्तः ।

सा(श्रा)वर पु० स(श्र)रेण निर्वृत्तः अण् । पापे, अपवादे च ।

सावर्ण पु० सवर्णायां सूर्य्यपत्न्यां संज्ञायां भवः अण् । सवर्णागर्भजे सूर्य्यजे अष्टमे मनौ । इञ् । सार्व्वर्णिरपत्यं "सूर्य्यात्कन्या मनो-सावर्ण्य सार्व्वर्णिमिति मनुरिति" च ङी ।

सावित्र पु० सविता देवतास्य अण् । विप्रे । कर्म्मभेदे, स्त्री० ङीप् । "सावित्रीमात्रसारोऽपीति" स्मृतिः । सा च सप्तदशसंस्कार्य्याच्च । सवि देवतास्य सूर्य्यो वि० यज्ञोपवीते न० । स्वार्थादौ अण् । सूर्य्ये । तत्रेदम् अण् । महादेवे, गर्भे वसौ च पु० ।

सावित्रीव्रत न० सावित्रीप्रजनसंबन्धि व्रतम् । ज्यैष्ठकृष्ण-चतुर्दश्यां सावित्रीप्रजनार्थे व्रते ।

सावित्रीव्रत न० सावित्रीप्रीणनार्थिकं व्रतम् शाक० । यज्ञोपवीते ।

सास्ना स्त्री० सस्य नासिका । गोगलस्थिते लोमसंघातात्मके लम्बले ।

सास्र त्रि० सह अस्रेण । चक्षुर्जलान्विते ।

सास्रव्य न० सस्रुचरस्य भावः ष्यञ् । समभिव्याहारे, सन्निध्ये, सामानाधिकरण्ये च ।

साहस न० सहसा क्रूरेण निर्वृत्तम् अण् । बलेन कृते चौर्य्य स्त्रीसंग्र-हादौ दुष्ट कर्म्मणि, "सहसा क्रियते यत्तु तत् साहसमिति स्मृतमिति" स्मृतिः तच्च पञ्चविधम् "मनुष्यमारणं स्तेयं परदा-राभिमर्षणम् । पारुष्यमनृतञ्चैव साहसं पञ्चधा स्मृतमिति" स्मृतिः । सहसा अविवेचनेन कृतम् कर्म्म । अविमृष्यप्रकृतकर्म्मणि, त्रि० । साहसमनुसरति अण् । मृत्युके दण्डविशेषे, "साधीति-

पथसाहस्रो दण्ड उत्तमसाहसः । तदर्द्धं मध्यमः प्रोक्तस्तदर्द्धमधमः स्मृत" इति स्मृतिः । "पाकयज्ञे तु साहस" इत्युक्ते अग्निभेदे च पु० ।

साहसिक त्रि० साहसे प्रभृतः ठन् । मनुष्यमारणाद्यभिरते चोरे, पारदारिके, मिथ्यावादिनि, परुषवादिनि च ।

साहस्र न० सहस्राणां समूहः अण् । सहस्रसमूहे । स्वार्थे अण् । सहस्रसङ्ख्यायाम् न० । सहस्रं परिमाणमस्य अण् । सहस्रसंख्यान्विते त्रि० । सहस्रसंख्यकगजसमूहे पु० ।

साहायक न० सहायस्य भावः वुञ् । साहाय्ये ।

साहाय्य न० सहायस्य भावः ष्यञ् । सहायतायाम् ।

साहित्य न० सहितस्य भावः । ष्यञ् । मेलने परस्परसापेक्षाणां तुल्यरूपाणामेकक्रियान्वयित्वे, तुल्यवदेककियान्वयित्वे, एककियान्वयित्वे बुद्धिविशेषविषयत्वे, काव्यभेदे च ।

साह्न न० सह्नस्य भावः अण् सह्न—खञ् वा । सह्नत्वे सह्नीये त्रि० ।

साङ्ग पु० सह आङ्गेनाभिधानेन । अभिधानसहिते "जगाम गजसाङ्गयमिति" भारतम् । मेषादिप्राणिकरणजातरूपे समाङ्गये च ।

सिंह पु० हिंस—अच् पृषो० वर्णविपर्ययः । स्वनामख्याते पशुभेदे, रक्तगोभाङ्गने, मेषादितः पञ्चमे राशौ च । पदान्तस्थः । श्रेष्ठार्थे ।

सिंहकेशर पु० सिंहस्येव केशरोऽस्य । वकुले ।

सिंहतल पु० सिंहस्येव तलमत्र । करद्वयमेलनरूपे अञ्जलौ ।

सिंहतुण्ड पु० सिंहस्येव तुण्डः पुष्पमस्य । शेलुवृक्षे ।

सिंहद्वार न० सिंहचिह्नितं द्वारम् । पुरप्रवेशनयोग्ये द्वारे ।

सिंहध्वनि पु० सिंहस्येव ध्वनिः । सिंहतुल्यनादे सिंहनादादयोऽप्यत्र । [भेदे ।
इत० सिंहस्य शब्दे ।

सिंहनर्दिका पु० सिंहइव नर्दति नर्द—ण्वुल् । (सिङ्गा) वाद्य-

सिंहनादिका स्त्री० सिंहमिव नादयति नद णिच् ण्वुल् । दुरालभायाम् ।

सिंहपर्णी स्त्री० सिंहस्य पुच्छइव पर्णमस्या ङीप् । वासकवृक्षे

सिंहपुच्छिका स्त्री० सिंहस्य पुच्छमिव पत्राग्रमस्याः-कप्, अत इत्वम्) (जुट्चाकुले) वृक्षे ।

सिंहपुच्छी स्त्री० सिंहस्य पुच्छमिव पुष्पाणि पत्राणि वास्याः ङीप् । चित्रपर्ण्यां, वृश्चिकपत्र्याम्, न० समासः । वृश्चिकपत्र्यां च ।

सिंहपुष्पा स्त्री० सिंहस्य पुच्छमिव पुष्पाग्रमस्याः । वृश्चिकपत्र्याम्

सिंहमुखा स्त्री० सिंहस्य मुखमिव मुखमस्येदन्त्वं पुष्पमस्याः ङीप् । वासके । [दयोऽस्यत्व ।

सिंहयाना स्त्री० सिंहोयानं वाहनं यस्याः दुर्गायाम् सिंहवाहना-

सिंहल पु० सिंहोऽस्त्यत्र लच् । देशभेदे । तद्देशप्रभवत्वात् रङ्गे, रीतौ त्वचे च न० ।

सिंहलाख्यान पु० सिंहल आख्यानं यस्य । नालसडये वृक्षभेदे ।

सिंहवाहिनी स्त्री० सिंहरूपो वाहो विद्युतेऽस्या इनि । दुर्गायाम् ।

सिंहविक्रान्त पु० सिंहस्येव विक्रान्तः । अश्वे । सिंहतुल्य विक्रमे त्रि०

सिंहविद्या स्त्री० सिंहस्येव विद्या यस्याः । मातृकायाम् ।

सिंहसंहनन त्रि० सिंहस्येव संहननमङ्गमस्य । वराङ्गयुक्ते सिंह-तुल्य दृढाङ्गे, च । "सिंहसंहननो युवेति" रघुः ।

सिंहा(ह्वा)न न० सिंह-आनच् पृ० । नौकृपले ।

सिंहासन न० सिंहचिह्नितमासनम् । राजासने चतुराजी क्रीड़ायां जयभेदे, योगासनभेदे च लक्षणं वाचस्पत्ये ।

सिंहास्य पु० सिंहस्यास्यमिवास्यमस्येदन्त्वं पुष्पं यस्य । वासके ।

सिंहिका स्त्री० । काश्यपपत्न्यां राक्षसमातरि ।

सिंहिकासुत पु० इत्न० । राहौ सिंहिकायाः पुत्रादयोऽस्यत्व ।

सिंही स्त्री० हिनस्ति रोगान् हिंस्रे अच् पृ० । वार्ताक्यां, कण्टकारिकायाम्, वासके, वृश्चिक्यां, वृश्चिकपत्र्याम्, राक्षसमातरि, च । सिंह + जातौ ङीप् । सिंह्योषिति ।

सिक सेचने सौत्र० पर० सक० सेट् सेकति असेकीत् ।

सिकता स्त्री० व० व० । सिक-अतच् किच्च । वालुकायाम् । सिकताः सन्त्यत्र अण् तस्य लुप् । सिकतायुक्तदेशे स्त्री० ।

सिकतामय त्रि० सिकता+मयट्। वालुकामये तटादौ
सिकतावत् त्रि० सिकताः सन्त्यस्य मतुप् मस्य वः। वालुकायुक्तदेशे।
सिकतिल त्रि० सिकताः सन्त्यस्य इलच्। वालुकायुक्तदेशे
सिक्थ न० सिच-थक्। मधूच्छिष्टे, (मोम) नीरस्याङ्गे। स्वार्थे कन्। तत्र, भक्तपुलाके, घासे च पु०।
सिक्त न० सिक-क्त। (सिके) रज्जुनिर्म्मिते पदार्थे
सिक्था(था)न न० सिच-आनच् पृ०। नासिकामले। (सिक्नी)।
सिच् त्रि० सिच-क्विप्। सेचनकर्त्तरि, कर्म्मणि क्विप्। वस्त्रे।
सिचय पु० सिच्-अयच् किच्च। वस्त्रे।
सिञ्चिता स्त्री० सिच इतच् पृ०। पिप्पल्याम्
सित न० सो-क्त। रौप्ये, मूलके, चन्दने च। शुक्ले, शुक्लपक्षे, शुक्लवर्णे च त्रि०। तद्वति, समाप्ते, बद्धे, श्याते च त्रि०।
सितकण्ठ पु० सितः कण्ठोऽस्य दात्यूहे, पक्षिणि।
सितकर पु० सितः करः किरणो यस्य। चन्द्रे, कर्पूरे च सितमयूखादयोऽप्यत्र।
सितकर्णी स्त्री० सितः कर्ण इव पुष्पमस्याः ङीप्। वासके
सितकुञ्जर पु० सितः कुञ्जरोऽस्य। इन्द्रे। कर्म्म०। ऐरावतगजे
सितगुञ्जा स्त्री० कर्म्म०। श्वेतगुञ्जायाम्।
सितच्छत्रा स्त्री० सितं छत्रमिव पुष्पमस्याः। श्वेतपुष्पायाम्।
सितच्छद पु० सितच्छदः पक्षोऽस्य। हंसे। श्वेतदूर्व्वायां, स्त्री०।
सितदर्भ पु० कर्म्म० श्वेतकुशे।
सितदीप्य पु० दीपयत्यग्निम् दीप-णिच्-यत् कर्म्म०। श्वेतजीरके।
सितदूर्व्वा स्त्री० कर्म्म०। श्वेतदूर्व्वायाम्।
सितद्रु पु० कर्म्म०। भोरटभेदे, शुक्लपर्णद्रुमे च।
सितधातु पु० कर्म्म०। कठिन्याम्।
सितपक्ष पु० सितः पक्षोऽस्य। हंसे। कर्म्म०। चन्द्रस्य वृद्धिकारके पञ्चदशतिथ्यात्मके शुक्ले पक्षे।

सितपर्णी स्त्री० सितानि पर्णान्यस्याः ङीप् । अर्कपुष्पिकावृक्षे ।
सितपाटलिका स्त्री०कर्म्म० । (श्वेतपाटल) वृक्षे ।
सितपुष्पा स्त्री० सितः पुष्पोऽस्याः । श्वेतशरपुङ्खावृक्षे ।
सितपुष्प न०सितानि पुष्पाण्यस्य । कैवर्तीमुस्तके । तगरवृक्षे, काशे श्वेतरोहितवृक्षे च पु० । श्वेतापराजितायां स्त्री० ङीप् । मल्लिकायां स्त्री० टाप् । कर्म्म० । श्वेतपुष्पे न० ।
सितमरिच न० कर्म्म० । शुभ्रमरिचे ।
सितमाष पु० कर्म्म० । राजमाषे (बरबटी)
सितवर्षाभू स्त्री०वर्षासु भवति भू-क्विप् कर्म्म० । श्वेतपुनर्णवायाम् ।
सितसायका स्त्री० सितः सायकोऽस्याः ५ब० । शुभ्रशरपुङ्खावृक्षे ।
सितशिम्बिक पु० सिता शिम्बिर्यस्य कप् । गोधूमे,
सितशूक पु० सितः शुभ्रः शूको यस्य । यवे ।
सितशूरण पु० कर्म्म० । वनशूरणे (वनओल) ।
सितसर्षप पु० कर्म्म० । गौरसर्षपे ।
सितसार(क) पु० सितः सारोनिर्यासो यस्य वा कप् । खादिरवृक्षे ।
सिता स्त्री० सो क्त । शर्करायाम् ।
सिताखण्ड पु० सितायाः खण्ड इव । मधुजातशर्करायाम् ।
सिताग्र पु० सितमग्रं यस्य । कपर्दके
सितादि पु० सितायाः आदिः कारणम् । गुडे ।
सितापाङ्ग पु० सितमपाङ्गं यस्य । मयूरे
सिताब्ज न० कर्म्म० । श्वेतकमले । सिताम्भोजादयोऽप्यत्र ।
सिताभ पु० सिता आभा यस्य । कर्पूरे, चन्द्रेच । तत्रे स्त्री० ।
सिताभ्र पु० अभ्रइव सितः शुभ्रः राज० । कर्पूरे ।
सिताभ्रक न० अभ्रकमिव सितम् राज० । कर्पूरे ।
सितार्ज्जक पु० कर्म्म० । श्वेतलजवायाम् ।
सितालक्त पु०आलयति भूषयति अल-णिच्-ण्वुल् कर्म्म० । श्वेतमन्दारे ।
सितालता स्त्री० सिता सती आलतते आ+लत-अच् । श्वेतदूर्वायाम्
सितावर पु० सितं श्वेतमावृणोति आ+वृ-अच् (सुसूनि) शाकभेदे ।

सिति पु० षो सिच् । शुक्लवर्णे, कृष्णवर्णे च । तद्वति त्रि० ।
सितिमन् पु० सितस्य भावः इमनिच् । शुभ्रतायाम् । [भावे ।
सितिवार पु० सितिं चेतनां हरोति ह-अच् । शनिग्रहके (शनौ)
सितिवासस् पु० सिति कृष्णं वासोऽस्य । बलदेवे ।
सितेतर पु० सितादितरः । श्यामश्यामौ कुलत्थे च श्यामेतरवर्णे पु० तद्वति त्रि० ।
सितोपल पु० कर्म्म० । स्फटिके । कठिन्यां न० । शर्करायां स्त्री०
सिद्ध न० सिध-क्त । सैन्धवलवणे व्यक्तिभवात्तथात्वम् निष्पन्ने, पक्के, नित्ये च त्रि० । सिद्धिरस्यास्य अच् । व्यास दो सुरौ देवयोनिभेदे च पु० । निश्चिते त्रि० विष्कम्भादिषु मध्ये द्वाविंशयोगे, युद्धे ब्रह्मणभूस्त्रे च पु० । ज्योतिषोक्तौ योगिनीदशामध्ये सप्तम्यां दशायां स्त्री० । तन्त्रोक्ते सिद्धादिचक्रस्थे साधकनामाद्याक्षरयुक्तकोष्ठस्थाद्याक्षरयुक्ते मन्त्रभेदे पु० ।
सिद्धक पु० सिद्धइव इवार्थे कन् । सिन्धुवारे, शालवृक्षे च ।
सिद्धजल न० सिद्धं पक्वं जलम् । काञ्जिके । सिद्धतोयादयोऽप्यत्र ।
सिद्धदेव पु० सिद्धानां देवः । महादेवे ।
सिद्धधातु पु० सिद्धः प्रसिद्धोधातुः । पारदे ।
सिद्धपीठ पु० न० कर्म्म० । आतोलक्षवलिर्यत्र होमोवा कोटिसङ्ख्यकः । महाविद्याजपाः कोटयः सिद्धपीठः प्रकीर्त्तितः, इति तन्त्रोक्ते स्थानभेदे ।
सिद्धपुर न० कर्म्म० । "ब्रह्मक्षेत्रमध्ये यमकोटिरेखाः प्राक् पश्चिमे रोमकपत्तनञ्च । अधोगतं सिद्धपुरञ्चैव्युक्तं" भूगोलस्थेषु भूसुरपादालङ्कृतदेशस्थेषु चतुर्षु दैवनिर्म्मितेषु पुरेषु मध्ये ब्रह्मणोभागस्थे पुरभेदे ।
सिद्धपुष्प पु० सिद्धं नित्यं पुष्पं यस्य करवीरवृक्षे ।
सिद्धप्रयोजन पु० सिद्धं प्रयोजनं यस्मात् ५त० । गौरसर्षपे
सिद्धरस पु० सिद्धः प्रसिद्धोरसः । पारदे सिद्धोरसोऽत्र धातुभावे त्रि० ।

सिद्धविद्या स्त्री० सिद्धा विद्या मन्त्रोयस्याः । "काली तारा महाविद्या षोड़शी भुवनेश्वरी । भैरवी छिन्नमस्ता च विद्या धूमावती तथा । बगला सिद्धविद्या च मातङ्गी कमलात्मिका । एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः" इति तन्त्रोक्तासु दशसु काल्यादिषु ।

सिद्धसाधन न० सिद्धस्य निश्चितस्य साधनमनुमानम् । न्यायोक्ते सिषाधयिषाविरहकाले साध्यत्वेन निश्चितस्य पुनरनुमानरूपे दोषे । सिद्धं साधयति ल्यु । श्वेतसर्षपे पु० ।

सिद्धसाध्य पु० सिद्धादिचक्रस्थे साधकनामाद्याक्षरयुक्तकोष्ठावधिद्वितीयकोष्ठस्थाद्याक्षरयुक्ते तन्त्रोक्ते मन्त्रभेदे ।

सिद्धसिद्ध पु० तन्त्रोक्ते सिद्धादिचक्रस्थे साधकनामाद्याक्षरयुक्तकोष्ठस्थितीयाद्याक्षरयुक्ते मन्त्रभेदे ।

सिद्धसिन्धु स्त्री० ६त० । गङ्गायाम् सिद्धनद्यादयोऽप्यत्र ।

सिद्धसुसिद्ध पु० तन्त्रोक्ते सिद्धादिचक्रस्थे साधकनामाद्याक्षरयुक्तकोष्ठावधिचतुर्थकोष्ठस्थितीयाद्याक्षरयुक्ते मन्त्रभेदे ।

सिद्धान्त पु० सिद्धः निश्चितोऽन्तोयस्मात् । प्रमाणाद्युपन्यासेन पूर्वपक्षनिरासके सिद्धपक्षस्य स्थापनरूपे याक्यसन्दर्भे, ज्योतिःशास्त्रभेदे च स च सूर्य्यसिद्धान्तः सोमसिद्धान्तादिः ।

सिद्धारि पु० तन्त्रोक्ते सिद्धादिचक्रस्थे साधकनामाद्याक्षरयुक्तकोष्ठावधिचतुर्थकोष्ठस्थाद्याक्षरयुक्ते मन्त्रभेदे ।

सिद्धार्थ (क) पु० सिद्धः अर्थो यस्मात् ५ब० वा कप् । श्वेतसर्षपे वटीवृक्षे च । ६ब० । प्रसिद्धार्थे त्रि० । "सिद्धार्थं सिद्धसम्बन्धमिति" प्राहुः ।

सिद्धि स्त्री० सिध–क्तिन् । ऋद्धिनामौषधे, योगभेदे, मन्त्रज्ञाने, निष्पत्तौ, पाके, पाटलायाम्, मोक्षे, सम्पत्तौ, अणिमाद्यष्टविधैश्वर्य्ये, बुद्धौ, साध्यवत्तया निश्चये च ।

सिद्धिद् पु० सिद्धिं ददाति दा–क । बटुकभैरवे । सिद्धिदातरि त्रि० ।

सिद्धियोग पु० सिद्धिश्चेतर्योगः । "शुक्रे नन्दा बुधे भद्रा धनौ रिक्ता कुजे जया । गुरौ पूर्णा च संयुक्ता सिद्धियोगः प्रकीर्त्तितः" इति ज्योतिषोक्ते शुक्रादिवारयुक्तनन्दादौ ।

सिध्म न० सिध-मनु किच्च । किलासरोगे ।

सिध्मन् न० सिध-मनिन् किच्च । किलासरोगे तद्युक्तवति त्रि० ।

सिध्मल त्रि० सिध्मन्+अस्त्यर्थे लच् । किलासरोगवति । विकारे स्त्री० ।

सिध्य पु० कार्य्यं साधयति सिध-णिच्-कर्त्तरि यत् नि० । पुरश्चरणादौ

सिध्रक पु० सेधति रोगान् सिध-रक् स्वार्थे कन् । (सुधे) वृक्षभेदे "वनमिर्यो"रित्यादिसूत्रेण सिध्रकशब्दस्य पाणिनिना दीर्घविधानात् पुंस्त्वमेवास्य, अमरोक्तं स्त्रीत्वन्त्वाश्रयणीयम् ।

सिध्रकावण न० सिध्रकप्रधानं वनं अत्तम् दीर्घश्च । देवोद्याने ।

सिन पु० सीयते बध्यते क्ष सि-क्यासे तस्य नः । पाशे, काचे च ।

सिनी स्त्री० सि-क्त तस्य नत्वं स्त्रियां ङीप् । शुक्लवर्णस्त्रियाम् ।

सिनीवाली स्त्री० सिनीं श्वेतां चन्द्रकलां वलति धारयति अण् ङीप् । चतुर्दशीयुक्तायाममावास्यायाम् ।

सिन्दु(न्धु)क पु० स्यन्दते स्यन्द-उ संप्रसारणञ्च ह्रस्वो दस्य वा धः स्वार्थे या कन् । सिन्दुवारवृक्षे ।

सिन्दु(न्धु)वार पु० सिन्धुं गजमदं वारयति निवारयति वृ-णिच्-अण् । (निर्गुण्डी) वृक्षे । "सुवासवापीजात सिन्दुवारमिति" कुमारः तस्य च क्षेत्रपुष्पत्वात् सुवासत्वम् । [भेदे, वृक्षभेदे पु० ।

सिन्दूर न० स्यन्द-ऊरन् संप्रसारणम् । स्वनामख्याते रक्तवर्णे चूर्णे-

सिन्दूरकारण न० ६त० । सीसके । [यायाम् स्त्री० ।

सिन्दूरतिलक पु० सिन्दूरवर्णतिलकसदृशभेदो यस्य । कृष्णतिनि वृक्ष-

सिन्दूरी स्त्री० सिन्दूरवर्णोऽस्ति पुष्पादौ अस्त्यर्थाः अच् स्त्री० ङीप् । सिन्दूरवर्णयुक्ते, धातुभेदे च ।

सिन्धु पु० स्यन्द-उ संप्रसारणं । दक्षे यज्ञे । वृक्षभेदे, नदभेदे, वृक्षे, श्वेतवृक्षे, रागभेदे, गजभेदे, देशभेदे च । तद्देशवासिनि पु०व० । नदीभेदे स्त्री० ।

सिन्धुकफ पु० सिन्धोः कफइव । यवक्षारभेदे । [इत्यौ०]
सिन्धुकर न०सिन्धुदेशे क्रीयते क्रियते वा कृ-अ-वा अण् । सैंधवलवणे ।
सिन्धुखेल पु० सिन्धुजलीये खेलति खेल-अच् । सिन्धुदेशे ।
सिन्धुज न० सिन्धुदेशे सम्भवे वा जायते जन-ड । सैन्धवलवणे ।
चन्द्रे, कर्पूरे च पु० । ब्रह्मण्यां स्त्री० । सिन्धुजातादयोऽत्र ।
सिन्धुनन्दन पु० ६त० । चन्द्रे, सिन्धुसुतादयोऽत्र ब्रह्मण्यां स्त्री० ।
सिन्धुपुष्प पु० सिन्धौ पुष्पमिति विकायते पुष्प-अच् । मद्ये ।
सिन्धुसम्भव न० सिन्धुसम्भवात् जायते जन-ड । सैन्धवलवणे,
अम्लवेते च । [ति" सङ्कलनम् ।
सिन्धुर पु० सिन्धुर्मदजलमस्यास्ति र । इभेभिदे "मदान्धसिन्धुरघटे-
सिन्धुलवण न० सिन्धुदेशजातं लवणम् । सैन्धवलवणे ।
सिन्धुवरित पु०सिन्धुः मदजलं वारितमिवरक्षतो येन अतितिक्षत्वात् ।
सिन्धुवारवृक्षे । (निसिन्दा)
सिन्धुवेषण पु० विष-ल्युट ६त० । गाम्भारीवृक्षे ।
सिन्धुसङ्गम पु० सिन्धोः नद्योः नदीसमुद्रयोर्वा सङ्गमः । नद्योः नदी-
समुद्रयोर्वा, मेलने । स यत्र । तदाधारदेशे त्रि० ।
सिन्धूद्भव न० सिन्धोः उद्भवति उद्+भू-अच् । सैन्धवलवणे
सिन्धूत्पल पु० सिन्धोरुपजातव । सैन्धवलवणे । क्लीवमित्यन्ये ।
सिप्र पु० सप-रक् पृ० । वरावरभेदे, चन्द्रे, निदाघजले, धर्मे च
उज्जयिनीसमीपस्थनदीभेदे स्त्री० "सिप्रातरङ्गसिकताम्बितसान्वि-
नि" रघुः ।
सिम पु० सि-मन् किच्च । सर्वस्मिन् इत्यर्थे, तदर्थेऽस्य सर्वनामता ।
सिम्बा(म्बि) स्त्री० श्याम्यति इडिरमया श्यम-अच् इत्वं वा पृ० (छुटि)
सिम्बायाम् इत्वन्तः । मल्लीनामसम्बन्धरूपे वा ङीप् । ङीवन्तः ।
सिम्बाख्यश्च ।
सिम्बिजा स्त्री० सिम्बेर्जायते जन-ड । मधीधान्ये कलायादौ ।
सिर सि-रक् । सिम्बीभूते । नाड्याम् अम्बुवाहिन्याञ्च स्त्री० । [इत्यौ०]
सिलक्की स्त्री० सि-किप् सक अच् गौरा० ङीष् कर्म० । वस्त्रको-

सिन्दुरक पु० सो—कि सिः सेदृक्षं क्षरणते कटेकाद्यतत्वात् क्षरि-कन्, ह्रस्वः पृषो० । [लिंव ।

सिन्ध पु० सिन्ध—घञ् पृ० । इक्षुभूपाख्ये गन्धद्रव्ये । स्वार्थे कन् । त-

सिन्धकी स्त्री० सिन्ध—वुञ् पृ० गौ० ङीष् । सल्लकीवृक्षे ।

सिन्धभूमि स्त्री० सिन्धस्य गन्धद्रव्यस्य भूमिः । सल्लकीवृक्षे ।

सीक सेचने भ्वा० आ० सक० सेट् । सीकते असेकिष्ट । चङि न ह्रस्वः । अनोपदेशत्वान्न नत्वम् ।

सीक सर्धे वा पु० उभ० पक्षे भ्वा० प० सक० सेट् । सीकयति ते सी-कति अससीकत् त असीकीत् । न नत्वम् ।

सीकर पु० सीक्यते सिच्यतेऽनेन सीक—अरण् । जलकणे ।

सीता स्त्री० सि-त पृ० दीर्घः । जानकीजनकौ, जनकराजदुहितरि, भद्राश्ववर्षस्थितगङ्गायाञ्च ।

सीतापति पु० ६त० । श्रीरामे ।

सीतायाःपति पु० ६तः अलुक्समा० । श्रीरामे "सीतायाः पतये नमः" इति पुराणम् असमस्तत्वे पत्येरिति ङीप् ।

सीत्कार पु० सीदित्यव्यक्तस्य कारः सीत्+क—घञ् । अनुरागजे शब्दे ।

सीत्कृत न० सीत्—कृ+भावे क्त । सीत्कारे, अनुरागजशब्दे ।

सीत्य न० सीतया लाङ्गलपद्धत्या निष्टप्तं यत् । धान्ये । सीतामर्हति यत् । कृषिकर्मणयोग्ये क्षेत्रादौ त्रि० ।

सीधु पु० सिध—उ पृ० । मद्ये "इक्षोः पक्वरसैः सिद्धः सीधुरित्यभि धीय-ते" इत्युक्ते मद्यभेदे च ।

सीधुगन्ध पु० सीधोरिव गन्धोऽस्य न तु अनित्यत्वात् । बकुले ।

सीधुपुष्प पु० सीधुगन्धयुक्तं पुष्पमस्य । कदम्बे, बकुले च । धातक्यां स्त्री० ङीप् ।

सीधुरस पु० सीधोरिव रस आस्वादोऽस्य । आम्रवृक्षे ।

सीमन्त पु० सीम्नोऽन्तः अक० । (सिंति) बध्नाति गर्भस्थबालं कारे घटार्थं "अष्टेऽष्टमे वा सीमन्त" इत्युक्ते गार्भिणिके अष्टमे वा मासि कर्त्तव्ये संस्कारभेदे च ।

सीमन्तक न० सीमन्ते भावति के—क । सिन्दूरे । नरकावासे पु० ।
सीमन्तिनी स्त्री० सीमन्त+अस्त्यर्थे इनि । योषिति वाच्यलिङ्गम् ।
सीमन्तोन्नयन न० सीमन्तस्य तदाख्य गर्भसंस्कारस्य उन्नयनमुद्भावनमत्र । कृत्युक्ते गर्भसंस्कारकर्म्मभेदे ।
सीमन् स्त्री० सि—मनि इ० न गुणादिः । मर्य्यादायाम्, अवधौ, स्थितौ क्षेत्रे, अमरकोषे "सीमन्ति पुण्यकीकृतः" इति सिद्धान्तकौमुद्यां । वेलायाञ्च । [न्द्यर्थे च ।
सीमा स्त्री० सीमन्+टाप् । मर्य्यादायां, आसादेरन्तभागे, सीमनृशब्दे ।
सीमाविवाद पु० सीमायां विवादः । अष्टादशसु विवादेषु मध्ये स्वनामख्याते विवादभेदे ।
सीर पु० सि-रक् पृ० । सूर्य्ये, अर्कवृक्षे, हले च ।
सीरध्वज पु० सीरोहलः सञ्चिन्तितो ध्वजोयस्य । चन्द्रवंशजे जनकनृपे ।
सीरपाणि पु० सीरः हलः पाणौ यस्य । बलदेवे ।
सीरिन् पु० सीरोहलोऽस्त्यस्यायुधत्वेन इनि । बलरामे ।
सी(से)वन न० सिव-ल्युट् नि० वा दीर्घः । सेवने तन्तुसन्ताने (सिब्बोयान) [कन् । तत्रार्थे ।
सीस न० सि—क्विप् पृ० षो-क कर्म० । (सीसे) धातुभेदे स्वार्थे
सीहुण्ड पु० सिड्गड्+पृ० दीर्घः । स्नुक्षीरवृक्षे, [अनायासे च ।
सु अव्य० षु ड । पूजायाम्, अतिशये, क्षेपे, अनुमतौ, सत्कृतौ,
सुकरटका स्त्री० सुष्ठु करटकोऽस्याः । हस्तकुमार्य्याम् ।
सुकण्डु स्त्री० सु+कण्डु+यक् डु । कण्डुरोगे (चुलकोना)
सुकन्द पु० शोभनः कन्दोऽस्य । कपेरौ, शोभनकन्दयुक्ते त्रि० संज्ञायां कन् । पलाण्डौ । [धरणीकन्दे, सूरणे, च । (ओल)
सुकन्दिन् पु० शोभनः स्थितकरः कन्दोऽस्त्यस्य इनि । वाराहीकन्दे,
सुकरा स्त्री० सुखेन क्रियते दुह्यते वा सु+कृ-खल् । सुधीलायां गवि ।
सुकर्म्मन् त्रि० । [युक्ते त्रि० ।
सुकर्णक पु० सुष्ठु कर्ण इव कन्दोऽस्य कप् । वृक्षिकन्दे । शोभनकर्ण-

सुकर्णिका स्त्री० सुष्ठु-कर्णाविव पर्णान्यस्याः कप् अत इत्त्वम् । मूषिकपर्ण्याम् । [(राजनिघण्टौ)] ।

सुकर्णी स्त्री० सुष्ठु कर्णाविव पर्णान्यस्याः ङीप् । इन्द्रवारुण्याम्

सुकर्मन् पु० सुष्ठु कर्म यस्मात् ५ ब० । विष्कम्भादिषु मध्ये शुभे योगे । शोभनकर्मयुक्ते त्रि० । प्रादि० । शोभने कर्मणि न० ।

सुकल पु० सुष्ठु कल्यते ख्याप्यतेऽसौ सु+कल+घञ् । दाक्षत्वभोक्तृत्वादिना विख्याते जने सुन्दरमधुरव्यक्तशब्दे च ।

सुकाण्ड पु० सुष्ठु काण्डोऽस्य । कारवेल्ले, सुन्दरकाण्डयुक्ते वृक्षे च काण्डीरलतायां स्त्री० स्वार्थे कन् अतइत्त्वम् । तत्रैव ।

सुकाम्या स्त्री० सुष्ठु काम्यतेऽसौ सु+कम-घञ् । त्रायमाणा लतायाम् । शोभनकामयति त्रि० ।

सुकाष्ठ न० सुष्ठु काष्ठं प्रा० । देवदारुकाष्ठे, शोभनकाष्ठे च ।

सुष्ठुकाष्ठा स्त्री० सुष्ठु काष्ठं यस्याम् । काष्ठकदल्याम्, कटुक्यां च

सुकुन्दक पु० सु+कुदि-ण्वुल् । प्लक्षवृक्षे ।

सुकुन्दन न० सु+कुदि-ल्युट् । वर्षरे

सुकुमारा स्त्री० सु+कुमार-अच् घञ् वा । जातीवृक्षे, नवमालिकायाम्, कदल्याम्, वृक्षायाम्, मालत्यां च । अतिकोमले त्रि० । प्रा० । सुन्दरकुमारावस्थान्विते त्रि० स्त्रियां ङीप्

सुकृत् त्रि० सु+कृ-क्विप् । पुण्यकारके, धार्म्मिके जने ।

सुकृत न० सु+कृ-क्त । पुण्ये, धर्म्मे, शुभे च । सुकर्म्मणि न० ।

सुकृति स्त्री० सु+कृ-क्तिन् । पुण्ये, मङ्गले, सत्कर्म्मणि च ।

सुकृतिन् त्रि० सुकृतमनेन इनि । पुण्यशीले, शुभयुक्ते, सत्कर्म्मणि च ।

सुकेसर पु० सुष्ठु केसरो यस्य । बीजपूरे ।

सुकोली स्त्री० प्रा० । क्षीरकाकोल्याम् ।

सुकोषक पु० सुष्ठु कोषोऽस्य कप् । कोषाम्रे ।

सुक्ख सुखसम्मादने कद० चु० उभ० सक० सेट् । सुक्खयति ते असुक्खत् त । अयोपदेशत्वान्न षत्वम् ।

सुक्ख न० सुक्ख-घञ् । पुण्यजन्ये गुणभेदे आनन्दे ऋक्सूक्तवेदनीये

वदनुभवाय चित्तमनुकूलं भवति तस्मिन् अर्थे । तन्त्र आत्मधर्म्म इति नैयायिकादयः । चित्तधर्म्म इति साङ्ख्यादयः । सुखयतीति अच् सुखमस्त्यस्मिन् अच् वा । सुखकारके, सुखिनि च त्रि० ।

सुखङ्करी स्त्री० सुखङ्करोति क-खच् मुम् च ङीप् । जीवन्त्यां दुग्धे-सुखकारके त्रि० ।

सुखजात त्रि० जातं सुखमस्य परनिपातः । जातसन्तुष्टे "सुखजातः सुरापीत" इति भट्टिः ।

सुखदोह्या स्त्री० सुखेन दोह्या दुह-यत् । क्लेशं विना दोहनीयायां गवि-सुखसंदोह्यायाम् ।

सुखभाज् त्रि० सुखं भजते भज-क्विप् । सुखयुक्ते ।

सुखमोदा स्त्री० सुखः सुखकरोमोदो यस्याः । सल्लकीवृक्षे ।

सुखरात्रि स्त्री० सुखा सुखकरी रात्रिर्यस्याम् । आश्विनामावास्यायाम् दीपान्वितामावास्यायाम् ।

सुखरात्रिका स्त्री० सुखा रात्रिर्यस्याः ५ब० कप् । दीपान्वितामावास्यायां-पूजायां लक्ष्म्याम् दीपान्विताकृत्यकृत्य "पूजनीया तदा लक्ष्मीर्विज्ञेया सुखरात्रिकेति" ज्योतिर्वचनम् । कवभावे सुखरात्रिरत्र "आख्याता भूतले देवि ! सुखरात्रि ! नमोऽस्तु ते" इति दीपान्वितामावस्यायां लक्ष्मीपूजनमन्त्रः ।

सुखवर्चक पु० सुखं वर्चयति वर्च णिच् ण्वुल् । सुर्जिकाक्षारे साजिमाटि ।

सुखवर्चस् पु० सुखं सुखकरं वर्चो यस्य । सुर्जिकाक्षारे (साजिमाटि) ।

सुखवास पु० सुखः सुखकरो वासोगन्धो यस्य । (तरमुज) फलवृक्षे ।

सुखवासन पु० सुखं सुखकरं वासनं गन्धो यस्य । सुखवासनगन्धद्रव्ये

सुखाधार पु० सुखानामाधारः । स्वर्गे । कर्म० । सुखकरावासे ।

सुखायत पु० सुखेनायम्यते आ+यम-क्त । विनीताश्वे ।

सुखायन पु० सुखेनायतेऽनेन अय-ल्युट् । सुविनीताश्वे ।

सुखावह त्रि० सुखमावहति जनयति आ+वह-अच् । सुखजनके ।

सुखाश्व पु० सुखा सुखकरी आशा यस्य । वरुणे । सुखेनाश्यते अश्-

यञ् । राजतिनिम्बे ङ्यो । स्वार्थे कन् । सुखाशने, (यथा) राजतिनिम्बङ्यो च पु० । भावे यञ् । सुखभोजने ।

सुखोत्सव पु० सुखकर उत्सवो यस्मात् ५ब० । पक्षौ । कर्म० । आनन्दकारके, उत्सवे पु० । [(खालिजांठि) ।

सुखोर्ज्जिक पु० सुखस्य उर्ज्जः इङ्गिरत्रस्य ठन् । खर्ज्जिकाक्षारे

सुग न० सुष्ठु गच्छति निर्याति गम-ड । विहायसि । सुगमे त्रि० ।

सुगत पु० सुष्ठु गच्छति जानाति गम-कर्त्तरि-क्त । बुद्धे ।

सुगन्ध न० सुष्ठु गन्धोऽस्य न ब० । गन्धतैले, खुरजीरके, नीलोत्पले, चन्दने, पत्रिपर्णे च । रक्तशिग्रौ, गन्धके, चणके, भूतृणे च पु० । सद्गन्धद्रव्ययुक्ते आपणादौ त्रि० । [रङ्गे, कर्कोटास्थ ।

सुखगन्धक पु० सुष्ठु गन्धोऽस्य कन् । रक्ततुलस्यां, गन्धके, न.म-

सुगन्धपत्रा स्त्री० सुगन्धं पत्रमस्याः । सुरजटायाम् ।

सुगन्धभूतृण न० कर्म० । गन्धतृणे,

सुगन्धमूला स्त्री० सुगन्धं मूलं यस्याः । स्वल्पपत्रिण्याम्, राज्ञायाञ्च ।

सुगन्धा स्त्री० सुष्ठु गन्धोऽस्याः । राज्ञायां यवान्यां, बब्बाकर्कोट्याम्, सुरजटायां, नाकुल्यां, शतपुष्पायां, नवमालिकायां, स्वर्णयूथिकायां, पृक्कायां, सल्लक्यां, गन्धपत्रायाम्, अनन्तायां, तुलस्यां, मातुलुङ्गके च ।

सुगन्धामलक न० सुगन्धैः सर्व्वौषधिगणैर्युक्तमामलकम् । "सर्व्वौषधिसमायुक्ताः शुष्कास्त्वामलकत्वचः । यदातदाय योगः स्यात् सुगन्धामलकाभिध" इत्युक्ते सर्व्वौषधियुक्ते शुष्के आमलकत्वक्फले ।

सुगन्धि पु० सुष्ठु गन्धः इत्यस्य० । दृढमस्ते सुरभौ । सुष्ठु गन्धोऽस्य । सुगन्धयुक्ते त्रि० एलवालुके, सुखायां, जयेरौ, मन्थद्रव्ये, धान्यके, पिप्पलीमूले च पु० स्वार्थे कन् । कङ्कारे, गौरस्वर्णे पुष्करमूले, उशीरे, तुरपर्णे, महाशालौ, गन्धके, तरक्षे च ।

सुगन्धिकुसुम पु० सुगन्धि कुसुमं यस्य । पीतकरवीरे । सुगन्धयुक्तपुष्पवति त्रि० ।

सुगन्धिलिफला स्त्री० लघ्वयवं लिपिराकं वा फलं लिफलं सुगन्धि

लिफलमस्यस्याः बाहुलेन कप्। जातीफले, पूगफले, कङ्कोलिके फले च।

सुगन्धिमूल न० सुगन्धि मूलमस्य। उशीरे (वेना)

सुगृहीतनामन् पु० सुगृहीतं प्रातःकाले स्मरणीयं नाम यस्य। प्रातःस्मरणीये पुण्यकीर्तौ जने।

सुग्रन्थि पु० सुष्ठु ग्रन्थिर्यस्य। चोरकवृक्षे। सुन्दरग्रन्थिमति त्रि०।

सुग्रीव पु० सुष्ठु ग्रीवाऽस्य। श्रीरामसखाये, सूर्य्यपुत्रे वानरेश्वरे च। सुन्दरग्रीववति त्रि०।

सुचक्षुस् पु० सुष्ठु चक्षुरिव फलमस्य। उडुम्बरे, शोभनलोचनयुक्ते त्रि०। प्रा०। शोभने नेत्रे न०।

सुचक्षुका स्त्री० सुष्ठु चक्षुरिव शिखा यस्याः कप्। महाचक्षुशाके।

सुचरित्रा स्त्री० सुष्ठु चरित्रं यस्याः। पतिव्रतायां स्त्रियाम्। सच्चरित्रवति त्रि०। प्रा०। सच्चरित्रे न०।

सुचर्म्मन् पु० सुष्ठु चर्म्मेव वल्कलमस्य। भूर्जवृक्षे सुन्दरचर्म्मवति त्रि०। प्रा०। सुन्दरे चर्मणि न०।

सुचित्रबीजा स्त्री० सुचित्रं विचित्रं बीजं यस्याः। विडङ्गायाम्।

सुचित्रा स्त्री० प्रा०। चिर्भटायाम्। विचित्रे त्रि०।

सुचिर प्रा०। अत्यन्तचिरकाले, बहुकाले च। बहुकालभवे त्रि०।

सुचिरायुस् पु० सुचिरं बहुकालिकमायुर्यस्य। देवे। बहुकालजीविनि त्रि०। [त्रि०।

सुचेलक पु० प्रा०। सच्छ्रवस्त्रे। सुष्ठु चेलोऽस्य कप्। सच्छ्रवस्त्रधरे

सुजल न० शोभनं जलं यस्मात् ५ब०। कमले। प्रा०। सुन्दरे जले न०

सुजाता स्त्री० सु+जन-क्त। तनयायाम्। जनोत्ते त्रि०।

सुजीवन्ती स्त्री० प्रा०। स्वर्णजीवन्त्याम्। [त्याञ्च घः।

सुट् अनादरे पु० उ० सक० सेट्। सुटयति ते असुसुटत् त अनोपदेशस्तु पु० स्त्री० स-क्त। पुत्रे तनयायां। स्त्री० षो च दुराचारभाषायाञ्च। उत्पन्ने, सम्यङ्, निष्पीडिते च त्रि०।

सु(स)तक न०। सु-(सू)-भावे क्त सु(सू)तं जननं तस्मादागतम्

कनू । अनर्थाभावे, अवधारणार्थे च "सुनके सुनके तवेति "नाहञ्च सुनकं तत्याजेति" च भूतिः । [जीवकद्रव्ये ।

सुतजीवक पु० सुतं जीवयति धारयात् जीव-णिच् ण्वुल् । पुत्र-

सुतनु(नू) पु० स्त्री० सुष्ठु तनुर्यस्याः वा ऊङ् । नार्याम् । "सुतनु ! त्यजमनसस्तुरत्यय मे" इतिमाघः ।

सुतपस् पु० सुष्ठु तपति सु + तप–क्विप् । सूर्य्ये । सुष्ठु तपोऽस्य सुनौ पु० । सुन्दरतपोयुक्ते त्रि० प्रा० । सुन्दरे तपसि न० ।

सुतपादिका सुतरां संहताः पादाः मूलान्यस्याः कप् च पादावः ह्रस्वश्च अत इत्वम् । हंसपदीलतायाम्

सुतराम् अव्य० सु + अतिशयेऽर्थे आद्य तरप् । अवधारितार्थस्य अतिशयोचितत्वे "धैर्य्या तदध्यासितकातराक्ष्या विरीक्ष्यमाणः सुतरां दयालुरिति" रघुः अत्र कातराक्ष्या धैर्य्या ईक्ष्यमानत्वेन दयालुत्वस्य अतिशयौचित्यम्

सुतर्कारी स्त्री० सुतर्कं करोति कृ–अण् ङीष् । देवदाली लतायाम् ।

सुतल पु० न० सुष्ठु तलं यत्र । पातालभेदे अट्टालिकाभेदे पु० ।

सुतल्लिवुकयोग पु० सुते ल्लिवुके च योगः अलुक्समासः । "सुतल्लि-वुकवियल्लिलम्बधम्मेल्लधवरगुरुर्वर्दि दानवार्चितो वा । यदयुभय-पयाति तच्छुभं स्यात्" इत्युक्ते योगभेदे ।

सुतिक्त पु० प्रा० । (चेतपापड़ा) पर्पटे अत्यन्ततिक्ते त्रि० कोषातक्यां स्त्री० संज्ञायां कन् । पारिभद्रे निम्बे भूनिम्बे च पु० ।

सुतीक्ष्ण पु० प्रा० । शोभाञ्जनवृक्षे, श्वेतशोभाञ्जने, सुनिभेदे च "सुतीक्ष्णसुनिवेतन" मितिभट्टिः । अत्युग्रे त्रि० ।

सुतुङ्ग पु० प्रा० । वारिकोलवृक्षे ज्योतिष्मतीलतायाम् अष्टरागिषु अंशभेदेषु च विस्तारो वाच्यलिङ्गे । अतिशयोच्चे त्रि०

सुतेजन पु० सु + तिज–ल्यु । धन्वनि, वृक्षे ।

सुतेजस् पु० सुष्ठु तेजोऽस्य । आदित्यभक्तायाम् । शोभनतेजोयुक्ते त्रि०

सुतेला स्त्री० सुष्ठु तैलं यस्याम् ७त० । महाज्योतिष्मती लतायाम्

सु(सू)त्रामन् पु० सुष्ठु त्रायते सु + त्रै–मनिन् पृ० । इन्द्रे

सुत्वन् पु० सुनोतिच्छ सु–क्वनिप् । अभिषेके अभिषवार्थस्थाने अभिषवे अभिषीडने च ।

सुद् शोभायां सौ० प० सक० सेट् इदित् । सुन्दति असुन्दीत् । अर्धा-पदेशत्वाच्च नः ।

सुदन्धिका पु० सुष्ठु दन्धमस्यस्य ठन् । सुदन्धाभिधानवृक्षे ।

सुदण्ड पु० सुष्ठु दण्डो यस्मात् ५ब० । वेते

सुदण्डिका स्त्री० सुदण्डयति रोगान् एवुल् । गोरक्षायाम् । (गोरक्ष-चाकुले) सुदण्डवत्यां स्त्रियाञ्च ।

सुदत् पु० सुष्ठु दन्तोऽस्य वयसि दशादेशः । शोभनदन्तयुक्तवयस्के-यजादौ युवत्यां स्त्रियां ङीप् । "सुदतीजनसङ्गमार्पितमिह" नै० घधम् । क्वयो भिन्ने तु सुदन्शब्देन नटादौ ।

सुदर्भा स्त्री० सु+दभ–घञ् । इक्षुदर्भाख्ये । सुष्ठु दर्भो यत्र सुन्दर-कुशयुक्ते त्रि० ।

सुदर्शन पु० सुष्ठु दृश्यते खलर्थे युच् । विष्णुचक्रे (चक्रशब्दे) वनस्पति-भेदे, इन्द्रपुरे च अमरावत्यां स्त्री० ङीप् ।

सुदल पु० सुष्ठु दलान्यस्य । क्षीरमोरटाख्ये । शालपर्ण्यां स्त्री०

सुदामन् पु० सुष्ठु ददाति दा-मनिन् । मेघे, पर्व्वतभेदे (इरावत् प-र्व्वत) गोपभेदे, सक्तुद्रे, ऐरावते गजे, पुराणप्रसिद्धे श्रीकृष्णमित्रे विप्रभेदे च शोभनदातरि त्रि० । नदीभेदे स्त्री० तत्र वा ङीप् । सुदाम्नी ।

सुदाय पु० सुष्ठु दीयते सु+दा-घञ् । यौतुकप्रसादादिना देये धने । सुष्ठु दायो यस्य । पितृप्रभृतौ ज्ञातौ ।

सुदिव अव्य० सुष्ठु दीव्यति सु+दिव-डि । शुक्लपक्षे ।

सुदिन न० प्रादि० । प्रशस्तदिवसे । प्रशस्ते त्रि० ।

सुदिनाह्न न० सुदिनं प्रशस्तमह्नः टच् समा० । प्रशस्तदिवसे ।

सुदीर्घधर्म्मा स्त्री० सुदीर्घः अतिविस्तीर्णो धर्म्मो गुणविशेषो यस्याः सा-वत्त्वाभावात्तस्यां नित्यं ङीष् । अवनपर्ण्याम्

सुदूर त्रि० प्रादि० । अतिदूरे ।

सुद्युम्न पु० वैवस्वतमनुपुत्रे ।

सुधन्वन् त्रि० सुष्ठु धनुर्यस्य अनङ् । सुन्दरधनुर्द्धरे । राजविशेषे, अर्जुने नागे, विश्वकर्म्मणि च पु० ।

सुधर्मन् स्त्री० सु+धृ मनिन् । देवसभायाम् । कुटुम्बिनि पु० ।

सुधर्मा स्त्री० सुष्ठु धर्मो यस्याः तनिच् समा० वा डाप् । देवसभायाम् । गौ० ङीप् । सुधर्मणीत्यपि ।

सुधा स्त्री० सुष्ठु धीयते पीयते अर्च्यते वाधे, धा वाक । अमृते । लेपनद्रव्ये (कलिचुन) मूर्वायाम्, क्षुद्रायां, गङ्गायाम्, दृष्टकायां, विद्युति, रसे, जले, धात्र्याम् हरीतक्याम् मधुनि, शालपर्णीञ्च ।

सुधांशु पु० सुधेवांशवोऽस्य । चन्द्रे, कर्पूरे च । सुधाकारादयोऽप्यत्र ।

सुधांशुतैल न० सुधांशुना कर्पूरेण वासितं तैलम् । कर्पूरवासिते तैले ।

सुधांशुरत्न न० ६त० । मौक्तिके तस्य चन्द्रप्रियत्वात्तथात्वम् ।

सुधाकर पु० सुधेवाप्यायनमङ्गमस्य । चन्द्रे, कर्पूरे च ।

सुधाजीविन् पु० सुधां लेपनद्रव्यमाजीवति आ+जीव-णिनि । पलङ्कषे (राज) ।

सुधाधार पु० ६त० । चन्द्रे, कर्पूरे, अमृताधारपात्रे च ।

सुधानिधि पु० सुधा निधीयतेऽत्र नि+धा-कि । चन्द्रे, कर्पूरे च ।

सुधापयस् पु० सुधा लेपनद्रव्यमिव शुभ्रं पयो निर्यासोऽस्य । स्नुक्षीरे ।

सुधाभुज् पु० सुधां भुक्तवान् भुज-भूते क्विप् । देवे ।

सुधाभृ(क्व)ति पु० सुधा भ्रियते पुष्यते क्षयते वाऽनेन भृ-क्व वा क्तिच् । यज्ञे, चन्द्रे, कर्पूरे च ।

सुधामय न० सुधात्मकं लेपनद्रव्यात्मकं वा प्राचुर्य्ये मयट् । राजभवने सौधे । अमृतवदाह्लादकवाक्यादौ त्रि० । स्त्रियां ङीप् ।

सुधामोदक पु० सुधेव मोदयति मुद णिच्-ण्वुल् । यवासशर्करायाम्, कर्पूरे च ।

सुधार्णिन् पु० सुधां वर्षति वृष-णिनि । चन्द्रे, कर्पूरे, ब्रह्मणि च ।

सुधावास पु० ६त० । चन्द्रे, कर्पूरे च । सुधावा रव यावो यस्यां ब० व्रीहौ० । लवङ्गाम् ।

सुधासिन्धु पु० सुधामयः सिन्धुः । अमृतसमुद्रे । [(आवलिम)] ।

सुधास्रवा स्त्री० सुधां स्रवति स्रु-अच् । इन्द्रीवृक्षे सुवृक्षिप्रायाम्

सुधाहर पु० सुधां हरति हृ-अच् । गरुडे सुधाहरणादयोऽस्य ।

सुधिति पु० स्त्री० सु+धा-क्तिच् न ह्रादेशः । कुठारे ।

सुधी पु० सुष्ठु धीर्यस्य । चक्षिते । सुष्ठु धीः । सुन्दरबुद्धौ स्त्री० । सुष्ठु ध्यायति सु+ध्यै क्विप् नि० । सुबुद्धियुक्ते त्रि० ।

सुधोन्नव पु० सुधया सह उन्नवति उद्+भू-अच् । धन्वन्तरिवैद्यराजे ६त० । हरितक्यां स्त्री० ।

सुनन्द न० सुष्ठु नन्दयति सु+नन्द-अच् । बलरामसुहृदि श्रीकृष्णपार्षदभेदे, राजगटकभेदे च । आनन्दजनके त्रि० गोरोचनायाम्, उमायाम्, उमासखीभेदे, नार्याम्, अर्कपत्रीवृक्षे च (इजेरमूल)स्त्री० ।

सुनयन पु० सुष्ठु नयने अक्षि । रूपे । नार्यां स्त्री० । शोभननयनयुक्ते त्रि० । [युक्ते त्रि० ।

सुनालक पु० सुष्ठु नालेन कायति कै-क । वकवृक्षे सुन्दरनालः ।

सुनासिका स्त्री० सुष्ठु नासाऽस्त्यस्य ठन् । काकनासायाम् । प्रा० । सुन्दरनासिकायाम् स्त्री० ।

सुनासी(शी)र पु० सुष्ठु नासी(शी)रः अग्रगसैन्यं यस्य । इन्द्रे

सुनासी(शी)र्य्य पु० सुना(शी)रो देवताऽस्य यत् । यज्ञभेदे । क । सुनासीर्य(शी)रीयोऽप्यत्र । [स्वार्थे कन् तत्रैव ।

सुनिषण्ण न० सुष्ठु निषण्णं स्वप्नो यस्मात् ५त० । (सुषुप्ति)भावे ।

सुनिष्टप्त त्रि० सु+निस्+तप-क्त मत्वम् । अत्यन्तोष्णे, सन्तप्ते च

सुनीति स्त्री० सुष्ठु नीतिः यस्याः । ध्रुवमातरि, सुन्दरनीतियुक्ते त्रि० । प्रा० । सुन्दरनीतौ स्त्री० ।

सुनील न० प्रा० । मणिभेदे (नीलम) । दाडिमे, सुन्दरनीलवर्णे च पु० । नदति त्रि० । अतसायाम्, अपराजितायाम्, अरतीतृणे च स्त्री० ।

सुनीलक पु० सुनीलविव स्वार्थे कन्। नीलझङ्गरागे, नीलाञ्जने, नीलरत्ने च।

सुन्द पु०। दैत्यभेदे, असुरभेदे च।

सुन्दर त्रि० सु+उन्द्-अरन्-मुक्०। मनोहरे। स्त्रियां ङीष्। सा च उत्तमस्त्रियां तिलोत्तमादेव्याञ्च। कामदेवे, दैत्यभेदे च (सुंदरि)॥०।

सुपक्व पु०सुन्दरं पक्वमत्र। शोभनपक्वे सुन्दरपरिणते त्रि०

सुपच त्रि०भुक्तं वस् सुखेन पचति पच-अच्प्रत्ये क। लघुपाके द्रव्यभाते।

सुपत्र न० शुष्ठु पत्रमस्य। तेजपत्रे आदित्यपत्रे पु० सुन्दरपत्रयुक्ते त्रि० वृक्षजटायां, घृतवर्य्यां, पालङ्क्यां शालपर्ण्यां च स्त्री०।

सुपत्रक पु० शुष्ठु पत्रमस्य स्वार्थे कन्। शोभाञ्जनवृक्षे जतुकायां स्त्री०। अत इत्वम्।

सुपथ पु० शुष्ठु पन्थाः प्रा० अच् समा०। सद्धर्मनि सदाचारे च शुष्ठु पन्था यत्र अच् समा०। सुन्दरपथयुक्ते त्रि०।

सुपथिन् पु० प्रा० समासान्ताभावः। सत्पथे।

सुपद्मा स्त्री० शुष्ठु पद्यते पद्-म। वचायाम्। पद्मिन्यां स्त्री०।

सुपर्ण पु० शुष्ठु पर्णं पत्रं पक्षो वा यस्य। गरुडे सुन्दरपर्णयुक्ते त्रि० नागकेशरे पु०। बहुव्रीह्यर्थे कप्। आरग्वधवृक्षे, सप्तच्छदवृक्षे, गरुडे च। शालपर्ण्यां, रेणुकायां, पलाश्यां, स्वर्णजीवन्त्याञ्च स्त्री० क्वापि अत इत्वम्।

सुपर्णकेतु पु० सुपर्णो गरुडः केतुर्यस्य। विष्णौ।

सुपर्णी स्त्री० शुष्ठु पर्णान्यस्याः गौ०ङीष्। पक्षिण्यां, गरुडमातरि च।

सुपर्णीतनय पु० इत०। गरुडे। [पर्व्वणि न०।

सुपर्वन् पु० शुष्ठु पर्व यस्य। देवे, वाणे, वंशे, भूमे च प्रा०। सुन्दरे

सुपर्वा स्त्री० शुष्ठु पर्व यस्याः डाप्। श्वेतदूर्व्यायाम्।

सुपाक्य न० सुपाकमर्हति यत्। विड्लवणे।

सुपार्श्व पु० शुष्ठु पार्श्वोऽस्य। पुनर्नवे (पाकुड़) वृक्षभेदे, सम्भातिवृक्षे विष्णुभेदे च वृद्धायां कन्। गर्हभाण्डवृक्षे पु०। सुन्दरपार्श्वयुक्ते त्रि०।

सुचिक्किका स्त्री० प्रा० । ज्योतिष्मत्यां, जीवन्त्याञ्च । [शि० ।
सुगीत न० प्रा० । गर्जरे (गाजर) । छन्दोरगीतवर्णे पु० । तद्वति त्रि० ।
सुघुट पु० सुष्ठु घुटमस्य । कोलकन्दे, विष्णुकन्दे च ।
सुघुण्टिका स्त्री० सुष्ठु घुण्टाः पर्वाः यस्याः कप् अत इत्वञ्च । आलुकायाम् (तेलाकोका) ।
सुघुष्टिरा स्त्री० सुष्ठु घुष्टिरमस्त्रायाः अच् । खसपर्ण्याम् ।
सुघुष्य न० प्रा० । लवङ्गकुसुमे, प्रपौण्डरीके, तूले, स्त्रीणां रजसि च । 'सुघुष्यैराकीर्णं कुसुमधनुषो मन्दिरमिति श्यामास्तवः । सुष्ठु घुष्यमस्य । (पालुदामान्दार) इक्षे । कप् । पाटलायां स्त्री० अत इत्वम् । [घुष्यायाम्, मिश्रेयायां, द्रोणपुष्पाच्च ।
सुघुष्यो स्त्री० सुष्ठु घुष्यमस्याः गौ० ङीप् । श्वेतापराजितायां, अत-
सुघूर पु० सुष्ठु घूर्य्यते घु+घूर-क । वीजपूरे ।
सुघूरक पु० सुष्ठु घूरयति घूर-ण्वुल् । वकवृक्षे ।
सुघृ स्त्री० व्याकरणपरिभाषिते सुघ्नदतौ प्रत्यये । [निद्रिते त्रि० ।
सुघ्न न० स्वप-भावे क्त संप्रसारणम् । निद्रायां, शयने च । कर्त्तरि क्त ।
सुघ्नजन पु० सुघ्नो जनो यत्र । अर्द्धरात्रे ।
सुघ्नि स्त्री० स्वप-क्निन् । शयने, निद्रायाम्, स्वप्ने च 'करोति सुघ्नि-र्जनदर्शनातिथिमिति नैषधम् ।
सुप्रतिभा स्त्री० सुष्ठु प्रतिभा यस्याः ५ब० । सुरायाम् प्रा० । उज्ज्व-लवर्णौ । इ ब० । तद्वति त्रि० । [पादके छन्दोभेदे स्त्री०
सुप्रतिष्ठा स्त्री० प्रा० । प्रशंसायाम् । इ ब० तद्वति त्रि० । पञ्चाक्षर-
सुप्रतीक पु० सुष्ठु प्रतीकं यस्य । ऐशानकोणस्थिते दिग्गजे शिवे, कामे च सुन्दराङ्गे त्रि० । प्रा० । सुन्दरेऽङ्गे न० ।
सुप्रभा स्त्री० सुष्ठु प्रभा यस्याः । अग्निजिह्वादृष्टे । सुन्दरदीप्तिमति त्रि० । प्रा० । शोभनदीप्तौ स्त्री० ।
सुप्रभात न० प्रा० । शुभसूचकप्रातःकाले, तत्र पाठमाङ्गल्यवाक्ये च ।
सुप्रयुक्तशर पु० सुप्रयुक्तः शरो येन । शीघ्रहस्ते वाक्यनोचनाभ्यासपा-टवयुक्ते ।

सुप्रयोगविधिज्ञ इ० ष० तत्पु० प्रयोगो विधिश्च प्रयोगविधी तयोर्ज्ञः । प्रयोगविधिज्ञे वाचनीयोपाध्यायाद्यपाटवयुक्ते ।

सुप्रलाप पु० सु+प्र+लप-घञ् । सुवचने ।

सुप्रसन्न इ० सु+प्र+सद्-क्त । कुबेरे । प्रसादयुक्ते त्रि० । संज्ञायां कन् । ऋष्यार्जके पु० । [युक्ते त्रि० ।

सुप्रसरा स्त्री० सु+प्र+सृ-अच् । प्रसारिण्यां-लतायाम् विस्तार-

सुप्रसाद सुखेनानायासेन प्रसादो यस्य । शिवे । प्रा० । सुन्दरप्रसन्नतायाम् ।

सुफल इ० ष० तत्पु० फलमस्य । दाडिमे, वदरे, शुण्ठे, कर्णिकारे, कपित्थे च । सुन्दरफलवति त्रि० । इन्द्रवारुण्यां कृष्णायां, कदल्यां, कपिलद्राक्षायाञ्च स्त्री० ।

सुबन्ध पु० सुखेन बध्यते असौ बन्ध-घञ् । तिलवृक्षे ।

सुभग सुष्ठु भगः माहात्म्यादिः यस्य । चम्पके, अशोके, रक्तास्फाने, वृक्षे च । सुदृश्ये, प्रिये, शोभनैश्वर्य्ययुक्ते च त्रि० । कैवर्त्तीमुस्तायां, शालपर्ण्याम्, हरिद्रायां, नीलदूर्वायां, तुलस्यां, प्रियङ्गौ, कस्तूर्य्यां, स्वर्णकदल्यां, वनमल्लिकायां, पतिप्रियायां स्त्रियां च स्त्री० ।

सुभगम्भावुक त्रि० असुभगः सुभगोभवति भू-ण्यर्थ खुकञ् सुमुच् । प्रियम्भविष्णौ ।

सुभगासुत पु० सुभगायाः पतिप्रियायाः सुतः । सौभागिनेये ।

सुभङ्ग पु० सुखेनानायासेन भज्यते निःसारत्वात् भञ्ज-घञ् । नारिकेलवृक्षे ।

सुभट पु० प्रा० । इन्द्रस्योदरि ।

सुभद्र पु० सुष्ठु भद्रं यस्मात् । विष्णौ । ६त० । शोभनभद्रवति त्रि० । शुक्लालतायाम् श्रीकृष्णस्य भगिन्याञ्च स्त्री० । कप् । देवरथे, बिल्ववृक्षे च पु० । [त्वम् । लाक्षलीलतायाम् ।

सुभद्राणी स्त्री० सुभद्रं सुभद्रलक्षणयति आ+नी-ड गौ० ङीष् ।

सुभद्रेय पु० ६त० । अर्জ্জুনे । सुभद्रापत्यादण्योऽपत्ये ।

सुभाञ्जन पु० सुष्ठु भाति भा-क मुमं० । शोभाञ्जनवृक्षे ।
सुभिक्ष त्रि० सुखेन लभ्या भिक्षा यत्र यस्मिन्वा यत्र यस्मिन्काले । प्रचुरान्नवति काले देशादौ । [वाचम् ।
सुभिक्षा स्त्री० सुष्ठु भिक्ष्यते याच्यतेऽसौ सु+भिक्ष-अ । वाचि पुभि-
सुभीरक पु० सुष्ठु भीः सुभीः तामीरयति विरचिताम् ईर-ण्वुल् । पलाण्डुवृक्षे ।
सुभूति पु० सुष्ठु भवति । सु भू-क्तिच् । पण्डितभेदे । प्रा० । सुन्दरविभूतौ स्त्री० ह्रस्व० । तद्वति त्रि० । विल्ववृक्षे पु० ।
सुभृश न० सुष्ठु भृशम् । अतिशये दार्ढ्ये । तद्वति त्रि० । [त्रि० ।
सुभ्रु(भ्रू)स्त्री० सुष्ठु भ्रुर्यस्याः वा ङीष् । नार्याम् सुन्दरभ्रुयुक्ते ।
सुम न० सुष्ठु मीयते ऽर्च्यते सु-मा-घञर्थे क । पुष्पे । चन्द्रे, कर्पूरे, नभसि च पु० ।
सुमङ्गला स्त्री० सुष्ठु मङ्गलं यस्याः ५ब० (आकड़ुहाता) वृक्षे सुमङ्गलयुक्ते त्रि० स्त्रियां ङीप् । 'सुमङ्गली दयं वधूरिति स्तुतिः
सुमदन पु० सुष्ठु मदयति कोकिलान् मद-णिच्-ल्यु आम्रवृक्षे ।
सुमधुर न० प्रा० । अत्यन्तप्रियवाक्ये; सान्त्ववाक्ये च । अतिमधुरे रसयुक्ते त्रि० ।
सुमन पु० सुष्ठु मन्यते मन-अप् । गोधूमे, धुस्तूरे च ।
सुमनःपत्रिका स्त्री० सुमनसः जात्यादेव पत्रमस्याः कप् अत इत्वम् । जातीपत्रिकायाम् । [जातीफले ।
सुमनःफल पु० सुष्ठु मनो यस्मात् तादृक् फलमस्य । कपित्थे, ह्रस्व० ।
सुमनस् न० सुष्ठु मनो यस्मात् यस्य वा । पुष्पे । बन्व० इत्यन्ये 'किं सेव्यते सुमनसां मनसापि गन्ध इति' रसगङ्गाधरः । मालत्यां स्त्री० । प्रसन्नचित्तयुक्ते त्रि० । प्रा० । प्रशान्ते मनसि न० ।
सुमना स्त्री० सुष्ठु मन्यते मन-अप् । मालतीवृक्षे ।
सुमनोरजस् न० ह्रस्व० । पुष्पधूलौ परागे ।
सुमित्रा स्त्री० लक्ष्मणमातरि दशरथपत्नीभेदे । सुन्दरमित्रयुक्ते त्रि०
सुमुख पु० सुष्ठु सुखमस्मात् अस्य वा । मत्स्ये, पण्डिते वाक्यभेदे,

नागभेदे, वितर्जके, वर्बरे, वनवर्ष्मरिकायाञ्च । सुमधुरवदने, मनोहरे च त्रि० । स्त्रियां ङीष् ।

सुमूल पु० सुष्ठु मूलमस्य । श्वेतशोभाञ्जने । शालपर्ण्यां पृश्निपर्ण्यां च स्त्री० । सुन्दरमूलयुक्ते त्रि० । संज्ञायां कन् । गर्ब्बरे न० ।

सुमेखल पु० सुष्ठु मेखला यस्मात् ५ब० । सुञ्जटके, ६ब० । सुन्दर-मेखलान्विते त्रि० । [यास् ६ब० । सुन्दरमेधायुक्ते त्रि० ।

सुमेधस् स्त्री० सुष्ठु मेधा अस्याः ५ब० असिच् । ज्योतिष्मत्यां लता-

सुमेरु पु० प्रा० । पर्वतभेदे, जपमालासीमास्थगुटिकायाञ्च ।

सुम्ब(म्ब) पु० गुम्ब-अच् पृ० । देशभेदे । तद्देशवासिनि पु०ब०व० ।

सुयामुन पु० यमुनाया इदम् सुष्ठु यामुनं प्रियत्वेनास्यस्य अच् । विष्णौ, पर्वतराजे, प्रासादविशेषे, पर्वतभेदे, मेघभेदे च ।

सुयोधन पु० सुखेन युध्यतेऽसौ सु+युध-युच् । धृतराष्ट्रराजपुत्रे दुर्योधने । [च ।

सुर पु० सुष्ठु राति ददात्यभीष्टं सु+रा-क । देवे, स्वर्णे, पण्डिते

सुरक्तता स्त्री० ३त० । युडूच्याम् । देवानिर्मिते त्रि० ।

सुरक्तक पु० सुरक्त इव कायति कै-क । कोषाम्बे, स्वर्णगैरिके च ।

सुरगुरु पु० ६त० । बृहस्पतौ ।

सुरगागणी पु० सुराणां गामणीः नेता । इन्द्रे ।

सुरङ्ग न० सुष्ठु रङ्गो यस्मात् ५ब० । क्रिक्रुके, (वर्षकमाटि) भेदे । प्रा० । नागरङ्गे, गर्त्तभेदे च ।

सुरङ्गधातु पु० सुष्ठु रङ्गो रञ्जनं यस्मात् कर्म० । गैरिके ।

सुरङ्गिका स्त्री० सुष्ठु रङ्गो रञ्जनं यस्याः ५ब०, कप् अत इत्वम् । मूर्वायाम् । रक्तशोभाञ्जने च ।

सुरङ्गा स्त्री० सुष्ठु रङ्गो यस्याः ५ब० गौ० ङीष् । काकनासायाम्,

सुरज्येष्ठ पु० ७त० । चतुर्मुखे ब्रह्मणि ।

सुरञ्जन पु० सुरञ्जयति सु+रञ्ज-णिच्-ल्यु । गुवाके ।

सुरत न० सु+रम-भावे क्त । स्त्रीपुंसयोः सङ्गमरूपे रमणभेदे सु-रमं+ कर्त्तरि क्त । अत्यन्तरते त्रि० ।

सुरता स्त्री० सुराणां समूहः भावो वा त, तल् वा । देवसमूहे, देवत्वे च । सु+रम-क्त । अत्यन्तरतायां स्त्रियाञ्च ।

सुरथ पु० शोभनो रथोऽस्य । चन्द्रवंशीय नृपभेदे 'सुरथो नाम राजाभूदि'ति चण्डी सुन्दररथयुक्ते त्रि० । [दारुहरिद्रे ।

सुरदारु न० सुरप्रियं सुरलोकपर्य्याप्तमुच्छ्रितं वा दारु । देव-

सुरदीर्घिका स्त्री० सुराणां दीर्घिकेव । गङ्गायाम् । सुरधाद्यादयोऽप्यत्र ।

सुरदुन्दुभी स्त्री० सुराणां दुन्दुभीवाह्लादकत्वात् । तुलस्याम्

सुरद्रुम पु० सुरप्रियो द्रुमः । देवदारुणि, देवतरौ च ।

सुरद्विष् पु० सुरान् द्वेष्टि द्विष-क्विप् । असुरे देवद्वेष्टरि त्रि० ।

सुरधनुस् न० ६त० । इन्द्रधनुषि ।

सुरधूप पु० सुरप्रियो धूपः । राले (धुना) ।

सुरन(ण)दी स्त्री० ६त० वा णत्वम् । गङ्गायाम् सुरधुन्यादयोऽप्यत्र ।

सुरनाल पु० सुरप्रियं नालमस्य । देवनालवृक्षे ।

सुरपति पु० ६त० । इन्द्रे सुरेशादयोऽप्यत्र ।

सुरपथ पु० सुराणां पन्था यत्र अच् समा० । आकाशे ।

सुरपर्ण न० सुरप्रियं पर्णमस्य । सौगन्धिके ओषधिभेदे । [त्यागे ।

सुरपर्णिक पु० स्त्री० । सुरप्रियं पर्णं शाक० तदस्त्यत्र ठक् । सुरपु-

सुरपर्णी स्त्री० सुरप्रियं पर्णं यस्याः ङीष् । पलाशीवृक्षे ।

सुरपादप पु० ६त० । कल्पवृक्षे सुरदारुवृक्षादयोऽप्यत्र ।

सुरपुन्नाग पु० सुरप्रियः पुन्नागः । पुन्नागभेदे ।

सुरपुरी स्त्री० ६त० । अमरावत्यां सुरनगर्य्यादयोऽप्यत्र ।

सुरप्रिय पु० ६त० । अगस्त्यवृक्षे, वृहस्पतौ, इन्द्रे च । जात्यां, स्वर्णकदल्यां च स्त्री० ।

सुरभि न० सु+रभ-इन् । स्वर्णे, सुन्दरे, गन्धाङ्गनि च । चम्पके, जातीफलवृक्षे, वसन्ते ऋतौ, "स सुरभिं सुरभिं सुमनोभरैरिति माघः । सुगन्धे, शमीवृक्षे, कदम्बे, कक्षयुग्गुलौ, गन्धवृक्षे, बकुलवृक्षे, राले, चैत्रे मासि, पण्डिते, गन्धफले च पु० । शल्लक्यां, वृद्धजटायां, मालतीभेदे, गवि, सुरायां, नवमालिकायां, तुलस्यां,

पृथिव्यां, गवां धातरि च स्त्री० वा ङीप्। धीरे, सुलज्जयुक्ते, मनोहरे, विख्याते च त्रि०।

सुरभिका स्त्री० सुरभि+स्वार्थे कन्। (धाणाकडा)। दर्भे।

सुरभित्वच् स्त्री० सुरभिः त्वक् यस्याः। स्थूलैलायाम्।

सुरभिदारु पु० सुरभि दारु यस्य। सरलवृक्षे।

सुरभिपत्रा स्त्री० सुरभि पत्रमस्याः। जम्बुवृक्षे, राजजम्बूवृक्षे च।

सुरभिवल्कल न० सुरभि वल्कलमस्य। गुडत्वचि (दारचिनि)।

सुरभिस्रवा स्त्री० सुरभिः स्रवो निष्यन्दो यस्याः। शल्लक्याम्।

सुरमृत्तिका स्त्री० सुरप्रिया मृत्तिका। तुत्थाञ्जे। (वर्षाकमाटि)।

सुरमेदा स्त्री० सुरप्रियो मेदोऽस्याः। महामेदायाम्।

सुरर्षि पु० सुरप्रियः ऋषिः। नारदादिषु ऋषिषु।

सुरलता स्त्री० सुरप्रिया लता। महाज्योतिष्मत्याम्। [योऽप्यत्र।

सुरलोक पु० सुराणां लोकः वासस्थानादिः। स्वर्गे। सुरभुवनाद्-

सुरवर्त्मन् न० सुराणां वर्त्म यत्र। आकाशे।

सुरवल्लभा स्त्री० ६त०। श्वेतदूर्वायाम्।

सुरवल्ली स्त्री० सुरप्रिया वल्ली। तुलस्याम्। [तयोऽप्यत्र।

सुरवैरिन् स्त्री० ६त०। असुरे सुरविरोधिनि त्रि०। सुररिपुप्रभृ-

सुरस न० सुखेन रस्यते सु+रस अच्। घोले, त्वचे, गन्धरसे, सिन्धु-वारे मोचरसे च। पु० स्वादौ रसे। ६ब०। सुस्वादुरसयुक्ते त्रि० तुलस्यां पु० स्त्री०। राज्ञायां, नागमातरि, सिन्धेयायां, ब्राह्मयां, महाशतावर्य्यां च स्त्री०। [भेदे च।

सुरसुन्दरी स्त्री० सुरप्रिया सुन्दरी। मेनकादाप्सरसे, योगिनी-

सुरा स्त्री० सुर-क सु-रक् वा। मद्ये, चषके च।

सुराकर पु० सुरायाः आकरः। मद्योत्पत्तिस्थाने।

सुराचार्य्य पु० ६त०। इन्द्रमन्त्रौ। [सुन्दरराजान्विते त्रि०।

सुराजक पु० सुष्ठु राजते राज-खुञ्। भद्रराजे। ६ब० कप्।

सुराजन् पु० सुष्ठु पूजितो राजा न टच्। सुन्दरे राजनि। ६ब०।

सुन्दरराजस्वामिके देये त्रि०।

सुराजीविन् पु० सुरां सुराकल्पादनमाजीवति आ+जीव णिनि । शौण्डिके ।
इनि स्मृतिः ।

सुराप त्रि० सुरां पिबति पा-क । मद्यपानकारके 'सुरापः ब्रह्मावदनक'

सुरापत्नी स्त्री० ६त० । गङ्गायाम् । सुरतरङ्गिण्यादयोऽस्याम् ।

सुरापान न० सुरा पीयतेऽनेन पा-करणे ल्युट् । अपदंशे (चाटनी)
सुरायाः पानं येषां यत्रम् । प्राच्यदेशस्थे जने पु० ।

सुराभाग पु० सुराया भागः अंशभागः । सुरामण्डे ।

सुरामण्ड पु० ६त० । सुराया अंशभागे ।

सुरारिहन्तृ पु० सुराणामरिं हन्ति हन-तृच् । विष्णौ ।

सुरार्ह न० सुरान् देवानर्हति अर्ह-अण् । हरिचन्दने ।

सुराष्ट्र पु० ६ब० देशभेदे (सुरट) ।

सुराष्ट्रज न० स्त्री० सुराष्ट्रदेशे जायते जन-ड । तुवरिकायाम् । क्षण-
क्षुद्रे, विषभेदे च पु० । तद्देशजातमात्रे त्रि० ।

सुराङ्क पु० सुरपूर्व्विका आङ्का यस्य सुरान् काङ्क्षयति मन्त्रेण आ+कांक्ष-
क वा । देवदारुवृक्षे, मरुवके, हरिद्रावृक्षे च ।

सुरङ्ग पु० सु+रञ्ज-अच् पृ० । शोभाञ्जनवृक्षे ।

सुरूप न० सुन्दरं रूपमस्य । तूले । सुन्दररूपवति त्रि० पयस्विते पु० ।
शालपर्णयां भार्य्यायाम् च स्त्री० । प्रा० । सुन्दरे रूपे न० ।

सुरूहवा पु० सु+रुह-क्वनिप् पृ० । गर्हाभाण्डे । [स्त्री० ।

सुरेज्य पु० इज्यते पूज्यते यज-क्यप् ६त० । बृहस्पतौ । तुल्यार्थ

सुरेन्द्र पु० सुराणामिन्द्रः श्रेष्ठः राजा वा । इन्द्रे सुरराजे ।

सुरेभ न० सु+रेभ अच् । रङ्गे । (रांग) ।

सुरेवट पु० शोभनो रेवटः सु+रेव-अटन् वा । रामठवृक्षे ।

सुरेश्वर पु० सुराणामीश्वरः । रुद्रे, इन्द्रे च । स्वर्गगङ्गायां, दुर्गा-
याञ्च स्त्री० ङीप् ।

सुरेष्ट पु० ६त० । शाले, सरलवृक्षे, शिवमल्लिकाम् च भाक्षायां स्त्री० ।

सुरोत्तम पु० सुरेषूत्तमः । स्वर्गे, देवश्रेष्ठे त्रि० ।

सुरोत्तर पु० सुरेषु बहुजनेषूत्तरः श्रेष्ठः । चन्दने ।

सुरोद पु० सुरेव उदकमस्य उदादेशः सुरोदसङ्ज्ञौ ।
सुलभ त्रि० सुखेन लभ्यते सु+लभ-खल् । अनायासलभ्ये । जायपत्यौ धूमपत्रायाञ्च स्त्री० ।
सुलोचन पु० सुष्ठु लोचनमस्य । हरिणे । सुन्दरनेत्रयुक्ते त्रि० । [त्रि०
सुलोमशा स्त्री० सुलोमानि सन्त्यस्याः अ । काकजङ्घायाम्ले सुलोमयुक्ते
सुलोमा स्त्री० सुष्ठु लोमान्यस्याः ङीप् । ताम्रवल्ल्याम्, मांसच्छदायाञ्च
सुलोहक न० प्रा० । पित्तले । [स्त्रियां ङीप् तस्य नत्वं ।
सुलोहिता स्त्री० प्रा० । अग्निशिखायाम्ले । सुरक्तवर्णे पु० तद्वति त्रि०
सुवक्त्र पु० सुष्ठु वक्त्रं सेवनात् यस्मात् । वनवर्ष्याम् ६ब० । सुन्दरानन-
युक्ते त्रि० । प्रा० । सुन्दरे मुखे न० ।
सुवचस् त्रि० सुष्ठु वचोऽस्य । वाग्मिनि ।
सुवर्चक पु० सुष्ठु वर्चयति सु+वर्च्-णिच्-एवुल् । सर्जिकाक्षारे ।
सुवर्चला स्त्री० सुष्ठु वर्चयति वर्च-णिच्-कलच् । सूर्य्यभार्य्यायाम्,
अतस्याम्, आदित्यभक्तायां, ब्रह्मचार्याञ्च । देवभेदे पु० ।
सुवर्चिक पु० सुवर्च्+अस्त्यर्थे ठन् । सर्ज्जिकाक्षारे । जतुकायां स्त्री०
सुवर्चिन् पु० सु+वर्च्-णिच् णिनि । सर्ज्जिकाक्षारे ।
सुवर्ण न० सुष्ठु वर्णोऽस्य । स्वनामख्याते धातुभेदे, हरिचन्दने, स्वर्ण-
गैरिके, धने, नागकेसरे । 'कर्षं सुवर्णस्य सुवर्णसंज्ञं' मित्युक्ते
कर्षमिते काञ्चने च यन्त्रभेदे, धुस्तूरे कणगुग्गुलौ च पु० । सुष्ठु
वर्णो रूपमक्षरं वास्य । सुरूपे सुन्दराक्षरयुक्ते च त्रि० । 'न सुव-
र्णमयी लङ्का पुरं ननु वाणपि तावकी तथेति नैषधम् ।
सुवर्णक न० सुवर्णमिव इवार्थे कन् । पित्तले, सुष्ठु वर्णोऽस्य कप् ।
सुन्दरवर्णयुक्ते त्रि० । [(चांपाकला) ।
सुवर्णकदली स्त्री० सुष्ठु वर्णो यस्याः कर्म० । स्वर्णवर्णकदल्याम्
सुवर्णकार पु० सुवर्णं सुवर्णमयभूषणादि करोति कृ अण् । (सेकरा)
स्वर्णकारे जातिभेदे ।
सुवर्णगैरिक सुवर्णमिव पीतं गैरिकम् । (वर्णकमाटि) गैरिकभेदे ।
सुवर्णनलदी स्त्री० सुवर्णनिभा पीता नलदी । महाज्योतिष्मत्याम् ।

सुवर्णप्रसव न० सुवर्णस्य प्रसव इव । इक्षवालुके ।

सुवर्णवणिज् पु० सुवर्णस्य वणिक् क्रयविक्रयादिकर्त्ता । जातिभेदे (सोनारबेने) स्वर्णवणिक्प्रभृतयोऽप्यत्र ।

सुवर्णयूथी स्त्री० सुवर्णस्येव पीता यूथी । पीतवर्णयूथिकायाम् ।

सुवर्णवर्णा स्त्री० सुवर्णस्येव वर्णो यस्याः । हरिद्रायाम् स्वर्णसदृशवर्णयुक्ते त्रि० ।

सुवर्णा स्त्री० सुष्ठु वर्णो यस्याः । कालानुसारिणि, वाच्यलिङ्गे च । स्वर्णे० जीर्णायां, हरिद्रायाम्, आसुकवर्णायां च स्त्री० ङीप् ।

सुवयस् स्त्री० सुष्ठु वयोऽस्याः । प्रौढायां स्त्रियाम् ।

सुवल्लि (ल्ली) स्त्री० प्रा० । सोमराजीलतायाम् ।

सुवहा स्त्री० सुखेन उह्यते वायुनाऽसौ सु+वह-क्त । शेफालिकायां, राज्ञायां, गोधापद्यां, एलापर्ण्यां, शल्लक्यां, वीणायां, लिङ्गतायाम्, रुद्रजटायां, हंसपद्यां, गन्धनाकुल्यां, सुषवल्यां, नीलसिन्धुवारे च । सुखवाह्ये त्रि० ।

सुवास पु० सुष्ठु वासः । सङ्गन्धे सुखनिवासे च । ह्रीव० । सङ्गन्धयुक्ते, सच्चिवासान्विते च त्रि० ।

सुवासिनी स्त्री० सुखेन वसति सु+वस-णिनि । चिरस्थायां चिरं पितृकुलवासिन्याम् स्त्रियाम् ।

सुविद् पु० सुष्ठु वेत्ति विद्-क्विप् । पण्डिते । सुष्ठु विद्यते लभ्यते विद्-लाभे क्विप् । गुणाढ्यायां स्त्रियाम् ।

सुविद् पु० सु+विद-क । कञ्चुकिनि ।

सुविदत् पु० सुविदं गुणाढ्यं स्त्रियमतति व्याप्नोति अत-क्विप् । नटे ।

सुविदल्ल पु० सुविदन्तं राजानं लाति ला-क । अन्तःपुरेक्षताधिकृते, कञ्चुकिनि च । सुविदत्ता राज्ञा क्रीयते ला-क । अन्तःपुररक्षणार्थम् स्त्री० । [त्रि० ।

सुविनीता स्त्री० सु+वि+नी-क्त । सुशीलायां गवि । सुविनययुक्ते

सुबीज पु० सुष्ठु बीज्यतेऽसौ बीज-क । (ऋसरुमे) इक्षुभेदे ह्रीव० । सुन्दरबीजवति त्रि० । प्रा० । सुन्दरे बीजे न० ।

सुवीरक न० सु+वीर-स्वार्थे कन्। सौवीराञ्जने।

सुवीराञ्जन न० सुवीरवति वीर्य्यान्वितं करोति सु+वीर-अच् कर्म०। काञ्जिके।। [उत्तमे वीर्य्ये न०।

सुवीर्य्य न० सुष्ठु वीर्य्यं यस्मात्। वदरीफले। [नक्षत्रार्यायां स्त्री०, प्रा०

सुवृत्त पु० सुष्ठु वृत्तः वर्त्तुलः। भूरुहे (ओल) सुन्दरवृत्तान्विते त्रि० मतपत्त्रायां, नाकुल्यां द्राक्षायञ्च स्त्री०। [शुल्वाम्।

सुवेगा स्त्री० सुष्ठु वेगो वायुनिस्सारणवेगो यस्याः ५त०। मरुाज्जोति

सुवेल पु० सुगता वेला सन्धिरङ्गं येन। त्रिकूटपर्व्वते। सुष्ठु वेला मर्य्यादा स्थितिः यस्य। शान्ते, प्रथते च त्रि०।

सुवेश पु० सुखेन विश्वते उपभुज्यते सु+विश घञ्। श्वेतेच्छौ सुन्दर-वेशयुक्ते त्रि०।

सुव्रती स्त्री० सुष्ठु व्रतं नियमो यस्याः। सुशीलायां गवि सुन्दर-व्रतयुक्ते त्रि०। [सुखव्रति त्रि०।

सुशर्म्मन् पु० ब्रह्म-मनिन् सुष्ठु शर्म्म सुखं यस्य। नृपभेदे सुन्दर-

सुशल्य पु० सुष्ठु दृढं शल्यं यस्मात्। खदिरे।

सुशवी स्त्री० सु+शव-अच् गौरा० ङीष्। कारवेल्ले, कृष्णजीरके च

सुशाक न० सुष्ठु शाको यस्मात् ५ब०। आर्द्रके। तल्लंयोगे हि शा-कस्य सुस्वादुता। सुष्ठु शाको यस्य। चञ्चुशाके, तण्डुलीये, (नटे-शाक) भिक्षायाञ्च पु०।

सुशिख पु० सुन्दरी शिखा यस्य। वह्नौ, चित्रकवृक्षे च। शोभन शिखायुक्ते त्रि०। मयूरशिखायां स्त्री०।

सुशीत न० प्रा०। शीतचन्दने अतिशीतलवर्ष्मणि। तद्वति त्रि०।

सुशीतल न० प्रा०। गन्धद्रव्ये अतिशीतगुणयुक्ते त्रि०।

सुशीला स्त्री० प्रा०। मतपत्त्रायाम्, शीतगुणवत्यां स्त्रियां च।

सुशील पु० सु+शील अच् सुखसारणञ्च। शीतवर्षे। तद्वति त्रि०।

सुशील पु० सुन्दरं-शीलमस्य। विष्णुपार्श्वचरभेदे शोभनचरितान्विते त्रि०

सुशीव स्त्री० सुन्दरो शीरस्य कप्। सञ्जकीवृक्षे। सुन्दरशीवयुक्ते त्रि०

सुश्रुत पु० सु श्रूयते सु+श्रु-क्त। विश्वामित्रतनिपुत्रे चिकित्साशास्त्र-

कर्त्तरि क्तनिर्भेदे, तत्प्रकृतवचने च। सुष्ठ्वरन्तेऽस्मिं०। 'देवाक्षणं वै सुस्तेन चरकक्षोक्ते नेति, नैषधम्।

सुश्लिष्ट त्रि० सु+श्लिष-क्त। दृढसंसृष्टे दृढश्लिष्टे।

सुषम पु० सुन्दरः समः प्रा० षत्वम्। शोभने, समे च परमायां शोभायां स्त्री०। [ब्राह्मणजीरके च।

सुषवी स्त्री० सु+षु-अच् गौ० ङीष्। कारवेल्ले, क्षुद्रकारवेल्ले, जीरके,

सुषामन् त्रि० सुष्ठु साम यस्य बहुव्रीहौ षत्वम्। सुसान्त्वने स्त्रियां वा ङाप् ङीप् च।

सुषि स्त्री० सुष-इन् षृ० षस्य सः। सुषौ छिद्रे।

सुषिर न० सुष किरच् षृ० षस्य सः। छिद्रे।

सुषीम पु० सुष्ठु सीमा यस्य। शीतलस्पर्शे। तद्वति, मनोज्ञे च। त्रि०

सुषुप्त न० सु+स्वप-भावे क्त। 'यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तमिति' श्रुत्युक्ते ज्ञानशून्यावस्थाभेदे। कर्त्तरि क्त। तदवस्थान्विते त्रि०।

सुषुप्ति स्त्री० सु+स्वप-क्तिन्। पुरीतति नाड्यां मनसः संयोगरूपे सर्व्वज्ञानशून्ये वेदान्तोक्ते सर्व्वपदार्थशून्ये च अवस्थाभेदे 'सुषुप्तिकाले सकले प्रलीने' इति स्मृतिः।

सुषुम्ना स्त्री० सुष्ठु स्वत्यर्थं शब्दं म्नायति यत्र म्ना-क। तन्त्रोक्ते मेरुदण्डमध्यस्थे इडापिङ्गलानाड्योर्मध्यस्थे सूक्ष्मे नाडीभेदे।

सुषेण पु० सुष्ठु सेनयति सेनां करोति अण् षत्वम्। करमर्द्दके (करमचा) वेतसे, चिकित्सके वानरभेदे च, त्रिष्टुप्ति स्त्री० ङीप्। कन्। अत इत्त्वम्। ह्रस्वत्रिष्टुप्ति स्त्री०।

सुष्ठु अव्य० सु+स्था-कु। अतिशये, प्रशस्ते, सत्ये च।

सुसंस्कृत त्रि० सु+सम्+कृ-क्त सुम् च। प्रयत्नेन हतादिनाशार्थे यत्ने व्यञ्जनादौ।

सुसम्पद् स्त्री० प्रा०। शोभायां सुष्ठु सम्पद् यस्य। सुसम्पन्ने त्रि०।

सुसार पु० सुष्ठु सारोऽस्य। रक्तखदिरे।

सुसिकता स्त्री० प्रा० । शर्करायाम् । उत्तमवालुकायां क० व० ।
सुस्थ त्रि० सुखेन तिष्ठति स्था-क । आरोग्येण युक्ते सुखिनि च ।
सुस्ता स्त्री० सु+स्त्रै-क । (खेसारी) शमीधान्यभेदे ।
सुस्नात त्रि० सुष्ठु स्नातः सु+स्नै-क्त । मङ्गलद्रव्येण स्नातस्नाने ।
सुस्थित त्रि० सु+धा-क्त । तृप्ते, विधिते च । प्रा० । सुन्दरस्थिते न० ।
५ब० । अग्निजिह्वभेदे स्त्री० । [लग्नात्सप्तमस्थाने च ।
सुहृद् पु० सुष्ठु हृदयं यस्य स्निग्धे हृदादेशः । मित्रे उद्योतिषोक्ते
सुहृदय त्रि० सुष्ठु हृदयं यस्य प्रशस्तमनस्के । प्रा० । सुचित्ते न० ।
सुहृद्दल न० सुहृदेव बलम् । मित्ररूपे सैन्ये ।
सू स्त्री० सू-क्विप् । सूतौ, प्रसवे, क्षेपे प्रेरणे च ।
सूक न० सू-प्रेरणे क्विप् स्वार्थे कन् । उत्पले, बाणे, वाते च ।
सूकर पु० सू-इत्यव्यक्तं शब्दं करोति क-अच् । वराहे, कुत्सिताकारे,
सूगभेदे च । वराहस्त्रान्तायां, वराहयोषिति च स्त्री० ङीप् ।
सूक्त न० सु+वच-क्त । सुन्दरकथने, एकार्थप्रतिपादके एकदैवत्ये वेदम-
न्त्रसमुदाये च । यथा श्रीसूक्तं पुरुषसूक्तमित्यादि । तानि च वेदे
बहूनि सन्ति तत्र महादानोपयोगीनि कतिचित् सूक्तानि तुलादा-
नादिपद्धतौ अस्माभिः लिखितानि । "जपयज्ञानि सूक्तानि तथैव
चैषा"मिति वह्निपुराणम् ।
सूक्ष्म न० सूच-क्सन् । कैतवे, अध्यात्मपदार्थे, अलङ्कारभेदे च । कनक-
वृक्षे पु० । अणुपरिमाणवति अल्पे च त्रि० ।
सूक्ष्मकृष्णफला स्त्री० सूक्ष्मं कृष्णं फलं यस्याः । मध्यमजम्बूवृक्षे ।
सूक्ष्मतण्डुल पु० सूक्ष्मस्तण्डुलोऽस्य । (खसखस) वृतिख्याते, पिप्प-
ल्यां स्त्री० । [ओषधौ ।
सूक्ष्मदर्शिन् त्रि० सूक्ष्मं पश्यतीति दृश-णिनि । अत्यन्तसूक्ष्मबुद्धौ कुशा-
सूक्ष्मपत्र पु० सूक्ष्मं पत्रमस्य । धान्यके, वनजीरके, देवसर्षपे, क्षुद्र-
वदरे, सरपर्णे, वसवर्ब्बर्यां, वायसद्रुचे, लोहितेक्षौ च । मत-
पुष्पायां, मतावर्य्यां, लघुकाक्षायां, दुरालभायां, आकाशमांस्याञ्च
स्त्री० । कप् अत इत्वम् । तत्रैव ।

सूक्ष्मपिप्पली स्त्री० कर्म० । वनपिप्पल्याम् ।
सूक्ष्मपुष्पा स्त्री० सूक्ष्माणि पुष्पाण्यस्याः । यवतिक्तायाम् ।
सूक्ष्मफला स्त्री० सूक्ष्मं फलमस्याः । भूम्यामलक्याम् ।
सूक्ष्मभद्दरी स्त्री० कर्म० । भूमिभद्र्याम् ।
सूक्ष्मभूत न० कर्म० । वेदान्तप्रसिद्धे अपञ्चीकृते भूम्यादीनां पञ्चानां भूतानां सूक्ष्मांशभेदे ।
सूक्ष्ममूला स्त्री० सूक्ष्मं मूलमस्याः । जयन्त्याम् ।
सूक्ष्मवल्ली स्त्री० कर्म० । ताम्रवल्ल्यां, जतुकायाञ्च ।
सूक्ष्मबीज पु० सूक्ष्मं बीजमस्य । (खसखस) ख्याते वृक्षे ।
सूक्ष्मशर्करा स्त्री० कर्म० । वालुकायाम् ।
सूक्ष्मशाख पु० सूक्ष्मा शाखाऽस्य । जालवृक्षे ।
सूक्ष्मशालि पु० कर्म० । अणुधान्ये ग्रामाकादौ ।
सूक्ष्मा स्त्री० सूच–क्तन् टाप् । यूथिकायां, क्षुद्रैलायां, कट्वरायां, वालुकायाञ्च ।
सूक्ष्मैला स्त्री० कर्म० । क्षुद्रैलायाम् (गुजराटी एलाच्) ।
सूच पैशुन्ये (अन्तर्दोहे) अदं०चु०उभ०सक०सेट् । सूचयति ते अचुसूचत् त ।
सूचक त्रि० सूचयति अन्तर्दुष्टं सूच-ण्वुल् । पिशुने अन्तर्दोषवति, बोधके च । काके, कुक्कुरे, विड़ाले, पिशाचे, क्षितिगणे, वृक्षे, नाटकप्रसिद्धे सूत्रधाराख्ये प्रधाननटे, कथके, सूक्ष्मशाली च पु० ।
सूचन न० सूच ल्युट् । क्षिंसने, ज्ञापने च । युच् । तत्र, दर्भे, पीड़ायाम् अभिनये च स्त्री० ।
सूचि(ची) स्त्री० सूच-इन् वा ङीप् । शिखायां, सीवनसाधने खनामख्याते लौहमयपदार्थे च । [(इरजि)।
सूचिक त्रि० सूचिः तया सीवनं शिल्पमस्त्यस्य ठन् । सूच्याजीविनि
सूचिका स्त्री० सूचि+स्वार्थे कन् । सूच्याम् सूचिरिव इवार्थे कन् । कल्लिगुण्डायाम् । [शैव्यत्वात्तथात्वम्।
सूचिकाभरण न० वैद्यकोक्ते औषधभेदे तस्य च सूच्यभिततता

सूचिकामुख पु० सूचिरिव क्रमसूक्ष्मं मुखमस्य । मशके ।
सूचिवेध न० सूच्याकारं वेधम् । लोहादिमयां प्रसिद्धे सूच्याकारके वेधभेदे ।
सूचित त्रि० सूच-क्त । कथिते, बोधिते, क्षिप्ते च । [दयोऽस्य ।
सूचिवक्त्रक पु० सूचिरिव वक्त्रमस्य कन् । सितार्जकभाके सूचीदलार्जके ।
सूचिपुष्प पु० सूच्याकारं पुष्पं पुष्पाग्रं यस्य । केतकवृक्षे सूचीपुष्पादयोऽस्य ।
सूचिग्रालि पु० कर्म० । सूच्यग्रान्ये ग्रामादौ ।
सूचीपत्रा स्त्री० सूचीव पत्रमस्याः । गण्डदूर्व्वायाम् ।
सूचीमुख सूचीव मुखमस्य । सितकुशे । हीरके न० । [भेदे ।
सूच्यग्रशूलक पु० सूच्यग्रमिव स्थूलः स्वार्थे कन् । (उलुखड़) तृणभेदे ।
सूत पु० सू-प्रसवे प्रेरणे ऐश्वर्य्ये वा क्त । सूर्य्ये, क्षत्रियजाते ब्राह्मणीगर्भजे वर्णसङ्करभेदे, त्वष्टरि, सारथौ, वन्दिनि, मागधे, लोमहर्षणाख्ये पुराणवक्तरि च पारदे पु० न० । प्रसूते, प्रेरते च त्रि० ।
सूततनय पु० सूतस्य तनयः । भारतप्रसिद्धे राधेये कर्णे सूतपुत्रादयोऽस्य । तस्य सूतपालितत्वात्तथात्वम् ।
सूति स्त्री० सू-क्तिन् । प्रसवे 'प्रबलैः सूतिमारुतैरिति' सूतिः स्रवते क्षरत्यत्र सोमोऽत्र सू-आधारे क्तिन् । सोमाभिषवभूमौ ।
सूतिका स्त्री० सू-क्त कन् यत इत्वम् । नवप्रसूतायां स्त्रियाम् 'उद्यां सूतिकां विनेति' सूतिः ।
सूतिकागार न० सूतिकाया निवासयोग्यमगारम् । सूतिकागृहे । सूतिकागृहादयोऽस्य ।
सूतिकारोग पु० ६त० । वैद्यकोक्ते रोगभेदे ।
सूतिकाषष्ठी स्त्री० सूतिकागृहपूज्या षष्ठी शाक० । सूतिकागारे—प्रसवावधि षष्ठे दिवसे पूज्यायां षष्ठीदेव्याम् ।
सूत्थान त्रि० सुष्ठु उत्थानम् उद्योगो यस्य । चतुरे, कर्म्मकुशले ।
सूत्या स्त्री० सू-क्यप् णि० । यज्ञाङ्गस्नानभेदे, अभिषवे, सोमरसपाने च

सूत्याशौच न० सूतनिमित्तकमाशौचम्। जननाशौचे 'शावाशौचं न कर्त्तव्यं सूत्याशौचं विधीयते' इति स्मृतिः। [त।

सूत्र पन्थरे वेष्टने च अद० चु०उभ० सं०सेट्। सूत्रयति ते असुसूत्रत्

सूत्र न० सूत्र-अच्। वस्त्रसाधने तन्त्रौ, व्यवस्थायां, नाटकसाधने, प्रस्तावे 'स्वल्पाक्षरमसंदिग्धं सारवत् विश्वतोमुखम्। अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुरि'त्युक्ते शास्त्रभेदे च।

सूत्रकण्ठ पु० सूत्रं कण्ठे यस्य। विप्रे, कपोते, खञ्जरीटे च।

सूत्रधार पु० सूत्रं नाट्यसाधनं धारयति धृ णिच्-अण्। नाट्यसाधनयुक्ते नाटकप्रस्तावके प्रधाननटे, 'सूत्रधारेण संदिष्टाः संलापं यत्र कुर्वते' इति दशरूपकम् इन्द्रे, शिल्पिभेदे (कुतार) च

सूत्रपुष्प पु० सूत्रगर्भं पुष्पं यस्य। कार्पासे।

सूत्रभिद् पु० सूत्रं भिनत्ति सूचया, भिद-क्विप्। सूचप्राजीवे (दरजी)

सूत्रयन्त्र न० सूत्रवापनं यन्त्रम्। (तांत) सूत्रवापनयन्त्रे।

सूत्रला स्त्री० सूत्रं लाति ला-क। तर्कुटाम् (टेको)।

सूद पु० सूदयति क्षीरान् सूद-अच्। सूपकारके, व्यञ्जनभेदे सूपे, सारथ्ये, अपराधे, क्षेपे, पापे च।

सूदन न० सूद-ल्युट्। हिंसने, निःक्षेपे, अङ्गीकारे च।

सूदशाला स्त्री० ६त०। पाकशालायाम्।

सून न० सू-क्त तस्य नः। पुष्पे, प्रसवे च। कर्त्तरि क्त। विकशिते, जाते च त्रि०।

सूना स्त्री० सू क्त तस्य नः। प्राणिवधस्थाने "पञ्च सूना गृहस्थस्ये"ति मनुः तनयायां, गलगुण्डायाम् मांसविक्रये च। [जङ्।

सूनु पु० सू नु। पुत्रे अनुजे, सूर्ये, अर्कवृक्षे च कन्यायां स्त्री० वा

सूनृत न० सुन्दरत्वति अनेन सु+नृत-घञर्थे क। सत्ये-प्रिये-वाक्ये, मङ्गले च तद्वति त्रि०।

सूप पु० सुखेन पीयते सु+पा-घञर्थे क पृ०। (दालि) व्यञ्जनभेदे सुवपति सु+वप-क पृ०। सूपकारे पाचके। आधारे क। भाजने। करणे क। साधके।

सूपकार पु० सूपं करोति ञ-अण् । पाचके ।
सूपधूपन न० सूपो धूप्यतेऽनेन । छिद्रौ, सूपपाके हि छिद्रधूपदानं पाकशास्त्रे प्रसिद्धम् ।
सूपपर्णी स्त्री० सूपस्याधनस्य सूदस्येव पर्णमस्याः ङीप् । सूदपर्ण्याम् ।
सूपश्रेष्ठ पु० सूपेषु तत्साधनेषु श्रेष्ठः । सूदे ।
सूपाङ्ग न० सूपस्य तत्संस्कारकमङ्गमुपकरणम् । छिद्रौ ।
सूर पु० सवति प्रेरयति कर्म्मणि लोकान् सू-क्रन् । सूर्य्ये, अर्कवृक्षे च । सूर-क । पण्डिते ।
सूरण पु० सूर-ल्युट् । शूरणे (ओल) ।
सूरत त्रि० सु+रम-क्त पृ० । दयालौ ।
सूरसूत पु० ६त० । अरुणे, गरुड़ात्मजे ।
सूरि पु० सू-क्रिन् । सूर्य्ये, अर्कवृक्षे, यादवभेदे, पण्डिते च 'सदा पश्यन्ति सूरयः' इति स्मृतिः राजसर्षपे स्त्री० ङीप् ।
सूरिन् पु० सूर-णिनि । पण्डिते । [अणोपदेशत्वान्न वृद्धिः ।
सूर्च्छ(र्च्छ) अनादरे भ्वा० प०सक०सेट् । सूर्च्छ(र्च्छ)ति असूर्छीत् (र्च्छीत्)
सूर्च्छ(र्च्छ)ण न० सूर्च्छ-(र्च्छ) ल्युट् । अनादरे ।
सूर्प पु० न० । शूर्प-पृ० अस्यसः । शूर्पशब्दार्थे । [भगिन्याम् ।
सूर्पणखा स्त्री० शूर्प इव नखा अस्याः पृ० अस्य सः णत्वम् । रावण-
सूर्मि स्त्री० शूर्म्मि+पृ० अस्य सः । शूर्म्मिशब्दार्थे वा ङीप् ।
सूर्य्य पु० सू-क्यप् नि० दीर्घश्च । दिवाकरे, अर्कवृक्षे, दानवभेदे च ।
सूर्य्यकान्त पु० सूर्य्यस्य कान्तः प्रियः । स्फटिकमणौ सूर्य्यसम्पर्कात् यत्राग्निसम्भवस्तत्किम् मणौ च (आतसी) ।
सूर्य्यग्रहण न० सूर्य्यस्य राहुणा तदाक्रान्तभूच्छायया यत्करणमाक्रमणम् । ज्योतिषोक्ते राहुप्रविष्टभूमिच्छायया सूर्य्यमण्डलस्य आक्रमणरूपे योगे ।
सूर्य्यज पु० सूर्य्यात् जायते जन-ड । शनिग्रहे, यमे, वैवस्वते मनौ, सुग्रीववानरे च सूर्य्यपुत्रादयोऽस्यत्र । यमुनायां स्त्री० ।
सूर्य्यभक्त पु० सूर्य्यस्य भक्त इव प्रियः । बब्बूकवृक्षे ।

सूर्य्यमणि पु० सूर्य्यप्रियः मणिः । सूर्य्यकान्तमणौ ।
सूर्य्यलता स्त्री० सूर्य्यभक्ता लता । आदित्यभक्तायाम् ।
सूर्य्यवल्ली स्त्री० सूर्य्यतुल्यपुष्पिका वल्ली । अर्कपुष्पवृक्षे ।
सूर्य्यसारथि पु० ६त० । अरुणे गरुडाग्रजे । सूर्य्यसूतादयोऽप्यत्र
सूर्य्या स्त्री० सूर्य्यस्य भार्या टाप् । अमानुष्यां संज्ञानाम्न्यां सूर्य्य-
भार्यायाम् । मानुष्यां कुन्त्यान्तु ङीप् । सूरीत्येव ।
सूर्य्यालोक पु० ६त० । आतपे रौद्रे ।
सूर्य्यावर्त्त पु० सूर्य्यइवावर्त्तते आ + वृत-घञ् । (झड़झड़िया) क्षुप-
भेदे (सुलफिया) शाके च आदित्यभक्तायां स्त्री० ।
सूर्य्याश्मन् पु० सूर्य्यप्रियः अश्मा । सूर्य्यकान्तमणौ ।
सूर्य्यास्त पु० सूर्य्येण सूर्य्यास्तकालेन अस्तः प्राप्तिः यस्य-क्त सूर्य्यास्त-
समये आगतातिथौ ।
सृकाल पु० सृ-कालन् कस्य नेत्त्वम् । मृगाले ।
सृक्क(न्) न० सृज-कन् कनिन् वा कस्य नेत्त्वम् । ओष्ठप्रान्तभागे 'सृक्क-
णी परिलेढि चेति, श्रुतिः । 'मदास्रक्काय शोभितो नसिंह-
वदिति । श्लेषात् कमध्यताप्यस्य ।
सृक्वन् न० सृज-क्वनिप् । ओष्ठप्रान्तभागे । पु० सृक्विन् अप्यत्र
सृग पु० सृ-गक् गस्य नेत्त्वम् । भिन्दिपालास्त्रे ।
सृगाल पु० सृ गालन् गस्य नेत्त्वम् । जम्बूके, दैत्यभेदे च ।
सृजकाचार पु० सृजति वर्च्चस्त्वं सृज-क ततः स्वार्थे कन् कर्म० ।
सर्ज्जिकाचारे । [त्यपि ।
सृणि पु० सृ-निक् । अङ्कुशास्त्रे स्त्री० तत्र वा ङीप् । सृणी-
सृ(णि)णीका स्त्री० सृणि+कन् ईकन् वा । लालायाम् ।
सृति स्त्री० सृ-भावे क्तिन् । गमने । करणे क्तिन् । पथि ।
सृत्वर त्रि० सृ-करप् । गमनकर्त्तरि स्त्रियां ङीप् स्याच्च मातरि च ।
सृप गतौ भ्वा० पर० सक० अनिट् । सर्पति असृपत् । अयोपदेशत्वाच्च न
सृभ हिंसे भ्वा० पर० सक० सेट् वा वेट् । सर्भति असर्भीत् । पृभृत्येक
धातुः अयोपदेशत्वमस्य चिन्त्यम् ।

सृमर पु० सृ-क्मरच् । मृगभेदे, भ्रमणशीले त्रि० ।

सृष्ट त्रि० सृज-क्त । निर्मिते, सृष्टे, निश्चिते, बद्धले, भूषिते त्यक्ते च

सृष्टि स्त्री० सृज-क्तिन् । निर्माणे, विश्वस्य निर्माणे, स्वभावे, च ।
कर्म्मणि क्तिन् । सृज्यमाने 'या सृष्टिः स्रष्टुराद्येति' शकुन्तला ।

सृष्टिप्रदा स्त्री० सृष्टिं सर्ज्जनं गर्भं प्रदत्ते प्र+दा-क । गर्भदात्रीक्षुपे

सेक पु० सिच-घञ् । सेचने जलादिना आर्द्रीकरणे । [भेदे ।

सेकपात्र न० सिच्यतेऽनेन सिच करणे घञ् कर्म० । (सेच्नी) पात्र-

सेक्तृ पु० सिञ्चति रेतः सिच-तृच् । पत्यौ । सेचके त्रि० । [त्रि० ।

सेचक पु० सिञ्चति तोयेन भूमिवीम् सिच-ण्वुल् । मेघे, सेककर्त्तरि

सेचन न० सिच-भावे ल्युट् । जलादिना आर्द्रीकरणे करणे ल्युट् ।
सेचन्यां, क्षुद्रसेकपात्रयां स्त्री० ङीप् ।

सेटु पु० सिट्-उन् । (तरसुज) वृक्षे ।

सेतु पु० सि तुन् । क्षेत्रादेर्जलधारणार्थे (आल) (आङ्गाल) पदार्थे,
वरणवृक्षे, तन्त्रोक्ते प्रणवात्मके मन्त्रे च स्वार्थे कन् । वरणवृक्षे ।

सेतुबन्ध पु० ६त० । लङ्कागमनार्थं श्रीरामेण नलकपिद्वारा कारिते
समुद्रोपरि आलीबन्धे, क्षेत्रादेरालीबन्धे च ।

सेतुभेदिन् पु० सेतुं भिनत्ति भिद-णिनि । दन्तीवृक्षे ।

सेतुवृक्ष पु० सेतुनामको वृक्षः । वरणवृक्षे सेतुपरिस्थे वृक्षे च ।

सेत्र न० सि-ष्ट्रन् । (बेड़ि) निगडे ।

सेना स्त्री० सि-न, सह एतेन प्रभुणा वा सैन्ये ।

सेनाङ्ग न० ६त० । हस्त्यश्वरथपदातिसंघाते, सेनाया उपकरणे च ।

सेनाचर पु० सेनायां चरति चर-ट । सेनागामिनि 'सेनाचरीभव-
दिभाननेति' नैषधम् । [पत्नी च ।

सेनानी पु० सेनां देवसेनां वा नयति नी-क्विप् । कार्त्तिकेये, सेना-

सेनापति पु० ६त० । कार्त्तिकेये, सैन्याध्यक्षे च ।

सेनामुख न० ६त० । सैन्याग्रे, हस्त्यश्वादिसंख्याविशेषे, 'एकिनः
त्रयः रथाः त्रयः अश्वा नव पदातयः पञ्चैते एतत् सेनामुखं' ।

सेनारक्ष पु० सेनां रक्षति रक्ष अण् । सेनारक्षाकारके यामिके सैन्ये

सैफ पु० सिफ । शेफे पुंसोऽसाधारणचिह्ने ।
सैमन्ती स्त्री० सिम-भि गौ० ङीष् । (सेऊती) पुष्पवृक्षे ।
सैलु पु० सि-लु । क्षौमातकवृक्षे ।
सैवक पु० सीव्यति सिव-ण्वुल् । सीवनकर्त्तरि (दरजी) सेव. ण्वुल् । भृत्ये, दासे, अनुचरे च त्रि० ।
सैवधि पु० सैवं सेवनं दधाति धा-कि । शङ्खप्रभेदौ निधौ ।
सेवन न० सिव-सेव-वा ल्युट् । सूचयादिना वस्त्रादेर्योजने आश्रयणे, उपभोगे, बन्धने, पूजने, भजने च । सीव्यतेऽनया ल्युट् । सूचयां स्त्री० ङीप् ।
सेवा स्त्री० सेव-अ । भजने, आराधने, उपभोगे, आश्रयणे च
सेवित त्रि० सेव-क्त । पूजिते, आराधिते, आश्रिते, उपभुक्ते च ।
सेव्य न० सेव-ण्यत् । वीरणमूले । अश्वत्थे, हिज्जलवृक्षे च पु० सेवार्हे त्रि० । वन्द्यवृक्षे स्त्री० ।
सैंहली स्त्री० सिंहले देशे भवा अण् ङीप् । सिंहलिप्रियायाम् ।
सैंहिक पु० सिंहिकायां भवः ठक् । राहौ, तस्याः अपत्यम् ठक् । सैंहिकेयोऽप्यत्र । [प्रचुरदेशे त्रि० ।
सैकत न० सिकताः सन्त्यत्र । अण् । बालुकाप्रचुरे नद्यादितटे सिकता-
सैकतेष्ट न० सैकतं स्थानमिष्टं यस्य । आर्द्रके ।
सैतवाहिनी स्त्री० सितायाः शर्करायाः अयम् अण् सैतो मधुरस्तं वहति वह-णिनि । वाहुदायां नद्याम् ।
सैद्धान्तिक पु० सिद्धान्तं वेत्ति ठक् । सिद्धान्ताभिज्ञे ।
सैनापत्य न० सेनापतेर्भावः कर्म० वा यञ् । सेनापतिधर्मे, तत्कर्मणि च सैनापत्यमुपेत्य वं कृति कुमारः ।
सैनिक पु० सेनायां समवैति ठक् । सिलिते हस्त्यश्वादौ ।
सैन्धव न० सिन्धुनदीसमीपे देशे भवम् अण् । लवणभेदे सिन्धोरदूरभवः । अण् । घोटके, तस्य सिन्धुदेशसमुद्भवसमीपस्थारण्यदेशोद्भवत्वात् तथात्वम् ।

सैन्धवघन पु० सैन्धवमिव घनः । सैन्धवशिलावत् समन्तादेकरसात्मके चिदानन्दस्वरूपे परमेश्वरे ।

सैन्य पु० सेनायां समवैति अत्र । शिविते कृतप्रहारादौ । सेनानां संघः यञ् । सेनासमुदाये न० ।

सैरिभी स्त्री० सीरं हलं धरति धृ-मूल० क ह्रस्वः च सीरभृत् क्षत्रकस्त्रियां शिल्पकर्म अण् तदस्यास्ति अच् गौ० ङीष् । परवृत्तिस्थे स्ववंशे शिल्पकारिणि स्त्रीभेदे पृ० सैरिभ्रीत्यमरः ।

सैरिभ पु० सीरे हले सहचरे इभदृष्ट शूरः अक० ततः स्वार्थेऽण् । महिषे, 'सैरिभमहिषीमिव महालक्ष्मीमिति' महालक्ष्मीध्यानम् । [स्वार्थे कन् तत्रैव ।

सैरीय पु० सीरस्येदम् अण् सैरं हलाकारमर्हति छण् । भिण्टाम्बे ।

सैरेय स्त्री० सैरं सीराकारमर्हति ढक् । भिण्टाम्बे । ढकञ् । सैरेयकोऽप्यत्र ।

सैवाल न० सेवायै मीनादीनामुपभोगाय अलति पर्य्याप्नोति अच् सेवालः ततः स्वार्थे अण् । शैवाले स्वार्थे कन् । तत्रैव ।

सोढ त्रि० सह-क्त वा ढत्वभावः । क्षान्ते तितिक्षिते । कर्त्तरि क्त । शीतादिसहनशीले त्रि० ।

सोढृ त्रि० सह-तृच् वा ढत्वभावः । सहनकर्त्तरि क्षमाशीले ।

सोत्कण्ठ त्रि० सह उत्कण्ठया । औत्सुक्यान्विते अभीष्टलाभेच्छया विलम्बासहिष्णुत्वयुक्ते ।

सोत्प्रास न० उद्+प्र-अस-घञ् सह उत्प्रासेन । सोल्लुण्ठने, अन्यार्थकस्य वाक्यस्य अन्यार्थकत्वकल्पनया तदुत्तरार्थके, वाक्ये, प्रियवाक्ये च । सपरिहासे पु० ।

सोदय न० त्रि० सह उदयेन प्रादुर्भावेन हृद्या, वा । प्रादुर्भूते, हृद्विवृद्धे, लाभयुक्ते (वृद्धियुक्ते) च । [स्त्री०

सोदर पु० सह समानमुदरं यस्य । एकोदरभवे भ्रातरि भगिन्यां

सोदर्य पु० सह समाने उदरे शयिता यत् स्वादेशः । एकोदरजाते भ्रातरि । भगिन्यां स्त्री० ।

सोमरुह न० षु—विच् सुवे रुहते रुह यजार्थे क । लशुने ।

सोन्माद पु० सह उन्मादेन । उन्मत्ते, उन्मादिन्यौ ।

सोपप्लव पु० सह उपप्लवेन । समाक्रान्तभूच्छायेन राहुणा योगरूपोपप्लव सहिते चन्द्रे तथाभूतचन्द्रच्छायायोगयुक्ते सूर्य्ये च ।

सोपाधि(क) सह उपाधिना वा कप् । कपाधियुक्ते प्रतिलाभागमा-कृतदानादौ ।

सोपान न० उप—अन—भावे घञ् सह विद्यमानः उपानः, उपरि गतिरनेन । आरोहणसाधने काष्ठादिनिर्म्मिते (पैँठा) प्रसृतौ पदार्थे

सोभाञ्जन पु० शोभाञ्जन+पृ० । (सजना) वृक्षे ।

सोम पु० सू—मन् । चन्द्रे, कर्पूरे, कुबेरे, यमे, वायौ, वसुभेदे, जले, सोमलतोषधौ, तक्रे, अमृते, दीधितौ च । सह उमया । शिवे, वानरेशे—सुग्रीवे च ।

सोमगर्भ पु० सोमस्य तदात्मकामृतरूपसोमस्य गर्भःस्थानम् । विष्णौ ।

सोमज न० सोमात् तच्चरितौषधिरसपानात् जायते जन—ड । दुग्धे चन्द्रजाते त्रि० । बुधे पु० ।

सोमतीर्थ न० सोमेन तपसात्मा कृतं तीर्थम् । प्रभासतीर्थे ।

सोमप पु० सोमं तद्रसं पिबति पा—क । यज्ञे—सोमरसपानकर्त्तरि पि गणभेदे ब० व० । पा—किप् सोमपा अध्वर्य्यु ।

सोमपद्म पु० सोमस्य ओषधिविशेषस्येव पद्मस्य (उलुखड़) इवाभेदे ।

सोमपीति(थि) न् पु० पीतमनेन इनि सोमं पीतो भू० वा तस्य थः । यज्ञे—सोमरसपायिनि । पा-क्तिनि । सोमपीथाय्यत्र ।

सोमबन्धु पु० सोमस्य बन्धुः, सोमो बन्धुरस्य वा । सूर्य्ये तद्दृष्टि-करत्वात् तस्य तथात्वम् चन्द्रजे बुधे पु० कुमुदे न० ।

सोमभू पु० सोम एव भूरुत्पत्तिस्थानं यस्य । बुधग्रहे, चन्द्रवंश्ये क्षत्रिये च ।

सोमयाग पु० सो० याग । त्रिवर्षसाध्ये सोमरसपानाङ्के यागभेदे

सोमयाजिन् पु० सोमेन यजते यज-णिनि । सोमयागकर्त्तरि ।

सोमयोनि न० सोमः योनिरस्य । चन्दनभेदे ।

सोमराजी स्त्री० सोमेन राजते राज-अच् गौ० ङीष्। (सोमराज) ओषधिभेदे। स्वार्थे कन्। सोमराजिकाप्यत्र। राज-णिनि। सोमराजील्लप्यत्र पु०।

सोमलता स्त्री० सु-अन् कर्म०। खनामख्यातायां लतायाम्।

सोमलतिका स्त्री० सोमलतेव इवार्थे कन् अत इत्त्वम्। गुडूच्याम्।

सोमवंश पु० सोमस्य वंशः। चन्द्रवंशे चन्द्रोद्भविके सोमपरम्परायाते क्षत्रिये च। [कट्फले च।

सोमवल्क पु० सोमस्येव वल्कमस्य। करञ्जे, रीठाकरञ्जे, श्वेतखदिरे,

सोमवल्लिका स्त्री० सोमवल्लीव इवार्थे कन्। सोमराज्याम् स्वार्थे कन्। सोमलतायाम्।

सोमवल्ली स्त्री० सोमायालताय वल्ली। गुडूच्याम्। सोमरूपा वल्ली। सोमलतायाम् सोमराज्यां, ब्राह्म्यां, सुदर्शनायाञ्च।

सोमवार पु० सोमस्वामिको वारः। चन्द्रस्वामिके दिने।

सोमविक्रयिन् पु० सोमं विक्रीणाति वि+क्री-णिनि। सोमलतायाः तद्रसस्य वा विक्रेतरि।

सोमवृक्ष पु० सोम इव वृक्षः। कट्फलवृक्षे, श्वेतखदिरे च।

सोमसार पु० सोम इव शुभ्रः सारोऽस्य। श्वेतखदिरे।

सोमसिद्धान्त पु सोमेन प्रोक्तः सिद्धान्तः। चन्द्रप्रोक्ते ज्योतिषग्रन्थभेदे।

सोमसुत् पु० सोमं सुतवान् सु-भूते क्विप्। यज्ञार्थं कृत सोमलता-निष्पीडने।

सोमसुत्वन् पु० सोमं सुतवान् भूते क्वनिप्। कृतसोमरसपाने।

सोमसुता स्त्री० हृत०। नर्म्मदानद्याम्। बुधे पु०। सोमोद्भवादयोऽप्यत्र पु० स्त्री० यथायथम्

सोमसूत्र न० सोमस्य जलस्य सूत्रमिव प्रणाली। जलनिर्गमप्रणाल्याम्, शिवलिङ्गस्थजलौरोपदृष्ट जलनिर्गमस्थाने च। 'सोमसूत्रं न लङ्घयेदिति' तन्त्रम्।

सोल्लुण्ठ त्रि० सह उल्लुण्ठेन। भूमौ पार्श्वपरिवर्त्तादियुक्ते अन्धादौ अन्यार्थवाक्यस्य अन्धपरत्वयुक्ते वाक्ये च।

सौम्यग्रहण न० षष्ठ्यन्तेन। अन्यव्यावर्त्तकस्य अन्यस्यैव परिकीर्त्तनसहिते वाक्ये (स्तुतिपरस्य निन्दापरता निन्दापरस्य च स्तुतिपरता इत्येवंरूपे वाक्ये)।

सौकर्य्य न० सुकरस्य भावः ष्यञ्। अनायासलभ्यत्वे।

सौखसुप्तिक त्रि० सुखसुप्तिं सुखेन शयनं प्रच्छति ठञ्। प्रातःकाले सुखशयनप्रच्छके वैतालिकादौ।

सौख्य न० सुखमेव स्वार्थे ष्यञ्। सुखे।

सौगत पु० सुगत एव अण्। सुगते बुद्धभेदे तस्येदमण्। सुगतसम्बन्धिनि त्रि०।

सौगन्ध न० सुष्ठु गन्धोऽस्य स्वार्थे अण्। कचूरे रामकर्पूरे।

सौगन्धिक न० सुष्ठु गन्धः सुगन्धः तस्येदम् ठण्। कह्लारे।

सौगन्ध्य न० सुगन्धस्य भावः ष्यञ्। सुगन्धे। स्वार्थे ष्यण्। सुगन्धौ।

सौचिक पु० सूचीं तत्कर्म्म जीवनमुपजीवति ठन्। (दरजी) जीवनकारके।

सौजन्य न० सुजनस्य भावः ष्यञ्। सुजनतायां सद्व्यवहारे च 'सौजन्यजन्यं यश' इत्युद्भटः।

सौण्डी स्त्री० शुण्डाकारोऽस्त्यस्याः अण् ङीप् पृ० यस्य वः। गजपिप्पल्याम्।

सौत्र पु० पाणिन्यादिभिः सूत्रेण कर्म्मविशेषाय पठितः अण्। भ्वादिदशगणीयभिन्नेषु सूत्रेण कर्म्मपठितेषु धातुषु।

सौदामनी स्त्री० सूदामा इन्द्रो देवताऽस्य अण् सपूर्वत्वात् न टिलोपः यत्वम्। दृष्टिभेदे तत्र हि सुरापानं विप्राणामपि विहितम् 'सौदामन्यां सुरां पिबेदिति' श्रुतिः।

सौदामनी स्त्री० सुदामा पर्व्वतभेदस्तत्रैका दिक् ततप्रान्तभवत्वात् अण्। विद्युति। सा हि स्फटिकमयस्य सुदाम्नः पर्व्वतस्यैकदेशे जाता। अप्सरोभेदे च। सुदामा ऐरावतगजस्तस्य पत्नी ङीप्। ऐरावतस्त्रीयोनिति। तत्र ङीपि अतोऽलोपे। सौदामनीत्यपि।

सौदायिक न० सुदायात् बन्धुकुलात् आगतः ठण्। "जदया कन्यया वापि पत्युः पितृष्टहेऽथ वा। भर्तुः सकाशात् पित्रोर्वा लब्धं सौदायिकं स्मृतमिति" स्मृत्युक्ते स्त्रीधनभेदे "सौदायिकं धनं प्राप्य स्वातन्त्र्यं परिकीर्त्तितमिति" स्मृतिः।

सौदास पु० चन्द्रवंश्ये कल्माषपादे नृपतौ।

सौध पु० न० सुधया लेपनद्रव्येण रक्तम् अण्। राजसदनभेदे सुधावर्णमर्हति अण्। रूप्ये न०। सुधासम्बन्धिनि त्रि०।

सौनिक पु० सूना बध्यस्थानं तदुपलक्षितमांसादि पण्यमस्य ठण्। मांसक्रयविक्रयोपजीविनि व्याधे (कसाइ)।

सौन्दर्य्य न० सुन्दरस्य भावः ष्यञ्। चारुतायां, "अङ्गप्रत्यङ्गकानां यः सन्निवेशो यथोचितम्। सुश्लिष्टः सन्धिबन्धः स्यात् तत् सौन्दर्य्यं सदाहृतमि"त्युक्ते अङ्गादीनां मनोहरत्वे।

सौपर्ण न० सुष्ठु पर्णानि तद्रूपमर्हति अण्। मरकतमणौ।

सौपर्णेय पु० सुपर्णी विनतायाः अपत्यम् ढक्। गरुड़े।

सौप्तिक त्रि० सुप्तिकाले रात्रौ भवम् ठञ्। रात्रियुद्धे सुप्तानभिहत्य कृतो ग्रन्थः ठञ्। महाभारतपर्व्वभेदे।

सौभ न० सुष्ठु सर्व्वत्र लोके भाति भा-क स्वार्थे अण्। कामचारिणि, पुरे, हरिश्चन्द्रनृपपुरे च।

सौभद्र पु० सुभद्रायां भवः अण्। सुभद्रापुत्रे अभिमन्यौ।

सौभद्रेय पु० सुभद्रायाः अपत्यम् ढक्। सुभद्रासुते अभिमन्यौ।

सौभरि पु० मुनिविशेषे।

सौभागिनेय पु० सुभगायाः अपत्यम् ढक् इनादेशः द्विपदवृद्धिः। सुभगापुत्रे। तत्कन्यायां स्त्री० ङीप्।

सौभाग्य न० सुभगस्य भावः ष्यञ् द्विपदवृद्धिः। प्रियत्वे स्वार्थे ष्यञ्। सिन्दूरे, टङ्कणे च। विष्कम्भादिषु मध्ये चतुर्थे योगे पु०। [लिङ्गे।

सौभिक पु० सौभं कामचारिपुरं तच्चिह्नमस्य ठण्। ऐन्द्रजा-

सौमनस्य न० सुमनसो भावः ष्यञ्। प्रसन्नचित्तत्वे।

सौमनस्यायनी स्त्री० सौमनस्यमयतेऽनया अय-ल्युट् ङीप् ह्रस्व० । मालत्याम्, तत्कलिकायाञ्च ।

सौमित्र(त्रि०) पु० सुमित्रायां भवः अण्, वाह्वादि० इञ् वा । लक्ष्मणे'

सौम्य त्रि०सोमो देवताऽस्य अण् । सोमदेवताके ङित्त्वात् स्त्रियां ङीप् । सोम इव शान्तादित्वात् य स्वार्थे अण् । मनोहरे प्रियदर्शने अनुग्रे च त्रि० बुधे पु० । ततः स्वार्थिकप्रत्ययाभावे सोम्योप्युभयत्र । 'सदैव सोम्येदमग्र आसी'दिति श्रुतिः ज्योतिषोक्ते शुभग्रहे दृष्टादिसमराशौ, उडुम्बरवृक्षे, सोमपायिनि-विप्रे पु० ।

सौम्यकृच्छ्र पु० कर्म० सोमदेवताके कृच्छ्रसाध्ये व्रतभेदे । शतपत्यां ।

सौम्यगन्धी स्त्री० सौम्यः अनुग्रः गन्धो यस्याः गौ० ङीप् ।

सौम्यग्रह पु० कर्म० ज्योतिषोक्ते चन्द्रबुधगुरुशुक्ररूपे शुभग्रहे ।

सौर पु० सूरस्य इदम् सूरो देवताऽस्य अण् वा । सूर्य्यपुत्रे शनैश्चरे यमे च । सूर्य्यदेवताके त्रि० स्त्रियां ङीप् । सूरेण निर्वृत्तः अण् । एकैकराशौ तद्भोगेषु सूर्य्यगतिसाध्ये दिनमासादौ त्रि० । 'विवाहादौ स्मृतः सौरः' इति स्मृतिः उडुम्बरवृक्षे पु० ।

सौरज पु० सूरस्येदं सौर आलोकस्ततो जायते जन-ड । तुम्बुरुवृक्षे ।

सौरभ न० सुरभेर्भावः अण् । सुरभिगन्धे, सौरभमस्यास्ति अच् । सुरभिरस्यास्ति अण् वा । कुङ्कुमे, बोले च न० ।

सौरभेय पु० सुरभेरपत्यम् ढक् । गवि स्त्रियां ङीप् । 'सौरभेयीभ्य एव चेति' गोदानमन्त्रः तस्य इदम् ढक् । सुरभिसम्बन्धिनि त्रि० ।

सौराष्ट्र पु० शुभ्रु राष्ट्रमस्यास्ति प्रज्ञा० अण् । (सुरट) देशभेदे । सुराष्ट्रे भवः अण् । सुराष्ट्रदेशभवे त्रि० । विषभेदे न० ।

सौराष्ट्रिक न० सुराष्ट्रदेशे भवः ठक् । विषभेदे । [तिषम् ।

सौरि पु० सूरस्यापत्यम् इञ् । शनैश्चरे, 'सौरिवारेऽस्तमानीति' ज्यो०

सौरिरत्न न० सौरिप्रियं रत्नम् शाक० । नीलके मणौ ।

सौरेय पु० सुरायै हितम् ढक् । शुक्लभिण्टाम् स्वार्थे कन् तत्रैव ।

सौल्विक त्रि० शुल्वं ताम्रपात्रादिनिर्म्माणं शिल्पमस्य ठक् । ताम्रमयपात्रनिर्म्माणकर्त्तरि (काँसारि) ।

सौक त्रि० स्वस्येदम् अण् न वृद्धि वातृपूर्व्वं औत् । आत्मसंबन्धिनि ।

सौकर्य्यामिक त्रि० स्वर्य्यामे भवः ठक् न वृद्धिः वातृपूर्व्वे औत् । स्वर्य्यामभवे पदार्थे ।

सौवर्चल न० सुवर्चलदेशे भवम् कण् । लवणभेदे ।

सौवर्णभेदिनी स्त्री० सुवर्णस्य विकारः अण् सौवर्णमिव भिनत्ति प्रकाशते भिद-णिनि । प्रियङ्गौ । [क्षिते ।

सौवस्तिक पु० स्वस्तिकरणे कुशलः ठक् न वृद्धिः वातृपूर्वऔत् । पुरो-

सौविद पु० सुविदन्ति सु+विद-क स्वार्थेऽण् । अन्तःपुररक्षके ।

सौविदल्ल पु० सुष्ठु विदल्लं विद्वांसमपि लाति ला-क स्वार्थेऽण् । अन्तःपुररक्षके ।

सौवीर पु० सुष्ठु वीरो यत्र सुवीरो देशभेदः तत्र भवः अण् । स्रोतोऽञ्जने । काञ्जिके यदरे च न० स्वार्थे कन् । काञ्जिकभेदे न० । यदरवृक्षे पु० ।

सौवीरसार पु० न० कर्म्म० । स्रोतोऽञ्जने ।

सौवीराञ्जन न० सौवीराख्यमञ्जनम् । अञ्जनभेदे 'सौवीरन्तु यवैरामैः पक्वैर्वा निस्तुषैः कृतम् । गोधूमैरपि सौवीरमि'त्यादुक्तो अञ्जनभेदे ।

सौष्ठव न० सुष्ठु भद्रं तस्य भावः अण् टिलोपः । आतिशय्ये 'च सौष्ठवौदार्य्यविशेषप्रालिनीमि'ति भारविः ।

सौहार्द न० सुहृदो भावः अण् । स्नेहे, मित्रत्वे च ।

सौहित्य न० सुहितस्य तृप्तस्य भावः ष्यञ् । तृप्तौ, 'नातिसौहित्यमाचरेदिति' स्मृतिः ।

सौहृद न० सुहृदो भावः अण् । मित्रत्वे बन्धुतायाम् ।

स्कद उत्सृज्य गतौ, अक० उद्भूतौ, आप्लावे च सक० भ्वा० आ० सेट् इदित् । स्कन्दते अस्कन्दिष्ट । ।

स्कन्द समाहारे अद० चु०उ०सक०सेट् । स्कन्दयति ते अचस्कन्दत् त ।

स्कन्द गतौ शोषणे च भ्वा० पर० सक० अनिट् । स्कन्दति अस्कन्दत् अस्कान्त्सीत् ।

स्कन्द पु० स्कन्दते उत्सृज्य गच्छति अच् । कार्त्तिकेये ।

स्कन्दन न० स्कन्द् ल्युट्। रेचने, क्षरणे, गतौ शोषणे च।

स्कन्दांशुक पु० स्कन्दस्यांशव एवांशवो यस्य कप्। पारदे। तयोः शिववीर्य्यजत्वादेकांशत्वम्।

स्कन्ध पु० स्कद्यते आरुह्यतेऽनेनेति घञ् पृ०। अंसे (कांध) वृक्षस्य काण्डे (गुडि) नृपे, व्यूहे, युद्धे, समूहे, काये, भट्टादौ, छन्दोभेदे, सौगतसिद्धेषु विज्ञानादिषु पञ्चसु 'छन्नाङ्गस्कन्धपञ्चकमि'ति माधवः। पथि, ग्रन्थपरिच्छेदे च। 'स्कन्धैर्द्वादशभिर्युक्तमि'ति भागवतविशेषणम्।

स्कन्धतरु पु० स्कन्धप्रधानस्तरुः। नारिकेलवृक्षे।

स्कन्धफल पु० स्कन्धे फलमस्य। नारिकेलवृक्षे, उडुम्बरवृक्षे च।

स्कन्धबन्धना स्त्री० स्कन्धे बन्धनमस्याः। मधुरिकायाम्।

स्कन्धरुह पु० स्कन्धात् रोहति रुह क। वटवृक्षे।

स्कन्धवाह पु० स्कन्धेन वाहयति वह णिच् अच्। शकटादि द्वारा स्कन्धवाहके वृषादौ। स्कन्धु। तत्रैव। [याम्।

स्कन्धशाखा स्त्री० स्कन्धात् प्रभवति शाखा। वृक्षस्य प्रधानशाखा-

स्कन्धशृङ्ग पु० स्कन्धपर्य्यन्तं शृङ्गमस्य। महिषे।

स्कन्धावार पु० स्कन्धार्थमावारः आ + वृ-घञ्। युद्धार्थमुद्युक्तसैन्यानां स्थापने, तदाधारे-कटके च। [वे-ना क्षरणे न०।

स्कन्न त्रि० स्कन्द्-क्त। च्युते, गलिते, क्षरिते, शुष्के, गते च। भा-

स्कन्भ प्रतिघाते क्रया० स्वा० उ० सक० सेट्। स्कम्नाति स्कम्नीते स्कम्नोति स्कम्नुते। अस्कम्नीत् अस्कम्निष्ट।

स्कभ स्तम्भे भ्वा० आ० सक० सेट् वेदित्। स्कम्भते अस्कम्भिष्ट।

स्कु उद्धृतौ आप्लावने च क्रया० स्वा० उ० सक० अनिट्। स्कुनाति स्कुनीते स्कुनोति स्कुनुते। अस्कौषीत् अस्कोष्ट। [लिष्ट।

स्कुट आप्लावने उद्धृतौ च भ्वा० आ० सक० सेट् वेदित्। स्कुण्टते अस्कुण्टिष्ट।

स्कुन्भ रोधने स्वा० क्रया० स्वा० जार्य्यभागी प० सक० सेट्। स्कुम्नाति स्कुम्नीति। अस्कुम्नीत्। [दयति।

स्खद विदारे दि० आ० सक० सेट्। स्खद्यते अस्खदिष्ट वदादि० स्व-

स्खल् चले भ्वा० प० सक० सेट् वा घटा० । स्खलति अस्खालीत् स्खलयति स्खालयति ।

स्खलन न० स्खल-भावे ल्युट् । चलने पतने ।

स्खलित न० स्खल—भावे क्त । भूरिप्रयुक्तादौ-प्रहत्या वीरमर्य्यादातः पतने स्खलनमात्रे च । कर्त्तरि क्त । चलिते त्रि० ।

स्तन मेघशब्दे अद० च० उभ० सक० सेट् । स्तनयति ते अतस्तनत् त ।

स्तन पु० स्तन-अच् । (माइ) स्त्रीणाम् अङ्गभेदे ।

स्तनन न० स्तन-ल्युट् । ध्वनिमात्रे, मेघशब्दे, कुक्कुरशब्दे च ।

स्तनन्धय पु० स्त्री० स्तनं धयति धे-खश् हुम् च । अतिशिशौ स्त्रियां ङीप् । [टाप् ।

स्तनप पु० स्त्री० स्तनं पिबति पा क । अतिशिशौ बालके । स्त्रियां [रोगे च ।

स्तनभर पु० ६त० । स्थूलस्तनभारे तदाभोगे च ।

स्तनयित्नु पु० स्तन—इत्नु । मेघे, सुमेरौ, मेघशब्दे, विद्युति, सत्यौ,

स्तनवृन्त पु० स्तनस्य वृन्त इवास्यत् । स्तनाग्रे स्तनशिखरयोश्चक्षत ।

स्तनान्तर न० स्तनयोरन्तरम् । हृदये, स्तनमध्ये च ।

स्तनाभोग पु० ६त० । स्तनस्य परिणतायाम् ।

स्तनित न० स्तन—भावे क्त । मेघशब्दे, सुरतादिशब्दे च । कर्त्तरि क्त । शब्दिते त्रि० । [अस्तभत् अस्तम्भीत् ।

स्तभ रोधने क्र्या० स्ना०प०सक०सेट् क्ना वेट् । स्तभ्नाति स्तम्भीति

स्तभ्य न० स्तभे भवम् यत् । स्तनजाते दुग्धे ।

स्तभ्यरोमन् पु० स्तभ्यानि रोमाणि यस्य । शूकरे ।

स्तभ स्तम्भने जडीभावे अक० तत्करणे, क्रियानिरोधे च सक० भ्वा० क्या० सेट् इदित् । स्तम्भते अस्तम्भिष्ट । [रणादौ, शुष्के च ।

स्तम्ब पु० स्था स्तम्बच् किच्च पृ० । कागुरहिते भिण्टिकादौ वृक्षे,

स्तम्बकरि पु० स्तम्बं गुच्छं करोति क इन् । व्रीहिधान्ये । [वादौ ।

स्तम्बघ्न पु० स्तम्बो हन्यतेऽनेन हन—क नि० । स्तम्बोन्मूलके खनि-

स्तम्बघ्न त्रि० स्तम्बो हन्यतेऽनेन हन-घञर्थे क । स्तम्बोन्मूलके खनि-

स्तम्बेरम पु० स्तम्बे इत्यादीनां कायते गुच्छे गुल्मे वा रमते अच्

स्तम्भ पु० स्तम्भ-अच् । (थाम) स्थूणायाम् । भावे घञ् । जडीभावे पु०

स्तम्भन न० स्तम्भ-जडीकरणे भावे ल्युट् । जडीकरणे । करणे ल्युट् ।
तन्त्रोक्ते जडीकरणसाधने प्रयोगभेदे । [मध्ये बाणभेदे ।

स्तम्भन पु० स्तम्भयति स्तम्भ—णिच् ल्यु । कन्दर्पस्य पञ्चसु बाणेषु

स्तव पु० स्तु अप् । प्रशंसायाम्, स्तुतौ च ।

स्तावक पु० स्तु-ण्वुल्, स्था-अवक पृ० वा । गुच्छे ।

स्तावक त्रि० स्तु-ण्वुल् । स्तुतिकारके ।

स्तिमित न० स्तिम भावे क्त । आर्द्रतायाम्, अचाञ्चल्ये च । कर्त्तरि क्त । अचञ्चले, आर्द्रे च त्रि० ।

स्तुत पु० स्तु-क्त । कृतस्तवे ।

स्तुति स्त्री० स्तु-क्तिन् । स्तवे ।

स्तुतिपाठक पु० स्तुतिं पठति पठ ण्वुल् । राजादेर्बन्दिनि ।

स्तुभ रोधने सौ० क्र्या० स्वा० आर्द्धधा० उभ० सक० सेट् ह्लादेट् ।
स्तुभ्नोति स्तुभ्नाति । अस्तुभीत् । [क्ले, निरुद्योजने च ।

स्तूप पु० स्तू पक् स्तूप—अच् वा । राशीकृते वृत्तिकादौ । संघाते,

स्तृभ पु० स्तृभ मूल० क । स्तम्भे । [अस्तृत अस्तरिष्ट ।

स्तृ विस्तारे स्वा० उ० सक० अनिट् । स्तृणोति स्तृणुते अस्तारीत्

स्तृ प्रीतौ अक० रक्षणे सक० स्वा० प० अनिट् । स्तृणोति अस्तार्षीत् ।
अप्रोपदेशत्वाच्च षः । [त्वाच्च षः ।

स्तृच गतौ स्वा० पर० सक० सेट् स्तृचति अस्तृचीत् । अप्रोपदेश-

स्तृह वधे तु० प० सक० वेट् । स्तृहति अतर्हीत् अस्तृचत् ।
अप्रोपदेशत्वाच्च षः ।

स्तृ आच्छादने क्र्या० स्वा० उ० सक० सेट स्तृणाति स्तृणीते
अस्तारीत् अस्तरिष्ट अस्तरीष्ट अस्तीर्त्त । [क्तोनत्—ता ।

स्तेन मद्यौर्ये कर० चु० उभ० सक० सेट् । स्तेनयति-ते अ त्रि-

स्तेन पु० स्तेन–घञ् । चौर्य्ये । अच् । चोरे त्रि० ।

स्तेप क्षेपे चु० उभ० सक० सेट् । स्तेपयति–ते अतिस्तिपत्–त । अयोपदेशत्वान्न षः ।

स्तेम पु० स्तिम–घञ् । आर्द्रीभावे, स्नेहे च ।

स्तेय न० स्तेनस्य भावः यत् नि० । चौर्य्ये "प्रत्यक्षं वा परोक्षं वा रात्रौ वा यदि वा दिवा । यत् परद्रव्यहरणं स्तेयं तत्परिकीर्त्तितं" मिताक्षरे परद्रव्यापहारे ।

स्तेयिन् त्रि० स्तेयमस्त्यस्य इनि । परद्रव्यापहारके । स्त्रियां–ङीप् ।

स्तैन(न्य) न० स्तेनस्य भावः ष्यञ्, ष्ट्रञ् वा । चौर्य्ये परद्रव्यापहरणे । स्तेन एव स्वार्थे ष्यञ् । चोरे त्रि० ।

स्तैमित्य न० स्तिमितस्य भावः ष्यञ् । जाड्ये, स्नेहे, आर्द्रीभावे च ।

स्तोक पु० स्तुच–घञ् । घातके, जलबिन्दौ च । अल्पे त्रि० ।

स्तोककक पु० स्तोकाय जलाय कायति शब्दायते कै–क । चातके ।

स्तोत्र न० स्तु–ष्ट्रन् । स्तवे–गुणकर्म्मादिभिः प्रशंसने ।

स्तोभ पु० स्तुभ–घञ् । अर्थशून्ये गानादिस्वरपूरणार्थे शब्दभेदे, यथा साम्नि हुडा, होद, प्रस्तुतयः । हेलने, स्तम्भने च ।

स्तोम आत्मगुणाविष्करणे अद० चु० उभ० सक० सेट् । स्तोमयति–ते अतुस्तोमत्–त ।

स्तोम पु० स्तोम–घञ् स्तु–मन् वा । समूहे, यज्ञे, स्तवे, च, मस्तके, धने, शस्ये, लौहदण्डे च न० । वक्रे त्रि० ।

स्त्यान न० स्त्यै–भावे क्त तस्य नः । स्नेहे, घनत्वे, संहतौ, आलस्ये, प्रतिशब्दे च । कर्त्तरि क्त । संहतिकारके, ध्वनिकारके च त्रि० ।

स्त्यै संहतौ ध्वनौ भ्वा० अक० अनिट् । स्त्यायति अस्त्यासीत् । अयोपदेशत्वान्न षः ।

स्त्री स्त्री० स्तु–ड्रट् । योषिति नार्य्याम् ।

स्त्रीगवी स्त्री० स्त्री चासौ गौश्च कर्म्म० । (गामि) रोहिणीम् ।

स्त्रीचित्तहारिन् पु० स्त्रियाश्चित्तं हरति हृ–णिनि । शोभाञ्जने । स्त्रीमनोहारके त्रि० ।

स्त्रीचिह्न न० स्त्रिया असाधारणं चिह्नम् । योनौ ।

स्त्रीचोर पु० स्त्रियाः चोर इव । कामुके ।

स्त्रीजित पु० स्त्रिया जितः जि—क्त । स्त्रीवश्ये ।

स्त्रीधन न० हृत० । स्त्रीस्वत्वाश्रये द्रव्यजाते इति मिताक्षरादयः । "अध्यग्न्यध्यावाहनिकं भर्तृदायं तथैव च । भ्रातृदत्तं पितृप्राप्तं षड्विधं स्त्रीधनं स्मृतं" मित्येवं परिगणिते स्त्रीस्वत्वाश्रये धने इति दायभागादयः ।

स्त्रीधर्म्म पु० हृत० । पत्नौ नारीकृत्यसम्बन्धिकार्य्ये रजसि ।

स्त्रीधर्म्मिणी स्त्री० स्त्रीधर्मोऽस्त्यस्या इनि । ऋतुमत्यां स्त्रियाम् ।

स्त्रीपुंधर्म्म पु० स्त्रियाः पुंसश्च धर्मः तमधिकृत्य व्यवहारो वा । स्त्रीपुंसयोः यथाशास्त्राचारक्रमे धर्मे तद्विषयके अष्टादशसु विवादेषु मध्ये विवादभेदे "स्त्रीपुंधर्मोविभागश्चेति" स्मृतिः । [यथोः ।

स्त्रीपुंस पु० द्विव० स्त्री च पुमांश्च अच् समा० । मिलितयोः स्त्रीपुरुषयोः

स्त्रीपुंसलक्षणा स्त्री० स्त्रीपुंसयोर्लक्षणमस्याम् । स्तनप्रसुप्तभृतिस्त्रीपुरुषचिह्नधारिण्यां स्त्रियाम् ।

स्त्रीप्रिय पु० हृत० । आम्रवृक्षे । नारीप्रियमात्रे त्रि० ।

स्त्रीलिङ्ग पु० स्त्रिया इव लिङ्गं तत्कार्य्यं यस्य । स्त्रीलिङ्गविहितव्याकरणोक्तसंस्कारयुक्ते शब्दभेदे । हृत० स्त्रीचिह्ने न० ।

स्त्रीवश पु० हृत० । स्त्रीवशीभूते ।

स्त्रीविधेय पु० हृत० । स्त्रीवशीभूते । [भेदे ।

स्त्रीसंग्रहण न० स्त्रियाः संग्रहणं यत्र । परस्त्रीहरणरूपेविवाद-

स्त्रीसभ न० स्त्रीणां सभा स्त्रीत्वम् । स्त्रीसमाजे ।

स्त्रीसेवा स्त्री० हृत० । स्त्रीसम्भोगे, व्यवायधर्म्मेण नारीसेवने ।

स्त्रीस्वभाव पु० स्त्रिया इव स्वभावो यस्य । अन्तःपुररक्षके नपुंसके हृत० । स्त्रीणां शीले ।

स्त्रैण न० स्त्रिया इदम् अण् नञ् । स्त्रीस्वभावे, "स्त्रैणेन नीता विलयं कपिञ्जले"ति भट्टिः । स्त्रीविधेये, स्त्रीसम्बन्धिनि च त्रि० ।

स्थ त्रि० स्था–क । स्थितिशीले प्रायेण उत्तरपदस्थित एवायं प्रयुज्यते यथा पदस्थः मार्गस्थः निकटस्थ इत्यादि ।

स्थग संवरणे भ्वा० पर० सक० सेट् घटा० सिचि न इडिः । स्थगति, अस्थगीत् । अधीपदेशत्वान्न वः ।

स्थगन न० स्थग–ल्युट् । आच्छादने ।

स्थगित त्रि० स्थग–क्त । आवृते तिरोहिते ।

स्थगी स्त्री० स्थग्यतेऽनया घञर्थे क गौ० ङीष् । ताम्बूलपात्रे करङ्के ।

स्थण्डिल न० स्थल इलच् नुक् लस्य ड । चत्वरे, उच्चत्वबनति भूम्ये समीकृते प्रदेशे "निषेदुषी स्थण्डिल एव केवले" इति कुमारः । यज्ञार्थं परिष्कृतस्थाने, होमार्थं कुण्डप्रतिनिधित्वेन बालुकादिभिः कर्त्तव्ये मण्डलभेदे च "नित्यं नैमित्तिकं कर्म स्थण्डिले वा समाचरेत् । हस्तमात्रं तु तत् कुर्य्यात् बालुकाभिः समन्ततः" इति तन्त्रम् ।

स्थण्डिलशायिन् पु० स्थण्डिले चत्वरे शेते व्रतत्वात् णी-णिनि । व्रतार्थं चत्वरे शयितरि । "स्थण्डिलशायिनश्चेति" भट्टिः ।

स्थण्डिलेशय पु० स्थण्डिले शेते अच् अलुक् समा० । व्रतार्थं चत्वरे शयितरि ।

स्थपति पु० स्था–क तस्य पतिः । यज्ञकिनि, शिल्पिभेदे, (कुबेर) कुबेरे, अधीशे, बृहस्पतिसवनामकयागकर्त्तरि च । सप्तमे त्रि० ।

स्थपुट त्रि० तिष्ठति स्था–क स्थं पुटं यत्र । विषमोन्नतप्रदेशे, "स्थपुटगतमपि क्रव्यमव्यग्रमत्तीति" मालतीमाधवम् । विषमस्थाने–सङ्घारिणि–जीवे पु० । [ष्ठलधातुनैवायं गतार्थ इत्यन्ये ।

स्थल स्थाने भ्वा० पर० अक० सेट् उज्वला० । स्थलति अस्थालीत् ।

स्थल न० स्त्री० स्थल–अच् । जलशून्ये–अकृत्रिमे–भूभागे । स्त्रीत्वपक्षे ङीप् "वनस्थलीर्मर्म्मरपत्रमोक्षा" इति कुमारः । कृत्रिमाकृत्रिमप्रदेशमात्रे, कृत्रिमभूभागे च न० ।

स्थलकन्द पु० स्थलजः कन्दः । (वनओल) अश्वाश्यकन्दे ।

स्थलकमल न० स्थलजातं कमलम् । स्थलपद्मे ।

स्थलकुमुद् पु० स्थले कुमुदमस्यस्य सादृश्येन अच्। करवीरे।

स्थलपद्म न० स्थलजातं पद्मं शाक० समासः। स्थलजं पद्मभिव। मानके पु०।

स्थलपद्मिनी स्त्री० स्थलपद्मानां समूहः तेषां सन्निकृष्टदेशो वा इनि। स्थलपद्मसमूहे तद्युक्तदेशे च। "ददृशे दूनः स्थलपद्मिनीं नलः" इति नैषधम्।

स्थलमञ्जरी स्त्री० स्थलस्य मञ्जरीव। अपामार्गे।

स्थलशृङ्गाट पु० स्थलजातः शृङ्गाटः शाक०। गोक्षुरे तस्य कण्टकाकृतत्वात् तथात्वम्।

स्थलरुहा स्त्री० स्थले रोहति रुह—क अलुक् स०। कृतकुमार्याम्

स्थलशय पु० स्थले शेते शी—अच् अलुक् स०। वराहरूपधरतो पद्मो—स्थलशायिनि त्रि०।

स्थविर न० स्था—किरच् स्वार्थेऽः। शैलेये गन्धद्रव्ये। चतुर्मुखे ब्रह्मणि पु०। अचले, स्थिरे, दृढे च त्रि०। मङ्गलावरणायां स्त्री०।

स्थविष्ठ त्रि० अतिशयेन स्थूलः इष्ठन् लघोर्गे गुणः। अतिदृढे ईयसुन् स्थवीयानपि। अतिदृढे। स्त्रियां ङीप्।

स्थाणु पु० स्था नु पृ० णत्वम्। शिवे, शाखाशून्यवृक्षे च। अक्षमेदे पु० स्थविरे त्रि०।

स्थाण्डिल पु० स्थण्डिले शयिताऽण्। व्रताथं स्थण्डिले शयितरि।

स्थान न० स्था-ल्युट्। स्थितौ, सादृश्ये, अवकाशे सन्निवेशे, वसतौ, ग्रन्थसन्धौ, भाजने, निकटे, व्याकरणोक्ते प्रयत्ने, (आदिश्यमानस्य वर्णादेः कारणभूते हृदादौ)। नीतिवेदिनाम्नुपचयापचयक्षीणे साम्यावस्थाने च। [चक्षुलाक्षात्स्थात्यात्वम्।

स्थानचञ्चला स्त्री० स्थाने स्थितायपि चञ्चला। वर्वरीवृक्षे अल्पवातेन

स्थानाध्यक्ष त्रि० स्थाने अध्यक्षः। स्थानरक्षके।

स्थानिक त्रि० स्थानेऽधिकृतः ठक्। स्थानाध्यक्षे।

स्थानिन् त्रि० स्थानमस्यास्ति रत्वेन। स्थानरक्षके। स्थानं प्रयत्नः

अस्यर्थे इनि । व्याकरणोक्ते आदिशब्दसमभिव्याहारे कारके कृदादौ "स्थानिवदादेशोऽनल्विधाविति" पाणिनिः ।

स्थानीय न० स्थीयतेऽस्मिन् स्था-आधारे अनीयर् । नगरे । स्थान' राजमर्हति स्थानस्येदम् वा छ । वासयोग्ये, देशे स्थानसम्बन्धिनि च त्रि० । [शक्नोति" रघुः । सत्ये, साहश्ये, करणार्थे च ।

स्थानि अव्य० स्था-न । योगात्मे, औचित्ये च "स्थानेभवानेकनराधिपः

स्थापत्य पु० स्थपतिरेव स्वार्थे । ष्यञ् । क्लीबः पुररक्षके कञ्चुकिप्रभृतौ । तस्य भावः ष्यञ् । स्थपतिधर्मे न० ।

स्थापन न० स्था-णिच्-ल्युट् । आरोपणे, समाधौ, पुंसवनाख्ये गर्भसंस्कारे च युच् । स्थापनात्त स्त्री० स्था च निवेशने च ।

स्थापनी स्त्री० स्थाप्यतेऽनया स्था-णिच्-करणे ल्युट् । पाठायाम् ।

स्थापित त्रि० स्था-णिच्-क्त । निश्चिते, निवेशिते, न्यस्ते च ।

स्थामन् न० स्था-मनिन् । सामर्थ्ये, बले च ।

स्थायिन् त्रि० स्था-णिनि । स्थितिशीले अलङ्कारीक्ते रसानु कूले रत्यादिभावे पु० । विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा । रत्यादीं रसतामेति स्थायी भावः सचेतसा मिति" साहित्य० ।

स्थायुक त्रि० स्था-उकञ् । स्थितिशीले । एकस्यामाश्रिते पु० ।

स्थाल न० स्थलति तिष्ठत्यस्मात्त आधारे घञ् । (थाल) अन्नपात्रे । पाकपात्रे (हाड़ि) स्त्री०गौ० ङीष् ।

स्थालीपाक पु० स्थाल्यां पाकः । गव्यघृतेन स्थाल्यां क्रते पाकभेदे तद्विधानं याज्ञिकग्रन्थे ।

स्थालीपुलाक पु० स्थालीस्थाः पुलाकाकारतण्डुलाः सन्त्यत्र एक धर्मतोऽवयवत्वेन अच् । मीमांसकोक्ते "स्थालीस्थास्तण्डुला एते सर्वे विकृतिभागिनः । समकालाग्निसंयोगभागित्वात् प्रतिपत्तिव" त्यनुमानकल्पके न्यायभेदे यथा एकस्य पाकदर्शनेन अन्येषां पाकज्ञानम् एवं एकस्पाक्यां सर्वेषामेकधर्मावच्छिन्नतण्डुलत्वेन रूपेणानुमानम् । [दृष्टभेदे]

स्थालीस्थ पु० स्थाल्यां स्थः । अवस्थाकारे स्थालीनिष्ठत्वे साधने

स्थावर त्रि० स्था+वरच् । अचञ्चले स्थिरे, दृढादौ, भूम्यादौ च स्था-

वरं जङ्गमजीव्यद्यपि खलवल्मीकमिति" श्रुतिः । पर्वते पु० । धनुषि न० । [वाचस्पत्याभिधाने ।

स्थाविर न०स्थविरस्य भावः अण् । दृढत्वे तच्च वयोनिबन्धनेऽपगमे भवतीति स्थास्नु पु० स्था-ब-स्थाद्यादौ कनु । अलङ्कारे, चार्चिक्ये जलबुद्बुदे च । स्थास्नु त्रि० स्था—स्नु । स्थितिशीले, "स्थास्नुरिवाचिरप्रभेति भट्टिः । स्थित त्रि० स्था-क्त । स्थिते, ऊर्द्धस्थतया दण्डायमाने, स्थितायां स्थानमाचरे रिति" रघुः निश्चले 'प्रतिष्ठायुक्ते स्थितिशालिनि च । स्थिति स्त्री० स्था—क्तिन् मर्य्यादायां, न्याय्यपथावस्थाने, स्थाने च । स्थिर पु० स्था-किरच् । पर्व्वते, देवे, दृढे, कार्त्तिकेये, धनौ, मोक्षे, हर्षे धवदृक्षे, ज्योतिष्मतीक्षुषु, वृषसिंहवृश्चिककुम्भराशिषु च । कठिने, निश्चले च त्रि० । शालमलौ, काश्मीर्य्यां, पृथिव्यां, शालपर्णीञ्च स्त्री० ।

स्थिरगन्ध पु० स्थिरोगन्धो यस्य । चम्पकवृक्षे । पाटलायां, केतक्याञ्च स्त्री० । स्थिरगन्धयुक्ते द्रव्यमात्रे त्रि० ।

स्थिरच्छद पु० स्थिरश्छदोयस्य । भूर्জपत्रवृक्षे । [च ।

स्थिरच्छाय पु० स्थिरा च्छाया यस्य । वृक्षमात्रे छायाप्रधाने वटादौ

स्थिरजिह्व पु० स्थिरा अचञ्चला जिह्वा यस्य । मत्स्ये ।

स्थिरजीविता स्त्री० स्थिरं जीवितमायुर्यत्र यस्याः । शालमलीवृक्षे

स्थिरतर त्रि० अतिशयेन स्थिरःतरप् । अत्यन्तस्थिरे । ईश्वरे पु० ।

स्थिरपत्त्र पु० स्थिराणि पत्त्राण्यस्य । हिन्तालवृक्षे ।

स्थिरपुष्प पु० स्थिरं पुष्पमस्य । चम्पकवृक्षे बकुलवृक्षे च ।

स्थिरपुष्पिन् पु० स्थिरं पुष्पमस्त्यस्य इनि । तिलकवृक्षे ।

स्थिरफला स्त्री० स्थिरं फलं यस्याः । कृष्णाखर्ज्जूराम् ।

स्थिरमति स्त्री० स्थिरा—मतिः । स्थिरचित्ते, स्थिरा मतिर्यस्य । स्थिरबुद्धियुक्ते त्रि० "अनिकेतः स्थिरमति रिति" गीता ।

स्थिरयौवन न० पु० स्थिरं यौवनमस्य । विद्याधरादौ देवयोनि भेदे, स्थिरस्थायियौवनयुक्ते त्रि० ।

स्थिररङ्गा स्त्री० स्थिरोरङ्गो रागोऽस्याः । नील्याम् ।

स्थिररागा स्त्री० स्थिरोरागोरङ्गनं यस्याः । दारुहरिद्रायाम् ।

स्थिरसाधनक पु० स्थिरं साधयति ल्यु ततः कन् । सिन्दुवारवृक्षे ।

स्थिरसार पु० स्थिरः सारोयस्य । (शेलु) वृक्षे ।

स्थिराङ्घ्रि पु० कर्म० । हिन्तालवृक्षे ।

स्थिरायुस् पु०स्थिरमायुर्यस्य दीर्घकालस्थायित्वात् । शाल्मलिवृक्षे । चिरजीविनि त्रि० ।

स्थुड वरणे तुदा० कुटा० पर० सक० सेट् । स्थुडति अस्थुडीत् तुस्थोड । अघोपदेशत्वान्न षः ।

स्थूणा स्त्री० स्था-नक् ऊदन्तादेशः पृ० । (खुटी) गृहस्तम्भे स्थूनावन्धेर्घ गृहर्धिति" वार्हि० ह्रीर्हृतिमायाञ्च ।

स्थूरिन् पु० स्था—ऊरन् किच्च स्थूरो वृक्षादिर्भारवाहकः स्थूरोऽस्त्यस्य सादृश्येन इनि । वृक्षादिवत्पुष्टेन भारवाहकेऽश्वे । स्थूरस्य भावः अण स्त्री० तटस्थास्ति इनि । स्थौरीत्यत्र ।

स्थूल हिंसने अद० चु० उभ० अक० सेट् स्थूलयति-ते अतुस्थूलत्-त

स्थूल त्रि० स्थूल-अच् । पीवरे, (मोटा) कृशे, समूहे च न० पु० । गजपिप्पल्याम्, एरण्डे, वृक्षदेलायाञ्च स्त्री० । स्वार्थे कन् । पीवरे त्रि० । संज्ञायां कन् (उलुखड़) तृणभेदे पु० ।

स्थूलकङ्कु पु० कर्म० । धरकक्षान्ने (गोरधान) ।

स्थूलकणा स्त्री० कर्म० । स्थूलजीरके वृक्षे । पीवरकणयति त्रि० ।

स्थूलकण्टक पु० स्थूलः कण्टकोऽस्य । जालवर्ब्बुरे । संज्ञायां कन् अत इत्वम् । शाल्मलीवृक्षे स्त्री० ।

स्थूलकण्टा स्त्री० स्थूलः कण्टः कण्टकोऽस्याः । वृक्षल्याम् ।

स्थूलकन्द पु० स्थूलः कन्दोऽस्य । रक्तालुके, शूरणे, हस्तिकन्दे, मानके च । [क्षुद्रे त्रि० ।

स्थूलचञ्चु पु० । स्थूला कठिन चिक्षाऽस्य । महाचञ्चुपक्षिणि । वृक्ष-

स्थूलजीरक पु० कर्म० । जीरकभेदे (काला जिरा) ।

स्थूलताल पु० कर्म० । हिन्तालवृक्षे

स्थूलदण्ड पु० स्थूलोदण्डोऽस्य । देवभेदे । स्थूलनालोऽप्रत्व ।
स्थूलदर्भ पु० स्थूलं दृढं दर्भ्यतेऽनेन दर्भ-बज् । छुरे (छुरा) ।
स्थूलदला स्त्री० स्थूलानि दलानि यस्याः । क्षुद्रकुमार्याम् ।
स्थूलनास पु० स्थूला नासाऽस्य । शूकरे, स्थूलनासिकोऽप्रत्व । दृढ-
नासावति त्रि० । [त्वात्तथात्वम् ।
स्थूलपट्ट पु० स्थूलं पट्टं यस्मात् कापीये तत्स्थूलजपट्टस्य स्थूल-
स्थूलपाद पु० स्थूलाः पीनाः पादा यस्य न पाद्भावः । गजे श्लीपद-
रोगे च । [यवतिक्षायां स्त्री० ङीप् ।
स्थूलपुष्प पु०स्थूलं पुष्पं यस्य । वकवृक्षे । पर्वतजातापराजितायां स्त्री०
स्थूलफल पु० स्थूलं फलमस्य । भाङ्गलोडुचे । दृढफलान्विते त्रि०
मणपुष्पायां स्त्री० ङीप् । [व्यादौ भूते ।
स्थूलभूत न० कर्म० । वैशेषिके प्रत्येकमेकात्मकतामापन्ने पृथि-
स्थूलमरिच न० कर्म० । कङ्कोले ।
स्थूललक्ष(क्ष्य) त्रि० स्थूलं लक्षयति दानाय संकल्पते, स्थूलं लक्ष्यं
वाऽस्य । बहुदातरि ।
स्थूलवर्त्मकृत् पु०स्थूलं वर्त्म करोति कृ-क्विप् । ब्राह्मणयष्टिकायाम् ।
स्थूलवल्कल पु० स्थूलं वल्कलमस्य । रक्तलोध्रे । स्थूलत्वचान्विते त्रि०
स्थूलवृक्षफल पु० स्थूलस्य वृक्षस्येव फलमस्य । शिग्रुभिण्डीतकवृक्ष-
भेदे (सजना) ।
स्थूलवैदेही स्त्री० विदेहे भवा अण् कर्म० । गजपिप्पल्याम् ।
स्थूलशाटक पु० कर्म० । स्थूलवस्त्रे स्थूलशाटिकादयोऽप्रत्व स्त्री० ।
स्थूलशालि पु० कर्म० । महाशालौ । [पोलिकायाम् ।
स्थूलशीर्षिका स्त्री० स्थूलं शीर्षं यस्याः कप् अत इत्त्वम् । क्षुद्रपि-
स्थूलषट्पद पु० षट् पद इव स्थूलः राज० । वरेलायाम् (बोलता) ।
स्थूलस्कन्ध पु० स्थूलः स्कन्धोऽस्य । गजे ।
स्थूलांशा स्त्री० स्थूलः अंशोऽवयवोऽस्याः । गन्धपत्रायाम् ।
स्थूलाम्र पु० कर्म० । आम्रभेदे ।

स्थूलेला स्त्री० कर्म० । हृद्देशावास् ।

स्थूलोच्चय पु० स्थूलस्य मांसस्योच्चयस्तत्समूहो यत्र । गण्डशैले । स्थूलस्य गजस्य उच्चयः । गजसमूहवति । वरण्डे, गजदन्तनिर्मिते च ।

स्थेय पु०स्थीयते विवादनिर्णायकतयाश्रीयते स्था-यत् विवादे संशयनिर्णायके (जुरी) पुरोहिते च । स्थिरे त्रि० ।

स्थेयस् त्रि० अतिशयेन स्थिरः ईयसुन् स्थादेशः । स्थिरतरे त्रि० स्त्रियां ङीप् । इष्ठन् स्थेशोऽप्यत्र त्रि० । सान्त्वने न० ।

स्थैर्य न० स्थिरस्य भावः ष्यञ् । स्थिरतायाम् । [द्रव्ये ।

स्थौणेय(क) पु० स्थूणायां तत्समीपे भवः ढक् । अन्थिपर्णे नामगन्ध-

स्थौल्य न० स्थूलस्य भावः ष्यञ् । पीवरत्वे ।

स्नपन पु० स्ना-णिच्-युक् ल्युट् । जलादिनाऽभिषेककरणे ।

स्नव पु० स्नु-अप् । स्रवणे, क्षरणे च ।

स्नसा स्त्री० स्नस—अच् । स्नायौ ।

स्नातक पु० स्ना—भावे क्त स्नानं वेदाध्ययनानन्तरं समावर्त्तनाङ्गं स्नानं तदस्यास्ति कन् । वेदाध्ययनानन्तरं गार्हस्थ्याय व्रतसमापर्त्तनाङ्गस्नाने ।

स्नातकव्रत न० ६त० । स्नातककर्त्तव्ये व्रत्युक्ते व्रतभेदे, "अलाभे चैव कन्यायाः स्नातकव्रतमाचरेदिति" स्मृतिः ।

स्नान न० स्ना-ल्युट् । शोधने, अवगाहने मज्जने, च तच्च । कल्पादि कारणभेदादष्टविधं विस्तरो वाचस्पत्ये ।

स्नानक्षण न० स्नानार्थं क्षणम् कुत्वे ।

स्नानीय त्रि० स्नानाय हितम् छ । स्नानसाधने तैलोद्वर्त्तनादौ ।

स्नायु स्त्री० स्नाति—स्नुश्नुति दीर्घोऽसया स्ना उण् । शरीरस्थे वायु-वाहिनाडीभेदे ।

स्निग्ध त्रि० स्निह—क्त । स्नेहयुक्ते, वत्सले, मसृणे, चिक्कणे च । स्नौरण्डे, सरलवृक्षे च पु० । भल्लातके न० मेदायां स्त्री० ।

स्निग्धतण्डुल पु० कर्म० । मटियाचावले ।

स्निग्धता स्त्री० स्निग्धस्य भावः । स्नेहे, प्रियत्वे च ।

स्निग्धदारु पु० स्निग्धं दारु काष्ठमस्य । सरलवृक्षे, देवदारुवृक्षे च ।
स्निग्धपत्रक पु० स्निग्धं पत्रमस्य कप् । इतकरञ्जे, गुच्छकरञ्जे, गर्ज-रवृक्षे च । वर्ध्यां, पालक्यां, वाह्लीकीद्राक्षे स्त्री० ।
स्निग्धपिण्डीतक पु० कर्म्म० । मदनवृक्षभेदे, पिण्डीतकभेदे ।
स्निग्धफला स्त्री० स्निग्धं फलमस्याः । नाकुल्याम् ।
स्निट स्नेहे चु० उ० सक० सेट् । स्नेटयति—अस्निटत्-त । अभोप-देशत्वान्न षः ।
स्नु पु० स्नातु+क्नु आदेशः स्ना—कु वा । पर्वतस्य समभूभाग्येऽस्त्रायौ स्त्री०
स्नुक्क्षुद पु० स्नुक्षति क्षिप् कुत्वम् स्नुक्, क्षुदोऽस्य । क्षीरकाकोलीवृक्षे ।
स्नुत पु० स्नु—क्त । चरिते जलादौ ।
स्नुषा स्त्री० स्नु—षक् । पुत्रवध्वाम्, स्नुहीवृक्षे च ।
स्नुह्(हा) स्त्री० स्नुह—क्विप् वा टाप् । स्नुहीवृक्षे ।
स्नुहि(ही) स्त्री० स्नुह—इन् वा ङीप् । (मनसासिजु) वृक्षे ।
"स्नुहीविटपसंश्रितानिति" पुराणम् ।
स्नेह पु० स्निह-घञ् । प्रेमणि, तैलादिरसभेदे, न्यायोक्ते गुणभेदे च यद्द्रव्यात् दाहानुकूल्यम् ।
स्नेहन न० स्निह-णिच् ल्युट् । तैलादिमर्द्दने अभ्यङ्गे ।
स्नेहप्रिय पु० स्नेहः तैलादिः प्रियोऽस्य । प्रदीपे ।
स्नेहभू स्त्री० ६त० । स्नेहाख्ये देहस्थे धातुभेदे, स्नेहपाते च ।
स्नेहरङ्ग पु० स्नेहेन रज्यते रञ्ज-कर्म्मणि घञ् । तिले ।
स्नेहवत् त्रि० स्नेहोऽस्त्यस्य मतुप् मस्य वः । स्नेहयुक्ते स्त्रियां ङीप् । सा च भेदायां पु० स्त्री० ।
स्नेहविद्ध न० स्नेहेन विद्धम् । देवदारुणि ।
स्नेहवीज पु० स्नेहाख्यं वीजमस्य । प्रियालवृक्षे । ६त० न० स्नेहकारणे न०
स्नेहाग्र पु० स्नेहमश्नाति अश—अण् । प्रदीपे ।
स्नेहिन् पु० स्निह-णिनि । वयसे बन्धौ, स्नेहयुक्ते त्रि० स्त्रियां ङीप्
स्पद दैवत्वाम्मे भ्वा० आ० अक० सेट् । स्पन्दते अस्पन्दिष्ट ।

स्पन्द पु० स्पदि घञ्। ईषच्चलने, ईषत्कम्पे, क्रियाभेदे च मेदिनीकरादौ शुभाशुभविवेचनं वाचस्पत्ये। [अस्पर्शिष्ट।

स्पर्ह संहर्षे (पराभिभवेच्छायाम्) भ्वा० आत्म० अक० सेट्। स्पर्हते स्पर्हा स्त्री० स्पर्ह-अ। संहर्षे पराभिभवेच्छायां, आख्ये, क्रमोन्नतौ च स्पर्श स्पर्शने, लेपे च पु० उ० सक० सेट्। स्पर्शयति ते अपस्पर्शत् त स्पर्श पु० स्पर्श-स्पृश-वा अच् घञ् वा। व्यायोक्ते त्वगिन्द्रियग्राह्ये गुणभेदे, स्पर्शने, रोगे, युद्धे, गुप्तचरे, उपतापके च। वायौ पु० स्पर्शके त्रि०। स्पृश-णिच् अच्। दाने स्पृशन्ते। वायुना जिह्वादयोऽण्, घञ्। कादिषु मावसानेषु वर्ग्यवर्णेषु पु०। स्पर्शन न० स्पर्श-स्पृश-वा ल्युट्। स्पर्शने, स्पर्शे च। णिच् ल्युट्। स्पर्शने, दाने च। स्पृश-कर्त्तरि ल्यु। वायौ पु०।

स्पर्शलज्जा स्त्री० स्पर्शमात्रेण लज्जते लज्ज-अच्। लज्जालु-वे।

स्पर्शशुद्धा स्त्री० स्पर्शे शुद्धा। शतमूल्याम्।

स्पर्शयितृ त्रि० स्पृश-तृच्। उपतापयितरि। रोगे पु०। अस्य स्पृष्टादेश

स्पश बन्धे बाधने च स्प० उभ० सक० सेट्। स्पशति-ते अस्पशीत्-आस्पाशीत्। अस्पशिष्ट। [स्पशेति" मावः।

स्पश पु० स्पश-अच्। चरमाङ्गे, युद्धे, गूढचरे च। "राजनीतिरय-

स्पष्ट त्रि० स्पश-क्त नि० दृडभावः। व्यक्ते, स्फुटे च।

स्पृ प्रीतौ अक० प्रीणने रक्षणे पालने च सक० स्वा० पर० अनिट्। स्पृणोति अस्पार्षीत्।

स्पृक्का स्त्री० स्पृश-कक् पृ० यस्य कः पृक्कायाम्। [अस्पृक्षत्।

स्पृश स्पर्शे तु० पर० सक० अनिट्। स्पृशति अस्पाक्षीत् अस्पार्क्षीत्

स्पृशा स्त्री० स्पृश-क। सर्पघातिनीवृक्षे। कराटकार्य्यां स्त्री० ङीप्।

स्पृष्ट त्रि० स्पृश-क्त कृतस्पर्शे। भावे क्त। स्पर्शे न०।

स्पृष्टास्पृष्ट न० स्पृष्टेन सा सम्यक् स्पृष्टम्। परस्परस्पर्शने।

स्पृष्टास्पृष्टि न० स्पृश-भावे-क्ति नञ्+स्पृश-क्तिन्, स्पृष्टस्य अस्पृष्टस्य द्वयोः समाहारः। स्पृष्टास्पर्शयोः। "नगरे ग्रामदाहे च स्पृष्टा-

स्फुटि न दुष्यतीति स्फुतिः । [कृत् त]

स्फुड इच्छायां अद० चुरा० उभ० सक० सेट् । स्फुडति-ते अपस्फुडत-

स्फुडनीय त्रि० स्फुड-अनीयर् । वाञ्छनीये, त्याज्ये च "अहो बतासि स्फुडनीयवीर्य" इति कुमारः ।

स्फुडयालु त्रि० स्फुड-आलुच् । स्फुडनीये ।

स्फुडा स्त्री० स्फुड-अङ् । इच्छायाम् "मिथुने स्फुडावतीति" कुमारः ।

स्फुड्ड पु० स्फुड-यत् । मातुलुङ्गवृक्षे । वाञ्छनीये त्रि० ।

स्फुट विशीर्णतायाम् अक० भ्वा० पर० सेट् । स्फुटति अस्फुटीत्-अस्फाटीत् । इदित्वमव्ययच्छन्दार्थे स्फाटते अस्फुटीत् ।

स्फुट पु० स्त्री० स्फुट-अच् । सर्पफणायाम् ।

स्फुटि(टी) स्त्री० स्फुट-इन् वा ङीप् । (फट्किरि) वणिग्द्रव्यभेदे ।

स्फुटि(टी)क पु० स्फुटिरि(टी)व इवार्थे कन् । स्वनामख्याते मणौ स्वार्थेऽण् । स्फाटिकमयत्व न० । [कमयपर्वते च ।

स्फुटिकाचल पु० स्फुटिक इव शुभ्रः अचलः । कैलासपर्वते, स्फाटि-

स्फुटिकाद्रिभिदु(द) पु० स्फुटिकाद्रिं स्फाटिकपर्वतं भिनत्ति बाहुलकात् भिद-क्विप् क वा कर्पूरे ।

स्फुटिकाम्र पु० स्फाटिकवर्णः आम्र इव कर्पूरे ।

स्फुटिकारि पु० इत० (फट्किरि) वणिग्द्रव्यभेदे तस्य स्फटिकतुल्य-दीप्तिमत्त्वात्तथात्वम् । [स्फण्डतृ त ।

स्फुड परिहासे चु० उभ० अक० सेट् इदित् । स्फण्डयति-ते अप-

स्फुर चले स्फूर्त्तौ च तुदा० प० अक० सेट् । स्फुरति अस्फारीत् ।

स्फुरण न० स्फुर-ल्युट् । स्फुरणे ।

स्फुल चले स्फूर्त्तौ च तुदा० पर० अक० सेट् । स्फुलति अस्फालीत् ।

स्फाटिकोपल पु० स्फटिकमेव अण् कर्म० । स्फटिके ।

स्फाति स्त्री० स्फाय-क्तिच् । वृद्धौ । [निष्ठायामनिट् स्फीतः ।

स्फाय वृद्धौ भ्वा० आ० अक० सेट् । स्फायते अस्फायि-अस्फाविष्ट ।

स्फार पु० स्फाय रक् । खर्जुबहुदे । विपुले, विकटे, प्रचुरे च त्रि० ।

स्फारण न० स्फुर-णिच्-स्फारादेशः ल्युट् । विकासने ।

स्फाल पु० स्फल-घञ् । स्फूर्त्तौ ।

स्फिग्घातम पु० स्फिचं घातयति हन्-णौ णिच्-ख्युल् । कट्फले ।

स्फिच् स्त्री० स्फाय-किच् । कटिप्रोथे, तत्स्थे वातजे रोगभेदे च ।

स्फिट दृतौ हिंसे अनादरे च चु० उभ० सक० सेट् । स्फेटयति ते अपिस्फिटत् त ।

स्फिर त्रि० स्फाय-किरच् । प्रचुरे, दृढे च ।

स्फीत त्रि० स्फाय-क्त स्फीभावः । वृद्धे-सम्पन्ने च ।

स्फुट भेदे चु० उभ० सक० सेट् । स्फोटयति ते अपुस्फुटत् त ।

स्फुट विकासे भ्वा० प० अक० सेट् । स्फोटति अस्फुटत् अस्फोटीत् ।

स्फुट विकासे तु० कुटा० प० अक० सेट् । स्फुटति अस्फुटीत् पुस्फोट ।

स्फुट विदलने भ्वा० आत्म० अक० सेट् । स्फोटते अस्फुटिष्ट ।

स्फुट क्षोभे चुरा० उभ० सक० सेट् । इदित् स्फुण्टयति ते अपुस्फुण्टत् त । [आपुस्फुटत् त ।

स्फुट हिंसे चु० उभ० सक० सेट् प्रायेणाङ्पूर्व्वः । आस्फोटयति ते

स्फुट विकासे अद० चु० उभ० सक० सेट् । स्फुटयति ते अपुस्फुटत् त

स्फुट त्रि० स्फुट-क । विकसिते, व्यक्ते, भिन्ने, शुक्ले च । ज्योतिषोक्तेषु मेषादिराशिषु अंशविशेषस्थितेषु कृत्तिकादिषट्केषु पु० तेषां तत्तदंशकलादिषु गतौ स्त्री० । उत्प्रेक्षाया द्योतने न० । सर्षपफणायां स्त्री० ।

स्फुटन न० स्फुट ल्युट् । विकसने, विदलीभावे च ।

स्फुटबन्धनी स्त्री० स्फुटं बन्धनं यस्याः गौ० ङीष् । कपोतपद्यां ।

स्फुटित त्रि० स्फुट-क्त । विकसिते, भिन्ने "दग्धे वा स्फुटितेऽथ वेति" पुराणम् व्यक्तीकृते, परिहासिते च ।

स्फुटि(टी) स्त्री० स्फुट-इन् वा ङीप् । पादस्फोटरोगे (फोड़ा) कर्कटीफले च (फुटि) ।

स्फुड्ड अनादरे चु० उ० सक० सेट् । स्फुड्डयति ते अपुस्फुड्डत् त ।

स्फुड वरणे तु० कु० पर० सक० सेट् । स्फुडति अस्फुडीत् पुस्फोड ।

स्फुड विकासे भ्वा० आत्म० अक० सेट् इदित् । स्फुण्डते अस्फुण्डिष्ट ।

स्फुड परिहासे पु० ड० सक० सेट् इदित्। स्फुण्डयति ते अपु-स्फुण्डत् त।

स्फुर स्फुरौ तु० क्रुटा० प० सक० सेट्। स्फुरति अस्फुरीत् पुस्फोर। "वाह पुस्फोर वाक्छरिति" भट्टिः।

स्फुरण न० स्फुर-ल्युट्। ईषत्स्पन्दने। वृच्। तत्रैव स्त्री०।

स्फुर्च्छ विकारणे भ्वा० प० सक० सेट्। स्फूर्च्छति अस्फूर्च्छीत्।

स्फुर्ज शब्दे भ्वा० प० अक० सेट्। स्फूर्जति अस्फूर्जीत्।

स्फुल स्फूर्त्तौ चले च अक० सञ्चये सक० तुदा० क्रुटा० प० सेट्। स्फुलति अस्फुलीत्। पुस्फोल।

स्फुल न० स्फुल-क। वस्त्रागारे (तँबु)।

स्फुलन न० स्फुल-ल्युट्। स्फुरणे।

स्फुलिङ्ग पु० स्त्री० स्फुल-इङ्गच्, स्फुलदव्यक्तः शब्दो लिङ्गति गच्छति यस्मात् लिंग-घञ् पृ० वा। अग्निकणे। [ङ्युक्ते त्रि०।

स्फुलिङ्गिनी स्त्री० स्फुलिङ्ग+अस्त्यर्थे इनि। अग्निज्वालायाम् स्फुलिङ्गवति त्रि०।

स्फूर्ज्जथु पु० स्फूर्ज अथु। वज्रपातशब्दे।

स्फूर्त्ति स्त्री० स्फूर्च्छ स्फुर-वा क्तिन्। स्फुरणे विकसने प्रतिभायाञ्च।

स्फूर्त्तिमत् पु० स्फूर्त्तिरस्त्यस्य मतुप्। पाशुपताख्ये शैवभेदे प्रतिभायुक्ते विकाशयुक्ते च त्रि०।

स्फेयस् त्रि० अतिशयेन स्फिरः, ईयसु स्फादेशः। अतिप्रभूते, स्त्रियां ङीप्। इष्ठन्। स्फेष्ठोऽप्यत्र त्रि०।

स्फोट पु० स्फुटत्यर्थो यस्मात् स्फुट-घञ्। व्याकरणोक्ते वर्ण्ये नित्ये पूर्वपूर्ववर्णानुभवसंस्कृतचरमवर्णव्यङ्ग्ये अर्थप्रत्यायके अखण्डे शब्दभेदे "स्फोटोति यदयं स्फोटमिति" भागवतम्। "न स्फोटः प्रतीत्यप्रतीतिभ्यामिति" शारीरकसूत्रम् यद्वा च वर्णेषु यत्नानर्थबोधकत्वं तथा प्रयत्नितसंज्ञाभिः, शब्दार्थरत्ने। व्रणभेदे च (फोड़ा)।

स्फोटक पु० स्फुट-ण्वुल्। (फोड़ा) व्रणभेदे विदारणे च।

स्फोटन न० स्फुट-ल्युट्। विदारणे, विकाशने च।

स्फोटनी स्त्री० स्फुटतेऽनया स्फुट+ल्युट् ङीप्। मक्षिकेधनकरण्डे यन्त्रभेदे (भोमरी)। [भल्लातके।

स्फोटवीजक पु० स्फोटस्य व्रणभेदस्य बीजम् ततः स्वार्थे कन्।

स्फोटायन पु० स्फोटएवायनं अर्थबोधकतयाऽऽश्रयणं अस्य। अर्थबोधकत्वेन स्फोटाभ्युपगन्तरि वैयाकरणे मुनिभेदे अवङ् स्फोटायनस्येति" पाणिनिः।

स्फ्य न० स्फा—य यत् नि०। खड्गाकारे यज्ञार्थे काष्ठभेदे।

स्म अव्य० स्मि—ड। अतीते, पादपूरणे च।

स्मय पु० स्मि—अच् गर्वे, अद्भुते च।

स्मर पु० स्मरति प्रियमनेन स्मृ—अप्। कामदेवे। भावे अप्। स्मरणे।

स्मरगृह न० स्मरस्य गृहमिव। स्त्रीचिह्नभेदे स्मरमन्दिरादयोऽप्यत्र।

स्मरण न० स्मृ—ल्युट्। ज्ञातवस्तुनोऽनुभवाधीनसंस्कारजन्ये उद्बोधकसहकारेण जायमाने ज्ञानभेदे आध्याने चिन्तने च।

स्मरदशा स्त्री० स्मरकृता दशा। कामिनां स्मरकृतासु नयनप्रीत्यादिषु दशसु दशासु। विस्तरो वाचस्पत्ये।

स्मरप्रिया स्त्री० ६त०। स्मरभार्यायाम् रतौ।

स्मरवीथिका स्त्री० स्मरस्य वीथिकेव प्राप्तिहेतुत्वात्। वेश्यायाम्।

स्मरहर पु० स्मरं हरति नाशयति हृ-अच्। महादेवे स्मरहरनादयोऽप्यत्र। [स्त्रीणां स्मरोद्दीपनम्।

स्मराङ्कुश पु० स्मरस्याङ्कुश इव उत्तेजकत्वात्। नखे, नखाघातेन हि

स्मराम्र पु० स्मरप्रिय आम्रः। राजाम्रे।

स्मरासव पु० स्मरोद्दीपक आसवः। हालायाम् कामिनां तत्पाने हि स्मरोद्दीपनात्तस्यास्तथात्वम्।

स्मार्त्त त्रि० स्मृतौ विहितः स्मृतिं वेत्त्यधीते वा अण्। स्मृति विहिते ज्ञानादौ "अन्योऽपि स्मार्त्तमाचरेदिति" स्मार्तं वैदिकवत् चरेदिति" च स्मृतिः स्मृतिशास्त्राभिज्ञे च।

स्मि अनादरे विकसने च चु० आ० सक० सेट्। आस्मयते अस्मिष्यत।

अभोषदेशत्वात् न घः । अन्यतोऽपि दृश्यते आवयतीत्येव । अर्थं भ्वादि-
रपि अनिट् । आयते अस्मेट् । [टुस्तृ ।
स्मिट् अवादरे सक० सुखे अक०चु० उभ० सेट् । स्मेटयति ते अस्मिस्मि-
स्मित न० स्मि-क्त । ईषद्धासे "सुखं विकसितस्मितमिति" भाव-
प्रकाशः । विकसिते, विस्मिते च त्रि० ।
स्मील निमेषणे भ्वा० पर० अक० सेट् । अस्मीलति अस्मीलीत्
स्मृ सरणे भ्वा० पर० सक० अनिट् । स्मरति अस्मार्षीत् ।
स्मृ औत्सुक्ये भ्वा० प० सक० अनिट् घटा० स्मरति अस्मार्षीत् ।
स्मृत त्रि० स्मृ-क्त । स्मृतिविषये ।
स्मृति स्त्री० स्मृ-क्तिन् अनुभूतवस्तुन उद्बोधकसंस्कारेण संस्काराधीने
ज्ञानभेदे । स्मर्य्यते वेदधर्मोऽनेन करणे क्तिन् । धर्मशासनशास्त्रे
वेदार्थानुभवजन्ये वेदार्थानुवादके स्मृतिप्रणीते वाक्यरूपे शास्त्रे ।
"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदां स्मृतिं" मनुः ।
स्मृतिहेतु पु० ह्रस्व० । संस्कारे वासनारूपे गुणभेदे ।
स्मेर त्रि० स्मि-रन् । विकसिते ईषद्धास्यान्विते च "मन्दाक्षनः स्मेरमुखो-
भविष्यतीति" कुमारः ।
स्यद् पु० स्यन्द-घञर्थे क । वेगे । [ह्रस्वस्य अस्यन्दिष्ट । अस्यन्त ।
स्यन्द स्रवणे भ्वा० आ० लुङ्, स्तुटि स्रुङि च उभ० अक० वेट् । स्यन्दते
स्यन्द पु० स्यन्द-घञ् । स्रवणे, प्रस्रवे ।
स्यन्दन न० स्यन्द-भावे ल्युट् । स्रवणे । कर्त्तरि ल्यु । जले न० ।
रथे, तन्निर्यूहे च पु० । [रोहेण योहरि ।
स्यन्दनारोह पु० स्यन्दनमारोहति युद्धार्थम्, आ+रुह अच् । रथा-
स्यन्दनि पु० स्यन्द-अनि । तन्निर्यूहे । ङीष् । लाङ्गलायां स्त्री० ।
स्यन्दिन् त्रि० स्यन्द+णिनि । । प्रस्रविणि । लाङ्गलायां स्त्री० ङीष् ।
स्यन्न त्रि० स्यन्द-क्त सुते जलादौ ।
स्यम ध्वनने भ्वा० पर० अक० सेट् । स्यामेट् क्वाप्यादि० । अस्यमि अस्यसीत्
स्यम वितर्के चु० उ० सक-सेट् । स्यामयति ते अस्यिस्यमत् त ।
स्यम ध्याने ऊद० पु० उभ० सक० सेट् । स्यमयति अस्यिस्यमत् त ।

स्रमभ्रम पु० स्रम+भ्रम् संज्ञायां घञ्। भीतत्रस्त इतस्ततो गतिभेदे। तस्य सुप्तादिकं नाट्यशास्त्राभिधाने वक्ष्यते।

स्रमीका स्त्री० स्रम-ईकक्। वल्मीके। काशे, मेघे च पु०।

स्रूत त्रि० सिव-क्त। सूच्यादिना ग्रथिते वस्त्रादौ। सूत्रधारिजातौ पु०। पु० ओत्। स्रोतोऽपत्ये।

स्रूति स्त्री० सिव-क्तिन्। सूच्यादिना वस्त्रादिसीवने।

स्रून पु० सिव-क्त। सूर्ये, किरणे, सूच्यादिसूतखण्डवस्त्रादिनिर्मिते पदार्थे (घुकड़ी) च।

स्रंसन न० स्रस्-णिच्-ल्युट्। अधोगतस्याधोनयने पातने। युच्। स्रंसनापत्त्र स्त्री०।

स्रंसिन् त्रि० स्रस्-णिनि। अधःपतनशीले। पीलुवृक्षे पु०।

स्रक गतौ भ्वा० आत्म० सक० सेट् इदित्। स्रक्षते अस्रक्षिष्ट।

स्रग्वत् त्रि० स्रक् मात्वमस्यास्य मतुप् मस्य वः कुत्वम्। माल्यवति। विनि। स्रग्वीत्यस्य। उभयत्र। स्त्रियां ङीप्।

स्रज् स्त्री० सृज्यते सृज-क्विन् नि०। माल्ये।

स्रन्स पतने भ्वा० आत्म० लुडि उ० अक० सेट् ह्रावेट्। अस्रंसत अस्रंसिष्ट। ["नाऽस्रसत् करिणां वैव मिति" रघुः।

स्रन्स प्रमादे भ्वा० आ० अक० सेट् ह्रावेट्। स्रंसते अस्रंसिष्ट।

स्रभ्भ अनवस्थाने भ्वा० आ० अक० सेट् ह्रावेट्। स्रभ्भते अस्रब्धिष्ट।

स्रभ्भ विस्रम्भे भ्वा० आत्म० लुडि उ० सक० सेट् ह्रावेट्। स्रभ्भते अस्रब्धिष्ट।

स्रव(स्रा)ण पु० सु-अप् चञ् च। क्षरणे। कर्त्तरि ल्युट्। निर्झरे।

स्रवण न० सु-ल्युट्। मूत्रजले, धर्मे च। भावे ल्युट्। क्षरणे।

स्रवन्ती स्त्री० सु-शिच् ङीप्। नद्याम् ओषधिभेदे, सुश्रुतस्थाने च। मत्व। सुविविक्ते त्रि०। स्त्रियां ङीप्।

स्रवा स्त्री० सु-अच्। मूर्वायाम्।

स्रष्टृ पु० सृज-तृच्। अमरकर्त्तरि, चतुर्मुखे, शिवे च। सृष्टिकर्त्तरि त्रि० स्त्रियां ङीप्।

स्रस्त त्रि० स्रंस-क्त । च्युते पतिते ।
स्रस्तर पु० स्रंस-तरच् किच् । आसने ।
स्राक् अव्य० स्रु-डाक् । त्वरिते शीघ्रार्थे ।
स्रावक न० स्रावयति स्रु-णिच्-ण्वुल् । क्षरिते । निःस्रावी त्रि० ।
स्रिभ् हिंसे भ्वा० प० सक० सेट् स्रावेट् । स्रिभ्नाति अस्रिभीत् ।
स्रिभ हिंसे भ्वा० प० सक० सेट् स्रावेट् । स्रुभति अस्रुभीत् ।
स्रिव गोचे अक० दिवा० प० गतौ सक० सेट् स्रावेट् । स्रिव्यति अस्रेवीत् ।
स्रु गतौ सक० क्षरणे अक० भ्वा० प० अनिट् । स्रवति अस्रुस्रुवत् ।
स्रुग्दारु पु० स्रुचे यज्ञपात्राय दारु यस्य । विकङ्कत वृक्षे ।
स्रुघ्न पु० देशभेदे । सोऽस्मिन्निवासः अण् गौ० ङीष् । सर्जिकाक्षारे स्त्री०
स्रुच् स्त्री० स्रु-क्विप् चिट् च । वटपत्राकृतौ विकङ्कतकाष्ठजे वास्तुमात्रे,
यज्ञपात्रभेदे ।
स्रुत त्रि० स्रु-क्त । क्षरिते जलादौ, गते च । स्त्रियां ङीप् ।
स्रुव पु० स्त्री० स्रु-क । खदिरकाष्ठभवे हस्तमिते यज्ञपात्रभेदे ।
यज्ञक्रियाम् मूर्धायाञ्च स्त्री० ।
स्रू स्त्री० स्रु-क्विप् नि० । यज्ञपात्रभेदे । निर्झरे च ।
स्रे विक्लवौ भ्वा० पर० अक० अनिट् । स्रायति अस्रासीत् ।
स्रोत न० स्रु-तच् । स्रोतसि वेगेन स्रुतोजलनिःसरणे ।
स्रोतस् न० स्रु तसि । वेगेन स्रुतोजलनिःसरणे रेतसि च ।
स्रोतस्वत् त्रि० स्रोतोऽस्यास्ति मतुप् मस्य वः । स्रोतोयुक्ते । नद्यां
स्त्री० ङीप् । [त्रि० ।
स्रोतस्विनी स्रोतस्+अस्यर्थे विनि ङीप् । नद्याम् । स्रोतोयुक्तौ
स्रोतोञ्जन न० स्रोतसि यज्ञनाम्रोतोञ्जनसञ्ज्ञिकटसौवीरदेशे भवम् ।
अञ्जनम् । सौवीरदेशजेऽञ्जने ।
स्रोतोवहा स्त्री० स्रोतसा वहति वह-अच् । नद्याम् ।

स्व न० स्वन–ड । धने, आत्मनि ज्ञातौ च पु० । आत्मीये त्रि० । आत्मनि आत्मीये, चार्थेऽस्य सर्वनामता ।

स्वकम्पन पु० स्वेनैव परापेक्षामन्तरेण एव कम्पते कपि-युच् । वायौ ।

स्वकर्म्मन् न० स्वस्य कर्म्म । स्ववर्णोचिते क्रिये । "स्वकर्म्मनिरतः सदेति" गीता । [अत्रक् युक्तप्रयोगस्तु अपाणिनीयः ।

स्वकीय त्रि० स्वस्येदम् छ कुक् च । आत्मीये । अत्र नित्यमेव कुक् ।

स्वग सर्पणे भ्वा० प० सक० सेट् इदित् । स्वङ्गति असङ्गीत् ।

स्वगत त्रि० स्वस्मिन् मनसि आत्मनि वा गतम् गम क्त । मनोगते, आत्मगते च । नाटकाभिनये प्रविष्टपात्रपुरुषं वर्ज्जयित्वा रङ्गभूमि-स्थसामाजिकजनश्रवणयोग्ये वाक्ये न० । लक्षणं वाक्यस्वाभिधाने ।

स्वगुप्ता स्त्री० स्वेनैव गुप्ता । भूकुष्माण्ड्याम्, लज्जालुलतायाञ्च ।

स्वच्छ त्रि० सुष्ठु अच्छः प्रा० । अतिनिर्म्मले कालुष्यरहिते । सुक्तायां, स्फटिके च पु० । श्वेतदूर्व्वायाम् स्त्री० ।

स्वच्छन्द त्रि० स्वस्य छन्दोऽभिप्रायः छन्दोऽभिप्रायः यस्य । स्वाधीने

स्वच्छपत्र न० स्वच्छं पत्रं यस्य । अभ्रके ।

स्वच्छमणि पु० कर्म्म० । स्फाटिके ।

स्वज न० स्वस्मात् देहात् आत्मनो वा जायते । रुधिरे । पुत्रे पु० कन्यायां स्त्री० आत्मजाते त्रि० । [अस्त्रिलोके ।

स्वजन पु० स्वस्येव जनोऽजननमेककुले यस्य । ज्ञातौ । हृत० । आत्मस०

स्वठ गतौ संस्कारेऽसंस्कारे च प्वा० उभ० सक० सेट् । स्वठयति–ते, अविस्वठत्–त ।

स्वतन्त्र त्रि० स्वस्य तन्त्रं मतीकारो यस्य । स्वाधीने अपराधीने

स्वतस् अव्य० स्व+तसिल् । आत्मन इत्यर्थे ।

स्वता स्त्री० स्वस्य स्वकीयस्य भावः तल् । स्वकीयत्वे । "कामः स्वतां यास्यतीति" भट्टिः ।

स्वत्व न० स्वस्य भावः त्व । द्रव्यादिषु यथेष्टक्रयविक्रयादिक्रियासु नियोजके धर्म्मभेदे, स्वामित्वे च तच्च द्रव्यगतमात्मगतञ्च ।

स्वदन न० स्वद–ल्युट् । आस्वादे लेहने च । सुष्ठु अदनम् । सुभक्षणे ।

स्वधर्म्म स्वस्य वेदादिविहितोधर्म्मः। स्वानुरूपे वेदाद्युक्ते आचारादिधर्म्मे।
स्वधा अव्य० स्वद आ पृ० दस धः। पितृदेवोद्देशेन हविष्यागे। स्वेन धयति धे-क आप्। नाटकाभेदे स्त्री० "नमः स्वधायै स्वाहायै" इति पितृगाथा।
स्वधाप्रिय पु० स्वधाग्निर्न प्रियः याक०। कृष्णतिले, स्वधोप लक्षितश्राद्धादिप्रिये पित्रादौ च। [हिने च।
स्वधाभुज् स्वधेत्यनेन त्यक्तव्यं भुङ्क्ते भुज-क्विप्। पितृगणे,
स्वधिति(ती) स्त्री० स्वेन धीयते धा-क्तिच् धा ङीप्। कुठारे परश्वधे। पृ०। स्वधितिरत्र। [अयं भूधरे वा घटा०।
स्वन शब्दे भ्वा०पर०अक०सेट्-कथा०। स्वनति। अस्वनीत्-अस्वानीत्।
स्वन ध्वाने अद० चु० उभ० अक० सेट्। स्वनयति-ते असस्वनत्-त।
स्वन पु० स्वन-अप्। शब्दे। [च न०।
स्वनित त्रि० स्वन-कर्त्तरि-क्त। शब्दिते। भावे क्त। शब्दे, मेघगर्जिते
स्वपन न० स्वप-ल्युट्। शयने, निद्रायाञ्च। [र्जूर्य्याम्।
स्वपिण्डा स्त्री० स्वेनैव पिण्डः पिण्डाकारोऽस्त्यस्याः अच्। पिण्डखर्-
स्वप्न पु० स्वप-नङ्। निद्रायां, शयने, सुप्तस्य मानसिकज्ञानभेदे च।
स्वप्नकृत् न० स्वप्नं निद्रां करोति कृ-क्विप्। (घुसुनि) शाके।
स्वप्नज् त्रि० स्वप नञिङ्। शयनशीले।
स्वभाव पु० स्वस्य भावः। निसर्गे, नैसर्गिके-स्वकीये-धर्म्मे च।
स्वभावोक्ति स्त्री० स्वभावस्योक्तिरत्र। अलङ्कारोक्ते अर्थालङ्कारभेदे हृत० स्वभावस्य कथने। [कामे च।
स्वभू पु० स्वेनैव भवति भू-क्विप्। ब्रह्मणि, विष्णौ, शिवे, ईश्वरे,
स्वयंवर पु० स्वयमात्मना वरो वरणम्। "कन्ययात्मनैव स्वपतेर्वरणे, ऋषि स्वयंवर" इति नैघण्टम्। स्वयं हृणुते पतिम्। हृ-अच्। आत्मनैव पतिवरणकर्त्र्यां कन्यकायां स्त्री०।
स्वयङ्कृत पु० स्वयमात्मना कृतः। कर्त्तरि प्रत्ये, आत्मकृते त्रि०। "पूर्व्वजुष्टः स्वयंकृत" इति स्मृतिः।
स्वयङ्गुप्ता स्त्री० स्वयमात्मनैव गुप्ता। गुप्तशिल्पग्रामे।

स्वयन्दत्त पु० स्वयमात्मनैव नत्व पितृमातृभ्यां दत्तः । दत्तात्मके पुत्रभेदे "दत्तात्मा तु स्वयन्दत्त" इति स्मृतिः ।

स्वयम् अव्य० सु+अय- असुन् । आत्मनेपदार्थे ।

स्वयम्भु पु० स्वयम्+भू-कु । ब्रह्मणि ।

स्वयम्भुवा पु० स्वयम्भवति भू-क भूआदेशश्च । ब्रह्मणि ।

स्वयम्भू पु० स्वयं भवति भू-क्विप् । अनादौ ब्रह्मणि, कृष्णे च ।

स्वर आक्षेपे अद० चुरा० उभ० सक० सेट् । स्वरयति-ते अस्वरत्-त ।

स्वर् अव्य० सृ-विच् । स्वर्गे, "यच्च दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् अभिलाषोपनीतञ्च तत्सुखं स्वःपदास्पदं" मित्युक्ते दुःखासंभिन्ने सुखस्थाने, परलोके, देवावासे, शोभने च ।

स्वर पु० स्वर-अच्, सृ-अप् वा । उदात्तानुदात्तस्वरितरूपे वर्णोच्चारणप्रयत्नभेदे, ताल्वादिस्थानजन्ये अकारादिषु अक्षरभिन्नवर्णेषु गिरायाञ्च । तन्त्रोक्ते प्राणादिवायोर्व्यापारभेदे, काकादिजन्ये वर्णोच्चारणध्वनिविशेषे, निषादादिषु सप्तसु ध्वनिषु च । विस्तरो वाचस्पत्याभिधाने ।

स्वरग्रन्थन न० स्वराणां निषादादीनां गानध्वनिविशेषाणां ग्रन्थनमाश्रयः । सामवेदे ।

स्वरभङ्ग पु० स्वरस्य कण्ठध्वनिभेदस्य भङ्गो यस्मात् । रोगभेदे ।

स्वरमण्डलिका स्वराणां मण्डलमत्रास्त्यस्य ठन् । वीणायाम् हेत० । स्वरसमूहे । [एवुल् । वीणायां, वंश्यां च ।

स्वरलासिका स्त्री० स्वरैः निषादादिभिः लसति लसतीव लस-स्वरस पु० स्वेन स्वभावेन रसः आस्वाद्यः । गिरायिष्टकस्वभेदे, काव्यभेदे च । स्वस्य रसः रागः । स्वाभिप्राये, स्वतात्पर्य्ये, वाक्यादौ रचनाभङ्ग्यां च ।

स्वराज् पु० स्वेनैव राजते राज-क्विप् । ईश्वरे "अर्थेष्वभिप्रः स्वराड्विदुः" भागवतम् । वैदिकच्छन्दोभेदे च ।

स्वरापगा स्त्री० स्वःस्वर्गस्यापगा । गङ्गायाम् स्वर्गीयनदीत्वात् ।

स्वरित पु० स्वरोऽनोऽस्य इतच्। उदात्तानुदात्तसमाहारस्वरे स्वरभेदे स्वरयुक्ते त्रि०। [भेदे च]

स्वरु पु० सृ-उ। वज्रे, यूपखण्डे, दाहे, यज्ञे, सूर्यकिरणे, दक्षिणस्वरुचि त्रि० स्वस्यैव रुचिः प्रभा यस्मात्। यज्ञे, इत०। स्वप्नाग्निजाये स्त्री०।

स्वरूप न० स्वस्य रूपम्। स्वभावे। स्वमेव रूपम्। स्वात्मके पदार्थे स्वं यथास्वं रूपयति रूप-अण्। यथास्वरूपाभिन्ने-पण्डिते पु०। स्वेन स्वभावेनैवरूपमस्य। मनोज्ञे० त्रि०।

स्वरूपसंबन्ध पु० स्वरूपं सम्बन्धः, स्वरूपयोर्वा सम्बन्धः। न्यायोक्ते, स्वात्मके सम्बन्धे, षट्पदार्थातिरिक्ते पदार्थभेदे, यथा प्रतियोगित्वम् विषयत्वमित्यादि।

स्वरोदय स्वराणामुदयो यत्र। स्वरस्य श्वासविशेषस्य शुभाशुभफलज्ञानसाधने तन्त्रशास्त्रभेदे।

स्वर्ग पु० स्वरिति गीयते गै क सु+ऋज वज् वा। दुःखासम्भिन्ने, सुखबहुले, देवानामायासस्थाने च।

स्वर्गनाथ पु० ६त०। इन्द्रे। स्वर्गपत्यादयोऽप्यत्र।

स्वर्गवधू स्त्री० ६त०। अप्सरसि।

स्वर्गाचल पु० स्वर्गलोकस्योऽचलः। सुमेरुपर्वते।

स्वर्गिन् पु० स्वर्गोऽस्त्यस्य भोग्यत्वेन इनि। देवे। स्वर्गवासिनि त्रि०।

स्वर्गौकस् पु० स्वर्गमोको यस्य। देवे।

स्वर्जिक पु० सु+अर्ज्-वज् अस्यार्थे ठन्। सर्जिकाक्षारे। कर्म०। स्वर्जिकाक्षारादयोऽप्यत्र।

स्वर्ण न० सुष्ठु अर्णो वर्णोऽस्य। काञ्चने, धुस्तूरे, नागकेसरे, गौरवर्णाके च। [लेखे पु०।

स्वर्णकण न० स्वर्णमिव पीतःकणोऽस्य। कणगुलगुलौ ६त०। सुवर्णकणे

स्वर्णकाय पु० स्वर्णमिव पीतः कायोऽस्य। गरुडे।

स्वर्णकार पु० स्वर्णं स्वर्णमयमलङ्कारादि करोति कृ-अण्। (सेकरा) जातिभेदे।

स्वर्णकेतकी स्त्री० स्वर्णमिव पीता केतकी । पीतकेतक्याम् ।
स्वर्णक्षीरी स्त्री० स्वर्णमिव पीतं क्षीरं निर्यासोऽस्यस्य अच् गौ०ङीष् ।
ओषधिभेदे सा च मालवदेशे जायते ।
स्वर्णगैरिक न० स्वर्णमिव पीतं गैरिकम् । (वर्णकमाटि) पदार्थभेदे ।
स्वर्णग्रीवा स्त्री० नदीभेदे ।
स्वर्णचूड पु० स्वर्णमिव पीता चूडा यस्य । चामरपक्षिणि ।
स्वर्णज न० स्वर्णात् जायते जन-ड । वङ्गे । स्वर्णजातमात्रे त्रि० ।
स्वर्णजीवन्ती स्त्री० स्वर्णमिव पीता जीवन्ती । पीतपुष्पजीवन्त्याम् ।
स्वर्णदी स्त्री० स्वर्णं द्यति अपसारयति मूल्यवर्णत्वात् दो-क गौ० ङीष् ।
क्षुद्रिकाख्यायाम् । हृत० । गङ्गायाम् ।
स्वर्णदीधिति पु० स्वर्णमिव भास्वरा दीधितिरस्य । अग्नौ, चित्रकवृक्षे च ।
स्वर्णद्रु पु० स्वर्णमिव पुष्पादौ पीतो द्रुः । आरग्वधे ।
स्वर्णपक्ष पु० स्वर्णमिव पीतः पक्षोऽस्य । गरुडे ।
स्वर्णपाटक पु० स्वर्णं पाटयति पट-णिच्-एवुल् । टङ्कणे ।
स्वर्णपुष्प पु० स्वर्णमिव पीतं पुष्पमस्य । चम्पके, आरग्वधे, पु० स्त्री०
स्त्रीत्वे ङीष् । सा च स्वर्णकेतक्याञ्च । सातलायाम् कर्णिकारौ
स्त्री० टाप् । [ख्याम् ।
स्वर्णफला स्त्री० स्वर्णमिव पीतं फलमस्याः । (चांपाकला) स्वर्णकद-
स्वर्णभृङ्गार पु० स्वर्णमिव स्वर्णमयो वा भृङ्गारः । पीतभृङ्गराजे स्वर्ण-
मयकलशे च । [भेदे ।
स्वर्णमाक्षिक न० स्वर्णमिव पीतं माक्षिकम् । धातुनामख्याते उपधातु-
स्वर्णयूथी स्त्री० स्वर्णमिव पीता यूथी । पीतयूथिकायाम् ।
स्वर्णलता स्त्री० स्वर्णमिव पीता लता । ज्योतिष्मत्याम् ।
स्वर्णवर्णा स्त्री० स्वर्णमिव वर्णोऽपमस्याः हरिद्रायाम् ।
स्वर्णवल्कल पु० स्वर्णमिव पीतं वल्कलमस्य । ज्योतिष्कवृक्षे ।
स्वर्णशेफालिका स्त्री० स्वर्णमिव पीता शेफालिका । पीतशेफालिकायाम् ।
स्वर्णाङ्ग पु० स्वर्णमिवाङ्गं पत्रपुष्पादि-यस्य । आरग्वधे । पीतवर्णदेहे त्रि० ।
स्वर्णारि पु० हृत० । गन्धके तस्य स्वर्णमारकत्वात्तथात्वम् ।

स्वर्त्त गतौ सक०दुःखेन जीवने अक०चु०उ०सेट्। सूर्त्तयति ते असुसूर्त्तत् त
स्वर्द प्रीतौ अक० प्रीत्यने सेचने च सक० भ्वा० आत्म० सेट । सूर्दते
असूर्दिष्ट ।
स्वर्भानव पु० सूरिव भूमौ भानुर्दीप्तिरस्यस्य अण्। गोमेदमणौ ।
स्वर्भानु पु० सूः सूर्गे भानुर्दीप्तिरस्य । राहौ ।
स्वर्लोक पु० सूरेव लोकः भुवनम् । सूर्गे, हृत० । सूर्गस्थलोके ।
स्वर्वापी स्त्री० सूः सूर्गस्य वापीव । गङ्गायाम् ।
स्वर्वेश्या स्त्री० सूः सूर्गस्य वेश्या । मेनकाद्यप्सरस्सु ।
स्वल्प त्रि० सुष्ठु अल्पम् प्रा० । अत्यल्पे क्षुद्रे ।
स्वल्पकेशरिन् पु०स्वल्पः केशरोऽस्त्यस्य इनि । कोविदारवृक्षे ।
स्वल्पपत्रक पु० सुल्पं पत्रमस्य कप् । गौरसर्षपे ।
स्ववासिनी स्त्री० सु खिन् पितृगृहे वसति वस-णिनि । चिरं पितृगृह
स्थादिवासिन्यामूढायामनूढायां वा स्त्रियाम् ।
स्वसृ स्त्री० सु+अस-ऋन् । भगिन्याम् ।
स्वस्क गतौ चु० उ० सक० सेट् । सूस्कति ते असुसूस्कत् त ।
स्वस्ति अव्य०सु-अस-क्तिच्, अस्तीति विभक्तिरूपकम् अव्ययं वादि०वा ।
क्षेमे, आशिषि, पुण्यादौ, स्वीकारसूचने च ।
स्वस्तिक पु० न० । स्वस्ति शुभाय हितम् ठन् । "स्वस्तिकं प्राङ्मुखं
यत् स्यादस्तिन्द्यानुगतं भवेत् । तत्पार्श्वानुगतौ चान्यौ तत्पर्यन्त-
गतोऽपर" इत्युक्तलक्षणे गृहभेदे, सितावरणाके, आसनबन्धभेदे,
तण्डुलचूर्णनिर्म्मिते-त्रिकोणाकारे द्रव्यभेदे च "हृतं स्वस्तिक-
सिन्दूर" नित्यक्रियासनद्रव्यप्रापकवाक्यम्" चतुष्पदे पु० ।
स्वस्तिमुख पु० स्वस्ति मुखे आदौ यस्य । लेखे पत्रादौ । विप्रे
पु० । स्वस्तिवादिनि त्रि० ।
स्वस्तिवाचन न०स्वस्ति शुभस्य विप्रद्वारा वाचनम् । कर्मारम्भे विघ्नो-
पशान्तये ब्राह्मणद्वारा कर्त्तव्यकर्मणां शुभतावाचने ।
स्वस्तिवाचनिक त्रि० स्वस्तिवाचनाय हितं, तत आगतम्, तत्प्रभवं
वा ठन् । स्वस्तिवाचनसाधने, तदुक्तिकर्त्तरि, तत्सम्बन्धिनि च ।

स्वस्त्ययन न० स्वस्ति शुभमयनं लाभो यस्मात् । शुभार्थं क्रियमाणे वेदादिविहिते यज्ञयागादौ ।

स्वस्थ त्रि० स्वः परलोके तिष्ठति स्वेन स्वभावेन सुखेन, वा तिष्ठति स्था-क विसर्गलोपः । स्वभावस्थे, स्वर्गस्थिते, विनायासेन सुखेनावस्थिते च । "स्वस्था भवन्तु मयि जीवति धार्त्तराष्ट्राः" इति वेणीसंहारनाटकम् ।

स्वस्रीय पु० स्वसुरपत्यम् छ । भागिनेये भागिनेय्यां स्त्री० ।

स्वागत न० सुखेनागतम् सु+आ+गम्—क्त । सुखेनागमने "स्वागतं स्वानधीकारानिति, कुमारः तदस्यास्ति अच् । कुशले ।

स्वाच्छन्द्य न० स्वच्छन्दस्य भावः ष्यञ् । स्वाधीनत्वे, स्वास्थ्ये च ।

स्वातन्त्र्य न० स्वतन्त्रस्य भावः ष्यञ् । स्वाधीनत्वे परानधीनत्वे ।

स्वाति(ती) पु० स्त्री० स्वेनैव अतति अत इन् स्त्रीत्वपक्षे वा ङीप् । अश्विन्यादिषु पञ्चदशे नक्षत्रे, सूर्य्यपत्नीभेदे च ।

स्वाद प्रीतौ अक० प्रीणने सेचने च सक० भ्वा० आ० सेट् । स्वादते आस्वादिष्ट ।

स्वाद पु० स्वद—स्वाद वा घञ् । रसानुभवे, प्रीतौ, प्रीणने, सेचने च ।

स्वादु पु० स्वद—जण् । मधुररसे, गुडे, जीवकौषधौ च । हृद्ये, मधुरे, मनोज्ञे च त्रि० स्त्रियां वा ङीप् ।

स्वादुकण्टक पु० स्वादुः कण्टकोऽस्य । विकङ्कतवृक्षे ।

स्वादुकन्दा स्त्री० स्वादुः कन्दोऽस्याः । विदार्य्याम् ।

स्वादुका स्त्री० स्वादुना मधुररसेन कायति कै—क । नागदन्त्याम् ।

स्वादुखण्ड पु० स्वादुः मिष्टः खण्डोऽस्य । गुडे कर्म्मः । मधुरभागे ।

स्वादुगन्धा स्त्री० स्वादुरिष्टः गन्धोऽस्याः । रक्तशोभाञ्जने, भूमिकुष्माण्डाख्ये च ।

स्वादुपर्णी स्त्री० स्वादूनि पर्णान्यस्याः ङीप् । दुग्धिकायाम् ।

स्वादुपाका स्त्री० स्वादुः पाकोऽस्याः । काकमाच्याम् ।

स्वादुपिण्डी स्त्री० स्वादुः पिण्डः पिण्डाकारं फलमस्याः । पिण्डखर्ज्जूर्य्याम् ।

स्वादुफल स्त्री० स्वादु फलमस्य । कोविदार्य्याम् कर्म० । मिष्टफले न० ।

स्वादुमज्जन् पु० स्वादुः मज्जाऽस्य । पर्व्वतजे पीलौ ।

स्वादुमांसी स्त्री० स्वादु मांसमिव फलमस्याः । काकोल्याम् ।

स्वादुमूल न० स्वादु मूलमस्य । गर्जरे (गाजर) ।

स्वादुरसा स्त्री० स्वादुःरसोऽस्याः । काकोल्याम्, मदिरायाम्, शताव-र्य्याम्, द्राक्षायाम्, आम्रातके च ।

स्वादुलता स्त्री० स्वादुः लता । विदार्य्याम् ।

स्वादुस्कन्ध पु० स्वादुः स्कन्धः । दाडिमे ।

स्वाधीन त्रि० स्वस्याधीनः । स्वायत्ते स्वतन्त्रे ।

स्वाधीनपतिका स्त्री० स्वाधीनः पतिर्यस्याः कप् । नायिकाभेदे स्वाधीनभर्त्तृकादयोऽप्यत्र ।

स्वाध्याय पु० स्वःस्वकीयत्वेन विहित अध्यायः द्विजानाम्, अधि+इङ्-कर्म्मणि घञ् । द्विजैः पाठ्ये वेदभागभेदे "स्वाध्यायोऽध्येतव्य" इति स्मृतिः । भावे घञ् । अवश्यपाठ्य वेदाध्ययने "स्वाध्यायोऽजपदत्युक्तो वेदाध्ययनकर्म्मणीति" स्मृतिः ।

स्वान्त न० स्वन—क्त । मनसि—सङ्घाये च ।

स्वाप पु० स्वप—घञ् । निद्रायाम् शयने, अज्ञाने च ।

स्वापतेय न० स्वस्य धनस्य पतिः तस्येदम् ढञ् । धने ।

स्वाभाविक त्रि० स्वभावादागतः ठञ् । स्वभावसिद्धे, स्त्रियां ङीष् ("स्वाभाविकी स्वच्छते"त्युक्टः) ।

स्वामिन् त्रि० स्व+अस्त्यर्थे मिनि दीर्घश्च । अधिपतौ, ईश्वरे च । स्त्रियां ङीप् । हरे, विभौ, रूपे कार्त्तिकेये, भर्त्तरि, वात्स्यायनमुनौ, गरुडे, परमहंसे च पु० ।

स्वायम्भुव पु० स्वयम्भुवोऽपत्यं, तस्येदम् वा अण् ओरोदिति वक्तव्ये ओर्गुण इति संज्ञापूर्व्वकविधानादनित्यत्वान्न गुणः उवङ् । स्वयम्भुपुत्रे प्रथमे मनौ, स्वयम्भूसम्बन्धिनि त्रि० । "धाम स्वायम्भुवं जयुरिति" कुमारः । स्त्रियां ङीप् । सा च आम्रातायाम् ।

स्वार्थिक त्रि० स्वार्थे विहितः ठञ् । स्वार्थविहिते व्याकरणोक्ते प्रत्यये ।

स्वाराज् पु० स्वः स्वर्गे राजते राज–क्विप् । इन्द्रे ।

स्वाराज्य न० स्वराजः स्वाराजो वा भावः ष्यञ् । ब्रह्मत्वे, इन्द्रत्वे च

स्वारोचिष पु० द्वितीये मनौ । "स्वारोचिषेऽन्तरे प्राप्ते" इति चण्डी ।

स्वार्थ पु० स्वस्य अर्थः प्रयोजनम् अभिधेये वा । स्वप्रयोजने स्वाभिधेये च "सार्थकः स्वार्थबोधकादिति' यद्ग्रन्थे ।

स्वास्थ्य न० स्वस्थस्य भावः ष्यञ् । आरोग्ये, सन्तोषे, सुखे च ।

स्वाहा अव्य० सु+आ+हे–डा नि० । देवोद्देशेन हविस्त्यागे । अग्नि-भार्यायां "स्वाहयेव हविर्भुजमिति" रघुः मातृकाभेदे च स्त्री० "नमः स्वधायै स्वाहायै" इति पितृगाथा ।

स्वाहाप्रिय पु० ६त० । अग्नौ । स्वाहापत्यादयोऽप्यत्र ।

स्वाहाभुज् पु० स्वाहेतिमन्त्रेण त्यक्तद्रव्यं भुङ्क्ते भुज–क्विप् । देवे ।

स्विद् अव्य० स्विद–क्विप् । प्रश्ने, वितर्के, पादपूरणे च ।

स्विन्न त्रि० स्विद–क्त धर्मयुक्ते, प्रस्वेदान्विते च ।

स्वीकार पु० अपूर्वस्य स्वस्य कारः करणं स्व+च्वि+कृ–घञ् । अङ्गीकारे

स्वीय त्रि० स्वस्येदम् छ अपाणिनीयैरत्र न कुत्रेति मन्यते । स्वसम्बन्धिनि । नायिकाभेदे स्त्री० ।

स्वुर्च्छ विस्तृतौ भ्वा० प० सक० सेट् । स्वूर्च्छति अस्वूर्च्छीत् । [धीत् ।

स्वृ शब्दे अक० उपतापे सक० भ्वा० प० वेट् स्वरति अस्वारीत् अस्वा-

स्वॄ हिंसने क्र्या० पा० प० सक० सेट् । स्वृणाति अस्वारीत् । [क्षिप्त ।

स्वेज गतौ भ्वादि० आत्म० सक० सेट् चङि न ह्रस्वः । स्वेजते अस्वे-

स्वेच्छा स्त्री० स्वस्येच्छा । स्वाभिलाषे ।

स्वेच्छामृत्यु पु० स्वेच्छया मृत्युर्यस्य । भीष्मे स्वेच्छाधीन मृत्युयुक्ते त्रि०

स्वेद पु० स्विद–स्विद–घा, घञ् । पाकभेदे (सेका) धर्मे गात्रादितो जलादेः निष्क्रान्दने । [जातमात्रे त्रि० ।

स्वेदज पु० स्वेदाज्जायते जन–ड । स्वेदाजाते दंशादिजन्तौ । स्वेद-

स्वेदन न० स्विद–णिच्–ल्युट् । स्नानादितो घर्मादेर्निस्सारणव्यापारे । (भापरा) ।

स्वेदनी स्त्री० स्विद्यते क्ष्यतेऽनया स्विद्–ल्युट्–ङीष्। औषधभेदे (ताम्बोया) संज्ञायां कन् टापिह्रस्वः। स्वेदनिका। कन्युरूपे पात्रे भर्ज्जनपात्रे स्त्री०।

स्वैर न०सुष्ठु ईरम् ईर–अच् इडभावः। स्वेच्छायाम्। तद्वति मन्दे, च त्रि०

स्वैरिन् त्रि० स्वेनैव ईरयितुं शीलमस्य ईर–णिनि इडभावः। स्वेच्छाचारिणि सुतन्त्रे। व्यभिचारिस्त्रियां स्त्री० ङीप्।

स्वोपार्ज्जित त्रि० स्वेन उपार्जितम्। स्वयमर्ज्जिते धनादौ।

ह

ह अव्य० हा–ड। पादपूरणे, सम्बोधने, नियोगे, क्षेपे, निश्चये, प्रश्नेऽवधारणे च,। शिवे, जले, शून्ये, सङ्गमे, आकाशे, रक्षे, स्वर्गे, पापहरणे, चन्द्रे, सकोपवारणे, शुष्के च पु०।

हंस पु० हस–अच्–पृ०। सुनामख्याते पक्षिभेदे, निर्लोभत्वादौ, विष्णौ, सूर्य्ये, परमात्मनि, "हंसं तनौ सन्निहितं चरन्तमिति" नैषधम्। मत्सरे, यतिभेदे, मन्त्रभेदे० हेहस्यवायुचेष्टाभेदे, अश्वभेदे, सुमेरुपर्व्वते, शिवे, अवस्थिते, श्रेष्ठे, विशुद्धे, अजपामन्त्ररूपे वर्णे च "हंकारेण बहिर्याति सकारेण विशेत्पुनः, हंसेति सततं मन्त्रं जीवो जपति सर्व्वदेति" तन्त्रम्।

हंसक पु० हंसइव कायति शब्दायते कै–क। पादकटके नूपुरादौ।

हंसगामिनी स्त्री० हंसइव गच्छति गम–णिनि। गद्गदगामिन्यां स्त्रियाम्। हंसेन गच्छति णिनि ङीप्। ब्रह्माण्याम्।

हंसनादिनी स्त्री० "मत्तेन्द्रगमना तन्वी कोकिलालापसंयुता। नितम्बे गुर्व्विणी या स्यात् सा स्मृता हंसनादिनी"त्युक्तलक्षणायां नार्य्याम्

हंसपदी स्त्री० हंसस्येव पादाः मूलान्यस्याः पाद्मादौ स्त्रियां। ङीषि पक्षायः। गोधातकीलतायाम्। छन्दोभेदे तु हंसपदा।

हंसपाद न० हंसस्य पादः तद्वर्णोऽस्यास्य अच्। हिङ्गुले।

हंसमाला स्त्री० ६त० षड्ज्ञाद्याकारेण स्थिते हंससमूहे, कादम्बे च।

हंसरथ पु० हंसः रथोवाहनं यस्य। चतुर्मुखे ब्रह्मणि हंसवाहनादयोऽस्य।

हंसलोमन् न० हंस इव लोमशं लोमयुक्तम्। कार्पासे उपधानौ।

हंसवती स्त्री० हंसस्तत्सदृशाकारः अक्षमस्याः मतुप् मस्य वः। हंसपद्याम्।

हंसबीज न० हंसस्य बीजमस्य। हंसडिम्बे।

हंसाङ्घ्रि पु० हंसस्याङ्घ्रिरिव लोहितत्वात्। किङ्किरातवृक्षे।

हंसारूढ़ पु० हंसमारूढः आ+रुह-क्त। ब्रह्मणि तच्छक्त्यां ब्रह्माण्यां स्त्री०। [छन्दोभेदे च।

हंसी स्त्री० हंसस्य भार्य्या ङीप्। हंसयोषिति द्वाविंशत्यक्षरे पादके

हंहो अव्य० हंसितव्यक्तं जहाति हा-डो। सम्बोधने "हंहो चित्तयचित्तचन्द्रमणयं चन्द्रादनि दर्पे, हम्भे, प्रश्ने च।

हक्के(ङ्का) अव्य० हंसित्यव्यक्तं जल्पतेऽत्र जल्प-डे डा वा। नाट्यक्रियायां नटाभिनेयजनके चेटीसम्बोधने।

हट दीप्तौ भ्वा० प० अक० सेट्। हटति अहटीत्-अहाटीत्।

हट्ट पु० हट-ट दृश्य नेत्वम्। क्रयविक्रयस्थाने "प्रतिहट्टपथे चरट्टजादिति" नैषधम्। [चोर) चौरभेदे।

हट्टचौरक पु० हट्टे प्रकाशिते स्थाने एव चौरः स्वार्थे कन्। (हाट-

हट्टविलासिनी स्त्री० हट्टं विलासयति वि+लस-णिच्-णिनि ङीप् गन्धद्रव्यभेदे, हरिद्रायाञ्च। [अहाठीत्-अहठीत्।

हठ बीभत्से बलात्कारे मुदी च भ्वा० पर० अक० सेट्। हठति।

हठ पु० हठ-अच्। बलात्कारे- प्रसह्याच्च।

हठपर्णी स्त्री० हठत्ते म्रवते हठ-अच् हठं म्रवमाणं पर्णं यस्याः ङीप्। शैवाले, कुल्लिकायाञ्च।

हठयोग पु० हठात्कारेण योगः। प्राणायामादिक्रियाभ्यासजे राजयोगं विनैव परमात्मसाक्षात्कारहेतौ चित्तवृत्तिनिरोधात्मके योगे।

हठाल् पु० हठः म्रवमानः आलुरिव। कुल्लिकायाम् (पाला)।

ठ्ठी स्त्री० हठ-अच् गौ० ङीष्। वारिपर्यालि (पाला)।

हडि पु० हठ-इन् पृ०। पशुमारणसाधने काष्ठयन्त्रे (हाड़िकाठ)।

हडिक पु० हठ-इकक् पृ०। नीचजातिभेदे (हाड़ि)।

हड्ड न० हड ड डस्य नेत्वम् पृ०। अस्थि-(हाड) संज्ञायां कन्। नीचजातिभेदे (हाड़ि)।

हण्डा स्त्री० हन डा डस्य नेत्वम्। डहरि-ऋत्पात्रभेदे (हांड़ा) नाट्योक्तौ नीचसम्बोधने अव्य०।

हण्डिका स्त्री० क्षुद्रा हण्डा कन्। क्षुद्रे ऋत्पात्रे (हांड़ि)।

हण्डे अव्य० हन-ड डस्य नेत्वम्। नाट्योक्तौ नीचसम्बोधने।

हत त्रि० हन-क्त। नाशिते, प्रतिहते, प्रतिबद्धे, आशा रहिते, शुचिते च। भावे क्त, हनने, शुचने च न०।

हतक त्रि० हतइव नष्टप्रायत्वात् कन्। नष्टप्राये (मड़ा)।

हताश त्रि० हता आशा यस्य। आशाशून्ये, बन्ध्ये, निर्दये, निर्गुणे च

हति स्त्री० हन-क्तिन्। हनने, मारणे, व्याघाते, अपकर्षे, शुचने च।

हत्या स्त्री० हन-क्यप्। मारणे, बधे, प्राणवियोगानुकूल व्यापारे "ब्रह्महत्या सुरापानमिति" स्मृतिः।

हद् विष्ठोत्सर्गे भ्वा० आ० अक० सेट्। हदते अहदिष्ट।

हन बधे-गतौ च भ्वा० प० सक० अनिट्। हन्ति अवधीत्। "कृष्णं हन्ति कयोदरी" त्यादावलङ्कारित्वात्तु गतौ निहतार्थतामाहुः।

हनन न० हन-ल्युट्। "स्यात् प्राणविच्छेदफलव्यापारोहनन" मुच्यते, नित्यु क्ते, व्यापारे शुचने च।

हनोल पु० हन-इनु डीप् हन्यां लीयते ली-ड। केतकीवृक्षे।

हनु(नू) पु० स्त्री० हन-उनृ वा ङीप्। कपोलद्वयोपरिस्थे मुखभागे, हृद्विद्याविद्यां रोगे, अस्त्रभेदे, स्मृतौ च स्त्री०।

हनु(नू)मत् पु० हनु(नू)+अस्त्यर्थे मतुप्। रामस्य अनुचरे, अञ्जना-गर्भजाते पवनतनये वानरभेदे।

हन्त अव्य० हन-त। हर्षे, अनुकम्पायां, विषादे, आर्त्तौ, वादे, सम्भ्रमे, वाक्यारम्भे, खेदे, परिच्छेदे, करुणे च।

हनाकार पु० हन हर्षस्य कारः करणं, हनेत्यस्य कारः उच्चारणम् वा ष-तत्। अतिहर्षे देवे-अच्छे, हनशब्दप्रयोगे च।

हन्तृ त्रि० हन-तृच्। हननकर्त्तरि सततहननानुमोदयितरि च स्त्रियां ङीप्। "नहिघ्नान्तरहन्त्राख्येति" पुराणम्।

हन्त्र त्रि० हद-क्त। कृतपुरीषोत्सर्गे।

हम् अव्य० हा-डम्। हर्षोक्तौ, अनुनये च। [यत्न।

हम्भा(म्भा) स्त्री० हम्+भा-हम्भ-अङ् वा। गवां ध्वनौ पु०। हम्बा-

हम्म गतौ भा० प० सक० सेट्। हम्मति। अहम्मीत्।

हय गतौ सक० ग्लानौ अक० भ्वा० प० सेट्। हयति अहयीत्।

हय पु० हय हि-वा अच्। घोटके। [मोदायाञ्च स्त्री०।

हयगन्ध पु० हयस्येव गन्धोऽस्य। काचलवणे। अश्वगन्धायाम् अज-

हयग्रीव पु० हयस्येव दीर्घा ग्रीवाऽस्य। विष्णोरवतारभेदे, दैत्यभेदे च "हयग्रीवबधोपेतं तद्वै भागवतं विदुरिति" पुराणम् दुर्गायां स्त्री०।

हयग्रीवहन् पु० हयग्रीवाख्यं दैत्यं हतवान् हन किप्। विष्णौ।

हयन न० हि-ल्युट्। कर्परिरधे। [पाने।

हयपुच्छी स्त्री० हयस्य पुच्छाकारोऽस्त्यस्याः अच् गौ० ङीष्। भाप

हयप्रिय पु० ६त०। यवे, अश्वगन्धायां, खर्जुर्यां च स्त्री० अश्वप्रभे त्रि० हयेष्टादयोऽप्यत्र। [ण्वुल्। तत्रैव।

हयमार पु० हयं मारयति निषेधयात् मृ-णिच् अण्। करवीरे,

हयमारक पु० हयं मारयति मृ-णिच् ण्वुल्। अश्वत्थवृक्षे।

हयवाहनसङ्कर पु० हयस्य वाहनं चालनं सङ्किरति सम्+कृ-अच्। रक्तकाञ्चने।

हया स्त्री० हयः हयगन्धोऽस्त्यस्याः। अश्वगन्धायाम्।

हयाध्यक्ष पु० हयेषु तद्रक्षणेषु अध्यक्षः। अश्वरक्षणाधिकृते।

हयानन्द पु० हयमानन्दयति आ+नन्द्-णिच्-अण्। सूते।

हयारि पु० ६त०। करवीरे।

हयाशना स्त्री० हयैरश्यते अश-ल्युट्। सुश्रुतोक्तवृक्षे।

हयोत्तम पु० हयेषु उत्तमः । अश्वरत्ने आजानेयेऽश्वे ।

हर पु० हृ-अच् । रुद्रे, अग्नौ, गर्जभे, विभाजके च "अन्योन्यहारा-भिहतौ हरांशा विति" बीजावती । हृ-भावे अप् । हरणे, विभाजने च ।

हरगौरी स्त्री० हरदेहार्द्धहरा गौरी । अर्द्धनारीश्वररूपे शिवपार्व्वती-त्योर्मूर्त्तिभेदे द्वन्द्व० । शिवपार्वत्योः द्वि० व० ।

हरण न० हृ-भावे ल्युट् । स्थानान्तरकरणे, विभाजने च कर्मणि ल्युट् । यौतुकादौ देये धने ।

हरतेजस् न० ६त० । पारदे शिवबीर्य्ये च । हरबीजादयोऽप्यत्र ।

हरप्रेखरा स्त्री० हरस्य प्रेखरमावासत्वेनास्त्यस्याः अच् । गङ्गायाम्

हरि पु० हृ-इन् । विष्णौ, सिंहे, सर्पे, वानरे, भेके, चन्द्रे, सूर्य्ये, वायौ, अश्वे, यमे, क्षुरे, अङ्गुलि, किरणे, नवखण्डमध्ये वर्षभेदे, मयूरे, कोकिले, हंसे, शुकपक्षिणि, भर्त्तृहरिनामके वाक्यपदीय-ग्रन्थकारके पण्डिते, इन्द्रे, पीते, पिङ्गलवर्णे, हरिद्वर्णे च । तद्वति त्रि० "हरिं विदित्वा हरिभिश्च वाजिभिरि"ति रघुः ।

हरिकेश पु० हरिः पिङ्गलः केशोऽस्य । शिवे, शिवभक्तयक्षभेदे च । स एव तत्प्रसादात् काश्यां दण्डपाणित्वनाम्नवान् इति काशीखण्डे स्थितम् । [परीभेदे च ।

हरिघट्ट न० ६त० । हरेर्विष्णुमूर्त्तेर्घट्टम् । हरिमूर्त्तिघट्टे एकचक्र-

हरिचन्दन न० हरेरिन्द्रस्य प्रियं चन्दनम्, चन्दयति चदि-ल्यु ६त० वा । देवतरुभेदे । हरेर्विष्णोः प्रियं चन्दनम् । श्वेतचन्दने गोशी-र्षनामके—मलयैकदेशे—जाते चन्दनभेदे, ज्योत्स्नायां, तुङ्गुने, चन्द्रराङ्गे च न० ।

हरिण पु० हृ-इनन् । स्वनामख्याते पशौ, शिवे, विष्णौ, हंसे, शुक्ल-वर्णे पाण्डुवर्णे च । तद्वति त्रि० ।

हरिणहृदय पु० हरिणस्येव भीतं हृदयमस्य । भीरौ ।

हरिणाक्षी स्त्री० हरिणस्येवाक्षि यस्याः ५त० अच् समा० ङीष्

कृष्णविलासिनीनामगन्धद्रव्ये हरिद्रातुल्यनेत्रवति त्रि० स्त्रियां, ङीप्। 'हरिणाक्षि ! कटाक्षेण मुह्यटः।

हरिणाङ्क पु० हरिणः मृगनामको मृगोऽङ्कचिह्नं, अङ्के क्रोडे वा अस्य। चन्द्रे।

हरिणी स्त्री० हरितवर्णा स्त्री ङीप् तस्य नः। हरिद्वर्णायां स्त्रियां, स्वर्णप्रतिमायां, स्वर्णयुथ्यां, मञ्जिष्ठायां, वरुणायां, वराहस्त्रियां, सप्तदशाक्षरपादके छन्दोभेदे च। हरिणस्य स्त्री० ङीप्। मृग्याम्

हरित् पु० हृ-इति। नीलपीतमिश्रितवर्णे (पातारङ्ग) पलाशवर्णे च तद्वति त्रि०। सूर्य्याश्वे, शुद्धे, सिंहे, कृष्णे, विष्णौ च पु०।

हरित पु० हृ-इतच्। सिंहे, मन्थानदण्डे, हरिद्वर्णे च। तद्वति त्रि०। स्त्रियां ङीप् तस्य नत्वं। दूर्वायां, जयन्त्यां, हरिद्रायां, कपिलद्राक्षायां नीलदूर्वायाञ्च स्त्री० टाप्।

हरितक न० हरितेन वर्णेन कायति प्रकाशते कै-क। शाके।

हरितशाक पु० हरितं शाकमस्य। शोभाञ्जने।

हरिताल न० हरिवर्णस्य पीतवर्णस्य तालः प्रतिष्ठा यत्र। पीतवर्णे उपधातुभेदे 'स हरितालसमाननवांशुकमिति' माघः। पीतवर्णपक्षिभेदे पु० स्वार्थे कन्। हरितालेऽपि।

हरितालिका स्त्री० हरेस्तालो हस्ततालो यस्यां कप् अत इत्वम्। सौरभाद्रशुक्लचतुर्थ्याम्। हरितवर्णाय अलति पर्य्याप्नोति अल-ण्वुल्। दूर्वायाम्। अण् ङीप्। हरितालो। दूर्वायाम्, सा च आकाशरेखायां, खड्गलतायाञ्च।

हरिताश्म न० हरितवर्णमश्म अच् समा० (पेरीजा) मणिभेदे, तत्थे, (तुँते) उपधातुभेदे च।

हरित्पर्ण न० हरिद्वर्णं पर्णमस्य। मूलके (मूला) हरिपर्णादयोऽप्यत्र

हरिद्भ पु० हरिः हरिद्वर्णो दर्भः। हरिद्वर्णे कुशे।

हरिदश्व पु० हरिन्नामकोऽश्वो यस्य। सूर्य्ये।

हरिदेव पु० हरिर्देवोऽधिष्ठात्री देवता अस्य। अश्वत्थवृक्षे।

हरिद्गर्भ पु० हरिद्वर्णो गर्भो यस्य। हरिद्वर्णे कुशे।

हरिद्रुव पु० हरिवर्णः पिङ्गलवर्णो द्रवद्रव्यः । नागकेसररञ्जसि ।

हरिद्रा स्त्री० हरिं पीतवर्णं द्रवति द्रु-ड । सुनामख्याते ओषधिभेदे

हरिद्रागणेश पु० हरिद्रावर्णयुक्तो गणेशः । पीतवर्णे गणेशभेदे ।

हरिदाभ पु० हरिद्रेव आभाति आ+भा-क । पीतसाले (पियासाल) कर्बुरके, पीतवर्णे च । तद्वति त्रि० ।

हरिदारोग त्रि० हरिद्राया इव रागः रञ्जनमनुरागोऽस्य । अस्थिरानुरागे सौहृदे । [हरिद्रायाञ्च ।

हरिद्रु पु० हरिः हरिद्वर्णो दारादिद्वारा, द्रुः । इक्षमात्रे, दारु-

हरिद्वार न० हरेस्तत्प्राप्तेः द्वारं सेवनात् । सुनामख्याते तीर्थभेदे ।

हरिनामन् न० हरेर्नाम तदाख्यानं वा । हरिनामनि तदाख्याते च हरेरिव नामास्य । सर्पे पु० ।

हरिनेत्र न० हरेर्नेत्रमिव । श्वेतपद्मे हृतं० । विष्णोर्लोचने । हरेः सिंहस्येव नेत्रमस्य दीर्घत्वात् । मेचके पु० ।

हरिन्मणि पु० हरिद्वर्णो मणिः । मरकते मणौ ।

हरिन्मुद्ग पु० हरिद्वर्णो मुद्गः । शरदि पक्वमुद्गे ।

हरिप्रिय न० हरेर्विष्णोः प्रियम् । कालीयके चन्दने, खदीरे च । कदम्बे, पीतभृङ्गराजे विष्णुकन्दे, करवीरे, शङ्खे, वन्धूके, शिवे, बालुके च पु० । लक्ष्म्यां, तुलस्यां, पृथिव्यां, द्वादश्यां तिथौ च स्त्री० । हरिवल्लभे त्रि० ।

हरिबालुक न० हरेर्विष्णोः प्रियम् बालुकम् । एलबालुके ।

हरिभक्त त्रि० हरौ विष्णौ भक्तः । विष्णुभक्तिमति 'सर्व्वजीवेषु यो विष्णुं भावयेत् समभावतः । हरौ करोति भक्तिञ्च हरिभक्तः स च स्मृतं' इति पुराणोक्ते सर्व्वत्र समदृष्टिपूर्वकहरिसेवके पु० ।

हरिभद्र न० हरिं भद्रयति सनर्पयति अच् । हरिबालुके ।

हरिभुज् पु० हरिं भेकं भुङ्क्ते भुज-क्विप् । सर्पे ।

हरिमन्थ पु० मन्थते मन्थः एकदेशः हरिःपीतो मन्थो यस्य । चणके, तस्य बह्वमन्थोऽपि पीतत्वानपायात्तथात्वम् । हरिं सर्पं मन्थति मन्थ-अण् । गन्धिकारिकायाम् देशभेदे च ।

हरिमन्थक पु० हरिः पीतो मन्थ एकखण्डो यस्य कप्। चणके।

हरिमन्थज पु० हरिमन्थे देशे जायते-जन-ड। चणके, कृष्णचणके च

हरिवंश पु० ६त०। विष्णुवंशे, हरेर्वंशो आख्येयत्वेनास्त्यत्र अच् महाभारतान्तर्गते खिलरूपे ग्रन्थभेदे।

हरिवर्ष न० हरिनामकं वर्षम्। जम्बुद्वीपस्य नववर्षमध्ये वर्षभेदे।

हरिवासर न० हरिप्रियं वासरम्। एकादशीदिवसे, द्वादशी प्रथमपादे च। 'अजमाश्रित्य पापानि तिष्ठन्ति हरिवासरे इति, द्वादश्याः प्रथमः पादो हरिवासरसंज्ञकः इति च पुरा०।

हरिवाहन पु० हरिं वाहयति स्थानान्तरं नयति वह+णिच् ल्यु। गरुडे ६त० वारिवाहनमध्यत् न०।

हरिवीज न० हरेर्बीजमुत्पत्तिकारणत्वेनास्त्यस्य अच्। हरितालें 'हरितालं हरेर्बीजं लक्ष्मणावीजं मनःशिलेति वैद्यकम्।

हरिशयन न० हरेः शयनं निद्रा। विष्णुनिद्रायाम्। हरेः शयनं यत्र तदुपलक्षिते काले स च 'मैत्राद्यपादे खपितोऽहि विष्णु'रित्युपक्रम्य 'प्रबुध्यते माघचतुष्टयेने'त्यन्तेन दर्शितः आषाढस्य शुक्लद्वादश्यवधिकार्त्तिकशुक्लद्वादशीपर्य्यन्तरूपोमासचतुष्टयात्मकः। विस्तरो वाचस्पत्याभिधाने।

हरिश्चन्द्र पु० हरिः चन्द्रइव ऋषौ सुट्। सूर्य्यवंशे त्रिशङ्कपुत्रे नृपभेदे। ऋग्विभक्तौ तु न सुट्। हरिचन्द्रएव।

हरिश्चन्द्रपुर न० ६त०। सौभनगरे।

हरिसङ्कीर्त्तन न० हरेर्हरिनाम्नः संकीर्त्तनं कथनम्। श्रीविष्णोर्नामोच्चारणे 'सकलं विपत्फलं राजन्! हरिसङ्कीर्त्तनं विने'ति पुराणम्।

हरिहय पु० हरिवर्णौ हयौयस्य। इन्द्रे 'हरिं विदित्वा हरिभिश्च वाजिभि'रिति रघौ तस्य हरिवर्णतुरगत्वमुक्तम्।

हरिहर पु० हरियुक्तो हरः। हरिहरयोः संश्लिष्टार्द्धदेहतया स्थिते मूर्त्तिभेदे। ६त०। शिवनारायणयो द्वि० ब०।

हरिहरक्षेत्र न० हरिहरयोः प्रियं क्षेत्रम्। गङ्गागण्डकी-सङ्गमा-न्तिकदेशस्थे पाटलिपुत्रादुत्तरस्यां दिशि स्थिते तीर्थभेदे।

हरीतकी स्त्री० हरिं पीतवर्णं फलहारं दधाति प्राप्ता दत्त-क्त। संज्ञायां कन् गौ० ङीप्। सुनामख्याते वृक्षे तस्याः फलम् अण् तस्य लुप्। हरीतकीफले स्त्री०। कदाचित् कुपिता माता सोदरस्या हरीतकी'-ति वैद्यकम्।

हरेणु स्त्री० हृ-एणु। रेणुकानामगन्धद्रव्ये, कुलस्त्रियाञ्च। (मटर) सतीले पु०। स्वार्थे कन् तत्रैव।

हर्त्तृ त्रि० हृ-तृच्। हरणकारिणि चौरे, सूर्य्ये च पु०।

हर्य्य न० हृ-यत् क्षुट् च। धनिनां सद्मभेदे 'रम्यं हर्य्यतलमिति प्रबोधचन्द्रोदयः।

हर्य्य क्षमे अक० गतौ सक० भ्वा० पर० सेट्। हर्य्यति अहर्यीत्।

हर्य्यक्ष पु० हरि पिङ्गलमक्षि यस्य बच् समा०। सिंहे, कुबेरे च।

हर्य्यश्व पु० हरिवर्णोऽश्वोऽस्य। इन्द्रे।

हर्ष पु० हृष-घञ्। सुखे, इष्टाधिगमजन्यानन्दे।

हर्षण पु० हर्षयति अभीष्टदानात् हृष-णिच्-ल्यु। विष्कम्भादिमध्ये चतुर्दशे योगे। हर्षकारके त्रि०। हृष-ल्युट्। हर्षे न०।

हर्षमाण पु० हृष ताच्छील्ये चानश्। आद्यदेवभेदे हृष्टचित्ते त्रि०

हर्षिणी स्त्री० हृष-णिच् णिनि ङीप्। विजयायाम्। हर्षकारके त्रि०

हर्षित त्रि० हर्षोजातोऽस्य इतच्। जातानन्दे।

हल विलेखे भ्वा० पर० सक० सेट् ज्वलादि०। हलति अहालीत्।

हल न० हल्यते क्षुद्यतेऽनेन हल-घञर्थे क। लाङ्गले।

हलद्दी स्त्री० हल-शतृ हलन्तं क्षुद्रकमपि दायति शोधयति दै-क गौ० ङीष्। हरिद्रायाम्।

हलधर पु० हलं धरति आयुधत्वेन धृ-अच्। बलरामे। क्षुद्रके त्रि० 'उन्मूलिता हलधरेण पदावघातैरि' त्युद्भटः।

हलभृति स्त्री० हलेन हलवाह्या भृतिः ष०तत्। वृत्तौ।

हला व्य० हेति लीयते ला-का। नाट्योक्तौ सखीसम्बोधने, सख्यां पृथिव्यां, जले च।

हलायुध पु० हलेन आयुध्यति आ+युध क। बलदेवे।

हलाहल पु० हलेनेव आहलति विलिखति आ+हल-अच्। विषभेदे

हलि पु० हल-इन्। हलग्रहे।

हलिन् पु० हलोऽस्त्यस्यायुधत्वेन इनि। बलरामे। लाङ्गले त्रि०।

हलीन पु० हलाय हितः ख। शाकवृक्षे। (गेरुन)।

हलीषा स्त्री० हलस्य ईषा यत्र०। लाङ्गलदण्डे।

हल्य त्रि० हलं हलकर्षणमर्हति तस्मै दं वा यत्। हलकृष्टे क्षेत्रादौ, हलसम्बन्धिनि च। हलानां समूहः यत्। हलसमूहे स्त्री०।

हल्ल विकाशे भ्वा० पर० अक० सेट्। हल्लति अहल्लीत्।

हल्लक न० हल्ल-एषुल्। रक्तकुङ्कुमे (हेला)।

हल्लीश न० हल्ल किप् लष-अच् ष० कर्म०। स्त्रीणां मण्डलिकाकार-नृत्ये। ततः कन्। तत्रैव।

हव पु० हु अप् हु-अप् पृ० वा। यज्ञे, आह्वायां, होमे आह्वाने च

हवन न० हु ल्युट्। होमे देवाद्युद्देशेन मन्त्रपूर्व्वकं वह्नौ हविःप्रक्षेपे।

हवनी स्त्री० हूयतेऽस्यां हु-ल्युट्। यज्ञकुण्डे।

हवनीय त्रि० हु कर्म्मणि अनीयर्। होमद्रव्ये।

हवा अव्य० हृ वाच ह्वच्० प्रतिज्ञार्थे।

हविरशन पु० हविरत्ति अद-युच्। वह्नौ।

हविर्गन्धा स्त्री० हविषो गन्धो यस्याम्। गव्याम्। (गांद)।

हविर्गेह न० हविषो गृहम्। यज्ञमण्डपसन्निकृष्टे हवनीय द्रव्य-स्थापनार्थे गेहे।

हविर्मन्थ पु० हविषे मथ्यतेऽसौ मन्थ-घञ्। गव्यिकारीवृक्षे।

हविष्य न० हविषे हितम् यत्। घृते, स्वार्थे कन्। हैमन्तिकादिधान्ये। च "चेरुर्हविष्यं भुञ्जाना" इति भागवतम्।

हविष्यान्न न० कर्म०। "हैमन्तिकं सितार्जुनं धान्यं शुद्धान्तिलाश्यामाः कलायकङ्गुनीवारा वास्तूकं हिलमोचिका। मर्षिका कालशाकञ्च

मूलकं केरुकेमरत् । लवणे सिन्धु सामुद्रे गव्ये च दधिसर्पिषी । पयोऽनुद्भूतसारश्च पनसाम्रहरितकी । तिन्तिडी जीरकश्चैव नागरश्चैवपिप्पली । कदली लवली धात्री फलान्यगुडमैक्षवम् । घृतैलपक्वं सुनयो हविष्यान्नं प्रचक्षते" इत्युक्ते व्रतादौ भक्ष्यद्रव्यभेदे ।

हविस् न० हूयते हुकर्म्मणि असुन् । घृते, हवनीयद्रव्यमात्रे च यथायामेदसो हविषोनुब्रूहीति' श्रुतिः । भावे असुन् । होमे ।

हव्य न० हु-कर्मणि यत् । देवयोग्यान्ने हवनीयद्रव्ये त्रि० । भावे यत् होमे न० । [खिन्ने अन्ने चरौ ।

हव्यपाक पु० हव्याय होमाय पाको यस्य । होमार्थं घृतादिसिद्धिते ।

हव्यवाह पु० हव्यं वहति देवान् वह-अण् । अग्नौ ।

हव्यवाहन पु० हव्यं वाहयति वह-णिच् ल्यु । वह्नौ ।

हव्याश पु० हव्यमश्नाति अश-अण् । वह्नौ । ल्यु । हव्याशनोऽप्यत्र पु०

हस हासे भ्वा० प० अक० सेट् सिचि न वृद्धिः । हसति अहसीत् दोषदर्शनपूर्वकहासे । तु सकर्म्मकः "स्मितावहस्येव पुरं मघोनः" इति भट्टिः ।

ह(हा)स पु० हस अप् घञ् वा । हासे सुखविकाशनभेदे ।

हसन न० हस-ल्युट् । प्रीत्यासुखकपोलादेर्विकाशने हासे ।

हसन्ती स्त्री० हस भ ङीप् । अङ्गारधानिकायां मल्लिकाभेदे, शाकिनीभेदे च । हस-शतृ-ङीप् । हासिनि त्रि० । स्त्रियाम् ङीप् ।

हसित न० हस-भावे क्त । हास्ये, कर्त्तरि क्त । ईषद्धासे विकशिते च ।

हस्त पु० हस-तन् नडुट् । देहावयवभेदे (हात) चतुर्विंशत्यङ्गुल परिमाणे यवोदरैरङ्गुलमष्टसंख्यैर्हस्तोऽङ्गुलैः षड्गुणितैश्चतुर्भिरिति' लीलावती । हस्तिशुण्डे च । अश्विन्यादिषु त्रयोदशे नक्षत्रे पु० स्त्री० । जाह्नवी हस्तयोगे, इति पुराणम् । 'पुष्या हस्ता तथा स्वातिरि'ति ज्योतिषम् ।

हस्तामलक न० हस्तस्थितमामलकम् आमलक्याः फलं । तद्वि वा । करावस्थितामलकफले, सहज अनायासदृश्ये पदार्थे वेदान्तप्रसिद्धग्रन्थभेदे च । करामलकादयोऽप्यत्र ।

हस्तिक न० हस्तिनां समूहः कन्। हस्तिसमूहे।

हस्तिकर्ण पु० हस्तिनः कर्ण इव पर्णमस्य अच्। एरण्डवृक्षे, पलाशभेदे, गणदेवतभेदे हस्तिकन्दे, रक्तैरण्डे च। कन् किंशुकभेदे।

हस्तिकन्द पु० हस्तिनः पदमिव कन्दोऽस्य। खनामख्याते कन्दभेदे।

हस्तिकरञ्ज पु० हस्तीव महान् करञ्जः। महाकरञ्जे।

हस्तिकर्णदल पु० हस्तिनः कर्ण इव दलमस्य। पलाशभेदे।

हस्तिकोलि पु० हस्तीव कोलिः। बदरीभेदे।

हस्तिघोषा स्त्री० हस्तीव हृहतो घोषा। हृहद्घोषायाम्।

हस्तिघोषातकी स्त्री० हस्तीव हृहती घोषातकी। हस्तिघोषायाम्।

हस्तिचारिणी स्त्री० हस्तीव चरति चर-णिनि। महाकरञ्जे।

हस्तिदन्त पु० ६त०। करिदन्ते। तदाकारोऽस्त्रस्य अच्। मूलके न०। यष्टभित्तिनिखाताई काष्ठनिर्मितकलिकाकारे पदार्थे नागदन्तादयोऽप्यत्र। [भेदे।

हस्तिदन्तफला स्त्री० हस्तिदन्त इव दन्त इव फलमस्याः। एरण्डे कर्कटी-

हस्तिन् पु० हस्तः शुण्डादण्डोऽस्त्यस्य। गजे चन्द्रवंश्ये नृपभेदे च

हस्तिनख पु० हस्तिनो नख इव हस्तिना न खन्यते नञ्+खन-ड वा। पुरद्वारस्थे, मृत्कूपे, दुर्गद्वारावरोधनार्थे निम्नोन्नते खातोद्धृते मृद्राशौ च। [अलुक् च०। (दिल्ली) पुरभेदे।

हस्तिनापुर न० हस्तिना तदाख्यनृपेण चिह्नितं तत्प्रथमत्वात् पुरम्

हस्तिनी स्त्री० हस्तिनः योषा ङीप्। करिण्याम् गजयोषिति स्त्रीभेदे च।

हस्तिप पु० हस्तिनं पाति पा-क। हस्त्यारोहे। स्वार्थे कन् तत्रैव

हस्तिपत्र पु० हस्तिकर्ण इव पत्रमस्य। हस्तिकन्दवृक्षे।

हस्तिपर्णिका स्त्री० हस्तिकर्णइव पर्णमस्याः कप् अत इत्त्वम्। राजकोषातक्याम्। [कर्कटाच्च।

हस्तिपर्णी स्त्री० हस्तिकर्ण इव पर्णमस्या ङीष्। ओरटालतायां,

हस्तिमद पु० ६त०। करिकरनिःसृतमदजले। स इव। गन्धद्रव्यभेदे च।

हस्तिरोहणक पु० हस्तीव रोहते ल्यु ककन्। महाकरञ्जे।

हस्तिलोध्रक पु० हस्तीव लोध्रः स्वार्थे कन्; लोध्रभेदे।

हस्तिविषाणी स्त्री० हस्ति विषाणं गजदन्तसदाकारः मध्यभागो (थोड़) यस्याः गौ० ङीष्। कदल्याम्।

हस्तिशुण्डा(ण्डी) स्त्री० हस्तिशुण्डस्तदाकारोऽस्त्यस्याः अच् वा गौ० ङीष्। (हाँतिशुड़ा) वृक्षे।

हस्तिश्यामाक पु० हस्तीव स्थूलः श्यामाकः। स्थूलश्यामाके।

हस्ते अव्य० हस्त+ए। पाणौ दत्यर्थे स्वीकारे च।

हस्त्यध्यक्ष पु० ७त०। गजाध्यक्षे गजरक्षणादौ नियुक्ते च।

हस्त्यारोह पु० हस्तिनमारोहति। आ+रुह अण्। हस्तिपके।

हहा पु० हेति शब्दं जहाति हा-किप्। गन्धर्वभेदे।

हा त्यागे जु० प० स० अनिट्। जहाति अहासीत् निष्ठातस्य नः।

हा गतौ जु० आ० स० अनिट्। निष्ठातस्य नः। जिहीते अहासिष्ट।

हा अव्य० हा-क। विषादे, शोके, पीडायां, कुत्सायाञ्च।

हाङ्कर पु० हा विषादाय पीडायै वा अङ्कं राति रा क ह्रस्वनामख्याते जलजन्तुभेदे। [मिते त्रि०।

हाटक न० हट-ण्वुल्। देशभेदे। तन्मिते-स्वर्णे, धुस्तूरे च स्वर्णनि-

हान न० हा भावे ल्युट्। परित्यागे, "हिमहानकृता न कृतेति भट्टिः।

हानि स्त्री० हा-क्तिन् नि० निः। क्षतौ अपचये।

हायन पु० स्त्री० अम्बु जहाति हा-ल्यु-नि०। व्रीहौ। भावे जहाति हा ल्यु नि०। वत्सरे आर्द्धशिखायां स्त्री०।

हार पु० हृ-कर्म्मणि घञ्। मुक्तामालाभेदे "हारो नारोपितः श्यामे कण्ठे, इति सीतावाक्यम्। हरतीति कर्त्तरि घञ् यद्वा भाजके, 'अन्योन्यहारार्भकृतौ हरांशाविति लीलावती।

हारक पु० हृ-ण्वुल्। चौरे, कितवे, शास्त्रोटकभेदे, भाजकाङ्के च हरणकर्त्तरि त्रि०। [द्राक्षायाम्।

हारहारा स्त्री० हार इव हरति आस्वादनात् हृ-अण्। कपिल-

हारङ्करा स्त्री० हृ-क्विप् ङ्रः हारदव ङ्रवं राति रा-क । द्राक्षा-याम् । मद्ये पु० । [गङ्गास्तवः । पुरुषोत्तमक्षेत्रे कोषभेदे च ।
हारावली स्त्री० हार इवावली । मुक्तावल्यां 'ङ्कारहारावलीति'
हारि(री) स्त्री० हृ-णिच्-इन् वा ङीप् । द्यूतादिभङ्गे तत्पराजये, पथिकसमूहे च । [त्वात् तथात्वम् । हरिद्वारक्षे त्रि० ।
हारिद्र पु० हरिद्रया रक्तः अण् । कदम्बवृक्षे तत्पुष्पस्य पीत प्राय-
हारिन् त्रि० हारोऽस्यास्ति इनि हृ-णिनि वा । हारके, हार विभ्रति, मनोहारिणि च । 'हारीणबलानां हारीणबलाना' मिति भट्टिः । [कितवे च ।
हारीत पु० हृ-णिच्-इतच् । स्मृतिकर्त्तरि मुनिभेदे । पक्षिभेदे,
हार्द्द न० हृदयस्य कर्म युवा० अण् हृदादेशः । स्नेहे, प्रेमणि, हृदि भवः विदितो वा अण् । हृदयस्थे, हृदयवेद्ये च त्रि० ।
हार्य्य पु० ह्रियतेऽसौ हृ-ण्यत् । विभीतकवृक्षे । हरणीये त्रि० ।
हाल पु० हलोऽस्यास्ति अण् हल एव वा अण् । बलराने, हले च ।
हाला स्त्री० हल-घञ् । मद्ये, तालरसजे मद्ये च ।
हालाहल पु० न० हालेव हलति हल-अच् । विषभेदे, कीटभेदे च मद्ये स्त्री० तत्र ङीष् ।
हालिक त्रि० हलेन खनति हलः प्रहरणमस्य तस्येदं वा ठक् ठञ् वा । हलकर्षके, हलेन योद्धरि, हलसंबन्धिनि च ।
हाव पु० हे-घञ् त्रि० । आकूते स्त्रीणां ङ्कारभावजे चेष्टाभेदे च
हास्तिक न० हस्तिनां समूहः ठक् । हस्तिसमूहे ।
हास्तिन न० हस्तिना क्रमेण निर्वृत्तम् नगरम् अण् संयोगादित्वा-दिनो न टिलोपः । हस्तिनापुरे ।
हास्य न० हस-ण्यत् । हासे, हसने, अलङ्कारोक्ते, रसभेदे च ।
हाहाकार पु० हाहाङ्कारस्य कारः ङ-घञ् । युद्धशब्दे, शोकध्वनौ च
हि वर्द्धने गतौ च स्वा० पर सक० अनिट् हिनोति अहैषीत् ।
हि अव्य० हा-हि-वा डि । हेतौ, अवधारणे, विशेषे, प्रश्ने, सम्भ्रमे, हेत्वपदेशे, शोके, असूयायां, श्लोकपूरणे च ।

हिंसक पु० हिंस्-ण्वुल् । व्याघ्रादौ हिंस्रे पशौ, शत्रौ च हिंसाकारके त्रि० ।

हिंसा स्त्री० हिंस्-अ । वधे, घातने, चौर्य्यादिकर्म्मणि च ।

हिंस्र त्रि० हिंस्-र । हिंसाशीले, घोरे, भये, मांसे, काकादन्यां, जटामांस्यां, गवेधुकायां, शिवायाञ्च स्त्री० ।

हिक्क क्रू० ने भ्वा० उ० अ० सेट् । हिक्कति ते अहिक्कीत् अहिक्किष्ट ।

हिक्क हिंसायां चु० आ० सक० सेट् । हिक्कयते अजिहिक्कत ।

हिक्का स्त्री० हिक्क-अ । रोगभेदे (हेचकी) ।

हिङ्गु न० हिंसं गच्छति गम-डु नि० । (हिङ्) रामठदेशोद्भवे वृक्षे यस्य निर्य्यासो हिङ्गुद्रव्यम् । [हिङ्गौ ।

हिङ्गुनालिका स्त्री० हिङ्गुनो नालीव इवार्थे कन् ह्रस्वः । नाडी-

हिङ्गुनिर्य्यास पु० हिङ्गुन इव निर्य्यासोऽस्य । निम्बवृक्षे, वृत० हिङ्गुवृक्षनिर्य्यासे (हिङ्) ।

हिङ्गुपत्र पु० हिङ्गुन इव पत्रमस्य । वृक्षदीपत्रे । (हिङ्पत्र) वृक्षभेदे स्त्री० ङीप् ।

हिङ्गुपर्णी स्त्री० हिङ्गुन इव पर्णमस्याः ङीष् । वंशपत्र्याम् ।

हिङ्गुल पु० न० हिङ्गु तद्वर्णं लाति ला-क । रक्तवर्णे वर्णकद्रव्यभेदे, वार्ताक्यां, वृक्षत्याञ्च स्त्री० ङीप् ।

हिङ्गुलु पु० न० हिङ्गु तद्वर्णं लाति ला-डु । (हिङ्गुल) वर्णकद्रव्ये

हिङ्गुशिराटिका स्त्री० हिङ्गुन इव शिरां पत्रशिरामटति घट-ण्वुल् अत इत्त्वम् । वंशपत्र्याम् ।

हिञ्जल न० हिङ्गुल+पृ० । मधुरमूले । (आलु) ।

हिञ्जा पु० हिनोति हि-किप् तया सन् जायते जन-ड कर्म्म० । हिञ्जलवृक्षे । [(हिजल) ।

हिञ्जल पु० हि-किप् हिन् हितकारि जलं यस्य । वृक्षभेदे

हिड गतौ भ्वमणे भ्वा० आ० सक० सेट् इदित् । हिण्डते अहिण्डिष्ट ।

हिडिम्ब पु० राक्षसभेदे स हि भीमेन हतः तद्भगिन्यां स्त्री० ।

हिडिम्बजित् हिडिम्बं राक्षसभेदं जितवान् जि-क्विप् । भीमसेने हिडिम्बशत्रुप्रभृतयोऽत्र ।

हिडिम्बापति पु० ६त० । भीमसेने ।

हिण्डन न० हिडि-ल्युट् । भ्रमणे, रमणे, लेखने च ।

हिण्डि(ण्डी)र पु० हिडि-इरन् ईरन् वा । समुद्रफेने, वार्त्ताकौ, पुरुषे, दत्यके च ।

हित त्रि० धा-क्त हि-क्त वा । गते, पथ्ये, इष्टसाधने, मङ्गले च ।

हितकारिन् त्रि० हितं करोति कृ-णिनि । शुभकारके ।

हितैषिन् त्रि० हितमिच्छति इष-णिनि । हितेच्छाकारिणि ।

हितोपदेश पु० हितस्य इष्टसाधनस्य उपदेशः । हितार्थे उपदेशे, विष्णुशर्म्मकृते नीतिग्रन्थभेदे च ।

हिन्ताल पु० हीनस्तालो यस्मात् ब० । (हेताल) वृक्षे ।

हिन्दोल पु० हिस्रोल+वञ् पृ० । दोलने, आश्विनशुक्लपञ्चमिहितदोलनयन्त्रेण भगवतो दोलनरूपे उत्सवभेदे रागभेदे च ।

हिम न० हि-मक् । आकाशच्युतजलकणे, शीतलस्पर्शे, तद्वति त्रि० । खल्लैलायां, रेणुकायां, भद्रमुस्तायाम्, नागरमुस्तायां, पृक्कायाञ्च स्त्री० । अयनहायणपौषमासात्मके ऋतुभेदे, चन्दनवृक्षे, चन्द्रे, कर्पूरे, च पु० ।

हिमक पु० हिममिव कायति कै-क । विकङ्कतवृक्षे ।

हिमकर पु० हिमः करः किरणो यस्य हिमं करोति निर्देश्यात् कृ-अच् । चन्द्रे, कर्पूरे च हिमकिरणादयोऽत्र ।

हिमगिरि पु० हिममयो गिरिः हिमप्रधानो वा गिरिः । हिमालयपर्व्वते हिमपर्व्वतादयोऽत्र ।

हिमतैल पु० हिमवीर्य्यं तैलम् । कर्पूरजाते तैले ।

हिमदुग्धा स्त्री० हिमवीर्य्यकरं दुग्धमस्याः । क्षीरशुक्लायाम् ।

हिमदुर्दिन न० हिमहेतुकं दुर्दिनम् । हिमपातेव दुःखकरे दिने कज्झटिकायुक्तवृष्टिदिने ।

हिमद्रुम पु० हिमप्रधाने जायमानः द्रुमः । निम्बवृक्षे ।

हिमप्रस्थ पु० हिमः शीतलः प्रस्थो यस्य । हिमालयपर्व्वते ।

हिमवत् पु० हिमानि प्राचुर्य्येण अस्त्यत्र मतुप् मस्य वः । हिमालय-पर्व्वते ।

हिमवालुक पु० हिममयो वालुकेव अंशो यस्य । कर्पूरे ।

हिमसंहति स्त्री० ६त० । हिमसमूहे हिमेन जनयज्जाते (बरफ) पदार्थे च ।

हिमहासक पु० हिमं हसति शीतवीर्य्यत्वात् एवुल् । हिन्तालवृक्षे ।

हिमांशु पु० हिमाः अंशवोऽस्य । चन्द्रे, कर्पूरे च ।

हिमांशुभिख्य न० हिमांशोरिवाभिख्या शोभा यस्य । रौप्ये मस्य अतिशुभ्रत्वात्तथात्वम् ।

हिमागम पु० हिमस्यागमो यत्र । हेमन्ते अग्रहायणपौषमासात्मके ऋतौ । [गङ्गायाञ्च ।

हिमाद्रिजा स्त्री० हिमाद्रौ जायते जन–ड । गौरिकायां, पार्व्वत्यां,

हिमाद्रितनया स्त्री० ६त० । दुर्गायां हिमाद्रिसुतादयोऽप्यत्र ।

हिमानी स्त्री० हिमानां संहतिः हिम+ङीप् आनुक् च । हिम-समूहे 'आगता वत अरेव हिमानीत्यु ङ्गटः ।

हिमरोति पु० ६त० । सूर्य्ये, अर्कवृक्षे, वङ्गौ शिलाकवृक्षे च ।

हिमालय पु० हिमानामालयः । हिमवत्पर्व्वते हिमप्रधाने आलयो यस्य । शुक्लखदिरे, भूम्यामलक्याञ्च ।

हिमाह्व न० हिमकाले आयते जन–ड । उत्पले ।

हिमावती स्त्री० हिमं सेवने हिमवीर्य्यं विद्यतेऽस्य मतुप् मस्य वः संज्ञायां दीर्घः । स्वर्णजीव्यां ।

हिमाश्रया स्त्री० हिमं हिमवीर्य्यमाश्रयति आ+श्रि–अच् । स्वर्ण-जीवन्त्याम् । [द्राक्षायाम् ।

हिमोत्तरा स्त्री० हिमसुत्तरं यस्याः सेवने शीतवीर्य्यकरत्वात् कपिल-

हिमोद्भवा स्त्री० हिमप्रधानस्थाने उद्भवति उद्–भू–अच् । यवानी ।

हिरण्य न० हृ–क्यप् नि० । रेतसि, स्वर्णे, धतूरके च ।

हिरण्मय त्रि० हिरण्यात्मकम् मयट् नि०। हिरण्यात्मके स्त्रियां ङीप्। 'हिरण्मयी शालतेवेति' भट्टिः। नववर्षमध्ये वर्षभेदे न० आदित्यमण्डलस्थे परमब्रह्मणि 'य एष हिरण्मयः पुरुषो दृश्यते हिरण्यात्मः' इति छान्दोग्यम्।

हिरण्य न० हिरण्यमेव स्वार्थे यत्। सुवर्णे, धुस्तूरे, रेतसि, द्रव्ये, वराटके, क्षये, मानभेदे, अकृष्ये, रजते, धने च।

हिरण्यकशिपु पु० दैत्यविशेषे। स तु कश्यपात् दित्यां जातः।

हिरण्यकशिपुहन् पु० हन-क्विप् ६त०। विष्णौ।

हिरण्यकामधेनु स्त्री० विधानेन हिरण्यरचिता कामधेनुः। तुलादिषोडशमहादानमध्ये दानार्थं हिरण्येन कल्पितायाम् धेनौ, उपचारात् तद्दाने च।

हिरण्यगर्भ पु० हिरण्यं स्वर्णमयाण्डं गर्भ उत्पत्तिस्थानमस्य। चतुर्मुखे ब्रह्मणि तस्य हैमाण्डप्रभवत्वात्तथात्वम् 'तदण्डमभवद्हैमं सहस्रांशुसमप्रभम्। तस्मिन् यज्ञे स्वयं ब्रह्मा सर्व्वलोकपितामह इति' मनुः। तुलादिषोडशमहादानमध्ये दानार्थं स्वर्णादिना कल्पिते हिरण्यगर्भे, उपचारात्तद्दाने, शालग्राममूर्त्तिभेदे च।

हिरण्यवाह(क) हिरण्यं वाहयति प्रापयति भक्तान् हिरण्यवर्णो वाहरिव तरङ्गो वा यस्य। महादेवे, शोणे नदभेदे च।

हिरण्यरेतस् पु० हिरण्यं रेतो यस्य। वह्नौ, चित्रकवृक्षे च स्वर्णस्य वह्निरेतोभवत्वं भारतादावुक्तम्।

हिरण्याक्ष पु० कश्यपस्य पुत्रे दैत्यभेदे।

हिरण्याश्व पु० हिरण्येन निर्म्मितोऽश्वः। तुलादिषोडशमहादानमध्ये दानार्थं स्वर्णादिकल्पितेऽश्वे, तद्दाने च।

हिरण्याश्वरथ पु० हिरण्येन निर्म्मितः अश्वः तद्युक्तरथश्च। तुलादिषोडशमहादानमध्ये दानार्थंस्वर्णादिना कल्पिते सुवर्णमयाश्वयुक्तरथे, तद्दाने च।

हिरुक् अव्य० हि-उकिक् रुट् च। वर्ज्जने त्यागे।

हिल भावकरणे तु० प० अक० सेट्। हेलति अहेलीत्।

हिलमोचि(ची) स्त्री० हिल–क मुच–इनि कर्म० वा ङीप्। (हेले-ञ्चा) शाके स्वार्थे कन् तत्रैव। [हल्लोलत् त।

हिल्लोल दोलने अद० चु० उभ० सक० सेट्। हिल्लोलयति ते अजि-

हिल्लोल पु० हिल्लोल–अच्। तरङ्गे। घञ्। दोलने।

हिव प्रीणने स्वा० प० सक० सेट् इदित्। हिन्वति अहिन्वीत्।

हिवक्र न० हिव–उक्रच् नि०। ज्योतिषोक्ते लग्नाच्चतुर्थे स्थाने।

हिंस वधे वा चु० उ० पक्षे रुधा० प० सक० सेट् इदित्। हिनस्ति हिंसयति ते अजिहिंसीत् अजिहिंसत् त।

ही अव्य० हि–ङी। विस्मये, दुःखे, विषादे, शोके च। वीप्सायां द्वित्वम्। विषादात्यतिशये। [व्यवहारे प्रतिवादिभेद पु०।

हीन त्रि० प० हा–क्त तस्य नः ईत्वम्। जने, निन्द्ये, अधमे च।

हीनवादिन् पु० कर्म०। 'पूर्ववादं परित्यज्य योऽन्यमालम्बते पुनः। वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः' इति स्मृत्युक्ते व्यवहारे वादिभेदे।

हीनाङ्ग त्रि० हीनमङ्गं यस्य। स्वभावतो न्यूनाङ्गवति 'हीनाङ्गं विकलाङ्ग'चेति स्मृतिः। स्त्रियां वा ङीप् ङीवन्तः। चुडुपि-प्पल्याञ्च।

हीन्ताल पु० हीनस्तालो यस्मात् ब०। हिन्तालवृक्षे (हेताल)

हीर न० हृ–क नि०। वज्रे, हीरके च। शिवे, सर्पे, हारे, सिंहे च पु०। लक्ष्म्यां पिपीलिकायां काश्मीर्यांञ्च स्त्री०। स्वार्थे कन् (हीरा) मणिभेदे।

हीराङ्ग पु० हीरमिव दृढमङ्गमस्य। इन्द्रस्य वज्रे।

हीव न० ही विस्मयं लाति ला–क। रेतसि।

हु होमे, अदने च जु० प० सक० अनिट्। जुहोति अहौषीत्।

हुङ्कार पु० हुमित्यव्यक्तस्य कारः क वञ् उप०। हुमित्यव्यक्तस्य प्रति-षेधसूचकशब्दस्योच्चारणे। 'मौनव्रतं महाकष्टं हुङ्कारेणापि नश्यती'ति पुराणम्। [हुडति अहुडीत् जुहोड।

हुड राशीकरणे सक० मज्जने संघाते च अक० तु० क्र० प० सेट्।

हुड राशीकरणे भ्वा॰ आ॰ सक॰ सेट् इदित्। जुहुण्डते अजुहुण्डिष्ट।

हुड गतौ भ्वा॰ आ॰ सक॰ सेट् चडि॰ न ह्रस्वः। होडते अजूहुडिष्ट।

हुड पु॰ हुड-क। मेघे, चौरनिवारणार्थं भूमौ निखाते लौहकीलके च।

हुत त्रि॰ हु-क्त। देवोद्देशेन मन्त्रद्वाराऽग्नौ प्रक्षिप्ते हृतादौ भावे क्त। होमे न॰। [अग्नौ, चित्रकवृक्षे च।

हुतभुज् पु॰ हुतं मन्त्रेण प्रक्षिप्तं हृतादि भुङ्क्ते भुज-क्विप्।

हुतवह पु॰ हुतं हृतादिकं वहति प्रापयति देवान् प्रीत्यर्थम्। वह-अच्। अग्नौ, चित्रकवृक्षे च।

हुताश पु॰ हुतमश्नाति अश-अण्। वह्नौ, चित्रकवृक्षे च। ल्युट्। हुताशनोऽप्यत्र। स च कर्म्मविशेषविहितवह्नौ च।

हुति स्त्री॰ हु-क्तिन्। होमे। [हुङ्कृत्य तङ्कृत्येति' स्मृतिः।

हुम् अव्य॰ हु-डुमि। स्मरणे, प्रश्ने, अनुज्ञायां च निवारणे, 'गुरु'

हुर्च्छ कौटिल्ये भ्वा॰ प॰ सक॰ सेट्। हुर्च्छति अहुर्च्छीत्। ह्रस्वपाठबलात् जुर्च्छतीत्येवेत्यन्ये। [लीत्।

हुल हृतौ संवरणे च भ्वा॰ प॰ सक॰ सेट् ज्वला॰। होलति अहोलीत्।

हुलहुली स्त्री॰ हुल-क आभीक्ष्ण्ये द्वित्वम् ङीप्। स्त्रीणां मङ्गलध्वनिभेदे (उलुउलु)।

हुहु(ह्व) ह्वे-डु नि॰। गन्धर्वभेदे पु॰ ह्वह्वरित्यप्यत्र।

हूङ्कार पु॰ हूम् + क-घञ्। अवज्ञाहेतुके शब्दभेदे 'हूङ्कारेणैव तं भस्म सा चकारान्विका ततः' इति चण्डी।

हूड गतौ भ्वा॰ आ॰ सक॰ सेट् चडि॰ न ह्रस्वः। हूडते अहूडिष्ट।

हूत त्रि॰ ह्वे-क्त संप्रसारणम्। आहूते लताह्वाने।

हूति स्त्री॰ ह्वे-क्तिन् संप्रसारणम्। आह्वाने।

हूण पु॰ ह्वे-नक् संप्रसारणम् च। म्लेच्छजातिभेदे, तद्वासस्थानदेशभेदे च 'हूणवल्लभसेव्येव नान्यदेशे कदाचने'ति ज्योतिषम्। तत्र प्रचलितं स्वर्णमुद्राभेदे स्त्रियाम्। [अवज्ञायाञ्च।

हूम अव्य॰ हु-डूम्। प्रश्न, वितर्के, सम्मतौ, क्रोधे, भये, निन्द्यायाम्

हूर्च्छन न॰ हुर्च्छ-ल्युट्। कौटिल्ये।

हृ हरणे भ्वा० उभ० द्विक० अनिट्। हरति ते अहार्षीत् अहृत।
हृ बलात्कारहरणे जु० पर० सक० अनिट् वैदिकः। जहर्त्ति अहार्षीत्।
हृच्छय पु० हृदि शेते शी–अच्। कामदेवे। हृदयशायिनि त्रि०।
हृच्छूल न० ६त०। शूलरोगभेदे। [वीरवतीति' भट्टिः।
हृणी कण्ड्वा० आत्म० अक० सेट्। हृणीयते अहृणीयत 'हृणीयते
हृणीया स्त्री० हृणीय–अ। निन्दायाम्।
हृत्कम्प पु० ६त० भयादिहेतुके हृदयकम्पे।
हृत त्रि० हृ–क्त। अपहृते, स्थानान्तरं गमिते च।
हृत् त्रि० हृ–क्विप् तुक् च। हारिणि। पृ० तस्य दः, हृदयस्य हृदा-
देशो वा। हृदये मानसे च न०।
हृदय न० हृ कयन् दुक् च। 'मनसि, वक्षसि च। हृत् एति इण–
अच्। परब्रह्मणि 'हृद्यं तस्माद्धृदयमिति' श्रुतिः।
हृदयग्रन्थि पु० हृदयस्य ग्रन्थिः। अविद्यासम्बन्धरूपे संसारबन्धे
'भिद्यते हृदयग्रन्थिरि'ति भागवतम्।
हृदयङ्गम न० हृदयं गच्छति गम–ख सुम् च। युक्तियुक्ते वाक्ये।
मनोहरे त्रि० 'हृदयङ्गममूर्त्तिस्त्वमि'ति भट्टिः। [वक्षःस्थले।
हृदयस्थान न० हृदयस्य मनसः स्थानम् हृदयरूपं वा स्थानम्।
हृदयिक त्रि० हृदयं प्रशस्तमनोऽस्यास्य ठन्। प्रशस्तचित्ते। इनि
तत्रैव।
हृदयेश पु० ६त०। भर्त्तरि। [रोमसंघे।
हृदावर्त्त पु० हृदिस्थ आवर्त्तः। अश्वस्य हृदयस्थे आवर्त्तकारे
हृदिका स्त्री० द्रोणशालकस्य कृपाचार्यस्य मातरि।
हृदिकासुत पु० ६त०। द्रोणशालके कृपाचार्ये।
हृदिस्पृश् त्रि० हृदि हृदये स्पृश्यतेऽसौ कर्मणि क्विप् अनुक् स०।
हृद्ये मनोज्ञे। कर्त्तरि क्विप्। मर्मस्पृशि, दुःखदे च।
हृन्नील पु० पर्व्वतभेदे।
हृद्य न० हृदि स्पृश्यते मनोऽत्वात् हृद्+यत्। गुडत्वचि (दारचिनि
मनोज्ञे त्रि० हृद्विनामौषधौ स्त्री०।

हृद्यगन्ध न० हृद्यो गन्धोऽस्य । चुद्रजीरके, बिल्ववृक्षे पु० । जात्यां स्त्री० । ङीप् समा० । हृद्यगन्धीत्यपि चुद्रजीरके न० ।

हृद्रोग पु० ६त० हृदयस्य रोगभेदे, कामे च ।

हृद्रोगवैरिन् पु० ६त० । अर्जुनवृक्षे ।

हृद्वण्टक पु० ६त० । हृदयस्य विभाजके, जठरे ।

हृल्लास पु० हृदयस्य लासो यत्र हृदादेशः । हिक्कारोगे तेन हि हृदयस्य स्फूर्त्तिरिव भवति ।

हृल्लेख पु० हृदयं लिखति स्पृशति लिख—अ हृदादेशः । घ्राणे, तर्के, तन्त्रोक्ते—मन्त्रभेदे च । औत्सुक्ये स्त्री० ।

हृष चित्तोत्साहे भ्वा० पर० अक० सेट् । हर्षति अहर्षीत् ।

हृष हर्षे चित्तोत्साहे, दि० प० अ० सेट् । हृष्यति अहृषत् अहर्षीत्

हृष मिथ्याकरणे भ्वा० पर० सक० सेट् क्वाचित् । हर्षति अहर्षीत् ।

हृषित त्रि० हृष—क्त । प्रीते, विस्मिते, प्रहृते, प्रणते, वर्मिते, जातरोमाञ्चे च ।

हृषीक न० हृष—ईकक् । विषयग्राहके—चक्षुरादौ—इन्द्रिये ।

हृषीकेश पु० ६त० । विष्णौ 'अन्तर्यामिब्राह्मणे तस्य सर्व्वनियन्तृत्वोक्तेः सर्व्वेन्द्रियप्रवर्त्तकत्वादीशत्वम् । [च ।

हृष्ट त्रि० हृष—क्त । प्रीते, जातहर्षे, जातरोमाञ्चे, विस्मिते, प्रतिहृते

हृष्टमानस त्रि० हृष्टं प्रीतं मानसमस्य । हृष्टचित्ते । [किते ।

हृष्टरोमन् त्रि० हृष्टमिव जाताङ्कुरं रोम यस्य । जातरोमाञ्चे, पुल-

हर्ष्टि स्त्री० हृष—क्त । आनन्दे, हर्षे, घ्राणे च ।

हे अव्य० हा—डे । सम्बोधने, आह्वाने, अरुचादौ च ।

हेठ विघाते भ्वा० प० सक० सेट् । हेठति अहेठीत् । [अहेठीत् ।

हेठ भूतौ उत्पत्तौ च अक० पवित्रीकरणे सक० तु० प० सेट् । हेठति

हेठ बाधने भ्वा० आ० सक० सेट् चङि न ह्रस्वः । हेठते अहेठिष्ट ।

हेठ पु० हेठ—घञ् । बाधायाम्, विघाते च ।

हेड अनादरे भ्वा० आ० सक० सेट् चङि न ह्रस्वः । हेडते अहेडिष्ट ।

हेड वेष्टने भ्वा० प० सक० सेट् घटा० । हेडति अहेडीत् ।

हेति स्त्री० हन्–करणे क्तिन् नि०। अस्त्रे, अग्निशिखायां, सूर्य-किरणे, तेजोमात्रे, साधने च।

हेतु पु० हि–तुन्। कारणे, अनुमितिसाधने–व्याप्ये, फले च।

हेतुता स्त्री० हेतोर्भावः तल्। हेतुत्वे, कार्य्याव्यवहितपूर्व्वक्षणे नियतकार्य्याधिकरणवृत्तित्वरूपे कारणत्वे, वृत्तिविशेषे च 'हेतु-तावच्छरस्तथेति' प्राहुः।

हेतुमत् त्रि० हेतुरस्त्यस्य मतुप्। कार्य्ये। स्त्रियां ङीप्।

हेत्वाभास पु० हेतुरिव अभासते आ+भास–अच् हेतोर्वा आभासः आ+भास–घञ्। दुष्टे हेतौ, हेतुदोषे च। स च दोषः पञ्चविधः व्यभिचारः, विरुद्धता, असिद्धिः, सत्प्रतिपक्षता, बाधश्च। तादृग्-दोषेषु सत्सु अनुमितिर्नोदेति एतल्लक्षणोदाहरणादिकं वाचस्पत्ये।

हेम न० हि–मन्। स्वर्णे, धुस्तूरे, माषकपरिमाणे च। क्षणदायां, बुधे च पु०।

हेमकन्दल पु० हेमवर्णं कन्दं लाति ला–क। प्रवाले।

हेमकान्ति स्त्री० हेम्न इव कान्तिरस्याः। दारुहरिद्रायाम् स्वर्णतुल्य-द्युतियुक्ते त्रि० हृत०। स्वर्णस्य दीप्तौ स्त्री०।

हेमकार पु० हेम तत्क्रयं भूषणं करोति कृ–कर्म्मण्। स्वर्णकारे। वर्ण-सङ्करभेदे। (सेकरा)

हेमकिञ्जल्क न० हेमेव पीतं किञ्जल्कं दलस्य। नागकेसरे।

हेमकूट पु० हेममयः कूटो यस्य। किंपुरुषवर्षस्थे पर्व्वतभेदे।

हेमकेतकी स्त्री० हेममयी केतकी। स्वर्णकेतक्याम्।

हेमक्षीरी स्त्री० हेम इव पीतं क्षीरं दलस्याः। स्वर्णक्षीर्य्याम्।

हेमगन्धिनी स्त्री० हेम्नः नागकेसरस्येव गन्धोऽस्त्यस्याः इनि ङीप्। रेणुकाख्ये गन्धद्रव्ये।

हेमगौर पु० हेमेव गौरः पीतः। अशोकवृक्षे, स्वर्णतुल्यपीते त्रि०।

हेमतार न० हेमं तारयति उत्कृष्टं करोति तृ–णिच्–कर्म्मण्। तुत्थे

हेमदुग्धक पु० हेमवर्णं दुग्धं निर्य्यासोऽस्य कप्। उडुम्बरे। स्वर्ण-क्षीर्य्यां स्त्री० वा ङीपि अत इत्त्वम्।

हेमदुग्धिन् पु० हेमवर्णं दुग्धं निर्यासोऽस्य इनि । उदुम्बरे ।
हेमन् न० हि—मनिन् । सुवर्णे—धातौ, धूलूरे, नागकेशरे, हिमे च ।
हेमन्त पु० न० । हि—झ सुट् च । अग्रहायणपौषमासात्मके ऋतौ ।
हेमन्तनाथ पु० हेमन्ते नाथ्यते याच्यते नाथ-कर्मणि बञ् । कपित्थे ।
हेमपुष्प न० हेमवर्णं पुष्पमस्य । अशोकवृक्षे । चम्पकवृक्षे पु० स्वार्थे कन् । तत्र, लोध्रे च ।
हेमपुष्पी स्त्री० हेमवर्णं पुष्पमस्याः ङीप् । मक्षिकायाम्, सुवर्णजीवन्त्याम्, दन्त्यां वृक्षभेदे, सुवल्याम्, वाराहीकायाञ्च । संज्ञायां० कन् ह्रस्वः । सुवर्णयूथिकायाम् स्त्री० ।
हेमफला स्त्री० हेमवर्णं फलमस्याः । सुवर्णकदल्याम् (चांपाकला)
हेममालिन् पु० हेमेव किरणानां मालास्त्यस्य इनि । सूर्ये ।
हेमयूथिका स्त्री० हेमवर्णा यूथिका । सुवर्णयूथिकायाम् ।
हेमरागिणी स्त्री० हेम्न इव रागोऽस्त्यस्या इनि ङीप् । हरिद्रायाम्
हेमलता स्त्री० हेमवर्णा लता । सुवर्णजीवन्त्याम् ।
हेमशिखा स्त्री० हेमवर्णा शिखा यस्याः । सुवर्णजीव्यांम् ।
हेमसार न० हेम सारयति निर्मलीकरोति सृ—अच् । तुत्थे ।
हेमहस्तिरथ पु० हेमनिर्म्मितहस्तियुक्तो रथः । तुलापुरुषादिषोड़श-महादानमध्ये दानार्थं कल्पिते सुवर्णमयहस्तियुक्ते रथे, तद्दाने च ।
हेमाङ्ग पु० हेमेव पीतमङ्गं यस्य । गरुड़े, सिंहे, सुमेरौ, ब्रह्मणि, चम्पकवृक्षे, विष्णौ च । सुवर्णवर्णाङ्गयुक्ते त्रि० हेमतुल्येऽङ्गे न० ।
हेमाद्रि पु० हेममयोऽद्रिः । सुमेरौ पर्व्वते । [मयोऽद्रौ त्रि० ।
हेमाद्रिजरण पु० हेमाद्रौ जीर्य्यति जॄ—ल्यु । सुवर्णजीव्यांम् । हेमहेय त्रि० हा—यत् । त्याज्ये ।
हेर न० हि—रन् । हरिद्रायाम्, सुकुटभेदे च ।
हेरम्ब पु० हे शिवे रम्बति रबि—अच् अलुक् समा० । गणेशे ।
हेरम्बजननी स्त्री० ६त० । दुर्गायाम् । [चिकायाम् ।
हेलञ्जा स्त्री० हिल—बञ् हेलं चिनोति चि—ड टाप् पृ० । हिञ्जी-
हेलन न० हिल—ल्युट् । अवज्ञायाम् ।

हेला स्त्री॰ हेड—अनादरे भावे अ टाप् वा। स्त्रीणां भ्रूकारभावज्ञे 'प्रौढेच्छा याऽतिरूढानां नारीणां सुरतोत्सवे। भ्रूकारभावज्ञतया हेला सा परिकीर्त्तिते'त्यु॰ नायिकाचेष्टाविशेषे।

हेलि पु॰ हिल—इन्। सूर्य्ये, अर्कवृक्षे च। णिनि। हेलीत्यप्यत्र।

हेष अव्यक्ते शब्दे भ्वा॰ आ॰ अ॰ सेट् चक्रि॰ न दृश्यः। हेषते अहेषिष्ट।

हेषा स्त्री॰ हेष—अ। घोटकानां शब्दे।

हेहै अव्य॰ हेच हेच इ॰। सम्बोधने।

हैं अव्य॰ हा-कै। सम्बोधने, आह्वाने च।

हैतुक त्रि॰ हेतौ प्रहृतः ठण्। हेतुवादरते, सयुक्तिकवाक्यवादिनि 'त्रैविद्यो हैतुकस्तर्की निरुक्तो धर्म्मपाठक' इति स्मृ॰।

हैम त्रि॰ हिमे भवम् अण्। हिमजातमात्रे भूनिम्बे पु॰ हेम्नो विकारः अण् टिलोपः। सुवर्णविकारे सुवर्णमयपदार्थे।

हैमन पु॰ हेमन्त एव हेमन्ते भवो वा अण् तलोपः। हेमन्ते काले। तत्र जाते त्रि॰।

हैमवत न॰ हिमवतोऽदूरभवो देशः मनुष्यं वा अण्। भारतवर्षभेदे हिमालयसम्बन्धिनि त्रि॰ विषभेदे पु॰ तस्यापत्यं तत्र भवो वा अण्। पार्व्वत्यां, हरीतक्यां, सुवर्णक्षीर्य्यां श्वेतवचायाञ्च स्त्री॰ ङीप्।

हैमा(मी) स्त्री॰ हैमं तद्वर्णोऽस्त्रस्य अण् वा ङीप्। सुवर्णयूथिकायाम्

हैयङ्गवीन ह्योगोदोहादुभवम् ह्यस्+गो+ख नि॰। नवनीते, पूर्व्वदिनदुग्धोद्भवे सद्योजाते घृते च।

हैहय पु॰ देशविशेषे। तेषां राजा अण्। हैहयेश्वरे कार्त्तवीर्य्ये।

हो अव्य॰ हे—डो नि॰। सम्बोधने। [अहोडिष्ट।

होड गतौ अनादरे च भ्वा॰ आ॰ सक॰ सेट् चक्रि॰ न दृश्यः। होडते

होड पु॰ होड—अच्। कुड—अच् वा। वस्तुद्वगामिनौकाभेदे (कुछि) चौरचिह्ने च।

होत्र पु॰ हु—ष्ट्रन्। अग्नेदाभिख्ये। होतृकर्त्तरि त्रि॰ स्त्रियां ङीप्। 'या हविर्या च होत्री'ति शकुन्तला।

होत्र न॰ हु—ष्ट्रन्। होमे, हविषि, हुतादौ च। स्तुतौ स्त्री॰ टाप्।

होमिन् पु० होमः होमोऽस्यास्ति इनि । होमकर्त्तरि ।

होतीय न० होत्राय हितम् होतुरिदं वा छ । ऋत्विग्देहे । होत्र-धर्म्मन्नि त्रि० ।

होम पु० हु-मन् । देवतोद्देशेन यज्ञौ हुतादिद्रव्यत्यागरूपे कर्म्मणि नित्य नैमित्तिकस्यावश्यकर्त्तव्येषु पञ्चसु यज्ञेषु मध्ये देवयज्ञे, आग्नेयविप्रपात्रौ आग्नेयाज्यभागस्य मन्त्रेण दाने च ।

होमकुण्ड न० होमार्थं कुण्डम् । होमार्थे कुण्डे ।

होमधान्य न० होमोपयुक्तं धान्यम् । तिले, यवे च ।

होमधूम पु० होमजः धूमः । होमार्थाग्निजाते धूमे ।

होमभक्षन् न० होमजं भक्षं । हुतद्रव्यजाते भक्षणे ।

होमिन् पु० होमोऽस्यास्ति इनि । होमकर्त्तरि ।

होम्य त्रि० होमाय हितम् यत् । होमोपयुक्ते हुतादौ ।

होरा स्त्री० हु-रन् । ज्योतिषोक्ते लग्ने, राश्यर्द्धभागे, होराशास्त्रोक्त-शास्त्रभेदे, रेखायाञ्च ।

होलका स्त्री० हु-विच् लकति लक-अच् कर्म्म० । 'अर्द्धपक्वे शमी-धान्यैस्तृणभ्रष्टैश्च होलका' इत्युक्ते तृणार्द्धना अर्द्धपक्वे शमी-धान्ये । [ब्येति, कल्पद्रुतरिति' दायभागः ।

होलाका स्त्री० हु-विच् लक-वञ्। यज्ञीयोल्मवभेदे, 'होलाका कर्त्त-

हौ अव्य० हे ही नि० । सम्बोधने, आह्वाने च । [अहौषीत् ।

हौड अनादरे गतौ च भ्वा० या० सक० सेट् चक्रि न ह्रस्वः । हौडते

ह्रु चौर्य्ये अदा० आत्म० सक० अनिट् । ह्रुते अह्रोष्ट ।

ह्वल चलने भ्वा० प० अक० सेट् घटा० । ह्वलति अह्वालीत् । ह्वाल-यति अनुपसर्गस्य वा ह्रस्वः ।

ह्वस् अव्य० गतेऽर्थे नि० । गतदिवसे ।

ह्वस्तन त्रि० ह्वस्+भवार्थे ट्युल् तुट् च । गतदिवसभवे त्यप् । ह्वस्योऽद्यत्व त्रि० । [अह्वगीत् ।

ह्वृ संवरणे भ्वा० पर० सक० सेट् घटा० सिचि न ह्रस्वः । ह्वारितः

ह्रद पु० ह्राद-अच् नि० । अगाधजलाशये ।

क्रदिनी स्त्री० ह्रदे ऽस्त्यस्याम् इनि । नद्याम् ।
क्रप भाषणे चु० उ० सक० सेट् । ह्रापयति ते अजिह्रपत् त ।
क्रम रवे भा० प० सक० सेट् । ह्रसति अह्रसीत् अह्रसीत् ।
क्रसिष्ठ त्रि० अतिशयेन ह्रस्वः इष्ठन् ह्रसादेशः । अतिह्रस्वे ।
क्रसिमन् पु० ह्रस्वस्य भावः इमनिच् ह्रसादेशः । ह्रस्वतायाम् ।
क्रसीयस् त्रि० अतिशयेन ह्रस्वः ईयसु ह्रसादेशः । अतिह्रस्वे ।
स्त्रियां ङीप् ।
क्रस्व न० ह्रस-वन् । परिमाणभेदे तद्वति । सर्व्वे च त्रि० एकमात्रा-
कालोच्चार्य्ये लघुवर्णे पु० ।
क्रस्वकुश पु० कर्म्म० । श्वेतकुशे ह्रस्वदर्भियोऽप्यत्र ।
क्रस्वगर्भ पु० ह्रस्वो गर्भो यस्य । कुशे ।
क्रस्वगवेधुका स्त्री० कर्म्म० । नागबलायाम् ।
क्रस्वजम्बू स्त्री० कर्म्म० । क्षुद्रजम्बूवृक्षे ।
क्रस्वदा स्त्री० ह्रस्वैरपि दीयते क्रियते दो-क । शक्तिक्याम् ।
क्रस्वपत्रक पु० ह्रस्वं पत्रमस्य कप् । नगजमधूके (मौल) अश्वत्थ्याम्
स्त्री० टाप् अत इत्त्वम् ।
क्रस्वफला स्त्री० ह्रस्वं फलमस्याः । भूमिजम्बूवृक्षे ।
क्रस्वमूल पु० ह्रस्वं मूलमस्य । रक्तेक्षौ ।
क्रस्वाग्नि पु० ह्रस्वः अग्निरस्मात् ५ब० । अजीर्णवृक्षे ।
क्रस्वाङ्ग पु० ह्रस्वमङ्गमस्मात् ५ब० । जीरकौषधे ह्रस्व० । वामने, खर्व्वे
त्रि० । कर्म्म० । ह्रस्वे अङ्गे न० ।
क्राद सने भा० का० अक० सेट् । क्रादते अक्रादिष्ट ।
क्राद पु० क्रद-घञ् । शब्दे । अच् । किरातकक्षिपुत्रभेदे पु० ।
शब्दकारके त्रि० । [क्याञ्च । क्रादविशिष्टे त्रि० ।
क्रादिनी स्त्री० क्राद इनि ङीप् । विद्युति, वज्रे, नद्याम्, यक्ष-
क्राम पु० क्रम घञ् । शब्दे, अपचये च ।
क्रिणी लज्जायाम् क्रयादा० आ० अ० सेट् । क्रिणीयते अक्रिणीयिष्ट ।

ह्रिणीया स्त्री० ह्रिणी-यक् अ । लज्जायाम् ।

ह्री लज्जायाम् जु० प० अक० अनिट् । जिह्रेति अह्रैषीत् ।

ह्री स्त्री० ह्री-क्विप् । लज्जायाम् ।

ह्रीच्छ लज्जायाम् भा० प० अक० सेट् । ह्रीच्छति अह्रीच्छीत् ।

ह्रीजित त्रि० इत० । लज्जाशीले ।

ह्रीण(त)ण त्रि० ह्री-क्त वा तस्य नः । लज्जिते । [(वाक्ता) शुपभेदे

ह्रीवेर(ल) न० ह्रिये लज्जायै वेरमङ्गमस्य ह्रस्वत्वात् पृ० या रस्य ल

ह्रुड गतौ भा० आ० सक० सेट् चडि न ह्रस्वः । ह्रोडते अह्रोडिष्ट ।

ह्रूड गतौ भा० आ० सक० सेट् चडि न ह्रस्वः । ह्रूडते अह्रूडिष्ट ।

ह्रेप गतौ भ्वा० आ० स० सेट् चडि न ह्रस्वः । ह्रेपते अह्रेपिष्ट ।

ह्रेष वर्णे भ्वा० आ० सक० सेट् चडि न ह्रस्वः । ह्रेषते अह्रेषिष्ट ।

ह्रेषा स्त्री० ह्रेष-अ । अश्वशब्दभेदे ।

ह्रौड गतौ भ्वा० आ० स० सेट् चडि न ह्रस्वः । ह्रौडते अह्रौडिष्ट ।

ह्लग संवरणे भ्वा० प० सक० सेट् घटा० सिचि न वृद्धिः । ह्लगति अह्लगीत् ।

ह्लप भाषणे चु० उ० द्विक० सेट् । ह्लापयति ते अजिह्लपत् त ।

ह्लस रवे भ्वा० प० अ० सेट् । ह्लसति अह्लसीत् अह्लासीत् ।

ह्लाद शब्दे भ्वा० आत्म० अक० मोदने सक० सेट् निष्ठायामनिट् । ह्लादते अह्लादिष्ट ।

ह्लाद पु० ह्लद घञ् । आह्लादे, आनन्दे, सन्तोषे ।

ह्लादिनी स्त्री० ह्लाद-णिनि ङीप् । विद्युति, वज्रे, ऐश्वर्यशक्तिभेदे च । ह्लादविशिष्टे त्रि० ।

ह्लल चलने भ्वा० प० अक० सेट् घटा० । ह्ललति अह्लालीत् । प्रह्ललयति अनुपसर्गस्य वा ह्रस्वः ह्ललयति ह्लालयति ।

ह्लान न० ह्ले-ल्युट् । आह्लाने ।

ह्ल कुटिलीकरणे भ्वा० प० सक० अनिट् । ह्लरति अह्लार्षीत् ।

ह्ले सर्वार्थे शब्दे च अक० आह्वानार्थे सक० भ्वा० उभ० वलां० अनिट् । ह्लायति अह्लत्–अह्लत । अह्लाल ।

ये शब्दाम्बुधिपारमापुरमलप्रज्ञातरी वैभवात् ।
तानुद्दिश्य नमस्क्रियैव सततं शेभ्यो न चेषा क्रिया ।
ये शास्त्रेऽजनबुद्धयो निजधिया व्युत्पित्सवो मानवा
नानाकोषनिरीक्षणे श्रमभियस्तेभ्यो मयैषा क्रिया ॥

यद्रत्नमयः कोषो मोषद्वेषमयोज्झितः ।
नानार्थोऽव्ययरूपाढ्यो बहुधातुर्जयत्यसौ ॥
पदानुशासने रतं सुनिलयं सुदानतम् ।
अस्य भूमिमण्डले करोतु सुप्रचारणम् ॥

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्यसङ्कलितः शब्दस्तोममहानिधिः समाप्तः ।

ओं तत्सत् ।